# VEDIC CONCORDANCE OF MANTRAS AS PER ṚṢI AND DEVATĀ

# (वैदिक-ऋषि-देवतानुसारी मन्त्रानुक्रमकोषः)

(द्वितीयो भागः)

Vol. 2

(ब्रह्मा से हैमवर्चिः तक)

By

Prof. Ravi Prakash Arya

Shri Ram Narain Arya

Amazon Books, USA

in association with

Indian Foundation for Vedic Science

H.O.1051, Sector-1, Rohtak, Haryana, India 01२6२-२9२580
Mobile: 09313033917; 09650183260
Email : vedicscience@rediffmail.com
vedicscience@gmail.com
web : www.vedicscience.net

Third Revised and Updated Edition
Kali era : 5127 (c. 2025)
Kalpa era : 1,97,29,49,127
Brahma era : 15,50,21,97,9,49,127

Price of Complete set of 2 Vols.: Rs. 5000.00

ISBN 978-93-94724-58-7
978-93-94724-28-0 (Complete set of 2 Vols.)

© Author

All rights are reserved. No part of this work may be reproduced or copied in any form or by any means without written permission from the author



To my beloved father, Late Ram Narain Arya
A Vedic scholar par excellence and Rainmaker.
Colloborator, guide and a great source of inspiration behind this endevour

# Introduction

Indian Foundation for Vedic Science was established with the sole objective of preserving the ancient Vedic heritage and culture by way of promoting scientific researches into Vedic philology, exegesis, and sciences. Now this work has been undertaken by Vedic Science Virtual Vishva Vidyapeeth, USA (VSVV).

The aims and objectives of the IFVS and VSVVare as under:

1. To preserve the ancient Vedic heritage and culture of India.

2. To unravel the mysteries of the Vedas and the Allied literature.

3. To promote and promulgate the rational and scientific outlook of Vedic seers and scholiasts of ancient India.

4. To conduct research into various aspects of Vedic learning and to seek its relevance to modern living.

5. To function as a nodal international agency for information about the current status of Vedic research, Vedic research scholars, and institutions and a liaison agency.

6. To be a competent body of scholars who can authoritatively proclaim decisions and evaluate research in the field of Vedic philology, Vedic exegesis, and Vedic sciences.

7. To bring together the Vedic scholars who evinced a great deal of interest for the promotion of Vedic studies on scientific lines and modern scientists or scholars interested in Vedic scientific vision to co-ordinate for the synthesis of modern scientific knowledge with the Vedic one so that it may diffuse following the Vedic vision for upkeep, advancement, safety, and development of mankind and not for ecological crisis, destruction, and extinction of mankind.

8. To disseminate the knowledge, information, and training scope for advanced research of direct and interdisciplinary nature for all those who are desirous of learning and contributing in the field of Vedic exegesis, Vedic philology, and Vedic sciences.

9. To construct a computer library and to prepare a computer concordance by computerizing the entire bulk of Vedic literature.

10. To undertake the publication of research work done from time to time by the scholars under the auspices of the foundation.

11. To promote such a vision (as discovered by the seers of this land in the times of yore) as could bring about social reforms leading to harmony, friendship, fraternity, and common culture to the present-day troubled world of mankind and help in the cause of national and international peace, thus suggesting the modern science for more and more active role for the upkeep and safety of living organisms and the planet.

In tune with the aims and objectives of the foundation, it was thought that a proper apparatus be produced first to facilitate the in-depth scientific studies and commentaries on the Vedas, since the presently available translations and commentaries on the Vedas and allied literature, leaving a few cases, are not able to present the actual and factual significance of this oldest literature of the world. Most of the translations are based on prejudices and preconceived notions of the translators, and so are misleading and far-fetched ones. The position is known to everyone. We need not elaborate upon this fact. In the absence of factual

interpretation of the Vedas, no factual data can be collected, and in the absence of the factual data, nobody, however reputed or eminent he may be in his field of studies, is able to do justice with the ancient most world of humanity or, say, Vedic life and thought. Under the circumstances, it becomes the paramount duty of an institute like the Indian Foundation For Vedic Science not only to preserve the ancient most intellectual and scientific heritage of the globe but also (1) to present it in the most modern terms and try to seek the relevance of this ancient most scientific treasure of the globe in the context of the modern scientific advancement and the modern living. (2) To see whether and to what extent Vedic scientific vision can contribute for the furtherance of modern science or, say, to seek the possibility of updating the modern scientific advancement with the help of Vedic scientific vision. (3) To find out the possible areas of collaboration between Vedic scientific vision and modern science. (4) To find the equivalence between Vedic scientific vision and modern science. (5) To present the state of the art of different disciplines in the Vedas and allied literature in terms of documentation, sources, and past and present experiments, etc. To pursue the work along the above-cited facts and to define the Vedic age and culture in the right perspective, it is imminent to have accurate interpretations of the Vedas and allied literature. Since the Vedas can best be interpreted with the help of the Vedas only, as the famous convention is, 'Vedas are homomensura or svataḥ pramāṇa.' On the other hand, to interpret the Vedas with the help of Vedas, it is highly essential to have the deep-rooted knowledge and understanding of the cultural and scientific background of the Vedic period. When we look out for such an apparatus as could help us best to interpret Vedas with the help of Vedas, we come across threefold apparatus designed to facilitate and deepen the study of the Vedas . First one among these is the Universal Word Index to the Vedas published in 16 vols. by Vishvabandhu et al. from VVRI Hoshiarpur, Punjab under the title 'Vedic Word Concordance' or वैदिक-पदानुक्रमकोषः Second is the Vedic Index of Names and Subjects by Macdonell. Third one is an index of each and every Mantra-pada to the Vedas consisting of the Published Vedic literature available by the time of its publication in 1966, published by Bloomfield under the title 'A Vedic Concordance'. On careful examination, it was found that only these threefold concordances available in the market are, though sufficient to facilitate the deep study of the Vedas, not enough to help pluck out the actual estimate of the Vedas. To interpret the Vedas with the help of Vedas, it is highly essential to have the deep-rooted knowledge and understanding of the cultural and scientific background of the Vedic period, which is only possible through the knowledge of the actual intention of the Vedic seers and the deities or the subject matter dealt with by them. A full detail of the Mantras compiled under a particular devate-head revealed to a particular seer in various Saṁhtās would also facilitate readers and researchers of the Vedas to make out the actual intention of the seer behind his revelation or visualization of various laws of nature known as various deities. Keeping in view the desideratum of such an apparatus as could help facilitate the readers and researchers make out the actual intention of the seers behind the visualization of various laws of nature at physical, astrophysical, and metaphysical levels, the foundation comes forward with the four-fold apparatus. Firstly named as 'A Vedic Concordance of Ṛṣis and Devatās' or वैदिक-ऋषि-देवतानुक्रम-कोषः- Secondly with 'A concordance of Vedic Mantras as per Ṛṣis and Devatās वैदिक-ऋषि-देवतानुसारी मन्त्रानुक्रम-कोषः- Thirdly, 'A Vedic Concordance of Devatās and Ṛṣis' or 'वैदिक-देवता ऋष्यानुक्रम-कोषः- Fourthly, 'A Concordance of Vedic Mantras as per Devatās and Ṛṣis or वैदिक-देवता-ऋष्यनुसारी मन्त्रानुक्रम-कोषः. Fifthly, it was also decided to produce Bloomfield's Vedic Concordance in Devanāgarī script in an updated, revised, and improved manner by including citations from the works not available by the time of publication of this work during his period so that Vedic researchers can find in the updated Devanāgarī version .

It is a matter of great pleasure and pride that after completing the first three tasks of producing a

Concordance of Vedic Ṛṣis and Devatās' or वैदिक-ऋषि-देवतानुक्रम-कोषः.

A Concordance of Vedic Mantras as per Ṛṣis and Devatās' or ' वैदिक-ऋषि-देवतानुसारी मन्त्रानुक्रम-कोषः'।

'A Vedic Concordance of Devatās and Ṛṣis' or 'वैदिक-देवता ऋष्यानुक्रम-कोषः'।

We are coming out with the fourth most important work, i.e. 'A Concordance of Vedic Mantras as per Ṛṣis and Devatās' or वैदिक-ऋषि-देवतानुसारी मन्त्रानुक्रम-कोषः running into two vols. With the publication of this work, a long-felt need of an apparatus useful to comprehend the actual intention of the visionaries of the Vedas has been fulfilled. It is fervently hoped that this work will be welcomed by the entire community of Vedic scholars and researchers.

The foundation is also coming out soon with the fifth monumental work, i.e. 'A Vedic Concordance' or "वैदिक-मन्त्रपादानुक्रमकोषः", an updated and revised Devanāgarī version of Bloomfield's Vedic concordance running into 1916 pages. The work is ready for publication.

## Introductory to the Present Concordance

In preparing the present Concordance, the following works have been used :

1. Ṛgveda Saṁhitā : Edited by Dr. Ravi Prakash Arya, Delhi, 1997.
2. Ṛgveda Saṁhitā (Mantras only) : Vaidika Yantralaya, Ajmer.
3. Yajurveda Saṁhitā ( Mantras only) : Vaidika Yantralaya, Ajmer.
4. Sāmaveda : Edited by Dr. Ravi Prakash, Delhi, 1996.
5. Sāmaveda : Edited by Sātavalekara [ Svādhyāya Maṇḍala] Paradi, 1985.
6. Sāmaveda : By R.T.H. Griffith, Delhi, 1978.
7. Sāmavedārṣeyadīpa of Bhaṭṭa Bhāskarādhvbarīndra: Edited by Ramachandra Sharma, Tirupati. 1957.
8. Atharvaveda : Vaidika Yantrālaya, Ajmer.
9. Ṛksarvānukramaṇī of Sāyaṇa.

This work has been prepared by compiling various Devatās of the four Vedas. Under a particular Devatā head, the names of the various Ṛṣis along with the Mantra @ or Mantras revealed to them on the particular subject Devatā were also compiled. The names of Devatās and Ṛṣis have been arranged alphabetically. While compiling the names of various Devatās and Ṛṣis of particular Mantra @ or Mantrās, the author came across the variant readings regarding the names of Devatās and their Ṛṣis in the various works cited above. All those variant readings have been cited in the concordance with reference to the works that contain those readings. For instance,

१. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १०.१२६.१-८

अंहोमुग् वामदेव्यः ; साग्री., सास्वा., सार्षेदी.) कुल्मल वर्हिषः शैलूषि अंहोमुग् वा वामदेव्यः ; ऋसर्व.

In the above cited entry Ṛgvedic mantrās of tenth Maṇḍala andŚ२6th sūkta have been recorded in various additions to have been revealed to varying seers. Sāyaṇabhāṣya of Ṣāmaveda] Ṣāmaveda by Sātavalekara and Sāmvedārṣeyadīpa of Bhaṭṭa Bhāskarādhvarindra register अंहोमुग् वामदेव्यः as the seer] where as Ṛksarvānukramaṇī of Śaunaka registers कुल्मल वर्हिषः शैलूषि अंहोमुग् वा वामदेव्यः as the seer. These variant readings have been shown in the above cited entry quoting the original works] in their abbreviated form] containing these readings.

# Significance of the present work

Vedas represent the knowledge of the creation of the universe acquired first ever by humanity on the globe. The knowledge of creation came into being as soon as the creation got materialized. Vedic seers were the masters of vision. They visualized this knowledge and the laws of nature, creation, and de-creation beyond time and space in their Samādhi. They encoded all those secret laws revealed to them in the form of Mantras. Since those laws of nature, creation, and de-creation were visualized and encoded in the form of Mantras by the Vedic scholars, they were known as the seers or Ṛṣis of that or those particular Mantras or Mantras which revealed to them. The secret laws of nature that were encoded by way of the Mantras came to be known as the deities or the Devatās. Thus, the knowledge of the Vedas lies in the knowledge of the seers and the deities. We find that a particular phenomenon or deity was visualized and encoded in the form of Mantras by more than one seer. Consequent upon which, all the four Saṅhitās recorded various seers on a particular devatā, and various devatās visualized by one particular seer. Under the circumstances, it would be interesting to conduct a comparative and critical study of the nature and types of the various laws or deities of the nature visualized by various seers from their various subjective angles. This comparative analysis would provide a clear-cut picture as to what extent the various seers have differed or agreed in their visualization of a particular phenomenon. This study would also provide a great help in deducing the actual intention of the original seer while interpreting the Vedic texts. In addition, the comparative picture of the various seers and deities would also help solve the various riddles impregnating the actual names of the seers, their surnames, and the deities visualized by them.

To enable the readers and the researchers to carry out such comparative studies regarding the seers and their respective visualizations, this concordance has been prepared. This concordance is a ready reference to all the deities and the seers who worked on them, along with the mantras revealed to seers in the beginning of creation deity-wise as compiled in the four major Saṁhitās of the Vedas. This concordance has listed 951 Devatās underlying great laws of the spiritual, astronomical, and physical nature visualized by various high-spirited Ṛṣis in the beginning of the origin of the human civilization on this globe. The most distinctive characteristic of this edition of concordance is its inclusion of names of Devatās, Ṛṣis, and Mantras in both Devanāgrī and Roman scripts. This accessibility enables users proficient in both scripts to utilize the concordance effectively.

**Prof. Ravi Prakash Arya**

**Fr. UGC Chair professor, MD University, Haryana, India**

**President: Vedic Science Virtual Vishva Vidyapeeth, USA**

Email : vedicscience@gmail.com

web : www.vedicscience.net

# ABBREVIATIONS

Following abbreviations have been used in this volume:

ऋ. [Rv.] *Ṛgveda*

सा. [Sv.] *Sāmaveda*

अ. [Av.] *Atharvaveda*

य. [Yv.] *Yajurveda of Vājasaneyī Saṁhitā*

सार्षेदी. [Sad.] *Sāmavedārṣeyadīpa of Bhaṭṭ Bhāskarādhvarindra*

सास्वा. [Sas.] *Sāmaveda of Svādhyāya Maṇḍala Pāraḍī edited by Sātavalekara*

साग्री. [Ssb.] Sāmaveda Sāyaṇa Bhāṣya or Sāmaveda edition of Griffith

ऋसर्व. [Rss.] *Ṛksarvānukramaṇī of Śaunaka*

अजमेर [Ajmer] *Ṛgveda edition of Vaidika Yantralaya Ajmer.*

# Contents


४४४. ब्रह्मा (Brahmā) ........ 1

४४५. ब्रह्मातिथिः काण्वः (Brahmātithiḥ Kāṇvaḥ) ........ 66

४४६. ब्रह्मातिथि काण्वः (सास्वा. साग्री.); ब्रह्मातिथिः (सार्षेदी.) (Brahmātithi Kāṇvaḥ [Sas. Ssb.]; Brahmātithiḥ [Sad.]) ........ 68

४४७. ब्रह्मास्कन्दः (Brahmāskandaḥ) ........ 68

४४८. भगः (Bhagaḥ) ........ 70

४४९. भरद्वाजः (Bharadvājaḥ) ........ 70

४५०. भरद्वाजो बार्हस्पत्यः (Bharadvājo Bārhaspatyaḥ) ........ 75

४५१. भरद्वाजो बार्हस्पत्यः वीतहव्य आंगिरसो वा (Bharadvājo Bārhaspatyaḥ Vītahavya Āṁgiraso Vā) ........ 117

४५२. भरद्वाज (सार्षेदी.); भारद्वाजः (सार्षेदी.सास्वा.) (Bharadvāja [Sad.]; Bhāradvājaḥ [Sad.Sas.]) . 119

४५३. भरद्वाजो बार्हस्पत्यः (साग्री. सास्वा.); शंयुबार्हस्पत्यः (ऋसर्व. ६.४६.७.; ७.४.९; ६.४६.३); भारद्वाजः (सार्षेदी.) (Bharadvājo Bārhaspatyaḥ [Ssb. Sas.]; Śaṁyubārhaspatyaḥ [Rss. 6.46.7.; 7.4.9; 6.46.3]; Bhāradvājaḥ [Sad.]) ........ 119

४५४. भरद्वाजः शिरम्बिठः (Bharadvājaḥ Śirambiṭhaḥ) ........ 120

४५५. भर्गः (Bhargaḥ) ........ 120

४५६. भर्गः प्रागाथः (Bhargaḥ Prāgāthaḥ) ........ 120

४५७. भर्गः प्रागाथः (साग्री. सास्वा.); शंयुः (सार्षेदी.) (Bhargaḥ Prāgāthaḥ [Ssb. Sas.]; Śaṁyuḥ [Sad.]) ........ 125

४५८. भागलिः (Bhāgaliḥ) ........ 126

४५९. भारतौ-देवश्रवदेववातौ - द्र. देवश्रव-देववातौ भारतौ (Bhāratau-Devaśravadevavātau - Dr. Devaśrava-Devavātau Bhāratau) ........ 126

४६०. भरद्वाजः (Bharadvājaḥ) ........ 126

४६१. भार्गवः (Bhārgavaḥ) ........ 129

४६२. भावयव्यः कक्षिवान्-(ऋ. १.१२६.१-५); रोमशा ब्रह्मवादिनी (ऋ. १.१२६.७) (Bhāvayavyaḥ Kakṣivān [Rv. 1.126.1-5]; Romaśā Brahmavādinī [Rv. 1.126.7]) ........ 129

४६३. भिक्षुः (Bhikṣuḥ) ........ 129

४६४. भिषग् (Bhiṣag) ........ 130

४६५. भिषग् आथर्वणः (Bhiṣag Ātharvaṇaḥ) ........ 131

४६६. भुवनः (Bhuvanaḥ) ........ 133

४६७. भुवन आप्त्यः साधनो वा भौवनः (Bhuvana Āptyaḥ Sādhano Vā Bhauvanaḥ) ........ 133

४६८. भुवनपुत्रो विश्वकर्मा (Bhuvanaputro Viśvakarmā)........................................................134
४६९. भुवनः साधनो वा (Bhuvanaḥ Sādhano Vā) ..........................................................................135
४७०. भूतांशः काश्यपः (Bhūtāṁśaḥ Kāśyapaḥ) ............................................................................135
४७१. भृगुः (Bhṛguḥ) .....................................................................................................................136
४७२. भृगुः (आयुष्कामः) (Bhṛguḥ (Āyuṣkāmaḥ)) ............................................................................152
४७३. भृगुर्वारुणिर् जमदग्निर् भार्गवो वा (Bhṛgṛrvāruṇir Jamadagnir Bhārgavo Vā)....................154
४७४. भृगुर्वारुणिः जमदग्निर्भार्गवो वा (Bhṛgurvāruṇiḥ Jamadagnirbhārgavo Vā) ......................155
४७५. भृग्वङ्गिरा (Bhṛgvaṅgirā)......................................................................................................156
४७६. भृगुर् आथर्वणः (Bhṛgur Ātharvaṇaḥ)...................................................................................173
४७७. मत्स्यः सांमदो मान्यो वा मैत्रावरुणिर्बाहवो वा मत्स्या जालनद्धाः (Matsyaḥ Sāṁmado Mānyo Vā maitrāvaruṇirbāhavo Vā Matsyā Jālanaddhāḥ) ...................................................173
४७८. मथितो यामायनो भृगुर् वा वारुणिः च्यवनो वा भार्गवः (Mathito Yāmāyano Bhṛgur Vā Vāruṇiḥ Chyavano Vā Bhārgavaḥ) ............................................................................................174
४७९. मधुच्छन्दाः (Madhuchchhandāḥ).........................................................................................174
४८०. मधुच्छन्दा वैश्वामित्रः (Madhuchchhandā Vaiśvāmitraḥ)......................................................182
४८१. मधुच्छन्दा सुतजेता (Madhuchchhandā Sutajetā)................................................................ 191
४८२. मनुः (Manuḥ)........................................................................................................................192
४८३. मनुर् आप्स्वः (Manur Āpsvaḥ)...............................................................................................192
४८४. मनुस् तापसः (Manus Tāpasaḥ) .............................................................................................192
४८५. मनुर्वैवस्वतः (Manurvaivasvataḥ) ..........................................................................................193
४८६. मनुः सांवरणः (Manuḥ Sāṁvaraṇaḥ) .....................................................................................197
४८७. मन्युर् वासिष्ठः (Manyur Vāsiṣṭhaḥ)........................................................................................197
४८८. मन्युर् वासिष्ठः (साग्री. सास्वा.); इन्दुर् वासिष्ठः (सार्षेदी.) (Manyur Vāsiṣṭhaḥ [Ssb. Sas.]; Indur Vāsiṣṭhaḥ [Sad.])................................................................................................................198
४८९. मय आत्रेयः (Maya Ātreyaḥ) .................................................................................................198
४९०. मयोभूः (Mayobhūḥ) ..............................................................................................................199
४९१. मरीचिः काश्यपः (Marīchiḥ Kāśyapaḥ) .................................................................................. 204
४९२. महीयवः (Mahīyavaḥ) ........................................................................................................... 204
४९३. मातरिश्वा काण्वः (Mātariśvā Kāṇvaḥ) ................................................................................... 205
४९४. मातृनामा (Mātṛnāmā) ........................................................................................................... 205
४९५. मान्धाता यौवनाश्वः (Māndhātā Yauvanāśvaḥ)........................................................................ 208
४९६. मान्धाता यौवनाश्वः (पूर्वार्द्ध); गोधा ऋषिका (उत्तरार्द्ध) (Māndhātā Yauvanāśvaḥ [Pūrvārddha]; Godhā Ṛṣikā [Uttarārddha])........................................................................................... 209

४९७. मान्धाता यौवनाश्वः (ऋसर्व. १०.१३४.१); मेधातिथिः काण्वः (साग्री. सास्वा.); मरुतो यौवनाश्वः (सार्षेदी.) (Māndhātā Yauvanāśvaḥ [Rss. 10.134.1]; Medhātithiḥ Kāṇvaḥ [Ssb. Sas.]; Maruto Yauvanāśvaḥ [Sad.]) ........ 210

४९८. मुद्गलः (Mudgalaḥ) ........ 210

४९९. मुद्गलो भार्म्यश्वः (Mudgalo Bhārmyaśvaḥ) ........ 210

५००. मुनयो वातरशनाः (Munayo Vātaraśanāḥ) ........ 211

५०१. मूर्धन्वान् आंगिरसो वामदेव्यो वा (Mūrdhanvān son of Aṁgiras or of Vāmadeva) ........ 211

५०२. मृगः (Mṛgaḥ) ........ 213

५०३. मृगारः (Mṛgāraḥ) ........ 213

५०४. मृळीको वासिष्ठः (Mṛḻīko Vāsiṣṭhaḥ) ........ 217

५०५. मेधः (Medhaḥ) ........ 218

५०६. मेधाकामः (Medhākāmaḥ) ........ 218

५०७. मेधातिथिः (Medhātithiḥ) ........ 218

५०८. मेधातिथिः काण्वः (Medhātithiḥ Kāṇvaḥ) ........ 223

५०९. मेधातिथिः काण्वः (साग्री. सास्वा.); शंयुर् बार्हस्पत्यः (ऋसर्व. ८.४५.२५); भरद्वाजः (सार्षेदी.) (Medhātithiḥ Kāṇvaḥ [Ssb. Sas.]; Śaṁyur Bārhaspatyaḥ [Rss. 8.45.25]; Bharadvājaḥ [Sad.]) ........ 236

५१०. मेधातिथिः काण्वः प्रियमेधश्च आंगिरसः (Medhātithiḥ Kāṇvaḥ Priyamedhaścha Āṁgirasaḥ) ........ 236

५११. मेधातिथि-मेध्यातिथी काण्वौ (Medhātithi-Medhyātithī Kāṇvau) ........ 238

५१२. मेधातिथि-मेध्यातिथी काण्वौ (ऋसर्व.); मेधातिथि-मेध्यातिथी काण्वौ; विश्वामित्र इत्येके (साग्री. सास्वा. सार्षेदी.) (Medhātithi-Medhyātithī Kāṇvau [Rss.]; Medhātithi-Medhyātithī Kāṇvau; Viśvāmitra Ityeke [Ssb. Sas. Sad.]) ........ 242

५१३. मेध्यः काण्वः (Medhyaḥ Kāṇvaḥ) ........ 242

५१४. मेध्यः काण्वः (साग्री. सास्वा. ऋसर्व.); बालखिल्याः (सार्षेदी.) (Medhyaḥ Kāṇvaḥ [Ssb. Sas. Rss.]; Bālakhilyāḥ [Sad.]) ........ 243

५१५. मेध्यातिथिः (Medhyātithiḥ) ........ 243

५१६. मेध्यातिथिः काण्वः (Medhyātithiḥ Kāṇvaḥ) ........ 247

५१७. मेध्यातिथिः काण्वः (ऋसर्व. ८.३.७; ८.३३.१; ८.३.१७ सार्षेदी.); मेधातिथिः काण्वः (साग्री. सास्वा.) (Medhyātithiḥ Kāṇvaḥ [Rss. 8.3.7; 8.33.1; 8.3.17 Sad.]; Medhātithiḥ Kāṇvaḥ [Ssb. Sas.]) ........ 251

५१८. मेध्यातिथिः काण्वः (ऋसर्व. ८.३३.७; ८.३३.१०); मेधातिथिः काण्वः (साग्री. सास्वा. सार्षेदी.) (Medhyātithiḥ Kāṇvaḥ [Rss. 8.33.7; 8.33.10]; Medhātithiḥ Kāṇvaḥ [Ssb. Sas. Sad.]) ........ 251

५१९. मेध्यातिथिः काण्वः (ऋसर्व. ८.३.५; य. ८.३.३); मेधातिथिर् मेध्यातिथिर् वा काण्वः (साग्री. सास्वा.);

मेधातिथिः (सार्षेदी.) (Medhyātithiḥ Kāṇvaḥ [Rss. 8.3.5; YV. 8.3.3]; Medhātithir Medhyātithir Vā Kāṇvaḥ [Ssb. Sas.]; Medhātithiḥ [Sad.]) ............................ 252
५२०. मेध्यातिथिर् वा काण्वः (ऋसर्व. ८.३.१५ सार्षेदी.); मेधातिथिर् मेध्यातिथिर् वा काण्वः (साग्री. सास्वा.) (Medhyātithir Vā Kāṇvaḥ [Rss. 8.3.15 Sad.]; Medhātithir Medhyātithir Vā Kāṇvaḥ [Ssb. Sas.]) ............................ 252
५२१. यक्ष्मनाशनः प्राजापत्यः (Yakṣamanāśanaḥ Prājāpatyaḥ) ............................ 252
५२२. यजत आत्रेयः (Yajata Ātreyaḥ) ............................ 253
५२३. यज्ञपुरुषः (Yajñapuruṣaḥ) ............................ 253
५२४. यज्ञः प्राजापत्यः (Yajñaḥ Prājāpatyaḥ) ............................ 253
५२५. याज्ञवल्क्यः (Yājñavalkyaḥ) ............................ 254
५२६. यमः (Yamaḥ) ............................ 254
५२७. यमी (Yamī) ............................ 268
५२८. ययातिः (Yayātiḥ) ............................ 269
५२९. ययातिर् नाहुषः (Yayātir Nāhuṣaḥ) ............................ 269
५३०. रक्षोहाः (Rakṣohāḥ) ............................ 269
५३१. रक्षोहा ब्राह्मः (Rakṣohā Brāhmaḥ) ............................ 270
५३२. रहूगणः (Rahūgaṇaḥ) ............................ 270
५३३. रहूगण आंगिरसः (Rahūgaṇa Āṁgirasaḥ) ............................ 271
५३४. रम्याक्षी (Ramyākṣī) ............................ 271
५३५. रातहव्य आत्रेयः (Rātahavya Ātreyaḥ) ............................ 272
५३६. रेणुः (Reṇuḥ) ............................ 272
५३७. रेणुर् वैश्वामित्रः (Reṇur Vaiśvāmitraḥ) ............................ 274
५३८. रेभः (Rebhaḥ) ............................ 275
५३९. रेभः काश्यपः (Rebhaḥ Kāśyapaḥ) ............................ 275
५४०. रेभसूनू काश्यपौ (Rebhasūnū Kāśyapau) ............................ 277
५४१. रोमशा ब्रह्मवादिनी (Romaśā Brahmavādinī) ............................ 279
५४२. लब ऐन्द्रः (Laba Aindraḥ) ............................ 279
५४३. लुशः (Luśaḥ) ............................ 280
५४४. लुशो धानाकः (Luśo Dhānākaḥ) ............................ 280
५४५. लोपामुद्रा (Lopāmudrā) ............................ 282
५४६. लोपामुद्रा-अगस्त्यौ (सास्वा.); रति (अजमेर) (Lopāmudrā-Agastyau [Sas.]; Rati [Ajmer]) .. 283
५४७. लौगाक्षिः (Laugākṣiḥ) ............................ 283

५४८. वत्सः (Vatsaḥ) ............ 284
५४९. वत्स आग्नेयः (Vatsa Āgneyaḥ) ............ 286
५५०. वत्सः काण्वः (Vatsaḥ Kāṇvaḥ) ............ 286
५५१. वत्सप्रिः (Vatsapriḥ) ............ 290
५५२. वत्सप्रिर् भालन्दनः (Vatsaprir Bhālandanaḥ) ............ 294
५५३. वत्सप्रिर् भालन्दनः (साग्री. सास्वा. ऋसर्व.); वत्स (सार्षेदी. ७४); वत्सप्रिय (सार्षेदी. ७७) (Vatsaprir Bhālandanaḥ [Ssb. Sas. Rss.]; Vatsa [Sad. 74]; Vatsapriya [Sad. 77]) ............ 294
५५४. वत्सारः (Vatsāraḥ) ............ 295
५५५. वत्सारः काश्यपः (Vatsāraḥ Kāśyapaḥ) ............ 295
५५६. वम्रो वैखानसः (Vamro Vaikhānasaḥ) ............ 297
५५७. वरुणः (Varuṇaḥ) ............ 298
५५८. वव्रिर् आत्रेयः (Vavrir Ātreyaḥ) ............ 301
५५९. वशोऽश्व्यः (Vaśo'śvyaḥ) ............ 301
५६०. वशः अश्व्यः (ऋसर्व. ८.४६.१०; ८.४६.१; ८.४६.४; ८.४६.१४); वत्सः काण्वः (साग्री. सास्वा.); वंशः (सार्षेदी.) (Vaśaḥ Aśvyaḥ [Rss. 8.46.10; 8.46.1; 8.46.4; 8.46.14]; Vatsaḥ Kāṇvaḥ [Ssb. Sas.]; Vaṁśaḥ [Sad.]) ............ 304
५६१. वसिष्ठः (Vasiṣṭhaḥ) ............ 304
५६२. वासिष्ठः अथर्वा वा (Vāsiṣṭhaḥ Atharvā Vā) ............ 381
५६३. वसिष्ठः कुमारो वा आग्नेयः (Vasiṣṭhaḥ Kumāro Vā Āgneyaḥ) ............ 381
५६४. वसिष्ठपुत्राः (Vasiṣṭhaputrāḥ) ............ 382
५६५. वासिष्ठो मैत्रावरुणिः (Vāsiṣṭho Maitrāvaruṇiḥ) ............ 383
५६६. वासिष्ठो मैत्रावैरुणिः (साग्री. सास्वा.); वामदेव (सार्षेदी.) (Vāsiṣṭho Maitrāvairuṇiḥ [Ssb. Sas.]; Vāmadeva [Sad.]) ............ 391
५६७. वसिष्ठः शक्तिर्वा (Vasiṣṭhaḥ Śaktirvā) ............ 392
५६८. वासुर् भरद्वाजः (Vāsur Bharadvājaḥ) ............ 392
५६९. वसुकर्णो वासुक्रः (Vasukarṇo Vāsukraḥ) ............ 392
५७०. वसुक्रः (Vasukraḥ) ............ 395
५७१. वसुक्र ऐन्द्रः (Vasukra Aindraḥ) ............ 396
५७२. वसुमना रौहिदश्वः (Vasumanā Rauhidaśvaḥ) ............ 398
५७३. वसुर् भारद्वाजः (Vasur Bhāradvājaḥ) ............ 398
५७४. वसुयुः (Vasuyuḥ) ............ 400
५७५. वसुश्रुत आत्रेयः (Vasuśruta Ātreyaḥ) ............ 400
५७६. वसूयव आत्रेयः (Vasūyava Ātreyaḥ) ............ 404

५७७. वागाम्भृणी (Vāgāmbhṛṇī) .......... 405

५७८. वातजूतिः (Vātajūtiḥ) .......... 406

५७९. वामदेवः (Vāmadevaḥ) .......... 406

५८०. वामदेवो गौतमः (Vāmadevo Gautamaḥ) .......... 413

५८१. वामदेवो गौतमः (साग्री. सास्वा.); वामदेवः विश्वामित्र इत्येके (सार्षेदी.) (Vāmadevo Gautamaḥ [Ssb. Sas.]; Vāmadevaḥ Viśvāmitra Ityeke [Sad.]) .......... 457

५८२. वामदेवो गौतमः (साग्री. सास्वा. सार्षेदी.); यमो वैवस्वती (ऋसर्व. १०.१०.१) (Vāmadevo Gautamaḥ [Ssb. Sas. Sad.]; Yamo Vaivasvatī [Rss. 10.10.1]) .......... 458

५८३. वामदेवः गौतमः (साग्री. सार्षेदी.); यमोवैवस्वतः (ऋसर्व.) (Vāmadevaḥ Gautamaḥ [Ssb. Sad.]; Yamovaivasvataḥ [Rss.]) .......... 458

५८४. वामदेवो गौतमः (साग्री. सास्वा. ऋसर्व. ४.१०.१); अग्निः (सार्षेदी.) (Vāmadevo Gautamaḥ [Ssb. Sas. Rss. 4.10.1]; Agniḥ [Sad.]) .......... 459

५८५. वामदेवो गौतमः (साग्री. सास्वा.); इन्द्राणी (सार्षेदी.) (Vāmadevo Gautamaḥ [Ssb. Sas.]; Indrāṇī [Sad.]) .......... 459

५८६. वामदेवः (सा.अजमेर); ऋण त्रसदस्य (सास्वा.) (Vāmadevaḥ [Sv. Ajmer]; Ṛṇa Trasadasya [Sas.]) .......... 460

५८७. वामदेवः काश्यपः असितो देवलो वा (साग्री.); वामदेवः (सार्षेदी.) (Vāmadevaḥ Kāśyapaḥ Asito Devalo Vā [Ssb.]; Vāmadevaḥ [Sad.]) .......... 460

५८८. वामदेवः कश्यपो वा मारीचो मनुर् वा वैवस्वतः उभौ वा (साग्री. सास्वा.); वामदेवः (सार्षेदी.) (Vāmadevaḥ Kaśyapo Vā Mārīcho Manur Vā Vaivasvataḥ Ubhau Vā [Ssb. Sas.]; Vāmadevaḥ [Sad.]) .......... 460

५८९. वामदेवो गौतमः शाकपूतो वा (साग्री. सास्वा.); वामदेवो गौतमः (सार्षेदी.) (Vāmadevo Gautamaḥ Śākapūto Vā [Ssb. Sas.]; Vāmadevo Gautamaḥ [Sad.]) .......... 460

५९०. वारुणिः (Vāruṇiḥ) .......... 460

५९१. वारुणः सत्यधृतिः - द्र. सत्यधृतिर् वारुणिः (Vāruṇaḥ Satyadhṛtiḥ - See Satyadhṛtir Vāruṇiḥ) .......... 460

५९२. विदर्भिः (Vidarbhiḥ) .......... 460

५९३. विधृतिः (Vidhṛtiḥ) .......... 462

५९४. विप्रजूतिः (Viprajūtiḥ) .......... 463

५९५. विप्रबन्धुः (Viprabandhuḥ) .......... 463

५९६. विभ्राट् (Vibhrāṭ) .......... 463

५९७. विभ्राट् सौर्यः (Vibhrāṭ Sauryaḥ) .......... 463

५९८. विमद ऐन्द्रः वसुकृद्वा वासुक्रः (साग्री. सास्वा.); विमद ऐन्द्रः वसुकृद्वा वसुक्रो वा प्राजापत्यः (ऋसर्व.); वसुकृदृषि विमदो वा (सार्षेदी.) (Vimada Aindraḥ Vasukṛdvā Vāsukraḥ [Ssb. Sas.]; Vimada Aindraḥ Vasukṛdvā Vasukro Vā Prājāpatyaḥ [Rss.]; Vasukṛdṛṣi Vimado vā [Sad.])

............................................................................................ 464
५९९. विमद ऐन्द्रः (साग्री. सास्वा.); प्राजापत्यो वा वसुकृद्वा वासुक्र (ऋसर्व. १०.२१.१; १०.२५.१); गोतमः (सार्षेदी.) (Vimada Aindraḥ [Ssb. Sas.]; Prājāpatyo Vā Vasukṛdvā Vāsukra [Rss. 10.21.1; 10.25.1]; Gotamaḥ [Sad.]) .......... 469
६००. विरुपः (Virupaḥ) .......... 469
६०१. विरुप आंगिरसः (Virupa Āṁgirasaḥ) .......... 475
६०३. विरुपाक्षः (Virupākṣaḥ) .......... 479
६०४. विवस्वान (Vivasvāna) .......... 479
६०५. विवस्वान्आदित्यः (Vivasvānādityaḥ) .......... 479
६०६. विवृहा काश्यपः (Vivṛhā Kāśyapaḥ) .......... 480
६०७. विश्वकर्मा (Viśvakarmā) .......... 480
६०८. विश्वकर्मा भौवनः (Viśvakarmā Bhauvanaḥ) .......... 481
६०९. विश्वमनाः (Viśvamanāḥ) .......... 483
६१०. विश्वमना वैयश्वः (Viśvamanā Vaiyaśvaḥ) .......... 484
६११. विश्वमना वैयश्व व्यश्वो वा आंगिरसः (Viśvamanā Vaiyaśva Vyaśvo Vā Āṁgirasaḥ) .......... 489
६१२. विश्वसामा आत्रेयः (Viśvasāmā Ātreyaḥ) .......... 490
६१३. विश्वरुपः (Viśvarupaḥ) .......... 490
६१४. विश्ववाराः (Viśvavārāḥ) .......... 491
६१५. विश्ववारा आत्रेयी (Viśvavārā Ātreyī) .......... 491
६१६. विश्वामित्रः (Viśvāmitraḥ) .......... 491
६१७. विश्वामित्रो गाथिनः (Viśvāmitro Gāthinaḥ) .......... 502
६१८. विश्वामित्रो गाथिनः अभिपाद उदलो वा (Viśvāmitro Gāthinaḥ Abhipāda Udalo Vā) .......... 537
६१९. विश्वामित्रो गाथिनः कुशिको ऐषीरथी वा (Viśvāmitro Gāthinaḥ Kuśiko Aiṣīrathī Vā) .......... 537
६२०. विश्वामित्रो जमदग्नी (Viśvāmitro Jamadagnī) .......... 539
६२१. विश्वामित्रो गाथिनो जमदग्नि र्वा (Viśvāmitro Gāthino Jamadagni Rvā) .......... 540
६२२. विश्वामित्रो गाथिनः (साग्री.सास्वा.); तिरश्ची (सार्षेदी.) (Viśvāmitro Gāthinaḥ [Ssb.Sas.]; Tiraśchī [Sad.]) .......... 540
६२३. विश्वामित्रः प्रागाथः (Viśvāmitraḥ Prāgāthaḥ) .......... 540
६२४. विश्वावसुर् देवगन्धर्वः (Viśvāvasur Devagandharvaḥ) .......... 540
६२५. विश्वावसुः (Viśvāvasuḥ) .......... 541
६२६. विश्वेदेवाः (Viśvedevāḥ) .......... 542
६२७. विहव्यः (Vihavyaḥ) .......... 545

६२८. वीतहव्यः (केशवर्धन कामः) (Vītahavyaḥ [Keśavardhana Kāmaḥ]) ............................ 547

६२९. वृशो जारः (Vṛśo Jāraḥ) ........................................................................ 547

६३०. वृषगणो वासिष्ठः (Vṛṣagaṇo Vāsiṣṭhaḥ) ...................................................... 547

६३१. वृषाकपिर् इन्द्राणी च (Vṛṣākapir Indrāṇī Cha) ............................................ 548

६३२. वृषाकपिर् ऐन्द्र इन्द्राणीन्द्रश्च (Vṛṣākapir Aindra Indrāṇīndraścha) ............................... 550

६३३. वृषागिरो महाराजस्य पुत्रभूता वार्षागिरा - ऋज्राश्व-अम्बरीष-सहदेव भयमान सुराधसः (Vṛṣāgiro Mahārājasya Putrabhūtā Vārṣāgirā - Ṛjrāśva-Ambarīṣa-Sahadeva Bhayamāna Surādhasaḥ) ........................................................................ 552

६३४. वृषाणकः (Vṛṣāṇakaḥ) ........................................................................ 553

६३५. वृहदुक्थो वामदेव्यः (Vṛhaduktho Vāmadevyaḥ) ............................................ 553

६३६. वृहन्मतिः (Vṛhanmatiḥ) ........................................................................ 555

६३७. वृहच्छुक्रः (Vṛhachchhukraḥ) ................................................................ 555

६३८. वृहद्दिवोऽथर्वा (Vṛhaddivo'tharvā) ........................................................ 555

६३९. वृहस्पतिः (Vṛhaspatiḥ) ........................................................................ 558

६४०. वेनः (Venaḥ) ................................................................................ 559

६४१. वेनो भार्गवः (Veno Bhārgavaḥ) .............................................................. 561

६४२. वैखानसः (Vaikhānasaḥ) ...................................................................... 563

६४३. वेदर्भिः भार्गवः (Vedarbhiḥ Bhārgavaḥ) .................................................. 564

६४४. वैश्वामित्रो मधुच्छन्दा - द्र. मधुच्छन्दा वैश्वामित्रः (Vaiśvāmitro Madhuchchhandā - See Madhuchchhandā Vaiśvāmitraḥ) ................................................................ 566

६४५. व्याघ्रपाद् वासिष्ठः (Vyāghrapād Vāsiṣṭhaḥ) .............................................. 566

६४६. शकपूतो नार्मेधः (Śakapūto Nārmedhaḥ) .................................................. 566

६४७. शक्तिः (Śaktiḥ) .............................................................................. 567

६४८. शक्तिर्वासिष्ठः (Śaktirvāsiṣṭhaḥ) .............................................................. 567

६४९. शची पौलौमी (Śachī Paulaumī) .............................................................. 568

६५०. शतप्रभेदेनो वैरुपः (Śataprabhedeno Vairupaḥ) ............................................ 568

६५१. शतं वैखानसः (Śataṁ Vaikhānasaḥ) ........................................................ 569

६५२. शन्तातिः (Śantātiḥ) .......................................................................... 571

६५३. शबरः काक्षीवतः (Śabaraḥ Kākṣīvataḥ) .................................................... 577

६५४. शम्भूः (Śambhūḥ) ............................................................................ 577

६५५. शशकर्णः (Śaśakarṇaḥ) ...................................................................... 578

६५६. शशकर्णः काण्वः (Śaśakarṇaḥ Kāṇvaḥ) ...................................................... 579

६५७. शश्वती अङ्गीरसस्य पत्नी (Śaśvatī Aṅgīrasasya Patnī) ........ 581
६५८. शाकल्य (Śākalya) ........ 581
६५९. शार्ङ्गाः (Śārṅgāḥ) ........ 581
६६०. शार्याती मानवः (Śāryāto Mānavaḥ) ........ 582
६६१. शाषः शासः (Śāṣaḥ Śāsaḥ) ........ 583
६६२. शासो भारद्वाजः (Śāso Bhāradvājaḥ) ........ 584
६६३. शिरिम्बिठिः (Śirimbiṭhiḥ) ........ 584
६६४. शिरिम्बिठो भारद्वाजः (Śirimbiṭho Bhāradvājaḥ) ........ 584
६६५. शिवसंकल्पः (Śivasaṁkalpaḥ) ........ 584
६६६. शिविर् औशीनरः (Śivir Auśīnaraḥ) ........ 585
६६७. शिशुः (Śiśuḥ) ........ 585
६६८. शुक्रः (Śukraḥ) ........ 585
६६९. शुनः शेपः (Śunaḥ Śepaḥ) ........ 592
६७०. शुनःशेप आजीगर्तिः (Śunaḥśepa Ājīgartiḥ) ........ 595
६७१. शुनःशेप आजीगर्तिः (देवरातः कृत्रिमो वैश्वामित्रः - साग्री. सास्वा.); शुनःशेप (ऋसर्व.) (Śunaḥśepa Ājīgartiḥ [Devarātaḥ Kṛtrimo Vaiśvāmitraḥ-Ssb. Sas.]; Śunaḥśepa [Rss.]) ........ 601
६७२. शुनःशेप आजीगर्ति कृत्रिमो देवरातो वैश्वामित्रो वा (साग्री. सास्वा.); शुनःशेप आजगर्ति कृत्रिमो देवरातो वैश्वामित्रः (ऋसर्व.); शुनःशेपः (सार्षेदी.) (Śunaḥśepa Ājīgarti Kṛtrimo Devarāto Vaiśvāmitro Vā [Ssb. Sas.]; Śunaḥśepa Ājagarti Kṛtrimo Devarāto Vaiśvāmitraḥ [Rss.]; Śunaḥśepaḥ [Sad.]) ........ 602
६७३. शुनःशेप आजीगर्तिः वामदेवो वा (साग्री. सास्वा.); पूषा (सार्षेदी.) (Śunaḥśepa Ājīgartiḥ Vāmadevo Vā [Ssb. Sas.]; Pūṣā [Sad.]) ........ 604
६७४. शनुःशेपो देवरात अपरनामा (Śanuḥśepo Devarāta Aparanāmā) ........ 604
६७५. शुनूहोत्रः (Śunūhotraḥ) ........ 604
६७६. शौनकः (Śaunakaḥ) ........ 605
६७७. शौनकः (सम्पत्कामः) (Śaunakaḥ (Sampatkāmaḥ)) ........ 606
६७८. शङ्खः (Śaṅkhaḥ) ........ 607
६७९. शंखो यामायनः (Śaṁkho Yāmāyanaḥ) ........ 611
६८०. शम्युः (Śamyuḥ) ........ 612
६८१. शंयुर् बार्हस्पत्यः (Śaṁyur Bārhaspatyaḥ) ........ 612
६८३. श्यावाश्वः (Śyāvāśvaḥ) ........ 621
६८४. श्यावाश्व आत्रेयः (Śyāvāśva Ātreyaḥ) ........ 626
६८५. श्यावाश्वो वामदेवो वा (सास्वा.साग्री.); वामदेवः (सार्षेदी.) (Śyāvāśvo Vāmadevo Vā [Sas.Ssb.];

Vāmadevaḥ [Sad.]) ........ 636

६८६. श्येन आग्नेयः (Śyena Āgneyaḥ) ........ 636

६८७. श्रद्धा कामायनी (Śraddhā Kāmāyanī) ........ 636

६८८. श्रीकामः (Śrīkāmaḥ) ........ 637

६८९. श्रुष्टिगुः (Śruṣṭiguḥ) ........ 637

६९०. श्रुष्टिगुः काण्वः (साग्री. सास्वा. ऋसर्व.); बालखिल्यः (सार्षेदी.) (Śruṣṭiguḥ Kāṇvaḥ [Ssb. Sas. Rss.]; Bālakhilyaḥ [Sad.]) ........ 637

६९१. श्रुतकक्षः (Śrutakakṣaḥ) ........ 638

६९२. श्रुतकक्ष आंगिरसः (Śrutakakṣa Āṁgirasaḥ) ........ 638

६९३. श्रुतकक्ष आंगिरसः (साग्री. सार्षेदी.); श्रुतकक्ष सुकक्षो वा (ऋसर्व.) (Śrutakakṣa Āṁgirasaḥ [Ssb. Sad.]; Śrutakakṣa Sukakṣo Vā [Rss.]) ........ 638

६९४. श्रुतकक्ष आंगिरसः (साग्री. सास्वा.); श्रुतकक्ष (सार्षेदी.) श्रुतकक्ष सुकक्षो वा आंगिरसः (ऋसर्व. ८.९२.१०; २२; २५) (Śrutakakṣa Āṁgirasaḥ [Ssb. Sas.]; Śrutakakṣa [Sad.]; Sukakṣaḥ Sukaṣo vā Āṁgirasaḥ [Rss. 8.93.7; 8]) ........ 640

६९५. श्रुतकक्ष आंगिरसः (साग्री. सास्वा.); श्रुतकक्षः (सार्षेदी.) सुकक्षः आंगिरसः (ऋसर्व. ८.९३.७; ८) (Śrutakakṣa Āṁgirasaḥ [Ssb. Sas.]; Śrutakakṣaḥ [Sad.] Sukakṣaḥ Āṁgirasaḥ [Rss. 8.93.7; 8]) ........ 640

६९६. श्रुतकक्ष आंगिरसः (साग्री. सास्वा.); श्रुतकक्षः (सार्षेदी.); सुकक्षः (ऋसर्व. ८.९२.४; ८.९३.३४) (Śrutakakṣa Āṁgirasaḥ [Ssb. Sas.]; Śrutakakṣaḥ [Sad.]; Sukakṣaḥ [Rss. 8.92.4; 8.93.34]) ........ 640

६९७. श्रुतकक्षः आंगिरसः (साग्री. सास्वा.); श्रुतकक्षः सुकक्षौ वा आंगिरसः (ऋसर्व. ८.९२.२८); मधुच्छन्दा (सार्षेदी.); (Śrutakakṣaḥ Āṁgirasaḥ [Ssb. Sas.]; Śrutakakṣaḥ Sukakṣau Vā Āṁgirasaḥ [Rss. 8.92.28]; Madhuchchhandā [Sad.]) ........ 640

६९८. श्रुतकक्षः (सार्षेदी.); श्रुतकक्षः सुकक्षो वा आंगिरसः (साग्री. सास्वा.); सुकक्षः (ऋसर्व. ८.९३.२३; २८; ३१) Śrutakakṣaḥ [Sad.]; Śrutakakṣaḥ Sukakṣo Vā Āṁgirasaḥ [Ssb. Sas.]; Sukaṣaḥ [Rss. 8.93.23; 28; 31]) ........ 641

६९९. श्रुतकक्षः (सार्षेदी.); श्रुतकक्षः सुकक्षो वा आंगिरसः (साग्री. सास्वा.) (Śrutakakṣaḥ [Sad.]; Śrutakakṣaḥ Sukakṣo Vā Āṁgirasaḥ [Ssb. Sas.]) ........ 641

७००. श्रुतकक्ष-सुकक्षौ (Śrutakakṣa-Sukakṣau) ........ 641

७०१. श्ररुतकक्षः सुकक्षो वा (Śrrutakakṣaḥ Sukakṣo Vā) ........ 641

७०२. श्रुतकक्षः सुकक्षो वा आंगिरसः (Śrutakakṣaḥ Sukakṣo Vā Āṁgirasaḥ) ........ 642

७०३. श्रुतबन्धुः (Śrutabandhuḥ) ........ 642

७०४. श्रुतिविद् आत्रेयः (Śrutivid Ātreyaḥ) ........ 643

७०५. संकसुकः (Saṁkasukaḥ) ........ 643

७०६. सत्यधृतिर्-वरुणिः (Satyadhṛtir-Varuṇiḥ) ........ 644

७०७. सत्यश्रवा आत्रेयः (Satyaśravā Ātreyaḥ) .......... 644
७०८. सत्यश्रवा आत्रेयः (साग्री. सास्वा. ऋसर्व.); गोतमः (सार्षेदी.) (Satyaśravā Ātreyaḥ [Ssb. Sas. Rss.]; Gotamaḥ [Sad.]) .......... 646
७०९. सदापृण आत्रेयः (Sadāpṛṇa Ātreyaḥ) .......... 646
७१०. सध्वंसः काण्वः (Sadhvaṁsaḥ Kāṇvaḥ) .......... 647
७११. सध्रिर् वैरुपो धर्मोगवा तापसः (Sadhrir Vairupo Dharmogavā Tāpasaḥ) .......... 648
७१२. सप्तर्षयः (Saptarṣayaḥ) .......... 649
७१३. सप्तर्षयः एकर्चाः (Saptarṣayaḥ Ekarchāḥ) .......... 655
७१४. सप्तगुः (Saptaguḥ) .......... 655
७१५. सप्तगुरांगिरसः (Saptagurāṁgirasaḥ) .......... 656
७१६. सप्तवध्रिर् आत्रेयः (Saptavadhrir Ātreyaḥ) .......... 656
७१७. सप्रथो भारद्वाजः (Sapratho Bhāradvājaḥ) .......... 657
७१८. सरमा देवशुनी (Saramā Devaśunī) .......... 657
७१९. सरस्वती (Sarasvatī) .......... 657
७२०. सविता (Savitā) .......... 660
७२१. सविताः (पुष्टिकामः) (Savitāḥ (Puṣṭikāmaḥ)) .......... 660
७२२. सव्यः (Savyaḥ) .......... 662
७२३. सव्य आंगिरसः (Savya Āṁgirasaḥ) .......... 662
७२४. सस आत्रेयः (Sasa Ātreyaḥ) .......... 669
७२५. सारिसृक्वः (Sārisṛkvaḥ) .......... 669
७२६. सार्पराज्ञी (Sārparājñī) .......... 669
७२७. सर्पराज्ञी कद्रुः (Sarparājñī Kadruḥ) .......... 669
७२८. सावित्री सूर्या (Sāvitrī Sūryā) .......... 670
७२९. सिकता निवावरी (Sikatā Nivāvarī) .......... 680
७३०. सिन्धुक्षित् प्रैयमेधः (Sindhukṣit Praiyamedhaḥ) .......... 681
७३१. सिन्धुद्वीपः (Sindhudvīpaḥ) .......... 682
७३२. सिन्धुद्वीप आम्बरीष त्रित आप्त्यो वा (साग्री. सास्वा.); सिन्धुद्वीप (सार्षेदी.) (Sindhudvīpa Āmbarīṣa Trita Āptyo Vā [Ssb. Sas.]; Sindhudvīpa [Sad.]) .......... 687
७३३. सिन्धुद्वीपः कृतिर वा (Sindhudvīpaḥ Kṛtira Vā) .......... 687
७३४. सुकक्षः (Sukakṣaḥ) .......... 688
७३५. सुकक्ष आंगिरसः (Sukakṣa Āṁgirasaḥ) .......... 688
७३६. सुकक्ष आंगिरसः (साग्री. सास्वा.); श्रुतकक्षः (ऋसर्व.८.९३.१६ सार्षेदी.) (Sukakṣa Āṁgirasaḥ [Ssb.

Sas.]; Śrutakakṣaḥ [Rss.8.93.16 Sad.]) .................................. 689

७३७. सुकक्षः (ऋसर्व.); सुकक्षः (साग्री. ); श्रुतकक्षः (सार्षेदी.) (Sukakṣaḥ [Rss.); Sukakṣaḥ [Ssb.]; Śrutakakṣaḥ [Sad.]) .................................. 689

७३८. सुकक्षः (ऋसर्व.); श्रुतकक्ष सुकक्षो वा आंगिरसः (साग्री.); श्रुतकक्षः (सार्षेदी. १५०) (Sukakṣaḥ [Rss.]; Śrutakakṣa Sukakṣo Vā Āṁgirasaḥ [Ssb.]; Śrutakakṣaḥ [Sad. 150]).................. 689

७३९. सुकक्षः (ऋसर्व.); श्रुतकक्ष सुकक्षो वा आंगिरसः (साग्री.) (Sukakṣaḥ [Rss.) Śrutakakṣa Sukakṣo Vā Āṁgirasaḥ [Ssb.]) .................................. 689

७४०. सुकक्ष श्रुतकक्षौ (साग्री. सास्वा.); श्रुतकक्षः (सार्षेदी.) (Sukakṣa Śrutakakṣau [Ssb. Sas.]; Śrutakakṣaḥ [Sad.]) .................................. 691

७४१. सुकीर्तिः (Sukīrtiḥ) .................................. 691

७४२. सुकीर्ति काक्षीवतः (Sukīrti Kākṣīvataḥ) .................................. 692

७४३. सुचीकः (Suchīkaḥ) .................................. 692

७४४. सुतकक्षः सुकक्षो वा (Sutakakṣaḥ Sukakṣo Vā) .................................. 692

७४५. सुतम्भरः (Sutambharaḥ) .................................. 693

७४६. सुतम्भर आत्रेयः (Sutambhara Ātreyaḥ) .................................. 693

७४७. सुतजेता मधुच्छन्दा - द्र. मधुच्छन्दा (Sutajetā Madhuchchhandā - See Madhuchchhandā) .................................. 695

७४८. सुदा (Sudā) .................................. 695

७४९. सुदा पैजवनः (Sudā Paijavanaḥ) .................................. 695

७५०. सुदासः पैजवनः (Sudāsaḥ Paijavanaḥ) .................................. 696

७५१. सुदीति-पुरुमीढौ (Sudīti-Purumīḍhau) .................................. 696

७५२. सुदीति-पुरुमीळहौ आंगिरसौ (Sudīti-Purumīḷahau Āṁgirasau) .................................. 696

७५३. सुदीति पुरुमीळ्हौ आंगिरसौ (साग्री. सास्वा.); सुदीति पुरुमीढो वा (सार्षेदी.) (Sudīti Purumīḷau Āṁgirasau [Ssb. Sas.]; Sudīti Purumīḍho Vā [Sad.]) .................................. 696

७५४. सुदीति पुरुमीढौ आंगिरसौ तयोर्वान्यतरः (साग्री. सास्वा.); सुदीतिः (सार्षेदी.) (Sudīti Purumīḍhau Āṁgirasau Tayorvānyataraḥ [Ssb. Sas.]; Sudītiḥ [Sad.]).................................. 697

७५५. सुदिति पुरुमीळहौ तयोर्वा अन्यतरः (Suditi and Purumīḷaha or any one of them) .......... 697

७५६. सुनीतिः (Sunītiḥ) .................................. 697

७५७. सुनुर् भार्गवः (Sunur Bhārgavaḥ) .................................. 698

७५८. सुपर्णः (Suparṇaḥ) .................................. 698

७५९. सुपर्णः काण्वः (Suparṇaḥ Kāṇvaḥ) .................................. 698

७६०. सुपर्णः तार्क्ष्यपुत्र ऊर्ध्व कृशनो वा यामायनः (Suparṇaḥ tārkṣayaputra Ūrdhva Kṛśano Vā Yāmāyanaḥ) .................................. 699

७६१. सुबन्धुः (Subandhuḥ) .................................. 699

७६२. सुमित्रो दुर्मित्रो वााकौत्सः (Sumitro Durmitro Vāākautsaḥ) ........................................ 699
७६३. सुमित्रो वाध्र्यश्वः (Sumitro Vādhrayaśvaḥ) ........................................ 700
७६४. सुवेदाः शैरीषिः (Suvedāḥ Śairīṣiḥ) ........................................ 702
७६५. सुवेदा शैलूषि (Suvedā Śailūṣi) ........................................ 702
७६६. सुश्रुतः (Suśrutaḥ) ........................................ 702
७६७. सुहस्त्यो घौषेयः (Suhastyo Ghauṣeyaḥ) ........................................ 703
७६८. सुहोत्रः (Suhotraḥ) ........................................ 703
७६९. सुहोत्रो भरद्वाजः (Suhotra of Bharadvāja) ........................................ 704
७७०. सूर्या सावित्री (Sūryā Sāvitrī) ........................................ 704
७७१. सोमकः (Somakaḥ) ........................................ 708
७७२. सोमाहुतिः (Somāhutiḥ) ........................................ 708
७७३. सोमाहुतिः भार्गव (Somāhutiḥ Bhārgava) ........................................ 708
७७४. सोभरिः (Sobhariḥ) ........................................ 708
७७५. सोभरिः काण्वः (Sobhariḥ Kāṇvaḥ) ........................................ 709
७७६. सौभरिः (Saubhariḥ) ........................................ 716
७७७. सौभरिः काण्वः (Saubhariḥ son of Kaṇva) ........................................ 717
७७८. संकुसुको यामायनः (Saṁkusuka of Yamāyana) ........................................ 719
७७९. संवरणः प्राजापत्यः (Saṁvaraṇaḥ Prājāpatyaḥ) ........................................ 720
७८०. संवर्त आंगिरसः (साग्री. ४४३; ४५१); संवर्त (ऋसर्व.); वामदेवः (सार्षेदी.) (Saṁvarta Āṁgirasaḥ [Ssb. 443; 451]; Saṁvarta [Rss.]; Vāmadevaḥ [Sad.]) ........................................ 722
७८१. संवननः (Saṁvananaḥ) ........................................ 722
७८२. स्तम्बमित्रः (Stambamitraḥ) ........................................ 723
७८३. स्यूमरश्मिर्भार्गवः (Syūmaraśmi of Bhṛgu) ........................................ 723
७८४. स्वयम्भुर् ब्रह्म (Svayambhu Brahma) ........................................ 724
७८५. स्वस्त्यात्रेयः (Svastyātreyaḥ) ........................................ 726
७८६. हरिमन्तः (Harimantaḥ) ........................................ 731
७८७. हविर्धान आंगिः (Havirdhāna Āṁgiḥ) ........................................ 732
७८८. हर्यतः प्रागाथः (Haryataḥ Prāgāthaḥ) ........................................ 733
७८९. हिरण्यगर्भः (Hiraṇyagarbhaḥ) ........................................ 735
७९०. हिरण्यगर्भः प्राजापत्य (Hiraṇyagarbhaḥ Prājāpatya) ........................................ 735
७९१. हिरण्यस्तूपः (Hiraṇyastūpaḥ) ........................................ 736
७९२. हिरण्यस्तूपः आङ्गिरसः (Hiraṇyastūpaḥ Āṅgirasaḥ) ........................................ 738

७९३. हैमवर्चिः (Haimavarchiḥ) ........ 745
७९४. ऋषि? (Ṛṣi ?) ........ 747
७९५. ऋषि-? (Ṛṣi ?) ........ 748
७९६. ऋषि-? (Ṛṣi ?) ........ 748

# Vedic Concordance of Mantras as per Ṛṣi and Devatā (Part-II)

# वैदिक-ऋषि-देवतानुसारी मन्त्रानुक्रमकोषः (भाग-२)

## ४४४. ब्रह्मा (Brahmā)

१. अग्निः (Agniḥ) - अ. (Av.) २.१६.४; ४.३३.१-८; ५.२६.१; ५.२७.१-१२; ६.७१.१-२; १३.१.२८.३०; १९.५९.१-३; १९.६४.१-४

अ. (Av.) २.१६.४

अग्ने वैश्वानर विश्वैर्मा देवैः पाहि स्वाहा ॥४॥
*agne vaiśvānara viśvairmā devaiḥ pāhi svāhā ॥4॥*

अ. (Av.) ४.३३.१-८

अप नः शोशुचदघमग्ने शुशुग्ध्या रयिम्। अपः नः शोशुचदघम् ॥१॥
सुक्षेत्रिया सुगातुया वसूया च यजामहे। अप नः शोशुचदघम् ॥२॥
प्र यद् भन्दिष्ठ एषां प्रास्माकासश्च सूरयः। अप नः शोशुचद घम् ॥३॥
प्र यत् ते अग्ने सूरयो जायेमहि प्र ते वयम्। अप नः शोशुचदघम्॥४॥
प्र यदग्नेः सहस्वतो विश्वतो यन्ति भानवः। अप नः शोशुचदघम् ॥५॥
त्वं हि विश्वतोमुख विश्वतः परिभूरसि। अप नः शोशुचदघम् ॥६॥
द्विषो नो विश्वतोमुखाति नावेव पारय। अपः नः शोशुचदघम् ॥७॥
स नः सिन्धुमिव नावाति पर्षा स्वस्तये। अप नः शोशुचदघम् ॥८॥
*apa naḥ śośuchadaghamagne śuśugdhyā rayim । apaḥ naḥ śośuchadagham ॥1॥*
*sukṣetriyā sugātuyā vasūyā cha yajāmahe । apa naḥ śośuchadagham ॥2॥*
*pra yad bhandiṣṭha eṣāṁ prāsmākāsaścha sūrayaḥ । apa naḥ śośuchada gham ॥3॥*
*pra yat te agne sūrayo jāyemahi pra te vayam । apa naḥ śośuchadagham ॥4॥*
*pra yadagneḥ sahasvato viśvato yanti bhānavaḥ । apa naḥ śośuchadagham ॥5॥*
*tvaṁ hi viśvateāmukha viśvataḥ paribhūrasi । apa naḥ śośuchadagham ॥6॥*
*dviṣo no viśvatomukhāti nāveva pāraya । apaḥ naḥ śośuchadagham ॥7॥*
*sa naḥ sindhumiva nāvāti parṣā svastaye । apa naḥ śośuchadagham ॥8॥*

अ. (Av.) ५.२६.१

यजूंषि यज्ञे समिधः स्वाहाग्निः प्रविद्वानिह वो युनक्तु ॥१॥
*yajūṁṣi yajñe samidhaḥ svāhāgniḥ pravidvāniha vo yunaktu ॥1॥*

अ. (Av.) ५.२७.१-१२

ऊर्ध्वा अस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचीष्यग्नेः ।
द्युमत्तमा सुप्रतीकः ससूनुस्तनूनपादसुरो भूरिपाणिः ॥१॥
देवो देवेषु देवः पथो अनक्ति मध्वा घृतेन ॥२॥
मध्वा यज्ञं नक्षति प्रैणानो नराशंसो अग्निः सुकृद् देवः सविता विश्ववारः ॥३॥
अच्छायमेति शवसा घृता चिदीडानो वह्निर्नमसा ॥४॥
अग्निः स्रुचो अध्वरेषु प्रयक्षु न यक्षदस्य महिमानमग्नेः ॥५॥
तरी मन्द्रासु प्रयक्षु वसवश्चातिष्ठन् वसुधातरश्च ॥६॥
द्वारो देवीरन्वस्य विश्वे व्रतं रक्षन्ति विश्वहा ॥७॥
उरुव्यचसाग्नेर्धाम्ना पत्यमाने ।
आ सुष्वयन्ती यजते उपाके उषासानक्तेमं यज्ञमवतामध्वरं नः ॥८॥
दैवा होतार ऊर्ध्वमध्वरं नोऽग्नेर्जिह्वयाभि गृणत गृणता नः स्विष्टये ।
तिस्रो देवीर्बर्हिरेदं सदन्तामिडा सरस्वती मही भारती गृणाना ॥९॥

तन्नस्तुरीपमद्भुतं पुरुक्षु। देव त्वष्टा रायस्पोषं वि ष्य नाभिमस्य ॥१०॥
वनस्पतेऽव सृजा रराणः। त्मना देवेभ्यो अग्निर्हव्यं शमिता स्वदयतु ॥११॥
अग्ने स्वाहा कृणुहि जातवेदः। इन्द्राय यज्ञं विश्वे देवा हविरिदं जुषन्ताम् ॥१२॥
*ūrdhvā asya samidho bhavantyūrdhvā śukrā śochīṣyagneḥ /*
*dyumattamā supratīkaḥ sasūnustanūnapādasuro bhūripāṇiḥ //1 //*
*devo deveṣu devaḥ patho anakti madhvā ghṛtena //2 //*
*madhvā yajñaṁ nakṣati praiṇāno narāśaṁso agniḥ sukṛd devaḥ savitā viśvavāraḥ //3 //*
*achchhāyameti śavasā ghṛtā chidīḍāno vahnirnamasā //4 //*
*agniḥ srucho adhvareṣu prayakṣu na yakṣadasya mahimānamagneḥ //5 //*
*tarī mandrāsu prayakṣu vasavaśchātiṣṭhan vasudhātaraścha //6 //*
*dvāro devīranvasya viśve vrataṁ rakṣanti viśvahā //7 //*
*uruvyachasāgnerdhāmnā patyamāne /*
*ā suṣvayantī yajate upāke uṣāsānaktemaṁ yajñamavatāmadhvaraṁ naḥ //8 //*
*daivā hotāra ūrdhvamadhvaraṁ no'gnerjihvayābhi gṛṇata gṛṇatā naḥ sviṣṭaye /*
*tisro devīrbarhiredaṁ sadantāmiḍā sarasvatī mahī bhāratī gṛṇānā //9 //*
*tannasturīpamadbhutaṁ purukṣu /*
*deva tvaṣṭā rāyaspoṣaṁ vi ṣya nābhimasya //10 //*
*vanaspate'va sṛjā rarāṇaḥ / tmanā devebhyo agnirhavyaṁ śamitā svadayatu //11 //*
*agne svāhā kṛṇuhi jātavedaḥ / indrāya yajñaṁ viśve devā haviridaṁ juṣantām //12 //*

अ. (Av.) ६.७१.१-२

यदन्नमद्मि बहुधा विरूपं हिरण्यमश्वमुत गामजामविम् ।
यदेव किं च प्रतिजग्रहाहमग्निष्टद्धोता सुहुतं कृणोतु ॥१॥
यन्मा हुतमहुतमाजगाम दत्तं पितृभिरनुमतं मनुष्यैः ।
यस्मान्मे मन उदिव रारजीत्यग्निष्टद्धोता सुहुतं कृणोतु ॥२॥
*yadannamadmi bahudhā virūpaṁ hiraṇyamaśvamuta gāmajāmavim /*
*yadeva kiṁ cha pratijagrahāhamagniṣṭaddhotā suhutaṁ kṛṇotu //1 //*
*yanmā hutamahutamājagāma dattaṁ pitṛbhiranumataṁ manuṣyaiḥ /*
*yasmānme mana udiva rārajītyagniṣṭaddhotā suhutaṁ kṛṇotu //2 //*

अ. (Av.) १३.१.२८-३०

समिद्धो अग्निः समिधानो घृतवृद्धो घृताहुतः ।
अभीषाड् विश्वाषाडग्निः सपत्नान् हन्तु ये मम ॥२८॥
हन्त्वेनान् प्र दहत्वरिर्यो नः पृतन्यति ।
क्रव्यादाग्निना वयं सपत्नान् प्र दहामहसि ॥२९॥
अवाचीनानव जहीन्द्र वज्रेण बाहुमान् ।
अधा सपत्नान् मामकानग्नेस्तेजोऽभिरादिषि ॥३०॥
*samiddho agniḥ samidhāno ghṛtavṛddho ghṛtāhutaḥ /*
*abhīṣāḍ viśvāṣāḍagniḥ sapatnān hantu ye mama //28 //*
*hantvenān pra dahatvariryo naḥ pṛtanyati /*
*kravyādāgninā vayaṁ sapatnān pra dahāmahasi //29 //*
*avāchīnānava jahīndra vajreṇa bāhumān /*
*adhā sapatnān māmakānagnestejo'bhirādiṣi //30 //*

अ. (Av.) १९.५९.१-३

त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा। त्वं यज्ञेष्वीड्यः ॥१॥
यद् वो वयं प्रमिनाम व्रतानि विदुषां देवा अविदुष्टरासः ।
अग्निष्टद् विश्वादा पृणातु विद्वान्त्सोमस्य यो ब्राह्मणाँ आविवेश॥२॥
आ देवानामपि पन्थामगन्म यच्छक्नवाम तदनुप्रवोढुम् ।
अग्निर्विद्वान्त्स यजात् स इद्धोता सोऽध्वरान्त्स ऋतून् कल्पयाति ॥३॥
*tvamagne vratapā asi deva ā martyeṣvā / tvaṁ yajñeṣvīḍyaḥ //1 //*
*yad vo vayaṁ pramināma vratāni viduṣāṁ devā aviduṣṭarāsaḥ /*
*agniṣṭad viśvādā pṛṇātu vidvāntsomasya yo brāhmaṇām̐ āviveśa //2 //*
*ā devānāmapi panthāmaganma yachchhaknavāma tadanupravoḍhum /*

*agnirvidvāntsa yajāt sa iddhotā so'dhvarāntsa ṛtūn kalpayāti ॥3॥*

अ. (Av.) १९.६४.१-४

अग्ने समिधमाहार्षं बृहते जातवेदसे। स मे श्रद्धां च मेधां च जातवेदाः प्र यच्छतु ॥१॥
इध्मेन त्वा जातवेदः समिधा वर्धयामसि। तथा त्वमस्मान् वर्धय प्रजया च धनेन च ॥२॥
यदग्ने यानि कानि चिदा ते दारूणि दध्मसि। सर्वं तदस्तु मे शिवं तज्जुषस्व यविष्ठ्य ॥३॥
एतास्ते अग्ने समिधस्त्वमिद्धः समिद् भव। आयुरस्मा सुधेह्यमृतत्वमाचार्याय ॥४॥

*agne samidhamāhārṣaṁ bṛhate jātavedase । sa me śraddhāṁ cha medhāṁ cha jātavedāḥ pra yachchhatu ॥1॥*
*idhmena tvā jātavedaḥ samidhā vardhayāmasi । tathā tvamasmān vardhaya prajayā cha dhanena cha ॥2॥*
*yadagne yāni kāni chidā te dārūṇi dadhmasi । sarvaṁ tadastu me śivaṁ tajjuṣasva yaviṣṭhya ॥3॥*
*etāste agne samidhastvamiddhaḥ samid bhava । āyurasmā sudhehyamṛtatvamāchāryāya ॥4॥*

२. अग्नीषोमौ (Agnīṣomau) - अ. (Av.) ६.५४.१-३

इदं तद् युज उत्तरमिन्द्रं शुम्भाम्यष्टये। अस्य क्षत्रं श्रियं महीं वृष्टिरिव वर्धया तृणम् ॥१॥
अस्मै क्षत्रमग्नीषोमावस्मै धारयतं रयिम्। इमं राष्ट्रस्याभीवर्गे कृणुतं युज उत्तरम् ॥२॥
सबन्धुश्चासबन्धुश्च यो अस्माँ अभिदासति। सर्वं तं रन्धयासि मे यजमानाय सुन्वते ॥३॥

*idaṁ tad yuja uttaramindraṁ śumbhāmyaṣṭaye ।*
*asya kṣatraṁ śriyaṁ mahīṁ vṛṣṭiriva vardhayā tṛṇam ॥1॥*
*asmai kṣatramagnīṣomāvasmai dhārayataṁ rayim ।*
*imaṁ rāṣṭrasyābhīvarge kṛṇutaṁ yuja uttaram ॥2॥*
*sabandhuśchāsabandhuścha yo asmām̐ abhidāsati ।*
*sarvaṁ taṁ randhayāsi me yajamānāya sunvate ॥3॥*

३. अग्न्यादयः पाप्महनो मन्त्रोक्ता (Agnyādayaḥ Pāpmahano Mantroktā) - अ. (Av.) ३.३१.१-११

वि देवा जरसावृतन् वि त्वमग्ने अरात्या ।
व्य१हं सर्वेण पाप्मना वि यक्ष्मेण समायुषा ॥१॥
व्यार्त्या पवमानो वि शक्रः पापकृत्यया ।
व्य१हं सर्वेण पाप्मना वि यक्ष्मेण समायुषा ॥२॥
वि ग्राम्याः पशव आरण्यैर्व्यापस्तृष्णयासरन् ।
व्य१हं सर्वेण पाप्मना वि यक्ष्मेण समायुषा ॥३॥
वी३मे द्यावापृथिवीइतो वि पन्थानो दिशंदिशम् ।
व्य१हं सर्वेण पाप्मना वि यक्ष्मेण समायुषा ॥४॥
त्वष्टा दुहित्रे वहतुं युनक्तीतीदं विश्वं भुवनं बि याति ।
व्य१हं सर्वेण पाप्मना वि यक्ष्मेण समायुषा ॥५॥
अग्निः प्राणन्त्सं दधाति चन्द्रः प्राणेन संहितः ।
व्य१हं सर्वेण पाप्मना वि यक्ष्मेण समायुषा ॥६॥
प्राणेन विश्वतोवीर्यं देवाः सूर्यं समैरयन् ।
व्य१हं सर्वेण पाप्मना वि यक्ष्मेण समायुषा ॥७॥
आयुष्मतामायुष्कृतां प्राणेन जीव मा मृथाः ।
व्य१हं सर्वेण पाप्मना वि यक्ष्मेण समायुषा ॥८॥
प्राणेन प्राणतां प्राणेहैव भव मा मृथाः ।
व्य१हं सर्वेण पाप्मना वि यक्ष्मेण समायुषा ॥९॥
अदायुषा समायुषोदोषधीनां रसेन ।
व्य१हं सर्वेण पाप्मना वि यक्ष्मेण समायुषा ॥१०॥
आ पर्जन्यस्य वृष्ट्योदस्थामामृता वयम् ।
व्य१हं सर्वेण पाप्मना वि यक्ष्मेण समायुषा ॥११॥

*vi devā jarasāvṛtan vi tvamagne arātyā* ।
*vya1haṁ sarveṇa pāppanā vi yakṣameṇa samāyuṣā* ॥1॥
*vyārtyā pavamāno vi śakraḥ pāpakṛtyayā* ।
*vya1haṁ sarveṇa pāpmanā vi yakṣameṇa samāyuṣā* ॥2॥
*vi grāmyāḥ paśava āraṇyairvyāpastṛṣṇayāsaran* ।
*vya1haṁ sarveṇa pāpmanā vi yakṣameṇa samāyuṣā* ॥3॥
*vī3me dyāvāpṛthivīito vi panthāno diśaṁdiśam* ।
*vya1haṁ sarveṇa pāpmanā vi yakṣameṇa samāyuṣā* ॥4॥
*tvaṣṭā duhitre vahatuṁ yunaktītīdaṁ viśvaṁ bhuvanaṁ bi yāti* ।
*vya1haṁ sarveṇa pāpmanā vi yakṣameṇa samāyuṣā* ॥5॥
*agniḥ prāṇantsaṁ dadhāti chandraḥ prāṇena saṁhitaḥ* ।
*vya1haṁ sarveṇa pāpmanā vi yakṣameṇa samāyuṣā* ॥6॥
*prāṇena viśvatovīryaṁ devāḥ sūryaṁ samairayan* ।
*vya1haṁ sarveṇa pāpmanā vi yakṣameṇa samāyuṣā* ॥7॥
*āyuṣmatāmāyuṣkṛtāṁ prāṇena jīva mā mṛthāḥ* ।
*vya1haṁ sarveṇa pāpmanā vi yakṣameṇa samāyuṣā* ॥8॥
*prāṇena prāṇatāṁ prāṇehaiva bhava mā mṛthāḥ* ।
*vya1haṁ sarveṇa pāpmanā vi yakṣameṇa samāyuṣā* ॥9॥
*adāyuṣā samāyuṣodoṣadhīnāṁ rasena* ।
*vya1haṁ sarveṇa pāpmanā vi yakṣameṇa samāyuṣā* ॥10॥
*ā parjanyasya vṛṣṭyodasthāmāmṛtā vayam* ।
*vya1haṁ sarveṇa pāpmanā vi yakṣameṇa samāyuṣā* ॥11॥

४. अग्न्यादयो मन्त्रोक्ता (Agnyādayo Mantroktā) - अ. (Av.) १३.१.३१; १९.४३.१-८

अ. (Av.) १३.१.३१

अग्ने सपत्नानधरान् पादयास्मद् व्यथया सजातमुत्पिपानं बृहस्पते ।
इन्द्राग्नी मित्रावरुणावधरे पद्यन्तामप्रतिमन्यूयमानाः ॥३१॥
*agne sapatnānadharān pādayāsmad vyathayā sajātamutpipānaṁ bṛhaspate* ।
*indrāgnī mitrāvaruṇāvadhare padyantāmapratimanyūyamānāḥ* ॥31॥

अ. (Av.) १९.४३.१-८

यत्र ब्रह्मविदो यान्ति दीक्षया तपसा सह ।
अग्निर्मा तत्र नयत्वग्निर्मेधा दधातु मे। अग्नये स्वाहा ॥ अग्नये स्वाहा ॥१॥
यत्र ब्रह्मविदो यान्ति दीक्षया तपसा सह ।
वायुर्मा तत्र नयतु वायुः प्राणान् दधातु मे वायवे स्वाहा ॥२॥
यत्र ब्रह्मविदो यान्ति दीक्षया तपसा सह ।
सूर्यो मा तत्र नयतु चक्षुः सूर्यो दधातु मे। सुर्याय स्वाहा ॥३॥
यत्र ब्रह्मविदो यान्ति दीक्षया तपसा सह ।
चन्द्रो मा तत्र नयतु मनश्चन्द्रो दधातु मे। चन्द्राय स्वाहा ॥४॥
यत्र ब्रह्मविदो यान्ति दीक्षया तपसा सह ।
सोमो मा तत्र नयतु पयः सोमो दधातु मे। सोमाय स्वाहा ॥५॥
यत्र ब्रह्मविदो यान्ति दीक्षया तपसा सह ।
इन्द्रो मा तत्र नयतु बलमिन्द्रा दधातु मे। इन्द्राय स्वाहा ॥६॥
यत्र ब्रह्मविदो यान्ति दीक्षया तपसा सह ।
आपो मा तत्र नयन्त्वमृतं मोप तिष्ठतु। अद्भ्यः स्वाहा ॥७॥
यत्र ब्रह्मविदो यान्ति दीक्षया तपसा सह ।
ब्रह्मा मा तत्र नयतु ब्रह्मा ब्रह्म दधातु मे। ब्रह्मणे स्वाहा ॥८॥
*yatra brahmavido yānti dīkṣayā tapasā saha* ।
*agnirmā tatra nayatvagnirmedhā dadhātu me* । *agnaye svāhā* ॥ *agnaye svāhā* ॥1॥
*yatra brahmavido yānti dīkṣayā tapasā saha* ।
*vāyurmā tatra nayatu vāyuḥ prāṇān dadhātu me vāyave svāhā* ॥2॥
*yatra brahmavido yānti dīkṣayā tapasā saha* ।
*sūryo mā tatra nayatu chakṣuḥ sūryo dadhātu me* । *suryāya svāhā* ॥3॥

*yatra brahmavido yānti dīkṣayā tapasā saha ।*
*chandro mā tatra nayatu manaśchandro dadhātu me । chandrāya svāhā ॥4॥*
*yatra brahmavido yānti dīkṣayā tapasā saha ।*
*somo mā tatra nayatu payaḥ somo dadhātu me । somāya svāhā ॥5॥*
*yatra brahmavido yānti dīkṣayā tapasā saha ।*
*indro mā tatra nayatu balamindrā dadhātu me । indrāya svāhā ॥6॥*
*yatra brahmavido yānti dīkṣayā tapasā saha ।*
*āpo mā tatra nayantvamṛtaṁ mopa tiṣṭhatu । adbhyaḥ svāhā ॥7॥*
*yatra brahmavido yānti dīkṣayā tapasā saha ।*
*brahmā mā tatra nayatu brahmā brahma dadhātu me । brahmaṇe svāhā ॥8॥*

५. अतिथिविद्या (Atithividyā) - अ. (Av.) ९.६(१).१-१७; ९.६(२).१-१३; ९.६(३).१-९; ९.६(४).१-१०; ९.६(५).१-१०; ९.६(६).१-१४

अ. (Av.) ९.६(१).१-१७

यो विद्याद् ब्रह्म प्रत्यक्षं परूंषि यस्य संभारा ऋचो यस्यानूक्यम् ॥१॥
सामानि यस्य लोमानि यजुर्हृदयमुच्यते परिस्तरणमिद्धविः ॥२॥
यद् वा अतिथिपतिरतिथीन् प्रतिपश्यति देवयजनं प्रेक्षते ॥३॥
यदभिवदति दीक्षामुपैति यदुदकं याचत्यपः प्र णयति ॥४॥
या एव यज्ञ आपः प्रणीयन्ते ता एव ताः ॥५॥
यत् तर्पणमाहरन्ति य एवाग्नीषोमीयः पशुर्बध्यते स एव सः ॥६॥
यदावसथान् कल्पयन्ति सदोहविर्धानान्येव तत् कल्पयन्ति ॥७॥
यदुपस्तृणन्ति बर्हिरेव तत् ॥८॥
यदुपरिशयन्माहरन्ति स्वर्गमेव तेन लोकमव रुन्द्धे ॥९॥
यत् कशिपूपबर्हणमाहरन्ति परिधय एव ते ॥१०॥
यदांजनाभ्यंजनमाहरन्त्याज्यमेव तत् ॥११॥
यत् पुरा परिवेषात् खादमाहरन्ति पुरोडाशावेव तौ ॥१२॥
यदशनकृतं ह्वयन्ति हविष्कृतमेव तद्धवयन्ति ॥१३॥
ये व्रीहयो यवा निरुप्यन्तेंऽशव एव ते ॥१४॥
यान्युलूखलमुसलानि ग्रावाण एव ते ॥१५॥
शूर्पं पवित्रं तुषा ऋजीषाभिषवणीरापः ॥१६॥
स्रुग् दर्विर्नेक्षणमायवनं द्रोणकलशाः कुम्भ्यो वायव्या नि पात्राणीयमेव कृष्णाजिनम् ॥१७॥

*yo vidyād brahma pratyakṣaṁ parūṁṣi yasya saṁbhārā ṛcho yasyānūkyam ॥1॥*
*sāmāni yasya lomāni yajurhṛdayamuchyate paristaraṇamiddhaviḥ ॥2॥*
*yad vā atithipatiratithīn pratipaśyati devayajanaṁ prekṣate ॥3॥*
*yadabhivadati dīkṣāmupaiti yadudakaṁ yāchatyapaḥ pra ṇayati ॥4॥*
*yā eva yajña āpaḥ praṇīyante tā eva tāḥ ॥5॥*
*yat tarpaṇamāharanti ya evāgnīṣomīyaḥ paśurbadhyate sa eva saḥ ॥6॥*
*yadāvasathān kalpayanti sadohavirdhānānyeva tat kalpayanti ॥7॥*
*yadupastṛṇanti barhireva tat ॥8॥*
*yadupariśayanmāharanti svargameva tena lokamava runddhe ॥9॥*
*yat kaśipūpabarhaṇamāharanti paridhaya eva te ॥10॥*
*yadāṁjanābhyaṁjanamāharantyājyameva tat ॥11॥*
*yat purā pariveṣāt khādamāharanti puroḍāśāveva tau ॥12॥*
*yadaśanakṛtaṁ hvayanti haviṣkṛtameva taddhavayanti ॥13॥*
*ye vrīhayo yavā nirupyanteṁ'śava eva te ॥14॥*
*yānyulūkhalamusalāni grāvāṇa eva te ॥15॥*
*śūrpaṁ pavitraṁ tuṣā ṛjīṣābhiṣavaṇīrāpaḥ ॥16॥*
*srug darvirnekṣaṇamāyavanaṁ droṇakalaśāḥ kumbhyo vāyavyā ni pātrāṇīyameva kṛṣṇājinam ॥17॥*

अ. (Av.) ९.६(२).१-१३

यजमानब्राह्मणं वा एतदतिथिपतिः कुरुते यदाहार्या णि प्रेक्षत इदं भूया३ इदा३मिति ॥१॥

यदाह भूय उद्धरेति प्राणमेव तेन वर्षीयांसं कुरुते ॥२॥
उप हरति हवींष्या सादयति ॥३॥
तेषामासन्नानामतिथिरात्मंजुहोति ॥४॥
स्रुचा हस्तेन प्राणे यूपे स्रुक्कारेण वषट्कारेण ॥५॥
एते वै प्रियाश्चाप्रियाश्चत्र्विजः स्वर्गं लोकं गमयन्ति यदतिथयः ॥६॥
स य एवं विद्वान् न द्विषन्नश्नीयान्न द्विषतोऽन्नमश्नीयान्न मीमांसितस्य न मीमांसमानस्य।७॥
सर्वो वा एष जग्धपाप्मा यस्यान्नमश्नन्ति ॥८॥
सर्वो वा एषोऽजग्धपाप्मा यस्यान्नं नाश्नन्ति ॥९॥
सर्वदा वा एष युक्ताग्रावार्द्रपवित्रो वितताध्वर आहृतयज्ञक्रतुर्य उपहरति ॥१०॥
प्राजापत्यो वा एतस्य यज्ञो विततो य उपहरति ॥११॥
प्रजापतेर्वा एष विक्रमाननुविक्रमते य उपहरति ॥१२॥
योऽतिथीनां स आहवनीयो यो वेश्मनि स गार्हपत्यो यस्मिन् पचन्ति स दक्षिणाग्निः ॥१३॥
*yajamānabrāhmaṇaṁ vā etadatithipatiḥ kurute yadāhāryā ṇi prekṣata idaṁ bhūyā3 idā3miti ॥1॥*
*yadāha bhūya uddhareti prāṇameva tena varṣīyāṁsaṁ kurute ॥2॥*
*upa harati havīṁṣyā sādayati ॥3॥*
*teṣāmāsannānāmatithirātmaṁjuhoti ॥4॥*
*sruchā hastena prāṇe yūpe srukkāreṇa vaṣaṭkāreṇa ॥5॥*
*ete vai priyāśchāpriyāśchatirvajaḥ svargaṁ lokaṁ gamayanti yadatithayaḥ ॥6॥*
*sa ya evaṁ vidvān na dviṣannaśnīyānna dviṣato'nnamaśnīyānna mīmāṁsitasya na mīmāṁsamānasya ।7॥*
*sarvo vā eṣa jagdhapāpmā yasyānnamaśnanti ॥8॥*
*sarvo vā eṣo'jagdhapāpmā yasyānnaṁ nāśnanti ॥9॥*
*sarvadā vā eṣa yuktāgrāvārdrapavitro vitatādhvara āhṛtayajñakraturya upaharati ॥10॥*
*prājāpatyo vā etasya yajño vitato ya upaharati ॥11॥*
*prajāpatervā eṣa vikramānanuvikramate ya upaharati ॥12॥*
*yo'tithīnāṁ sa āhavanīyo yo veśmani sa gārhapatyo yasmin pachanti sa dakṣiṇāgniḥ ॥13॥*

अ. (Av.) ९.६(३).१-९

इष्टं च वा एष पूर्तं च गृहाणामश्नाति यः पूर्वोऽतिथेरश्नाति ॥१॥
पयश्च वा एष रसं च गृहाणामश्नाति यः पूवोऽतिथेरश्नाति ॥२॥
ऊर्जां च वा एष स्फातिं च गृहाणामश्नाति यः पूर्वोऽतिथेरश्नाति ॥३॥
प्रजां च वा एष पशूंश्च गृहाणामश्नाति यः पूर्वोऽतिथेरश्नाति ॥४॥
कीर्तिं च वा एष यशश्च गृहाणामश्नाति यः पूर्वोऽतिथेरश्नाति ॥
श्रियं च वा एष संविदं च गृहाणामश्नाति यः पूर्वोऽतिथेरश्नाति ॥
एष वा अतिथिर्यच्छ्रोत्रियस्तस्मात् पूर्वो नाश्नीयात् ॥७॥
अशितावत्यतिथावश्नीयाद् यज्ञस्य सात्मत्वाय यज्ञस्याविच्छेदाय तद् व्रतम् ॥८॥
एतद् वा उ स्वादीयो यदधिगवं क्षीरं वा मांसं वा तदेव नाश्नीयात् ॥९॥
*iṣṭaṁ cha vā eṣa pūrtaṁ cha gṛhāṇāmaśnāti yaḥ pūrvo'titheraśnāti ॥1॥*
*payaścha vā eṣa rasaṁ cha gṛhāṇāmaśnāti yaḥ pūvo'titheraśnāti ॥2॥*
*ūrjāṁ cha vā eṣa sphātiṁ cha gṛhāṇāmaśnāti yaḥ pūrvo'titheraśnāti ॥3॥*
*prajāṁ cha vā eṣa paśūṁścha gṛhāṇāmaśnāti yaḥ pūrvo'titheraśnāti ॥4॥*
*kīrtiṁ cha vā eṣa yaśaścha gṛhāṇāmaśnāti yaḥ pūrvo'titheraśnāti ॥*
*śriyaṁ cha vā eṣa saṁvidaṁ cha gṛhāṇāmaśnāti yaḥ pūrvo'titheraśnāti ॥*
*eṣa vā atithiryachchhrotriyastasmāt pūrvo nāśnīyāt ॥7॥*
*aśitāvatyatithāvaśnīyād yajñasya sātmatvāya yajñasyāvichchhedāya tad vratam ॥8॥*
*etad vā u svādīyo yadadhigavaṁ kṣīraṁ vā māṁsaṁ vā tadeva nāśnīyāt ॥9॥*

अ. (Av.) ९.६(४).१-१०

स य एवं विद्वान् क्षीरमुपसिच्योपहरति ॥१॥
यावदग्निष्टोमेनेष्ट्वा सुसमृद्धेनावरुन्द्धे तावदेनेनाव रुन्द्धे ॥२॥
स य एवं विद्वान्त्सर्पिरुपसिच्योपहरति ॥३॥

यावदतिरात्रेणेष्ट्वा सुसमृद्धेनावरुन्द्धे तावदेनेनाव रुन्द्धे ॥४॥
स य एवं विद्वान् धुपसिच्योपहरति ॥५॥
यावत् सत्त्रसद्येनेष्ट्वा सुसमृद्धेनावरुन्द्धे तावदेनेनाव रुन्द्धे ॥६॥
स य एवं विद्वान् मांसमुपसिच्योपहरति ॥७॥
यावद् द्वादशहेनेष्ट्वा सुसमृद्धेनावरुन्द्धे तावदेनेनाव रुन्द्धे ॥८॥
स य एवं विद्वानुदकमुपसिच्योपहरति ॥९॥
प्रजानां प्रजननाय गच्छति प्रतिष्ठां प्रियः प्रजानां भवति य एवं विद्वानुदकमुपसिच्योपहरति ।१०।
*sa ya evaṁ vidvān kṣīramupasichyopaharati ॥1॥*
*yāvadagniṣṭomeneṣṭvā susamṛddhenāvarunddhe tāvadenenāva runddhe ॥2॥*
*sa ya evaṁ vidvāntsarpirupasichyopaharati ॥3॥*
*yāvadatirātreṇeṣṭvā susamṛddhenāvarunddhe tāvadenenāva runddhe ॥4॥*
*sa ya evaṁ vidvān dhupasichyopaharati ॥5॥*
*yāvat sattrasadyeneṣṭvā susamṛddhenāvarunddhe tāvadenenāva runddhe ॥6॥*
*sa ya evaṁ vidvān māṁsamupasichyopaharati ॥7॥*
*yāvad dvādaśaheneṣṭvā susamṛddhenāvarunddhe tāvadenenāva runddhe ॥8॥*
*sa ya evaṁ vidvānudakamupasichyopaharati ॥9॥*
*prajānāṁ prajananāya gachchhati pratiṣṭhāṁ priyaḥ prajānāṁ bhavati ya evaṁ vidvānudakamupasichyopaharati ।10।*

अ. (Av.) ९.६(५).१-१०

तस्मा उषा हिंकृणोति सविता प्र स्तौति ॥१॥
बृहस्पतिरूर्जयोद् गायति त्वष्टा पुष्ट्या प्रति हरति विश्वे देवा निधनम् ॥२॥
निधनं भूत्याः प्रजायाः पशूनां भवति य एवं वेद ॥३॥
तस्मा उद्यन्त्सूर्यो हिंकृणोति संगवः प्र स्तौति ॥४॥
मध्यन्दिन उद्गायत्यपराह्णः प्रति हरत्यस्तंयन् निधनम् ।
निधनं भूत्याः प्रजायाः पशूनां भवति य एवं वेद ॥५॥
तस्मा अभ्रो भवन् हिंकृणोति स्तनयन् प्र स्तौति ॥६॥
विद्योतमानः प्रति हरति वर्षन्नुद्गायत्युद्गृह्णन् निधनम् ।
निधनं भूत्याः प्रजायाः पशूनां भवति य एवं वेद ॥७॥
अतिथीन् प्रति पश्यति हिंकृणोत्यभि वदति प्र स्तौत्युदकं याचत्युद् गायति ॥८॥
उप हरति प्रति हरत्युच्छिष्टं निधनम् ॥९॥
निधनं भूतयाः प्रजायाः पशूनां भवति य एवं वेद ॥१०॥
*tasmā uṣā hiṁkṛṇoti savitā pra stauti ॥1॥*
*bṛhaspatirūrjayod gāyati tvaṣṭā puṣṭyā prati harati viśve devā nidhanam ॥2॥*
*nidhanaṁ bhūtyāḥ prajāyāḥ paśūnāṁ bhavati ya evaṁ veda ॥3॥*
*tasmā udyantsūryo hiṁkṛṇoti saṁgavaḥ pra stauti ॥4॥*
*madhyandina udgāyatyaparāhṇaḥ prati haratyastaṁyan nidhanam ।*
*nidhanaṁ bhūtyāḥ prajāyāḥ paśūnāṁ bhavati ya evaṁ veda ॥5॥*
*tasmā abhro bhavan hiṁkṛṇoti stanayan pra stauti ॥6॥*
*vidyotamānaḥ prati harati varṣannudgāyatyudgṛhṇan nidhanam ।*
*nidhanaṁ bhūtyāḥ prajāyāḥ paśūnāṁ bhavati ya evaṁ veda ॥7॥*
*atithīn prati paśyati hiṁkṛṇotyabhi vadati pra stautyudakaṁ yāchatyud gāyati ॥8॥*
*upa harati prati haratyuchchhiṣṭaṁ nidhanam ॥9॥*
*nidhanaṁ bhūtayāḥ prajāyāḥ paśūnāṁ bhavati ya evaṁ veda ॥10॥*

अ. (Av.) ९.६(६).१-१४

यत् क्षत्तारं ह्वयत्या श्रावयत्येव तत् ॥१॥
यत् प्रतिश्रृणोति प्रत्याश्रावयत्येव तत् ॥२॥
यत् परिवेष्टारः पात्रहस्ताः पूर्वे चापरे च प्रपद्यन्ते चमसाध्वर्यव एव ते ॥३॥
तेषां न कश्चनाहोता ॥४॥
यद् वा अतिथिपतिरतिथीन् परिविष्य गृहानुपोदैत्यवभृथमेव तदुपावैति ॥५॥
यत् सभगयति दक्षिणाः सभागयति यदनुतिष्ठत उदवस्यत्येव तत् ॥६॥

स उपहूतः पृथिव्यां भक्षयत्युपहूतस्तस्मिन् यत् पृथिव्यां विश्वरूपम् ॥७॥
स उपहूतोऽन्तरिक्षे भक्षयत्युपहूतस्तस्मिन् यदन्तरिक्षे विश्वरूपम् ॥८॥
स उपहूतो दिवि भक्षयत्युपहूतस्तस्मिन् यददिवि विश्वरूपम् ॥९॥
स उपहूतो देवेषु भक्षयत्युपहूतस्तस्मिन् यददेवैर्ष विश्वरूपम् ॥१०॥
स उपहूतो लोकेषु भक्षयत्युपहूतस्तस्मिन् यल्लोकेशु विश्वरूपम् ॥११॥
स उपहूत उपहूतः ॥१२॥
आष्नोतीमं लोकमाप्नोत्यमुम् ॥१३॥
ज्योतिष्मतो लोकांजयति य एवं वेद ॥१४॥
*yat kṣattāraṁ hvayatyā śrāvayatyeva tat //1 //*
*yat pratiśṛṇoti pratyāśrāvayatyeva tat //2 //*
*yat pariveṣṭāraḥ pātrahastāḥ pūrve chāpare cha prapadyante chamasādhvaryava eva te //3 //*
*teṣāṁ na kaśchanāhotā //4 //*
*yad vā atithipatiratithīn pariviṣya gṛhānupodaityavabhṛthameva tadupāvaiti //5 //*
*yat sabhagayati dakṣiṇāḥ sabhāgayati yadanutiṣṭhata udavasyatyeva tat //6 //*
*sa upahūtaḥ pṛthivyāṁ bhakṣayatyupahūtastasmin yat pṛthivyāṁ viśvarūpam //7 //*
*sa upahūto'ntarikṣe bhakṣayatyupahūtastasmin yadantarikṣe viśvarūpam //8 //*
*sa upahūto dievi bhakṣayatyupahūtastasmin yadadivi viśvarūpam //9 //*
*sa upahūto deveṣu bhakṣayatyupahūtastasmin yadadevairṣa viśvarūpam //10 //*
*sa upahūto lokeṣu bhakṣayatyupahūtastasmin yallokeśu viśvarūpam //11 //*
*sa upahūta upahūtaḥ //12 //*
*āṣnotīmaṁ lokamāpnotyamum //13 //*
*jyotiṣmato lokāṁjayati ya evaṁ veda //14 //*

६. अदितिः (Aditiḥ) - अ. (Av.) ५.२६.६

एयमगन् बर्हिषा प्रोक्षणीभिर्यज्ञं तन्वानादितिः स्वाहा ॥६॥
*eyamagan barhiṣā prokṣaṇībhiryajñaṁ tanvānāditiḥ svāhā //6 //*

७. अध्यातमम् (Adhyātamam) - अ. (Av.) १३.४(१).१-१३; १३.४(२).१४-२१; १३.४(३).२२-२८; १३.४(४).२९-४५; १३.४(५).४६-५१; १३.४(६).५२-५६

अ. (Av.) १३.४(१).१-१३

स एति सविता स्वर्दिवस्पृष्ठेऽवचाकशत् ॥१॥
रशिमभिर्नभ आभृतं महेन्द्र एतयावृतः ॥२॥
स धाता स विधर्ता स वायुर्नभ उच्छ्रितम् ।
रशिमभिर्नभ आभृतं महेन्द्र एत्यावृतः ॥३॥
सोऽर्यमा स वरुणः स रुद्रः स महादेवः ।
रश्मिभिर्नभ आभृतं महेन्द्र एत्यावृतः ॥४॥
सो अग्निः स उ सूर्यः स उ एव महायमः ।
रश्मिभिर्नभ आभृतं महेन्द्र एत्यावृतः ॥५॥
तं वत्सा उप तिष्ठन्त्येकशीर्षाणो युता दश ।
रश्मिभिर्नभ आभृतं महेन्द्र एत्यावृतः ॥६॥
पश्चात् प्रांच आ तन्वन्ति यदुदेति वि भासति ।
रश्मिभिर्नभ आभृतं महेन्द्र एत्यावृतः ॥७॥
तस्यैष मारुतो गणः स एति शिक्याकृतः ॥८॥
रशिमभिर्नभ आभृतं महेन्द्र एत्यावृतः ॥९॥
तस्येमे नव कोशा विष्टम्भा नवधा हिताः ॥१०॥
स प्रजाभ्यो वि पश्यति यच्च प्राणति यच्च न ॥११॥
तमिदं निगतं सहः स एष एक एकवृदेक एव ॥१२॥
एते अस्मिन् देवा एकवृतो भवन्ति ॥१३॥
*sa eti savitā svardivaspṛṣṭhe'vachākaśat //1 //*
*raśimabhirnabha ābhṛtaṁ mahendra etayāvṛtaḥ //2 //*

*sa dhātā sa vidhartā sa vāyurnabha uchichhratam* ।
*raśimabhirnabha ābhṛtaṁ mahendra etyāvṛtaḥ* ॥3 ॥
*so'ryamā sa varuṇaḥ sa rudraḥ sa mahādevaḥ* ।
*raśmibhirnabha ābhṛtaṁ mahendra etyāvṛtaḥ* ॥4 ॥
*so agniḥ sa u sūryaḥ sa u eva mahāyamaḥ* ।
*raśmibhirnabha ābhṛtaṁ mahendra etyāvṛtaḥ* ॥5 ॥
*taṁ vatsā upa tiṣṭhantyekaśīrṣāṇo yutā daśa* ।
*raśmibhirnabha ābhṛtaṁ mahendra etyāvṛtaḥ* ॥6 ॥
*paśchāt prāṁcha ā tanvanti yadudeti vi bhāsati* ।
*raśmibhirnabha ābhṛtaṁ mahendra etyāvṛtaḥ* ॥7 ॥
*tasyaiṣa māruto gaṇaḥ sa eti śikyākṛtaḥ* ॥8 ॥
*raśimabhirnabha ābhṛtaṁ mahendra etyāvṛtaḥ* ॥9 ॥
*tasyeme nava kośā viṣṭambhā navadhā hitāḥ* ॥10 ॥
*sa prajābhyo vi paśyati yachcha prāṇati yachcha na* ॥11 ॥
*tamidaṁ nigataṁ sahaḥ sa eṣa eka ekavṛdeka eva* ॥12 ॥
*ete asmin devā ekavṛto bhavanti* ॥13 ॥

अ. (Av.) १३.४(२).१४-२१

कीर्तिश्च यशश्चाम्भश्च नभश्च ब्राह्मणवर्चसं चान्नं चान्नाद्यं च ॥१४॥
य एतं देवमेकवृतं वेद ॥१५॥
न द्वितीयो न तृतीयश्चतुर्थो नाप्युच्यते। य एतं देवमेकवृतं वेद ॥१६॥
न पंचमो न षष्ठः सप्तमो नाप्युच्यते। य एतं देवमेकवृतं वेद ॥१७॥
नाष्टमो न नवमो दशमो नाप्युच्यते। य एतं देवमेकवृतं वेद ॥१८॥
स सर्वस्मै वि पश्यति यच्च प्राणति यच्च न। य एतं देवमेकवृतं वेद ॥१९॥
तमिदं निगतं सहः स एष एक एकवृदेक एव। य एतं देवमेकवृतं वेद ॥२०॥
सर्वे अस्मिन् देवा एकवृतो भवन्ति। य एतं देवमेकवृतं वेद ॥२१॥
*kīrtiścha yaśaśchāmbhaścha nabhaścha brāhmaṇavarchasaṁ chānnaṁ chānnādyaṁ cha* ॥14 ॥
*ya etaṁ devamekavṛtaṁ veda* ॥15 ॥
*na dvitīyo na tṛtīyaśchaturtho nāpyuchyate* । *ya etaṁ devamekavṛtaṁ veda* ॥16 ॥
*na paṁchamo na ṣaṣṭhaḥ saptamo nāpyuchyate* ।
*ya etaṁ devamekavṛtaṁ veda* ॥17 ॥
*nāṣṭamo na navamo daśamo nāpyuchyate* । *ya etaṁ devamekavṛtaṁ veda* ॥18 ॥
*sa sarvasmai vi paśyati yachcha prāṇati yachcha na* ।
*ya etaṁ devamekavṛtaṁ veda* ॥19 ॥
*tamidaṁ nigataṁ sahaḥ sa eṣa eka ekavṛdeka eva* ।
*ya etaṁ devamekavṛtaṁ veda* ॥20 ॥
*sarve asmin devā ekavṛto bhavanti* । *ya etaṁ devamekavṛtaṁ veda* ॥21 ॥

अ. (Av.) १३.४(३).२२-२८

ब्रह्म च तपश्च कीर्तिश्च यशश्चाम्भश्च नभश्च ब्राह्मणवर्चसं चान्नं चान्नाद्यं च ।
य एतं देवेमेकवृतं वेद ॥२२॥
भूतं च भव्यं च श्रद्धा च रुचिश्च स्वर्गश्च स्वधा च ॥२३॥
य एतं देवमेकवृतं वेद ॥२४॥
स एव मृत्युः सो३मृतं सो३भ्वं१ स रक्षः ॥२५॥
स रुद्रो वसुवनिर्वसुदेये नमोवाके वषड्कारोऽनु संहितः ॥२६॥
तस्येमे सर्वे यातव उप प्रशिषमासते ॥२७॥
तस्यामू सर्वा नक्षत्रा वशे चन्द्रमसा सह ॥२८॥
*brahma cha tapaścha kīrtiścha yaśaśchāmbhaścha nabhaścha brāhmaṇavarchasaṁ chānnaṁ chānnādyaṁ cha* ।
*ya etaṁ devemekavṛtaṁ veda* ॥22 ॥
*bhūtaṁ cha bhavyaṁ cha śraddhā cha ruchiścha svargaścha svadhā cha* ॥23 ॥
*ya etaṁ devamekavṛtaṁ veda* ॥24 ॥

*sa eva mṛtyuḥ so3mṛtaṁ so3bhvaṁ1 sa rakṣaḥ ॥25॥*
*sa rudro vasuvanirvasudeye namovāke vaṣaṭkāro'nu saṁhitaḥ ॥26॥*
*tasyeme sarve yātava upa praśiṣamāsate ॥27॥*
*tasyāmū sarvā nakṣatrā vaśe chandramasā saha ॥28॥*

अ. (Av.) १३.४(४).२९-४५

स वा अह्नोऽजायत तस्मादहरजायत ॥२९॥
स वै रात्र्या अजायत तस्माद् रात्रिरजायत ॥३०॥
स वा अन्तरिक्षादजायत तस्मादन्तरिक्षमजायत ॥३१॥
स वै वायोरजायत तस्माद् वायुरजायत ॥३२॥
स वै दिवोऽजायत तस्माद् द्यौरध्यजायत ॥३३॥
स वै दिग्भ्योऽजायत तस्माद् दिशोजायन्त ॥३४॥
स वै भूमेरजायत तस्माद् भूमिरजायत ॥३५॥
स वा अग्नेरजायत तस्मादग्निरजायत ॥३६॥
स वा अद्भ्येऽजायत तस्मादापोऽजायन्त ॥३७॥
स वा ऋग्भ्योऽजायत तस्मादृचोऽजायन्त ॥३८॥
स वै यज्ञादजायत तस्माद् यज्ञोऽजायत ॥३९॥
स यज्ञस्तस्य यज्ञः स यज्ञस्य शिरस्कृतम् ॥४०॥
स स्तनयति स वि द्योतते स उ अश्मानमस्यति ॥४१॥
पापाय वा भद्राय वा पुरुषायासुराय वा ॥४२॥
यद्वा कृणोष्योषधीर्यद्वा वर्षसि भद्रया यद्वा जन्यमवीवृधः ॥४३॥
तावांस्ते मघवन् महिमोपो ते तन्वः शतम् ॥४४॥
उपो ते बद्धे बद्धानि यदि वासि न्यर्बुदम् ॥४५॥

*sa vā ahno'jāyata tasmādaharajāyata ॥29॥*
*sa vai rātrayā ajāyata tasmād rātrirajāyata ॥30॥*
*sa vā antarikṣādajāyata tasmādantarikṣamajāyata ॥31॥*
*sa vai vāyorajāyata tasmād vāyurajāyata ॥32॥*
*sa vai divo'jāyata tasmād dyauradhyajāyata ॥33॥*
*sa vai digbhyo'jāyata tasmād diśojāyanta ॥34॥*
*sa vai bhūmerajāyata tasmād bhūmirajāyata ॥35॥*
*sa vā agnerajāyata tasmādagnirajāyata ॥36॥*
*sa vā adbhye'jāyata tasmādāpo'jāyanta ॥37॥*
*sa vā ṛgbhyo'jāyata tasmādṛcho'jāyanta ॥38॥*
*sa vai yajñādajāyata tasmād yajño'jāyata ॥39॥*
*sa yajñastasya yajñaḥ sa yajñasya śiraskṛtam ॥40॥*
*sa stanayati sa vi dyotate sa u aśmānamasyati ॥41॥*
*pāpāya vā bhadrāya vā puruṣāyāsurāya vā ॥42॥*
*yadvā kṛṇoṣyoṣadhīryadvā varṣasi bhadrayā yadvā janyamavīvṛdhaḥ ॥43॥*
*tāvāṁste maghavan mahimopo te tanvaḥ śatam ॥44॥*
*upo te baddhe baddhāni yadi vāsi nyarbudam ॥45॥*

अ. (Av.) १३.४(५).४६-५१

भूयानिन्द्रो नमुराद् भूयानिन्द्रासि मृत्युभ्यः ॥४६॥
भूयानरात्याः शच्याः पतिस्त्वमिन्द्रासि विभूः प्रभूरिति त्वोपास्महे वयम् ॥४७॥
नमस्ते अस्तु पश्यत पश्य मा पश्यत ॥४८॥
अन्नाद्येन यशसा तेजसा ब्राह्मणवर्चसेन ॥४९॥
अम्भो अमो महः सह इति त्वोपास्महे वयम् ।
नमस्ते अस्तु पश्यत पश्य मा पश्यत। अन्नाद्येन यशसा तेजसा ब्राह्मणवर्चसेन ॥५०॥
अम्भो अरुणं रजतं रजः सह इति त्वोपास्महे वयम् ।
नमस्ते अस्तु पश्यत पश्य मा पश्यत। अन्नाद्येन यशसा तेजसा ब्राह्मणवर्चसेन ॥५१॥

*bhūyānindro namurād bhūyānindrāsi mṛtyubhyaḥ ॥46॥*
*bhūyānarātyāḥ śachyāḥ patistvamindrāsi vibhūḥ prabhūriti tvopāsmahe vayam ॥47॥*

*namaste astu paśyata paśya mā paśyata //48 //*
*annādyena yaśasā tejasā brāhmaṇavarchasena //49 //*
*ambho amo mahaḥ saha iti tvopāsmahe vayam /*
*namaste astu paśyata paśya mā paśyata / annodyena yaśasā tejasā brāhmaṇavarchasena //50 //*
*ambho aruṇaṁ rajataṁ rajaḥ saha iti tvopāsmahe vayam /*
*namaste astu paśyata paśya mā paśyata / annādyena yaśasā tejasā brāhmaṇavarchasena //51 //*

अ. (Av.) १३.४(६).५२-५६

उरुः पृथुः सुभूर्भुव इति त्वोपास्महे वयम् ।
नमस्ते अस्तु पश्यत पश्य मा पश्यत ।
अन्नाद्येन यशसा तेजसा ब्राह्मणवर्चसेन ॥५२॥
प्रथो वरो व्यचो लोक इति त्वोपास्महे वयम् ।
नमस्ते अस्तु पश्यत पश्य मा पश्यत ।
अन्नाद्येन यशसा तेजसा ब्राह्मणवर्चसेन ॥५३॥
भवद्वसुरिदद्वसुः संयद्वसुरायद्वसुरिति त्वोपास्महे वयम् ॥५४॥
नमस्ते अस्तु पश्यत पश्य मा पश्यत ॥५५॥
अन्नाद्येन यशसा तेजसा ब्राह्मणवर्चसेन ॥५६॥
*uruḥ pṛthuḥ subhūrbhuva iti tvopāsmahe vayam /*
*namaste astu paśyata paśya mā paśyata /*
*annādyena yaśasā tejasā brāhmaṇavarchasena //52 //*
*pratho varo vyacho loka iti tvopāsmahe vayam /*
*namaste astu paśyata paśya mā paśyata /*
*annādyena yaśasā tejasā brāhmaṇavarchasena //53 //*
*bhavadvasuridadvasuḥ saṁyadvasurāyadvasuriti tvopāsmahe vayam //54 //*
*namaste astu paśyata paśya mā paśyata //55 //*
*annādyena yaśasā tejasā brāhmaṇavarchasena //56 //*

८. अध्यात्मम् रोहितः आदित्यः (Adhyātmam Rohitaḥ Ādityaḥ) - अ. (Av.) १३.१.१-२; ४-२७; ३२-६०; १३.२.१-४६; १३.३.१-२६

अ. (Av.) १३.१.१-२

उदेहि वाजिन् यो अप्स्व१न्तरिदं राष्ट्रं प्र विश सूनृतावत् ।
यो रोहितो विश्वमिदं जजान स त्वा राष्ट्राय सुभृतं बिभर्तु ॥१॥
उद्वाज आ गन् यो अप्स्व१न्तर्विश आ रोह त्वद्योनयो याः ।
सोमं दधानोऽप ओषधीर्गाश्चतुष्पदो द्विपद आ वेशयेह ॥२॥
*udehi vājin yo apsva1ntaridaṁ rāṣtraṁ pra viśa sūnṛtāvat /*
*yo rohito viśvamidaṁ jajāna sa tvā rāṣṭrāya subhṛtaṁ bibhartu //1 //*
*udvāja ā gan yo apsva1ntarviśa ā roha tvadyonayo yāḥ /*
*somaṁ dadhāno'pa oṣadhīrgāśchatuṣpado dvipada ā veśayeha //2 //*

अ. (Av.) १३.१.४-२७

रुहो रुरोह रोहित आ रुरोह गर्भो जनीनां जनुषामुपस्थम् ।
ताभिः संरब्धमन्वविन्दन् षडुर्वीर्गातुं प्रपश्यन्निह राष्ट्रमाहाः ॥४॥
आ ते राष्ट्रमिह रोहितोऽहार्षीद् व्यास्थन्मृधो अभयं ते अभूत् ।
तस्मै ते द्यावापृथिवी रेवतीभिः कामं दुहाथामिह शक्करीभिः ॥५॥
रोहितो द्यावापृथिवी जजान तत्र तन्तुं परमेष्ठी ततान ।
तत्र शिश्रियेऽज एकपादोऽदृंहद् द्यावापृथिवी बलेन ॥६॥
रोहितो द्यावापृथिवी अदृंहत् तेन स्व स्तभितं तेन नाकः ।
तेनान्तरिक्षं विमिता रजांसि तेन देवा अमृतमन्वविन्दन् ॥७॥
वि रोहितो अमृशद् विश्वरूपं समाकुर्वाणः प्ररुहो रुहश्च ।
दिवं रुद्वा महता महिम्ना सं ते राष्ट्रमनक्तु ॥८॥

यास्ते रुहः प्ररुहो यास्त आरुहो याभिरापृणासि दिवमन्तरिक्षम् ।
तासां ब्रह्मणा पयसा वावृधानो विशि राष्ट्रे जागृहि रोहितस्य ॥९॥
यास्ते विशस्तपसः संबभूवुर्वत्सं गायत्रीमनु ता इहागुः ।
तास्त्वा विशन्तु मनसा शिवेन संमाता वत्सो अभ्येतु रोहितः ॥१०॥
ऊर्ध्वो रोहितो अधि नाके अस्थाद् विश्वा रूपाणि जनयन् युवा कविः ।
तिग्मेनाग्निर्ज्योतिषा वि भाति तृतीये चक्रे रजसि प्रियाणि ॥११॥
सहस्रशृंगो वृषभो जातवेदा घृताहुतः सोमपृष्ठः सुवीरः ।
मा मा हासीन्नाथितो नेत् त्वा जहानि गोपोषं च मे वीरपोषं च धेहि ॥१२॥
रोहितो यज्ञस्य जनिता मुखं च रोहिताय वाचा श्रोत्रेण मनसा जुहोमि ।
रोहितं देवा यन्ति सुमनस्यमानाः स मा रोहैः सामित्यै रोहयतु ॥१३॥
रोहितो यज्ञं व्यदधाद् विश्वकर्मणे तस्मात् तेजांस्युप मेमान्यागुः ।
वोचेयं ते नाभिं भुवनस्याधि मज्मनि ॥१४॥
आ त्वा रुरोह बृहत्यू३त पङ्क्तिरा ककुब् वर्चसा जातवेदः ।
आ त्वा रुरोहोष्णिहाक्षरो वषट्कार आ त्वा रुरोह रोहितो रेतसा सह ॥१५॥
अयं वस्ते गर्भं पृथिव्या दिवं वस्तेऽयमन्तरिक्षम् ।
अयं ब्रध्नस्य विष्टपि स्वर्लोकान् व्यानिशे ॥१६॥
वाचस्पते पृथिवी नः स्योना स्योना योनिस्तल्पा नः सुशेवा ।
इहैव प्राणः सख्ये नो अस्तु तं त्वा परमेष्ठिन् पर्यग्निरायुषा वर्चसा दधातु ॥१७॥
वाचस्पत ऋतवः पंच ये नो वैश्वकर्मणाः परि ये संबभूवुः ।
इहैव प्राणः सख्ये नो अस्तु तं त्वा परमेष्ठिन् परि रोहित आयुषा वर्चसा दधातु ॥१८॥
वाचस्पते सौमनसं मनश्च गोष्ठे नोगा जनय योनिषु प्रजाः ।
इहैब प्राणः सख्ये नो अस्तु तं त्वा परमेष्ठिन् पर्यहमायुषा वर्चसा दधामि ॥१९॥
इहैव त्वा धात् सविता देवो अग्निर्वर्चसा मित्रावरुणावभि त्वा ।
सर्वा अरातीरवक्रामन्नेहीदं राष्ट्रमकरः सूनृतावत् ॥२०॥
यं त्वा पृषती रथे प्रष्टिर्वहति रोहित ।
शुभा यासि रिणन्नपः ॥२१॥
अनुव्रता रोहिणी रोहितस्य सूरिः सुवर्णा बृहती सुवर्चाः ।
तया वाजान विश्वरूपां जयेम तया विश्वाः पृतना अभि ष्याम ॥२२॥
इदं सदो रोहिणी रोहितस्यासौ पन्थाः पृषती येन याति ।
तां गन्धर्वाः कश्यपा उन्नयन्ति तां रक्षन्ति कवयोऽप्रमादम् ॥२३॥
सूर्यस्याश्वा हरयः केतुमन्तः सदा वहन्त्यमृताः सुखं रथम् ।
घृतपावा रोहितो भ्राजमानो दिवं देवः पृषतीमा विवेश ॥२४॥
यो रोहितो वृषभस्तिग्मशृंगः पर्यग्निं परि सूर्यं बभूव ।
यो विष्टभ्नाति पृथिवीं दिवं च तस्माद् देवा अधि सृष्टीः सृजन्ते ॥२५॥
रोहितो दिवमारुहन्महतः पर्यर्णवात् ।
सर्वा रुरोह रोहितो रुहः ॥२६॥
वि मिमीष्व पयस्वतीं घृताचीं देवानां धेनुरनपस्पृगेषा ।
इन्द्रः सोमं पिबतु क्षेमो अस्त्वग्निः प्र स्तौतु वि मृधो नुदस्व ॥२७॥
*ruho ruroha rohita ā ruroha garbho janīnāṁ januṣāmupastham /*
*tābhiḥ saṁrabdhamanvavindan ṣaḍurvīrgātuṁ prapaśyanniha rāṣṭramāhāḥ //4 //*
*ā te rāṣṭramiha rohito'hārṣīd vyāsthanmṛdho abhayaṁ te abhūt /*
*tasmai te dyāvāpṛthivī revatībhiḥ kāmaṁ duhāthāmiha śakvarībhiḥ //5 //*
*rohito dyāvāpṛthivī jajāna tatra tantuṁ parameṣṭhī tatāna /*
*tatra śiśriye'ja ekapādo'dṛṁhad dyāvāpṛthivī balena //6 //*
*rohito dyāvāpṛthivī adṛṁhat tena sva stabhitaṁ tena nākaḥ /*
*tenāntarikṣaṁ vimitā rajāṁsi tena devā amṛtamanvavindan //7 //*
*vi rohito amṛśad viśvarūpaṁ samākurvāṇaḥ praruho ruhaścha /*
*divaṁ ruḍhvā mahatā mahimnā saṁ te rāṣṭramanaktu //8 //*
*yāste ruhaḥ praruho yāsta āruho yābhirāpṛṇāsi divamantarikṣam /*

*tāsāṁ brahmaṇā payasā vāvṛdhāno viśi rāṣṭre jāgṛhi rohitasya* ॥9॥
*yāste viśastapasaḥ saṁbabhūvurvatsaṁ gāyatrīmanu tā ihāguḥ* ।
*tāstvā viśantu manasā śivena saṁmātā vatso abhyetu rohitaḥ* ॥10॥
*ūrdhvo rohito adhi nāke asthād viśvā rūpāṇi janayan yuvā kaviḥ* ।
*tigmenāgnirjyotiṣā vi bhāti tṛtīye chakre rajasi priyāṇi* ॥11॥
*sahasraśṛṁgo vṛṣabho jātavedā ghṛtāhutaḥ somapṛṣṭhaḥ sṛvīraḥ* ।
*mā mā hāsīnnāthito net tvā jahāni gopoṣaṁ cha me vīrapoṣaṁ cha dhehi* ॥12॥
*rohito yajñasya janitā mukhaṁ cha rohitāya vāchā śrotreṇa manasā juhomi* ।
*rohitaṁ devā yanti sumanasyamānāḥ sa mā rohaiḥ sāmityai rohayatu* ॥13॥
*rohito yajñaṁ vyadadhād viśvakarmaṇe tasmāt tejāṁsyupa memānyāguḥ* ।
*vocheyaṁ te nābhiṁ bhuvanasyādhi majmani* ॥14॥
*ā tvā ruroha bṛhatyū3ta paṅktirā kakub varchasā jātavedaḥ* ।
*ā tvā rurohoṣṇihākṣaro vaṣaṭkāra ā tvā ruroha rohito retasā saha* ॥15॥
*ayaṁ vaste garbhaṁ pṛthivyā divaṁ vaste'yamantarikṣam* ।
*ayaṁ bradhnasya viṣṭapi svarlokān vyāniśe* ॥16॥
*vāchaspate pṛthivī naḥ syonā syonā yonistalpā naḥ suśevā* ।
*ihaiva prāṇaḥ sakhye no astu taṁ tvā parameṣṭhin paryagnirāyuṣā varchasā dadhātu* ॥17॥
*vāchaspata ṛtavaḥ paṁcha ye no vaiśvakarmaṇāḥ pari ye saṁbabhūvuḥ* ।
*ihaiva prāṇaḥ sakhye no astu taṁ tvā parameṣṭhin pari rohita āyuṣā varchasā dadhātu* ॥18॥
*vāchaspate saumanasaṁ manaścha goṣṭhe nogā janaya yoniṣu prajāḥ* ।
*ihaiba prāṇaḥ sakhye no astu taṁ tvā parameṣṭhin paryahamāyuṣā varchasā dadhāmi* ॥19॥
*ihaiva tvā dhāt savitā devo agnirvarchasā mitrāvaruṇāvabhi tvā* ।
*sarvā arātīravakrāmannehīdaṁ rāṣṭramakaraḥ sūnṛtāvat* ॥20॥
*yaṁ tvā pṛṣatī rathe praṣṭirvahati rohita* ।
*śubhā yāsi riṇannapaḥ* ॥21॥
*anuvratā rohiṇī rohitasya sūriḥ suvarṇā bṛhatī suvarchāḥ* ।
*tayā vājāna viśvarūpāṁ jayema tayā viśvāḥ pṛtanā abhi ṣyāma* ॥22॥
*idaṁ sado rohiṇī rohitasyāsau panthāḥ pṛṣatī yena yāti* ।
*tāṁ gandharvāḥ kaśyapā unnayanti tāṁ rakṣanti kavayo'pramādam* ॥23॥
*sūryasyāśvā harayaḥ ketumantaḥ sadā vahantyamṛtāḥ sukhaṁ ratham* ।
*ghṛtapāvā rohito bhrājamāno divaṁ devaḥ pṛṣatīmā viveśa* ॥24॥
*yo rohito vṛṣabhastigmaśṛṁgaḥ paryagiṁna pari sūryaṁ babhūva* ।
*yo viṣṭabhnāti pṛthivīṁ divaṁ cha tasmād devā adhi sṛṣṭīḥ sṛjante* ॥25॥
*rohito divamāruhanmahataḥ paryarṇavāt* ।
*sarvā ruroha rohito ruhaḥ* ॥26॥
*vi mimīṣva payasvatīṁ ghṛtāchīṁ devānāṁ dhenuranapaspṛgeṣā* ।
*indraḥ somaṁ pibatu kṣemo astvagniḥ pra stautu vi mṛdho nudasva* ॥27॥

अ. (Av.) १३.१.३२-६०

उद्यंस्त्वं देव सूर्य सपत्नानव मे जहि ।
अवैनानश्मना जहि ते यन्त्वधमं तमः ॥३२॥
वत्सो विराजो वृषभो मतीनामा रुरोह शुक्रपृष्ठोऽन्तरिक्षम् ।
घृतेनार्कमभ्य र्चन्ति वत्सं ब्रह्म सन्तं ब्रह्मणा वर्धयन्ति ॥३३॥
दिवं च रोह पृथिवीं च रोह राष्ट्रं च रोह द्रविणं च रोह ।
प्रजां च रोहामृतं च रोह रोहितेन तन्वं१ सं स्पृशस्व ॥३४॥
ये देवा राष्ट्रभृतोऽभितो यन्ति सूर्यम् ।
तैष्टे रोहितः संविदानो राष्ट्रं दधातु सुमनस्यमानः ॥३५॥
उत् त्वा यज्ञा ब्रह्मपूता वहन्त्यध्वगतो हरयस्त्वा वहन्ति ।
तिरः समुद्रमति रोचसे अर्णवम् ॥३६॥
रोहिते द्यावापृथिवी अधि श्रिते वसुजिति गोजिति संधनाजिति ।
सहस्रं यस्य जनिमानि सप्त च वोचेयं ते नाभिं भुनस्याधि मज्मनि ॥३७॥

यशा यासि प्रदिशो दिशश्च यशाः पशूनामुत चर्षणीनाम् ।
यशाः पृथिव्या अदित्या उपस्थेऽहं भूयासं सवितेव चारुः ॥३८॥
अमुत्र सन्निह वेत्थेतः संस्तानि पश्यसि ।
इतः पश्यन्ति रोचनं दिवे सूर्यं विपश्चितम् ॥३९॥
देवो देवान् मर्चयस्यन्तश्चरस्यर्णवे ।
समानमग्निमिन्धते तं विदुः कवयः परे ॥४०॥
अवः परेण पर एनावरेण पदा वत्सं बिभ्रती गौरुदस्थात् ।
सा कद्रीची कं स्विदर्धं परागात् क्व स्वित् सूते नहि यूथे अस्मिन् ॥४१॥
एकपदी द्विपदी सा चतुष्पद्यष्टापदी नवपदी बभूवुषी ।
सहस्राक्षरा भुवनस्य पङ्क्तिस्तस्याः समुद्रा अधि वि क्षरन्ति ॥४२॥
आरोहन् द्यामममृतः प्राव मे वचः ।
उत् त्वा यज्ञा ब्रह्मपूता वहन्त्यध्वगतो हरयस्त्वा वहन्ति ॥४३॥
वेद तत् ते अमर्त्य यत् त आक्रमणं दिवि ।
यत् ते सधस्थं परमे व्योमन् ॥४४॥
सूर्यो द्यां सूर्यः पृथिवीं सूर्य आपोऽति पश्यति ।
सूर्यो भूतस्यैकं चक्षुरा रुरोह दिवं महीम् ॥४५॥
उर्वीरासन् परिधयो वेदिर्भूमिरकल्पत ।
तत्रैतानग्नी आधत्त हिमं घ्रंसं च रोहितः ॥४६॥
हिमं घ्रंसं चाधाय यूपान् कृत्वा पर्वतान् ।
वर्षाज्यावग्नी ईजाते रोहितस्य स्वर्विदः ॥४७॥
स्वर्विढो रोहितस्य ब्रह्मणाग्निः समिध्यते ।
तस्माद् घ्रंसस्तस्माद्धिमस्तस्माद् यज्ञोऽजायत ॥४८॥
ब्रह्मणाग्नी वावृधानौ ब्रह्मवृद्धौ ब्रह्माहुतौ ।
ब्रह्मेद्धावग्नी ईजाते रोहितस्य स्वर्विदः ॥४९॥
सत्ये अन्यः समाहितोऽप्स्व१न्यः समिध्यते ।
ब्रह्मेद्धावग्नी ईजाते रोहितस्य स्वर्विदः ॥५०॥
यं वातः परि शुम्भति यं वेन्द्रो ब्रह्मणस्पतिः ।
ब्रह्मेद्धावग्नी ईजाते रोहितस्य स्वर्विदः ॥५१॥
वेदिं भूमिं कल्पयित्वा दिवं कृत्वा दक्षिणाम् ।
घ्रंसं तदग्निं कृत्वा चकार विश्वमात्मन्वद् वर्षेणाज्येन रोहितः ॥५२॥
वर्षमाज्यं घ्रंसो अग्निर्वेदिर्भूमिरकल्पत ।
तत्रैतान्पर्वतानग्निर्गीर्भिरूर्ध्वाँ अकल्पयत् ॥
गीर्भिरूर्ध्वान् कल्पयित्वा रोहितो भूमिमब्रवीत् ।
त्वयीदं सर्वं जायतो यद् भूतं यच्च भवयम् ॥५४॥
स यज्ञः प्रथमो भूतो भव्यो अजायत ।
तस्माद्ध जज्ञ इदं सर्वं यत् किं चेदं विरोचते रोहितेन ऋषिणाभृतम् ॥५५॥
यश्च गां पदा स्फुरति प्रत्यङ् सूर्यं च मेहति ।
तस्य वृश्चामि ते मूलं न च्छायां करवोऽपरम् ॥५६॥
यो माभिच्छायमत्येषि मां चाग्निं चान्तरा ।
तस्य वृश्चामि ते मूलं न च्छायां करवोऽपरम् ॥५७॥
यो अद्य देव सूर्य त्वां च मां चान्तरायति ।
दुःष्वप्न्यं तस्मिंछमलं दुरितानि च मृज्महे ॥५८॥
मा प्र गाम पथो वयं मा यज्ञादिन्द्र सोमिनः। मान्त स्थुर्नो अरातयः ॥५९॥
यो यज्ञस्य प्रसाधनस्तन्तुर्देवेष्वाततः। तमाहुतमशीमहि॥६०॥

*udyaṁstvaṁ deva sūrya sapatnānava me jahi /*
*avaināṇaśmanā jahi te yantvadhamaṁ tamaḥ //32 //*
*vatso virājo vṛṣabho matīnāmā ruroha śukrapṛṣṭho'ntarikṣam /*
*ghṛtenārkamabhya rchanti vatsaṁ brahma santaṁ brahmaṇā vardhayanti //33 //*

*divaṁ cha roha pṛthivīṁ cha roha rāṣṭraṁ cha roha draviṇaṁ cha roha ।*
*prajāṁ cha rohāmṛtaṁ cha roha rohitena tanvaṁ1 saṁ spṛśasva ॥34 ॥*
*ye devā rāṣṭrabhṛto'bhito yanti sūryam ।*
*taiṣṭe rohitaḥ saṁvidāno rāṣṭraṁ dadhātu sumanasyamānaḥ ॥35 ॥*
*ut tvā yajñā brahmapūtā vahantyadhvagato harayastvā vahanti ।*
*tiraḥ samudramati rochase arṇavam ॥36 ॥*
*rohite dyāvāpṛthivī adhi śrite vasujiti gojiti saṁdhanājiti ।*
*sahasraṁ yasya janimāni sapta cha vocheyaṁ te nābhiṁ bhunasyādhi majmani ॥37 ॥*
*yaśā yāsi pradiśeā diśaścha yaśāḥ paśūnāmuta charṣaṇīnām ।*
*yaśāḥ pṛthivyā adityā upasthe'haṁ bhūyāsaṁ saviteva chāruḥ ॥38 ॥*
*amutra sanniha vetthetaḥ saṁstāni paśyasi ।*
*itaḥ paśyanti rochanaṁ dive sūryaṁ vipaśchitam ॥39 ॥*
*devo devān marchayasyantaścharasyarṇave ।*
*samānamagnimindhate taṁ viduḥ kavayaḥ pare ॥40 ॥*
*avaḥ pareṇa para enāvareṇa padā vatsaṁ bibhratī gaurudasthāt ।*
*sā kadrīchī kaṁ svidardhaṁ parāgāt kva svit sūte nahi yūthe asmin ॥41 ॥*
*ekapadī dvipadī sā chatuṣpadyaṣṭāpadī navapadī babhūvuṣī ।*
*sahasrākṣarā bhuvanasya paṅktistasyāḥ samudrā adhi vi kṣaranti ॥42 ॥*
*ārohan dyāmamṛtaḥ prāva me vachaḥ ।*
*ut tvā yajñā brahmapūtā vahantyadhvagato harayastvā vahanti ॥43 ॥*
*veda tat te amartya yat ta ākramaṇaṁ divi ।*
*yat te sadhasthaṁ parame vyoman ॥44 ॥*
*sūryo dyāṁ sūryaḥ pṛthivīṁ sūrya āpo'ti paśyati ।*
*sūryo bhūtsyaikaṁ chakṣurā ruroha divaṁ mahīm ॥45 ॥*
*urvīrāsan paridhayo vedirbhūmirakalpata ।*
*tatraitānagnī ādhatta himaṁ ghraṁsaṁ cha rohitaḥ ॥46 ॥*
*himaṁ ghraṁsaṁ chādhāya yūpān kṛtvā parvatān ।*
*varṣājyāvagnī ījāte rohitasya svarvidaḥ ॥47 ॥*
*svarviḍho rohitasya brahmaṇāgniḥ samidhyate ।*
*tasmād ghraṁsastasmāddhimastasmād yajño'jāyata ॥48 ॥*
*brahmaṇāgnī vāvṛdhānau brahmavṛddhau brahmāhutau ।*
*brahmeddhāvagnī ījāte rohitasya svarvidaḥ ॥49 ॥*
*satye anyaḥ samāhito'psva1nyaḥ samidhyate ।*
*brahmeddhāvagnī ījāte rohitasya svarvidaḥ ॥50 ॥*
*yaṁ vātaḥ pari śumbhati yaṁ vendro brahmaṇaspatiḥ ।*
*brahmeddhāvagnī ījāte rohitasya svarvidaḥ ॥51 ॥*
*vedi bhūmiṁ kalpayitvā divaṁ kṛtvā dakṣiṇām ।*
*ghraṁsaṁ tadagiṁna kṛtvā chakāra viśvamātmanvad varṣeṇājyena rohitaḥ ॥52 ॥*
*varṣamājyaṁ ghraṁso agnirvedirbhūmirakalpata ।*
*tatraitānparvatānagnirgīrbhirūrdhvāṁ̐ akalpayat ॥*
*gīrbhirūrdhvān kalpayitvā rohito bhūmimabravīt ।*
*tvayīdaṁ sarvaṁ jāyato yad bhūtaṁ yachcha bhavayam ॥54 ॥*
*sa yajñaḥ prathamo bhūto bhavyo ajāyata ।*
*tasmāddha jajña idaṁ sarvaṁ yat kiṁ chedaṁ virochate rohitena ṛṣiṇābhṛtam ॥55 ॥*
*yaścha gāṁ padā sphurati pratyaṅ sūryaṁ cha mehati ।*
*tasya vṛśchāmi te mūlaṁ na chchhāyāṁ karavo'param ॥56 ॥*
*yo mābhichchhāyamatyeṣi māṁ chāgiṁna chāntarā ।*
*tasya vṛśchāmi te mūlaṁ na chchhāyāṁ karavo'param ॥57 ॥*
*yo adya deva sūrya tvāṁ cha māṁ chāntarāyati ।*
*duḥṣvapnyaṁ tasmiṁchhamalaṁ duritāni cha mṛjmahe ॥58 ॥*
*mā pra gāma patho vayaṁ mā yajñādindra sominaḥ । mānta sthurno arātayaḥ ॥59 ॥*
*yo yajñasya prasādhanastanturdeveṣvātataḥ । tamāhutamaśīmahi ॥60 ॥*

अ. (Av.) १३.२.१-४६

उदस्य केतवो दिवि शुक्रा भ्राजन्त ईरते ।

आदित्यस्य नृचक्षसो महिव्रतस्य मीढुषः ॥१॥
दिशां प्रज्ञानां स्वरयन्तमर्चिषा सुपक्षमाशुं पतयन्तमर्णवे ।
स्तवाम सूर्यं भुवनय गोपां यो रशिमभिर्दिश आभाति सर्वाः ॥२॥
यत् प्राङ् प्रत्यङ् स्वधया यासि शीभं नानारूपे अहनी कर्षि मायया ।
तदादित्य महि तत् ते महि श्रवो यदेको विश्वं परि भूम जायसे ॥३॥
विपश्चितं तरणिं भ्राजमानं वहन्ति यं हरितः सप्त बह्वीः ।
स्रुताद् यमत्त्रिर्दिवमुन्निनाय तं त्वा पश्यन्ति परियान्माजिम् ॥४॥
मा त्वा दभन् परियान्तमाजिं स्वस्ति दुर्गाँ अति याहि शीभम् ।
दिवं च सूर्य पृथिवीं च देवीमहोरात्रे विमिमानो यदेषि ॥५॥
स्वस्ति ते सूर्य चरसे रथाय येनोभावन्तौ परियासि सद्यः ।
यं ते वहन्ति हरितो वहिष्ठाः शतमश्वा यदि वा सप्त बह्वीः ॥६॥
सुखं सूर्य रथमंशुमन्तं स्योनं सुवह्निमधि तिष्ठ वाजिनम् ।
यं ते वहन्ति हरितो वहिष्ठाः शतमश्वा यदि वा सप्त बह्वीः ॥७॥
सप्त सूर्यो हरितो यातवे रथे हिरण्यत्वचसो बृहतीरयुक्त ।
अमोचि शुक्रो रजसः परस्ताद् विधूय देवस्तमो दिवमारुहत् ॥८॥
उत् केतुना बृहता देव आगन्नपावृक् तमोऽभि ज्योतिरश्रैत् ।
दिव्यः सुपर्णः स वीरो व्यख्यददितेः पुत्रो भुवनानि विश्वा ॥९॥
उद्यन् रश्मीना तनुषे विश्वा रूपाणि पुष्यसि ।
उभा समुद्रौ क्रतुना वि भासि सर्वाल्लोँकान् परिभूभ्राजमानः ॥१०॥
पर्वापरं चरतो माययैतौ शिशू क्रीडन्तौ परि यातो अर्णवम् ।
विश्वान्यो भुवना विचष्टे हैरण्यैरन्यं हरितो वहन्ति ॥११॥
दिवि त्वात्त्रिरधारयत् सूर्या मासाय कर्तवे ।
स एषि सुधृतस्तपन् विश्वा भूतावचाकशत् ॥१२॥
उभावन्तौ समर्षसि वत्सः संमातराविव ।
नन्वे३तदितः पुरा ब्रह्म देवा अमी विदुः ॥१३॥
यत् समुद्रमनु श्रितं तत् सिषासति सूर्यः ।
अध्वास्य विततो महान् पूर्वश्चापरश्च यः ॥१४॥
तं समाप्नोति जूतिभिस्ततो नाप चिकित्सति ।
तेनामृतस्य भक्षं देवानां नाव रुन्धते ॥१५॥
उदु त्यं जातवेदसं देवं वहन्ति केतवः ।
दृशे विश्वाय सूर्यम् ॥१६॥
अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः ।
सूराय विश्वचक्षसे ॥१७॥
अदृश्रन्नस्य केतवो वि रश्मयो जनाँ अनु ।
भ्राजन्तो अग्नयो यथा ॥१८॥
तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य ।
विश्वमा भासि रोचन ॥१९॥
प्रत्यङ् देवानां विशः प्रतयङ्ङुदेषि मानुषीः ।
प्रतयङ् विश्वं स्वर्दृशे ॥२०॥
येना पावक चक्षसा भुरण्यन्तं जनाँ अनु ।
त्वं वरुण पश्यसि ॥२१॥
वि द्यामेषि रजस्पृथ्वहर्मिमानो अक्तुभिः ।
पश्यन् जन्मानि सूर्य ॥२२॥
सप्त त्वा हरितो रथे वहन्ति देव सूर्य ।
शोचिष्केशं विचक्षणम् ॥२३॥
अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्यः ।
ताभिर्याति स्वयुक्तिभिः ॥२४॥

रोहितो दिवमारुहत् तपसा तपस्वी ।
स योनिमैति स उ जायते पुनः स देवानामधिपतिर्बभूव ॥२५॥
यो विश्वचर्षणिरुत विश्वतोमुखो यो विश्वतस्पाणिरुत विश्वतस्पृथः ।
सं बाहुभ्यां भरति सं पतत्रैर्द्यावापृथिवी जनयन् देव एकः ॥२६॥
एकपाद् द्विपदो भूयो वि चक्रमे द्विपात् त्रिपादमभ्येति पश्चात् ।
द्विपाद्ध षद्पदो भूयो वि चक्रमे त एकपदस्तन्वं१ समासते ॥२७॥
अतन्द्रो यास्यन् हरितो यदास्थाद् द्वे रूपे कृणुते रोचमानः ।
केतुमानुद्यन्त्सहमानो राजांसि विश्वा आदित्य प्रवतो वि भासि ॥२८॥
बण्महाँ असि सूर्य बडादित्य महाँ असि ।
महांस्ते महतो महिमा त्वमादित्य महाँ असि ॥२९॥
रोचसे दिवि रोचसे अन्तरिक्षे पतंग पृथिव्यां रोचसे रोचसे अप्स्व१न्तः ।
उभा समुद्रौ रुच्या व्यापिथ देवो देवासि महिषः स्वर्जित् ॥३०॥
अर्वाङ् परस्तात् प्रयतो व्यध्व आशुर्विपश्चित् पतयन् पतंगः ।
विष्णुर्विचित्तः शवसाधितिष्ठन् प्र केतुना सहते विश्वमेजत् ॥३१॥
चित्रश्चिकित्वान् महिषः सुपर्ण आरोचयन् रोदसी अन्तरिक्षम् ।
अहोरात्रे परि सूर्यं वसाने प्रास्य विश्वा तिरतो वीर्याणि ॥३२॥
तिग्मो विभ्राजन् तन्वं१ शिशानोऽरंगमासः प्रवतो रराणः ।
ज्योतिष्मान् पक्षी महिषो वयोधा विश्वा आस्थात् प्रदिशः कल्पमानः ॥३३॥
चित्रं देवानां केतुरनीकं ज्योतिष्मान् प्रदिशः सूर्य उद्यन् ।
दिवाकरोऽति द्युम्नैस्तमांसि विश्वतारीद् दुरितानि शुक्रः ॥३४॥
चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्राद्द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥३५॥
उच्चा पतन्तमरुणं सुपर्णं मध्ये दिवस्तरणिं भ्राजमानम् ।
पश्याम त्वा सवितारं यमाहुरजस्रं ज्योतिर्यदविन्ददत्त्रिः ॥३६॥
दिवस्पृष्ठे धावमानं सुपर्णमदित्याः पुत्रं नाथकाम उप यामि भीतः ।
स नः सूर्य प्र तिर दीर्घमायुर्मा रिषाम सुमतौ ते स्याम ॥३७॥
सहस्राह्ण्यं वियतावस्य पक्षौ हरेर्हंसस्य पततः स्वर्गम् ।
स देवान्त्सर्वानुरस्युपदद्य संपश्यन् याति भुवनानि विश्वा ॥३८॥
रोहितः कालो अभवद् रोहितोऽग्रे प्रजापतिः ।
रोहितो यज्ञानां मुखं रोहितः स्व१राभरत् ॥३९॥
रोहितो लोको अभवद् रोहितोऽत्यतपद् दिवम् ।
रोहितो रश्मिभिर्भूमिं समुद्रमनु सं चरत् ॥४०॥
सर्वा दिशः समचरद् रोहितोऽधिपतिर्दिवः ।
दिवं समुद्रमाद् भूमिं सर्वं भूतं वि रक्षति ॥४१॥
आरोहंछुक्रो बृहतीरतन्द्रो द्वे रूपे कृणुते रोचमानः ।
चित्रश्चिकित्वान् महिषो वातमाया यावतो लोकानभि यद् विभाति ॥४२॥
अभ्य१न्यदेति पर्यन्यदस्यतेऽहोरात्राभ्यां महिषः कल्पमानः ।
सूर्यं वयं रजसि क्षियन्तं गातुविदं हवामहे नाधमानाः ॥४३॥
पृथिवीप्रो महिषो नाधमानस्य गातुरदब्धचक्षुः परि विश्वं बभूव ।
विश्वं संपश्यन्त्सुविदत्रो यजत्र इदं श्रृणोतु यदहं ब्रवीमि ॥४४॥
पर्यस्य महिमा पृथिवीं समुद्रं ज्योतिषा विभ्राजन् परि द्यामन्तरिक्षम् ।
सर्वं संपश्यन्त्सुविदत्रो यजत्र इदं श्रृणोतु यदहं ब्रवीमि ॥४५॥
अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम् ।
यह्वाइव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ ॥४६॥
*udasya ketavo divi śukrā bhrājanta īrate ।*
*ādityasya nṛchakṣaso mahivratasya mīḍhuṣaḥ ॥1॥*
*diśāṁ prajñānāṁ svarayantamarchiṣā supakṣamāśuṁ patayantamarṇave ।*
*stavāma sūryaṁ bhuvanaya gopāṁ yo raśimabhirdiśa ābhāti sarvāḥ ॥2॥*

*yat prāṅ pratyaṅ svadhayā yāsi śībhaṁ nānārūpe ahanī karṣi māyayā ।*
*tadāditya mahi tat te mahi śravo yadeko viśvaṁ pari bhūma jāyase ॥3॥*
*vipaśchitaṁ taraṇiṁ bhrājamānaṁ vahanti yaṁ haratiḥ sapta bahrīḥ ।*
*srutād yamattrirdivamunninăya taṁ tvā paśyanti pariyānmājim ॥4॥*
*mā tvā dabhan pariyāntamājiṁ svasti durgām̐ ati yāhi śībham ।*
*divaṁ cha sūrya pṛthivīṁ cha devīmahorātre vimimāno yadeṣi ॥5॥*
*svasti te sūrya charase rathāya yenobhāvantau pariyāsi sadyaḥ ।*
*yaṁ te vahanti harito vahiṣṭhāḥ śatamaśvā yadi vā sapta bahvīḥ ॥6॥*
*sukhaṁ sūrya rathamaṁśumantaṁ syonaṁ suvahnimadhi tiṣṭha vājinam ।*
*yaṁ te vahanti harito vahiṣṭhāḥ śatamaśvā yadi vā sapta bahvīḥ ॥7॥*
*sapta sūryo harito yātave rathe hiraṇyatvachaso bṛhatīrayukta ।*
*amochi śukro rajasaḥ parastād vidhūya devastamo divamāruhat ॥8॥*
*ut ketunā bṛhatā deva āgannapāvṛk tamo'bhi jyotiraśrait ।*
*divyaḥ suparṇaḥ sa vīro vyakhyadaditeḥ putro bhuvanāni viśvā ॥9॥*
*udyan raśmīnā tanuṣe viśvā rūpāṇi puṣyasi ।*
*ubhā samudrau kratunā vi bhāsi sarvāllom̐kān paribhūbhrājamānaḥ ॥10॥*
*parvāparaṁ charato māyayaitau śiśū krīḍantau pari yāto arṇavam ।*
*viśvānyo bhuvanā vichaṣṭe hairaṇyairanyaṁ harito vahanti ॥11॥*
*divi tvāttriradhārayat sūryā māsāya kartave ।*
*sa eṣi sudhṛtastapan viśvā bhūtāvachākaśat ॥12॥*
*ubhāvantau samarṣasi vatsaḥ saṁmātarāviva ।*
*nanve3taditaḥ purā brahma devā amī viduḥ ॥13॥*
*yat samudramanu śritaṁ tat siṣāsati sūryaḥ ।*
*adhvāsya vitato mahān pūrvaśchāparaścha yaḥ ॥14॥*
*taṁ samāpnoti jūtibhistato nāpa chikitsati ।*
*tenāmṛtasya bhakṣaṁ devānāṁ nāva rundhate ॥15॥*
*udu tyaṁ jātavedasaṁ devaṁ vahanti ketavaḥ ।*
*dṛśe viśvāya sūryam ॥16॥*
*apa tye tāyavo yathā nakṣatrā yantyaktubhiḥ ।*
*sūrāya viśvachakṣase ॥17॥*
*adṛśrannasya ketavo vi raśmayo janām̐ anu ।*
*bhrājanto agnayo yathā ॥18॥*
*taraṇirviśvadarśato jyotiṣkṛdasi sūrya ।*
*viśvamā bhāsi rochana ॥19॥*
*pratyaṅ devānāṁ viśaḥ pratayaṅṅudeṣi mānuṣīḥ ।*
*pratayaṅ viśvaṁ svardṛśe ॥20॥*
*yenā pāvaka chakṣasā bhuraṇyantaṁ janām̐ anu ।*
*tvaṁ varuṇa paśyasi ॥21॥*
*vi dyāmeṣi rajaspṛthvaharmimāno aktubhiḥ ।*
*paśyan janmāni sūrya ॥22॥*
*sapta tvā harito rathe vahanti deva sūrya ।*
*śochiṣkeśaṁ vichakṣaṇam ॥23॥*
*ayukta sapta śundhyuvaḥ sūro rathasya naptyaḥ ।*
*tābhiryāti svayuktibhiḥ ॥24॥*
*rohito divamāruhat tapasā tapasvī ।*
*sa yonimaiti sa u jāyate punaḥ sa devānāmadhipatirbabhūva ॥25॥*
*yo viśvacharṣaṇiruta viśvatomukho yo viśvataspāṇiruta viśvataspṛthaḥ ।*
*saṁ bāhubhyāṁ bharati saṁ patatrairdyāvāpṛthivī janayan deva ekaḥ ॥26॥*
*ekapād dvipado bhūyo vi chakrame dvipāt tripādamabhyeti paśchāt ।*
*dvipāddha ṣaṭpado bhūyo vi chakrame ta ekapadastanvaṁ1 samāsate ॥27॥*
*atandro yāsyan harito yadāsthād dve rūpe kṛṇute rochamānaḥ ।*
*ketumānudyantsahamāno rājāṁsi viśvā āditya pravato vi bhāsi ॥28॥*
*baṇmahām̐ asi sūrya baḍāditya mahām̐ asi ।*
*mahāṁste mahato mahimā tvamāditya mahām̐ asi ॥29॥*
*rochase divi rochase antarikṣe pataṁga pṛthivyāṁ rochase rochase apsva1ntaḥ ।*

*ubhā samudrau ruchyā vyāpitha devo devāsi mahiṣaḥ svarjit ॥30॥*
*arvāṅ parastāt prayato vyadhva āśurvipaśchit patayan pataṁgaḥ ।*
*viṣṇurvichittaḥ śavasādhitiṣṭhan pra ketunā sahate viśvamejat ॥31॥*
*chitraśchikitvān mahiṣaḥ suparṇa ārochayan rodasī antarikṣam ।*
*ahorātre pari sūryaṁ vasāne prāsya viśvā tirato vīryāṇi ॥32॥*
*tigmo vibhrājan tanvaṁ1 śiśāno'raṁgamāsaḥ pravato rarāṇaḥ ।*
*jyotiṣmān pakṣī mahiṣo vayodhā viśvā āsthāt pradiśaḥ kalpamānaḥ ॥33॥*
*chitraṁ devānāṁ keturanīkaṁ jyotiṣmān pradiśaḥ sūrya udyan ।*
*divākaro'ti dyumnaistamāṁsi viśvatārīd duritāni śukraḥ ॥34॥*
*chitraṁ devānāmudagādanīkaṁ chakṣurmitrasya varuṇasyāgneḥ ।*
*āprāddyāvāpṛthivī antarikṣaṁ sūrya ātmā jagatastasthuṣaścha ॥35॥*
*uchchā patantamaruṇaṁ suparṇaṁ madhye divastaraṇi bhrājamānam ।*
*paśyāma tvā savitāraṁ yamāhurajasraṁ jyotiryadavindadattriḥ ॥36॥*
*divaspṛṣṭhe dhāvamānaṁ suparṇamadityāḥ putraṁ nāthakāma upa yāmi bhītaḥ ।*
*sa naḥ sūrya pra tira dīrghamāyurmā riṣāma sumatau te syāma ॥37॥*
*sahasrāhṇyaṁ viyatāvasya pakṣau harerhaṁsasya patataḥ svargam ।*
*sa devāntsarvānurasyupadadya saṁpaśyan yāti bhuvanāni viśvā ॥38॥*
*rohitaḥ kālo abhavad rohito'gre prajāpatiḥ ।*
*rohito yajñānāṁ mukhaṁ rohitaḥ sva1rābharat ॥39॥*
*rohito loko abhavad rohito'tyatapad divam ।*
*rohito raśmibhirbhūmi samudramanu saṁ charat ॥40॥*
*sarvā diśaḥ samacharad rohito'dhipatirdivaḥ ।*
*divaṁ samudramād bhūmiṁ sarvaṁ bhūtaṁ vi rakṣati ॥41॥*
*ārohaṁchhukro bṛhatīratandro dve rūpe kṛṇute rochamānaḥ ।*
*chitraśchikitvān mahiṣo vātamāyā yāvato lokānabhi yad vibhāti ॥42॥*
*abhya1nyadeti paryanyadasyate'horātrābhyāṁ mahiṣaḥ kalpamānaḥ ।*
*sūryaṁ vayaṁ rajasi kṣiyantaṁ gātuvidaṁ havāmahe nādhamānāḥ ॥43॥*
*pṛthivīpro mahiṣo nādhamānasya gāturadabdhachakṣuḥ pari viśvaṁ babhūva ।*
*viśvaṁ saṁpaśyantsuvidatro yajatra idaṁ śṛṇotu yadahaṁ bravīmi ॥44॥*
*paryasya mahimā pṛthivīṁ samudraṁ jyotiṣā vibhrājan pari dyāmantarikṣam ।*
*sarvaṁ saṁpaśyantsuvidatro yajatra idaṁ śṛṇotu yadahaṁ bravīmi ॥45॥*
*abodhyagniḥ samidhā janānāṁ prati dhenumivāyatīmuṣāsam ।*
*yahvāiva pra vayāmujjihānāḥ pra bhānavaḥ sisrate nākamachchha ॥46॥*

अ. (Av.) १३.३.१-२६

य इमे द्यावापृथिवी जजान यो द्रापि कृतवा भुवनानि वस्ते ।
यस्मिन् क्षियन्ति प्रदिशः षडुर्वीर्याः पतंगो अनु विचाकशीति ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ॥१॥
यस्माद् वाता ऋतुथा पवन्ते यस्मात् समुद्रा अधि विक्षरन्ति ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ॥२॥
यो मारयति प्राणयति यस्मात् प्राणन्ति भुवनानि विश्वा ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ॥३॥
यः प्राणेन द्यावापृथिवी तर्पयत्यपानेन समुद्रस्य जठरं यः पिपर्ति ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति पुंच पाशान् ॥४॥
यस्मिन् विराट् परमेष्ठी प्रजापतिरग्निर्वैश्वानरः सह पङ्क्त्या श्रितः ।
यः परस्य प्राणं परमस्य तेज आददे ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ॥५॥
यस्मिन् षडुर्वीः पंच दिशो अधि श्रिताश्चतस्र आपो यज्ञस्य त्रयोऽक्षराः ।

यो अन्तरा रोदसी क्रुद्धश्चक्षुषैक्षत ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ॥६॥
यो अन्नादो अन्नपतिर्बभूव ब्रह्मणस्पतिरुत यः ।
भूतो भविष्यद् भुवनस्य यस्पतिः ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ॥७॥
अहोरात्रैर्विमितं त्रिंशदंगं त्रयोदशं मासं यो निर्मिमीते ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ॥८॥
कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत् पतन्ति ।
त आववृत्रन्त्सदनादृतस्य ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ॥९॥
यत् ते चन्द्रं कश्यप रोचनावद् यत् संहितं पुष्कलं चित्रभानु ।
यस्मिन्त्सूर्या अर्पिताः सप्त साकम् ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ॥१०॥
बृहदेनमनु वस्ते पुरस्ताद् रथन्तरं प्रति गृह्णाति पश्चात् ।
ज्योतिर्वसाने सदमप्रमादम् ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ॥११॥
बृहदन्यतः पक्ष आसीद् रथन्तरमन्यतः सबले सध्रीची ।
यद् रोहितमजनयन्त देवाः ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ॥१२॥
स वरुणः सायमग्निर्भवति स मित्रे भवति प्रातरुद्यन् ।
स सविता भूत्वान्तरिक्षेण याति स इन्द्रो भूत्वा तपति मध्यतो दिवम् ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ॥१३॥
सहस्राह्ण्यं वियतावस्य पक्षौ हरेर्हंसस्य पततः स्वर्गम् ।
स देवान्त्सर्वानुरस्युपदद्य संपशयन् याति भुवनानि विश्वा ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ॥१४॥
अयं स देवो अप्स्व१न्तः सहस्रमूलः पुरुशाको अत्त्रिः ।
य इदं विश्वं भुवनं जजान ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ॥१५॥
शुक्रं वहन्ति हरयो रघुष्यदो देवं दिवि वर्चसा भ्राजमानम् ।
यस्योर्ध्वा दिवं तन्व१स्तपन्त्यर्वाङ् सुवर्णैः पटरैर्वि भाति ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ॥१६॥
येनादित्यान् हरितः संवहन्ति येन यज्ञेन बहवो यन्ति प्रजानन्तः ।
यदेकं ज्योतिर्बहुधा विभाति ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ॥१७॥
सप्त युंजन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा ।

त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधि तस्थुः ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ॥१८॥
अष्टधा युक्तो वहति वह्निरुग्रः पिता देवानां जनिता मतीनाम् ।
ऋतस्य तन्तुं मनसा मिमानः सर्वा दिशः पवते मातरिश्वा ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ॥१९॥
सम्यंचं तन्तुं प्रदिशोऽनु सर्वा अन्तर्गायत्र्याममृतस्य गर्भे ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ॥२०॥
निम्रुचस्तिस्रो व्युषो ह तिस्रस्त्रीणि रजांसि दिवो अंग तिस्रः ।
विद्मा ते अग्ने त्रेधा जनित्रं त्रेधा देवानां जनिमानि विद्म ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ॥२१॥
वि य और्णोत् पृथिवी जायमान आ समुद्रमदधादन्तरिक्षे ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ॥२२॥
त्वमग्ने क्रतुभिः केतुभिर्हितो३र्कः समिद्ध उदरोचथा दिवि ।
किमभ्या र्चन्मरुतः पृश्निमातरो यद् रोहितमजनयन्त देवाः ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ॥२३॥
य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
योऽस्येशे द्विपदो यश्चतुष्पदः ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ॥२४॥
एकपाद् द्विपदो भूयो वि चक्रमे द्विपात् त्रिपादमभ्ये ति पश्चात् ।
चतुष्पाचचक्रे द्विपदामभिस्वरे संपश्यन् पङ्क्तिमुपतिष्ठमानः ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ॥२५॥
कृष्णायाः पुत्रो अर्जुनो रात्र्या वत्सोजायत ।
स ह द्यामधि रोहति रुहो रुरोह रोहितः ॥२६॥
*ya ime dyāvāpṛthivī jajāna yo drāpi kṛtavā bhuvanāni vaste* /
*yasmin kṣiyanti pradiśaḥ ṣaḍurvīryāḥ pataṁgo anu vichākaśīti* /
*tasya devasya kruddhasyaitadāgo ya evaṁ vidvāṁsaṁ brāhmaṇaṁ jināti* /
*ud vepaya rohita pra kṣiṇīhi brahmajyasya prati muṁcha pāśān* //1 //
*yasmād vātā ṛtuthā pavante yasmāt samudrā adhi vikṣaranti* /
*tasya devasya kruddhasyaitadāgo ya evaṁ vidvāṁsaṁ brāhmaṇaṁ jināti* /
*ud vepaya rohita pra kṣiṇīhi brahmajyasya prati muṁcha pāśān* //2 //
*yo mārayati prāṇayati yasmāt prāṇanti bhuvanāni viśvā* /
*tasya devasya kruddhasyaitadāgo ya evaṁ vidvāṁsaṁ brāhmaṇaṁ jināti* /
*ud vepaya rohita pra kṣiṇīhi brahmajyasya prati muṁcha pāśān* //3 //
*yaḥ prāṇena dyāvāpṛthivī tarpayatyapānena samudrasya jaṭharaṁ yaḥ piparti* /
*tasya devasya kruddhasyaitadāgo ya evaṁ vidvāṁsaṁ brāhmaṇaṁ jināti* /
*ud vepaya rohita pra kṣiṇīhi brahmajyasya prati puṁcha pāśān* //4 //
*yasmin virāṭ parameṣṭhī prajāpatiragnirvaiśvānaraḥ saha paṅktyā śritaḥ* /
*yaḥ parasya prāṇaṁ paramasya teja ādade* /
*tasya devasya kruddhasyaitadāgo ya evaṁ vidvāṁsaṁ brāhmaṇaṁ jināti* /
*ud vepaya rohita pra kṣiṇīhi brahmajyasya prati muṁcha pāśān* //5 //
*yasmin ṣaḍurvīḥ paṁcha diśo adhi śritāśchatasra āpo yajñasya trayo'kṣarāḥ* /
*yo antarā rodasī kruddhaśchakṣuṣaikṣata* /

*tasya devasya kruddhasyaitadāgo ya evaṁ vidvāṁsaṁ brāhmaṇaṁ jināti /*
*ud vepaya rohita pra kṣiṇīhi brahmajyasya prati muṁcha pāśān //6 //*
*yo annādo annapatirbabhūva brahmaṇaspatiruta yaḥ /*
*bhūto bhaviṣyad bhuvanasya yaspatiḥ /*
*tasya devasya kruddhasyaitadāgo ya evaṁ vidvāṁsaṁ brāhmaṇaṁ jināti /*
*ud vepaya rohita pra kṣiṇīhi brahmajyasya prati muṁcha pāśān //7 //*
*ahorātrairvimitaṁ triṁśadaṁgaṁ trayodaśaṁ māsaṁ yo nirmimīte /*
*tasya devasya kruddhasyaitadāgo ya evaṁ vidvāṁsaṁ brāhmaṇaṁ jināti /*
*ud vepaya rohita pra kṣiṇīhi brahmajyasya prati muṁcha pāśān //8 //*
*kṛṣṇaṁ niyānaṁ harayaḥ suparṇā apo vasānā divamut patanti /*
*ta āvavṛtrantsadanādṛtasya /*
*tasya devasya kruddhasyaitadāgo ya evaṁ vidvāṁsaṁ brāhmaṇaṁ jināti /*
*ud vepaya rohita pra kṣiṇīhi brahmajyasya prati muṁcha pāśān //9 //*
*yat te chandraṁ kaśyapa rochanāvad yat saṁhitaṁ puṣkalaṁ chitrabhānu /*
*yasmintsūryā arpitāḥ sapta sākam /*
*tasya devasya kruddhasyaitadāgo ya evaṁ vidvāṁsaṁ brāhmaṇaṁ jināti /*
*ud vepaya rohita pra kṣiṇīhi brahmajyasya prati muṁcha pāśān //10 //*
*bṛhadenamanu vaste purastād rathantaraṁ prati gṛhṇāti paśchāt /*
*jyotirvasāne sadamapramādam /*
*tasya devasya kruddhasyaitadāgo ya evaṁ vidvāṁsaṁ brāhmaṇaṁ jināti /*
*ud vepaya rohita pra kṣiṇīhi brahmajyasya prati muṁcha pāśān //11 //*
*bṛhadanyataḥ pakṣa āsīd rathantaramanyataḥ sabale sadhrīchī /*
*yad rohitamajanayanta devāḥ /*
*tasya devasya kruddhasyaitadāgo ya evaṁ vidvāṁsaṁ brāhmaṇaṁ jināti /*
*ud vepaya rohita pra kṣiṇīhi brahmajyasya prati muṁcha pāśān //12 //*
*sa varuṇaḥ sāyamagnirbhavati sa mitre bhavati prātarudyan /*
*sa savitā bhūtvāntarikṣeṇa yāti sa indro bhūtvā tapati madhyato divam /*
*tasya devasya kruddhasyaitadāgo ya evaṁ vidvāṁsaṁ brāhmaṇaṁ jināti /*
*ud vepaya rohita pra kṣiṇīhi brahmajyasya prati muṁcha pāśān //13 //*
*sahasrāhṇyaṁ viyatāvasya pakṣau harerhaṁsasya patataḥ svargam /*
*sa devāntsarvānurasyupadadya saṁpaśayan yāti bhuvanāni viśvā /*
*tasya devasya kruddhasyaitadāgo ya evaṁ vidvāṁsaṁ brāhmaṇaṁ jināti /*
*ud vepaya rohita pra kṣiṇīhi brahmajyasya prati muṁcha pāśān //14 //*
*ayaṁ sa devo apsva1ntaḥ sahasramūlaḥ puruśāko attriḥ /*
*ya idaṁ viśvaṁ bhuvanaṁ jajāna /*
*tasya devasya kruddhasyaitadāgo ya evaṁ vidvāṁsaṁ brāhmaṇaṁ jināti /*
*ud vepaya rohita pra kṣiṇīhi brahmajyasya prati muṁcha pāśān //15 //*
*śukraṁ vahanti harayo raghuṣyado devaṁ divi varchasā bhrājamānam /*
*yasyordhvā divaṁ tanva1stapantyarvāṅ suvarṇaiḥ paṭarairvi bhāti /*
*tasya devasya kruddhasyaitadāgo ya evaṁ vidvāṁsaṁ brāhmaṇaṁ jināti /*
*ud vepaya rohita pra kṣiṇīhi brahmajyasya prati muṁcha pāśān //16 //*
*yenādityān haritaḥ saṁvahanti yena yajñena bahavo yanti prajānantaḥ /*
*yadekaṁ jyotirbahudhā vibhāti /*
*tasya devasya kruddhasyaitadāgo ya evaṁ vidvāṁsaṁ brāhmaṇaṁ jināti /*
*ud vepaya rohita pra kṣiṇīhi brahmajyasya prati muṁcha pāśān //17 //*
*sapta yuṁjanti rathamekachakrameko aśvo vahati saptanāmā /*
*trinābhi chakramajaramanarvaṁ yatremā viśvā bhuvanādhi tasthuḥ /*
*tasya devasya kruddhasyaitadāgo ya evaṁ vidvāṁsaṁ brāhmaṇaṁ jināti /*
*ud vepaya rohita pra kṣiṇīhi brahmajyasya prati muṁcha pāśān //18 //*
*aṣṭadhā yukto vahati vahnirugraḥ pitā devānāṁ janitā matīnām /*
*ṛtasya tantuṁ manasā mimānaḥ sarvā diśaḥ pavate mātariśvā /*
*tasya devasya kruddhasyaitadāgo ya evaṁ vidvāṁsaṁ brāhmaṇaṁ jināti /*
*ud vepaya rohita pra kṣiṇīhi brahmajyasya prati muṁcha pāśān //19 //*
*samyaṁchaṁ tantuṁ pradiśo'nu sarvā antargāyatrayāmamṛtasya garbhe /*
*tasya devasya kruddhasyaitadāgo ya evaṁ vidvāṁsaṁ brāhmaṇaṁ jināti /*

*ud vepaya rohita pra kṣiṇīhi brahmajyasya prati muṁcha pāśān ॥20 ॥*
*nimruchastisro vyuṣo ha tisrastrīṇi rajāṁsi divo aṁga tisraḥ ।*
*vidmā te agne tredhā janitraṁ tredhā devānāṁ janimāni vidma ।*
*tasya devasya kruddhasyaitadāgo ya evaṁ vidvāṁsaṁ brāhmaṇaṁ jināti ।*
*ud vepaya rohita pra kṣiṇīhi brahmajyasya prati muṁcha pāśān ॥21 ॥*
*vi ya aurṇot pṛthivī jāyamāna ā samudramadadhādantarikṣe ।*
*tasya devasya kruddhasyaitadāgo ya evaṁ vidvāṁsaṁ brāhmaṇaṁ jināti ।*
*ud vepaya rohita pra kṣiṇīhi brahmajyasya prati muṁcha pāśān ॥22 ॥*
*tvamagne kratubhiḥ ketubhirhito3rkaḥ samiddha udarochathā divi ।*
*kimabhyā rchanmarutaḥ pṛśnimātaro yad rohitamajanayanta devāḥ ।*
*tasya devasya kruddhasyaitadāgo ya evaṁ vidvāṁsaṁ brāhmaṇaṁ jināti ।*
*ud vepaya rohita pra kṣiṇīhi brahmajyasya prati muṁcha pāśān ॥23 ॥*
*ya ātmadā baladā yasya viśva upāsate praśiṣaṁ yasya devāḥ ।*
*yo'syeśe dvipado yaśchatuṣpadaḥ ।*
*tasya devasya kruddhasyaitadāgo ya evaṁ vidvāṁsaṁ brāhmaṇaṁ jināti ।*
*ud vepaya rohita pra kṣiṇīhi brahmajyasya prati muṁcha pāśān ॥24 ॥*
*ekapād dvipado bhūyo vi chakrame dvipāt tripādamabhye ti paśchāt ।*
*chatuṣpāchachakre dvipadāmabhisvare saṁpaśyan paṅktimupatiṣṭhamānaḥ ।*
*tasya devasya kruddhasyaitadāgo ya evaṁ vidvāṁsaṁ brāhmaṇaṁ jināti ।*
*ud vepaya rohita pra kṣiṇīhi brahmajyasya prati muṁcha pāśān ॥25 ॥*
*kṛṣṇāyāḥ putro arjuno rātrayā vatsojāyata ।*
*sa ha dyāmadhi rohati ruho ruroha rohitaḥ ॥26 ॥*

९. अश्विनी बृहस्पतिः (Aśvinī Bṛhaspatiḥ) - अ. (Av.) ५.२६.१२

अश्विना ब्रह्मणा यातमर्वांचौ वषट्कारेण यज्ञं वर्धयन्तौ ।
बृहस्पते ब्रह्मणा याह्यर्वाङ् यज्ञो अयं स्वरिदं यजमानाय स्वाहा ॥१२ ॥
*aśvinā brahmaṇā yātamarvāṁchau vaṣaṭkāreṇa yajñaṁ vardhayantau ।*
*bṛhaspate brahmaṇā yāhyarvāṅ yajño ayaṁ svaridaṁ yajamānāya svāhā ॥12 ॥*

१०. आत्मा (Ātmā) - अ. (Av.) ७.२१.१; ७.६७.१; ७.१०३.१; ७.१०४.१; १९.५१.१

अ. (Av.) ७.२१.१

समेत विश्वे वचसा पति दिव एको विभूरतिथिर्जनानाम् ।
स पूर्व्यो नूतनमाविवासत् तं वर्तनिरनु वावृत एकमित् पुरु ॥१ ॥
*sameta viśve vachasā pati diva eko vibhūratithirjanānām ।*
*sa pūrvyo nūtanamāvivāsat taṁ vartaniranu vāvṛta ekamit puru ॥1 ॥*

अ. (Av.) ७.६७.१

पुनर्मैत्विन्द्रियं पुनरात्मा द्रविणं ब्राह्मणं च। पुनरग्नयो धिष्ण्या यथास्थाम कल्पयन्तामिहैव ॥१ ॥
*punarmaitvindriyaṁ punarātmā draviṇaṁ brāhmaṇaṁ cha । punaragnayo dhiṣṇyā yathāsthāma kalpayantāmihaiva ॥1 ॥*

अ. (Av.) ७.१०३.१

को अस्या नो द्रुहोऽवद्यवत्या उन्नेष्यति क्षत्रियो वस्य इच्छन् ।
को यज्ञकामः क उ पूर्तिकामः को देवेषु वनुते दीर्घमायुः ॥१ ॥
*ko asyā no drṛho'vadyavatyā unneṣyati kṣatriyo vasya ichchhan ।*
*ko yajñakāmaḥ ka u pūrtikāmaḥ ko deveṣu vanute dīrghamāyuḥ ॥1 ॥*

अ. (Av.) ७.१०४.१

कः पृश्निं धेनुं वरुणेन दत्तामथर्वणे सुदुघां नित्यवत्साम् ।
बृहस्पतिना सख्यं जुषाणो यथावशं तन्वः कल्पयाति ॥१ ॥
*kaḥ pṛśni dhenuṁ varuṇena dattāmatharvaṇe sudughāṁ nityavatsām ।*
*bṛhaspatinā sakhyaṁ juṣāṇo yathāvaśaṁ tanvaḥ kalpayāti ॥1 ॥*

अ. (Av.) १९.५१.१

अयुतोऽहमयुतो म आत्मायुतं मे चक्षुरयुतं मे श्रोत्रमयुतो मे प्राणोऽयुतो मेऽपानोऽयुतो मे व्यानोऽयुतोऽहं सर्वः ॥१ ॥

*ayuto'hamayuto ma ātmāyutaṁ me chakṣurayutaṁ me śrotramayuto me prāṇo'yuto me'pāno'yuto me vyāno'yuto'haṁ sarvaḥ* //1 //

११. आदित्यः (Ādityaḥ) - अ. (Av.) १७.१.१-३०

विषामहिं सहमानं सासहानं सहीयांसम् ।
सहमानं सहोजितं स्वर्जितं गोजितं संधनाजितम्। ईड्यं नाम ह्व इन्द्रमायुष्मान् भूयासम्॥१॥
विषासहिं सहमानं सासहानं सहीयांसम् ।
सहमानं सहोजितं स्वर्जितं गोजितं संधनाजितम्।
ईड्यं नाम ह्व इन्द्रं प्रियो देवानां भूयासम् ॥२॥
विषासहिं सहमानं सासहानं सहीयांसम् ।
सहमानं सहोजितं स्वर्जितं गोजितं संधनाजितम्।
ईड्यं नाम ह्व इन्द्रं प्रियः प्रजानां भूयासम् ॥३॥
विषासहिं सहमानं सासहानं सहीयांसम् ।
सहमानं सहोजितं स्वर्जितं गोजितं संधनाजितम्।
ईड्यं नाम ह्व इन्द्रं प्रियः पशूनां भूयासम् ॥४॥
विषासहिं सहमानं सासहानं सहीयांसम् ।
सहमानं सहोजितं स्वर्जितं गोजितं संधनाजितम्।
ईड्यं नाम ह्व इन्द्रं प्रियः समानानां भूयासम् ॥५॥
उदिह्युदिहि सूर्य वर्चसा माभ्युदिहि ।
द्विषंश्चमह्यं रध्यतु मा चाहं द्विषते रधं त्वेद् विष्णो बहुधा वीर्याणि ।
त्वं नः पृणीहि पशुभिर्विश्वरूपैः सुधायां मा धेहि परमे व्योमन् ॥६॥
उदिह्युदिहि सूर्य वर्चसा माभ्युदिहि ।
यांश्च पश्यामि यांश्च न तेषु मा सुमतिं कृधि त्वेद् विष्णो बहुधा वीर्याणि ।
त्वं नः पृणीहि पशुभिर्विश्वरूपैः सुधायां मा धेहि परमे व्योमन् ॥७॥
मा त्वा दभन्त्सलिले अप्स्व१न्तर्ये पाशिन उपतिष्ठन्त्यत्र ।
हित्वाशस्तिं दिवमारुक्ष एतां स नो मृड सुमतौ ते स्याम तवेद् विष्णो बहुधा वीर्याणि ।
त्वं नः पृणीहि पशुभिर्विश्वरूपैः सुधायां मा धेहि परमे व्योमन् ॥८॥
त्वं न इन्द्र महते सौभगायादब्धेभिः परि पाह्यक्तुभिस्तवेद विष्णो बहुधा वीर्याणि ।
त्वं नः पृणीहि पशुभिर्विश्वरूपैः सुधायां मा धेहि परमे व्योमन् ॥९॥
त्वं न इन्द्रोतिभिः शिवाभिः शंतमो भव ।
आरोहंस्त्रिदिवं दिवो गृणानः सोमपीतये प्रियधामा स्वस्तये तवेद् विष्णो बहुधा वीर्याणि ।
त्वं नः पृणीहि पशुभिर्विश्वरूपैः सुधायां मा धेहि परमे व्योमन् ॥१०॥
त्वमिन्द्रासि विश्वजित् सर्ववित् पुरुहूतस्त्वमिन्द्र ।
त्वमिन्द्रेमं सुहवं स्तोममेरयस्व स नो मृड सुमतौ ते स्याम तवेद् विष्णो बहुधा वीर्याणि ।
त्वं नः पृणीहि पशुभिर्विश्वरूपैः सुधायां मा धेहि परमे व्योमन् ॥११॥
अदब्धो दिवि पृथिव्यामुतासि न त आपुर्महिमानमन्तरिक्षे ।
अदब्धेन ब्रह्मणा वावृधानः स त्वं न इन्द्र दिवि षंछर्म यच्छ तवेद् विष्णो बहुधा वीर्याणि ।
त्वं नः पृणीहि पशुभिर्विश्वरूपैः सुधायां मा धेहि परमे व्योमन् ॥१२॥
या त इन्द्र तनूरप्सु या पृथिव्यां यान्तरग्नौ या त इन्द्र पवमाने स्वर्विदि ।
ययेन्द्र तन्वा३न्तरिक्षं व्यापिथ तया न इन्द्र तन्वा३ शर्म यच्छ त्वेद् विष्णो बहुधा वीर्याणि ।
त्वं नः पृणीहि पशुभिर्विश्वरूपैः सुधायां मा धेहि परमे व्योमन् ॥१३॥
त्वामिन्द्र ब्रह्मणा वर्धयन्तः सत्रं नि षेदुरृषयो नाधमानास्तवेद् विष्णो बहुधा वीर्याणि ।
त्वं नः पृणीहि पशुभिर्विश्वरूपैः सुधायां मा धेहि परमे व्योमन् ॥१४॥
त्वं तृतं त्वं पर्येष्युत्सं सहस्रधारं विदथं स्वर्विदं त्वेद् विष्णो बहुधा वीर्याणि ।
त्वं नः पृणीहि पशुभिर्विश्वरूपैः सुधायां मा धेहि परमे व्योमन् ॥१५॥
त्वं रक्षसे प्रदिशश्चतस्रस्त्वं शोचिषा नभसी वि भासि ।
त्वमिमा विश्वा भुवनानु तिष्ठस ऋतस्य पन्थामन्वेषि विद्वांस्तवेद् विष्णो बहुधा वीर्याणि ।
त्वं नः पृणीहि पशुभिर्विश्वरूपैः सुधायां मा धेहि परमे व्योमन् ॥१६॥

पंचभिः पराङ् तपस्येकयार्वाङशस्तिमेषि सुदिने बाधमानस्तवेद् विष्णो बहुधा वीर्याणि ।
त्वं नः पृणीहि पशुभिर्विश्वरूपैः सुधायां मा धेहि परमे व्योमन् ॥१७॥
त्वमिन्द्रस्त्वं महेन्द्रस्त्वं लोकस्त्वं प्रजापतिः ।
तुभ्यं यज्ञो वि तायते तुभ्यं जुह्वति जुह्वतस्तवेद् विष्णो बहुधा वीर्याणि ।
त्वं नः पृणीहि पशुभिर्विश्वरूपैः सुधायां मा धेहि परमे व्योमन् ॥१८॥
असति सत् प्रतिष्ठितं सति भूतं प्रतिष्ठितम् ।
भूतं ह भव्य आहितं भव्यं भूते प्रतिष्ठितं तवेद् विष्णो बहुधा वीर्याणि ।
त्वं नः पृणीहि पशुभिर्विश्वरूपैः सुधायां मा धेहि परमे व्योमन् ॥१९॥
शुक्रोऽसि भ्राजोऽसि। स यथा त्वं भ्राजता भ्राजोऽस्येवाहं भ्राजता भ्राज्यासम् ॥२०॥
रुचिरसि रोचोऽसि। स यथा त्वं रुच्या रोचोऽस्येवाहं पशुभिश्च ब्रह्मणवर्चसेन च रुचिषीय।२१।
उद्यते नम उदायते नम उदिताय नमः। विराजे नमः स्वराजे नमः सम्राजे नमः ॥२२॥
अस्तंयते नमोऽस्तमेष्यते नमोऽस्तमिताय नमः। विराजे नमः स्वराजे नमः ॥२३॥
उदगादयमादित्यो विश्वेन तपसा सह ।
सपत्नान् मह्यं रन्धयन् मा चाहं द्विषते रधं तवेद् विष्णो बहुधा वीर्याणि ।
त्वं नः पृणीहि पशुभिर्विश्वरूपैः सुधायां मा धेहि परमे व्योमन् ॥२४॥
आदित्य नावमारुक्षः शतारित्रां स्वस्तये। अहर्मात्यपीपरो रात्रिं सत्राति पारय ॥२५॥
सूर्य नावमारुक्षः शतारित्रां स्वस्तये। रात्रिं मात्यपीपरोऽहः सत्राति पारय ॥२६॥
प्रजापतेरावृतो ब्रह्मणा वर्मणाहं कश्यपस्य ज्योतिषा वर्चसा च ।
जरदष्टिः कृतवीर्यो विहायाः सहस्रायुः सुकृतश्चरेयम् ॥२७॥
परीवृतो ब्रह्मणा वर्मणाहं कश्यपस्य ज्योतिषा वर्चसा च ।
मा मा प्रापन्निषवो दैव्या या मा मानुषीरवसृष्टा वधाय ॥२८॥
ऋतेन गुप्त ऋतुभिश्च सर्वैर्भूतेन गुप्तो भव्येन चाहम् ।
मा मा प्रापत् पाप्मा मोत मृत्युरन्तर्दधेऽहं सलिलेन वाचः ॥२९॥
अग्निर्मा गोप्ता परि पातु विश्वत उद्यन्त्सूर्यो नुदतां मृत्युपाशान् ।
व्युच्छन्तीरुषसः पर्वता ध्रुवाः सहस्रं प्राणा मय्या यतन्ताम् ॥३०॥
*viṣāmahiṁ sahamānaṁ sāsahānaṁ sahīyāṁsam* ।
*sahamānaṁ sahojitaṁ svarjitaṁ gojitaṁ saṁdhanājitam । īḍyaṁ nāma hva indramāyuṣmān bhūyāsam ॥1॥*
*viṣāsahiṁ sahamānaṁ sāsahānaṁ sahīyāṁsam* ।
*sahamānaṁ sahojitaṁ svarjitaṁ gojitaṁ saṁdhanājitam* ।
*īḍyaṁ nāma hva indraṁ priyo devānāṁ bhūyāsam ॥2॥*
*viṣāsahiṁ sahamānaṁ sāsahānaṁ sahīyāṁsam* ।
*sahamānaṁ sahojitaṁ svarjitaṁ gojitaṁ saṁdhanājitam* ।
*īḍyaṁ nāma hva indraṁ priyaḥ prajānāṁ bhūyāsam ॥3॥*
*viṣāsahiṁ sahamānaṁ sāsahānaṁ sahīyāṁsam* ।
*sahamānaṁ sahojitaṁ svarjitaṁ gojitaṁ saṁdhanājitam* ।
*īḍyaṁ nāma hva indraṁ priyaḥ paśūnāṁ bhūyāsam ॥4॥*
*viṣāsahiṁ sahamānaṁ sāsahānaṁ sahīyāṁsam* ।
*sahamānaṁ sahojitaṁ svarjitaṁ gojitaṁ saṁdhanājitam* ।
*īḍyaṁ nāma hva indraṁ priyaḥ samānānāṁ bhūyāsam ॥5॥*
*udihyudihi sūrya varchasā mābhyudihi* ।
*dviṣaṁśchamahyaṁ radhyatu mā chāhaṁ dviṣate radhaṁ tved viṣṇo bahudhā vīryāṇi* ।
*tvaṁ naḥ pṛṇīhi paśubhirviśvarūpaiḥ sudhāyāṁ mā dhehi parame vyoman ॥6॥*
*udihyudihi sūrya varchasā mābhyudihi* ।
*yāṁścha paśyāmi yāṁścha na teṣu mā sumatiṁ kṛdhi tved viṣṇo bahudhā vīryāṇi* ।
*tvaṁ naḥ pṛṇīhi paśubhirviśvarūpaiḥ sudhāyāṁ mā dhehi parame vyoman ॥7॥*
*mā tvā dabhantsalile apsva1ntarye pāśina upatiṣṭhantyatra* ।
*hitvāśasiṁta divamārukṣa etāṁ sa no mṛḍa sumatau te syāma taved viṣṇo bahudhā vīryāṇi* ।
*tvaṁ naḥ pṛṇīhi paśubhirviśvarūpaiḥ sudhāyāṁ mā dhehi parame vyoman ॥8॥*
*tvaṁ na indra mahate saubhagāyādabdhaibhiḥ pari pāhyaktubhistaveda viṣṇo bahudhā*

*vīryāṇi* ।
*tvaṁ naḥ pṛṇīhi paśubhirviśvarūpaiḥ sudhāyāṁ mā dhehi parame vyoman* ॥9॥
*tvaṁ na indrotibhiḥ śivābhiḥ śaṁtamo bhava* ।
*ārohaṁstridivaṁ divo gṛṇānaḥ somapītaye priyadhāmā svastaye taved viṣṇo bahudhā vīryāṇi* ।
*tvaṁ naḥ pṛṇīhi paśubhirviśvarūpaiḥ sudhāyāṁ mā dhehi parame vyoman* ॥10॥
*tvamindrāsi viśvajit sarvavit puruhūtastvamindra* ।
*tvamindremaṁ suhavaṁ stomamerayasva sa no mṛḍa sumatau te syāma taved viṣṇo bahudhā vīryāṇi* ।
*tvaṁ naḥ pṛṇīhi paśubhirviśvarūpaiḥ sudhāyāṁ mā dhehi parame vyoman* ॥11॥
*adabdho divi pṛthivyāmutāsi na ta āpurmahimānamantarikṣe* ।
*adabdhena brahmaṇā vāvṛdhānaḥ sa tvaṁ na indra divi ṣaṁchharma yachchha taved viṣṇo bahudhā vīryāṇi* ।
*tvaṁ naḥ pṛṇīhi paśubhirviśvarūpaiḥ sudhāyāṁ mā dhehi parame vyoman* ॥12॥
*yā ta indra tanūrapsu yā pṛthivyāṁ yāntaragnau yā ta indra pavamāne svarvidi* ।
*yayendra tanvā3ntarikṣaṁ vyāpitha tayā na indra tanvā3 śarma yachchha tved viṣṇo bahudhā vīryāṇi* ।
*tvaṁ naḥ pṛṇīhi paśubhirviśvarūpaiḥ sudhāyāṁ mā dhehi parame vyoman* ॥13॥
*tvāmindra brahmaṇā vardhayantaḥ satraṁ ni ṣedurṛṣayo nādhamānāstaved viṣṇo bahudhā vīryāṇi* ।
*tvaṁ naḥ pṛṇīhi paśubhirviśvarūpaiḥ sudhāyāṁ mā dhehi parame vyoman* ॥14॥
*tvaṁ tṛtaṁ tvaṁ paryeṣyutsaṁ sahasradhāraṁ vidathaṁ svarvidaṁ tved viṣṇo bahudhā vīryāṇi* ।
*tvaṁ naḥ pṛṇīhi paśubhirviśvarūpaiḥ sudhāyāṁ mā dhehi parame vyoman* ॥15॥
*tvaṁ rakṣase pradiśaśchatasrastvaṁ śochiṣā nabhasī vi bhāsi* ।
*tvamimā viśvā bhuvanānu tiṣṭhasa ṛtasya panthāmanveṣi vidvāṁstaved viṣṇo bahudhā vīryāṇi* ।
*tvaṁ naḥ pṛṇīhi paśubhirviśvarūpaiḥ sudhāyāṁ mā dhehi parame vyoman* ॥16॥
*paṁchabhiḥ parāṅ tapasyekayārvāṅaśastimeṣi sudine bādhamānastaved viṣṇo bahudhā vīryāṇi* ।
*tvaṁ naḥ pṛṇīhi paśubhirviśvarūpaiḥ sudhāyāṁ mā dhehi parame vyoman* ॥17॥
*tvamindrastvaṁ mahendrastvaṁ lokastvaṁ prajāpatiḥ* ।
*tubhyaṁ yajño vi tāyate tubhyaṁ juhvati juhvatastaved viṣṇo bahudhā vīryāṇi* ।
*tvaṁ naḥ pṛṇīhi paśubhirviśvarūpaiḥ sudhāyāṁ mā dhehi parame vyoman* ॥18॥
*asati sat pratiṣṭhitaṁ sati bhūtaṁ pratiṣṭhitam* ।
*bhūtaṁ ha bhavya āhitaṁ bhavyaṁ bhūte pratiṣṭhitaṁ taved viṣṇo bahudhā vīryāṇi* ।
*tvaṁ naḥ pṛṇīhi paśubhirviśvarūpaiḥ sudhāyāṁ mā dhehi parame vyoman* ॥19॥
*śukro'si bhrājo'si* । *sa yathā tvaṁ bhrājatā bhrājo'syevāhaṁ bhrājatā bhrājyāsam* ॥20॥
*ruchirasi rocho'si* । *sa yathā tvaṁ ruchyā rocho'syevāhaṁ paśubhiścha brahmaṇavarchasena cha ruchiṣīya* ।21।
*udyate nama udāyate nama uditāya namaḥ* । *virāje namaḥ svarāje namaḥ samrāje namaḥ* ॥22॥
*astaṁyate namo'stameṣyate namo'stamitāya namaḥ* । *virāje namaḥ svarāje namaḥ* ॥23॥
*udagādayamādityo viśvena tapasā saha* ।
*sapatnān mahyaṁ randhayan mā chāhaṁ dviṣate radhaṁ taved viṣṇo bahudhā vīryāṇi* ।
*tvaṁ naḥ pṛṇīhi paśubhirviśvarūpaiḥ sudhāyāṁ mā dhehi parame vyoman* ॥24॥
*āditya nāvamārukṣaḥ śatāritrāṁ svastaye* । *aharmātyapīparo rātriṁ satrāti pāraya* ॥25॥
*sūrya nāvamārukṣaḥ śatāritrāṁ svastaye* । *rātriṁ mātyapīparo'haḥ satrāti pāraya* ॥26॥
*prajāpaterāvṛto brahmaṇā varmaṇāhaṁ kaśyapasya jyotiṣā varchasā cha* ।
*jaradaṣṭiḥ kṛtavīryo vihāyāḥ sahasrāyuḥ sukṛtaśchareyam* ॥27॥
*parīvṛto brahmaṇā varmaṇāhaṁ kaśyapasya jyotiṣā varchasā cha* ।
*mā mā prāpanniṣavo daivyā yā mā mānuṣīravasṛṣṭā vadhāya* ॥28॥
*ṛtena gupta ṛtubhiścha sarvairbhūtena gupto bhavyena chāham* ।
*mā mā prāpat pāpmā mota mṛtyurantardadhe'haṁ salilena vāchaḥ* ॥29॥
*agninarmā goptā pari pātu viśvata udyantsūryo nudatāṁ mṛtyupāśān* ।

*vyuchchhantīruṣasaḥ parvatā dhruvāḥ sahasraṁ prāṇā mayyā yatantām ॥30॥*

१२. आदित्यः अध्यातमम् (Ādityaḥ Adhyātamam) - अ. (Av.) ९.९.१-२२

अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अस्त्यश्नः ।
तृतीयो भ्राता घतपृष्ठो अस्यात्रापश्यं विश्पतिं सप्तपुत्रम् ॥१॥
सप्त युंजन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा ।
त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधि तस्थुः ॥२॥
इमं रथमधि ये सप्त तस्थुः सप्तचक्रं सप्त वहन्त्यश्वाः ।
सप्त स्वसारो अभि सं नवन्त यत्र गवां निहिता सप्त नामा ॥३॥
को ददर्श प्रथमं जायमानमस्थन्वन्तं यदनस्था बिभर्ति ।
भूमया असुरसृगात्मा क्वस्वित् को विद्वांसमुप गात् प्रष्टुमेतत् ॥४॥
इह ब्रवीतु य ईमंग वेदास्य वामस्य निहितं पदं वेः ।
शीर्ष्णः क्षीरं दुह्रत गावो अस्य वव्रिं वसाना उदकं पदापुः ॥५॥
पाकः पृच्छामि मनसाविजानन् देवानाभेना निहिता पदानि ।
वत्से बष्कयेऽधि सप्त तन्तून् वि तत्निरे कवय ओतवा उ ॥६॥
अचिकित्वांश्चिकितुषश्चिदत्र कवीन् पृच्छामि विद्मनो न विद्वान् ।
वि यस्तस्तम्भ षडिमा रजांस्यजस्य रूपे किमपि स्विदेकम् ॥७॥
माता पितरमृत आ बभाज धीत्यग्रे मनसा सं हि जग्मे ।
सा बीभत्सुर्गर्भरसा निविद्धा नमस्वन्त इदुपवाकमीयुः ॥८॥
युक्ता मातासीद् धुरि दक्षिणाया अतिष्ठद् गर्भो वृजनीष्वन्तः ।
अमीमेद् वत्सो अनु गामपश्यद् विश्वरूप्यं त्रिषु योजनेषु ॥९॥
तिस्रो मातृस्त्रीन् पितृन् विभ्रदेक ऊर्ध्वस्तस्थौ नेमव ग्लापयन्त ।
मन्त्रयन्ते दिवो अमुष्य पृष्ठे विश्वविदो वाचमविश्वविन्नाम् ॥१०॥
पंचारे चक्रे परिवर्तमाने यस्मिन्नातस्थुर्भुवनानि विश्वा ।
तस्य नाक्षस्तप्यते भूरिभारः सनादेव न च्छिद्यते सनाभिः ॥११॥
पंचपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम् ।
अथेमे अन्य उपरे विचक्षणे सप्तचक्रे षडर आहुरर्पितम् ॥१२॥
द्वादशारं नहि तज्जराय वर्वर्ति चक्रं परि द्यामृतस्य ।
आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः ॥१३॥
सनेमि चक्रमजरं वि वावृत उत्तानायां दश युक्ता वहन्ति ।
सूर्यस्य चक्षू रजसैत्यावृतं यस्मिन्नातस्थुर्भवनानि विश्वा ॥१४॥
स्त्रियः सतीस्ताँ उ मे पुंस आहुः पश्यदक्षण्वान् न वि चेतदन्धः ।
कविर्यः पुत्रः स ईमा चिकेत यस्ता विजानात् स पितुष्पितासत् ॥१५॥
साकंजानां सप्तथमाहुरेकजं षडिद्यमा ऋषयो देवजा इति ।
तेषमिष्टानि विहितानि धामश स्थात्रे रेजन्ते विकृतानि रूपशः ॥१६॥
अवः परेण पर एनावरेण पदा वत्सं बिभ्रती गौरुदस्थात् ।
सा कद्रीची कं स्विदर्धं परागात् क्व स्वित् सूते नहि यूथे अस्मिन् ॥१७॥
अवः परेण पितरं यो अस्य वेदावः परेण पर एनावरेण ।
कवीयमानः क इह प्र वोचद् देवं मनः कुतो अधि प्रजातम् ॥१८॥
ये अर्वांचस्ताँ उ पराच आहुर्ये परांचस्ताँ उ अर्वाच आहुः ।
इन्द्रश्च या चक्रथुः सोम तानि धुरा न युक्ता रजसो वहन्ति ॥१९॥
द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्न्यो अभि चाकशीति ॥२०॥
यस्मिन् वृक्षे मध्वदः सुपर्णा निविशन्ते सुवते चाधि विश्वे ।
तस्य यदाहुः पिप्लं स्वाद्वग्रे तन्नोन्नशद्यः पितरं न वेद ॥२१॥
यत्रा सुपर्णा अमृतस्य भक्षमनिमेषं विदथाभिस्वरन्ति ।
एना विश्वस्य भुवनस्य गोपाः स मा धीरः पाकमत्रा विवेश ॥२२॥
*asya vāmasya palitasya hotustasya bhrātā madhyamo astyaśnaḥ ।*

*tṛtīyo bhrātā ghataprṛṣṭho asyātrāpaśyaṁ viśpatiṁ saptaputram  //1 //*
*sapta yuṁjanti rathamekachakrameko aśvo vahati saptanāmā  /*
*trinābhi chakramajaramanarvaṁ yatremā viśvā bhuvanādhi tasthuḥ  //2 //*
*imaṁ rathamadhi ye sapta tasthuḥ saptachakraṁ sapta vahantyaśvāḥ  /*
*sapta svasāro abhi saṁ navanta yatra gavāṁ nihitā sapta nāmā  //3 //*
*ko dadarśa prathamaṁ jāyamānamasthanvantaṁ yadanasthā bibharti  /*
*bhūmayā asurasṛgātmā kvasvit ko vidvāṁsamupa gāt praṣṭumetat  //4 //*
*iha bravītu ya īmaṁga vedāsya vāmasya nihitaṁ padaṁ veḥ  /*
*śīrṣṇaḥ kṣīraṁ duhrata gāvo asya vavriṁ vasānā udakaṁ padāpuḥ  //5 //*
*pākaḥ pṛchchhāmi manasāvijānan devānābhenā nihitā padāni  /*
*vatse baṣkaye'dhi sapta tantūn vi tatnire kavaya otavā u  //6 //*
*achikitvāṁśchikituṣaśchidavra kavīn pṛchchhāmi vidvano na vidvān  /*
*vi yastastambha ṣaḍimā rajāṁsyajasya rūpe kimapi svidekam  //7 //*
*mātā pitaramṛta ā babhāja dhītyagre manasā saṁ hi jagme  /*
*sā bībhatsurgarbharasā nividdhā namasvanta idupavākamīyuḥ  //8 //*
*yuktā mātāsīd dhuri dakṣiṇāyā atiṣṭhad garbho vṛjanīṣvantaḥ  /*
*amīmed vatso anu gāmapaśyad viśvarūpyaṁ triṣu yojaneṣu  //9 //*
*tisro mātṛstrīn pitṛn vibhradeka ūrdhvastasthau nemava glāpayanta  /*
*mantrayante divo amuṣya pṛṣṭhe viśvavido vāchamaviśvavinnām  //10 //*
*paṁchāre chakre parivartamāne yasminnātasthurbhuvanāni viśvā  /*
*tasya nākṣastapyate bhūribhāraḥ sanādeva na chchhidyate sanābhiḥ  //11 //*
*paṁchapādaṁ pitaraṁ dvādaśākṛtiṁ diva āhuḥ pare ardhe purīṣiṇam  /*
*atheme anya upare vichakṣaṇe saptachakre ṣaḍara āhurarpitam  //12 //*
*dvādaśāraṁ nahi tajjarāya varvarti chakraṁ pari dyāmṛtasya  /*
*ā putrā agne mithunāso atra sapta śatāni viṁśatiścha tasthuḥ  //13 //*
*sanemi chakramajaraṁ vi vāvṛta uttānāyāṁ daśa yuktā vahanti  /*
*sūryasya chakṣū rajasaityāvṛtaṁ yasminnātasthurbhavanāni viśvā  //14 //*
*striyaḥ satīstām̐ u me puṁsa āhuḥ paśyadakṣaṇvān na vi chetadandhaḥ  /*
*kaviryaḥ putraḥ sa īmā chiketa yastā vijānāt sa pituṣpitāsat  //15 //*
*sākaṁjānāṁ saptathamāhurekajaṁ ṣaḍidyamā ṛṣayo devajā iti  /*
*teṣamiṣṭāni vihitāni dhāmaśa sthātre rejante vikṛtāni rūpaśaḥ  //16 //*
*avaḥ pareṇa para enāvareṇa padā vatsaṁ bibhratī gaurudasthāt  /*
*sā kadrīchī kaṁ svidardhaṁ parāgāt kva svit sūte nahi yūthe asmin  //17 //*
*avaḥ pareṇa pitaraṁ yo asya vedāvaḥ pareṇa para enāvareṇa  /*
*kavīyamānaḥ ka iha pra vochad devaṁ manaḥ kuto adhi prajātam  //18 //*
*ye arvāṁchastām̐ u parācha āhurye parāṁchastām̐ u arvācha āhuḥ  /*
*indraścha yā chakrathuḥ soma tāni dhurā na yuktā rajaso vahanti  //19 //*
*dvā suparṇā sayujā sakhāyā samānaṁ vṛkṣaṁ pari ṣasvajāte  /*
*tayoranyaḥ pippalaṁ svādvattyanaśnannanyo abhi chākaśīti  //20 //*
*yasmin vṛkṣe madhvadaḥ suparṇā niviśante suvate chādhi viśve  /*
*tasya yadāhuḥ piplaṁ svādvagre tannonnaśadyaḥ pitaraṁ na veda  //21 //*
*yatrā suparṇā amṛtasya bhakṣamanimeṣaṁ vidathābhisvaranti  /*
*enā viśvasya bhuvanasya gopāḥ sa mā dhīraḥ pākamatrā viveśa  //22 //*

१३. आदित्यादयः (Ādityādayaḥ) - अ. (Av.) ५.२१.१०-१२

आदित्य चक्षुरा दत्स्व मरीचयोऽनु धावत। पत्संगिनीरा सजन्तु विगते बाहुवीर्ये ॥१०॥
यूयमुग्रा मरुतः पृश्निमातर इन्द्रेण युजा प्र मृणीत शत्रून्  ।
सोमो राजा वरुणो राजा महादेव उत मृत्युरिन्द्रः ॥११॥
एता देवसेनाः सूर्यकेतवः सचेतसः। अमित्रान् नो जयन्तु स्वाहा  ॥१२॥
*āditya chakṣurā datsva marīchayo'nu dhāvata / patsaṁginīrā sajantu vigate bāhuvīrye //10 //*
*yūyamugrā marutaḥ pṛśnimātara indreṇa yujā pra mṛṇīta śatrūn  /*
*somo rājā varuṇo rājā mahādeva uta mṛtyurindraḥ  //11 //*
*etā devasenāḥ sūryaketavaḥ sachetasaḥ / amitrān no jayantu svāhā  //12 //*

१४. आपः (Āpaḥ) - अ. (Av.) ७.११२.१-२; १९.६९.१-४

अ. (Av.) ७.११२.१-२

शुम्भनी द्यावापृथिवी अन्तिसुम्ने महिव्रते। आपः सप्त सुस्रुवुर्देवीस्ता नो मुच्चन्त्वंहसः ॥१॥
मुंचन्तु मा शपथ्या३दथो वरुण्यादुत। अथो यमस्य पड्वीशाद् विश्वस्माद् देवकिल्बिषात् ॥२॥
*śumbhanī dyāvāpṛthivī antisumne mahivrate / āpaḥ sapta susruvurdevīstā no muchchantvaṁhasaḥ //1 //*
*muṁchantu mā śapathyā3datho varuṇyāduta / atho yamasya paḍbīśād viśvasmād devakilbiṣāt //2 //*

अ. (Av.) १९.६९.१-४

जीवा स्थ जीव्यासं सर्वमायुर्जीव्यासम् ॥१॥
उपजीवा स्थोप जीव्यासं सर्वमायुर्जीव्यासम् ॥२॥
संजीवा स्थ सं जीव्यासं सर्वमायुर्जीव्यासम् ॥३॥
जीवला स्थ जीव्यासं सर्वमायुर्जीव्यासम् ॥४॥
*jīvā stha jīvyāsaṁ sarvamāyurjīvyāsam //1 //*
*upajīvā sthopa jīvyāsaṁ sarvamāyurjīvyāsam //2 //*
*saṁjīvā stha saṁ jīvyāsaṁ sarvamāyurjīvyāsam //3 //*
*jīvalā stha jīvyāsaṁ sarvamāyurjīvyāsam //4 //*

१५. आयुः (Āyuḥ) - अ. (Av.) २.२४.१-८; ७.३२.१; ८.१.१-२१; ८.२.१-२८

अ. (Av.) २.२४.१-८

शेरभक शेरभ पुनर्वो यन्तु यातवः पुनर्हेतिः किमीदिनः ।
यस्य स्थ तमत्त यो वः प्राहैत् तमत्त स्वा मांसान्यत्त ॥१॥
शेरभक शेवृध पुनर्वो यन्तु यातवः पुनर्हेतिः किमीदिनः ।
यस्य स्थ तमत्त यो वः प्राहैत् तमत्त स्वा मांसान्यत्त ॥२॥
म्रोकानुम्रोक पुनर्वो यन्तु यातवः पुनर्हेतिः किमीदिनः ।
यस्य स्थ तमत्त यो वः प्राहैत् तमत्त स्वा मांसान्यत्त ॥३॥
सर्पानुसर्प पुनर्वो यन्तु यातवः पुनर्हेतिः किमीदिनः ।
यस्य स्थ तमत्त यो वः प्राहैत् तमत्त स्वा मांसान्यत्त ॥४॥
जूर्णि पुनर्वो यन्तु यातवः पुनर्हेतिः किमीदिनः ।
यस्य स्थ तमत्त यो वः प्राहैत् तमत्त स्वा मांसान्यत्त ॥५॥
उपब्दे पुनर्वो यन्तु यातवः पुनर्हेतिः किमीदिनः ।
यस्य स्थ तमत्त यो वः प्राहैत् तमत्त स्वा मांसान्यत्त ॥६॥
अर्जुनि पुनर्वो यन्तु यातवः पुनर्हेतिः किमीदिनीः ।
यस्य स्थ तमत्त यो वः प्राहैत् तमत्त स्वा मांसान्यत्त ॥७॥
भरूजि पुनर्वो यन्तु यातवः पुनर्हेतिः किमीदिनः ।
यस्य स्थ तमत्त यो वः प्राहैत् तमत्त स्वा मांसान्यत्त ॥८॥
*śerabhaka śerabha punarvo yantu yātavaḥ punarhetiḥ kimīdinaḥ /*
*yasya stha tamatta yo vaḥ prāhait tamatta svā māṁsānyatta //1 //*
*śerabhaka śevṛdha punarvo yantu yātavaḥ punarhetiḥ kimīdinaḥ /*
*yasya stha tamatta yo vaḥ prāhait tamatta svā māṁsānyatta //2 //*
*mrokānumroka punarvo yantu yātavaḥ punarhetiḥ kimīdinaḥ /*
*yasya stha tamatta yo vaḥ prāhait tamatta svā māṁsānyatta //3 //*
*sarpānusarpa punarvo yantu yātavaḥ punarhetiḥ kimīdinaḥ /*
*yasya stha tamatta yo vaḥ prāhait tamatta svā māṁsānyatta //4 //*
*jūrṇi punarvo yantu yātavaḥ punarhetiḥ kimīdinaḥ /*
*yasya stha tamatta yo vaḥ prāhait tamatta svā māṁsānyatta //5 //*
*upabde punarvo yantu yātavaḥ punarhetiḥ kimīdinaḥ /*
*yasya stha tamatta yo vaḥ prāhait tamatta svā māṁsānyatta //6 //*
*arjuni punarvo yantu yātavaḥ punarhetiḥ kimīdinīḥ /*
*yasya stha tamatta yo vaḥ prāhait tamatta svā māṁsānyatta //7 //*

*bharūji punarvo yantu yātavaḥ punarhetiḥ kimīdinaḥ /*
*yasya stha tamatta yo vaḥ prāhait tamatta svā māṁsānyatta //8 //*

अ. (Av.) ७.३२.१

उप प्रिय पानप्नतं युवानमाहुतीवृधम्। अगन्म बिभ्रतो नमो दीर्घमायुः कृणोतु मे ॥१॥
*upa priya pānapnataṁ yuvānamāhutīvṛdham / aganma bibhrato namo dīrghamāyuḥ kṛṇotu me //1 //*

अ. (Av.) ८.१.१-२१

अन्तकाय मृत्यवे नमः प्राणा अपाना इह ते रमन्ताम् ।
इहायमस्तु पुरुषः सहासुना सूर्यस्य भागे अमृतस्य लोके ॥१॥
उदेनं भगो अग्रभीदुदेनं सोमो अंशुमान् ।
उदेनं मरुतो देवा उदिन्द्राग्नी स्वस्तये ॥२॥
इह तेऽसुरिह प्राण इहायुरिह ते मनः ।
उत् त्वा निर्ऋत्याः पाशेभ्यो दैव्या वाचा भरामसि ॥३॥
उत् क्रामातः पुरुष माव पत्था मृत्योः पड्बीशमवमुंचमानः ।
मा च्छित्था अस्माल्लोकादग्नेः सूर्यस्य संदृशः ॥४॥
तुभ्यं वातः पवतां मातरिश्वा तुभ्यं वर्षन्त्वमृतान्यापः ।
सूर्यस्ते तन्वे३ शं तपाति त्वां मृत्युर्दयतां मा प्र मेष्ठाः ॥५॥
उद्यानं ते पुरुष नावयानं जीवातुं ते दक्षतातिं कृणोमि ।
आ हि रोहेमममृतं सुखं रथमथ जिर्विर्विदथमा वदासि ॥६॥
मा ते मनस्तत्र गान्मा तिरो भून्मा जीवेभ्यः प्र मदो मानु गाः पितृन् ।
विश्वे देवा अभि रक्षन्तु त्वेह ॥७॥
मा गतानामा दीधीथा ये नयन्ति परावतम् ।
आ रोह तमसो ज्योतिरेह्या ते हस्तौ रभामहे ॥८॥
श्यामश्च त्वा मा शबलश्च प्रेषितौ यमस्य यौ पथिरक्षी श्वानौ ।
अर्वाङेहि मा वि दीध्यो मात्र तिष्ठः पराङ्मनाः ॥९॥
मैतं पन्थामनु गा भीम एष येन पूर्वं नेयथ तं ब्रवीमि ।
तम एतत् पुरुष मा प्र पत्था भयं परस्तादभयं ते अर्वाक् ॥१०॥
रक्षन्तु त्वाग्नयो ये अप्स्व१न्ता रक्षतु त्वा मनुष्या३ यमिन्धते ।
वैश्वानरो रक्षतु जातवेदा दिव्यस्त्वा मा प्र धाग् विद्युता सह ॥११॥
मा त्वा क्रव्यादभि मंस्तारात् संकसुकाच्चर ।
रक्षतु त्वा द्यौ रक्षतु पृथिवी सूर्यश्च त्वा रक्षतां चन्द्रमाश्च ।
अन्तरिक्षं रक्षतु देवहेत्याः ॥१२॥
बोधश्च त्वा प्रतीबोधश्च रक्षतामस्वप्नश्च त्वानवद्राणश्च रक्षताम् ।
गोपायंश्च त्वा जागृविश्च रक्षताम् ॥१३॥
ते त्वा रक्षन्तु ते त्वा गोपायन्तु तेभ्यो नमस्तेभ्यः स्वाहा ॥१४॥
जीवेभ्यस्त्वा समुदे वायुरिन्द्रो धाता दधातु सविता त्रायमाणः ।
मा त्वा प्राणो बलं हासीदसुं तेऽनु ह्वयामसि ॥१५॥
मा त्वा जम्भः संहनुर्मा तमो विदन्मा जिह्वा बर्हिः प्रमयुः कथा स्याः ।
उत् त्वादित्या वसवो भरन्तूदिन्द्राग्नी स्वस्तये ॥१६॥
उत् त्वा द्यौरुत् पृथिव्युत् प्रजापतिरग्रभीत् ।
उत् त्वा मृत्योरोषधयः सोमराज्ञीरपीपरन् ॥१७॥
अयं देवा इहैवास्त्वयं मामुत्र गादितः ।
इमं सहस्रवीर्येण मृत्योरुत् पारयामसि ॥१८॥
उत् त्वा मृत्योरपीपरं सं धमन्तु वयोधसः ।
मा त्वा व्यस्तकेश्यो३ मा त्वा वरुदो रुदन् ॥१९॥
आहार्षमविदं त्वा पुनरागाः पुनर्णवः ।
सर्वाङ्ग सर्वं ते चक्षुः सर्वमायुश्च तेऽविदम् ॥२०॥

व्यवात् ते ज्योतिरभूदप त्वत् तमो अक्रमीत् ।
अप त्वन्मृत्युं निरृर्तिमप यक्ष्मं नि दध्मसि ॥२१॥
*antakāya mṛtyave namaḥ prāṇā apānā iha te ramantām /*
*ihāyamastu puruṣaḥ sahāsunā sūryasya bhāge amṛtasya loke //1 //*
*udenaṁ bhago agrabhīdudenaṁ somo aṁśumān /*
*udenaṁ maruto devā udindrāgnī svastaye //2 //*
*iha te'suriha prāṇa ihāyuriha te manaḥ /*
*ut tvā nirṛtyāḥ pāśebhyo daivyā vāchā bharāmasi //3 //*
*ut krāmātaḥ puruṣa māva patthā mṛtyoḥ paḍbīśamavamuṁchamānaḥ /*
*mā chchhitthā asmāllokādagneḥ sūryasya saṁdṛśaḥ //4 //*
*tubhyaṁ vātaḥ pavatāṁ mātariśvā tubhyaṁ varṣantvamṛtānyāpaḥ /*
*sūryaste tanve3 śaṁ tapāti tvāṁ mṛtyurdayatāṁ mā pra meṣṭhāḥ //5 //*
*udyānaṁ te puruṣa nāvayānaṁ jīvātuṁ te dakṣatātiṁ kṛṇomi /*
*ā hi rohemamamṛtaṁ sukhaṁ rathamatha jirvirvidathamā vadāsi //6 //*
*mā te manastatra gānmā tiro bhūnmā jīvebhyaḥ pra mado mānu gāḥ pitṛn /*
*viśve devā abhi rakṣantu tveha //7 //*
*mā gatānāmā dīdhīthā ye nayanti parāvatam /*
*ā roha tamaso jyotirehyā te hastau rabhāmahe //8 //*
*śyāmaścha tvā mā śabalaścha preṣitau yamasya yau pathirakṣī śvānau /*
*arvāṅehi mā vi dīdhyo mātra tiṣṭhaḥ parāṅmanāḥ //9 //*
*maitaṁ panthāmanu gā bhīma eṣa yena pūrvaṁ neyatha taṁ bravīmi /*
*tama etat puruṣa mā pra patthā bhayaṁ parastādabhayaṁ te arvāk //10 //*
*rakṣantu tvāgnayo ye apsva1ntā rakṣatu tvā manuṣyā3 yamindhate /*
*vaiśvānaro rakṣatu jātavedā divyastvā mā pra dhāg vidyutā saha //11 //*
*mā tvā kravyādabhi maṁstārāt saṁkasukāchchara /*
*rakṣatu tvā dyau rakṣatu pṛthivī sūryaścha tvā rakṣatāṁ chandramāścha /*
*antarikṣaṁ rakṣatu devahetyāḥ //12 //*
*bodhaścha tvā pratībodhaścha rakṣatāmasvapnaścha tvānavadrāṇaścha rakṣatām /*
*gopāyaṁścha tvā jāgṛviścha rakṣatām //13 //*
*te tvā rakṣantu te tvā gopāyantu tebhyo namastebhyaḥ svāhā //14 //*
*jīvebhyastvā samude vāyurindro dhātā dadhātu savitā trāyamāṇaḥ /*
*mā tvā prāṇo balaṁ hāsīdasuṁ te'nu hvayāmasi //15 //*
*mā tvā jambhaḥ saṁhanurmā tamo vidanmā jihvā barhiḥ pramayuḥ kathā syāḥ /*
*ut tvādityā vasavo bharantūdindrāgnī svastaye //16 //*
*ut tvā dyaurut pṛthivyut prajāpatiragrabhīt /*
*ut tvā mṛtyoroṣadhayaḥ somarājñīrapīparan //17 //*
*ayaṁ devā ihaivāstvayaṁ māmutra gāditaḥ /*
*imaṁ sahasravīryeṇa mṛtyorut pārayāmasi //18 //*
*ut tvā mṛtyorapīparaṁ saṁ dhamantu vayodhasaḥ /*
*mā tvā vyastakeśyo3 mā tvā varudo rudan //19 //*
*āhārṣamavidaṁ tvā punarāgāḥ punarṇavaḥ /*
*sarvāṅga sarvaṁ te chakṣuḥ sarvamāyuścha te'vidam //20 //*
*vyavāt te jyotirabhūdapa tvat tamo akramīt /*
*apa tvanmṛtyuṁ nirṛtimapa yakṣamaṁ ni dadhmasi //21 //*

अ. (Av.) ८.२.१-२८

आ रभस्वेमाममृतस्य श्नुष्टिमच्छिद्यमाना जरदष्टिरस्तु ते ।
असुं त आयुः पुनरा भरामि रजस्तमो मोप गा मा प्र मेष्ठाः ॥१॥
जीवतां ज्योतिरभ्येह्यर्वाङा त्वा हरामि शतशारदाय ।
अवमुंचन् मृत्युपाशानशानशास्तिं द्राघीय आयुः प्रतरं ते दधामि ॥२॥
वातात् ते प्राणमविदं सूर्याच्चक्षुरहं तव ।
यत् ते मनस्त्वयि तद् धारयामि सं वित्सवाङ्गैर्वद जिह्वयालपन् ॥३॥
प्राणेन त्वा द्विपदां चतुष्पदामग्निमिव जातमभि सं धमामि ।
नमस्ते मृत्यो चक्षुषे नमः प्राणाय तेऽकरम् ॥४॥

अयं जीवतु मा मृतेमं समीरयामसि ।
कृणोम्यस्मै भेषजं मृत्यो मा पुरुषं वधीः ॥५॥
जीवलां नघारिषां जीवन्तीमोषधीमहम् ।
त्रयमाणां सहमानां सहस्वतीमिह हुवेऽस्मा अरिष्टतातये ॥६॥
अधि ब्रूहि मा रभथाः सृजेमं तवैव सन्त्सर्वहाया इहास्तु ।
भवाशर्वौ मृडतं शर्म यच्छतमपसिध्य दुरितं धत्तमायुः ॥७॥
अस्मै मृत्यो अधि ब्रूहीमं दयस्वोदितो३यमेतु ।
अरिष्टः सर्वांगः सुश्रुज्जरसा शतहायन आत्मना भुजमश्नुताम् ॥८॥
देवानां हेतिः परि त्वा वृणक्तु पारयामि त्वा रजस उत् त्वा मृत्योरपीपरम् ।
आरादग्निं क्रव्यादं निरूहं जीवातवे ते परिधिं दधामि ॥९॥
यत् ते नियानं रजसं मृत्यो अनवधर्ष्यम् ।
पथ इमं तस्माद् रक्षन्तो ब्रह्मास्मै वर्म कृण्मसि ॥१०॥
कृणोमि ते प्राणपानौ जरां मृत्युं दीर्घमायुः स्वस्ति ।
वैवस्वतेन प्रहितान् यमदूतांश्चरतोऽप सेधामि सर्वान् ॥११॥
आरादरातिं निर्ऋतिं परो ग्राहिं क्रव्यादः पिशाचान् ।
रक्षो यत् सर्वं दुर्भूतं तत् तमइवाप हन्मसि ॥१२॥
अग्नेष्टे प्राणममृतादायुष्मतो वन्वे जातवेदसः ।
यथा न रिष्या अमृतः सजूरसस्तत् ते कृणोमि तदु ते समृध्यताम् ॥१३॥
शिवे ते स्तां द्यावापृथिवी असंतापे अभिश्रियौ ।
शं ते सूर्य आ तपतु शं वातो वातु ते हृदे ।
शिवा अभि क्षरन्तु त्वापो दिव्याः पयस्वतीः ॥१४॥
शिवास्ते सन्त्वोषधय उत् त्वाहार्षमधरस्या उत्तरां पृथिवीमभि ।
त्र त्वादित्यौ रक्षतां सूर्याचन्द्रमसावुभा ॥१५॥
यत् ते वासः परिधानं यां नीविं कृणुषे त्वम् ।
शिवं ते तन्वे३ तत् कृण्मः संस्पर्शेऽद्रूक्ष्णमस्तु ते ॥१६॥
यत् क्षुरेण मर्चयता सुतेजसा वप्ता वपसि केशश्मश्रु ।
मुखं मा न आयुः प्र मोषीः ॥१७॥
शिवौ ते स्तां व्रीहियवावबलासावदोमधौ ।
एतौ यक्ष्मं वि बाधेते एतौ मुंचतो अंहसः ॥१८॥
यदश्नासि यत्पिबसि धान्यं कृष्याः पयः ।
यदाद्यं१ यदनाद्यं सर्वं ते अन्नमविषं कृणोमि ॥१९॥
अह्ने च त्वा रात्रये चोभाभ्यां परि दद्मसि ।
अरायेभ्यो जिघत्सुभ्य इमं मे परि रक्षत ॥२०॥
शतं तेऽयुतं हायनान् द्वे युगे त्रीणि चत्वारि कृण्मः ।
इन्द्राग्नी विश्वे देवास्तेऽनु मन्यन्तामहृणीयमानाः ॥२१॥
शरदे त्वा हेमन्ताय वसन्ताय ग्रीष्माय परि दद्मसि ।
वर्षाणि तुभ्यं स्योनानि येषु वर्धन्त ओषधीः ॥२२॥
मृत्युरीशे द्विपदां मृत्युरीशे चतुष्पदाम् ।
तस्मात् त्वां मृत्योर्गोपतेरुद्भरामि स मा बिभेः ॥२३॥
सोऽरिष्ट न मरिष्यसि न मरिष्यसि मा बिभेः ।
न वै तत्र म्रियन्ते नो यन्त्यधमं तमः ॥२४॥
सर्वो वै तत्र जीवति गौरश्वः पुरुषः पशुः ।
यत्रेदं ब्रह्म क्रियते परिधिर्जीवनाय कम् ॥२५॥
परि त्वा पातु समानेभ्योऽभिचारात् सबन्धुभ्यः ।
अमम्रिर्भवामृतोऽतिजीवो मा ते हासिषुरसवः शरीरम् ॥२६॥
ये मृत्यव एकशतं या नाष्ट्रा अतितार्याः ।
मुंचन्तु तस्मात् त्वां देवा अग्नेर्वैश्वानरादधि ॥२७॥

अग्नेः शरीरमसि पारयिष्णु रक्षोहासि सपत्नहा ।
अथो अमीवचातनः पूतुद्रुर्नाम भेषजम् ॥२८॥

*ā rabhasvemāmamṛtasya śnuṣṭimachchhidyamānā jaradaṣṭirastu te ।*
*asuṁ ta āyuḥ punarā bharāmi rajastamo mopa gā mā pra meṣṭhāḥ ॥1॥*
*jīvatāṁ jyotirabhyehyarvāṅā tvā harāmi śataśāradāya ।*
*avamuṁchan mṛtyupāśānaśānaśāsiṁta drāghīya āyuḥ prataraṁ te dadhāmi ॥2॥*
*vātāt te prāṇamavidaṁ sūryāchchkṣurahaṁ tava ।*
*yat te manastvayi tad dhārayāmi saṁ vitsavāṅgairvada jihvayālapan ॥3॥*
*prāṇena tvā dvipadāṁ chatuṣpadāmagnimiva jātamabhi saṁ dhamāmi ।*
*namaste mṛtyo chakṣuṣe namaḥ prāṇāya te'karam ॥4॥*
*ayaṁ jīvatu mā mṛtemaṁ samīrayāmasi ।*
*kṛṇomyasmai bheṣajaṁ mṛtyo mā puruṣaṁ vadhīḥ ॥5॥*
*jīvalāṁ naghāriṣāṁ jīvantīmoṣadhīmaham ।*
*trayamāṇāṁ sahamānāṁ sahasvatīmiha huve'smā ariṣṭatātaye ॥6॥*
*adhi brūhi mā rabhathāḥ sṛjemaṁ tavaiva santsarvahāyā ihāstu ।*
*bhavāśarvau mṛḍataṁ śarma yachchhatamapasidhya duritaṁ dhattamāyuḥ ॥7॥*
*asmai mṛtyo adhi brūhīmaṁ dayasvodito3yametu ।*
*ariṣṭaḥ sarvāṁgaḥ suśrujjarasā śatahāyana ātmanā bhujamaśnutām ॥8॥*
*devānāṁ hetiḥ pari tvā vṛṇaktu pārayāmi tvā rajasa ut tvā mṛtyorapīparam ।*
*ārādagiṁna kravyādaṁ nirūhaṁ jīvātave te paridhiṁ dadhāmi ॥9॥*
*yat te niyānaṁ rajasaṁ mṛtyo anavadharṣyam ।*
*patha imaṁ tasmād rakṣanto brahmāsmai varma kṛṇmasi ॥10॥*
*kṛṇomi te prāṇapānau jarāṁ mṛtyuṁ dīrghamāyuḥ svasti ।*
*vaivasvatena prahitān yamadūtāṁścharato'pa sedhāmi sarvān ॥11॥*
*ārādarātiṁ nirṛtiṁ paro grāhiṁ kravyādaḥ piśāchān ।*
*rakṣo yat sarvaṁ durbhūtaṁ tat tamaivāpa hanmasi ॥12॥*
*agneṣṭe prāṇamamṛtādāyuṣmato vanve jātavedasaḥ ।*
*yathā na riṣyā amṛtaḥ sajūrasastat te kṛṇomi tadu te samṛdhyatām ॥13॥*
*śive te stāṁ dyāvāpṛthivī asaṁtāpe abhiśriāyau ।*
*śaṁ te sūrya ā tapatu śaṁ vāto vātu te hṛde ।*
*śivā abhi kṣarantu tvāpo divyāḥ payasvatīḥ ॥14॥*
*śivāste santvoṣadhaya ut tvāhārṣamadharasyā uttarāṁ pṛthivīmabhi ।*
*tra tvādityau rakṣatāṁ sūryāchandramasāvubhā ॥15॥*
*yat te vāsaḥ paridhānaṁ yāṁ nīviṁ kṛṇuṣe tvam ।*
*śivaṁ te tanve3 tat kṛṇmaḥ saṁsparśe'drūkṣaṇamastu te ॥16॥*
*yat kṣureṇa marchayatā sutejasā vaptā vapasi keśaśmaśru ।*
*mukhaṁ mā na āyuḥ pra moṣīḥ ॥17॥*
*śivau te stāṁ vrīhiyavāvabalāsāvadomadhau ।*
*etau yakṣamaṁ vi bādhete etau muṁchato aṁhasaḥ ॥18॥*
*yadaśnāsi yatpibasi dhānyaṁ kṛṣyāḥ payaḥ ।*
*yadādyaṁ1 yadanādyaṁ sarvaṁ te annamaviṣaṁ kṛṇomi ॥19॥*
*ahne cha tvā rātraye chobhābhyāṁ pari dadmasi ।*
*arāyebhyo jighatsubhya imaṁ me pari rakṣata ॥20॥*
*śataṁ te'yutaṁ hāyanān dve yuge trīṇi chatvāri kṛṇmaḥ ।*
*indrāgnī viśve devāste'nu manyantāmahṛṇīyamānāḥ ॥21॥*
*śarade tvā hemantāya vasantāya grīṣmāya pari dadmasi ।*
*varṣāṇi tubhyaṁ syonāni yeṣu vardhanta oṣadhīḥ ॥22॥*
*mṛtyurīśe dvipadāṁ mṛtyurīśe chatuṣpadām ।*
*tasmāt tvāṁ mṛtyorgaupaterudbhararāmi sa mā bibheḥ ॥23॥*
*so'riṣṭa na mariṣyasi na mariṣyasi mā bibheḥ ।*
*na vai tatra mriyante no yantyadhamaṁ tamaḥ ॥24॥*
*sarvo vai tatra jīvati gauraśvaḥ puruṣaḥ paśuḥ ।*
*yatredaṁ brahma kriyate paridhirjīvanāya kam ॥25॥*
*pari tvā pātu samānebhyo'bhichārāt sabandhubhyaḥ ।*
*amamrirbhavāmṛto'tijīvo mā te hāsiṣurasavaḥ śarīram ॥26॥*

*ye mṛtyava ekaśataṁ yā nāṣṭrā atitāryāḥ* ।
*muṁchantu tasmāt tvāṁ devā agnervaiśvānarādadhi* ॥27॥
*agneḥ śarīramasi pārayiṣṇu rakṣohāsi sapatnahā* ।
*atho amīvachātanaḥ pūtudrurnāma bheṣajam* ॥28॥

१६. आयुः (Āyuḥ) - अ. (Av.) बृहस्पतिः अश्विनौ च (Bṛhaspatiḥ Aśvinau Cha) - अ. (Av.) ७.५३.१-७

अमुत्रभूयादधि यद् यमस्य बृहस्पते अभिशस्तेरमुंचः ।
प्रत्यौहतामश्विना मृत्युमस्मद् देवानामग्ने भिषजा शचीभिः ॥१॥
सं क्रामतं मा जहीतं शरीरं प्राणापानौ ते सयुजाविह स्ताम् ।
शतं जीव शरदो वर्धमानोऽग्निष्टे गोपा अधिपा वसिष्ठः ॥२॥
आयुर्यत् ते अतिहितं पराचैरपानः प्राणः पुनरा ताविताम् ।
अग्निष्टदाहार्निर्ऋतेरुपस्थात् तदात्मनि पुनरा वेशयामि ते ॥३॥
मेमं प्राणो हासीन्मो अपानोऽवहाय परा गात् ।
सप्तऋषिभ्य एनं परि ददामि त एनं स्वस्ति जरसे वहन्तु ॥४॥
प्र विशतं प्राणापानावनड्वाहाविव व्रजम् ।
अयं जरिम्णः शेवधिररिष्ट इह वर्धताम् ॥५॥
आ ते प्राणं सुवामसि परा यक्ष्मं सुवामि ते ।
आयुर्नो विश्वतो दधदयमग्निर्वरेण्यः ॥६॥
उद् वयं तमसस्परि रोहन्तो नाकमुत्तमम् ।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥७॥
*amutrabhūyādadhi yad yamasya bṛhaspate abhiśasteramuṁchaḥ* ।
*pratyauhatāmaśvinā mṛtyumasmad devānāmagne bhiṣajā śachībhiḥ* ॥1॥
*saṁ krāmataṁ mā jahītaṁ śarīraṁ prāṇāpānau te sayujāviha stām* ।
*śataṁ jīva śarado vardhamāno'gniṣṭe gopā adhipā vasiṣṭhaḥ* ॥2॥
*āyuryat te atihitaṁ parāchairapānaḥ prāṇaḥ punarā tāvitām* ।
*agniṣṭadāhārnirṛterupasthāt tadātmani punarā veśayāmi te* ॥3॥
*memaṁ prāṇo hāsīnmo apāno'vahāya parā gāt* ।
*saptarṣibhya enaṁ pari dadāmi ta enaṁ svasti jarase vahantu* ॥4॥
*pra viśataṁ prāṇāpānāvanaḍvāhāviva vrajam* ।
*ayaṁ jarimṇaḥ śevadhirariṣṭa iha vardhatām* ॥5॥
*ā te prāṇaṁ suvāmasi parā yakṣamaṁ suvāmi te* ।
*āyurno viśvato dadhadayamagnirvareṇyaḥ* ॥6॥
*ud vayaṁ tamasaspari rohanto nākamuttamam* ।
*devaṁ devatrā sūryamaganma jyotiruttamam* ॥7॥

१७. आशापालाः वास्तोष्पतयः (Āśāpālāḥ Vāstoṣpatayaḥ) - अ. (Av.) १.३१.१-४

आशानामाशापालेभ्यश्चतुर्भ्यो अमृतेभ्यः ।
इदं भूतस्याध्यक्षेभ्यो विधेम हविषा वयम् ॥१॥
य आशानामाशापालाश्चत्वार स्थन देवाः ।
ते नो निर्ऋत्याः पाशेभ्यो मुंचतांहसोअंहसः ॥२॥
अस्रामस्त्वा हविषा यजाम्यश्लोणस्त्वा घृतेन जुहोमि ।
य आशानामाशापालस्तुरीयो देवः स नः सुभूतमेह वक्षत् ॥३॥
स्वस्ति मात्र उत पित्रे नो अस्तु स्वस्ति गोभ्यो जगते पुरुषेभ्यः ।
विश्वं सुभूतं सुविदत्रं नो अस्तु ज्योगेव दृशेम सूर्यम् ॥४॥
*āśānāmāśāpālebhyaśchaturbhyo amṛtebhyaḥ* ।
*idaṁ bhūtasyādhyakṣebhyo vidhema haviṣā vayam* ॥1॥
*ya āśānāmāśāpālāśchatvāra sthana devāḥ* ।
*te no nirṛtyāḥ pāśebhyo muṁchatāṁhasoaṁhasaḥ* ॥2॥
*asrāmastvā haviṣā yajāmyaśloṇastvā ghṛtena juhomi* ।
*ya āśānāmāśāpālasturīyo devaḥ sa naḥ subhūtameha vakṣat* ॥3॥
*svasti mātra uta pitre no astu svasti gobhyo jagate puruṣebhyaḥ* ।

*viśvaṁ subhūtaṁ suvidatraṁ no astu jyogeva dṛśema sūryam ॥4॥*

१८. आसुरी वनस्पतिः (Āsurī Vanaspatiḥ) - अ. (av.) १.२४.१-४

सुपर्णो जातः प्रथमस्तस्य त्वं पित्तमासिथ ।
तदासुरी युधा जिता रूपं चक्रे वनस्पतीन् ॥१॥
आसुरी चक्रे प्रथमेदं किलासभेषजमिदं किलासनाशनम् ।
अनीनशत् किलासं सरूपामकरत् त्वचम् ॥२॥
सरूपा नाम ते माता सरूपो नाम ते पिता ।
सरूपकृत् त्वमोषधे सा सरूपमिदं कृधि ॥३॥
श्यामा सरूपंकरणी पृथिव्या अध्युद्भृता ।
इदमू षु प्र साधय पुना रूपाणि कल्पय ॥४॥
*suparṇo jātaḥ prathamastasya tvaṁ pittamāsitha ।*
*tadāsurī yudhā jitā rūpaṁ chakre vanaspatīn ॥1॥*
*āsurī chakre prathamedaṁ kilāsabheṣajamidaṁ kilāsanāśanam ।*
*anīnaśat kilāsaṁ sarūpāmakarat tvacham ॥2॥*
*sarūpā nāma te mātā sarūpo nāma te pitā ।*
*sarūpakṛt tvamoṣadhe sā sarūpamidaṁ kṛdhi ॥3॥*
*śyāmā sarūpaṁkaraṇī pṛthivyā adhyudbhṛtā ।*
*idamū ṣu pra sādhaya punā rūpāṇi kalpaya ॥4॥*

१९. इन्द्रः (Indraḥ) - अ. (Av.) १.१९.१-४; ५.२६.३; ११

अ. (Av.) १.१९.१-४

मा नो विदन् विव्याधिनो मो अभिव्याधिनो विदन् ।
आराच्छरव्या अस्मद् विषूचीरिन्द्र पातय ॥१॥
विष्वंचो अस्मच्छरवः पतन्तु ये अस्ता ये चास्याः ।
दैवीर्मनुष्येषवो ममामित्रान् वि विध्यत ॥२॥
यो नः स्वो यो अरणः सजात उत निष्ट्यो यो अस्माँ अभिदासति ।
रुद्रः शरव्य यैतान् ममामित्रान् वि विध्यतु ॥३॥
यः सपत्नो योऽसपत्नो यश्च द्विषंछपाति नः ।
देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरम् ॥४॥
*mā no vidan vivyādhino mo abhivyādhino vidan ।*
*ārāchchharavyā asmad viṣūchīrindra pātaya ॥1॥*
*viṣvaṁcho asmachchharavaḥ patantu ye astā ye chāsyāḥ ।*
*daivīrmanuṣyeṣavo mamāmitrān vi vidhyata ॥2॥*
*yo naḥ svo yo araṇaḥ sajāta uta niṣṭyo yo asmām̐ abhidāsati ।*
*rudraḥ śaravya yaitān mamāmitrān vi vidhyatu ॥3॥*
*yaḥ sapatno yo'sapatno yaścha dviṣaṁchhapāti naḥ ।*
*devāstaṁ sarve dhūrvantu brahma varma mamāntaram ॥4॥*

अ. (Av.) ५.२६.३

इन्द्र उक्थामदान्यस्मिन् यज्ञे प्रविद्वान् युनक्तु सुयुजः स्वाहा ॥३॥
*indra ukthāmadānyasmin yajñe pravidvān yunaktu suyujaḥ svāhā ॥3॥*

अ. (Av.) ५.२६.११

इन्द्रो युनक्तु बहुधा वीर्याण्यस्मिन् यज्ञे सुयुजः स्वाहा ॥११॥
*indro yunaktu bahudhā vīryāṇyasmin yajñe suyujaḥ svāhā ॥11॥*

२०. इन्द्रादयो मन्त्रोक्ता (Indrādayo Mantroktā) - अ. (Av.) १.२६.१-४; १९.७०.१

अ. (Av.) १.२६.१-४

आरे३सावस्मदस्तु हेतिर्देवासो असत्। आरे अश्मा यमस्यथ ॥१॥
सखासावस्मभ्यमस्तु रातिः सखेन्द्रो भगः सविता चित्रराधाः ॥२॥
यूयं नः प्रवतो नपान्मरुतः सूर्यत्वचसः। शर्म यच्छाथ सप्रथाः ॥३॥
सुषूदत मृडत मृडया नस्तनूभ्यो मयस्तोकेभ्यस्कृधि ॥४॥

*āre3sāvasmadastu hetidrevāso asat । āre aśmā yamasyatha ॥1 ॥*
*sakhāsāvasmabhyamastu rātiḥ sakhendro bhagaḥ savitā chitrarādhāḥ ॥2 ॥*
*yūyaṁ naḥ pravato napānmarutaḥ sūryatvachasaḥ । śarma yachchhātha saprathāḥ ॥3 ॥*
*suṣūdata mṛḍata mṛḍayā nastanūbhyo mayastokebhyaskṛdhi ॥4 ॥*

अ. (Av.) १९.७०.१

इन्द्र जीव सूर्य जीव देवा जीवा जीव्यासमहम्। सर्वमायुर्जीव्यासम् ॥१ ॥
*indra jīva sūrya jīva devā jīvā jīvyāsamaham । sarvamāyurjīvyāsam ॥1 ॥*

२१. इन्द्राग्नी आयुः यक्ष्मनाशनम् (Indrāgnī Āyuḥ Yakṣamanāśanam) - अ. (Av.) ३.११.१-८

मुंचामि त्वा हविषा जीवनाय कमज्ञातयक्ष्मादुत राजयक्ष्मात् ।
ग्राहिर्जग्राह यद्येतदेनं तस्या इन्द्राग्नी प्र मुमुक्तमेनम् ॥१ ॥
यदि क्षितायुर्यदि वा परेतोयदि मृत्योरन्तिकं नीत एव ।
तमा हरामि निऋर्तेरुपस्थादस्पार्शमेनम् शतशारदाय ॥२ ॥
सहस्राक्षेण शतवीर्येण शतायुषा हविषाहार्षमेनम् ।
इन्द्रो यथैनं शरदो नयातयति विश्वस्य दुरितस्य पारम् ॥३ ॥
शतं जीव शरदो वर्धमानः शतं हेमन्तांछतमुवसन्तान् ।
शतं त इन्द्रो अग्निः सविता बृहस्पतिः शतायुषा हविषाहार्षमेनम् ॥४ ॥
प्र विशतं प्राणापानावनड्वाहाविव व्रजम् ।
व्य१न्ये यन्तु मृत्यवो यानाहुरितरांछतम् ॥५ ॥
इहैव स्तं प्राणापानौ माप गातमितो युवम् ।
शरीरमस्यांगानि जरसे वहतं पुनः ॥६ ॥
जरायै त्वा परि ददामि जरायै नि धुवामि त्वा ।
जरा त्वा भद्रा नेष्ट व्य१न्ये यन्तु मृत्यवो यानाहुरितरांछतम् ॥७ ॥
अभि त्वा जरिमाहित गामुक्षणमिव रज्ज्वा ।
यस्त्वा मृत्युरभ्यधत्त जायमानं सुपाशया ।
तं ते सत्यस्य हस्ताभ्यामुदमुंचद् बृहस्पतिः ॥८ ॥
*muṁchāmi tvā haviṣā jīvanāya kamajñātayakṣamāduta rājayakṣamāt ।*
*grāhirjagrāha yadyetadenaṁ tasyā indrāgnī pra mumuktamenam ॥1 ॥*
*yadi kṣitāyuryadi vā paretoyadi mṛtyorantikaṁ nīta eva ।*
*tamā harāmi nirṛterupasthādaspārśamenam śataśāradāya ॥2 ॥*
*sahasrākṣeṇa śatavīryeṇa śatāyuṣā haviṣāhārṣamenam ।*
*indro yathainaṁ śarado nayātayati viśvasya duritasya pāram ॥3 ॥*
*śataṁ jīva śarado vardhamānaḥ śataṁ hemantāṁchhatamuvasantān ।*
*śataṁ ta indro agniḥ savitā bṛhaspatiḥ śatāyuṣā haviṣāhārṣamenam ॥4 ॥*
*pra viśataṁ prāṇāpānāvanaḍvāhāviva vrajam ।*
*vya1nye yantu mṛtyavo yānāhuritarāṁchhatam ॥5 ॥*
*ihaiva staṁ prāṇāpānau māpa gātamito yuvam ।*
*śarīramasyāṁgāni jarase vahataṁ punaḥ ॥6 ॥*
*jarāyai tvā pari dadāmi jarāyai ni dhuvāmi tvā ।*
*jarā tvā bhadrā neṣṭa vya1nye yantu mṛtyavo yānāhuritarāṁchhatam ॥7 ॥*
*abhi tvā jarimāhita gāmukṣaṇamiva rajjvā ।*
*yastvā mṛtyurabhyadhatta jāyamānaṁ supāśayā ।*
*taṁ te satyasya hastābhyāmudamuṁchad bṛhaspatiḥ ॥8 ॥*

२२. ऋक् सामनी (Ṛk Sāmanī) - अ. (Av.) ७.५४.१

ऋचं साम यजामहे याभ्यां कर्माणि कुर्वते। एते सदसि राजतो यज्ञं देवेषु यच्छतः ॥१ ॥
*ṛchaṁ sāma yajāmahe yābhyāṁ karmāṇi kurvate । ete sadasi rājato yajñaṁ deveṣu yachchhataḥ ॥1 ॥*

२३. ऋषभः (Ṛṣabhaḥ) - अ. (Av.) ९.४.१-२४

साहस्रस्त्वेष ऋषभः पयस्वान् विश्वा रूपाणि वक्षणासु बिभ्रत् ।
भद्रं दात्रे यजमानाय शिक्षन् बार्हस्पत्य उस्रियस्तन्तुमातान् ॥१ ॥

अपां यो अग्रे प्रतिमा बभूव प्रभूः सर्वस्मै पृथिवीव देवी ।
पिता वत्सानां पतिरघ्न्यानां साहस्रे पोषे अपि नः कृणोतु ॥२॥
पुमानन्तर्वान्त्स्थविरः पयस्वान् वसोः कबन्धमृषभो बिभर्ति ।
तमिन्द्राय पथिभिर्देवयानैर्हुतमग्निर्वहतु जातवेदाः ॥३॥
पिता वत्सानां पतिरघ्न्यानामथो पिता महतां गर्गराणाम् ।
वतसो जरायुः प्रतिधुक् पीयूष आमिक्षा घृतं तद् वस्य रेतः ॥४॥
देवानां भाग उपनाह एषा३पां रस ओषधीनां घृतस्य ।
सोमस्य भक्षमवृणीत शक्रो बृहन्नद्रिरभवद् यच्छरीरम् ।
सोमेन पूर्णं कलशं बिभर्षि त्वष्टा रूपाणां जनिता पशूनाम् ।
शिवास्ते सन्तु प्रजन्व इह या इमा न्य१ स्मभ्यं स्वधिते यच्छ या अमूः ॥६॥
आज्यं बिभर्ति घृतमस्य रेतः साहस्रः पोषस्तमु यज्ञमाहुः ।
इन्द्रस्य रूपमृषभो वसानः सो अस्मान् देवाः शिव ऐतु दत्तः ॥७॥
इन्द्रस्यौजो वरुणस्य बाहू अश्विनोरंसौ मरुतामियं कुकुत् ।
बृहस्पतिं संभृतमेतमाहुर्ये धीरासः कवयो ये मनीषिणः ॥८॥
दैवीर्विशः पयस्वाना तनोषि त्वामिन्द्रं त्वां सरस्वन्तमाहुः ।
सहस्रं स एकमुखा ददाति यो ब्राह्मण ऋषभमाजुहोति ॥९॥
बृहस्पतिः सविता ते वयो दधौ त्वष्टुर्वायोः पर्यात्मा त आभृतः ।
अन्तरिक्षे मनसा त्वा जुहोमि बर्हिष्टे द्यावापृथिवी उभे स्ताम् ॥१०॥
य इन्द्रइव देवेषु गोष्वेति विवावदत् ।
तस्य ऋषभस्यांगानि ब्रह्मा सं स्तौतु भद्रया ॥११॥
पार्श्वे आस्तामनुमत्या भगस्यास्तामनूवृजौ ।
अष्ठीवन्तावब्रवीन्मित्रो ममैतौ केवलाविति ॥१२॥
भसदासीदादित्यानां श्रोणी आस्तां बृहस्पतेः ।
पुच्छं वातस्य देवस्य तेन धूनोत्योषधीः ॥१३॥
गुदा आसन्त्सिनीवाल्याः सूर्यायास्त्वचमब्रुवन् ।
उत्थातुरब्रुवन् पद ऋषभं यदकल्पयन् ॥१४॥
क्रोड आसींजामिशंसस्य सोमस्य कलशो धृतः ।
देवाः संगत्य यत् सर्व ऋषभं व्यकल्पयन् ॥१५॥
ते कुष्ठिकाः सरमायै कूर्मेभ्यो अदधुः शफान् ।
ऊबध्यमस्य कीटेभ्यः श्ववर्तेभ्यो अधारयन् ॥१६॥
श्रृंगभ्यां रक्ष ऋषत्यवर्तिं हन्ति चक्षुषा ।
श्रृणोति भद्रं कर्णाभ्यां गवां यः पतिरघ्न्यः ॥१७॥
शतयाजं स यजते नैनं दुन्वन्त्यग्नयः ।
जिन्वन्ति विश्वे तं देवा यो ब्राह्मण ऋषभमाजुहोति ॥१८॥
ब्राह्मणेभ्य ऋषभं दत्त्वा वरायः कृणुते मनः ।
पुष्टिं सो अघ्न्यानां स्वे गोष्ठेऽव पश्यते ॥१९॥
गावः सन्तु प्रजाः सन्त्वथो अस्तु तनूबलम् ।
तत् सर्वमनु मन्यन्तां देवा ऋषभदायिने ॥२०॥
अयं पिपान इन्द्र इद् राय दधातु चेतनीम् ।
अयं धेनुं सुदुघां नित्यवत्सां वशं दुहां विपश्चितं परो दिवः ॥२१॥
पिशंगरूपो नभसो वयोधा ऐन्द्रः शुष्मो विश्वरूपो न आगन् ।
आयुरस्मभ्यं दधत् प्रजां च रायश्च पोषैरभि नः सचताम् ॥२२॥
उपेहोपपर्चनास्मिन् गोष्ठ उप पृंच नः ।
उप ऋषभस्य यद् रेत उपेन्द्र तव वीर्यम् ॥२३॥
एतं वो युवानं प्रति दध्मो अत्र तेन क्रीडन्तीश्चरत वशाँ अनु ।
मा नो हासिष्ट जनुषा सुभागा रायश्च पाषैरभि नः सचध्वम् ॥२४॥
*sāhasrastveṣa ṛṣabhaḥ payasvān viśvā rūpāṇi vakṣaṇāsu bibhrat* ।

*bhadraṁ dātre yajamānāya śikṣan bārhaspatya usriyastantumātān* ॥1॥
*apāṁ yo agre pratimā babhūva prabhūḥ sarvasmai pṛthivīva devī* ।
*pitā vatsānāṁ patiradhnyānāṁ sāhasre poṣe api naḥ kṛṇotu* ॥2॥
*pumānantarvāntsthaviraḥ payasvān vasoḥ kabandhamṛṣabho bibharti* ।
*tamindrāya pathibhirdevayānairhutamagnirvahatu jātavedāḥ* ॥3॥
*pitā vatsānāṁ patiraghnyānāmatho pitā mahatāṁ gargarāṇām* ।
*vataso jarāyuḥ pratidhuk pīyūṣa āmikṣā ghṛtaṁ tad vasya retaḥ* ॥4॥
*devānāṁ bhāga upanāha eṣā3pāṁ rasa oṣadhīnāṁ ghṛtasya* ।
*somasya bhakṣamavṛṇīta śakro bṛhannadrirabhavad yachchharīram* ।
*somena pūrṇaṁ kalaśaṁ bibharṣi tvaṣṭā rūpāṇāṁ janitā paśūnām* ।
*śivāste santu prajanva iha yā imā nya1 smabhyaṁ svadhite yachchha yā amūḥ* ॥6॥
*ājyaṁ bibharti ghṛtamasya retaḥ sāhasraḥ poṣastamu yajñamāhuḥ* ।
*indrasya rūpamṛṣabho vasānaḥ so asmān devāḥ śiva aitu dattaḥ* ॥7॥
*indrasyaujo varuṇasya bāhū aśvinoraṁsau marutāmiyaṁ kukut* ।
*bṛhaspatiṁ saṁbhṛtametamāhurye dhīrāsaḥ kavayo ye manīṣiṇaḥ* ॥8॥
*daivīrviśaḥ payasvānā tanoṣi tvāmindraṁ tvāṁ sarasvantamāhuḥ* ।
*sahasraṁ sa ekamukhā dadāti yo brāhmaṇa ṛṣabhamājuhoti* ॥9॥
*bṛhaspatiḥ savitā te vayo dadhau tvaṣṭurvāyoḥ paryātmā ta ābhṛtaḥ* ।
*antarikṣe manasā tvā juhomi barhiṣṭe dyāvāpṛthivī ubhe stām* ॥10॥
*ya indraiva deveṣu goṣveti vivāvadat* ।
*tasya ṛṣabhsyāṁgāni brahmā saṁ stautu bhadrayā* ॥11॥
*pārśve āstāmanumatyā bhagasyāstāmanūvṛjau* ।
*aṣṭhīvantāvabravīnmitro mamaitau kevalāviti* ॥12॥
*bhasadāsīdādityānāṁ śroṇī āstāṁ bṛhaspateḥ* ।
*puchchhaṁ vātasya devasya tena dhūnotyoṣadhīḥ* ॥13॥
*gudā āsantsinīvālyāḥ sūryāyāstvachamabruvan* ।
*utthāturabruvan pada ṛṣabhaṁ yadakalpayan* ॥14॥
*kroḍa āsīṁjāmiśaṁsasya somasya kalaśo dhṛtaḥ* ।
*devāḥ saṁgatya yat sarva ṛṣabhaṁ vyakalpayan* ॥15॥
*te kuṣṭhikāḥ saramāyai kūrmebhyo adadhuḥ śaphān* ।
*ūbadhyamasya kīṭebhyaḥ śvavartebhyo adhārayan* ॥16॥
*śṛṁgabhyāṁ rakṣa ṛṣatyavartiṁ hanti chakṣuṣā* ।
*śṛṇoti bhadraṁ karṇābhyāṁ gavāṁ yaḥ patiraghnyaḥ* ॥17॥
*śatayājaṁ sa yajate nainaṁ dunvantyagnayaḥ* ।
*jinvanti viśve taṁ devā yo brāhmaṇa ṛṣabhamājuhoti* ॥18॥
*brāhmaṇebhya ṛṣabhaṁ dattvā varāyaḥ kṛṇute manaḥ* ।
*puṣṭiṁ so aghnyānāṁ sve goṣṭhe'va paśyate* ॥19॥
*gāvaḥ santu prajāḥ santvatho astu tanūbalam* ।
*tat sarvamanu manyantāṁ devā ṛṣabhadāyine* ॥20॥
*ayaṁ pipāna indra id rāya dadhātu chetanīm* ।
*ayaṁ dhenuṁ sudughāṁ nityavatsāṁ vaśaṁ duhāṁ vipaśchitaṁ paro divaḥ* ॥21॥
*piśaṁgarūpo nabhaso vayodhā aindraḥ śuṣmo viśvarūpo na āgan* ।
*āyurasmabhyaṁ dadhat prajāṁ cha rāyaścha poṣairabhi naḥ sachatām* ॥22॥
*upehopaparchanāsmin goṣṭha upa pṛṁcha naḥ* ।
*upa ṛṣabhasya yad reta upendra tava vīryam* ॥23॥
*etaṁ vo yuvānaṁ prati dadhmo atra tena krīḍantīścharata vaśāṁ̐ anu* ।
*mā no hāsiṣṭa januṣā subhāgā rāyaścha pāṣairabhi naḥ sachadhvam* ॥24॥

२४. ओजः प्रभृतीनिः (Ojaḥ Prabhṛtīniḥ) - अ. (Av.) २.१७.१-७

ओजोऽस्योजो मे दाः स्वाहा ॥१॥
सहोऽसि सहो मे दाः स्वाहा ॥२॥
बलमसि बलं मे दाः स्वाहा ॥३॥
आयुरस्यायुर्मे मे दाः स्वाहा ॥४॥
श्रोत्रमसि श्रोत्रं मे दाः स्वाहा ॥५॥

चक्षुरसि चक्षुर्मे दाः स्वाहा ॥६॥
परिपाणमसि परिपाणं मे दाः स्वाहा ॥७॥
*ojo'syojo me dāḥ svāhā ॥1॥*
*saho'si saho me dāḥ svāhā ॥2॥*
*balamasi balaṁ me dāḥ svāhā ॥3॥*
*āyurasyāyurme me dāḥ svāhā ॥4॥*
*śrotramasi śrotraṁ me dāḥ svāhā ॥5॥*
*chakṣurasi chakṣurme dāḥ svāhā ॥6॥*
*paripāṇamasi paripāṇaṁ me dāḥ svāhā ॥7॥*

२५. कामः (Kāmaḥ) - अ. (Av.) १९.५२.१-५

कामस्तदग्रे समवर्तत मनसो रेतः प्रथमं यदासीत् ।
स काम कामेन बृहता सयोनी रायस्पोषं यजमानाय धेहि ॥१॥
त्वं काम सहसासि प्रतिष्ठितो विभुर्विभावा सख आ सखीयते ।
त्वमुग्रः पृत्नासु सासहिः सह ओजो यजमानाय धेहि ॥२॥
दूराच्चकमानाय प्रतिपाणयाक्षये ।
आस्मा अशृण्वन्नाशाः कामेनाजनयन्त्स्वः ॥३॥
कामेन मा काम आगन् हृदयाद्धृदयं परि ।
यदमीषामदो मनस्तदैतूप मामिह ॥४॥
यत्काम कामयमाना इदं कृण्मसि ते हविः ।
तन्नः सर्वं समृध्यतामथेतस्य हविषो वीहि स्वाहा ॥५॥
*kāmastadagre samavartata manaso retaḥ prathamaṁ yadāsīt ।*
*sa kāma kāmena bṛhatā sayonī rāyaspoṣaṁ yajamānāya dhehi ॥1॥*
*tvaṁ kāma sahasāsi pratiṣṭhito vibhurvibhāvā sakha ā sakhīyate ।*
*tvamugraḥ pṛtnāsu sāsahiḥ saha ojo yajamānāya dhehi ॥2॥*
*dūrāchchakamānāya pratipāṇayākṣaye ।*
*āsmā aśṛṇvannāśāḥ kāmenājanayantsvaḥ ॥3॥*
*kāmena mā kāma āgan hṛdayāddhṛdayaṁ pari ।*
*yadamīṣāmado manastadaitūpa māmiha ॥4॥*
*yatkāma kāmayamānā idaṁ kṛṇmasi te haviḥ ।*
*tannaḥ sarvaṁ samṛdhyatāmathetasya haviṣo vīhi svāhā ॥5॥*

२६. गायत्रीः (Gāyatrīḥ) - अ. (Av.) १९.७१.१

स्तुता मया वरदा वेदमाता प्र चोदयन्तां पावमानी द्विजानाम् ।
आयुः प्राणं प्रजां पशुं कीर्तिं द्रविणं ब्रह्मवर्चसम्। मह्यं दत्त्वा व्रजत ब्रह्मलोकम् ॥१॥
*stutā mayā varadā vedamātā pra chodayantāṁ pāvamānī dvijānām ।*
*āyuḥ prāṇaṁ prajāṁ paśuṁ kīrtiṁ draviṇaṁ brahmavarchasam । mahyaṁ dattvā vrajata brahmalokam ॥1॥*

२७. गावः (Gāvaḥ) - अ. (Av.) ४.२१.१-७

आ गावो अग्मन्नुत भद्रमक्रन्त्सीदन्तु गोष्ठे रणयन्त्वस्मे ।
प्रजावतीः पुरुरूपा इह स्युरिन्द्राय पूर्वीरुषसो दुहानाः ॥१॥
इन्द्रो यज्वने गृणनते च शिक्षत उपेद् ददाति न स्वं मुषायति ।
भूयोभूयो रयिमिदस्य वर्धयन्नभिन्न खिल्ये नि दधाति देवयुम् ॥२॥
न ता नशन्ति न दभाति तस्करो नासामामित्रो व्यथिरा दधर्षति ।
देवांश्च याभिर्यजते ददाति च ज्योगित् ताभिः सचते गोपतिः सह ॥३॥
न ता अर्वा रेणुककाटोऽश्नुते न संस्कृतत्रमुप यन्ति ता अभि ।
उरुगायमभ्यं तस्य ता अनु गावो मर्तस्य वि चरन्ति यज्वनः ॥४॥
गावो भगो गाव इन्द्रो म इच्छाद् गावः सोमस्य प्रथमस्य भक्षः ।
इमा या गावः स जनास इन्द्र इच्छमि हृदा मनसा चिदिन्द्रम् ॥५॥
यूयं गावो मेदयथा कृशं चिदश्रीरं चित् कृणुथा सुप्रतीकम् ।
भद्रं गृहं कृणुथ भद्रवाचो बृहद् वो वय उच्यते सभासु ॥६॥

प्रजावतीः सूयवसे रुशन्तीः शुद्धा अपः सुप्रपाणे पिबन्तीः ।
मा व स्तेन ईशत माघशंसः परि वो रुद्रस्य हेतिर्वृणक्तु ॥७॥
*ā gāvo agmannuta bhadramakrantsīdantu goṣṭhe raṇayantvasme /*
*prajāvatīḥ pururūpā iha syurindrāya pūrvīruṣaso duhānāḥ //1//*
*indro yajvane gṛṇanate cha śikṣata uped dadāti na svaṁ muṣāyati /*
*bhūyobhūyo rayimidasya vardhayannabhinna khilye ni dadhāti devayum //2//*
*na tā naśanti na dabhāti taskaro nāsāmāmitro vyathirā dadharṣati /*
*devāṁścha yābhiryajate dadāti cha jyogit tābhiḥ sachate gopatiḥ saha //3//*
*na tā arvā reṇukakāṭo'śnute na saṁskṛtatramupa yanti tā abhi /*
*urugāyamabhyaṁ tasya tā anu gāvo martasya vi charanti yajvanaḥ //4//*
*gāvo bhago gāva indro ma ichchhād gāvaḥ somasya prathamasya bhakṣaḥ /*
*imā yā gāvaḥ sa janāsa indra ichchhami hṛdā manasā chidindram //5//*
*yūyaṁ gāvo medayathā kṛśaṁ chidaśrīraṁ chit kṛṇuthā supratīkam /*
*bhadraṁ gṛhaṁ kṛṇutha bhadravācho bṛhad vo vaya uchyate sabhāsu //6//*
*prajāvatīḥ sūyavase ruśantīḥ śuddhā apaḥ suprapāṇe pibantīḥ /*
*mā va stena īśata māghaśaṁsaḥ pari vo rudrasya hetirvṛṇaktu //7//*

२८. गृहाः वास्तोष्पतिः (Gṛhāḥ Vāstoṣpatiḥ) - अ. (Av.) ७.६०.१-७

ऊर्जं बिभ्रद् वसुवनिः सुमेधा अघोरेण चक्षुषा मित्रियेण।
गृहानैमि सुमना वन्दमानो रमध्वं मा बिभीत मत् ॥१॥
इमे गृहा मयोभुव ऊर्जस्वन्तः पयस्वन्तः ।
पूर्णा वामेन तिष्ठन्तस्ते नो जानन्त्वायतः ॥२॥
येषामध्येति प्रवसन् येषु सौमनसो बहुः ।
गृहानुप ह्वयामहे ते नो जानन्त्वयतः ॥३॥
उपहूता भूरिधनाः सखायः स्वादुसंमुदः ।
अक्षुध्या अतृष्या स्त गृहा मास्मद् बिभीतन ॥४॥
उपहूता इह गाव उपहूता अजाव्यः ।
अथो अन्नस्य कीलाल उपहूतो गृहेषु नः ॥५॥
सूनृतावन्तः सुभगा इरावन्तो हसामुदाः ।
अतृष्या अक्षुध्या स्त गृहा मास्मद् बिभीतन ॥६॥
इहैव स्त मानु गात विश्वा रूपाणि पुष्यत ।
ऐष्यामि भद्रेण सह भूयांसो भवता मया ॥७॥
*ūrjaṁ bibhrad vasuvaniḥ sumedhā aghoreṇa chakṣuṣā mitriyeṇa /*
*gṛhānaimi sumanā vandamāno ramadhvaṁ mā bibhīta mat //1//*
*ime gṛhā mayobhuva ūrjasvantaḥ payasvantaḥ /*
*pūrṇā vāmena tiṣṭhantaste no jānantvāyataḥ //2//*
*yeṣāmadhyeti pravasan yeṣu saumanaso bahuḥ /*
*gṛhānupa hvayāmahe te no jānantvayataḥ //3//*
*upahūtā bhūridhanāḥ sakhāyaḥ svādusaṁmudaḥ /*
*akṣudhyā atṛṣyā sta gṛhā māsmad bibhītana //4//*
*upahūtā iha gāva upahūtā ajāvyaḥ /*
*atho annasya kīlāla upahūto gṛheṣu naḥ //5//*
*sūnṛtāvantaḥ subhagā irāvanto hasāmudāḥ /*
*atṛṣyā akṣudhyā sta gṛhā māsmad bibhītana //6//*
*ihaiva sta mānu gāta viśvā rūpāṇi puṣyata /*
*aiṣyāmi bhadreṇa saha bhūyāṁso bhavatā mayā //7//*

२९. गौः (Gauḥ) - अ. (Av.) ९.७.१-२६

प्रजापतिश्च परमेष्ठी च श्रृंगे इन्द्रः शिरो अग्निर्ललाटं यमः कृकाटम् ॥१॥
सोमो राजा मस्तिष्को द्यौरुत्तरहनुः पृथिव्यधरहनुः ॥२॥
विद्युज्जिह्वा मरुतो दन्ता रेवतीर्ग्रीवाः कृत्तिका स्कन्धा घर्मो वहः ॥३॥
विश्वं वायुः स्वर्गो लोकः कृष्णद्रं विधरणी निवेष्यः ॥४॥

श्येनः क्रोडो३न्तरिक्षं पाजस्यं१ बृहस्पतिः ककुद् बृहतीः कीकसाः ॥५॥
देवानां पत्नीः पृष्टय उपसदः पर्शवः ॥६॥
मित्रश्च वरुणश्चांसौ त्वष्टा चार्यमा च दोषणी महादेवो बाहू ॥७॥
इन्द्राणी भसद् वायुः पुच्छं पवमानो वालाः ॥८॥
ब्रह्म च क्षत्रं च श्रोणी बलमूरू ॥९॥
धाता च सविता चाष्ठीवन्तौ जंघा गन्धर्वा अप्सरसः कुष्ठिका अदितिः शफाः ॥१०॥
चेतो हृदयं यकृन्मेधा व्रतं पुरीतत् ॥११॥
क्षुत् कुक्षिरिरा वनिष्ठुः पर्वताः प्लाशयः ॥१२॥
क्रोधो वृक्कौ मन्युराण्डौ प्रजा शेपः ॥१३॥
नदी सूत्री वर्षस्य पतय स्तना स्तनयित्नुरूधः ॥१४॥
विश्वव्यचाश्चर्मौषधयो लोमानि नक्षत्राणि रूपम् ॥१५॥
देवजना गुदा मनुष्याआन्त्राण्यत्रा उदरम् ॥१६॥
रक्षांसि लोहितमितरजना ऊवध्यम् ॥१७॥
अभ्रं पीबो मज्जा निधनम् ॥१८॥
अग्निरासीन उत्थितोऽश्विना ॥१९॥
इन्द्रः प्राङ् तिष्ठन् दक्षिणा तिष्इन् यमः ॥२०॥
प्रत्यङ् तिष्ठन् धातोदङ् तिष्ठन्त्सविता ॥२१॥
तृणानि प्राप्तः सोमो राजा ॥२२॥
मित्र ईक्षमाण आवृत्त आनन्दः ॥२३॥
युज्यमानो वैश्वदेवो युक्तः प्रजापतिर्विमुक्तः सर्वम् ॥२४॥
एतद् वै विश्वरूपं सर्वरूपं गोरूपम् ॥२५॥
उपैनं विश्वरूपाः सर्वरूपाः पशवस्तिष्ठन्ति य एवं वेद ॥२६॥

*prajāpatiścha parameṣṭhī cha śṛṅge indraḥ śiro agnirlalāṭaṁ yamaḥ kṛkāṭam ॥1॥*
*somo rājā mastiṣko dyauruttarahanuḥ pṛthivyadharahanuḥ ॥2॥*
*vidyujjihvā maruto dantā revatīrgrīvāḥ kṛttikā skandhā gharmo vahaḥ ॥3॥*
*viśvaṁ vāyuḥ svargo lokaḥ kṛṣṇadraṁ vidharaṇī niveṣyaḥ ॥4॥*
*śyenaḥ kroḍo3ntarikṣaṁ pājasyaṁ1 bṛhaspatiḥ kakud bṛhatīḥ kīkasāḥ ॥5॥*
*devānāṁ patnīḥ pṛṣṭaya upasadaḥ parśavaḥ ॥6॥*
*mitraścha varuṇaśchāṁsau tvaṣṭā chāryamā cha doṣaṇī mahādevo bāhū ॥7॥*
*indrāṇī bhasad vāyuḥ puchchhaṁ pavamāno vālāḥ ॥8॥*
*brahma cha kṣatraṁ cha śroṇī balamūrū ॥9॥*
*dhātā cha savitā chāṣṭhīvantau jaṁghā gandharvā apsarasaḥ kuṣṭhikā aditiḥ śaphāḥ ॥10॥*
*cheto hṛdayaṁ yakṛnmedhā vrataṁ purītat ॥11॥*
*kṣut kukṣirirā vaniṣṭhuḥ parvatāḥ plāśayaḥ ॥12॥*
*krodho vṛkkau manyurāṇḍau prajā śepaḥ ॥13॥*
*nadī sūtrī varṣasya pataya stanā stanayitnurūdhaḥ ॥14॥*
*viśvavyachāścharmauṣadhayo lomāni nakṣatrāṇi rūpam ॥15॥*
*devajanā gudā manuṣyāāntrāṇyatrā udaram ॥16॥*
*rakṣāṁsi lohitamitarajanā ūvadhyam ॥17॥*
*abhraṁ pībo majjā nidhanam ॥18॥*
*agnirāsīna utthito'śvinā ॥19॥*
*indraḥ prāṅ tiṣṭhan dakṣiṇā tiṣin yamaḥ ॥20॥*
*pratyaṅ tiṣṭhan dhātodaṅ tiṣṭhantsavitā ॥21॥*
*tṛṇāni prāptaḥ somo rājā ॥22॥*
*mitra īkṣamāṇa āvṛtta ānandaḥ ॥23॥*
*yujyamāno vaiśvadevo yuktaḥ prajāpatirvimuktaḥ sarvam ॥24॥*
*etad vai viśvarūpaṁ sarvarūpaṁ gorūpam ॥25॥*
*upainaṁ viśvarūpāḥ sarvarūpāḥ paśavastiṣṭhanti ya evaṁ veda ॥26॥*

३०. गौ विराट् अध्यातमम् (Gau Virāṭ Adhyātamam) - अ. (Av.) ९.१०.१-२२; २४-२८

अ. (Av.) ९.१०.१-२२

यद् गायत्रे अधि गायत्रमाहितं त्रैष्टुभे वा त्रैष्टुभान्निरतक्षत ।
यद्वा जगज्जगत्याहितं पदं य इत् तद् विदुस्ते अमृतत्वमानशुः ॥१॥
गायत्रेण प्रति मिमीते अर्कमर्केण साम त्रैष्टुभेन वाकम् ।
वाकेन वाकं द्विपदा चतुष्पदाक्षरेण मिमते सप्त वाणीः ॥२॥
जगता सिन्धुं दिव्यस्कभायद् रथन्तरे सूर्यं पर्यपश्यत् ।
गायत्रस्य समिधस्तिस्र आहुस्ततो मह्ना प्र रिरिचे महित्वा ॥३॥
उप ह्वये सुदुघां धेनुमेतां सुहस्तो गोधुगुत दोहदेनाम् ।
श्रेष्ठं सवं सविता साविषन्नोऽभीद्धो घर्मस्तदु षु प्र वोचत् ॥४॥
हिंकृण्वती वसुपत्नी वसूनां वत्समिच्छन्ती मनसाभ्यागात् ।
दुहामश्विभ्यां पयो अघ्न्येयं सा वर्धतां महते सौभगाय ॥५॥
गौरमीमेदभि वत्सं मिषन्तं मूर्धानं हिङ्ङकृणोन्मातवा उ ।
सृक्वाणं घर्ममभि वावशाना मिमाति मायुं पयते पयोभिः ॥६॥
अयं स शिङ्क्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधि श्रिता ।
सा चित्तिभिर्नि हि चकार मर्त्यान् विद्युद्भवन्ती प्रति वव्रिमौहत ॥७॥
अनच्छये तुरगातु जीवमेजद् ध्रुवं मध्य आ पस्त्यानाम् ।
जीवो मृतस्य चरति स्वधाभिरमर्त्यो मर्त्येना सयोनिः ॥८॥
विधुं दद्राणं सलिलस्य पृष्ठे युवानं सन्तं पलितो जगार ।
देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान ॥९॥
य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मात् ।
स मातुर्योना परिवीतो अन्तर्बहुप्रजा निरृर्तिरा विवेश ॥१०॥
अपश्यं गोपानिपद्यमानमा च परा च पथिभिश्चरन्तम् ।
स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भूवनेष्वन्तः ॥११॥
द्यौर्नः पिता जनिता नाभिरत्र बन्धूर्नो माता पृथिवी महीयम् ।
उत्तानयोश्चम्बो३र्योनिरन्तरत्रा पिता दुहितुर्गर्भमाधात् ॥१२॥
पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि वृष्णो अश्वस्य रेतः ।
पृच्छामि विश्वस्य भुवनस्य नाभिं पृच्छामि वाचः परमं व्योम ॥१३॥
इयं वेदिः परो अन्तः पृथिव्या अयं सोमो वृष्णो अश्वस्य रेतः ।
अयं यज्ञो विश्वस्य भुवनस्य नाभिर्ब्रह्मायं वाचः परमं वयोम ॥१४॥
न वि जानामि यदिवेदमस्मि निण्यः संनद्धो मनसा चरामि ।
यदा मागन् प्रथमजा ऋतस्यादिद् वाचो अश्नुवे भागमस्याः ॥१५॥
अपाङ् प्राङेति स्वधया गृभीतोऽमर्त्यो मर्त्येना सयोनिः ।
ता शश्वन्ता विषूचीना वियन्ता न्य१न्यं चिक्युर्न नि चिक्युरन्यम् ॥१६॥
सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणि ।
ते धीतिभिर्मनसा ते विपश्चितः परिभुवः परि भवन्ति विश्वतः ॥१७॥
ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इत् तद् विदुस्ते अमी समासते ॥१८॥
ऋचः पदं मात्रया कल्पयन्तोऽर्धर्चेन चाक्लृपुर्विश्वमेजत् ।
त्रिपाद् ब्रह्म पुरुरूपं वि तष्ठे तेन जीवन्ति प्रदिशश्चतस्रः ॥१९॥
सूयवसाद् भगवती हि भूया अधा वयं भगवन्तः स्याम ।
अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती ॥२०॥
गौरिन्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी ।
अष्टापदी नवपदी बभूवुषी सहसांक्षरा भुवनस्य पङ्क्तिस्तस्याः समुद्रा अधि वि क्षरन्ति ॥२१॥
कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतन्ति ।
तं आववृत्रन्सदनादृतस्यादिद् घृतेन पृथिवीं व्यूदुः ॥२२॥

*yad gāyatre adhi gāyatramāhitaṁ traiṣṭubhe vā traiṣṭubhānniratakṣata ।*
*yadvā jagajjagatyāhitaṁ padaṁ ya it tad viduste amṛtatvamānaśuḥ ॥1॥*

*gāyatreṇa prati mimīte arkamarkeṇa sāma traiṣṭubhena vākam ।*
*vākena vākaṁ dvipadā chatuṣpadākṣareṇa mimate sapta vāṇīḥ ॥2 ॥*
*jagatā sindhuṁ divyaskabhāyad rathantare sūryaṁ paryapaśyat ।*
*gāyatrasya samidhastisra āhustato mahnā pra ririche mahitvā ॥3 ॥*
*upa hvaye sudughāṁ dhenumetāṁ suhasto godhuguta dohadenām ।*
*śreṣṭhaṁ savaṁ savitā sāviṣanno'bhīddho gharmastadu ṣu pra vochat ॥4 ॥*
*hiṁkṛṇvatī vasupatnī vasūnāṁ vatsamichchhantī manasābhyāgāt ।*
*duhāmaśvibhyāṁ payo aghnyeyaṁ sā vardhatāṁ mahate saubhagāya ॥5 ॥*
*gauramīmedabhi vatsaṁ miṣantaṁ mūrdhānaṁ hiṅṅakṛṇonmātavā u ।*
*sṛkvāṇaṁ gharmamabhi vāvaśānā mimāti māyuṁ payate payobhiḥ ॥6 ॥*
*ayaṁ sa śiṅkte yena gaurabhīvṛtā mimāti māyuṁ dhvasanāvadhi śritā ।*
*sā chittibhirni hi chakāra martyān vidyudbhavantī prati vavrimauhata ॥7 ॥*
*anachchhaye turagātu jīvamejad dhruvaṁ madhya ā pastyānām ।*
*jīvo mṛtasya charati svadhābhiramartyo martyenā sayoniḥ ॥8 ॥*
*vidhuṁ dadrāṇaṁ salilasya pṛṣṭhe yuvānaṁ santaṁ palito jagāra ।*
*devasya paśya kāvyaṁ mahitvādyā mamāra sa hyaḥ samāna ॥9 ॥*
*ya īṁ chakāra na so asya veda ya īṁ dadarśa hiruginnu tasmāt ।*
*sa māturyonā parivīto antarbahuprajā nirṛtirā viveśa ॥10 ॥*
*apaśyaṁ gopānipadyamānamā cha parā cha pathibhiścharantam ।*
*sa sadhrīchīḥ sa viṣūchīrvasāna ā varīvarti bhūvaneṣvantaḥ ॥11 ॥*
*dyaurnaḥ pitā janitā nābhiratra bandhūrno mātā pṛthivī mahīyam ।*
*uttānayośchambo3ryonirantaratrā pitā duhiturgarbhamādhāt ॥12 ॥*
*pṛchchhāmi tvā paramantaṁ pṛthivyāḥ pṛchchhāmi vṛṣṇo aśvasya retaḥ ।*
*pṛchchhāmi viśvasya bhuvanasya nābhiṁ pṛchchhāmi vāchaḥ paramaṁ vyoma ॥13 ॥*
*iyaṁ vediḥ paro antaḥ pṛthivyā ayaṁ somo vṛṣṇo aśvasya retaḥ ।*
*ayaṁ yajño viśvasya bhuvanasya nābhirbrahmāyaṁ vāchaḥ paramaṁ vayoma ॥14 ॥*
*na vi jānāmi yadivedamasmi niṇyaḥ saṁnaddho manasā charāmi ।*
*yadā māgan prathamajā ṛtasyādid vācho aśnuve bhāgamasyāḥ ॥15 ॥*
*apāṅ prāṅeti svadhayā gṛbhīto'martyo martyenā sayoniḥ ।*
*tā śaśvantā viṣūchīnā viyantā nya1nyaṁ chikyurna ni chikyuranyam ॥16 ॥*
*saptārdhagarbhā bhuvanasya reto viṣṇostiṣṭhanti pradiśā vidharmaṇi ।*
*te dhītibhirmanasā te vipaśchitaḥ paribhuvaḥ pari bhavanti viśvataḥ ॥17 ॥*
*ṛcho akṣare parame vyoman yasmin devā adhi viśve niṣeduḥ ।*
*yastanna veda kimṛchā kariṣyati ya it tad viduste amī samāsate ॥18 ॥*
*ṛchaḥ padaṁ mātrayā kalpayanto'rdharchena chāklṛpurviśvamejat ।*
*tripād brahma pururūpaṁ vi taṣṭhe tena jīvanti pradiśaśchatasraḥ ॥19 ॥*
*sūyavasād bhagavatī hi bhūyā adhā vayaṁ bhagavantaḥ syāma ।*
*addhi tṛṇamaghnye viśvadānīṁ piba śuddhamudakamācharantī ॥20 ॥*
*gaurinmimāya salilāni takṣatyekapadī dvipadī sā chatuṣpadī ।*
*aṣṭāpadī navapadī babhūvuṣī sahasāṁkṣarā bhuvanasya paṅktistasyāḥ samudrā adhi vi kṣaranti ॥21 ॥*
*kṛṣṇaṁ niyānaṁ harayaḥ suparṇā apo vasānā divamutpatanti ।*
*taṁ āvavṛtransadanādṛtasyādid ghṛtena pṛthivīṁ vyūduḥ ॥22 ॥*

अ. (Av.) ९.१०.२४-२८

विराड् वाग् विराट् पृथिवी विराडन्तरिक्षं विराट् प्रजापतिः ।
विराण्मृत्युः साध्यानामधिराजो बभूव तस्य भूतं भव्यं वशे स मे भूतं भव्यं वशे कृणोतु ॥२४॥
शकमयं धूममारादपश्यं विषूवता पर एनावरेण ।
उक्षाणं पृश्निमपचन्त वीरास्तानि धर्माणि प्रथमान्यासन् ॥२५॥
त्रयः केशिन ऋतुथा वि चक्षते संवत्सरे वपत एक एषाम् ।
विश्वमन्यो अभिचष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपम् ॥२६॥
चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेंगयन्ति तुरीयं वाचो मनुष्यावदन्ति ॥२७॥
इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।

एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥२८॥

*virāḍ vāg virāṭ pṛthivī virāḍantarikṣaṁ virāṭ prajāpatiḥ* ।
*virāṇmṛtyuḥ sādhyānāmadhirājo babhūva tasya bhūtaṁ bhavyaṁ vaśe sa me bhūtaṁ bhavyaṁ vaśe kṛṇotu* ॥24॥
*śakamayaṁ dhūmamārādapaśyaṁ viṣūvatā para enāvareṇa* ।
*ukṣāṇaṁ pṛśnimapachanta vīrāstāni dharmāṇi prathamānyāsan* ॥25॥
*trayaḥ keśina ṛtuthā vi chakṣate saṁvatsare vapata eka eṣām* ।
*viśvamanyo abhichaṣṭe śachībhirdhrājirekasya dadṛśe na rūpam* ॥26॥
*chatvāri vāk parimitā padāni tāni vidurbrāhmaṇā ye manīṣiṇaḥ* ।
*guhā trīṇi nihitā neṁgayanti turīyaṁ vācho manuṣyāvadanti* ॥27॥
*indraṁ mitraṁ varuṇamagnimāhuratho divyaḥ sa suparṇo garutmān* ।
*ekaṁ sad viprā bahudhā vadantyagiṁna yamaṁ mātariśvānamāhuḥ* ॥28॥

३१. गौष्ठः (Gauṣṭhaḥ) - अ. (Av.) ३.१४.१-६

सं वो गोष्ठेन सुषदा सं रय्या सं सुभूत्या। अहर्जातस्य यन्नाम तेना वः सं सृजामसि ॥१॥
सं वः सृजत्वर्यमा सं पूषा सं बृहस्पतिः। समिन्द्रो यो धनंजयो मयि पुष्यत यद् वसु ॥२॥
संजग्माना अविभ्युषिरस्मिन् गोष्ठे करीषिणीः। बिभ्रतीः सोम्यं मध्वनमीवा उपेतन ॥३॥
इहैव गाव एतनेहो शकेव पुष्यत। इहैवोत प्र जायध्वं मयि संज्ञानमस्तु वः ॥४॥
शिवो वो गोष्ठो भवतु शारिशाकेव पुष्यत। इहैवोत प्र जायध्वं मया वः सं सृजामसि ॥५॥
माया गावो गोपतिना सचध्वमयं वो गोष्ठ इह पोषयिष्णुः ।
रायस्पोषेण बहुला भवन्तीर्जीवाजीवन्तीरुप वः सदेम ॥६॥

*saṁ vo goṣṭhena suṣadā saṁ rayyā saṁ subhūtyā* । *aharjātasya yannāma tenā vaḥ saṁ sṛjāmasi* ॥1॥
*saṁ vaḥ sṛjatvaryamā saṁ pūṣā saṁ bṛhaspatiḥ* । *samindro yo dhanaṁjayo mayi puṣyata yad vasu* ॥2॥
*saṁjagmānā avibhyuṣirasmin goṣthe karīṣiṇīḥ* । *bibhratīḥ somyaṁ madhvanamīvā upetana* ॥3॥
*ihaiva gāva etaneho śakeva puṣyata* । *ihaivota pra jāyadhvaṁ mayi saṁjñānamastu vaḥ* ॥4॥
*śivo vo goṣṭho bhavatu śāriśākeva puṣyata* । *ihaivota pra jāyadhvaṁ mayā vaḥ saṁ sṛjāmasi* ॥5॥
*māyā gāvo gopatinā sachadhvamayaṁ vo goṣṭha iha poṣayiṣṇuḥ* ।
*rāyaspoṣeṇa bahulā bhavantīrjīvājīvantīrupa vaḥ sadema* ॥6॥

३२. छन्दांसि (Chhandāṁsi) - अ. (Av.) १९.२१.१

गायत्र्युश्णिगनुष्टुब् बृहती पङ्क्तिस्त्रिष्टुब् जगत्यै ॥१॥

*gāyatrayu1ṣṇiganuṣṭub bṛhatī paṅktistriṣṭub jagatyai* ॥1॥

३३. जातवेदसोऽग्निः (Jātavedaso'gniḥ) - अ. (Av.) ४.३९.९-१०

अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अभिशस्तिपा उ ।
नमस्कारेण नमसा ते जुहोमि मा देवानां मिथुया कर्म भागम् ॥९॥
हृदा पूतं मनसा जातवेदो विश्वानि देव वयुनानि विद्वान् ।
सप्तास्यानि तव जातवेदस्तेभ्यो जुहोमि स जुषस्व हव्यम् ॥१०॥

*agnāvagniścharati praviṣṭa ṛṣīṇāṁ putro abhiśastipā u* ।
*namaskāreṇa namasā te juhomi mā devānāṁ mithuyā karma bhāgam* ॥9॥
*hṛdā pūtaṁ manasā jātavedo viśvāni deva vayunāni vidvān* ।
*saptāsyāni tava jātavedastebhyo juhomi sa juṣasva havyam* ॥10॥

३४. तपः (Tapaḥ) - अ. (Av.) १९.४१.१

भद्रमिच्छन्त ऋषयः स्वर्विदस्तपो दीक्षामुपनिषेदुरग्रे ।
ततो राष्ट्रं बलमोजश्च जातं तदस्मै देवा उपसंनमन्तु ॥१॥

*bhadramichchhanta ṛṣayaḥ svarvidastapo dīkṣāmupaniṣeduragre* ।
*tato rāṣṭraṁ balamojaścha jātaṁ tadasmai devā upasaṁnamantu* ॥1॥

३५. त्वष्टा (Tvaṣṭā) - अ. (Av.) ५.२६.८

त्वष्टा युनक्तु बहुधा नु रूपा अस्मिन् यज्ञे सुयुजः स्वाहा ॥८॥
*tvaṣṭā yunaktu bahudhā nu rūpā asmin yajñe suyujaḥ svāhā ॥8॥*

३६. दर्भमणिः (Darbhamaṇiḥ) - अ. (Av.) १९.२८.१-१०; १९.२९.१-९; १९.३०.१-५

अ. (Av.) १९.२८.१-१०

इमं बध्नामि ते मणिं दीर्घायुत्वाय तेजसे। अदर्भं सपत्नदम्भनं द्विषतस्तपनं हृदः ॥१॥
द्विषतस्तापयन् हृदः शत्रूणां तापयन् मनः। दुर्हार्दः सर्वांस्त्वं दर्भ घर्मइवाभीन्त्संतापयन् ॥२॥
घर्मइवाभितपन् दर्भ द्विषतो नितपन् मणे। हृदः सपत्नानां भिन्द्धीन्द्रइव विरुजं बलम् ॥३॥
भिन्द्धि दर्भ सपत्नानां हृदयं द्विषतां मणे। उद्यन् त्वचमिव भूम्याः शिर एषा वि पातय ॥४॥
भिन्द्धि दर्भ सपत्नान् मे भिन्द्धि मे पृतनायतः। भिन्द्धि मे सर्वान्दुर्हार्दो भिन्द्धि मे द्विषतो मणे॥५॥
छिन्द्धि दर्भ सपत्नान् मे छिन्द्धि मे पृतनायतः ।
छिान्द्धि मे सुर्वान्दुर्हार्दान् छिन्द्धि मे द्विषतो मणे॥६॥
वृश्च दर्भ सपत्नान् मे वृश्च मे पृतनायतः। वृश्च मे सर्वान्दुर्हार्दो वृश्च मे द्विषतो मणे ॥७॥
कृन्त दर्भ सपत्नान्मे कृन्त मे पृतनायतः। कृन्त मे सर्वान्दुर्हार्दां कृन्त मे द्विषतो मणे ॥८॥
पिंश दर्भ सपत्नान् मे पिंश मे पृतनायतः। पिंश मे सर्वान् दुर्हार्दः पिंश मे द्विषतो मणे ॥९॥
विध्य दर्भ सपत्नान् मे विध्य मे पृतनायतः। विध्य मे सर्वान् दुर्हार्दो विध्य मे द्विषतो मणे।१०॥

*imaṁ badhnāmi te maṇiṁ dīrghāyutvāya tejase ।*
*adarbhaṁ sapatnadambhanaṁ dviṣatastapanaṁ hṛdaḥ ॥1॥*
*dviṣatastāpayan hṛdaḥ śatrūṇāṁ tāpayan manaḥ ।*
*durhārdaḥ sarvāṁstvaṁ darbha gharmaivābhīntsaṁtāpayan ॥2॥*
*gharmaivābhitapan darbha dviṣato nitapan maṇe ।*
*hṛdaḥ sapatnānāṁ bhinddhīndraiva virujaṁ balam ॥3॥*
*bhinddhi darbha sapatnānāṁ hṛdayaṁ dviṣatāṁ maṇe ।*
*udyan tvachamiva bhūmyāḥ śira eṣā vi pātaya ॥4॥*
*bhinddhi darbha sapatnān me bhinddhi me pṛtanāyataḥ ।*
*bhinddhi me sarvāndurhārdo bhinddhi me dviṣato maṇe ॥5॥*
*chhinddhi darbha sapatnān me chhinddhi me pṛtanāyataḥ ।*
*chhiānddhi me survāndurhārdān chhinddhi me dviṣato maṇe ॥6॥*
*vṛścha darbha sapatnān me vṛścha me pṛtanāyataḥ ।*
*vṛścha me sarvāndurhārdo vṛścha me dviṣato maṇe ॥7॥*
*kṛnta darbha sapatnānme kṛnta me pṛtanāyataḥ ।*
*kṛnta me sarvāndurhārdāṁ kṛnta me dviṣato maṇe ॥8॥*
*piṁśa darbha sapatnān me piṁśa me pṛtanāyataḥ ।*
*piṁśa me sarvān durhārdaḥ piṁśa me dviṣato maṇe ॥9॥*
*vidhya darbha sapatnān me vidhya me pṛtanāyataḥ ।*
*vidhya me sarvān durhārdo vidhya me dviṣato maṇe ।10॥*

अ. (Av.) १९.२९.१-९

निक्ष दर्भ सपत्नान् मे निक्ष मे पृतनायतः। निक्ष मे सर्वान् दुर्हार्दो निक्ष मे द्विषतो मणे ॥१॥
तृन्द्धि दर्भ सपत्नान् मे तृन्द्धि मे पृतनायतः। तृन्द्धि मे सर्वान् दुर्हार्दस्तृन्द्धि मे द्विषतो मणे॥२।
रुन्द्धि दर्भ सपत्नान् मे रुन्द्धि मे पृतनायतः। रुन्द्धि मे सर्वान् दुर्हार्दो रुन्द्धि मे द्विषतो मणे।३।
मृण दर्भ सपत्नान् मे मृण मे पृतनायतः। मृण मे सर्वान् दुर्हार्दो मृण मे द्विषतो मणे ॥४॥
मन्थ दर्भ सपत्नान् मे मन्थ मे पृतनायतः। मन्थ मे सर्वान् दुर्हार्दो मन्थ मे द्विषतो मणे ॥५॥
पिण्ड्ढि दर्भ सपत्नान् मे पिण्ड्ढि मे पृतनायतः ।
पिण्ड्ढि मे सर्वान् दुर्हार्दः पिण्ड्ढि मे द्विषतो मणे ॥६॥
ओष दर्भ सपत्नान् मे ओष मे पृतनायतः। ओष मे सर्वान् दुर्हार्द ओष मे द्विषतो मणे ॥७॥
दह दर्भ सपत्नान् मे दह मे पृतनायतः। दह मे सर्वान् दुर्हार्दो दह मे द्विषतो मणे ॥८॥
जहि दर्भ सपत्नान् मे जहि मे पृतनायतः। जहि मे सर्वान् दुर्हार्दो जहि मे द्विषतो मणे ॥९॥

*nikṣa darbha sapatnān me nikṣa me pṛtanāyataḥ ।*
*nikṣa me sarvān durhārdo nikṣa me dviṣato maṇe ॥1॥*
*tṛnddhi darbha sapatnān me tṛnddhi me pṛtanāyataḥ ।*
*tṛnddhi me sarvān durhārdastṛnddhi me dviṣato maṇe ॥2।*

*runddhi darbha sapatnān me runddhi me pṛtanāyataḥ |*
*runddhi me sarvān durhārdo runddhi me dviṣato maṇe |3 |*
*mṛṇa darbha sapatnān me mṛṇa me pṛtanāyataḥ |*
*mṛṇa me sarvān durhārdo mṛṇa me dviṣato maṇe ||4 ||*
*mantha darbha sapatnān me mantha me pṛtanāyataḥ |*
*mantha me sarvān durhārdo mantha me dviṣato maṇe ||5 ||*
*piṇḍḍhi darbha sapatnān me piṇḍḍhi me pṛtanāyataḥ |*
*piṇḍḍhi me sarvān durhārdaḥ piṇḍḍhi me dviṣato maṇe ||6 ||*
*oṣa darbha sapatnān me oṣa me pṛtanāyataḥ |*
*oṣa me sarvān durhārda oṣa me dviṣato maṇe ||7 ||*
*daha darbha sapatnān me daha me pṛtanāyataḥ | daha me sarvān durhārdo daha me dviṣato maṇe ||8 ||*
*jahi darbha sapatnān me jahi me pṛtanāyataḥ | jahi me sarvān durhārdo jahi me dviṣato maṇe ||9 ||*

अ. (Av.) १९.३०.१-५

यत् ते दर्भ जरामृत्युः शतं वर्ममु वर्म ते। तेनेमं वर्मिणं कृत्वा सपत्नांजहि वीर्यैः ॥१॥
शतं ते दर्भ वर्माणि सहस्रं वीर्याणि ते। तमस्मै विश्वे त्वां देवा जरसे भर्तवा अदुः ॥२॥
त्वामाहुर्देववर्म त्वां दर्भ ब्रह्मणस्पतिम्। त्वामिन्द्रस्याहुर्वर्म त्वं राष्ट्राणि रक्षसि ॥३॥
सपत्नक्षयणं दर्भ द्विषतस्तपनं हृदः। मणिं क्षत्रस्य वर्धनं तनूपानं कृणोमि ते ॥४॥
यत् समुद्रो अभ्यक्रन्दत् पर्जन्यो विद्युता सह। ततो हिरण्ययो बिन्दुस्ततो दर्भो अजायत ॥५॥
*yat te darbha jarāmṛtyuḥ śataṁ varmamu varma te |*
*tenemaṁ varmiṇaṁ kṛtvā sapatnāṁjahi vīryaiḥ ||1 ||*
*śataṁ te darbha varmāṇi sahasraṁ vīryāṇi te |*
*tamasmai viśve tvāṁ devā jarase bhartavā aduḥ ||2 ||*
*tvāmāhurdevavarma tvāṁ darbha brahmaṇaspatim |*
*tvāmindrasyāhurvarma tvaṁ rāṣṭrāṇi rakṣasi ||3 ||*
*sapatnakṣayaṇaṁ darbha dviṣatastapanaṁ hṛdaḥ |*
*maṇiṁ kṣatrasya vardhanaṁ tanūpānaṁ kṛṇomi te ||4 ||*
*yat samudro abhyakrandat parjanyo vidyutā saha |*
*tato hiraṇyayo bindustato darbho ajāyata ||5 ||*

३७. देवाः (Devāḥ) - अ. (Av.) १.१९.४

यः सपत्नो योऽसपत्नो यश्च द्विषंछपाति नः। देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरम् ॥४॥
*yaḥ sapatno yo'sapatno yaścha dviṣaṁchhapāti naḥ | devāstaṁ sarve dhūrvantu brahma varma mamāntaram ||4 ||*

३८. द्यावापृथिवी (Dyāvāpṛthivī) - अ. (Av.) १.३२.१-४; २.१६.२

अ. (Av.) १.३२.१-४

इदं जनासो विदथ महद् ब्रह्म वदिष्यति। न तत् पृथिव्यां नो दिवि येन प्राणन्ति वीरुधः ॥१॥
अन्तरिक्षं आसां स्थाम श्रान्तसदामिव। आस्थानमस्य भूतस्य विदुष्टद् वेधसो न वा ॥२॥
यद् रोदसी रेजमाने भूमिश्च निरतक्षतम्। आर्द्रं तदद्य सर्वदा समुद्रस्येव स्रोत्याः ॥३॥
विश्वमन्यामभीवार तदन्यस्यामधि श्रितम्। दिवे च विश्ववेदसे पृथिव्यै चाकरं नमः ॥४॥
*idaṁ janāso vidatha mahad brahma vadiṣyati |*
*na tat pṛthivyāṁ no divi yena prāṇanti vīrudhaḥ ||1 ||*
*antarikṣaṁ āsāṁ sthāma śrāntasadāmiva |*
*āsthānamasya bhūtasya viduṣṭad vedhaso na vā ||2 ||*
*yad rodasī rejamāne bhūmiścha niratakṣatam |*
*ārdraṁ tadadya sarvadā samudrasyeva srotyāḥ ||3 ||*
*viśvamanyāmabhīvāra tadanyasyāmadhi śritam |*
*dive cha viśvavedase pṛthivyai chākaraṁ namaḥ ||4 ||*

अ. (Av.) २.१६.२

द्यावापृथिवी उपश्रुत्या मा पातं स्वाहा ॥२॥
*dyāvāpṛthivī upaśrutyā mā pātaṁ svāhā ||2 ||*

३९. निविदः (Nividaḥ) - अ. (Av.) ५.२६.४

प्रैषा यज्ञे निविदः स्वाहा शिष्टाः पत्नीभिर्वहतेह युक्ताः ॥४॥

*praiṣā yajñe nividaḥ svāhā śiṣṭāḥ patnībhirvahateha yuktāḥ ॥4॥*

४०. प्रजापतिः धाता (Prajāpatiḥ Dhātā) - अ. (Av.) ७.१९.१

प्रजापतिर्जनयति प्रजा इमा धाता दधातु सुमनस्यमानः ।
संजानानाः संमनसः सयोनयो मयि पुष्टं पुष्टपतिर्दधातु ॥१॥

*prajāpatirjanayati prajā imā dhātā dadhātu sumanasyamānaḥ ।*
*saṁjānānāḥ saṁmanasaḥ sayonayo mayi puṣṭaṁ puṣṭapatirdadhātu ॥1॥*

४१. प्राणः (Prāṇaḥ) - अ. (Av.) २.१५.१-६

यथा द्यौश्च पृथिवी च न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेः ॥१॥
यथाहश्च रात्री च न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेः ॥२॥
यथा सूर्यश्च चन्द्रश्च न बिभीतो न रिष्यतः। एवा मे प्राणा मा बिभेः ॥३॥
यथा ब्रह्म च क्षंत्रं च न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेः ॥४॥
यथा सत्यं चानृतं च न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेः ॥५॥
यथा भूतं च भव्यं च न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेः ॥६॥

*yathā dyauścha pṛthivī cha na bibhīto na riṣyataḥ । evā me prāṇa mā bibheḥ ॥1॥*
*yathāhaścha rātrī cha na bibhīto na riṣyataḥ । evā me prāṇa mā bibheḥ ॥2॥*
*yathā sūryaścha chandraścha na bibhīto na riṣyataḥ । evā me prāṇā mā bibheḥ ॥3॥*
*yathā brahma cha kṣaṁtraṁ cha na bibhīto na riṣyataḥ । evā me prāṇa mā bibheḥ ॥4॥*
*yathā satyaṁ chānṛtaṁ cha na bibhīto na riṣyataḥ । evā me prāṇa mā bibheḥ ॥5॥*
*yathā bhūtaṁ cha bhavyaṁ cha na bibhīto na riṣyataḥ । evā me prāṇa mā bibheḥ ॥6॥*

४२. प्राणपानौ (Prāṇapānau) - अ. (Av.) २.१६.१

प्राणापानै मृत्योर्मा पातं स्वाहा ॥१॥

*prāṇāpānai mṛtyormā pātaṁ svāhā ॥1॥*

४३. पाप्मा (Pāpmā) - अ. (Av.) ६.२६.१-३

अव मा पाप्मन्त्सृज वशी सन् मृडयासि नः। आ मा भद्रस्य लोके पाप्मन् द्येह्यविह्रुतम् ॥१॥
यो नः पाप्मन् न जहासि तमु त्वा जहिमो वयम्। पथामनु व्यावर्तनेऽन्यं पाप्मानु पद्यताम्॥२॥
अन्यत्रास्मन्न्युच्यतु सहस्राक्षो अमर्त्यः। यं द्वेषाम तमृच्छतु यमु द्विषमस्तमिज्जहि ॥३॥

*ava mā pāpmantsṛja vaśī san mṛḍayāsi naḥ ।*
*ā mā bhadrasya loke pāpman dyehyavihrutam ॥1॥*
*yo naḥ pāpman na jahāsi tamu tvā jahimo vayam ।*
*pathāmanu vyāvartane'nyaṁ pāpmānu padyatām ॥2॥*
*anyatrāsmannyuchyatu sahasrākṣo amartyaḥ ।*
*yaṁ dveṣāma tamṛchchhatu yamu dviṣamastamijjahi ॥3॥*

४४. ब्रह्म (Brahma) - अ. (Av.) १९.४२.१-४

ब्रह्म होता ब्रह्म यज्ञा ब्रह्मणा स्वरवो मिताः ।
अध्वर्युर्ब्रह्मणो जातो ब्रह्मणोऽन्तर्हितं हविः ॥१॥
ब्रह्म स्रुचो घृतवतीर्ब्रह्मणा वेदिरुद्धिता ।
ब्रह्म यज्ञस्य तत्त्वं च ऋत्विजो ये हविष्कृतः। शमिताय स्वाहा ॥२॥
अंहोमुचे प्र भरे मनीषामा सुत्राव्णे सुमतिमावृणानः ।
इममिन्द्र प्रति हव्यं गृभाय सत्याः सन्तु यजमानस्य कामाः ॥३॥
अंहोमुचं वृषभं यज्ञियानां विराजन्तं प्रथममध्वराणाम् ।
अपां नपातमश्विना हुवे धिय इन्द्रियेण तं इन्द्रियं दत्तमोजः ॥४॥

*brahma hotā brahma yajñā brahmaṇā svaravo mitāḥ ।*
*adhvaryurbrahmaṇo jāto brahmaṇo'ntarhitaṁ haviḥ ॥1॥*
*brahma srucho ghṛtavatīrbrahmaṇā vediruddhitā ।*
*brahma yajñasya tattvaṁ cha ṛtvijo ye haviṣkṛtaḥ । śamitāya svāhā ॥2॥*
*aṁhomuche pra bhare manīṣāmā sutrāvṇe sumatimāvṛṇānaḥ ।*

*imamindra prati havyaṁ gṛbhāya satyāḥ santu yajamānasya kāmāḥ //3 //*
*aṁhomuchaṁ vṛṣabhaṁ yajñiyānāṁ virājantaṁ prathamamadhvarāṇām /*
*apāṁ napātamaśvinā huve dhiya indriyeṇa taṁ indriyaṁ dattamojaḥ //4 //*

४५. ब्रह्मचारी (Brahmachārī) - अ. (Av.) ११.५.१-२६

ब्रह्मचारीष्णंश्चरति रोदसी उभे तस्मिन् देवाः संमनसो भवन्ति ।
स दाधार पृथिवीं दिवं च स आचार्यं१ तपसा पिपर्ति ॥१॥
ब्रह्मचारिणं पितरो देवजनाः पृथग् देवा अनुसंयन्ति सर्वे ।
गन्धर्वा एनमन्वायन् त्रयस्त्रिंशत् त्रिशताः षट्सहस्राः सर्वान्त्स देवांस्तपसा पिपर्ति ॥२॥
आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः ।
तं रात्रीस्तिस्र उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः ॥३॥
इयं समित् पृथिवी द्यौर्द्वितीयोतान्तरिक्षं समिधा पृणाति ।
ब्रह्मचारी समिधा मेखलया श्रमेण लोकास्तपसा पिपर्ति ॥४॥
पूर्वो जातो ब्रह्मणो ब्रह्मचारी घर्मं वसानस्तपसोदतिष्ठत् ।
तस्माज्जातं ब्राह्मणं ब्रह्म ज्येष्ठं देवाश्च सर्वे अमृतेन साकम् ॥५॥
ब्रह्मचार्येति समिधा समिद्धः कार्ष्णं वसानो दीक्षितो दीर्घश्मश्रुः ।
स सद्य एति पूर्वस्मादुत्तरं समुद्रं लोकान्त्संगृभ्य मुहुराचरिक्रत् ॥६॥
ब्रह्मचारी जनयन् ब्रह्मापो लोकं प्रजापतिं परमेष्ठिनं विराजम् ।
गर्भो भूत्वामृतस्य योनाविन्द्रो ह भूत्वासुरांस्ततर्ह ॥७॥
आचार्यस्ततक्ष नभसी उभे इमे उर्वी गम्भीरे पृथिवी दिवं च ।
ते रक्षति तपसा ब्रह्मचारी तस्मिन् देवाः संमनसो भवन्ति ॥८॥
इमां भूमिं पृथिवीं ब्रह्मचारी भिक्षामा जभार प्रथमो दिवं च ।
ते कृतवा समिधावुपास्ते तयोरार्पिता भुवनानि विश्वा ॥९॥
अर्वागन्यः परो अन्यो दिवस्पृष्ठाद् गुहा निधी निहितौ ब्राह्मणस्य ।
तौ रक्षति तपसा ब्रह्मचारी तत् केवलं कृणुते ब्रह्म विद्वान् ॥१०॥
अर्वागन्य इतो अन्यः पृथिव्या अग्नी समेतो नभसी अन्तरेमे ।
तयोः श्रयन्ते रश्मयोऽधि दृढास्ताना तिष्ठति तपसा ब्रह्मचारी ॥११॥
अभिक्रन्दन् स्तनयन्नरुणः शितिंगो बृहच्छेपोऽनु भूमौ जभार ।
ब्रह्मचारी सिंचति सानौ रेतः पृथिव्यां तेन जीवन्ति प्रदिशश्चतस्रः ॥१२॥
अग्नौ सूर्ये चन्द्रमसि मातरिश्वन् ब्रह्मचार्य१प्सु समिधमा दधाति ।
तासामर्चींषि पृथगभ्रे चरन्ति तासामाज्यं पुरुषो वर्षमापः ॥१३॥
आचार्ये मृत्युर्वरुणः सोम ओषधयः पयः ।
जीमूता आसन्त्सत्वानस्तैरिदं स्व१राभृतम् ॥१४॥
अमा घृतं कृणुते केवलमाचार्यो भूतवा वरुणो यद्यदैच्छत् प्रजापतौ ।
तद् ब्रह्मचारी प्रायच्छत् स्वान्मित्रो अध्यात्मनः ॥१५॥
आचार्यो ब्रह्मचारी ब्रह्मचारी प्रजापतिः ।
प्रजापतिर्वि राजति विराडिन्द्रोऽभवद् वशी ॥१६॥
ब्रह्मचर्येण तपसा राजा राष्ट्रं वि रक्षति ।
आचार्यो ब्रह्मचर्येण ब्रह्मचारिणमिच्छते ॥१७॥
ब्रह्मचर्येण कन्या३ युवानं विन्दते पतिम् ।
अनड्वान् ब्रह्मचर्येणाश्वो घासं जिगीषति ॥१८॥
ब्रह्मचर्येण तपसा देवा मृत्युमपाघ्नत ।
इन्द्रो ह ब्रह्मचर्येण देवेभ्यः स्व१राभरत् ॥१९॥
ओषधयो भूतभव्यमहोरात्रे वनस्पतिः ।
संवत्सरः सहर्तुभिस्ते जाता ब्रह्मचारिणः ॥२०॥
पार्थिवा दिव्याः पशव आरण्या ग्राम्याश्च ये ।
अपक्षाः पक्षिणश्च ये ते जाता ब्रह्मचारिणः ॥२१॥
पृथक् सर्वे प्राजापत्याः प्राणानात्मसु बिभ्रति ।

तान्त्सर्वान् ब्रह्म रक्षति ब्रह्मचारिण्याभृतम् ॥२२॥
देवानामेतत् परिषूतमनभ्यारूढं चरति रोचमानम् ।
तस्माज्जातं ब्राह्मणं ब्रह्म ज्येष्ठं देवाश्च सर्वे अमृतेन साकम् ॥२३॥
ब्रह्मचारी ब्रह्म भ्राजद् बिभर्ति तस्मिन् देवा अधि विश्वे समोताः ।
प्राणापानौ जनयन्नाद् व्यानं वाचं मनो हृदयं ब्रह्म मेधाम् ॥२४॥
चक्षुः श्रोत्रं यशो अस्मासु धेह्यन्नं रेतो लोहितमुदरम् ॥२५॥
तानि कल्पद् ब्रह्मचारी सलिलस्य पृष्ठे तपोऽतिष्ठत् तप्यमानः समुद्रे ।
स स्नातो बभ्रुः पिङ्गलः पृथिव्यां बहु रोचते ॥२६॥

*brahmachārīṣṇaṁścharati rodasī ubhe tasmin devāḥ saṁmanaso bhavanti /*
*sa dādhāra pṛthivīṁ divaṁ cha sa āchāryaṁ1 tapasā piparti //1 //*
*brahmachāriṇaṁ pitaro devajanāḥ pṛthag devā anusaṁyanti sarve /*
*gandharvā enamanvāyan trayastriṁśat triśatāḥ ṣaṭsahasrāḥ sarvāntsa devāṁstapasā piparti //2 //*
*āchārya upanayamāno brahmachāriṇaṁ kṛṇute garbhamantaḥ /*
*taṁ rātrīstisra udare bibharti taṁ jātaṁ draṣṭumabhisrayanti devāḥ //3 //*
*iyaṁ samit pṛthivī dyaurdvitīyotāntarikṣaṁ samidhā pṛṇāti /*
*brahmachārī samidhā mekhalayā śrameṇa lokāstapasā piparti //4 //*
*pūrvo jāto brahmaṇo brahmachārī gharmaṁ vasānastapasodatiṣṭhat /*
*tasmājjātaṁ brāhmaṇaṁ brahma jyeṣṭhaṁ devāścha sarve amṛtena sākam //5 //*
*brahmachāryeti samidhā samiddhaḥ kārṣṇaṁ vasāno dīkṣito dīrghaśmaśruḥ /*
*sa sadya eti pūrvasmāduttaraṁ samudraṁ lokāntsaṁgṛbhya muhurāchalikrat //6 //*
*brahmachārī janayan brahmāpo lokaṁ prajāpatiṁ parameṣṭhinaṁ virājam /*
*garbho bhūtvāmṛtasya yonāvindro ha bhūtvāsurāṁstatarha //7 //*
*āchāryastatakṣa nabhasī ubhe ime urvī gambhīre pṛthivī divaṁ cha /*
*te rakṣati tapasā brahmachārī tasmin devāḥ saṁmanaso bhavanti //8 //*
*imāṁ bhūmiṁ pṛthivīṁ brahmachārī bhikṣāmā jabhāra prathamo divaṁ cha /*
*te kṛtavā samidhāvupāste tayorārpitā bhuvanāni viśvā //9 //*
*arvāganyaḥ paro anyo divaspṛṣṭhād guhā nidhī nihitau brāhmaṇasya /*
*tau rakṣati tapasā brahmachārī tat kevalaṁ kṛṇute brahma vidvān //10 //*
*arvāganya ito anyaḥ pṛthivyā agnī sameto nabhasī antareme /*
*tayoḥ śrayante raśmayo'dhi dṛḍhāstānā tiṣṭhati tapasā brahmachārī //11 //*
*abhikrandan stanayannaruṇaḥ śitiṁgo bṛhachchhepo'nu bhūmau jabhāra /*
*brahmachārī siṁchati sānau retaḥ pṛthivyāṁ tena jīvanti pradiśaśchatasraḥ //12 //*
*agnau sūrye chandramasi mātariśvan brahmachārya1psu samidhamā dadhāti /*
*tāsāmarchīṁṣi pṛthagabhre charanti tāsāmājyaṁ puruṣo varṣamāpaḥ //13 //*
*āchārye mṛtyurvaruṇaḥ soma oṣadhayaḥ payaḥ /*
*jīmūtā āsantsatvānastairidaṁ sva1rābhṛtam //14 //*
*amā ghṛtaṁ kṛṇute kevalamāchāryo bhūtavā varuṇo yadyadaichchhat prajāpatau /*
*tad brahmachārī prāyachchhat svānmitro adhyātmanaḥ //15 //*
*āchāryo brahmachārī brahmachārī prajāpatiḥ /*
*prajāpatirvi rājati virāḍindro'bhavad vaśī //16 //*
*brahmacharyeṇa tapasā rājā rāṣṭraṁ vi rakṣati /*
*āchāryo brahmacharyeṇa brahmachāriṇamichchhate //17 //*
*brahmacharyeṇa kanyā3 yuvānaṁ vindate patim /*
*anaḍvān brahmacharyeṇāśvo ghāsaṁ jigīṣati //18 //*
*brahmacharyeṇa tapasā devā mṛtyumapāghnata /*
*indro ha brahmacharyeṇa devebhyaḥ sva1rābharat //19 //*
*oṣadhayo bhūtabhavyamahorātre vanaspatiḥ /*
*saṁvatsaraḥ sahartubhiste jātā brahmachāriṇaḥ //20 //*
*pārthivā divyāḥ paśava āraṇyā grāmyāścha ye /*
*apakṣāḥ pakṣiṇaścha ye te jātā brahmachāriṇaḥ //21 //*
*pṛthak sarve prājāpatyāḥ prāṇānātmasu bibhrati /*
*tāntsarvān brahma rakṣati brahmachāriṇyābhṛtam //22 //*
*devānāmetat pariṣūtamanabhyārūḍhaṁ charati rochamānam /*

*tasmājjātaṁ brāhmaṇaṁ brahma jyeṣṭhaṁ devāścha sarve amṛtena sākam ॥23॥*
*brahmachārī brahma bhrājad bibharti tasmin devā adhi viśve samotāḥ ।*
*prāṇāpānau janayannād vyānaṁ vāchaṁ mano hṛdayaṁ brahma medhām ॥24॥*
*chakṣuḥ śrotraṁ yaśo asmāsu dhehyannaṁ reto lohitamudaram ॥25॥*
*tāni kalpad brahmachārī salilasya pṛṣṭhe tapo'tiṣṭhat tapyamānaḥ samudre ।*
*sa snāto babhruḥ piṅgalaḥ pṛthivyāṁ bahu rochate ॥26॥*

४६. ब्रह्मणस्पतिः (Brahmaṇaspatiḥ) - अ. (Av.) १९.६१.१; १९.६२.१; १९.६३.१

अ. (Av.) १९.६१.१

तनूस्तमन्वा मे सहे दतः सर्वमायुरशीय। स्योनं मे सीद पुरुः पृणस्व पवमानः स्वर्गे ॥१॥
*tanūstamanvā me sahe dataḥ sarvamāyuraśīya ।*
*syonaṁ me sīda puruḥ pṛṇasva pavamānaḥ svarge ॥1॥*

अ. (Av.) १९.६२.१

प्रियं मा कृणु देवेषु प्रियं राजसु मा कृणु। प्रियं सर्वस्य पश्यत उत शूद्र उतार्ये ॥१॥
*priyaṁ mā kṛṇu deveṣu priyaṁ rājasu mā kṛṇu ।*
*priyaṁ sarvasya paśyata uta śūdra utārye ॥1॥*

अ. (Av.) १९.६३.१

उत् तिष्ठ ब्रह्मणस्पते देवान् यज्ञेन बोधय। आयुः प्राणं प्रजां पशून् कीर्तिं यजमानं च वर्धय।१।
*ut tiṣṭha brahmaṇaspate devān yajñena bodhaya ।*
*āyuḥ prāṇaṁ prajāṁ paśūn kīrtiṁ yajamānaṁ cha vardhaya ।1।*

४७. ब्रह्मौदनः (Brahmaudanaḥ) - अ. (Av.) ११.१.१-३७

अग्ने जायस्वादितिर्नाथितेयं ब्रह्मौदनं पचति पुत्रकामा ।
सप्तऋषयो भूतकृतस्ते त्वा मन्थन्तु प्रजया सहेह ॥१॥
कृणुत धूमं वृषणः सखायोऽद्रोघाविता वाचमच्छ ।
अयमग्निः पृतनाषाट् सुवीरो येन देवा असहन्त दस्यून् ॥२॥
अग्नेऽजनिष्ठा महते वीर्याय ब्रह्मौदनाय पक्तवे जातवेदः ।
सप्तऋषयो भूतकृतस्ते त्वाजीजनन्नस्यै रयिं सर्ववीरं नि यच्छ ॥३॥
समिद्धो अग्ने समिधा समिध्यस्व विद्वान् देवान् यज्ञियाँ एह वक्षः ।
तेभ्यो हविः श्रपयंजातवेद उत्तमं नाकमधि रोहयेमम् ॥४॥
त्रेधा भागो निहितो यः पुरा वो देवानां पितृणां मर्त्यानाम् ।
अंशंजानीध्वं वि भजामि तान् वो यो देवानां स इमां पारयाति ॥५॥
अग्ने सहस्वानभिभूरभीदसि नीचो न्युब्ज द्विषतः सपत्नान् ।
इयं मात्रा मीयमाना मिता च सजातांस्ते बलिहृतः कृणोतु ॥६॥
साकं सजातैः पयसा सहैध्युदुब्जैनां महते वीर्याय ।
ऊर्ध्वो नाकस्याधि रोह विष्टपं स्वर्गो लोक इति यं वदन्ति ॥७॥
इयं मही प्रति गृह्णातु चर्म पृथिवी देवी सुमनस्यमाना ।
अथ गच्छेम सुकृतस्य लोकम् ॥८॥
एतौ ग्रावाणौ सयुजा युङ्ग्धि चर्मणि निर्भिन्ध्यंशून् यजमानाय साधु ।
अवघ्नती नि जहि य इमां पृतन्यव ऊर्ध्वं प्रजामुद्भरन्त्युदूह ॥९॥
गृहाण ग्रावाणौ सकृतौ वीर हस्त आ ते देवा यज्ञिया यज्ञमगुः ।
त्रयो वरा यतमांस्त्वं वृणीषे तास्ते समृद्धीरिह राधयामि ॥१०॥
इयं ते धीतिरिदमु ते जनित्रं गृह्णातु त्वामदितिः शूरपुत्रा ।
परा पुनीहि य इमां पृतन्यवोऽस्यै रयिं सर्ववीरं नि यच्छ ॥११॥
उपश्वसे द्रुवये सीदता यूयं वि विच्यध्वं यज्ञियासस्तुषैः ।
श्रिया समानानति सर्वान्त्स्यामाधस्पदं द्विषतस्पादयामि ॥१२॥
परेहि नारि पुनरेहि क्षिप्रमपां त्वा गोष्ठोऽध्यरुक्षद् भराय ।
तासां गृह्णीताद् यतमा यज्ञिया असन् विभाज्य धीरीतरा जहीतात् ॥१३॥
एमा अगुर्योषितः शुम्भमाना उत्तिष्ठ नारि तवसं रभस्व ।

सुपत्नी पत्या प्रजया प्रजावत्या त्वागन् यज्ञः प्रति कुम्भं गृभाय ॥१४॥
ऊर्जो भागो निहितो यः पुरा व ऋषिप्रशिष्टाप आ भरैताः ।
अयं यज्ञो गातुविन्नाथवित् प्रजाविदुग्रः पशुविद् वीरविद् वो अस्तु॥१५॥
अग्ने चरुर्यज्ञियस्त्वाध्यरुक्षच्छुचिस्तपिष्ठस्तपसा तपैनम् ।
आर्षेया दैवा अभिसंगत्य भागमिमं तपिष्ठा ऋतुभिस्तपन्तु ॥१६॥
शुद्धाः पूता योषितो यज्ञिया इमा आपश्चरुमव सर्पन्तु शुभ्राः ।
अदुः प्रजां बहुलां पशून् नः पक्तौदनस्य सुकृतामेतु लोकम् ।
ब्रह्मणा शुद्धा उत पूता घृतेन सोमस्यांशवस्तण्डुला यज्ञिया इमे ।
अपः प्र विशत प्रति गृह्णातु वश्चरुरिमं पक्त्वा सुकृतामेत लोकम् ॥१८॥
उरुः प्रथस्व महता महिम्ना सहस्रपृष्ठः सुकृतस्य लोके ।
पितामहाः पितरः प्रजोपजाहं पक्ता पंचदशस्ते अस्मि ॥१९॥
सहस्रपृष्ठः शतधारो अक्षितो ब्रह्मौदनो देवयानः स्वर्गः ।
अमूंस्त आ दधामि प्रजया रेषयैनान् बलिहाराय मृडतान्मह्यमेव ॥२०॥
उदेहि वेदिं प्रजया वर्धयैनां नुदस्व रक्षः प्रतरं धेह्येनाम् ।
श्रिया समानानति सर्वान्त्स्यामाधस्पदं द्विषतस्पादयामि ॥२१॥
अभ्यावर्तस्व पशुभिः सहैनां प्रत्यङ्ङेना देवताभिः सहैधि ।
मा त्वा प्रापच्छपथो माभिचारः स्वे क्षेत्रे अनमीवा वि राज ॥२२॥
ऋतेन तष्टा मनसा हितैषा ब्रह्मौदनस्य विहिता वेदिरग्रे ।
अंसद्रीं शुद्धामुप धेहि नारि तत्रौदनं सादय दैवानाम् ॥२३॥
अदितेर्हस्तां स्रुचमेतां द्वितीयां सप्तऋषयो भूतकृतो यामकृण्वन् ।
सा गात्राणि विदुष्योदनस्य दर्विर्वेद्यामध्येनं चिनोतु ॥२४॥
शृतं त्वा हव्यमुप सीदन्तु दैवा निः सृप्याग्नेः पुनरेनान् प्र सीद् ।
सोमेन पूतो जठरे सीद ब्रह्मणामार्षेयास्ते मा रिषन् प्राशितारः ॥२५॥
सोम राजन्त्संज्ञानमा वपैभ्यः सुब्राह्मणा यतमे त्वोपसीदान् ।
ऋषीनार्षेयांस्तपसोऽधि जातान् ब्रह्मौदने सुहवा जोहवीमि ॥२६॥
शुद्धाः पूता योषितो यज्ञिया इमा ब्रह्मणां हस्तेषु प्रपृथक् सादयामि ।
यत्काम इदमभिषिंचामि वोऽहमिन्द्रो मरुत्वान्त्स ददादिदं मे ॥२७॥
इदं मे ज्योतिरमृतं हिरण्यं पक्वं क्षेत्रात् कामदुघा म एषा ।
इदं धनं नि दधे ब्राह्मणेषु कृण्वे पन्थां पितृषु यः स्वर्गः ॥२८॥
अग्नौ तुषाना वप जातवेदसि परः कम्वूकाँ अप मृड्ढि दूरम् ।
एतं शुश्रुम गृहराजस्य भागमथो विद्म निरृर्तेर्भागधेयम् ॥२९॥
श्राम्यतः पचतो विद्धि सुन्वतः पन्थां स्वर्गमधि रोहयैनम् ।
येन रोहात् परमापद्य यद् वय उत्तमं नाकं परमं व्योम ॥३०॥
बभ्रेरध्वर्यो मुखमेतद् वि मृड्ढ्याज्याय लोकं कृणुहि प्रविद्वान् ।
घृतेन गात्रानु सर्वा वि मृड्ढि कृण्वे पन्थां पितृषु यः स्वर्गः ॥३१॥
बभ्रे रक्षः समदमा वपैभ्योऽब्राह्मणा यतमे त्वोपसीदान् ।
पुरीषिणः प्रथमानाः पुरस्तादार्षेयास्ते मा रिषन् प्राशितारः ॥३२॥
आर्षेयेषु नि दध ओदन त्वा नानार्षेयाणामप्यस्त्यत्र ।
अग्निर्मे गोप्ता मरुतश्च सर्वे विश्वे देवा अभि रक्षन्तु पक्वम् ॥३३॥
यज्ञं दुहानं सदमित् प्रपीनं पुमांसं धेनुं सदनं रयीणाम् ।
प्रजामृतत्वमुत दीर्घमायू रायश्च पोषैरुप त्वा सदेम ॥३४॥
वृषभोऽसि स्वर्ग ऋषीनार्षेयान् गच्छ ।
सुकृतां लोके सीद तत्र नौ संस्कृतम् ॥३५॥
समाचिनुष्वानुसंप्रयाह्यग्ने पथः कल्पय देवयानान् ।
एतैः सुकृतैरनु गच्छेम यज्ञं नाके तिष्ठन्तमधि सप्तरश्मौ ॥३६॥
येन देवा ज्योतिषा द्यामुदायन् ब्रह्मौदनं पक्त्वा सुकृतस्य लोकम् ।
तेन गेष्म सुकृतस्य लोकं स्वरारोहन्तो अभि नाकमुत्तमम् ॥३७॥

*agne jāyasvāditirnāthiteyaṁ brahmaudanaṁ pachati putrakāmā* ।
*saptarṣayo bhūtakṛtaste tvā manthantu prajayā saheha* ॥1॥
*kṛṇuta dhūmaṁ vṛṣaṇaḥ sakhāyo'droghāvitā vāchamachchha* ।
*ayamagniḥ pṛtanāṣāṭ suvīro yena devā asahanta dasyūn* ॥2॥
*agne'janiṣṭhā mahate vīryāya brahmaudanāya paktave jātavedaḥ* ।
*saptarṣayo bhūtakṛtaste tvājījanannasyai rayiṁ sarvavīraṁ ni yachchha* ॥3॥
*samiddho agne samidhā samidhyasva vidvān devān yajñiyām̐ eha vakṣaḥ* ।
*tebhyo haviḥ śrapayaṁjātaveda uttamaṁ nākamadhi rohayemam* ॥4॥
*tredhā bhāgo nihito yaḥ purā vo devānāṁ pitṛṇāṁ martyānām* ।
*aṁśaṁjānīdhvaṁ vi bhajāmi tān vo yo devānāṁ sa imāṁ pārayāti* ॥5॥
*agne sahasvānabhibhūrabhīdasi nīcho nyubja dviṣataḥ sapatnān* ।
*iyaṁ mātrā mīyamānā mitā cha sajātāṁste balihṛtaḥ kṛṇotu* ॥6॥
*sākaṁ sajātaiḥ payasā sahaidhyudubjaināṁ mahate vīryāya* ।
*ūrdhvo nākasyādhi roha viṣṭapaṁ svargo loka iti yaṁ vadanti* ॥7॥
*iyaṁ mahī prati gṛhṇātu charma pṛthivī devī sumanasyamānā* ।
*atha gachchhema sukṛtasya lokam* ॥8॥
*etau grāvāṇau sayujā yuṅgdhi charmaṇi nirbhindhyaṁśūn yajamānāya sādhu* ।
*avaghnatī ni jahi ya imāṁ pṛtanyava ūrdhvaṁ prajāmudbharantyudūha* ॥9॥
*gṛhāṇa grāvāṇau sakṛtau vīra hasta ā te devā yajñiyā yajñamaguḥ* ।
*trayo varā yatamāṁstvaṁ vṛṇīṣe tāste samṛddhīriha rādhayāmi* ॥10॥
*iyaṁ te dhītiridamu te janitraṁ gṛhṇātu tvāmaditiḥ śūraputrā* ।
*parā punīhi ya imāṁ pṛtanyavo'syai rayiṁ sarvavīraṁ ni yachchha* ॥11॥
*upaśvase druvaye sīdatā yūyaṁ vi vichyadhvaṁ yajñiyāsastuṣaiḥ* ।
*śriyā samānānati sarvāntsyāmādhaspadaṁ dviṣataspādayāmi* ॥12॥
*parehi nāri punarehi kṣipramapāṁ tvā goṣṭho'dhyarukṣad bharāya* ।
*tāsāṁ gṛhṇītād yatamā yajñiyā asan vibhājya dhīrītarā jahītāt* ॥13॥
*emā aguryoṣitaḥ śumbhamānā uttiṣṭha nāri tavasaṁ rabhasva* ।
*supatnī patyā prajayā prajāvatyā tvāgan yajñaḥ prati kumbhaṁ gṛbhāya* ॥14॥
*ūrjo bhāgo nihito yaḥ purā va ṛṣipraśiṣṭāpa ā bharaitāḥ* ।
*ayaṁ yajño gātuvinnāthavit prajāvidugraḥ paśuvid vīravid vo astu* ॥15॥
*agne charuryajñiyastvādhyarukṣachchhuchistapiṣṭhastapasā tapainam* ।
*ārṣeyā daivā abhisaṁgatya bhāgamimaṁ tapiṣṭhā ṛtubhistapantu* ॥16॥
*śuddhāḥ pūtā yoṣito yajñiyā imā āpaścharumava sarpantu śubhrāḥ* ।
*aduḥ prajāṁ bahulāṁ paśūn naḥ paktaudanasya sukṛtāmetu lokam* ।
*brahmaṇā śuddhā uta pūtā ghṛtena somasyāṁśavastaṇḍulā yajñiyā ime* ।
*apaḥ pra viśata prati gṛhṇātu vaścharurimaṁ paktvā sukṛtāmeta lokam* ॥18॥
*uruḥ prathasva mahatā mahimnā sahasrapṛṣṭhaḥ sukṛtasya loke* ।
*pitāmahāḥ pitaraḥ prajopajāhaṁ paktā paṁchadaśaste asmi* ॥19॥
*sahasrapṛṣṭhaḥ śatadhāro akṣito brahmaudano devayānaḥ svargaḥ* ।
*amūṁsta ā dadhāmi prajayā reṣayainān balihārāya mṛḍatānmahyameva* ॥20॥
*udehi vediṁ prajayā vardhayaināṁ nudasva rakṣaḥ prataraṁ dhehyenām* ।
*śriyā samānānati sarvāntsyāmādhaspadaṁ dviṣataspādayāmi* ॥21॥
*abhyāvartasva paśubhiḥ sahaināṁ pratyaṅṅenā devatābhiḥ sahaidhi* ।
*mā tvā prāpachchhapatho mābhichāraḥ sve kṣetre anamīvā vi rāja* ॥22॥
*ṛtena taṣṭā manasā hitaiṣā brahmaudanasya vihitā vediragre* ।
*aṁsadrīṁ śuddhāmupa dhehi nāri tatraudanaṁ sādaya daivānām* ॥23॥
*aditerhastāṁ sruchametāṁ dvitīyāṁ saptarṣayo bhūtakṛto yāmakṛṇvan* ।
*sā gātrāṇi viduṣyodanasya darvirvedyāmadhyenaṁ chinotu* ॥24॥
*śṛtaṁ tvā havyamupa sīdantu daivā niḥ sṛpyāgneḥ punarenān pra sīd* ।
*somena pūto jaṭhare sīda brahmaṇāmārṣeyāste mā riṣan prāśitāraḥ* ॥25॥
*soma rājantsaṁjñānamā vapaibhyaḥ subrāhmaṇā yatame tvopasīdān* ।
*ṛṣīnārṣeyāṁstapaso'dhi jātān brahmaudane suhavā johavīmi* ॥26॥
*śuddhāḥ pūtā yoṣito yajñiyā imā brahmaṇāṁ hasteṣu prapṛthak sādayāmi* ।
*yatkāma idamabhiṣiṁchāmi vo'hamindro marutvāntsa dadādidaṁ me* ॥27॥
*idaṁ me jyotiramṛtaṁ hiraṇyaṁ pakvaṁ kṣetrāt kāmadughā ma eṣā* ।

*idaṁ dhanaṁ ni dadhe brāhmaṇeṣu kṛṇve panthāṁ pitṛṣu yaḥ svargaḥ //28 //*
*agnau tuṣānā vapa jātavedasi paraḥ kamvūkāṁ apa mṛḍḍhi dūram /*
*etaṁ śuśruma gṛharājasya bhāgamatho vidma nirṛterbhāgadheyam //29 //*
*śrāmyataḥ pachato viddhi sunvataḥ panthāṁ svargamadhi rohayainam /*
*yena rohāt paramāpadya yad vaya uttamaṁ nākaṁ paramaṁ vyoma //30 //*
*babhreradhvaryo mukhametad vi mṛḍḍhyājyāya lokaṁ kṛṇuhi pravidvān /*
*ghṛtena gātrānu sarvā vi mṛḍḍhi kṛṇve panthāṁ pitṛṣu yaḥ svargaḥ //31 //*
*babhre rakṣaḥ samadamā vapaibhyo'brāhmaṇā yatame tvopasīdān /*
*purīṣiṇaḥ prathamānāḥ purastādārṣeyāste mā riṣan prāśitāraḥ //32 //*
*ārṣeyeṣu ni dadha odana tvā nānārṣeyāṇāmapyastyatra /*
*agnirme goptā marutaścha sarve viśve devā abhi rakṣantu pakvam //33 //*
*yajñaṁ duhānaṁ sadamit prapīnaṁ pumāṁsaṁ dhenuṁ sadanaṁ rayīṇām /*
*prajāmṛtatvamuta dīrghamāyū rāyaścha poṣairupa tvā sadema //34 //*
*vṛṣabho'si svarga ṛṣīnārṣeyān gachchha /*
*sukṛtāṁ loke sīda tatra nau saṁskṛtam //35 //*
*samāchinuṣvānusaṁprayāhyagne pathaḥ kalpaya devayānān /*
*etaiḥ sukṛtairanu gachchhema yajñaṁ nāke tiṣṭhantamadhi saptaraśmau //36 //*
*yena devā jyotiṣā dyāmudāyan brahmaudanaṁ paktvā sukṛtasya lokam /*
*tena geṣma sukṛtasya lokaṁ svarārohanto abhi nākamuttamam //37 //*

४८. ब्रह्मणम् (Brahmaṇam) - अ. (Av.) ७.६६.१

यद्यन्तरिक्षे यदि वात आस यदि वृक्षेषु यदि वोलपेषु ।
यदस्रवन् पशव उद्यमानं तद् ब्राह्मणं पुनस्मानुपैतु ॥१॥
*yadyantarikṣe yadi vāta āsa yadi vṛkṣeṣu yadi volapeṣu /*
*yadasravan paśava udyamānaṁ tad brāhmaṇaṁ punasmānupaitu //1 //*

४९. भगः (Bhagaḥ) - अ. (Av.) ५.२६.९

भगो युनक्त्वाशिषो न्व१स्मा अस्मिन् यज्ञे प्रविद्वान् युनक्तु सुयुजः स्वाहा ॥९॥
*bhago yunaktvāśiṣo nva1smā asmin yajñe pravidvān yunaktu suyujaḥ svāhā //9 //*

५०. मन आदयो दैव्यात्रृषयः (Mana Ādayo Daivyārṣayaḥ) - अ. (Av.) ६.४१.१-३

मनसे चेतसे धिय आकूतय उत चित्तये ।
मत्यै श्रुताय चक्षसे विधेम हविषा वयम् ॥१॥
अपानाय व्यानाय प्राणाय भूरिधायसे ।
सरस्वत्या उरुव्यचे विधेम हविषा वयम् ॥२॥
मा नो हासिषुत्रृर्षयो दैव्या ये तनूपा ये नस्तन्वस्तनूजाः ।
अमर्त्या मँर्त्या अभि नः सच वमायुर्धत्त प्रतरं जीवसे नः ॥३॥
*manase chetase dhiya ākūtaya uta chittaye /*
*matyai śrutāya chakṣase vidhema haviṣā vayam //1 //*
*apānāya vyānāya prāṇāya bhūridhāyase /*
*sarasvatyā uruvyache vidhema haviṣā vayam //2 //*
*mā no hāsiṣurṛṣayo daivyā ye tanūpā ye nastanvastanūjāḥ /*
*amartyā matm̐ryā abhi naḥ sacha vamāyurdhatta prataraṁ jīvase naḥ //3 //*

५१. मनुष्येषवः (Manuṣyeṣavaḥ) - अ. (Av.) १.१९.२

विष्वंचो अस्मच्छरवः पतन्तु ये अस्ता ये चास्याः। दैवीर्मनुष्येषवो ममामित्रान् वि विध्यत ॥२॥
*viṣvaṁcho asmachchharavaḥ patantu ye astā ye chāsyāḥ / daivīrmanuṣyeṣavo mamāmitrān vi vidhyata //2 //*

५२. मन्त्रोक्ता (Mantroktā) - अ. (Av.) १०.५.३७-४१; १९.५८.१-६; १९.६८.१

अ. (Av.) १०.५.३७-४१

सूर्यस्यावृतमन्वावर्ते दक्षिणामन्वावृतम्। सा मे द्रविणं यच्छतु सा मे ब्राह्मणवर्चसम् ॥३७॥
दिशो ज्योतिष्मतीरभ्यावर्ते। ता मे द्रविणं यच्छन्तु ता मे ब्राह्मणवर्चसम् ॥३८॥
सप्तऋषीनभ्यावते। ते मे द्रविणं यच्छन्तु ते मे ब्राह्मणवर्चसम् ॥३९॥

ब्रह्माभ्यावर्ते। तन्मे द्रविणं यच्छन्तु तन्मे ब्राह्मणवर्चसम् ॥४०॥
ब्राह्मणाँ अभ्यावर्ते। ते मे द्रविणं यच्छन्तु ते मे ब्राह्मणवर्चसम्॥४१॥
*sūryasyāvṛtamanvāvarte dakṣiṇāmanvāvṛtam |*
*sā me draviṇaṁ yachchhatu sā me brāhmaṇavarchasam ||37||*
*diśo jyotiṣmatīrabhyāvarte |*
*tā me draviṇaṁ yachchhantu tā me brāhmaṇavarchasam ||38||*
*saptaṛṣīnabhyāvate | te me draviṇaṁ yachchhantu te me brāhmaṇavarchasam ||39||*
*brahmābhyāvarte | tanme draviṇaṁ yachchhantu tanme brāhmaṇavarchasam ||40||*
*brāhmaṇām̐ abhyāvarte | te me draviṇaṁ yachchhantu te me brāhmaṇavarchasam ||41||*

अ. (Av.) १९.५८.१-६

घृतस्य जूतिः समना सदेवा संवत्सरं हविष वर्धयन्ती ।
श्रोत्रं चक्षुः प्राणोऽछिन्नो नो अस्त्वच्छिन्ना वयमायुषो वर्चसः ॥१॥
उपास्मान् प्राणो ह्वयतामुप वयं प्राणं हवामहे ।
वर्चो जग्राह पृथिव्य१न्तरिक्षं वर्चः सोमो बृहस्पतिर्विधर्त्ता ॥२॥
वर्चसो द्यावापृथिवी संग्रहणी बभूवथुर्वर्चो गृहीत्वा पृथिवीमनु सं चरेम ।
यशसं गावो गोपतिमुष तिष्ठन्त्यायतीर्यशो गृहीत्वा पृथिवीमनु सं चरेम ॥३॥
व्रजं कृणुध्वं स हि वो नृपाणो वर्मा सीव्यध्वं बहुला पृथूनि ।
पुरः कृणुध्वमायसीरधृष्टा मा वः सुस्रोच्चमसो दृंहता तम् ॥४॥
यज्ञस्य चक्षुः प्रभृतिर्मुखं च वाचा श्रोत्रेण मनसा जुहोमि ।
इमं यज्ञं विततं विश्वकर्मणा देवा यन्तु सुमनस्यमानाः ॥५॥
ये देवानामृत्विजो ये च यज्ञिया येभ्यो हव्यं क्रियते भागधेयम् ।
इमं यज्ञं सह पत्नीभिरेत्य यावन्तो देवास्तविषा मादयन्ताम् ॥६॥
*ghṛtasya jūtiḥ samanā sadevā saṁvatsaraṁ haviṣa vardhayantī |*
*śrotraṁ chakṣuḥ prāṇo'chhinno no astvachchhinnā vayamāyuṣo varchasaḥ ||1||*
*upāsmān prāṇo hvayatāmupa vayaṁ prāṇaṁ havāmahe |*
*varcho jagrāha pṛthivya1ntarikṣaṁ varchaḥ somo bṛhaspatirvidharttā ||2||*
*varchaso dyāvāpṛthivī saṁgrahaṇī babhūvathurvarcho gṛhītvā pṛthivīmanu saṁ charema |*
*yaśasaṁ gāvo gopatimuṣa tiṣṭhantyāyatīryaśo gṛhītvā pṛthivīmanu saṁ charema ||3||*
*vrajaṁ kṛṇudhvaṁ sa hi vo nṛpāṇo varmā sīvyadhvaṁ bahulā pṛthūni |*
*puraḥ kṛṇudhvamāyasīradhṛṣṭā mā vaḥ susrochchamaso dṛṁhatā tam ||4||*
*yajñasya chakṣuḥ prabhṛtirmukhaṁ cha vāchā śrotreṇa manasā juhomi |*
*imaṁ yajñaṁ vitataṁ viśvakarmaṇā devā yantu sumanasyamānāḥ ||5||*
*ye devānāmṛtvijo ye cha yajñiyā yebhyo havyaṁ kriyate bhāgadheyam |*
*imaṁ yajñaṁ saha patnībhiretya yāvanto devāstaviṣā mādayantām ||6||*

अ. (Av.) १९.६८.१

अव्यसश्च व्यचसश्च बिलं वि ष्यामि मायया। ताभ्यामुद्धृत्य वेदमथ कर्माणि कृण्महे ॥१॥
*avyasaścha vyachasaścha bilaṁ vi ṣyāmi māyayā |*
*tābhyāmuddhṛtya vedamatha karmāṇi kṛṇmahe ||1||*

५३. मरुतः (Marutaḥ) - अ. (Av.) ५.२६.५; १३.१.३

अ. (Av.) ५.२६.५

छन्दांसि यज्ञे मरुतः स्वाहा मातेव पुत्रं पिपृतेह युक्ताः ॥५॥
*chhandāṁsi yajñe marutaḥ svāhā māteva putraṁ pipṛteha yuktāḥ ||5||*

अ. (Av.) १३.१.३

यूयमुग्रा मरुतः पृश्निमातर इन्द्रेण युजा प्र मृणीत शत्रून् ।
आ वो रोहितः श्रृणवत् सुदानवस्त्रिषप्तासो मरुतः स्वादुसंमुदः ॥३॥
*yūyamugrā marutaḥ pṛśnimātara indreṇa yujā pra mṛṇīta śatrūn |*
*ā vo rohitaḥ śṛṇavat sudānavastriṣaptāso marutaḥ svādusaṁmudaḥ ||3||*

५४. मरुतः पूषा बृहस्पतिः अग्निश्च (Marutaḥ Pūṣā Bṛhaspatiḥ Agniścha) - अ. (Av.) ७.३३.१

सं मा सिंचन्तु मरुतः सं पूषा सं बृहस्पतिः ।

सं मायमग्निः सिंचतु प्रजया च धनेन च दीर्घमायुः कृणोतु मे ॥१॥
*saṁ mā siṁchantu marutaḥ saṁ pūṣā saṁ bṛhaspatiḥ /*
*saṁ māyamagniḥ siṁchatu prajayā cha dhanena cha dīrghamāyuḥ kṛṇotu me //1 //*

५५. मित्रावरुणौ (Mitrāvaruṇau) - अ. (Av.) ९.१०.२३

अपादेति प्रथमा पद्वतीनां कस्तद् वां मित्रावरुणा चिकेत ।
गर्भो भारं भरत्या चिदस्या ऋतं पिपर्त्यनृतं नि पाति ॥२३॥
*apādeti prathamā padvatīnāṁ kastad vāṁ mitrāvaruṇā chiketa /*
*garbho bhāraṁ bharatyā chidasyā ṛtaṁ pipartyanṛtaṁ ni pāti //23 //*

५६. यक्ष्मनाशनः (Yakṣamanāśanaḥ) - अ. (Av.) २०.९६.६-१०; १७-२३

अ. (Av.) २०.९६.६-१०

मुंचामि त्वा हविषा जीवनाय कमज्ञातयक्ष्मादुत राजयक्ष्मात् ।
ग्राहिर्जग्राह यद्येतदेनं तस्या इन्द्राग्नी प्र मुमुक्तमेनम् ॥६॥
यदि क्षितायुर्यदि वा परेतो यदि मृत्योरन्तिकं नीत एव ।
तमा हरामि निर्ऋतेरुपस्थादस्पार्शमेनं शतशारदाय ॥७॥
सहस्राक्षेण शतवीर्येण शतायुषा हविषाहार्षमेनम् ।
इन्द्रो यथैनं शरदो नयात्यति विश्वस्य दुरितस्य पारम् ॥८॥
शतं जीव शरदो वर्धमानः शतं हेमन्तांछतमु वसन्तान् ।
शतं त इन्द्रो अग्निः सविता बृहस्पतिः शतायुषा हविषाहार्षमेनम् ॥९॥
आहार्षमविदं त्वा पुनरागाः पुनर्णवः ।
सर्वांग सर्वं ते चक्षुः सर्वमायुश्च तेऽविदम् ॥१०॥
*muṁchāmi tvā haviṣā jīvanāya kamajñātayakṣamāduta rājayakṣamāt /*
*grāhirjagrāha yadyetadenaṁ tasyā indrāgnī pra mumuktamenam //6 //*
*yadi kṣitāyuryadi vā pareto yadi mṛtyorantikaṁ nīta eva /*
*tamā harāmi nirṛterupasthādaspārśamenaṁ śataśāradāya //7 //*
*sahasrākṣeṇa śatavīryeṇa śatāyuṣā haviṣāhārṣamenam /*
*indro yathainaṁ śarado nayātyati viśvasya duritasya pāram //8 //*
*śataṁ jīva śarado vardhamānaḥ śataṁ hemantāṁchhatamu vasantān /*
*śataṁ ta indro agniḥ savitā bṛhaspatiḥ śatāyuṣā haviṣāhārṣamenam //9 //*
*āhārṣamavidaṁ tvā punarāgāḥ punarṇavaḥ /*
*sarvāṁga sarvaṁ te chakṣuḥ sarvamāyuścha te'vidam //10 //*

अ. (Av.) २०.९६.१७-२३

अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि ।
यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया वि वृहामि ते ॥ १७॥
ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात् ।
यक्ष्मं दोषण्य१मंसाभ्यां बाहुभ्यां वि वृहामि ते ॥१८॥
हृदयात् ते परि क्लोम्नो हलीक्ष्णात् पार्श्वाभ्याम् ।
यक्ष्मं मतस्नाभ्यां प्लीह्नो यक्नस्ते वि वृहामसि ॥१९॥
आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोरुदरादधि ।
यक्ष्मं कुक्षिभ्यां प्लाशेर्नाभ्या वि वृहामि ते ॥२०॥
ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्याम् ।
यक्ष्मं भसद्यं१ श्रोणिभ्यां भासदं भंससो वि वृहामि ते ॥२१॥
अस्थिभ्यस्ते मज्जभ्यः स्नावभ्यो धमनिभ्यः ।
यक्ष्मं पाणिभ्यामङ्गुलिभ्यो नखेभ्यो वि वृहामि ते ॥२२॥
अंगेअङ्गे लोम्निलोम्नि यस्ते पर्वणिपर्वणि ।
यक्ष्मं त्वचस्यं ते वयं कश्यपस्य वीवर्हेण विष्वंचं वि वृहामसि ॥२३॥
*akṣībhyāṁ te nāsikābhyāṁ karṇābhyāṁ chhubukādadhi /*
*yakṣamaṁ śīrṣaṇyaṁ mastiṣkājjihvāyā vi vṛhāmi te // 17 //*
*grīvābhyasta uṣṇihābhyaḥ kīkasābhyo anūkyāt /*

*yakṣamaṁ doṣaṇya1maṁsābhyāṁ bāhubhyāṁ vi vṛhāmi te ॥18॥*
*hṛdayāt te pari klomno halīkṣaṇāt pārśvābhyām ।*
*yakṣamaṁ matasnābhyāṁ plīhno yaknaste vi vṛhāmasi ॥19॥*
*āntrebhyaste gudābhyo vaniṣṭhorudarādadhi ।*
*yakṣamaṁ kukṣibhyāṁ plāśernābhyā vi vṛhāmi te ॥20॥*
*ūrubhyāṁ te aṣṭhīvadbhyāṁ pāṣirṇabhyāṁ prapadābhyām ।*
*yakṣamaṁ bhasadyaṁ1 śroṇibhyāṁ bhāsadaṁ bhaṁsaso vi vṛhāmi te ॥21॥*
*asthibhyaste majjabhyaḥ snāvabhyo dhamanibhyaḥ ।*
*yakṣamaṁ pāṇibhyāmaṅgulibhyo nakhebhyo vi vṛhāmi te ॥22॥*
*aṁgeaṅge lomnilomni yaste parvaṇiparvaṇi ।*
*yakṣamaṁ tvachasyaṁ te vayaṁ kaśyapasya vīvarheṇa viṣvaṁchaṁ vi vṛhāmasi ॥23॥*

## ५७. यक्ष्मविवर्हणम् (Yakṣamavivarhaṇam) - अ. (Av.) २.३३.१-७

अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि ।
यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया वि वृहामि ते ॥१॥
ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात् ।
यक्ष्मं दोषण्य१मंसाभ्यां बाहुभ्यां वि वृहामि ते ॥२॥
हृदयात् ते परि क्लोम्नो हलीक्ष्णात् पार्श्वाभ्याम् ।
यक्ष्मं मतस्नाभ्यां प्लीह्नो यक्नस्ते वि वृहामसि ॥३॥
आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोरुदरादधि ।
यक्ष्मं कुक्षिभ्यां प्लाशेर्नाभ्यां वि वृहामि ते ॥४॥
ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्याम् ।
यक्ष्मं भसद्यं१ श्रोणिभ्यां भासदं भंससो वि वृहामि ते ॥५॥
अस्थिभ्यस्ते मज्जभ्यः स्नावभ्यो धमानिभ्यः ।
यक्ष्मं पाणिभ्यामङ्गुलिभ्यो नखेभ्यो वि वृहामि ते ॥६॥
अंगेअङ्गे लोम्निलोम्नि यस्ते पर्वणिपर्वणि ।
यक्ष्मं त्वचस्यं ते वयं कश्यपस्य वीवर्हेण विष्वंचं वि वृहामसि ॥७॥
*akṣībhyāṁ te nāsikābhyāṁ karṇābhyāṁ chhubukādadhi ।*
*yakṣamaṁ śīrṣaṇyaṁ mastiṣkājjihvāyā vi vṛhāmi te ॥1॥*
*grīvābhyasta uṣṇihābhyaḥ kīkasābhyo anūkyāt ।*
*yakṣamaṁ doṣaṇya1maṁsābhyāṁ bāhubhyāṁ vi vṛhāmi te ॥2॥*
*hṛdayāt te pari klomno halīkṣaṇāt pārśvābhyām ।*
*yakṣamaṁ matasnābhyāṁ plīhno yaknaste vi vṛhāmasi ॥3॥*
*āntrebhyaste gudābhyo vaniṣṭhorudarādadhi ।*
*yakṣamaṁ kukṣibhyāṁ plāśernābhyāṁ vi vṛhāmi te ॥4॥*
*ūrubhyāṁ te aṣṭhīvadbhyāṁ pāṣirṇabhyāṁ prapadābhyām ।*
*yakṣamaṁ bhasadyaṁ1 śroṇibhyāṁ bhāsadaṁ bhaṁsaso vi vṛhāmi te ॥5॥*
*asthibhyaste majjabhyaḥ snāvabhyo dhamānibhyaḥ ।*
*yakṣamaṁ pāṇibhyāmaṅgulibhyo nakhebhyo vi vṛhāmi te ॥6॥*
*aṁgeaṅge lomnilomni yaste parvaṇiparvaṇi ।*
*yakṣamaṁ tvachasyaṁ te vayaṁ kaśyapasya vīvarheṇa viṣvaṁchaṁ vi vṛhāmasi ॥7॥*

## ५८. यमिनी (Yaminī) - अ. (Av.) ३.२८.१-६

एकैकयैषा सृष्ट्या सं बभूव यत्र गा असृजन्त भूतकृतो विश्वरूपाः ।
यत्र विजायते यमिन्यपर्तुः सा पशून् क्षिणाति रिफती रुशती ॥१॥
एषा पशून्त्सं क्षिणाति क्रव्याद् भूत्वा व्यद्वरी ।
उतैनां ब्रह्मणे दद्यात् तथा स्योना शिवा स्यात् ॥२॥
शिवा भव पुरुषेभ्यो गोभ्यो अश्वेभ्यः शिवा ।
शिवास्मै सर्वस्मै क्षेत्राय शिवा न इहैधि ॥३॥
इह पुष्टिरिह रस इह सहस्रसातमा भव ।
पशून् यमिनि पोषय ॥४॥
यत्रा सुहार्दः सुकृतो मदन्ति विहाय रोगं तन्व१ स्वायाः ।

तं लोकं यमिन्यभिसंबभूव सा नो मा हिंसीत् पुरुषान पशूंश्च ॥५॥
यत्रा सुहार्दां सुकृतामग्निहोत्रहुतां यत्र लोकः ।
तं लोकं यमिन्यभिसंबभूव सा नो मा हिंसीत् पुरुषान् पशूंश्च ॥६॥
*ekaikayaiṣā sṛṣṭyā saṁ babhūva yatra gā asṛjanta bhūtakṛto viśvarūpāḥ /*
*yatra vijāyate yaminyapartuḥ sā paśūn kṣiṇāti riphatī ruśatī //1 //*
*eṣā paśūntsaṁ kṣiṇāti kravyād bhūtvā vyadvarī /*
*utaināṁ brahmaṇe dadyāt tathā syonā śivā syāt //2 //*
*śivā bhava puruṣebhyo gobhyo aśvebhyaḥ śivā /*
*śivāsmai sarvasmai kṣetrāya śivā na ihaidhi //3 //*
*iha puṣṭiriha rasa iha sahasrasātamā bhava / paśūn yamini poṣaya //4 //*
*yatrā suhārdaḥ sukṛto madanti vihāya rogaṁ tanva1 svāyāḥ /*
*taṁ lokaṁ yaminyabhisaṁbabhūva sā no mā hiṁsīt puruṣāna paśūṁścha //5 //*
*yatrā suhārdāṁ sukṛtāmagnihotrahutāṁ yatra lokaḥ /*
*taṁ lokaṁ yaminyabhisaṁbabhūva sā no mā hiṁsīt puruṣān paśūṁścha //6 //*

५९. योनिः (Yoniḥ) - अ. (Av.) ३.२३.१-६

येन वेहद् बभूविथ नाशयामसि तत् त्वत् ।
इदं तदन्यत्र त्वदप दूरे नि दध्मसि ॥१॥
आ ते योनिं गर्भ एतु पुमान् बाण इवेषुधिम् ।
आ वीरोऽत्र जायतां पुत्रस्ते दशमास्यः ॥२॥
पुमांसं पुत्रं जनय तं पुमाननु जायताम् ।
भवासि पुत्राणां माता जातानां जनयाश्च यान् ॥३॥
यानि भद्राणि बीजान्यृषभा जनयन्ति च ।
तैस्त्वं पुत्रं विन्दस्व सा प्रसूर्धेनुका भव ॥४॥
कृणोमि मे प्राजापत्यमा योनिं गर्भ एतु ते ।
विन्दस्व त्वं पुत्रं नारि यस्तुभ्यं शमसच्छमु तस्मै त्वं भव ॥५॥
यासां द्यौष्पिता पृथिवी माता समुद्रो मूलं वीरुधां बभूव ।
तास्त्वा पुत्रविद्याय दैवीः प्रावन्त्वोषधयः ॥६॥
*yena vehad babhūvitha nāśayāmasi tat tvat /*
*idaṁ tadanyatra tvadapa dūre ni dadhmasi //1 //*
*ā te yoniṁ garbha etu pumān bāṇa iveṣudhim /*
*ā vīro'tra jāyatāṁ putraste daśamāsyaḥ //2 //*
*pumāṁsaṁ putraṁ janaya taṁ pumānanu jāyatām /*
*bhavāsi putrāṇāṁ mātā jātānāṁ janayāścha yān //3 //*
*yāni bhadrāṇi bījānyṛṣabhā janayanti cha /*
*taistvaṁ putraṁ vindasva sā prasūrdhenukā bhava //4 //*
*kṛṇomi me prājāpatyamā yoniṁ garbha etu te /*
*vindasva tvaṁ putraṁ nāri yastubhyaṁ śamasachchhamu tasmai tvaṁ bhava //5 //*
*yāsāṁ dyauṣpitā pṛthivī mātā samudro mūlaṁ vīrudhāṁ babhūva /*
*tāstvā putravidyāya daivīḥ prāvantvoṣadhayaḥ //6 //*

६०. योनिः गर्भः पृथिव्यादयः (Yoniḥ Garbhaḥ Pṛthivyādayaḥ) - अ. (Av.) ५.२५.१-१३

पर्वतात् दिवो योनेरंगादंगात् समाभृतम्। शेपो गर्भस्य रेतोधाः सरौ पर्णमिवा दधत् ॥१॥
यथेयं पृथिवी मही भूतानां गर्भमादधे। एवा दधामि ते गर्भं तस्मै त्वामवसे हुवे ॥२॥
गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति। गर्भं ते अश्विनोभा धत्तां पुष्करस्रजा ॥३॥
गर्भं ते मित्रावरुणौ गर्भं देवा बृहस्पतिः। गर्भं त इन्द्रश्चग्निश्च गर्भं धाता दधातु ते ॥४॥
विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु। आ सिंचतु प्रजापतिर्धाता गर्भं दधातु ते ॥५॥
यद् वेद राजा वरुणो यद् वा देवी सरस्वती। यदिन्द्रो वृत्रहा वेद तद् गर्भकरणं पिब ॥६॥
गर्भो अस्योषधीनां गर्भो वनस्पतीनाम्। गर्भो विश्वस्य भूतस्य सो अग्ने गर्भमेह धाः ॥७॥
अधि स्कन्द वीरयस्व गर्भमा धेहि योनयाम्। वृषासि वृष्ण्यावन् प्रजायै त्वा नयामसि ॥८॥
वि जिहीष्व बार्हत्सामे गर्भस्ते योनिमा शयाम्। अदुष्टे देवाः पुत्रं सोमपा अभयाविनम्॥९॥
धातः श्रेष्ठेन रूपेणास्या नार्या गवीन्योः। पुमांसं पुत्रमा धेहि दशमे मासि सूतवे ॥१०॥

त्वष्टः श्रेष्ठेन रूपेणास्या नार्या गवीन्योः। पुमांसं पुत्रमा धेहि दशमे मासि सूतवे ॥११॥
सवितः श्रेष्ठेन रूपेणास्या नार्या गवीन्योः। पुमांसं पुत्रमा धेहि दशमे मासि सूतवे ॥१२॥
प्रजापते श्रेष्ठेन रूपेणास्या नार्या गवीन्योः। पुमांसं पुत्रमा धेहि दशमे मासि सूतवे ॥१३॥

*parvatāt divo yoneraṁgādaṁgāt samābhṛtam |*
*śepo garbhasya retodhāḥ sarau parṇamivā dadhat ||1 ||*
*yatheyaṁ pṛthivī mahī bhūtānāṁ garbhamādadhe |*
*evā dadhāmi te garbhaṁ tasmai tvāmavase huve ||2 ||*
*garbhaṁ dhehi sinīvāli garbhaṁ dhehi sarasvati |*
*garbhaṁ te aśvinobhā dhattāṁ puṣkarasrajā ||3 ||*
*garbhaṁ te mitrāvaruṇau garbhaṁ devā bṛhaspatiḥ |*
*garbhaṁ ta indraśchagniścha garbhaṁ dhātā dadhātu te ||4 ||*
*viṣṇuryoni kalpayatu tvaṣṭā rūpāṇi piṁśatu |*
*ā siṁchatu prajāpatirdhātā garbhaṁ dadhātu te ||5 ||*
*yad veda rājā varuṇo yad vā devī sarasvatī |*
*yadindro vṛtrahā veda tad garbhakaraṇaṁ piba ||6 ||*
*garbho asyoṣadhīnāṁ garbho vanaspatīnām |*
*garbho viśvasya bhūtasya so agne garbhameha dhāḥ ||7 ||*
*adhi skanda vīrayasva garbhamā dhehi yonayām |*
*vṛṣāsi vṛṣṇyāvan prajāyai tvā nayāmasi ||8 ||*
*vi jihīṣva bārhatsāme garbhaste yonimā śayām |*
*aduṣṭe devāḥ putraṁ somapā abhayāvinam ||9 ||*
*dhātaḥ śreṣṭhena rūpeṇāsyā nāryā gavīnyoḥ |*
*pumāṁsaṁ putramā dhehi daśame māsi sūtave ||10 ||*
*tvaṣṭaḥ śreṣṭhena rūpeṇāsyā nāryā gavīnyoḥ |*
*pumāṁsaṁ putramā dhehi daśame māsi sūtave ||11 ||*
*savitaḥ śreṣṭhena rūpeṇāsyā nāryā gavīnyoḥ |*
*pumāṁsaṁ putramā dhehi daśame māsi sūtave ||12 ||*
*prajāpate śreṣṭhena rūpeṇāsyā nāryā gavīnyoḥ |*
*pumāṁsaṁ putramā dhehi daśame māsi sūtave ||13 ||*

६१. योषितो धमन्यश्च (Yoṣito Dhamanyaścha) - अ. (Av.) १.१७.१-४

अमूर्या यन्ति योषितो हिरा लोहितवाससः। अभ्रातरइव जामयस्तिष्ठन्तु हतवर्चसः ॥१॥
तिष्ठावरे तिष्ठ पर उत त्वं तिष्ठ मध्यमे। कनिष्ठिका च तिष्ठति तिष्ठादिद् धमनिर्मही ॥२॥
शतस्य धमनीनां सहस्रस्य हिराणाम्। अस्थुरिन्मध्यमा इमाः साकमन्ता अरंसत ॥३॥
परि वः सिकतावती धनूर्बृहत्यक्रमीत्। तिष्ठतेलयता सु कम् ॥४॥

*amūryā yanti yoṣito hirā lohitavāsasaḥ | abhrātaraiva jāmayastiṣṭhantu hatavarchasaḥ ||1 ||*
*tiṣṭhāvare tiṣṭha para uta tvaṁ tiṣṭha madhyame |*
*kaniṣṭhikā cha tiṣṭhati tiṣṭhādid dhamarnimahī ||2 ||*
*śatasya dhamanīnāṁ sahasrasya hirāṇām |*
*asthurinmadhyamā imāḥ sākamantā araṁsata ||3 ||*
*pari vaḥ sikatāvatī dhanūrbṛhatyakramīt | tiṣṭhatelayatā su kam ||4 ||*

६२. रुद्रः (Rudraḥ) - अ. (Av.) १.१९.३; ६.५५.२-३

अ. (Av.) १.१९.३

यो नः स्वो यो अरणः सजात उ त निष्ट्यो यो अस्माँ अभिदासति ।
रुद्रः शरव्य यैतान् ममामित्रान् वि विध्यतु ॥३॥

*yo naḥ svo yo araṇaḥ sajāta u ta niṣṭyo yo asmām̐ abhidāsati |*
*rudraḥ śaravya yaitān mamāmitrān vi vidhyatu ||3 ||*

अ. (Av.) ६.५५.२-३

ग्रीष्मो हेमन्तः शिशिरो वसन्तः शरद् वर्षाः स्विते नो दधात ।
आ नो गोषु भजता प्रजायां निवात इद् वः शरणे स्याम ॥२॥
इदावत्सराय परिवत्सराय संवत्सराय कृणुता बृहन्नमः ।
तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥३॥

*grīṣmo hemantaḥ śiśiro vasantaḥ śarad varṣāḥ svite no dadhāta /*
*ā no goṣu bhajatā prajāyāṁ nivāta id vaḥ śaraṇe syāma //2 //*
*idāvatsarāya parivatsarāya saṁvatsarāya kṛṇutā bṛhannamaḥ /*
*teṣāṁ vayaṁ sumatau yajñiyānāmapi bhadre saumanase syāma //3*

६३. लिङ्गोक्ता ब्रघ्न (Liṅgoktā Braghna) - अ. (Av.) ७.२२.१-२

अयं सहस्रमा नो दृशे कवीनां मतिर्ज्योतिर्विधर्मणि ॥१॥
ब्रध्नः समीचीरुषसः समैरयन्। अरेपसः सचेतसः स्वसरे मन्युमत्तमाश्चिते गोः ॥२॥
*ayaṁ sahasramā no dṛśe kavīnāṁ matirjyotirvidharmaṇi //1 //*
*bradhnaḥ samīchīruṣasaḥ samairayan /*
*arepasaḥ sachetasaḥ svasare manyumattamāśchite goḥ //2 //*

६४. वरुणः सत्यानृतान्त्रीक्षणम् (Varuṇaḥ Satyānṛtāntrīkṣaṇam) - अ. (Av.) ४.१६.१-९

बृहन्नेषामधिष्ठाता अन्तिकादिव पश्यति ।
य स्तायन्मन्यते चरन्त्सर्वं देवा इदं विदुः ॥१॥
यस्तिष्ठति चरति यश्च वंचति यो निलायं चरति यः प्रतंकम् ।
द्वौ संनिषद्य यन्मन्त्रयेते रजा तद् वेद वरुणस्तृतीयः ॥२॥
उतेयं भूमिर्वरुणस्य राज्ञ उतासौ द्यौर्बृहती दूरेअन्ता ।
उतो समुद्रौ वरुणस्य कुक्षी उतास्मिन्नल्प उदके निलीनः ॥३॥
उत यो द्यामतिसर्पात् परस्तान्न स मुच्यातै वरुणस्य राज्ञः ।
दिव स्पशः प्र चरन्तीदमस्य सहस्राक्षा अति पश्यन्ति भूमिम् ॥४॥
सर्वं तद् राजा वरुणो वि चष्टे यदन्तरा रोदसी यत् परस्तात् ।
संख्याता अस्य निमिषो जनानामक्षानिव श्वघ्नी नि मिनोति तानि ॥५॥
ये ते पाशा वरुण सप्तसप्त त्रेधा तिष्ठन्ति विषिता रुशन्तः ।
छिनन्तु सर्वे अनृतं वदन्तं यः सत्यवाद्यति तं सृजन्तु ॥६॥
शतेन पाशैरभि धेहि वरुणैनं मा ते मोच्यनृतवाङ् नृचक्षः ।
आस्तां जाल्म उदरं स्रंसयित्वा कोशइवाबन्धः परिकृत्यमानः ॥७॥
यः समाम्यो३ वरुणो यो व्याम्यो३ यः संदेश्यो३ वरुणो यो विदेश्यः । यो दैवो वरुणो यश्च मानुषः ॥८॥
तैस्त्वा सर्वैरभि ष्यामि पाशेरसावामुष्यायणामुष्याः पुत्र । तानु ते सर्वानुसंदिशामि ॥९॥
*bṛhanneṣāmadhiṣṭhātā antikādiva paśyati /*
*ya stāyanmanyate charantsarvaṁ devā idaṁ viduḥ //1 //*
*yastiṣṭhati charati yaścha vaṁchati yo nilāyaṁ charati yaḥ prataṁkam /*
*dvau saṁniṣadya yanmantrayete rajā tad veda varuṇastṛtīyaḥ //2 //*
*uteyaṁ bhūmirvaruṇasya rājña utāsau dyaurbṛhatī dūreantā /*
*uto samudrau varuṇasya kukṣī utāsminnalpa udake nilīnaḥ //3 //*
*uta yo dyāmatisarpāt parastānna sa muchyātai varuṇasya rājñaḥ /*
*diva spaśaḥ pra charantīdamasya sahasrākṣā ati paśyanti bhūmim //4 //*
*sarvaṁ tad rājā varuṇo vi chaṣṭe yadantarā rodasī yat parastāt /*
*saṁkhyātā asya nimiṣo janānāmakṣāniva śvaghnī ni minoti tāni //5 //*
*ye te pāśā varuṇa saptasapta tredhā tiṣṭhanti viṣitā ruśantaḥ /*
*chhinantu sarve anṛtaṁ vadantaṁ yaḥ satyavādyati taṁ sṛjantu //6 //*
*śatena pāśairabhi dhehi varuṇainaṁ mā te mochyanṛtavāṅ nṛchakṣaḥ /*
*āstāṁ jālma udaraṁ sraṁsayitvā kośaivābandhaḥ parikṛtyamānaḥ //7 //*
*yaḥ samāmyo3 varuṇo yo vyāmyo3 yaḥ saṁdeśyo3 varuṇo yo videśyaḥ /*
*yo daivo varuṇo yaścha mānuṣaḥ //8 //*
*taistvā sarvairabhi ṣyāmi pāśerasāvāmuṣyāyaṇāmuṣyāḥ putra /*
*tānu te sarvānusaṁdiśāmi //9 //*

६५. वागादि मन्त्रोक्ताः (Vāgādi Mantroktāḥ) - अ. (Av.) १९.६०.१-२

वाङ्म आसन्नसोः प्राणश्चक्षुरक्ष्णोः श्रोत्रं कर्णयोः ।
अपलिताः केशा अशोणा दन्ता बहु बाह्वोर्बलम् ॥१॥
ऊर्वोरोजो जंघयोर्जवः पादयोः प्रतिष्ठा। अरिष्टानि मे सर्वात्मानिभृष्टः ॥२॥
*vāṅma āsannasoḥ prāṇaśchakṣurakṣṇoḥ śrotraṁ karṇayoḥ /*

*apalitāḥ keśā aśoṇā dantā bahu bāhvorbalam ॥1॥*
*ūrvorojo jaṁghayorjavaḥ pādayoḥ pratiṣṭhā । ariṣṭāni me sarvātmānibhṛṣṭaḥ ॥2॥*

६६. वानस्पतयो दुन्दुभिः (Vānaspatayo Dundubhiḥ) - अ. (Av.) ५.२०.१-१२; ५.२१.१-९

अ. (Av.) ५.२०.१-१२

उच्चैर्घोषो दुन्दुभिः सत्वनायन् वानस्पत्यः संभृत उस्रियाभिः ।
वाचं क्षुणुवानो दमयन्त्सपत्नान्त्सिंह इव जेष्यन्नभि तंस्तनीहि ॥१॥
सिंह इवास्तानीद् द्रुवयो विबद्धोऽभिक्रन्दन्नृषभो वासितामिव ।
वृषा त्वं वध्रयस्ते सपत्ना ऐन्द्रस्ते शुष्मो अभिमातिषाहः ॥२॥
वृषेव यूथे सहसा विदानो गव्यन्नभि रुव संधनाजित् ।
शुचा विध्य हृदयं परेषां हित्वा ग्रामान् प्रच्युता यन्तु शत्रवः ॥३॥
संजयन् पृतना ऊर्ध्वमायुर्गुह्या गृह्णानो बहुधा वि चक्ष्व ।
दैवीं वाचं दुन्दुभ आ गुरस्व वेधाः शत्रूणामुप भरस्व वेदः ॥४॥
दुन्दुभेर्वाचं प्रयतां वदन्तीमाश्टण्वती नाथिता घोषबुद्धा ।
नारी पुत्रं धावतु हस्तगृह्यामित्री भीता समरे वधानाम् ॥५॥
पूर्वो दुन्दुभे प्र वदासि वाचं भूम्याः पृष्ठे वद रोचमानः ।
अमित्रसेनामभिजंजभानो द्युमद् वद दुन्दुभे सूनृतावत् ॥६॥
अन्तरेमे नभसी घोषो अस्तु पृथक् ते ध्वनयो यन्तु शीभम् ।
अभि क्रन्द स्तनयोत्पिपानः श्लोककृन्मित्रतूर्याय स्वर्धी ॥७॥
धीभिः कृतः प्र वदाति वाचमुद्धर्षय सत्वनामायुधानि ।
इन्द्रमेदी सत्वनो नि ह्वयस्व मित्रैरमित्राँ अव जङ्घनीहि ॥८॥
संक्रन्दनः प्रवदो धृष्णुषेणः प्रवेदकृद् बहुधा ग्रामघोषी ।
श्रेयो वन्वानो वयुनानि विद्वान् कीर्ति बहुभ्यो वि हर द्विराजे ॥९॥
श्रेयःकेतो वसुजित् सहीयान्त्संग्रामजित् संशितो ब्रह्मणासि ।
अंशूनिव ग्रावाधिषवणे अद्रिर्गव्यन् दुन्दुभेऽधि नृत्य वेदः ॥१०॥
शत्रूषाण्नीषाडभिमातिषाहो गवेषणः सहमान उद्भित ।
वाग्वीव मन्त्रं प्र भरस्व ववाचं सांग्रामजित्यायेषमुद् वदेह ॥११॥
अच्युतच्युत् समदो गमिष्ठो मृधो जेता पुरएतायोध्यः ।
इन्द्रेण गुप्तो विदथा निचिक्यद्धृद्योतनो द्विषतां याहि शीभम् ॥१२॥

*uchchairghoṣo dundubhiḥ satvanāyan vānaspatyaḥ saṁbhṛta usriyābhiḥ ।*
*vāchaṁ kṣuṇuvāno damayantsapatnāntsiṁha iva jeṣyannabhi taṁstanīhi ॥1॥*
*siṁha ivāstānīd druvayo vibaddho'bhikrandannṛṣabho vāsitāmiva ।*
*vṛṣā tvaṁ vadhrayaste sapatnā aindraste śuṣmo abhimātiṣāhaḥ ॥2॥*
*vṛṣeva yūthe sahasā vidāno gavyannabhi ruva saṁdhanājit ।*
*śuchā vidhya hṛdayaṁ pareṣāṁ hitvā grāmān prachyutā yantu śatravaḥ ॥3॥*
*saṁjayan pṛtanā ūrdhvamāyurguhyā gṛhṇāno bahudhā vi chakṣava ।*
*daivīṁ vāchaṁ dundubha ā gurasva vedhāḥ śatrūṇāmupa bharasva vedaḥ ॥4॥*
*dundubhervāchaṁ prayatāṁ vadantīmāśṛṇvatī nāthitā ghoṣabuddhā ।*
*nārī putraṁ dhāvatu hastagṛhyāmitrī bhītā samare vadhānām ॥5॥*
*pūrvo dundubhe pra vadāsi vāchaṁ bhūmyāḥ pṛṣṭhe vada rochamānaḥ ।*
*amitrasenāmabhijaṁjabhāno dyumad vada dundubhe sūnṛtāvat ॥6॥*
*antareme nabhasī ghoṣo astu pṛthak te dhvanayo yantu śībham ।*
*abhi kranda stanayotpipānaḥ ślokakṛnmitratūryāya svardhī ॥7॥*
*dhībhiḥ kṛtaḥ pra vadāti vāchamuddharṣaya satvanāmāyudhāni ।*
*indramedī satvano ni hvayasva mitrairamitrāṁ ava jaṅdhanīhi ॥8॥*
*saṁkrandanaḥ pravado dhṛṣṇuṣeṇaḥ pravedakṛd bahudhā grāmaghoṣī ।*
*śreyo vanvāno vayunāni vidvān kīrti bahubhyo vi hara dvirāje ॥9॥*
*śreyaḥketo vasujit sahīyāntsaṁgrāmajit saṁśito brahmaṇāsi ।*
*aṁśūniva grāvādhiṣavaṇe adrirgavyan dundubhe'dhi nṛtya vedaḥ ॥10॥*
*śatrūṣāṇnīṣāḍabhimātiṣāho gaveṣaṇaḥ sahamāna udbhita ।*
*vāgvīva mantraṁ pra bharasva vavāchaṁ sāṁgrāmajityāyeṣamud vadeha ॥11॥*

*achyutachyut samado gamiṣṭho mṛdho jetā puraetāyodhyaḥ* ।
*indreṇa gupto vidathā nichikyaddhṛdyotano dviṣatāṁ yāhi śībham* ॥12॥

अ. (Av.) ५.२१.१-९

विहृदयं वैमनस्यं वदामित्रेषु दुन्दुभे ।
विद्वेषं कश्मशं भयममित्रेषु नि दध्मस्यवैनान् दुन्दुभे जहि ॥१॥
उद्वेपमाना मनसा चक्षुषा हृदयेन च ।
धवन्तु बिभ्यतोऽमित्राः प्रत्रासेनाज्ये हुते ॥२॥
वानस्पत्यः संभृत उस्रियाभिर्विश्वगोत्र्यः ।
प्रत्रासममित्रेभ्यो वदाज्येनाभिघारितः ॥३॥
यथा मृगाः संविजन्त आरण्याः पुरुषादधि ।
एवा त्वं दुन्दुभेऽमित्रानभि क्रन्द प्र त्रासयाथो चित्तानि मोहय ॥४॥
यथा वृकादजावयो धावन्ति बहु बिभ्यतीः ।
एवा त्वं दुन्दुभेऽमित्रानभि क्रन्द प्र त्रासयाथो चित्तानि मोहय ॥५॥
यथा श्येनात् पतत्रिणः संविजन्त अहर्दिवि सिंहस्य स्तनथोर्यथा ।
एवा त्वं दुन्दुभेऽमित्रानभि क्रन्द प्र त्रासयाथो चित्तानि मोहय ॥६॥
परामित्रान् दुन्दुभिना हरिणस्याजिनेन च ।
सर्वे देवा अतित्रसन् ये संग्रामस्येशते। ॥७॥
यैरिन्द्रः प्रक्रीडते पद्घोषैश्छायया सह ।
तैरमित्रास्त्रसन्तु नोऽमीर ये यन्त्यनीकशः ॥८॥
ज्याघोषा दुन्दुभयोऽभि क्रोशन्तु या दिशः ।
सेनाः पराजिता यतीरमित्राणामनीकशः ॥९॥

*vihṛdayaṁ vaimanasyaṁ vadāmitreṣu dundubhe* ।
*vidveṣaṁ kaśmaśaṁ bhayamamitreṣu ni dadhmasyavainān dundubhe jahi* ॥1॥
*udvepamānā manasā chakṣuṣā hṛdayena cha* ।
*dhavantu bibhyato'mitrāḥ pratrāsenājye hute* ॥2॥
*vānaspatyaḥ saṁbhṛta usriyābhirviśvagotrayaḥ* ।
*pratrāsamamitrebhyo vadājyenābhighāritaḥ* ॥3॥
*yathā mṛgāḥ saṁvijanta āraṇyāḥ puruṣādadhi* ।
*evā tvaṁ dundubhe'mitrānabhi kranda pra trāsayātho chittāni mohaya* ॥4॥
*yathā vṛkādajāvayo dhāvanti bahu bibhyatīḥ* ।
*evā tvaṁ dundubhe'mitrānabhi kranda pra trāsayātho chittāni mohaya* ॥5॥
*yathā śyenāt patatriṇaḥ saṁvijanta ahardivi siṁhasya stanathoryathā* ।
*evā tvaṁ dundubhe'mitrānabhi kranda pra trāsayātho chittāni mohaya* ॥6॥
*parāmitrān dundubhinā hariṇasyājinena cha* ।
*sarve devā atitrasan ye saṁgrāmasyeśate* । ॥7॥
*yairindraḥ prakrīḍate padghoṣaiśchhāyayā saha* ।
*tairamitrāstrasantu no'mīra ye yantyanīkaśaḥ* ॥8॥
*jyāghoṣā dundubhayo'bhi krośantu yā diśaḥ* ।
*senāḥ parājitā yatīramitrāṇāmanīkaśaḥ* ॥9॥

६७. वास्तोष्पतिः (Vāstoṣpatiḥ) - अ. (Av.) ५.९.१-८; ५.१०.१-८

अ. (Av.) ५.९.१-८

दिवे स्वाहा ॥१॥
पृथिव्यै स्वाहा ॥२॥
अन्तरिक्षाय स्वाहा ॥३॥
अन्तरिक्षाय स्वाहा ॥४॥
दिवे स्वाहा ॥५॥
पृथिव्यै स्वाहा ॥६॥
सूर्यो मे चक्षुर्वातः प्राणो३न्तरिक्षमात्मा पृथिवी शरीरम् ।
अस्तृतो नामाहमयमस्मि स आत्मानं नि दधे द्यावापृथिवीभ्यां गोपीथाय ॥७॥

उदायुरुद् बलमुत् कृतमुत् कृत्यामुन्मनीषामुदिन्द्रियम् ।
आयुष्कृदायुष्पत्नी स्वधावन्तौ गोपा मे स्तं गोपायतं मा ।
आत्मसदौ मे स्तं मा मा हिंसिष्टम् ॥८॥
*dive svāhā //1 //*
*pṛthivyai svāhā //2 //*
*antarikṣāya svāhā //3 //*
*antarikṣāya svāhā //4 //*
*dive svāhā //5 //*
*pṛthivyai svāhā //6 //*
*sūryo me chakṣurvātaḥ prāṇo3ntarikṣamātmā pṛthivī śarīram /*
*astṛto nāmāhamayamasmi sa ātmānaṁ ni dadhe dyāvāpṛthivībhyāṁ gopīthāya //7 //*
*udāyurud balamut kṛtamut kṛtyāmunmanīṣāmudindriyam /*
*āyuṣkṛdāyuṣpatnī svadhāvantau gopā me staṁ gopāyataṁ mā /*
*ātmasadau me staṁ mā mā hiṁsiṣṭam //8 //*

अ. (Av.) ५.१०.१-८

अश्मवर्म मेऽसि यो मा प्राच्या दिशोऽघायुरभिदासात्। एतत् स ऋच्छात् ॥१॥
अश्मवर्म मेऽसि यो मा दक्षिणाया दिशोऽघायुरभिदासात्। एतत् स ऋच्छात् ॥२॥
अश्मवर्म मेऽसि यो मा प्रतीच्या दिशोऽघायुरभिदासात्। एतत् स ऋच्छात् ॥३॥
अश्मवर्म मेऽसि यो मोदीच्या दिशोऽघायुरभिदासात्। एतत् स ऋच्छात् ॥४॥
अश्मवर्म मेऽसि यो मा ध्रुवाया दिशोऽघायुरभिदासात्। एतत् स ऋच्छात् ॥५॥
अश्मवर्म मेऽसि यो मोर्ध्वाया दिशोऽघायुरभिदासात्। एतत् स ऋच्छात् ॥६॥
अश्मवर्म मेऽसि यो मा दिशामन्तर्देशेभ्योऽघायुरभिदासात्। एतत् स ऋच्छात् ॥७॥
बृहता मन उप ह्वये मातरिश्वना प्राणापानौ ।
सूर्याच्चक्षुरन्तरिक्षाच्छ्रोत्रं पृथिव्याः शरीरम्। सरस्वत्या वाचमुप ह्वयामहे मनोयुजा ॥८॥
*aśmavarma me'si yo mā prāchyā diśo'ghāyurabhidāsāt / etat sa ṛchchhāt //1 //*
*aśmavarma me'si yo mā dakṣiṇāyā diśo'ghāyurabhidāsāt / etat sa ṛchchhāt //2 //*
*aśmavarma me'si yo mā pratīchyā diśo'ghāyurabhidāsāt / etat sa ṛchchhāt //3 //*
*aśmavarma me'si yo modīchyā diśo'ghāyurabhidāsāt / etat sa ṛchchhāt //4 //*
*aśmavarma me'si yo mā dhruvāyā diśo'ghāyurabhidāsāt / etat sa ṛchchhāt //5 //*
*aśmavarma me'si yo mordhvāyā diśo'ghāyurabhidāsāt / etat sa ṛchchhāt //6 //*
*aśmavarma me'si yo mā diśāmantardeśebhyo'ghāyurabhidāsāt / etat sa ṛchchhāt //7 //*
*bṛhatā mana upa hvaye mātariśvanā prāṇāpānau /*
*sūryāchchakṣurantarikṣāchchhrotraṁ pṛthivyāḥ śarīram / sarasvatyā vāchamupa hvayāmahe manoyujā //8 //*

६८. विश्वम्भरः (Viśvambharaḥ) - अ. (av.) २.१६.५

विश्वम्भर विश्वेन मा भरसा पाहि स्वाहा ॥५॥
*viśvambhara viśvena mā bharasā pāhi svāhā //5 //*

६९. विष्णुः (Viṣṇuḥ) - अ. (Av.) ५.२६.७

विष्णुर्युनक्तु बहुधा तपांस्यस्मिन् यज्ञे सुयुजः स्वाहा ॥७॥
*viṣṇuryunaktu bahudhā tapāṁsyasmin yajñe suyujaḥ svāhā //7 //*

७०. विश्वेदेवाः (Viśvedevāḥ) - अ. (Av.) ६.५५.१; ६.७१.३; ६.११४.१-३; ६.११५.१-३

अ. (Av.) ६.५५.१

ये पन्थानो बहवो देवयानां अन्तरा द्यावापृथिवी संचरन्ति ।
तेषामज्यानिं यतमो वहाति तस्मै मा देवाः परि धत्तेह सर्वे ॥१॥
*ye panthāno bahavo devayānāṁ antarā dyāvāpṛthivī saṁcharanti /*
*teṣāmajyāniṁ yatamo vahāti tasmai mā devāḥ pari dhatteha sarve //1 //*

अ. (Av.) ६.७१.३

यदन्नमद्म्यनृतेन देवा दास्यन्नदास्यन्नुत संगृणामि ।
वैश्वानरस्य महतो महिम्ना शिवं मह्यं मधुमदस्त्वन्नम् ॥३॥

*yadannamadmyanṛtena devā dāsyannadāsyannuta saṁgṛṇāmi ।*
*vaiśvānarasya mahato mahimnā śivaṁ mahyaṁ madhumadastvannam ॥3 ॥*

अ. (Av.) ६.११४.१-३

यद् देवा देवहेडनं देवासश्चकृमा वयम्। आदित्यास्तस्मान्नो यूयमृतस्यर्तेन मुंचत ॥१॥
ऋतस्यर्तेनादित्या यजत्रा मुंचतेह नः। यज्ञं यद् यज्ञवाहसः शिक्षन्तो नोपशेकिम ॥२॥
मेदस्वता यजमानाः स्रुचाज्यानि जुह्वतः। अकामा विश्वे वो देवाः शिक्षन्तो नोप शेकिम ॥३॥
*yad devā devahedanaṁ devāsaśchakṛmā vayam ।*
*ādityāstasmānno yūyamṛtasyartena muṁchata ॥1 ॥*
*ṛtasyartenādityā yajatrā muṁchateha naḥ ।*
*yajñaṁ yad yajñavāhasaḥ śikṣanto nopaśekima ॥2 ॥*
*medasvatā yajamānāḥ sruchājyāni juhvataḥ ।*
*akāmā viśve vo devāḥ śikṣanto nopa śekima ॥3 ॥*

अ. (Av.) ६.११५.१-३

यद् विद्वांसो यद्रविद्वांस एनांसि चकृमा वयम्। यूयं नस्तस्मान्मुंचत विश्वे देवाः सजोषसः ॥१॥
यदि जाग्रद् यदि स्वपन्नेन एनस्योऽकरम्। भूतं मा तस्माद् भव्यं च द्रुपदादिव मुंचताम् ॥२॥
द्रुपदादिव मुमुचानः स्विन्नः स्नात्वा मलादिव। पूतं पवित्रेणेवाज्यं विश्वे शुम्भन्तु मैनसः ॥३॥
*yad vidvāṁso yadravidvāṁsa enāṁsi chakṛmā vayam ।*
*yūyaṁ nastasmānmuṁchata viśve devāḥ sajoṣasaḥ ॥1 ॥*
*yadi jāgrad yadi svapannena enasyo'karam ।*
*bhūtaṁ mā tasmād bhavyaṁ cha drupadādiva muṁchatām ॥2 ॥*
*drupadādiva mumuchānaḥ svinnaḥ snātvā malādiva ।*
*pūtaṁ pavitreṇevājyaṁ viśve śumbhantu mainasaḥ ॥3 ॥*

७१. विश्वेदेवाः बृहस्पतिः (Viśvedevāḥ Bṛhaspatiḥ) - अ. (Av.) १९.४०.१-४

यन्मे छिद्रं मनसो यच्च वाचः सरस्वती मन्युमन्तं जगाम ।
विश्वैस्तद् देवैः सह संविदानः सं दधातु बृहस्पतिः ॥१॥
मा न आपो मेधां मा ब्रह्म प्र मथिष्टन ।
शुष्यदा यूयं स्यन्दध्वमुपहूतोऽहं सुमेधा वर्चस्वी ॥२॥
मा नो मेधां मा नो दीक्षां मा नो हिंसिष्टं यत् तपः ।
शिवा नः शं सन्त्वायुषे शिवा भवन्तु मातरः ॥३॥
या नः पीपरदश्विना ज्योतिष्मती तमस्तिरः। तामस्मे रासतामिषम् ॥४॥
*yanme chhidraṁ manaso yachcha vāchaḥ sarasvatī manyumantaṁ jagāma ।*
*viśvaistad devaiḥ saha saṁvidānaḥ saṁ dadhātu bṛhaspatiḥ ॥1 ॥*
*mā na āpo medhāṁ mā brahma pra mathiṣṭana ।*
*śuṣyadā yūyaṁ syandadhvamupahūto'haṁ sumedhā varchasvī ॥2 ॥*
*mā no medhāṁ mā no dīkṣāṁ mā no hiṁsiṣṭaṁ yat tapaḥ ।*
*śivā naḥ śaṁ santvāyuṣe śivā bhavantu mātaraḥ ॥3 ॥*
*yā naḥ pīparadaśvinā jyotiṣmatī tamastiraḥ । tāmasme rāsatāmiṣam ॥4 ॥*

७२. वृषभः स्वापनम् (Vṛṣabhaḥ Svāpanam) - अ. (Av.) ४.५.१-७

सहस्रशृंगो वृषभो यः समुद्रादुदाचरत् । तेना सहस्येना वयं नि जनान्त्स्वापयामसि ॥१॥
न भूमिं वातो अति वाति नाति पश्यति कश्चन।
स्त्रियश्च सर्वाः स्वापय शुनश्चेन्द्रसखा चरन् ॥२॥
प्रोष्ठेशयास्तल्पेशया नारीर्या बह्यशीवरीः ।
स्त्रियो याः पुण्यगन्धयस्ताः सर्वाः स्वापयामसि ॥३॥
एजदेजदजग्रभं चक्षुः प्राणमजग्रभम्। अंगान्यजग्रभं सर्वा रात्रीणामतिशर्वरे ॥४॥
या आस्ते यश्चरति यश्च तिष्ठन् विपश्यति ।
तेषां सं दध्मो अक्षीणि यथेदं हर्म्यं तथा ॥५॥
स्वप्तु माता स्वप्तु पिता स्वप्तु श्वा स्वप्तु विशपतिः ।
स्वपन्त्वस्यै ज्ञातयः स्वप्त्वयमभितो जनः ॥६॥
स्वप्न स्वप्नाभिकरणेन सर्वं नि ष्वापया जनम् ।

ओत्सूर्यमन्यान्त्स्वापयाव्युषं जागृतादहमिन्द्रइवारिष्टो अक्षितः ॥७॥
*sahasraśṛṁgo vṛṣabhe yaḥ samudrādudācharat /*
*tenā sahasyenā vayaṁ ni janāntsvāpayāmasi //1//*
*na bhūmiṁ vāto ati vāti nāti paśyati kaśchana /*
*striyaścha sarvāḥ svāpaya śunaśchendrasakhā charan //2//*
*proṣṭheśayāstalpeśayā nārīryā bahyaśīvarīḥ /*
*striyo yāḥ puṇyagandhayastāḥ sarvāḥ svāpayāmasi //3//*
*ejadejadajagrabhaṁ chakṣuḥ prāṇamajagrabham /*
*aṁgānyajagrabhaṁ sarvā rātrīṇāmatiśarvare //4//*
*yā āste yaścharati yaścha tiṣṭhan vipaśyati /*
*teṣāṁ saṁ dadhmo akṣīṇi yathedaṁ harmyaṁ tathā //5//*
*svaptu mātā svaptu pitā svaptu śvā svaptu viśpatiḥ /*
*svapantvasyai jñātayaḥ svaptvayamabhito janaḥ //6//*
*svapna svapnābhikaraṇena sarvaṁ ni ṣvāpayā janam /*
*otsūryamanyāntsvāpayāvyuṣaṁ jāgṛtādahamindraivāriṣṭo akṣitaḥ //7//*

७३. शतवारः (Śatavāraḥ) - अ. (Av.) १९.३६.१-६

शतवारो अनीनशद् यक्ष्मान् रक्षांसि तेजसा। आरोहन् वर्चसा सह मणिर्दुर्णामचातनः ॥१॥
शृंगाभ्यां रक्षो नुदते मूलेन यातुधान्यः। मध्येन यक्ष्मं बाधते नैनं पाप्माति तत्रति ॥२॥
ये यक्ष्मासो अर्भका महान्तो ये च शब्दिनः। सर्वान् दुर्णामहा मणिः शतवारो अनीनशत् ॥३॥
शतं वीरानजनयच्छतं यक्ष्मानपावपत्। दुर्णाम्नः सर्वान् हत्वाव रक्षांसि धूनुते ॥४॥
हिरण्यशृंग ऋषभः शातवारो अयं मणिः। दुर्णाम्नः सर्वांस्तृड्ढ्वाव रक्षांस्यक्रमीत् ॥५॥
शतमहं दुर्णाम्नीनां गन्धर्वाप्सरसां शतम्। शतं शश्वन्वतीनां शतवारेण वारये ॥६॥
*śatavāro anīnaśad yakṣamān rakṣāṁsi tejasā /*
*ārohan varchasā saha maṇirdurṇāmachātanaḥ //1//*
*śṛṁgābhyāṁ rakṣo nudate mūlena yātudhānyaḥ /*
*madhyena yakṣamaṁ bādhate nainaṁ pāpmāti tatrati //2//*
*ye yakṣamāso arbhakā mahānto ye cha śabdinaḥ /*
*sarvān durṇāmahā maṇiḥ śatavāro anīnaśat //3//*
*śataṁ vīrānajanayachchhataṁ yakṣamānapāvapat /*
*durṇāmnaḥ sarvān hatvāva rakṣāṁsi dhūnute //4//*
*hiraṇyaśṛṁga ṛṣabhaḥ śātavāro ayaṁ maṇiḥ /*
*durṇāmnaḥ sarvāṁstṛḍḍhvāva rakṣāṁsyakramīt //5//*
*śatamahaṁ durṇāmnīnāṁ gandharvāpsarasāṁ śatam /*
*śataṁ śaśvanvatīnāṁ śatavāreṇa vāraye //6//*

७४. शाला वास्तोष्पतिः (Śālā Vāstoṣpatiḥ) - अ. (Av.) ३.१२.१-९

इहैव ध्रुवां नि मिनोमि शालां क्षेमे तिष्ठाति घृतमुक्षमाणा ।
तां त्वा शाले सर्ववीराः सुवीरा अरिष्टवीरा उप सं चरेम ॥१॥
इहैव ध्रुवा प्रति तिष्ठ शालेऽश्वावती गोमती सूनृतावती ।
ऊर्जस्वती घृतवती पयस्वत्युच्छ्रयस्व महते सौभगाय ॥२॥
धरुण्यसि शाले बृहच्छन्दाः पूतिधान्या ।
आ त्वा वत्सो गमेदा कुमार आ धेनवः सायमास्पन्दमानाः ॥३॥
इमां शालां सविता वायुरिन्द्रो बृहस्पतिर्नि मिनोतु प्रजानन् ।
उक्षन्तूदना मरुतो घृतेन भगो नो राजा नि कृषिं तनोतु ॥४॥
मानस्य पत्नि शरणा स्योना देवी देवेभिर्निमितास्यग्रे ।
तृणं वसाना सुमना असस्त्वमथास्मभ्यं सहवीरं रयिं दाः ॥५॥
ऋतेन स्थूणामधि रोह वंशोग्रो विराजन्नप वृङ्क्ष्व शत्रून् ।
मा ते रिषन्नुपसत्तारो गृहाणां शाले शतं जीवेम शरदः सर्ववीराः ॥६॥
एमां कुमारस्तरुणा आ वत्सो जगता सह ।
एमां परिस्रुतः कुम्भ आ दध्नः कलशैरगुः ॥७॥
पूर्णं नारि प्र भर कुम्भमेतं घृतस्य धाराममृतेन संभृताम् ।

इमां पात्रीममृतेना समङ्धीष्टापूर्तमभि रक्षात्येनाम् ॥८॥
इमा आपः प्र भराम्ययक्ष्मा यक्ष्मनाशनीः। गृहानुप प्र सीदाम्यमृतेन सहाग्निना ॥९॥
*ihaiva dhruvāṁ ni minomi śālāṁ kṣeme tiṣṭhāti ghṛtamukṣamāṇā |*
*tāṁ tvā śāle sarvavīrāḥ suvīrā ariṣṭavīrā upa saṁ charema ||1 ||*
*ihaiva dhruvā prati tiṣṭha śāle'śśvāvatī gomatī sūnṛtāvatī |*
*ūrjasvatī ghṛtavatī payasvatyuchchhrayasva mahate saubhagāya ||2 ||*
*dharuṇyasi śāle bṛhachchhandāḥ pūtidhānyā |*
*ā tvā vatso gamedā kumāra ā dhenavaḥ sāyamāspandamānāḥ ||3 ||*
*imāṁ śālāṁ savitā vāyurindro bṛhaspatirni minotu prajānan |*
*ukṣantūdanā maruto ghṛtena bhago no rājā ni kṛṣiṁ tanotu ||4 ||*
*mānasya patni śaraṇā syonā devī devebhirnimitāsyagre |*
*tṛṇaṁ vasānā sumanā asastvamathāsmabhyaṁ sahavīraṁ rayiṁ dāḥ ||5 ||*
*ṛtena sthūṇāmadhi roha vaṁśogro virājannapa vṛṅkṣava śatrūn |*
*mā te riṣannupasattāro gṛhāṇāṁ śāle śataṁ jīvema śaradaḥ sarvavīrāḥ ||6 ||*
*emāṁ kumārastaruṇā ā vatso jagatā saha |*
*emāṁ parisrutaḥ kumbha ā dadhnaḥ kalaśairaguḥ ||7 ||*
*pūrṇaṁ nāri pra bhara kumbhametaṁ ghṛtasya dhārāmamṛtena saṁbhṛtām |*
*imāṁ pātrīmamṛtenā samaṅgdhīṣṭāpūrtamabhi rakṣātyenām ||8 ||*
*imā āpaḥ pra bharāmyayakṣamā yakṣamanāśanīḥ | gṛhānupa pra sīdāmyamṛtena sahāgninā ||9 ||*

७५. सविता (Savitā) - अ. (Av.) ५.२६.२; ७.२४.१; १९.५१.२

अ. (Av.) ५.२६.२

युनक्तु देवः सविता प्रजानन्नस्मिन् यज्ञे महिषः स्वाहा ॥२॥
*yunaktu devaḥ savitā prajānannasmin yajñe mahiṣaḥ svāhā ||2 ||*

अ. (Av.) ७.२४.१

यन्न इन्द्रो अखनद् यदग्निर्विश्वे देवा मरुतो यत् स्वर्काः ।
तदस्मभ्यं सविता सत्यधर्मा प्रजापतिरनुमातिर्नि यच्छात् ॥१॥
*yanna indro akhanad yadagnirviśve devā maruto yat svarkāḥ |*
*tadasmabhyaṁ savitā satyadharmā prajāpatiranumātirni yachchhāt ||1 ||*

अ. (Av.) १९.५१.२

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रसूत आ रभे ॥२॥
*devasya tvā savituḥ prasave'śvinorbāhubhyāṁ pūṣṇo hastābhyāṁ prasūta ā rabhe ||2 ||*

७६. सूर्यः (Sūryaḥ) - अ. (Av.) २०.१०७.१३-१४; १९.६७.१-८

अ. (Av.) २०.१०७.१३-१४

चित्रं देवानां केतुरनीकं ज्योतिष्मान् प्रदिशः सूर्य उद्यन् ।
दिवाकरोऽति द्युम्नैस्तमांसि विश्वातारीद् दुरितानि शुक्रः ॥१३॥
चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्राद् द्यावापुथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥१४॥
*chitraṁ devānāṁ keturanīkaṁ jyotiṣmān pradiśaḥ sūrya udyan |*
*divākaro'ti dyumnaistamāṁsi viśvātārīd duritāni śukraḥ ||13 ||*
*chitraṁ devānāmudagādanīkaṁ chakṣurmitrasya varuṇasyāgneḥ |*
*āprād dyāvāputhivī antarikṣaṁ sūrya ātmā jagatastasthuṣaścha ||14 ||*

अ. (Av.) १९.६७.१-८

पश्येम शरदः शतम् ॥१॥
जीवेम शरदः शतम् ॥२॥
बुध्येम शरदः शतम् ॥३॥
रोहेम शरदः शतम् ॥४॥
पूषेम शरदः शतम् ॥५॥
भवेम शरदः शतम् ॥६॥

भूयेम शरदः शतम् ॥७॥
भूयसीः शरदः शतम् ॥८॥
*paśyema śaradaḥ śatam //1 //*
*jīvema śaradaḥ śatam //2 //*
*budhyema śaradaḥ śatam //3 //*
*rohema śaradaḥ śatam //4 //*
*pūṣema śaradaḥ śatam //5 //*
*bhavema śaradaḥ śatam //6 //*
*bhūyema śaradaḥ śatam //7 //*
*bhūyasīḥ śaradaḥ śatam //8 //*

७७. सूर्यो जातवेदा (Sūryo Jātavedā) - अ. (Av.) १९.६५.१

हरिः सुपर्णो दिवमारुहोऽर्चिषा ये त्वा दिप्सन्ति दिवमुत्पतन्तम् ।
अव तां जहि हरसा जातवेदो बिभ्यदुग्रोऽर्चिषा दिवमा रोह सूर्य ॥१॥
*hariḥ suparṇo divamāruho'rchiṣā ye tvā dipsanti divamutpatantam /*
*ava tāṁ jahi harasā jātavedo bibhyadugro'rchiṣā divamā roha sūrya //1 //*

७८. सूर्यो जातवेदा वज्रः (Sūryo Jātavedā Vajraḥ) - अ. (Av.) १९.६६.१

अयोजाला असुरा मायिनोऽयस्मयैः पाशैरिंकनो ये चरन्ति ।
तांस्ते रन्ध्यामि हरसा जातवेदः सहस्रऋष्टिः सपत्नान् प्रमृणन् पाहि वज्रः ॥१॥
*ayojālā asurā māyino'yasmayaiḥ pāśairiṁkano ye charanti /*
*tāṁste randhyāmi harasā jātavedaḥ sahasrarṣṭiḥ sapatnān pramṛṇan pāhi vajraḥ //1 //*

७९. सूर्यः हरिमा हृदयरोगश्च (Sūryaḥ Harimā Hṛdayarogaścha) - अ. (Av.) १.२२.१-४; २.१६.३

अ. (Av.) १.२२.१-४

अनु सूर्यमुदयतां हृद्द्योतो हरिमा चे ते। गो रोहितस्य वर्णेन तेन त्वा परि दध्मसि ॥१॥
परि त्वा रोहितैर्वर्णैर्दीर्घायुत्वाय दध्मसि। यथायमरपा असदथो अहरितो भुवत् ॥२॥
या रोहिणीर्देवत्या३ गावो या उत रोहिणीः। रूपरूपं वयोवयस्ताभिष्ट्वा परि दध्मसि ॥३॥
शुकेषु ते हरिमाणं रोपणाकासु दध्मसि। अथो हारिद्रवेषु ते हरिमाणं नि दध्मसि ॥४॥
*anu sūryamudayatāṁ hṛddyoto harimā che te /*
*go rohitasya varṇena tena tvā pari dadhmasi //1 //*
*pari tvā rohitairvarṇairdīrghiāyutvāya dadhmasi /*
*yathāyamarapā asadatho aharito bhuvat //2 //*
*yā rohiṇīrdevatyā3 gāvo yā uta rohiṇīḥ /*
*rūparūpaṁ vayovayastābhiṣṭvā pari dadhmasi //3 //*
*śukeṣu te harimāṇaṁ ropaṇākāsu dadhmasi /*
*atho hāridraveṣu te harimāṇaṁ ni dadhmasi //4 //*

अ. (Av.) २.१६.३

सूर्य चक्षुषा मा पाहि स्वाहा ॥३॥
*sūrya chakṣuṣā mā pāhi svāhā //3 //*

८०. सोमः (Somaḥ) - अ. (Av.) ५.२६.१०

सोमो युनक्तु बहुधा पयांस्यस्मिन् यज्ञे सुयुजः स्वाहा ॥१०॥
*somo yunaktu bahudhā payāṁsyasmin yajñe suyujaḥ svāhā //10 //*

## ४४५. ब्रह्मातिथिः काण्वः (Brahmātithiḥ Kāṇvaḥ)

१. अश्विनौ (Aśvinau) - ऋ. (Rv.) ८.५.१-३६; ३७१

ऋ. (Rv.) ८.५.१-३६

दूरादिहेव यत्सत्यरुणप्सुरशिश्वितत्। वि भानुं विश्वधातनत् ॥१॥
नृवद्दस्रा मनोयुजा रथेन पृथुपाजसा। सचेथे अश्विनोषसम् ॥२॥
युवाभ्यां वाजिनीवसू प्रति स्तोमा अदृक्षत। वाचं दूतो यथोहिषे ॥३॥
पुरुप्रिया ण ऊतये पुरुमन्द्रा पुरूवसू। स्तुषे कण्वासो अश्विना ॥४॥

मंहिष्ठा वाजसातमेषयन्ता शुभस्पती। गन्तारा दाशुषो गृहम् ॥५॥
ता सुदेवाय दाशुषे सुमेधामवितारिणीम्। घृतैर्गव्यूतिमुक्षतम् ॥६॥
आ नः स्तोममुप द्रवत्तूयं श्येनोभिराशुभिः। यातमश्वेभिरश्विना ॥७॥
येभिस्तिस्रः परावतो दिवो विश्वानि रोचना। त्रींरक्तून्परिदीयथः ॥८॥
उत नो गोमतीरिष उत सातीरहर्विदा। वि पथः सातये सितम् ॥९॥
आ नो गोमन्तमश्विना सुवीरं सुरथं रयिम्। वोळहमश्वावतीरिषः ॥१०॥
वावृधाना शुभस्पती दस्रा हिरण्यवर्तनी। पिबतं सोम्यं मधु ॥११॥
अस्मभ्यं वाजिनीवसू मघवद्भ्यश्च सप्रथः। छर्दिर्यन्तमदाभ्यम् ॥१२॥
नि षु ब्रह्म जनानां याविष्टं तूयमा गतम्। मोष्व१न्याँ उपारतम् ॥१३॥
अस्य पिबतमश्विना युवं मदस्य चारुणः। मध्वो रातस्य धिष्ण्या ॥१४॥
अस्मे आ वहतं रयिं शतवन्तं सहस्रिणम्। पुरुक्षुं विश्वधायसम् ॥१५॥
पुरुत्रा चिद्धि वां नरा विह्वयन्ते मनीषिणः। वाघद्भिरश्विना गतम् ॥१६॥
जनासो वृक्तबर्हिषो हविष्मन्तो अरंकृतः। युवां हवन्ते अश्विना ॥१७॥
अस्माकमद्य वामयं स्तोमो वाहिष्ठो अन्तमः। युवाभ्यां भूत्वश्विना ॥१८॥
यो ह वां मधुनो दृतिराहितो रथचर्षणे। ततः पिबतमश्विना ॥१९॥
तेन नो वाजिनीवसू पश्वे तोकाय शं गवे। वहतं पीवरीरिषः ॥२०॥
उत नो दिव्या इष उत सिन्धूँरहर्विदा। अप द्वारेव वर्षथः ॥२१॥
कदा वां तौग्र्यो विधत्समुद्रे जहितो नरा। यद्वां रथो विभिष्पतात् ॥२२॥
युवं कण्वाय नासत्यापिरिप्ताय हर्म्ये। शश्वदूतीर्दशस्यथः ॥२३॥
ताभिरा यातमूतिभिर्नव्यसीभिः सुशस्तिभिः। यद्वां वृषण्वसू हुवे ॥२४॥
यथा चित्कण्वमावतं प्रियमेधमुपस्तुतम्। अत्रिं शिंजारमश्विना ॥२५॥
यथोत कृत्व्ये धनेंऽशुं गोष्वगस्त्यम्। यथा वाजेषु सोभरिम् ॥२६॥
एतावद्वां वृषण्वसू अतो वा भूयो अश्विना। गृणन्तः सुम्नमीमहे ॥२७॥
रथं हिरण्यवन्धुरं हिरण्याभीषुमश्विना। आ हि स्थाथो दिविस्पृशम् ॥२८॥
हिरण्ययी वां रभिरीषा अक्षो हिरण्ययः। उभा चक्रा हिरण्यया। ॥२९॥
तेन नो वाजिनीवसू परावतश्चिदा गतम्। उपेमां सुष्टुतिं मम ॥३०॥
आ वहेथे पराकात्पूर्वीरश्नन्तावश्विना। इषो दासीरमर्त्या ॥३१॥
आ नो द्युम्नैरा श्रवोभिरा राया यातमश्विना। पुरुश्चन्द्रा नासत्या ॥३२॥
एह वां प्रुषितप्सवो वयो वहन्तु पर्णिनः। अच्छा स्वध्वरं जनम् ॥३३॥
रथं वामनुगायसं य इषा वर्तते सह। न चक्रमभि बाधते ॥३४॥
हिरण्ययेन रथेन द्रवत्पाणिभिरश्वैः। धीजवना नासत्या ॥३५॥
युवं मृगं जागृवांसं स्वदथो वा वृषण्वसू। ता नः पृङ्क्तमिषा रयिम् ॥३६॥

*dūrādiheva yatsatyaruṇapsuraśiśvitat | vi bhānuṁ viśvadhātanat ||1 ||*
*nṛvaddasrā manoyujā rathena puthupājasā | sachethe aśvinoṣasam ||2 ||*
*yuvābhyāṁ vājinīvasū prati stomā adṛkṣata | vāchaṁ dūto yathehiṣe ||3 ||*
*purupriyā ṇa ūtaye purumandrā purūvasū | stuṣe kaṇvāso aśvinā ||4 ||*
*maṁhiṣṭhā vājasātameṣayantā śubhaspatī | gantārā dāśuṣo gṛham ||5 ||*
*tā sudevāya dāśuṣe sumedhāmavitāriṇīm | ghṛtairgavyūtimukṣatam ||6 ||*
*ā naḥ stomamupa dravattūyaṁ śyenobhirāśubhiḥ | yātamaśvebhiraśvinā ||7 ||*
*yebhistisraḥ parāvato divo viśvāni rochanā | trīṁraktūnparidīyathaḥ ||8 ||*
*uta no gomatīriṣa uta sātīraharvidā | vi pathaḥ sātaye sitam ||9 ||*
*ā no gomantamaśvinā suvīraṁ surathaṁ rayim | voḷahamaśvāvatīriṣaḥ ||10 ||*
*vāvṛdhānā śubhaspatī dasrā hiraṇyavartanī | pibataṁ somyaṁ madhu ||11 ||*
*asmabhyaṁ vājinīvasū maghavadbhyaścha saprathaḥ | chhardiryantamadābhyam ||12 ||*
*ni ṣu brahma janānāṁ yāviṣṭaṁ tūyamā gatam | moṣva1nyāṁ̐ upāratam ||13 ||*
*asya pibatamaśvinā yuvaṁ madasya chāruṇaḥ | madhvo rātasya dhiṣṇyā ||14 ||*
*asme ā vahataṁ rayiṁ śatavantaṁ sahasriṇam | purukṣuṁ viśvadhāyasam ||15 ||*
*purutrā chiddhi vāṁ narā vihvayante manīṣiṇaḥ | vāghadbhiraśvinā gatam ||16 ||*
*janāso vṛttbarhiṣo haviṣmanto araṁkṛtaḥ | yuvāṁ havante aśvinā ||17 ||*
*asmākamadya vāmayaṁ stomo vāhiṣṭho antamaḥ | yuvābhyāṁ bhūtvaśvinā ||18 ||*

*yo ha vāṁ madhuno dṛtirāhito rathacharṣaṇe । tataḥ pibatamaśvinā ॥19॥*
*tena no vājinīvasū paśve tokāya śaṁ gave । vahataṁ pīvarīriṣaḥ ॥20॥*
*uta no divyā iṣa uta sindhūm̐raharvidā । apa dvāreva varṣathaḥ ॥21॥*
*kadā vāṁ taugryo vidhatsamudre jahito narā । yadvāṁ ratho vibhiṣpatāt ॥22॥*
*yuvaṁ kaṇvāya nāsatyāpiriptāya harmye । śaśvadūtīrdaśasyathaḥ ॥23॥*
*tābhirā yātamūtibhirnavyasībhiḥ suśastibhiḥ । yadvāṁ vṛṣaṇvasū huve ॥24॥*
*yathā chitkaṇvamāvataṁ priyamedhmupastutam । atriṁ śiṁjāramaśvinā ॥25॥*
*yathota kṛtvye dhaneṁ'śuṁ goṣvagastyam । yathā vājeṣu sobharim ॥26॥*
*etāvadvāṁ vṛṣaṇvasū ato vā bhūyo aśvinā । gṛṇantaḥ sumnamīmahe ॥27॥*
*rathaṁ hiraṇyavandhuraṁ hiraṇyābhīṣumaśvinā । ā hi sthātho divispṛśam ॥28॥*
*hiraṇyayī vāṁ rabhirīṣā akṣo hiraṇyayaḥ । ubhā chakrā hiraṇyayā । ॥29॥*
*tena no vājinīvasū parāvataśchidā gatam । upemāṁ suṣṭutiṁ mama ॥30॥*
*ā vahethe parākātpūrvīraśnantāvaśvinā । iṣo dāsīramartyā ॥31॥*
*ā no dyumnairā śravobhirā rāyā yātamaśvinā । puruśchandrā nāsatyā ॥32॥*
*eha vāṁ pruṣitapsavo vayo vahantu parṇinaḥ । achchhā svadhvaraṁ janam ॥33॥*
*rathaṁ vāmanugāyasaṁ ya iṣā vartate saha । na chakramabhi bādhate ॥34॥*
*hiraṇyayena rathena dravatpāṇibhiraśvaiḥ । dhījavanā nāsatyā ॥35॥*
*yuvaṁ mṛgaṁ jāgṛvāṁsaṁ svadatho vā vṛṣaṇvasū । tā naḥ pṛṅktamiṣā rayim ॥36॥*

ऋ. (Rv.) ८.५.३७१

ता मे अश्विना सनीनां विद्यातं नवानाम् ।
यथा चिच्चैद्यः कशुः शतमुष्ट्रानां ददत्सहस्रा दश गोनाम् ॥३७॥
*tā me aśvinā sanīnāṁ vidyātaṁ navānām ।*
*yathā chichchaidyaḥ kaśuḥ śatamuṣṭrānāṁ dadatsahasrā daśa gonām ॥37॥*

२. चैद्यस्य कसोर् दानस्तुतिः (Chaidyasya Kasor Dānastutiḥ) - ऋ. (Rv.) ८.५.३७२-३९

ता मे अश्विना सनीनां विद्यातं नवानाम् ।
यथा चिच्चैद्यः कशुः शतमुष्ट्रानां ददत्सहस्रा दश गोनाम् ॥३७॥
यो मे हिरण्यसंदृशो दश राज्ञो अमंहत ।
अधस्पदा इच्चैद्यस्य कृष्टयश्चर्मम्ना अभितो जनाः ॥३८॥
माकिरेना पथा गोद्येनेमे यन्ति चेदयः ।
अन्यो नेत्सूरिरोहते भूरिदावत्तरो जनः ॥३९॥
*tā me aśvinā sanīnāṁ vidyātaṁ navānām ।*
*yathā chichchaidyaḥ kaśuḥ śatamuṣṭrānāṁ dadatsahasrā daśa gonām ॥37॥*
*yo me hiraṇyasaṁdṛśo daśa rājño amaṁhata ।*
*adhaspadā ichchaidyasya kṛṣṭayaścharmamnā abhito janāḥ ॥38॥*
*mākirenā pathā godyeneme yanti chedayaḥ ।*
*anyo netsūrirohate bhūridāvattaro janaḥ ॥39॥*

## ४४६. ब्रह्मातिथि काण्वः (सास्वा. साग्री.); ब्रह्मातिथिः (सार्षेदी.) (Brahmātithi Kāṇvaḥ [Sas. Ssb.]; Brahmātithiḥ [Sad.])

१. अश्विनौ मित्रावरुणौ (Aśvinau Mitrāvaruṇau) - सा. (Sv.) २१९

दूरादिहेव यत्सतोऽरुणप्सुरशिश्वितत्। वि भानुं विश्वथातनत् ॥६॥
*dūrādiheva yatsato'ruṇapsuraśiśvitat । vi bhānuṁ viśvathātanat ॥6॥*

## ४४७. ब्रह्मास्कन्दः (Brahmāskandaḥ)

१. मन्युः (Manyuḥ) - अ. (Av.) ४.३१.१-७; ४.३२.१-७

अ. (Av.) ४.३१.१-७

त्वया मन्यो सरथमारुजन्तो हर्षमाणा हृषितासो मरुत्वन् ।
तिग्मेषव आयुधा संशिशाना उप प्र यन्तु नरो अग्निरूपाः ॥१॥
अग्निरिव मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे हूत एधि ।
हत्वाय शत्रून वि भजस्व वेद ओजो मिमानो वि मृधो नुदस्व ॥२॥
सहस्व मन्यो अभिमातिमस्मै रुजन् मृणन् प्रमृणन् प्रेहि शत्रून् ।

उग्रं ते पाजो नन्वा रुरुध्रे वशी वशं नयासा एकज त्वम् ॥३॥
एको बहूनामसि मन्य ईडिता विशंविशं युद्धाय सं शिशाधि ।
अकृत्तरुत्त्वया युजा वयं द्युमन्तं घेषं विजयाय कृण्मसि ॥४॥
विजेष्कृदिन्द्र इवानवब्रवो३स्माकं मन्यो अधिपा भवेह ।
प्रियं ते नाम सहुरे गृणीमसि विद्मा तमुत्सं यत आबभूथा ॥५॥
आभूत्या सहजा वज्र सायक सहो बिभर्षि सहभूत उत्तरम् ।
क्रत्वा नो मन्यो सह मेद्येधि महाधनस्य पुरुहूतं संसृजि ॥६॥
संसृष्टं धनमुभयं समाकृतमस्मभ्यं धत्तां वरुणश्च मन्युः ।
भियो दधाना हृदयेषु शत्रवः पराजितासो अप नि लयन्ताम् ॥७॥
*tvayā manyo sarathamārujanto harṣamāṇā hṛṣitāso marutvan /*
*tigmeṣava āyudhā saṁśiśānā upa pra yantu naro agnirūpāḥ //1 //*
*agniriva manyo tviṣitaḥ sahasva senānīrnaḥ sahure hūta edhi /*
*hatvāya śatrūna vi bhajasva veda ojo mimāno vi mṛdho nudasva //2 //*
*sahasva manyo abhimātimasmai rujan mṛṇan pramṛṇan prehi śatrūn /*
*ugraṁ te pājo nanvā rurudhre vaśī vaśaṁ nayāsā ekaja tvam //3 //*
*eko bahūnāmasi manya īḍitā viśaṁviśaṁ yuddhāya saṁ śiśādhi /*
*akṛttaruktvayā yujā vayaṁ dyumantaṁ gheṣaṁ vijayāya kṛṇmasi //4 //*
*vijeṣkṛdindra ivānavabravo3smākaṁ manyo adhipā bhaveha /*
*priyaṁ te nāma sahure gṛṇīmasi vidmā tamutsaṁ yata ābabhūthā //5 //*
*ābhūtyā sahajā vajra sāyaka saho bibharṣi sahabhūta uttaram /*
*kratvā no manyo saha medyedhi mahādhanasya puruhūtaṁ saṁsṛji //6 //*
*saṁsṛṣṭaṁ dhanamubhayaṁ samākṛtamasmabhyaṁ dhattāṁ varuṇaścha manyuḥ /*
*bhiyo dadhānā hṛdayeṣu śatravaḥ parājitāso apa ni layantām //7 //*

अ. (Av.) ४.३२.१-७

यस्ते मन्योऽविधद् वज्र सायक सह ओजः पुष्यति विश्वमानुषक् ।
साह्याम दासमार्यं त्वया युजा वयं सहस्कृतेन सहसा सहस्वता ॥१॥
मन्युरिन्द्रो मन्युरेवास देवो मन्युर्होता वरुणो जातवेदाः ।
मन्युर्विश ईडते मानुषीर्याः पाहि नो मन्यो तपसा सजोषाः ॥२॥
अभीहि मन्यो तवसस्तवीयान् तपसा युजा वि जहि शत्रून् ।
अमित्रहा वृत्रहा दस्युहा च विश्वा वसून्या भरा त्वं नः ॥३॥
त्वं हि मन्यो अभिभूत्योजाः स्वयंभूर्भामो अभिमातिषाहः ।
विश्वचर्षणिः सहुरिः सहीयानस्मास्वोजः पृतनासु धेहि ॥४॥
अभागः सत्रप परेतो अस्मि तव क्रत्वा तविषस्य प्रचेतः ।
तं त्वा मन्यो अक्रतुर्जिहीडाहं स्वा तनूर्बलदावा न एहि ॥५॥
अयं ते अस्म्युप न एह्यर्वाङ् प्रतीचीनः सहुरे विश्वदावन् ।
मन्यो वज्रिन्नभि न आ ववृत्स्व हनाव दस्यूंरुत बोध्यापेः ॥६॥
अभि प्रेहि दक्षिणतो भवा नोऽधा वृत्राणि जंघनाव भूरि ।
जुहोमि ते धरुणं मध्वो अग्रमुभावुपांशु प्रथमा पिबाव ॥७॥
*yaste manyo'vidhad vajra sāyaka saha ojaḥ puṣyati viśvamānuṣak /*
*sāhyāma dāsamāryaṁ tvayā yujā vayaṁ sahaskṛtena sahasā sahasvatā //1 //*
*manyurindro manyurevāsa devo manyurhotā varuṇo jātavedāḥ /*
*manyurviśa īḍate mānuṣīryāḥ pāhi no manyo tapasā sajoṣāḥ //2 //*
*abhīhi manyo tavasastavīyān tapasā yujā vi jahi śatrūn /*
*amitrahā vṛtrahā dasyuhā cha viśvā vasūnyā bharā tvaṁ naḥ //3 //*
*tvaṁ hi manyo abhibhūtyojāḥ svayaṁbhūrbhāmo abhimātiṣāhaḥ /*
*viśvacharṣaṇiḥ sahuriḥ sahīyānasmāsvojaḥ pṛtanāsu dhehi //4 //*
*abhāgaḥ satrapa pareto asmi tava kratvā taviṣasya prachetaḥ /*
*taṁ tvā manyo akraturjihīḍāhaṁ svā tanūrbaladāvā na ehi //5 //*
*ayaṁ te asmyupa na ehyarvāṅ pratīchīnaḥ sahure viśvadāvan /*
*manyo vajrinnabhi na ā vavṛtsva hanāva dasyūṁruta bodhyāpeḥ //6 //*
*abhi prehi dakṣiṇato bhavā no'dhā vṛtrāṇi jaṁghanāva bhūri /*

*juhomi te dharuṇaṁ madhvo agramubhāvupāṁśu prathamā pibāva //7 //*

## ४४८. भगः (Bhagaḥ)

१. इन्द्रः (Indraḥ) - अ. (Av.) ६.८२.१-३

आगच्छत आगतस्य नाम गृह्णाभ्यायतः । इन्द्रस्य वृत्रघ्नो व वे वासवस्य शतक्रतोः ॥१॥
येन सूर्यं सावित्रीमश्विनोहतुः पथा । तेन मामब्रवीद् भगो जायामा वहतादिति ॥२॥
यस्तेऽङ्कुशो वसुदानो बृहन्निन्द्र हिरण्ययः । तेना जनीयते जायां मह्यं धेहि शचीपते ॥३॥
*āgachchhata āgatasya nāma gṛhṇābhyāyataḥ /*
*indrasya vṛtraghno va ve vāsavasya śatakratoḥ //1 //*
*yena sūryaṁ sāvitrīmaśvinohatuḥ pathā /*
*tena māmabravīd bhago jāyāmā vahatāditi //2 //*
*yaste'ṅkuśo vasudāno bṛhannindra hiraṇyayaḥ /*
*tenā janīyate jāyāṁ mahyaṁ dhehi śachīpate //3 //*

२. निर्ऋतिः (Nirṛtiḥ) - अ. (Av.) ६.८४.१-४

यस्यास्त आसनि घोरे जुहोम्येषां बद्धानामवसर्जनाय कम् ।
भूमिरिति त्वाभिप्रमन्वते जना निर्ऋतिरिति त्वाहं परि वेद सर्वतः ॥१॥
भूते हविष्मती भवैष ते भागो यो अस्मासु ।
मुंचेमानमूनेनसः स्वाहा ॥२॥
एवो ष्व१स्मन्निर्ऋते नेहा त्वमयस्मयान् वि चृता बन्धपाशान् ।
यमो मह्यं पुनरित् त्वां ददाति तस्मै यमाय नमो अस्तु मृत्यव ॥३॥
अयस्मये द्रुपदे बेधिष इहाभिहितो मृत्युभिर्ये सहस्रम् ।
यमेन त्वं पितृभिः संविदान उत्तमं नाकमधि रोहयेमम् ॥४॥
*yasyāsta āsani ghore juhomyeṣāṁ baddhānāmavasarjānāya kam /*
*bhūmiriti tvābhipramanvate janā nirṛtiriti tvāhaṁ pari veda sarvataḥ //1 //*
*bhūte haviṣmatī bhavaiṣa te bhāgo yo asmāsu /*
*muṁchemānamūnenasaḥ svāhā //2 //*
*evo ṣva1smannirṛte nehā tvamayasmayān vi chṛtā bandhapāśān /*
*yamo mahyaṁ punarit tvāṁ dadāti tasmai yamāya namo astu mṛtyava //3 //*
*ayasmaye drupade bedhiṣa ihābhihito mṛtyubhirye sahasram /*
*yamena tvaṁ pitṛbhiḥ saṁvidāna uttamaṁ nākamadhi rohayemam //4 //*

३. सूर्यादयः (Sūryādayaḥ) - अ. (Av.) ६.८३.१-४

अपचितः प्र पतत सुपर्णे वसतेरिव । सूर्यः कृणोतु भेषजं चन्द्रमा वोऽपोच्छतु ॥१॥
एन्येका श्येन्येका कृष्णैका रोहिणी द्वे । सर्वासामग्रभं नामावीरघ्नीरपेतन ॥२॥
असूतिका रामायण्यपचित् प्र पतिष्यति । ग्लौरितः प्र पतिष्यति स गलुन्तो नशिष्यति ॥३॥
वीहि स्वामाहुतिं जुषाणो मनसा स्वाहा मनसा यदिदं जुहोमि ॥४॥
*apachitaḥ pra patata suparṇe vasateriva / sūryaḥ kṛṇotu bheṣajaṁ chandramā vo'pochchhatu //1 //*
*enyekā śyenyekā kṛṣṇaikā rohiṇī dve / sarvāsāmagrabhaṁ nāmāvīraghnīrapetana //2 //*
*asūtikā rāmāyaṇyapachit pra patiṣyati / glauritaḥ pra patiṣyati sa galunto naśiṣyati //3 //*
*vīhi svāmāhutiṁ juṣāṇo manasā svāhā manasā yadidaṁ juhomi //4 //*

## ४४९. भरद्वाजः (Bharadvājaḥ)

१. अग्निः (Agniḥ) - अ. (Av.) २.१२.८; य. (Yv.) ३.३; १३; ११.३२-३४; १८.७४; ३३.९

अ. (Av.) २.१२.८

आ दधामि ते पदं समिद्धे जातवेदसि । अग्निः शरीरं वेवेष्ट्वसुं वागपि गच्छतु ॥८॥
*ā dadhāmi te padaṁ samiddhe jātavedasi /*
*agniḥ śarīraṁ veveṣṭvasuṁ vāgapi gachchhatu //8 //*

य. (Yv.) ३.३

तं त्वा समिद्भिरंगिरो घृतेन वर्द्धयामसि । बृहच्छोचा यविष्ठ्य ॥३॥
*taṁ tvā samidbhiraṁgiro ghṛtena varddhayāmasi / bṛhachchhochā yaviṣṭhya //3 //*

य. (Yv.) ३.१३

उभा वामिन्द्राग्नीऽआहुवध्याऽउभा राधसः सह मादयध्यै ।
उभा दाताराविषां रयीणामुभा वाजस्य सातये हुवे वाम् ॥१३ ॥
*ubhā vāmindrāgnī'āhuvadhyā'ubhā rādhasaḥ saha mādayadhyai /*
*ubhā dātārāviṣāāṁ rayīṇāmubhā vājasya sātaye huve vām //13 //*

य. (Yv.) ११.३२-३४

पुरीष्योऽसि विश्वभराऽअथर्वा त्वा प्रथमो निरमन्थदग्ने ।
त्वामग्ने पुष्करादध्यथर्वा निरमन्थत। मूर्ध्नो विश्वस्य वाघतः ॥३२ ॥
तमु त्वा दध्यङ्ङृषिः पुत्र ईधेऽअथर्वणः। वृत्रहणं पुरन्दरम् ॥३३ ॥
तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम्। धनंजयं रणेरणे ॥३४ ॥
*purīṣyo'si viśvabharā'atharvā tvā prathamo niramanthadagne /*
*tvāmagne puṣkarādadhyatharvā niramanthata / mūrdhno viśvasya vāghataḥ //32 //*
*tamu tvā dadhyaṅṅṛṣiḥ putra īdhe'atharvaṇaḥ / vṛtrahaṇaṁ purandaram //33 //*
*tamu tvā pāthyo vṛṣā samīdhe dasyuhantamam / dhanaṁjayaṁ raṇeraṇe //34 //*

य. (Yv.) १८.७४

अश्याम तं काममग्ने तवोतीऽअश्याम रयिं रयिवः सुवीरम् ।
अश्याम वाजमभि वाजयन्तोऽश्याम द्युम्नमजराजरं ते ॥७४ ॥
*aśyāma taṁ kāmamagne tavotī'aśyāma rayiṁ rayivaḥ suvīram /*
*aśyāma vājamabhi vājayanto'śyāma dyumnamajarājaraṁ te //74 //*

य. (Yv.) ३३.९

अग्निर्वृत्राणि जंघनद्द्रविणस्युर्विपन्यया। समिद्धः शुक्रऽआहुतः ॥९ ॥
*agnirvṛtrāṇi jaṁghanaddraviṇasyurvipanyayā / samiddhaḥ śukra'āhutaḥ //9 //*

२. आदित्यवस्वङ्गिरसः (Ādityavasvaṅgirasaḥ) - अ. (Av.) २.१२.४

अशीतिभिस्तिसृभिः सामगेभिरादित्येभिर्वसुभिरंगिरोभिः ।
इष्टापूर्तमवतु नः पितृणामामुं ददे हरसा दैव्येन ॥४ ॥
*aśītibhistisṛbhiḥ sāmagebhirādityebhirvasubhiraṁgirobhiḥ /*
*iṣṭāpūrtamavatu naḥ pitṝṇāmāmuṁ dade harasā daivyena //4 //*

३. इन्द्रः (Indraḥ) - अ. (Av.) २.१२.३; २०.८.१; २०.३६.१-११

अ. (Av.) २.१२.३

इदमिन्द्र श्रृणुहि सोमप यत् त्वाहृदा शोचता जोहवीमि ।
वृश्चामि तं कुलिशेनेव वृक्षं यो अस्माकं मन इदं हिनस्ति ॥३ ॥
*idamindra śṛṇuhi somapa yat tvāhṛdā śochatā johavīmi /*
*vṛśchāmi taṁ kuliśeneva vṛkṣaṁ yo asmākaṁ mana idaṁ hinasti //3 //*

अ. (Av.) २०.८.१

एवा पाहि प्रत्नथा मन्दतु त्वा श्रुधि ब्रह्म वावृधस्वोत गीर्भिः ।
आविः सूर्यं कृणुहि पीपिहीषो जहि शत्रूँरभि गा इन्द्र तृन्धि ॥१ ॥
*evā pāhi pratnathā mandatu tvā śrudhi brahma vāvṛdhasvota gīrbhiḥ /*
*āviḥ sūryaṁ kṛṇuhi pīpihīṣo jahi śatrūm̐rabhi gā indra tṛndhi //1 //*

अ. (Av.) २०.३६.१-११

य एक इद्धव्यश्चर्षणीनामिन्द्रं तं गीर्भिरभ्यर्च आभिः ।
यः पत्यते वृषभो वृष्ण्यावान्त्सत्यः सत्वा पुरुमायः सहस्वान् ॥१ ॥
तमु नः पूर्वे पितरो नवग्वाः सप्त विप्रासो अभि वाजयन्तः ।
नक्षद्दाभं ततुरि पर्वतेष्ठामद्रोघवाचं मतिभिः शविष्ठम् ॥२ ॥
तमीमह इन्द्रमस्य रायः पुरुवीरस्य नृवतः पुरुक्षोः ।
यो अस्कृधोयुरजरः स्वर्वान् तमा भर हरिवो मादयध्यै ॥३ ॥
तन्नो वि वोचो यदि ते पुरा चिज्जरितार आनशुः सुम्नमिन्द्र ।
कस्ते भागः किं वयो दुध्र खिद्वः पुरुहूत पुरूवसोऽसुरघ्नः ॥४ ॥

तं पृच्छन्ती वज्रहस्तं रथेष्ठामिन्द्रं वेपी वक्करी यस्य नू गीः ।
तुविग्राभं तुविकूर्मिं रभोदां गातुमिषे नक्षते तुम्रमच्छ ॥५॥
अया ह त्यं मायया वावृधानं मनोजुवा स्वतवः पर्वतेन ।
अच्युता चिद् वीडिता स्वोजो रुजो वि दृढा धृषता विरप्शिन् ॥६॥
तं वो धिया नव्यस्या शविष्ठं प्रत्नं प्रत्नवत् परितंसयध्यै ।
स नो वक्षदनिमानः सुवह्मेन्द्रो विश्वान्यति दुर्गहाणि ॥७॥
आ जनाय द्रुह्वणे पार्थिवानि दिव्यानि दीपयोऽनतरिक्षा ।
तपा वृषन् विश्वतः शोचिषा तान् ब्रह्मद्विषे शोचय क्षामपश्च ॥८॥
भुवो जनस्य दिव्यस्य राजा पार्थिवस्य जगतस्त्वेषसंदृक् ।
धिष्व वज्रं दक्षिण इन्द्र हस्ते विश्वा अजुर्य दयसे वि मायाः ॥९॥
आ संयतमिन्द्र णः स्वस्तिं शत्रुतूर्याय बृहतीममृध्राम् ।
यया दासान्यार्याणि वृत्रा करो वज्रिन्त्सुतुका नाहुषाणि ॥१०॥
स नो नियुद्भिः पुरुहूत वेधो विश्ववाराभिरा गहि प्रयज्यो ।
न या अदेवो वरते न देव आभिर्याहि तूयमा मद्र्यद्रिक् ॥११॥

*ya eka iddhavyaścharṣaṇīnāmindraṁ taṁ gīrbhirabhyarcha ābhiḥ /*
*yaḥ patyate vṛṣabho vṛṣṇyāvāntsatyaḥ satvā purumāyaḥ sahasvān //1 //*
*tamu naḥ pūrve pitaro navagvāḥ sapta viprāso abhi vājayantaḥ /*
*nakṣaddābhaṁ taturi parvateṣṭhāmadroghavāchaṁ matibhiḥ śaviṣṭham //2 //*
*tamīmaha indramasya rāyaḥ puruvīrasya nṛvataḥ purukṣoḥ /*
*yo askṛdhoyurajaraḥ svarvān tamā bhara harivo mādayadhyai //3 //*
*tanno vi vocho yadi te purā chijjaritāra ānaśuḥ sumnamindra /*
*kaste bhāgaḥ kiṁ vayo dudhra khidvaḥ puruhūta purūvaso'suraghnaḥ //4 //*
*taṁ pṛchchhantī vajrahastaṁ ratheṣṭhāmindraṁ vepī vakvarī yasya nū gīḥ /*
*tuvigrābhaṁ tuvikūrmiṁ rabhodāṁ gātumiṣe nakṣate tumramachchha //5 //*
*ayā ha tyaṁ māyayā vāvṛdhānaṁ manojuvā svatavaḥ parvatena /*
*achyutā chid vīḍitā svojo rujo vi dṛḍhā dhṛṣatā virapśin //6 //*
*taṁ vo dhiyā navyasyā śaviṣṭhaṁ pratnaṁ pratnavat paritaṁsayadhyai /*
*sa no vakṣadanimānaḥ suvahyendro viśvānyati durgahāṇi //7 //*
*ā janāya druhvaṇe pārthivāni divyāni dīpayo'natarikṣā /*
*tapā vṛṣan viśvataḥ śochiṣā tān brahmadviṣe śochaya kṣāmapaścha //8 //*
*bhuvo janasya divyasya rājā pārthivasya jagatastveṣasaṁdṛk /*
*dhiṣva vajraṁ dakṣiṇa indra haste viśvā ajurya dayase vi māyāḥ //9 //*
*ā saṁyatamindra ṇaḥ svasiṁta śatrutūryāya bṛhatīmamṛdhrām /*
*yayā dāsānyāryāṇi vṛtrā karo vajrintsutukā nāhuṣāṇi //10 //*
*sa no niyudbhiḥ puruhūta vedho viśvavārābhirā gahi prayajyo /*
*na yā adevo varate na deva ābhiryāhi tūyamā madyradrik //11 //*

४. इन्द्राग्नी (Indrāgnī) - य. (Yv.) ३३.६१

उग्रा विघनिना मृधऽइन्द्राग्नी हवामहे। ता नो मृडातऽईदृशे ॥६१॥
*ugrā vighaninā mṛdha'indrāgnī havāmahe / tā no mūḍāta'irdṛśe //61 //*

५. गृहपतयः (Gṛhapatayaḥ) - य. (Yv.) ८.६; १०-१२; १४

य. (Yv.) ८.६

वाममद्य सवितर्वाममु श्वो दिवे दिवे वाममस्मभ्यं सावीः ।
सामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम ॥६॥
*vāmamadya savitarvāmamu śvo dive dive vāmamasmabhyaṁ sāvīḥ /*
*sāmasya hi kṣayasya deva bhūrerayā dhiyā vāmabhājaḥ syāma //6 //*

य. (Yv.) ८.१०-१२

अग्ना३इ पत्नीवन्त्सजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहा ।
प्रजापतिर्वृषामि रेतोधा रेतो मयि धेहि प्रजापतेस्ते वृष्णो रेतोधसो रेतोधामशीय ॥१०॥
उपयामगृहीतोऽसि हरिरसि हारियोजनो हरिभ्यां त्वा। हर्योर्धाना स्थ सहसोमाऽइन्द्राय ॥११॥

यस्तेऽअश्वसनिर्भक्षो यो गोसनिस्तस्य तऽइष्टयजुष स्तुतस्तोमस्य शस्तोक्थस्योपहूतस्योपहूतो भक्षयामि ॥१२॥
*agnā3ha patnīvantsajūrdevena tvaṣṭrā somaṁ piba svāhā ।*
*prajāpatirvṛṣāmi retodhā reto mayi dhehi prajāpateste vṛṣṇo retodhaso retodhāmaśīya ॥10॥*
*upayāmagṛhīto'si harirasi hāriyojano haribhyāṁ tvā ।*
*haryyorddhānā stha sahasomā'indrāya ॥11॥*
*yaste'aśvasanirbhakṣo yo gosanistasya ta'iṣṭayajuṣa stutastomasya śastokthasyopahūtasyopahūto bhakṣayāmi ॥12॥*

य. (Yv.) ८.१४

सं वर्चसा पयसा सं तनूभिरगन्महि मनसास सं शिवेन ।
त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् ॥१४॥
*saṁ varchasā payasā saṁ tanūbhiraganmahi manasāsa saṁ śivena ।*
*tvaṣṭā sudatro vidadhātu rāyo'numārṣṭu tanvo yadviliṣṭam ॥14॥*

६. गृहपतयो विश्वेदेवाः (Gṛhapatayo Viśvedevāḥ) - य. (Yv.) ८.९; १३

य. (Yv.) ८.९

उपयामगृहीतोऽसि बृहस्पतिसुतस्य देव सोम तऽइन्दोरिन्द्रियावतः पत्नीवतो ग्रँहा २ऽऋध्यासम् ।
अहं परस्तादहम वस्ताद्यदन्तरिक्षं तदु मे पिताभूत्। अहंसूर्य्यमुभयतो ददर्शाहं देवानां परमं गुहा यत्॥९।
*upayāmagṛhīto'si bṛhaspatisutasya deva soma ta'indorindriyāvataḥ patnīvato graṁhā 2'ṛdhyāsam ।*
*ahaṁ parastādahama vastādyadantarikṣaṁ tadu me pitābhūt । ahaṁsūryyamubhayato dadarśāhaṁ devānāṁ paramaṁ guhā yat ॥9।*

य. (Yv.) ८.१३

देवकृतस्यैनसोऽवयजनमसि मनुष्यकृतस्यैनसोऽवयजनमसि पितृकृतस्यैनसोऽवयजनमस्या त्मकृतस्यैनसोऽवयजनमस्येनसऽएनसोऽवयजनमसि। यच्चाहमेनो विद्वाँश्चकार यच्चाविद्वाँस्तस्य सर्वस्यैनसोऽवयजनमसि ॥१३॥
*devakṛtasyainaso'vayajanamasi manuṣyakṛtasyainaso'vayajanamasi pitṛkṛtasyainaso'vayajanamasyā tmakṛtasyainaso'vayajanamasyenasa'enaso'vayajanamasi ।*
*yachchāhameno vidvāṁśchakāra yachchāvidvāṁstasya sarvasyainaso'vayajanamasi ॥13॥*

७. देवाः (Devāḥ) - अ. (Av.) २.१२.२

इदं देवाः श्रृणुत ये यज्ञिया स्थ भरद्वाजो मह्यमुक्थानि शंसति ।
पाशे स बद्धो दुरिते नि युज्यतां यो अस्माकं मन इदं हिनस्ति ॥२॥
*idaṁ devāḥ śṛṇuta ye yajñiyā stha bharadvājo mahyamukthāni śaṁsati ।*
*pāśe sa baddho durite ni yujyatāṁ yo asmākaṁ mana idaṁ hinasti ॥2॥*

८. द्यावापृथिव्यौ (Dyāvāpṛthivyau) - य. (Yv.) ३४.४५

घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा ।
द्यावापृथिवी वरुणस्य धर्मणा विष्कभितेऽअजरे भूरिरेतसा ॥४५॥
*ghṛtavatī bhuvanānāmabhiśriyorvī pṛthvī madhudughe supeśasā ।*
*dyāvāpṛthivī varuṇasya dharmaṇā viṣkabhite'ajare bhūriretasā ॥45॥*

९. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.६७.१-३

त्वं सोमासि धारयुर्मन्द्र ओजिष्ठो अध्वरे। पवस्व मंहयद्रयिः ॥१॥
त्वं सुतो नृमादनो दधन्वान्मत्सरिन्तमः। इन्द्राय सूरिरन्धसा ॥२॥
त्वं सुष्वाणो अद्रिभिरभ्यर्ष कनिक्रदत्। द्युमन्तं शुष्ममुत्तमम् ॥३॥
*tvaṁ somāsi dhārayurmandra ojiṣṭho adhvare । pavasva maṁhayadrayiḥ ॥1॥*
*tvaṁ suto nṛmādano dadhanvānmatsarintamaḥ । indrāya sūrirandhasā ॥2॥*
*tvaṁ suṣvāṇo adribhirabhyarṣa kanikradat । dyumantaṁ śuṣmamuttamam ॥3॥*

१०. प्रजासेनापतिः (Prajāsenāpatiḥ) - य. (Yv.) ७.३९

महाँ२ऽइन्द्रो नृवदा चर्षणिप्राऽउत द्विबर्हाऽअमिनः सहोभिः ।

अस्मद्र्यग्वावृधे वीर्य्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत् ।
उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा ॥३९॥
*mahāṁ2'indro nṛvadā charṣaṇiprā'uta dvibarhā'aminaḥ sahobhiḥ /*
*asmadryagvāvṛdhe vīryyāyoruḥ pṛthuḥ sukṛtaḥ kartṛbhirbhūt /*
*upayāmagṛhīto'si mahendrāya tvaiṣa te yonirmahendrāya tvā //39 //*

११. बृहस्पतिः (Bṛhaspatiḥ) - अ. (Av.) २०.९०.१-३

यो अद्रिभित् प्रथमजा ऋतावा बृहस्पतिरांगिरसो हविष्मान् ।
द्विबर्हज्मा प्राघर्मसत् पिता न आ रोदसी वृषभो रोरवीति ॥१॥
जनाय चिद् य ईवत उ लोकं बृहस्पतिर्देवहूतौ चकार ।
घ्नन् वृत्राणि वि पुरो दर्दरीति जयंछत्रूंरमित्रान् पृत्सु साहन् ॥२॥
बृहस्पतिः समजयद् वसूनि महो व्रजान् गोमतो देव एषः ।
अपः सिषासन्त्स्व१रप्रतीतो बृहस्पतिर्हन्त्यमित्रमर्कैः ॥३॥
*yo adribhit prathamajā ṛtāvā bṛhaspatirāṁgiraso haviṣmān /*
*dvibarhajmā prāgharmasat pitā na ā rodasī vṛṣabho roravīti //1 //*
*janāya chid ya īvata u lokaṁ bṛhaspatirdevahūtau chakāra /*
*ghnan vṛtrāṇi vi puro dardarīti jayaṁchhatrūṁramitrān pṛtsu sāhan //2 //*
*bṛhaspatiḥ samajayad vasūni maho vrajān gomato deva eṣaḥ /*
*apaḥ siṣāsantsva1rapratīto bṛhaspatirhantyamitramarkaiḥ //3 //*

१२. मरुतः (Marutaḥ) - अ. (Av.) २.१२.६

अतीव यो मरुतो मन्यते नो ब्रह्म वा यो निन्दिषत् क्रियमाणम् ।
तपूंषि तस्मै वृजिनानि सन्तु ब्रह्मद्विषं द्यौरभिसंतपाति ॥६॥
*atīva yo maruto manyate no brahma vā yo nindiṣat kriyamāṇam /*
*tapūṁṣi tasmai vṛjināni santu brahmadviṣaṁ dyaurabhisaṁtapāti //6 //*

१३. यमसादनम् ब्रह्म (Yamasādanam Brahma) - अ. (Av.) २.१२.७

सप्त प्राणानष्टौ मन्यस्तांस्ते वृश्चामि ब्रह्मणा। अया यमस्य सादनमग्निदूतो अरंकृतः ॥७॥
*sapta prāṇānaṣṭau manyastāṁste vṛśchāmi brahmaṇā /*
*ayā yamasya sādanamagnidūto araṁkṛtaḥ //7 //*

१४. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.) ७.२४; ३३.१३

य. (Yv.) ७.२४

मूर्द्धानं दिवोऽअरतिं पृथिव्या वैश्वानर मृतऽआ जातमग्निम् ।
कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥२४॥
*mūrddhānaṁ divo'aratiṁ pṛthivyā vaiśvānara mṛta'ā jātamagnim /*
*kaviṁ samrājamatithi janānāmāsannā pātraṁ janayanta devāḥ //24 //*

य. (Yv.) ३३.१३

त्वां हि मन्द्रतममर्कशोकैर्ववृमहे महि नः श्रोष्यग्ने ।
इन्द्र न त्वा शवसा देवता वायुं पृणन्ति राधसा नृतमाः ॥१३॥
*tvāṁ hi mandratamamarkaśokairvavṛmahe mahi naḥ śroṣyagne /*
*indra na tvā śavasā devatā vāyuṁ pṛṇanti rādhasā nṛtamāḥ //13 //*

१५. विश्वेदेवाः गृहपतयः (Viśvedevāḥ Gṛhapatayaḥ) (Viśvedevāḥ Gṛhapatayaḥ) - य. (Yv.) ८.८

उपयामगृहीतोऽसि सुशर्म्मासि सुप्रतिष्ठानो बृहदुक्षाय नमः ।
विश्वेभ्यस्त्वा देवेभ्यऽएष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥८॥
*upayāmagṛhīto'si suśarmmāsi supratiṣṭhāno bṛhadukṣāya namaḥ /*
*viśvebhyastvā devebhya'eṣa te yonirviśvebhyastvā devebhyaḥ //8 //*

१६. वैश्वानरः (Vaiśvānaraḥ) - य. (Yv.) ७.२५

उपयामगृहीतोऽसि ध्रुवोऽसि ध्रुवक्षितिध्रुवाणां ध्रुवतमोऽच्युतानामच्युतक्षित्तमऽएष ते योनिर्वैश्वानराय त्वा। ध्रुवं ध्रुवेण मनसा वाचा सोममवनयामि। अथा नऽइन्द्र इद्विशोऽसपत्नाः समनसस्करत् ॥२५॥

*upayāmagṛhīto'si dhruvo'si dhruvakṣitidhruvāṇāṁ*
*dhruvatamo'chyutānāmachyutakṣittama'eṣa te yonirvaiśvānarāya tvā । dhruvaṁ dhruveṇa*
*manasā vāchā somamavanayāmi । athā na'indra idviśo'sapatnāḥ samanasaskarat ॥25॥*

१७. सविता (Savitā) - य. (Yv.) ३३.८४

अदब्धेभिः सवितः पायुभिष्ट्वं शिवेभिरद्य परि पाहि नो गयम् ।
हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नोऽअघशंस ईशत ॥८४॥
*adabdhebhiḥ savitaḥ pāyubhiṣṭvaṁ śiveśribharadya pari pāhi no gayam ।*
*hiraṇyajihvaḥ suvitāya navyase rakṣā mārkino'aghaśaṁsa īśata ॥84॥*

१८. सविता गृहपतिः (Savitā Gṛhapatiḥ) - य. (Yv.) ८.७

उपयामगृहीतोऽसि सवित्रोऽसि चनोधाश्चनोधाऽअसि चनो मयि धेहि ।
जिन्व यज्ञं जिन्व यज्ञपतिं भगाय देवाय त्वा सवित्रे ॥७॥
*upayāmagṛhīto'si savitro'si chanodhāśchanodhā'asi chano mayi dhehi ।*
*jinva yajñaṁ jinva yajñapatiṁ bhagāya devāya tvā savitre ॥7॥*

१९. सूर्यः (Sūryaḥ) - अ. (Av.) २०.५८.३-४

बण्महाँ असि सूर्य बडादित्य महाँ असि ।
महस्ते सतो महिमा पनस्यतेऽद्धा देव महाँ असि ॥३॥
बट् सूर्य श्रवसा महाँ असि सत्रा देव महाँ असि ।
मह्ना देवानामसुर्यः पुरोहितो विभु ज्योतिरदाभ्यम् ॥४॥
*baṇmahām̐ asi sūrya baḍāditya mahām̐ asi ।*
*mahaste sato mahimā panasyate'ddhā deva mahām̐ asi ॥3॥*
*baṭ sūrya śravasā mahām̐ asi satrā deva mahām̐ asi ।*
*mahnā devānāmasuryaḥ purohito vibhu jyotiradābhyam ॥4॥*

## ४५०. भरद्वाजो बार्हस्पत्यः (Bharadvājo Bārhaspatyaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ६.१.१-१३; ६.२.१-११; ६.३.१-८; ६.४.१-८; ६.५.१-७; ६.६.१-७; ६.१०.१-७; ६. ११.१-६; ६.१२.१-६; ६.१३.१-६; ६.१४.१-६; ६.१६.१-४८; सा. (Sv.) १; २; ४; ७; ९; २२; २५; ६७; ६८; ८३; ८४; ६६०-६६२; ७०५-७०७; १३८३-१३८५; १३९६-१३९८; १४७४-१४७६; १७०५-१७०७

ऋ. (Rv.) ६.१.१-१३

त्वं ह्यग्ने प्रथमो मनोतास्या धियो अभवो दस्म होता ।
त्वं सीं वृषन्नकृणोर्दुष्टरीतु सहो विश्वस्मै सहसे सहध्यै ॥१॥
अधा होता न्यसीदो यजीयानिळस्पद इषयन्नीड्यः सन् ।
तं त्वा नरः प्रथमं देवयन्तो महो राये चितयन्तो अनु ग्मन् ॥२॥
वृतेव यन्तं बहुभिर्वसव्यैः३ स्त्वे रयिं जागृवांसो अनु ग्मन् ।
रुशन्तमग्निं दर्शतं बृहन्तं वपावन्तं विश्वहा दीदिवांसम् ॥३॥
पदं देवस्य नमसा व्यन्तः श्रवस्यवः श्रव आपन्नमृक्तम् ।
नामानि चिद्दधिरे यज्ञियानि भद्रायां ते रणयन्त संदृष्टौ ॥४॥
त्वां वर्धन्ति क्षितयः पृथिव्यां त्वां राय उभयासो जनानाम् ।
त्वं त्राता तरणे चेत्यो भूः पिता माता सदमिन्मानुषाणाम् ॥५॥
सपर्येण्यः स प्रियो विक्ष्व१ ग्नि र्होता मन्द्रो नि षसादा यजीयान् ।
तं त्वा वयं दम आ दीदिवांसमुप ज्ञुबाधो नमसा सदेम ॥६॥
तं त्वा वयं सुध्यो३ नव्यमग्ने सुम्नायव ईमहे देवयन्तः ।
त्वं विशो अनयो दीद्यानो दिवो अग्ने बृहता रोचनेन ॥७॥
विशां कविं विश्पतिं शश्वतीनां नितोशनं वृषभं चर्षणीनाम् ।
प्रेतीषणिमिषयन्तं पावकं राजन्तमग्निं वृषभं चर्षणीनाम् ।
प्रेतीषणिमिषयन्तं पावकं राजन्तमग्निं यजतं रयीणाम् ॥८॥
सो अग्न ईजे शशमे च मर्तो यस्त आनट् समिधा हव्यदातिम् ।

य आहुतिं परि वेदा नमोभिर्विश्वेत्स वामा दधते त्वोतः ॥९॥
अस्मा उ ते महि महे विधेम नमोभिरग्ने समिधोत हव्यैः ।
वेदी सूनो सहसो गीर्भिरुक्थैरा ते भद्राया सुमतौ यतेम ॥१०॥
आ यस्ततन्थ रोदसी वि भासा श्रवोभिश्च श्रवस्य१स्तरुत्रः ।
बृहद्भिर्वाजैः स्थविरेभिरस्मे रेवद्भिरग्ने वितरं वि भाहि ॥११॥
नृवद्वसो सदमिद्धेह्यस्मे भूरि तोकाय तनयाय पश्वः ।
पूर्वीरिषो बृहतीरारे अघा अस्मे भद्रा सौश्रवसानि सन्तु ॥१२॥
पुरूण्यग्ने पुरुधा त्वाया वसूनि राजन्वसुता ते अश्याम् ।
पुरूणि हि त्वे पुरुवार सन्त्यग्ने वसु विधते राजनि त्वे ॥१३॥
*tvaṁ hyagne prathamo manotāsyā dhiyo abhavo dasma hotā /*
*tvaṁ sīṁ vṛṣannakṛṇorduṣṭarītu saho viśvasmai sahase sahadhyai //1 //*
*adhā hotā nyasīdo yajīyāniḻaspada iṣayannīḍyaḥ san /*
*taṁ tvā naraḥ prathamaṁ devayanto maho rāye chitayanto anu gman //2 //*
*vṛteva yantaṁ bahubhirvasavyai3 stve rayiṁ jāgṛvāṁso anu gman /*
*ruśantamagiṁna darśataṁ bṛhantaṁ vapāvantaṁ viśvahā dīdivāṁsam //3 //*
*padaṁ devasya namasā vyantaḥ śravasyavaḥ śrava āpannamṛktam /*
*nāmāni chiddadhire yajñiyāni bhadrāyāṁ te raṇayanta saṁdṛṣṭau //4 //*
*tvāṁ vardhanti kṣitayaḥ pṛthivyāṁ tvāṁ rāya ubhayāso janānām /*
*tvaṁ trātā taraṇe chetyo bhūḥ pitā mātā sadaminmānuṣāṇām //5 //*
*saparyeṇyaḥ sa priyo vikṣava1 gni rhotā mandro ni ṣasādā yajīyān /*
*taṁ tvā vayaṁ dama ā dīdivāṁsamupa jñubādho namasā sadema //6 //*
*taṁ tvā vayaṁ sudhyo3 navyamagne sumnāyava īmahe devayantaḥ /*
*tvaṁ viśo anayo dīdyāno divo agne bṛhatā rochanena //7 //*
*viśāṁ kaviṁ viśpatiṁ śaśvatīnāṁ nitośanaṁ vṛṣabhaṁ charṣaṇīnām /*
*pretīṣaṇimiṣayantaṁ pāvakaṁ rājantamagiṁna vṛṣabhaṁ charṣaṇīnām /*
*pretīṣaṇimiṣayantaṁ pāvakaṁ rājantamagiṁna yajataṁ rayīṇām //8 //*
*so agna īje śaśame cha marto yasta ānaṭ samidhā havyadātim /*
*ya āhutiṁ pari vedā namobhirviśvetsa vāmā dadhate tvotaḥ //9 //*
*asmā u te mahi mahe vidhema namobhiragne samidhota havyaiḥ /*
*vedī sūno sahaso gīrbhirukthairā te bhadrāyā sumatau yatema //10 //*
*ā yastatantha rodasī vi bhāsā śravobhiścha śravasya1starutraḥ /*
*bṛhadbhirvājaiḥ sthavirebhirasme revadbhiragne vitaraṁ vi bhāhi //11 //*
*nṛvadvaso sadamiddhehyasme bhūri tokāya tanayāya paśvaḥ /*
*pūrvīriṣo bṛhatīrāre aghā asme bhadrā sauśravasāni santu //12 //*
*purūṇyagne purudhā tvāyā vasūni rājanvasutā te aśyām /*
*purūṇi hi tve puruvāra santyagne vasu vidhate rājani tve //13 //*

ऋ. (Rv.) ६.२.१-११

त्वं हि क्षैतवद्यशोऽग्ने मित्रो न पत्यसे। त्वं विचर्षणे श्रवो वसो पुष्टिं न पुष्यसि ॥१॥
त्वां हि ष्मा चर्षणयो यज्ञेभिर्गीर्भिरीळते। त्वां वाजी यात्यवृको रजस्तूर्विश्वचर्षणिः ॥२॥
सजोषस्त्वा दिवो नरो यज्ञस्य केतुमिन्धते। यद्ध स्य मानुषो जनः सुम्नायुर्जुह्वे अध्वरे ॥३॥
ऋधद्यस्ते सुदानवे धिया मर्तः शशमते। ऊती ष बृहतो दिवो द्विषो अंहो न तरति ॥४॥
समिधा यस्त आहुतिं निशितिं मर्त्यो नशत्। वयावन्तं स पुष्यति क्षयमग्ने शतायुषम् ॥५॥
त्वेषस्ते धूम ऋण्वति दिवि षंछुक्र आततः। सूरो न हि द्युता त्वं कृपा पावक रोचसे ॥६॥
अधा हि विक्ष्वीड्योऽसि प्रियो नो अतिथिः। रण्वः पुरीव जूर्यः सूनुर्न त्रययाय्यः ॥७॥
क्रत्वा हि द्रोणे अजयसेऽग्ने वाजी न कृत्व्यः। परिज्मेव स्वधा गयोऽत्यो न ह्वार्यः शिशुः ॥८॥
त्वं त्या चिदच्युताग्ने पशुर्न यवसे। धामा ह यत्ते अजर वना वृश्चन्ति शिक्वसः ॥९॥
वेषि ह्यध्वरीयतामग्ने होता दमे विशाम्। समृधो विश्पते कृणु जुषस्व हव्यमंगिरः ॥१०॥
अच्छा नो मित्रमहो देव देवानग्ने वोचः सुमतिं रोदस्योः ।
वीहि स्वस्तिं सुक्षितिं दिवो नॄन्द्विषो अंहांसि दुरिता तरेम ता तरेम तवावसा तरेम ॥११॥
*tvaṁ hi kṣaitavadyaśo'gne mitro na patyase /*
*tvaṁ vicharṣaṇe śravo vaso puṣṭiṁ na puṣyasi //1 //*

*tvāṁ hi ṣmā charṣaṇayo yajñebhirgībhirīḻate |*
*tvāṁ vājī yātyavṛko rajastūrviśvacharṣaṇiḥ ||2 ||*
*sajoṣastvā divo naro yajñasya ketumindhate |*
*yaddha sya mānuṣo janaḥ sumnāyurjuhve adhvare ||3 ||*
*ṛdhadyaste sudānave dhiyā martaḥ śaśamate | ūtī ṣa bṛhato divo dviṣo aṁho na tarati ||4 ||*
*samidhā yasta āhutiṁ niśitiṁ martyo naśat |*
*vayāvantaṁ sa puṣyati kṣayamagne śatāyuṣam ||5 ||*
*tveṣaste dhūma ṛṇvati divi ṣaṁchhukra ātataḥ |*
*sūro na hi dyutā tvaṁ kṛpā pāvaka rochase ||6 ||*
*adhā hi vikṣavīḍyo'si priyo no atithiḥ | raṇvaḥ purīva jūryaḥ sūnurna trayayāyyaḥ ||7 ||*
*kratvā hi droṇe ajayase'gne vājī na kṛtvyaḥ |*
*parijmeva svadhā gayo'tyo na hvāryaḥ śiśuḥ ||8 ||*
*tvaṁ tyā chidachyutāgne paśurna yavase |*
*dhāmā ha yatte ajara vanā vṛśchanti śikvasaḥ ||9 ||*
*veṣi hyadhvarīyatāmagne hotā dame viśām |*
*samṛdho viśpate kṛṇu juṣasva havyamaṁgiraḥ ||10 ||*
*achchhā no mitramaho deva devānagne vochaḥ sumatiṁ rodasyoḥ |*
*vīhi svasiṁta sukṣitiṁ divo nṛndviṣo aṁhāṁsi duritā tarema tā tarema tavāvasā tarema ||11 ||*

ऋ. (Rv.) ६.३.१-८

अग्ने स क्षेषदृतपा ऋतेजा उरु ज्योतिर्नशते देवयुष्टे ।
यं त्वं मित्रेण वरुणः सजोषा देव पासि त्यजसा मर्तमंहः ॥१॥
ईजे यज्ञेभिः शशमे शमीभिऋर्धद्वारायाग्नये ददाश ।
एवा चन तंयशसामजुष्टिर्नांहो मर्तं नशते न प्रदृप्तिः ॥२॥
सूरो न यस्य दृशतिर रेपा भीमा यदेति शुचतस्त आ धीः ।
हेषस्वतः शुरुधो नायमक्तोः कुत्रा चिद्रण्वो वसतिर्वनेजाः ॥३॥
तिग्मं चिदेम महि वर्पो अस्य भसदश्वो न यसमान आसा ।
विजेहमानः परशुर्न जिह्वा द्रविर्न द्रावयति दारु धक्षत् ॥४॥
स इदस्तेव प्रति धादसिष्यञ्छिशीत तेजोऽयसो न धाराम् ।
चित्रध्रजतिररतिर्यो अक्तोर्वेर्न द्रुषद्वा रघुपत्मजंहाः ॥५॥
स ईं रेभो न प्रति वस्त उस्राः शोचिषा रारपीति मित्रमहाः ।
नक्तं य ईमरुषो यो दिवा नृनमतर्यो अरुषो यो दिवा नृन् ॥६॥
दिवो न यस्य विधतो नवीनोद्वृषा रुक्ष ओषधीषु नूनोत् ।
घृणा न यो ध्रजसा पत्मना यन्ना रोदसी वसुना दं सुपत्नी ॥७॥
धायोभिर्वा यो युजयेभिरर्कैर्विद्युन्न दविद्योत्स्वेभिः शुष्मैः ।
शर्धो वा यो मरुतां ततक्ष ऋभुर्न त्वेषो रभसानो अद्यौत् ॥८॥

*agne sa kṣeṣadṛtapā ṛtejā uru jyotirnaśate devayuṣṭe |*
*yaṁ tvaṁ mitreṇa varuṇaḥ sajoṣā deva pāsi tyajasā martamaṁhaḥ ||1 ||*
*ïje yajñebhiḥ śaśame śamībhirṛdhadvārāyāgnaye dadāśa |*
*evā chana taṁyaśasāmajuṣṭirnāṁho martaṁ naśate na pradṛptiḥ ||2 ||*
*sūro na yasya dṛśatira repā bhīmā yadeti śuchatasta ā dhīḥ |*
*heṣasvataḥ śurudho nāyamaktoḥ kutrā chidraṇvo vasatirvanejāḥ ||3 ||*
*tigmaṁ chidema mahi varpo asya bhasadaśvo na yasamāna āsā |*
*vijehamānaḥ paraśurna jihvā dravirna drāvayati dāru dhakṣat ||4 ||*
*sa idasteva prati dhādasiṣyañchhiśīta tejo'yaso na dhārām |*
*chitradhrajatiraratiryo aktorverna druṣadvā raghupatmajaṁhāḥ ||5 ||*
*sa īṁ rebho na prati vasta usrāḥ śochiṣā rārapīti mitramahāḥ |*
*naktaṁ ya īmaruṣo yo divā nṛnamataryo aruṣo yo divā nṛn ||6 ||*
*divo na yasya vidhato navīnodvṛṣā rukṣa oṣadhīṣu nūnot |*
*ghṛṇā na yo dhrajasā patmanā yannā rodasī vasunā daṁ supatnī ||7 ||*
*dhāyobhirvā yo yujayebhirarkairvidyunna davidyotsvebhiḥ śuṣmaiḥ |*
*śardho vā yo marutāṁ tatakṣa ṛbhurna tveṣo rabhasāno adyaut ||8 ||*

ऋ. (Rv.) ६.४.१-८

यथा होतर्मनुषो देवताता यज्ञेभिः सूनो सहसो यजासि ।
एवा नो अद्य समना समानानुशन्नग्न उशतो यक्षि देवान् ॥१॥
स नो विभावा चक्षणिर्न वस्तोरग्निर्वन्दारु वेद्यश्चनो धात् ।
विश्वायुर्यो अमृतो मर्त्येषूषर्भुदभूदतिथिर्जातवेदाः ॥२॥
द्यावो न यस्य पनयन्त्यभ्वं भासांसि वस्ते सूर्यो न शुक्रः ।
वि य इनोत्यजरः पावकोऽश्नस्य चिच्छिश्नथत्पूर्व्याणि ॥३॥
वद्मा हि सूनो अस्यद्मसद्वा चक्रे अग्निर्जनुषाज्मान्नम् ।
स त्वं न ऊर्जसन ऊर्जं धा राजेव जेरवृके क्षेष्यन्तः ॥४॥
नितिक्ति यो वारणमन्नमत्ति वायुर्न राष्ट्र्यत्येत्यक्तून् ।
तुर्याम यस्त आदिशामरातीरत्यो न ह्रुतः पततः परिह्रुत् ॥५॥
आ सूर्यो न भानुमद्भिरर्कैरग्ने ततन्थ रोदसी वि भासा ।
चित्रो नयत्परि तमांस्यक्तः शोचिषा पत्मन्नौशिजो न दीयन् ॥६॥
त्वां हि मन्द्रतममर्कशोकैर्ववृमहे महि नः श्रोष्यग्ने ।
इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति राधसा नृतमाः ॥७॥
नू नो अग्नेऽवृकेभिः स्वस्ति वेषि रायः पथिभिः पर्ष्यंहः ।
ता सूरिभ्यो गृणते रासि सुम्नं मदेम शतहिमाः सुवीराः ॥८॥

*yathā hotarmanuṣo devatātā yajñebhiḥ sūno sahaso yajāsi /*
*evā no adya samanā samānānuśannagna uśato yakṣi devān //1 //*
*sa no vibhāvā chakṣaṇirna vastoragnirvandāru vedyaśchano dhāt /*
*viśvāyuryo amṛto martyeṣūṣarbhudabhūdatithirjātavedāḥ //2 //*
*dyāvo na yasya panayantyabhvaṁ bhāsāṁsi vaste sūryo na śukraḥ /*
*vi ya inotyajaraḥ pāvako'śnasya chichchhiśnathatpūrvyāṇi //3 //*
*vadmā hi sūno asyadmasadvā chakre agnirjanuṣājmānnam /*
*sa tvaṁ na ūrjasana ūrjaṁ dhā rājeva jeravṛke kṣeṣyantaḥ //4 //*
*nitikti yo vāraṇamannamatti vāyurna rāṣṭhryatyetyaktūn /*
*turyāma yasta ādiśāmarātīratyo na hrutaḥ patataḥ parihrut //5 //*
*ā sūryo na bhānumadbhirarkairagne tatantha rodasī vi bhāsā /*
*chitro nayatpari tamāṁsyaktaḥ śochiṣā patmannauśijo na dīyan //6 //*
*tvāṁ hi mandratamamarkaśokairvavṛmahe mahi naḥ śreṣyagne /*
*indraṁ na tvā śavasā devatā vāyuṁ pṛṇanti rādhasā nṛtamāḥ //7 //*
*nū no agne'vṛkebhiḥ svasti veṣi rāyaḥ pathibhiḥ parṣyaṁhaḥ /*
*tā sūribhyo gṛṇate rāsi sumnaṁ madema śatahimāḥ suvīrāḥ //8 //*

ऋ. (Rv.) ६.५.१-७

हुवे वः सूनुं सहसो युवानमद्रोघवाचं मतिभिर्यविष्ठम् ।
य इन्वति द्रविणानि प्रचेता विश्ववाराणि पुरुवारो अध्रुक् ॥१॥
त्वे वसूनि पुर्वणीक होतर्दोषा वस्तोरेरिरे यज्ञियासः ।
क्षामेव विश्वा भुवनानि यस्मिन्त्सं सौभगानि दधिरे पावके ॥२॥
त्वं विक्षु प्रदिवः सीद आसु क्रत्वा रथीरभवो वार्याणाम् ।
अत इनोषि विधते चिकित्वो व्यानुषग्जातवेदो वसूनि ॥३॥
यो नः सनुत्यो अभिदासदग्ने यो अन्तरो मित्रमहो वनुष्यात् ।
तमजरेभिर्वृषभिस्तव स्वैस्तपा तपिष्ठ तपसा तपस्वान् ॥४॥
यस्ते यज्ञेन समिधा य उक्थैरर्केभिः सूनो सहसो ददाशत् ।
स मर्त्येष्वमृत प्रचेता राया द्युम्नेन श्रवसा वि भाति ॥५॥
स तत्कृधीषितस्तूयमग्ने स्पृधो बाधस्व सहसा सहस्वान् ।
यच्छस्यसे द्युभिरक्तो वचोभिस्तज्जुषस्व जरितुर्घोषि मन्म ॥६॥
अश्याम तं काममग्ने तवोती अश्याम रयिं रयिवः सुवीरम् ।
अश्याम वाजमभि वाजयन्तोऽश्याम द्युम्नमजराजरं ते ॥७॥

*huve vaḥ sūnuṁ sahaso yuvānamadroghavāchaṁ matibhiryaviṣṭham /*

*ya invati draviṇāni prachetā viśvavārāṇi puruvāro adhruk ॥1॥*
*tve vasūni purvaṇīka hotardoṣā vastorerire yajñiyāsaḥ ।*
*kṣāmeva viśvā bhuvanāni yasmintsaṁ saubhagāni dadhire pāvake ॥2॥*
*tvaṁ vikṣu pradivaḥ sīda āsu kratvā rathīrabhavo vāryāṇām ।*
*ata inoṣi vidhate chikitvo vyānuṣagjātavedo vasūni ॥3॥*
*yo naḥ sanutyo abhidāsadagne yo antaro mitramaho vanuṣyāt ।*
*tamajarebhirvṛṣabhistava svaistapā tapiṣṭha tapasā tapasvān ॥4॥*
*yaste yajñena samidhā ya ukthairarkebhiḥ sūno sahaso dadāśat ।*
*sa martyeṣvamṛta prachetā rāyā dyumnena śravasā vi bhāti ॥5॥*
*sa tatkṛdhīṣitastūyamagne spṛdho bādhasva sahasā sahasvān ।*
*yachchhasyase dyubhirakto vachobhistajjuṣasva jariturghoṣi manma ॥6॥*
*aśyāma taṁ kāmamagne tavotī aśyāma rayiṁ rayivaḥ suvīram ।*
*aśyāma vājamabhi vājayanto'śyāma dyumnamajarājaraṁ te ॥7॥*

ऋ. (Rv.) ६.६.१-७

प्र नव्यसा सहसः सूनुमच्छा यज्ञेन गातुमव इच्छमानः ।
वृश्चद्वनं कृष्णयामं रुशन्तं वीती होतारं दिव्य जिगति ॥१॥
स श्वितानस्तन्यतू रोचनस्था अजरेभिर्नानदद्भिर्यविष्ठः ।
यः पावकः पुरुतमः पुरूणि पृथून्यग्निरनुयाति भर्वन् ॥२॥
वि ते विष्वग्वातजूतासो अग्ने भामासः शुचे शुचयश्चरन्ति ।
तुविम्रक्षासो दिव्या नवग्वा वना वनन्ति धृषता रुजन्तः ॥३॥
ये ते शुक्रासः शुचयः शुचिष्मः क्षां वपन्ति विषितासो अश्वाः ।
अध भ्रमस्त उर्विया वि भाति यातयमानो अधि सानु पृश्नेः ॥४॥
अध जिह्वा पापतीति प्र वृष्णो गोषुयुधो नाशनिः सृजाना ।
शूरस्येव प्रसितिः क्षातिरग्नेर्दुर्वर्तुर्भीमो दयते वनानि ॥५॥
आ भानुना पार्थिवानि ज्रयांसि महस्तोदस्य धृषता ततन्थ ।
स बाधस्वाप भया सहोभिः स्पृधो वनुष्यन्वनुषो नि जूर्व ॥६॥
स चित्र चित्रं चितयन्तमस्मे चित्रक्षत्र चित्रतमं वयोधाम् ।
चन्द्रं रयिं पुरुवीरं बृहन्तं चन्द्र चन्द्राभिर्गृणते युवस्व ॥७॥

*pra navyasā sahasaḥ sūnumachchhā yajñena gātumava ichchhamānaḥ ।*
*vṛśchadvanaṁ kṛṣṇayāmaṁ ruśantaṁ vītī hotāraṁ divya jigati ॥1॥*
*sa śvitānastanyatū rochanasthā ajarebhirnānadadbhiryaviṣṭhaḥ ।*
*yaḥ pāvakaḥ purutamaḥ purūṇi pṛthūnyagniranuyāti bharvan ॥2॥*
*vi te viṣvagvātajūtāso agne bhāmāsaḥ śuche śuchayaścharanti ।*
*tuvimrakṣāso divyā navagvā vanā vananti dhṛṣatā rujantaḥ ॥3॥*
*ye te śukrāsaḥ śuchayaḥ śuchiṣmaḥ kṣāṁ vapanti viṣitāso aśvāḥ ।*
*adha bhramasta urviyā vi bhāti yātayamāno adhi sānu pṛśneḥ ॥4॥*
*adha jihvā pāpatīti pra vṛṣṇo goṣuyudho nāśaniḥ sṛjānā ।*
*śūrasyeva prasitiḥ kṣātiragnedrurvarturbhīmo dayate vanāni ॥5॥*
*ā bhānunā pārthivāni jrayāṁsi mahastodasya dhṛṣatā tatantha ।*
*sa bādhasvāpa bhayā sahobhiḥ spṛdho vanuṣyanvanuṣo ni jūrva ॥6॥*
*sa chitra chitraṁ chitayantamasme chitrakṣatra chitratamaṁ vayodhām ।*
*chandraṁ rayiṁ puruvīraṁ bṛhantaṁ chandra chandrābhirgṛṇate yuvasva ॥7॥*

ऋ. (Rv.) ६.१०.१-७

पुरो वो मन्द्रं दिव्यं सुवृक्तिं प्रयति यज्ञे अग्निमध्वरे दधिध्वम् ।
पुर उक्थेभिः स हि नो विभावा स्वध्वरा करति जातवेदाः ॥१॥
तमु द्युमः पुर्वणीक होतरग्ने अग्निभिर्मनुष इधानः ।
स्तोमं यमस्मै ममतेव शूषं घृतं न शुचि मतयः पवन्ते ॥२॥
पीपाय स श्रवसा मर्त्येषु यो अग्नये ददाश विप्र उक्थैः ।
चित्राभिस्तमूतिभिश्चित्रशोचिर्व्रजस्य साता गोमतो दधाति ॥३॥
आ यः पप्रौ जायमान उर्वी दूरेदृशा भासा कृष्णाध्वा ।

अध बहु चित्तम ऊर्म्यायास्तिरः शोचिषा ददृशे पावकः ॥४॥
नू नश्चित्रं पुरुवाजाभिरूती अग्ने रयिं मघवद्भ्यश्च धेहि ।
ये राधसा श्रवसा चात्यन्यान्त्सुवीर्येभिश्चाभि सन्ति जनान् ॥५॥
इमं यज्ञं चनो धा अग्न उशन्यं त आसानो जुहुते हविष्मान् ।
भरद्वाजेषु दधिषे सुवृक्तिमवीर्वाजस्य गध्यस्य सातौ ॥६॥
वि द्वेषांसीनुहि वर्धयेळां मदेम शतहिमाः सुवीराः ॥७॥
*puro vo mandraṁ divyaṁ suvṛktiṁ prayati yajñe agnimadhvare dadhidhvam /*
*pura ukthebhiḥ sa hi no vibhāvā svadhvarā karati jātavedāḥ //1 //*
*tamu dyumaḥ purvaṇīka hotaragne agnibhirmanuṣa idhānaḥ /*
*stomaṁ yamasmai mamateva śūṣaṁ ghṛtaṁ na śuchi matayaḥ pavante //2 //*
*pīpāya sa śravasā martyeṣu yo agnaye dadāśa vipra ukthaiḥ /*
*chitrābhistamūtibhiśchitraśochirvrajasya sātā gomato dadhāti //3 //*
*ā yaḥ paprau jāyamāna urvī dūredṛśā bhāsā kṛṣṇādhvā /*
*adha bahu chittama ūrmyāyāstiraḥ śochiṣā dadṛśe pāvakaḥ //4 //*
*nū naśchitraṁ puruvājābhirūtī agne rayiṁ maghavadbhyaścha dhehi /*
*ye rādhasā śravasā chātyanyāntsuvīryebhiśchābhi santi janān //5 //*
*imaṁ yajñaṁ chano dhā agna uśanyaṁ ta āsāno juhute haviṣmān /*
*bharadvājeṣu dadhiṣe suvṛktimavīrvājasya gadhyasya sātau //6 //*
*vi dveṣāṁsīnuhi vardhayeḻāṁ madema śatahimāḥ suvīrāḥ //7 //*

ऋ. (Rv.) ६.११.१-६

यजस्व होतरिषितो यजीयानग्ने बाधो मरुतां न प्रयुक्ति ।
आ नो मित्रावरुणा नासत्या द्यावा होत्राय पृथिवी ववृत्याः ॥१॥
त्वं होता मन्द्रत्मो नो अध्रुगन्तर्देवो विदथा मर्त्येषु ।
पावकया जुह्वा३ वह्निरासाग्ने यजस्व तन्वं१ तव स्वाम् ॥२॥
धन्या चिद्धि त्वे धिष्णा वष्टि प्र देवांजन्म गृणते यजध्यै ।
वेष्ठिो अंगिरसां यद्ध विप्रो मधुच्छन्दो भनति रेभ इष्टौ ॥३॥
अदिद्युतत्स्वपाको विभावाग्ने यजस्व रोदसी उरूची ।
आयुं न यं नमसा रातहव्या अंजन्ति सुप्रयसं पंच जनाः ॥४॥
वृंजे ह यन्नमसा बर्हिरग्नावयामि स्रुग्घृतवती सुवृक्तिः ।
अम्यक्षि सद्म सदने पृथिव्या अश्रायि यज्ञः सूर्ये न चक्षुः ॥५॥
दशस्या नः पूर्वणीक होतर्देवेभिरग्ने अग्निभिरिधानः ।
रायः सूनो सहसो वावसाना अति स्रसेम वृजनं नांहः ॥६॥
*yajasva hotariṣito yajīyānagne bādho marutāṁ na prayukti /*
*ā no mitrāvaruṇā nāsatyā dyāvā hotrāya pṛthivī vavṛtyāḥ //1 //*
*tvaṁ hotā mandratmo no adhrugantardevo vidathā martyeṣu /*
*pāvakayā juhvā3 vahnirāsāgne yajasva tanvaṁ1 tava svām //2 //*
*dhanyā chiddhi tve dhiṣṇā vaṣṭi pra devāṁjanma gṛṇate yajadhyai /*
*veṣṭhio aṁgirasāṁ yaddha vipro madhuchchhando bhanati rebha iṣṭau //3 //*
*adidyutatsvapāko vibhāvāgne yajasva rodasī urūchī /*
*āyuṁ na yaṁ namasā rātahavyā aṁjanti suprayasaṁ paṁcha janāḥ //4 //*
*vṛṁje ha yannamasā barhiragnāvayāmi srugghṛtavatī suvṛktiḥ /*
*amyakṣi sadma sadane pṛthivyā aśrāyi yajñaḥ sūrye na chakṣuḥ //5 //*
*daśasyā naḥ pūrvaṇīka hotardevebhiragne agnibhiridhānaḥ /*
*rāyaḥ sūno sahaso vāvasānā ati srasema vṛjanaṁ nāṁhaḥ //6 //*

ऋ. (Rv.) ६.१२.१-६

मध्ये होता दुरोणे बर्हिषो राळग्निस्तोदस्य रोदसी यजध्यै ।
अयं स सूनुः सहस ऋतावा दूरात्सूर्यो न शोचिषा ततान ॥१॥
आ यस्मिन्त्वे स्वपाके यजत्र यक्षद्राजन्त्सर्वतातेव नु द्यौः ।
त्रिषधस्थस्ततरुषो न जंहो हव्या मघानि मानुषा यजध्यै ॥२॥
तेजिष्ठा यस्यारतिर्वनेराट् तोदो अध्वन्न वृधसानो अद्यौत् ।

अद्रोघो न द्रविता चेतति त्मन्नमर्त्योऽवर्त्र ओषधीषु ॥३॥
सास्माकेभिरेतरी न शूषैरग्नि ष्टवे दम आ जातवेदाः ।
द्रवन्नो वन्वन् क्रत्वा नार्वोस्रः पितेव जारयायि यज्ञैः ॥४॥
अध सामास्य पनयन्ति भासो वृथा यत्तक्षदनुयाति पृथ्वीम् ।
सद्यो यः स्यन्द्रो विषितो धवीयानृणो न तायुरति धन्वा राट् ॥५॥
स त्वं नो अर्वन्निदाया विश्वे भिरग्ने अग्निभिरिधानः ।
वेषि रायो वि यासि दुच्छुना मदेम शतहिमाः सुवीराः ॥६॥
*madhye hotā duroṇe barhiṣo rāḷagnistodasya rodasī yajadhyai /*
*ayaṁ sa sūnuḥ sahasa ṛtāvā dūrātsūryo na śochiṣā tatāna //1 //*
*ā yasmintve svapāke yajatra yakṣadrājantsarvatāteva nu dyauḥ /*
*triṣadhasthastataruṣo na jaṁho havyā maghāni mānuṣā yajadhyai //2 //*
*tejiṣṭhā yasyāratirvanerāṭ todo adhvanna vṛdhasāno adyaut /*
*adrogho na dravitā chetati tmannamartyo'vartra oṣadhīṣu //3 //*
*sāsmākebhiretarī na śūṣairagni ṣṭave dama ā jātavedāḥ /*
*dravanno vanvan kratvā nārvosraḥ piteva jārayāyi yajñaiḥ //4 //*
*adha sāmāsya panayanti bhāso vṛthā yattakṣadanuyāti pṛthvīm /*
*sadyo yaḥ syandro viṣito dhavīyānṛṇo na tāyurati dhanvā rāṭ //5 //*
*sa tvaṁ no arvannidāyā viśve bhiragne agnibhiridhānaḥ /*
*veṣi rāyo vi yāsi duchchhunā madema śatahimāḥ suvīrāḥ //6 //*

ऋ. (Rv.) ६.१३.१-६

त्वद्विश्वा सुभग सौभगान्यग्ने वि यन्ति वनिनो न वयाः ।
श्रुष्टी रयिर्वाजो वृत्रतूर्ये दिवो वृष्टिरीड्यो रीतिरपाम् ॥१॥
त्वं भगो न आ हि रत्नमिषे परिज्मेव क्षयसि दस्मवर्चा ।
अग्ने मित्रो न बृहत ऋतस्यासि क्षत्ता वामस्रू देव भूरेः ॥२॥
स सत्पतिः शवसा हन्ति वृत्रमग्ने विप्रो वि पणेर्भति वाजम् ।
यं त्वं प्रचेत ऋतजात राया सजोषा नप्त्रापां हिनोषि ॥३॥
यस्ते सूनो सहसो गीर्भिरुक्थैर्यज्ञैर्मर्तो निशितिं वेद्यानट् ।
विश्वं स देव प्रति वारमग्ने धत्ते धान्यं१ पत्यते वसव्यैः ॥४॥
ता नृभ्य आ सौश्रवसा सुवीराग्ने सूनो सहसः पुष्यसे धाः ।
कृणोषि यच्छवसा भूरि पश्वो वयो वृकायारये जसुरये ॥५॥
वद्मा सूनो सहसो नि विहाया अग्ने तोकं तनयं वाजि नो दाः ।
विश्वाभिर्गीर्भिरभि पूर्त्तिमश्यां मदेम शतहिमाः सुवीराः ॥६॥
*tvadviśvā subhaga saubhagānyagne vi yanti vanino na vayāḥ /*
*śruṣṭī rayirvājo vṛtratūrye divo vṛṣṭirīḍyo rītirapām //1 //*
*tvaṁ bhago na ā hi ratnamiṣe parijmeva kṣayasi dasmavarchā /*
*agne mitro na bṛhata ṛtasyāsi kṣattā vāmasrū deva bhūreḥ //2 //*
*sa satpatiḥ śavasā hanti vṛtramagne vipro vi paṇerbhati vājam /*
*yaṁ tvaṁ pracheta ṛtajāta rāyā sajoṣā naptrāpāṁ hinoṣi //3 //*
*yaste sūno sahaso gīrbhirukthairyajñairmarto niśitiṁ vedyānaṭ /*
*viśvaṁ sa deva prati vāramagne dhatte dhānyaṁ1 patyate vasavyaiḥ //4 //*
*tā nṛbhya ā sauśravasā suvīrāgne sūno sahasaḥ puṣyase dhāḥ /*
*kṛṇoṣi yachchhavasā bhūri paśvo vayo vṛkāyāraye jasuraye //5 //*
*vadmā sūno sahaso ni vihāyā agne tokaṁ tanayaṁ vāji no dāḥ /*
*viśvābhirgīrbhirabhi pūrttimaśyāṁ madema śatahimāḥ suvīrāḥ //6 //*

ऋ. (Rv.) ६.१४.१-६

अग्ना यो मर्त्यो दुवो धियं जुजोष धीतिभिः। भसन्नु ष प्र पूर्व्य इषं बुरीतावसे ॥१॥
अग्निरिद्धि प्रचेता अग्निर्वेधस्तम ऋषिः। अग्निं होतारमीळते यज्ञेषु मनुषो विशः ॥२॥
नाना ह्य१ग्नेऽवसे स्पर्धन्ते रायो अर्यः। तूर्वन्तो दस्युमायवो व्रतैः सीक्षन्तो अव्रतम् ॥३॥
अग्निरप्सामृतीषहं वीरं ददाति सत्पतिम्। यस्य त्रसन्ति शवसः संचक्षि शत्रवो भिया ॥४॥
अग्निहि विद्मना निदो देवो मर्तमुरुष्यति। सहावा यस्यावृतो रयिर्वाजेष्ववृतः ॥५॥

अच्छा नो मित्रमहो देव देवानग्ने वोचः सुमतिं रोदस्योः ।
वीहि स्वस्तिं सुक्षितिं दिवो नॄन्द्विषो अंहांसि दुरिता तरेम ता तरेम तवावसा तरेम ॥६॥
*agnā yo martyo duvo dhiyaṁ jujoṣa dhītibhiḥ |*
*bhasannu ṣa pra pūrvya iṣaṁ burītāvase ॥1॥*
*agniriddhi prachetā agnirvedhastama ṛṣiḥ |*
*agiṁna hotāramīḷate yajñeṣu manuṣo viśaḥ ॥2॥*
*nānā hya1gne'vase spardhante rāyo aryaḥ |*
*tūrvanto dasyumāyavo vrataiḥ sīkṣanto avratam ॥3॥*
*agnirapsāmṛtīṣahaṁ vīraṁ dadāti satpatim |*
*yasya trasanti śavasaḥ saṁchakṣi śatravo bhiyā ॥4॥*
*agnihi vidmanā nido devo martamuruṣyati | sahāvā yasyāvṛto rayirvājeṣvavṛtaḥ ॥5॥*
*achchhā no mitramaho deva devānagne vochaḥ sumatiṁ rodasyoḥ |*
*vīhi svasiṁta sukṣitiṁ divo nṛndviṣo aṁhāṁsi duritā tarema tā tarema tavāvasā tarema ॥6॥*

ऋ. (Rv.) ६.१६.१-४८

त्वमग्ने यज्ञानां होता विश्वेषां हितः। देवेभिर्मानुषे जने ॥१॥
स नो मन्द्राभिरध्वरे जिह्वाभिर्यजा महः। आ देवान्वक्षि यक्षि च ॥२॥
वेत्था हि वेधो अध्वनः पथश्च देवांजसा। अग्ने यज्ञेषु सुक्रतो ॥३॥
त्वामीळे अध द्विता भरतो वाजिभिः शुनम्। ईजे यज्ञेषु यज्ञियम् ॥४॥
त्वमिमा वार्या पुरु दिवोदासाय सुन्वते। भरद्वाजाय दाशुषे ॥५॥
त्वं दूतो अमर्त्य आ वहा दैव्यं जनम्। श्रृण्वन्विप्रस्य सुष्टुतिम् ॥६॥
त्वामग्ने स्वाध्यो३ मर्तासो देववीतये। यज्ञेषु देवमीळते ॥७॥
तव प्र यक्षि संदृशमुत क्रतुं सुदानवः। विश्वे जुषन्त कामिनः ॥८॥
त्वं होता मनुर्हितो वह्निरासा विदुष्टरः। अग्ने यक्षि दिवो विशः ॥९॥
अग्न आ याहि वीतये गृणानो हव्यदातये। नि होता सत्सि बर्हिषि ॥१०॥
तं त्वा समिद्भिरंगिरो घृतेन वर्धयामसि। बृहच्छोचा यविष्ठ्य ॥११॥
स नः पृथु श्रवाय्यमच्छा देव विवाससि। बृहदग्ने सुवीर्यम् ॥१२॥
त्वामग्ने पुष्करादध्यथर्वा निरमन्थत। मूर्ध्नो विश्वस्य वाघतः ॥१३॥
तमु त्वा दध्यङृषिः पुत्र ईधे अथर्वणः। वृत्रहणं पुरन्दरम् ॥१४॥
तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम्। धनंजयं रणेरणे ॥१५॥
एह्यू षु ब्रवाणि तेऽग्न इत्थेतरा गिरः। एभिर्वर्धास इन्दुभिः ॥१६॥
यत्र क्व च ते मनो दक्षं दधस उत्तरम्। तत्रा सदः कृणवसे ॥१७॥
नहि ते पूर्तमक्षिपद्भुवन्नेमानां वसो। अथा दुवो वनवसे ॥१८॥
आग्निरगामि भारतो वृत्रहा पुरुचेतनः। दिवोदासस्य सत्पतिः ॥१९॥
स हि विश्वाति पार्थिवा रयिं दाशन्महित्वना वन्वन्नवातो अस्तृतः ॥२०॥
स प्रत्नवन्नवीयसाग्ने द्युम्नेन संयता। बृहत्ततन्थ भानुना ॥२१॥
प्र वः सखायो अग्नये स्तोमं यज्ञं च धृष्णुया। अर्च गाय च वेधसे ॥२२॥
स हि यो मानुषा युगा सीदद्धोता कविक्रतुः। दूतश्च हव्यवाहनः ॥२३॥
ता राजाना शुचिव्रतादित्यान्मारुतं गणम्। वसो यक्षीह रोदसी ॥२४॥
वस्वी ते अग्ने संदृष्टिरिषयते पर्त्याय। ऊर्जो नपादमृतस्य ॥२५॥
क्रत्वा दा अस्तु श्रेष्ठोऽद्य त्वा वन्वन्त्सुरेक्णाः। मर्त आनाश सुवृक्तिम् ॥२६॥
ते ते अग्ने त्वोता इषयन्तो विश्वमायुः। तरन्तो अर्यो अरातीर्वन्वन्तो अर्यो अरातीः ॥२७॥
अग्निस्तिग्मेन शोचिषा यासद्विश्वं न्य१त्रिणम्। अग्निर्नो वनते रयिम् ॥२८॥
सुवीरं रयिमा भर जातवेदो विचर्षणे। जहि रक्षांसि सुक्रतो ॥२९॥
त्वं नः पाह्यंहसो जातवेदो अघायतः। रक्षा णो ब्रह्मणस्कवे ॥३०॥
यो नो अग्ने दुरेव आ मर्तो वधाय दाशति। तस्मान्नः पाह्यंहसः ॥३१॥
त्वं तं देव जिह्वया परि बाधस्व दुष्कृतम्। मर्तो यो नो जिघांसति ॥३२॥
भरद्वाजाय सप्रथः शर्म यच्छ सहन्त्य। अग्ने वरेण्यं वसु ॥३३॥
अग्निर्वृत्राणि जंघनद् द्रविणस्युर्विपन्यया। समिद्धः शुक्र आहुतः ॥३४॥

गर्भे मातुः पितुष्पिता विदिद्युतानो अक्षरे। सीदन्नृतस्य योनिमा ॥३५॥
ब्रह्म प्रजावदा भर जातवेदो विचर्षणे। अग्ने यद्दीदयद्दिवि ॥३६॥
उप त्वा रण्वसंदृशं प्रयस्वन्तः सहसस्कृत। अग्ने ससृज्महे गिरः ॥३७॥
उप च्छायामिव घृणेरगन्म शर्म ते वयम्। अग्ने हिरण्यऽसंदृशः ॥३८॥
य उग्र इव शर्यहा तिग्मशृङ्गो न वंसगः। अग्ने पुरो रुरोजिथ ॥३९॥
आ यं हस्ते न खादिनं शिशुं जातं न बिभ्रति। विशामग्निं स्वध्वरम् ॥४०॥
प्र देवं देववीतये भरता वसुवित्तमम्। आ स्वे योनौ नि षीदतु ॥४१॥
आ जातं जातवेदसि प्रियं शिशीतातिथिम्। स्योन आ गृहपतिम् ॥४२॥
अग्ने युक्ष्वा हि ये त्वाश्वासो देव साधवः। अरं वहन्ति मन्यवे ॥४३॥
अच्छा नो याह्या वहाभि प्रयांसि वीतये। आ देवान्त्सोमपीतये ॥४४॥
उदग्ने भारत द्युमदजस्रेण दविद्युतत्। शोचा वि भाह्यजर ॥४५॥
वीति यो देवं मर्तो दुवस्येदग्निमीळीताध्वरे हविष्मान् ।
होतारं सत्ययजं रोदस्योरुत्तानहस्तो नमसा विवासेत् ॥४६॥
आ ते अग्न ऋचा हविर्हृदा तष्टं भरामसि। ते ते भवन्तूक्षण ऋषभासो वशा उत ॥४७॥
अग्निं देवासो अग्रियमिन्धते वृत्रहन्तमम्। येना वसून्याभृता तृळहा रक्षांसि वाजिना ॥४८॥

*tvamagne yajñānāṁ hotā viśveṣāṁ hitaḥ | devebhirmānuṣe jane ||1 ||*
*sa no mandrābhiradhvare jihvābhiryajā mahaḥ | ā devānvakṣi yakṣi cha ||2 ||*
*vetthā hi vedho adhvanaḥ pathaścha devāṁjasā | agne yajñeṣu sukrato ||3 ||*
*tvāmīḻe adha dvitā bharato vājibhiḥ śunam | īje yajñeṣu yajñiyam ||4 ||*
*tvamimā vāryā puru divodāsāya sunvate | bharadvājāya dāśuṣe ||5 ||*
*tvaṁ dūto amartya ā vahā daivyaṁ janam | śṛṇvanviprasya suṣṭutim ||6 ||*
*tvāmagne svādhyo3 martāso devavītaye | yajñeṣu devamīḻate ||7 ||*
*tava pra yakṣi saṁdṛśamuta kratuṁ sudānavaḥ | viśve juṣanta kāminaḥ ||8 ||*
*tvaṁ hotā manurhito vahniārāsā viduṣṭaraḥ | agne yakṣi divo viśaḥ ||9 ||*
*agna ā yāhi vītaye gṛṇāno havyadātaye | ni hotā satsi barhiṣi ||10 ||*
*taṁ tvā samidbhiraṁgiro ghṛtena vardhayāmasi | bṛhachchhochā yaviṣṭhya ||11 ||*
*sa naḥ pṛthu śravāyyamachchhā deva vivāsasi | bṛhadagne suvīryam ||12 ||*
*tvāmagne puṣkarādadhyatharvā niramanthata | mūrdhno viśvasya vāghataḥ ||13 ||*
*tamu tvā dadhyaṅṛṣiḥ putra īdhe atharvaṇaḥ | vṛtrahaṇaṁ purandaram ||14 ||*
*tamu tvā pāthyo vṛṣā samīdhe dasyuhantamam | dhanaṁjayaṁ raṇeraṇe ||15 ||*
*ehyū ṣu bravāṇi te'gna itthetarā giraḥ | ebhirvardhāsa indubhiḥ ||16 ||*
*yatra kva cha te mano dakṣaṁ dadhasa uttaram | tatrā sadaḥ kṛṇavase ||17 ||*
*nahi te pūrtamakṣipadbhuvannemānāṁ vaso | athā duvo vanavase ||18 ||*
*āgniragāmi bhārato vṛtrahā puruchetanaḥ | divodāsasya satpatiḥ ||19 ||*
*sa hi viśvāti pārthivā rayiṁ dāśanmahitvanā vanvannavāto astṛtaḥ ||20 ||*
*sa pratnavannavīyasāgne dyumnena saṁyatā | bṛhattatantha bhānunā ||21 ||*
*pra vaḥ sakhāyo agnaye stomaṁ yajñaṁ cha dhṛṣṇuyā | archa gāya cha vedhase ||22 ||*
*sa hi yo mānuṣā yugā sīdaddhotā kavikratuḥ | dūtaścha havyavāhanaḥ ||23 ||*
*tā rājānā śuchivratādityānmārutaṁ gaṇam | vaso yakṣīha rodasī ||24 ||*
*vasvī te agne saṁdṛṣṭiriṣayate partyāya | ūrjo napādamṛtasya ||25 ||*
*kratvā dā astu śreṣṭho'dya tvā vanvantsurekṇāḥ | marta ānāśa suvṛktim ||26 ||*
*te te agne tvotā iṣayanto viśvamāyuṁḥ | taranto aryo arātīrvanvanto aryo arātīḥ ||27 ||*
*agnistigmena śochiṣā yāsadviśvaṁ nya1triṇam | agnirno vanate rayim ||28 ||*
*suvīraṁ rayimā bhara jātavedo vicharṣaṇe | jahi rakṣāṁsi sukrato ||29 ||*
*tvaṁ naḥ pāhyaṁhaso jātavedo aghāyataḥ | rakṣā ṇo brahmaṇaskave ||30 ||*
*yo no agne dureva ā marto vadhāya dāśati | tasmānnaḥ pāhyaṁhasaḥ ||31 ||*
*tvaṁ taṁ deva jihvayā pari bādhasva duṣkutam | marto yo no jighāṁsati ||32 ||*
*bharadvājāya saprathaḥ śarbha yachchha sahantya | agne vareṇyaṁ vasu ||33 ||*
*agnivṛtrāṇi jaṁghanad draviṇasyurvipanyayā | samiddhaḥ śukra āhutaḥ ||34 ||*
*garbhe mātuḥ pituṣpitā vididyutāno akṣare | sīdannṛtasya yonimā ||35 ||*
*brahma prajāvadā bhara jātavedo vicharṣaṇe | agne yaddīdayaddivi ||36 ||*
*upa tvā raṇvasadṛṁśaṁ prayasvantaḥ sahasaskṛta | agne sasṛjmahe giraḥ ||37 ||*

*upa chchhāyāmiva ghṛṇeraganma śarma te vayam | agne hiraṇya'saṁdṛśaḥ ||38 ||*
*ya ugra iva śaryahā tigmaśṛṅgo na vaṁsagaḥ | agne puro rurojitha ||39 ||*
*ā yaṁ haste na khādinaṁ śiśuṁ jātaṁ na bibhrati | viśāmagiṁna svadhvaram ||40 ||*
*pra devaṁ devavītaye bharatā vasuvittamam | ā sve yonau ni ṣīdatu ||41 ||*
*ā jātaṁ jātavedasi priyaṁ śiśītātithim | syona ā gṛhapatim ||42 ||*
*agne yukṣavā hi ye tvāśvāso deva sādhavaḥ | araṁ vahanti manyave ||43 ||*
*achchhā no yāhyā vahābhi prayāṁsi vītaye | ā devāntsomapītaye ||44 ||*
*udagne bhārata dyumadajasreṇa davidyutat | śochā vi bhāhyajara ||45 ||*
*vīti yo devaṁ marto duvasyedagnimīḻītādhvare haviṣmān |*
*hotāraṁ satyayajaṁ rodasyoruttānahasto namasā vivāset ||46 ||*
*ā te agna ṛchā havirhṛdā taṣṭaṁ bharāmasi | te te bhavantūkṣaṇa ṛṣabhāso vaśā uta ||47 ||*
*agiṁna devāso agriyamindhate vṛtrahantamam |*
*yenā vasūnyābhṛtā tṛḻahā rakṣāṁsi vājinā ||48 ||*

सा. (Sv.) १-२

अग्न आ याहि वीतये गृणानो हव्यादातये। नि होता सत्सि बर्हिषि ॥१॥
त्वमग्ने यज्ञानां होता विश्वेषां हितः। देवेभिर्मानुषे जने ॥२॥
*agna ā yāhi vītaye gṛṇāno havyādātaye | ni hotā satsi barhiṣi ||1 ||*
*tvamagne yajñānāṁ hotā viśveṣāṁ hitaḥ | devebhirmānuṣe jane ||2 ||*

सा. (Sv.) ४

अग्निर्वृत्राणि जंघनद् द्रविणस्युर्विपन्यया। समिद्ध शुक्र आहुतः ॥४॥
*agnirvṛtrāṇi jaṁghanad draviṇasyurvipanyayā | samiddha śukra āhutaḥ ||4 ||*

सा. (Sv.) ७

एह्यू ब्रवाणि तेऽग्न इत्थेतरा गिरः। एभिर्वर्धास इन्दुभिः ॥७॥
*ehyū bravāṇi te'gna itthetarā giraḥ | ebhirvardhāsa indubhiḥ ||7 ||*

सा. (Sv.) ९

त्वामग्ने पुष्करादध्यथर्वा निरमन्थत। मूर्ध्नो विश्वस्य वाघतः ॥९॥
*tvāmagne puṣkarādadhyatharvā niramanthata | mūrdhno viśvasya vāghataḥ ||9 ||*

सा. (Sv.) २२

अग्निस्तिग्मेन शोचिषा यंसद्विश्वं न्य३त्रिणम्। अग्निर्नो वंसते रयिम् ॥२॥
*agnistigmena śochiṣā yaṁsadviśvaṁ nya3triṇam | agnirno vaṁsate rayim ||2 ||*

सा. (Sv.) २५

अग्ने युङ्क्ष्वा हि ये तवाश्वासो देव साधवः। अरं वहन्त्याशवः ॥५॥
*agne yuṅkṣavā hi ye tavāśvāso deva sādhavaḥ | araṁ vahantyāśavaḥ ||5 ||*

सा. (Sv.) ६७

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
कविं सम्राजमतिथिं जनानामासन्नः पात्रं जनयन्त देवाः ॥५॥
*mūrdhānaṁ divo aratiṁ pṛthivyā vaiśvānaramṛta ā jātamagnim |*
*kaviṁ samrājamatithiṁ janānāmāsannaḥ pātraṁ janayanta devāḥ ||5 ||*

सा. (Sv.) ६८

वि त्वदापो न पर्वतस्य पृष्ठादुक्थेभिरग्ने जनयन्त देवाः ।
तं त्वा गिरः सुष्टुतयो वाजयन्त्याजिं न गिर्ववाहो जिग्युरश्वाः ॥६॥
*vi tvadāpo na parvatasya pṛṣṭhādukthebhiragne janayanta devāḥ |*
*taṁ tvā giraḥ suṣṭutayo vājayantyājiṁ na girvavāho jigyuraśvāḥ ||6 ||*

सा. (Sv.) ८३-८४

त्वेषस्ते धूम ऋण्वति दिवि संछुक्र आततः। सूरो न हि द्युता त्वं कृपा पावक रोचसे ॥३॥
त्वं हि क्षैतवद्यशोऽग्ने मित्रो न पत्यसे। त्वं विचर्षणे श्रवो वसो पुष्टिं न पुष्यसि ॥४॥
*tveṣaste dhūma ṛṇvati divi saṁchhukra ātataḥ |*
*sūro na hi dyutā tvaṁ kṛpā pāvaka rochase ||3 ||*
*tvaṁ hi kṣaitavadyaśo'gne mitro na patyase |*

*tvaṁ vicharṣaṇe śravo vaseā puṣṭiṁ na puṣyasi ॥4 ॥*

सा. (Sv.) ६६०-६६२

अग्न आ याहि वीतये गृणानो हव्यदातये। नि होता सत्सि बर्हिषि ॥१॥
तं त्वा समिद्भिरंगिरो घृतेन वर्धयामसि। बृहच्छोचा यविष्ठ्य ॥२॥
स नः पृथु श्रवाय्यमच्छा देव विवाससि। बृहदग्ने सुवीर्यम् ॥३॥
*agna ā yāhi vītaye gṛṇāno havyadātaye । ni hotā satsi barhiṣi ॥1 ॥*
*taṁ tvā samidbhiraṁgiro ghṛtena vardhayāmasi । bṛhachchhochā yaviṣṭhya ॥2 ॥*
*sa naḥ pṛthu śravāyyamachchhā deva vivāsasi । bṛhadagne suvīryam ॥3 ॥*

सा. (Sv.) ७०५-७०७

एह्यू षु ब्रवाणि तेऽग्न इत्थेतरा गिरः। एभिर्वर्धास इन्दुभिः ॥१॥
यत्र क्व च ते मनो दक्षं दधस उत्तरम्। तत्र योर्नि कृणवसे ॥२॥
न हि ते पूर्तमक्षिपद्भुवन्नेमानां पते। अथा दुवो वनवसे ॥३॥
*ehyū ṣu bravāṇi te'gna itthetarā giraḥ । ebhirvardhāsa indubhiḥ ॥1 ॥*
*yatra kva cha te mano dakṣaṁ dadhasa uttaram । tatra yorniṁ kṛṇavase ॥2 ॥*
*na hi te pūrtamakṣipadbhuvannemānāṁ pate । athā duvo vanavase ॥3 ॥*

सा. (Sv.) १३८३-१३८५

अग्ने युङ्वा हि ये तवाश्वासो देव साधवः। अरं वहन्त्याशवः ॥१॥
अच्छा नो याह्या वहाभि प्रयांसि वीतये। आ देवान्त्सोमपीतये ॥२॥
उदग्ने भारत द्युमदजस्रेण दविद्युतत्। शोचा वि भाह्यजर ॥३॥
*agne yuṅavā hi ye tavāśvāso deva sādhavaḥ । araṁ vahantyāśavaḥ ॥1 ॥*
*achchhā no yāhyā vahābhi prayāṁsi vītaye । ā devāntsomapītaye ॥2 ॥*
*udagne bhārata dyumadajasreṇa davidyutat । śochā vi bhāhyajara ॥3 ॥*

सा. (Sv.) १३९६-१३९८

अग्निर्वृत्राणि जंघनद्द्रविणस्युर्विपन्यया। समिद्धः शुक्र आहुतः ॥१॥
गर्भे मातुः पितुः पिता विदिद्युतानो अक्षरे। सीदन्नृतस्य योनिमा ॥२॥
ब्रह्म प्रजावदा भर जातवेदो विचर्षणे। अग्ने यद्दीदयद्दिवि ॥३॥
*agnirvṛtrāṇi jaṁghanaddraviṇasyurvipanyayā । samiddhaḥ śukra āhutaḥ ॥1 ॥*
*garbhe mātuḥ pituḥ pitā vididyutāno akṣare । sīdannṛtasya yonimā ॥2 ॥*
*brahma prajāvadā bhara jātavedo vicharṣaṇe । agne yaddīdayaddivi ॥3 ॥*

सा. (Sv.) १४७४-१४७६

त्वमग्ने यज्ञानां होता विश्वेषं हितः। देवेभिर्मानुषे जने ॥१॥
स नो मन्द्राभिरध्वरे जिह्वाभिर्यजा महः आ देवान्वक्षि यक्षि च ॥२॥
वेत्या हि वेधो अध्वनः पथश्च देवांजसा। अग्ने यज्ञेषु सुक्रतो ॥३॥
*tvamagne yajñānāṁ hotā viśveṣaṁ hitaḥ । devebhirmānuṣe jane ॥1 ॥*
*sa no mandrābhiradhvare jihvābhiryajā mahaḥ ā devānvakṣi yakṣi cha ॥2 ॥*
*vetyā hi vedho adhvanaḥ pathaścha devāṁjasā । agne yajñeṣu sukrato ॥3 ॥*

सा. (Sv.) १७०५-१७०७

उप त्वा रण्वसंदृशं प्रयस्वन्तः सहस्कृत। अग्ने ससृज्महे गिरः ॥१॥
उप च्छायामिव घृणेरगन्म शर्म ते वयम्। अग्ने हिरण्यसंदृशः ॥२॥
य उग्र इव शर्यहा तिग्मशृंगो न वंसगः। अग्ने पुरो रुरोजिथ ॥३॥
*upa tvā raṇvasaṁdṛśaṁ prayasvantaḥ sahaskṛta । agne sasṛjmahe giraḥ ॥1 ॥*
*upa chchhāyāmiva ghṛṇeraganma śarma te vayam । agne hiraṇyasaṁdṛśaḥ ॥2 ॥*
*ya ugra iva śaryahā tigmaśṛṁgo na vaṁsagaḥ । agne puro rurojitha ॥3 ॥*

२. अभ्यावर्ति नश्चायमानस्य दानस्तुतिः (Abhyāvarti Naśchāyamānasya Dānastutiḥ) - ऋ. (Rv.) ६.२७.८

द्वयाँ अग्ने रथिनो विंशतिं गा वधूमतो मघवा मह्यं सम्राट् ।
अभ्यावर्ती चायमानो ददाति दूणशेयं दक्षिणा पार्थवानाम् ॥८॥
*dvayām̐ agne rathino viṁśatiṁ gā vadhūmato maghavā mahyaṁ samrāṭ ।*

*abhyāvartī chāyamāno dadāti dūṇaśeyaṁ dakṣiṇā pārthavānām //8 //*

३. अश्विनौ (Aśvinau) - ऋ. (Rv.) ६.६२.१-११; ६.६३.१-११

ऋ. (Rv.) ६.६२.१-११

स्तुषे नरा दिवो अस्य प्रसन्ताश्विना हुवे जुरमाणो अर्कैः ।
या सद्य उस्रा व्युषि ज्मो अन्तान्युयूषतः पर्युरू वरांसि ॥१॥
ता यज्ञमा शुचिभिश्चक्रमाणा रथस्य भानुं रुरुचू रजोभिः ।
पुरू वरांस्यमिता मिमानापो धन्वान्यति याथो अज्रान् ॥२॥
ता ह त्यद्वर्तिर्यदरध्रमुग्रेत्था धिय ऊहथुः शश्वदश्वैः ।
मनोजवेभिरिषिरैः शयध्यै परि व्यथिर्दाशुषो मर्त्यस्य ॥३॥
ता नव्यसो जरमाणस्य मन्मोप भूषतो युयुजानसप्ती ।
शुभं पृक्षमिषमूर्जं वहन्ता होता यक्षत्प्रत्नो अध्रुग् युवाना ॥४॥
ता वल्गू दस्रा पुरुशाकतमा प्रत्ना नव्यसा वचसा विवासे ।
या शंसते स्तुवते शंभविष्ठा बभूवतुर्गृणते चित्रराती ॥५॥
ता भुजयुं विभिदद्भ्यः समुद्रात्तुग्रस्य सूनुमूहथू रजोभिः ।
अरेणुभिर्योजनोभिर्भुजन्ता पतत्रिभिरर्णसो निरुपस्थात् ॥६॥
वि जयुषा रथ्या यातमद्रिं श्रुतं हवं वृषणा वध्रिमत्याः ।
दशस्यन्ता शयवे पिप्यथुर्गामिति च्यवाना सुमतिं भुरण्यू ॥७॥
यद्रोदसी प्रदिवो अस्ति भूमा हेळो देवानामुत मर्त्यत्रा ।
तदादित्या वसवो रुद्रियासो रक्षोयुजे तपुरघं दधात ॥८॥
य ईं राजानावृतुथा विदधद्रजसो मित्रो वरुणश्चिकेतत् ।
गम्भीराय रक्षसे हेतिमस्यद्रोघाय चिद्वचस आनवाय ॥९॥
अन्तरैश्चक्रैस्तनयाय वर्तिर्द्युमता यातं नृवता रथेन ।
सनुत्येन त्यजसा मर्त्यस्य वनुष्यतामपि शीर्षा ववृक्तम् ॥१०॥
आ परमाभिरुत मध्यमाभिर्नियुद्भिर्यातमवमाभिरर्वाक् ।
दृळहस्य चिद् गामतो वि व्रजस्य दुरो वर्तं गृणते चित्रराती ॥११॥

*stuṣe narā divo asya prasantāśvinā huve juramāṇo arkaiḥ /*
*yā sadya usrā vyuṣi jmo antānyuyūṣataḥ paryurū varāṁsi //1 //*
*tā yajñamā śuchibhiśchakramāṇā sthasya bhānuṁ ruruchū rajobhiḥ /*
*purū varāṁsyamitā mimānāpo dhanvānyati yātho ajrān //2 //*
*tā ha tyadvartiryadaradhramugretthā dhiya ūhathuḥ śaśvadaśvaiḥ /*
*manojavebhiriṣaraiḥ śayadhyai pari vyathirdāśuṣo martyasya //3 //*
*tā navyaso jaramāṇasya manmopa bhūṣato yuyujānasaptī /*
*śubhaṁ pṛkṣamiṣamūrjaṁ vahantā hotā yakṣatpratno adhrug yuvānā //4 //*
*tā valgū dasrā puruṣākatamā pratnā navyasā vachasā vivāse /*
*yā śaṁsate stuvate śaṁbhaviṣṭhā babhūvaturgṛṇate chitrarātī //5 //*
*tā bhujayuṁ vibhidadbhyaḥ samudrāttugrasya sūnumūhathū rajobhiḥ /*
*areṇubhiryojanobhirbhujantā patatribhirarṇaso nirupasthāt //6 //*
*vi jayuṣā rathyā yātamidraṁ śrutaṁ havaṁ vṛṣaṇā vadhrimatyāḥ /*
*daśasyantā śayave pipyathurgāmiti chyavānā sumatiṁ bhuraṇyū //7 //*
*yadrodasī pradivo asti bhūmā heḻo devānāmuta martyatrā /*
*tadādityā vasavo rudriyāso rakṣoyuje tapuraghaṁ dadhāta //8 //*
*ya īṁ rājānāvṛtuthā vidadhadrajaso mitro varuṇaśchiketat /*
*gambhīrāya rakṣase hetimasyadroghāya chidvachasa ānavāya //9 //*
*antaraiśchakrastanayāya vartirdyumatā yātaṁ nṛvatā rathena /*
*sanutyena tyajasā martyasya vanuṣyatāmapi śīrṣā vavṛktam //10 //*
*ā paramābhiruta madhyābhirniyudbhiryātamavamābhirarvāk /*
*dṛḻahasya chid gāmato vi vrajasya duro vartaṁ gṛṇate chitrarātī //11 //*

ऋ. (Rv.) ६.६३.१-११

क्व१त्या वल्गू पुरुहूताद्य दूतो न स्तोमोऽविदन्नमस्वान् ।
आ यो अर्वाङ् नासत्या ववर्त प्रेष्ठा ह्यसथो अस्य मनम् ॥१॥

अरं मे गन्तं हवनायास्मै गृणाना यथा पिबाथो बन्धः ।
परि ह त्यद्वतिर्याथो रिषो न यत्परो नान्तरस्तुतुर्यात् ॥२॥
अकारि वामन्धसो वरीमन्नस्तारि बर्हिः सुप्रायणतमम् ।
उत्तानहस्तो युवयुर्ववन्दा वां नक्षन्तो अद्रय आंजन् ॥३॥
ऊर्ध्वो वामग्निरध्वरेष्वस्थात्प्र रातिरेति जूर्णिनी घृताची ।
प्र होता गूर्तमना उराणोऽयुक्त यो नासत्या हवीमन् ॥४॥
अधि श्रियै दुहिता सूर्यस्य रथं तस्थौ पुरुभुजा शतोतिम् ।
प्र मायाभिर्मायिना भूतमत्र नरा नृतू जनिमन्यज्ञियानाम् ॥५॥
युवं श्रीभिर्दर्शताभिराभिः शुभे पुष्टिमूहथुः सूर्यायाः ।
प्र वां वयो वपुषेऽनु पप्तन्नक्षद्वाणी सुष्टुता धिष्ण्या वाम् ॥६॥
आ वां वयोऽश्वासो वहिष्ठा अभि प्रयो नासत्या वहन्तु ।
प्र वां रथो मनोजवा असर्जीषः पृक्ष इषिधो अनु पूर्वीः ॥७॥
पुरु हि वां पुरुभुजा देष्णं धेनुं न इषं पिन्वतमसक्राम् ।
स्तुतश्च वां माध्वी सुष्टुतिश्च रसाश्च ये वामनु रातिमग्मन् ॥८॥
उत म ऋज्रे पुरयस्य रध्वी सुमीळ्हे शतं पेरुके च पक्वा ।
शाण्डो दाद्धिरणिनः स्मद्दिष्टीन् दश वशासो अभिषाच ऋष्वान् ॥९॥
सं वां शता नासत्या सहस्राश्वानां पुरुपन्था गिरे दात् ।
भरद्वाजाय वीर नू गिरे दाद्धता रक्षांसि पुरुदंससा स्युः ॥१०॥
आ वां सुम्ने वरिमन्त्सूरिभिः ष्याम् ॥११॥

*kva1tyā valgū puruhūtādya dūto na stomo'vidannamasvān* ।
*ā yo arvāṁ nāsatyā vavarta preṣṭhā hyasatho asya manam* ॥1॥
*araṁ me gantaṁ havanāyāsmai gṛṇānā yathā pibātho bandhaḥ* ।
*pari ha tyadvatiryātho riṣo na yatparo nāntarastuturyāt* ॥2॥
*akāri vāmandhaso varīmannastāri barhiḥ suprāyaṇatamam* ।
*uttānahasto yuvayurvavandā vāṁ nakṣanto adraya āṁjan* ॥3॥
*ūrdhvo vāmagniradhvareṣvasthātpra rātireti jūrṇinī ghṛtāchī* ।
*pra hotā gūrtamanā urāṇo'yukta yo nāsatyā havīman* ॥4॥
*adhi śriyai duhitā sūryasya rathaṁ tasthau purubhujā śatotim* ।
*pra māyābhirmāyinā bhūtamatra narā nṛtū janimanyajñiyānām* ॥5॥
*yuvaṁ śrībhirdaśatābhirābhiḥ śubhe puṣṭimūhathuḥ sūryāyāḥ* ।
*pra vāṁ vayo vapuṣe'nu paptannakṣadvāṇī suṣṭutā dhiṣṇyā vām* ॥6॥
*ā vāṁ vayo'śvāso vahiṣṭhā abhi prayo nāsatyā vahantu* ।
*pra vāṁ ratho manojavā asarjīṣaḥ pṛkṣa iṣidho anu pūrvīḥ* ॥7॥
*puru hi vāṁ purubhujā deṣṇaṁ dhenuṁ na iṣaṁ pinvatamasakrām* ।
*stutaścha vāṁ mādhvī suṣṭutiścha rasāścha ye vāmanu rātimagman* ॥8॥
*uta ma ṛjre purayasya radhvī sumīḷahe śataṁ peruke cha pakvā* ।
*śāṇḍo dāddhiraṇinaḥ smaddiṣṭīn daśa vaśāso abhiṣācha ṛṣvān* ॥9॥
*saṁ vāṁ śatā nāsatyā sahasrāśvānāṁ purupanthā gire dāt* ।
*bharadvājāya vīra nū gire dāddhatā rakṣāṁsi purudaṁsasā syuḥ* ॥10॥
*ā vāṁ sumne varimantsūribhiḥ ṣyām* ॥11॥

४. इन्द्रः (Indraḥ) - ऋ. (Rv.) ६.१७.१-१५; ६.१८.१-१५; ६.१९.१-१३; ६.२०.१-१३; ६.२१ १-१२; ६.२२.१-११; ६.२३.१-१०; ६.२४.१-१०; ६.२५.१-९; ६.२६.१-८; ६.२७.१-७; ६.२९.१-६; ६.३०.१-५; ६.३७.१-५; ६.३८.१-५; ६.३९.१-५; ६.४०.१-५; ६.४१.१-५ ; ६.४२.१-४; ६.४३.१-४; सा. (Sv.) ३५२; ३९२; ११४०-११४२; ११४९-११५१; १४४०-१४४३

ऋ. (Rv.) ६.१७.१-१५

पिबा सोममभि यमुग्र तर्द ऊर्वं गव्यं महि गृणान इन्द्र ।
वि यो धृष्णो वधिषो वज्रहस्त विश्वा वृत्रमित्रिया शवोभिः ॥१॥
स ईं पाहि य ऋजीषी तरुत्रो यः शिप्रवान् वृषभो यो मतीनाम् ।
यो गोत्रभिद्वज्रभृद्यो हरिष्ठाः स इन्द्र चित्राँ अभि तृन्धि वाजान् ॥२॥

एवा पाहि प्रत्नथा मन्दतु त्वा श्रुधि ब्रह्म वावृधस्वोत गीर्भिः ।
आविः सूर्यं कृणुहि पीपिहीषो जहि शत्रूँरभि गा इन्द्र तृन्धि ॥३॥
ते त्वा मदा बृहदिन्द्र स्वधाव इमे पीता उक्षयन्त द्युमन्तम् ।
महामनूनं तवसं विभूतिं मत्सरासो जर्हृषन्त प्रसाहम् ॥४॥
येभिः सूर्यमुषसं मन्दसानोऽवासयोऽप हळहानि दर्द्रत् ।
महामद्रिं परि गा इन्द्र सन्तं नुत्था अच्युतं सदसस्परि स्वात् ॥५॥
तव क्रत्वा तव तद्दंसनाभिरामासु पक्वं शच्या नि दीधः ।
और्णोर्दुर उस्रियाभ्यो वि दृळहोदूर्वाद् गा असृजो अंगिरस्वान् ॥६॥
पप्राथ क्षां महि दंसो व्यु१र्वीमुप द्यामृष्वो बृहदिन्द्र स्तभायः ।
अधारयो रोदसी देवपुत्रे प्रत्ने मातरा यह्वी ऋतस्य ॥७॥
अध त्वा विश्वे पुर इन्द्र देवा एकं तवसं दधिरे भराय ।
अदेवो यदभ्यौहिष्ट देवान्त्स्वर्षाता वृणत इन्द्रमत्र ॥८॥
अध द्यौश्चित्ते अप सा नु वज्राद् द्वितानमद्भियसास्वस्य मन्योः ।
अहिं यदिन्द्रो अभ्योहसानं नि चिद्विश्वायुः शयथे जघान ॥९॥
अध त्वष्टा ते मह उग्र वज्रं सहस्रभृष्टिं ववृतच्छताश्रिम् ।
निकाममरमणसं येन नवन्तमहिं सं पिणगृजीषिन् ॥१०॥
वर्धान्यं विश्वे मरुतः सजोषाः पचच्छतं महिषाँ इन्द्र तुभ्यम् ।
पूषा विष्णुस्त्रीणि सरांसि धावन्वृत्रहणं मदिरमंशुमस्मै ॥११॥
आ क्षोदो महि वृतं नदीनां परिष्ठितमसृज ऊर्मिमपाम् ।
तासामनु प्रवत इन्द्र पन्थां प्रार्दयो नीचीरपसः समुद्रम् ॥१२॥
एवा ता विश्वा चकृवांसमिन्द्रं महामुग्रमजुर्यं सहोदाम् ।
सुवीरं त्वा स्वायुधं सुवज्रमा ब्रह्म नव्यमवसे ववृत्यात् ॥१३॥
स नो वाजाय श्रवस इषे च राये धेहि द्युमत इन्द्र विप्रान् ।
भरद्वाजे नृवत इन्द्र सूरीन्दिवि च स्मैधि पार्ये न इन्द्र ॥१४॥
अया वाजं देवहितं सनेम मदेम शतहिमाः सुवीराः ॥१५॥

*pibā somamabhi yamugra tarda ūrvaṁ gavyaṁ mahi gṛṇāna indra /*
*vi yo dhṛṣṇo vadhiṣo vajrahasta viśvā vṛtramitriyā śavobhiḥ //1 //*
*sa īṁ pāhi ya ṛjīṣī tarutro yaḥ śipravān vṛṣabho yo matīnām /*
*yo gotrabhidvajrabhṛdyo hariṣṭhāḥ sa indra chitrām̐ abhi tṛndhi vājān //2 //*
*evā pāhi pratnathā mandatu tvā śrudhi brahma vāvṛdhasvota gīrbhiḥ /*
*āviḥ sūryaṁ kṛṇuhi pīpihīṣo jahi śatrūm̐rabhi gā indra tṛndhi //3 //*
*te tvā madā bṛhadindra svadhāva ime pītā ukṣayanta dyumantam /*
*mahāmanūnaṁ tavasaṁ vibhūtiṁ matsarāso jarhṛṣanta prasāham //4 //*
*yebhiḥ sūryamuṣasaṁ mandasāno'vāsayo'pa haḷahāni dardrat /*
*mahāmadriṁ pari gā indra santaṁ nutthā achyutaṁ sadasaspari svāt //5 //*
*tava kratvā tava taddaṁsanābhirāmāsu pakvaṁ śachyā ni dīdhaḥ /*
*aurṇordura usriyābhyo vi dṛḷahodūrvād gā asṛjo aṁgirasvān //6 //*
*paprātha kṣāṁ mahi daṁso vyu1rvīmupa dyāmṛṣvo bṛhadindra stabhāyaḥ /*
*adhārayo rodasī devaputre pratne mātarā yahvī ṛtasya //7 //*
*adha tvā viśve pura indra devā ekaṁ tavasaṁ dadhire bharāya /*
*adevo yadabhyauhiṣṭa devāntsvarṣātā vṛṇata indramatra //8 //*
*adha dyauśchitte apa sā nu vajrād dvitānamadbhiyasāsvasya manyoḥ /*
*ahiṁ yadindro abhyohasānaṁ ni chidviśvāyuḥ śayathe jaghāna //9 //*
*adha tvaṣṭā te maha ugra vajraṁ sahasrabhṛṣṭiṁ vavṛtachchhatāśrim /*
*nikāmamaramaṇasaṁ yena navantamahiṁ saṁ piṇagṛjīṣin //10 //*
*vardhānyaṁ viśve marutaḥ sajoṣāḥ pachachchhataṁ mahiṣām̐ indra tubhyam /*
*pūṣā viṣṇustrīṇi sarāṁsi dhāvanvṛtrahaṇaṁ madiramaṁśumasmai //11 //*
*ā kṣodo mahi vṛtaṁ nadīnāṁ pariṣṭhitamasṛja ūrmimapām /*
*tāsāmanu pravata indra panthāṁ prārdayo nīchīrapasaḥ samudram //12 //*
*evā tā viśvā chakṛvāṁsamindraṁ mahāmugramajuryaṁ sahodām /*
*suvīraṁ tvā svāyudhaṁ suvajramā brahma navyamavase vavṛtyāt //13 //*

*sa no vājāya śravasa iṣe cha rāye dhehi dyumata indra viprān* ।
*bharadvāje nṛvata indra sūrīndivi cha smaidhi pārye na indra* ॥14॥
*ayā vājaṁ devahitaṁ sanema madema śatahimāḥ suvīrāḥ* ॥15॥

ऋ. (Rv.) ६.१८.१-१५

तमु ष्टुहि यो अभियूत्योजा वन्वन्नवातः पुरुहूत इन्द्रः ।
अषाळहमुग्रं सहमानमाभिर्गीर्भिर्वर्ध वृषभं चर्षणीनाम् ॥१॥
स युध्मः सत्वा खजकृत्समद्वा तुविम्रक्षो नदनुमाँ ऋजीषी ।
बृहद्रेणुश्च्यवनो मानुषीणामेकः कृष्टीनामभवत्सहावा ॥२॥
त्वं ह नु त्यददमायो दस्यूँरेकः कृष्टीरवनोरार्याय ।
अस्ति स्विन्नु वीर्यं१ तत्त इन्द्र न स्विदस्ति तदृतुथा वि वोचः ॥३॥
सदिद्धि ते तुविजातस्य मन्ये सहः सहिष्ठ तुरतस्तुरस्य ।
उग्रमुग्रस्य तवसस्तवीयोऽरध्रस्य रध्रतुरो बभूव ॥४॥
तन्नः प्रत्नं सख्यमस्तु युष्मे इत्था वदद्भिर्वलमंगिरोभिः ।
हन्नच्युतच्युद्दस्मेषयन्तमृणोः पुरो वि दुरो अस्य विश्वाः ॥५॥
स हि धीर्भिर्हव्यो अस्त्युग्र ईशानकृन्महति वृत्रतूर्ये ।
स तोकसाता तनये स वज्री वितन्तसाय्यो अभवत्समत्सु ॥६॥
स मज्मना जनिम मानुषाणाममर्त्येन नाम्नाति प्र सर्स्रे ।
स द्युम्नेन स शवसोत राया स वीर्येण नृतमः समोकाः ॥७॥
स यो न मुहे न मिथू जनो भूत्सुमन्तुनामा चुमुरिं धुनिं च ।
वृणक्पिप्रुं शम्बरं शुष्णमिन्द्रः पुरां च्यौत्नाय शयथाय नू चित् ॥८॥
उदावता त्वक्षसा पन्यसा च वृत्रहत्याय रथमिन्द्र तिष्ठ ।
धिष्व वज्रं हस्त आ दक्षिणत्राभि प्र मन्द पुरुदत्र मायाः ॥९॥
अग्निर्न शुष्कं वनमिन्द्र हेती रक्षो नि धक्ष्यशनिर्न भीमा ।
गम्भीरय ऋष्वया यो रुरोजाध्वानयद् दुरिता दम्भयच्च ॥१०॥
आ सहस्रं पथिभिरिन्द्र राया तुविद्युम्न तुविवाजेभिरर्वाक् ।
याहि सूनो सहसो यस्य नू चिददेव ईशे पुरुहूत योतोः ॥११॥
प्र तुविद्युम्नस्य स्थविरस्य घृष्वेर्दिवो ररप्शे महिमा पृथिव्याः ।
नास्य शत्रुर्न प्रतिमानमस्ति न प्रतिष्ठिः पुरुमायस्य सह्योः ॥१२॥
प्र तत्ते अद्या करणं कृतं भूत्कुत्सं यदायुमतिथिग्वमस्मै ।
पुरू सहस्रा नि शिशा अभि क्षामुत्तूर्वयाणं धृषता निनेथ ॥१३॥
अनु त्वाहिघ्ने अध देव देवा मदन्विश्वे कवितमं कवीनाम् ।
करो यत्र वरिवो बाधिताय दिवे जनाय तन्वे गृणानः ॥१४॥
अनु द्यावापृथिवी तत्त ओजोऽमर्त्या जिहत इन्द्र देवाः ।
कृष्वा कृत्नो अकृतं यत्ते अस्त्युक्थं नवीयो जनयस्व यज्ञैः ॥१५॥

*tamu ṣṭuhi yeā abhiyūtyojā vanvannavātaḥ puruhūta indraḥ* ।
*aṣāḷahamugraṁ sahamānamābhirgīrbhirvardha vṛṣabhaṁ charṣaṇīnām* ॥1॥
*sa yudhmaḥ satvā khajakṛtsamadvā tuvimrakṣo nadanumām̐ ṛjīṣī* ।
*bṛhadreṇuśchyavano mānuṣīṇāmekaḥ kṛṣṭīnāmabhavatsahāvā* ॥2॥
*tvaṁ ha nu tyadadamāyo dasyūm̐rekaḥ kṛṣṭīravanorāryāya* ।
*asti svinnu vīryaṁ1 tatta indra na svidasti tadṛtuthā vi vochaḥ* ॥3॥
*sadiddhi te tuvijātasya manye sahaḥ sahiṣṭha turatasturasya* ।
*ugramugrasya tavasastavīyo'radhrasya radhraturo babhūva* ॥4॥
*tannaḥ pratnaṁ sakhyamastu yuṣme itthā vadadbhirvalamaṁgirobhiḥ* ।
*hannachyutachyuddasmeṣayantamṛṇoḥ puro vi duro asya viśvāḥ* ॥5॥
*sa hi dhīrbhirhavyo astyugra īśānakṛnmahati vṛtratūrye* ।
*sa tokasātā tanaye sa vajrī vitantasāyyo abhavatsamatsu* ॥6॥
*sa majmanā janima mānuṣāṇāmamartyena nāmnāti pra sarsre* ।
*sa dyumnena sa śavasota rāyā sa vīryeṇa nṛtamaḥ samokāḥ* ॥7॥
*sa yo na muhe na mithū jano bhūtsūmantunāmā chumuriṁ dhuniṁ cha* ।
*vṛṇakpipruṁ śambaraṁ śuṣṇamindraḥ purāṁ chyautnāya śayathāya nū chit* ॥8॥

*udāvatā tvakṣasā panyasā cha vṛtrahatyāya rathamindra tiṣṭha* ।
*dhiṣva vajraṁ hasta ā dakṣiṇatrābhi pra manda purudatra māyāḥ* ॥9॥
*agnirna śuṣkaṁ vanamindra hetī rakṣo ni dhakṣayaśanirna bhīmā* ।
*gambhīraya ṛṣvayā yo rurojādhvānayad duritā dambhayachcha* ॥10॥
*ā sahasraṁ pathibhirindra rāyā tuvidyumna tuvivājebhirarvāk* ।
*yāhi sūno sahaso yasya nū chidadeva īśe puruhūta yotoḥ* ॥11॥
*pra tuvidyumnasya sthavirasya ghṛṣverdivo rarapśe mahimā pṛthivyāḥ* ।
*nāsya śatrurna pratimānamasti na pratiṣṭhiḥ purumāyasya sahyoḥ* ॥12॥
*pra tatte adyā karaṇaṁ kṛtaṁ bhūtkutsaṁ yadāyumatithigvamasmai* ।
*purū sahasrā ni śiśā abhi kṣāmuttūrvayāṇaṁ dhṛṣatā ninetha* ॥13॥
*anu tvāhighne adha rdeva devā madanviśve kavitamaṁ kavīnām* ।
*karo yatra varivo bādhitāya dive janāya tanve gṛṇānaḥ* ॥14॥
*anu dyāvāpṛthivī tatta ojo'martyā jihata indra devāḥ* ।
*kṛṣvā kṛtno akṛtaṁ yatte astyukthaṁ navīyo janayasva yajñaiḥ* ॥15॥

ऋ. (Rv.) ६.१९.१-१३

महाँ इन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः ।
अस्मद्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत् ॥१॥
इन्द्रमेव धिषणा सातये धाद् बृहन्तमृष्वमजरं युवानाम् ।
अषाळहेन शवसा शूशुवासं सद्यश्चिद्यो वावृधे असामि ॥२॥
पृथू करस्ना बहुला गभस्ती अस्मद्र्य१क्सं मिमीहि श्रवांसि ।
यूथेव पश्वः पशुपा दमूना अस्माँ इन्द्राभ्या ववृत्स्वाजौ ॥३॥
तं व इन्द्रं चतिनमस्य शाकैरिह नूनं वाजयन्तो हुवेम ।
यथा चित्पूर्व जरितार आसुरनेद्या अनवद्या अरिष्टाः ॥४॥
धृतव्रतो धनदाः सोमवृद्धः स हि वामस्य वसुनः पुरुक्षुः ।
स जग्मिरे पथ्या१ रायो अस्मिन्त्समुद्रे न सिन्धवो यादमानाः ॥५॥
शविष्ठं न आ भर शूर शव ओजिष्ठमोजो अभिभूत उग्रम् ।
विश्व द्युम्ना वृष्ण्या मानुषाणामस्मभ्यं दा हरिवो मादयध्यै ॥६॥
यस्ते मदः पृतनाषाळमृध्र इन्द्र तं न आ भर शूशुवांसम् ।
येन तोकस्य तनयस्य सातौ मंसीमहि जिगीवांसस्त्वोताः ॥७॥
आ नो भर वृषणं शुष्ममिन्द्र धनस्पृतं शूशुवांसं सुदक्षम् ।
येन वंसाम पृतनासु शत्रून्तवोतिभिरुत जामीँरजामीन् ॥८॥
आ ते शुष्मो वृषभ एतु पश्चादोत्तरादधरादा पुरस्तात् ।
आ विश्वतो अभि समेत्वर्वाङिन्द्र द्युम्नं स्वर्वद्धेह्यस्मे ॥९॥
नृवत्त इन्द्र नृतमाभिरूती वंसीमहि वामं श्रोमतेभिः ।
ईक्षे हि वस्व उभयस्य राजन्धा रत्नं महि स्थूरं बृहन्तम् ॥१०॥
मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यं शासमिन्द्रम् ।
विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम ॥११॥
जनं वज्रिन्महि चिन्मन्यमानमेभ्यो नृभ्यो रन्धया येष्वस्मि ।
अधा हि त्वा पृथिव्यां शूरसातौ हवामहे तनये गोष्वप्सु ॥१२॥
वयं त एभिः पुरुहूत सख्यैः शत्रोः शत्रोरुत्तर इत्स्याम ।
घ्नन्तो वृत्राण्युभयानि शूर राया मदेम बृहता त्वोताः ॥१३॥

*mahām̐ indro nṛvadā charṣaṇiprā uta dvibarhā aminaḥ sahobhiḥ* ।
*asmadryagvāvṛdhe vīryāyoruḥ pṛthuḥ sukṛtaḥ kartṛbhirbhūt* ॥1॥
*indrameva dhiṣaṇā sātaye dhād bṛhantamṛṣvamajaraṁ yuvānām* ।
*aṣāḷahena śavasā śūśuvāsaṁ sadyaśchidyo vāvṛdhe asāmi* ॥2॥
*pṛthū karasnā bahulā gabhastī asmadrya1ksaṁ mimīhi śravāṁsi* ।
*yūtheva paśvaḥ paśupā damūnā asmām̐ indrābhyā vavṛtsvājau* ॥3॥
*taṁ va indraṁ chatinamasya śākairiha nūnaṁ vājayanto huvema* ।
*yathā chitpūrva jaritāra āsuranedyā anavadyā ariṣṭāḥ* ॥4॥
*dhṛtavrato dhanadāḥ somavṛddhaḥ sa hi vāmasya vasunaḥ pṛrukṣuḥ* ।

*sa jagmire pathyā1 rāyo asmintsamudre na sindhavo yādamānāḥ ॥5॥*
*śaviṣṭhaṁ na ā bhara śūra śava ojiṣṭhamojo abhibhūta ugram ।*
*viśva dyumnā vṛṣṇyā mānuṣāṇāmasmabhyaṁ dā harivo mādayadhyai ॥6॥*
*yaste madaḥ pṛtanāṣāḻamṛdhra indra taṁ na ā bhara śūśuvāṁsam ।*
*yena tokasya tanayasya sātau maṁsīmahi jigīvāṁsastvotāḥ ॥7॥*
*ā no bhara vṛṣaṇaṁ śuṣmamindra dhanaspṛtaṁ śūśuvāṁsaṁ sudakṣam ।*
*yena vaṁsāma pṛtanāsu śatrūntavotibhiruta jāmīm̐rajāmīn ॥8॥*
*ā te śuṣmo vṛṣabha etu paśchādottarādadharādā purastāt ।*
*ā viśvato abhi sametvarvāṅindra dyumnaṁ svarvaddhehyasme ॥9॥*
*nṛvatta indra nṛtamābhirūtī vaṁsīmahi vāmaṁ śromatebhiḥ ।*
*īkṣe hi vasva ubhayasya rājandhā ratnaṁ mahi sthūraṁ bṛhantam ॥10॥*
*marutvantaṁ vṛṣabhaṁ vāvṛdhānamakavāriṁ divyaṁ śāsamindram ।*
*viśvāsāhamavase nūtanāyograṁ sahodāmiha taṁ huvema ॥11॥*
*janaṁ vajrinmahi chinmanyamānamebhyo nṛbhyo randhayā yeṣvasmi ।*
*adhā hi tvā pṛthivyāṁ śūrasātau havāmahe tanaye goṣvapsu ॥12॥*
*vayaṁ ta ebhiḥ puruhūta sakhyaiḥ śatroḥ śatreruttara itsyāma ।*
*ghnanto vṛtrāṇyubhayāni śūra rāyā madema bṛhatā tvotāḥ ॥13॥*

ऋ. (Rv.) ६.२०.१-१३

द्यौर्न य इन्द्राभि भूमार्यस्तस्थौ रयिः शवसा पृत्सु जनान्।
तं नः सहस्रभरमुर्वरासां दद्धि सूनो सहसो वृत्रतुरम् ॥१॥
दिवो न तुभ्यमन्विन्द्र सत्रासुर्यं देवेभिर्धायि विश्वम् ।
अहिं यद्वृत्रमपो वव्रिवांसं हन्नृजीषिन्विष्णुना सचानः ॥२॥
तु र्वन्नोजीयान्तवसस्तवीयान्कृतब्रह्मेन्द्रो वृद्धमहाः ।
राजाभवन्मधुनः सोम्यस्य विश्वासां यत्पुरां दर्त्नुमावत् ॥३॥
शतैरपद्रन्पणय इन्द्राय दशोणये कवयेऽर्कसातौ ।
वधैः शुष्णस्याशुषस्य मायाः पित्वो नारिरेचीत्किं चन प्र ॥४॥
महो द्रुहो अप विश्वायु धायि वज्रस्य यत्पतने पादि शुष्णः ।
उरु ष सरथं सारथये करिन्द्रः कुत्साय सूर्यस्य सातौ ॥५॥
प्र श्येनो न मदिरमंशुमस्मै शिरो दासस्य नमुचेर्मथायन् ।
प्रावन्नमीं साप्यं ससन्तं पृणग्राया समिषा सं स्वस्ति ॥६॥
वि पिप्रोरहिमायस्य दृळहाः पुरो वज्रिञ्छवसा न दर्दः ।
सुदामन्द्रेक्णो अप्रमृष्यमृजिश्वने दात्रं दाशुषे दाः ॥७॥
स वेतसुं दशमायं दशोणिं तूतुजिमिन्द्रः स्वभिष्टिसुम्नः ।
आ तुग्रं शश्वदिभं द्योतनाय मातुर्न सीमुप सृजा इयध्यै ॥८॥
स ईं स्पृधो वनते अप्रतीतो बिभ्रद्वज्रं वृत्रहणं गभस्तौ ।
तिष्ठद्धरी अध्यस्तेव गर्ते वचोयुजा वहत इन्द्रमृष्वम् ॥९॥
सनेम तेऽवसा नव्य इन्द्र प्र पूरवः स्तवन्त एना यज्ञैः ।
सप्त यत्पुरः शर्म शारदीर्दर्द्धन्दासीः पुरुकुत्साय शिक्षन् ॥१०॥
त्वं वृध इन्द्र पूर्व्यो भूर्वरिवस्यन्नुशने काव्याय ।
परा नववास्त्वमनुदेयं महे पित्रे ददाथ स्वं नपातम् ॥११॥
त्वं धुनिरिन्द्र धुनिमतीऋर्णोरपः सीरा न स्रवन्तीः ।
प्र यत्समुद्रमति शूर पर्षि पारया तुर्वशं यदुं स्वस्ति ॥१२॥
तव ह त्यदिन्द विश्वमाजौ सस्तो धुनीचुमुरी या ह सिष्वप् ।
दीदयदित्तुभ्यं सोमेभिः सुन्वन्दभीतिरिध्मभृतिः पक्थ्य१ र्कैः ॥१३॥

*dyaurna ya indrābhi bhūmāryastasthau rayiḥ śavasā pṛtsu janān ।*
*taṁ naḥ sahasrabharamurvarāsāṁ daddhi sūno sahaso vṛtraturam ॥1॥*
*divo na tubhyamanvindra satrāsuryaṁ devebhirdhāyi viśvam ।*
*ahiṁ yadvṛtramapo vavrivāṁsaṁ hannṛjīṣinviṣṇunā sachānaḥ ॥2॥*
*tu rvannojīyāntavasastavīyānkṛtabrahmendro vṛddhamahāḥ ।*
*rājābhavanmadhunaḥ somyasya viśvāsāṁ yatpurāṁ dartnumāvat ॥3॥*

*śatairapadranpaṇaya indrāya daśoṇaye kavaye'rkasātau ।*
*vadhaiḥ śuṣṇasyāśuṣasya māyāḥ pitvo nārirechītiṁka chana pra ॥4॥*
*maho druho apa viśvāyu dhāyi vajrasya yatpatane pādi śuṣṇaḥ ।*
*uru ṣa sarathaṁ sārathaye karindraḥ kutsāya sūryasya sātau ॥5॥*
*pra śyeno na madiramaṁśumasmai śiro dāsasya namuchermathāyan ।*
*prāvannamīṁ sāpyaṁ sasantaṁ pṛṇagrāyā samiṣā saṁ svasti ॥6॥*
*vi piprorahimāyasya dṛḷahāḥ puro vajriṁchhavasā na dardaḥ ।*
*sudāmandrekṇo apramṛṣyamṛjiśvane dātraṁ dāśuṣe dāḥ ॥7॥*
*sa vetasuṁ daśamāyaṁ daśoṇiṁ tṛtujimindraḥ svabhiṣṭisumnaḥ ।*
*ā tugraṁ śaśvadibhaṁ dyotanāya māturna sīmupa sṛjā iyadhyai ॥8॥*
*sa īṁ spṛdho vanate apratīto bibhradvajraṁ vṛtrahaṇaṁ gabhastau ।*
*tiṣṭhaddharī adhyasteva garte vachoyujā vahata indramṛṣvam ॥9॥*
*sanema te'vasā navya indra pra pūravaḥ stavanta enā yajñaiḥ ।*
*sapta yatpuraḥ śarma śāradīrdarddhandāsīḥ purukutsāya śikṣan ॥10॥*
*tvaṁ vṛdha indra pūrvyo bhūrvarivasyannuśane kāvyāya ।*
*parā navavāstvamanudeyaṁ mahe pitre dadātha svaṁ napātam ॥11॥*
*tvaṁ dhunirindra dhunimatīrṛṇorapaḥ sīrā na sravantīḥ ।*
*pra yatsamudramati śūra parṣi pārayā turvaśaṁ yaduṁ svasti ॥12॥*
*tava ha tyadinda viśvamājau sasto dhunīchumurī yā ha siṣvap ।*
*dīdayadittubhyaṁ somebhiḥ sunvandabhītiridhmabhṛtiḥ pakthya1 rkaiḥ ॥13॥*

ऋ. (Rv.) ६.२१.१-१२

इमा उ त्वा पुरुतमस्य कारोर्हव्यं वीर हव्या हवन्ते ।
धियो रथेष्ठामजरं नवीयो रयिर्विभूतिरीयते वचस्या ॥१॥
तमु स्तुष इन्द्रं यो विदानो गिर्वाहसं गीर्भिर्यज्ञवृद्धम् ।
यस्य दिवमति मह्ना पृथिव्याः पुरुमायस्य रिरिचे महित्वम् ॥२॥
स इत्तमोऽवयुनं ततन्वत्सूर्येण वयुनवच्चकार ।
कदा ते मर्ता अमृतस्य धामेयक्षन्तो न मिनन्ति स्वधावः ॥३॥
यस्ता चकार स कुह स्विदिन्द्रः कमा जनं चरति कासु विक्षु ।
कस्ते यज्ञो मनसे शं वराय को अर्क इन्द्र कतमः स होता ॥४॥
इदा हि ते वेविषतः पुराजाः प्रत्नास आसुः पुरुकृत्सखायः ।
ये मध्यमास उत नूतनास उतावमस्य पुरुहूत बोधि ॥५॥
तं पृच्छन्तोऽवरासः पराणि प्रत्ना त इन्द्र श्रुत्यानु येमुः ।
अर्चामसि वीर ब्रह्मवाहो यादेव विद्म तात्त्वा महान्तम् ॥६॥
अभि त्वा पाजो रक्षसो वि तस्थे महि जज्ञानमभि तत्सु तिष्ठ ।
तव प्रत्नेन युज्येन सख्या वज्रेण धृष्णो अप ता नुदस्व ॥७॥
स तु श्रुधीन्द्र नूतनस्य ब्रह्मण्यतो वीर कारुधायः ।
त्वं ह्या३ पिः प्रदिवि पितृणां शश्वद् बभूथ सुहव एष्टौ ॥८॥
प्रोतये वरुणं मित्रमिन्द्रं मरुतः कृष्वावसे नो अद्य ।
प्र पूषणं विष्णुमग्निं पुरन्धिं सवितारमोषधीः पर्वतांश्च ॥९॥
इम उ तवा पुरुशाक प्रयज्यो जरितारो अभ्यर्चन्त्यर्कैः ।
श्रुधी हवमा हुवतो हुवानो न त्वावाँ अन्यो अमृत त्वदस्ति ॥१०॥
नू म आ वाचमुप याहि विद्वान् विश्वेभिः सूनो सहसो यजत्रैः ।
ये अग्निजिह्वा ऋतसाप आसुर्ये मनुं चक्रुरुपरं दसाय ॥११॥
स नो बोधि पुर एता सुगेषूत दुर्गेषु पथिकृद्विदानः ।
ये अश्रमास उरवो वहिष्ठास्तेभिर्न इन्द्राभि वक्षि वाजम् ॥१२॥

*imā u tvā purutamasya kārorhavyaṁ vīra havyā havante ।*
*dhiyo ratheṣṭhāmajaraṁ navīyo rayirvibhūtirīyate vachasyā ॥1॥*
*tamu stuṣa indraṁ yo vidāno girvāhasaṁ gīrbhiryajñavṛddham ।*
*yasya divamati mahnā pṛthivyāḥ purumāyasya ririche mahitvam ॥2॥*
*sa ittamo'vayunaṁ tatanvatsūryeṇa vayunavachchakāra ।*
*kadā te martā amṛtasya dhāmeyakṣanto na minanti svadhāvaḥ ॥3॥*

*yastā chakāra sa kuha svidindraḥ kamā janaṁ charati kāsu vikṣu* ।
*kaste yajño manase śaṁ varāya ko arka indra katamaḥ sa hotā* ॥4॥
*idā hi te veviṣataḥ purājāḥ pratnāsa āsuḥ purukṛtsakhāyaḥ* ।
*ye madhyamāsa uta nūtanāsa utāvamasya puruhūta bodhi* ॥5॥
*taṁ pṛchchhanto'varāsaḥ parāṇi pratnā ta indra śrutyānu yemuḥ* ।
*archāmasi vīra brahmavāho yādeva vidma tāttvā mahāntam* ॥6॥
*abhi tvā pājo rakṣaso vi tasthe mahi jajñānamabhi tatsu tiṣṭha* ।
*tava pratnena yujyena sakhyā vajreṇa dhṛṣṇo apa tā nudasva* ॥7॥
*sa tu śrudhīndra nūtanasya brahmaṇyato vīra kārudhāyaḥ* ।
*tvaṁ hyā3 piḥ pradivi pitṝṇāṁ śaśvad babhūtha suhava eṣṭau* ॥8॥
*protaye varuṇaṁ mitramindraṁ marutaḥ kṛṣvāvase no adya* ।
*pra pūṣaṇaṁ viṣṇumagiṁna puraniṁdha savitāramoṣadhīḥ parvatāṁścha* ॥9॥
*ima u tavā puruśāka prayajyo jaritāro abhyarchantyarkaiḥ* ।
*śrudhī havamā huvato huvāno na tvāvāṁ̐ anyo amṛta tvadasti* ॥10॥
*nū ma ā vāchamupa yāhi vidvān viśvebhiḥ sūno sahaso yajatraiḥ* ।
*ye agnijihvā ṛtasāpa āsurye manuṁ chakruruparaṁ dasāya* ॥11॥
*sa no bodhi pura etā sugeṣūta durgeṣu pathikṛdvidānaḥ* ।
*ye aśramāsa uravo vahiṣṭhāstebhirna indrābhi vakṣi vājam* ॥12॥

ऋ. (Rv.) ६.२२.१-११

य एक इद्धव्यश्चर्षणीनामिन्द्रं तं गीर्भिरभ्यर्च आभिः ।
यः पत्यते वृषभो वृष्ण्यान्त्सत्यः सत्वा पुरुमायः सहस्वान् ॥१॥
तमु नः पूर्वे पितरो नवग्वाः सप्त विप्रासो अभि वाजयन्तः ।
नक्षद्दाभं ततुरिं पर्वतेष्ठामद्रोघवाचं मतिभिः शविष्ठम् ॥२॥
तमीमह इन्द्रमस्य रायः पुरुवीरस्य नृवतः पुरुक्षोः ।
यो अस्कृधोयुरजरः स्वर्वान्तमा भर हरिवो मादयध्यै ॥३॥
तन्नो वि वोचो यदि ते पुरा चिज्जरितार आनुशः सुम्नमिन्द्र ।
कस्ते भागः किं वयो दुध्रा खिद्वः पुरुहूत पुरूवसोऽसुरघ्नः ॥४॥
तं पृच्छन्ती वज्रहस्तं रथेष्ठामिन्द्रं वेपी वक्वरी यस्य नू गीः ।
तुविग्राभं तुविकूर्मिं रभोदां गातुमिषे नक्षते तुम्रमच्छ ॥५॥
अया ह त्यं मायया वावृधानं मनोजुवा स्वतवः पर्वतेन ।
अच्युता चिद्वीळिता स्वोजो रुजो वि दृळहा धृषता विरप्शिन् ॥६॥
तं वो धिया नव्यस्या शविष्ठं प्रत्नं प्रत्नवत्परितंसयध्यै ।
स नो वक्षदनिमानः सुवह्मेन्द्रो विश्वान्यति दुर्गहाणि ॥७॥
आ जनाय द्रुह्वणे पार्थिवानि दिव्यानि दीपयोऽन्तरिक्षा।
तपा वृषन्विश्वतः शोचिषा तान्ब्रह्मद्विषे शोचय क्षामपश्च ॥८॥
भुवो जनस्य दिव्यस्य राजा पार्थिवस्य जगतस्त्वेषसंदृक् ।
धिष्व वज्रं दक्षिण इन्द्र हस्ते विश्वा अजुर्य दयसे वि मायाः ॥९॥
आ सयंतमिन्द्र णः स्वस्तिं शत्रुतूर्याय बृहतीममृध्राम् ।
यया दासान्यार्याणि वृत्रा करो वज्रिन्त्सुतुका नाहुषाणि ॥१०॥
स नो नियुद्भिः पुरुहूत वेधो विश्ववाराभिरा गाहि प्रयज्यो ।
न या अदेवो वरते न देव आभिर्याहि तूयमा मद्र्यद्रिक् ॥११॥

*ya eka iddhavyaścharṣaṇīnāmindraṁ taṁ gīrbhirabhyarcha ābhiḥ* ।
*yaḥ patyate vṛṣabho vṛṣṇyāntsatyaḥ satvā purumāyaḥ sahasvān* ॥1॥
*tamu naḥ pūrve pitaro navagvāḥ sapta viprāso abhi vājayantaḥ* ।
*nakṣaddābhaṁ taturiṁ parvateṣṭhāmadroghavāchaṁ matibhiḥ śaviṣṭham* ॥2॥
*tamīmaha indramasya rāyaḥ puruvīrasya nṛvataḥ purukṣoḥ* ।
*yo askṛdhoyurajaraḥ svarvāntamā bhara harivo mādayadhyai* ॥3॥
*tanno vi vocho yadi te purā chijjaritāra ānuśaḥ sumnamindra* ।
*kaste bhāgaḥ kiṁ vayeā dudhrā khidvaḥ puruhūta purūvaso'suraghnaḥ* ॥4॥
*taṁ pṛchchhantī vajrahastaṁ ratheṣṭhāmindraṁ vepī vakvarī yasya nū gīḥ* ।
*tuvigrābhaṁ tuvikūrmiṁ rabhodāṁ gātumiṣe nakṣate tumramachchha* ॥5॥

*ayā ha tyaṁ māyayā vāvṛdhānaṁ manojuvā svatavaḥ parvatena* ।
*achyutā chidvīḷitā svojo rujo vi dṛḷahā dhṛṣatā virapśin* ॥6॥
*taṁ vo dhiyā navyasyā śaviṣṭhaṁ pratnaṁ pratnavatparitaṁsayadhyai* ।
*sa no vakṣadanimānaḥ suvahmendro viśvānyati durgahāṇi* ॥7॥
*ā janāya druhvaṇe pārthivāni divyāni dīpayo'ntarikṣā* ।
*tapā vṛṣanviśvataḥ śochiṣā tānbrahmadviṣe śochaya kṣāmapaścha* ॥8॥
*bhuvo janasya divyasya rājā pārthivasya jagatastveṣasaṁdṛk* ।
*dhiṣva vajraṁ dakṣiṇa indra haste viśvā ajurya dayase vi māyāḥ* ॥9॥
*ā sayaṁtamindra ṇaḥ svasiṁta śatrutūryāya bṛhatīmamṛdhrām* ।
*yayā dāsānyāryāṇi vṛtrā karo vajrintsutukā nāhuṣāṇi* ॥10॥
*sa no niyudbhiḥ puruhūta vedho viśvavārābhirā gāhi prayajyo* ।
*na yā adevo varate na deva ābhiryāhi tṛyamā madryadrik* ॥11॥

ऋ. (Rv.) ६.२३.१-१०

सुत इत्त्वं निमिश्ल इन्द्र सोमे ब्रह्माणि शस्यमान उक्थे ।
यद्वा युक्ताभ्यां मघ्वन्हरिभ्यां बिभ्रद्वज्रं बाह्वोरिन्द्र यासि ॥१॥
यद्वा दिवि पार्ये सुष्विमिन्द्र वृत्रहत्येऽवसि शूरसातौ ।
यद्वा दक्षस्य बिभ्युषो अबिभ्यदरन्धयः शर्धत इन्द्र दस्यून् ॥२॥
पाता सुतमिन्द्रो अस्तु सोमं प्रणेनीरुग्रो जरितारमूती ।
कर्ता वीराय सुष्वय उ लोकं दाता वसु स्तुवते कीरये चित् ॥३॥
गन्तेयान्ति सवना हरिभ्यां बभ्रिर्वज्रं पपिः सोमं ददिर्गाः ।
कर्ता वीरं नर्यं सर्ववीरं श्रोता हवं गृणतः स्तोमवाहाः ॥४॥
अस्मै वयं यद्वावान् तद्विविष्म इन्द्राय यो नः प्रदिवो अपस्कः ।
सुते सोमे स्तुमसि शंसदुक्थेन्द्राय ब्रह्म वर्धनं यथासत् ॥५॥
ब्रह्माणि हि चकृषे वर्धनानि तावत्त इन्द्र मतिभिर्विविष्मः ।
सुते सोमे सुतपाः शंतमानि रान्द्र्या क्रियास्म वक्षणानि यज्ञैः ॥६॥
स नो बोधि पुरोळाशं रराणः पिबा तु सोमं गोऋजीकमिन्द्र ।
एदं बर्हिर्यजमानस्य सीदोरुं कृधि त्वायत उ लोकम् ॥७॥
स मन्दस्वा ह्यनु जोषमुग्र प्र त्वा यज्ञास इमे अश्नुवन्तु ।
प्रेमे हवासः पुरुहूतमस्मे आ त्वेयं धीरवस इन्द्र यम्याः ॥८॥
तं वः सखायः सं यथा सुतेषु सोमेभिरीं पृणता भोजमिन्द्रम् ।
कुवित्तस्मा असति नो भराय न सुष्विमिन्द्रोऽवसे मृधाति ॥९॥
एवेदिन्द्रः सुते अस्तावि सोमे भरद्वाजेषु क्षयदिन्मघोनः ।
असद्यथा जरित्र अत सूरिरिन्द्रो रायो विश्ववारस्य दाता ॥१०॥

*suta ittvaṁ nimiśla indra some brahmāṇi śasyamāna ukthe* ।
*yadvā yuktābhyāṁ maghvanharibhyāṁ bibhradvajraṁ bāhvorindra yāsi* ॥1॥
*yadvā divi pārye suṣvimindra vṛtrahatye'vasi śūrasātau* ।
*yadvā dakṣasya bibhyuṣo abibhyadarandhayaḥ śardhata indra dasyūn* ॥2॥
*pātā sutamindro astu somaṁ praṇenīrugro jaritāramūtī* ।
*kartā vīrāya suṣvaya u lokaṁ dātā vasu stuvate kīraye chit* ॥3॥
*ganteyānti savanā haribhyāṁ babhrirvajraṁ papiḥ somaṁ dadirgāḥ* ।
*kartā vīraṁ naryaṁ sarvavīraṁ śrotā havaṁ gṛṇataḥ stomavāhāḥ* ॥4॥
*asmai vayaṁ yadvāvān tadviviṣma indrāya yo naḥ pradivo apaskaḥ* ।
*sute some stumasi śaṁsadukthendrāya brahma vardhanaṁ yathāsat* ॥5॥
*brahmāṇi hi chakṛṣe vardhanāni tāvatta indra matibhirviviṣmaḥ* ।
*sute some sutapāḥ śaṁtamāni rāndyrā kriyāsma vakṣaṇāni yajñaiḥ* ॥6॥
*sa no bodhi puroḷāśaṁ rarāṇaḥ pibā tu somaṁ gorjīkamindra* ।
*edaṁ barhiryajamānasya sīdoruṁ kṛdhi tvāyata u lokam* ॥7॥
*sa mandasvā hyanu joṣamugra pra tvā yajñāsa ime aśnuvantu* ।
*preme havāsaḥ puruhūtamasme ā tveyaṁ dhīravasa indra yamyāḥ* ॥8॥
*taṁ vaḥ sakhāyaḥ saṁ yathā suteṣu somebhirīṁ pṛṇatā bhojamindram* ।
*kuvittasmā asati no bharāya na suṣvimindro'vase mṛdhāti* ॥9॥

*evedindraḥ sute astāvi some bharadvājeṣu kṣayadinmaghonaḥ* ।
*asadyathā jaritra ata sūririndro rāyo viśvavārasya dātā* ॥10 ॥

ऋ. (Rv.) ६.२४.१-१०

वृषा मद इन्द्रे श्लोक उक्था सचा सोमेषु सुतपा ऋजीषी ।
अर्चत्र्यो मघवा नृभ्य उक्थैर्द्युक्षो राजा गिरामक्षितोतिः ॥१॥
ततुरिर्वीरो नर्यो विचेताः श्रोता हवं गृणत उर्व्यूतिः ।
वसुः शंसो नरां कारुधाया वाजी स्तुतो विदथे दाति वाजम् ॥२॥
अक्षो न चक्र्योः शूर बृहन्प्र ते मह्ना रिरिचे रोदस्योः ।
वृक्षस्य नु ते पुरुहूत वया व्यू३तयो रुरुहुरिन्द्र पूर्वीः ॥३॥
शचीवतस्ते पुरुशाक शाका गवामिव स्रुतयः संचरणीः ।
वत्सानां न तन्तयस्त इन्द्र दामन्वन्तो अदामानः सुदामन् ॥४॥
अन्यदद्य कर्वरमन्यदु श्वोऽसच्च सन्मुहुराचक्रिरिन्द्रः ।
मित्रो नो अत्र वरुणश्च पूषार्यो वशस्य पर्येतास्ति ॥५॥
वि त्वदापो न पर्वतस्य पृष्ठादुक्थेभिरिन्द्रानयन्त यज्ञैः ।
तं त्वाभिः सुष्टुतिभिर्वाजयन्त आजिं न जग्मुर्गिर्वाहो अश्वाः ॥६॥
न यं जरन्ति शरदो न मासा न द्याव इन्द्रमवकर्शयन्ति ।
वृद्धस्य चिद्वर्धतामस्य तनूः स्तोमेभिरुक्थैश्च शस्यमाना ॥७॥
न वीळवे नमते न स्थिराय न शर्धते दस्युजूताय स्तवान् ।
अज्रा इन्द्रस्य गिरयश्चिदृष्वा गम्भीरे चिद्भवति गाधमस्मै ॥८॥
गम्भीरेण न उरुणमत्रिन्प्रेषो यन्धि सुतपावन्वाजान् ।
स्था ऊ षु ऊर्ध्व ऊती अरिषण्यन्नक्तोर्व्युष्टौ परितकम्यायाम् ॥९॥
सचस्व नायमवसे अभीक इतो वा तमिन्द्र पाहि रिषः ।
अमा चैनमरण्ये पाहि रिषो मदेम शतहिमाः सुवीराः ॥१०॥

*vṛṣā mada indre śloka ukthā sachā someṣu sutapā ṛjīṣī* ।
*archatrayo maghavā nṛbhya ukthairdyukṣo rājā girāmakṣitotiḥ* ॥1 ॥
*taturirvīro naryo vichetāḥ śrotā havaṁ gṛṇata urvyūtiḥ* ।
*vasuḥ śaṁso narāṁ kārudhāyā vājī stuto vidathe dāti vājam* ॥2 ॥
*akṣo na chakryoḥ śūra bṛhanpra te mahnā ririche rodasyoḥ* ।
*vṛkṣasya nu te puruhūta vayā vyū3tayo ruruhurindra pūrvīḥ* ॥3 ॥
*śachīvataste puruśāka śākā gavāmiva srutayaḥ saṁcharaṇīḥ* ।
*vatsānāṁ na tantayasta indra dāmanvanto adāmānaḥ sudāman* ॥4 ॥
*anyadadya karvaramanyadu śvo'sachcha sanmuhurāchakririndraḥ* ।
*mitro no atra varuṇaścha pūṣāryo vaśasya paryetāsti* ॥5 ॥
*vi tvadāpo na parvatasya pṛṣṭhādukthebhirindrānayanta yajñaiḥ* ।
*taṁ tvābhiḥ suṣṭutibhirvājayanta ājiṁ na jagmurgirvāho aśvāḥ* ॥6 ॥
*na yaṁ jaranti śarado na māsā na dyāva indramavakarśayanti* ।
*vṛddhasya chidvardhatāmasya tanūḥ stomebhirukthaiścha śasyamānā* ॥7 ॥
*na vīḷave namate na sthirāya na śardhate dasyujūtāya stavān* ।
*ajrā indrasya girayaśchidṛṣvā gambhīre chidbhavati gādhamasmai* ॥8 ॥
*gambhīreṇa na uruṇamatrinpreṣo yandhi sutapāvanvājān* ।
*sthā ū ṣu ūrdhva ūtī ariṣaṇyannaktorvyuṣṭau paritakamyāyām* ॥9 ॥
*sachasva nāyamavase abhīka ito vā tamindra pāhi riṣaḥ* ।
*amā chainamaraṇye pāhi riṣo madema śatahimāḥ suvīrāḥ* ॥10 ॥

ऋ. (Rv.) ६.२५.१-९

या त ऊतिरवमा या परमा या मध्यमेन्द्र शुष्मिन्नस्ति ।
ताभिरू षु वृत्रहत्येऽवीर्न एभिश्च वाजैर्महान्न उग्र ॥१॥
आभिः स्पृधो मिथतीररिषण्यन्नमित्रस्य व्यथया मन्युमिन्द्र ।
आभिर्विश्वा अभियुजो विषूचीरार्याय विशोऽव तारीर्दासीः ॥२॥
इन्द्र जामय उत येऽजामयोऽर्वाचीनासो वनुषो युयुज्रे ।
त्वमेषां विथुरा शवांसि जहि वृष्ण्यानि कृणुही पराचः ॥३॥

शूरो वा शूरं वनते शरीरैस्तनूरुचा तरुषि यत्कृण्वैते ।
तोके वा गोषु तनये यदप्सु वि क्रन्दसी उर्वरासु ब्रवैते ॥४॥
नहि त्वा शूरो न तुरो न धृष्णुर्न त्वा योधो मन्यमानो युयोध ।
इन्द्र नकिष्ट्वा प्रत्यस्त्येषां विश्वा जातान्यभ्यसि तानि ॥५॥
स पत्यत उभयोर्नृम्णमयोर्यदी वेधसः समिथे हवन्ते ।
वृत्रे वा महो नृवति क्षये वा व्यचस्वन्ता यदि वितन्तसैते ॥६॥
अध स्मा ते चर्षणयो यदेजानिन्द्र त्रातोत भवा वरूता ।
अस्माकासो ये नृतमासो अर्य इन्द्र सूरयो दधिरे पुरो नः ॥७॥
अनु ते दायि मह इन्द्रियाय सत्रा ते विश्वमनु वृत्रहत्ये ।
अनु क्षत्रमनु सहो यजत्रेन्द्र देवेभिरनु ते नृषह्ये ॥८॥
एवा नः स्पृधः समजा समत्स्विन्द्र रारन्धि मिथतीरदेवीः ।
विद्याम वस्तोरवसा गृणन्तो भरद्वाजा उत त इन्द्र नूनम् ॥९॥

*yā ta ūtiravamā yā paramā yā madhyamendra śuṣminnasti ।*
*tābhirū ṣu vṛtrahatye'vīrna ebhiścha vājairmahānna ugra ॥1॥*
*ābhiḥ spṛdho mithatīrariṣaṇyannamitrasya vyathayā manyumindra ।*
*ābhirviśvā abhiyujo viṣūchīrāryāya viśo'va tārīrdāsīḥ ॥2॥*
*indra jāmaya uta ye'jāmayo'rvāchīnāso vanuṣo yuyujre ।*
*tvameṣāṁ vithurā śavāṁsi jahi vṛṣṇyāni kṛṇuhī parāchaḥ ॥3॥*
*śūro vā śūraṁ vanate śarīraistanūruchā taruṣi yatkṛṇvaite ।*
*toke vā goṣu tanaye yadapsu vi krandasī urvarāsu bravaite ॥4॥*
*nahi tvā śūro na turo na dhṛṣṇurna tvā yodho manyamāno yuyodha ।*
*indra nakiṣṭvā pratyastyeṣāṁ viśvā jātānyabhyasi tāni ॥5॥*
*sa patyata ubhayornṛmṇamayoryadī vedhasaḥ samithe havante ।*
*vṛtre vā maho nṛvati kṣaye vā vyachasvantā yadi vitantasaite ॥6॥*
*adha smā te charṣaṇayo yadejānindra trātota bhavā varūtā ।*
*asmākāso ye nṛtamāso arya indra sūrayo dadhire puro naḥ ॥7॥*
*anu te dāyi maha indriyāya satrā te viśvāmanu vṛtrahatye ।*
*anu kṣatramanu saho yajatrendra devebhiranu te nṛṣahye ॥8॥*
*evā naḥ spṛdhaḥ samajā samatsvindra rārandhi mithatīradevīḥ ।*
*vidyāma vastoravasā gṛṇanto bharadvājā uta ta indra nūnam ॥9॥*

ऋ. (Rv.) ६.२६.१-८

श्रुधी न इन्द्र ह्वयामसि त्वा महो वाजस्य सातौ वावृषाणाः ।
सं यद्विशोऽयन्त शूरसाता उग्रं नोऽवः पार्ये अहन्दाः ॥१॥
त्वां वाजी हवते वाजिनेयो महो वाजस्य गध्यस्य सातौ ।
त्वां वृत्रेष्विन्द्र सत्पतिं तरुत्रं त्वां चष्टे मुष्टिहा गोषु युध्यन् ॥२॥
त्वं कविं चोदयोऽर्कसातौ त्वं कुत्साय शुष्णं दाशुषे वर्क् ।
त्वं शिरो अमर्मणः पराहन्नतिथिग्वाय शंस्यं करिष्यन् ॥३॥
त्वं रथं प्र भरो योधमृष्वमावो युध्यन्तं वृषभं दशद्युम् ।
त्वं तुग्रं वेतसवे सचाहन्त्वं तुजिं गृणन्तमिन्द्र तूतोः ॥४॥
त्वं तदुक्थमिन्द्र बर्हणा कः प्र यच्छता सहस्रा शूर दर्षि ।
अव गिरेर्दासं शम्बरं हन्प्रावो दिवोदासं चित्राभिरूती ॥५॥
त्वं श्रद्धाभिर्मन्दसानः सोमैर्दभीतये चुमुरिमिन्द्र सिष्वप् ।
त्वं रजिं पिठीनसे दशस्यन्षष्टिं सहस्रा शच्या सचाहन् ॥६॥
अहं चन तत्सूरिभिरानश्यां तव ज्याय इन्द्र सुम्नमोजः ॥
त्वया यत्स्तवन्ते सधवीर वीरास्त्रिवरूथेन नहुषा शविष्ठ ॥७॥
वयं ते अस्यामिन्द्र द्युम्नहूतौ सखायः स्याम महिन प्रेष्ठाः ।
प्रातर्दनिः क्षत्र श्रीरस्तु श्रेष्ठो घने वृत्राणां सनये धनानाम् ॥८॥

*śrudhī na indra hvayāmasi tvā maho vājasya sātau vāvṛṣāṇāḥ ।*
*saṁ yadviśo'yanta śūrasātā ugraṁ no'vaḥ pārye ahandāḥ ॥1॥*
*tvāṁ vājī havate vājineyo maho vājasya gadhyasya sātau ।*

*tvāṁ vṛtreṣvindra satpatiṁ tarutraṁ tvāṁ chaṣṭe muṣṭihā goṣu yudhyan ॥2॥*
*tvaṁ kaviṁ chodayo'rkasātau tvaṁ kutsāya śuṣṇaṁ dāśuṣe vark ।*
*tvaṁ śiro amarmaṇaḥ parāhannatithigvāya śaṁsyaṁ kariṣyan ॥3॥*
*tvaṁ rathaṁ pra bharo yodhamṛṣvamāvo yudhyantaṁ vṛṣabhaṁ daśadyum ।*
*tvaṁ tugraṁ vetasave sachāhantvaṁ tujiṁ gṛṇantamindra tūtoḥ ॥4॥*
*tvaṁ tadukthamindra barhaṇā kaḥ pra yachchhatā sahasrā śūra darṣi ।*
*ava girerdāsaṁ śambaraṁ hanprāvo divodāsaṁ chitrābhirūtī ॥5॥*
*tvaṁ śraddhābhirmandasānaḥ somairdabhītaye chumurimindra siṣvap ।*
*tvaṁ rajiṁ piṭhīnase daśasyanṣaṣṭiṁ sahasrā śachyā sachāhan ॥6॥*
*ahaṁ chana tatsūribhirānaśyāṁ tava jyāya indra sumnamojaḥ ॥*
*tvayā yatsatavante sadhavīra vīrāstrivarūthena nahuṣā śaviṣṭha ॥7॥*
*vayaṁ te asyāmindra dyumnahūtau sakhāyaḥ syāma mahina preṣṭhāḥ ।*
*prātardaniḥ kṣatra śrīrastu śreṣṭho ghane vṛtrāṇāṁ sanaye dhanānām ॥8॥*

ऋ. (Rv.) ६.२७.१-७

किमस्य मदे किम्वस्य पीताविन्द्रः किमस्य सख्ये चकार ।
रणा वा ये निषदि किं ते अस्य पुरा विविद्रे किमु नूतनासः ॥१॥
सदस्य मदे सद्वस्य पीताविन्द्रः सदस्य सख्ये चकार ।
रणा वा ये निषदि सत्ते अस्य पुरा विविद्रे सदु नूतनासः ॥२॥
नहि नु ते महिमनः समस्य न मघवन् मघवत्त्वस्य विद्म ।
न राधसो राधसोा नूतनस्येन्द्र नकिर्ददृश इन्द्रियं ते ॥३॥
एतत्त्यत्त इन्द्रियमचेति येनावधीर्वरशिखस्य शेषः ।
वज्रस्य यत्ते निहतस्य शुष्मात्स्वनाच्चिदिन्द्र परमो ददार ॥४॥
वधीदिन्द्रो वरशिखस्य शेषोऽभ्यावर्तिने चायमानाय शिक्षन् ।
वृचीवतो यद्धरियूपीयायां हन्पूर्वे अर्धे भियसापरो दर्त् ॥५॥
त्रिंशच्छतं वर्भिण इन्द्र साकं यव्यावत्यां पुरुहूत श्रवस्या ।
वृचीवन्तः शरवे पत्यमानाः पात्रा भिन्दाना न्यर्था न्यायन् ॥६॥
यस्य गावावरुषा सूयवस्यू अन्तरू षु चरतो रेरिहाणा ।
स सृंजयाय तुर्वशं परादाद्वृचीवतो दैववाताय शिक्षन् ॥७॥

*kimasya made kimvasya pītāvindraḥ kimasya sakhye chakāra ।*
*raṇā vā ye niṣadi kiṁ te asya purā vividre kimu nūtanāsaḥ ॥1॥*
*sadasya made sadvasya pītāvindraḥ sadasya sakhye chakāra ।*
*raṇā vā ye niṣadi satte asya purā vividre sadu nūtanāsaḥ ॥2॥*
*nahi nu te mahimanaḥ samasya na maghavan maghavattvasya vidma ।*
*na rādhaso rādhasoā nūtanasyendra nakirdadṛśa indriyaṁ te ॥3॥*
*etattyatta indriyamacheti yenāvadhīrvaraśikhasya śeṣaḥ ।*
*vajrasya yatte nihatasya śuṣmātsvanāchchidindra paramo dadāra ॥4॥*
*vadhīdindro varaśikhasya śeṣo'bhyāvartine chāyamānāya śikṣan ।*
*vṛchīvato yaddhariyūpīyāyāṁ hanpūrve ardhe bhiyasāparo dart ॥5॥*
*triṁśachchhataṁ varbhiṇa indra sākaṁ yavyāvatyāṁ puruhūta śravasyā ।*
*vṛchīvantaḥ śarave patyamānāḥ pātrā bhindānā nyarthā nyāyan ॥6॥*
*yasya gāvāvaruṣā sūyavasyū antarū ṣu charato rerihāṇā ।*
*sa sṛṁjayāya turvaśaṁ parādādvṛchīvato daivavātāya śikṣan ॥7॥*

ऋ. (Rv.) ६.२९.१-६

इन्द्रं वो नरः सख्याय सेपुर्महो यन्तः सुमतये चकानाः ।
महो हि दाता वज्रहस्तो अस्ति महामु रण्वमवसे यजध्वम् ॥१॥
आ यस्मिन्हस्ते नर्या मिमिक्षुरा रथे हिरण्यये रथेष्ठः ।
आ रश्मयो गभस्त्योः स्थूरयोराध्वन्नश्वासो वृषणो युजानाः ॥२॥
श्रिये ते पादा दुव आ मिमिक्षुर्धृष्णुर्वज्री शवसा दक्षिणावान् ।
वसानो अतकं सुरभिं दृशे कं स्वर्ण नृतविषिरो बभूथ ॥३॥
स सोम आमिश्लतमः सुतो भूद्यस्मिन्पक्तिः पच्यते सन्ति धानाः ।

इन्द्रं नरः स्तुवन्तो ब्रह्मकारा उक्था शंसन्तो देवाततमाः ॥४॥
न ते अन्तः शवसो धाय्यस्य वि तु बाबधे रोदसी महित्वा ।
आ ता सूरिः पृणति तूतुजानो युथेवाप्सु समीजमान ऊती ॥५॥
एवेदिन्द्रः सुहव ऋष्वो अस्तूति अनूती हिरिशिप्रः सत्वा ।
एवा हि जातो असमात्योजाः पुरू च वृत्रा हनति नि दस्यून् ॥६॥
*indraṁ vo naraḥ sakhyāya sepurmaho yantaḥ sumataye chakānāḥ /*
*maho hi dātā vajrahasto asti mahāmu raṇvamavase yajadhvam //1 //*
*ā yasminhaste naryā mimikṣurā rathe hiraṇyaye ratheṣṭhaḥ /*
*ā raśmayo gabhastyoḥ sthūrayorādhvannaśvāso vṛṣaṇo yujānāḥ //2 //*
*śriye te pādā duva ā mimikṣurdhṛṣṇurvajrī śavasā dakṣiṇāvān /*
*vasāno atakaṁ surabhiṁ dṛśe kaṁ sva1rṇa nṛtaviṣiro babhūtha //3 //*
*sa soāma āmiślatamaḥ suto bhūdyasminpaktiḥ pachyate santi dhānāḥ /*
*indraṁ naraḥ stuvanto brahmakārā ukthā śaṁsanto devātatamāḥ //4 //*
*na te antaḥ śavaso dhāyyasya vi tu bābadhe rodasī mahitvā /*
*ā tā sūriḥ pṛṇati tūtujāno yuthevāpsu samījamāna ūtī //5 //*
*evedindraḥ suhava ṛṣvo astūti anūtī hiriśipraḥ satvā /*
*evā hi jāto asamātyojāḥ purū cha vṛtrā hanati ni dasyūn //6 //*

ऋ. (Rv.) ६.३०.१-५

भूय इद्वावृधे वीर्यायँ एको अजुर्यो दयते वसूनि ।
प्र रिरिचे दिव इन्द्रः प्रथिव्या अर्धमिदस्य प्रति रोदसी उभे ॥१॥
अधा मन्ये बृहदसूर्यमस्य यानि दाधार नकिरा मिनाति ।
दिवेदिवे सूर्यो दर्शतो भूद्वि सद्मान्युर्विया सुक्रतुर्धात् ॥२॥
अद्या चिन्नू चित्तदपो नदीनां यदाभ्यो अरदो गातुमिन्द्र ।
नि पर्वता अद्मसदो न सेदुस्त्वया दृव्ळ्हानि सुक्रतो रजांसि ॥३॥
सत्यमित्तन्न त्वावाँ अन्यो अस्तीन्द्र देवो न मर्त्यो ज्यायान् ।
अहन्नहिं परिशयानमर्णोऽवासृजो अपो अच्छा समुद्रम् ॥४॥
त्वमपो वि दुरो विषूचीरिन्द्र दृव्ळ्हमरुजः पर्वतस्य ।
राजाभवो जगतश्चर्षणीनां साकं सूर्यं जनयन् द्यामुषासम् ॥५॥
*bhūya idvāvṛdhe vīryāyam̐ eko ajuryo dayate vasūni /*
*pra ririche diva indraḥ prathivyā ardhamidasya prati rodasī ubhe //1 //*
*adhā manye bṛhadasūryamasya yāni dādhāra nakirā mināti /*
*divedive sūryo darśato bhūdvi sadmānyurviyā sukraturdhāt //2 //*
*adyā chinnū chittadapo nadīnāṁ yadābhyo arado gātumindra /*
*ni parvatā admasado na sedustvayā ddaḷhāni sukrato rajāṁsi //3 //*
*satyamittanna tvāvām̐ anyo astīndra devo na martyo jyāyān /*
*ahannahiṁ pariśayānamarṇo'vāsṛjo apo achchhā samudram //4 //*
*tvamapo vi duro viṣūchīrindra dṛḷhamarujaḥ parvatasya /*
*rājābhavo jagataścharṣaṇīnāṁ sākaṁ sūryaṁ janayan dyāmuṣāsam //5 //*

ऋ. (Rv.) ६.३७.१-५

अर्वाग्रथं विश्ववारं त उग्रेन्द्र युक्तासो हरयो वहन्तु ।
कीरिश्चिद्धि त्वा हवते स्वर्वानृधीमहि सधमादस्ते अद्य ॥१॥
प्रो द्रोणे हरयः कर्माग्मन्पुनानास ऋज्यन्तो अभूवन् ।
इन्द्रो नो अस्य पूर्व्यः पपीयाद् द्युक्षो मदस्य सोम्यस्य राजा ॥२॥
आसस्राणासः शवसानमच्छेन्द्रं सुचक्रे रथ्यासो अश्वाः ।
अभि श्रव ऋज्यन्तो वहेयुर्नू चिन्नु वायोरमृतं वि दस्येत् ॥३॥
वरिष्ठो अस्य दक्षिणामियर्तीन्द्रो मघोनां तुविकूर्मितमः ।
यया वज्रिवः पारयास्यंहो मघा च धृष्णो दयसे वि सूरीन् ॥४॥
इन्द्रो वाजस्य स्थविरस्य दातेन्द्रो गीर्भिर्वर्धतां वृद्धमहाः ।
इन्द्रो वृत्रं हनिष्ठो अस्तु सत्वा ता सूरिः पृणति तूतुजानः ॥५॥
*arvāgrathaṁ viśvavāraṁ ta ugrendra yuktāso harayo vahantu /*

*kīriśchiddhi tvā havate svarvānṛdhīmahi sadhamādaste adya ॥1॥*
*pro droṇe harayaḥ karmāgmanpunānāsa ṛjyanto abhūvan ।*
*indro no asya pūrvyaḥ papīyād dyukṣo madasya somyasya rājā ॥2॥*
*āsasrāṇāsaḥ śavasānamachchhendraṁ suchakre rathyāso aśvāḥ ।*
*abhi śrava ṛjyanto vaheyurnū chinnu vāyoramṛtaṁ vi dasyet ॥3॥*
*variṣṭho asya dakṣiṇāmiyartīndo maghonāṁ tuvikūrmitamaḥ ।*
*yayā vajrivaḥ pārayāsyaṁho maghā cha dhṛṣṇo dayase vi sūrīn ॥4॥*
*indro vājasya sthavirasya dātendro gīrbhirvardhatāṁ vṛddhamahāḥ ।*
*indro vṛtraṁ haniṣṭho astu satvā tā sūriḥ pṛṇati tṛtujānaḥ ॥5॥*

ऋ. (Rv.) ६.३८.१-५

अपादित उदु नश्चित्रतमो महीं भर्षद् द्युमतीमिन्द्रहूतिम् ।
पन्यसीं धीतिं दैव्यस्य यामज्जनस्य रातिं वनते सुदानुः ॥१॥
दूराच्चिदा वसतो अस्य कर्णा घोषादिन्द्रस्य तन्यति ब्रुवाणः ।
एयमेनं देवहूतिर्ववृत्यान्मद्र्य१ गिन्दमियमृच्यमाना ॥२॥
तं वो धिया परमया पुराजामजरमिन्द्रमभ्यनूष्यर्कैः ।
ब्रह्मा च गिरो दधिरे समस्मिन्महाँश्च स्तोमो अधि वर्धदिन्द्रे ॥३॥
वर्धाद्यं यज्ञ उत सोम इन्द्र वर्धाद् ब्रह्म गिर उक्था च मन्म ।
वर्धाहैनमुषसो यामन्नक्तोर्वर्धान्मासाः शरदो द्याव इन्द्रम् ॥४॥
एवा जज्ञानं सहसे असामि वावृधानं राधसे च श्रुताय ।
महामुग्रमवसे विप्र नूनमा विवासेम वृत्रतूर्येषु ॥५॥

*apādita udu naśchitratamo mahīṁ bharṣad dyumatīmindrahūtim ।*
*panyasīṁ dhītiṁ daivyasya yāmajjanasya rātiṁ vanate sudānuḥ ॥1॥*
*dūrāchchidā vasato asya karṇā ghoṣādindrasya tanyati bruvāṇaḥ ।*
*eyamenaṁ devahūtirvavṛtyānmadyra1 gindamiyamṛchyamānā ॥2॥*
*taṁ vo dhiyā paramayā purājāmajaramindramabhyanūṣyarkaiḥ ।*
*brahmā cha giro dadhire samasminmahāṁścha stomo adhi vardhadindre ॥3॥*
*vardhādyaṁ yajña uta soma indra vardhād brahma gira ukthā cha manma ।*
*vardhāhainamuṣaso yāmannaktorvardhānmāsāḥ śarado dyāva indram ॥4॥*
*evā jajñānaṁ sahase asāmi vāvṛdhānaṁ rādhase cha śrutāya ।*
*mahāmugramavase vipra nūnamā vivāsema vṛtratūryeṣu ॥5॥*

ऋ. (Rv.) ६.३९.१-५

मन्द्रस्य कवेर्दिव्यस्य वह्नेर्विप्रमन्मनो वचनस्य मध्वः ।
अपा नस्तस्य सचनस्य देवेषो युवस्व गृणते गोअग्राः ॥१॥
अयमुशानः पर्यद्रिमुस्रा ऋतधीतिभिर्ऋतयुग्युजानः ।
रुजदरुग्णं वि वलस्य सानुं पणीँर्वचोभिरभि योधदिन्द्रः ॥२॥
अयं द्योतयदद्युतो व्य१क्तून्दोषा वस्तोः शरद इन्दुरिन्द्र ।
इमं केतुमदधुर्नू चिदह्नां शुचिजन्मन उषसश्चकार ॥३॥
अयं रोचयदरुचो रुचानो३यं वासयद् व्यृ१तेन पूर्वीः ।
अयमीयत ऋतयुग्भिरश्वैः स्वर्विदा नाभिना चर्षणिप्राः ॥४॥
न गृणानो गृणते प्रत्न राजन्निषः पिन्व वसुदेयाय पूर्वीः ।
अप ओषधीरविषा वनानि गा अर्वतो नॄनृचसे रिरीहि ॥५॥

*mandrasya kaverdivyasya vahnervipramanmano vachanasya madhvaḥ ।*
*apā nastasya sachanasya deveṣo yuvasva gṛṇate goagrāḥ ॥1॥*
*ayamuśānaḥ paryadrimusrā ṛtadhītibhirṛtayugyujānaḥ ।*
*rujadarugṇaṁ vi valasya sānuṁ paṇīṁrvachobhirabhi yodhadindraḥ ॥2॥*
*ayaṁ dyotayadadyuto vya1ktūndoṣā vastoḥ śarada indurindra ।*
*imaṁ ketumadadhurnū chidahnāṁ śuchijanmana uṣasaśchakāra ॥3॥*
*ayaṁ rochayadarucho ruchāno3yaṁ vāsayad vyṛ1tena pūrvīḥ ।*
*ayamīyata ṛtayugbhiraśvaiḥ svarvidā nābhinā charṣaṇiprāḥ ॥4॥*
*na gṛṇāno gṛṇate pratna rājanniṣaḥ pinva vasudeyāya pūrvīḥ ।*
*apa oṣadhīraviṣā vanāni gā arvato nṛnṛchase rirīhi ॥5॥*

ऋ. (Rv.) ६.४०.१-५

इन्द्र पिब तुभ्यं सुतो मदायाव स्य हरी वि मुचा सखाया ।
उत प्र गाय गण आ निषद्याथा यज्ञाय गृणते वयो धाः ॥१॥
अस्य पिब यस्य जज्ञान इन्द्र मदाय क्रत्वे अपिबो विरप्शिन् ।
तमु ते गावो नर आपो अद्रिरिन्दुं समह्यन्पीतये समस्मै ॥२॥
समिद्धे अग्नौ सुत इन्द्र सोम आ त्वा वहन्तु हरयो वहिष्ठाः ।
त्वायता मनसा जोवीमीन्द्रा याहि सुविताय महे नः ॥३॥
आ याहि शश्वादुशता ययाथेन्द्र महा मनसा सोमपेयम् ।
उप ब्रह्माणि श्रृणव इमा नोऽथा ते यज्ञस्तन्वे३ वयो धात् ॥४॥
यदिन्द्र दिवि पार्ये यदृधग्यद्वा स्वे सदने यत्र वासि ।
अतो नो यज्ञमवसे नियुत्वान्त्सजोषाः पाहि गिर्वणो मरुद्भिः ॥५॥

*indra piba tubhyaṁ suto madāyāva sya harī vi muchā sakhāyā /*
*uta pra gāya gaṇa ā niṣadyāthā yajñāya gṛṇate vayo dhāḥ //1//*
*asya piba yasya jajñāna indra madāya kratve apibo virapśin /*
*tamu te gāvo nara āpo adririnduṁ samahyanpītaye samasmai //2//*
*samiddhe agnau suta indra soma ā tvā vahantu harayo vahiṣṭhāḥ /*
*tvāyatā manasā jovīmīndrā yāhi suvitāya mahe naḥ //3//*
*ā yāhi śaśvāduśatā yayāthendra mahā manasā somapeyam /*
*upa brahmāṇi śṛṇava imā no'thā te yajñastanve3 vayo dhāt //4//*
*yadindra divi pārye yadṛdhagyadvā sve sadane yatra vāsi /*
*ato no yajñamavase niyutvāntsajoṣāḥ pāhi girvaṇo marudbhiḥ //5//*

ऋ. (Rv.) ६.४१.१-५

अहेळमान उप याहि यज्ञं तुभ्यं पवन्त इन्दवः सुतासः ।
गावो न वज्रिन्त्स्वमोको अच्छेन्द्रा गहि प्रथमो यज्ञियानाम् ॥१॥
या ते काकुत्सुकृता या वरिष्ठा यया शश्वत्पिबसि मध्व ऊर्मिम् ।
तया पाहि प्र ते अध्वर्युरस्थात्सं ते वज्रो वर्ततामिन्द्र गव्युः ॥२॥
एष द्रप्सो वृषभो विश्वरूप इन्द्राय वृष्णे समकारि सोमः ।
एतं पिब हरिवः स्थातरुग्र यस्येशिषे प्रदिवि यस्ते अन्नम् ॥३॥
सुतः सोमो असुतादिन्द्र वस्यानयं श्रेयाञ्चिकितुषे रणाय।
एतं तितिर्व उप याहि यज्ञं तेन विश्वास्तविषीरा पृणस्व ॥४॥
ह्वयामसि त्वेन्द्र याह्यर्वाङरं ते सोमस्तन्वे भवाति ।
शतक्रतो मादयस्वा सुतेषु प्रास्माँ अव पृतनासु प्र विक्षु॥५॥

*aheḻamāna upa yāhi yajñaṁ tubhyaṁ pavanta indavaḥ sutāsaḥ /*
*gāvo na vajrintsvamoko achchhendrā gahi prathamo yajñiyānām //1//*
*yā te kākutsukṛtā yā variṣṭhā yayā śaśvatpibasi madhva ūrmim /*
*tayā pāhi pra te adhvaryurasthātsaṁ te vajro vartatāmindra gavyuḥ //2//*
*eṣa drapso vṛṣabho viśvarūpa indrāya vṛṣṇe samakāri somaḥ /*
*etaṁ piba harivaḥ sthātarugra yasyeśiṣe pradivi yaste annam //3//*
*sutaḥ somo asutādindra vasyānayaṁ śreyāñchikituṣe raṇāya /*
*etaṁ titirva upa yāhi yajñaṁ tena viśvāstaviṣīrā pṛṇasva //4//*
*hvayāmasi tvendra yāhyarvāṅaraṁ te somastanve bhavāti /*
*śatakrato mādayasvā suteṣu prāsmām̐ ava pṛtanāsu pra vikṣu //5//*

ऋ. (Rv.) ६.४२.१-४

प्रत्यस्मै पिपीषते विश्वानि विदुषे भर । अरंगमाय जग्मयेऽपश्चाद् दध्वने नरे ॥१॥
एमेनं प्रत्येतन सोमेभिः सोमपातमम् । अमत्रोभिऋर्जीषिणमिन्द्रं सुतेभिरिन्दुभिः ॥२॥
यदी सुतेभिरिन्दुभिः सोमेभिः प्रतिभूषथ । वेदा विश्वस्य मेधिरो धृषत्तंतमिदेषते ॥३॥
अस्माअस्मा इदन्धसोऽध्वर्यो प्र भरा सुतम् । कुवित्समस्य जेन्यस्य शर्धतोऽभिशस्तेरवस्परत् ॥४॥

*pratyasmai pipīṣate viśvāni viduṣe bhara /*
*araṁgamāya jagmaye'paśchād dadhvane nare //1//*
*emenaṁ pratyetana somebhiḥ somapātamam /*

*amatrobhirṛjīṣiṇamindraṁ sutebhirindubhiḥ //2 //*
*yadī sutebhirindubhiḥ somebhiḥ pratibhūṣatha /*
*vedā viśvasya medhiro dhṛṣattaṁtamideṣate //3 //*
*asmāasmā idandhaso'dhvaryo pra bharā sutam /*
*kuvitsamasya jenyasya śardhato'bhiśasteravasparat //4 //*

ऋ. (Rv.) ६.४३.१-४

यस्य त्यच्म्बरं मदे दिवोदासाय रन्धयः। अयं स सोम इन्द्र ते सुतः पिब ॥१॥
यस्य तीव्रसुतं मदं मध्यमन्तं च रक्षसे। अयं स सोम इन्द्र ते सुतः पिब ॥२॥
यस्य गा अन्तरश्मनो मदे दृळ्हा अवासृजः। अयं स सोम इन्द्र ते सुतः पिब ॥३॥
यस्य मन्दानो अन्धसो माघोनं दधिषे शवः। अयं स सोम इन्द्र ते सुतः पिब ॥४॥
*yasya tyachmbaraṁ made divodāsāya randhayaḥ / ayaṁ sa soma indra te sutaḥ piba //1 //*
*yasya tīvrasutaṁ madaṁ madhyamantaṁ cha rakṣase /*
*ayaṁ sa soma indra te sutaḥ piba //2 //*
*yasya gā antaraśmano made dṛḷhā avāsṛjaḥ / ayaṁ sa soma indra te sutaḥ piba //3 //*
*yasya mandāno andhaso māghonaṁ dadhiṣe śavaḥ /*
*ayaṁ sa soma indra te sutaḥ piba //4 //*

सा. (Sv.) ३५२

प्रत्यस्मै पिपीषते विश्वानि विदुषे भर। अरंगमाय जग्मयेऽपश्चादध्वने नरः ॥१॥
*pratyasmai pipīṣate viśvāni viduṣe bhara /*
*araṁgamāya jagmaye'paśchādadhvane naraḥ //1 //*

सा. (Sv.) ३९२

यस्य त्यच्छम्बरं मदे दिवोदासाय रन्धयन्। अयं स सोम इन्द्र ते सुतः पिब ॥२॥
*yasya tyachchhambaraṁ made divodāsāya randhayan /*
*ayaṁ sa soma indra te sutaḥ piba //2 //*

सा. (Sv.) ११४०-११४२

मूर्धनं दिवो अरति पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
कविं सम्राजमतिथिं जनानामासन्नः पात्रं जनयन्त देवाः ॥१॥
त्वां विश्वे अमृतं जायमानं शिशुं न देवा अभि सं नवन्ते ।
तव क्रतुभिरमृतत्वमायन् वैश्वानर यत्पित्रोरदीदेः ॥२॥
नाभि यज्ञानां सदनं रयीणां महामाहावमभि सं नवन्त ।
वैश्वानरं रथ्यमध्वराणां यज्ञस्य केतुं जनयन्त देवाः ॥३॥
*mūrdhanaṁ divo arati pṛthivyā vaiśvānaramṛta ā jātamagnim /*
*kaviṁ samrājamatithiṁ janānāmāsannaḥ pātraṁ janayanta devāḥ //1 //*
*tvāṁ viśve amṛtaṁ jāyamānaṁ śiśuṁ na devā abhi saṁ navante /*
*tava kratubhiramṛtatvamāyan vaiśvānara yatpitroradīdeḥ //2 //*
*nābhi yajñānāṁ sadanaṁ rayīṇāṁ mahāmāhāvamabhi saṁ navanta /*
*vaiśvānaraṁ rathyamadhvarāṇāṁ yajñasya ketuṁ janayanta devāḥ //3 //*

सा. (Sv.) ११४९-११५१

तमीडिष्व यो अर्चिषा वना विश्वा परिष्वजत्। कृष्णा कृणोति जिह्वया ॥१॥
य इद्ध आविवासति सुम्नमिन्द्रस्य मर्त्यः। द्युम्नाय सुतरा अपः ॥२॥
ता नो वाजवतीरिष आशून् पिपृतमर्वतः। एन्द्रमग्निं च वोढवे ॥३॥
*tamīḍiṣva yo archiṣā vanā viśvā pariṣvajat / kṛṣṇā kṛṇoti jihvayā //1 //*
*ya iddha āvivāsati sumnamindrasya martyaḥ / dyumnāya sutarā apaḥ //2 //*
*tā no vājavatīriṣa āśūn pipṛtamarvataḥ / endramagiṁna cha voḍhave //3 //*

सा. (Sv.) १४४०-१४४३

प्रत्यस्मै पिपीषते विश्वानि विदुषे भर ।
अरंगमाय जग्मयेऽपश्चदध्वने नरः ॥१॥
एमेनं प्रत्येतन सोमेभिः सोमपातमम् ।
अमत्रेभिऋर्जीषिणमिन्द्रं सुतेभिरिन्दुभिः ॥२॥

यदी सुतेभिरिन्दुभिः सोमेभिः प्रतिभूषथ ।
वेदा विश्वस्य मेधिरो धृषत्तंतमिदेषते ॥३॥
अस्माअस्मा इदन्धसोऽध्वर्यो प्र भरा सुतम् ।
कुवित्समस्य जेन्यस्य शर्धतोऽभिशस्तेरवस्वरत् ॥४॥
*pratyasmai pipīṣate viśvāni viduṣe bhara /*
*araṁgamāya jagmaye'paśchadadhvane naraḥ //1 //*
*emenaṁ pratyetana somebhiḥ somapātamam /*
*amatrebhirṛjīṣiṇamindraṁ sutebhirindubhiḥ //2 //*
*yadī sutebhirindubhiḥ somebhiḥ pratibhūṣatha /*
*vedā viśvasya medhiro dhṛṣattaṁtamideṣate //3 //*
*asmāasmā idandhaso'dhvaryo pra bharā sutam /*
*kuvitsamasya jenyasya śardhato'bhiśasteravasvarat //4 //*

५. अग्निः (ऋसर्व. ६.२.४) इन्द्रः (साग्री. सास्वा. सार्षेदी.) (Agniḥ [Rss. 6.2.4) Indraḥ [Ssb. Sas.Sad.]) - सा. (Sv.) ३६५

स घा यस्ते दिवो नरो धिया मर्तस्य शमतः ।
ऊती स बृहतो दिवो द्विषो अंहो न तरति ॥६॥
*sa ghā yaste divo naro dhiyā martasya śamataḥ /*
*ūtī sa bṛhato divo dviṣo aṁho na tarati //6 //*

६. अग्निः (साग्री. सास्वा.) वैष्वानरः (सार्षेदी.) (Agniḥ [Ssb. Sas.] Vaiṣvānaraḥ [Sad.]) - सा. (Sv.) ६०९

प्रक्षस्य वृष्णो अरुषस्य नू महः प्र नो वचो विदथा जातवेदसे ।
वैश्वानराय मतिर्नव्यसे शुचिः सोम इव पवते चारुरग्नये ॥८॥
*prakṣasya vṛṣṇo aruṣasya nū mahaḥ pra no vacho vidathā jātavedase /*
*vaiśvānarāya matirnavyase śuchiḥ soma iva pavate chāruragnaye //8 //*

७. इन्द्रः (Indraḥ) - सा. (Sv.) ३५२; ३९२; ११४०-११४२; ११४९-११५१; १४४०-१४४३

सा. (Sv.) ३५२

प्रत्यस्मै पिपीषते विश्वानि विदुषे भर। अरंगमाय जग्मयेऽपश्चादध्वने नरः ॥१॥
*pratyasmai pipīṣate viśvāni viduṣe bhara /*
*araṁgamāya jagmaye'paśchādadhvane naraḥ //1 //*

सा. (Sv.) ३९२

यस्य त्यच्छम्बरं मदे दिवोदासाय रन्धयन्। अयं स सोम इन्द्र ते सुतः पिब ॥२॥
*yasya tyachchhambaraṁ made divodāsāya randhayan /*
*ayaṁ sa soma indra te sutaḥ piba //2 //*

सा. (Sv.) ११४०-११४२

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
कविं सम्राजमतिथिं जनानामासन्नः पात्रं जनयन्त देवाः ॥१॥
त्वां विश्वे अमृत जायमानं शिशुं न देवा अभि सं नवन्ते ।
तव क्रतुभिरमृतत्वमायन् वैश्वानर यत्पित्रोरदीदेः ॥२॥
नाभिं यज्ञानां सदनं रयीणां महामहावमभि सं नवन्त ।
वैश्वानरं रथ्यमध्वराणां यज्ञस्य केतुं जनयन्त देवाः ॥३॥
*mūrdhānaṁ divo aratiṁ pṛthivyā vaiśvānaramṛta ā jātamagnim /*
*kaviṁ samrājamatithiṁ janānāmāsannaḥ pātraṁ janayanta devāḥ //1 //*
*tvāṁ viśve amṛta jāyamānaṁ śiśuṁ na devā abhi saṁ navante /*
*tava kratubhiramṛtatvamāyan vaiśvānara yatpitroradīdeḥ //2 //*
*nābhiṁ yajñānāṁ sadanaṁ rayīṇāṁ mahāmahāvamabhi saṁ navanta /*
*vaiśvānaraṁ rathyamadhvarāṇāṁ yajñasya ketuṁ janayanta devāḥ //3 //*

सा. (Sv.) ११४९-११५१

तमीडिष्व यो अर्चिषा वना विश्वा परिष्वजत्। कृष्णा कृणोति जिह्वया ॥१॥

य इद्ध आविवासति सुम्नमिन्द्रस्य मर्त्यः। द्युम्नाय सुतरा अपः ॥२॥
ता नो वाजवतीरिष आशून् पिपृतमर्वतः। एन्द्रमग्निं च वोढवे ॥३॥
*tamīḍiṣva yo archiṣā vanā viśvā pariṣvajat I kṛṣṇā kṛṇoti jihvayā II1 II*
*ya iddha āvivāsati sumnamindrasya martyaḥ I dyumnāya sutarā apaḥ II2 II*
*tā no vājavatīriṣa āśūn pipṛtamarvataḥ I endramagiṁna cha voḍhave II3 II*

सा. (Sv.) १४४०-१४४३

प्रत्यस्मै पिपीषते विश्वानि विदुषे भर। अरंगमाय जग्मयेऽपश्चाद्दध्वने नरः ॥१॥
एमेनं प्रत्येतन सोमेभिः सोमपातमम्। अमत्रेभिर्ऋजीषिणमिन्द्रं सुतेभिरिन्दुभिः ॥२॥
यदी सुतेभिरिन्दुभिः सोमेभिः प्रतिभूषथ। वेदा विश्वस्य मेधिरो धृषत्ततमिदेषते ॥३॥
अस्माअस्मा इदन्धसोऽध्वर्यो प्र भरा सुतम्। कुवित्समस्य जेन्यस्य शर्धतोऽभिशस्तेरवस्वरत् ॥४॥
*pratyasmai pipīṣate viśvāni viduṣe bhara I*
*araṁgamāya jagmaye'paśchādadhvane naraḥ II1 II*
*emenaṁ pratyetana somebhiḥ somapātamam I*
*amatrebhirṛjīṣiṇamindraṁ sutebhirindubhiḥ II2 II*
*yadī sutebhirindubhiḥ somebhiḥ pratibhūṣatha I*
*vedā viśvasya medhiro dhṛṣattatamideṣate II3 II*
*asmāasmā idandhaso'dhvaryo pra bharā sutam I*
*kuvitsamasya jenyasya śardhato'bhiśasteravasvarat II4 II*

८. इन्द्रः (साग्री. सास्वा.) इन्द्रापूषणो (सार्षेदी.) (Indraḥ [Ssb. Sas.] Indrāpūṣaṇo [Sad.]) - सा. (Sv.) २०२

इन्द्रा नु पूषणा वयं सख्माय स्वस्तये। हुवेम वाजसातये ॥९॥
*indrā nu pūṣaṇā vayaṁ sakhmāya svastaye I huvema vājasātaye II9 II*

९. इन्द्रः (साग्री. सास्वा.) उषा (सार्षेदी.) (Indraḥ [Ssb. Sas.] Uṣā [Sad.]) - सा. (Sv.) ४५४

अया वाजं देवहितं सनेम मदेम शतहिमाः सुवीराः ॥८॥
*ayā vājaṁ devahitaṁ sanema madema śatahimāḥ suvīrāḥ II8 II*

१०. इन्द्रः (साग्री. सास्वा.) इन्द्राग्नी (सार्षेदी. ऋसर्व.) (Indraḥ [Ssb. Sas.] Indrāgnī [Sad. Rss.)) - सा. (Sv.) २८१

इन्द्राग्नी अपादियं पूर्वागात्पद्वतीभ्यः।
हित्वा शिरो जिह्वया रारपच्चरत् त्रिंशत्पदा न्यक्रमीत् ॥९॥
*indrāgnī apādiyaṁ pūrvāgātpadvatībhyaḥ I*
*hitvā śiro jihvayā rārapachcharat triṁśatpadā nyakramīt II9 II*

११. इन्द्राग्नी (Indrāgnī) - ऋ. (Rv.) ६.५९.१-१०; ६.६०.१-१५; सा. (Sv.) ८५३-८५५; ९९१-९९३

ऋ. (Rv.) ६.५९.१-१०; ६.६०.१-१५

प्र नु वोचा सुतेषु वां वीर्या३ यानि चक्रथुः ।
हतासो वां पितरो देवशत्रव इन्द्राग्नी जीवथो युवम्॥१॥
वळित्था महिमा वामिन्द्राग्नी पनिष्ठ आ ।
समानो वां जनिता भ्रातरा युवं यमाविहेहमातरा ॥२॥
ओकिवांसा सुते सचाँ अश्वा सप्ती इवादने ।
इन्द्रान्व१ग्नी अवसेह वज्रिणा वयं देवा हवामहे ॥३॥
य इन्द्राग्नी सुतेषु वां स्तवत्तेष्वृतावृधा ।
जोषवाकं वदतः पज्रहोषिणा न देवा भसथश्चन ॥४॥
इन्द्राग्नी को अस्य वां देवौ मर्तश्चिकेतति ।
विषूचो अश्वान्युयुजान ईयत एकः समान आ रथे ॥५॥
इन्द्राग्नी अपादियं पूर्वागात्पद्वतीभ्यः ।
हित्वी शिरो जिह्वया वावदच्चरत्त्रिंशत्पदा न्यक्रमीत्॥६॥
इन्द्राग्नी आ हि तन्वते नरो धन्वानि बाह्वोः ।
मा नो अस्मिन्महाधने परा वर्क्तं गविष्टिषु ॥७॥

इन्द्राग्नी युवोरपि वसु दिव्यानि पार्थिवा ।
आ न इह प्र यच्छतं रयिं विश्वायुपोषसम् ॥९॥
इन्द्राग्नी उक्थवाहसा स्तोमेभिर्हवनश्रुता ।
विश्वाभिर्गीर्भिरा गतमस्य सोमस्य पीतये ॥१०॥
*pra nu vochā suteṣu vāṁ vīryā3 yāni chakrathuḥ /*
*hatāso vāṁ pitaro devaśatrava indrāgnī jīvatho yuvam //1 //*
*vaḷitthā mahimā vāmindrāgnī paniṣṭha ā /*
*samāno vāṁ janitā bhrātarā yuvaṁ yamāvihehamātarā //2 //*
*okivāṁsā sute sachāṁ aśvā saptī ivādane /*
*indrānva1gnī avaseha vajriṇā vayaṁ devā havāmahe //3 //*
*ya indrāgnī suteṣu vāṁ stavatteṣvṛtāvṛdhā /*
*joṣavākaṁ vadataḥ pajrahoṣiṇā na devā bhasathaśchana //4 //*
*indrāgnī ko asya vāṁ devau martaśchiketati /*
*viṣūcho aśvanyuyujāna īyata ekaḥ samāna ā rathe //5 //*
*indrāgnī apādiyaṁ pūrvāgātpadvatībhyaḥ /*
*hitvī śiro jihvayā vāvadachcharattriṁśatpadā nyakramīt //6 //*
*indrāgnī ā hi tanvate naro dhanvāni bāhvoḥ /*
*mā no asminmahādhane parā varktaṁ gaviṣṭiṣu //7 //*
*indrāgnī yuvorapi vasu divyāni pārthivā /*
*ā na iha pra yachchhataṁ rayiṁ viśvāyupoṣasam //9 //*
*indrāgnī ukthavāhasā stomebhirhavanaśrutā /*
*viśvābhirgīrbhirā gatamasya somasya pītaye //10 //*

ऋ. (Rv.) ६.६०.१-१५

श्नथद्वृत्रमुत सनोति वाजमिन्द्रा यो अग्नी सहुरी सपर्यात् ।
इरज्यन्ता वसव्यस्य भूरेः सहस्तमा सहसा वाजयन्ता ॥१॥
ता योधिष्टमभि गा इन्द्र नूनमपः स्वरुषसो अग्न ऊळ्हाः ।
दिशः स्वरुषस इन्द्र चित्रा अपो गा अग्ने युवसे नियुत्वान् ॥२॥
आ वृत्रहणा वृत्रहभिः शुष्मैरिन्द्र यातं नमोभिरग्ने अर्वाक् ।
युवं राधोभिरकवेभिरिन्द्राग्ने अस्मे भवतमुत्तमेभिः ॥३॥
ता हुवे ययोरिदं पप्ने विश्वं पुरा कृतम् । इन्द्राग्नी न मर्धतः ॥४॥
उग्रा विघनिना मृध इन्द्राग्नी हवामहे । ता नो मृळात् ईदृशे ॥५॥
हतो वृत्राण्यार्या हतो दासानि सत्पती । हतो विश्वा अप द्विषः ॥६॥
इन्द्राग्नी युवामिमे३भि स्तोमा अनूषत । पिबतं शंभुवा सुतम् ॥७॥
या वां सन्ति पुरुस्पृहो नियुतो दाशुषे नरा । इन्द्राग्नी ताभिरा गतम् ॥८॥
ताभिरा गच्छतं नरोपेदं सवनं सुतम् । इन्द्राग्नी सोमपीतये ॥९॥
तमीळिष्व यो अर्चिषा वना विश्वा परिष्वजत् । कृष्णा कृणोति जिह्वया ॥१०॥
य इद्ध आविवासति सुम्नमिन्द्रस्य मर्त्यः । द्युम्नाय सुतरा अपः ॥११॥
ता नो वजवतीरिष आशून्पिपृतमर्वतः । इन्द्रमग्निं च बोळ्हवे ॥१२॥
उभा वामिन्द्राग्नी आहुवध्या उभा राधसः सह मादयध्यै ।
उभा दाताराविषां रयीणामुभा वाजस्य सातये हुवे वाम् ॥१३॥
आ नो गव्येभिरश्व्यैर्वसव्यै३ रुप गच्छतम् ।
सखायो देवौ सख्याय शंभूवेन्द्राग्नी ता हवामहे ॥१४॥
इन्द्राग्नी श्रृणुतं हवं यजमानस्य सुन्वतः । वीतं हव्यान्या गतं पिबतं सोम्यं मधु ॥१५॥
*śnathadvṛtramuta sanoti vājamindrā yo agnī sahurī saparyāt /*
*irajyantā vasavyasya bhūreḥ sahastamā sahasā vājayantā //1 //*
*tā yodhiṣṭamabhi gā indra nūnamapaḥ svaruṣaso agna ūḷhāḥ /*
*diśaḥ svaruṣasa indra chitrā apo gā agne yuvase niyutvān //2 //*
*ā vṛtrahaṇā vṛtrahabhiḥ śuṣmairindra yātaṁ namobhiragne arvāk /*
*yuvaṁ rādhobhirakavebhirindrāgne asme bhavatamuttamebhiḥ //3 //*
*tā huve yayoridaṁ papne viśvaṁ purā kṛtam / indrāgnī na mardhataḥ //4 //*
*ugrā vighaninā mṛdha indrāgnī havāmahe / tā no mṛḷāt īdṛśe //5 //*

*hato vṛtrāṇyāryā hato dāsāni satpatī । hato viśvā apa dviṣaḥ ॥6 ॥*
*indrāgnī yuvāmime3bhi stomā anūṣata । pibataṁ śaṁbhuvā sutam ॥7 ॥*
*yā vāṁ santi puruspṛho niyuto dāśuṣe narā । indrāgnī tābhirā gatam ॥8 ॥*
*tābhirā gachchhataṁ naropedaṁ savanaṁ sutam । indrāgnī somapītaye ॥9 ॥*
*tamīḻiṣva yo archiṣā vanā viśvā pariṣvajat । kṛṣṇā kṛṇoti jihvayā ॥10 ॥*
*ya iddha āvivāsati sumnamindrasya martyaḥ । dyumnāya sutarā apaḥ ॥11 ॥*
*tā no vajavatīriṣa āśūnpipṛtamarvataḥ । indramagiṁna cha boḻhave ॥12 ॥*
*ubhā vāmindrāgnī āhuvadhyā ubhā rādhasaḥ saha mādayadhyai ।*
*ubhā dātārāviṣāṁ rayīṇāmubhā vājasya sātaye huve vām ॥13 ॥*
*ā no gavyebhiraśvyairvasavyai3 rupa gachchhatam ।*
*sakhāyo devau sakhyāya śaṁbhūvendrāgnī tā havāmahe ॥14 ॥*
*indrāgnī śṛṇutaṁ havaṁ yajamānasya sunvataḥ ।*
*vītaṁ havyānyā gataṁ pibataṁ somyaṁ madhu ॥15 ॥*

सा. (Sv.) ८५३-८५५

ता हुवे ययोरिदं पप्ने विश्वं पुरा कृतम्। इन्द्राग्नी न मर्धतः ॥१॥
उग्रा विघनिना मृध इन्द्राग्नी हवामहे। ता नो मृडात ईदृशे ॥२॥
हथो वृत्राण्यार्या हथो दासानि सत्पती। हथो विश्वा अप द्विषः ॥३॥
*tā huve yayoridaṁ papne viśvaṁ purā kṛtam । indrāgnī na mardhataḥ ॥1 ॥*
*ugrā vighaninā mṛdha indrāgnī havāmahe । tā no mṛḍāta īdṛśe ॥2 ॥*
*hatho vṛtrāṇyāryā hatho dāsāni satpatī । hatho viśvā apa dviṣaḥ ॥3 ॥*

सा. (Sv.) ९९१-९९३

इन्द्राग्नी युवामिमे३ऽभि स्तोमा अनूषत। पिबतं शम्भुवा सुतम् ॥१॥
या वां सन्ति पुरुस्पृहो नियुतो दाशुषेः नरा। इन्द्राग्नी ताभिरा गतम् ॥२॥
ताभिरा गच्छतं नरोपेदं सवनं सुतम्। इन्द्राग्नी सोमपीतये ॥३॥
*indrāgnī yuvāmime3'bhi stomā anūṣata । pibataṁ śambhuvā sutam ॥1 ॥*
*yā vāṁ santi puruspṛho niyuto dāśuṣeḥ narā । indrāgnī tābhirā gatam ॥2 ॥*
*tābhirā gachchhataṁ naropedaṁ savanaṁ sutam । indrāgnī somapītaye ॥3 ॥*

१२. इन्द्रा पूषणौ (Indrā Pūṣaṇau) - ऋ. (Rv.) ६.५७.१-६

य एनमादिदेशति करम्भादिति पूषणम्। न तेन देव आदिशे ॥१॥
उत घा स रथीतमः सख्या सत्पतिर्युजा। इन्द्रो वृत्राणि जिघ्नते ॥२॥
उतादः परुषे गवि सूरश्चक्रं हिरण्ययम्। न्यैरयद्रथीतमः ॥३॥
यदद्य त्वा पुरुष्टुत ब्रवाम दस्र मन्तुमः। तत्सु नो मन्म साधय॥४॥
इमं नो गवेषणं सातये सीषधो गणम्। आरात् पूषन्नसि श्रुतः ॥५॥
आ ते स्वस्तिमीमह आरे अघामुपावसुम्। अद्या च सर्वतातये ॥६॥
*ya enamādideśati karambhāditi pūṣaṇam । na tena deva ādiśe ॥1 ॥*
*uta ghā sa rathītamaḥ sakhyā satpatiryujā । indro vṛtrāṇi jighnate ॥2 ॥*
*utādaḥ paruṣe gavi sūraśchakraṁ hiraṇyayam । nyairayadrathītamaḥ ॥3 ॥*
*yadadya tvā puruṣṭuta bravāma dasra mantumaḥ । tatsu no manma sādhaya ॥4 ॥*
*imaṁ no gaveṣaṇaṁ sātaye sīṣadho gaṇam । ārāt pūṣannasi śrutaḥ ॥5 ॥*
*ā te svastimīmaha āre aghāmupāvasum । adyā cha sarvatātaye ॥6 ॥*

१३. इन्द्रावरुणौ (Indrāvaruṇau) - ऋ. (Rv.) ६.६८.१-११

श्रुष्टी वां यज्ञ उद्यतः सजोषा मनुष्वद् वृक्तबर्हिषो यजध्यै ।
आ य इन्द्रावरुणाविषे अद्य महे सुम्नाय मह आववर्तत् ॥१॥
ता हि श्रेष्ठा देवताता तुजा शूराणां शविष्ठा ता हि भूतम् ।
मघोनां मंहिष्ठा तुविशुष्म ऋतेन वृत्रतुरा सर्वसेना ॥२॥
ता गृणीहि नमस्येभिः शूषैः सुम्नेभिरिन्द्रावरुणा चकाना ।
वज्रेणान्यः शवसा हन्ति वृत्रं सिषक्त्यन्यो वृजनेषु विप्रः ॥३॥
ग्नाश्च यन्नरश्च वावृधन्त विश्वे देवासो नरां स्वगूर्ताः ।
प्रैभ्य इन्द्रावरुणा महित्वा द्यौश्च पृथिवी भूतमुर्वि ॥४॥

स इत्सुदानुः स्ववाँ ऋतावेन्द्रा यो वां वरुण दशति त्मन् ।
इषा स द्विषस्तरेद्दास्वान्वंसद् रयिं रयिवतश्च जनान् ॥५॥
यं युवं दाश्वध्वराय देवा रयिं धत्थो वसुमन्तं पुरुक्षुम् ।
अस्मे स इन्द्रावरुणावपि ष्यात्प्र यो भनक्ति वनुषामशस्तीः ॥६॥
उत नः सुत्रात्रो देवगोपाः सूरिभ्य इन्द्रावरुणा रयिः ष्यात् ।
येषां शुष्मः पृतनासु साह्वान्प्र सद्यो द्युम्ना तिरते ततुरिः ॥७॥
नू न इन्द्रावरुणा गृणानां पृङ्क्तं रयिं सौश्रवसाय देवा ।
इत्था गृणन्तो महिनस्य शर्धोऽपो न नावा दुरिता तरेम ॥८॥
प्र सम्राजे बृहते मन्म नु प्रियमर्च देवाय वरुणाय सप्रथः ।
अयं य उर्वी महिना महिव्रतः क्रत्वा विभात्यजरो न शोचिषा ॥९॥
इन्द्रावरुणा सुतपाविमं सुतं सोमं पिबतं मद्यं धृतव्रता ।
युवो रथो अध्वरं देववीतये प्रति स्वसरमुप याति पीतये ॥१०॥
इन्द्रावरुणा मधुमत्तमस्य वृष्णः सोमस्य वृषणा वृषेथाम् ।
इदं वामन्धः परिषिक्तमस्मे आसद्यास्मिन्बर्हिषि मादयेथाम् ॥११॥
*śruṣṭī vāṁ yajña udyataḥ sajoṣā manuṣvad vṛktabarhiṣo yajadhyai /*
*ā ya indrāvaruṇāviṣe adya mahe sumnāya maha āvavartat //1 //*
*tā hi śreṣṭhā devatātā tujā śūrāṇāṁ śaviṣṭhā tā hi bhūtam /*
*maghonāṁ maṁhiṣṭhā tuviśuṣma ṛtena vṛtraturā sarvasenā //2 //*
*tā gṛṇīhi namasyebhiḥ śūṣaiḥ sumnebhirindrāvaruṇā chakānā /*
*vajreṇānyaḥ śavasā hanti vṛtraṁ siṣaktyanyo vṛjaneṣu vipraḥ //3 //*
*gnāścha yannaraścha vāvṛdhanta viśve devāso narāṁ svagūrtāḥ /*
*praibhya indrāvaruṇā mahitvā dyauścha pṛthivī bhūtamurvi //4 //*
*sa itsudānuḥ svavām̐ ṛtāvendrā yo vāṁ varuṇa daśati tman /*
*iṣā sa dviṣastareddāsvānvaṁsad rayiṁ rayivataścha janān //5 //*
*yaṁ yuvaṁ dāśvadhvarāya devā rayiṁ dhattho vasumantaṁ purukṣum /*
*asme sa indrāvaruṇāvapi ṣyātpra yo bhanakti vanuṣāmaśastīḥ //6 //*
*uta naḥ sutrātro devagopāḥ sūribhya indrāvaruṇā rayiḥ ṣyāt /*
*yeṣāṁ śuṣmaḥ pṛtanāsu sāhvānpra sadyo dyumnā tirate taturiḥ //7 //*
*nū na indrāvaruṇā gṛṇānāṁ pṛṅktaṁ rayiṁ sauśravasāya devā /*
*itthā gṛṇanto mahinasya śardho'po na nāvā duritā tarema //8 //*
*pra samrāje bṛhate manma nu priyamarcha devāya varuṇāya saprathaḥ /*
*ayaṁ ya urvī mahinā mahivrataḥ kratvā vibhātyajaro na śochiṣā //9 //*
*indrāvaruṇā sutapāvimaṁ sutaṁ somaṁ pibataṁ madyaṁ dhṛtavratā /*
*yuvo ratho adhvaraṁ devavītaye prati svasaramupa yāti pītaye //10 //*
*indrāvaruṇā madhumattamasya vṛṣṇaḥ somasya vṛṣaṇā vṛṣethām /*
*idaṁ vāmandhaḥ pariṣiktamasme āsadyāsminbarhiṣi mādayethām //11 //*

१४. इन्द्राविष्णू (Indrāviṣṇū) - ऋ. (Rv.) ६.६९.१-८

सं वां कर्मणा समिषा हिनोमीन्द्राविष्णू अपसस्पारे अस्य ।
जतुषेथां यज्ञं द्रविणं च धत्तमरिष्टैर्नः पथिभीः पारयन्ता ॥१॥
या विश्वासां जनितारा मतीनामिन्द्राविष्णू कलशा सोमधाना ।
प्र वां गिरः शस्यमाना अवन्तु प्र स्तोमासो गीयमानासो अर्कैः ॥२॥
इन्द्राविष्णू मदपती मदानामा सोमं यातं द्रविणो दधाना ।
सं वामञ्जन्त्वक्तुभिर्मतीनां सं स्तोमासः शस्यमानास उक्थैः ॥३॥
आ वामश्वासो अभिमातिषाह इन्द्राविष्णू सधमादो वहन्तु ।
जुषोथां विश्वा हवना मतीनामुप ब्रह्माणि शृणुतं गिरो मे ॥४॥
इन्द्राविष्णू तत्पनयाय्यं वां सोमस्य मद उरु चक्रमाथे ।
अकृणुतमन्तरिक्षं वरीयोऽप्रथतं जीवसे नो रजांसि ॥५॥
इन्द्राविष्णू हविषा वावृधानाग्राद्वाना नमसा रातहव्या ।
घृतासूती द्रविणं धत्तमस्मे समुद्र स्थः कलशः सोमधानः ॥६॥
इन्द्राविष्णू पिबतं मध्वो अस्य सोमस्य दस्रा जठरं पृणेथाम् ।

आ वामन्धांसि मदिराण्यग्मन्नुप ब्रह्माणि श्रृणुतं हवं मे ॥७॥
उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः ।
इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथाम् ॥८॥
*saṁ vāṁ karmaṇā samiṣā hinomīndrāviṣṇū apasaspāre asya /*
*jatuṣethāṁ yajñaṁ draviṇaṁ cha dhattamariṣṭairnaḥ pathibhīḥ pārayantā //1 //*
*yā viśvāsāṁ janitārā matīnāmindrāviṣṇū kalaśā somadhānā /*
*pra vāṁ giraḥ śasyamānā avantu pra stomāso gīyamānāso arkaiḥ //2 //*
*indrāviṣṇū madapatī madānāmā somaṁ yātaṁ draviṇo dadhānā /*
*saṁ vāmajjantvaktubhirmatīnāṁ saṁ stomāsaḥ śasyamānāsa ukthaiḥ //3 //*
*ā vāmaśvāso abhimātiṣāha indrāviṣṇū sadhamādo vahantu /*
*juṣothāṁ viśvā havanā matīnāmupa brahmāṇi śṛṇutaṁ giro me //4 //*
*indrāviṣṇū tatpanayāyyaṁ vāṁ somasya mada uru chakramāthe /*
*akṛṇutamantarikṣaṁ varīyo'prathataṁ jīvase no rajāṁsi //5 //*
*indrāviṣṇū haviṣā vāvṛdhānāgrādvānā namasā rātahavyā /*
*ghṛtāsūtī draviṇaṁ dhattamasme samudra sthaḥ kalaśaḥ somadhānaḥ //6 //*
*indrāviṣṇū pibataṁ madhvo asya somasya dasrā jaṭharaṁ pṛṇethām /*
*ā vāmandhāṁsi madirāṇyagmannupa brahmāṇi śṛṇutaṁ havaṁ me //7 //*
*ubhā jigyathurna parā jayethe na parā jigye kataraśchanainoḥ /*
*indraścha viṣṇo yadapaspṛdhethāṁ tredhā sahasraṁ vi tadairayethām //8 //*

१५. इन्द्रासोमौ (Indrāsomau) - ऋ. (Rv.) ६.७२.१-५

इन्द्रासोमा महि तद्वां महित्वं युवं महानि प्रथमानि चक्रथुः ।
युवं सूर्यं विविदथुर्युवं स्व१ र्विश्वा तमांस्यहतं निदश्च ॥१॥
इन्द्रासोमा वासयथ उषासमुत्सूर्यं नयथो ज्योतिषा सह ।
उप द्यां स्कम्भथुः स्कम्भनेनाप्रथतं पृथिवीं मातरं वि ॥२॥
इन्द्रासोमावहिमपः परिष्ठां हथो वृत्रमनु वां द्यौरमन्यत ।
प्रार्णांस्यैरयतं नदीनामा समुद्राणि पप्रथुः पुरूणि ॥३॥
इन्द्रासोमा पक्वमामास्वन्तर्नि गवामिद्दधथुर्वक्षणासु ।
जगृभथुरनपिनद्धमासु रुशच्चित्रासु जगतीष्वन्तः ॥४॥
इन्द्रासोमा युवमंग तरुत्रमपत्यसाचं श्रुत्यं रराथे ।
युवं शुष्मं नर्यं चर्षणिभ्यः सं विव्यथुः पृतनाषाहमुग्रा ॥५॥
*indrāsomā mahi tadvāṁ mahitvaṁ yuvaṁ mahāni prathamāni chakrathuḥ /*
*yuvaṁ sūryaṁ vividathuryuvaṁ sva1 rviśvā tamāṁsyahataṁ nidaścha //1 //*
*indrāsomā vāsayatha uṣāsamutsūryaṁ nayatho jyotiṣā saha /*
*upa dyāṁ skambhathuḥ skambhanenāprathataṁ pṛthivīṁ mātaraṁ vi //2 //*
*indrāsomāvahimapaḥ pariṣṭhāṁ hatho vṛtramanu vāṁ dyauramanyata /*
*prārṇāṁsyairayataṁ nadīnāmā samudrāṇi paprathuḥ purūṇi //3 //*
*indrāsomā pakvamāmāsvantarni gavāmiddadhathurvakṣaṇāsu /*
*jagṛbhathuranapinaddhamāsu ruśachchitrāsu jagatīṣvantaḥ //4 //*
*indrāsomā yuvamaṁga tarutramapatyasāchaṁ śrutyaṁ rarāthe /*
*yuvaṁ śuṣmaṁ naryaṁ charṣaṇibhyaḥ saṁ vivyathuḥ pṛtanāṣāhamugrā //5 //*

१६. उषा (Uṣā) - ऋ. (Rv.) ६.६४.१-६; ६.६५.१-६

ऋ. (Rv.) ६.६४.१-६

उदु श्रिय उषसो रोचमाना अस्थुरपां नोर्मयो रुशन्तः ।
कृणोति विश्वा सुपथा सुगान्यभूदु वस्वी दक्षिणा मघोनी ॥१॥
भद्रा ददृक्ष उर्विया वि भास्युत्ते शोचिर्भानवो द्यामपप्तन् ।
आविर्वक्षः कृणुषे शुम्भमानोषो देवि रोचमाना महोभिः ॥२॥
वहन्ति सीमरुणासो रुशन्तो गावः सुभगामुर्विया प्रथानाम् ।
अपेजते शूरो अस्तेव शत्रून् बाधते तमो अजिरो न वोळ्हा ॥३॥
सुगोत ते सुपथा पर्वतेष्ववाते अपस्तरसि स्वभानो ।
सा न आ वह पृथुयामन्नृष्वे रयिं दिवो दुहितरिषयध्यै ॥४॥

सा वह योक्षभिरवातोषो वरं वहसि जोषमनु ।
त्वं दिवो दुहितर्या ह देवी पूर्वहूतौ मंहना दर्शता भूः ॥५॥
उत्ते वयश्चिद्वसतेरपप्तन्नरश्च ये पितुभाजो व्युष्टौ ।
अमा सते वहसि भूरि वाममुषो देवि दाशुषे मर्त्याय ॥६॥
*udu śriya uṣaso rochamānā asthurapāṁ normayo ruśantaḥ /*
*kṛṇoti viśvā supathā sugānyabhūdu vasvī dakṣiṇā maghonī //1 //*
*bhadrā dadṛkṣa urviyā vi bhāsyutte śochirbhānavo dyāmapaptan /*
*āvirvakṣaḥ kṛṇuṣe śumbhamānoṣo devi rochamānā mahobhiḥ //2 //*
*vahanti sīmaruṇāso ruśanto gāvaḥ subhagāmurviyā prathānām /*
*apejate śūro asteva śatrūn bādhate tamo ajiro na voḷhā //3 //*
*sugota te supathā parvateṣvavāte apastarasi svabhāno /*
*sā na ā vaha pṛthuyāmannṛṣve rayiṁ divo duhitariṣayadhyai //4 //*
*sā vaha yokṣabhiravātoṣo varaṁ vahasi joṣamanu /*
*tvaṁ divo duhitaryā ha devī pūrvahūtau maṁhanā darśatā bhūḥ //5 //*
*utte vayaśchidvasaterapaptannaraścha ye pitubhājo vyuṣṭau /*
*amā sate vahasi bhūri vāmamuṣo devi dāśuṣe martyāya //6 //*

ऋ. (Rv.) ६.६५.१-६

एषा स्या नो दुहिता दिवोजाः क्षितीरुच्छन्ती मानुषीरजीगः ।
या भानुना रुशता राम्यास्वज्ञायि तिरस्तमसश्चिदक्तून् ॥१॥
वि तद्ययुररुणयुग्भिरश्वैश्चित्रं भान्त्युषसश्चन्द्ररथाः ।
अग्रं यज्ञस्य बृहतो नयन्तीर्वि ता बाधन्ते तम ऊर्म्यायाः ॥२॥
श्रवो वाजमिषमूर्जं वहन्तीर्नि दाशुष उषसो मर्त्याय ।
मघोनीर्वीरवत्पत्यमाना अवो धात विधते रत्नमद्य ॥३॥
इदा हि वो विधते रत्नमस्तीदा वीराय दाशुष उषासः ।
इदा विप्राय जरते यदुक्था नि ष्म मावते वहथा पुरा चित् ॥४॥
इदा हि त उषो अद्रिसानो गोत्रा गवामंगिरसो गृणन्ति ।
व्य१र्केण बिभदुर्ब्रह्मणा च सत्या नृणामभवद्देवहूतिः ॥५॥
उच्छा दिवो दुहितः प्रत्नवन्नो भरद्वाजवद्विधते मघोनि ।
सुवीरं रयिं गृणते रिरीह्युरुगायमधि धेहि श्रवो नः ॥६॥
*eṣā syā no duhitā divojāḥ kṣitīruchchhantī mānuṣīrajīgaḥ /*
*yā bhānunā ruśatā rāmyāsvajñāyi tirastamasaśchidaktūn //1 //*
*vi tadyayuraruṇayugbhiraśvaiśchitraṁ bhāntyuṣasaśchandrarathāḥ /*
*agraṁ yajñasya bṛhato nayantīrvi tā bādhante tama ūrmyāyāḥ //2 //*
*śravo vājamiṣamūrjaṁ vahantīrni dāśuṣa uṣaso martyāya /*
*maghonīrvīravatpatyamānā avo dhāta vidhate ratnamadya //3 //*
*idā hi vo vidhate ratnamastīdā vīrāya dāśuṣa uṣāsaḥ /*
*idā viprāya jarate yadukthā ni ṣma māvate vahathā purā chit //4 //*
*idā hi ta uṣo adrisāno gotrā gavāmaṅgiraso gṛṇanti /*
*vya1rkeṇa bibhadurbrāhmaṇā cha satyā nṛṇāmabhavaddevahūtiḥ //5 //*
*uchchhā divo duhitaḥ pratnavanno bharadvājavadvidhate maghoni /*
*suvīraṁ rayiṁ gṛṇate rirīhyurugāyamadhi dhehi śravo naḥ //6 //*

१७. गावः (Gāvaḥ) - ऋ. (Rv.) ६.२८.१; ३-७

ऋ. (Rv.) ६.२८.१

आ गावो अग्मन्नुत भद्रमक्रन्त्सीदन्तु गोष्ठे रणयन्त्वस्मे ।
प्रजावतीः पुरुरूपा इह स्युरिन्द्राय पूर्वीरुषसो दुहानाः ॥१॥
*ā gāvo agmannuta bhadramakrantsīdantu goṣṭhe raṇayantvasme /*
*prajāvatīḥ pururūpā iha syurindrāya pūrvīruṣaso duhānāḥ //1 //*

ऋ. (Rv.) ६.२८.३-७

न ता नशन्ति न दभाति तस्करो नासामामित्रो व्यथिरा दधर्षति ।
देवाँश्च याभिर्यजते ददाति च ज्योगित्ताभिः सचते गोपतिः सह ॥३॥

न ता अर्वा रेणुककाटो अश्नुते न संस्कृतत्रमुप यन्ति ता अभि ।
उरुगायमभयं तस्य ता अनु गावो मर्तस्य वि चरन्ति यज्वनः ॥४॥
गावो भगो गाव इन्द्रो मे अच्छान् गावः सोमस्य प्रथमस्य भक्षः ।
इमा या गावः स जनास इन्द्र इच्छामीद्धृदा मनसा चिदिन्द्रम् ॥५॥
यूयं गावो मेदयथा कृशं चिदश्रीरं चित्कृणुथा सुप्रतीकम् ।
भद्रं गृहं कृणुथ भद्रवाचो बृहद्वो वय उच्यते सभासु ॥६॥
प्रजावतीः सूयवसं रिशन्तीः शुद्धा अपः सप्रपाणे पिबन्तीः ।
मा वः स्तेन ईशत माघशंसः परि वो हेति रुद्रस्य वृजयाः ॥७॥
*na tā naśanti na dabhāti taskaro nāsāmāmitro vyathirā dadharṣati* ।
*devāṁścha yābhiryajate dadāti cha jyogittābhiḥ sachate gopatiḥ saha* ॥3॥
*na tā arvā reṇukakāṭo aśnute na saṁskṛtatramupa yanti tā abhi* ।
*urugāyamabhayaṁ tasya tā anu gāvo martasya vi charanti yajvanaḥ* ॥4॥
*gāvo bhago gāva indro me achchhān gāvaḥ somasya prathamasya bhakṣaḥ* ।
*imā yā gāvaḥ sa janāsa indra ichchhāmīddhṛdā manasā chidindram* ॥5॥
*yūyaṁ gāvo medayathā kṛśaṁ chidaśrīraṁ chitkṛṇuthā supratīkam* ।
*bhadraṁ gṛhaṁ kṛṇutha bhadravācho bṛhadvo vaya uchyate sabhāsu* ॥6॥
*prajāvatīḥ sūyavasaṁ riśantīḥ śuddhā apaḥ saprapāṇe pibantīḥ* ।
*mā vaḥ stena īśata māghaśaṁsaḥ pari vo heti rudrasya vṛjayāḥ* ॥7॥

१८. गावः इन्द्रो वा (Gāvaḥ Indro Vā) - ऋ. (Rv.) ६.२८.२; ८

ऋ. (Rv.) ६.२८.२

इन्द्रो यज्वने पृणते च शिक्षत्युपेद्ददाति न स्वं मुषायति ।
भूयोभूयो रयिमिदस्य वर्धयन्नभिन्ने खिल्ये नि दधाति देवयुम् ॥२॥
*indro yajvane pṛṇate cha śikṣatyupeddadāāti na svaṁ muṣāyati* ।
*bhūyobhūyo rayimidasya vardhayannabhinne khilye ni dadhāti devayum* ॥2॥

ऋ. (Rv.) ६.२८.८

उपेदमुपपर्चनमासु गोषूप पृच्यताम्। उप ऋषभस्य रेतस्युपेन्द्र तव वीर्ये ॥८॥
*upedamupaparchanamāsu goṣūpa pṛchyatām* । *upa ṛṣabhasya retasyupendra tava vīrye* ॥8॥

१९. द्यावापृथिवी (Dyāvāpṛthivī) - सा. (Sv.) ३७८

घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा ।
द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ॥९॥
*ghṛtavatī bhuvanānāmabhiśriyorvī pṛthvī madhudughe supeśasā* ।
*dyāvāpṛthivī varuṇasya dharmaṇā viṣkabhite ajare bhūriretasā* ॥9॥

२०. द्यावापृथिव्यौ (Dyāvāpṛthivyau) - ऋ. (Rv.) ६.७०.१-६

घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुधे सुपेशसा ।
द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरि रेतसा ॥१॥
असश्चन्ती भूरिधारे पयस्वती घृतं दुहाते सुकृते शुचिव्रते ।
राजन्ती अस्य भुवनस्य रोदसी अस्मे रेतः सिंचतं यन्मनुर्हितम् ॥२॥
यो वामृजवे क्रमणाय रोदसी मर्तो ददाश धिषणे स साधति ।
प्र प्रजाभिर्जायते धर्मणस्परि युवोः सिक्ता विषुरूपाणि सव्रता ॥३॥
घृतेन द्यावापृथिवी अभीवृते घृतश्रिया घृतपृचा घृतावृधा ।
उर्वी पृथ्वी होतृवूर्ये पुरोहिते ते इद्विप्रा ईळते सुम्नमिष्टये ॥४॥
मधु नो द्यावापृथिवी मिमिक्षतां मधुश्चुता मधुदुघे मधुव्रते ।
दधाने यज्ञं द्रविणं च देवता महि श्रवो वाजमस्मे सुवीर्यम् ॥५॥
ऊर्जं नो द्यौश्च पृथिवी च पिन्वतां पिता माता विश्वविदा सुदंससा ।
संरराणे रोदसी विश्वशम्भुवा सनिं वाजं रयिमस्मे समिन्वताम् ॥६॥
*ghṛtavatī bhuvanānāmabhiśriyorvī pṛthvī madhududhe supeśasā* ।
*dyāvāpṛthivī varuṇasya dharmaṇā viṣkabhite ajare bhūri retasā* ॥1॥

*asaśchantī bhūridhāre payasvatī ghṛtaṁ duhāte sukṛte śuchivrate /*
*rājantī asya bhuvanasya rodasī asme retaḥ siṁchataṁ yanmanurhitam //2 //*
*yo vāmṛjave kramaṇāya rodasī marto dadāśa dhiṣaṇe sa sādhati /*
*pra prajābhirjāyate dharmaṇaspari yuvoḥ siktā viṣurūpāṇi savratā //3 //*
*ghṛtena dyāvāpṛthivī abhīvṛte ghṛtaśriyā ghṛtapṛchā ghṛtāvṛdhā /*
*urvī pṛthvī hotṛvūrye pṛrohite te idviprā īḷate sumnamiṣṭaye //4 //*
*madhu no dyāvāpṛthivī mimikṣatāṁ madhuśchutā madhudughe madhuvrate /*
*dadhāne yajñaṁ draviṇaṁ cha devatā mahi śravo vājamasme suvīryam //5 //*
*ūrjaṁ no dyauścha pṛthivī cha pinvatāṁ pitā mātā viśvavidā sudaṁsasā /*
*saṁrarāṇe rodasī viśvaśambhuvā saniṁ vājaṁ rayimasme saminvatām //6 //*

२१. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) १३२३-१३२५

त्वं सोमासि धरयुर्मन्द्र ओजिष्ठो अध्वरे। पवस्व मं हयद्रयिः ॥१॥
त्वं सुतो मदिन्तमो दधन्वान्मत्सरिन्तमः। इन्दुः सत्राजिदस्तुतः ॥२॥
त्वं सुष्वाणो अद्रिभिरभ्यर्ष कनिक्रदत्। द्युमन्तं शुष्ममा भर ॥३॥
*tvaṁ somāsi dharayurmandra ojiṣṭho adhvare / pavasva maṁ hayadrayiḥ //1 //*
*tvaṁ suto madintamo dadhanvānmatsarintamaḥ / induḥ satrājidastutaḥ //2 //*
*tvaṁ suṣvāṇo adribhirabhyarṣa kanikradat / dyumantaṁ śuṣmamā bhara //3 //*

२२. पूषा (Pūṣā) - ऋ. (Rv.) ६.५३.१-१०; ६.५४.१-१०; ६.५५.१-६; ६.५६.१-६; ६.५८.१-४; सा. (Sv.) ७५; १५९३

ऋ. (Rv.) ६.५३.१-१०

वयमु त्वा पथस्पते रथं वाजसातये। धिये पूषन्नयुज्महि ॥१॥
अभि नो नर्यं वसु वीरं प्रयतदक्षिणम्। वामं गृहपतिं नय ॥२॥
अदित्सन्तं चिदाधृणे पूषन्दानाय चोदय। पणेश्चिद्वि म्रदा मनः ॥३॥
वि पथो वाजसातये चिनुहि वि मृधो जहि। साधन्तामुग्र नो धियः ॥४॥
परि तृन्धि पणीनामारया हृदया कवे। अथेमस्मभ्यं रन्धय ॥५॥
वि पूषन्नारया तुद पणेरिच्छ हृहि प्रियम्। अथेमस्मभ्यं रन्धय ॥६॥
आ रिख किकिरा कृणु पणीननां हृदया कवे। अथेमस्मभ्यं रन्धय ॥७॥
या पूषन्ब्रह्मचोदनीमारां बिभर्ष्याघृणे। तया समस्य हृदयमा रिख किकिरा कृणु ॥८॥
या ते अष्ट्रा गोओपशाघृणे पशुसाधनी। तस्यास्ते सुम्नमीमहे ॥९॥
उत नो गोषणिं धियमश्वसां वाजासामुत। नृवत कृणुहि वीतये ॥१०॥
*vayamu tvā pathaspate rathaṁ vājasātaye / dhiye pūṣannayujmahi //1 //*
*abhi no naryaṁ vasu vīraṁ prayatadakṣiṇam / vāmaṁ gṛhapatiṁ naya //2 //*
*aditsantaṁ chidādhṛṇe pūṣandānāya chodaya / paṇeśchidvi mradā manaḥ //3 //*
*vi patho vājasātaye chinuhi vi mṛdho jahi / sādhantāmugra no dhiyaḥ //4 //*
*pari tṛndhi paṇīnāmārayā hṛdayā kave / athemasmabhyaṁ randhaya //5 //*
*vi pūṣannārayā tuda paṇerichchha hṛhi priyam / athemasmabhyaṁ randhaya //6 //*
*ā rikha kikirā kṛṇu paṇīnanāṁ hṛdayā kave / athemasmabhyaṁ randhaya //7 //*
*yā pūṣanbrahmachodanīmārāṁ bibharṣyāghṛṇe /*
*tayā samasya hṛdayamā rikha kikirā kṛṇu //8 //*
*yā te aṣṭrā goopaśāghṛṇe paśusādhanī / tasyāste sumnamīmahe //9 //*
*uta no goṣaṇiṁ dhiyamaśvasāṁ vājāsāmuta / nṛvata kṛṇuhi vītaye //10 //*

ऋ. (Rv.) ६.५४.१-१०

सं पूषन् विदुषा नय यो अंजसानुशासति। यं एवेदमिति ब्रवत् ॥१॥
समु पूष्णा गमेमहि यो गृहाँ अभिशासति। इम एवेति च ब्रवत् ॥२॥
पूष्णश्चक्रं न रिष्यति न कोशोऽव पद्यते। नो अस्य व्यथते पविः ॥३॥
यो अस्मै हविषाविधन्न तं पूषापि मृष्यते। प्रथमो विन्दते वसु ॥४॥
पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः। पूषा वाजं सनोतु नः ॥५॥
पूषन्नु प्र गा इहि यजमानस्य सुन्वतः। अस्माकं स्तुवतामुत ॥६॥
माकिर्नेशन्माकीं रिषन्माकीं सं शारि केवटे। अथारिष्टाभिरा गहि ॥७॥

शृण्वन्तं पूषणं वयमिर्यमनष्टवेदसम्। ईशानं राय ईमहे ॥८॥
पूषन्तव व्रते वयं न रिष्येम कदा चन। स्तोतारस्त इह स्मसि ॥९॥
परि पूषा परस्ताद्धस्तं दधातु दक्षिणम्। पुनर्नो नष्टमाजतु ॥१०॥
*saṁ pūṣan viduṣā naya yo aṁjasānuśāsati । yaṁ evedamiti bravat ॥1॥*
*samu pūṣṇā gamemahi yo gṛhāṁ abhiśāsati । ima eveti cha bravat ॥2॥*
*pūṣṇaśchakraṁ na riṣyati na kośo'va padyate । no asya vyathate paviḥ ॥3॥*
*yo asmai haviṣāvidhanna taṁ pūṣāpi mṛṣyate । prathamo vindate vasu ॥4॥*
*pūṣā gā anvetu naḥ pūṣā rakṣatvarvataḥ । pūṣā vājaṁ sanotu naḥ ॥5॥*
*pūṣannanu pra gā ihi yajamānasya sunvataḥ । asmākaṁ stuvatāmuta ॥6॥*
*mākirneśanmākīṁ riṣanmākīṁ saṁ śāri kevaṭe । athāriṣṭābhirā gahi ॥7॥*
*śṛṇvantaṁ pūṣaṇaṁ vayamiryamanaṣṭavedasam । īśānaṁ rāya īmahe ॥8॥*
*pūṣantava vrate vayaṁ na riṣyema kadā chana । stotārasta iha smasi ॥9॥*
*pari pūṣā parastāddhastaṁ dadhātu dakṣiṇam । punarno naṣṭamājatu ॥10॥*

ऋ. (Rv.) ६.५५.१-६

एहि वां विमुचो नपादाघृणे सं सचावहै। रथीऋर्तस्य नो भव ॥१॥
रथीतमं कपर्दिनमीशानं राधसो महः। रायः सखायमीमहे ॥२॥
रायो धारास्याघृणे वसो राशिरजाश्व। धीवतोधीवतः सखा ॥३॥
पूषणं न्व१जाश्वमुप स्तोषाम वाजिनम्। स्वसुर्यो जार उच्यते ॥४॥
मातुर्दिधिषुमब्रवं स्वसुर्जारः शृणोतु नः। भ्रातेन्द्रस्य सखा मम ॥५॥
आजासः पूषणं रथे निशृम्भास्ते जनश्रियम्। देवं वहन्तु विभ्रतः ॥६॥
*ehi vāṁ vimucho napādāghṛṇe saṁ sachāvahai । rathīṛrtasya no bhava ॥1॥*
*rathītamaṁ kapardinamīśānaṁ rādhaso mahaḥ । rāyaḥ sakhāyamīmahe ॥2॥*
*rāyo dhārāsyāghṛṇe vaso rāśirajāśva । dhīvatodhīvataḥ sakhā ॥3॥*
*pūṣaṇaṁ nva1jāśvamupa stoṣāma vājinam । svasuryo jāra uchyate ॥4॥*
*māturdidhiṣumabravaṁ svasurjāraḥ śṛṇotu naḥ । bhrātendrasya sakhā mama ॥5॥*
*ājāsaḥ pūṣaṇaṁ rathe niśṛmbhāste janaśriyam । devaṁ vahantu vibhrataḥ ॥6॥*

ऋ. (Rv.) ६.५६.१-६

य एनमादिदेशति करम्भादिति पूषणम्। न तेन देव आदिशे ॥१॥
उत घा स रथीतमः सख्या सत्पतिर्युजा। इन्द्रो वृत्राणि जिघ्नते ॥२॥
उतादः परुषे गवि सूरश्चक्रं हिरण्ययम्। न्यैरयद्रथीतमः ॥३॥
यदद्य त्वा पुरुष्टुत ब्रवाम दस्र मन्तुमः। तत्सु नो मन्म साधय ॥४॥
इमं च नो गवेषणं सातये सीषधो गणम्। आरात् पूषन्नसि श्रुतः ॥५॥
आ ते स्वस्तिमीमह आरे अघामुपावसुम्। अद्या च सर्वतातये श्वश्च सर्वतातये ॥६॥
*ya enamādideśati karambhāditi pūṣaṇam । na tena deva ādiśe ॥1॥*
*uta ghā sa rathītamaḥ sakhyā satpatiryujā । indro vṛtrāṇi jighnate ॥2॥*
*utādaḥ paruṣe gavi sūraśchakraṁ hiraṇyayam । nyairayadrathītamaḥ ॥3॥*
*yadadya tvā puruṣṭuta bravāma dasra mantumaḥ । tatsu no manma sādhaya ॥4॥*
*imaṁ cha no gaveṣaṇaṁ sātaye sīṣadho gaṇam । ārāt pūṣannasi śrutaḥ ॥5॥*
*ā te svastimīmaha āre aghāmupāvasum । adyā cha sarvatātaye śvaścha sarvatātaye ॥6॥*

ऋ. (Rv.) ६.५८.१-४

शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासि ।
विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु ॥१॥
अजाश्वः पशुपा वाजपस्त्यो धियंजिन्वो भुवने विश्वे अर्पितः ।
अष्ट्रां पूषा शिथिरामुद्वरीवृजत् संचक्षाणो भुवना देव ईयते ॥२॥
यास्ते पूषन्नावो अन्तः समुद्रे हिरण्ययीरन्तरिक्षे चरन्ति ।
ताभिर्यासि दूत्यां सूर्यस्य कामेन कृत श्रव इच्छमानः ॥३॥
पूषा सुबन्धुर्दिव आ पृथिव्या इळस्पतिर्मघवा दस्मवर्चाः ।
यं देवासो अददुः सूर्यायै कामेन कृतं तवसं स्वंचम्॥४॥
*śukraṁ te anyadyajataṁ te anyadviṣurūpe ahanī dyaurivāsi ।*
*viśvā hi māyā avasi svadhāvo bhadrā te pūṣanniha rātirastu ॥1॥*

*ajāśvaḥ paśupā vājapastyo dhiyaṁjinvo bhuvane viśve arpitaḥ ।*
*aṣṭrāṁ pūṣā śithirāmudvarīvṛjat saṁchakṣāṇo bhuvanā deva īyate ॥2॥*
*yāste pūṣannāāvo antaḥ samudre hiraṇyayīrantarikṣe charanti ।*
*tābhiryāsi dūtyāṁ sūryasya kāmena kṛta śrava ichchhamānaḥ ॥3॥*
*pūṣā subandhurdiva ā pṛthivyā iḷaspatirmaghavā dasmavarchāḥ ।*
*yaṁ devāso adaduḥ sūryāyai kāmena kṛtaṁ tavasaṁ svaṁcham ॥4॥*

सा. (Sv.) ७५

शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासि ।
विश्वा हि माया अवसि स्वधावन्भद्रा ते पूषन्निह रातिरस्तु ॥३॥
*śukraṁ te anyadyajataṁ te anyadviṣurūpe ahanī dyaurivāsi ।*
*viśvā hi māyā avasi svadhāvanbhadrā te pūṣanniha rātirastu ॥3॥*

सा. (Sv.) १५९३

उत नो गोषणिं धियमश्वसां वाजसामुत। नृवत्कृणुह्यूतये ॥१॥
*uta no goṣaṇiṁ dhiyamaśvasāṁ vājasāmuta । nṛvatkṛṇuhyūtaye ॥1॥*

२३. बृहस्पतिः (Bṛhaspatiḥ) - ऋ. (Rv.) ६.७३.१-३

योअद्रिभित्प्रथमजा ऋतावा बृहस्पतिरांगिरसो हविष्मान् ।
द्विर्बहज्मा प्राघर्मसत्पिता न आ रोदसी वृषभो रोरवीति ॥१॥
जनाय चिद्य ईवत उ लोकं बृहस्पतिर्देवहूतौ चकार ।
घ्नन्वृत्राणि वि पुरो दर्दरीति जयंछत्रूँमित्रान्पृत्सु साहन् ॥२॥
बृहस्पतिः समजयद्वसूनि महो व्रजान् गोमतो देव एषः ।
अपः सिषासन्त्स्व१ रप्रतीतो बृहस्पतिर्हन्त्यमित्रमर्कैः ॥३॥
*yoadribhitprathamajā ṛtāvā bṛhaspatirāṁgiraso haviṣmān ।*
*dvirbahajmā prāgharmasatpitā na ā rodasī vṛṣabho roravīti ॥1॥*
*janāya chidya īvata u lokaṁ bṛhaspatirdevahūtau chakāra ।*
*ghnanvṛtrāṇi vi puro dardarīti jayaṁchhatrūm̐mitrānpṛtsu sāhan ॥2॥*
*bṛhaspatiḥ samajayadvasūni maho vrajān gomato deva eṣaḥ ।*
*apaḥ siṣāsantsva1 rapratīto bṛhaspatirhantyamitramarkaiḥ ॥3॥*

२४. वैश्वानरः (Vaiśvānaraḥ) - ऋ. (Rv.) ६.७.१-७; ६.८.१-७; ६.९.१-७

ऋ. (Rv.) ६.७.१-७

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥१॥
नाभिं यज्ञानां सदनं रयीणां महामाहावमभि सं नवन्त ।
वैश्वानरं रथ्यमध्वराणां यज्ञस्य केतुं जनयन्त देवाः ॥२॥
त्वद्विप्रो जायते वाज्यग्ने त्वद्वीरासो अभिमातिषाहः ।
वैश्वानर त्वमस्मासु धेहि वसूनि राजन्त्पृहयाय्याणि ॥३॥
त्वां विश्वे अमृत जायमानं शिशुं न देवा अभि सं नवन्ते ।
तव क्रतुभिरमृतत्वमायन्वैश्वानर यत्पित्रोरदीदेः ॥४॥
वैश्वानर तव तानि व्रतानि महान्यग्ने नकिरा दधर्ष ।
यज्जायमानः पित्रोरुपस्थेऽविन्दः केतुं वयुनेष्वह्नाम् ॥५॥
वैश्वानरस्य विमितानि चक्षसा सानूनि दिवो अमृतस्य केतुना ।
तस्येदु विश्वा भुवनाधि मूर्धनि वया इव रुरुहुः सप्त विस्रुहः ॥६॥
वि यो रजांस्यमिमीत सुक्रतुर्वैश्वानरो वि दिवो रोचना कविः ।
परि यो विश्वा भुवनानि पप्रथेऽदब्धो गोपा अमृतस्य रक्षिता ॥७॥
*mūrdhānaṁ divo aratiṁ pṛthivyā vaiśvānaramṛta ā jātamagnim ।*
*kaviṁ samrājamatithiṁ janānāmāsannā pātraṁ janayanta devāḥ ॥1॥*
*nābhiṁ yajñānāṁ sadanaṁ rayīṇāṁ mahāmāhāvamabhi saṁ navanta ।*
*vaiśvānaraṁ rathyamadhvarāṇāṁ yajñasya ketuṁ janayanta devāḥ ॥2॥*
*tvadvipro jāyate vājyagne tvadvīrāso abhimātiṣāhaḥ ।*
*vaiśvānara tvamasmāsu dhehi vasūni rājantpṛhayāyyāṇi ॥3॥*

*tvāṁ viśve amṛta jāyamānaṁ śiśuṁ na devā abhi saṁ navante ।*
*tava kratubhiramṛtatvamāyanvaiśvānara yatpitroradīdeḥ ॥4 ॥*
*vaiśvānara tava tāni vratāni mahānyagne nakirā dadharṣa ।*
*yajjāyamānaḥ pitrorupasthe'vindaḥ ketuṁ vayuneṣvahnām ॥5 ॥*
*vaiśvānarasya vimitāni chakṣasā sānūni divo amṛtasya ketunā ।*
*tasyedu viśvā bhuvanādhi mūrdhani vayā iva ruruhuḥ sapta visruhaḥ ॥6 ॥*
*vi yo rajāṁsyamimīta sukraturvaiśvānaro vi divo rochanā kaviḥ ।*
*pari yo viśvā bhuvanāni paprathe'dabdho gopā amṛtasya rakṣitā ॥7 ॥*

ऋ. (Rv.) ६.८.१-७

पृक्षस्य वृष्णो अरुषस्य नू सहः प्र नु वोचं विदथा जातवेदसः ।
वैश्वानराय मतिर्नव्यसी शुचिः सोमइव पवते चारुरग्नये ॥१ ॥
स जायमानः परमे व्योमनि व्रतान्यग्निर्व्रतपा अरक्षत ।
व्य१न्तरिक्षमिमीत सुक्रतुर्वैश्वानरो महिना नाकमस्पृशत् ॥२ ॥
व्यस्तभ्नाद्रोदसी मित्रो अद्भुतोऽन्तर्वावदकृणोज्योतिषा तमः ।
वि चर्मणीव धिषणे अवर्तयद्वैश्वानरो विश्वमधत्त वृष्ण्यम् ॥३ ॥
अपामुपस्थे महिषा अगृभ्णत विशो राजानमुप तस्थुरृग्मियम् ।
आ दूतो अग्निमभरद्विवस्वतो वैश्वानरं मातरिश्वा परावतः ॥४ ॥
युगेयुगे विदथ्यं गृणद्भ्योग्ने रयिं यशसं धेहि नव्यसीम् ।
पव्येव राजन्नघशंसमजर नीचा नि वृश्च वनिनं न तेजसा ॥५ ॥
वयं जयेम शतिनं सहस्रिणं वैश्वानर वाजमग्ने तवोतिभिः ॥६ ॥
अदब्धेभिस्तव गोपाभिरिष्टेऽस्माकं पाहि त्रिषधस्थ सूरीन् ।
रक्षा च नो ददुषां शर्धो अग्ने वैश्वानर प्र च तारीः स्तवानः ॥७ ॥
*pṛkṣasya vṛṣṇo aruṣasya nū sahaḥ pra nu vochaṁ vidathā jātavedasaḥ ।*
*vaiśvānarāya matirnavyasī śuchiḥ somaiva pavate chāruragnaye ॥1 ॥*
*sa jāyamānaḥ parame vyomani vratānyagnirvratapā arakṣata ।*
*vya1ntarikṣamimīta sukraturvaiśvānaro mahinā nākamaspṛśat ॥2 ॥*
*vyastabhnādrodasī mitro adbhuto'ntarvāvadakṛṇojyotiṣā tamaḥ ।*
*vi charmaṇīva dhiṣaṇe avartayadvaiśvānaro viśvamadhatta vṛṣṇyam ॥3 ॥*
*apāmupasthe mahiṣā agṛbhṇata viśo rājānamupa tasthuṛrgmiyam ।*
*ā dūto agnimabharadvivasvato vaiśvānaraṁ mātariśvā parāvataḥ ॥4 ॥*
*yugeyuge vidathyaṁ gṛṇadbhyogne rayiṁ yaśasaṁ dhehi navyasīm ।*
*pavyeva rājannaghaśaṁsamajara nīchā ni vṛścha vaninaṁ na tejasā ॥5 ॥*
*vayaṁ jayema śatinaṁ sahasriṇaṁ vaiśvānara vājamagne tavotibhiḥ ॥6 ॥*
*adabdhebhistava gopābhiriṣṭe'smākaṁ pāhi triṣadhastha sūrīn ।*
*rakṣā cha no daduṣāṁ śardho agne vaiśvānara pra cha tārīḥ stavānaḥ ॥7 ॥*

ऋ. (Rv.) ६.९.१-७

अहश्च कृष्णमहरर्जुनं च वि वर्तेते रजसी वेद्याभिः ।
वैश्वानरो जायमानो न राजावातिरज्ज्योतिषाग्निस्तमांसि ॥१ ॥
नाहं तन्तुं न वि जानाम्योतुं न यं वयन्ति समरेऽतमानाः ।
कस्य स्वित्पुत्र इह वक्त्वानि पुरो वदात्यवरेण पित्रा ॥२ ॥
स इत्तन्तुं स वि जानात्योतुं स वक्त्वान्यृतुथा वदाति ।
य ईं चिकेतदमृतस्य गोपा अवश्चरन्परो अन्येन पश्यन् ॥३ ॥
अयं होता प्रथमः पश्यतेममिदं ज्योतिरमृतं मर्त्येषु ।
अयं स जज्ञे ध्रुव आ निषत्तोऽमतर्यस्तन्वा३ वर्धमानः ॥४ ॥
ध्रुवं ज्योतिर्निहितं दृशये कं मनो जविष्ठं पतयत्स्वन्तः ।
विश्वे देवाः समनसः सकेता एकं क्रतुमभि वि यन्ति साधु ॥५ ॥
वि मे कर्णा पतयतो वि चक्षुर्वीदं ज्योतिर्हृदय आहितं यत् ।
वि मे मनश्चरति दूरआधीः किं स्विद्वक्ष्यामि किमु नू मनिष्ये ॥६ ॥
विश्वे देवा अनमस्यन्भियानास्त्वामग्ने तमसि तस्थिवांसम् ।
बैश्वनरोऽवतूतये नोऽमर्त्योऽवतूतये नः ॥७ ॥

*ahaścha kṛṣṇamahararjunaṁ cha vi vartete rajasī vedyābhiḥ ।*
*vaiśvānaro jāyamāno na rājāvātirajjyotiṣāgnistamāṁsi ॥1॥*
*nāhaṁ tantuṁ na vi jānāmyotuṁ na yaṁ vayanti samare'tamānāḥ ।*
*kasya svitputra iha vaktavāni puro vadātyavareṇa pitrā ॥2॥*
*sa ittantuṁ sa vi jānātyotuṁ sa vaktavānyṛtuthā vadāti ।*
*ya īṁ chiketadamṛtasya gopā avaścharanparo anyena paśyan ॥3॥*
*ayaṁ hotā prathamaḥ paśyatemamidaṁ jyotiramṛtaṁ martyeṣu ।*
*ayaṁ sa jajñe dhruva ā niṣatto'mataryastanvā3 vardhamānaḥ ॥4॥*
*dhruvaṁ jyotirnihitaṁ dṛśaye kaṁ mano javiṣṭhaṁ patayatsvantaḥ ।*
*viśve devāḥ samanasaḥ saketā ekaṁ ṛtumabhi vi yanti sāghu ॥5॥*
*vi me karṇā patayato vi chakṣuvarddidaṁ jyotirhṛdaya āhitaṁ yat ।*
*vi me manścharati dūraādhīḥ kiṁ svidvakṣayāmi kimu nū maniṣye ॥6॥*
*viśve devā anamasyanbhiyānāstvāmagne tamasi tasthivāṁsam ।*
*baiśvanaro'vatūtaye no'martyo'vatūtaye naḥ ॥7॥*

२५. मरुतः (Marutaḥ) - ऋ. (Rv.) ६.६६.१-११

वपुर्नु तच्चिकितुषे चिदस्तु समानं नाम धेनु पत्यमानम् ।
मर्तेष्वन्यद्दोहसे पीपाय सकृच्छुक्रं दुदुहे पृश्निरूधः ॥१॥
ये अग्नयो न शोशुचन्निधाना द्विर्यत्त्रिर्मरुतो वावृधन्त ।
अरेण्वो हिरण्यास एषां साकं नृम्णैः पौंस्येभिश्च भूवन् ॥२॥
रुद्रस्य ये मीळ्हुषः सन्ति पुत्रा यांश्चे नु दाधृविर्भरध्यै ।
विदे हि माता महो मही षा सेत्पृश्निःसुभ्वे३ गर्भमाधात् ॥३॥
न य ईषन्ते जुनुषोऽया न्व१न्तः सन्तोऽवद्यानि पुनानाः ।
निर्यद् दुह्रे शुचयोऽनु जोषमनु श्रिया तन्वमुक्षमाणाः ॥४॥
मक्षू न येषु दोहसे चिदया आ नाम धृष्णु मारुतं दधानाः ।
न ये स्तौना अयासो मह्ना नू चित्सुदानुरव यासदुग्रान् ॥५॥
त इदुग्राः शवसा धृष्णुषेणा उभे युजन्त रोदसी सुमेके ।
अध स्मैषु रोदसी स्वशेचिरामवत्सु तस्थौ न रोकः ॥६॥
अनेनो वो मरुतो यामो अस्त्वनश्वश्चिद्यमजत्यरथीः ।
अनवसो अनभीशू रजस्तूर्वि रोदसी पथ्या याति साधन् ॥७॥
नास्य वर्ता न तरुता न्वस्ति मरुतो यमवथ वाजसातौ ।
तोके वा गोषु तनये यमप्सु स व्रजं दर्ता पार्ये अध द्योः ॥८॥
प्र चित्रमर्कं गृणते तुराय मारुताय स्वतवसे भरध्वम् ।
ये सहांसि सहसा सहन्ते रेजते अग्ने पृथिवी मखेभ्यः ॥९॥
त्विषीमन्तो अध्वरस्येव दिद्युत्तृषुच्यवसो जुह्वो३ नाग्नेः ।
अर्चत्रयो धुनयो न वीरा भ्राजज्जन्मानो मरुतो अधृष्टाः ॥१०॥
तं वृधन्तं मारुतं भ्राजदृष्टिं रुद्रस्य सूनुं हवसा विवासे ।
दिवः शर्धाय शुचयो मनीषा गिरयो नाप उग्रा अस्पृध्रन् ॥११॥

*vapurnu tachchikituṣe chidastu samānaṁ nāma dhenu patyamānam ।*
*marteṣvanyaddohase pīpāya sakṛchchhukraṁ daduhe pṛśnirūdhaḥ ॥1॥*
*ye agnayo na śośuchannidhānā dviryattrirmaruto vāvṛdhanta ।*
*areṇvo hiraṇyāsa eṣāṁ sākaṁ nṛmṇaiḥ pauṁsyebhiścha bhūvan ॥2॥*
*rudrasya ye mīḻhuṣaḥ santi putrā yāṁśche nu dādhṛvirbharadhyai ।*
*vide hi mātā maho mahī ṣā setpṛśniḥsubhve3 garbhamādhāt ॥3॥*
*na ya īṣante junuṣo'yā nva1ntaḥ santo'vadyāni punānāḥ ।*
*niryad duhre śuchayo'nu joṣamanu śriyā tanvamukṣamāṇāḥ ॥4॥*
*makṣū na yeṣu dohase chidayā ā nāma dhṛṣṇu mārutaṁ dadhānāḥ ।*
*na ye staunā ayāso mahnā nū chitsudānurava yāsadugrān ॥5॥*
*ta idugrāḥ śavasā dhṛṣṇuṣeṇā ubhe yujanta rodasī sumeke ।*
*adha smaiṣu rodasī svaśechirāmavatsu tasthau na rokaḥ ॥6॥*
*aneno vo maruto yāmo astvanaśvaśchidyamajatyarathīḥ ।*
*anavaso anabhīśū rajastūrvi rodasī pathyā yāti sādhan ॥7॥*

*nāsya vartā na tarutā nvasti maruto yamavatha vājasātau ।*
*toke vā goṣu tanaye yamapsu sa vrajaṁ dartā pārye adha dyoḥ ॥8 ॥*
*pra chitramarkaṁ gṛṇate turāya mārutāya svatavase bharadhvam ।*
*ye sahāṁsi sahasā sahante rejate agne pṛthivī makhebhyaḥ ॥9 ॥*
*tviṣīmanto adhvarasyeva didyuttṛṣuchyavaso juhvo3 nāgneḥ ।*
*archatrayo dhunayo na vīrā bhrājajjanmāno maruto adhṛṣṭāḥ ॥10 ॥*
*taṁ vṛdhantaṁ mārutaṁ bhrājadṛṣṭiṁ rudrasya sūnuṁ havasā vivāse ।*
*divaḥ śardhāya śuchayo manīṣā girayo nāpa ugrā aspṛdhran ॥11 ॥*

२६. मित्रावरुणौ (Mitrāvaruṇau) - ऋ. (Rv.) ६.६७.१-११

विश्वेषां वः सतां ज्येष्ठतमा गीर्भिर्मित्रावरुणा वावृधध्यै ।
सं या रश्मेव यमतुर्यमिष्ठा द्वा जनाँ असमा बाहुभिः स्वैः ॥१ ॥
इयं मद्वां प्र स्तृणीते मनीषोप प्रिया नमसा बर्हिरच्छ ।
यन्तं नो मित्रावरुणावधृष्टं छर्दिर्यद्वां वरूथ्यं सुदान् ॥२ ॥
आ यातं मित्रावरुणा सुशस्त्युप प्रिया नमसा हूयमाना ।
सं यावप्नस्थो अपसेव जनांछुधीयतश्चिद्यतथो महित्वा ॥३ ॥
अश्वा न या वाजिना पूतबन्धू ऋता यद् गर्भमदितिर्भरध्यै ।
प्र या महि महान्ता जायमाना घोरा मर्ताय रिपवे नि दीधः ॥४ ॥
विश्वे यद्वां मंहना मन्दमानाः क्षत्रं देवासो अदधुः सजोषाः ।
परि यद्भूथो रोदसी चिदुर्वी सन्ति स्पशो अदब्धासो अमूराः ॥५ ॥
ता हि क्षत्रं धारयेथे अनु द्यून् दृंहेथे सानुमुपमादिव द्योः ।
दृळ्हो नक्षत्र उत विश्वदेवो भूमिमातान्द्यां धासिनायोः ॥६ ॥
ता विग्रं धैथे जठरं पृणध्या आ यत्सद्म सभृतयः पृणन्ति ।
न मृष्यन्ते युवतयोऽवाता वि यत्पयो विश्वजिन्वा भरन्ते ॥७ ॥
ता जिह्वया सदमेदं सुमेधा आ यद्वां सत्यो अरतिर्ऋते भूत् ।
तद्वां महित्वं घृतान्नावस्तु युवं दाशुषे वि चयिष्टमंहः ॥८ ॥
प्र यद्वां मित्रावरुणा स्पूर्धन्प्रिया धाम युवधिता मिनन्ति ।
न ये देवास ओहसा न मर्ता अयज्ञसाचो अप्यो न पुत्राः ॥९ ॥
वि यद्वाचं कीस्तासो भरन्ते शंसन्ति के चिन्निविदो मनानाः ।
आद्वां ब्रवाम सत्यान्युक्था नकिर्देवेभिर्यतथो महित्वा ॥१० ॥
अवोरित्था वां छर्दिषो अभिष्टौ युवोर्मित्रावरुणावस्कृधोयु ।
अनु यद्द गावः स्फुरानृजिप्यं धृष्णुं यद्रणे वृषणं युनजन् ॥११ ॥

*viśveṣāṁ vaḥ satāṁ jyeṣṭhatamā gīrbhirmitrāvaruṇā vāvṛdhadhyai ।*
*saṁ yā raśmeva yamaturyamiṣṭhā dvā janāँ asamā bāhubhiḥ svaiḥ ॥1 ॥*
*iyaṁ madvāṁ pra stṛṇīte manīṣopa priyā namasā barhirachchha ।*
*yantaṁ no mitrāvaruṇāvadhṛṣṭaṁ chhardiryadvāṁ varūthyaṁ sudān ॥2 ॥*
*ā yātaṁ mitrāvaruṇā suśastyupa priyā namasā hūyamānā ।*
*saṁ yāvapnastho apaseva janāṁchhudhīyataśchidyatatho mahitvā ॥3 ॥*
*aśvā na yā vājinā pūtabandhū ṛtā yad garbhamaditirbharadhyai ।*
*pra yā mahi mahāntā jāyamānā ghorā martāya ripave ni dīdhaḥ ॥4 ॥*
*viśve yadvāṁ maṁhanā mandamānāḥ kṣatraṁ devāso adadhuḥ sajoṣāḥ ।*
*pari yadbhūtho rodasī chidurvī santi spaśo adabdhāso amūrāḥ ॥5 ॥*
*tā hi kṣatraṁ dhārayethe anu dyūn ddaṁhethe sānumupamādiva dyoḥ ।*
*dṛḷho nakṣatra uta viśvadevo bhūmimātāndyāṁ dhāsināyoḥ ॥6 ॥*
*tā vigraṁ dhaithe jaṭharaṁ pṛṇadhyā ā yatsadma sabhṛtayaḥ pṛṇanti ।*
*na mṛṣyante yuvatayo'vātā vi yatpayo viśvajinvā bharante ॥7 ॥*
*tā jihvayā sadamedaṁ sumedhā ā yadvāṁ satyo aratirṛte bhūt ।*
*tadvāṁ mahitvaṁ ghṛtānnāvastu yuvaṁ dāśuṣe vi chayiṣṭamaṁhaḥ ॥8 ॥*
*pra yadvāṁ mitrāvaruṇā spūrdhanpriyā dhāma yuvadhitā minanti ।*
*na ye devāsa ohasā na martā ayajñasācho apyo na putrāḥ ॥9 ॥*
*vi yadvāchaṁ kīstāso bharante śaṁsanti ke chinnivido manānāḥ ।*
*ādvāṁ bravāma satyānyukthā nakirdevebhiryatatho mahitvā ॥10 ॥*

*avoritthā vāṁ chhardiṣo abhiṣṭau yuvormitrāvaruṇāvaskṛdhoyu* ।
*anu yadṛ gāvaḥ sphurānṛjipyaṁ dhṛṣṇuṁ yadraṇe vṛṣaṇaṁ yunajan* ॥11॥

२७. सरस्वती (Sarasvatī) - ऋ. (Rv.) ६.६१.१-१४; सा. (Sv.) १४६१

ऋ. (Rv.) ६.६१.१-१४

इयमददाद्रभसमृणच्युतं दिवोदासं वध्यश्वाय दाशुषे ।
या शश्वन्तमाचखादावसं पणिं ता ते दात्राणि तविषा सरस्वति ॥१॥
इयं शुष्मेभिर्बिसखा इवारुजत्सानु गिरीणां तविषेभिरूर्मिभिः ।
पारावतघ्नीमवसे सुवृक्तिभिः सरस्वतीमा विवासेम धीतिभिः ॥२॥
सरस्वति देवनिदो निबर्हय प्रजां विश्वस्य बृहसयस्य मायिनः ।
उत क्षितिभ्योऽवनीरविन्दो विषमेभ्यो अस्रवो वाजिनीवति ॥३॥
प्र णो देवी सरस्वती वाजेभिर्वाजिनीवती। धीनामवित्रयवतु ॥४॥
यस्त्वा देवि सरस्वत्युपब्रूते धने हिते। इन्द्रं न वृत्रतूर्ये ॥५॥
त्वं देवि सरस्वत्यवा वाजेषु वाजिनि। रदा पूषेव नः सनिम् ॥६॥
उत स्या नः सरस्वती घोरा हिरण्यवर्तनिः। वृत्रघ्नी वष्टि सुष्टुतिम् ॥७॥
यस्या अनन्तो अह्रुतत्वेषश्चरिष्णुरर्णवः। अमश्चरति रोरुवत् ॥८॥
सा नो विश्वा अतिद्विषः स्वसृरन्या ऋतावरी। अतन्नहेव सूर्यः ॥९॥
उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा। सरस्वती स्तोम्या भूत् ॥१०॥
आपप्रुषी पार्थिवान्युरु रजो अन्तरिक्षम्। सरस्वती निदस्पातु ॥११॥
त्रिषधस्था सप्तधातुः पंच जाता वर्धयन्ती। वाजेवाजे हव्या भूत् ॥१२॥
प्र या महिम्ना महिनासु चेकिते द्युम्नेभिरन्या अपसामपस्तमा ।
रथइव बृहती विभ्वने कृतोपस्तुत्या चिकितुषा सरस्वती ॥१३॥
सरस्वत्यभि नो नेषि वस्यो माप स्फरीः पयसा मा न आ धक् ।
जुषस्वः न सख्या वेश्या च मा त्वत्क्षेत्राण्यरणानि गन्म ॥१४॥
*iyamadadādrabhasamṛṇachyutaṁ divodāsaṁ vadhyaśvāya dāśuṣe* ।
*yā śaśvantamāchakhādāvasaṁ paṇiṁ tā te dātrāṇi taviṣā sarasvati* ॥1॥
*iyaṁ śuṣmebhirbisakhā ivārujatsānu girīṇāṁ taviṣebhirūrmibhiḥ* ।
*pārāvatadhnīmavase suvṛktibhiḥ sarasvatīmā vivāsema dhītibhiḥ* ॥2॥
*sarasvati devanido nibarhaya prajāṁ viśvasya bṛhasayasya māyinaḥ* ।
*uta kṣitibhyo'vanīravindo viṣamebhyo asravo vājinīvati* ॥3॥
*pra ṇo devī sarasvatī vājebhirvājinīvatī* । *dhīnāmavitrayavatu* ॥4॥
*yastvā devi sarasvatyupabrūte dhane hite* । *indraṁ na vṛtratūrye* ॥5॥
*tvaṁ devi sarasvatyavā vājeṣu vājini* । *radā pūṣeva naḥ sanim* ॥6॥
*uta syā naḥ sarasvatī ghorā hiraṇyavartaniḥ* । *vṛtraghnī vaṣṭi suṣṭutim* ॥7॥
*yasyā ananto ahrutatveṣaścariṣṇurarṇavaḥ* । *amaścharati roruvat* ॥8॥
*sā no viśvā atidviṣaḥ svasṛranyā ṛtāvarī* । *atannaheva sūryaḥ* ॥9॥
*uta naḥ priyā priyāsu saptasvasā sujuṣṭā* । *sarasvatī stomyā bhūt* ॥10॥
*āpapruṣī pārthivānyuru rajo antarikṣam* । *sarasvatī nidaspātu* ॥11॥
*triṣadhasthā saptadhātuḥ paṁcha jātā vardhayantī* । *vājevāje havyā bhūt* ॥12॥
*pra yā mahimnā mahināsu chekite dyumnebhiranyā apasāmapastamā* ।
*rathaiva bṛhatī vibhvane kṛtopastutyā chikituṣā sarasvatī* ॥13॥
*sarasvatyabhi no neṣi vasyo māpa spharīḥ payasā mā na ā dhak* ।
*juṣasvaḥ na sakhyā veśyā cha mā tvatkṣetrāṇyaraṇāni ganma* ॥14॥

सा. (Sv.) १४६१

उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा। सरस्वती स्तोम्या भूत् ॥१॥
*uta naḥ priyā priyāsu saptasvasā sujuṣṭā* । *sarasvatī stomyā bhūt* ॥1॥

२८. सविता (Savitā) - ऋ. (Rv.) ६.७१.१-६

उदु ष्य देवः सविता हिरण्यया बाहु अयंस्त सवनाय सुक्रतुः ।
घृतेन पाणी अभि प्रष्णुते मखो युवा सुदक्षो रजसो विधर्मणि ॥१॥
देवस्य वयं सवितुः सवीमनि श्रेष्ठे स्याम वसुनश्च दावने ।

यो विश्वस्य द्विपदो यश्चतुष्पदो निवेशने प्रसवे चासि भूमनः ॥२॥
अदब्धेभिः सवितः पायुभिष्ट्वं शिवेभिरद्य परिपाहि नो गयम् ।
हिरण्यजिह्वः सुविताय नव्यसे रक्षो माकिर्नो अघशंस ईशत ॥३॥
उदु ष्य देवः सविता दमूना हिरण्यपाणिः प्रतिदोषमस्थात् ।
अयोहनुर्यजतो मन्द्रजिह्व आ दाशुषे सुवति भूरि वामम् ॥४॥
उदू अयाँ उपवक्तेव बाहू हिरण्यया सविता सुप्रतीका ।
दिवा रोहांस्यरुहत्पृथिव्या अरीरमत्पतयत् कच्चिदभ्वम् ॥५॥
वाममद्य सवितर्वाममु श्वो दिवेदिवे वाममस्मभ्यं सावीः ।
वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम ॥६॥
*udu ṣya devaḥ savitā hiraṇyayā bāhu ayaṁsta savanāya sukratuḥ /*
*ghṛtena pāṇī abhi praṣṇute makho yuvā sudakṣo rajaso virdhmaṇi //1 //*
*devasya vayaṁ savituḥ savīmani śreṣṭhe syāma vasunaścha dāvane /*
*yo viśvasya dvipado yaśchatuṣpadeā niveśane prasave chāsi bhūmanaḥ //2 //*
*adabdhebhiḥ savitaḥ pāyumiṣṭvaṁ śivebhiradya paripāhi no gayam /*
*hiraṇyajihvaḥ suvitāya navyase rakṣo mākirno aghaśaṁsa īśata //3 //*
*udu ṣya devaḥ savitā damūnā hiraṇyapāṇiḥ pratidoṣamasthāt /*
*ayohanuryajato mandrajihva ā dāśuṣe suvati bhūri vāmam //4 //*
*udū ayāṁ̐ upavakteva bāhū hiraṇyayā savitā supratīkā /*
*divā rohāṁsyaruhatpṛthivyā arīramatpatayat kachchidabhvam //5 //*
*vāmamadya savitarvāmamu śvo divedive vāmamasmabhyaṁ sāvīḥ /*
*vāmasya hi kṣayasya deva bhūrerayā dhiyā vāmabhājaḥ syāma //6 //*

२९. सोमा रुद्रौ (Somā Rudrau) - ऋ. (Rv.) ६.७४.१-४

सोमारुद्रा धारयेथामसुर्यं१ प्र वामिष्टयोऽरमश्नुवन्तु ।
दमेदमे सप्त रत्ना दधाना शं नो भूतं द्विपदे शं चतुष्पदे ॥१॥
सोमारुद्रा वि बृहतं विषूचीममीवा या नो गयमाविवेश ।
आरे बाधेथां निर्ऋतिं पराचैरस्मे भद्रा सौश्रवसानि सन्तु ॥२॥
सोमारुद्रा युवमेतान्यस्मे विश्वा तनूषु भेषजानि धत्तम् ।
अव स्यतं मुंचतं यन्नो अस्ति तनूषु बद्धं कृतमेनो अस्मत् ॥३॥
तिग्मायुधौ तिग्महेती सुशेवौ सोमारुद्राविह सु मृळतं न ।
प्र नो मुंचतं वरुणस्य पाशाद् गोपायतं नः सुमनस्यमानाः ॥४॥
*somārudrā dhārayethāmasuryaṁ1 pra vāmiṣṭayo'ramaśnuvantu /*
*damedame sapta ratnā dadhānā śaṁ no bhūtaṁ dvipade śaṁ chatuṣpade //1 //*
*somārudrā vi bṛhataṁ viṣūchīmamīvā yā no gayamāviveśa /*
*āre bādhethāṁ nirṛtiṁ parāchairasme bhadrā sauśravasāni santu //2 //*
*somārudrā yuvametānyasme viśvā tanrașu bheṣajāni dhattam /*
*ava syataṁ muṁchataṁ yanno asti tanrașu baddhaṁ kṛtameno asmat //3 //*
*tigmāyudhau tigmahetī suśevau somārudrāviha su mṛḷataṁ na /*
*pra no muṁchataṁ varuṇasya pāśād gopāyataṁ naḥ sumanasyamānāḥ //4 //*

## ४५१. भरद्वाजो बार्हस्पत्यः वीतहव्य आंगिरसो वा (Bharadvājo Bārhaspatyaḥ Vītahavya Āṁgiraso Vā)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ६.१५.१-१९; सा. (Sv.) १५६७-१५६९

ऋ. (Rv.) ६.१५.१-१९

इममू षु वो अतिथिमुषर्बुधं विश्वासां विशां पतिमृंजसे गिरा ।
वेतीद्दिवो जनुषा कच्चिदा शुचिर्ज्योक् चिदत्ति गर्भो यदच्युतम् ॥१॥
मित्रं न यं सुधितं भृगवो दधुर्वनस्पतावीड्यमूर्ध्वशोचिषम् ।
स त्वं सुप्रीतो वीतहव्ये अद्भुत प्रशस्तिभिर्महयसे दिवेदिवे ॥२॥
स त्वं दक्षस्यावृको वृधो भूरर्यः परस्यान्तरस्य तरुषः ।
रायः सूनो सहसो मर्त्येष्वा छर्दिर्यच्छ वीतहव्याय सप्रथो भरद्वाजाय सप्रथः ॥३॥
द्युतानं वो अतिथिं स्वर्णरमग्निं होतारं मनुषः स्वध्वरम् ।
विप्रं न द्युक्षवचसं सुवृक्तिभिर्हव्यवाहमरतिं देवमृंजसे ॥४॥

पावकया यश्चितयन्त्या कृपा क्षामन् रुरुच उषसो न भानुना ।
तूर्वन्न यामन्नेतशस्य नू रण आ यो घृणे न ततृषाणो अजरः ॥५॥
अग्निमग्निं वः समिधा दुवस्यत प्रियंप्रियं वो अतिथिं गृणीषणि ।
उप वो गीर्भिरमृतं विवासत देवो देवेषु वनते हि वार्यं ।
देवो देवेषु वनते हि नो दुवः ॥६॥
समिद्धमग्निं समिधा गिरा गृणे शुचिं पावकं पुरो अध्वरे ध्रुवम् ।
विप्रं होतारं पुरुवारमद्रुहं कविं सुम्नैरीमहे जातवेदसम् ॥७॥
त्वां दूतमग्ने अमृतं युगेयुगे हव्यवाहं दधिरे पायुमीड्यम् ।
देवासश्च मर्तासश्च जागृविं विभुं विश्पतिं नमसा नि षेदिरे ॥८॥
विभूषन्नग्न उभयाँ अनु व्रता दूतो देवानां रजसी समीयसे ।
यत्ते धीतिं सुमतिमावृणीमहेऽध स्मा नस्त्रिवरूथः शिवो भव ॥९॥
तं सुप्रतीकं सुदृशं स्वंचमविद्वांसो विदुष्टरं सपेम ।
स यक्षद् विश्वा वयुनानि विद्वान् प्र हव्यमग्निरमृतेषु वोचत् ॥१०॥
तमग्ने पास्युत तं पिपर्षि यस्त आनट् कवये शूर धीतिम् ।
यज्ञस्य वा निशितिं वोदितिं वा तमित्पृणक्षि शवसोत राया ॥११॥
त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात् ।
सं त्वा ध्वस्मन्वदभ्येतु पाथः सं रयिः स्पृहयाय्यः सहस्री ॥१२॥
अग्निर्होता गृहपतिः स राजा विश्वा वेद जनिमा जातवेदाः ।
देवानामुत यो मर्त्यानां यजिष्ठः स प्र यजतामृतावा ॥१३॥
अग्ने यदद्य विशो अध्वरस्य होतः पावकशोचे वेष्ट्वं हि यज्वा ।
ऋता यजासि महिना वि यद्भूर्हव्या वह यविष्ठ या ते अद्य ॥१४॥
अभि प्रयांसि सुधितानि हि ख्यो नि त्वा दधीत रोदसी यजध्यै ।
अवा नो मघवन्वाजसातावग्ने विश्वानि दुरिता तरेम ता तरेम तवावसा तरेम ॥१५॥
अग्ने विश्वेभिः स्वनीक देवैरूर्णावन्तं प्रथमः सीद योनिम् ।
कुलायिनं घृतवन्तं सवित्रे यज्ञं नय यजमानाय साधु ॥१६॥
इममु त्यमथर्ववदग्निं मन्थन्ति वेधसः। यमंकूयन्तमानयन्नमूरं श्याव्याभ्यः ॥१७॥
जनिष्वा देववीतये सर्वताता स्वस्तये ।
आ देवान् वक्ष्यमृताँ ऋतावृधो यज्ञं देवेषु पिस्पृशः ॥१८॥
वयमु त्वा गृहपते जनानामग्ने अकर्म्म समिधा बृहन्तम् ।
अस्थूरि नो गार्हपत्यानि सन्तु तिग्मेन तस्तेजसा सं शिशाधि ॥१९॥
*imamū ṣu vo atithimuṣarbudhaṁ viśvāsāṁ viśāṁ patimṛñjase girā ।*
*vetīddivo januṣā kachchidā śuchirjyok chidatti garbho yadachyutam ॥1॥*
*mitraṁ na yaṁ sudhitaṁ bhṛgavo dadhurvanaspatārvāḍyamūrdhvaśochiṣam ।*
*sa tvaṁ suprīto vītahavye adbhuta praśastibhirmahayase divedive ॥2॥*
*sa tvaṁ dakṣasyāvṛko vṛdho bhūraryaḥ parasyāntarasya taruṣaḥ ।*
*rāyaḥ sūno sahasoā martyeṣvā chhardiryachchha vītahavyāya saprathо bharadvājāya saprathaḥ ॥3॥*
*dyutānaṁ vo atithiṁ svarṇaramagiṁna hotāraṁ manuṣaḥ svadhvaram ।*
*vipraṁ na dyukṣavachasaṁ suvṛktibhirhavyavāhamaratiṁ devamṛñjase ॥4॥*
*pāvakayā yaśchitayantyā kṛpā kṣāman rurucha uṣaso na bhānunā ।*
*tūrvanna yāmannetaśasya nū raṇa ā yo ghṛṇe na tatṛṣāṇo ajaraḥ ॥5॥*
*agnimagiṁna vaḥ samidhā duvasyata priyaṁpriyaṁ vo atithiṁ gṛṇīṣaṇi ।*
*upa vo gīrbhiramṛtaṁ vivāsata devo deveṣu vanate hi vāryaṁ ।*
*devo deveṣu vanate hi no duvaḥ ॥6॥*
*samiddhamagiṁna samidhā girā gṛṇe śuchiṁ pāvakaṁ puro adhvare dhruvam ।*
*vipraṁ hotāraṁ puruvāramadruhaṁ kaviṁ sumnairīmahe jātavedasam ॥7॥*
*tvāṁ dūtamagne amṛtaṁ yugeyuge havyavāhaṁ dadhire pāyumīḍyam ।*
*devāsaścha martāsaścha jāgṛviṁ vibhuṁ viśpatiṁ namasā ni ṣedire ॥8॥*
*vibhūṣannagna ubhayāṁ anu vratā dūto devānāṁ rajasī samīyase ।*
*yatte dhītiṁ sumatimāvṛṇīmahe'dha smā nastrivarūthaḥ śivo bhava ॥9॥*

*taṁ supratīkaṁ sudṛśaṁ svaṁchamavidvāṁso viduṣṭaraṁ sapema ।*
*sa yakṣad viśvā vayunāni vidvān pra havyamagniramṛteṣu vochat ॥10 ॥*
*tamagne pāsyuta taṁ piparṣi yasta ānaṭ kavaye śūra dhītim ।*
*yajñasya vā niśitiṁ voditiṁ vā tamitpṛṇakṣi śavasota rāyā ॥11 ॥*
*tvamagne vanuṣyato ni pāhi tvamu naḥ sahasāvannavadyāt ।*
*saṁ tvā dhvasmanvadabhyetu pāthaḥ saṁ rayiḥ spṛhayāyyaḥ sahasrī ॥12 ॥*
*agnirhotā gṛhapatiḥ sa rājā viśvā veda janimā jātavedāḥ ।*
*devānāmuta yo martyānāṁ yajiṣṭhaḥ sa pra yajatāmṛtāvā ॥13 ॥*
*agne yadadya viśo adhvarasya hotaḥ pāvakaśoche veṣṭvaṁ hi yajvā ।*
*ṛtā yajāsi mahinā vi yadbhūrhavyā vaha yaviṣṭha yā te adya ॥14 ॥*
*abhi prayāṁsi sudhitāni hi khyo ni tvā dadhīta rodasī yajadhyai ।*
*avā no maghavanvājasātāvagne viśvāni duritā tarema tā tarema tavāvasā tarema ॥15 ॥*
*agne viśvebhiḥ svanīka devairūrṇāvantaṁ prathamaḥ sīda yonim ।*
*kulāyinaṁ ghṛtavantaṁ savitre yajñaṁ naya yajamānāya sādhu ॥16 ॥*
*imamu tyamatharvavadagiṁna manthanti vedhasaḥ ।*
*yamaṁkūyantamānayannamūraṁ śyāvyābhyaḥ ॥17 ॥*
*janiṣvā devavītaye sarvatātā svastaye ।*
*ā devān vakṣayamṛtām̐ ṛtāvṛdho yajñaṁ deveṣu pispṛśaḥ ॥18 ॥*
*vayamu tvā gṛhapate janānāmagne akarmma samidhā bṛhantam ।*
*asthūri no gārhapatyāni santu tigmena tastejasā saṁ śiśādhi ॥19 ॥*

सा. (Sv.) १५६७-१५६९

समिद्धमग्निं समिधा गिरा गृणे शुचिं पावकं पुरो अध्वरे ध्रुवम् ।
विप्रं होतारं पुरुवारमद्रुहं कविं सुम्नैरीमहे जातवेदसम् ॥१ ॥
त्वां दूतमग्ने अमृतं युगेयुगे हव्यवाहं दधिरे पायुमीड्यम् ।
देवासश्च मर्तासश्च जागृविं विभुं विश्पतिं नमसा नि षेदिरे ॥२ ॥
विभूषन्नग्न उभयाँ अनु व्रता दूतो देवानां रजसी समीयसे।
यत्ते धीतिं सुमतिमावृणीमहेऽध स्मा नस्त्रिवरूथः शिवो भव ॥३ ॥
*samiddhamagiṁna samidhā girā gṛṇe śuchiṁ pāvakaṁ puro adhvare dhruvam ।*
*vipraṁ hotāraṁ puruvāramadruhaṁ kaviṁ sumnairīmahe jātavedasam ॥1 ॥*
*tvāṁ dūtamagne amṛtaṁ yugeyuge havyavāhaṁ dadhire pāyumīḍyam ।*
*devāsaścha martāsaścha jāgṛviṁ vibhuṁ viśpatiṁ namasā ni ṣedire ॥2 ॥*
*vibhūṣannagna ubhayām̐ anu vratā dūto devānāṁ rajasī samīyase ।*
*yatte dhītiṁ sumatimāvṛṇīmahe'dha smā nasnnivarūthaḥ śivo bhava ॥3 ॥*

**४५२. भरद्वाज (सार्षेदी.); भारद्वाजः (सार्षेदी.सास्वा.) (Bharadvāja [Sad.]; Bhāradvājaḥ [Sad.Sas.])**

१. इन्द्रः (Indraḥ) - सा. (Sv.) १२७

य आनयत्परावतः सुनीती तुर्वशं यदुम्। इन्द्रः स नो युवा सखा ॥३ ॥
*ya ānayatparāvataḥ sunītī turvaśaṁ yadum । indraḥ sa no yuvā sakhā ॥3 ॥*

**४५३. भरद्वाजो बार्हस्पत्यः (साग्री. सास्वा.); शंयुबार्हस्पत्यः (ऋसर्व. ६.४६.७.; ७.४.९; ६.४६.३); भारद्वाजः (सार्षेदी.) (Bharadvājo Bārhaspatyaḥ [Ssb. Sas.]; Śaṁyubārhaspatyaḥ [Rss. 6.46.7.; 7.4.9; 6.46.3]; Bhāradvājaḥ [Sad.])**

१. इन्द्रः (Indraḥ) - सा. (Sv.) २६२; २६६; २८६

सा. (Sv.) २६२

यदिन्द्र नाहुषीष्वा ओजो नृम्णं च कृष्टिषु ।
यद्वा पंचक्षितीनां द्युम्नमा भर सत्रा विश्वानि पौंस्या ॥१० ॥
*yadindra nāhuṣīṣvā ojo nṛmṇaṁ cha kṛṣṭiṣu ।*
*yadvā paṁchakṣitīnāṁ dyumnamā bhara satrā viśvāni pauṁsyā ॥10 ॥*

सा. (Sv.) २६६

इन्द्र त्रिधातु शरणं त्रिवरूथं स्वस्तये। छर्दिर्यच्छ मघवद्भ्यश्च मह्यं च यावधा दिद्युमेभ्यः ॥४ ॥
*indra tridhātu śaraṇaṁ trivarūthaṁ svastaye ।*

*chhardiryachchha maghavadbhyaścha mahyaṁ cha yāvadhā didyumebhyaḥ ॥4॥*

सा. (Sv.) २८६

यः सत्राहा विचर्षणिरिन्द्रं तं हूमहे वयम्।
सहस्रमन्यो तुविनृम्ण सत्पते भवा समत्सु नो वृधे ॥४॥
*yaḥ satrāhā vicharṣaṇirindraṁ taṁ hūmahe vayam ।*
*sahasramanyo tuvinṛmṇa satpate bhavā samatsu no vṛdhe ॥4॥*

## ४५४. भरद्वाजः शिरम्बिठः (Bharadvājaḥ Śirambiṭhaḥ)

१. इन्द्रः (Indraḥ) - य. (Yv.) ३५.१८

परीमे गामनेषत पर्य्यग्निमहृषत। देवेष्व क्रत श्रवः कऽइमाँऽआ दधर्षति ॥८॥
*parīme gāmaneṣata paryyagnimahṛṣata । deveṣva krata śravaḥ ka'imām̐'ā dadharṣati ॥8॥*

## ४५५. भर्गः (Bhargaḥ)

१. अग्निः (Agniḥ) - अ. (Av.) २०.१०३.२-३

अग्न आ याह्यग्निभिर्होतारं त्वा वृणीमहे ।
आ त्वामनक्तु प्रयता हविष्मती यजिष्ठं बर्हिरासदे ॥२॥
अच्छा हि त्वा सहसः सूनो अंगिरः स्रुचश्चरन्त्यध्वरे ।
ऊर्जो नपातं घृतकेशमीमहेऽग्निं यज्ञेषु पूर्व्यम् ॥३॥
*agna ā yāhyagnibhirhotāraṁ tvā vṛṇīmahe ।*
*ā tvāmanaktu prayatā haviṣmatī yajiṣṭhaṁ barhirāsade ॥2॥*
*achchhā hi tvā sahasaḥ sūno aṁgiraḥ sruchaścharantyadhvare ।*
*ūrjo napātaṁ ghṛtakeśamīmahe'giṁna yajñeṣu pūrvyam ॥3॥*

२. इन्द्रः (Indraḥ) - अ. (Av.) २०.११३.१-२; २०.११८.१-२

अ. (Av.) २०.११३.१-२

उभयं श्रृणवच्च न इन्द्रो अर्वागिदं वचः ।
सत्राच्या मघवा सोमपीतये धिया शविष्ठ आ गमत् ॥१॥
तं हि स्वराजं वृषभं तमोजसे धिषणे निष्टतक्षतुः ।
उतोपमानां प्रथमो नि षीदसि सोमकामं हि ते मनः ॥२॥
*ubhayaṁ śṛṇavachcha na indro arvāgidaṁ vachaḥ ।*
*satrāchyā maghavā somapītaye dhiyā śaviṣṭha ā gamat ॥1॥*
*taṁ hi svarājaṁ vṛṣabhaṁ tamojase dhiṣaṇe niṣṭatakṣatuḥ ।*
*utopamānāṁ prathamo ni ṣīdasi somakāmaṁ hi te manaḥ ॥2॥*

अ. (Av.) २०.११८.१-२

शग्ध्यू३ षु शचीपत इन्द्र विश्वाभिरूतिभिः ।
भगं न हि त्वा यशसं वसुविदमनु शूर चरामसि ॥१॥
पौरो अश्वस्य पुरुकृद गवामस्युत्सो देव हिरण्ययः ।
नकिर्हि दानं परिमर्धिषत् त्वे यद्यद्यामि तदा भर ॥२॥
*śagdhyū3 ṣu śachīpata indra viśvābhirūtibhiḥ ।*
*bhagaṁ na hi tvā yaśasaṁ vasuvidamanu śūra charāmasi ॥1॥*
*pauro aśvasya purukṛda gavāmasyutso deva hiraṇyayaḥ ।*
*nakirhi dānaṁ parimardhiṣat tve yadyadyāmi tadā bhara ॥2॥*

## ४५६. भर्गः प्रागाथः (Bhargaḥ Prāgāthaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ८.६०.१-२०; सा. (Sv.) ३६; ३९; ४६; १५४४-१५४५; १५५२-१५५३

ऋ. (Rv.) ८.६०.१-२०

अग्न आ याह्यग्निभिर्हेतारं त्वा वृणीमहे ।
आ त्वामनक्तु प्रयता हविष्मती यजिष्ठं बर्हिरासदे ॥१॥
अच्छा हि त्वा सहसः सूनो अंगिरः स्रुचश्चरन्त्यध्वरे ।

ऊर्जो नपातं घृतकेशमीमहेऽग्निं यज्ञेषु पूर्व्यम् ॥२॥
अग्ने कविर्वेधा असि होता पावक यक्ष्यः ।
मन्द्रो यजिष्ठो अध्वरेष्वीड्यो विप्रेभिः शुक्र मन्मभिः ॥३॥
अद्रोघमा वहोशतो यविष्ठ्य देवाँ अजस्र वीतये ।
अभि प्रयांसि सुधिता वसो गहि मन्दस्व धीतिभिर्हितः ॥४॥
त्वमित्सप्रथा अस्यग्ने त्रातऋर्तस्कविः ।
त्वां विप्रासः समिधान दीदिव आ विवासन्ति वेधसः ॥५॥
शोचा शोचिष्ठ दीदिहि विशे मयो रास्व स्तोत्रे महाँ असि ।
देवानां शर्मन् मम सन्तु सूरयः शत्रूषाहः स्वग्नयः ॥६॥
यथा चिद्वृद्धमतसमग्ने संजूर्वसि क्षमि ।
एवा दह मित्रमहो यो अस्मध्रुग् दुर्मन्मा कश्च वेनति ॥७॥
मा नो मर्त्ताय रिपवे रक्षस्विने माघशंसाय रीरधः ।
अस्रेधद्भिस्तरणिभिर्यविष्ठ्य शिवेभिः पाहि पायुभिः ॥८॥
पाहि नो अग्न एकया पाह्यु१त द्वितीयया ।
पाहि गीर्भिस्तिसृभिरूर्जाम्पते पाहि चतसृभिर्वसो ॥९॥
पाहि विश्वस्माद्रक्षसो अराव्णः प्र स्म वाजेषु नोऽव ।
त्वामिद्धि नेदिष्ठं देवतातय आपिं नक्षामहे वृधे ॥१०॥
आ नो अग्ने वयोवृधं रयिं पावक शंस्यम् ।
रास्वा च न उपमाते पुरुस्पृहं सुनीती स्वयशस्तरम् ॥११॥
येन वंसाम पृतनासु शर्धतस्तरन्तो अर्य आदिशः ।
स त्वं नो वर्ध प्रयसा शचीवसो जिन्वा धियो वसुविदः ॥१२॥
शिशानो वृषभोः यथाग्निः शृङ्गे दविध्वत् ।
तिग्मा अस्य हनवो न प्रतिधृषे सुजम्भः सहसो यहुः ॥१३॥
नहि ते अग्ने वृषभ प्रतिधृषे जम्भासो यद्वितिष्ठसे ।
स त्वं नो होतः सुहुतं हविष्कृधि वंस्वा नो वार्या पुरु ॥१४॥
शेषे वनेषु मात्रोः सं त्वा मर्तास इन्धते ।
अतन्द्रो हव्या वहसि हविषकृत आदिद्देवेषु राजसि ॥१५॥
सप्त होतारस्तमिदीळते त्वाग्ने सुत्यजमह्रयम् ।
भिनत्सयद्रिं तपसा वि शोचिषा प्राग्ने तिष्ठ जनाँ अति ॥१६॥
अग्निमग्निं वो अध्रिगुं हुवेम वृक्तबर्हिषः ।
अग्निं हितप्रयसः शश्वतीष्वा होतारं चर्षणीनाम् ॥१७॥
केतेन शर्मन्त्सचते सुषामण्यग्ने तुभ्यं चिकित्वना ।
इषण्यया नः पुरुरूपमा भर वाजं नेदिष्ठमूतये ॥१८॥
अग्ने जरितार्विश्पतिस्तेपानो देव रक्षसः ।
अप्रोषिवान्गृहपतिर्महाँ असि दिवस्पायुर्दुरोणयुः ॥१९॥
मा नो रक्ष आ वेशीदाघृणीवसो मा यातुर्यातुमावताम् ।
परोगव्यूत्यनिरामप क्षुधमग्ने सेध रक्षस्विनः ॥२०॥

*agna ā yāhyagnibhirhetāraṁ tvā vṛṇīmahe* ।
*ā tvāmanaktu prayatā haviṣmatī yajiṣṭhaṁ barhirāsade* ॥1॥
*achchhā hi tvā sahasaḥ sūno aṁgiraḥ sruchaścharantyadhvare* ।
*ūrjo napātaṁ ghṛtakeśamīmahe'giṁna yajñeṣu pūrvyam* ॥2॥
*agne kavirvedhā asi hotā pāvaka yakṣayaḥ* ।
*mandro yajiṣṭho adhvareṣvīḍyo viprebhiḥ śukra manmabhiḥ* ॥3॥
*adroghamā vahośato yaviṣṭhya devāṁ̐ ajasra vītaye* ।
*abhi prayāṁsi sudhitā vaseā gahi mandasva dhītibhirhitaḥ* ॥4॥
*tvamitsaprathā asyagne trātaṛrtaskaviḥ* ।
*tvāṁ viprāsaḥ samidhāna dīdiva ā vivāsanti vedhasaḥ* ॥5॥
*śochā śochiṣṭha dīdihi viśe mayo rāsva stotre mahāṁ̐ asi* ।
*devānāṁ śarman mama santu sūrayaḥ śatrūṣāhaḥ svagnayaḥ* ॥6॥

*yathā chidvṛddhamatasamagne saṁjūrvasi kṣami /*
*evā daha mitramaho yo asmadhrug durmanmā kaścha venati //7 //*
*mā no marttāya ripave rakṣasvine māghaśaṁsāya rīradhaḥ /*
*asredhadbhistaraṇibhiryaviṣṭhya śivebhiḥ pāhi pāyubhiḥ //8 //*
*pāhi no agna ekayā pāhyu1ta dvitīyayā /*
*pāhi gīrbhistisṛbhirūrjāmpate pāhi chatasṛbhirvaso //9 //*
*pāhi viśvasmādrakṣaso arāvṇaḥ pra sma vājeṣu no'va /*
*tvāmiddhi nediṣṭhaṁ devatātaya āpiṁ nakṣāmahe vṛdhe //10 //*
*ā no agne vayovṛdhaṁ rayiṁ pāvaka śaṁsyam /*
*rāsvā cha na upamāte puruspṛhaṁ sunītī svayaśastaram //11 //*
*yena vaṁsāma pṛtanāsu śardhatastaranto arya ādiśaḥ /*
*sa tvaṁ no vardha prayasā śachīvaso jinvā dhiyo vasuvidaḥ //12 //*
*śiśāno vṛṣabhoḥ yathāgniḥ śṛṅge davidhvat /*
*tigmā asya hanavo na pratidhṛṣe sujambhaḥ sahaso yahuḥ //13 //*
*nahi te agne vṛṣabha pratidhṛṣe jambhāso yadvitiṣṭhase /*
*sa tvaṁ no hotaḥ suhutaṁ haviṣkṛdhi vaṁsvā no vāryā puru //14 //*
*śeṣe vaneṣu mātroḥ saṁ tvā martāsa indhate /*
*atandro havyā vahasi haviṣakṛta ādiddeveṣu rājasi //15 //*
*sapta hotārastamidīḻate tvāgne sutyajamahrayam /*
*bhinatsayadriṁ tapasā vi śochiṣā prāgne tiṣṭha janāṁ̐ ati //16 //*
*agnimagiṁna vo adhriguṁ huvema vṛktabarhiṣaḥ /*
*agiṁna hitaprayasaḥ śaśvatīṣvā hotāraṁ charṣaṇīnām //17 //*
*ketena śarmantsachate suṣāmaṇyagne tubhyaṁ chikitvanā /*
*iṣaṇyayā naḥ pururūpamā bhara vājaṁ nediṣṭhamūtaye //18 //*
*agne jaritārviśpatistepāno deva rakṣasaḥ /*
*aproṣivāngṛhapatirmahāṁ̐ asi divaspāyurduroṇayuḥ //19 //*
*mā no rakṣa ā veśīdāghṛṇīvaso mā yāturyātumāvatām /*
*parogavyūtyanirāmapa kṣudhamagne sedha rakṣasvinaḥ //20 //*

सा. (Sv.) ३६

पाहि नो अग्न एकया पाह्यू३त द्वितीयया।
पाहि गीर्भिस्तिसृभिरूर्जा पते पाहि चतसृभिर्वसो ॥२॥
*pāhi no agna ekayā pāhyū3ta dvitīyayā /*
*pāhi gīrbhistisṛbhirūrjā pate pāhi chatasṛbhirvaso //2 //*

सा. (Sv.) ३९

अग्ने जरितर्विश्पतिस्तपानो देव रक्षसः।
अप्रोषिवान् गृहपते महाँ असि दिवस्पायुर्दुरोणयुः ॥५॥
*agne jaritarviśpatistapāno deva rakṣasaḥ /*
*aproṣivān gṛhapate mahāṁ̐ asi divaspāyurduroṇayuḥ //5 //*

सा. (Sv.) ४६

शेषे वनेषु मातृषु सं त्वा मर्तास इन्धते।
अतन्द्रो हव्यं वहसि हविष्कृत आदिद्देवेषु राजसि ॥२॥
*śeṣe vaneṣu mātṛṣu saṁ tvā martāsa indhate /*
*atandro havyaṁ vahasi haviṣkṛta ādiddeveṣu rājasi //2 //*

सा. (Sv.) १५४४-१५४५

पाहि नो अग्न एकया पाह्यु३त द्वितीयया ।
पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो ॥१॥
पाहि विश्वस्माद्रक्षसो अराव्णः प्र स्म वाजेषु नोऽव ।
त्वामिद्धि नेदिष्ठं देवतातय आपिं नक्षामहे वृधे ॥२॥
*pāhi no agna ekayā pāhyu3ta dvitīyayā /*
*pāhi gīrbhistisṛbhirūrjāṁ pate pāhi chatasṛbhirvaso //1 //*
*pāhi viśvasmādrakṣaso arāvṇaḥ pra sma vājeṣu no'va /*
*tvāmiddhi nediṣṭhaṁ devatātaya āpiṁ nakṣāmahe vṛdhe //2 //*

सा. (Sv.) १५५२-१५५३

अग्न आ याह्यग्निभिर्होतारं त्वा वृणीमहे ।
आ त्वामनक्त प्रयता हविष्मती यजिष्ठं बर्हिरासदे ॥१॥
अच्छा हि त्वा सहसः सूनो अंगिरः स्रचश्चरन्त्यध्वरे ।
ऊर्जो नपातं घृतकेशमीमहेऽग्निं यज्ञेषु पूर्व्यम् ॥२॥
*agna ā yāhyagnibhirhotāraṁ tvā vṛṇīmahe /*
*ā tvāmanakta prayatā haviṣmatī yajiṣṭhaṁ barhirāsade //1 //*
*achchhā hi tvā sahasaḥ sūno aṁgiraḥ srachaścharantyadhvare /*
*ūrjo napātaṁ ghṛtakeśamīmahe'gniṁ yajñeṣu pūrvyam //2 //*

२. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.६१.१-१८; सा. (Sv.) २४०; २५३; २७४; २९०; १२३३-१२३४; १३२१-१३२२; १४५८-१४५९; १५८०-१५८२

ऋ. (Rv.) ८.६१.१-१८

उभयं श्रृणवच्च न इन्द्रो अर्वागिदं वचः ।
सत्राच्या मघवा सोमपीतये धिया शविष्ठ आ गमत् ॥१॥
तं हि स्वराजं वृषभं तमोजसे धिषणे निष्टतक्षतुः ।
उतोपमानां प्रथमो नि षीदसि सोमकामं हि ते मनः ॥२॥
आ वृषस्व पुरूवसो सुतस्येन्द्रान्धसः ।
विद्मा हि त्वा हरिवः पृत्सु सासहिमधृष्टं चिद्दधृष्वणिम् ॥३॥
अप्रामिसत्य मघवन्तथेदसदिन्द्र क्रत्वा यथा वशः ।
सनेम वाजं तव शिप्रिन्नवसा मक्षू चिद्यन्तो अद्रिवः ॥४॥
शग्ध्यू३ षु शचीपत इन्द्र विश्वाभिरूतिभिः ।
भगं न हि त्वा यशसं वसुविदमनु शूर चरामसि ॥५॥
पौरो अश्वस्य पुरुकृद् गवामस्युत्सो देव हिरण्ययः ।
नकिर्हि दानं परिमर्धिषत्त्वे यद्यद्यामि तदा भर ॥६॥
त्वं ह्येहि चेरवे विदा भगं वसुत्तये ।
उद्वावृषस्व मघवन् गविष्टय उदिन्द्राश्वमिष्टये ॥७॥
त्वं पुरू सहस्राणि शतानि य यूथा दानाय मंहसे ।
आ पुरन्दरं चकृम विप्रवचस इन्द्रं गायन्तोऽवसे ॥८॥
अविप्रो वा यदविधद् विप्रो वेन्द्र ते वचः ।
स प्र ममन्दत्त्वाया शतक्रतो प्राचामन्यो अहंसन ॥९॥
उग्रबाहुर्म्रक्षकृत्वा पुरन्दरो यदि मे श्रृणवद्धवम् ।
वसूयवो वसुपतिं शतक्रतुं स्तोमैरिन्द्रं हवामहे ॥१०॥
न पापासो मनामहे नारायासो न जळ्हवः ।
यदिन्विन्द्रं वृषणं सचा सुते सखायं कृणवामहै ॥११॥
उग्रं युयुज्म पृतनासु सासहिमृणकातिमदाभ्यम् ।
वेदाभृमं चित्सनिता रथीतमो वाजिनं यमिदू नशत् ॥१२॥
यत इन्द्र भयामहे ततो नो अभयं कृधि ।
मधवंछग्धि तव तन्न ऊतिभिर्वि द्विषो वि मृधो जहि ॥१३॥
त्वं हि राधस्पते राधसो महः क्षयस्यासि विधतः ।
तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे ॥१४॥
इन्द्र स्पळुत वृत्रहा परस्पा नो वरेण्यः ।
स नो रक्षिषच्चरमं स मध्यमं स पश्चात्पातु नः पुरः ॥१५॥
त्वं नः पश्चादधरादुत्तरात्पुर इन्द्र नि पाहि विश्वतः ।
आरे अस्मत्कृणुहि दैव्यं भयमारे हेतीरदेवीः ॥१६॥
अद्याद्या श्वः श्व इन्द्र त्रस्व परे च नः ।
विश्व चनो जरितृन्त्सत्पते अहा दिवा नक्तं च रक्षिषः ॥१७॥
प्रभंगी शूरो मघवा तुवीमघः सम्मिशलो वीर्याय कम् ।

उभा ते बाहू वृषणा शतक्रतो नि या वज्रं मिमिक्षतुः ॥१८॥
*ubhayaṁ śṛṇavachcha na indro arvāgidaṁ vachaḥ /*
*satrāchyā maghavā somapītaye dhiyā śaviṣṭha ā gamat //1 //*
*taṁ hi svarājaṁ vṛṣabhaṁ tamojase dhiṣaṇe niṣṭatakṣatuḥ /*
*utopamānāṁ prathamo ni ṣīdasi somakāmaṁ hi te manaḥ //2 //*
*ā vṛṣasva purūvaso sutasyendrāndhasaḥ /*
*vidmā hi tvā harivaḥ pṛtsu sāsahimadhṛṣṭaṁ chiddadhṛṣvaṇim //3 //*
*aprāmisatya maghavantathedasadindra kratvā yathā vaśaḥ /*
*sanema vājaṁ tava śiprinnavasā makṣū chidyanto adrivaḥ //4 //*
*śagdhyū3 ṣu śachīpata indra viśvābhirūtibhiḥ /*
*bhagaṁ na hi tvā yaśasaṁ vasuvidamanu śūra charāmasi //5 //*
*pauro aśvasya purukṛd gavāmasyutso deva hiraṇyayaḥ /*
*nakirhi dānaṁ parimardhiṣattve yadyadyāmi tadā bhara //6 //*
*tvaṁ hyehi cherave vidā bhagaṁ vasuttaye /*
*udvāvṛṣasva maghavan gaviṣṭaya udindrāśvamiṣṭaye //7 //*
*tvaṁ purū sahasrāṇi śatāni ya yūthā dānāya maṁhase /*
*ā purandaraṁ chakṛma vipravachasa indraṁ gāyanto'vase //8 //*
*avipro vā yadavidhad vipro vendra te vachaḥ /*
*sa pra mamandattvāyā śatakrato prāchāmanyo ahaṁsana //9 //*
*ugrabāhurmrakṣakṛtvā purandaro yadi me śṛṇavaddhavam /*
*vasūyavo vasupatiṁ śatakratuṁ stomairindraṁ havāmahe //10 //*
*na pāpāso manāmahe nārāyāso na jaḻhavaḥ /*
*yadinnvindraṁ vṛṣaṇaṁ sachā sute sakhāyaṁ kṛṇavāmahai //11 //*
*ugraṁ yuyujma pṛtanāsu sāsahimṛṇakātimadābhyam /*
*vedābhṛmaṁ chitsanitā rathītamo vājinaṁ yamidū naśat //12 //*
*yata indra bhayāmahe tato no abhayaṁ kṛdhi /*
*madhavaṁchhagnidha tava tanna ūtibhirvi dviṣo vi mṛdho jahi //13 //*
*tvaṁ hi rādhaspate rādhaso mahaḥ kṣayasyāsi vidhataḥ /*
*taṁ tvā vayaṁ maghavannindra girvaṇaḥ sutāvanto havāmahe //14 //*
*indra spaḻuta vṛtrahā paraspā no vareṇyaḥ /*
*sa no rakṣiṣachcharamaṁ sa madhyamaṁ sa paśchātpātu naḥ puraḥ //15 //*
*tvaṁ naḥ paśchādadharāduttarātpura indra ni pāhi viśvataḥ /*
*āre asmatkṛṇuhi daivyaṁ bhayamāre hetīradevīḥ //16 //*
*adyādyā śvaḥ śva indra trasva pare cha naḥ /*
*viśva chano jaritṝntsatpate ahā divā naktaṁ cha rakṣiṣaḥ //17 //*
*prabhaṁgī śūro maghavā tuvīmaghaḥ sammiśalo vīryāya kam /*
*ubhā te bāhū vṛṣaṇā śatakrato ni yā vajraṁ mimikṣatuḥ //18 //*

सा. (Sv.) २४०

त्वं ह्येहि चेरवे विदा भगं वसुत्तये। उद्वावृषस्व मघवन् गविष्टय उदिन्द्राश्वमिष्टये ॥८॥
*tvaṁ hyehi cherave vidā bhagaṁ vasuttaye / udvāvṛṣasva maghavan gaviṣṭaya udindrāśvamiṣṭaye //8 //*

सा. (Sv.) २५३

शग्ध्यू३षु शचीपत इन्द्र विश्वाभिरूतिभिः।
भगं न हि त्वा यशसं वसुविदमनु शूर चरामसि ॥१॥
*śagdhyū3ṣu śachīpata indra viśvābhirūtibhiḥ /*
*bhagaṁ na hi tvā yaśasaṁ vasuvidamanu śūra charāmasi //1 //*

सा. (Sv.) २७४

यत इन्द्र भयामहे ततो नो अभयं कृधि ।
मघवंछग्धि तव तन्न ऊतये वि द्विषो वि मृधो जहि ॥२॥
*yata indra bhayāmahe tato no abhayaṁ kṛdhi /*
*maghavaṁchhagdhi tava tanna ūtaye vi dviṣo vi mṛdho jahi //2 //*

सा. (Sv.) २९०

उभयं शृणवच्च न इन्द्रो अर्वागिदं वचः ।
सत्राच्या मघवान्त्सोमपीतये धिया शविष्ठ आ गमत् ॥८॥
*ubhayaṁ śṛṇavachcha na indro arvāgidaṁ vachaḥ ।*
*satrāchyā maghavāntsomapītaye dhiyā śaviṣṭha ā gamat ॥8॥*

सा. (Sv.) १२३३-१२३४

उभयं शृणवच्च न इन्द्रो अर्वागिदं वचः ।
सत्राच्या मघवान्त्सोमपीतये धिया शविष्ठ आ गमत् ॥१॥
तं हि स्वराजं वृषभं तमोजसा धिषणे निष्टतक्षतुः ।
उतोपमानां प्रथमो निषीदसि सोमकामं हि ते मनः ॥२॥
*ubhayaṁ śṛṇavachcha na indro arvāgidaṁ vachaḥ ।*
*satrāchyā maghavāntsomapītaye dhiyā śaviṣṭha ā gamat ॥1॥*
*taṁ hi svarājaṁ vṛṣabhaṁ tamojasā dhiṣaṇe niṣṭatakṣatuḥ ।*
*utopamānāṁ prathamo niṣīdasi somakāmaṁ hi te manaḥ ॥2॥*

सा. (Sv.) १३२१-१३२२

यत इन्द्र भयामहे ततो नो अभयं कृधि ।
मघवंछग्धि तव तन्न ऊतये वि द्विषो वि मृधो जहि ॥१॥
त्वं हि राधसस्पते राधसो महः क्षयस्यासि विधर्ता ।
तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे ॥२॥
*yata indra bhayāmahe tato no abhayaṁ kṛdhi ।*
*maghavaṁchhagdhi tava tanna ūtaye vi dviṣo vi mṛdho jahi ॥1॥*
*tvaṁ hi rādhasaspate rādhaso mahaḥ kṣayasyāsi vidhartā ।*
*taṁ tvā vayaṁ maghavannindra girvaṇaḥ sutāvanto havāmahe ॥2॥*

सा. (Sv.) १४५८-१४५९

अद्याद्या श्वःश्व इन्द्र त्रास्व परे च नः ।
विश्वा च नो जरितृन्सत्पते अहा दिवा नक्तं च रक्षिषः ॥१॥
प्रभंगी शूरो मघवा तुवीमघः सम्मिश्लो वीर्याय कम् ।
उभा ते बाहु वृषणा शतक्रतो नि या वज्रं मिमिक्षतुः ॥२॥
*adyādyā śvaḥśva indra trāsva pare cha naḥ ।*
*viśvā cha no jaritṛnsatpate ahā divā naktaṁ cha rakṣiṣaḥ ॥1॥*
*prabhaṁgī śūro maghavā tuvīmaghaḥ sammiślo vīryāya kam ।*
*ubhā te bāhu vṛṣaṇā śatakrato ni yā vajraṁ mimikṣatuḥ ॥2॥*

सा. (Sv.) १५८०-१५८२

पौरो अश्वस्य पुरुकृद्गवामस्युत्सो देव हिरण्ययः ।
न किर्हि दानं परि मर्धिषत्त्वे यद्यद्यामि तदा भर ॥२॥
त्वं ह्येहि चेरवे विदा भगं वसुत्तये ।
उद्वावृषस्व मघवन्गविष्टय उदिन्द्राश्वमिष्टये ॥१॥
*pauro aśvasya purukṛdgavāmasyutso deva hiraṇyayaḥ ।*
*na kirhi dānaṁ pari mardhiṣattve yadyadyāmi tadā bhara ॥2॥*
*tvaṁ hyehi cherave vidā bhagaṁ vasuttaye ।*
*udvāvṛṣasva maghavangaviṣṭaya udindrāśvamiṣṭaye ॥1॥*

**४५७. भर्गः प्रागाथः (साग्री. सास्वा.); शंयुः (सार्षेदी.) (Bhargaḥ Prāgāthaḥ [Ssb. Sas.]; Śaṁyuḥ [Sad.])**

१. अग्निः (Agniḥ) - सा. (Sv.) ४२-४३

त्वमित्सप्रथा अस्यग्ने त्रतऋर्तः कविः ।
त्वां विप्रासः समिधान दीदिव आ विवासन्ति सेधसः ॥८॥
आ नो अग्ने वयोवृधं रयिं पावक शंस्यम् ।
रास्वा च न उपमाते पुरुस्पृहं सुनीती सुयशस्तरम् ॥९॥

*tvamitsaprathā asyagne tratarrtaḥ kaviḥ |*
*tvāṁ viprāsaḥ samidhāna dīdiva ā vivāsanti sedhasaḥ ||8 ||*
*ā no agne vayovṛdhaṁ rayiṁ pāvaka śaṁsyam |*
*rāsvā cha na upamāte puruspṛhaṁ sunītī suyaśastaram ||9 ||*

**४५८. भागलिः (Bhāgaliḥ)**

१. गावः (Gāvaḥ) - अ. (Av.) ६.५२.२

निं गावो गोष्ठे असदन् नि मृगासो अविक्षत। न्यू३र्मयो नदीनां न्य१दृष्टा अलिप्सत ॥२॥
*ni gāvo goṣṭhe asadan ni mṛgāso avikṣata | nyū3rmayo nadīnāṁ nya1dṛṣṭā alipsata ||2 ||*

२. भेषजम् (Bheṣajam) - अ. (Av.) ६.५२.३

आयुर्ददं विपश्चितं श्रुतां कण्वस्य वीरुधम्। आभारिषं विश्वभेषजीमस्यादृष्टान् नि शमयत्॥३॥
*āyurdadaṁ vipaśchitaṁ śrutāṁ kaṇvasya vīrudham |*
*ābhāriṣaṁ viśvabheṣajīmasyādṛṣṭān ni śamayat ||3 ||*

३. सूर्यः (Sūryaḥ) - अ. (Av.) ६.५२.१

उत् सूर्यो दिव एति पुरो रक्षांसि निजूर्वन्। आदित्यः पर्वतेभ्यो विश्वदृष्टो अदृष्टहा ॥१॥
*ut sūryo diva eti puro rakṣāṁsi nijūrvan | ādityaḥ parvatebhyo viśvadṛṣṭo adṛṣṭahā ||1 ||*

**४५९. भारतौ-देवश्रवदेववातौ - द्द. देवश्रव-देववातौ भारतौ (Bhāratau-Devaśravadevavātau - Dṛ. Devaśrava-Devavātau Bhāratau)**

**४६०. भरद्वाजः (Bharadvājaḥ)**

१. अग्निः (Agniḥ) - य. (Yv.) १३.३६; १७.१०; १६; २६.१३

य. (Yv.) १३.३६

अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः। अरं वहन्ति मन्यवे ॥३६॥
*agne yukṣavā hi ye tavāśvāso deva sādhavaḥ | araṁ vahanti manyave ||36 ||*

य. (Yv.) १७.१०

पावकया यश्चितयन्त्या कृपा क्षामन् रुरुचऽउषसो न भानुना ।
तूर्वन्न यामन्ने तशस्य नू रणऽआ यो घृणे न ततृषाणोऽअजरः ॥१०॥
*pāvakayā yaśchitayantyā kṛpā kṣāman rurucha'uṣaso na bhānunā |*
*tūrvanna yāmanne taśasya nū raṇa'ā yo ghṛṇe na tatṛṣāṇo'ajaraḥ ||10 ||*

य. (Yv.) १७.१६

अग्निस्तिग्मेन शोचिषा यासद्विश्वं न्य त्रिणम्। अग्निर्नो वनते रयिम् ॥१६॥
*agnistigmena śochiṣā yāsadviśvaṁ nya triṇam | agnirno vanate rayim ||16 ||*

य. (Yv.) २६.१३

एह्यू षु ब्रवाणि तेऽग्नऽइत्थेतरा गिरः। एभिर्वर्द्धासऽइन्दुभिः ॥१३॥
*ehyū ṣu bravāṇi te'gna'itthetarā giraḥ | ebhirvarddhāsa'indubhiḥ ||13 ||*

२. अग्न्यादयः (Agnyādayaḥ) - य. (Yv.) २९.५९-६०

अग्नयेनीकवते रोहिताञ्जिरनड्वानधोरामौ सावित्रौ पौष्णौ रजतनाभी वैश्वदेवौ पिशंगौ तूपरौ मारुतः कल्माषऽआग्नयेः कृष्णोऽजः सारस्वती मेषी वारुणः पेत्वः ॥५९॥
अग्नये गायत्राय त्रिवृते राथन्तरायाष्टा कपालऽइन्द्राय त्रैष्टुभाय पंचदशाय बार्हतायैकादशकपालो विश्वेभ्यो देवेभ्यो जागतेभ्यः सप्तदशेभ्यो वैरूपेभ्यो द्वादशकपालो मित्रावरुणाभ्यामानुष्टुभाभ्यामेकविंशाभ्यां वैराजाभ्यां पयस्या बृहस्पतये पाङ्काय त्रिणवाय शाक्वराय चरुः सवित्रऽऔष्णिहाय त्रयस्त्रिंशाय रैवताय द्वादशकपालः प्रजापत्यश्चरुरदित्यै विष्णुपत्न्यै चरुरग्नये वैश्वानराय द्वादशकपालोऽनुमत्याऽअष्टाकपालः ॥६०॥
*agnayenīkavate rohitāñjiranaḍvānadhorāmau sāvitrau pauṣṇau rajatanābhī vaiśvadevau piśaṁgau tūparau mārutaḥ kalmāṣa'āgnayeḥ kṛṣṇo'jaḥ sārasvatī meṣī vāruṇaḥ petvaḥ ||59 ||*
*agnaye gāyatrāya trivṛte rāthantarāyāṣṭā kapāla'indrāya traiṣṭubhāya paṁchadaśāya bārhatāyaikādaśakapālo viśvebhyo devebhyo jāgatebhyaḥ saptadaśebhyo vairūpebhyo dvādaśakapālo mitrāvaruṇābhyāmānuṣṭubhābhyāmekaviṁśābhyāṁ vairājābhyāṁ payasyā*

*bṛhaspataye pāṅktāya triṇavāya śākvarāya charuḥ savitra'auṣṇihāya trayastriṁśāya raivatāya dvādaśakapālaḥ prajāpatyaścharuradityai viṣṇupatnyai charuragnaye vaiśvānarāya dvādaśakapālo'numatyā'aṣṭākapālaḥ ॥60 ॥*

३. धनुर्वेदाध्यापकाः (Dhanurvedādhyāpakāḥ) - य. (Yv.) २९.४७

ब्रह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवीऽअनेहसा ।
पूषा नः पातु दुरिताद्दतावृधो रक्षा माकिर्नोऽअघशंसऽईशत ॥४७ ॥
*brahmaṇāsaḥ pitaraḥ somyāsaḥ śive no dyāvāpṛthivī'anehasā ।*
*pūṣā naḥ pātu duritādṛtāvṛdho rakṣā mākirno'aghaśaṁsa'īśata ॥47 ॥*

४. संवत्सरः (Saṁvatsaraḥ) - य. (Yv.) २६.१४

ऋतवस्ते यज्ञं वि तन्वन्तु मासा रक्षन्तु ते हविः ।
संवत्सरस्ते यज्ञं दधातु नः प्रजां च परि पातु नः ॥१४ ॥
*ṛtavaste yajñaṁ vi tanvantu māsā rakṣantu te haviḥ ।*
*saṁvatsaraste yajñaṁ dadhātu naḥ prajāṁ cha pari pātu naḥ ॥14 ॥*

५. महावीर सेनापतिः (Mahāvīra Senāpatiḥ) - य. (Yv.) २९.५१

अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाध्मानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान पुमांसं परि पातु विश्वतः ॥५१ ॥
*ahiriva bhogaiḥ paryeti bāhuṁ jyāyā hetiṁ paribādhmānaḥ ।*
*hastaghro viśvā vayunāni vidvān pumāna pumāṁsaṁ pari pātu viśvataḥ ॥51 ॥*

६. वादयितारो वीराः (Vādayitāro Vīrāḥ) - य. (Yv.) २९.५६-५७

आ क्रन्दयः बलमोजो नऽआधा निष्टनिहि दुरिता बाधमानः ।
अप प्रोथ दुन्दुभे दुच्छुनाऽइतऽइन्द्रस्य मुष्टिरसि वीडयस्व ॥५६ ॥
आमूरज प्रत्यावर्त्तयेमाः केतुमद्दुन्दुभिर्वावदीति ।
समश्वपर्णाश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु ॥५७ ॥
*ā krandayaḥ balamojo na'ādhā niṣṭanihi duritā bādhamānaḥ ।*
*apa protha dundubhe duchchhunā'ita'indrasya muṣṭirasi vīḍayasva ॥56 ॥*
*āmūraja pratyāvarttayemāḥ ketumaddundubhirvāvadīti ।*
*samaśvaparṇāścharanti no naro'smākamindra rathino jayantu ॥57 ॥*

७. विद्वान् (Vidvān) - य. (Yv.) २९.३८

जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे ।
अनाविद्धया तन्वा जय त्वं स त्वा वर्मणो महिमा पिपर्त्तु ॥३८ ॥
*jīmūtasyeva bhavati pratīkaṁ yadvarmī yāti samadāmupasthe ।*
*anāviddhayā tanvā jaya tvaṁ sa tvā varmaṇo mahimā piparttu ॥38 ॥*

८. विद्वांसः (Vidvāṁsaḥ) - य. (Yv.) २९.५८

आग्नेयः कृष्णग्रीवः सारस्वती मेषी बभ्रुः सौम्यः पौष्णः श्यामः शितिपृष्ठो बार्हस्पत्यः शिल्पो वैश्वदेवऽऐन्द्रोऽरुणो मारुतः कल्माषऽऐन्द्राग्नः सं हितो ऽधोरामः सावित्रो वारुणः कृष्णऽएकशितिपात्पेत्वः ॥५८ ॥
*āgneyaḥ kṛṣṇagrīvaḥ sārasvatī meṣī babhruḥ saumyaḥ pauṣṇaḥ śyāmaḥ śitipṛṣṭho bārhaspatyaḥ śilpo vaiśvadeva'aindro'ruṇo mārutaḥ kalmāṣa'aindrāgnaḥ saṁ hito 'dhorāmaḥ sāvitro vāruṇaḥ kṛṣṇa'ekaśitipātpetvaḥ ॥58 ॥*

९. वीरः (Vīraḥ) - य. (Yv.) २९.५२-५४

वनस्पते वीड्वंगो हि भूयाऽअस्मत्सखा प्रतरणः सुवीरः ।
गोभिः सन्नद्धोऽअसि वीडयस्वास्थाता ते जयतु जेत्वानि ॥५२ ॥
दिवः पृथिव्याः पर्योजऽउद्धृतं वनस्पतिभ्यः पर्य्याभृतं सहः ।
अपामोज्मानं परि गोभिरावृतमिन्द्रस्य वज्रं हविषा रथं यज ॥५३ ॥
इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ।
सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ॥५४ ॥
*vanaspate vīḍvaṅgo hi bhūyā'asmatsakhā prataraṇaḥ suvīraḥ ।*
*gobhiḥ sannaddho'asi vīḍayasvāsthātā te jayatu jetvāni ॥52 ॥*
*divaḥ pṛthivyāḥ paryoja'udbhṛtaṁ vanaspatibhyaḥ paryyābhṛtaṁ sahaḥ ।*

*apāmojmānaṁ pari gobhirāvṛtamindrasya vajraṁ haviṣā rathaṁ yaja //53 //*
*indrasya vajro marutāmanīkaṁ mitrasya garbho varuṇasya nābhiḥ /*
*semāṁ no havyadātiṁ juṣāṇo deva ratha prati havyā gṛbhāya //54 //*

१०. वीराः (Vīrāḥ) - य. (Yv.) २९.३९-४६; ४८-५०; ५५

य. (Yv.) २९.३९-४६

धन्वना गा धन्वनाऽऽजिं जयेम धन्वना तीव्राः समदो जयेम ।
धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम ॥३९॥
वक्ष्यन्तीवेदा गनीगन्ति कर्णं प्रियं सखायं परिषस्वजाना ।
योषेव शिङ्क्ते वितताधि धन्वंज्या इयं समने पारयन्ती ॥४०॥
ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे ।
अप शत्रून् विध्यतां संविदाने आर्त्नी इमे विष्फुरन्ती अमित्रान् ॥४१॥
बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य ।
इषुधिः संका पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥४२॥
रथे तिष्ठन् नयति वाजिनः पुरो यत्र-यत्र कामयते सुषारथिः ।
अभीशूनां महिमानं पनायत मनः पश्चादनु यच्छन्ति रश्मयः ॥४३॥
तीव्रान् घोषान् कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः ।
अवक्रामन्तः प्रपदैरमित्रान् क्षिणन्ति शत्रूँ१रनपव्ययन्तः ॥४४॥
रथवाहणं हविरस्य नाम यत्रायुधं निहितमस्य वर्म ।
तत्रा रथमुप शग्मं सदेम विश्वाहा वयं सुमनस्यमानाः ॥४५॥
स्वादुषंसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः ।
चित्रसेनाः इषुबला अमृध्राः सतोवीरा उरवो व्रातसाहाः ॥४६॥

*dhanvanā gā dhanvanā'jiṁ jayema dhanvanā tīvrāḥ samado jayema /*
*dhanuḥ śatrorapakāmaṁ kṛṇoti dhanvanā sarvāḥ pradiśo jayema //39 //*
*vakṣayantīvedā ganīganti karṇaṁ priyaṁ sakhāyaṁ pariṣasvajānā /*
*yoṣeva śiṅkte vitatādhi dhanvaṁjyā iyaṁ samane pārayantī //40 //*
*te ācharantī samaneva yoṣā māteva putraṁ bibhṛtāmupasthe /*
*apa śatrūn vidhyatāṁ saṁvidāne ārtnī ime viṣphurantī amitrān //41 //*
*bahvīnāṁ pitā bahurasya putraśchiśchā kṛṇoti samanāvagatya /*
*iṣudhiḥ saṁkā pṛtanāścha sarvāḥ pṛṣṭhe ninaddho jayati prasūtaḥ //42 //*
*rathe tiṣṭhan nayati vājinaḥ puro yatra-yatra kāmayate suṣārathiḥ /*
*abhīśūnāṁ mahimānaṁ panāyata manaḥ paśchādanu yachchhanti raśmayaḥ //43 //*
*tīvrān ghoṣān kṛṇvate vṛṣapāṇayo'śvā rathebhiḥ saha vājayantaḥ /*
*avakrāmantaḥ prapadairamitrān kṣiṇanti śatrūm̐1ranapavyayantaḥ //44 //*
*rathavāhaṇaṁ havirasya nāma yatrāyudhaṁ nihitamasya varma /*
*tatrā rathamupa śagmaṁ sadema viśvāhā vayaṁ sumanasyamānāḥ //45 //*
*svāduṣaṁsadaḥ pitaro vayodhāḥ kṛchchhreśritaḥ śaktīvanto gabhīrāḥ /*
*chitrasenāḥ iṣubalā amṛdhrāḥ satovīrā uravo vrātasāhāḥ //46 //*

य. (Yv.) २९.४८-५०

सुपर्णं वस्ते मृगोऽअस्या दन्तो गोभिः सन्नद्धा पतति प्रसूता ।
यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यंसन् ॥४८॥
ऋजीते परि वृङ्धि नोऽश्मा भवतु नस्तनूः ।
सोमोऽअधि ब्रवीतु नोऽदितिः शर्म यच्छतु ॥४९॥
आ जंघन्ति सान्वेषां जघनाँ२ऽउप जिघ्नते ।
अश्वाजनि प्रचेतसोऽश्वान्त्समत्सु चोदय ॥५०॥

*suparṇaṁ vaste mṛgo'asyā danto gobhiḥ sannaddhā patati prasūtā /*
*yatrā naraḥ saṁ cha vi cha dravanti tatrāsmabhyamiṣavaḥ śarma yaṁsan //48 //*
*ṛjīte pari vṛṅdhi no'śmā bhavatu nastanūḥ /*
*somo'adhi bravītu no'ditiḥ śarma yachchhatu //49 //*
*ā jaṁghanti sānveṣāṁ jaghanām̐2'upa jighnate /*
*aśvājani prachetaso'śvāntsamatsu chodaya //50 //*

य. (Yv.) २९.५५

उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत् ।
स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयो अप सेध शत्रून् ॥५५॥
*upa śvāsaya pṛthivīmuta dyāṁ purutrā te manutāṁ viṣṭhitaṁ jagat* ।
*sa dundubhe sajūrindreṇa devairdūrāddavīyo apa sedha śatrūn* ॥55॥

११. सोमः (Somaḥ) - य. (Yv.) १९.२-३

परीतो षिंचता सुतं सोमो य उत्तमं हविः ।
दधन्वा यो नर्यो अप्स्व न्तरा सुषाव सोममद्रिभिः ॥२॥
वायोः पूतः पवित्रेण प्रतयङ्क्सोमो अतिद्रुतः । इन्द्रस्य युज्यः सखा ।
वायोः पूतः पवित्रेण प्राङ्क्सोमो अतिद्रुतः । इन्द्रस्य युज्यः सखा ॥३॥
*parīto ṣiṁchatā sutaṁ somo ya uttamaṁ haviḥ* ।
*dadhanvā yo naryo apsva ntarā suṣāva somamadribhiḥ* ॥2॥
*vāyoḥ pūtaḥ pavitreṇa pratayaṅraksomo atidrutaḥ* । *indrasya yujyaḥ sakhā* ।
*vāyoḥ pūtaḥ pavitreṇa prāṅksomo atidrutaḥ* । *indrasya yujyaḥ sakhā* ॥3॥

## ४६१. भार्गवः (Bhārgavaḥ)

१. अग्निः (Agniḥ) - य. (Yv.) २७.४३

पाहि नोऽअग्नऽएकया पाह्यु त द्वितीयया ।
पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो्र ॥४३॥
*pāhi no'agna'ekayā pāhyu ta dvitīyayā* ।
*pāhi gīrbhistisṛbhirūrjāṁ pate pāhi chatasṛbhirvasora* ॥43॥

२. अग्निषोमौ (Agniṣomau) - अ. (Av.) ७.११४.१-२

आ ते ददे वक्षणाभ्य आ तेऽहं हृदयाद् ददे ।
आ ते मुखस्य संकाशात् सर्वं ते वर्च आ ददे ॥१॥
प्रेतो यन्तु व्याध्यः प्रानुध्याः प्रो अशस्तयः ।
अग्नी रक्षस्विनीर्हन्तु सोमो हन्तु दुरस्यतीः ॥२॥
*ā te dade vakṣaṇābhya ā te'haṁ hṛdayād dade* ।
*ā te mukhasya saṁkāśāt sarvaṁ te varcha ā dade* ॥1॥
*preto yantu vyādhyaḥ prānudhyāḥ pro aśastayaḥ* ।
*agnī rakṣasvinīrhantu somo hantu durasyatīḥ* ॥2॥

३. तृषिकाः (Tṛṣiṛkāḥ) - अ. (Av.) ७.११३.१-२

तृष्टिके तृष्टवन्दन उदमूं छिन्धि तृष्टिके । यथा कृतद्विष्टासोऽमूष्मै शेप्यावते ॥१॥
तृष्टासि तृष्टिका विषा विषातक्यसि । परिवृक्ता यथासस्यृषभस्य वशेव ॥२॥
*tṛṣṭike tṛṣṭavandana udamūṁ chhindhi tṛṣṭike* । *yathā kṛtadviṣṭāso'mūṣmai śepyāvate* ॥1॥
*tṛṣṭāsi tṛṣṭikā viṣā viṣātakyasi* । *parivṛktā yathāsasyṛṣabhasya vaśeva* ॥2॥

## ४६२. भावयव्यः कक्षिवान्-(ऋ. १.१२६.१-५); रोमशा ब्रह्मवादिनी (ऋ. १.१२६.७) (Bhāvayavyaḥ Kakṣivān [Rv. 1.126.1-5]; Romaśā Brahmavādinī [Rv. 1.126.7])

१. विद्वान्सः (Vidvānsaḥ) - ऋ. (Rv.) १.१२६.६

आगधिता परिगधिता या कशीकेव जंगहे । ददाति मह्यं यादुरी याशूनां भोज्या शता ॥६॥
*āgadhitā parigadhitā yā kaśīkeva jaṁgahe* ।
*dadāti mahyaṁ yādurī yāśūnāṁ bhojyā śatā* ॥6॥

## ४६३. भिक्षुः (Bhikṣuḥ)

१. धन अन्न दान प्र्शंसा (Dhana Anna Dāna Prraśaṁsā) - ऋ. (Rv.) १०.११७.१-९

न वा उ देवाः क्षुधमिद्वधं ददुरुताशितमुप गच्छन्ति मृतयवः ।
उतो रयिः पृणतो नोप दस्यत्युतापृणन्मर्डितांर न विन्दते ॥१॥
य आध्राय चकमानाय पित्वोऽन्नवान्त्सन्नफितायोपजग्मुषे ।
स्थिरं मनः कृणते सेवते पुरोतो चित्स मर्डितारं न विन्दते ॥२॥

स इद्भोजो यो गृहवे ददात्यन्नकामाय चरते कृशाय ।
अरमस्मै भवति यामहूता उतापरीषु कृणुते सखायम् ॥३॥
न स सखा यो न ददाति सख्ये सचाभुवे सचमानाय पित्वः ।
अपास्मात्प्रेयान्न तदोको अस्ति पृणन्तमन्यमरणं चिदिच्छेत् ॥४॥
पृणीयादिन्नाधमानाय तव्यान्द्राघीयांसमनु पश्येत पन्थाम् ।
ओ हि वर्तन्ते रथ्येव चक्रान्यमन्यमुप तिष्ठन्त रायः ॥५॥
मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य ।
नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी ॥६॥
कृषन्नित्फाल आशितं कृणोति यन्नध्वानमप वृङ्क्ते चरित्रैः ।
वदन्ब्रह्मावदतो वनीयान्पृन्नापिरपृणन्तमभि ष्यात् ॥७॥
एकपाद्भूयो द्विपदो वि चक्रमे द्विपात्त्रिपादमभ्येति पश्चात् ।
चतुष्पादेति द्विपदामभिस्वरे संपश्यन्पङ्क्तीरुपतिष्ठमानः ॥८॥
समौ चद्धिस्तौ न समं विविष्टः सम्मातरा चिन्न समं दुहाते ।
यमयोश्चिन्न समा वीर्याणि ज्ञाती चित्सन्तो न समं पृणीतः ॥९॥

*na vā u devāḥ kṣudhamidvadhaṁ dudurutāśitamupa gachchhanti mṛtayavaḥ /*
*uto rayiḥ pṛṇato nopa dasyatyutāpṛṇanmarḍitāṁra na vindate //1 //*
*ya ādhrāya chakamānāya pitvo'nnavāntsannaphitāyopajagmuṣe /*
*sthiraṁ manaḥ kṛṇate sevate puroto chitsa marḍitāraṁ na vindate //2 //*
*sa idbhojo yo gṛhave dadātyannakāmāya charate kṛśāya /*
*aramasmai bhavati yāmahūtā utāparīṣu kṛṇute sakhāyam //3 //*
*na sa sakhā yo na dadāti sakhye sachābhuve sachamānāya pitvaḥ /*
*apāsmātpreyānna tadoko asti pṛṇantamanyamaraṇaṁ chidichchhet //4 //*
*pṛṇīyādinnādhamānāya tavyāndrāghīyāṁsamanu paśyeta panthām /*
*o hi vartante rathyeva chakrānyamanyamupa tiṣṭhanta rāyaḥ //5 //*
*moghamannaṁ vindate aprachetāḥ satyaṁ bravīmi vadha itsa tasya /*
*nāryamaṇaṁ puṣyati no sakhāyaṁ kevalāgho bhavati kevalādī //6 //*
*kṛṣannitphāla āśitaṁ kṛṇoti yannadhvānamapa vṛṅkte charitraiḥ /*
*vadanbrahmāvadato vanīyānpṛnnāpirapṛṇantamabhi ṣyāt //7 //*
*ekapādbhayo dvipado vi chakrame dvipāttripādamabhyeti paśchāt /*
*chatuṣpādeti dvipadāmabhisvare saṁpaśyanpaḍktīrupatiṣṭhamānaḥ //8 //*
*samau chaddhistau na samaṁ viviṣṭaḥ sammātarā chinna samaṁ duhāte /*
*yamayośchinna samā vīryāṇi jñātī chitsanto na samaṁ pṛṇītaḥ //9 //*

## ४६४. भिषग् (Bhiṣag)

१. ओषधयः (Oṣadhayaḥ) - य. (Yv.) १२.८०; ८२

य. (Yv.) १२.८०

यत्रौषधीः समग्मत राजानः समिताविव। विप्रः स उच्यते भिषग्रक्षोहामीवचातनः ॥८०॥
*yatrauṣadhīḥ samagmata rājānaḥ samitāviva /*
*vipraḥ sa uchyate bhiṣagrakṣohāmīvachātanaḥ //80 //*

य. (Yv.) १२.८२

उच्छुष्मा ओषधीनां गावो गोष्ठदिवेरते। धनं सनिष्यन्तीनामात्मानं तव पूरुष ॥८२॥
*uchchhuṣmā oṣadhīnāṁ gāvo goṣṭhadiverate /*
*dhanaṁ saniṣyantīnāmātmānaṁ tava pūruṣa //82 //*

२. चिकित्सुः (Chikitsuḥ) - य. (Yv.) १२.७८

ओषधीरिति मातरस्तद्वो देवीरुप ब्रुवे। सनेयमश्वं गां वासऽआत्मानं तव पूरुष ॥७८॥
*oṣadhīriti mātarastadvo devīrupa bruve /*
*saneyamaśvaṁ gāṁ vāsa'ātmānaṁ tava pūruṣa //78 //*

३. वैद्यः (Vaidyaḥ) - य. (Yv.) १२.७५-७७; ७९; ८१; ८५-८७

य. (Yv.) १२.७५-७७

या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा। मनै नु बभ्रूणामहं शतं धामानि सप्त च ॥७५॥
शतं वो अम्ब धामानि सहस्रमुत वो रुहः। अधा शतक्रत्वो यूयमिमं मेऽअगदं कृत ॥७६॥
ओषधीः प्रतिमोदध्वं पुष्पवतीः प्रसूवरीः। अश्वाऽइव सजित्वरीर्वीरुधः पारयिष्ण्वः ॥७७॥
*yā oṣadhīḥ pūrvā jātā devebhyastriyugaṁ purā |*
*manai nu babhrūṇāmahaṁ śataṁ dhāmāni sapta cha ||75 ||*
*śataṁ vo amba dhāmāni sahasramuta vo ruhaḥ |*
*adhā śatakratvo yūyamimaṁ me'agadaṁ kṛta ||76 ||*
*oṣadhīḥ pratimodadhvaṁ puṣpavatīḥ prasūvarīḥ |*
*aśvā'iva sajitvarīrvīrudhaḥ pārayiṣṇvaḥ ||77 ||*

य. (Yv.) १२.७९

अश्वत्थे वो वो निषदनं पर्णे वो वसतिष्कृता। गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥७९॥
*aśvatthe vo vo niṣadanaṁ parṇe vo vasatiṣkṛtā | gobhāja itkilāsatha yatsanavatha pūruṣam ||79 ||*

य. (Yv.) १२.८१

अश्वावतीं सोमावतीमूर्जयन्तीमुदोजसम्। अऽवित्सि सर्वा ओषधीरस्मा अरिष्टतातये ॥८१॥
*aśvāvatīṁ somāvatīmūrjayantīmudojasam |*
*a'vitsi sarvā oṣadhīrasmā ariṣṭatātaye ||81 ||*

य. (Yv.) १२.८५-८७

यदिमा वाजयन्नहमोषधीर्हस्त आदधे। आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥८५॥
यस्यौषधीः प्रसर्पथांगमंग परुष्परुः। ततो यक्ष्मं वि बाधध्व उग्रो मध्यमशीरिव ॥८६॥
साकं यक्ष्म प्र पत चाषेण किकिदीविना। साकं वातस्य ध्राज्या साकं नश्य निहाकया ॥८७॥
*yadimā vājayannahamoṣadhīrhasta ādadhe |*
*ātmā yakṣamasya naśyati purā jīvagṛbho yathā ||85 ||*
*yasyauṣadhīḥ prasarpathāṁgamaṁga paruṣparuḥ |*
*tato yakṣamaṁ vi bādhadhva ugro madhyamaśīriva ||86 ||*
*sākaṁ yakṣama pra pata chāṣeṇa kikidīvinā |*
*sākaṁ vātasya dhrājyā sākaṁ naśya nihākayā ||87 ||*

४. वैद्याः (Vaidyāḥ) - य. (Yv.) १२.८३-८४; ८८-९०

य. (Yv.) १२.८३-८४

इष्कृतिर्नाम वो माताथो यूयं स्थ निष्कृतीः। सीराः पतत्रिणी स्थन यदामयति निष्कृथ ॥८३॥
अति विश्वाः परिष्ठा स्तेनऽइव व्रजमक्रमुः। ओषधीः प्राचुच्यवुर्यत्किं च तन्वो रपः ॥८४॥
*iṣkṛtirnāma vo mātātho yūyaṁ stha niṣkṛtīḥ |*
*sīrāḥ patatriṇī sthana yadāmayati niṣkṛtha ||83 ||*
*ati viśvāḥ pariṣṭhā stena'iva vrajamakramuḥ |*
*oṣadhīḥ prāchuchyavuryatiṁka cha tanvo rapaḥ ||84 ||*

य. (Yv.) १२.८८-९०

अन्या वोऽअन्यामवत्वन्यान्यस्याऽउपावत। ताः सर्वा संविदानाऽइदं मे प्रावता वचः ॥८८॥
याः फलिनीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुंचन्त्वंहसः ॥८९॥
पुंचन्तु मा शपथ्या दथो वरुण्यादुत। अथो यमस्य पड्वीशात्सर्वस्माद् देवकिल्विषात् ॥९०॥
*anyā vo'anyāmavatvanyānyasyā'upāvata |*
*tāḥ sarvā saṁvidānā'idaṁ me prāvatā vachaḥ ||88 ||*
*yāḥ phalinīryā'aphalā'apuṣpā yāścha puṣpiṇīḥ |*
*bṛhaspatiprasūtāstā no muṁchantvaṁhasaḥ ||89 ||*
*puṁchantu mā śapathyā datho varuṇyāduta |*
*atho yamasya paḍvīśātsarvasmād devakilviṣāt ||90 ||*

## ४६५. भिषग् आथर्वणः (Bhiṣag Ātharvaṇaḥ)

१. ओषधीस्तुतिः (Oṣadhīstutiḥ) - ऋ. (Rv.) १०.९७.१-२३

या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा। मनै नु ब्रभूणामहं शतं धामानि सप्त च ॥१॥

शतं वो अम्ब धामानि सहस्रमुत वो रुहः। अधा शतक्रत्वो यूयमिमं मे अगदं कृत ॥२॥
ओषधीः प्रति मोदध्वं पुष्पवतीः प्रसूवरीः। अश्वाइव सजित्वरीर्वीरुधः पारयिष्ण्वः ॥३॥
ओषधीरिति मातरस्तद्वो देवीरुप ब्रुवे। सनेयमश्वं गां वास आत्मानं तव पूरुष ॥४॥
अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता। गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥५॥
यत्रौषधीः समग्मत राजानः समिताविव। विप्रः स उच्यते भिषग्रक्षोहामीवचातनः ॥६॥
अश्वावतीं सोमावतीमूर्जयन्तीमुदोजसम्। आवित्सि सर्वा ओषधीरस्मा अरिष्टतातये ॥७॥
अच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते। धनं सनिष्यन्तीनामात्मानं तव पूरुष ॥८॥
इष्कृतिर्नाम वो माताथो यूयं स्थ निष्कृतीः। सीराः पतत्रिणीः स्थन यदामयति निष्कृथ ॥९॥
अति विश्वाः परिष्ठाः स्तेनइव व्रजमक्रमुः। ओषधीः प्राचुच्युवर्यत्किं च तन्वो३ रपः ॥१०॥
यदिमा वाजयन्नहमोषधीर्हस्त आदधे। आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥११॥
यस्यौषधीः प्रसर्पथांगमङ्गं परुष्परुः। ततो यक्ष्मं वि बाधध्व उग्रो मध्यमशीरिव ॥१२॥
साकं यक्ष्म प्र पत चाषेण किकिदीविना। साकं वातस्य ध्राज्या साकं नश्य निहाकया ॥१३॥
अन्या वो अन्यामवत्वन्यान्यस्या अपावत। ताः सर्वाः संविदाना इदं म प्रावता वचः ॥१४॥
या फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुंचन्त्वंहसः ॥१५॥
मुंचन्तु मा शपथ्या३ दथो वरुण्यादुत। अथो यमस्य पड्बीशात्सर्वस्माद्देवकिल्बिषात् ॥१६॥
अवपत्तीरवदन्दिव ओषधयस्परि। यं जीवमश्नवामहै न स रिष्याति पूरुषः ॥१७॥
या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः। तासां त्वमस्युत्तमारं कामाय शं हृदे ॥१८॥
या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु। बृहस्पतिप्रसूता अस्यै सं दत्त वीर्यम् ॥१९॥
मा वो रिषत्खनिता यस्मै चाहं खनामि वः। द्विपच्चतुष्पदस्माकं सर्वमस्त्वनातुरम् ॥२०॥
याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः। सर्वाः संगत्य वीरुधो स्यै सं दत्त वीर्यम् ॥२१॥
ओषधयः सं वदन्ते सोमंन सह राज्ञा। यस्मै कृणोति ब्राह्मणस्तं राजन्पारयामसि ॥२२॥
त्वमुत्तमास्योषधे तव वृक्षा उपस्तयः। उपस्तिरस्तु सो३स्माकं यो अस्माँ अभिदासति ॥२३॥

*yā oṣadhīḥ pūrvā jātā devebhyastriyugaṁ purā /*
*manai nu brabhūṇāmahaṁ śataṁ dhāmāni sapta cha //1 //*
*śataṁ vo amba dhāmāni sahasramuta vo ruhaḥ /*
*adhā śatakratvo yūyamimaṁ me agadaṁ kṛta //2 //*
*oṣadhīḥ prati modadhvaṁ puṣpavatīḥ prasūvarīḥ /*
*aśvāiva sajitvarīrvīrudhaḥ pārayiṣṇvaḥ //3 //*
*oṣadhīriti mātarastadvo devīrupa bruve /*
*saneyamaśvaṁ gāṁ vāsa ātmānaṁ tava pūruṣa //4 //*
*aśvatthe vo niṣadanaṁ parṇe vo vasatiṣkṛtā /*
*gobhāja itkilāsatha yatsanavatha pūruṣam //5 //*
*yatrauṣadhīḥ samagmata rājānaḥ samitāviva /*
*vipraḥ sa uchyate bhiṣagrakṣohāmīvachātanaḥ //6 //*
*aśvāvatīṁ somāvatīmūrjayantīmudojasam / āvitsi sarvā oṣadhīrasmā ariṣṭatātaye //7 //*
*achchhuṣmā oṣadhīnāṁ gāvo goṣṭhādiverate /*
*dhanaṁ saniṣyantīnāmātmānaṁ tava pūruṣa //8 //*
*iṣkṛtirnāma vo mātātho yūyaṁ stha niṣkṛtīḥ /*
*sīrāḥ patatriṇīḥ sthana yadāmayati niṣkṛtha //9 //*
*ati viśvāḥ pariṣṭhāḥ stenaiva vrajamakramuḥ /*
*oṣadhīḥ prāchuchyuvaryatiṁka cha tanvo3 rapaḥ //10 //*
*yadimā vājayannahamoṣadhīrhasta ādadhe /*
*ātmā yakṣamasya naśyati purā jīvagṛbho yathā //11 //*
*yasyauṣadhīḥ prasarpathāṁgamaṅgaṁ paruṣparuḥ /*
*tato yakṣamaṁ vi vādhadhva ugro madhyamaśīriva //12 //*
*sākaṁ yakṣama pra pata chāṣeṇa kikidīvinā /*
*sākaṁ vātasya dhrājyā sākaṁ naśya nihākayā //13 //*
*anyā vo anyāmavatvanyānyasyā apāvata /*
*tāḥ sarvāḥ saṁvidānā idaṁ ma prāvatā vachaḥ //14 //*
*yā phalinīryā aphalā apuṣpā yāśva puṣpiṇīḥ /*
*bṛhaspatiprasūtāstā no muṁchantvaṁhasaḥ //15 //*

*muṁchantu mā śapathyā3 datho varuṇyāduta । atho yamasya padvīśātsarvasmāddevakilviṣāt ॥16 ॥*
*avapatntīravadandiva oṣadhayaspari । yaṁ jīvamaśnavāmahai na sa riṣyāti pūruṣaḥ ॥17 ॥*
*yā oṣadhīḥ somarājñīrbahvīḥ śatavichakṣaṇāḥ ।*
*tāsāṁ tvamasyuttamāraṁ kāmāya śaṁ hṛde ॥18 ॥*
*yā oṣadhīḥ somarājñīrviṣṭhitāḥ pṛthivīmanu ।*
*bṛhaspatiprasūtā asyai saṁ datta vīryam ॥19 ॥*
*mā vo riṣatkhanitā yasmai chāhaṁ khanāmi vaḥ ।*
*dvipachchatuṣpadasmākaṁ sarvamastvanāturam ॥20 ॥*
*yāśvedamupaśṛṇvanti yāścha dūraṁ parāgatāḥ ।*
*sarvāḥ saṁgatya vīrudho syai saṁ datta vīryam ॥21 ॥*
*oṣadhayaḥ saṁ vadante somaṁna saha rājñā ।*
*yasmai kṛṇoti brāhmaṇastaṁ rājanpārayāmasi ॥22 ॥*
*tvamuttamāsyoṣadhe tava vṛkṣā upastayaḥ ।*
*upastirastu so3smākaṁ yeā asmām̐ abhidāsati ॥23 ॥*

## ४६६. भुवनः (Bhuvanaḥ)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.१२४.४-६

इमा नु कं भुवना सीषधामेन्द्रश्च विश्वे च देवाः ।
यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्रः सह चीक्लृपाति ॥४॥
आदित्येरिन्द्रः सगणो मरुद्भिरस्माकं भूत्वविता तनूनाम् ।
हत्वाय देवा असुरान् यदायन् देवा देवत्वमभिरक्षमाणाः ॥५॥
प्रत्यंचमर्कमनयंछचीभिरादित् स्वधामिषिरां पर्यपश्यन् ।
अया वाजं देवहितं सनेम मदेम शतहिमाः सुवीराः ॥६॥
*imā nu kaṁ bhuvanā sīṣadhāmendraścha viśve cha devāḥ ।*
*yajñaṁ cha nastanvaṁ cha prajāṁ chādityairindraḥ saha chīklṛpāti ॥4 ॥*
*ādityerindraḥ sagaṇo marudbhirasmākaṁ bhūtvavitā tanūnām ।*
*hatvāya devā asurān yadāyan devā devatvamabhirakṣamāṇāḥ ॥5 ॥*
*pratyaṁchamarkamanayaṁchhachībhirādit svadhāmiṣirāṁ paryapaśyan ।*
*ayā vājaṁ devahitaṁ sanema madema śatahimāḥ suvīrāḥ ॥6 ॥*

## ४६७. भुवन आप्त्यः साधनो वा भौवनः (Bhuvana Āptyaḥ Sādhano Vā Bhauvanaḥ)

१. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १०.१५७.१-५; सा. (Sv.) ४५२; १११०-१११२

ऋ. (Rv.) १०.१५७.१-५

इमा नु कं भुवना सीषधामेन्द्रश्च विश्वे च देवाः ॥१॥
यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्रः सह चीक्लृपाति ॥२॥
आदित्यैरिन्द्रः सगणो मरुद्भिरस्माकं भूत्वविता तनूनाम् ॥३॥
हत्वाय देवा असुरान्यदायन्देवा देवत्वमभिरक्षमाणाः ॥४॥
प्रतयंचमर्कमनयंछचीभिरादित्स्वधामिषिरां पर्यपश्यन् ॥५॥
*imā nu kaṁ bhuvanā sīṣadhāmendraścha viśve cha devāḥ ॥1 ॥*
*yajñaṁ cha nastanvaṁ cha prajāṁ chādityairindraḥ saha chīklṛpāti ॥2 ॥*
*ādityairindraḥ sagaṇo marudbhirasmākaṁ bhūtvavitā tanūnām ॥3 ॥*
*hatvāya devā asurānyadāyandevā devatvamabhirakṣamāṇāḥ ॥4 ॥*
*pratayaṁchamarkamanayaṁchhachībhirāditsvadhāmiṣirāṁ paryapaśyan ॥5 ॥*

सा. (Sv.) ४५२

इमा नु कं भुवना सीषधेमेन्द्रश्च विश्वे च देवाः ॥६॥
*imā nu kaṁ bhuvanā sīṣadhemendraścha viśve cha devāḥ ॥6 ॥*

सा. (Sv.) १११०-१११२

इमा नु कं भुवना सीषधेमेन्द्रश्च विश्वे च देवाः ॥१॥
यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्रः सह सीषधातु ॥२॥
आदित्यैरिन्द्रः सगणो मरुद्भिरस्मभ्यं भेषजा करत् ॥३॥

*imā nu kaṁ bhuvanā sīṣadhemendraścha viśve cha devāḥ ॥1॥*
*yajñaṁ cha nastanvaṁ cha prajāṁ chādityairindraḥ saha sīṣadhātu ॥2॥*
*ādityairindraḥ sagaṇo marudbhirasmabhyaṁ bheṣajā karat ॥3॥*

## ४६८. भुवनपुत्रो विश्वकर्मा (Bhuvanaputro Viśvakarmā)

१. विश्वकर्मा (Viśvakarmā) - य. (Yv.) १७.१७-३२

य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत् पिता नः ।
स आशिषा द्रविणमिच्छमानः प्रथमच्छदवराँ२ आ विवेश ॥१७॥
किंस्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथाऽऽसीत् ।
यतो भूमिं जनयन् विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः ॥१८॥
विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः ॥१९॥
किंस्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः ।
मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन् ॥२०॥
या ते धामानि परमाणि याऽवमा या मध्यमा विश्वकर्मन्नुतेमा ।
शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तन्वं वृधानः ॥२१॥
विश्वकर्मन् हविषा वावृधानः स्वयं यजस्व पृथिवीभुत द्याम् ।
मुह्यन्त्वन्ये अभितः सपत्ना इहास्माकं मघवा सूरिरस्तु ॥२२॥
वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे अद्या हुवेम ।
स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्मा ॥२३॥
विश्वकर्मन् हविषा वर्धनेन त्रातारमिन्द्रमकृणोरवध्यम् ।
तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथाऽसत् ॥२४॥
चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नम्नमाने ।
यदेदन्ता अददृहन्त पूर्व आदिद् द्यावापृथिवी अप्रथेताम् ॥२५॥
विश्वकर्मा विमना आद्विहाया धाता विधाता परमोत सन्दृक् ।
तेषामिष्टानि समिषा मदन्ति यत्रा सप्त ऋषीन् पर एकमाहुः ॥२६॥
यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा ।
यो देवानां नामधा एक एव तं सम्प्रश्नं भुवना यन्त्यन्या ॥२७॥
त आऽयजन्त द्रविणं समस्मा ऋषयः पूर्वे जरितारो न भूना ।
असूर्ते सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि ॥२८॥
परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति ।
कंस्विद् गर्भं प्रथमं दध्र आपो यत्र देवाः समपश्यन्त पूर्वे ॥२९॥
तमिद्गर्भं प्रथमं दध्रा आपो यत्र देवाः समगच्छन्त विश्वे ।
अजस्य नाभावध्येकमर्पितं यस्मिन् विश्वानि भुवनानि तस्थुः ॥३०॥
न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव ।
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति ॥३१॥
विश्वकर्मा ह्यजनिष्ट देव आदिद्गन्धर्वो अभवद् द्वितीयः ।
तृतीयः पिता जनितौषधीनामपां गर्भं व्यदधात् पुरुत्रा ॥३२॥

*ya imā viśvā bhuvanāni juhvadṛṣirhotā nyasīdat pitā naḥ ।*
*sa āśiṣā draviṇamichchhamānaḥ prathamachchhadavarāँ2 ā viveśa ॥17॥*
*kiṁsvidāsīdadhiṣṭhānamārambhaṇaṁ katamatsvitkathā''sīt ।*
*yato bhūmiṁ janayan viśvakarmā vi dyāmaurṇonmahinā viśvachakṣāḥ ॥18॥*
*viśvataśchakṣuruta viśvatomukho viśvatobāhuruta viśvataspāt ।*
*saṁ bāhubhyāṁ dhamati saṁ patatrairdyāvābhūmī janayan deva ekaḥ ॥19॥*
*kiṁsvidvanaṁ ka u sa vṛkṣa āsa yato dyāvāpṛthivī niṣṭatakṣuḥ ।*
*manīṣiṇo manasā pṛchchhatedu tadyadadhyatiṣṭhadbhuvanāni dhārayan ॥20॥*
*yā te dhāmāni paramāṇi yā'vamā yā madhyamā viśvakarmannutemā ।*
*śikṣā sakhibhyo haviṣi svadhāvaḥ svayaṁ yajasva tanvaṁ vṛdhānaḥ ॥21॥*
*viśvakarman haviṣā vāvṛdhānaḥ svayaṁ yajasva pṛthivībhuta dyām ।*

*muhyantvanye abhitaḥ sapatnā ihāsmākaṁ maghavā sṛrirastu ॥22॥*
*vāchaspatiṁ viśvakarmāṇamūtaye manojuvaṁ vāje adyā huvema ।*
*sa no viśvāni havanāni joṣadviśvaśambhūravase sādhukarmā ॥23॥*
*viśvakarman haviṣā vardhanena trātāramindramakṛṇoravadhyam ।*
*tasmai viśaḥ samanamanta pūrvīrayamugro vihavyo yathā'sat ॥24॥*
*chakṣuṣaḥ pitā manasā hi dhīro ghṛtamene ajanannamnamāne ।*
*yadedantā adadṛhanta pūrva ādid dyāvāpṛthivī aprathetām ॥25॥*
*viśvakarmā vimanā ādvihāyā dhātā vidhātā paramota sandṛk ।*
*teṣāmiṣṭāni samiṣā madanti yatrā sapta ṛṣīn para ekamāhuḥ ॥26॥*
*yo naḥ pitā janitā yo vidhātā dhāmāni veda bhuvanāni viśvā ।*
*yo devānāṁ nāmadhā eka eva taṁ sampraśnaṁ bhuvanā yantyanyā ॥27॥*
*ta ā'yajanta draviṇaṁ samasmā ṛṣayaḥ pūrve jaritāro na bhūnā ।*
*asūrte sūrte rajasi niṣatte ye bhūtāni samakṛṇvannimāni ॥28॥*
*paro divā para enā pṛthivyā paro devebhirasurairyadasti ।*
*kaṁsvid garbhaṁ prathamaṁ dadhra āpo yatra devāḥ samapaśyanta pūrve ॥29॥*
*tamidgarbhaṁ prathamaṁ dadhrā āpo yatra devāḥ samagachchhanta viśve ।*
*ajasya nābhāvadhyekamarpitaṁ yasmin viśvāni bhuvanāni tasthuḥ ॥30॥*
*na taṁ vidātha ya imā jajānānyadyuṣmākamantaraṁ babhūva ।*
*nīhāreṇa prāvṛtā jalpyā chāsutṛpa ukthaśāsaścharanti ॥31॥*
*viśvakarmā hyajaniṣṭa deva ādidgandharvo abhavad dvitīyaḥ ।*
*tṛtīyaḥ pitā janitauṣadhīnāmapāṁ garbhaṁ vyadadhāt purutrā ॥32॥*

## ४६९. भुवनः साधनो वा (Bhuvanaḥ Sādhano Vā)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.६३.१-३

इमा नु कं भुवना सीषधामेन्द्रश्च विश्वे च देवाः ।
यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्रः सह चीक्लृपाति ॥१॥
आदित्यैरिन्द्रः सगणो मरुद्भिरस्माकं भूत्वविता तनूनाम् ।
हत्वाय देवा असुरान यदायन् देवा देवत्वमभिरक्षमाणाः ॥२॥
प्रत्यंचमर्कमनयंछचीभिरादित् स्वधामिषिरां पर्यपश्यन् ।
अया वाजं देवहितं सनेम मदेम शतहिमाः सुवीराः ॥३॥
*imā nu kaṁ bhuvanā sīṣadhāmendraścha viśve cha devāḥ ।*
*yajñaṁ cha nastanvaṁ cha prajāṁ chādityairindraḥ saha chīklṛpāti ॥1॥*
*ādityairindraḥ sagaṇo marudbhirasmākaṁ bhūtvavitā tanūnām ।*
*hatvāya devā asurāna yadāyan devā devatvamabhirakṣamāṇāḥ ॥2॥*
*pratyaṁchamarkamanayaṁchhachībhirādit svadhāmiṣirāṁ paryapaśyan ।*
*ayā vājaṁ devahitaṁ sanema madema śatahimāḥ suvīrāḥ ॥3॥*

## ४७०. भूतांशः काश्यपः (Bhūtāṁśaḥ Kāśyapaḥ)

१. अश्विनौ (Aśvinau) - ऋ. (Rv.) १०.१०६.१-११

उभा उ नूनं तदिदर्थयेथे वि तन्वाथे धियो वस्त्रापसेव ।
सध्रीचीना यातवे प्रेमजीगः सुदिनेव पृक्ष आ तंसयेथे ॥१॥
उष्टारेव फर्वरेषु श्रयेथे प्रायोगेव श्वात्र्या शसुरेथः ।
दूतेव हि ष्ठो यशसा जनेषु माप स्थातं महिषेवावपानात् ॥२॥
साकंयुजा शकुनस्येव पक्षा पश्वेव चित्रा यजुरा गमिष्टम् ।
अग्निरिव देवयोर्दीदिवांसा परिज्मानेव यजथः पुरुत्रा ॥३॥
आपी वो अस्मे पितरेव पुत्रोग्रेव रुचा नृपतीव तुर्यै ।
इर्येव पुष्ट्यै किरणेव भुज्यै श्रुष्टीवानेव हवमा गमिष्टम् ॥४॥
वंसगेव पूषर्या शिम्बाता मित्रेव ऋता शतरा शातपन्ता ।
वाजेवोच्चा वयसा घर्म्येष्ठा मेषेवेषा सपर्या३ पुरीषा ॥५॥
सृण्येव जर्भरी तुर्फरीतू नैतोशेव तुर्फरी पर्फरीका ।
उदन्यजेव जेमना मदेरू ता मे जराय्वजरं मरायु ॥६॥

पज्रेव चर्चरं जारं मरायु क्षद्मेवार्थेषु तर्तरीथ उग्रा ।
ऋभू नापत्खरमज्रा खरज्रुर्वायुर्न पर्फरत्क्षयद्रयिणाम् ॥७॥
घर्मेव मधु जठरे सनेरू भगेविता तुर्फरी फारिवारम् ।
पतरेव चचरा चन्द्रनिर्णिङ्मनऋङ्गा मनन्या३ न जग्मी ॥८॥
बृहन्तेव गम्भरेषु प्रतिष्ठां पादेव गाधं तरते विदाथः ।
कर्णेव शासुरनु हि स्मराथोंऽशेव नो भजतं चित्रमप्नः ॥९॥
आरंगगरेव मध्वेरयेथे सारघेव गवि नीचीनबारे ।
कीनारेव स्वेदमासिष्विदाना क्षामेवोर्जा सूयवसात्सचेथे ॥१०॥
ऋध्याम स्तोमं सनुयाम वाजमा नो मन्त्रं सरथेहोप यातम् ।
यशो न पक्वं मधु गोष्वन्तरा भूतांशो अश्विनोः काममप्राः ॥११॥
*ubhā u nūnaṁ tadidarthayethe vi tanvāthe dhiyo vastrāpaseva ।*
*sadhrīchīnā yātave premajīgaḥ sudineva pṛkṣa ā taṁsayethe ॥1॥*
*uṣṭāreva pharvareṣu śrayethe prāyogeva śvātrayā śasurethaḥ ।*
*dūteva hi ṣṭho yaśasā janeṣu māpa sthātaṁ mahiṣevāvapānāt ॥2॥*
*sākaṁyujā śakunasyeva pakṣā paśveva chitrā yajurā gamiṣṭam ।*
*agniriva devayordīdivāṁsā parijmāneva yajathaḥ purutrā ॥3॥*
*āpī vo asme pitareva putrogreva ruchā nṛpatīva turyai ।*
*iryeva puṣṭyai kiraṇeva bhujyai śruṣṭīvāneva havamā gamiṣṭam ॥4॥*
*vaṁsageva pūṣaryā śimbātā mitreva ṛtā śatarā śātapantā ।*
*vājevochchā vayasā gharmyeṣṭhā meṣeveṣā saparyā3 purīṣā ॥5॥*
*sṛṇyeva jarbharī turpharītū nautośeva turpharī parpharīkā ।*
*udanyajeva jemanā maderū tā me jarāyvajaraṁ marāyu ॥6॥*
*pajreva charcharaṁ jāraṁ marāyu kṣadmevārtheṣu tartarītha ugrā ।*
*ṛbhū nāpatkharamajrā kharajrurvāyurna parpharatkṣayadrayaṇiām ॥7॥*
*gharmeva madhu jaṭhare sanerū bhagevitā turpharī phārivāram ।*
*patareva chacharā chandranirṇiṅmanaṛṁgā mananyā3 na jagmī ॥8॥*
*bṛhanteva gambhareṣu pratiṣṭhāṁ pādeva gādhaṁ tarate vidāthaḥ ।*
*karṇeva śāsuranu hi smarāthoṁ'śeva no bhajataṁ chitramapnaḥ ॥9॥*
*āraṁgagareva madhverayethe sāragheva gavi nīchīnabāre ।*
*kīnāreva svedamāsiṣvidānā kṣāmevorjā sūyavasātsachethe ॥10॥*
*ṛdhyāma stomaṁ sanuyāma vājamā no mantraṁ sarathehopa yātam ।*
*yaśo na pakvaṁ madhu goṣvantarā bhūtāṁśo aśvinoḥ kāmamaprāḥ ॥11॥*

## ४७१. भृगुः (Bhṛguḥ)

१. अग्निः (Agniḥ) - अ. (Av.) ७.८४.१; ७.१०८.१-२; १९.५५.१-७

अ. (Av.) ७.८४.१

अनाधृष्यो जातवेदा अमर्त्यो विराडग्ने क्षत्रभृद् दीदिहीह ।
विश्वा अमीवाः प्रमुंचन् मानुषीभिः शिवाभिरद्य परि पाहि नो गयम् ॥१॥
*anādhṛṣyo jātavedā amartyo virāḍagne kṣatrabhṛd dīdihīha ।*
*viśvā amīvāḥ pramuṁchan mānuṣībhiḥ śivābhiradya pari pāhi no gayam ॥1॥*

अ. (Av.) ७.१०८.१-२

यो नस्तायद् दिप्सति यो न आविः स्वो विद्वानरणो वा नो अग्ने ।
प्रतीच्येत्वरणी दत्वती तान् मैषामग्ने वास्तु भून्मो अपत्यम् ॥१॥
यो नः सुप्तांजाग्रतो वाभिदासात् तिष्ठतो वा चरतो जातवेदः ।
वैश्वानरेण सयुजा सजोषास्तान् प्रतीचो निर्दह जातवेदः ॥२॥
*yo nastāyad dipsati yo na āviḥ svo vidvānaraṇo vā no agne ।*
*pratīchyetvaraṇī datvatī tān maiṣāmagne vāstu bhūnmo apatyam ॥1॥*
*yo naḥ suptāṁjāgrato vābhidāsāt tiṣṭhato vā charato jātavedaḥ ।*
*vaiśvānareṇa sayujā sajoṣāstān pratīcho nirdaha jātavedaḥ ॥2॥*

अ. (Av.) १९.५५.१-७

रात्रिंरात्रिमप्रयातं भरन्तोऽश्वायेव तिष्ठते घासमस्मै ।

रायस्पोषेण समिषा मदन्तो मा ते अग्ने प्रतिवेशा रिषाम ॥१॥
या ते वसोर्वात इषुः सा त एषा तया नो मृड ।
रायस्पोषेण समिषा मदन्तो मा ते अग्ने प्रतिवेशा रिषाम ॥२॥
सायंसायं गृहपतिर्नो अग्निः प्रातः प्रातः सौमनस्य दाता ।
वसोर्वसोर्वसुदान् एधि वयं त्वेन्धानास्त्वं पुषेम ॥३॥
प्रातः प्रात गृहपतिर्नो अग्निः सायंसायं सोमनस्य दाता ।
वसोवसोर्वसुदान एघीन्धानास्त्वा शतंहिमा ऋधेम ॥४॥
अपश्चादग्धान्नस्य भूयासम्। अन्नादयान्नपतये रुद्राय नमो अग्नये ॥५॥
सभ्य सभां मे पाहि ये च सभ्याः सभासदः । त्वयेद्गाः पुरुहूत विश्वमायुर्व्यश्नवम् ॥६॥
अहरहर्बलिमित्ते हरन्तोऽश्वायेव तिष्ठते घासमग्ने ।
रायस्पोषेण समिषा मदन्तो मा ते अग्ने प्रतिवेशा रिषाम ॥७॥

*rātriṁrātrimaprayātaṁ bharanto'śvāyeva tiṣṭhate ghāsamasmai /*
*rāyaspoṣeṇa samiṣā madanto mā te agne prativeśā riṣāma //1 //*
*yā te vasorvāta iṣuḥ sā ta eṣā tayā no mṛḍa /*
*rāyaspoṣeṇa samiṣā madanto mā te agne prativeśā riṣāma //2 //*
*sāyaṁsāyaṁ gṛhapatirno agniḥ prātaḥ prātaḥ saumanasya dātā /*
*vasorvasorvasudān edhi vayaṁ tvendhānāstnvaṁ puṣema //3 //*
*prātaḥ prāta rgṛhapatirno agniḥ sāyaṁsāyaṁ somanasya dātā /*
*vasovasorvasudāna eghīndhānāstvā śataṁhimā ṛdhema //4 //*
*apaśchādagdhānnasya bhūyāsam / annādayānnapataye rudrāya namo agnaye //5 //*
*sabhya sabhāṁ me pāhi ye cha sabhyāḥ sabhāsadaḥ /*
*tyayedgāḥ puruhūta viśvamāyurvyaśnavam //6 //*
*aharaharbalimitte haranto'śvāyeva tiṣṭhate ghāsamagne /*
*rāyaspoṣeṇa samiṣā madanto mā te agne prativeśā riṣāma //7 //*

२. अग्निः आज्यम् (Agniḥ Ājyam) - अ. (Av.) ४.१४.१-९

अजो ह्य१ग्नेरजनिष्ट शोकात् सो अपश्यज्जनितारमग्रे ।
तेन देवा देवतामग्र आयन् तेन रोहान् रुरुहुर्मेध्यासः ॥१॥
क्रमध्वमग्निना नाकमुख्यान् हस्तेषु बिभ्रतः ।
दिवस्पृष्ठं स्वर्गत्वा मिश्रा देवेभिराद्धम् ॥२॥
पृष्ठात् पृथिव्या अहमन्तरिक्षमारुहमन्तरिक्षाद् दिवमारुहम् ।
दिवो नाकस्य पृष्ठात् स्व१र्ज्योतिरगामहम् ॥३॥
स्व१र्यन्तो नापोक्षन्त आ द्यां रोहन्ति रोदसी ।
यज्ञं ये विश्वतोधारं सुविद्वांसो वितेनिरे ॥४॥
अग्ने प्रेहि प्रथमो देवतानां चक्षुर्देवानामुत मानुषाणाम् ।
इयक्षमाणा भृगुभिः सजोषाः स्व र्यन्तु यजमानाः स्वस्ति ॥५॥
अजमनज्मि पयसा घृतेन दिव्यं सुपर्णं पयसं बृहन्तम् ।
तेन गेष्म सुकृतस्य लोकं स्वरारोहन्तो अभि नाकमुत्तमम् ॥६॥
पंचौदनं पंचभिरङ्गुलिभिर्दर्व्योद्धर पंचधैतमोदनम् ।
प्राच्यां दिशि शिरो अजस्य धेहि दक्षिणायां दिशि दक्षिणं धेहि पार्श्वम् ॥७॥
प्रतीच्यां दिशि भसदमस्य धेह्युत्तरस्यां दिश्युत्तरं धेहि पार्श्वम् ।
ऊर्ध्वायां दिश्य१जस्यानूकं धेहि दिशि ध्रुवायां धेहि पाजस्यमन्तरिक्षे मध्यतो मध्यमस्य ॥८॥
शृतमजं शृतया प्रोर्णुहि त्वचा सर्वैरंगैः सम्भृतं विश्वरूपम् ।
स उत् तिष्ठेतो अभि नाकमुत्तमं पद्भिश्चतुर्भिः प्रति तिष्ठ दिक्षु ॥९॥

*ajo hya1gnerajaniṣṭa śokāt so apaśyajjanitāramagre /*
*tena devā devatāmagra āyan tena rohān ruruhurmedhyāsaḥ //1 //*
*kramadhvamagninā nākamukhyān hasteṣu bibhrataḥ /*
*divaspṛṣṭhaṁ svargatvā miśrā devebhirāddhvam //2 //*
*pṛṣṭhāt pṛthivyā ahamantarikṣamāruhamantarikṣād divamāruham /*
*divo nākasya pṛṣṭhāt sva1rjyotiragāmaham //3 //*
*sva1ryanto nāpokṣanta ā dyāṁ rohanti rodasī /*

*yajñaṁ ye viśvetodhāraṁ suvidvāṁso vitenire ॥4॥*
*agne prehi prathamo devatānāṁ chakṣurdevānāmuta mānuṣāṇām ।*
*iyakṣamāṇā bhṛgubhiḥ sajoṣāḥ sva ryantu yajamānāḥ svasti ॥5॥*
*ajamanajmi payasā ghṛtena divyaṁ suparṇaṁ payasaṁ bṛhantam ।*
*tena geṣma sukṛtasya lokaṁ svarārohanto abhi nākamuttamam ॥6॥*
*paṁchaudanaṁ paṁchabhiraṅgulibhirdarvyoddhara paṁchadhaitamodanam ।*
*prāchyāṁ diśi śiro ajasya dhehi dakṣiṇāyāṁ diśi dakṣiṇaṁ dhehi pārśvam ॥7॥*
*pratīchyāṁ diśi bhasadamasya dhehyuttarasyāṁ diśyuttaraṁ dhehi pārśvam ।*
*ūrdhvāyāṁ diśya1jasyānūkaṁ dhehi diśi dhruvāyāṁ dhehi pājasyamantarikṣe madhyato madhyamasya ॥8॥*
*śṛtamajaṁ śṛtayā prorṇuhi tvachā sarvairaṁgaiḥ sambhṛtaṁ viśvarūpam ।*
*sa ut tiṣṭheto abhi nākamuttamaṁ padbhiśchatubhiḥ prati tiṣṭha dikṣu ॥9॥*

३. अग्निः मन्त्रोक्ता (Agniḥ Mantroktā) - अ. (Av.) १२.२.१-२०; ३४-५५

अ. (Av.) १२.२.१-२०

नडमा रोह न ते अत्र लोक इदं सीसं भागधेयं त एहि ।
यो गोषु यक्ष्मः पुरुषेषु यक्ष्मस्तेन त्वं साकमधराङ् परेहि ॥१॥
अघशंसदुः शंसाभ्यां करेणानुकरेण च ।
यक्ष्मं च सर्वं तेनेतो मृत्युं च निरजामसि ॥२॥
निरितो मृत्युं निर्ऋतिं निरातिमजामसि ।
यो नो द्वेष्टि तमद्ध्यग्ने अक्रव्याद् यमु द्विष्मस्तमु ते प्र सुवामसि ॥३॥
यद्यग्निः क्रव्याद् यदि वा व्याघ्र इमं गोष्ठं प्रविवेशान्योकाः ।
तं माषाज्यं कृत्वा प्र हिणोमि दूरं स गच्छत्वप्सुषदोऽप्यग्नीन् ॥४॥
यत् त्वा क्रुद्धाः प्रचक्रुर्मन्युना पुरुषे मृते ।
सुकल्पमग्ने तत् त्वया पुनस्त्वोद्दीपयामसि ॥५॥
पुनस्त्वादित्या रुद्रा वसवः पुनर्ब्रह्मा वसुनीतिरग्ने ।
पुनस्त्वा ब्रह्मणस्पतिराधाद् दीर्घायुत्वाय शतशारदाय ॥६॥
यो अग्निः क्रव्यात् प्रविवेश नो गृहमिमं पश्यन्नितरं जातवेदसम् ।
तं हरामि पितृयज्ञाय दूरं स घर्ममिन्धां परमे सधस्थे ॥७॥
क्रव्यादमग्निं प्र हिणोमि दूरं यमराज्ञो गच्छतु रिप्रवाहः ।
इहायमितरो जातवेदा देवो देवेभ्यो हव्यं वहतु प्रजानन् ॥८॥
क्रव्यादमग्निमिषितो हरामि जनान् दृंहन्तं वज्रेण मृत्युम् ।
नि तं शास्मि गार्हपत्येन विद्वान् पितृणां लोके अपि भागो अस्तु ॥९॥
क्रव्यादमग्निं शशमानमुक्थ्यं१ प्र हिणोमि पथिभिः पितृयाणैः ।
मा देवयानैः पुनरा गा अत्रैवैधि पितृषु जागृहि त्वम् ॥१०॥
समिन्धते संकसुकं स्वस्तये शुद्धा भवन्तः शुचयः पावकाः ।
जहाति रिप्रमत्येन एति समिद्धो अग्निः सुपुना पुनाति ॥११॥
देवो अग्निः संकसुको दिवस्पृष्ठान्यारुहत् ।
मुच्यमानो निरेणसोऽमोगस्माँ अशस्त्याः ॥१२॥
अस्मिन् वयं संकसुके अग्नौ रिप्राणि मृज्महे ।
अभूम यज्ञियाः शुद्धाः प्र ण आयूंषि तारिषत् ॥१३॥
संकसुको विकसुको निर्ऋथो यश्च निस्वरः ।
ते ते यक्ष्मं सवेदसो दूराद् दूरमनीनशन् ॥१४॥
यो नो अश्वेषु वीरेषु यो नो गोष्वजाविषु ।
क्रव्यादं निर्णुदामसि यो अग्निर्जनयोपनः ॥१५॥
अन्येभ्यस्त्वा पुरुषेभ्यो गोभ्यो अश्वेभ्यस्त्वा ।
निः क्रव्यादं नुदामसि यो अग्निर्जीवितयोपनः ॥१६॥
यस्मिन् देवा अमृजत यस्मिन् मनुष्या उत ।
तस्मिन् घृतस्तावो मृष्ट्वा त्वमग्ने दिवं रुह ॥१७॥

समिद्धो अग्न आहुत स नो माभ्यपक्रमीः ।
अत्रैव दीदिहि द्यवि ज्योक् च सूर्यं दृशे ॥१८॥
सीसे मृड्ढ्वं नडे मृड्ढ्वमग्नौ संकसुके च यत् ।
अथो अव्यां रामायां शीर्षक्तिमुपबर्हणे ॥१९॥
सीसे मलं सादयित्वा शीर्षक्तिमुपबर्हणे ।
अव्यामसिक्न्यां मृष्ट्वा शुद्धा भवत यज्ञियाः ॥२०॥
*naḍamā roha na te atra loka idaṁ sīsaṁ bhāgadheyaṁ ta ehi ।*
*yo goṣu yakṣamaḥ puruṣeṣu yakṣamastena tvaṁ sākamadharāṅ parehi ॥1॥*
*aghaśaṁsaduḥ śaṁsābhyāṁ kareṇānukareṇa cha ।*
*yakṣamaṁ cha sarvaṁ teneto mṛtyuṁ cha nirajāmasi ॥2॥*
*nirito mṛtyuṁ nirṛtiṁ nirātimajāmasi ।*
*yo no dveṣṭi tamaddhyagne akravyād yamu dviṣmastamu te pra suvāmasi ॥3॥*
*yadyagniḥ kravyād yadi vā vyāghra imaṁ goṣṭhaṁ praviveśānyokāḥ ।*
*taṁ māṣājyaṁ kṛtvā pra hiṇomi dūraṁ sa gachchhatvapsuṣado'pyagnīn ॥4॥*
*yat tvā kruddhāḥ prachakrurmanyunā puruṣe mṛte ।*
*sukalpamagne tat tvayā punastvoddīpayāmasi ॥5॥*
*punastvādityā rudrā vasavaḥ punarbrahmā vasunītiragne ।*
*punastvā brahmaṇaspatirādhād dīrghāyutvāya śataśāradāya ॥6॥*
*yo agniḥ kravyāt praviveśa no gṛhamimaṁ paśyannitaraṁ jātavedasam ।*
*taṁ harāmi pitṛyajñāya dūraṁ sa gharmamindhāṁ parame sadhasthe ॥7॥*
*kravyādamagiṁna pra hiṇomi dūraṁ yamarājño gachchhatu ripravāhaḥ ।*
*ihāyamitaro jātavedā devo devebhyo havyaṁ vahatu prajānan ॥8॥*
*kravyādamagnimiṣito harāmi janān dṛṁhantaṁ vajreṇa mṛtyum ।*
*ni taṁ śāsmi gārhapatyena vidvān pitṛṇāṁ loke api bhāgo astu ॥9॥*
*kravyādamagiṁna śaśamānamukthyaṁ1 pra hiṇomi pathibhiḥ pitṛyāṇaiḥ ।*
*mā devayānaiḥ punarā gā atraivaidhi pitṛṣu jāgṛhi tvam ॥10॥*
*samindhate saṁkasukaṁ svastaye śuddhā bhavantaḥ śuchayaḥ pāvakāḥ ।*
*jahāti ripramatyena eti samiddho agniḥ supunā punāti ॥11॥*
*devo agniḥ saṁkasuko divaspṛṣṭhānyāruhat ।*
*muchyamāno nireṇaso'mogasmāṁ aśastyāḥ ॥12॥*
*asmin vayaṁ saṁkasuke agnau riprāṇi mṛjmahe ।*
*abhūma yajñiyāḥ śuddhāḥ pra ṇa āyūṁṣi tāriṣat ॥13॥*
*saṁkasuko vikasuko nirṛtho yaścha nisvaraḥ ।*
*te te yakṣamaṁ savedaso dūrād dūramanīnaśan ॥14॥*
*yo no aśveṣu vīreṣu yo no goṣvajāviṣu ।*
*kravyādaṁ nirṇudāmasi yo agnirjanayopanaḥ ॥15॥*
*anyebhyastvā puruṣebhyeā gobhyo aśvebhyastvā ।*
*niḥ kravyādaṁ nudāmasi yo agnirjīvitayopanaḥ ॥16॥*
*yasmin devā amṛjata yasmin manuṣyā uta ।*
*tasmin ghṛtastāvo mṛṣṭvā tvamagne divaṁ ruha ॥17॥*
*samiddho agna āhuta sa no mābhyapakramīḥ ।*
*atraiva dīdihi dyavi jyok cha sūryaṁ dṛśe ॥18॥*
*sīse mṛḍḍhvaṁ naḍe mṛḍḍhvamagnau saṁkasuke cha yat ।*
*atho avyāṁ rāmāyāṁ śīrṣaktimupabarhaṇe ॥19॥*
*sīse malaṁ sādayitvā śīrṣaktimupabarhaṇe ।*
*avyāmasiknyāṁ mṛṣṭvā śuddhā bhavata yajñiyāḥ ॥20॥*

अ. (Av.) १२.२.३४-५५

अपावृत्य गार्हपत्यात् क्रव्यादा प्रेत दक्षिणा ।
प्रियं पितृभ्य आत्मने ब्रह्मभ्यः कृणुता प्रियम् ॥३४॥
द्विभागधनमादाय प्र क्षिणात्यवर्त्या ।
अग्निः पुत्रस्य ज्येष्ठस्य यः क्रव्यादनिराहितः ॥३५॥
यत् कृषते यद् वनुते यच्च वस्नेन विन्दते ।
सर्वं मर्त्यस्य तन्नास्ति क्रव्याच्चेदनिराहितः ॥३६॥

अयज्ञियो हतवर्चा भवति नैनेन हविरत्तवे ।
छिनत्ति कृष्या गोर्धनाद् यं क्रव्यादनुवर्त्तते ॥३७॥
मुहुर्गृध्यैः प्र वदत्यार्ति मर्त्यो नीत्य ।
क्रव्याद् यानग्निरन्तिकादनुविद्वान् वितावति ॥३८॥
ग्राह्या गृहाः सं सृज्यन्ते स्त्रिया यन्म्रियते पतिः ।
ब्रह्मैव विद्वानेष्यो३ यः क्रव्यादं निरादधत् ॥३९॥
यद् रिप्रं शमलं चकृम यच्च दुष्कृतम् ।
आपो मा तस्माच्छुम्भन्त्वग्नेः संकसुकाच्च यत् ॥४०॥
ता अधरादुदीचीराववृत्रन् प्रजानतीः पथिभिर्देवयानैः ।
पर्वतस्य वृषभस्याधि पृष्ठे नवाश्चरन्ति सरितः पुराणीः ॥४१॥
अग्ने अक्रव्यान्निष्क्रव्यादं नुदा देवयजनं वह ॥४२॥
इमं क्रव्यादा विवेशायं क्रव्यादमन्वगात् ।
व्याघ्रौ कृत्वा नानानं तं हरामि शिवापरम् ॥४३॥
अन्तर्धिर्देवानां परिधिर्मनुष्याणामग्निर्गार्हपत्य उभयानन्तरा श्रितः ॥४४॥
जीवानामायुः प्र तिर त्वमग्ने पितृणां लोकमपि गच्छन्तु ये मृताः ।
सुगार्हपत्यो वितपन्नरातिमुषामुषां श्रेयसीं धेह्यस्मै ॥४५॥
सर्वानग्ने सहमानः सपत्नानैषामूर्जं रयिमस्मासु धेहि ॥४६॥
इममिन्द्रं वह्निं पप्रिमन्वारभध्वं स वो निर्वक्षद् दुरितादवद्यात् ।
तेनाप हत शरुमापतन्तं तेन रुद्रस्य परि पातास्ताम् ॥४७॥
अनड्वाहं प्लवमन्वारभध्वं स वो निर्वक्षद् दुरितादवद्यात् ।
आ रोहत सवितुर्नावमेतां षड्भिरुर्वीभिरमतिं तरेम ॥४८॥
अहोरात्रे अन्वेषि बिभ्रत् क्षेम्यस्तिष्ठन् प्रतरणः सुवीरः ।
अनातुरान्त्सुमनसस्तल्प बिभ्रज्ज्योगेव नः पुरुषगन्धिरेधि ॥४९॥
ते देवेभ्य आ वृश्चन्ते पापं जीवन्ति सर्वदा ।
क्रव्याद् यानग्निरन्तिकादश्वइवानुवपते नडम् ॥५०॥
येऽश्रद्धा धनकाम्या क्रव्यादा समासते ।
ते वा अन्येषां कुम्भीं पर्यादधति सर्वदा ॥५१॥
प्रेव पिपतिषति मनसा मुहुरा वर्तते पुनः ।
क्रव्याद् यानग्निरन्तिकादनुविद्वान् वितावति ॥५२॥
अविः कृष्णा भागधेयं पशूनां सीसं क्रव्यादपि चन्द्रं त आहुः ।
माषाः पिष्टा भागधेयं ते हव्यमरण्यान्या गह्वरं सचस्व ॥५३॥
इषीकां जरतीमिष्ट्वा तिल्पिंजं दण्डनं नडम् ।
तमिन्द्र इध्मं कृत्वा यमस्याग्निं निरादधौ ॥५४॥
प्रत्यंचमर्कं प्रत्यर्पयित्वा प्रविद्वान् पन्थां वि ह्याविवेश ।
परामीषामसून दिदेश दीर्घेणायुषा समिमान्त्सृजामि ॥५५॥

*apāvṛtya gārhapatyāt kravyādā preta dakṣiṇā /*
*priyaṁ pitṛbhya ātmane brahmabhyaḥ kṛṇutā priyam //34 //*
*dvibhāgadhanamādāya pra kṣiṇātyavatyā /*
*agniḥ putrasya jyeṣṭhasya yaḥ kravyādanirāhitaḥ //35 //*
*yat kṛṣate yad vanute yachcha vasnena vindate /*
*sarvaṁ martyasya tannāsti kravyāchchedanirāhitaḥ //36 //*
*ayajñiyo hatavarchā bhavati nainena havirattave /*
*chhinatti kṛṣyā gordhanād yaṁ kravyādanuvarttate //37 //*
*muhurgṛdhyaiḥ pra vadatyārti martyo nītya /*
*kravyād yānagnirantikādanuvidvān vitāvati //38 //*
*grāhyā gṛhāḥ saṁ sṛjyante striyā yanmriyate patiḥ /*
*brahmaiva vidvāneṣyo3 yaḥ kravyādaṁ nirādadhat //39 //*
*yad ripraṁ śamalaṁ chakṛma yachcha duṣkṛtam /*
*āpo mā tasmāchchhumbhantvagneḥ saṁkasukāchcha yat //40 //*

*tā adharādudīchīrāvavṛtran prajānatīḥ pathibhirdevayāneḥ ।*
*parvatasya vṛṣabhasyādhi pṛṣṭhe navāścharanti saritaḥ purāṇīḥ ॥41॥*
*agne akravyānniṣkravyādaṁ nudā devayajanaṁ vaha ॥42॥*
*imaṁ kravyādā viveśāyaṁ kravyādamanvagāt ।*
*vyāghrau kṛtvā nānānaṁ taṁ harāmi śivāparam ॥43॥*
*antardhirdevānāṁ paridhirmanuṣyāṇāmagnirgārhapatya ubhayānantarā śritaḥ ॥44॥*
*jīvānāmāyuḥ pra tira tvamagne pitṛṇāṁ lokamapi gachchhantu ye mṛtāḥ ।*
*sugārhapatyeā vitapannarātimuṣāmuṣāṁ śreyasīṁ dhehyasmai ॥45॥*
*sarvānagne sahamānaḥ sapatnānaiṣāmūrjaṁ rayimasmāsu dhehi ॥46॥*
*imamindraṁ vaniṁha paprimanvārabhadhvaṁ sa vo nirvakṣad duritādavadyāt ।*
*tenāpa hata śarumāpatantaṁ tena rudrasya pari pātāstām ॥47॥*
*anaḍvāhaṁ plavamanvārabhadhvaṁ sa vo nirvakṣad duritādavadyāt ।*
*ā rohata saviturnāvametāṁ ṣaḍbhirurvībhiramatiṁ tarema ॥48॥*
*ahorātre anveṣi bibhrat kṣemyastiṣṭhan prataraṇaḥ suvīraḥ ।*
*anāturāntsumanasastalpa bibhrajjyogeva naḥ puruṣagandhiredhi ॥49॥*
*te devebhya ā vṛśchante pāpaṁ jīvanti sarvadā ।*
*kravyād yānagnirantikādaśvaivānuvapate naḍam ॥50॥*
*ye'śraddhā dhanakāmyā kravyādā samāsate ।*
*te vā anyeṣāṁ kumbhīṁ paryādadhati sarvadā ॥51॥*
*preva pipatiṣati manasā muharā vartate punaḥ ।*
*kravyād yānagnirantikādanuvidvān vitāvati ॥52॥*
*aviḥ kṛṣṇā bhāgadheyaṁ paśūnāṁ sīsaṁ kravyādapi chandraṁ ta āhuḥ ।*
*māṣāḥ piṣṭā bhāgadheyaṁ te havyamaraṇyānyā gahvaraṁ sachasva ॥53॥*
*iṣīkāṁ jaratīmiṣṭvā tilpiṁjaṁ daṇḍanaṁ naḍam ।*
*tamindra idhmaṁ kṛtvā yamasyāgiṁna nirādadhau ॥54॥*
*pratyaṁchamarkaṁ pratyarpayitvā pravidvān panthāṁ vi hyāviveśa ।*
*parāmīṣāmasūna dideśa dīrgheṇāyuṣā samimāntsṛjāmi ॥55॥*

४. अग्न्यादयो मन्त्रोक्ताः (Agnyādayo Mantroktāḥ) - अ. (Av.) १९.४५.६-१०

अग्निर्माग्निनावतु प्राणायापानायायुषे वर्चस ओजसे तेजसे स्वस्तये सुभूतये स्वाहा ॥६॥
इन्द्रो मेन्द्रियेणावतु प्राणायापानायायुषे वर्चस ओजसे तेजसे स्वस्तये सुभूतये स्वाहा ॥७॥
सोमो मा सौम्येनावतु प्राणायापानायायुषे वर्चस ओजसे तेजसे स्वस्तये सुभूतये स्वाहा ॥८॥
भागो मा भगेनावतु प्राणायापानायायुषे वर्चस ओजसे तेजसे स्वस्तये सुभूतये स्वाहा ॥९॥
मरुतो मा गणैरवन्तु प्राणायापानायायुषे वर्चस ओजसे तेजसे स्वस्तये सुभूतये स्वाहा ॥१०॥
*agnirmāgnināvatu prāṇāyāpānāyāyuṣe varchasa ojase tejase svastaye subhūtaye svāhā ॥6॥*
*indro mendriyeṇāvatu prāṇāyāpānāyāyuṣe varchasa ojase tejase svastaye subhūtaye svāhā ॥7॥*
*somo mā saumyenāvatu prāṇāyāpānāyāyuṣe varchasa ojase tejase svastaye subhūtaye svāhā ॥8॥*
*bhāgo mā bhagenāvatu prāṇāyāpānāyāyuṣe varchasa ojase tejase svastaye subhūtaye svāhā ॥9॥*
*maruto mā gaṇairavantu prāṇāyāpānāyāyuṣe varchasa ojase tejase svastaye subhūtaye svāhā ॥10॥*

५. अजः पंचोदनः (Ajaḥ Paṁchodanaḥ) - अ. (Av.) ९.५.१-३८

आ नयैतमा रभस्व सुकृतां लोमपि गच्छतु प्रजानन् ।
तीर्त्वा तमांसि बहुधा महान्त्यजो नाकमा क्रमतां तृतीयम् ॥१॥
इन्द्राय भागं परि त्वा नयाम्यस्मिन् यज्ञे यजमानाय सूरिम् ।
ये नो द्विषन्त्यनु तान् रभस्वानागसो यजमानस्य वीराः ॥२॥
प्र पदोऽव नेनिग्धि दुश्चरितं यच्चचार शुद्धैः शफैरा क्रमतां प्रजानन् ।
तीर्त्वा तमांसि बहुधा विपश्यन्नजो नाकमा क्रमतां तृतीयम् ॥३॥
अनु च्छ्य श्यामेन त्वचमेतां विशस्तर्यथापर्वश्सिना माभि मंस्थाः ।
माभि द्रुहः पुरुषः कल्पयैनं तृतीये नाके अधि वि श्रयैनम् ॥४॥

ऋचा कुम्भीमध्यग्नौ श्रयाम्या सिंचोदकमव धेह्येनम् ।
पर्याधत्ताग्निना शमितारः श्रतो गच्छतु सुकृतां यत्र लोकः ॥५॥
उत्क्रामातः परि चेदतप्तस्तप्ताच्चरोरधि नाकं तृतीयम् ।
अग्नेरग्निरधि सं बभूविथ ज्योतिष्मन्तमभि लोकं जयैतम् ॥६॥
अजो अग्निरजमु ज्योतिराहुरजं जीवता ब्रह्मणे देयमाहुः ।
अजस्तमांस्यप हन्ति दूरमस्मिँल्लोके श्रद्दधानेन दत्तः ॥७॥
पंचौदनः पंचधा वि क्रमतामक्रंस्यमानस्त्रीणि ज्योतींषि ।
ईजानानां सुकृतां प्रेहि मध्यं तृतीये नाके अधि वि श्रयस्व ॥८॥
अजा रोह सुकृतां यत्र लोकः शरभो न चत्तोऽति दुर्गाण्येषः ।
पंचौदनो ब्रह्मणे दीयमानः स दातारं तृप्त्या तर्पयाति ॥९॥
अजस्त्रिनाके त्रिदिवे त्रिपृष्ठे नाकस्य पृष्ठे ददिवांसं दधाति ।
पंचौदनो ब्रह्मणे दीपमानो विश्वरूपा धेनुः कामदुघास्येका ॥१०॥
एतद् वो ज्योतिः पितरस्तृतीयं पंचौदनं ब्रह्मणेऽजं ददाति ।
अजस्तमांस्यप हन्ति दूरमस्मिँल्लोके श्रद्दधानेन दत्तः ॥११॥
ईजानानां सुकृतां लोकमीप्सन् पंचौदनं ब्रह्मणेऽजं ददाति ।
स व्याप्तिमभि लोकं जयैतं शिवा३स्मभ्यं प्रतिगृहीतो अस्तु ॥१२॥
अजो ह्य१ग्नेरजनिष्ट शोकाद् विप्रो विप्रस्य सहसो विपश्चित् ।
इष्टं पूर्तमभिपूर्तं वषट्कृतं तद् देवा ऋतुशः कलपयन्तु ॥१३॥
अमोतं वासो दद्याद्धिरण्यमपि दक्षिणाम् ।
तथा लोकास्त्समाप्नोति ये दिव्या ये च पार्थिवाः ॥१४॥
एतान्वाजोप यन्तु धाराः सोम्या देवीर्घृतपृष्ठा मधुश्चुतः ।
स्तभान पृथिवीमुत द्यां नाकस्य पृष्ठे अधि सप्तरश्मौ ॥१५॥
अजो३स्यज स्वर्गोऽसि त्वया लोकमंगिरसः प्रजानन् ।
तं लोकं पुण्यं प्र ज्ञेषम् ॥१६॥
येना सहस्रं वहसि येनाग्ने सर्ववेदसम् ।
तेनेमं यज्ञं नो वह स्वर्देवेषु गन्तवे ॥१७॥
अज पक्वः स्वर्गे लोके दधाति पंचौदनो निर्ऋतिं बाधमानः ।
तेन लोकान्त्सूर्यवतो जयेम ॥१८॥
यं ब्राह्मणे निदधे यं च विक्षु या विप्रुष ओदनानामजस्य ।
सर्वं तदग्ने सुकृतस्य लोके जानीतान्नः संगमने पथीनाम् ॥१९॥
अजो वा इदमग्रे व्यक्रमत तस्योर इयमभवद् द्यौः पृष्ठम् ।
अन्तरिक्षं मध्यं दिशः पार्श्वे समुद्रौ कुक्षी ॥२०॥
सत्यं च ऋतं च चक्षुषी विश्वं सत्यं श्रद्धा प्राणो विराट् शिरः ।
एष वा अपरिमितो यज्ञो यदजः पंचौदनः ॥२१॥
अपरिमितमेव यज्ञमाप्नोत्यपरिमितं लोकमव रुन्द्धे ।
यो३जं पंरचौदनं दक्षिणाज्योतिषं ददाति ॥२२॥
नास्यास्थीनि भिन्द्यान्न मज्ज्ञो निर्धयेत् ।
सर्वमेनं समादायेदमिदं प्र वेशयेत् ॥२३॥
इदमिदमेवास्य रूपं भवति तेनैनं सं गमयति ।
इषं मह ऊर्जमस्मै दुहे यो३जं पंचौदनं दक्षिणाज्योतिषं ददाति ॥२४॥
पंच रुक्मा पंच नवानि वस्त्रा पंचास्मै धेनवः कामदुघा भवन्ति ।
यो३जं पंचौदनं दक्षिणाज्योतिषं ददाति ॥२५॥
पंच रुक्मा ज्योतिरस्मै भवन्ति वर्म वासांसि तन्वे भवन्ति ।
स्वर्गं लोकमश्नुते यो३जं पंचौदनं दक्षिणाज्योतिषं ददाति ॥२६॥
या पूर्वं पतिं वित्त्वाथान्यं विन्दतेऽपरम् ।
पंचौदनं च तावजं ददातो न वि योषतः ॥२७॥
समानलोको भवति पुनर्भुवापरः पतिः ।

योऽजं पंचौदनं दक्षिणाज्योतिषं ददाति ॥२८॥
अनुपूर्ववत्सां धेनुमनड्वाहमुपबर्हणम् ।
वासो हिरण्यं दत्त्वा ते यन्ति दिवमुत्तमाम् ॥२९॥
आत्मानं पितरं पुत्रं पौत्रं पितामहम् ।
जायां जनित्रीं मातरं ये प्रियास्तानुप ह्वये ॥३०॥
यो वै नैदाघं नाम ऋतुं वेद। एष वै नेदाघो नाम ऋतुर्यदजः पंचौदनः ।
निरेवाप्रियस्य भ्रातृव्यस्य श्रियं दहति भवत्यात्मना ।
योऽजं पंचौदनं दक्षिणाज्योतिषं ददाति ॥३१॥
यो वै कुर्वन्तं नाम ऋतुं वेद । कुर्वतींकुर्वतीमेवाप्रियस्य भ्रातृव्यस्य श्रियमा दत्ते ।
एष वै कुर्वन्नाम ऋतुर्यदजः पंचौदनः। निरेवाप्रियस्य भ्रातृव्यस्य श्रियं दहति भवत्यात्मना ।
योऽजं पंचौदनं दक्षिणाज्योतिषं ददाति ॥३२॥
यो वैसंयन्तं नाम ऋतुं वेद । संयतींसयतीमेवाप्रियस्य भ्रातृव्यस्य श्रियमा दत्ते ।
एष वै संयन्नाम ऋतुर्यदजः पंचौदनः । निरेवाप्रियस्य भ्रातृव्यस्य श्रियं दहति भवत्यात्मना ।
योऽजं पंचौदनं दक्षिणाज्योतिषं ददाति ॥३३॥
यो वै पिन्वन्तं नाम ऋतुं वेद । पिन्वतीपिन्वतीमेवाप्रियस्य भ्रातृव्यस्य श्रियमा दत्ते ।
एषं वै पिन्वन्नाम ऋतुर्यदजः पंचौदनः। निरेवाप्रियस्य भ्रातृव्यस्य श्रियं दहति भवत्यात्मना ।
योऽजं पंचौदनं दक्षिणाज्योतिष ददाति ॥३४॥
यो वा उद्यतं नाम ऋतुं वेद । उद्यतीमुद्यतीमेवाप्रियस्य भ्रातृव्यस्य श्रियमा दत्ते ।
एष वा उद्यन्नाम ऋतुर्यदजः पंचौदनः। निरेवाप्रियस्य भ्रातृव्यस्य श्रियं दहति भवत्यात्मना ।
योऽजं पंचौदनं दक्षिणाज्योतिषं ददाति ॥३५॥
यो वा अभिभुवं नाम ऋतुं वेद । अभिभवन्तीमभिभवन्तीमेवाप्रियस्य भ्रातृव्यस्य श्रियमा दत्ते ।
एष वा अभिभूर्नाम ऋतुर्यदजः पंचौदनः। निरेवाप्रियस्य भ्रातृव्यस्य श्रियं दहति भवत्यात्मना ।
योऽजं पंचौदनं दक्षिणाज्योतिषं ददाति ॥३६॥
अजं च पचत पंच चौदनान् ।
सर्वा दिशः संमनसः सध्रीचीः सान्तर्देशाः प्रति गृह्णन्तु त एतम् ॥३७॥
तास्ते रक्षन्तु तव तुभ्यमेतं ताभ्य आज्यं हविरिदं जुहोमि ॥३८॥
*ā nayaitamā rabhasva sukṛtāṁ lomapi gachchhatu prajānan* ।
*tīrtvā tamāṁsi bahudhā mahāntyajo nākamā kramatāṁ tṛtīyam* ॥1॥
*indrāya bhāgaṁ pari tvā nayāmyasmin yajñe yajamānāya sūrim* ।
*ye no dviṣantyanu tān rabhasvānāgaso yajamānasya vīrāḥ* ॥2॥
*pra pado'va nenigdhi duścharitaṁ yachchachāra śuddhaiḥ śaphairā kramatāṁ prajānan* ।
*tīrtvā tamāṁsi bahudhā vipaśyannajo nākamā kramatāṁ tṛtīyam* ॥3॥
*anu chchhya śyāmena tvachametāṁ viśastaryathāparva1sinā mābhi maṁsthāḥ* ।
*mābhi druhaḥ puruṣaḥ kalpayainaṁ tṛtīye nāke adhi vi śrayainam* ॥4॥
*ṛchā kumbhīmadhyagnau śrayāmyā siṁchodakamava dhehyenam* ।
*paryādhattāgninā śamitāraḥ śṛto gachchhatu sukṛtāṁ yatra lokaḥ* ॥5॥
*utkrāmātaḥ pari chedataptastaptāchcharoradhi nākaṁ tṛtīyam* ।
*agneragniradhi saṁ babhūvitha jyotiṣmantamabhi lokaṁ jayaitam* ॥6॥
*ajo agnirajamu jyotirāhurajaṁ jīvatā brahmaṇe deyamāhuḥ* ।
*ajastamāṁsyapa hanti dūramasmiṁlloke śraddadhānena dattaḥ* ॥7॥
*paṁchaudanaḥ paṁchadhā vi kramatāmakraṁsyamānastrīṇi jyotīṁṣi* ।
*ījānānāṁ sukṛtāṁ prehi madhyaṁ tṛtīye nāke adhi vi śrayasva* ॥8॥
*ajā roha sukṛtāṁ yatra lokaḥ śarabho na chatto'ti durgāṇyeṣaḥ* ।
*paṁchaudano brahmaṇe dīyamānaḥ sa dātāraṁ tṛptyā tarpayāti* ॥9॥
*ajastrināke tridive tripṛṣṭhe nākasya pṛṣṭhe dadivāṁsaṁ dadhāti* ।
*paṁchaudano brahmaṇe dīpamāno viśvarūpā dhenuḥ kāmadughāsyekā* ॥10॥
*etad vo jyotiḥ pitarastṛtīyaṁ paṁchaudanaṁ brahmaṇe'jaṁ dadāti* ।
*ajastamāṁsyapa hanti dūramasmiṁlloke śraddadhānena dattaḥ* ॥11॥
*ījānānāṁ sukṛtāṁ lokamīpsan paṁchaudanaṁ brahmaṇe'jaṁ dadāti* ।
*sa vyāptimabhi lokaṁ jayaitaṁ śivā2smabhyaṁ pratigṛhīto astu* ॥12॥
*ajo hya1gnerajaniṣṭa śokād vipro viprasya sahaso vipaśchit* ।

*iṣṭaṁ pūrtamabhipūrtaṁ vaṣaṭkṛtaṁ tad devā ṛtuśaḥ kalapayantu ।।13 ।।*
*amotaṁ vāso dadyāddhiraṇyamapi dakṣiṇām ।*
*tathā lokāstsamāpnoti ye divyā ye cha pārthivāḥ ।।14 ।।*
*etāntvājopa yantu dhārāḥ somyā devīrghṛtapṛṣṭhā madhuśchutaḥ ।*
*stabhāna pṛthivīmuta dyāṁ nākasya pṛṣṭhe adhi saptaraśmau ।।15 ।।*
*ajo3syaja svargo'si tvayā lokamaṁgirasaḥ prajānan ।*
*taṁ lokaṁ puṇyaṁ pra jñeṣam ।।16 ।।*
*yenā sahasraṁ vahasi yenāgne sarvavedasam ।*
*tenemaṁ yajñaṁ no vaha svardeveṣu gantave ।।17 ।।*
*aja pakvaḥ svarge loke dadhāti paṁchaudano nirṛti bādhamānaḥ ।*
*tena lokāntsūryavato jayema ।।18 ।।*
*yaṁ brāhmaṇe nidadhe yaṁ cha vikṣu yā vipruṣa odanānāmajasya ।*
*sarvaṁ tadagne sukṛtasya loke jānītānnaḥ saṁgamane pathīnām ।।19 ।।*
*ajo vā idamagre vyakramata tasyora iyamabhavad dyauḥ pṛṣṭham ।*
*antarikṣaṁ madhyaṁ diśaḥ pārśve samudrau kukṣī ।।20 ।।*
*satyaṁ cha ṛtaṁ cha chakṣuṣī viśvaṁ satyaṁ śraddhā prāṇo virāṭ śiraḥ ।*
*eṣa vā aparimito yajñe yadajaḥ paṁchaudanaḥ ।।21 ।।*
*aparimitameva yajñamāpnotyaparimitaṁ lokamava runddhe ।*
*yo3jaṁ paṁrachaudanaṁ dakṣiṇājyotiṣaṁ dadāti ।।22 ।।*
*nāsyāsthīni bhindyānna majjño nirdhayet ।*
*sarvamenaṁ samādāyedamidaṁ pra veśayet ।।23 ।।*
*idamidamevāsya rūpaṁ bhavati tenainaṁ saṁ gamayati ।*
*iṣaṁ maha ūrjamasmai duhe yo3jaṁ paṁchaudanaṁ dakṣiṇājyotiṣaṁ dadāti ।।24 ।।*
*paṁcha rukmā paṁcha navāni vastrā paṁchāsmai dhenavaḥ kāmadughā bhavanti ।*
*yo3jaṁ paṁchaudanaṁ dakṣiṇājyotiṣaṁ dadāti ।।25 ।।*
*paṁcha rukmā jyotirasmai bhavanti varma vāsāṁsi tanve bhavanti ।*
*svargaṁ lokamaśnute yo3jaṁ paṁchaudanaṁ dakṣiṇājyotiṣaṁ dadāti ।।26 ।।*
*yā pūrvaṁ patiṁ vittvāthānyaṁ vindate'param ।*
*paṁchaudanaṁ cha tāvajaṁ dadāto na vi yoṣataḥ ।।27 ।।*
*samānaloko bhavati punabhuvāparaḥ patiḥ ।*
*yo3jaṁ paṁchaudanaṁ dakṣiṇājyotiṣaṁ dadāti ।।28 ।।*
*anupūrvavatsāṁ dhenumanaḍvāhamupabarhaṇam ।*
*vāso hiraṇyaṁ dattvā te yanti divamuttamām ।।29 ।।*
*ātmānaṁ pitaraṁ putraṁ pautraṁ pitāmaham ।*
*jāyāṁ janitrīṁ mātaraṁ ye priyāstānupa hvaye ।।30 ।।*
*yo vai naidāghaṁ nāma ṛtuṁ veda । eṣa vai nedāgho nāma ṛturyadajaḥ paṁchaudanaḥ ।*
*nirevāpriyasya bhrātṛvyasya śriyaṁ dahati bhavatyātmanā ।*
*yo3jaṁ paṁchaudanaṁ dakṣiṇājyotiṣaṁ dadāti ।।31 ।।*
*yo vai kurvantaṁ nāma ṛtuṁ veda ।*
*kurvatīṁkurvatīmevāpriyasya bhrātṛvyasya śriyamā datte ।*
*eṣa vai kurvannāma ṛturyadajaḥ paṁchaudanaḥ ।*
*nirevāpriyasya bhrātṛvyasya śriyaṁ dahati bhavatyātmanā ।*
*yo3jaṁ paṁchaudanaṁ dakṣiṇājyotiṣaṁ dadāti ।।32 ।।*
*yo vaisaṁyantaṁ nāma ṛtuṁ veda ।*
*saṁyatīṁsayatīmevāpriyasya bhrātṛvpyasya śriyamā datte ।*
*eṣa vai saṁyannāma ṛturyadajaḥ paṁchaudanaḥ ।*
*nirevāpriyasya bhrātṛvyasya śriyaṁ dahati bhavatyātmanā ।*
*yo3jaṁ paṁchaudanaṁ dakṣiṇājyotiṣaṁ dadāti ।।33 ।।*
*yo vai pinvantaṁ nāma ṛtuṁ veda ।*
*pinvatīpinvatīmevāpriyasya bhrātṛvyasya śriyamā datte ।*
*eṣaṁ vai pinvannāma ṛturyadajaḥ paṁchaudanaḥ ।*
*nirevāpriyasya bhrātṛvyasya śriyaṁ dahati bhavatyātmanā ।*
*yo3jaṁ paṁchaudanaṁ dakṣiṇājyotiṣa dadāti ।।34 ।।*
*yo vā udyataṁ nāma ṛtuṁ veda ।*
*udyatīmudyatīmevāpriyasya bhrātṛvyasya śriyamā datte ।*

*eṣa vā udyannāma ṛturyadajaḥ paṁchaudanaḥ ।*
*nirevāpriyasya bhrātṛvyasya śriyaṁ dahati bhavatyātmanā ।*
*yo3jaṁ paṁchaudanaṁ dakṣiṇājyotiṣaṁ dadāti ॥35॥*
*yo vā abhibhuvaṁ nāma ṛtuṁ veda ।*
*abhibhavantīmabhibhavantīmevāpriyasya bhrātṛvyasya śriyamā datte ।*
*eṣa vā abhibhūrnāma ṛturyadajaḥ paṁchaudanaḥ ।*
*nirevāpriyasya bhrātṛvyasya śriyaṁ dahati bhavatyātmanā ।*
*yo3jaṁ paṁchaudanaṁ dakṣiṇājyotiṣaṁ dadāti ॥36॥*
*ajaṁ cha pachata paṁcha chaudanān ।*
*sarvā diśaḥ saṁmanasaḥ sadhrīchīḥ sāntardeśāḥ prati gṛhṇantu ta etam ॥37॥*
*tāste rakṣantu tava tubhyametaṁ tābhya ājyaṁ haviridaṁ juhomi ॥38॥*

६. आंजनम् (Āṁjanam) - अ. (Av.) १९.४४.१-७; १०; १९.४५.१-५

अ. (Av.) १९.४४.१-७

आयुषोऽसि प्रतरणं विप्रं भेषजमुच्यसे। तदांजन त्वं शंताते शमापो अभयं कृतम् ॥१॥
यो हरिमा जायान्योऽङ्गभेदो विसल्पकः। सर्वं ते यक्ष्ममंगेभ्यो बहिर्निर्हन्त्वांजनम् ॥२॥
आंजनं पृथिव्यां जातं भद्रं पुरुषजीवनम्। कृणोत्वप्रमायुकं रथजूतिमनागसम् ॥३॥
प्राण प्राणं त्रयस्वासो असवे मृड। निर्ऋते निर्ऋत्या नः पाशेभ्यो मुंच ॥४॥
सिन्धोर्गर्भोऽसि विद्युतां पुष्पम्। वातः प्राणः सूर्यश्चक्षुर्दिवस्पयः ॥५॥
देवांजन त्रैककुदं परि मा पाहि विश्वतः। न त्वा तरन्त्योषधयो बाह्याः पर्वतीया उत ॥६॥
वी३दं मध्यमवासृपद् रक्षोहामीवचातनः। अभीवाः सर्वाश्चातयन् नाशयदभिभा इतः ॥७॥

*āyuṣo'si prataraṇaṁ vipraṁ bheṣajamuchyase ।*
*tadāṁjana tvaṁ śaṁtāte śamāpo abhayaṁ kṛtam ॥1॥*
*yo harimā jāyānyo'ṅgabhedo visalpakaḥ ।*
*sarvaṁ te yakṣamamaṁgebhyo bahirnirhantvāṁjanam ॥2॥*
*āṁjanaṁ pṛthivyāṁ jātaṁ bhadraṁ puruṣajīvanam ।*
*kṛṇotvapramāyukaṁ rathajūtimanāgasam ॥3॥*
*prāṇa prāṇaṁ trayasvāso asave mṛḍa । nirṛte nirṛtyā naḥ pāśebhyo muṁcha ॥4॥*
*sindhorgarbho'si vidyutāṁ puṣpam । vātaḥ prāṇaḥ sūryaśchakṣurdivaspayaḥ ॥5॥*
*devāṁjana traikakudaṁ pari mā pāhi viśvataḥ ।*
*na tvā tarantyoṣadhayo bāhyāḥ parvatīyā uta ॥6॥*
*vī3daṁ madhyamavāsṛpad rakṣohāmīvachātanaḥ ।*
*abhīvāḥ sarvāśchātayan nāśayadabhibhā itaḥ ॥7॥*

अ. (Av.) १९.४४.१०

मित्रश्च त्वा वरुणश्चानुप्रेयतुरांजन। तौ त्वानुगत्य दूरं भोगाय पुनरोहतुः ॥१०॥

*mitraścha tvā varuṇaśchānupreyaturāṁjana । tau tvānugatya dūraṁ bhogāya punarohatuḥ ॥10॥*

अ. (Av.) १९.४५.१-५

ऋणादृणमिव संनयन् कृत्यां कृत्याकृतो गृहम् । चक्षुर्मन्त्रस्य दुर्हार्दः पृष्टीरपि शुणंजन ॥१॥
यदस्मासु दुःष्वप्न्यं यद् गोषु यच्च नो गृहे । अनामगस्तं च दुर्हार्दः प्रियः प्रति मुंचताम् ॥२॥
अपामूर्ज ओजसो वावृधनमग्नेर्जातमधि जातवेदसः ।
चतुर्वीरं पर्वीतयं यदांजनं दिशः प्रदिशः करदिच्छिवास्ते ॥३॥
चतुर्वीरं बध्यत आंजनं ते सर्वा दिशो अभयास्ते भवन्तु ।
ध्रुवस्तिष्ठासि सवितेव चार्य इमा विशो अभि हरन्तु ते बलिम् ॥४॥
आक्ष्वैकं मणिमेकं कृणष्व स्नाह्येकेना पिबैकमेषाम् ।
चतुर्वीरं नैर्ऋतेभ्यश्चतुर्भ्यो ग्राह्या बन्धेभ्यः परि पात्वस्मान् ॥५॥

*ṛṇādṛṇamiva saṁnayan kṛtyāṁ kṛtyākṛto gṛham ।*
*chakṣurmantrasya durhārdaḥ pṛṣṭīrapi śuṇaṁjana ॥1॥*
*yadasmāsu duḥṣvapnyaṁ yad goṣu yachcha no gṛhe ।*
*anāmagastaṁ cha durhārdaḥ priyaḥ prati muṁchatām ॥2॥*
*apāmūrja ojaso vāvṛdhanamagnerjātamadhi jātavedasaḥ ।*

*chaturvīraṁ parvītayaṁ yadāṁjanaṁ diśaḥ pradiśaḥ karadichchhivāste ॥3॥*
*chaturvīraṁ badhyata āṁjanaṁ te sarvā diśo abhayāste bhavantu ।*
*dhruvastiṣṭhāsi saviteva chārya imā viśo abhi harantu te balim ॥4॥*
*ākṣavaikaṁ maṇimekaṁ kṛṇaṣva snāhyekenā pibaikameṣām ।*
*chaturvīraṁ nairṛtebhyaśchaturbhyo grāhyā bandhebhyaḥ pari pātvasmān ॥5॥*

७. इन्द्रः (Indraḥ) - अ. (Av.) ७.५४.२; ७.५५.१; ७.८४.२-३

अ. (Av.) ७.५४.२

ऋचं साम यदप्राक्षं हविरोजो यजुर्बलम्। एष मा तस्मान्मा हिंसीद् वेदः पृष्टः शचीपते ॥२॥
*ṛchaṁ sāma yadaprākṣaṁ havirojo yajurbalam ।*
*eṣa mā tasmānmā hiṁsīd vedaḥ pṛṣṭaḥ śachīpate ॥2॥*

अ. (Av.) ७.५५.१

ये ते पन्थानोऽव दिवो येभिर्विश्वमैरयः। तेभिः सुम्नया धेहि नो वसो ॥१॥
*ye te panthāno'va divo yebhirviśvamairayaḥ । tebhiḥ sumnayā dhehi no vaso ॥1॥*

अ. (Av.) ७.८४.२-३

इन्द्र क्षत्रमभि वाममोजोऽजायथा वृषभ चर्षणीनाम् ।
अपानुदो जनममित्रायन्तमुरुं देवेभ्यो अकृणोरु लोकम् ॥२॥
मृगो न भीमः कुचरो गिरिष्ठाः परावत आ जगम्यात् परस्याः ।
सृकं संशाय पविमिन्द्र तिग्मं वि शत्रून् ताढि वि मृधो नुदस्व ॥३॥
*indra kṣatramabhi vāmamojo'jāyathā vṛṣabha charṣaṇīnām ।*
*apānudo janamamitrāyantamuruṁ devebhyo akṛṇoru lokam ॥2॥*
*mṛgo na bhīmaḥ kucharo giriṣṭhāḥ parāvata ā jagamyāt parasyāḥ ।*
*sṛkaṁ saṁśāya pavimindra tigmaṁ vi śatrūn tāḍhi vi mṛdho nudasva ॥3॥*

८. इन्द्राग्नी (Indrāgnī) - अ. (Av.) ७.११०.१-३

अग्न इन्द्रश्च दाशुषे हतो वृत्राण्यप्रति । उभा हि वृत्रहन्तमा ॥१॥
याभ्यामजयन्त्स्व१रग्र एव यावातस्थतुर्भुवनानि विश्वा ।
प्रचर्षणी वृषणा वज्रबाहू अग्निमिन्द्रं वृत्रहणा हुवेऽहम् ॥२॥
उप त्वा देवो अग्रभीच्चमसेन बृहस्पतिः । इन्द्र गीर्भिर्न आ विश यजमानाय सुन्वते ॥३॥
*agna indraścha dāśuṣe hato vṛtrāṇyaprati । ubhā hi vṛtrahantamā ॥1॥*
*yābhyāmajayantsva1ragra eva yāvātasthaturbhuvanāni viśvā ।*
*pracharṣaṇī vṛṣaṇā vajrabāhū agnimindraṁ vṛtrahaṇā huve'ham ॥2॥*
*upa tvā devo agrabhīchchamasena bṛhaspatiḥ ।*
*indra gīrbhirna ā viśa yajamānāya sunvate ॥3॥*

९. कामेषु मित्रावरुणौ (Kāmeṣu Mitrāvaruṇau )- अ. (Av.) ३.२५.१-६

उत्तुदस्त्वोत् तुदतु मा धृथाः शयने स्वे। इषुः कामस्य या भीमा तया विध्यामि त्वा हृदि ॥१॥
आधीपर्णां कामशल्यामिषुं संकल्पकुल्मलाम्। तां सुसन्नतां कृत्वा कामो विध्यतु त्वा हृदि ॥२॥
या प्लीहानं शोषयति कामस्येषुः सुसंनता। प्राचीनपक्षा व्योषा त्पा विध्यामि त्वा हृदि ॥३॥
शुचा विद्धा व्योषा शुष्कास्याभि सर्प मा। मृदुर्निमन्युः केवली प्रियवादिन्यनुव्रता ॥४॥
आजामि त्वाजन्या परि मातुरथो पितुः। यथा मम क्रतावसो मम चित्तमुपायसि ॥५॥
व्यस्यै मित्रावरुणौ हृदश्चित्तान्यस्यतम्। अथैनामक्रतुं कृत्वा ममैव कृणुतं वशे ॥६॥
*uttudastvot tudatu mā dhṛthāḥ śayane sve ।*
*iṣuḥ kāmasya yā bhīmā tayā vidhyāmi tvā hṛdi ॥1॥*
*ādhīparṇāṁ kāmaśalyāmiṣuṁ saṁkalpakulmalām ।*
*tāṁ susannatāṁ kṛtvā kāmo vidhyatu tvā hṛdi ॥2॥*
*yā plīhānaṁ śoṣayati kāmasyeṣuḥ susaṁnatā ।*
*prāchīnapakṣā vyoṣā tpā vidhyāmi tvā hṛdi ॥3॥*
*śuchā viddhā vyoṣā śuṣkāsyābhi sarpa mā ।*
*mṛdurnimanyuḥ kevalī priyavādinyanuvratā ॥4॥*
*ājāmi tvājanyā pari māturatho pituḥ । yathā mama kratāvaso mama chittamupāyasi ॥5॥*
*vyasyai mitrāvaruṇau hṛdaśchittānyasyatam । athaināmakratuṁ kṛtvā mamaiva kṛṇutaṁ*

*vaśe //6 //*

१०. कालः (Kālaḥ) - अ. (Av.) १९.५३.१-१०; १९.५४.१-५

अ. (Av.) १९.५३.१-१०

कालो अश्वो वहति सप्तरश्मिः सहस्राक्षो अजरो भूरिरेताः ।
तमा रोहन्ति कवयो विपश्चितस्तस्य चक्रा भुवनानि विश्वा ॥१॥
सप्त चक्रान् वहति काल एष सप्तास्य नाभीरमृतं न्वक्षः ।
स इमा विश्वा भुवनान्यंजत् कालः स ईयते प्रथमो नु देवः ॥२॥
पूर्णः कुम्भोऽधि काल आहितस्तं वै पश्यामो बहुधा नु सन्तः ।
स इमा विश्वा भुवनानि प्रत्यङ् कालं तमाहुः परमे व्योमन् ॥३॥
स एव सं भुवनान्याभरत् स एव सं भुवनानि पर्यैत् ।
पिता सन्नभवत् पुत्र एषां तस्माद् वै नान्यत् परमस्ति तेजः ॥४॥
कालोऽमूं दिवमजनयत् काल इमाः पृथिवीरुत । काले ह भूतं भव्यं चेषितं ह वि तिष्ठते ॥५॥
कालो भूतिमसृजत काले तपति सूर्यः । काले ह विश्वा भूतानि काले चक्षुर्वि पश्यति ॥६॥
काले मनः काले प्राणः काले नाम समाहितम् । कालेन सर्वा नन्दन्त्यागतेन प्रजा इमाः ॥७॥
काले तपः काले ज्येष्ठं काले ब्रह्म समाहितम् ।
कालो ह सर्वस्येश्वरो यः पितासीत् प्रजापतेः ॥८॥
तेनेषितं तेन जातं तदु तस्मिन् प्रतिष्ठितम् । कालो ह ब्रह्म भूत्वा बिभर्ति परमेष्ठिनम् ॥९॥
कालः प्रजा असृजत कालो अग्रे प्रजापतिम् ।
स्वयम्भूः कश्यपः कालात् तपः कालादजायत ॥१०॥

*kālo aśvo vahati saptaraśmiḥ sahasrākṣo ajaro bhūriretāḥ /*
*tamā rohanti kavayo vipaśchitastasya chakrā bhuvanāni viśvā //1 //*
*sapta chakrān vahati kāla eṣa saptāsya nābhīramṛtaṁ nvakṣaḥ /*
*sa imā viśvā bhuvanānyaṁjat kālaḥ sa īyate prathamo nu devaḥ //2 //*
*pūrṇaḥ kumbho'dhi kāla āhitastaṁ vai paśyāmo bahudhā nu santaḥ /*
*sa imā viśvā bhuvanāni pratyaṅ kālaṁ tamāhuḥ parame vyoman //3 //*
*sa eva saṁ bhuvanānyābharat sa eva saṁ bhuvanāni paryait /*
*pitā sannabhavat putra eṣāṁ tasmād vai nānyat paramasti tejaḥ //4 //*
*kālo'mūṁ divamajanayat kāla imāḥ pṛthivīruta /*
*kāle ha bhūtaṁ bhavyaṁ cheṣitaṁ ha vi tiṣṭhate //5 //*
*kālo bhūtimasṛjata kāle tapati sūryaḥ / kāle ha viśvā bhūtāni kāle chakṣurvi paśyati //6 //*
*kāle manaḥ kāle prāṇaḥ kāle nāma samāhitam /*
*kālena sarvā nandantyāgatena prajā imāḥ //7 //*
*kāle tapaḥ kāle jyeṣṭhaṁ kāle brahma samāhitam /*
*kālo ha sarvasyeśvaro yaḥ pitāsīt prajāpateḥ //8 //*
*teneṣitaṁ tena jātaṁ tadu tasmin pratiṣṭhitam /*
*kālo ha brahma bhūtvā bibharti parameṣṭhinam //9 //*
*kālaḥ prajā asṛjata kālo agre prajāpatim /*
*svayambhūḥ kaśyapaḥ kālāt tapaḥ kālādajāyata //10 //*

अ. (Av.) १९.५४.१-५

कालादापः समभवन् कालाद् ब्रह्म तपो दिशः । कालेनोदेति सूर्यः काले नि विशते पुनः ॥१॥
कालेन वातः पवते कालेन पृथिवी मही । द्यौर्मही काल आहिता ॥२॥
कालो ह भूतं भव्यं च पुत्रो अजनयत् पुरा । कालादृचः समभवन् यजुः कालादजायत ॥३॥
कालो यज्ञं समैरयद्देवेभ्यो भागमक्षितम् । काले गन्धर्वाप्सरसः काले लोकाः प्रतिष्ठिताः ॥४॥
कालेऽयमंगिरा देवेऽथर्वा चाधि तिष्ठतः ।
इमं च लोकं परमं च लोकं पुण्यांश्च लोकान् विधृतीश्च पुण्याः ।
सर्वाँल्लोकानभिजित्य ब्रह्मणा कालः स ईयते परमो नु देवः ॥५॥

*kālādāpaḥ samabhavan kālād brahma tapo diśaḥ /*
*kālenodeti sūryaḥ kāle ni viśate punaḥ //1 //*
*kālena vātaḥ pavate kālena pṛthivī mahī / dyaurmahī kāla āhitā //2 //*
*kālo ha bhūtaṁ bhavyaṁ cha putro ajanayat purā /*

*kālādṛchaḥ samabhavan yajuḥ kālādajāyata ॥3 ॥*
*kālo yajñaṁ samairayaddevebhyo bhāgamakṣitam ।*
*kāle gandharvāpsarasaḥ kāle lokāḥ pratiṣṭhitāḥ ॥4 ॥*
*kāle'yamaṁgirā deve'tharvā chādhi tiṣṭhataḥ ।*
*imaṁ cha lokaṁ paramaṁ cha lokaṁ puṇyāṁścha lokān vidhṛtīścha puṇyāḥ ।*
*sarvāँllokānabhijitya brahmaṇā kālaḥ sa īyate paramo nu devaḥ ॥5 ॥*

११. त्रैककुदांजनम् (Traikakudāṁjanam) - अ. (Av.) ४.९.१-१०

एहि जीवं त्रायमाणं पर्वतस्यास्यक्ष्यम्। विश्वेभिर्देवैर्दत्तं परिधिर्जीवनाय कम् ॥१॥
परिपाणं पुरुषाणां परिपाणं गवामसि। अश्वानामर्वतां परिपाणाय तस्थिषे ॥२॥
उतासि परिपाणं यातुजम्भनमांजन ।
उतामृतस्य त्वं वेत्थाथो असि जीवभेजनमथो हरितभेषजम् ॥३॥
यस्यांजन प्रसर्पस्यंगमंगं परुष्परुः। ततो यक्ष्मं वि बाधस उग्रो मध्यमशीरिव ॥४॥
नैनं प्राप्नोति शपथो न कृत्या नाभिशोचनम्। नैनं विष्कन्धमश्नुते यस्त्वा बिभर्त्यांजन ॥५॥
असन्मन्त्राद् दुःष्वप्न्याद् दुष्कृताच्छमलादुत। दुर्हार्दश्चक्षुषो घोरात् तस्मान्नः पाह्यांजन ॥६॥
इदं विद्वानांजन सत्यं वक्ष्यामि नानृतम्। सनेयमश्वं गामहमात्मानं तव पुरुष ॥७॥
त्रयो दासा आंजनस्य तक्मा बलास आदहिः। वर्षिष्ठः पर्वतानां त्रिककुन्नाम ते पिता ॥८॥
यदाज्जनं त्रैककुदं जातं हिमवतस्परि। यातूंश्च सर्वांजम्भयत् सर्वाश्च यातुधान्यः ॥९॥
यदि वासि त्रैककुदं यदि यामुनमुच्यसे। उभे ते भद्रे नाम्नी ताभ्यां नः पाह्यांजन ॥१०॥

*ehi jīvaṁ trāyamāṇaṁ parvatasyāsyakṣayam ।*
*viśvebhirdevairdattaṁ paridhirjīvanāya kam ॥1 ॥*
*paripāṇaṁ puruṣāṇāṁ paripāṇaṁ gavāmasi ।*
*aśvānāmarvatāṁ paripāṇāya tasthiṣe ॥2 ॥*
*utāsi paripāṇaṁ yātujambhanamāṁjana ।*
*utāmṛtasya tvaṁ vetthātho asi jīvabhejanamatho haritabheṣajam ॥3 ॥*
*yasyāṁjana prasarpasyaṁgamaṁgaṁ paruṣparuḥ ।*
*tato yakṣamaṁ vi bādhasa ugro madhyamaśīriva ॥4 ॥*
*nainaṁ prāpnoti śapatho na kṛtyā nābhiśochanam ।*
*nainaṁ viṣkandhamaśnute yastvā bibhartyāṁjana ॥5 ॥*
*asanmantrād duḥṣvapnyād duṣkṛtāchchhamalāduta ।*
*durhārdaśchakṣuṣo ghorāt tasmānnaḥ pāhyāṁjana ॥6 ॥*
*idaṁ vidvānāṁjana satyaṁ vakṣayāmi nānṛtam ।*
*saneyamaśvaṁ gāmahamātmānaṁ tava puruṣa ॥7 ॥*
*trayo dāsā āṁjanasya takmā balāsa ādahiḥ ।*
*varṣiṣṭhaḥ parvatānāṁ trikakunnāma te pitā ॥8 ॥*
*yadājjanaṁ traikakudaṁ jātaṁ himavataspari ।*
*yātūṁścha sarvāṁjambhayat sarvāścha yātudhānyaḥ ॥9 ॥*
*yadi vāsi traikakudaṁ yadi yāmunamuchyase ।*
*ubhe te bhadre nāmnī tābhyāṁ naḥ pāhyāṁjana ॥10 ॥*

१२. धात्रादयो मन्त्रोक्ता (Dhātrādayo Mantroktā) - अ. (Av.) ७.१७.१-४

धाता दधातु नो रयिमीशानो जगतस्पतिः । स नः पूर्णेन यच्छतु ॥१॥
धाता दधातु दाशुषे प्राचीं जीवातुमक्षिताम् । वयं देवस्य धमीहि सुमतिं विश्वराधसः ॥२॥
धाता विश्वा वार्या दधातु प्रजाकामाय दाशुषे दुरोणे ।
तस्मै देवा अमृतं सं व्ययन्तु विश्वे देवा अदितिः सजोषाः ॥३॥
धाता रातिः सवितेदं जुषन्तां प्रजापतिर्निधिपतिर्नो अग्निः ।
त्वष्टा विष्णुः प्रजया संरराणो यजमानाय द्रविणं दधातु ॥४॥

*dhātā dadhātu no rayimīśāno jagataspatiḥ । sa naḥ pūrṇena yachchhatu ॥1 ॥*
*dhātā dadhātu dāśuṣe prāchīṁ jīvātumakṣitām ।*
*vayaṁ devasya dhamīhi sumatiṁ viśvarādhasaḥ ॥2 ॥*
*dhātā viśvā vāryā dadhātu prajākāmāya dāśuṣe duroṇe ।*
*tasmai devā amṛtaṁ saṁ vyayantu viśve devā aditiḥ sajoṣāḥ ॥3 ॥*
*dhātā rātiḥ savitedaṁ juṣantāṁ prajāpatirnidhipatirno agniḥ ।*

*tvaṣṭā viṣṇuḥ prajayā saṁrarāṇo yajamānāya draviṇaṁ dadhātu //4 //*

१३. मृत्युः (Mṛtyuḥ) - अ. (Av.) १२.२.२१-३३

परं मृत्यो अनु परेहि पन्थां यस्त एष इतरो देवयानात् ।
चक्षुष्मते श्रृण्वते ते ब्रवीमीहेमे वीरा बहवो भवन्तु ॥२१॥
इमे जीवा वि मृतैराववृत्रन्नभूद् भद्रा देवहूतिर्नो अद्य ।
प्रांचो अगाम नृतये हसाय सुवीरासो विदथमा वदेम ॥२२॥
इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्थमेतम् ।
शतं जीवन्तः शरदः पुरूचीस्तिरो मृत्युं दधतां पर्वतेन ॥२३॥
आ रोहतायुर्जरसं वृणाना अनुपूर्वं यतमाना यदि स्थ ।
तान् वस्त्वष्टा सुजनिमा सजोषाः सर्वमायुर्नयतु जीवनाय ॥२४॥
यथाहान्यनुपूर्वं भवन्ति यथर्तव ऋतुभिर्यन्ति साकम् ।
यथा न पूर्वमपरो जहात्येवा धातरायूंषि कल्पयैषाम् ॥२५॥
अश्मन्वती रीयते सं रभध्वं प्र तरता सखायः ।
अत्रा जहीत ये असन् दुरेवा अनमीवानुत्तरेमाभि वाजान् ॥२६॥
उत्तिष्ठता प्र तरता सखायोऽश्मन्वती नदी स्यन्दत इयम् ।
अत्रा जहीत ये असन्नशिवाः शिवान्त्स्योनानुत्तरेमाभि वाजान् ॥२७॥
वैश्वदेवीं वर्चस आ रभध्वं शुद्धा भवन्तः शुचयः पावकाः ।
अतिक्रामन्तो दुरिता पदानि शतं हिमाः सर्ववीरा मदेम ॥२८॥
उदीचीनैः पथिभिर्वायुमद्भिरतिक्रामन्तोऽवरान् परेभिः ।
त्रिः सप्त कृत्व ऋषयः परेता मृत्युं प्रत्यौहन् पदयोपनेन ॥२९॥
मृत्योः पदं योपयन्त एत द्राघीय आयुः प्रतरं दधानाः ।
आसीना मृतयुं नुदता सधस्थेऽथ जीवासो विदथमा वदेम ॥३०॥
इमा नारीरविधवाः सुपत्नीरांजनेन सर्पिषा सं स्पृशन्ताम् ।
अनश्रवो अनमीवाः सुरत्ना आ रोहन्तु जनयो योनिमग्रे ॥३१॥
व्याकरोमि हविषाहमेतौ तौ ब्रह्मणा व्य१हं कल्पयामि ।
स्वधां पितृभ्यो अजरां कृणोमि दीर्घेणायुषा समिमान्त्सृजामि ॥३२॥
यो नो अग्निः पितरो हृत्स्व१न्तराविवेशामृतो मतर्येषु ।
मय्यहं तं परि गृह्णामि देवं मा सो अस्मान् द्विक्षत मा वयं तम् ॥३३॥

*paraṁ mṛtyo anu parehi panthāṁ yasta eṣa itaro devayānāt /*
*chakṣuṣmate śṛṇvate te bravīmīheme vīrā bahavo bhavantu //21 //*
*ime jīvā vi mṛtairāvavṛtrannabhūd bhadrā devahūtirno adya /*
*prāṁcho agāma nṛtaye hasāya suvīrāso vidathamā vadema //22 //*
*imaṁ jīvebhyaḥ paridhiṁ dadhāmi maiṣāṁ nu gādaparo arthametam /*
*śataṁ jīvantaḥ śaradaḥ purūchīstiro mṛtyuṁ dadhatāṁ parvatena //23 //*
*ā rohatāyurjarasaṁ vṛṇānā anupūrvaṁ yatamānā yadi stha /*
*tān vastvaṣṭā sujanimā sajoṣāḥ sarvamāyurnayatu jīvanāya //24 //*
*yathāhānyanupūrvaṁ bhavanti yathartava ṛtubhiryanti sākam /*
*yathā na pūrvamaparo jahātyevā dhātarāyūṁṣi kalpayaiṣām //25 //*
*aśmanvatī rīyate saṁ rabhadhvaṁ pra taratā sakhāyaḥ /*
*atrā jahīta ye asan durevā anamīvānuttaremābhi vājān //26 //*
*uttiṣṭhatā pra taratā sakhāyo'śmanvatī nadī syandata iyam /*
*atrā jahīta ye asannaśivāḥ śivāntsyonānuttaremābhi vājān //27 //*
*vaiśvadevīṁ varchasa ā rabhadhvaṁ śuddhā bhavantaḥ śuchayaḥ pāvakāḥ /*
*atikrāmanto duritā padāni śataṁ himāḥ sarvavīrā madema //28 //*
*udīchīnaiḥ pathibhirvāyumadbhiratikrāmanto'varān parebhiḥ /*
*triḥ sapta kṛtva ṛṣayaḥ paretā mṛtyuṁ pratyauhan padayopanena //29 //*
*mṛtyoḥ padaṁ yopayanta eta drāghīya āyuḥ prataraṁ dadhānāḥ /*
*āsīnā mṛtayuṁ nudatā sadhasthe'tha jīvāso vidathamā vadema //30 //*
*imā nārīravidhavāḥ supatnīrāṁjanena sarpiṣā saṁ spṛśantām /*
*anaśravo anamīvāḥ suratnā ā rohantu janayo yonimagre //31 //*

*vyākaromi haviṣāhametau tau brahmaṇā vya1haṁ kalpayāmi ।*
*svadhāṁ pitṛbhyo ajarāṁ kṛṇomi dīrgheṇāyuṣā samimāntsṛjāmi ॥32॥*
*yo no agniḥ pitaro hṛtsva1ntarāviveśāmṛto mataryeṣu ।*
*mayyahaṁ taṁ pari gṛhṇāmi devaṁ mā so asmān dvikṣata mā vayaṁ tam ॥33॥*

१४. यमः निर्ऋतिः (Yamaḥ Nirṛtiḥ) - अ. (Av.) ६.२७.१-३; ६.२८.१-३; ६.२९.१-३

अ. (Av.) ६.२७.१-३

कपोत इषितो यदिच्छन् दूतो निर्ऋत्या इदमाजगाम ।
तस्मा अर्चाम कृणवाम देवाः निष्कृतिं शं नो अस्तु द्विपदे शं चतुष्पदे ॥१॥
शिवः कपोत इषितो नो अस्त्वनागा देवाः शकुनो गृहं नः ।
अग्निर्हि विप्रो जुषातं हविर्नः परि हेतिः पक्षिणी नो वृणक्तु ॥२॥
हेतिः पक्षिणी न दभात्यस्मानाष्ट्री पदं कृणुते अग्निधाने ।
शिवो गोभ्य उत पुरुषेभ्यो नो अस्तु मा नो देवा इह हिंसीत् कपोतः ॥३॥
*kapota iṣito yadichchhan dūto nirṛtyā idamājagāma ।*
*tasmā archāma kṛṇavāma devāḥ niṣkṛtiṁ śaṁ no astu dvipade śaṁ chatuṣpade ॥1॥*
*śivaḥ kapota iṣito no astvanāgā devāḥ śakuno gṛhaṁ naḥ ।*
*agnirhi vipro juṣātaṁ havirnaḥ pari hetiḥ pakṣiṇī no vṛṇaktu ॥2॥*
*hetiḥ pakṣiṇī na dabhātyasmānāṣṭrī padaṁ kṛṇute agnidhāne ।*
*śivo gobhya uta puruṣebhyo no astu mā no devā iha hiṁsīt kapotaḥ ॥3॥*

अ. (Av.) ६.२८.१-३

ऋचा कपो नुदत प्रणोदमिषं मदन्त परि गां नयामः ।
सं लोभयन्तो दुरिता पदानि हित्वा न ऊर्जं प्र पदात् पथिष्ठः ॥१॥
परीमे३ग्निमर्षत परीमे गामनेषत । देवेष्वक्रत श्रवः क इमाँ आ दधर्षति ॥२॥
यः प्रथमः प्रवतमाससाद बहुभ्यः पन्थामनुपस्पशानः ।
यो३स्येशे द्विपदो यश्चतुष्पदस्तस्मै यमाय नमो अस्तु मृत्यवे ॥३॥
*ṛchā kapo nudata praṇodamiṣaṁ madanta pari gāṁ nayāmaḥ ।*
*saṁ lobhayanto duritā padāni hitvā na ūrjaṁ pra padāt pathiṣṭhaḥ ॥1॥*
*parīme3gnimarṣata parīme gāmaneṣata । deveṣvakrata śravaḥ ka imām̐ ā dadharṣati ॥2॥*
*yaḥ prathamaḥ pravatamāsasāda bahubhyaḥ panthāmanupaspaśānaḥ ।*
*yo3syeśe dvipado yaśchatuṣpadastasmai yamāya namo astu mṛtyave ॥3॥*

अ. (Av.) ६.२९.१-३

अमन् हेतिः पतत्रिणी न्येतु यदुलूको वदति मोघमेतत् । यद् वा कपोतः पदमग्नौ कृणोति ॥१॥
यौ ते दूतौ निर्ऋत इदमेतोऽप्रहितौ प्रहितौ वा गृह नः। कपोतोलूकाभ्यामपदं तदस्तु ॥२॥
अवैरहत्यायेदमा पपत्यात् सुवीरताया इदमा ससद्यात् । पराङेव परा वद पराचीमनु संवतम् यथा यमस्य त्वा गृहेऽरसं प्रतिचाकाशानाभूकं प्रतिचाकशान् ॥३॥
*aman hetiḥ patatriṇī nyetu yadulūko vadati moghametat ।*
*yad vā kapotaḥ padamagnau kṛṇoti ॥1॥*
*yau te dūtau nirṛta idameto'prahitau prahitau vā gṛha naḥ ।*
*kapotolūkābhyāmapadaṁ tadastu ॥2॥*
*avairahatyāyedamā papatyāt suvīratāyā idamā sasadyāt ।*
*parāṅeva parā vada parāchīmanu saṁvatam yathā yamasya tvā gṛhe'rasaṁ*
*pratichākāśānābhūkaṁ pratichākaśān ॥3॥*

१५. वनस्पतिः (Vanaspatiḥ) - अ. (Av.) ३.२४.१-७

पयस्वतीरोषधयः पयस्वन्मामकं वचः । अथो पयस्वतीनामा भरेऽहं सहस्रशः ॥१॥
वेदाहं पयस्वन्तं चकार धान्यं बहु ।
सम्भृत्वा नाम यो देवस्तं वयं हवामहे योयो अयज्वनो गृहे ॥२॥
इमा याः पंच प्रदिशो मानवीः पंच कृष्टयः ।
वृष्टे शापं नदीरिवेह स्फातिं समावहान् ॥३॥
उदुतसं शतधारं सहस्रधारमक्षितम् । एवास्माकेदं धान्यं सहस्रधारमक्षितम् ॥४॥
शतहस्त समाहर सहस्रहस्त सं किर । कृतस्य कार्यस्य चेह स्फातिं समावह ॥५॥

तिस्रो मात्रा गन्धर्वाणां चतस्रो गृहपत्न्याः । तासां या स्फातिमत्तमा तया त्वाभि मृशामसि ॥६॥
उपोहश्च समूहश्च क्षत्तारौ ते प्रजापते । ताविहा वहतां स्फातिं बहुं भूमानमक्षितम् ॥७॥
*payasvatīroṣadhayaḥ payasvanmāmakaṁ vachaḥ ।*
*atho payasvatīnāmā bhare'haṁ sahasraśaḥ ॥1॥*
*vedāhaṁ payasvantaṁ chakāra dhānyaṁ bahu ।*
*sambhṛtvā nāma yo devastaṁ vayaṁ havāmahe yoyo ayajvano gṛhe ॥2॥*
*imā yāḥ paṁcha pradiśo mānavīḥ paṁcha kṛṣṭayaḥ ।*
*vṛṣṭe śāpaṁ nadīriveha sphātiṁ samāvahān ॥3॥*
*udutasaṁ śatadhāraṁ sahasradhāramakṣitam ।*
*evāsmākedaṁ dhānyaṁ sahasradhāramakṣitam ॥4॥*
*śatahasta samāhara sahasrahasta saṁ kira । kṛtasya kāryasya cheha sphātiṁ samāvaha ॥5॥*
*tisro mātrā gandharvāṇāṁ chatasro gṛhapatnyāḥ ।*
*tāsāṁ yā sphātimattamā tayā tvābhi mṛśāmasi ॥6॥*
*upohaścha samūhaścha kṣattārau te prajāpate ।*
*tāvihā vahatāṁ sphātiṁ bahuṁ bhūmānamakṣitam ॥7॥*

१६. वरुणः (Varuṇaḥ) - अ. (Av.) १९.४४.८-९

बह्वी३दं राजन् वरुणानृतमाह पुरुषः । तस्मात् सहस्रवीर्य मुंच नः पर्यंहसः ॥८॥
यदापो अघ्न्या इति वरुणेति यदूचिम । तस्मात् सहस्रवीर्य मुंच नः पर्यंहसः ॥९॥
*bahvī3daṁ rājan varuṇānṛtamāha puruṣaḥ ।*
*tasmāt sahasravīrya muṁcha naḥ paryaṁhasaḥ ॥8॥*
*yadāpo aghnyā iti varuṇeti yadūchima ।*
*tasmāt sahasravīrya muṁcha naḥ paryaṁhasaḥ ॥9॥*

१७. विश्वकर्मा (Viśvakarmā) - अ. (Av.) ६.१२२.१-५

एतं भागं परि ददामि विद्वान् विश्वकर्मन् प्रथमजा ऋतस्य ।
अस्माभिर्दत्तं जरसः परस्तादच्छिन्नं तन्तुमनु सं तरेम ॥१॥
ततं तन्तुमन्वेके तरन्ति येषां दत्तं पित्र्यमायनेन ।
अबन्ध्वेके ददतः प्रयच्छन्तो दातुं चेच्छिक्षान्तस स्वर्ग एव ॥२॥
अन्वारेभथामनुसंरभेथामेतं लोकं श्रद्दधानाः सचन्ते ।
यद् वां पक्वं परिविष्टमग्नौ तस्य गुप्तये दम्पती सं श्रयेथाम् ॥३॥
यज्ञं यन्तं मनसा बृहन्तमन्वारोहामि तपसा सयोनिः ।
उपहूता अग्ने जरसः परस्तात् तृतीये नाके सधमादं मदेम ॥४॥
शुद्धाः पूता योषितो यज्ञिया इमा ब्रह्मणां हस्तेषु प्रपृथक् सादयामि ।
यत्काम इदमभिषिंचामि वोऽहमिन्द्रो मरुत्वान्त्स ददातु तन्मे ॥५॥
*etaṁ bhāgaṁ pari dadāmi vidvān viśvakarman prathamajā ṛtasya ।*
*asmābhirdattaṁ jarasaḥ parastādachchhinnaṁ tantumanu saṁ tarema ॥1॥*
*tataṁ tantumanveke taranti yeṣāṁ dattaṁ pitrayamāyanena ।*
*abandhveke dadataḥ prayachchhanto dātuṁ chechchhikṣāntasa svarga eva ॥2॥*
*anvārebhathāmanusaṁrabhethāmetaṁ lokaṁ śraddadhānāḥ sachante ।*
*yad vāṁ pakvaṁ pariviṣṭamagnau tasya guptaye dampatī saṁ śrayethām ॥3॥*
*yajñaṁ yantaṁ manasā bṛhantamanvārohāmi tapasā sayoniḥ ।*
*upahūtā agne jarasaḥ parastāt tṛtīye nāke sadhamādaṁ madema ॥4॥*
*śuddhāḥ pūtā yoṣito yajñiyā imā brahmaṇāṁ hasteṣu prapṛthak sādayāmi ।*
*yatkāma idamabhiṣiṁchāmi vo'hamindro marutvāntsa dadātu tanme ॥5॥*

१८. विश्वेदेवा (Viśvedevā) - अ. (Av.) ६.१२३.१-५

एतं सधस्थाः परि वो ददामि यं शेवधिमावहाज्जातवेदाः ।
अन्वागन्ता यजमानः स्वस्ति तं स्म जानीत परमे व्योमन् ॥१॥
जानीत स्मैनं परमे व्योमन् देवाः सधस्था विद लोकमत्र ।
अन्वागन्ता यजमानः स्वस्तीष्टापूर्तं स्म कृणुताविरस्मै ॥२॥
देवाः पितरः पितरो देवाः । यो अस्मि सो अस्मि ॥३॥
स पचामि स ददामि स यजे स दत्तान्मा यूषम् ॥४॥

नाके राजन् प्रति तिष्ठ तत्रैतत् प्रति तिष्ठतु । विद्धि पूर्तस्य नो राजन्त्स देव सुमना भव ॥५॥
*etaṁ sadhasthāḥ pari vo dadāmi yaṁ śevadhimāvahājjātavedāḥ ।*
*anvāgantā yajamānaḥ svasti taṁ sma jānīta parame vyoman ॥1॥*
*jānīta smainaṁ parame vyoman devāḥ sadhasthā vida lokamatra ।*
*anvāgantā yajamānaḥ svastīṣṭāpūrtaṁ sma kṛṇutāvirasmai ॥2॥*
*devāḥ pitaraḥ pitaro devāḥ । yo asmi so asmi ॥3॥*
*sa pachāmi sa dadāmi sa yaje sa dattānmā yūṣam ॥4॥*
*nāke rājan prati tiṣṭha tatraitat prati tiṣṭhatu ।*
*viddhi pūrtasya no rājantsa deva sumanā bhava ॥5॥*

१९. सविता (Savitā) - अ. (Av.) ७.१५.१; ७.१६.१

अ. (Av.) ७.१५.१

तां सवितः सत्यसवां सुचित्रामाहं वृणे सुमतिं विश्ववाराम् ।
यामस्य कण्वो अदुहत् प्रपीनां सहस्रधारां महिषो भगाय ॥१॥
*tāṁ savitaḥ satyasavāṁ suchitrāmāhaṁ vṛṇe sumatiṁ viśvavārām ।*
*yāmasya kaṇvo aduhat prapīnāṁ sahasradhārāṁ mahiṣo bhagāya ॥1॥*

अ. (Av.) ७.१६.१

बृहस्पते सवितर्वर्धयैनं ज्योतयैनं महते सौभगाय ।
संशितं चित् संतरं सं शिशाधि विश्व एनमनु मदन्तु देवाः ॥१॥
*bṛhaspate savitarvardhayainaṁ jyotayainaṁ mahate saubhagāya ।*
*saṁśitaṁ chit saṁtaraṁ saṁ śiśādhi viśva enamanu madantu devāḥ ॥1॥*

२०. सिन्धुः आपः वरुणः (Sindhuḥ Āpaḥ Varuṇaḥ) - अ. (Av.) ३.१३.१-७

यददः संप्रयतिरहावनदता हते। तस्मादा नद्यो३ नाम स्थ तावो नामानि सिन्धवः ॥१॥
य त्प्रेषिता वरुणेनाच्छीभं समवल्गत । तदाप्नोदिन्द्रो वो यतीस्तस्मादापो अनु ष्ठन ॥२॥
अपकामं स्यन्दमाना अवीरत वो हि कम् ।
इन्द्रो वः शक्तिभिर्देवीस्तस्माद् वार्नाम वो हितम् ॥३॥
एको वो देवेऽप्यतिष्ठत् स्यन्दमाना यथावशम् ।
उदानिषुर्महीरिति तस्मादुदकमुच्यते ॥४॥
आपो भद्रा घृतमिदाप आसन्नग्नीषोमौ बिभ्रत्याप इत् ताः ।
तीव्रो रसो मधुपृचारमरंगम आ मा प्राणेन सह वर्चसा गमेत् ॥५॥
आदित् पश्याम्युतवा श्रृणोम्यामा घोषो गच्छति वाङ् मासाम् ।
मन्ये भेजानो अमृतस्य तर्हि हिरण्वर्णा अतृपं यदा वः ॥६॥
इदं व आपो हृदयमयं वत्स ऋतावरीः । इहेत्थमेत शक्करीर्यत्रेदं वेशयामि वः ॥७॥
*yadadaḥ saṁprayatirahāvanadatā hate ।*
*tasmādā nadyo3 nāma stha tāvo nāmāni sindhavaḥ ॥1॥*
*ya tpreṣitā varuṇenāchchhībhaṁ samavalgata ।*
*tadāṣnodindro vo yatīstasmādāpo anu ṣṭhana ॥2॥*
*apakāmaṁ syandamānā avīrata vo hi kam ।*
*indro vaḥ śaktibhirdevīstasmād vārnāma vo hitam ॥3॥*
*eko vo deve'pyatiṣṭhat syandamānā yathāvaśam ।*
*udāniṣurmahīriti tasmādudakamuchyate ॥4॥*
*āpo bhadrā ghṛtamidāpa āsannagnīṣomau bibhratyāpa it tāḥ ।*
*tīvro raso madhupṛchāramaraṁgama ā mā prāṇena saha varchasā gamet ॥5॥*
*ādit paśyāmyutavā śṛṇomyāmā ghoṣo gachchhati vāṅ māsām ।*
*manye bhejāno amṛtasya tarhi hiraṇvarṇā atṛpaṁ yadā vaḥ ॥6॥*
*idaṁ va āpo hṛdayamayaṁ vatsa ṛtāvarīḥ । i*
*hetthameta śakvarīryatredaṁ veśayāmi vaḥ ॥7॥*

## ४७२. भृगुः (आयुष्कामः) (Bhṛguḥ (Āyuṣkāmaḥ))

१. दर्भः (Darbhaḥ) - अ. (Av.) १९.३२.१-१०; १९.३३.१-५

अ. (Av.) १९.३२.१-१०

शतकाण्डो दुश्च्यवनः सहस्रपर्ण उत्तिरः। दर्भो य उग्र आषिधिस्तं ते बध्नाम्यायुषे ॥१॥
नास्य केशान् प्र वपन्ति नोरसि ताडमा घ्नते। यस्मा अच्छिन्नपर्णेन दर्भेण शर्म यच्छति ॥२॥
दिवि ते तूलमोषधे पृथिव्यामसि निष्ठितः। त्वया सहस्रकाण्डेनायुः प्र वर्धयामहे ॥३॥
तिस्रो दिवो अत्यतृणत् तिस्र इमाः पृथिवीरुत। त्वयाहं दुर्हार्दो जिह्वां नि तृणद्मि वचांसि ॥४॥
त्वमसि सहमानोऽहमस्मि सहस्वान्। उभौ सहस्वन्तौ भूत्वा सपत्नान् सहिषीमहि ॥५॥
सहस्व नो अभिमातिं सहस्व पृतनायतः। सहस्व सर्वान् दुर्हार्दः सुर्हार्दो मे बहून् कृधि ॥६॥
दर्भेण देवजातेन दिवि ष्टम्भेन शश्वदित्। तेनाहं शश्वतो जनाँ असनं सनवानि च ॥७॥
प्रियं मा दर्भ कृणु ब्रराजन्याभ्यां शुद्राय चार्याय च। यस्मै च कामयामहे सर्वस्मै च विपश्य ॥८॥
यो जायमानः पृथिवीमदृंहद् यो अस्तभ्नादन्तरिक्षं दिवं च ।
यं बिभ्रतं ननु पाप्मा विवेद स नोऽयं दर्भो वरुणो दिवा कः ॥९॥
सपत्नहा शतकाण्डः सहस्वानोषधीनां प्रथमः सं बभूव ।
स नोऽयं दर्भः परि पातु विश्वतस्तेन साक्षीय पृतनाः पृतन्यतः ॥१०॥

*śatakāṇḍo duśchyavanaḥ sahasraparṇa uttiraḥ /*
*darbho ya ugra āṣidhistaṁ te badhnāmyāyuṣe //1 //*
*nāsya keśān pra vapanti norasi tāḍamā ghnate /*
*yasmā achchhinnaparṇena darbheṇa śarma yachchhati //2 //*
*divi te tūlamoṣadhe pṛthivyāmasi niṣṭhitaḥ /*
*tvayā sahasrakāṇḍenāyuḥ pra vardhayāmahe //3 //*
*tisro divo atyatṛṇat tisra imāḥ pṛthivīruta /*
*tvayāhaṁ durhārdo jihvāṁ ni tṛṇadmi vachāṁsi //4 //*
*tvamasi sahamāno'hamasmi sahasvān /*
*ubhau sahasvantau bhūtvā sapatnān sahiṣīmahi //5 //*
*sahasva no abhimātiṁ sahasva pṛtanāyataḥ /*
*sahasva sarvān durhārdaḥ surhārdo me bahūn kṛdhi //6 //*
*darbheṇa devajātena divi ṣṭambhena śaśvadit /*
*tenāhaṁ śaśvato janām̐ asanaṁ sanavāni cha //7 //*
*priyaṁ mā darbha kṛṇu brarājanyābhyāṁ śudrāya chāryāya cha /*
*yasmai cha kāmayāmahe sarvasmai cha vipaśya //8 //*
*yo jāyamānaḥ pṛthivīmadṛṁhad yo astabhnādantarikṣaṁ divaṁ cha /*
*yaṁ bibhrataṁ nanu pāpmā viveda sa no'yaṁ darbho varuṇo divā kaḥ //9 //*
*sapatnahā śatakāṇḍaḥ sahasvānoṣadhīnāṁ prathamaḥ saṁ babhūva /*
*sa no'yaṁ darbhaḥ pari pātu viśvatastena sākṣīya pṛtanāḥ pṛtanyataḥ //10 //*

अ. (Av.) १९.३३.१-५

सहस्रार्घः शतकाण्डः पयस्वानपामग्निर्वीरुधां राजसूयम्।
स नोऽयं दर्भः परि पातु विश्वतो देवो मणिरायुषा सं सृजाति नः ॥१॥
घृतादुल्लुप्तो मधुमान् पयस्वान् भूमिदृंहोऽच्युतश्च्यावयिष्णुः ।
नुदन्त्सपत्नानधरांश्च कृण्वन् दर्भा रोह महतामिन्द्रियेण ॥२॥
त्वं भूमिमत्येष्योजसा त्वं वेद्यां सीदसि चारुरध्वरे ।
त्वां पवित्रमृषयोऽभरन्त त्वं पुनीहि दुरितान्यस्मत् ॥३॥
तीक्ष्णो राजा विषासही रक्षोहा विश्वचर्षणिः ।
ओजो देवानां बलमुग्रमेतत् तं ते बध्नामि जरसे स्वस्तये ॥४॥
दर्भेण त्वं कृणवद् वीर्याणि दर्भं बिभ्रदात्मना मा व्यथिष्ठाः ।
अतिष्ठाया वर्चसाधान्यान्सूर्यइवा भाहि प्रदिशश्चतस्रः ॥५॥

*sahasrārghaḥ śatakāṇḍaḥ payasvānapāmagnirvīrudhāṁ rājasūyam /*
*sa no'yaṁ darbhaḥ pari pātu viśvato devo maṇirāyuṣā saṁ sṛjāti naḥ //1 //*
*ghṛtādullupto madhumān payasvān bhūmidṛṁho'chyutaśchyāvayiṣṇuḥ /*
*nudantsapatnānadharāṁścha kṛṇvan darbhā roha mahatāmindriyeṇa //2 //*
*tvaṁ bhūmimatyeṣyojasā tvaṁ vedyāṁ sīdasi chāruradhvare /*
*tvāṁ pavitramṛṣayo'bharanta tvaṁ punīhi duritānyasmat //3 //*
*tīkṣaṇo rājā viṣāsahī rakṣohā viśvacharṣaṇiḥ /*

*ojo devānāṁ balamugrametat taṁ te badhnāmi jarase svastaye ॥4॥*
*darbheṇa tvaṁ kṛṇavad vīryāṇi darbhaṁ bibhradātmanā mā vyathiṣṭhāḥ ।*
*atiṣṭhāyā varchasādhānyānsūryaivā bhāhi pradiśaśchatasraḥ ॥5॥*

## ४७३. भृगुर्वारुणिर् जमदग्निर् भार्गवो वा (Bhṛgṛrvāruṇir Jamadagnir Bhārgavo Vā)

१. पवमानःसोमः (Pavamānaḥsomaḥ) - सा. (Sv.) ४६९; ४८०; ४९८; ५०३; ७८४-८६; ८०३-८०५; ८३३-३५; ९०४-९०६; ९९४-९६; ११३७-३९; ११६३-११६५

सा. (Sv.) ४६९

वृषा पवस्व धारया मरुत्वते च मत्सरः। विश्वा दधान ओजसा ॥३॥
*vṛṣā pavasva dhārayā marutvate cha matsaraḥ । viśvā dadhāna ojasā ॥3॥*

सा. (Sv.) ४८०

वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे। पवमान स्वर्दृशम् ॥४॥
*vṛṣā hyasi bhānunā dyumantaṁ tvā havāmahe । pavamāna svardṛśam ॥4॥*

सा. (Sv.) ४९८

आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे। पान्तमा पुरुस्पृहम् ॥२॥
*ā te dakṣaṁ mayobhuvaṁ vahnimadyā vṛṇīmahe । pāntamā puruspṛham ॥2॥*

सा. (Sv.) ५०३

अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत्। सीदन्योनौ वनेष्वा ॥७॥
*arṣā soma dyumattamo'bhi droṇāni roruvat । sīdanyonau vaneṣvā ॥7॥*

सा. (Sv.) ७८४-८६

वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे। पवमान स्वर्दृशम् ॥१॥
यदद्भिः परिषिच्यसे मर्मृज्यमान आयुभिः। द्रोणे सधस्थमश्नुषे ॥२॥
आ पवस्व सुवीर्यं मन्दमानः स्वायुध। इहो ष्विन्दवा गहि ॥३॥
*vṛṣā hyasi bhānunā dyumantaṁ tvā havāmahe । pavamāna svardṛśam ॥1॥*
*yadadbhiḥ pariṣichyase marmṛjyamāna āyubhiḥ । droṇe sadhasthamaśnuṣe ॥2॥*
*ā pavasva suvīryaṁ mandamānaḥ svāyudha । iho ṣvindavā gahi ॥3॥*

सा. (Sv.) ८०३-८०५

वृषा पवस्व धारया मरुत्वते च मत्सरः। विश्वा दधान ओजसा ॥१॥
तं त्वा धर्त्तारमोण्यो३: पवमान स्वर्दृशम् । हिन्वे वाजेषु वाजिनम् ॥२॥
अया चित्तो विपानया हरिः पवस्व धारया। युजं वाजेषु चोदय ॥३॥
*vṛṣā pavasva dhārayā marutvate cha matsaraḥ । viśvā dadhāna ojasā ॥1॥*
*taṁ tvā dharttāramoṇyo3: pavamāna svardṛśam । hinve vājeṣu vājinam ॥2॥*
*ayā chitteā vipānayā hariḥ pavasva dhārayā । yujaṁ vājeṣu chodaya ॥3॥*

सा. (Sv.) ८३३-३५

राजा मेधाभिरीयते पवमानो मनावधि। अन्तरिक्षेण यातवे ॥१॥
आ नः सोम सहो जुवो रूपं न वर्चसे भर। सुष्वाणो देववीतये ॥२॥
आ न इन्द्रो शातग्विनं गवां पोषं स्वश्वयम्। वहा भगत्तिमूतये ॥३॥
*rājā medhābhirīyate pavamāno manāvadhi । antarikṣeṇa yātave ॥1॥*
*ā naḥ soma saho juvo rūpaṁ na varchase bhara । suṣvāṇo devavītaye ॥2॥*
*ā na indro śātagvinaṁ gavāṁ poṣaṁ svaśvayam । vahā bhagattimūtaye ॥3॥*

सा. (Sv.) ९०४-९०६

हिन्वन्ति सूरमुस्रयः स्वसारो जामयस्पतिम्। महामिन्दुं महीयुवः ॥१॥
पवमान रुचारुचा देव देवेभ्यः सुतः। विश्वा वसून्या विश ॥२॥
आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः। इषे पवस्व संयतम् ॥३॥
*hinvanti sūramusrayaḥ svasāro jāmayaspatim । mahāminduṁ mahīyuvaḥ ॥1॥*
*pavamāna ruchāruchā deva devebhyaḥ sutaḥ । viśvā vasūnyā viśa ॥2॥*
*ā pavamāna suṣṭutiṁ vṛṣṭiṁ devebhyo duvaḥ । iṣe pavasva saṁyatam ॥3॥*

सा. (Sv.) ९९४-९६

अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत्। सीदन्योनौ वनेष्वा ॥१॥
अप्सा इन्द्राय वायवे वरुणाय वरुद्भयः। सोमा अर्षन्तु विष्णवे ॥२॥
इषं तोकाय नो दधदस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणम् ॥३॥
*arṣā soma dyumattamo'bhi droṇāni roruvat / sīdanyonau vaneṣvā //1 //*
*apsā indrāya vāyave varuṇāya varudbhayaḥ / somā arṣantu viṣṇave //2 //*
*iṣaṁ tokāya no dadhadasmabhyaṁ soma viśvataḥ / ā pavasva sahasriṇam //3 //*

सा. (Sv.) ११३७-३९

आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे। पान्तमा पुरुस्पृहम् ॥१०॥
आ मन्द्रमा वरेण्यमा विप्रमा मनीषिणम्। पान्तमा पुरुस्पृहम् ॥११॥
आ रयिमा सुचेतुनमा सुक्रतो तनूष्वा। पान्तमा पुरुस्पृहम् ॥१२॥
*ā te dakṣaṁ mayobhuvaṁ vahnimadyā vṛṇīmahe / pāntamā puruspṛham //10 //*
*ā mandramā vareṇyamā vipramā manīṣiṇam / pāntamā puruspṛham //11 //*
*ā rayimā suchetunamā sukrato tanūṣvā / pāntamā puruspṛham //12 //*

सा. (Sv.) ११६३-११६५

ये सोमासः परावति ये अर्वावति सुन्विरे। ये वादः शर्यणावति ॥१॥
य आर्जीकेषु कृत्वसु ये मध्ये पस्त्यानाम्। ये वा जनेषु पंचसु ॥२॥
ते नो वृष्टिं दिवस्परि पवन्तामा सुवीर्यम्। स्वाना देवास इन्दवः ॥३॥
*ye somāsaḥ parāvati ye arvāvati sunvire / ye vādaḥ śaryaṇāvati //1 //*
*ya ārjīkeṣu kṛtvasu ye madhye pastyānām / ye vā janeṣu paṁchasu //2 //*
*te no vṛṣṭiṁ divaspari pavantāmā suvīryam / svānā devāsa indavaḥ //3 //*

## ४७४. भृगुर्वारुणिः जमदग्निर्भार्गवो वा (Bhṛgurvāruṇiḥ Jamadagnirbhārgavo Vā)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.६५.१-३०

हिन्वन्ति सूरमुस्रयः स्वसारो जामयस्पतिम् महामिन्दुं महीयुवः ॥१॥
पवमान रुचारुचा देवो देवेभ्यस्परि। विश्वा वसून्या विश ॥२॥
आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः। इषे पवस्व संयतम् ॥३॥
वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे। पवमान स्वाध्यः ॥४॥
आ पवस्व सुवीर्यं मन्दमानः स्वायुध। इहो ष्विन्दवा गहि ॥५॥
यदद्भिः परिषिच्यसे मृज्यमानो गभस्त्योः। द्रुणा सधस्थमश्नुषे ॥६॥
प्र सोमाय व्यश्ववत्पवमानाय गायत। महे सहस्रचक्षसे ॥७॥
यस्य वर्णं मधुश्चुतं हरिं हिन्वन्त्यद्रिभिः। इन्दुमिन्द्राय पीतये ॥८॥
तस्य ते वाजिनो वयं विश्वा धनानि जिग्युषः सखित्वमा वृणीमहे ॥९॥
वृषा पवस्व धारया मरुत्वते च मत्सरः। विश्वा दधान ओजसा ॥१०॥
तं त्वा धर्तारमोण्यो३: पवमान स्वर्दृशम् । हिन्वे वाजेषु वाजिनम् ॥११॥
अया चित्तो विपानया हरिः पवस्व धारया। युजं वाजेषु चोदय ॥१२॥
आ न इन्दो महीमिषं पवस्व विश्वदर्शतः। अस्मभ्यं सोमगातुवित् ॥१३॥
आ कलशा अनूषतेन्दो धाराभिरोजसा। एन्द्रस्य पीतये विश ॥१४॥
यस्य ते मद्यं रसं तीव्रं दुहन्त्यद्रिभिः। स पवस्वाभिमातिहा ॥१५॥
राजा मेधाभिरीयते पवमानो मनावधि। अन्तरिक्षेण यातवे ॥१६॥
आ न इन्दो शतग्विनं गवां पोषं स्वश्व्यम्। वहा भगत्तिमूतये ॥१७॥
आ नः सोम सहो जुवो रूपं न वर्चसे भर। सुष्वाणो देववीतये ॥१८॥
अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत्। सीदंछ्येनो न योनिमा ॥१९॥
अप्सा इन्द्राय वायवे वरुणाय मरुद्भ्यः। सोमो अर्षति विष्णवे ॥२०॥
इषं तोकाय नो दधदस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणम् ॥२१॥
ये सोमासः परावति ये अर्वावति सुन्विरे। ये वादः शर्यणावति ॥२२॥
य आर्जीकेषु कृत्वसु ये मध्ये पस्त्यानाम्। ये वा जनेषु पंचसु ॥२३॥
ते नो वृष्टिं दिवस्परि पवन्तामा सुवीर्यम्। सुवाना देवास इन्दवः ॥२४॥

पवते हर्यतो हरिर्गृणानो जमदग्निना। हिन्वानो गोरधि त्वचि ॥२५॥
प्र शुक्रासो वयोजुवो हिन्वानासो न सप्तयः। श्रीणाना अप्सु मृंजत ॥२६॥
तं त्वा सुतेष्वाभुवो हिन्विरे देवतातये। स पवस्वानया रुचा ॥२७॥
आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे। पान्तमा पुरुस्पृहम् ॥२८॥
आ मन्द्रमा वरेण्यमा विप्रमा मनीषिणम्। पान्तमा पुरुस्पृहम् ॥२९॥
आ रयिमा सुचेतुनमा सुक्रतो तनूष्वा। पान्तमा पुरुस्पृहम् ॥३०॥
*hinvanti sūramusrayaḥ svasāro jāmayaspatim mahāminduṁ mahīyuvaḥ ॥1॥*
*pavamāna ruchāruchā devo devebhyaspari । viśvā vasūnyā viśa ॥2॥*
*ā pavamāna suṣṭutiṁ vṛṣṭiṁ devebhyo duvaḥ । iṣe pavasva saṁyatam ॥3॥*
*vṛṣā hyasi bhānunā dyumantaṁ tvā havāmahe । pavamāna svādhyaḥ ॥4॥*
*ā pavasva suvīryaṁ mandamānaḥ svāyudha । iho ṣvindavā gahi ॥5॥*
*yadadbhiḥ pariṣichyase mṛjyamāno gabhastyoḥ । druṇā sadhasthamaśnuṣe ॥6॥*
*pra somāya vyaśvavatpavamānāya gāyata । mahe sahasrachakṣase ॥7॥*
*yasya varṇaṁ madhuśchutaṁ hariṁ hinvantyadribhiḥ । indumindrāya pītaye ॥8॥*
*tasya te vājino vayaṁ viśvā dhanāni jigyuṣaḥ sakhitvamā vṛṇīmahe ॥9॥*
*vṛṣā pavasva dhārayā marutvate cha matsaraḥ । viśvā dadhāna ojasā ॥10॥*
*taṁ tvā dhartāramoṇyo3: pavamāna svardṛśam । hinve vājeṣu vājinam ॥11॥*
*ayā chitto vipānayā hariḥ pavasva dhārayā । yujaṁ vājeṣu chodaya ॥12॥*
*ā na indo mahīmiṣaṁ pavasva viśvadarśataḥ । asmabhyaṁ somagātuvit ॥13॥*
*ā kalaśā anūṣatendo dhārābhirojasā । endrasya pītaye viśa ॥14॥*
*yasya te madyaṁ rasaṁ tīvraṁ duhantyadribhiḥ । sa pavasvābhimātihā ॥15॥*
*rājā medhābhirīyate pavamāno manāvadhi । antarikṣeṇa yātave ॥16॥*
*ā na indo śatagvinaṁ gavāṁ poṣaṁ svaśvyam । vahā bhagattimūtaye ॥17॥*
*ā naḥ soma saho juvo rūpaṁ na varchase bhara । suṣvāṇo devavītaye ॥18॥*
*arṣā soma dyumattamo'bhi droṇāni roruvat । sīdaṁchhyeno na yonimā ॥19॥*
*apsā indrāya vāyave varuṇāya marudbhyaḥ । somo arṣati viṣṇave ॥20॥*
*iṣaṁ tokāya no dadhadasmabhyaṁ soma viśvataḥ । ā pavasva sahasriṇam ॥21॥*
*ye somāsaḥ parāvati ye arvāvati sunvire । ye vādaḥ śaryaṇāvati ॥22॥*
*ya ārjīkeṣu kṛtvasu ye madhye pastyānām । ye vā janeṣu paṁchasu ॥23॥*
*te no vṛṣṭiṁ divaspari pavantāmā suvīryam । suvānā devāsa indavaḥ ॥24॥*
*pavate haryato harirgṛṇāno jamadagninā । hinvāno goradhi tvachi ॥25॥*
*pra śukrāāso vayojuvo hinvānāso na saptayaḥ । śrīṇānā apsu mṛṁjata ॥26॥*
*taṁ tvā suteṣvābhuvo hinvire devatātaye । sa pavasvānayā ruchā ॥27॥*
*ā te dakṣaṁ mayobhuvaṁ vahnimadyā vṛṇīmahe । pāntamā puruspṛham ॥28॥*
*ā mandramā vareṇyamā vipramā manīṣiṇam । pāntamā puruspṛham ॥29॥*
*ā rayimā suchetunamā sukrato tanūṣvā । pāntamā puruspṛham ॥30॥*

## ४७५. भृग्वङ्गिरा (Bhṛgvaṅgirā)

१. अनड्वान् इन्द्ररुपः (Anaḍvān Indrarupaḥ) - अ. (Av.) ४.११.१-१२

अनड्वान् दाधार पृथिवीमुत द्यामनड्वान् दाधारोर्व१न्तरिक्षम् ।
अनड्वान् दाधार प्रदिशः षडुर्वीरनड्वान् विश्वं भुवनमा विवेश ॥१॥
अनड्वानिन्द्रः स पशुभ्यो वि चष्टे त्रयांछक्रो वि मिमीते अध्वनः ।
भूतं भविष्यद् भुवना दुहानः सर्वा देवानां चरति व्रतानि ॥२॥
इन्द्रो जातो मनुष्येष्वन्तर्घर्मस्तप्तश्चरति शोशुचानः ।
सुप्रजाः सन्त्स उदारे न सर्षद यो नाश्नीयादनडुहो विजानन् ॥३॥
अनड्वान् दुहे सुकृतस्य लोक एनं प्याययति पवमानः पुरस्तात् ।
पर्जन्यो धारा मरुत ऊधो अस्य यज्ञः पयो दक्षिणा दोहो अस्य ॥४॥
यस्य नेशे यज्ञपतिर्न यज्ञो नास्य दातेशे न प्रतिग्रहीता ।
यो विश्वजिद् विश्वभृद् विश्वकर्मा घर्मं नो ब्रूत यतमश्चतुष्पात् ॥५॥
येन देवाः स्वरारुरुहुर्हित्वा शरीरममृतस्य नाभिम् ।
तेन गेष्म सुकृतस्य लोकं घर्मस्य व्रतेन तपसा यशस्यवः ॥६॥
इन्द्रो रूपेणाग्निर्वहेन प्रजापतिः परमेष्ठी विराट् ।

विश्वानरे अक्रमत वैश्वानरे अक्रमतानडुह्यक्रमत। सोऽदृंहयत सोऽधारयत ॥७॥
मध्यमेतदनडुहो यत्रैष वह आहितः। एतावदस्य प्राचीनं यावान् प्रत्यङ् समाहितः ॥८॥
यो वेदानडुहो दोहान्त्सप्तानुपदस्वतः। प्रजां च लोकं चाप्नोति तथा सप्तऋषयो विदुः ॥९॥
पद्भिः सेदिमवक्रामन्निरां जंघाभिरुत्खिदन्। श्रमेणानड्वान् कीलालं कीनाशश्चाभि गच्छतः ॥१०॥
द्वादश वा एता रात्रीर्व्रत्या आहुः प्रजापतेः। तत्रोप ब्रह्म यो वेद तद् वा अनडुहो व्रतम् ॥११॥
दुहे सायं दुहे प्रातर्दुहे मध्यन्दिनं परि। दोहा ये अस्य संयन्ति तान् विद्मानुपदस्वतः ॥१२॥
*anaḍvān dādhāra pṛthivīmuta dyāmanaḍvān dādhārorva1ntarikṣam ।*
*anaḍvān dādhāra pradiśaḥ ṣaḍurvīranaḍvān viśvaṁ bhuvanamā viveśa ॥1॥*
*anaḍvānindraḥ sa paśubhyo vi chaṣṭe trayāṁchhakro vi mimīte adhvanaḥ ।*
*bhūtaṁ bhaviṣyad bhuvanā duhānaḥ sarvā devānāṁ charati vratāni ॥2॥*
*indro jāto manuṣyeṣvantargharmastaptaścharati śośuchānaḥ ।*
*suprajāḥ santsa udāre na sarṣada yo nāśnīādanaḍuho vijānan ॥3॥*
*anaḍvān duhe sukṛtasya loka enaṁ pyāyayati pavamānaḥ purastāt ।*
*parjanyo dhārā maruta ūdho asya yajñaḥ payo dakṣiṇā doho asya ॥4॥*
*yasya neśe yajñapatirna yajño nāsya dāteśe na pratigrahītā ।*
*yo viśvajid viśvabhṛd viśvakarmā gharmaṁ no brūta yatamaśchatuṣpāt ॥5॥*
*yena devāḥ svarāruruhurhitvā śarīramamṛtasya nābhim ।*
*tena geṣma sukṛtasya lokaṁ gharmasya vratena tapasā yaśasyavaḥ ॥6॥*
*indro rūpeṇāgnirvahena prajāpatiḥ parameṣṭhī virāṭ ।*
*viśvānare akramata vaiśvānare akramatānaḍuhyakramata । so'dṛṁhayata so'dhārayata ॥7॥*
*madhyametadanaḍuho yatraiṣa vaha āhitaḥ ।*
*etāvadasya prāchīnaṁ yāvān pratyaṅ samāhitaḥ ॥8॥*
*yo vedānaḍuho dohāntsaptānupadasvataḥ ।*
*prajāṁ cha lokaṁ chāpnoti tathā saptarṣayo viduḥ ॥9॥*
*padbhiḥ sedimavakrāmannirāṁ jaṁghābhirutkhidan ।*
*śrameṇānaḍvān kīlālaṁ kīnāśaśchābhi gachchhataḥ ॥10॥*
*dvādaśa vā etā rātrīrvratyā āhuḥ prajāpateḥ ।*
*tatropa brahma yo veda tad vā anaḍuho vratam ॥11॥*
*duhe sāyaṁ duhe prātarduhe madhyandinaṁ pari ।*
*dohā ye asya saṁyanti tān vidmānupadasvataḥ ॥12॥*

२. आपः (Āpaḥ) - अ. (Av.) ३.७.५; ६.९१.३

अ. (Av.) ३.७.५

आप इद् वा उ भेषजीरापो अमीवचातनीः। आपो विश्वस्य भेषजीस्तास्त्वा मुंचन्तु क्षेत्रियात्॥५॥
*āpa id vā u bheṣajīrāpo amīvachātanīḥ ।*
*āpo viśvasya bheṣajīstāstvā muṁchantu kṣetriyāt ॥5॥*

अ. (Av.) ६.९१.३

आप इद् वा उ भेषजीरापो अमीवचातनीः। आपो विश्वस्य भेषजीस्तास्ते कृण्वन्तु भेषजम् ॥३॥
*āpa id vā u bheṣajīrāpo amīvachātanīḥ । āpo viśvasya bheṣajīstāste kṛṇvantu bheṣajam ॥3॥*

३. इन्द्रः (Indraḥ) - अ. (Av.) ७.३१.१; ७.९३.१

अ. (Av.) ७.३१.१

इन्द्रोतिभिर्बहुलभिर्नो अद्य यावच्छ्रेष्ठाभिर्मघवंछूर जिन्वा ।
यो नो द्वेष्ट्यधरः सस्पदीष्ट यमु द्विष्मस्तमु प्राणो जहातु ॥१॥
*indrotibhirbahulabhirno adya yāvachchhreṣṭhābhirmaghavaṁchhūra jinvā ।*
*yo no dveṣṭyadharaḥ saspadīṣṭa yamu dviṣmastamu prāṇo jahātu ॥1॥*

अ. (Av.) ७.९३.१

इन्द्रेण मन्युना वयमभि ष्याम पृतन्यतः। घ्नन्तो वृत्राण्यप्रति ॥१॥
*indreṇa manyunā vayamabhi ṣyāma pṛtanyataḥ । ghnanto vṛtrāṇyaprati ॥1॥*

४. इन्द्राग्नी आयुः यक्ष्मनाशनम् (Indrāgnī Āyuḥ Yakṣamanāśanam) - अ. (Av.) ३.११.१-८

मुंचामि त्वा हविषा जीवनाय कमज्ञातयक्ष्मादुत राजयक्ष्मात् ।

ग्राहिर्जग्राह यद्येतदेनं तस्या इन्द्राग्नी प्र मुमुक्तमेनम् ॥१॥
यदि क्षितायुर्यदि वा परेतोयदि मृत्योरन्तिकं नीत एव ।
तमा हरामि निर्ऋतेरुपस्थदास्पार्षमेनम् शतशारदाय ॥२॥
सहस्राक्षेण शतवीर्येण शतायुषा हविषाहार्षमेनम् ।
इन्द्रो यथैनं शरदो नयात्यति विश्वस्य दुरितस्य पारम् ॥३॥
शतं जीव शरदो वर्धमानः शतं हेमन्तांछतमुवसन्तान् ।
शतं त इन्द्रो अग्निः सविता बृहस्पतिः शतायुषा हविषाहार्षमेनम् ॥४॥
प्र विशतं प्राणापानावनड्वाहाविव व्रजम् । व्य१न्ये यन्तु मृत्यवो यानाहुरितरांदतम् ॥५॥
इहैव स्तं प्राणापानौ माप गातमितो युवम् । शरीरमस्यांगानि जरसे वहतं पुनः ॥६॥
जरायै त्वा परि ददामि जरायै नि धुवामि त्वा ।
जरा त्वा भद्रा नेष्ट व्य१न्ये यन्तु मृत्यवो यानाहुरितरांछतम् ॥७॥
अभि त्वा जरिमाहित गामुक्षण्मिव रज्ज्वा । यस्त्वा मृत्युरभ्यधत्त जायमानं सुपाशया ।
तं ते सत्यस्य हस्ताभ्यामुदमुंचद् बृहस्पतिः ॥८॥
*mumchāmi tvā haviṣā jīvanāya kamajñātayakṣamāduta rājayakṣamāt ।*
*grāhirjagrāha yadyetadenaṁ tasyā indrāgnī pra mumuktamenam ॥1॥*
*yadi kṣitāyuryadi vā paretoyadi mṛtyorantikaṁ nīta eva ।*
*tamā harāmi nirṛterupasthadāspārṣamenam śataśāradāya ॥2॥*
*sahasrākṣeṇa śatavīryeṇa śatāyuṣā haviṣāhārṣamenam ।*
*indro yathainaṁ śarado nayātyati viśvasya duritasya pāram ॥3॥*
*śataṁ jīva śarado vardhamānaḥ śataṁ hemantāṁchhatamuvasantān ।*
*śataṁ ta indro agniḥ savitā bṛhaspatiḥ śatāyuṣā haviṣāhārṣamenam ॥4॥*
*pra viśataṁ prāṇāpānāvanaḍvāhāviva vrajam ।*
*vya1nye yantu mṛtyavo yānāhuritarāṁdatam ॥5॥*
*ihaiva staṁ prāṇāpānau māpa gātamito yuvam ।*
*śarīramasyāṁgāni jarase vahataṁ punaḥ ॥6॥*
*jarāyai tvā pari dadāmi jarāyai ni dhuvāmi tvā ।*
*jarā tvā bhadrā neṣṭa vya1nye yantu mṛtyavo yānāhuritarāṁchhatam ॥7॥*
*abhi tvā jarimāhita gāmukṣaṇmiva rajjvā ।*
*yastvā mṛtyurabhyadhatta jāyamānaṁ supāśayā ।*
*taṁ te satyasya hastābhyāmudamuṁchad bṛhaspatiḥ ॥8॥*

५. इन्द्रः वनस्पतिः परसेनाहननं च (Indraḥ Vanaspatiḥ Parasenāhananaṁ Cha) - अ. (Av.) ८.८.१-२४

इन्द्रो मन्थतु मन्थिता शक्रः शूरः पुरंदरः । यथा हनाम सेना अमित्राणां सहस्रशः ॥१॥
पूतिरज्जुरुपध्मानी पूतिं सेनां कृणोत्वमूम् । धूममग्निं परादृश्यामित्रा हृत्स्वा दधतां भयम् ॥२॥
अमूनश्वत्थ निः श्रृणीहि खादामून् खदिराजिरम् ताजद्भंगइव भज्यन्तां हन्त्वेनान् वधको वधैः ॥३॥
परुषानमून्परुषाह्वः कृणोतु हन्त्वेनान् वधको वधैः ।
क्षिप्रं शरइव भज्यन्तां बृहज्जालेन संदिताः ॥४॥
अन्तरिक्षं जालमासीज्जालदण्डा दिशो महीः । तेनाभिधाय दस्यूनां शक्रः सेनामपावपत् ॥५॥
बृहद्धि जालं बृहतः शक्रस्य वाजिनीवतः ।
तेन शत्रूनभि सर्वान् न्युब्ज यथा न मुच्यातै कतमश्चनैषाम् ॥६॥
बृहत् ते जालं बृहत इन्द्र शूर सहस्रार्घस्य शतवीर्यस्य ।
तेन शतं सहस्रमयुतं न्यर्बुदं जघान शक्रो दस्यूनामभिधाय सेनया ॥७॥
अयं लोको जालमासीच्छक्रस्य महतो महान् ।
तेनाहमिन्द्रजालेनामूंस्तमसाभि दधामि सर्वान् ॥८॥
सेदिरुग्रा व्यृद्धिरार्तिश्चानपवाचना । श्रमस्तन्द्रीश्च मोहश्च तैरमूनभि दधामि सर्वान् ॥९॥
मृत्यवेऽमून् प्र यच्छामि मृतयूपाशैरमी सिताः ।
मृत्योर्ये अघला दूतास्तेभ्य एनान् प्रति नयामि बद्ध्वा ॥१०॥
नयतामून् मृत्युदूता यमदूता अपोम्भत । परः सहस्रा हन्यन्तां तृणेढ्वेनान् मत्यं भवस्य ॥११॥
साध्या एकं जालदण्डमुद्यत्य यन्त्योजसा । रुद्रा एकं वसव एकमादित्यैरेक उद्यतः ॥१२॥

विश्वे देवा उपरिष्टादुब्जन्तो यन्त्वोजसा । मध्येन घ्नन्तो यन्तु सेनामंगिरसो महीम् ॥१३॥
वनस्पतीन् वानस्पत्यानोषधीरुत वीरुधः । द्विपाच्चतुष्पादिष्णामि यथा सेनाममूं हनन् ॥१४॥
गन्धर्वाप्सरसः सर्पान् देवान् पुण्यजनान् पितृन् ।दृष्टानदृष्टानिष्णामि यथा सेनाममूं हनन् ॥१५॥
इम उप्ता मृत्युपाशा यानाक्रम्य न मुच्यसे । अमुष्या हन्तु सेनाया इदं कूटं सहस्रशः ॥१६॥
घर्मः समिद्धो अग्निनायं होमः सहस्रहः । भवश्च पृश्निबाहुश्च शर्व सेनाममूं हतम् ॥१७॥
मृत्योराष्मा पद्यनतां क्षुधं सेदिं वधं भयम् । इन्द्रश्चक्षुजालाभ्यां शर्व सेनाममूं हतम् ॥१८॥
पराजिताः प्र त्रसतामित्रा नुत्ता धावत ब्रह्मणा। बृहस्पतिप्रणुत्तानां ममीषां मोचि कश्चन ॥१९॥
अव पद्यन्तामेषामायुधानि मा शकन् प्रतिधामिषुम्। अथैषां बहु बिभ्यतामिषवो घ्नन्तु मर्मणि॥२०॥
सं क्रोशतामेनान् द्यावापृथिवी समन्तरिक्षं सह देवताभिः ।
मा ज्ञातारं मा प्रतिष्ठां विदन्त मिथो विघ्नाना उप यन्तु मृत्युम् ॥२१॥
दिशश्चतस्रोऽश्वतर्यो देवरथस्य पुरोडाशाः शफा अन्तरिक्षमुद्धिः ।
द्यावापृथिवी पक्षसी ऋतवोऽभीशवोऽन्तर्देशाः किंकरा वाक् परिरथ्यम् ॥२२॥
संवत्सरो रथः परिवत्सरो रथोपस्थो विराडीषाग्नी रथमुखम् ।
इन्द्रः सव्यष्ठाश्चन्द्रमाः सारथिः ॥२३॥
इतो जयेतो वि जय सं जय जय स्वाहा । इमे जयन्तु परामी जयन्तां स्वाहैभ्यो दुराहामीभ्यः ।
नीललोहितेनामूनभ्यवतनोमि ॥२४॥

*indro manthatu manthitā śakraḥ śūraḥ puraṁdaraḥ ।*
*yathā hanāma senā amitrāṇāṁ sahasraśaḥ ॥1॥*
*pūtirajjurupadhmānī pūtiṁ senāṁ kṛṇotvamūm ।*
*dhūmamagiṁna parādṛśyāmitrā hṛtsvā dadhatāṁ bhayam ॥2॥*
*amūnaśvattha niḥ śṛṇīhi khādāmūn khadirājiram tājadbhaṁgaiva bhajyantāṁ hantvenān vadhako vadhaiḥ ।3॥*
*paruṣānamūnparuṣāhvaḥ kṛṇotu hantvenān vadhako vadhaiḥ ।*
*kṣipraṁ śaraiva bhajyantāṁ bṛhajjālena saṁditāḥ ॥4॥*
*antarikṣaṁ jālamāsījjāladaṇḍā diśo mahīḥ ।*
*tenābhidhāya dasyūnāṁ śakraḥ senāmapāvapat ॥5॥*
*bṛhaddhi jālaṁ bṛhataḥ śakrasya vājinīvataḥ ।*
*tena śatrūnabhi sarvān nyubja yathā na muchyātai katamaśchanaiṣām ॥6॥*
*bṛhat te jālaṁ bṛhata indra śūra sahasrārghasya śatavīryasya ।*
*tena śataṁ sahasramayutaṁ nyarbudaṁ jaghāna śakro dasyūnāmabhidhāya senayā ॥7॥*
*ayaṁ loko jālamāsīchchhakrasya mahato mahān ।*
*tenāhamindrajālenāmūṁstamasābhi dadhāmi sarvān ॥8॥*
*sedirugrā vyṛddhirārtiśchānapavāchanā ।*
*śramastandrīścha mohaścha tairamūnabhi dadhāmi sarvān ॥9॥*
*mṛtyave'mūn pra yachchhāmi mṛtayūpāśairamī sitāḥ ।*
*mṛtyorye aghalā dūtāstebhya enān prati nayāmi baddhvā ॥10॥*
*nayatāmūn mṛtyudūtā yamadūtā apombhata ।*
*paraḥ sahasrā hanyantāṁ tṛṇeḍhvenān matyaṁ bhavasya ॥11॥*
*sādhyā ekaṁ jāladaṇḍamudyatya yantyojasā ।*
*rudrā ekaṁ vasava ekamādityaireka udyataḥ ॥12॥*
*viśve devā upariṣṭādubjanto yantvojasā ।*
*madhyena ghnanto yantu senāmaṁgiraso mahīm ॥13॥*
*vanaspatīn vānaspatyānoṣadhīruta vīrudhaḥ ।*
*dvipāchchatuṣpādiṣṇāmi yathā senāmamūṁ hanan ॥14॥*
*gandharvāpsarasaḥ sarpān devān puṇyajanān pitṛn ।*
*dṛṣṭānadṛṣṭāniṣṇāmi yathā senāmamūṁ hanan ॥15॥*
*ima uptā mṛtyupāśā yānākramya na muchyase ।*
*amuṣyā hantu senāyā idaṁ kūṭaṁ sahasraśaḥ ॥16॥*
*gharmaḥ samiddho agnināyaṁ homaḥ sahasrahaḥ ।*
*bhavaścha pṛśnibāhuścha śarva senāmamūṁ hatam ॥17॥*
*mṛtyorāṣmā padyanatāṁ kṣudhaṁ sediṁ vadhaṁ bhayam ।*
*indraśchakṣujālābhyāṁ śarva senāmamūṁ hatam ॥18॥*

*parājitāḥ pra trasatāmitrā nuttā dhāvata brahmaṇā I*
*bṛhaspatipraṇuttānāṁ mamīṣāṁ mochi kaśchana II19 II*
*ava padyantāmeṣāmāyudhāni mā śakan pratidhāmiṣum I*
*athaiṣāṁ bahu bibhyatāmiṣavo ghnantu marmaṇi II20 II*
*saṁ krośatāmenān dyāvāpṛthivī samantarikṣaṁ saha devatābhiḥ I*
*mā jñātāraṁ mā pratiṣṭhāṁ vidanta mitho vighnānā upa yantu mṛtyum II21 II*
*diśaśchtasro'śvataryo devarathasya puroḍāśāḥ śaphā antarikṣamuddhiḥ I*
*dyāvāpṛthivī pakṣasī ṛtavo'bhīśavo'ntardeśāḥ kiṁkarā vāk parirathyam II22 II*
*saṁvatsaro rathaḥ parivatsaro rathopastho virāḍīṣāgnī rathamukham I*
*indraḥ savyaṣṭhāśchandramāḥ sārathiḥ II23 II*
*ito jayeto vi jaya saṁ jaya jaya svāhā I*
*ime jayantu parāmī jayantāṁ svāhaibhyo durāhāmībhyaḥ I*
*nīlalohitenāmūnabhyavatanomi II24 II*

६. कुष्ठः (Kuṣṭhaḥ) - अ. (Av.) १९.३९.१-१०

ऐतु देवस्त्रायमाणः कुष्ठो हिमवतस्परि। तक्मानं सर्वं नाशय सर्वाश्च यातुधान्यः ॥१॥
त्रीणि ते कुष्ठ नामानि नद्यमारो नद्यारिषः ।
नद्यायं पुरुषो रिषत्। यस्मै परिब्रवीमि त्वा सायंप्रातरथो दिवा ॥२॥
जीवला नाम ते माता जीवन्तो नाम ते पिता ।
नद्यायं पुरुषो रिषत्। यस्मै परिब्रवीमि त्वा सायंप्रातरथो दिवा ॥३॥
उत्तमो अस्योषधीनामनड्वान् जगतामिव व्याघ्रः श्वपदामिव ।
नद्यायं पुरुषो रिषत्। यस्मै परिब्रवीमि त्वा सायंप्रातरथो दिवा ॥४॥
त्रिः शाम्बुभ्यो अंगिरेभ्यस्त्रिरादित्येभ्यस्परि। त्रिर्जातो विश्वदेवभ्यः। स कुष्ठो विश्वेभषजः ।
साकं सोमेन तिष्ठति। तक्मानं सर्वं नाशय सर्वाश्च यातुधान्यः ॥५॥
अश्वत्थो देवसदनस्तृतीयस्यामितो दिवि। तत्रामृतस्य चक्षणं ततः कुष्ठो अजायत ।
स कुष्ठो विश्वभेषजः साकं सोमेन तिष्ठति। तक्मानं सर्वं नाशय सर्वाश्च यातुधान्यः ॥६॥
हिरण्ययी नौरचरद्धिरण्यबन्धना दिवि। तात्रमृतस्य वक्षणं ततः कृष्ठो अजायत ।
स कुष्ठो विश्वभेषजः साकं सोमेन तिष्ठति। तक्मानं सर्वं नाशय सर्वाश्च यातुधान्यः ॥७॥
यत्र नावप्रभ्रंशनं यत्र हिमवतः शिरः। तत्रामृतस्य चक्षणं ततः कुष्ठो अजायत ।
स कुष्ठो विश्वभेषजः साकं सोमेन तिष्ठति। तक्मानं सर्वं नाशय सर्वाश्च यातुधान्यः ॥८॥
यं त्वा वेद पूर्व इक्ष्वाको यं वा त्वा कुष्ठ काम्यः। यं वा वसो यमात्स्यस्तेनासि विश्वभेषजः ॥९।
शीर्षलोकं तृतीयकं सदन्दिर्यश्च हायनः। तक्मानं विश्वधावीर्याधरांचं परा सुव ॥१०॥

*aitu devastrāyamāṇaḥ kuṣṭho himavataspari I*
*takmānaṁ sarvaṁ nāśaya sarvāścha yātudhānyaḥ II1 II*
*trīṇi te kuṣṭha nāmāni nadyamāro nadyāāriṣaḥ I*
*nadyāyaṁ puruṣo riṣat I yasmai paribravīmi tvā sāyaṁprātaratho divā II2 II*
*jīvalā nāma te mātā jīvanto nāma te pitā I*
*nadyāyaṁ puruṣo riṣat I yasmai paribravīmi tvā sāyaṁprātaratho divā II3 II*
*uttamo asyoṣadhīnāmanaḍvān jagatāmiva vyāghraḥ śvapadāmiva I*
*nadyāyaṁ puruṣo riṣat I yasmai paribravīmi tvā sāyaṁprātaratho divā II4 II*
*triḥ śāmbubhyo aṁgirebhyastrirādityebhyaspari I trirjāto viśvadevabhyaḥ I*
*sa kuṣṭho viśvebhaṣajaḥ I sākaṁ somena tiṣṭhati I*
*takmānaṁ sarvaṁ nāśaya sarvāścha yātudhānyaḥ II5 II*
*aśvattho devasadanastṛtīyasyāmito divi I tatrāmṛtasya chakṣaṇaṁ tataḥ kuṣṭho ajāyata I*
*sa kuṣṭho viśvabheṣajaḥ sākaṁ somena tiṣṭhati I*
*takmānaṁ sarvaṁ nāśaya sarvāścha yātudhānyaḥ II6 II*
*hiraṇyayī nauracharaddhiraṇyabandhanā divi I*
*tātramṛtasya vakṣaṇaṁ tataḥ kṛṣṭho ajāyata I*
*sa kuṣṭho viśvabheṣajaḥ sākaṁ somena tiṣṭhati I*
*takmānaṁ sarvaṁ nāśaya sarvāścha yātudhānyaḥ II7 II*
*yatra nāvaprabhraṁśanaṁ yatra himavataḥ śiraḥ I*
*tatrāmṛtasya chakṣaṇaṁ tataḥ kuṣṭho ajāyata I*
*sa kuṣṭho viśvabheṣajaḥ sākaṁ somena tiṣṭhati I*

*takmānaṁ sarvaṁ nāśaya sarvāścha yātudhānyaḥ ॥8॥*
*yaṁ tvā veda pūrva ikṣavāko yaṁ vā tvā kuṣṭha kāmyaḥ ।*
*yaṁ vā vaso yamātsyastenāsi viśvabheṣajaḥ ॥9।*
*śīrṣalokaṁ tṛtīyakaṁ sadandiryaścha hāyanaḥ ।*
*takmānaṁ viśvadhāvīryādharāṁchaṁ parā suva ॥10॥*

७. कुष्ठः तक्मनाशनम् (Kuṣṭhaḥ Takmanāśanam) - अ. (Av.) ५.४.१-१०

यो गिरिष्वजायथा वीरुधां बलवत्तमः। कुष्ठेहि तक्मनाशन तक्मानं नाशयन्नितः ॥१॥
सुपर्णसुवने गिरौ जातं हिमवतस्परि। धनैरभि श्रुत्वा यन्ति विदुर्हि तक्मनाशनम् ॥२॥
अश्वत्थो देवसदनस्तृतीयस्यामितो दिवि। तत्रामृतस्य चक्षणं देवाः कुष्ठमवन्वत ॥३॥
हिरण्ययी नौरचरद्धिरण्यबन्धना दिवि। तत्रामृतस्य पुष्पं देवाः कुष्ठमवन्वत ॥४॥
हिरण्ययाः पन्थान आसन्नरित्राणि हिरण्यया। नावो हिरण्ययीरासन् याभिः कुष्ठं निरावहन् ॥५॥
इमं मे कुष्ठ पुरुषं तमा वह तं निष्कुरु। तमु मे अगदं कृधि ॥६॥
देवेभ्यो अधि जातोऽसि सोमस्यासि सखा हितः। स प्राणाय व्यानाय चक्षुषे मे अस्मै मृड ॥७॥
उदङ् जातो हिमवतः स प्राच्यां नीयसे जनम्। तत्र कुष्ठस्य नामान्युत्तमानि वि भेजिरे ॥८॥
उत्तमो नाम कुष्ठास्युत्तमो नाम ते पिता। यक्ष्मं च सर्वं नाशय तक्मानं चारसं कृधि ॥९॥
शीर्षामयमुपहत्यामक्ष्योस्तन्वो३रपः। कुष्ठस्तत् सर्वं निष्करद् दैवं समह वृष्ण्यम् ॥१०॥

*yo giriṣvajāyathā vīrudhāṁ balavattamaḥ ।*
*kuṣṭhehi takmanāśana takmānaṁ nāśayannitaḥ ॥1॥*
*suparṇasuvane girau jātaṁ himavataspari ।*
*dhanairabhi śrutvā yanti vidurhi takmanāśanam ॥2॥*
*aśvattho devasadanastṛtīyasyāmito divi ।*
*tatrāmṛtasya chakṣaṇaṁ devāḥ kuṣṭhamavanvata ॥3॥*
*hiraṇyayī nauracharaddhiraṇyabandhanā divi ।*
*tatrāmṛtasya puṣpaṁ devāḥ kuṣṭhamavanvata ॥4॥*
*hiraṇyayāḥ panthāna āsannaritrāṇi hiraṇyayā ।*
*nāvo hiraṇyayīrāsan yābhiḥ kuṣṭhaṁ nirāvahan ॥5॥*
*imaṁ me kuṣṭha puruṣaṁ tamā vaha taṁ niṣkuru । tamu me agadaṁ kṛdhi ॥6॥*
*devebhyo adhi jāto'si somasyāsi sakhā hitaḥ ।*
*sa prāṇāya vyānāya chakṣuṣe me asmai mṛḍa ॥7॥*
*udaṅ jāto himavataḥ sa prāchyāṁ nīyase janam ।*
*tatra kuṣṭhasya nāmānyuttamāni vi bhejire ॥8॥*
*uttamo nāma kuṣṭhāsyuttamo nāma te pitā ।*
*yakṣamaṁ cha sarvaṁ nāśaya takmānaṁ chārasaṁ kṛdhi ॥9॥*
*śīrṣāmayamupahatyāmakṣayostanvo3rapaḥ ।*
*kuṣṭhastat sarvaṁ niṣkarad daivaṁ samaha vṛṣṇyam ॥10॥*

८. क्षेत्रिय (यक्ष्मकुष्ठादि) नाशनम् (Kṣetriya (Yakṣamakuṣṭhādi) Nāśanam) - अ. (Av.) २.८.१-५

उदगातां भगवती विचृतौ नाम तारके । वि क्षेत्रियस्य मुंचतामधमं पाशमुत्तमम् ॥१॥
अपेयं रात्र्युच्छत्वपोच्छन्त्वभिकृत्वरीः । वीरुत् क्षेत्रियनाशन्यप क्षेत्रियमुच्छतु ॥२॥
बभ्रोरर्जुनकाण्डस्य यवस्य ते पलाल्या तिलस्य तिलपिंज्या ।
वीरुत् क्षेत्रियनाशन्यप क्षेत्रियमुच्छतु ॥३॥
नमस्ते लांगलेभ्यो नम ईषायुगेभ्यः । वीरुत् क्षेत्रियनाशन्यप क्षेत्रियमुच्छतु ॥४॥
नमः सनिस्रसाक्षेभ्यो नमः संदेश्येभ्यो नमः क्षेत्रस्य पतये।
वीरुत् क्षेत्रियनाशन्यप क्षेत्रियमुच्छतु ॥५॥

*udagātāṁ bhagavatī vichṛtau nāma tārake ।*
*vi kṣetriyasya muṁchatāmadhamaṁ pāśamuttamam ॥1॥*
*apeyaṁ rātrayuchchhatvapochchhantvabhikṛtvarīḥ ।*
*vīrut kṣetriyanāśanyapa kṣetriyamuchchhatu ॥2॥*
*babhrorarjunakāṇḍasya yavasya te palālyā tilasya tilapiṁjyā ।*
*vīrut kṣetriyanāśanyapa kṣetriyamuchchhatu ॥3॥*
*namaste lāṁgalebhyeā nama īṣāyugebhyaḥ ।*

*vīrut kṣetriyanāśanyapa kṣetriyamuchchhatu ॥4॥*
*namaḥ sanisrasākṣebhyo namaḥ saṁdeśyebhyo namaḥ kṣetrasya pataye ।*
*vīrut kṣetriyanāśanyapa kṣetriyamuchchhatu ॥5॥*

९. तक्मनाशनः (Takmanāśanaḥ) - अ. (Av.) ५.२२.१-१४

अग्निस्तक्मानमप बाधतामितः सोमो ग्रावा वरुणः पूतदक्षाः ।
वेदिर्बर्हिः समिधः शोशुचाना अप द्वेषंस्यमुया भवन्तु ॥१॥
अयं यो विश्वान् हरितान् कृणोष्युच्छोचयन्नग्निरिवाभिदुन्वन् ।
अधा हि तक्मन्नरसो हि भूया अधा न्यङ्ङधराङ् वा परेहि ॥२।
यः पुरुषः पारुषेयोऽवध्वंसइवारुणः। तक्मानं विश्वधावीर्याधरांचं परा सुव ॥३॥
अधरांचं प्र हिणोमि नमः कृत्वा तक्मने। शकम्भरस्य मुष्टिहा पुनरेतु महावृषान् ॥४॥
ओको अस्य मजवन्त ओको अस्य महावृषाः।
यावज्जातस्तक्मंस्तावानसि बल्हिकेषु न्योचरः ॥५॥
तक्मन् व्याल वि गद व्यंग भूरि यावय । दासीं निष्टक्वरीमिच्छ तां वज्रेण समर्पय ॥६॥
तक्मन् मूजवतो गच्छ बल्हिकान् वा परस्तराम् ।
शूद्रामिच्छ प्रफर्व्यं१ तां तक्मन् वीव धूनुहि ॥७॥
महावृषान् मूजवतो बन्ध्वद्धि परेत्य । प्रैतानि तक्मने ब्रूमो अन्यक्षेत्राणि वा इमा ॥८॥
अन्यक्षेत्रे न रमसे वशी सन् मृडयासि नः। अभृदु प्रार्थस्तक्मा स गमिष्यति बल्हि कान् ।
भीमास्ते तक्मन् हेतयस्ताभिः स्म परि वृङ्गि नः ॥१०॥
मा स्मैतान्त्सखीन् कुरुथा बलासं कासमुद्युगम्।
मा स्मातोऽर्वाडैः पुनस्तत् त्वा तक्मन्नुप ब्रुवे ॥११॥
तक्मन् भ्रात्रा बलासेन स्वस्रा कासिकया सह । पाप्मा भ्रातृव्येण सह गच्छामुमरणं जनम् ॥१२॥
तृतीयकं वितृतीयं सदन्दिमुत शारदम् । तक्मानं शीतं रूरं ग्रैष्मं नाशय वार्षिकम् ॥१३॥
गन्धारिभ्यो मूजवद्भ्योऽङ्गेभ्यो मगधेभ्यः। प्रैष्यन् जनमिव शेवधिं तक्मानं परि दद्मसि ॥१४॥

*agnistakmānamapa bādhatāmitaḥ somo grāvā varuṇaḥ pūtadakṣāḥ ।*
*vedirbarhiḥ samidhaḥ śośuchānā apa dveṣaṁsyamuyā bhavantu ॥1॥*
*ayaṁ yo viśvān haritān kṛṇoṣyuchchhochayannagnirivābhidunvan ।*
*adhā hi takmannaraso hi bhūyā adhā nyaṅaḍadharāṅ vā parehi ॥2।*
*yaḥ puruṣaḥ pāruṣeyo'vadhvaṁsaivāruṇaḥ ।*
*takmānaṁ viśvadhāvīryādharāṁchaṁ parā suva ॥3॥*
*adharāṁchaṁ pra hiṇomi namaḥ kṛtvā takmane ।*
*śakambharasya muṣṭihā punaretu mahāvṛṣān ॥4॥*
*oko asya majavanta oko asya mahāvṛṣāḥ ।*
*yāvajjātastakmaṁstāvānasi balhikeṣu nyocharaḥ ॥5॥*
*takman vyāla vi gada vyaṁga bhūri yāvaya ।*
*dāsīṁ niṣṭakvarīmichchha tāṁ vajreṇa samarpaya ॥6॥*
*takman mūjavato gachchha balhikān vā parastarām ।*
*śūdrāmichchha prapharvyaṁ1 tāṁ takman vīva dhūnuhi ॥7॥*
*mahāvṛṣān mūjavato bandhvaddhi paretya ।*
*praitāni takmane brūmo anyakṣetrāṇi vā imā ॥8॥*
*anyakṣetre na ramase vaśī san mṛḍayāsi naḥ ।*
*abhṛdu prārthastakmā sa gamiṣyati balhi kān ।*
*bhīmāste takman hetayastābhiḥ sma pari vṛṅgdhi naḥ ॥10॥*
*mā smaitāntsakhīn kuruthā balāsaṁ kāsamudyugam ।*
*mā smāto'rvāḍaiḥ punastat tvā takmannupa bruve ॥11॥*
*takman bhrātrā balāsena svasrā kāsikayā saha ।*
*pāpmā bhrātṛvyeṇa saha gachchhāmumaraṇaṁ janam ॥12॥*
*tṛtīyakaṁ vitṛtīyaṁ sadandimuta śāradam ।*
*takmānaṁ śītaṁ rūraṁ graiṣmaṁ nāśaya vārṣikam ॥13॥*
*gandhāribhyo mūjavadbhyo'ṅgebhyo magadhebhyaḥ ।*
*praiṣyan janamiva śevadhiṁ takmānaṁ pari dadmasi ॥14॥*

१०. त्रिवृत् (Trivṛt) - अ. (Av.) १९.२७.१-१५

गोभिष्ट्वा पात्वृषभो वृषा त्वा पातु वाजिभिः ।
वायुष्ट्वा ब्रह्मणा पात्विन्द्रस्त्वा पात्विन्द्रियैः ॥१॥
सोमस्त्वा पात्वोषधीभिर्नक्षत्रैः पातु सूर्यः। माद्भ्यस्त्वा चन्द्रो वृत्रहा वातः प्राणेन रक्षतु ॥२॥
तिस्रो दिवस्तिस्रः पृथिवीस्त्रीण्यन्तरिक्षाणि चतुरः समुद्रान् ।
त्रिवृतं स्तोमं त्रिवृत आप आहुस्तास्त्वा रक्षन्तु त्रिवृता त्रिवृद्भिः ॥३॥
त्रीन्नाकांस्त्रीन् समुद्रांस्त्रीन् ब्रध्नांस्त्रीन् वैष्टपान् ।
त्रीन् मातरिश्वनस्त्रीन्त्सूर्यान् गोप्तृन् कल्पयामि ते ॥४॥
घृतेन त्वा समुक्षाम्यग्न आज्येन वर्धयन् ।
अग्नेश्चन्द्रस्य सूर्यस्य मा प्राणं मायिनो दभन् ॥५॥
मा वः प्राणं मा वोऽपानं मा हरो मायिनो दभन् ।
भ्राजन्तो विश्ववेदसो देवा दैव्येन धावत ॥६॥
प्राणेनाग्निं सं सृजति वातः प्राणेन संहितः ।
प्राणेन विश्वतोमुखं सूर्यं देवा अजनयन् ॥७॥
आयुषायुष्कृतां जीवायुष्मान् जीव मा मृथाः ।
प्राणेनात्मन्वतां जीव मा मृत्योरुदगा वशम् ॥८॥
देवानां निहितं निधिं यमिन्द्रोऽन्विन्दत् पथिभिर्देवयानैः ।
आपो हिरण्यं जुगुपुस्त्रिवृद्भिस्तास्त्वा रक्षन्तु त्रिवृता त्रिवृद्भिः ॥९॥
त्रयस्त्रिंशद् देवतास्त्रीणि च वीर्याणि प्रियायमाणा जुगुपुरप्स्व१न्तः ।
अस्मिंश्चन्द्रे अधि यद्धिरण्यं तेनायं कृणवद् वीर्याणि ॥१०॥
ये देवा दिव्येकादश स्थ ते देवासो हविरिदं जुषध्वम् ॥११॥
ये देवा अन्तरिक्ष एकादश स्थ ते देवासो हविरिदं जुषध्वम् ।
ये देवाः पृथिव्यामेकादश स्थ ते देवासो हविरिदं जुषध्वम् ॥१३॥
असपत्नं पुरस्तात् पश्चान्नो अभयं कृतम् । सविता मा दक्षिणत उत्तरान्मा शचीपतिः ॥१४॥
दिवो मादित्या रक्षन्तु भूम्या रक्षन्त्वग्नयः।इन्द्राग्नी रक्षतां मा पुरस्तादश्विनावभितः शर्म यच्छताम्।
तिरश्चीनघ्न्या रक्षतु जातवेदा भूतकृतो मे सर्वतः सन्तु वर्म ॥१५॥

*gobhiṣṭvā pātvṛṣabho vṛṣā tvā pātu vājibhiḥ* ।
*vāyuṣṭvā brahmaṇā pātvindrastvā pātvindriyaiḥ* ॥1॥
*somastvā pātvoṣadhībhirnikṣatraiḥ pātu sūryaḥ* ।
*mādbhyastvā chandro vṛtrahā vātaḥ prāṇena rakṣatu* ॥2॥
*tisro divastisraḥ pṛthivīstrīṇyantarikṣāṇi chaturaḥ samudrān* ।
*trivṛtaṁ stomaṁ trivṛta āpa āhustāstvā rakṣantu trivṛtā trivṛdbhiḥ* ॥3॥
*trīnnākāṁstrīn samudrāṁstrīn bradhnāṁstrīn vaiṣṭapān* ।
*trīn mātariśvanastrīntsūryān goptṛn kalpayāmi te* ॥4॥
*ghṛtena tvā samukṣāmyagna ājyena vardhayan* ।
*agneśchandrasya sūryasya mā prāṇaṁ māyino dabhan* ॥5॥
*mā vaḥ prāṇaṁ mā vo'pānaṁ mā haro māyino dabhan* ।
*bhrājanto viśvavedaso devā daivyena dhāvata* ॥6॥
*prāṇenāgiṁna saṁ sṛjati vātaḥ prāṇena saṁhitaḥ* ।
*prāṇena viśvatomukhaṁ sūryaṁ devā ajanayan* ॥7॥
*āyuṣāyuṣkṛtāṁ jīvāyuṣmān jīva mā mṛthāḥ* ।
*prāṇenātmanvatāṁ jīva mā mṛtyorudagā vaśam* ॥8॥
*devānāṁ nihitaṁ nidhiṁ yamindro'nvindat pathibhirdevayānaiḥ* ।
*āpo hiraṇyaṁ jugupustrivṛdbhistāstvā rakṣantu trivṛtā trivṛdbhiḥ* ॥9॥
*trayastriṁśad devatāstrīṇi cha vīryāṇi priyāyamāṇā jugupurapsva1ntaḥ* ।
*asiṁmaśchandre adhi yaddhiraṇyaṁ tenāyaṁ kṛṇavad vīryāṇi* ॥10॥
*ye devā divyekādaśa stha te devāso haviridaṁ juṣadhvam* ॥11॥
*ye devā antarikṣa ekādaśa stha te devāso haviridaṁ juṣadhvam* ।
*ye devā: pṛthivyāmekādaśa stha te devāso haviridaṁ juṣadhvam* ॥13॥
*asapatnaṁ purastāt paśchānno abhayaṁ kṛtam* ।
*savitā mā dakṣiṇata uttarānmā śachīpatiḥ* ॥14॥
*divo māditya rakṣantu bhūmyā rakṣantvagnayaḥ ।indrāgnī rakṣatāṁ mā*

*purastādaśvināvabhitaḥ śarma yachchhatām ।*
*tiraśchīnaghnyā rakṣatu jātavedā bhūtakṛto me sarvataḥ santu varma* ॥15॥

११. त्रिषन्धिः (Triṣandhiḥ) - अ. (Av.) ११.१०.१-२७

उत्तिष्ठत सं नह्यध्वमुदाराः केतुभिः सह । सर्पा इतरजना रक्षांस्यमित्राननु धावत ॥१॥
ईशां वो वेदराज्यं त्रिषन्धे अरुणैः केतुभिः सह। ये अन्तरिक्षे ये दिवि पृथिव्यां ये च मानवाः ।
त्रिषन्धेस्ते चेतसि दुर्णामान उपासताम् ॥२॥
अयोमुखाः सूचीमुखा अथो विकंकतीमुखाः ।
क्रव्यादो वातरंहस आ सजन्त्वमित्रान् वज्रेण त्रिषन्धिना ॥३॥
अन्तर्धेहि जातवेद आदित्य कुणपं बहु । त्रिषन्धेरियं सेना सुहितास्तु मे वशे ॥४॥
उत्तिष्ठ त्वं देवजनार्बुदे सेनया सह । अयं बलिर्व आहुतस्त्रिषन्धेराहुतिः प्रिया ॥५॥
शितिपदी सं द्यतु शरव्ये३यं चतुष्पदी । कृत्येऽमित्रेभ्यो भव त्रिषन्धेः सह सेनया ॥६॥
धूमाक्षी सं पततु कृधुकर्णी च क्रोशतु । त्रिषन्धेः सेनया जिते अरुणाः सन्तु केतवः ॥७॥
अवायन्तां पक्षिणो ये वयांस्यन्तरिक्षे दिवि ये चरन्ति ।
श्वापदो मक्षिकाः सं रभन्तामामादो गृध्राः कुणपे रदन्ताम् ॥८॥
यामिन्द्रेणसंधां समधत्था ब्रह्मणा च बृहस्पते ।
तयाहमिन्द्रसंधया सर्वान् देवानिह हुव इतो जयत मामुतः ॥९॥
बृहस्पतिरांगिरस ऋषयो ब्रह्मसंशिताः । असुरक्षयणं वधं त्रिषन्धिं दिव्याश्रयन् ॥१०॥
येनासौ गुप्त आदितय उभाविन्द्रश्च तिष्ठतः ।
त्रिषन्धिं देवा अभजन्तौजसे च बलाय च ॥११॥
सर्वाल्लोँकान्त्समजयन् देवा आहुत्यानया ।
बृहस्पतिरांगिरसो वज्रं यमसिंचतासुरक्षयणं वधम्॥१२॥
बृहस्पतिरांगिरसो वज्रं यमसिंचतासुरक्षयणं वधम् ।
तेनाहममूं सेनां नि लिम्पामि बृहस्पतेऽमित्रान् हन्म्योजसा ॥१३॥
सर्वे देवा अत्यायन्ति ये अश्नन्ति वषट्कृतम् ।
इमां जुषध्वमाहुतिमितो जयत मामुतः ॥१४॥
सर्वे देवा अत्यायन्तु त्रिषन्धेराहुतिः प्रिया ।
संधां महतीं रक्षत ययाग्रे असुरा जिता ॥१५॥
वायुरमित्राणामिष्वग्राण्यांचतु । इन्द्र एषां बाहून् प्रति भनक्तु मा शकन् प्रतिधामिषुम् ।
आदित्य एषामस्त्रं वि नाशयतु चन्द्रमा युतामगतस्य पन्थाम् ॥१६॥
यदि प्रेयुर्देवपुरा ब्रह्म वर्माणि चक्रिरे ।
तनूपानं परिपाणं कृण्वाना यदुपोचिरे सर्वं तदरसं कृधि ॥१७॥
क्रव्यादानुवर्तयन् मृत्युना च पुरोहितम् ।
त्रिषन्धे प्रेहि सेनया जयामित्रान् प्र पद्यस्व ॥१८॥
त्रिषन्धे तमसा त्वममित्रान् परि वारय । पृषदाज्यप्रणुत्तानां मामीषां मोचि कश्चन ॥१९॥
शितिपदी सं पतत्वमित्राणाममूः सिचः । मुह्यन्त्वद्यामूः सेना अमित्राणां न्यर्बुदे ॥२०॥
मूढा अमित्रा न्यर्बुदे जह्येषां वरंवरम् । अनया जहि सेनया ॥२१॥
यश्च कवची यश्चाकवचो३मित्रो यश्चज्मनि । ज्यापाशैः कवचपाशैरज्मनाभिहतः शयाम् ॥२२॥
ये वर्मिणो ये वर्माणो अमित्रा ये च वर्मिणः । सर्वास्ताँ अर्बुदे हतांछ्वांनोऽदन्तु भूम्याम् ॥२३॥
ये रथिनो ये अरथा असादा ये च सादिनः । सर्वानदन्तु तान् हतान् गृध्राः श्येनाः पतत्रिणः ।२४।
सहस्रकुणपा शेतामामित्री सेना समरे वधानाम् । विविद्धा ककजाकृता ॥२५॥
मर्माविधं रोरुवतं सुपर्णैरदन्तु दुश्चितं मृदितं शयानम् ॥२६॥
यां देवा अनुतिष्ठन्ति यस्या नास्ति विराधनम्। तयेन्द्रो हन्तु वृत्रहा वज्रेण त्रिषन्धिना॥२७॥

*uttiṣṭhata saṁ nahyadhvamudārāḥ ketubhiḥ saha ।*
*sarpā itarajanā rakṣāṁsyamitrānanu dhāvata* ॥1॥
*īśāṁ vo vedarājyaṁ triṣandhe aruṇaiḥ ketubhiḥ saha ।*
*ye antarikṣe ye divi pṛthivyāṁ ye cha mānavāḥ ।*
*triṣandheste chetasi durṇāmāna upāsatām* ॥2॥
*ayomukhāḥ sūchīmukhā atho vikaṁkatīmukhāḥ ।*

*kravyādo vātaraṁhasa ā sajantvamitrān vajreṇa triṣandhinā* //3 //
*antardhehi jātaveda āditya kuṇapaṁ bahu* / *triṣandheriyaṁ senā suhitāstu me vaśe* //4 //
*uttiṣṭha tvaṁ devajanārbude senayā saha* / *ayaṁ balirva āhutastriṣandherāhutiḥ priyā* //5 //
*śitipadī saṁ dyatu śaravye3yaṁ chatuṣpadī* /
*kṛtye'mitrebhyo bhava triṣandheḥ saha senayā* //6 //
*dhūmākṣī saṁ patatu kṛdhukarṇī cha krośatu* /
*triṣandheḥ senayā jite aruṇāḥ santu ketavaḥ* //7 //
*avāyantāṁ pakṣiṇo ye vayāṁsyantarikṣe divi ye charanti* /
*śvāpado makṣikāḥ saṁ rabhantāmāmādo gṛdhrāḥ kuṇape radantām* //8 //
*yāmindreṇasaṁdhāṁ samadhatthā brahmaṇā cha bṛhaspate* /
*tayāhamindrasaṁdhayā sarvān devāniha huva ito jayata māmutaḥ* //9 //
*bṛhaspatirāṁgirasa ṛṣayo brahmasaṁśitāḥ* /
*asurakṣayaṇaṁ vadhaṁ triṣaniṁdha divyāśrayan* //10 //
*yenāsau gupta āditaya ubhāvindraścha tiṣṭhataḥ* /
*triṣandhi devā abhajantaujase cha balāya cha* //11 //
*sarvāllomkāntsamajayan devā āhutyānayā* /
*bṛhaspatirāṁgiraso vajraṁ yamasiṁchatāsurakṣayaṇaṁ vadham* //12 //
*bṛhaspatirāṁgiraso vajraṁ yamasiṁchatāsurakṣayaṇaṁ vadham* /
*tenāhamamūṁ senāṁ ni limpāmi bṛhaspate'mitrān hanmyojasā* //13 //
*sarve devā atyāyanti ye aśnanti vaṣaṭkṛtam* /
*imāṁ juṣadhvamāhutimito jayata māmutaḥ* //14 //
*sarve devā atyāyantu triṣandherāhutiḥ priyā* /
*saṁdhāṁ mahatīṁ rakṣata yayāgre asurā jitā* //15 //
*vāyuramitrāṇāmiṣvagrāṇyāṁchatu* /
*indra eṣāṁ bāhūn prati bhanaktu mā śakan pratidhāmiṣum* /
*āditya eṣāmastraṁ vi nāśayatu chandramā yutāmagatasya panthām* //16 //
*yadi preyurdevapurā brahma varmāṇi chakrire* /
*tanūpānaṁ paripāṇaṁ kṛṇvānā yadupochire sarvaṁ tadarasaṁ kṛdhi* //17 //
*kravyādānuvartayan mṛtyunā cha purohitam* /
*triṣandhe prehi senayā jayāmitrān pra padyasva* //18 //
*triṣandhe tamasā tvamamitrān pari vāraya* /
*pṛṣadājyapraṇuttānāṁ māmīṣāṁ mochi kaśchana* //19 //
*śitipadī saṁ patatvamitrāṇāmamūḥ sichaḥ* /
*muhyantvadyāāmūḥ senā amitrāṇāṁ nyarbude* //20 //
*mūḍhā amitrā nyarbude jahyeṣāṁ varaṁvaram* / *anayā jahi senayā* //21 //
*yaścha kavachī yaśchākavacho3mitro yaśchajmani* /
*jyāpāśaiḥ kavachapāśairajmanābhihataḥ śayām* //22 //
*ye varmiṇo ye varmāṇo amitrā ye cha varmiṇaḥ* /
*arvāstāṁ arbude hatāṁchhvāṁno'dantu bhūmyām* //23 //
*ye rathino ye arathā asādā ye cha sādinaḥ* /
*sarvānadantu tān hatān gṛdhrāḥ śyenāḥ patatriṇaḥ* /24 /
*sahasrakuṇapā śetāmāmitrī senā samare vadhānām* / *vividdhā kakajākṛtā* //25 //
*marmāvidhaṁ roruvataṁ suparṇairadantu duśchitaṁ mṛditaṁ śayānam* //26 //
*yāṁ devā anutiṣṭhanti yasyā nāsti virādhanam* /
*tayendro hantu vṛtrahā vajreṇa triṣandhinā* //27 //

१२. द्यावापृथिवी मित्रः बृह्मणस्पतिः सविता च (Dyāvāpṛthivī Mitraḥ Bṛhmaṇaspatiḥ Savitā Cha) - अ. (Av.) ७.३०.१

स्वाक्तं मे द्यावापृथिवी स्वाक्त मित्रो अकरयम्। स्वाक्तं मे ब्रह्मणस्पतिः स्वाक्तं सविता करत्।१।
*svāktaṁ me dyāvāpṛthivī svākta mitro akarayam* /
*svāktaṁ me brahmaṇaspatiḥ svāktaṁ savitā karat* /1 /

१३. निऋर्ति द्यावापृथिव्यादयो मन्त्रोक्ताः (Nirṛti Dyāvāpṛthivyādayo Mantroktāḥ) - अ. (Av.) २.१०.१-८

क्षेत्रियात् त्वा निऋर्त्या जामिशंसाद् द्रुहो मुंचामि वरुणस्य पाशात् ।

अनागसं ब्रह्मणा त्वा कृणोमि शिवे ते द्यावापृथिवी उभे स्ताम् ॥१॥
शं ते अग्निः सहाद्भिरस्तु शं सोमः सहौषधीभिः ।
एवाहं त्वा क्षेत्रियान्निर्ऋत्या जामिशंसाद् द्रुहो मुंचामि वरुणस्य पाशात् ।
अनागसं ब्रह्मणा त्वा कृणोमि शिवे ते द्यावापृथिवी उभे स्ताम् ॥२॥
शं ते वातो अन्तरिक्षे वयो धाच्छं ते भवन्तु प्रदिशश्चतस्रः ।
एवाहं त्वा क्षेत्रियान्निर्ऋत्या जामिशंसाद् द्रुहो मुंचामि वरुणस्य पाशात् ।
अनागसं ब्रह्मणा त्वा कृणोमि शिवे ते द्यावापृथिवी उभे स्ताम् ॥३॥
इमा या देवीः प्रदिशश्चतस्रो वातपत्नीरभि सूर्यो विचष्टे ।
एवाहं त्वा क्षेत्रियान्निर्ऋत्या जामिशंसाद् द्रुहो मुंचामि वरुणस्य पाशात् ।
अनागसं ब्रह्मणा त्वा कृणोमि शिवे ते द्यावापृथिवी उभे स्ताम् ॥४॥
तासु त्वान्तर्जरस्या दधामि प्र यक्ष्म एतु निर्ऋतिः पराचैः ।
एवाहं त्वा क्षेत्रियान्निर्ऋत्या जामिशंसाद् द्रुहो मुंचामि वरुणस्य पाशात् ।
अनागसं ब्रह्मणा त्वा कृणोमि शिवे ते द्यावापृथिवी उभे स्ताम् ॥५॥
अमुक्था यक्ष्माद् दुरितादवद्याद् द्रुहः पाशाद् ग्राह्याश्चोदमुक्थाः ।
एवाहं त्वा क्षेत्रियान्निर्ऋत्या जामिशंसाद् द्रुहो मुंचामि वरुणस्य पाशात् ।
अनागसं ब्रह्मणा त्वा कृणोमि शिवे ते द्यावापृथिवी उभे स्ताम् ॥६॥
अहा अरातिमविदः स्योनमप्यभूर्भद्रे सुकृतस्य लोके ।
एवाहं त्वा क्षेत्रियान्निर्ऋत्या जामिशंसाद् द्रुहो मुंचामि वरुणस्य पाशात् ।
अनागसं ब्रह्मणा त्वा कृणोमि शिवे ते द्यावापृथिवी उभे स्ताम् ॥७॥
सुर्यमृतं तमसो ग्राह्या अधिदेवा मुंचन्तो असृजन्निरेणसः ।
एवाहं त्वा क्षेत्रियान्निर्ऋत्या जामिशंसाद् द्रुहो मुंचामि वरुणस्य पाशात् ।
अनागसं ब्रह्मणा त्वा कृणोमि शिवे ते द्यावापृथिवी उभे स्ताम् ॥८॥
*kṣetriyāt tvā nirṛtyā jāmiśaṁsād druho muṁchāmi varuṇasya pāśāt /*
*anāgasaṁ brahmaṇā tvā kṛṇomi śive te dyāvāpṛthivī ubhe stām //1//*
*śaṁ te agniḥ sahādbhirastu śaṁ somaḥ sahauṣadhībhiḥ /*
*evāhaṁ tvā kṣetriyānnirṛtyā jāmiśaṁsād druho muṁchāmi varuṇasya pāśāt /*
*anāgasaṁ brahmaṇā tvā kṛṇomi śive te dyāvāpṛthivī ubhe stām //2//*
*śaṁ te vāto antarikṣe vayo dhāchchhaṁ te bhavantu pradiśaśchatasraḥ /*
*evāhaṁ tvā kṣetriyānnirṛtyā jāmiśaṁsād druho muṁchāmi varuṇasya pāśāt /*
*anāgasaṁ brahmaṇā tvā kṛṇomi śive te dyāvāpṛthivī ubhe stām //3//*
*imā yā devīḥ pradiśaśchatasro vātapatnīrabhi sūryo vichaṣṭe /*
*evāhaṁ tvā kṣetriyānnirṛtyā jāmiśaṁsād druho muṁchāmi varuṇasya pāśāt /*
*anāgasaṁ brahmaṇā tvā kṛṇomi śive te dyāvāpṛthivī ubhe stām //4//*
*tāsu tvāntarjarasyā dadhāmi pra yakṣama etu nirṛtiḥ parāchaiḥ /*
*evāhaṁ tvā kṣetriyānnirṛtyā jāmiśaṁsād druho muṁchāmi varuṇasya pāśāt /*
*anāgasaṁ brahmaṇā tvā kṛṇomi śive te dyāvāpṛthivī ubhe stām //5//*
*amukthā yakṣamād duritādavadyād druhaḥ pāśād grāhyāśchodamukthāḥ /*
*evāhaṁ tvā kṣetriyānnirṛtyā jāmiśaṁsād druho muṁchāmi varuṇasya pāśāt /*
*anāgasaṁ brahmaṇā tvā kṛṇomi śive te dyāvāpṛthivī ubhe stām //6//*
*ahā arātimavidaḥ syonamapyabhūrbhadre sukṛtasya loke /*
*evāhaṁ tvā kṣetriyānnirṛtyā jāmiśaṁsād druho muṁchāmi varuṇasya pāśāt /*
*anāgasaṁ brahmaṇā tvā kṛṇomi śive te dyāvāpṛthivī ubhe stām //7//*
*suryamṛtaṁ tamaso grāhyā adhidevā muṁchanto asṛjannireṇasaḥ /*
*evāhaṁ tvā kṣetriyānnirṛtyā jāmiśaṁsād druho muṁchāmi varuṇasya pāśāt /*
*anāgasaṁ brahmaṇā tvā kṛṇomi śive te dyāvāpṛthivī ubhe stām //8//*

### १४. परमात्मा देवाश्च (Paramātmā Devāścha) - अ. (Av.) १९.७२.१

यस्मात् कोशादुदभराम वेद तस्मिन्नन्तरव दध्म एनम् ।
कृतमिष्टं ब्रह्मणो वीर्येण तेन मा देवास्तपसावतेह ॥१॥
*yasmāt kośādudabharāma veda tasminnantarava dadhma enam /*
*kṛtamiṣṭaṁ brahmaṇo vīryeṇa tena mā devāstapasāvateha //1//*

१५. मन्युः (Manyuḥ) - अ. (Av.) ६.४२.१-३

अव ज्यामिव धन्वनो मन्युं तनोमि ते हृदः। यथा संमनसौ भूत्वा सखायाविव सचावहै ॥१॥
सखायाविव सचावहा अव मन्युं तनोमि ते। अधस्ते अश्मनो मन्युमुपास्यामसि यो गुरुः ॥२॥
अभि तिष्ठामि ते मन्युं पार्ष्ण्या प्रपदेन च। यथावशो न वादिषो मम चित्तमुपायसि ॥३॥
*ava jyāmiva dhanvano manyuṁ tanomi te hṛdaḥ ।*
*yathā saṁmanasau bhūtvā sakhāyāviva sachāvahai ॥1॥*
*sakhāyāviva sachāvahā ava manyuṁ tanomi te ।*
*adhaste aśmano manyumupāsyāmasi yo guruḥ ॥2॥*
*abhi tiṣṭhāmi te manyuṁ pārṣṇyā prapadena cha ।*
*yathāvaśo na vādiṣo mama chittamupāyasi ॥3॥*

१६. मन्युशमनम् (Manyuśamanam) - अ. (Av.) ६.४३.१-३

अयं दर्भो विमन्युकः स्वाय चारणाय च। मन्योर्विमन्युकस्यायं मन्युशमन उच्यते ॥१॥
अयं यो भरिमूलः समुद्रमवतिष्ठति। दर्भः पृथिव्या उत्थितो मन्युशसन उच्यते ॥२॥
वि ते हन्व्यां शरणिं वि ते मुख्यां नयामसि। यथावशो न वादिषो मम चित्तमुपायसि ॥३॥
*ayaṁ darbho vimanyukaḥ svāya chāraṇāya cha ।*
*manyorvimanyukasyāyaṁ manyuśamana uchyate ॥1॥*
*ayaṁ yo bharimūlaḥ samudramavatiṣṭhati ।*
*darbhaḥ pṛthivyā utthito manyuśasana uchyate ॥2॥*
*vi te hanvyāṁ śaraṇiṁ vi te mukhyāṁ nayāmasi ।*
*yathāvaśo na vādiṣo mama chittamupāyasi ॥3॥*

१७. यक्ष्मनाशनम् (Yakṣamanāśanam) - अ. (Av.) ३.७.६-७; १.१२.१-४; ६.२.१-३; ६.९१.१-२

अ. (Av.) ३.७.६-७

यदासुतेः क्रियमाणायाः क्षेत्रिय त्वा व्यानशे। वेदाहं तस्य भेषजं क्षेत्रियं नाशयामि त्वत् ॥६॥
अपवासे नक्षत्राणामपवास उषसामुत। अपास्मत् सर्वं दुर्भूतमप क्षेत्रियमुच्छतु ॥७॥
*yadāsuteḥ kriyamāṇāyāḥ kṣetriya tvā vyānaśe ।*
*vedāhaṁ tasya bheṣajaṁ kṣetriyaṁ nāśayāmi tvat ॥6॥*
*apavāse nakṣatrāṇāmapavāsa uṣasāmuta ।*
*apāsmat sarvaṁ durbhūtamapa kṣetriyamuchchhatu ॥7॥*

अ. (Av.) १.१२.१-४

जरायुजः प्रथम उस्रियो वृषा वातभ्रजा स्तनयन्नेति वृष्ट्या ।
स नो मृडाति तन्व ऋजुगो रुजन् य एकमोजस्त्रेधा विचक्रमे ॥१॥
अंगेअंगे शोचिषा शिश्रियाणं नमस्यन्तस्त्वा हविषा विधेम ।
अंकान्त्समंकान् हविषा विधेम यो अग्रभीत् पर्वास्या ग्रभीता ॥२॥
मुंच शीर्षक्त्या उत कास एनं परुष्परुराविवेशा यो अस्य ।
यो अभ्रजा वातजा यश्च शुष्मो वनस्पतीन्त्सचतां पर्वतांश्च ॥३॥
शं मे परस्मै गायत्राय शमस्त्ववराय मे । शं मे चतुर्भ्यो अंगेभ्यः शमस्तु तन्वे३ मम ॥४॥
*jarāyujaḥ prathama usriyo vṛṣā vātabhrajā stanayanneti vṛṣṭyā ।*
*sa no mṛḍāti tanva ṛjugo rujan ya ekamojastredhā vichakrame ॥1॥*
*aṁgeaṁge śochiṣā śiśriyāṇaṁ namasyantastvā haviṣā vidhema ।*
*aṁkāntsamaṁkān haviṣā vidhema yo agrabhīt parvāsyā grabhītā ॥2॥*
*muṁcha śīrṣaktyā uta kāsa enaṁ paruṣparurāviveśā yo asya ।*
*yo abhrajā vātajā yaścha śuṣmo vanaspatīntsachatāṁ parvatāṁścha ॥3॥*
*śaṁ me parasmai gāyatrāya śamastvavarāya me ।*
*śaṁ me chaturbhyo aṁgebhyaḥ śamastu tanve3 mama ॥4॥*

अ. (Av.) ६.९१.१-२

इमं यवमष्टायोगैः षड्योगेभिरचर्कृषुः। तेना ते तन्वो३रपोऽपाचीनमप व्यये ॥१॥
न्य१ग् वातो वाति न्यक् तपति सूर्यः। नीचीनमघ्न्या दुहे न्यग् भवतु ते रपः ॥२॥
*imaṁ yavamaṣṭāyogaiḥ ṣaḍyogebhiracharkṛṣuḥ ।*
*tenā te tanvo3rapo'pāchīnamapa vyaye ॥1॥*

*nya1g vāto vāti nyak tapati sūryaḥ । nīchīnamaghnyā duhe nyag bhavatu te rapaḥ ।।2 ।।*

१८. यक्ष्मनाशनोऽग्निः (Yakṣamanāśano'gniḥ) - अ. (Av.) १.२५.१-४

यदग्निरापो अदहत् प्रविश्य यत्राकृण्वन् धर्मधृतो नमांसि ।
तत्र त आहुः परमं जनित्रं स नः संविद्वान् परि वृङ्घि तक्मन् ॥१॥
यद्यर्चिर्यदि वासि शोचिः शकल्येषि यदि वा ते जनित्रम् ।
ह्रूडुर्नामासि हरितस्य देव स नः संविद्वान्परि वृङ्घि तक्मन् ॥२॥
यदि शोको यदि वाभिशोको यदि वा राज्ञो वरुणस्यासि पुत्रः ।
ह्रूडुर्नामासि हरितस्य देव स नः संविद्वान् परि वृङ्घि तक्मन् ॥३॥
नमः शीताय तक्मने नमो रूराय शोचिषे कृणोमि ।
यो अन्येद्युरुभयद्युरभ्येति तृतीयकाय नमो अस्तु तक्मने ॥४॥
*yadagnirāpo adahat praviśya yatrākṛṇvan dharmadhṛto namāṁsi ।*
*tatra ta āhuḥ paramaṁ janitraṁ sa naḥ saṁvidvān pari vṛṅgdhi takman ।।1 ।।*
*yadyarchiryadi vāsi śochiḥ śakalyeṣi yadi vā te janitram ।*
*hrūḍurnāmāsi haritasya deva sa naḥ saṁvidvānpari vṛṅgdhi takman ।।2 ।।*
*yadi śoko yadi vābhiśoko yadi vā rājño varuṇasyāsi putraḥ ।*
*hrūḍurnāmāsi haritasya deva sa naḥ saṁvidvān pari vṛṅgdhi takman ।।3 ।।*
*namaḥ śītāya takmane namo rūrāya śochiṣe kṛṇomi ।*
*yo anyedyurubhayadyurabhyeti tṛtīyakāya namo astu takmane ।।4 ।।*

१९. यमः (Yamaḥ) - अ. (Av.) १.१४.१-४

भगमस्या वर्च आदिष्यधि वृक्षादिव स्रजम्। महाबुध्नइव पर्वतो ज्योक् पितृष्वास्ताम् ॥१॥
एषा ते राजन् कन्या वधूर्नि धूयतां यम। सा मातुर्बध्यतां गृहेऽथो भ्रातुरथो पितुः ॥२॥
एषा ते कुलपा राजन् तामु ते परि दद्मसि। ज्योक् पितृष्वासाता आ शीर्ष्णः समोप्यात् ॥३॥
असितस्य ते ब्रह्मणा कश्यपस्य गयस्य च। अन्तः कोशमिव जामयोऽपि नह्यामि ते भगम् ॥४॥
*bhagamasyā varcha ādiṣyadhi vṛkṣādiva srajam ।*
*mahābudhnaiva parvato jyok pitṛṣvāstām ।।1 ।।*
*eṣā te rājan kanyā vadhūrni dhūyatāṁ yama ।*
*sā māturbadhyatāṁ gṛhe'tho bhrāturatho pituḥ ।।2 ।।*
*eṣā te kulapā rājan tāmu te pari dadmasi । jyok pitṛṣvāsātā ā śīrṣṇaḥ samopyāt ।।3 ।।*
*asitasya te brahmaṇā kaśyapasya gayasya cha ।*
*antaḥ kośamiva jāmayo'pi nahyāmi te bhagam ।।4 ।।*

२०. वनस्पतिः (Vanaspatiḥ) - अ. (Av.) २.९.१-५; ६.९६.१-२

अ. (Av.) २.९.१-५

दशवृक्ष मुंचेमं रक्षसो ग्राह्या अधि यैनं जग्राह पर्वसु।
अथो एनं वनस्पते जीवानां लोकमुन्नय ॥१॥
आगादुदगादयं जीवानां व्रातमप्यगात्। अभूदु पुत्राणां पिता नृणां च भगवत्तमः ॥२॥
अधीतीरध्यगादयमधि जीवपुरा अगन्। शतं ह्यस्य भिषजः सहस्रमुत वीरुधः ॥३॥
देवास्ते चीतिमविदन् ब्रह्माण उत वीरुधः। चीतिं ते विश्वे देवा अविदन् भ्रम्यामधि ॥४॥
यश्चकार स निष्करत् स एव सुभिषक्तमः। स एव तुभ्यं भेषजानि कृणवद् भिषजा शुचिः ॥५॥
*daśavṛkṣa muṁchemaṁ rakṣaso grāhyā adhi yainaṁ jagrāha parvasu ।*
*atho enaṁ vanaspate jīvānāṁ lokamunnaya ।।1 ।।*
*āgādudagādayaṁ jīvānāṁ vrātamapyagāt ।*
*abhūdu putrāṇāṁ pitā nṛṇāṁ cha bhagavattamaḥ ।।2 ।।*
*adhītīradhyagādayamadhi jīvapurā agan ।*
*śataṁ hyasya bhiṣajaḥ sahasramuta vīrudhaḥ ।।3 ।।*
*devāste chītimavidan brahmāṇa uta vīrudhaḥ ।*
*chītiṁ te viśve devā avidan bhramyāmadhi ।।4 ।।*
*yaśchakāra sa niṣkarat sa eva subhiṣaktamaḥ ।*
*sa eva tubhyaṁ bheṣajāni kṛṇavad bhiṣajā śuchiḥ ।।5 ।।*

अ. (Av.) ६.९६.१-२

यो ओषधयः सोमराज्ञीर्बह्वीः शतविचक्षणाः। बृहस्पति प्रसूतास्ता नो मुंचन्त्वंहसः ॥१॥
मुंचन्तु मा शपथ्या३दथो वरुण्यादुत। अथो यमस्य पड्वीशाद् विश्वस्माद् देव किल्बिषात् ॥२॥
*yo oṣadhayaḥ somarājñīrbahvīḥ śatavichakṣaṇāḥ |*
*bṛhaspati prasūtāstā no muṁchantvaṁhasaḥ ||1 ||*
*muṁchantu mā śapathyā3datho varuṇyāduta |*
*atho yamasya paḍvīśād viśvasmād deva kilbiṣāt ||2 ||*

२१. वनस्पतिः (कुष्ठ) (Vanaspatiḥ (Kuṣṭha)) - अ. (Av.) ६.९५.१-३

अश्वत्थो देवसदनस्तृतीयस्यामितो दिवि। तत्रामृतस्य चक्षणं देवाः कृष्ठमवन्वत ॥१॥
हिरण्ययी नौरचरद्धिरण्यबन्धना दिवि। तत्रामृतस्य पुष्पं देवाः कुष्ठमवन्वत ॥२॥
गर्भो अस्योषधीनां गर्भो हिमवतामुत। गर्भो विश्वस्य भूतस्येमं मे अगदं कृधि ॥३॥
*aśvattho devasadanastṛtīyasyāmito divi |*
*tatrāmṛtasya chakṣaṇaṁ devāḥ kṛṣṭhamavanvata ||1 ||*
*hiraṇyayī nauracharaddhiraṇyabandhanā divi |*
*tatrāmṛtasya puṣpaṁ devāḥ kuṣṭhamavanvata ||2 ||*
*garbho asyoṣadhīnāṁ garbho himavatāmuta |*
*garbho viśvasya bhūtasyemaṁ me agadaṁ kṛdhi ||3 ||*

२२. वनस्पतिः यक्ष्मनाशनम् (Vanaspatiḥ Yakṣamanāśanam) - अ. (Av.) ६.१२७.१-३

विद्रधस्य बलासस्य लोहितस्य वनस्पते। विसल्पकस्योषधे मोच्छिषः पिशितं चन ॥१॥
यौ ते बलास तिष्ठतः कक्षे मुष्कावपश्रितौ। वेदाहं तस्य भेषजं चीपुद्रुरभिचक्षणम् ॥२॥
यो अंग्यो यः कर्ण्यो यो अक्ष्योर्विसल्पकः । वि वृहामो विसल्पकं विद्रधं हृदयामयम्।
परा तमज्ञातं यक्ष्ममधरांचं सुवामसि ॥३॥
*vidradhasya balāsasya lohitasya vanaspate |*
*visalpakasyoṣadhe mochchhiṣaḥ piśitaṁ chana ||1 ||*
*yau te balāsa tiṣṭhataḥ kakṣe muṣkāvapaśritau |*
*vedāhaṁ tasya bheṣajaṁ chīpudrurabhichakṣaṇam ||2 ||*
*yo aṁgyo yaḥ karṇyo yo akṣayorvisalpakaḥ |*
*vi vṛhāmo visalpakaṁ vidradhaṁ hṛdayāmayam |*
*parā tamajñātaṁ yakṣamamadharāṁchaṁ suvāmasi ||3 ||*

२३. विचृतौतारके (Vichṛtautārake) - अ. (Av.) ३.७.४

अमू ये दिवि सुभगे विचृतौ नाम तारके। वि क्षेत्रियस्य मुंचतामधमं पाशमुत्तमम् ॥४॥
*amū ye divi subhage vichṛtau nāma tārake |*
*vi kṣetriyasya muṁchatāmadhamaṁ pāśamuttamam ||4 ||*

२४. विद्युत् (Vidyut) - अ. (Av.) १.१३.१-४

नमस्ते अस्तु विद्युते नमस्ते स्तनयित्नवे । नमस्ते अस्त्वश्मने येना दूडाशे अस्यसि ॥१॥
नमस्ते प्रवतो नपाद् यतस्तपः समूहसि । मृडया नस्तनूभ्यो मयस्तोकेभ्यस्कृधि ॥२॥
प्रवतो नपान्नम एवास्तु तुभ्यं नमस्ते हेतये तपुषे च कृण्मः ।
विद्म ते धाम परमं गुहा यत् समुद्रे अन्तर्निहितासि नाभिः ॥३॥
यां त्वा देवा असृजन्त विश्व इषुं कृण्वाना असनाय धृष्णुम् ।
सा नो मृड विदथे गृणाना तस्यै ते नमो अस्तु देवि ॥४॥
*namaste astu vidyute namaste stanayitnave | namaste astvaśmane yenā dūḍāśe asyasi ||1 ||*
*namaste pravato napād yatastapaḥ samūhasi |*
*mṛḍayā nastanūbhyo mayastokebhyaskṛdhi ||2 ||*
*pravato napānnama evāstu tubhyaṁ namaste hetaye tapuṣe cha kṛṇmaḥ |*
*vidma te dhāma paramaṁ guhā yat samudre antarnihitāsi nābhiḥ ||3 ||*
*yāṁ tvā devā asṛjanta viśva iṣuṁ kṛṇvānā asanāya dhṛṣṇum |*
*sā no mṛḍa vidathe gṛṇānā tasyai te namo astu devi ||4 ||*

२५. शाला (Śālā) - अ. (Av.) ९.३.१-३१

उपमितां प्रतिमितामथो परिमितामुत। शालाया विश्ववाराया नद्धानि वि चृतामसि ॥१॥

यत् ते नद्धं विश्ववारे पाशो ग्रन्थिश्च यः कृतः।
बृहस्पतिरिवाहं बलं वाचा वि स्रंसयामि तत् ॥२॥
आ ययाम सं बबर्ह ग्रन्थींश्चकार ते दृढान्। परूंषि विद्वांछस्तेवेन्द्रेण वि चृतामसि ॥३॥
वंशानां ते नहनानां प्राणाहस्य तृणस्य च। पक्षाणां विश्ववारे ते नद्धानि वि चृतामसि ॥४॥
संदंशानां पलदानां परिष्वंजल्यस्य च। इदं मानस्य पत्नया नद्धानि वि चृतामसि ॥५॥
यानि तेऽन्तः शिक्यान्याबेधू रण्याय कम्।
प्र ते तानि चृतामसि शिवा मानस्य पत्नी न उद्धिता तन्वे भव ॥६॥
हविर्धानमग्निशालं पत्नीनां सदनं सदः। सदो देवानामसि देवि शाले ॥७॥
अक्षुमोपशं विततं सहस्राक्षं विषूवति। अवनद्धमभिहितं ब्रह्मणा वि चृतामसि ॥८॥
यस्त्वा शाले प्रतिगृह्णाति येन चासि मिता त्वम्।
उभौ मानस्य पत्नि तौ जीवतां जरदष्टी ॥९॥
अमुत्रैनमा गच्छताद् दृढा नद्धा परिष्कृता। यस्यास्ते विचृतामस्यंगमङ्गं परुष्परुः ॥१०॥
यस्त्वा शाले निमिमाय संजभार वनस्पतीन्। प्रजायै चक्रे त्वा शाले परमेष्ठी प्रजापतिः ॥११॥
नमस्तस्मै नमो दात्रे शालापतये च कृण्मः। नमोऽग्नये प्रचरते पुरुषाय च ते नमः ॥१२॥
गोभ्यो अश्वेभ्यो नमो यच्छालायां विजायते। विजावति प्रजावति वि ते पाशांश्चृतामसि ॥१३॥
अग्निमन्तश्छादयसि पुरुषान् पशुभिः सह। विजावति प्रजावति वि ते पाशांश्चृतामसि ॥१४॥
अन्तरा द्यां च पृथिवीं च यद् व्यचस्तेन शालां प्रति गृह्णामि त इमाम्।
यदन्तरिक्षं रजसो विमानं तत् कृण्वेऽहमुदरं शेवधिभ्यः। तेन शालां प्रति गृह्णामि तस्मै ॥१५॥
ऊर्जस्वती पयस्वती पृथिव्यां निमिता मिता।
विश्वान्नं बिभ्रती शाले मा हिंसीः प्रतिगृह्णतः ॥१६॥
तृणैरावृता पलदान् वसाना रात्रीव शाला जगतो निवेशनी।
मिता पृथिव्यां तिष्ठसि हस्तिनीव पद्वती ॥१७॥
इटस्य ते वि चृताम्यपि नद्धमपोर्णुवन्। वरुणेन समुब्जितां मित्रः प्रातर्व्युब्जतु ॥१८॥
ब्रह्मणा शालां निमितां कविभिर्निमितां मिताम्। इन्द्राग्नी रक्षतां शालाममृतौ सोम्यं सदः ॥१९॥
कुलायेऽधि कुलायं कोशे कोशः समुब्जितः। तत्र मर्तो वि जायते यस्माद् विश्वं प्रजायते ॥२०॥
या द्विपक्षा चतुष्पक्षा षट्पक्षा या निमायेत।
अष्टापक्षां दशपक्षां शालां मानस्य पत्नीमग्निर्गर्भइवा शये ॥२१॥
प्रतीचीं त्वा प्रतीचीनः शाले प्रैम्यहिंसतीम्। अग्निर्ह्य१न्तरापश्च ऋतस्य प्रथमा द्वाः ॥२२॥
इमा आपः प्र भराम्ययक्ष्मा यक्ष्मनाशनीः। गृहानुप प्र सीदाम्यमृतेन सहाग्निना ॥२३॥
मा नः पाशं प्रति मुचो गुरुर्भारो लघुर्भव। वधूमिव त्वा शाले यत्र कामं भरामसि ॥२४॥
प्राच्या दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः ॥२५॥
दक्षिणाया दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः ॥२६॥
प्रतीच्या दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः ॥२७॥
उदीच्या दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः ॥२८॥
ध्रुवाया दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः ॥२९॥
ऊर्ध्वाया दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः ॥३०॥
दिशोदिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः ॥३१॥
*upamitāṁ pratimitāmatho parimitāmuta । śālāyā viśvavārāyā naddhāni vi chṛtāmasi ॥1॥*
*yat te naddhaṁ viśvavāre pāśo granthiścha yaḥ kṛtaḥ ।*
*bṛhaspatirivāhaṁ balaṁ vāchā vi sraṁsayāmi tat ॥2॥*
*ā yayāma saṁ babarha granthīṁśchakāra te dṛḍhān ।*
*parūṁṣi vidvāṁchhastevendreṇa vi chṛtāmasi ॥3॥*
*vaṁśānāṁ te nahanānāṁ prāṇāhasya tṛṇasya cha ।*
*pakṣāṇāṁ viśvavāre te naddhāni vi chṛtāmasi ॥4॥*
*saṁdaṁśānāṁ paladānāṁ pariṣvaṁjalyasya cha ।*
*idaṁ mānasya patnayā naddhāni vi chṛtāmasi ॥5॥*
*yāni te'ntaḥ śikyānyābedhū raṇyāya kam ।*
*pra te tāni chṛtāmasi śivā mānasya patnī na uddhitā tanve bhava ॥6॥*
*havirdhānamagniśālaṁ patnīnāṁ sadanaṁ sadaḥ । sado devānāmasi devi śāle ॥7॥*

*akṣumopaśaṁ vitataṁ sahasrākṣaṁ viṣūvati ।*
*avanaddhamabhihitaṁ brahmaṇā vi chṛtāmasi ॥8 ॥*
*yastvā śāle pratigṛhṇāti yena chāsi mitā tvam ।*
*ubhau mānasya patni tau jīvatāṁ jaradaṣṭī ॥9 ॥*
*amutrainamā gachchhatād dṛḍhā naddhā pariṣkṛtā ।*
*yasyāste vichṛtāmasyaṁgamaṅgaṁ paruṣparuḥ ॥10 ॥*
*yastvā śāle nimimāya saṁjabhāra vanaspatīn ।*
*prajāyai chakre tvā śāle parameṣṭhī prajāpatiḥ ॥11 ॥*
*namastasmai namo dātre śālāpataye cha kṛṇmaḥ ।*
*namo'gnaye pracharate puruṣāya cha te namaḥ ॥12 ॥*
*gobhyo aśvebhyo namo yachchhālāyāṁ vijāyate ।*
*vijāvati prajāvati vi te pāśāṁśchṛtāmasi ॥13 ॥*
*agnimantaśchhādayasi puruṣān paśubhiḥ saha ।*
*vijāvati prajāvati vi te pāśāṁśchṛtāmasi ॥14 ॥*
*antarā dyāṁ cha pṛthivīṁ cha yad vyachastena śālāṁ prati gṛhṇāmi ta imām ।*
*yadantarikṣaṁ rajaso vimānaṁ tat kṛṇve'hamudaraṁ śevadhibhyaḥ ।*
*tena śālāṁ prati gṛhṇāmi tasmai ॥15 ॥*
*ūrjasvatī payasvatī pṛthivyāṁ nimitā mitā ।*
*viśvānnaṁ bibhratī śāle mā hiṁsīḥ pratigṛhṇataḥ ॥16 ॥*
*tṛṇairāvṛtā paladān vasānā rātrīva śālā jagato niveśanī ।*
*mitā pṛthivyāṁ tiṣṭhasi hastinīva padvatī ॥17 ॥*
*iṭasya te vi chṛtāmyapi naddhamaporṇuvan ।*
*varuṇena samubjitāṁ mitraḥ prātarvyubjatu ॥18 ॥*
*brahmaṇā śālāṁ nimitāṁ kavibhirnimitāṁ mitām ।*
*indrāgnī rakṣatāṁ śālāmamṛtau somyaṁ sadaḥ ॥19 ॥*
*kulāye'dhi kulāyaṁ kośe kośaḥ samubjitaḥ ।*
*tatra marto vi jāyate yasmād viśvaṁ prajāyate ॥20 ॥*
*yā dvipakṣā chatuṣpakṣā ṣaṭpakṣā yā nimāyeta ।*
*aṣṭāpakṣāṁ daśapakṣāṁ śālāṁ mānasya patnīmagnirgarbhaivā śaye ॥21 ॥*
*pratīchīṁ tvā pratīchīnaḥ śāle praimyahiṁsatīm ।*
*argnihya1ntarāpaścha ṛtasya prathamā dvāḥ ॥22 ॥*
*imā āpaḥ pra bharāmyayakṣamā yakṣamanāśanīḥ ।*
*gṛhānupa pra sīdāmyamṛtena sahāgninā ॥23 ॥*
*mā naḥ pāśaṁ prati mucho gururbhāro laghurbhava ।*
*vadhūmiva tvā śāle yatra kāmaṁ bharāmasi ॥24 ॥*
*prāchyā diśaḥ śālāyā namo mahimne svāhā devebhyaḥ svāhyebhyaḥ ॥25 ॥*
*dakṣiṇāyā diśaḥ śālāyā namo mahimne svāhā devebhyaḥ svāhyebhyaḥ ॥26 ॥*
*pratīchyā diśaḥ śālāyā namo mahimne svāhā devebhyaḥ svāhyebhyaḥ ॥27 ॥*
*udīchyā diśaḥ śālāyā namo mahimne svāhā devebhyaḥ svāhyebhyaḥ ॥28 ॥*
*dhruvāyā diśaḥ śālāyā namo mahimne svāhā devebhyaḥ svāhyebhyaḥ ॥29 ॥*
*ūrdhvāyā diśaḥ śālāyā namo mahimne svāhā devebhyaḥ svāhyebhyaḥ ॥30 ॥*
*diśodiśaḥ śālāyā namo mahimne svāhā devebhyaḥ svāhyebhyaḥ ॥31 ॥*

२६. सर्व शीर्षामयापकरणम् (Sarva Śīrṣāmayāpakaraṇam) . अ. ९.८.१-२२

शीर्षक्तिं शीर्षमयं कर्णशूलं विलोहितम्। सर्वं शीर्षण्यं ते रोगं बहिर्निर्मन्त्रयामहे ॥१॥
कर्णाभ्यां ते कंकूषेभ्यः कर्णशूलं विसल्पकम्। सर्वं शीर्षण्यं ते रोगं बहिर्निर्मन्त्रयामहे ॥२॥
यस्य हेतोः प्रच्यवते यक्ष्मः कर्णत आस्यतः। सर्वं शीर्षण्यं ते रोगं बहिर्निर्मन्त्रयामहे ॥३॥
यः कृणोति प्रमोतमन्धं कृणोति पूरुषम्। सर्वं शीर्षण्यं ते रोगं बहिर्निर्मन्त्रयामहे ॥४॥
अङ्गभेदमंगज्वरं विश्वांग्यं विसल्पकम्। सर्वं शीर्षण्यं ते रोगं बहिर्निर्मन्त्रयामहे ॥५॥
यस्य भीमः प्रतीकाश उद्वेपयति पूरुषम्। तक्मानं विश्वशारदं बहिर्निर्मन्त्रयामहे ॥६॥
य ऊरू अनुसर्पत्यथो एति गवीनिके। यक्ष्मं ते अन्तरंगेभ्यो बहिर्निर्मन्त्रयामहे ॥७॥
यदि कामादपकामाद्धृदयाज्जायते परि। हृदो बलासमंगेभ्यो बहिर्निर्मन्त्रयामहे ॥८॥
हरिमाणं ते अंगेभ्योऽप्वामन्तरोदरात्। यक्ष्मोधामन्तरात्मनो बहिर्निर्मन्त्रयामहे ॥९॥
आसो बलासो भवतु मूत्रं भवत्वामयत्। यक्ष्माणां सर्वेषां विषं निरवोचमहं त्वत् ॥१०॥

बहिर्बिलं निर्द्रवतु काहाबाहं तवोदरात्। यक्ष्माणां सर्वेषां विषं निरवोचमहं त्वत् ॥११॥
उदरात् ते क्लोम्नो नाभ्या हृदयादधि। यक्ष्माणां सर्वेषां विषं निरवोचमहं त्वत् ॥१२॥
याः सीमानं विरुजन्ति मूर्धानं प्रत्यर्षणीः। अहिंसन्तीरनामया निर्द्रवन्तु बहिर्बिलम् ॥१३॥
या हृदयमुपर्षन्त्यनुतन्वन्ति कीकसाः। अहिंसन्तीरनामया निर्द्रवन्तु बर्हिर्बिलम् ॥१४॥
याः पार्श्वे उपर्षन्त्यनुनिक्षन्ति पृष्टीः। अहिंसन्तीरनामया निर्द्रवन्तु बहिर्बिलम् ॥१५॥
यास्तिरश्चीरुपर्षन्त्यर्षणीर्वक्षणासु ते। अहिंसन्तीरनामया निर्द्रवन्तु बर्हिर्बिलम् ॥१६॥
या गुदा अनुसर्पन्त्यान्त्राणि मोहयन्ति च। अहिंसन्तीरनामया निर्द्रवन्तु बहिर्बिलम् ॥१७॥
या मज्ज्ञो निर्धयन्ति परूंषि विरुजन्ति व। अहिंसन्तीरनामया निर्द्रवन्तु बर्हिर्बिलम् ॥१८॥
ये अंगानि मदयन्ति यक्ष्मासो रोपणास्तव। यक्ष्माणां सर्वेषां विषं निरवोचमहं त्वत् ॥१९॥
विसल्पस्य विद्रधस्य वातीकारस्य वालजेः। यक्ष्माणां सर्वेषां विषं निरवोचमहं त्वत् ॥२०॥
पादाभ्यां ते जानुभ्यां श्रोणिभ्यां परि भंससः। अनूकादर्षणीरुष्णिहाभ्यः शीर्ष्णो रोगमनीनशम्॥२१॥
सं ते शीर्ष्णाः कपालानि हृदयस्य च यो विधुः।
उद्यन्नादित्य रश्मिभिः शीर्ष्णो रोगमनीनशोऽङ्गभेदमशीशमः ॥२२॥

*śīrṣaktiṁ śīrṣamayaṁ karṇaśūlaṁ vilohitam |*
*sarvaṁ śīrṣaṇyaṁ te rogaṁ bahirnirmantrayāmahe ||1 ||*
*karṇābhyāṁ te kaṁkūṣebhyaḥ karṇaśūlaṁ visalpakam |*
*sarvaṁ śīrṣaṇyaṁ te rogaṁ bahirnirmantrayāmahe ||2 ||*
*yasya hetoḥ prachyavate yakṣamaḥ karṇata āsyataḥ |*
*sarvaṁ śīrṣaṇyaṁ te rogaṁ bahirnirmantrayāmahe ||3 ||*
*yaḥ kṛṇoti pramotamandhaṁ kṛṇoti pūruṣam |*
*sarvaṁ śīrṣaṇyaṁ te rogaṁ bahirnirmantrayāmahe ||4 ||*
*aṅgabhedamaṁgajvaraṁ viśvāṁgyaṁ visalpakam |*
*sarvaṁ śīrṣaṇyaṁ te rogaṁ bahirnirmantrayāmahe ||5 ||*
*yasya bhīmaḥ pratīkāśa udvepayati pūruṣam |*
*takmānaṁ viśvaśāradaṁ bahirnirmantrayāmahe ||6 ||*
*ya ūrū anusarpatyatho eti gavīnike |*
*yakṣamaṁ te antaraṁgebhyo bahirnirmantrayāmahe ||7 ||*
*yadi kāmādapakāmāddhṛdayājjāyate pari |*
*hṛdo balāsamaṁgebhyo bahirnirmantrayāmahe ||8 ||*
*harimāṇaṁ te aṁgebhyo'pvāmantarodarāt |*
*yakṣamodhāmantarātmano bahirnirmantrayāmahe ||9 ||*
*āso balāso bhavatu mūtraṁ bhavatvāmayat |*
*yakṣamāṇāṁ sarveṣāṁ viṣaṁ niravochamahaṁ tvat ||10 ||*
*bahirbilaṁ nirdravatu kāhābāhaṁ tavodarāt |*
*yakṣamāṇāṁ sarveṣāṁ viṣaṁ niravochamahaṁ tvat ||11 ||*
*udarāt te klomno nābhyā hṛdayādadhi |*
*yakṣamāṇāṁ sarveṣāṁ viṣaṁ niravochamahaṁ tvat ||12 ||*
*yāḥ sīmānaṁ virujanti mūrdhānaṁ pratyarṣaṇīḥ |*
*ahiṁsantīranāmayā nirdravantu bahirbilam ||13 ||*
*yā hṛdayamuparṣantyanutanvanti kīkasāḥ |*
*ahiṁsantīranāmayā nirdravantu barhirbilam ||14 ||*
*yāḥ pārśve uparṣantyanunikṣanti pṛṣṭīḥ | ahiṁsantīranāmayā nirdravantu bahirbilam ||15 ||*
*yāstiraśchīruparṣantyarṣaṇīrvakṣaṇāsu te |*
*ahiṁsantīranāmayā nirdravantu barhirbilam ||16 ||*
*yā gudā anusarpantyāntrāṇi mohayanti cha |*
*ahiṁsantīranāmayā nirdravantu bahirbilam ||17 ||*
*yā majjño nirdhayanti parūṁṣi virujanti va |*
*ahiṁsantīranāmayā nirdravantu barhirbilam ||18 ||*
*ye aṁgāni madayanti yakṣamāso ropaṇāstava |*
*yakṣamāṇāṁ sarveṣāṁ viṣaṁ niravochamahaṁ tvat ||19 ||*
*visalpasya vidradhasya vātīkārasya vālajeḥ |*
*yakṣamāṇāṁ sarveṣāṁ viṣaṁ niravochamahaṁ tvat ||20 ||*
*pādābhyāṁ te jānubhyāṁ śroṇibhyāṁ pari bhaṁsasaḥ |*

*anūkādarṣaṇīruṣṇihābhyaḥ śīrṣṇo rogamanīnaśam* //21 //
*saṁ te śīrṣṇāḥ kapālāni hṛdayasya cha yo vidhuḥ* /
*udyannāditya raśmibhiḥ śīrṣṇo rogamanīnaśo'ṅgabhedamaśīśamaḥ* //22 //

२७. सोमः (Somaḥ) – अ. ६.९६.३

यच्चक्षुषा मनसा यच्च वाचोपारिम जाग्रतो यत् स्वपन्तः। सोमस्तानि स्वधया नः पुनातु ॥३॥
*yachchakṣuṣā manasā yachcha vāchopārima jāgrato yat svapantaḥ* /
*somastāni svadhayā naḥ punātu* //3 //

२८. हरिणः (Hariṇaḥ) - अ. (Av.) ३.७.१-३

हरिणस्य रघुष्यदोऽधि शीर्षाणि भेषजम्। स क्षेत्रियं विषाणया विषूचीनमनीनशत् ॥१॥
अनु त्वा हरिणो वृषा पद्भिश्चतुर्भिरक्रमीत्। विषाणे वि ष्य गुष्पितं यदस्य क्षेत्रियं हृदि ॥२॥
अदो यदवरोचते चतुष्पक्षमिवच्छदिः। तेना ते सर्वं क्षेत्रियामंगेभ्यो नाशयामसि ॥३॥
*hariṇasya raghuṣyado'dhi śīrṣāṇi bheṣajam* / *sa kṣetriyaṁ viṣāṇayā viṣūchīnamanīnaśat* //1 //
*anu tvā hariṇo vṛṣā padbhiśchaturbhirakramīt* /
*viṣāṇe vi ṣya guṣpitaṁ yadasya kṣetriyaṁ hṛdi* //2 //
*ado yadavarochate chatuṣpakṣamivachchhadiḥ* /
*tenā te sarvaṁ kṣetriyāmaṁgebhyo nāśayāmasi* //3 //

## ४७६. भृगुर् आथर्वणः (Bhṛgur Ātharvaṇaḥ)

१. इन्द्रः (Indraḥ) – अ. २.५.१-७

इन्द्र जुषस्व प्र वहा याहि शूर हरिभ्याम् । पिबा सुतस्य मतेरिह मधोश्चकानश्चरुर्मदाय ॥१॥
इन्द्र जठरं नव्यो न पृणस्व मधोर्दिवो न । अस्य सुतस्य स्व१र्णोप त्वा मदाः सुवाचो अगुः ॥२॥
इन्द्रस्तुराषाण्मित्रो वृत्रं यो जघान यतीर्न । बिभेद बलं भृगुर्न ससहे शत्रून् मदे सोमस्य ॥३॥
आ त्वा विशन्तु सुतास इन्द्र पृणस्व कुक्षी विड्ढि शक्र धियोह्या नः ।
श्रुधी हवं गिरो मे जुषस्वेन्द्र स्वयुग्भिर्मत्स्वेह महे रणाय ॥४॥
इन्द्रस्य नु प्रा वोचं वीर्याणि यानि चकार प्रथमानि वज्री ।
अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत् पर्वतानाम् ॥५॥
अहन्नहिं पर्वते शिश्रियाणं त्वष्टास्मै वज्रं स्वर्यं ततक्ष ।
वाश्राइव धेनवः स्यन्दमाना अंजः समुद्रमव जग्मुरापः ॥६॥
वृषायमाणो अवृणीत सोमं त्रिकद्रुकेष्वपिबत् सुतस्य ।
आ सायकं मघवादत्त वज्रमहन्नेनं प्रथमजामहीनाम् ॥७॥
*indra juṣasva pra vahā yāhi śūra haribhyām* /
*pibā sutasya materiha madhośchakānaścharurmadāya* //1 //
*indra jaṭharaṁ navyo na pṛṇasva madhordivo na* /
*asya sutasya sva1rṇopa tvā madāḥ suvācho aguḥ* //2 //
*indrasturāṣāṇmitro vṛtraṁ yo jaghāna yatīrna* /
*bibheda balaṁ bhṛgurna sasahe śatrūn made seāmasya* //3 //
*ā tvā viśantu sutāsa indra pṛṇasva kukṣī viḍḍhi śakra dhiyohyā naḥ* /
*śrudhī havaṁ giro me juṣasvendra svayugbhirmatsveha mahe raṇāya* //4 //
*indrasya nu prā vochaṁ vīryāṇi yāni chakāra prathamāni vajrī* /
*ahannahimanvapastatarda pra vakṣaṇā abhinat parvatānām* //5 //
*ahannahiṁ parvate śiśriyāṇaṁ tvaṣṭāsmai vajraṁ svaryaṁ tatakṣa* /
*vāśrāiva dhenavaḥ syandamānā aṁjaḥ samudramava jagmurāpaḥ* //6 //
*vṛṣāyamāṇo avṛṇīta somaṁ trikadrukeṣvapibat sutasya* /
*ā sāyakaṁ maghavādatta vajramahannenaṁ prathamajāmahīnām* //7 //

## ४७७. मत्स्यः सांमदो मान्यो वा मैत्रावरुणिर्बाहवो वा मत्स्या जालनद्धाः (Matsyaḥ Sāṁmado Mānyo Vā maitrāvaruṇirbāhavo Vā Matsyā Jālanaddhāḥ)

१. अदित्याः (Adityāḥ) - ऋ. (Rv.) ८.६७.१-२१

त्यान्नु क्षत्रियाँ अव आदित्यान्याचिषामहे। सुमृळीकाँ अभिष्टये ॥१॥
मित्रो नो अत्यंहतिं वरुणः पर्षदर्यमा। आदित्यासो यथा विदुः ॥२॥

तेषां हि चित्रमुक्थ्यं१ वरूथमस्ति दाशुषे। आदित्यानामरंकृते ॥३॥
महि वो महतामवो वरुण मित्रार्यमन्। अवांस्या वृणीमहे ॥४॥
जीवान्नो अभि धेतनादित्यासः पुरा हथात्। कद्ध स्थ हवनश्रुतः ॥५॥
यद्वः श्रान्ताय सुन्वते वरूथमस्ति यच्छर्दिः। तेना नो अधि वोचत ॥६॥
अस्ति देवा अंहोरुर्वास्ति रत्नमनागसः। आदित्या उद्भुतैनसः ॥७॥
मा नः सेतु सिषेदयं महे वृणक्तु नस्परि। इन्द्र इद्धि श्रुतो वशी ॥८॥
मा नो मृचा निपूर्णा वृजिनानामविष्यवः। देवा अभि प्र मृक्षत ॥९॥
उत त्वामदिते मह्यहं देव्युप ब्रुवे। सुमृळीकामभिष्टये ॥१०॥
पर्षि दीने गभीर आँ उग्रपुत्रे जिघांसतः। माकिस्तोकस्य नो रिषत् ॥११॥
अनेहो न उरुव्रज उरूचि वि प्रसर्तवे। कृधि तोकाय जीवसे ॥१२॥
ये मूर्धानः क्षितीनामदब्धासः स्वयशसः। व्रता रक्षन्ते अद्रुहः ॥१३॥
ते न आस्नो वृकाणमादित्यासो मुमोचत। स्तेनं बद्धमिवादिते ॥१४॥
अपो षु ण इयं शरुरादित्या अप दुर्मतिः। अस्मदेत्वजघ्नुषी ॥१५॥
शश्वद्धि वः सुदानव आदित्या ऊतिभिर्वयम्। पुरा नूनं बुभुज्महे ॥१६॥
शश्वन्तं हि प्रचेतसः प्रतियन्तं चिदेनसः। देवाः कृणुथ जीवसे ॥१७॥
तत्सु नो नव्यं सन्यस आदित्या यन्मुमोचति। बन्धाद् बद्धमिवादिते ॥१८॥
नास्माकमस्ति तत्तर आदित्यासो अतिष्कदे। यूयमस्मभ्यं मृळत ॥१९॥
मा नो हेतिर्विवस्वत आदित्याः कृत्रिमा शरुः। पुरा नु जरसो वधीत् ॥२०॥
वि षु द्वेषे व्यंहतिमादित्यासो वि संहितम्। विष्वग्वि बृहता रपः ॥२१॥

*tyānnu kṣatriyām̐ ava ādityānyāchiṣāmahe । sumṛlīkām̐ abhiṣṭaye ॥1॥*
*mitro no atyaṁhatiṁ varuṇaḥ parṣadaryamā । ādityāso yathā viduḥ ॥2॥*
*teṣāṁ hi chitramukthyaṁ1 varūthamasti dāśuṣe । ādityānāmaraṁkṛte ॥3॥*
*mahi vo mahatāmavo varuṇa mitrāryaman । avāṁsyā vṛṇīmahe ॥4॥*
*jīvānno abhi dhetanādityāsaḥ purā hathāt । kaddha stha havanaśrutaḥ ॥5॥*
*yadvaḥ śrāntāya sunvate varūthamasti yachchhardiḥ । tenā no adhi vochata ॥6॥*
*asti devā aṁhorurvāsti ratnamanāgasaḥ । ādityā udbhutainasaḥ ॥7॥*
*mā naḥ setu siṣedayaṁ mahe vṛṇaktu naspari । indra iddhi śruto vaśī ॥8॥*
*mā no mṛchā nipūrṇā vṛjinānāmaviṣyavaḥ । devā abhi pra mṛkṣata ॥9॥*
*uta tvāmadite mahyahaṁ devyupa bruve । sumṛlīkāmabhiṣṭaye ॥10॥*
*parṣi dīne gabhīra ām̐ ugraputre jighāṁsataḥ । mākistokasya no riṣat ॥11॥*
*aneho na uruvraja urūchi vi prasartave । kṛdhi tokāya jīvase ॥12॥*
*ye mūrdhānaḥ kṣitīnāmadabdhāsaḥ svayaśasaḥ । vratā rakṣante adruhaḥ ॥13॥*
*te na āsno vṛkāṇamādityāso mumochata । stenaṁ baddhamivādite ॥14॥*
*apo ṣu ṇa iyaṁ śarurādityā apa durmatiḥ । asmadetvajaghnuṣī ॥15॥*
*śaśvaddhi vaḥ sudānava ādityā ūtibhirvayam । purā nūnaṁ bubhujmahe ॥16॥*
*śaśvantaṁ hi prachetasaḥ pratiyantaṁ chidenasaḥ । devāḥ kṛṇutha jīvase ॥17॥*
*tatsu no navyaṁ sanyasa ādityā yanmumochati । bandhād baddhamivādite ॥18॥*
*nāsmākamasti tattara ādityāso atiṣkade । yūyamasmabhyaṁ mṛlata ॥19॥*
*mā no hetirvivasvata ādityāḥ kṛtrimā śaruḥ । purā nu jaraso vadhīt ॥20॥*
*vi ṣu dveṣe vyaṁhatimādityāso vi saṁhitam । viṣvagvi bṛhatā rapaḥ ॥21॥*

## ४७८. मथितो यामायनो भृगुर् वा वारुणिः च्यवनो वा भार्गवः (Mathito Yāmāyano Bhṛgur Vā Vāruṇiḥ Chyavano Vā Bhārgavaḥ)

१. अग्निषोमौः (Agniṣomauḥ) - ऋ. (Rv.) १०.१९.१

नि वर्तध्वं मानु गातास्मान्त्सिषक्त रेवतीः। अग्नीषोमा पुनर्वसू अस्मे धारयतं रयिम् ॥१॥
*ni vartadhvaṁ mānu gātāsmāntsiṣakta revatīḥ । agnīṣomā punarvasū asme dhārayataṁ rayim ॥1॥*

## ४७९. मधुच्छन्दाः (Madhuchchhandāḥ)

१. अग्निः (Agniḥ) - य. (Yv.) ५.३१-३५; ६.२९; १२.५७-५९; २६.२६

य. (Yv.) ५.३१-३५

विभूरसि प्रवाहणो वह्निरसि हव्यवाहनः। शवात्रोऽसि प्रचेतास्तुथोऽसि विश्ववेदाः ॥३१॥
उशिगसि कविरंघारिरसि बम्भारिरवस्यूरसि दुवस्वांछुन्ध्यूरसि मार्जालीयः।
सम्राडसि कृशानुः परिषद्योऽसि पवमानो नभोऽसि प्रतक्वा मृष्टोऽसि हव्यसूदन्ऽऋतधामासि स्वर्ज्योतिः ॥३२॥
समुद्रोऽसि विश्वव्यचाऽअजोऽस्येकपादहिरसि बुध्न्यो वागस्यैन्द्रमसि सदोऽस्यृतस्य द्वारौ मा मा सन्ताप्तमध्वनामध्वपते प्र मा तिर स्वस्ति मेऽस्मिन पथि देवयाने भूयात् ॥३३॥
मित्रस्य मा चक्षुषेक्षध्वमग्नयः सगराः सगरा स्थ सगरेण नाम्ना रौद्रेणानीकेन पात माग्नयः पिपृत माग्नयो गोपायत मा नमो वोऽस्तु मा मा हिंसिष्ट ॥३४॥
ज्योतिरसि विश्वरूपं विश्वेषां देवानां समित् त्वं सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्यऽउरु यन्तासि वरूथं स्वाहा। जुषाणोऽअप्तुराज्यस्य वेतु स्वाहा ॥३५॥

*vibhūrasi pravāhaṇo vahnirasi havyavāhanaḥ । śavātro'si prachetāstutho'si viśvavedāḥ ॥31॥*
*uśigasi kaviraṁghārirasi bambhāriravasyūrasi duvasvāṁchhundhyūrasi mārjālīyaḥ ।*
*samrāḍasi kṛśānuḥ pariṣadyo'si pavamāno nabho'si pratakvā mṛṣṭo'si havyasūdan'ṛtadhāmāsi svarjyotiḥ ॥32॥*
*samudro'si viśvavyachā'ajo'syekapādahirasi budhnyo vāgasyaindramasi sado'syṛtasya dvārau mā mā santāptamadhvanāmadhvapate pra mā tira svasti me'smina pathi devayāne bhūyāt ॥33॥*
*mitrasya mā chakṣuṣekṣadhvamagnayaḥ sagarāḥ sagarā stha sagareṇa nāmnā raudreṇānīkena pāta māgnayaḥ pipṛta māgnayo gopāyata mā namo vo'stu mā mā hiṁsiṣṭa ॥34॥*
*jyotirasi viśvarūpaṁ viśveṣāṁ devānāṁ samit tvaṁ soma tanūkṛdbhyo dveṣobhyo'nyakṛtebhya'uru yantāsi varūthaṁ svāhā । juṣāṇo'apturājyasya vetu svāhā ॥35॥*

य. (Yv.) ६.२९

यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः। स यन्ता शश्वतीरिषः स्वाहा ॥२९॥
*yamagne pṛtsu martyamavā vājeṣu yaṁ junāḥ । sa yantā śaśvatīriṣaḥ svāhā ॥29॥*

य. (Yv.) १२.५७-५९

समितं सं कल्पेथां संप्रियौ रोचिष्णू सुमनस्यमानौ। इषमूर्जमभि संवसानौ ॥५७॥
सं वां मनांसि सं व्रता समु चित्तान्याकरम्।
अग्ने पुरीष्याधिपा भव त्वं नऽइषमूर्जं यजमानाय धेहि ॥५८॥
अग्ने त्वं पुरीष्यो रयिमान् पुष्टिमाँ२ऽअसि।
शिवाः कृत्वा दिशः सर्वाः स्वं योनिमिहासदः ॥५९॥

*samitaṁ saṁ kalpethāṁ saṁpriyau rochiṣṇū sumanasyamānau । iṣamūrjamabhi saṁvasānau ॥57॥*
*saṁ vāṁ manāṁsi saṁ vratā samu chittānyākaram ।*
*agne purīṣyādhipā bhava tvaṁ na'iṣamūrjaṁ yajamānāya dhehi ॥58॥*
*agne tvaṁ purīṣyo rayimān pṛṣṭimām̐2'asi ।*
*śivāḥ kṛtvā diśaḥ sarvāḥ svaṁ yonimihāsadaḥ ॥59॥*

य. (Yv.) २६. २६

रक्षोहा विश्वचर्षणिरभि योनिमयोहिते। द्रोणे सधस्थमासदत् ॥२६॥
*rakṣohā viśvacharṣaṇirabhi yonimayohite । droṇe sadhasthamāsadat ॥26॥*

२. अश्विनौ (Aśvinau) - य. (Yv.) ३३.५८

दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः। आ यातं रुद्रवर्त्तनी। तं प्रनथा अयं वेनः ॥५८॥
*dasrā yuvākavaḥ sutā nāsatyā vṛktabarhiṣaḥ ।*
*ā yātaṁ rudravarttanī । taṁ rpranathā ayaṁ venaḥ ॥58॥*

३. अश्विसरस्वतीन्द्राः (Aśvisarasvatīndrāḥ) - य. (Yv.) २०.९०

अश्विना पिबतां मधु सरस्वत्या सजोषसा। इन्द्रः सुत्रामा वृत्रहा जुषन्तां सोम्यं मधु ॥९०॥
*aśvinā pibatāṁ madhu sarasvatyā sajoṣasā ।*
*indraḥ sutrāmā vṛtrahā juṣantāṁ somyaṁ madhu ॥90॥*

४. इन्द्रः (Indraḥ) - अ. (Av.) २०.२६.४-६; २०.३८.४-६; २०.३९.१; २०.४०.१-२; २०.४७.४-६;

१०-१२; २०.५७.१-३; २०.६०.४-६; २०.६८.१-१२; २०.६९.१-११; २०.७०.६-२०; २०.७१.१-१६; २०.८४.१-३; य. (Yv.) ३.३४; १५.६१; २०.८७-८९; ३३.२५

अ. (Av.) २०.२६.४-६

युंजन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः। रोचन्ते रोचना दिवि ॥४॥
युंजन्त्यस्य कामया हरी विपक्षसा रथे। शोणा धृष्णू नृवाहसा ॥५॥
केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः ॥६॥
*yuṁjanti bradhnamaruṣaṁ charantaṁ pari tasthuṣaḥ | rochante rochanā divi ||4 ||*
*yuṁjantyasya kāmayā harī vipakṣasā rathe | śoṇā dhṛṣṇū nṛvāhasā ||5 ||*
*ketuṁ kṛṇvannaketave peśo maryā apeśase | samuṣadbhirajāyathāḥ ||6 ||*

अ. (Av.) २०.३८.४-६

इन्द्रमिद् गाथिनो बृहदिन्द्रमर्केभिरर्किणः। इन्द्रं वाणीरनूषत ॥४॥
इन्द्र इद्धर्योः सचा संमिश्ल आ वचोयुजा। इन्द्रो वज्री हिरण्ययः ॥५॥
इन्द्रो दीर्घाय चक्षस आ सूर्यं रोहयद् दिवि। वि गोभिरद्रिमैरयत् ॥६॥
*indramid gāthino bṛhadindramarkebhirarkiṇaḥ | indraṁ vāṇīranūṣata ||4 ||*
*indra iddharyoḥ sachā saṁmiśla ā vachoyujā | indro vajrī hiraṇyayaḥ ||5 ||*
*indro dīrghāya chakṣasa ā sūryaṁ rohayad divi | vi gobhiradrimairayat ||6 ||*

अ. (Av.) २०.३९.१

इन्द्र वो विश्वतस्परि हवामहे जनेभ्यः। अस्माकमस्तु केवलः ॥१॥
*indra vo viśvataspari havāmahe janebhyaḥ | asmākamastu kevalaḥ ||1 ||*

अ. (Av.) २०.४०.१-२

इन्द्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा। मन्दू समानवर्चसा ॥१॥
अनवद्यैरभिद्युभिर्मखः सहस्वदर्चति। गणैरिन्द्रस्य काम्यैः ॥२॥
*indreṇa saṁ hi dṛkṣase saṁjagmāno abibhyuṣā | mandū samānavarchasā ||1 ||*
*anavadyairabhidyubhirmakhaḥ sahasvadarchati | gaṇairindrasya kāmyaiḥ ||2 ||*

अ. (Av.) २०.४७.४-६

इन्द्रमिद् गाथिनो बृहदिन्द्रमर्केभिरर्किणः। इन्द्र वाणीरनूषत ॥४॥
इन्द्र इद्धर्योः सचा संमिश्ल आ वचोयुजा। इन्द्रो वज्री हिरण्ययः ॥५॥
इन्द्रो दीर्घाय चक्षस आ सूर्यं रोहयद् दिवि। वि गोभिरद्रिमैरयत् ॥६॥
*indramid gāthino bṛhadindramarkebhirarkiṇaḥ | indra vāṇīranūṣata ||4 ||*
*indra iddharyoḥ sachā saṁmiśla ā vachoyujā | indro vajrī hiraṇyayaḥ ||5 ||*
*indro dīrghāya chakṣasa ā sūryaṁ rohayad divi | vi gobhiradrimairayat ||6 ||*

अ. (Av.) २०.४७.१०-१२

युंजन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः। रोचन्ते रोचना दिवि ॥१०॥
युंजन्त्यस्य काम्या हरी विपक्षसा रथे। शोणा धृष्णू नृवाहसा ॥११॥
केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः ॥१२॥
*yuṁjanti bradhnamaruṣaṁ charantaṁ pari tasthuṣaḥ | rochante rochanā divi ||10 ||*
*yuṁjantyasya kāmyā harī vipakṣasā rathe | śoṇā dhṛṣṇū nṛvāhasā ||11 ||*
*ketuṁ kṛṇvannaketave peśo maryā apeśase | samuṣadbhirajāyathāḥ ||12 ||*

अ. (Av.) २०.५७.१-३

सुरूपकृत्नुमूतये सुदुघामिव गोदुहे। जुहूमसि द्यविद्यवि ॥१॥
उप नः सवना गहि सोमस्य सोमपाः पिब। गोदा इद् रेवतो मदः ॥२॥
अथा ते अन्तमानां विद्याम सुमतीनाम्। मा नो अति ख्य आ गहि ॥३॥
*surūpakṛtnumūtaye sudughāmiva goduhe | juhūmasi dyavidyavi ||1 ||*
*upa naḥ savanā gahi somasya somapāḥ piba | godā id revato madaḥ ||2 ||*
*athā te antamānāṁ vidyāma sumatīnām | mā no ati khya ā gahi ||3 ||*

अ. (Av.) २०.६०.४-६

एवा ह्यस्य सूनृता विरप्शी गोमती मही। पक्वा शाखा न दाशुषे ॥४॥

एवा हि ते विभूतय ऊतय इन्द्र मावते। सद्यश्चित् सन्ति दाशुषे ॥५॥
एवा ह्यस्य कामया स्तोम उक्थं च शंस्या। इन्द्राय सोमपीतये ॥६॥
*evā hyasya sūnṛtā virapśī gomatī mahī | pakvā śākhā na dāśuṣe ||4 ||*
*evā hi te vibhūtaya ūtaya indra māvate | sadyaśchit santi dāśuṣe ||5 ||*
*evā hyasya kāmayā stoma ukthaṁ cha śaṁsyā | indrāya somapītaye ||6 ||*

अ. (Av.) २०.६८.१-१२

सुरूपकृत्नुमूतये सुदुघामिव गोदुहे। जुहूमसि द्यविद्यवि ॥१॥
उप नः सवना गहि सोमस्य सोमपाः पिब। गोदा इद् रेवतो मदः ॥२॥
अथा ते अन्तमानां विद्याम सुमतीनाम्। मा नो अति ख्य आ गहि ॥३॥
परेहि विग्रमस्तृतमिन्द्रं पृच्छा विपश्चितम्। यस्ते सखिभ्य आ वरम् ॥४॥
उत ब्रुवन्तु नो निदो निरंयतश्चिदारत। दधाना इन्द्र इद् दुवः ॥५॥
उत नः सुभगाँ अरिर्वोचेयुर्दस्म कृष्टयः। स्यामेदिन्द्रस्य शर्मणि ॥६॥
एमाशुमाशवे भर यज्ञश्रियं नृमादनम्। पतयन्मन्दयत् सखम् ॥७॥
अस्य पीत्वा शतक्रतो घनो वृत्राणामभवः। प्रावो वाजेषु वाजिनम् ॥८॥
तं त्वा वाजेषु वाजिनं वाजयामः शतक्रतो। धनानामिन्द्र सातये ॥९॥
यो रायो३वनिर्महान्त्सुपारः सुन्वतः सखा। तस्मा इन्द्राय गायत ॥१०॥
आ त्वेता नि षीढतेन्द्रमभि प्र गायत। सखाय स्तोमवाहसः ॥११॥
पुरूतमं पुरूणामीशानं वार्याणाम्। इन्द्रं सोमे सचा सुते ॥१२॥
*surūpakṛtnumūtaye sudughāmiva goduhe | juhūmasi dyavidyavi ||1 ||*
*upa naḥ savanā gahi somasya somapāḥ piba | godā id revato madaḥ ||2 ||*
*athā te antamānāṁ vidyāma sumatīnām | mā no ati khya ā gahi ||3 ||*
*parehi vigramastṛtamindraṁ pṛchchhā vipaśchitam | yaste sakhibhya ā varam ||4 ||*
*uta bruvantu no nido niraṁyataśchidārata | dadhānā indra id duvaḥ ||5 ||*
*uta naḥ subhagām̐ arirvocheyurdasma kṛṣṭyaḥ | syāmedindrasya śarmaṇi ||6 ||*
*emāśumāśave bhara yajñaśriyaṁ nṛmādanam | patayanmandayat sakham ||7 ||*
*asya pītvā śatakrato ghano vṛtrāṇāmabhavaḥ | prāvo vājeṣu vājinam ||8 ||*
*taṁ tvā vājeṣu vājinaṁ vājayāmaḥ śatakrato | dhanānāmindra sātaye ||9 ||*
*yo rāyo3vanirmahāntsupāraḥ sunvataḥ sakhā | tasmā indrāya gāyata ||10 ||*
*ā tvetā ni ṣīḍhatendramabhi pra gāyata | sakhāya stomavāhasaḥ ||11 ||*
*purūtamaṁ purūṇāmīśānaṁ vāryāṇām | indraṁ some sachā sute ||12 ||*

अ. (Av.) २०.६९.१-११

स घा नो योग आ भुवत् स राये स पुरंध्याम्। गमद् वाजेभिरा स नः ॥१॥
यस्य संस्थे न वृण्वते हरी समत्सु शत्रवः। तस्मा इन्द्राय गायत ॥२॥
सुतपाव्ने इमे शुचयो यन्ति वीतये। सोमासो दध्याशिरः ॥३॥
त्वं सुतस्य पीतये सद्यो वृद्धो अजायथाः। इन्द्र ज्यैष्ठ्याय सुक्रतो ॥४॥
आ त्वा विशन्त्वाशवः सोमास इन्द्र गिर्वणः। शं ते सन्तु प्रचेतसे ॥५॥
त्वां स्तोमा अवीवृधन् त्वामुक्था शतक्रतो। त्वां वर्धन्तु नो गिरः ॥६॥
अक्षितोतिः सनेदिमं वाजमिन्द्रः सहस्रिणम्। यस्मिन् विश्वानि पौंस्या ॥७॥
मा नो मर्ता अभि द्रुहन् तनूनामिन्द्र गिर्वणः। ईशानो यवया वधम् ॥८॥
युंजन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः रोचन्ते रोचना दिवि ॥९॥
युंजन्त्यस्य काम्या हरी विपक्षसा रथे। शोणा धृष्णू नृवाहसा ॥१०॥
केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः ॥११॥
*sa ghā no yoga ā bhuvat sa rāye sa puraṁdhyām | gamad vājebhirā sa naḥ ||1 ||*
*yasya saṁsthe na vṛṇvate harī samatsu śatravaḥ | tasmā indrāya gāyata ||2 ||*
*sutapāvne ime śuchayo yanti vītaye | somāso dadhyāśiraḥ ||3 ||*
*tvaṁ sutasya pītaye sadyo vṛddho ajāyathāḥ | indra jyaiṣṭhyāya sukrato ||4 ||*
*ā tvā viśantvāśavaḥ somāsa indra girvaṇaḥ | śaṁ te santu prachetase ||5 ||*
*tvāṁ stomā avīvṛdhan tvāmukthā śatakrato | tvāṁ vardhantu no giraḥ ||6 ||*
*akṣitotiḥ sanedimaṁ vājamindraḥ sahasriṇam | yasmin viśvāni pauṁsyā ||7 ||*
*mā no martā abhi druhan tanūnāmindra girvaṇaḥ | īśāno yavayā vadham ||8 ||*

*yuṁjanti bradhnamaruṣaṁ charantaṁ pari tasthuṣaḥ rochante rochanā divi ॥9॥*
*yuṁjantyasya kāmyā harī vipakṣasā rathe । śoṇā dhṛṣṇū nṛvāhasā ॥10॥*
*ketuṁ kṛṇvannaketave peśo maryā apeśase । samuṣadbhirajāyathāḥ ॥11॥*

अ. (Av.) २०.७०.६-२०

इतो वा सातिमीमहे दिवो वा पार्थिवादधि। इन्द्रं महो वा रजसः ॥६॥
इन्द्रमिद् गाथिनो बृहदिन्द्रमर्केभिरर्किणः। इन्द्र वाणीरनूषत ॥७॥
इन्द्र इद्धर्यो सचा संमिश्ल आ वचोयुजा। इन्द्रो वज्री हिरण्यः ॥८॥
इन्द्रो दीर्घाय चक्षस आ सूर्यं रोहयद् दिवि। वि गोभिरद्रिमैरयत् ॥९॥
इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च। उग्र उग्राभिरूतिभिः ॥१०॥
इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे। युजं वृत्रेषु वज्रिणम् ॥११॥
स नो वृषन्नमुं चरुं सत्रादावन्नपा वृधि। असमभ्यमप्रतिष्कुतः ॥१२॥
तुंजेतुंजे य उत्तरे स्तोमा इन्द्रस्य वज्रिणः। न विन्धे अस्य सुष्टुतिम् ॥१३॥
वृषा यूथेव वंसगः कृष्टीरियर्त्योजसा। ईशानो अप्रतिष्कुतः ॥१४॥
य एकश्चर्षणीनां वसूनामिरज्यति। इन्द्रः पंच क्षितीनाम् ॥१५॥
इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः। अस्माकमस्तु केवलः ॥१६॥
एन्द्र सानसिं रयिं सजित्वानं सदासहम्। वर्षिष्ठमूतये भर ॥१७॥
नि येन मुष्टिहत्यया नि वृत्रा रुणधामहै। त्वोतासो न्यर्वता ॥१८॥
इन्द्र त्वोतास आ वयं वज्रं घना ददीमहि। जयेम सं युधि स्पृधः ॥१९॥
वयं शूरेभिरस्तृभिरिन्द्र त्वया युजा वयम्। सासह्याम पृतन्यतः ॥२०॥

*ito vā sātimīmahe divo vā pārthivādadhi । indraṁ maho vā rajasaḥ ॥6॥*
*indramid gāthino bṛhadindramarkebhirarkiṇaḥ । indra vāṇīranūṣata ॥7॥*
*indra iddharyo sachā saṁmiśla ā vachoyujā । indro vajrī hiraṇyaḥ ॥8॥*
*indro dīrghāya chakṣasa ā sūryaṁ rohayad divi । vi gobhiradrimairayat ॥9॥*
*indra vājeṣu no'va sahasrapradhaneṣu cha । ugra ugrābhirūtibhiḥ ॥10॥*
*indraṁ vayaṁ mahādhana indramarbhe havāmahe । yujaṁ vṛtreṣu vajriṇam ॥11॥*
*sa no vṛṣannamuṁ charuṁ satrādāvannapā vṛdhi । asamabhyamapratiṣkutaḥ ॥12॥*
*tuṁjetuṁje ya uttare stomā indrasya vajriṇaḥ । na vindhe asya suṣṭutim ॥13॥*
*vṛṣā yūtheva vaṁsagaḥ kṛṣṭīriyartyojasā । īśāno apratiṣkutaḥ ॥14॥*
*ya ekaścharṣaṇīnāṁ vasūnāmirajyati । indraḥ paṁcha kṣitīnām ॥15॥*
*indraṁ vo viśvataspari havāmahe janebhyaḥ । asmākamastu kevalaḥ ॥16॥*
*endra sānasiṁ rayiṁ sajitvānaṁ sadāsaham । varṣiṣṭhamūtaye bhara ॥17॥*
*ni yena muṣṭihatyayā ni vṛtrā ruṇadhāmahai । tvotāso nyarvatā ॥18॥*
*indra tvotāsa ā vayaṁ vajraṁ ghanā dadīmahi । jayema saṁ yudhi spṛdhaḥ ॥19॥*
*vayaṁ śūrebhirastṛbhirindra tvayā yujā vayam । sāsahyāma pṛtanyataḥ ॥20॥*

अ. (Av.) २०.७१.१-१६

महाँ इन्द्रः परश्च नु महित्वमस्तु वज्रिणे। द्यौर्न प्रथिना शवः ॥१॥
समोहे वा य आशत नरस्तोकस्य सनितौ। विप्रासो वा धियायवः ॥२॥
यः कुक्षिः सोमपातमः समुद्रइव पिन्वते। उर्वीरापो न काकुदः ॥३॥
एवा ह्यस्य सूनृता विरप्शी गोमती मही। पक्वा शाखा न दाशुषे ॥४॥
एवा हि ते विभूतय ऊतय इन्द्र मावते। सद्यश्चित् सन्ति दाशुषे ॥५॥
एवा ह्यस्य काम्या स्तोम उक्थं च शंस्या। इन्द्राय सोमपीतये ॥६॥
इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः महाँ अभिष्टिरोजसा ॥७॥
एमेनं सृजता सुते मन्दिमिन्द्राय मन्दिने। चक्रिं विश्वानि चक्रये ॥८॥
मत्स्वा सुशिप्र मन्दिभि स्तोमेभिर्विश्वचर्षणे। सचैषु सवनेष्वा ॥९॥
असृग्रमिन्द्र ते गिरः प्रतित्वामुदहासत। अजोषा वृषभं पतिम् ॥१०॥
सं चोदय चित्रमर्वाग् राध इन्द्र वरेण्यम्। असदित् ते विभु प्रभु ॥११॥
अस्मान्त्सु तत्र चोदयेन्द्र राये रभस्वतः। तुविद्युम्न यशस्वतः ॥१२॥
सं गोमदिन्द्र वाजवदस्मे पृथु श्रवो बृहत्। विश्वायुर्धेह्यक्षितम् ॥१३॥
अस्मे धेहि श्रवो बृहद् द्युम्नं सहस्रसातमम्। इन्द्र ता रथिनीरिषः ॥१४॥

वसोरिन्द्रं वसुपतिं गीर्भिर्गृणन्त ऋग्मियम्। होम गन्तारमूतये ॥१५॥
सुतेसुते न्योकसे बृहद् बृहत एदरिः। इन्द्राय शूषमर्चति ॥१६॥
*mahāṁ̐ indraḥ paraścha nu mahitvamastu vajriṇe । dyaurna prathinā śavaḥ ॥1॥*
*samohe vā ya āśata narastokasya sanitau । viprāso vā dhiyāyavaḥ ॥2॥*
*yaḥ kukṣiḥ somapātamaḥ samudraiva pinvate । urvīrāpo na kākudaḥ ॥3॥*
*evā hyasya sūnṛtā virapśī gomatī mahī । pakvā śākhā na dāśuṣe ॥4॥*
*evā hi te vibhūtaya ūtaya indra māvate । sadyaśchit santi dāśuṣe ॥5॥*
*evā hyasya kāmyā stoma uktham cha śaṁsyā । indrāya somapītaye ॥6॥*
*indrehi matsyandhaso viśvebhiḥ somaparvabhiḥ mahāṁ̐ abhiṣṭirojasā ॥7॥*
*emenaṁ sṛjatā sute mandimindrāya mandine । chakriṁ viśvāni chakraye ॥8॥*
*matsvā suśipra mandibhi stomebhirviśvacharṣaṇe । sachaiṣu savaneṣvā ॥9॥*
*asṛgramindra te giraḥ pratitvāmudahāsata । ajoṣā vṛṣabhaṁ patim ॥10॥*
*saṁ chodaya chitramarvāg rādha indra vareṇyam । asadit te vibhu prabhu ॥11॥*
*asmāntsu tatra chodayendra rāye rabhasvataḥ । tuvidyumna yaśasvataḥ ॥12॥*
*saṁ gomadindra vājavadasme pṛthu śravo bṛhat । viśvāyurdhehyakṣitam ॥13॥*
*asme dhehi śravo bṛhad dyumnaṁ sahasrasātamam । indra tā rathinīriṣaḥ ॥14॥*
*vasorindraṁ vasupatiṁ gīrbhirgṛṇanta ṛgmiyam । homa gantāramūtaye ॥15॥*
*sutesute nyokase bṛhad bṛhata edariḥ । indrāya śūṣamarchati ॥16॥*

अ. (Av.) २०.८४.१-३

इन्द्रा याहि चित्रभानो सुता इमे त्वायवः। अण्वीभिस्तना पूतासः ॥१॥
इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः। उप ब्रह्माणि वाघतः ॥२॥
इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः। सुते दधिष्व नश्चनः ॥३॥
*indrā yāhi chitrabhāno sutā ime tvāyavaḥ । aṇvībhistanā pūtāsaḥ ॥1॥*
*indrā yāhi dhiyeṣito viprajūtaḥ sutāvataḥ । upa brahmāṇi vāghataḥ ॥2॥*
*indrā yāhi tūtujāna upa brahmāṇi harivaḥ । sute dadhiṣva naśchanaḥ ॥3॥*

य. (Yv.) ३.३४

कदा चन स्तरीरसि नेन्द्र सश्चसि दांशुषे।
उपोपेन्नु मघवन् भूयऽइन्नु ते दनं देवस्य पृच्यते ॥३४॥
*kadā chana starīrasi nendra saśchasi dāṁśuṣe ।*
*upopennu maghavan bhūya'annu te danaṁ devasya pṛchyate ॥34॥*

य. (Yv.) १५.६१

इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः। रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥६१॥
*indraṁ viśvā avīvṛdhantsamudravyachasaṁ giraḥ । rathītamaṁ rathīnāṁ vājānāṁ satpatiṁ patim ॥61॥*

य. (Yv.) २०.८७-८९

इन्द्रा याहि चित्रभानो सुताऽइमे त्वा यवः। अण्वीभिस्तना पूतासः ॥८७॥
इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः। उप ब्रह्माणि वाघतः ॥८८॥
इन्द्रा याहि तूतुजानऽउप ब्रह्माणि हरिवः। सुते दधिष्व नश्चनः ॥८९॥
*indrā yāhi chitrabhāno sutā'ime tvā yavaḥ । aṇvībhistanā pūtāsaḥ ॥87॥*
*indrā yāhi dhiyeṣito viprajūtaḥ sutāvataḥ । upa brahmāṇi vāghataḥ ॥88॥*
*indrā yāhi tūtujāna'upa brahmāṇi harivaḥ । sute dadhiṣva naśchanaḥ ॥89॥*

य. (Yv.) ३३.२५

इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः। महाँ२ऽअभिष्टिरोजसा ॥२५॥
*indrehi matsyandhaso viśvebhiḥ somaparvabhiḥ । mahāṁ̐2'abhiṣṭirojasā ॥25॥*

५. इन्द्रवायू (Indravāyū) - य. (Yv.) ७.८; ३३.५६; अ. (Av.) २०.७०.१-२

य. (Yv.) ७.८

इन्द्रवायूऽइमे सुताऽउप प्रयोभिरागतम्। इन्दवो वामुशन्ति हि ।
उपयामगृहीतोऽसि वायवऽइन्द्रवायुभ्यां त्वैष ते योनिः सजाषोभ्यां त्वा ॥८॥
*indravāyū'ime sutā'upa prayobhirāgatam । indavo vāmuśanti hi ।*
*upayāmagṛhīto'si vāyava'indravāyubhyāṁ tvaiṣa te yoniḥ sajāṣobhyāṁ tvā ॥8॥*

य. (Yv.) ३३.५६

इन्द्रवायूऽइमे सुताऽउप प्रयोभिरा गतम्। इन्दवो वामुशन्ति हि ॥५६॥
*indravāyū'ime sutā'upa prayobhirā gatam | indavo vāmuśanti hi ||56||*

अ. (Av.) २०.७०.१-२

वीलु चिदारुजत्नुभिर्गुहा चिदिन्द्र वह्निभिः। अविन्द उस्रिया अनु ॥१॥
देवयन्तो यथा मतिमच्छा विदद्वसुं गिरः। महामनूषत श्रुतम् ॥२॥
*vīlu chidārujatnubhirguhā chidindra vahnibhiḥ | avinda usriyā anu ||1||*
*devayanto yathā matimachchhā vidadvasuṁ giraḥ | mahāmanūṣata śrutam ||2||*

६. ईश्वरसभाध्यक्षौ (Īśvarasabhādhyakṣau) - य. (Yv.) ५.३०

इन्द्रस्य स्यूरसीन्द्रस्य ध्रुवोसि। ऐन्द्रमसि वैश्वदेवमसि ॥३०॥
*indrasya syūrasīndrasya dhruvosi | aindramasi vaiśvadevamasi ||30||*

७. गृहपतयः (Gṛhapatayaḥ) - य. (Yv.) ८.३४

युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा। अथा नऽइन्द्र सोमपा गिरामुपश्रुतिं चर ।
उपयामगृहीतोऽसीन्द्राप त्वा षोडशिनऽएष ते योनिरिन्द्राय त्वा षोडशिने ॥३४॥
*yukṣavā hi keśinā harī vṛṣaṇā kakṣayaprā | athā na'indra somapā girāmupaśrutiṁ chara |*
*upayāmagṛhīto'sīndrāpa tvā ṣoḍaśina'eṣa te yonirindrāya tvā ṣoḍaśine ||34||*

८. दम्पत्ती (Dampattī) - य. (Yv.) १२.६०

भवतं नः समनसौ सचेतसावरेपसौ।
मा यज्ञं हिंसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः ॥६०॥
*bhavataṁ naḥ samanasau sachetasāvarepasau |*
*mā yajñaṁ hiṁsiṣṭaṁ mā yajñapatiṁ jātavedasau śivau bhavatamadya naḥ ||60||*

९. द्यावापृथिव्यौ (Dyāvāpṛthivyau) - य. (Yv.) ६.३५

मा भेर्मा संविक्थाऽऊंर्ज धत्स्व धिष्णे वीड्वी सती वीडयेथामूर्जं दधाथाम्।
पाप्मा हतो न सोमः ॥३५॥
*mā bhermā saṁvikthā'ūṁrja dhatsva dhiṣṇe vīḍvī satī vīḍayethāmūrjaṁ dadhāthām |*
*pāpmā hato na somaḥ ||35||*

१०. निर्ऋतिः (Nirṛtiḥ) - य. (Yv.) १२.६२-६४

असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य ।
अन्यमस्मदिच्छ सा तऽइत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥६२॥
नमः सु ते निर्ऋते तिग्मतेजोऽयस्मयं विचृता बन्धमेतम् ।
यमेन त्वं यम्या संविदानोत्तमे नाकेऽअधि रोहयैनम् ॥६३॥
यस्यास्ते घोरऽआसन् जुहोम्येषां बन्धानामवसर्जनाय ।
यां त्वा जनो भूमिरिति प्रमन्दते निर्ऋतिं त्वाहं परि वेद विश्वतः ॥६४॥
*asunvantamayajamānamichchha stenasyetyāmanvihi taskarasya |*
*anyamasmadichchha sā ta'ityā namo devi nirṛte tubhyamastu ||62||*
*namaḥ su te nirṛte tigmatejo'yasmayaṁ vichṛtā bandhametam |*
*yamena tvaṁ yamyā saṁvidānottame nāke'adhi rohayainam ||63||*
*yasyāste ghora'āsan juhomyeṣāṁ bandhānāmavasarjanāya |*
*yāṁ tvā jano bhūmiriti pramandate nirṛtiṁ tvāhaṁ pari veda viśvataḥ ||64||*

११. पत्नी (Patnī) - य. (Yv.) १२.६१

मातेव पुत्रं पृथिवी पुरीष्यमग्निं स्वे योनावभारुखा ।
तां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा वि मुंचतु ॥६१॥
*māteva putraṁ pṛthivī pṛrīṣyamagniṁ sve yonāvabhārukhā |*
*tāṁ viśvairdevairṛtubhiḥ saṁvidānaḥ prajāpatirviśvakarmā vi muṁchatu ||61||*

१२. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.१.१-१०

स्वदिष्ठया मदिष्ठया पवसव् सोम धारया। इन्द्राय पातवे सुतः ॥१॥
रक्षोहा विश्वचर्षणिरभि योनिमयोहतम्। द्रुणा सधस्थमासदत् ॥२॥

वरिवोधातमो भव मंहिष्ठो वृत्रहन्तमः । पर्षि राधो मघोनाम् ॥३ ॥
अभ्यर्ष महानां देवानां वीतिमन्धसा । अभि वाजमुत श्रवः ॥४ ॥
त्वामच्छा चरामसि तदिदर्थं दिवेदिवे । इन्द्रो त्वे न आशसः ॥५ ॥
पुनाति ते परिस्रुतं सोमं सूर्यस्य दुहिता । वारेण शश्वता तना ॥६ ॥
तमीमण्वीः समर्य आ गृभ्णन्ति योषणो दश । स्वसारः पार्ये दिवि ॥७ ॥
तमीं हिन्वन्त्यग्रुवो धमन्ति बाकुरं दृतिम् । त्रिधातु वारणं मधु ॥८ ॥
अभी३ममघ्न्या उत श्रीणन्ति धेनवः शिशुम् । सोममिन्द्राय पातवे ॥९ ॥
अस्येदिन्द्रो मदेष्वा विश्वा वृत्राणि जिघ्नते । शूरो मघा च मंहते ॥१० ॥
*svadiṣṭhayā madiṣṭhayā pavasav soma dhārayā । indrāya pātave sutaḥ ॥1 ॥*
*rakṣohā viśvacharṣaṇirabhi yonimayohatam । druṇā sadhasthamāsadat ॥2 ॥*
*varivodhātamo bhava maṁhiṣṭho vṛtrahantamaḥ । parṣi rāgho maghonām ॥3 ॥*
*abhyarṣa mahānāṁ devānāṁ vītimandhasā । abhi vājamuta śravaḥ ॥4 ॥*
*tvāmachchhā charāmasi tadidarthaṁ divedive । indro tve na āśasaḥ ॥5 ॥*
*punāti te parisrutaṁ somaṁ sūryasya duhitā । vāreṇa śaśvatā tanā ॥6 ॥*
*tamīmaṇvīḥ samarya ā gṛbhṇanti yoṣaṇo daśa । svasāraḥ pārye divi ॥7 ॥*
*tamīṁ hinvantyagruvo dhamanti bākuraṁ dṛtim । tridhātu vāraṇaṁ madhu ॥8 ॥*
*abhī3mamaghnyā uta śrīṇanti dhenavaḥ śiśum । somamindrāya pātave ॥9 ॥*
*asyedindro madeṣvā viśvā vṛtrāṇi jighnate । śūro maghā cha maṁhate ॥10 ॥*

१३. मरुतः (Marutaḥ) - अ. (Av.) २०.४०.३; २०.६९.१२; २०.७०.३-५

अ. (Av.) २०.४०.३

आदह स्वधामनु पुनर्गर्भत्वमेरिरे । दधाना नाम यज्ञियम् ॥३ ॥
*ādaha svadhāmanu punargarbhatvamerire । dadhānā nāma yajñiyam ॥3 ॥*

अ. (Av.) २०.६९.१२

आदह स्वधामनु पुनर्गर्भत्वमेरिरे । दधाना नाम यज्ञियम् ॥१२ ॥
*ādaha svadhāmanu punargarbhatvamerire । dadhānā nāma yajñiyam ॥12 ॥*

अ. (Av.) २०.७०.३-४

इन्द्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा । मन्दू समानवर्चसा ॥३ ॥
अनवद्यैरभिद्युभिर्मखः सहस्वदर्चति । गणैरिन्द्रस्य काम्यैः ॥४ ॥
अतः परिज्मन्ना गहि दिवो वा रोचनादधि । समस्मिन्नृंजते गिरः ॥५ ॥
*indreṇa saṁ hi dṛkṣase saṁjagmāno abibhyuṣā । mandū samānavarchasā ॥3 ॥*
*anavadyairabhidyubhirmakhaḥ sahasvadarchati । gaṇairindrasya kāmyaiḥ ॥4 ॥*
*ataḥ parijmannā gahi divo vā rochanādadhi । samasminnṛṁjate giraḥ ॥5 ॥*

१४. मित्रावरुणौ (Mitrāvaruṇau) - य. (Yv.) ३३.५७

मित्रं हुवे पूतदक्षं वरुणं च रिशादसम् । धियं घृताचीं साधन्ता ॥५७ ॥
*mitraṁ huve pūtadakṣaṁ varuṇaṁ cha riśādasam । dhiyaṁ ghṛtāchīṁ sādhantā ॥57 ॥*

१५. यजमानः (Yajamānaḥ) - य. (Yv.) १२.६५

यं ते देवी निर्ऋतिराबबन्ध पाशं ग्रीवास्वविचृत्यम् ।
तं ते विष्याम्यायुषो न मध्यादथैतं पितुमद्धि प्रसूतः । नमो भूत्यै येदं चकार ॥६५ ॥
*yaṁ te devī nirṛtirābabandha pāśaṁ grīvāsvavichṛtyam ।*
*taṁ te viṣyāmyāyuṣo na madhyādathaitaṁ pitumaddhi prasūtaḥ ।*
*namo bhūtyai yedaṁ chakāra ॥65 ॥*

१६. यज्ञः (Yajñaḥ) - य. (Yv.) ६.३४

श्वात्रा स्थ वृत्रतुरो राधोगूर्त्ताऽअमृतस्य पत्नीः ।
ता देवीर्देवत्रेमं यज्ञं नयतोपहूताः सोमस्य पिबत ॥३४ ॥
*śvātrā stha vṛtraturo rādhogūrttā'amṛtasya patnīḥ ।*
*tā devīrdevatremaṁ yajñaṁ nayatopahūtāḥ somasya pibata ॥34 ॥*

१७. विद्वान् (Vidvān) - य. (Yv.) १५.६५

सहस्रस्य प्रमासि सहस्रस्य प्रतिमासि सहस्रस्योन्मासि साहस्रोऽसि सहस्राय त्वा ॥६५ ॥

*sahasrasya pramāsi sahasrasya pratimāsi sahasrasyonmāsi sāhasro'si sahasrāya tvā ॥65 ॥*

१८. विद्वांसः (Vidvāṁsaḥ) - य. (Yv.) २९.३७

केतुं कृण्वन्नकेतवे पेशो मर्याऽअपेशसे। समुषद्भिरजायथाः ॥३७॥
*ketuṁ kṛṇvannaketave peśo maryā'apeśase । samuṣadbhirajāyathāḥ ॥37 ॥*

१९. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.) ७.३३

ओमासश्चर्षणीधृतो विश्वे देवासऽआगत। दाश्वांसो दाशुषः सुतम्। उपयामगृहीतोऽसि विश्वेभ्यस्तवा देवेभ्यऽएष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥३३॥
*omāsaścharṣaṇīdhṛto viśve devāsa'āgata । dāśvāṁso dāśuṣaḥ sutam ।*
*upayāmagṛhīto'si viśvebhyastavā devebhya'eṣa te yonirviśvebhyastvā devebhyaḥ ॥33 ॥*

२०. सभापति राजा (Sabhāpati Rājā) - य. (Yv.) ६.३२

इन्द्राय त्वा वसुमते रुद्रवतऽइन्द्राय त्वादित्यवतऽइन्द्राय त्वाभिमातिघ्ने ।
श्येनाय त्वा सोमभृतेऽग्नये त्वा रायस्पोषदे ॥३२॥
*indrāya tvā vasumate rudravata'indrāya tvādityavata'indrāya tvābhimātighne ।*
*śyenāya tvā somabhṛte'gnaye tvā rāyaspoṣade ॥32 ॥*

२१. सरस्वती (Sarasvatī) - य. (Yv.) २०.८४-८६

पावका नः सरस्वती वाजेभिर्वाजिनीवती। यज्ञं वष्टु धियावसु५ ॥८४॥
चोदयित्री सूनृतानां चेतन्ती सुमतीनाम्। यज्ञं दधे सरस्वती ॥८५॥
महोऽअर्णः सरस्वती प्र चेतयति केतुना। धियो विश्वा वि राजति॥८६॥
*pāvakā naḥ sarasvatī vājebhirvājinīvatī । yajñaṁ vaṣṭu dhiyāvasu5 ॥84 ॥*
*chodayitrī sūnṛtānāṁ chetantī sumatīnām । yajñaṁ dadhe sarasvatī ॥85 ॥*
*maho'arṇaḥ sarasvatī pra chetayati ketunā । dhiyo viśvā vi rājati ॥86 ॥*

२२. सोमः (Somaḥ) - य. (Yv.) ६.३३; २६.२५

य. (Yv.) ६.३३

यत्ते सोम दिवि ज्योतिर्यत्पृथिव्यां यदुरावन्तरिक्षे ।
तेनास्मै यजमानायोरु राये कृद्ध्यधि दात्रे वोचः ॥३३॥
*yatte soma divi jyotiryatpṛthivyāṁ yadurāvantarikṣe ।*
*tenāsmai yajamānāyoru rāye kṛddhyadhi dātre vochaḥ ॥33 ॥*

य. (Yv.) २६.२५

स्वादिष्ठया मदिष्ठया पवस्व सोम धारया। इन्द्राय पातवे सुतः ॥२५॥
*svādiṣṭhayā madiṣṭhayā pavasva soma dhārayā । indrāya pātave sutaḥ ॥25 ॥*

## ४८०. मधुच्छन्दा वैश्वामित्रः (Madhuchchhandā Vaiśvāmitraḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.)१.१.१-९; सा. (Sv.) १४; ६०५; य. (Yv.) ३.२२-२४

ऋ. (Rv.) १.१.१-९

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम् ॥१॥
अग्निः पूर्वेभिऋर्षिभिरीड्यो नूतनैरुत। स देवाँ एह वक्षति ॥२॥
अग्निना रयिमश्नवत् पोषमेव दिवेदिवे। यशमं वीरवत्तमम् ॥३॥
अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि। स इद्देवेषु गच्छति ॥४॥
अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः। देवो देवेभिरा गमत् ॥५॥
यदंग दाशुषे त्वमग्ने भद्रं करिष्यसि। तवेत्तत् सत्यमंगिरः ॥६॥
उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम्। नमो भरन्त एमसि ॥७॥
राजन्तमध्वराणां गोपामृतस्य दीदिविम्। वर्धमानं स्वे दमे ॥८॥
स नः पितेव सूनवेऽग्ने सूपायनो भव। सचस्वा नः स्वस्तये ॥९॥
*agnimīḷe purohitaṁ yajñasya devamṛtvijam । hotāraṁ ratnadhātamam ॥1 ॥*
*agniḥ pūrvebhirṛṣibhirīḍyo nūtanairuta । sa devām̐ eha vakṣati ॥2 ॥*
*agninā rayimaśnavat poṣameva divedive । yaśamaṁ vīravattamam ॥3 ॥*
*agne yaṁ yajñamadhvaraṁ viśvataḥ paribhūrasi । sa iddeveṣu gachchhati ॥4 ॥*

*agnirhotā kavikratuḥ satyaśchitraśravastamaḥ / devo devebhirā gamat //5 //*
*yadaṁga dāśuṣe tvamagne bhadraṁ kariṣyasi / tavettat satyamaṁgiraḥ //6 //*
*upa tvāgne divedive doṣāvastardhiyā vayam / namo bharanta emasi //7 //*
*rājantamadhvarāṇāṁ gopāmṛtasya dīdivim / vardhamānaṁ sve dame //8 //*
*sa naḥ piteva sūnave'gne sūpāyano bhava / sachasvā naḥ svastaye //9 //*

सा. (Sv.) १४

उप त्वाग्ने दिवेदिवे दोषवस्तर्धिया वयम्। नमो भरन्त एमसि ॥४॥
*upa tvāgne divedive doṣavastardhiyā vayam / namo bharanta emasi //4 //*

सा. (Sv.) ६०५

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम। होतारं रत्नधातमम् ॥४॥
*agnimīḷe purohitaṁ yajñasya devamṛtvijama / hotāraṁ ratnadhātamam //4 //*

य. (Yv.) ३.२२-२४

संहितासि विश्वरूप्यूर्जा माविश गौपत्येन ।
उप तवाग्ने दिवेदिवे दोषावस्तर्द्धिया वयम्। नमो भरन्तऽएमसि ॥२२॥
राजन्तमध्वरारणां गोपामृतस्य दीदिविम्। वर्द्धमानं स्वे दमे ॥२३॥
स नः पितेव सूनवेऽग्ने सूपायनो भव। सचस्वा नः स्वस्तये ॥२४॥
*saṁhitāsi viśvarūpyūrjā māviśa gaupatyena /*
*upa tavāgne divedive doṣāvastarddhiyā vayam / namo bharanta'emasi //22 //*
*rājantamadhvarāraṇāṁ gopāmṛtasya dīdivim / varddhamānaṁ sve dame //23 //*
*sa naḥ piteva sūnave'gne sūpāyano bhava / sachasvā naḥ svastaye //24 //*

२. अश्विनौ (Aśvinau) - ऋ. (Rv.) १.३.१-३

अश्विना यज्वरीरिषो द्रवत्पाणी शुभस्पती। पुरुभुजा चनस्यतम् ॥१॥
अश्विना पुरुदंससा नरा शवीरया धिया। धिष्ण्या वनतं गिरः ॥२॥
दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः। आ यातं रुद्रवर्तनी ॥३॥
*aśvinā yajvarīriṣo dravatpāṇī śubhaspatī / purubhujā chanasyatam //1 //*
*aśvinā purudaṁsasasā narā śavīrayā dhiyā / dhiṣṇyā vanataṁ giraḥ //2 //*
*dasrā yuvākavaḥ sutā nāsatyā vṛktabarhiṣaḥ / ā yātaṁ rudravartanī //3 //*

३. इन्द्रः (Indraḥ) - ऋ. (Rv.) १.३.४-६; १.४.१-१०; १.५.१-१०; १.६.१-३; १०; १.७.१-१०; १.८.१-१०; १.९.१-१०; १.१०.१-१२; सा. (Sv.) १२९; १३० ; १६०; १६४; १६६; १८०; १९८; २०५; ३४२; ५९७; ५९८; ७४०-७४२; ७९६-७९९; ८५०-८५२; १०८७-१०८९; १३४४-१३४६; १४६८-१४७०; १६२०-१६२२

ऋ. (Rv.) १.३.४-६

इन्द्रा याहि चित्रभानो सुता इमे त्वायवः। अण्वीभिस्तना पूतासः ॥४॥
इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः। उप ब्रह्माणि वाघतः ॥५॥
इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः। सुते दधिष्व नश्चनः ॥६॥
*indrā yāhi chitrabhāno sutā ime tvāyavaḥ / aṇvībhistanā pūtāsaḥ //4 //*
*indrā yāhi dhiyeṣito viprajūtaḥ sutāvataḥ / upa brahmāṇi vāghataḥ //5 //*
*indrā yāhi tūtujāna upa brahmāṇi harivaḥ / sute dadhiṣva naśchanaḥ //6 //*

ऋ. (Rv.) १.४.१-१०

सुरूपकृत्नुमूतये सुदुघामिव गोदुहे। जुहूमसि द्यविद्यवि ॥१॥
उप नः सवना गहि सोमस्य सोमपाः पिब। गोदा इद्रेवतो मदः ॥२॥
अथा ते अन्तमानां विद्याम सुमतीनाम्। मा नो अति ख्य आ गहि ॥३॥
परेहि विग्रमस्तृतमिन्द्रं पृच्छा विपश्चितम्। यस्ते सखिभ्य आ वरम्॥४॥
उत ब्रुवन्तु नो निदो निरन्यतश्चिदारत। दधाना इन्द्र इद्दुवः ॥५॥
उत नः सुभगाँ अरिर्वोचेयुर्दस्म कृष्टयः। स्यामेदिन्द्रस्य शर्मणि ॥६॥
एमाशुमाशवे भर यज्ञश्रियं नृमादनम्। पतयन्मन्दयत्सखम् ॥७॥
अस्य पीत्वा शतक्रतो घनो वृत्राणामभवः। प्रावो वाजेषु वाजिनम् ॥८॥

तं त्वा वाजेषु वाजिनं वाजयामः शतक्रतो। धनानामिन्द्र सातये ॥९॥
यो रायो३वनिर्महान्त्सुपारः सुन्वतः सखा। तस्मा इन्द्राय गायत ॥१०॥
*surūpakṛtnumūtaye sudughāmiva goduhe / juhumasi dyavidyavi //1 //*
*upa naḥ savanā gahi somasya somapāḥ piba / godā idrevato madaḥ //2 //*
*athā te antamānāṁ vidyāma sumatīnām / mā no ati khya ā gahi //3 //*
*parehi vigramastṛtamindraṁ pṛchchhā vipaśchitam / yaste sakhibhya ā varam //4 //*
*uta bruvantu no nido niranyataśchidārata / dadhānā indra idduvaḥ //5 //*
*uta naḥ subhagāṁ arirvocheyurdasma kṛṣṭayaḥ / syāmedindrasya śarmaṇi //6 //*
*emāśumāśave bhara yajñaśriyaṁ nṛmādanam / patayanmandayatsakham //7 //*
*asya pītvā śatakrato ghano vṛtrāṇāmabhavaḥ / prāvo vājeṣu vājinam //8 //*
*taṁ tvā vājeṣu vājinaṁ vājayāmaḥ śatakrato / dhanānāmindra sātaye //9 //*
*yo rāyo3vanirmahāntsupāraḥ sunvataḥ sakhā / tasmā indrāya gāyata //10 //*

ऋ. (Rv.) १.५.१-१०

आ त्वेता नि षीदतेन्द्रमभि प्र गायत। सखायः स्तोमवाहसः ॥१॥
पुरूतमं पुरूणामीशानं वार्याणाम्। इन्द्रं सोमे सचा सुते ॥२॥
स घा नो योग आ भुवत् स राये स पुरंध्याम्। गमद् वाजेभिरा स नः ॥३॥
यस्य संस्थे न वृण्वते हरी समत्सु शत्रवः। तस्मा इन्द्राय गायत ॥४॥
सुतपाव्ने सुता इमे शुचयो यन्ति वीतये। सोमासो दध्याशिरः ॥५॥
त्वं सुतस्य पीतये सद्यो वृद्धो अजायथाः। इन्द्र ज्यैष्ठ्याय सुक्रतो ॥६॥
आ त्वा विशन्त्वाशवः सोमास इन्द्र गिर्वणः। शं ते सन्तु प्रचेतसे ॥७॥
त्वां स्तोमा अवीवृधन् त्वामुक्था शतक्रतो। त्वां वर्धन्तु नो गिरः ॥८॥
अक्षितोतिः सनेदिमं वाजमिन्द्रः सहस्रिणम्। यस्मिन् विश्वानि पौंस्या ॥९॥
मा नो मर्ता अभि द्रुहन् तनूनामिन्द्र गिर्वणः। ईशानो यवया वधम् ॥१०॥
*ā tvetā ni ṣīdatendramabhi pra gāyata / sakhāyaḥ stomavāhasaḥ //1 //*
*purūtamaṁ purūṇāmīśānaṁ vāryāṇām / indraṁ some sachā sute //2 //*
*sa ghā no yeāga ā bhuvat sa rāye sa puraṁdhyām / gamad vājebhirā sa naḥ //3 //*
*yasya saṁsthe na vṛṇvate harī samatsu śatravaḥ / tasmā indrāya gāyata //4 //*
*sutapāvne sutā ime śuchayo yanti vītaye / somāso dadhyāśiraḥ //5 //*
*tvaṁ sutasya pītaye sadyo vṛddho ajāyathāḥ / indra jyaiṣṭhyāya sukrato //6 //*
*ā tvā viśantvāśavaḥ somāsa indra girvaṇaḥ / śaṁ te santu prachetase //7 //*
*tvāṁ stomā avīvṛdhan tvāmukthā śatakrato / tvāṁ vardhantu no giraḥ //8 //*
*akṣitotiḥ sanedimaṁ vājamindraḥ sahasriṇam / yasmin viśvāni pauṁsyā //9 //*
*mā no martā abhi druhan tanūnāmindra girvaṇaḥ / īśāno yavayā vadham //10 //*

ऋ. (Rv.) १.६.१-३

युंजन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः। रोचन्ते रोचना दिवि ॥१॥
युंजन्त्यस्य काम्या हरी विपक्षसा रथे। शोणा धृष्णू नृवाहसा ॥२॥
केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः ॥३॥
*yuṁjanti bradhnamaruṣaṁ charantaṁ pari tasthuṣaḥ / rochante rochanā divi //1 //*
*yuṁjantyasya kāmyā harī vipakṣasā rathe / śoṇā dhṛṣṇū nṛvāhasā //2 //*
*ketuṁ kṛṇvannaketave peśo maryā apeśase / samuṣadbhirajāyathāḥ //3 //*

ऋ. (Rv.) १.६.१०

इतो वा सातिमीमहे दिवो वा पार्थिवादधि। इन्द्रं महो वा रजसः ॥१०॥
*ito vā sātimīmahe divo vā pārthivādadhi / indraṁ maho vā rajasaḥ //10 //*

ऋ. (Rv.) १.७.१-१०

इन्द्रमिद् गाथिनो बृहदिन्द्रमर्केभिरर्किणः। इन्द्रं वाणीरनूषत ॥१॥
इन्द्र इद्धर्योः सचा संमिश्ल आ वचोयुजा। इन्द्रो वज्री हिरण्ययः ॥२॥
इन्द्रो दीर्घाय चक्षस आ सूर्यं रोहयद् दिवि। वि गोभिरद्रिमैरयत् ॥३॥
इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च। उग्र उग्राभिरूतिभिः ॥४॥
इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे। युजं वृत्रेषु वज्रिणम् ॥५॥
स नो वृषन्नमुं चरुं सत्रादावन्नपा वृधि। अस्मभ्यमप्रतिष्कुतः ॥६॥

तुंजेतुंजे य उत्तरे स्तोमा इन्द्रस्य वज्रिणः। न विन्धे अस्य सुष्टुतिम् ॥७॥
वृषा यूथेव वंसगः कृष्टीरियर्त्योजसा। ईशानो अप्रतिष्कुतः ॥८॥
य एकश्चर्षणीनां वसूनामिरज्यति। इन्द्रः पंच क्षितीनाम् ॥९॥
इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः। अस्माकमस्तु केवलः ॥१०॥
*indramid gāthino bṛhadindramarkebhirarkiṇaḥ | indraṁ vāṇīranūṣata ||1 ||*
*indra iddharyoḥ sachā saṁmiśla ā vachoyujā | indro vajrī hiraṇyayaḥ ||2 ||*
*indro dīrghāya chakṣasa ā sūryaṁ rohayad divi | vi gobhiradrimairayat ||3 ||*
*indra vājeṣu no'va sahasrapradhaneṣu cha | ugra ugrābhirūtibhiḥ ||4 ||*
*indraṁ vayaṁ mahādhana indramarbhe havāmahe | yujaṁ vṛtreṣu vajriṇam ||5 ||*
*sa no vṛṣannamuṁ charuṁ satrādāvannapā vṛdhi | asmabhyamapratiṣkutaḥ ||6 ||*
*tuṁjetuṁje ya uttare stomā indrasya vajriṇaḥ | na vindhe asya suṣṭutim ||7 ||*
*vṛṣā yūtheva vaṁsagaḥ kṛṣṭīriyartyojasā | īśāno apratiṣkutaḥ ||8 ||*
*ya ekaścharṣaṇīnāṁ vasūnāmirajyati | indraḥ paṁcha kṣitīnām ||9 ||*
*indraṁ vo viśvataspari havāmahe janebhyaḥ | asmākamastu kevalaḥ ||10 ||*

ऋ. (Rv.) १.८.१-१०

एन्द्र सानसिं रयिं सजित्वानं सदासहम्। वर्षिष्ठमूतये भर ॥१॥
नि येन मुष्टिहत्यया नि वृत्रा रुणधामहै। त्वोतासो न्यर्वता ॥२॥
इन्द्र त्वोतास आ वयं वज्रं घना ददीमहि। जयेम सं युधि स्पृधः ॥३॥
वयं शूरेभिरस्तृभिरिन्द्र त्वया युजा वयम्। सासह्याम पृतन्यतः ॥४॥
महाँ इन्द्रः परश्च नु महित्वमस्तु वज्रिणे। द्यौर्न प्रथिना शवः ॥५॥
समोहे वा य आशत नरस्तोकस्य सनितौ। विप्रासो वा धियायवः ॥६॥
यः कुक्षिः सोमपातमः समुद्रइव पिन्वते। उर्वीरापो न काकुदः ॥७॥
एवा ह्यस्य सूनृता विरप्शी गोमती मही। पक्वा शाखा न दाशुषे ॥८॥
एवा हि ते विभूतय ऊतय इन्द्र मावते। सद्यश्चित् सन्ति दाशुषे ॥९॥
एवा ह्यस्य काम्या स्तोम उक्थं च शंस्या। इन्द्राय सोमपीतये ॥१०॥
*endra sānasiṁ rayiṁ sajitvānaṁ sadāsaham | varṣiṣṭhamūtaye bhara ||1 ||*
*ni yena muṣṭihatyayā ni vṛtrā ruṇadhāmahai | tvotāso nyarvatā ||2 ||*
*indra tvotāsa ā vayaṁ vajraṁ ghanā dadīmahi | jayema saṁ yudhi spṛdhaḥ ||3 ||*
*vayaṁ śūrebhirastṛbhirindra tvayā yujā vayam | sāsahyāma pṛtanyataḥ ||4 ||*
*mahām̐ indraḥ paraścha nu mahitvamastu vajriṇe | dyaurna prathinā śavaḥ ||5 ||*
*samohe vā ya āśata narastokasya sanitau | viprāso vā dhiyāyavaḥ ||6 ||*
*yaḥ kukṣiḥ somapātamaḥ samudraiva pinvate | urvīrāpo na kākudaḥ ||7 ||*
*evā hyasya sūnṛtā virapśī gomatī mahī | pakvā śākhā na dāśuṣe ||8 ||*
*evā hi te vibhūtaya ūtaya indra māvate | sadyaśchit santi dāśuṣe ||9 ||*
*evā hyasya kāmyā stoma ukthaṁ cha śaṁsyā | indrāya somapītaye ||10 ||*

ऋ. (Rv.) १.९.१-१०

इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः। महाँ अभिष्टिरोजसा ॥१॥
एमेनं सृजता सुते मन्दिमिन्द्राय मन्दिने। चक्रिं विश्वानि चक्रये ॥२॥
मत्स्वा सुशिप्र मन्दिभिः स्तोमेभिर्विश्वचर्षणे। सचैषु सवनेष्वा ॥३॥
असृग्रमिन्द्र ते गिरः प्रति त्वामुदहासत। अजोषा वृषभं पतिम् ॥४॥
सं चोदय चित्रमर्वाग् राध इन्द्र वरेण्यम्। असदित्ते विभु प्रभु ॥५॥
अस्मान्त्सु तत्र चोदयेन्द्र राये रभस्वतः। तुविद्युम्न यशस्वतः ॥६॥
सं गोमदिन्द्र वाजवदस्मे पृथु श्रवो बृहत्। विश्वायुर्धेह्यक्षितम् ॥७॥
अस्मे धेहि श्रवो बृहद् द्युम्नं सहस्रसातमम्। इन्द्र ता रथिनीरिषः ॥८॥
वसोरिन्द्रं वसुपतिं गीर्भिर्गृणन्त ऋग्मियम्। होम गन्तारमूतये ॥९॥
सुतेसुते न्योकसे बृहद् बृहत एदरिः। इन्द्राय शूषमर्चति ॥१०॥
*indrehi matsyandhaso viśvebhiḥ seāmaparvabhiḥ | mahām̐ abhiṣṭirojasā ||1 ||*
*emenaṁ sṛjatā sute mandimindrāya mandine | chakriṁ viśvāni chakraye ||2 ||*
*matsvā suśipra mandibhiḥ stomebhirviśvacharṣaṇe | sachaiṣu savaneṣvā ||3 ||*
*asṛgramindra te giraḥ prati tvāmudahāsata | ajoṣā vṛṣabhaṁ patim ||4 ||*

*saṁ chodaya chitramarvāg rādha indra vareṇyam । asaditte vibhu prabhu ॥5 ॥*
*asmāntsu tatra chodayendra rāye rabhasvataḥ । tuvidyumna yaśasvataḥ ॥6 ॥*
*saṁ gomadindra vājavadasme pṛthu śravo bṛhat । viśvāyurdhehyakṣitam ॥7 ॥*
*asme dhehi śravo bṛhad dyumnaṁ sahasrasātamam । indra tā rathinīriṣaḥ ॥8 ॥*
*vasorindraṁ vasupatiṁ gīrbhirgṛṇanta ṛgmiyam । homa gantāramūtaye ॥9 ॥*
*sutesute nyokase bṛhad bṛhata edariḥ । indrāya śūṣamarchati ॥10 ॥*

ऋ. (Rv.) १.१०.१-१२

गायन्ति त्वा गायत्रिणोऽर्चन्त्यिर्कमर्किणः । ब्रह्माणस्त्वा शतकृत उद्वंशमिव येमिरे ॥१॥
यत्सानो सानुरुहद् भूर्यस्पष्ट कर्त्वम् । तदिन्द्रो अर्थं चेतति यूथेन वृष्णिरेजति ॥२॥
युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा । अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर ॥३॥
एहि स्तोमाँ अभि स्वराभि गृणीह्या रुव । ब्रह्म च नो वसो सचेन्द्र यज्ञं च वर्धय ॥४॥
उक्थमिन्द्राय शंस्यं वर्धनं पुरुनिष्षिधे । शक्रो यथा सुतेषु णो रारणत् सख्येषु च ॥५॥
तमित् सखित्व ईमहे तं राये तं सुवीर्ये । स शक्र उत नः शकदिन्द्रो वसु दयमानः ॥६॥
सुविवृतं सुनिरजमिन्द्र त्वादातमिद्यशः । गवामप व्रजं वृधि कृणुष्व राधो अद्रिवः ॥७॥
नहि त्वा रोदसी उभे ऋघायमाणामिन्वतः । जेषः स्वर्वतीरपः सं गाः अस्मभ्यं धिनुहि ॥८॥
आश्रुत्कर्ण श्रुधी हवं नू चिद्दधिष्व मे गिरः । इन्द्र स्तोममिमं मम कृष्वा युजश्चिदन्तरम ॥९॥
विद्मा हि त्वा वृषन्तमं वाजेषु हवनश्रुतम् । वृषन्तमस्य हूमह ऊतिं सहस्रसातमम् ॥१०॥
आ तु न इन्द्र कौशिक मन्दसानः सुतं पिब । नव्यमायुः प्र सू तिर कृधि सहस्रसामृषिम् ॥११॥
परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः । वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः ॥१२॥

*gāyanti tvā gāyatriṇo'rchantyirkamarkiṇaḥ ।*
*brahmāṇastvā śatakṛta udvaṁśamiva yemire ॥1 ॥*
*yatsāno sānuruhad bhūryaspaṣṭa kartvam ।*
*tadindro arthaṁ chetati yūthena vṛṣṇirejati ॥2 ॥*
*yukṣavā hi keśinā harī vṛṣaṇā kakṣayaprā ।*
*athā na indra somapā girāmupaśrutiṁ chara ॥3 ॥*
*ehi stomām̐ abhi svarābhi gṛṇīhyā ruva ।*
*brahma cha no vaso sachendra yajñaṁ cha vardhaya ॥4 ॥*
*ukthamindrāya śaṁsyaṁ vardhanaṁ puruniṣṣidhe ।*
*śakro yathā suteṣu ṇo rāraṇat sakhyeṣu cha ॥5 ॥*
*tamit sakhitva īmahe taṁ rāye taṁ suvīrye ।*
*sa śakra uta naḥ śakadindro vasu dayamānaḥ ॥6 ॥*
*suvivṛtaṁ sunirajamindra tvādātamidyaśaḥ ।*
*gavāmapa vrajaṁ vṛdhi kṛṇuṣva rādho adrivaḥ ॥7 ॥*
*nahi tvā rodasī ubhe ṛghāyamāṇāminvataḥ ।*
*jeṣaḥ svarvatīrapaḥ saṁ gāḥ asmabhyaṁ dhinuhi ॥8 ॥*
*āśrutkarṇa śrudhī havaṁ nū chiddadhiṣva me giraḥ ।*
*indra stomamimaṁ mama kṛṣvā yujaśchidantarama ॥9 ॥*
*vidmā hi tvā vṛṣantamaṁ vājeṣu havanaśrutam ।*
*vṛṣantamasya hūmaha ūtiṁ sahasrasātamam ॥10 ॥*
*ā tu na indra kauśika mandasānaḥ sutaṁ piba ।*
*navyamāyuḥ pra sū tira kṛdhi sahasrasāmṛṣim ॥11 ॥*
*pari tvā girvaṇo gira imā bhavantu viśvataḥ ।*
*vṛddhāyumanu vṛddhayo juṣṭā bhavantu juṣṭayaḥ ॥12 ॥*

सा. (Sv.) १२९-१३०

एन्द्र सानसिं रयिं सजित्वानं सदासहम् । वर्षिष्ठमूतये भर ॥५॥
इन्द्र वयं महाधन इन्द्रमर्भे हवामहे । युजं वृत्रेषु वज्रिणम् ॥६॥
*endra sānasiṁ rayiṁ sajitvānaṁ sadāsaham । varṣiṣṭhamūtaye bhara ॥5 ॥*
*indra vayaṁ mahādhana indramarbhe havāmahe । yujaṁ vṛtreṣu vajriṇam ॥6 ॥*

सा. (Sv.) १६०

सुरूपकृत्नुमूतये सुदुधामिव गोदुहे । जुहूमसि द्यविद्यवि ॥६॥
*surūpakṛtnumūtaye sududhāmiva goduhe । juhūmasi dyavidyavi ॥6 ॥*

सा. (Sv.) १६४

आ त्वेता नि षीदतेन्द्रमभि प्र गायत। सखायः स्तोमवाहसः ॥१० ॥
*ā tvetā ni ṣīdatendramabhi pra gāyata । sakhāyaḥ stomavāhasaḥ ॥10 ॥*

सा. (Sv.) १६६

महाँ इन्द्रः पुरश्च नो महित्वमस्तु वज्रिणे। द्यौर्न प्रथिना शवः ॥२ ॥
*mahām̐ indraḥ puraścha no mahitvamastu vajriṇe । dyaurna prathinā śavaḥ ॥2 ॥*

सा. (Sv.) १८०

इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः। महाँ अभिष्टिरोजसा ॥६ ॥
*indrehi matsyandhaso viśvebhiḥ somaparvabhiḥ । mahām̐ abhiṣṭirojasā ॥6 ॥*

सा. (Sv.) १९८

इन्द्रमिद्गथिनो बृहदिन्द्रमर्केभिरर्किणः। इन्द्रं वाणीरनूषत ॥५ ॥
*indramidgathino bṛhadindramarkebhirarkiṇaḥ । indraṁ vāṇīranūṣata ॥5 ॥*

सा. (Sv.) २०५

असृग्रमिन्द्र ते गिरः प्रति त्वामुदहासत। सजोषा वृषभं पतिम् ॥२ ॥
*asṛgramindra te giraḥ prati tvāmudahāsata । sajoṣā vṛṣabhaṁ patim ॥2 ॥*

सा. (Sv.) ३४२

गयन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः। ब्रह्मणस्त्वा शतक्रत उद्वंशमिव येमिरे ॥१ ॥
*gayanti tvā gāyatriṇo'rchantyarkamarkiṇaḥ । brahmaṇastvā śatakrata udvaṁśamiva yemire ॥1 ॥*

सा. (Sv.) ५९७

इन्द्र इद्धर्योः सचा सम्मिश्ल आ वचोयुजा। इन्द्रो वज्री हिरण्ययः ॥३ ॥
*indra iddharyoḥ sachā sammiśla ā vachoyujā । indro vajrī hiraṇyayaḥ ॥3 ॥*

सा. (Sv.) ५९८

इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च। उग्र उग्राभिरूतिभिः ॥४ ॥
*indra vājeṣu no'va sahasrapradhaneṣu cha । ugra ugrābhirūtibhiḥ ॥4 ॥*

सा. (Sv.) ७४०-७४२

आ त्वेता नि षीदतेन्द्रमभि प्र गायत। सखाय स्तोमवाहसः ॥१ ॥
पुरूतमं पुरूणामीशानं वार्याणाम्। इन्द्रं सोमे सचा सुते ॥२ ॥
स घा नो योग आ भुवत्स राये स पुरुन्ध्या। गमद्वाजेभिरा स नः ॥३ ॥
*ā tvetā ni ṣīdatendramabhi pra gāyata । sakhāya stomavāhasaḥ ॥1 ॥*
*purūtamaṁ purūṇāmīśānaṁ vāryāṇām । indraṁ some sachā sute ॥2 ॥*
*sa ghā no yoga ā bhuvatsa rāye sa purundhyā । gamadvājebhirā sa naḥ ॥3 ॥*

सा. (Sv.) ७९६-७९९

इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः। इन्द्र वाणीरनूषत ॥१ ॥
इन्द्र इद्धर्योः सचा सम्मिश्ल आ वचोयुजा। इन्द्रो वज्री हिरण्ययः ॥२ ॥
इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च। उग्र उग्राभिरूतिभिः ॥३ ॥
इन्द्रो दीर्घाय चक्षस आ सूर्यं रोहयद्दिवि। वि गोभिरद्रिमैरयत् ॥४ ॥
*indramidgāthino bṛhadindramarkebhirarkiṇaḥ । indra vāṇīranūṣata ॥1 ॥*
*indra iddharyoḥ sachā sammiśla ā vachoyujā । indro vajrī hiraṇyayaḥ ॥2 ॥*
*indra vājeṣu no'va sahasrapradhaneṣu cha । ugra ugrābhirūtibhiḥ ॥3 ॥*
*indro dīrghāya chakṣasa ā sūryaṁ rohayaddivi । vi gobhiradrimairayat ॥4 ॥*

सा. (Sv.) ८५०-८५२

इन्द्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा। मन्दू समानवर्चसा ॥१ ॥
आदह स्वधामनु पुनर्गर्भत्वमेरिरे। दधाना नाम यज्ञियम् ॥२ ॥
वीडु चिदारुजत्नुभिर्गुहा चिदिन्द्र बह्निभिः। अविन्द उस्त्रिया अनु ॥३ ॥
*indreṇa saṁ hi dṛkṣase saṁjagmāno abibhyuṣā । mandū samānavarchasā ॥1 ॥*
*ādaha svadhāmanu punargarbhatvamerire । dadhānā nāma yajñiyam ॥2 ॥*
*vīḍu chidārujatnubhirguhā chidindra bahnibhiḥ । avinda usriyā anu ॥3 ॥*

सा. (Sv.) १०८७-१०८९

सुरूपकृत्नुमूतये सुदुघामिव गोदुहे। जुहूमसि द्यविद्यवि ॥१॥
उप नः सवना गहि सोमस्य सोमपाः पिब। गोदा इद्रेवतो मदः ॥२॥
अथा ते अन्तमानां विद्याम सुमतीनाम्। मा नो अति ख्य आ गहि ॥३॥
*surūpakṛtnumūtaye sudughāmiva goduhe | juhūmasi dyavidyavi ॥1॥*
*upa naḥ savanā gahi somasya somapāḥ piba | godā idrevato madaḥ ॥2॥*
*athā te antamānāṁ vidyāma sumatīnām | mā no ati khya ā gahi ॥3॥*

सा. (Sv.) १३४४-१३४६

गायन्ति त्वा गायत्रिणोऽर्चत्यर्कमर्किणः। ब्रह्माणस्त्वा शतक्रत उद्वंशमिव योमिरे ॥१॥
यत्सानोः सान्वारुहो भूर्यस्पष्ट कर्त्वम्। तदिन्द्रो अर्थं चेतति यूथेन वृष्णिरेजति ॥२॥
युंक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा। अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर ॥३॥
*gāyanti tvā gāyatriṇo'rchatyarkamarkiṇaḥ |*
*brahmāṇastvā śatakrata udvaṁśamiva yomire ॥1॥*
*yatsānoḥ sānvāruho bhūryaspaṣṭa kartvam |*
*tadindro arthaṁ chetati yūthena vṛṣṇirejati ॥2॥*
*yuṁkṣavā hi keśinā harī vṛṣaṇā kakṣayaprā |*
*athā na indra somapā girāmupaśrutiṁ chara ॥3॥*

सा. (Sv.) १४६८-१४७०

युंजन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः। रोचन्ते रोचना दिवि ॥१॥
युंजन्त्यस्य काम्या हरी विपक्षसा रथे। शोणा धृष्णू नृवाहसा ॥२॥
केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः ॥३॥
*yuṁjanti bradhnamaruṣaṁ charantaṁ pari tasthuṣaḥ | rochante rochanā divi ॥1॥*
*yuṁjantyasya kāmyā harī vipakṣasā rathe | śoṇā dhṛṣṇū nṛvāhasā ॥2॥*
*ketuṁ kṛṇvannaketave peśo maryā apeśase | samuṣadbhirajāyathāḥ ॥3॥*

सा. (Sv.) १६२०-१६२२

इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः। अस्माकमस्तु केवलः ॥१॥
स नो वृषन्नमुं चरुं सत्रादावन्नपा वृधि। अस्मभ्यमप्रतिष्कुतः ॥२॥
वृषा यूथेव वं सगः कृष्टीरियर्त्योजसा। ईशानो अप्रतिष्कुतः ॥३॥
*indraṁ vo viśvataspari havāmahe janebhyaḥ | asmākamastu kevalaḥ ॥1॥*
*sa no vṛṣannamuṁ charuṁ satrādāvannapā vṛdhi | asmabhyamapratiṣkutaḥ ॥2॥*
*vṛṣā yūtheva vaṁ sagaḥ kṛṣṭīriyartyojasā | īśāno apratiṣkutaḥ ॥3॥*

४. इन्द्रः (साग्री. सास्वा.) मित्रावरुणौ (सार्षेदी.) (Indraḥ [Ssb. Sas.] Mitrāvaruṇau [Sad.]) - ऋ. (Rv.) १.१०.१-१२; सा. (Sv.) ३६३

ऋ. (Rv.) १.१०.१-१२

गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः। ब्रह्माणस्त्वा शतक्रत उद्वंशभिव येमिरे ॥१॥
यत्सानोः सानुमारुहद् भूर्यस्पष्ट कर्त्वम्। तदिन्द्रो अर्थं चेतति यूथेन वृष्णिरेजति ॥२॥
युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा। अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर ॥३॥
एहि स्तोमाँ अभि स्वराऽभि गृणीह्या रुव। ब्रह्म च नो वसो सचेन्द्र यज्ञं च वर्धय ॥४॥
शक्रो यथा सुतेषु णे रारणत् सख्येषु च ॥५॥
तमित् सखित्व ईमहे तं राये तं सुवीर्ये। स शक्र उत नः शकदिन्द्रो वसु दयमानः ॥६॥
सुविवृतं सुनिरज मिन्द्र त्वादातमिद् यशः। गवामप व्रजं वृधि कृणुष्व राधो अद्रिवः ॥७॥
नहि त्वा रोदसी उभे ऋघायमाणमिन्वतः। जेषः स्वर्वतीरपः सं गा अस्मभ्यं धूनुहि ॥८॥
आश्रुत्कर्ण श्रुधी हवं नू चिद्दधिष्व मे गिरः। इन्द्र स्तोममिमं मम कृष्वा युजश्चिदन्तरम् ॥९॥
विद्मा हि त्वा वृषन्तमं वाजेषु हवनश्रुतम्। वृषन्तमस्य हूमह ऊतिं सहस्रसातमाम् ॥१०॥
आ तू न इन्द्र कौशिक मन्दसानः सुतं पिब। नव्यमायुः प्र सू तिर कृधी सहस्रसामृषिम् ॥११॥
परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः। वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः ॥१२॥
गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः। ब्रह्माणस्त्वा शतक्रत उद्वंशभिव येमिरे ॥१॥
यत्सानोः सानुमारुहद् भूर्यस्पष्ट कर्त्वम्। तदिन्द्रो अर्थं चेतति यूथेन वृष्णिरेजति ॥२॥

युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा। अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर ॥३॥
एहि स्तोमाँ अभि स्वराऽभि गृणीह्या रुव। ब्रह्म च नो वसो सचेन्द्र यज्ञं च वर्धय ॥४॥
शक्रो यथा सुतेषु णे रारणत् सख्येषु च ॥५॥
तमित् सखित्व ईमहे तं राये तं सुवीर्ये। स शक्र उत नः शकदिन्द्रो वसु दयमानः ॥६॥
सुविवृतं सुनिरज मिन्द्र त्वादातमिद् यशः। गवामप व्रजं वृधि कृणुष्व राधो अद्रिवः ॥७॥
नहि त्वा रोदसी उभे ऋघायमाणमिन्वतः। जेषः स्वर्वतीरपः सं गा अस्मभ्यं धूनुहि ॥८॥
आश्रुत्कर्ण श्रुधी हवं नू चिद्दधिष्व मे गिरः। इन्द्र स्तोममिमं मम कृष्वा युजश्चिदन्तरम् ॥९॥
विद्मा हि त्वा वृषन्तमं वाजेषु हवनश्रुतम्। वृषन्तमस्य हूमह ऊतिं सहस्रसातमाम् ॥१०॥
आ तू न इन्द्र कौशिक मन्दसानः सुतं पिब। नव्यमायुः प्र सू तिर कृधी सहस्रसामृषिम् ॥११॥
परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः। वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः ॥१२॥

*gāyanti tvā gāyatriṇo'rchantyarkamarkiṇaḥ |*
*brahmāṇastvā śatakrata udvaṁśabhiva yemire ||1 ||*
*yatsānoḥ sānumāruhad bhūryaspaṣṭa kartvam |*
*tadindro arthaṁ chetati yūthena vṛṣṇirejati ||2 ||*
*yukṣavā hi keśinā harī vṛṣaṇā kakṣayaprā |*
*athā na indra somapā girāmupaśrutiṁ chara ||3 ||*
*ehi stomām̐ abhi svarā'bhi gṛṇīhyā ruva |*
*brahma cha no vaso sachendra yajñaṁ cha vardhaya ||4 ||*
*śakro yathā suteṣu ṇe rāraṇat sakhyeṣu cha ||5 ||*
*tamit sakhitva īmahe taṁ rāye taṁ suvīrye |*
*sa śakra uta naḥ śakadindro vasu dayamānaḥ ||6 ||*
*suvivṛtaṁ suniraja mindra tvādātamid yaśaḥ |*
*gavāmapa vrajaṁ vṛdhi kṛṣṇuṣva rādho adrivaḥ ||7 ||*
*nahi tvā rodasī ubhe ṛghāyamāṇaminvataḥ |*
*jeṣaḥ svarvatīrapaḥ saṁ gā asmabhyaṁ dhūnuhi ||8 ||*
*āśrutkarṇa śrudhī havaṁ nū chiddadhiṣva me giraḥ |*
*indra stomamimaṁ mama kṛṣvā yujaśchidantaram ||9 ||*
*vidmā hi tvā vṛṣantamaṁ vājeṣu havanaśrutam |*
*vṛṣantamasya hūmaha ūtiṁ sahasrasātamām ||10 ||*
*ā tū na indra kauśika mandasānaḥ sutaṁ piba |*
*navyamāyuḥ pra sū tira kṛdhī sahasrasāmṛṣim ||11 ||*
*pari tvā girvaṇo gira imā bhavantu viśvataḥ |*
*vṛddhāyumanu vṛddhayo juṣṭā bhavantu juṣṭayaḥ ||12 ||*

*gāyanti tvā gāyatriṇo'rchantyarkamarkiṇaḥ |*
*brahmāṇastvā śatakrata udvaṁśabhiva yemire ||1 ||*
*yatsānoḥ sānumāruhad bhūryaspaṣṭa kartvam |*
*tadindro arthaṁ chetati yūthena vṛṣṇirejati ||2 ||*
*yukṣavā hi keśinā harī vṛṣaṇā kakṣayaprā |*
*athā na indra somapā girāmupaśrutiṁ chara ||3 ||*
*ehi stomām̐ abhi svarā'bhi gṛṇīhyā ruva |*
*brahma cha no vaso sachendra yajñaṁ cha vardhaya ||4 ||*
*śakro yathā suteṣu ṇe rāraṇat sakhyeṣu cha ||5 ||*
*tamit sakhitva īmahe taṁ rāye taṁ suvīrye |*
*sa śakra uta naḥ śakadindro vasu dayamānaḥ ||6 ||*
*suvivṛtaṁ suniraja mindra tvādātamid yaśaḥ |*
*gavāmapa vrajaṁ vṛdhi kṛṣṇuṣva rādho adrivaḥ ||7 ||*
*nahi tvā rodasī ubhe ṛghāyamāṇaminvataḥ |*
*jeṣaḥ svarvatīrapaḥ saṁ gā asmabhyaṁ dhūnuhi ||8 ||*
*āśrutkarṇa śrudhī havaṁ nū chiddadhiṣva me giraḥ |*
*indra stomamimaṁ mama kṛṣvā yujaśchidantaram ||9 ||*
*vidmā hi tvā vṛṣantamaṁ vājeṣu havanaśrutam |*
*vṛṣantamasya hūmaha ūtiṁ sahasrasātamām ||10 ||*
*ā tū na indra kauśika mandasānaḥ sutaṁ piba |*

*navyamāyuḥ pra sū tira kṛdhī sahasrasāmṛṣim ॥11॥*
*pari tvā girvaṇo gira imā bhavantu viśvataḥ ।*
*vṛddhāyumanu vṛddhayo juṣṭā bhavantu juṣṭayaḥ ॥12॥*

सा. (Sv.) ३६३

उक्थमिन्द्राय शंस्यं वर्धनं पुरुनिषिधे। शक्रो यथा सतेषु नो रारणत्सख्येषु च ॥४॥
*ukthamindrāya śaṁsyaṁ vardhanaṁ puruniṣidhe ।*
*śakro yathā sateṣu no rāraṇatsakhyeṣu cha ॥4॥*

५. इन्द्रः (सास्वा.साग्री. ) सरस्वती (सार्षेदी.) (Indraḥ [Sas.Ssb. ) Sarasvatī [Sad.]) - सा. (Sv.) १८९

पावका नः सरस्वती वाजेभिर्वाजिनीवती। यज्ञं वष्टु धियावसुः ॥५॥
*pāvakā naḥ sarasvatī vājebhirvājinīvatī । yajñaṁ vaṣṭu dhiyāvasuḥ ॥5॥*

६. इन्द्रवायू (Indravāyū) - ऋ. (Rv.) १.२.४-६

इन्द्रवायू इमे सुता उप प्रयोभिरा गतम्। इन्दवो वामुशन्ति हि ॥४॥
वायविन्द्रश्च चेतथः सुतानां वाजिनीवसू। तावा यातमुप द्रवत् ॥५॥
वायविन्द्रश्च सुन्वत आ यातमुप निष्कृतम्। मक्षिवि१त्था धिया नरा ॥६॥
*indravāyū ime sutā upa prayobhirā gatam । indavo vāmuśanti hi ॥4॥*
*vāyavindraścha chetathaḥ sutānāṁ vājinīvasū । tāvā yātamupa dravat ॥5॥*
*vāyavindraścha sunvata ā yātamupa niṣkṛtam । makṣavi1tthā dhiyā narā ॥6॥*

७. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ४६८; ६८९-६९१

सा. (Sv.) ४६८

स्वादिष्ठया मदिष्ठया पवस्व सोम धारया। इन्द्राय पातवे सुतः ॥२॥
*svādiṣṭhayā madiṣṭhayā pavasva soma dhārayā । indrāya pātave sutaḥ ॥2॥*

सा. (Sv.) ६८९-६९१

स्वादिष्ठया मदिष्ठया पवस्व सोम धारया। इन्द्राय पातवे सुतः ॥१॥
रक्षोहा विश्वचर्षणिरभि योनिमयोहते। द्रोणे सधस्थमासदत् ॥२॥
वरिवोधातमो भुवो मंहिष्ठो वृत्रहन्तमः। पर्षि राधो मघोनाम् ॥३॥
*svādiṣṭhayā madiṣṭhayā pavasva soma dhārayā । indrāya pātave sutaḥ ॥1॥*
*rakṣohā viśvacharṣaṇirabhi yonimayohate । droṇe sadhasthamāsadat ॥2॥*
*varivodhātamo bhuvo maṁhiṣṭho vṛtrahantamaḥ । parṣi rādho maghonām ॥3॥*

८. मरुतः (Marutaḥ) - ऋ. (Rv.) १.६.४; ६; ८; ९; सा. (Sv.) ८५१

ऋ. (Rv.) १.६.४

आदह स्वधामनु पुनर्गर्भत्वमेरिरे। दधाना नाम यज्ञियम् ॥४॥
*ādaha svadhāmanu punargarbhatvamerire । dadhānā nāma yajñiyam ॥4॥*

ऋ. (Rv.) १.६.६

देवयन्तो यथा मतिमच्छा विदद्वसुं गिरः। महामनूषत श्रुतम् ॥६॥
*devayanto yathā matimachchhā vidadvasuṁ giraḥ । mahāmanūṣata śrutam ॥6॥*

ऋ. (Rv.) १.६.८-९

अनवद्यैरभिद्युभिर्मखः सहस्वदर्चति। गणैरिन्द्रस्य काम्यै ॥८॥
अतः परिज्मन्ना गहि दिवो वा रोचनादधि। समस्मिन्नृंजते गिरः ॥९॥
*anavadyairabhidyubhirmakhaḥ sahasvadarchati । gaṇairindrasya kāmyai ॥8॥*
*ataḥ parijmannā gahi divo vā rochanādadhi । samasminnṛṁjate giraḥ ॥9॥*

सा. (Sv.) ८५१

आदह स्वधामनु पुनर्गर्भत्वमेरिरे। दधाना नाम यज्ञियम् ॥२॥
*ādaha svadhāmanu punargarbhatvamerire । dadhānā nāma yajñiyam ॥2॥*

९. मरुतः इन्द्रश्च (Marutaḥ Indraścha) - ऋ. (Rv.) १.६.५; ७

ऋ. (Rv.) १.६.५

वीळु चिदारुर्जनुभिर्गुहा चिदिन्द्र वह्निभिः। अविन्द उस्रिया अनु ॥५॥
इन्द्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा। मन्दू समानवर्चसा ॥७॥
*vīḷu chidārurjanubhirguhā chidindra vahnibhiḥ I avinda usriyā anu II5 II*
*indreṇa saṁ hi dṛkṣase saṁjagmāno abibhyuṣā I mandū samānavarchasā II7 II*

१०. मित्रावरुणौ (Mitrāvaruṇau) - ऋ. (Rv.) १.२.७-९; सा. (Sv.) ८४७-८४९

मित्रं हुवे पूतदक्षं वरुणं च रिशादसम्। धियं घृताचीं साधन्ता ॥७॥
ऋतेन मित्रावरुणावृतावृधावृतस्पृशा। क्रतुं बृहन्तमाशाथे ॥८॥
कवी नो मित्रावरुणा तुविजाता उरुक्षया। दक्षं दधाते अपसम् ॥९॥
*mitraṁ huve pūtadakṣaṁ varuṇaṁ cha riśādasam I dhiyaṁ ghṛtāchīṁ sādhantā II7 II*
*ṛtena mitrāvaruṇāvṛtāvṛdhāvṛtaspṛśā I kratuṁ bṛhantamāśāthe II8 II*
*kavī no mitrāvaruṇā tuvijātā urukṣayā I dakṣaṁ dadhāte apasam II9 II*

सा. (Sv.) ८४७-८४९

मित्रं हुवे पूतदक्षं वरुणं च रिशादसम्। धियं धृताचीं साधन्ता ॥१॥
ऋतेन मित्रावरुणावृतावृधावृतस्पृशा। क्रतुं बृहन्तमाशाथे ॥२॥
कवी नो मित्रावरुणा तुविजाता उरुक्षया। दक्षं दधाते अपसम् ॥३॥
*mitraṁ huve pūtadakṣaṁ varuṇaṁ cha riśādasam I dhiyaṁ dhṛtāchīṁ sādhantā II1 II*
*ṛtena mitrāvaruṇāvṛtāvṛdhāvṛtaspṛśā I kratuṁ bṛhantamāśāthe II2 II*
*kavī no mitrāvaruṇā tuvijātā urukṣayā I dakṣaṁ dadhāte apasam II3 II*

११. वायुः (Vāyuḥ) - ऋ. (Rv.) १.२.१-३

वायवा याहि दर्शतेमे सोमा अरंकृताः। तेषां पाहि श्रुधी हवम् ॥१॥
वाय उक्थेभिर्जरन्ते त्वामच्छा जरितारः। सुतसोमा अहर्विदः ॥२॥
वायो तव प्रपृंचती धेना जिगाति दाशुषे। उरूची सोमपीतये ॥३॥
*vāyavā yāhi darśateme somā araṁkṛtāḥ I teṣāṁ pāhi śrudhī havam II1 II*
*vāya ukthebhirjarante tvāmachchhā jaritāraḥ I sutasomā aharvidaḥ II2 II*
*vāyo tava prapṛṁchatī dhenā jigāti dāśuṣe I urūchī somapītaye II3 II*

१२. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १.३.७-९

ओमासश्चर्षणीधृतो विश्वे देवास आ गत। दाश्वांसो दाशुषः सुतम् ॥७॥
विश्वे देवासो अप्तुरः सुतमा गन्त तूर्णयः। उस्रा इव स्वसराणि ॥८॥
विश्वे देवासो अस्रिध एहिमायासो अद्रुहः। मेधं जुषन्त वह्नयः ॥९॥
*omāsaścharṣaṇīdhṛto viśve devāsa ā gata I dāśvāṁso dāśuṣaḥ sutam II7 II*
*viśve devāso apturaḥ sutamā ganta tūrṇayaḥ I usrā iva svasarāṇi II8 II*
*viśve devāso asridha ehimāyāso adruhaḥ I medhaṁ juṣanta vahnayaḥ II9 II*

१३. सरस्वती (Sarasvatī) - ऋ. (Rv.) १.३.१०-१२

पावका नः सरस्वती वाजेभिर्वाजिनीवती। यज्ञं वष्टु धियावसुः ॥१०॥
चोदयित्री सूनृतानां चेतन्ती सुमतीनाम्। यज्ञं दधे सरस्वती ॥११॥
महो अर्णः सरस्वती प्र चेतयति केतुना। धियो विश्वा वि राजति ॥१२॥
*pāvakā naḥ sarasvatī vājebhirvājinīvatī I yajñaṁ vaṣṭu dhiyāvasuḥ II10 II*
*chodayitrī sūnṛtānāṁ chetantī sumatīnām I yajñaṁ dadhe sarasvatī II11 II*
*maho arṇaḥ sarasvatī pra chetayati ketunā I dhiyo viśvā vi rājati II12 II*

**४८१. मधुच्छन्दा सुतजेता (Madhuchchhandā Sutajetā)**

१. इन्द्रः (Indraḥ) - य. (Yv.) १२.५६; १७.६१

य. (Yv.) १२.५६

इन्द्रं विश्वाऽअवीवृधन्त्समुद्रव्यचसं गिरः। रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥५६॥
*indraṁ viśvā'avīvṛdhantsamudravyachasaṁ giraḥ I*
*rathītamaṁ rathīnāṁ vājānāṁ satpatiṁ patim II56 II*

य. (Yv.) १७.६१

इन्द्रं विश्वाऽअवीवृधन्त्समुद्रव्यचसं गिरः। रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥६१॥
*indraṁ viśvā'avīvṛdhantsamudravyachasaṁ giraḥ |*
*rathītamaṁ rathīnāṁ vājānāṁ satpatiṁ patim ॥61॥*

## ४८२. मनुः (Manuḥ)

१. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.) ३३.९१; ९४

य. (Yv.) ३३.९१

देवंदेवं वोऽवसे देवंदेवमाभिष्टये। देवंदेवं हुवेम वाजसातये गृणन्तो देव्या धिया ॥९१॥
*devaṁdevaṁ vo'vase devaṁdevamābhiṣṭaye |*
*devaṁdevaṁ huvema vājasātaye gṛṇanto devyā dhiyā ॥91॥*

य. (Yv.) ३३.९४

देवासो हि ष्मा मनवे समन्यवो विश्वे साकं सरातयः ।
ते नोऽअद्य तेऽअपरं तुचे तु नो भवन्तु वरिवोविदः ॥९४॥
*devāso hi ṣmā manave samanyavo viśve sākaṁ sarātayaḥ |*
*te no'adya te'aparaṁ tuche tu no bhavantu varivovidaḥ ॥94॥*

## ४८३. मनुर् आप्स्वः (Manur Āpsvaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.१०६.७-९; सा. (Sv.) ५७१; १३२६-२८

९.१०६.७-९

पवस्व देववीतय इन्दो धाराभिरोजसा। आ कलशं मधुमान्त्सोम नः सदः ॥७॥
तव द्रप्सा उदप्रुत इन्द्रं मदाय वावृधुः। त्वां देवासो अमृताय कं पपुः ॥८॥
आ नः सुतास इन्दवः पुनाना धावता रयिम्। वृष्टिद्यावो रीत्यापः स्वर्विदः ॥९॥
*pavasva devavītaya indo dhārābhirojasā | ā kalaśaṁ madhumāntsoma naḥ sadaḥ ॥7॥*
*tava drapsā udapruta indraṁ madāya vāvṛdhuḥ | tvāṁ devāso amṛtāya kaṁ papuḥ ॥8॥*
*ā naḥ sutāsa indavaḥ punānā dhāvatā rayim | vṛṣṭidyāvo rītyāpaḥ svarvidaḥ ॥9॥*

सा. (Sv.) ५७१

पवस्व देववीतय इन्दो धाराभिरोजसा। आ कलशं मधुमान्त्सोम नः सदः ॥६॥
*pavasva devavītaya indo dhārābhirojasā | ā kalaśaṁ madhumāntsoma naḥ sadaḥ ॥6॥*

सा. (Sv.) १३२६-१३२८

पवस्व देववीतय इन्दो धाराभिरोजसा। आ कलशं मधुमान्त्सोम नः सदः ॥१॥
तव द्रप्सा उदप्रुत इन्द्रं मदाय वावुधुः। त्वां देवासो अमृताय कं पपुः ॥२॥
आ नः सुतास इन्दवः पुनाना धावता रयिम्। वृष्टिद्यावो रीत्यापः स्वर्विदः ॥३॥
*pavasva devavītaya indo dhārābhirojasā | ā kalaśaṁ madhumāntsoma naḥ sadaḥ ॥1॥*
*tava drapsā udapruta indraṁ madāya vāvudhuḥ | tvāṁ devāso amṛtāya kaṁ papuḥ ॥2॥*
*ā naḥ sutāsa indavaḥ punānā dhāvatā rayim | vṛṣṭidyāvo rītyāpaḥ svarvidaḥ ॥3॥*

## ४८४. मनुस् तापसः (Manus Tāpasaḥ)

१. मन्युः (Manyuḥ) - ऋ. (Rv.) १०.८३.१-७; १०.८४.१-७

ऋ. (Rv.) १०.८३.१-७

यस्ते मन्योऽविधद्वज्र सायक सह ओजः पुष्यति विश्वमानुषक् ।
साह्याम दासमार्यं त्वया युजा सहस्कृतेन सहसा सहस्वता ॥१॥
मनयुरिन्द्रो मन्युरेवास देवो मन्युर्होता वरुणो वातवेदाः ।
मन्युं विश ईळते मानुषीर्याः पाहि नो मन्यो तपसा सजोषाः ॥२॥
अभीहि मन्यो तवसस्तवीयान्तपसा युजा वि जहि शत्रून् ।
अमित्रहा वृत्रहा दस्युहा च विश्वा वसून्या भरा त्वं नः ॥३॥
त्वं हि मन्यो अभिभूतयोजाः स्वयम्भूर्भामो अभिमातिषाहः ।
विश्वचर्षणिः सहुरिः सहावानस्मास्वोजः पृतनासु धेहि ॥४॥

अभागः सन्नप परेतो अस्मि तव क्रत्वा तविषस्य प्रचेतः ।
तं त्वा मन्यो अक्रतुर्जिहीळाहं स्वा तनूर्बलदेयाय मेहि ॥५॥
अयं ते अस्मयुप मेह्यर्वाङ् प्रतीचीनः सहुरे विश्वधयः ।
मन्यो वज्रिन्नभि मामा ववृत्स्व हनाव दस्यूँरुत बोध्यापेः ॥६॥
अभि प्रेहि दक्षिणतो भवा मेऽधा वृत्राणि जंघनाव भूरि ।
जुहोमि ते धरुणं मध्वो अग्रमुभा उपांशु प्रथमा पिबाव ॥७॥
*yaste manyo'vidhadvajra sāyaka saha ojaḥ puṣyati viśvamānuṣak /*
*sāhyāma dāsamāryaṁ tvayā yujā sahaskṛtena sahasā sahasvatā //1 //*
*manayurindro manyurevāsa devo manyurhotā varuṇo vātavedāḥ /*
*manyuṁ viśa īḻate mānuṣīryāḥ pāhi no manyo tapasā sajoṣāḥ //2 //*
*abhīhi manyo tavasastavīyāntapasā yujā vi jahi śatrūn /*
*amitrahā vṛtrahā dasyuhā cha viśvā vasūnyā bharā tvaṁ naḥ //3 //*
*tvaṁ hi manyo abhibhūtayojāḥ svayambhūrbhāmo abhimātiṣāhaḥ /*
*viśvacharṣaṇiḥ sahuriḥ sahāvānasmāsvojaḥ pṛtanāsu dhehi //4 //*
*abhāgaḥ sannapa pareto asmi tava kratvā taviṣasya prachetaḥ /*
*taṁ tvā manyo akraturjihīḻāhaṁ svā tanūrbaladeyāya mehi //5 //*
*ayaṁ te asmayupa mehyarvāṅ pratīchīnaḥ sahure viśvadhayaḥ /*
*manyo vajrinnabhi māmā vavṛtsva hanāva dasyūm̐ruta bodhyāpeḥ //6 //*
*abhi prehi dakṣiṇato bhavā me'dhā vṛtrāṇi jaṁghanāva bhūri /*
*juhomi te dharuṇaṁ madhvo agramubhā upāṁśu prathamā pibāva //7 //*

ऋ. (Rv.) १०.८४.१-७

त्वया मन्यो सरथमारुजन्तो हर्षमाणासो धृषिता मरुत्वः ।
तिग्मेषव आयुधा संशिशाना अभि प्र यन्तु नरो अग्निरूपाः ॥१॥
अग्निरिव मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे हूत एधि ।
हत्वाय शत्रून्वि भजस्व वेद ओजो मिमानो वि मृधो नुदस्व ॥२॥
सहस्व मन्यो अभिमातिमस्मे रुजन्मृणन्प्रमृणन् प्रेहि शत्रून् ।
उग्रं ते पाजो नन्वा रुरुध्रे वशी वशं नयस एकज त्वम् ॥३॥
एको बहूनामसि मन्यवीळितो विशंविशं युधये सं शिशाधि ।
अकृत्तरुक्त्वया युजा वयं द्युमन्तं घोषं विजयाय कृण्महे ॥४॥
विजेषकृदिन्द्र इवानवब्रवो३स्माकं मन्यो अधिपा भवेह ।
प्रियं ते नाम सहुरे गृणीमसि विद्मा तमुत्सं यत आबभूथ ॥५॥
आभूत्या सहजा वज्र सायक सहो बिभर्ष्यभिभूत उत्तरम् ।
क्रत्वा नो मन्यो सह मेद्येधि महाधनस्य पुरुहूत संसृजि ॥६॥
संसृष्टं धनमुभ्यं समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः ।
भियं दधाना हृदयेषु शत्रवः पराजितासो अप नि लयन्ताम् ॥७॥
*tvayā manyo sarathamārujanto harṣamāṇāso dhṛṣitā marutvaḥ /*
*tigmeṣava āyudhā saṁśiśānā abhi pra yantu naro agnirūpāḥ //1 //*
*agniriva manyo tviṣitaḥ sahasva senānīrnaḥ sahure hūta edhi /*
*hatvāya śatrūnvi bhajasva veda ojo mimāno vi mṛdho nudasva //2 //*
*sahasva manyo abhimātimasme rujanmṛṇanpramṛṇan prehi śatrūn /*
*ugraṁ te pājo nanvā rurudhre vaśī vaśaṁ nayasa ekaja tvam //3 //*
*eko bahūnāmasi manyavīḻito viśaṁviśaṁ yudhaye saṁ śiśādhi /*
*akṛttaruktvayā yujā vayaṁ dyumantaṁ ghoṣaṁ vijayāya kṛṇmahe //4 //*
*vijeṣakṛdindra ivānavabravo3smākaṁ manyo adhipā bhaveha /*
*priyaṁ te nāma sahure gṛṇīmasi vidmā tamutsaṁ yata ābabhūtha //5 //*
*ābhūtyā sahajā vajra sāyaka saho bibharṣyabhibhūta uttaram /*
*kratvā no manyo saha medyedhi mahādhanasya puruhūta saṁsṛji //6 //*
*saṁsṛṣṭaṁ dhanamubhyaṁ samākṛtamasmabhyaṁ dattāṁ varuṇaścha manyuḥ /*
*bhiyaṁ dadhānā hṛdayeṣu śatravaḥ parājitāso apa ni layantām //7 //*

## ४८५. मनुर्वैवस्वतः (Manurvaivasvataḥ)

१. अग्निः (Agniḥ) - सा. (Sv.) ४८

अग्निरुक्थे पुरोहितो ग्रावाणो बर्हिरध्वरे। ऋचा यामि मरुतो ब्रह्मणस्पते देवा अवो वरेण्यम् ।४॥

*agnirukthe purohito grāvāṇo barhiradhvare I*
*ṛchā yāmi maruto brahmaṇaspate devā avo vareṇyam I4 II*

२. इज्यास्तवः यजमानप्रशंसा च (Ijyāstavaḥ Yajamānapraśaṁsā Cha) - ऋ. (Rv.) ८.३१.१-४

यो यजाति यजात इत्सुनवच्च पचाति च। ब्रह्मेदिन्द्रस्य चाकनत् ॥१॥
पुरोळाशं यो अस्मै सोमं ररत आशिरम्। पादित्तं शक्रो अंहसः ॥२॥
तस्य द्युमाँ असद्रथो देवजूतः स शूशुवत्। विश्वा वन्वन्नमित्रिया ॥३॥
अस्य प्रजावती गृहेऽसश्चन्ती दिवेदिवे। इळा धेनुमती दुहे ॥४॥

*yo yajāti yajāta itsunavachcha pachāti cha I brahmedindrasya chākanat II1 II*
*puroḷāśaṁ yo asmai somaṁ rarata āśiram I pādittaṁ śakro aṁhasaḥ II2 II*
*tasya dyumām̐ asadratho devajūtaḥ sa śūśuvat I viśvā vanvannamitriyā II3 II*
*asya prajāvatī gṛhe'saśchantī divedive I iḷā dhenumatī duhe II4 II*

३. दम्पत्ती (Dampattī) - ऋ. (Rv.) ८.३१.५-९

या दंपती समनसा सुनुत आ च धावतः। देवासो नित्ययाशिरा ॥५॥
प्रति प्राशव्याँ इतः सम्यंचा बर्हिराशाते। न ता वाजेषु वायतः ॥६॥
न देवानामपि ह्नुतः सुमतिं न जुगुक्षतः। श्रवो बृहद्विवासतः ॥७॥
पुत्रिणा ता कुमारिणा विश्वमायुर्व्यश्नुतः। उभा हिरण्यपेशसा ॥८॥
वीतिहोत्रा कृतद्वसू दशस्यन्तामृताय कम्। समूधो रोमशं हतो देवेषु कृणुतो दुवः ॥९॥

*yā daṁpatī samanasā sunuta ā cha dhāvataḥ I devāso nityayāśirā II5 II*
*prati prāśavyām̐ itaḥ samyaṁchā barhirāśāte I na tā vājeṣu vāyataḥ II6 II*
*na devānāmapi hrutaḥ sumatiṁ na jugukṣataḥ I śravo bṛhadvivāsataḥ II7 II*
*putriṇā tā kumāriṇā viśvamāyurvyaśnutaḥ I ubhā hiraṇyapeśasā II8 II*
*vītihotrā kṛtadvasū daśasyantāmṛtāya kam I*
*samūdho romaśaṁ hato deveṣu kṛṇuto duvaḥ II9 II*

४. दम्पत्त्योराशिषः (Dampattyorāśiṣaḥ) - ऋ. (Rv.) ८.३१.१०-१८

आ शर्म पर्वतानां वृणीमहे नदीनाम्। आ विष्णोः सचाभुवः ॥१०॥
ऐतु पूषा रयिर्भगः स्वस्ति सर्वधतमः। उरुरध्वा स्वस्तये ॥११॥
अरमतिरनर्वणो विश्वो देवस्य मनसा। आदित्यानामनेह इत् ॥१२॥
यथा नो मित्रो अर्यमा वरुणः सन्ति गोपाः। सुगा ऋतस्य पन्थाः ॥१३॥
अगि्ंन वः पूर्व्यं गिरा देवमीळे वसूनाम् । सपर्यन्तः पुरुप्रियं मित्रं न क्षेत्रसाधसम् ॥१४॥
मक्षू देववतो रथः शूरो वा पृत्सु कासु चित् ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥१५॥
न यजमान रिष्यसि न सुन्वान न देवयो ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥१६॥
नकिष्टं कर्मणा नशन्न प्र योषन्न योषति ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥१७॥
असदत्र सुवीर्यमुत त्यदाश्वश्व्यम् ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥१८॥

*ā śarma parvatānāṁ vṛṇīmahe nadīnām I ā viṣṇoḥ sachābhuvaḥ II10 II*
*aitu pūṣā rayirbhagaḥ svasti sarvadhatamaḥ I ururadhvā svastaye II11 II*
*aramatiranarvaṇo viśvo devasya manasā I ādityānāmaneha it II12 II*
*yathā no mitro aryamā varuṇaḥ santi gopāḥ I sugā ṛtasya panthāḥ II13 II*
*agiṁna vaḥ pūrvyaṁ girā devamīḷe vasūnām I*
*saparyantaḥ purupriyaṁ mitraṁ na kṣetrasādhasam II14 II*
*makṣū devavato rathaḥ śūro vā pṛtsu kāsu chit I*
*devānāṁ ya inmano yajamāna iyakṣatyabhīdayajvano bhuvat II15 II*
*na yajamāna riṣyasi na sunvāna na devayo I*
*devānāṁ ya inmano yajamāna iyakṣatyabhīdayajvano bhuvat II16 II*

*nakiṣṭaṁ karmaṇā naśanna pra yoṣanna yoṣati ।*
*devānāṁ ya inmano yajamāna iyakṣatyabhīdayajvano bhuvat ॥17॥*
*asadatra suvīryamuta tyadāśvaśvayam ।*
*devānāṁ ya inmano yajamāna iyakṣatyabhīdayajvano bhuvat ॥18॥*

५. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) ८.२७.१-२२; ८.२८.१-५; ८.२९.१-१०

ऋ. (Rv.) ८.२७.१-२२

अग्निरुक्थे पुरोहितो ग्रावाणो बर्हिरध्वरे ।
ऋचा यामि मरुतो ब्रह्मणस्पतिं देवाँ अवो वरेण्यम् ॥१॥
आ पशुं गासि पृथिवीं वनस्पतीनुषासा नक्तमोषधीः ।
विश्वे च नो वसवो विश्ववेदसो धीनां भूत प्रावितारः ॥२॥
प्र सू न एत्वध्वरा३ ग्ना देवेषु पूर्व्यः । आदित्येषु प्र वरुणे धृतव्रते मरुत्सु विश्वभानुषु ॥३॥
विश्वे हि ष्मा मनवे विश्ववेदसो भुवन्वृधे रिशादसः ।
आरिष्टेभिः पायुभिर्विश्ववेदसो यन्ता नोऽवृकं छर्दिः ॥४॥
आ नो अद्य समनसो गन्ता विश्वे सजोषसः ।
ऋचा गिरा मरुतो देव्यदिते सदने पस्त्ये महि ॥५॥
अभि प्रिया मरुतो या वो अश्व्या हव्या मित्र प्रयाथन ।
आ बर्हिरिन्द्रो वरुणस्तुरा नर आदित्यासः सदन्तु नः ॥६॥
वयं वो वृक्तबर्हिषो हितप्रयस अनुषक् । सुतसोमासो वरुण हवामहे मनुष्वदिद्धाग्नयः ॥७॥
आ प्र यात मरुतो विष्णो अश्विना पूषन्माकीनया धिया ।
इन्द्र आ यातु प्रथमः सनिष्युभिर्वृषा यो वृत्रहा गृणे ॥८॥
वि नो देवासो अद्रुहोऽच्छिद्रं शर्म यच्छत ।
न यद्दूराद्वसवो नू चिदन्तितो वरूथमादधर्षति ॥९॥
अस्ति हि वः सजात्यं रिशादसो देवासो अस्त्याप्यम् ।
प्र णः पूर्वस्मै सुविताय वोचत मक्षू सुम्नाय नव्यसे ॥१०॥
इदा हि व उपस्तुतिमिदा वामस्य भक्तये । उप वो विश्ववेदसो नमस्युराँ असृक्ष्यन्यामिव ॥११॥
उदु ष्य वः सविता सुप्रणीतयोऽस्थादूर्ध्वो वरेण्यः ।
नि द्विपादश्चतुष्पादो अर्थिनोऽविश्रन्पतयिष्णवः ॥१२॥
देवंदेवं वोऽवसे देवंदेवमभिष्टये । देवंदेवं हुवेम वाजसातये गृणन्तो देव्या धिया ॥१३॥
देवासो हि ष्मा मनवे समन्यवो विश्वे साकं सरातयः ।
ते नो अद्य ते अपरं तुचे तु नो भवन्तु वरिवोविदः ॥१४॥
प्र वः शंसाम्यद्रुहः संस्थ उपस्तुतीनाम् । न तं धूर्तिर्वरुण मित्र मर्त्यं यो वो धामभ्योऽविधत् ॥१५॥
प्र स क्षयं तिरते वि महीरिषो यो वो वराय दाशति ।
प्र प्रजाभिर्जायते धर्मणस्पर्यरिष्टः सर्व एधते ॥१६॥
ऋते स विन्दते युधः सुगेभिर्यात्यध्वनः ।
अर्यमा मित्रो वरुणः सरातयो यं त्रायन्ते सजोषसः ॥१७॥
अज्रे चिदस्मै कृणुथा न्यंचनं दुर्गे चिदा सुसरणम् ।
एषा चिदस्मादशनिः परो नु सास्रेधन्ती वि नश्यतु ॥१८॥
यदद्य सूर्य उद्यति प्रियक्षत्रा ऋतं दध ।
यन्निम्रुचि प्रबुधि विश्ववेदसो यद्वा मध्यंदिने दिवः ॥१९॥
यद्वाभिपित्वे असुरा ऋतं यते छर्दिर्येम वि दाशुषे ।
वयं तद्वो वसवो विश्ववेदस उप स्थेयाम मध्य आ ॥२०॥
यदद्य सूर उदिते यन्मध्यन्दिन आतुचि ।
वामं धत्थ मनवे विश्ववेदसो जुह्वानाय प्रचेतसे ॥२१॥
वयं तद्वः सम्राज आ वृणीमहे पुत्रो न बहुपाय्यम् ।
अश्याम तदादित्या जुह्वतो हविर्येन वस्योऽनशामहै ॥२२॥

*agnirukthe purohito grāvāṇo barhiradhvare ।*
*ṛcā yāmi maruto brahmaṇaspatiṁ devām̐ avo vareṇyam ॥1॥*

*ā paśuṁ gāsi pṛthivīṁ vanasṣatīnuṣāsā naktamoṣadhīḥ ।*
*viśve cha no vasavo viśvavedaso dhīnāṁ bhūta prāvitāraḥ ॥2 ॥*
*pra sū na etvadhvarā3 gnā deveṣu pūrvyaḥ ।*
*ādityeṣu pra varuṇe dhṛtavrate marutsu viśvabhānuṣu ॥3 ॥*
*viśve hi ṣmā manave viśvavedaso bhuvanvṛdhe riśādasaḥ ।*
*āriṣṭebhiḥ pāyubhirviśvavedaso yantā no'vṛkaṁ chhardiḥ ॥4 ॥*
*ā no adya samanaso gantā viśve sajoṣasaḥ ।*
*ṛchā girā maruto devyadite sadane pastye mahi ॥5 ॥*
*abhi priyā maruto yā vo aśvyā havyā mitra prayāthana ।*
*ā barhirindro varuṇasturā nara ādityāsaḥ sadantu naḥ ॥6 ॥*
*vayaṁ vo vṛktabarhiṣo hitaprayasa anuṣak ।*
*sutasomāso varuṇa havāmahe manuṣvadiddhāgnayaḥ ॥7 ॥*
*ā pra yāta maruto viṣṇo aśvinā pūṣanmākīnayā dhiyā ।*
*indra ā yātu prathamaḥ saniṣyubhirvṛṣā yo vṛtrahā gṛṇe ॥8 ॥*
*vi no devāso adruho'chchhidraṁ śarma yachchhata ।*
*na yaddūrādvasavo nū chidantito varūthamādadharṣati ॥9 ॥*
*asti hi vaḥ sajātyaṁ riśādaso devāso astyāpyam ।*
*pra ṇaḥ pūrvasmai suvitāya vochata makṣū sumnāya navyase ॥10 ॥*
*idā hi va upastutimidā vāmasya bhaktaye ।*
*upa vo viśvavedaso namasyurām̐ asṛkṣayanyāmiva ॥11 ॥*
*udu ṣya vaḥ savitā supraṇītayo'sthādūrdhvo vareṇyaḥ ।*
*ni dvipādaśchatuṣpādo arthino'viśranpatayiṣṇavaḥ ॥12 ॥*
*devaṁdevaṁ vo'vase devaṁdevamabhiṣṭaye ।*
*devaṁdevaṁ huvema vājasātaye gṛṇanto devyā dhiyā ॥13 ॥*
*devāso hi ṣmā manave samanyavo viśve sākaṁ sarātayaḥ ।*
*te no adya te aparaṁ tuche tu no bhavantu varivovidaḥ ॥14 ॥*
*pra vaḥ śaṁsāmyadruhaḥ saṁstha upastutīnām ।*
*na taṁ dhūrtirvaruṇa mitra martyaṁ yo vo dhāmabhyo'vidhat ॥15 ॥*
*pra sa kṣayaṁ tirate vi mahīriṣo yo vo varāya dāśati ।*
*pra prajābhirjāyate dharmaṇasparyariṣṭaḥ sarva edhate ॥16 ॥*
*ṛte sa vindate yudhaḥ sugebhiryātyadhvanaḥ ।*
*aryamā mitro varuṇaḥ sarātayo yaṁ trāyante sajoṣasaḥ ॥17 ॥*
*ajre chidasmai kṛṇuthā nyaṁchanaṁ durge chidā susaraṇam ।*
*eṣā chidasmādaśaniḥ paro nu sāsredhantī vi naśyatu ॥18 ॥*
*yadadya sūrya udyati priyakṣatrā ṛtaṁ dadha ।*
*yannimruchi prabudhi viśvavedaso yadvā madhyaṁdine divaḥ ॥19 ॥*
*yadvābhipitve asurā ṛtaṁ yate chhardiryema vi dāśuṣe ।*
*vayaṁ tadvo vasavo viśvavedasa upa stheyāma madhya ā ॥20 ॥*
*yadadya sūra udite yanmadhyandina ātuchi ।*
*vāmaṁ dhattha manave viśvavedaso juhvānāya prachetase ॥21 ॥*
*vayaṁ tadvaḥ samrāja ā vṛṇīmahe pṛtro na bahupāyyam ।*
*aśyāma tadādityā juhvato haviryena vasyo'naśāmahai ॥22 ॥*

ऋ. (Rv.) ८.२८.१-५

ये त्रिंशति त्रयस्परो देवासो बर्हिरासदन्। विदन्नह द्वितासनन् ॥१॥
वरुणो मित्रो अर्यमा स्मद्रातिषाचो अग्नयः। पत्नीवन्तो वषट्कृताः ॥२॥
ते नो गोपा अपाच्यास्त उदक्त इत्था न्यक्। पुरस्तात्सर्वया विशा ॥३॥
यथा वशन्ति देवास्तथेदसत्तदेषां नकिरा मिनत्। अरावा चन मर्त्यः ॥४॥
सप्तानां सप्त ऋष्टयः सप्त द्युम्नान्येषाम्। सप्तो अधि श्रियो धिरे ॥५॥

*ye triṁśati trayasparo devāso barhirāsadan । vidannaha dvitāsanan ॥1 ॥*
*varuṇo mitro aryamā smadrātiṣācho agnayaḥ । patnīvanto vaṣaṭkṛtāḥ ॥2 ॥*
*te no gopā apāchyāsta udakta itthā nyak । purastātsarvayā viśā ॥3 ॥*
*yathā vaśanti devāstathedasattadeṣāṁ nakirā minat । arāvā chana martyaḥ ॥4 ॥*
*saptānāṁ sapta ṛṣṭayaḥ sapta dyumnānyeṣām । sapto adhi śriyo dhire ॥5 ॥*

ऋ. (Rv.) ८.२९.१-१०

बभ्रुरेको विषुणः सूनरो युवांज्यङ्क्ते हिरण्ययम् ॥१॥
येनिमेक आ ससाद द्योतनोऽन्तर्देवेषु मेधिरः ॥२॥
वाशीमेको बिभर्ति हस्त आयसीमन्तर्देवेषु निध्रुविः ॥३॥
वज्रमेको बिभर्ति हस्त आहितं तेन वृत्राणि जिघ्नते ॥४॥
तिग्ममेको बिभर्ति हस्त आयुधं शुचिरुग्रो जलाषभेषजः ॥५॥
पथ एकः पीपाय तस्करो यथाँ एष वेद निधीनाम् ॥६॥
त्रीण्येक उरुगायो वि चक्रमे यत्र देवासो मदन्ति ॥७॥
विभिर्द्वा चरत एकया सह प्र प्रवासेव वसतः ॥८॥
सदो द्वा चक्राते उपमा दिवि सम्राजा सर्पिरासुती ॥९॥
अर्चन्त एके महि साम मन्वत तेन सूर्यमरोचयन् ॥१०॥

*babhrureko viṣuṇaḥ sūnaro yuvāṁjyaṅkte hiraṇyayam //1 //*
*yenimeka ā sasāda dyotano'ntardeveṣu medhiraḥ //2 //*
*vāśīmeko bibharti hasta āyasīmantardeveṣu nidhruviḥ //3 //*
*vajrameko bibharti hasta āhitaṁ tena vṛtrāṇi jighnate //4 //*
*tigmameko bibharti hasta āyudhaṁ śuchirugro jalāṣabheṣajaḥ //5 //*
*patha ekaḥ pīpāya taskaro yathām̐ eṣa veda nidhīnām //6 //*
*trīṇyeka urugāyo vi chakrame yatra devāso madanti //7 //*
*vibhirdvā charata ekayā saha pra pravāseva vasataḥ //8 //*
*sado dvā chakrāte upamā divi samrājā sarpirāsutī //9 //*
*archanta eke mahi sāma manvata tena sūryamarochayan //10 //*

## ४८६. मनुः सांवरणः (Manuḥ Sāṁvaraṇaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.१०१.१०-१२; सा. (Sv.) ५४८; ११०१-११०३

ऋ. (Rv.) ९.१०१.१०-१२

सोमाः पवन्त इन्दवोऽस्मभ्यं गातुवित्तमाः। मित्राः सुवाना अरेपसः स्वाध्यः स्वर्विदः ॥१०॥
सुष्वाणासो व्यद्रिभिश्चिताना गोरधि त्वचि। इषमस्मभ्यमभितः समस्वरन् वसुविदः ॥११॥
एते पूता विपश्चितः सोमासो दध्याशिरः। सूर्यासो न दर्शतासो जिगत्नवो ध्रुवा घृते ॥१२॥

*somāḥ pavanta indavo'smabhyaṁ gātuvittamāḥ /*
*mitrāḥ suvānā arepasaḥ svādhyaḥ svarvidaḥ //10 //*
*suṣvāṇāso vyadribhiśchitānā goradhi tvachi /*
*iṣamasmabhyamabhitaḥ samasvaran vasuvidaḥ //11 //*
*ete pūtā vipaśchitaḥ somāso dadhyāśiraḥ /*
*sūryāso na darśatāso jigatnavo dhruvā ghṛte //12 //*

सा. (Sv.) ५४८

सोमाः पवन्त इन्दवोऽस्मभ्यं गातुवित्तमाः। मित्रा खाना अरेपसः स्वाध्यः स्वर्विदः ॥४॥

*somāḥ pavanta indavo'smabhyaṁ gātuvittamāḥ /*
*mitrā khānā arepasaḥ svādhyaḥ svarvidaḥ //4 //*

सा. (Sv.) ११०१-११०३

सोमाः पवन्त इन्दवोऽस्मभ्यं गातुवित्तमाः। मित्राः स्वाना अरेपसः स्वाध्यः स्वर्विदः ॥१॥
ते पूतासो विपश्चितः सोमासो दध्याशिरः। सुरासो न दर्शतासो जिगत्नवो ध्रुवा घृते ॥२॥
सुष्वाणासो व्यद्रिभिश्चिताना गोरधि त्वचि। इषमस्मभ्यमभितः समस्वरन्वसुविद ॥३॥

*somāḥ pavanta indavo'smabhyaṁ gātuvittamāḥ /*
*mitrāḥ svānā arepasaḥ svādhyaḥ svarvidaḥ //1 //*
*te pūtāso vipaśchitaḥ somāso dadhyāśiraḥ /*
*surāso na darśatāso jigatnavo dhruvā ghṛte //2 //*
*suṣvāṇāso vyadribhiśchitānā goradhi tvachi /*
*iṣamasmabhyamabhitaḥ samasvaranvasuvida //3 //*

## ४८७. मन्युर् वासिष्ठः (Manyur Vāsiṣṭhaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.९७.१०-१२; सा. (Sv.) १०१९-१०२१

ऋ. (Rv.) ९.९७.१०-१२

इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन्मदाय ।
हन्ति रक्षो बाधते पर्यरातीर्वरिवः कृण्वन्वृजनस्य राजा ॥१०॥
अध धारया मध्वा पृचानस्तिरो रोम पवते अद्रिदुग्धः ।
इन्दुरिन्द्रस्य सख्यं जुषाणो देवो देवस्य मत्सरो मदाय ॥११॥
अभि प्रियाणि पवते पुनानो देवो देवान्त्स्वेन रसेन पृंचन् ।
इन्दुर्धर्माण्यृतुथा वसानो दश क्षिपो अव्यत सानो अव्ये ॥१२॥
*indurvājī pavate gonyoghā indre somaḥ saha invanmadāya /*
*hanti rakṣo bādhate paryarātīrvarivaḥ kṛṇvanvṛjanasya rājā //10 //*
*adha dhārayā madhvā pṛchānastiro roma pavate adridugdhaḥ /*
*indurindrasya sakhyaṁ juṣāṇo devo devasya matsaro madāya //11 //*
*abhi priyāṇi pavate punāno devo devāntsvena rasena pṛṁchan /*
*indurdharmāṇyṛtuthā vasāno daśa kṣipo avyata sāno avye //12 //*

सा. (Sv.) १०१९-१०२१

इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन्मदाय ।
हन्ति रक्षो बाधते पर्यरातिं वरिवस्कृण्वन्वृजनस्य राजा ॥१॥
अध धारया मध्वा पृचानस्तिरो रोम पवते अद्रिदुग्धः ।
इन्दुरिन्द्रस्य सख्यं जुषाणो देवो देवस्य मत्सरो मदाय ॥२॥
अभि व्रतानि पवते पुनानो देवो देवान्त्स्वेन रसेन पृंचन् ।
इन्दुर्धर्माण्यृतुथा वसानो दश क्षिपो अव्यत सानो अव्ये ॥३॥
*indurvājī pavate gonyoghā indre somaḥ saha invanmadāya /*
*hanti rakṣo bādhate paryarātiṁ varivaskṛṇvanvṛjanasya rājā //1 //*
*adha dhārayā madhvā pṛchānastiro roma pavate adridugdhaḥ /*
*indurindrasya sakhyaṁ juṣāṇo devo devasya matsaro madāya //2 //*
*abhi vratāni pavate punāno devo devāntsvena rasena pṛṁchan /*
*indurdharmāṇyṛtuthā vasāno daśa kṣipo avyata sāno avye //3 //*

## ४८८. मन्युर् वासिष्ठः (साग्री. सास्वा.); इन्दुर् वासिष्ठः (सार्षेदी.) (Manyur Vāsiṣṭhaḥ [Ssb. Sas.]; Indur Vāsiṣṭhaḥ [Sad.])

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ५४०

इन्दुर्वाजीपवते गोन्योघा इन्द्रे सोमः सह इन्वन्मदाय ।
हन्ति रक्षो बाधते पर्यरातिं वरिवस्कृण्वन्वृजनस्य राजा ॥८॥
*indurvājīpavate gonyoghā indre somaḥ saha invanmadāya /*
*hanti rakṣo bādhate paryarātiṁ varivaskṛṇvanvṛjanasya rājā //8 //*

## ४८९. मय आत्रेयः (Maya Ātreyaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ५.९.१-७; ५.१०.१-७

ऋ. (Rv.) ५.९.१-७

त्वामग्ने हविष्मन्तो देवं मर्तास ईळते । मन्ये त्वा जातवेदसं स हव्या वक्ष्यानुषक् ॥१॥
अग्निर्होता दास्वतः क्षयस्य वृक्तबर्हिषः । सं यज्ञासश्चरन्ति यं सं वाजासः श्रवस्यवः ॥२॥
उत स्म यं शिशुं यथा नवं जनिष्टारणी । धर्तारं मानुषीणां विशामग्निं स्वध्वरम् ॥३॥
उत स्म दुर्गृभीयसे पुत्रो न ह्वार्याणाम् । पुरू यो दग्धासि वनाग्ने पशुर्न यवसे ॥४॥
अध स्म यस्यार्चयः सम्यक्संयन्ति धूमिनः ।
यदीमह त्रितो दिव्युप ध्मातेव धमति शिशीते ध्मातरी यथा ॥५॥
त्वाहमग्न ऊतिभिर्मित्रस्य च प्रशस्तिभिः । द्वेषोयुतो न दुरिता तुर्याम मर्त्यानाम् ॥६॥
तं नो अग्ने अभी नरो रयिं सहस्व आ भर ।
तं क्षेपयत्स पोषयद्भुवद्वाजस्य सातय उतैधि पृत्सु नो वृधे ॥७॥
*tvāmagne haviṣmanto devaṁ martāsa īḷate /*

*manye tvā jātavedasaṁ sa havyā vakṣayānuṣak ॥1॥*
*agnirhotā dāsvataḥ kṣayasya vṛktabarhiṣaḥ ।*
*saṁ yajñāsaścharanti yaṁ saṁ vājāsaḥ śravasyavaḥ ॥2॥*
*uta sma yaṁ śiśuṁ yathā navaṁ janiṣṭāraṇī ।*
*dhartāraṁ mānuṣīṇāṁ viśāmagiṁna svadhvaram ॥3॥*
*uta sma durgṛbhīyase putro na hvāryāṇām ।*
*purū yo dagdhāsi vanāgne paśurna yavase ॥4॥*
*adha sma yasyārchayaḥ samyaksaṁyanti dhūminaḥ ।*
*yadīmaha trito divyupa dhmāteva dhamati śiśīte dhmātarī yathā ॥5॥*
*tvāhamagna ūtibhirmitrasya cha praśastibhiḥ ।*
*dveṣoyuto na duritā turyāma martyānām ॥6॥*
*taṁ no agne abhī naro rayiṁ sahasva ā bhara ।*
*taṁ kṣepayatsa poṣayadbhuvadvājasya sātaya utaidhi pṛtsu no vṛdhe ॥7॥*

ऋ. (Rv.) ५.१०.१-७

अग्न ओजिष्ठमा भर द्युम्नमस्मभ्यमध्रिगो । प्र नो राया परीणसा रत्सि वाजाय पन्थाम् ॥१॥
एवं नो अग्ने अद्भुत क्रत्वा दक्षस्य मंहना । त्वे असुर्य१मारुहत्क्राणा मित्रो न यज्ञियः ॥२॥
त्वं नो अग्न एषां गयं पुष्टिं च वर्धय । ये स्तोमेभिः प्र सूरयो नरो मघान्यानशुः ॥३॥
ये अग्ने चन्द्र ते गिरः शुम्भन्त्यश्वराधसः ।
शुष्मेभिः शुष्मिणो नरो दिविश्चिद्येषां बृहत्सुकीर्तिर्बोधति त्मना ॥४॥
तव त्ये अग्ने अर्चयो भ्राजन्तो यन्ति धृष्णुया ।
परिज्मानो न विद्युतः स्वानो रथो न वाजयः ॥५॥
नू नो अग्न ऊतये सबाधसश्च रातये । अस्माकासश्च सूरयो विश्वा आशास्तरीषणि ॥६॥
त्वं नो अग्ने अंगिरः स्तुतः स्तवान आ भर ।
होतर्विभ्वासहं रयिं स्तोतृभ्यः स्तवसे च न उतैधि पृत्सु नो वृधे ॥७॥

*agna ojiṣṭhamā bhara dyumnamasmabhyamadhrigo ।*
*pra no rāyā parīṇasā ratsi vājāya panthām ॥1॥*
*evaṁ no agne adbhuta kratvā dakṣasya maṁhanā ।*
*tve asurya1māruhatkrāāṇā mitro na yajñiyaḥ ॥2॥*
*tvaṁ no agna eṣāṁ gayaṁ puṣṭiṁ cha vardhaya ।*
*ye stomebhiḥ pra sūrayo naro maghānyānaśuḥ ॥3॥*
*ye agne chandra te giraḥ śumbhantyaśvarādhasaḥ ।*
*śuṣmebhiḥ śuṣmiṇo naro diviśchidyeṣāṁ bṛhatsukīrtirbodhati tmanā ॥4॥*
*tava tye agne archayo bhrājanto yanti dhṛṣṇuyā ।*
*parijmāno na vidyutaḥ svāno ratho na vājayaḥ ॥5॥*
*nū no agna ūtaye sabādhasaścha rātaye ।*
*asmākāsaścha sūrayo viśvā āśāstarīṣaṇi ॥6॥*
*tvaṁ no agne aṁgiraḥ stutaḥ stavāna ā bhara ।*
*hotarvibhvāsahaṁ rayiṁ stotṛbhyaḥ stavase cha na utaidhi pṛtsu no vṛdhe ॥7॥*

## ४९०. मयोभूः (Mayobhūḥ)

१. अग्निः (Agniḥ) - य. (Yv.) ११.१८-१९

आगत्य वाज्यध्वानं सर्वा मृधो विधूनुते । अग्निं सधस्थे महति चक्षुषा निचिकीषते ॥१८॥
आक्रम्य वाजिन् पृथिवीमग्निमिच्छ रुचा त्वम् ।
भूम्या वृत्वाय नो ब्रूहि यतः खनेम तं वयम् ॥१९॥
*āgatya vājyadhvānaṁ sarvā mṛdho vidhūnute ।*
*agniṁ sadhasthe mahati chakṣuṣā nichikīṣate ॥18॥*
*ākramya vājin pṛthivīmagnimichchha ruchā tvam ।*
*bhūmyā vṛtvāya no brūhi yataḥ khanema taṁ vayam ॥19॥*

२. क्षत्रपतिः (Kṣatrapatiḥ) - य. (Yv.) ११.२०

द्यौस्ते पृष्ठं पृथिवी सधस्थमात्मान्तरिक्षं समुद्रो योनिः ।
विख्याय चक्षुषा त्वमभि तिष्ठ पृतन्यतः ॥२०॥

*dyauste pṛṣṭhaṁ pṛthivī sadhasthamātmāntarikṣaṁ samudro yoniḥ* ।
*vikhyāya chakṣuṣā tvamabhi tiṣṭha pṛtanyataḥ* ॥20॥

३. द्रविणोदा (Draviṇodā) - य. (Yv.) ११.२१; २२

उत्क्राम महते सौभगायास्मादास्थानाद् द्रविणोदा वाजिन् ।
वयं स्याम सुमतौ पृथिव्याऽअग्निं खनन्तऽउपस्थेऽअस्याः ॥२१॥
उदक्रमीद् द्रविणोदा वाज्यर्वाकः सुलोकं सुकृतं पृथिव्याम् ।
ततः खनेम सुप्रतीकमग्निं स्वो रुहाणाऽअधि नाकमुत्तमम् ॥२२॥
*utkrāma mahate saubhagāyāsmādāsthānād draviṇodā vājin* ।
*vayaṁ syāma sumatau pṛthivyā'agniṁ khananta'upasthe'asyāḥ* ॥21॥
*udakramīd draviṇodā vājyarvākaḥ sulokaṁ sukṛtaṁ pṛthivyām* ।
*tataḥ khanema supratīkamagniṁ svo ruhāṇā'adhi nākamuttamam* ॥22॥

४. ब्रह्मगवी (Brahmagavī) - अ. (Av.) ५.१८.१-१५; ५.१९.१-१५

अ. (Av.) ५.१८.१-१५

नैतां ते देवा अददुस्तुभ्यं नृपते अत्तवे। मा ब्राह्मणस्य राजन्य गां जिघत्सो अनाद्याम् ॥१॥
अक्षद्रुग्धो राजन्यः पाप आत्मपराजितः। स ब्राह्मणस्य गामद्यादद्य जीवानि मा श्वः ॥२॥
आविष्टिताघविषा पृदाकूरिव चर्मणा। सा ब्राह्मणस्य राजन्य तृष्टैषा गौरनाद्या ॥३॥
निर्वै क्षत्रं नयति हन्ति वर्चोऽग्निरिवारब्धो वि दुनोति सर्वम् ।
यो ब्राह्मणं मन्यते अन्नमेव स विषस्य पिबति तैमातस्य ॥४॥
य एनं हन्ति मृदुं मन्यमानो देवपीयुर्धनकामो न चित्तात् ।
सं तस्येन्द्रो हृदयेऽग्निमिन्ध उभे एनं द्विष्टो नभसी चरन्तम् ॥५॥
न ब्राह्मणो हिंसितव्योऽग्निः प्रियतनोरिव। सोमो ह्यस्य दायाद इन्द्रो अस्याभिशस्तिपाः ॥६॥
शतापाष्ठां नि गिरति तां न शक्नोति निः खिदन्।
अन्नं यो ब्रह्मणां मल्वः स्वाद्व१द्मीति मन्यते॥७॥
जिह्वा ज्या भवति कुल्मलं वाङ्नाडीका दन्तास्तपसाभिदिग्धाः तेभिर्ब्रह्मा विध्यति देवपीयून् हृद्बलैर्धनुर्भिर्देवजूतैः ॥८॥
तीक्ष्णेषवो ब्राह्मणा हेतिमन्तो यामस्यन्ति शरव्यां३ न सा मृषा ।
अनुहाय तपसा मन्युना चोत दूरादव भिन्दन्त्येनम् ॥९॥
ये सहस्रमराजन्नासन् दशशता उत। ते ब्राह्मणस्य गां जग्ध्वा वैतहव्याः पराभवन् ॥१०॥
गौरेव तान् हन्यमाना वैतहव्याँ अवातिरत्। ये केसरप्राबन्धायाश्चरमाजामपेचिरन् ॥११॥
एकशतं ता जनता या भूमिर्व्यधूनुत। प्रजां हिंसित्वा ब्राह्मणीमसंभव्यं पराभवन् ॥१२॥
देवपीयुश्चरति मर्त्येषु गरगीर्णो भवत्यस्थिभूयान् ।
यो ब्राह्मणं देवबन्धुं हिनस्ति न स पितृयाणमप्येति लोकम् ॥१३॥
अग्निर्वै नः पदवायः सोमो दायाद उच्यते। हन्ताभिशस्तेन्द्रस्तथा तद् बेधसो विदुः ॥१४॥
इषुरिव दिग्धा नृपते पृदाकूरिव गोपते। सा ब्राह्मणस्येषुर्घोरा तया विध्यति पीयतः ॥१५॥
नैतां ते देवा अददुस्तुभ्यं नृपते अत्तवे। मा ब्राह्मणस्य राजन्य गां जिघत्सो अनाद्याम् ॥१॥
अक्षद्रुग्धो राजन्यः पाप आत्मपराजितः। स ब्राह्मणस्य गामद्यादद्य जीवानि मा श्वः ॥२॥
आविष्टिताघविषा पृदाकूरिव चर्मणा। सा ब्राह्मणस्य राजन्य तृष्टैषा गौरनाद्या ॥३॥
निर्वै क्षत्रं नयति हन्ति वर्चोऽग्निरिवारब्धो वि दुनोति सर्वम् ।
यो ब्राह्मणं मन्यते अन्नमेव स विषस्य पिबति तैमातस्य ॥४॥
य एनं हन्ति मृदुं मन्यमानो देवपीयुर्धनकामो न चित्तात् ।
सं तस्येन्द्रो हृदयेऽग्निमिन्ध उभे एनं द्विष्टो नभसी चरन्तम् ॥५॥
न ब्राह्मणो हिंसितव्योऽग्निः प्रियतनोरिव। सोमो ह्यस्य दायाद इन्द्रो अस्याभिशस्तिपाः ॥६॥
शतापाष्ठां नि गिरति तां न शक्नोति निः खिदन्।
अन्नं यो ब्रह्मणां मल्वः स्वाद्व१द्मीति मन्यते॥७॥
जिह्वा ज्या भवति कुल्मलं वाङ्नाडीका दन्तास्तपसाभिदिग्धाः तेभिर्ब्रह्मा विध्यति देवपीयून् हृद्बलैर्धनुर्भिर्देवजूतैः ॥८॥
तीक्ष्णेषवो ब्राह्मणा हेतिमन्तो यामस्यन्ति शरव्यां३ न सा मृषा ।
अनुहाय तपसा मन्युना चोत दूरादव भिन्दन्त्येनम् ॥९॥
ये सहस्रमराजन्नासन् दशशता उत। ते ब्राह्मणस्य गां जग्ध्वा वैतहव्याः पराभवन् ॥१०॥

गौरेव तान् हन्यमाना वैतहव्याँ अवातिरत्। ये केसरप्राबन्धायाश्चरमाजामपेचिरन् ॥११॥
एकशतं ता जनता या भूमिर्व्यधूनुत। प्रजां हिंसित्वा ब्राह्मणीमसंभव्यं पराभवन् ॥१२॥
देवपीयुश्चरति मर्त्येषु गरगीर्णो भवत्यस्थिभूयान् ।
यो ब्राह्मणं देवबन्धुं हिनस्ति न स पितृयाणमप्येति लोकम् ॥१३॥
अग्निर्वै नः पदवायः सोमो दायाद उच्यते। हन्ताभिशस्तेन्द्रस्तथा तद् बेधसो विदुः ॥१४॥
इषुरिव दिग्धा नृपते पृदाकूरिव गोपते। सा ब्राह्मणस्येषुर्घोरा तया विध्यति पीयतः ॥१५॥

*naitāṁ te devā adadustubhyaṁ nṛpate attave /*
*mā brāhmaṇasya rājanya gāṁ jighatso anādyām //1 //*
*akṣadrugdho rājanyaḥ pāpa ātmaparājitaḥ /*
*sa brāhmaṇasya gāmadyādadya jīvāni mā śvaḥ //2 //*
*āviṣṭhitāghaviṣā pṛdākūriva charmaṇā /*
*sā brāhmaṇasya rājanya tṛṣṭaiṣā gauranādyā //3 //*
*nirvai kṣatraṁ nayati hanti varcho'gnirivārabdho vi dunoti sarvam /*
*yo brāhmaṇaṁ manyate annameva sa viṣasya pibati taimātasya //4 //*
*ya enaṁ hanti muduṁ manyamāno devapīyurdhanakāmo na chittāt /*
*saṁ tasyendro hṛdaye'gnimindha ubhe enaṁ dviṣṭo nabhasī charantam //5 //*
*na brāhmaṇo hiṁsitavyo3gniḥ priyatanoriva /*
*somo hyasya dāyāda indro asyābhiśastipāḥ //6 //*
*śatāpāṣṭhāṁ ni girati tāṁ na śaknoti niḥ khidan /*
*annaṁ yo brahmaṇāṁ malvaḥ svādva1dmīti manyate //7 //*
*jihvā jyā bhavati kulmalaṁ vāṅnāḍīkā dantāstapasābhidigdhāḥ tebhirbrahmā vidhyati*
*devapīyūn hṛdbalairdhanurbhirdevajūtaiḥ //8 //*
*tīkṣaṇeṣavo brāhmaṇā hetimanto yāmasyanti śaravyāṁ3 na sā mṛṣā /*
*anuhāya tapasā manyunā chota dūrādava bhindantyenam //9 //*
*ye sahasramarājannāsan daśaśatā uta /*
*te brāhmaṇasya gāṁ jagdhvā vaitahavyāḥ parābhavan //10 //*
*gaureva tān hanyamānā vaitahavyāṁ̐ avātirat / ye*
*kesaraprābandhāyāścharamājāmapechiran //11 //*
*ekaśataṁ tā janatā yā bhūmirvyadhūnuta /*
*prajāṁ hiṁsitvā brāhmaṇīmasaṁbhavyaṁ parābhavan //12 //*
*devapīyuścharati martyeṣu garagīrṇo bhavatyasthibhūyān /*
*yo brāhmaṇaṁ devabandhuṁ hinasti na sa pitṛyāṇamapyeti lokam //13 //*
*agnirvai naḥ padavāyaḥ somo dāyāda uchyate /*
*hantābhiśastendrastathā tad bedhaso viduḥ //14 //*
*iṣuriva digdhā nṛpate pṛdākūriva gopate /*
*sā brāhmaṇasyeṣurghorā tayā vidhyati pīyataḥ //15 //*
*naitāṁ te devā adadustubhyaṁ nṛpate attave /*
*mā brāhmaṇasya rājanya gāṁ jighatso anādyām //1 //*
*akṣadrugdho rājanyaḥ pāpa ātmaparājitaḥ /*
*sa brāhmaṇasya gāmadyādadya jīvāni mā śvaḥ //2 //*
*āviṣṭhitāghaviṣā pṛdākūriva charmaṇā /*
*sā brāhmaṇasya rājanya tṛṣṭaiṣā gauranādyā //3 //*
*nirvai kṣatraṁ nayati hanti varcho'gnirivārabdho vi dunoti sarvam /*
*yo brāhmaṇaṁ manyate annameva sa viṣasya pibati taimātasya //4 //*
*ya enaṁ hanti muduṁ manyamāno devapīyurdhanakāmo na chittāt /*
*saṁ tasyendro hṛdaye'gnimindha ubhe enaṁ dviṣṭo nabhasī charantam //5 //*
*na brāhmaṇo hiṁsitavyo3gniḥ priyatanoriva /*
*somo hyasya dāyāda indro asyābhiśastipāḥ //6 //*
*śatāpāṣṭhāṁ ni girati tāṁ na śaknoti niḥ khidan /*
*annaṁ yo brahmaṇāṁ malvaḥ svādva1dmīti manyate //7 //*
*jihvā jyā bhavati kulmalaṁ vāṅnāḍīkā dantāstapasābhidigdhāḥ tebhirbrahmā vidhyati*
*devapīyūn hṛdbalairdhanurbhirdevajūtaiḥ //8 //*
*tīkṣaṇeṣavo brāhmaṇā hetimanto yāmasyanti śaravyāṁ3 na sā mṛṣā /*
*anuhāya tapasā manyunā chota dūrādava bhindantyenam //9 //*

*ye sahasramarājannāsan daśaśatā uta I*
*te brāhmaṇasya gāṁ jagdhvā vaitahavyāḥ parābhavan II10 II*
*gaureva tān hanyamānā vaitahavyām̐ avātirat I ye*
*kesaraprābandhāyāścharamājāmapechiran II11 II*
*ekaśataṁ tā janatā yā bhūmirvyadhūnuta I*
*prajāṁ hiṁsitvā brāhmaṇīmasaṁbhavyaṁ parābhavan II12 II*
*devapīyuścharati martyeṣu garagīrṇo bhavatyasthibhūyān I*
*yo brāhmaṇaṁ devabandhuṁ hinasti na sa pitṛyāṇamapyeti lokam II13 II*
*agnirvai naḥ padavāyaḥ somo dāyāda uchyate I*
*hantābhiśastendrastathā tad bedhaso viduḥ II14 II*
*iṣuriva digdhā nṛpate pṛdākūriva gopate I*
*sā brāhmaṇasyeṣurghorā tayā vidhyati pīyataḥ II15 II*

अ. (Av.) ५.१९.१-१५

अतिमात्रमवर्धन्त नोदिव दिवमस्पृशन् । भृगुं हिंसित्वा सृंजया वैतहव्याः पराभवन् ॥१॥
ये बृहस्त्सामानमांगिरसमार्पयन् ब्राह्मणं जनाः ।
पेत्वस्तेषामुभयादमविस्तोकान्यावयत् ॥२॥
ये ब्राह्मणं प्रत्यष्ठीवन् ये वास्मिंछुल्कमीषिरे ।
अस्नस्ते मध्ये कुल्यायाः केशान् खादन्त आसते ॥३॥
ब्रह्मगवी पच्यमाना यावत् साभि विजंगहे ।
तेजो राष्ट्रस्य निर्हन्ति न वीरो जायते वृषा ॥४॥
क्रूरमस्या आशसनं तृष्ट पिशितमस्यते । क्षीरं यदस्याः पीयते तद् वै पितृषु किल्बिषम् ॥५॥
उग्रो राजा मन्यमानो ब्राह्मणं यो जिघत्सति ।
परा तत् सिच्यते राष्ट्रं ब्राह्मणो यत्र जीयते ॥६॥
अष्टापदी चतुरक्षी चतुःश्रोत्रा चतुर्हनुः ।
द्व्यास्या द्विजिह्वा भूत्वा सा राष्ट्रमव धूनुते ब्रह्मज्यस्य ॥७॥
तद् वै राष्ट्रमा स्रवति नावं भिन्नामिवोदकम् ।
ब्रह्माणं यत्र हिंसन्ति तद् राष्ट्रं हन्ति दुच्छुना ॥८॥
तं वृक्षा अप सेधन्ति च्छायां नो मोप गा इति ।
यो ब्राह्मणस्य सद्धनमभि नारद मन्यते ॥९॥
विषमेतद् देवकृतं राजा वरुणोऽब्रवीत् । न ब्राह्मणस्य गां जग्ध्वा राष्ट्रे जागार कश्चन ॥१०॥
नवैव ता नवतयो या भूमिर्व्यधूनुत । प्रजां हिंसित्वा ब्राह्मणीमसंभव्यं पराभवन् ॥११॥
यां मृतायानुबध्नन्ति कूद्यं पदयोपनीम् । तद् वै ब्रह्मज्य ते देवा उपस्तरणमब्रुवन् ॥१२॥
अश्रूणि कृपमाणस्य यानि जीतस्य वावृतुः । तं वै ब्रह्मज्य ते देवा अपां भागमधारयन् ॥१३॥
येन मृतं स्नपयन्ति श्मश्रूणि येनोन्दते । तं वै ब्रह्मज्य ते देवा अपां भागमधारयन् ॥१४॥
न वर्षं मैत्रावरुणं ब्रह्मज्यमभि वर्षति । नास्मै समितिः कल्पते न मित्रं नयते वशम् ॥१५॥
*atimātramavardhanta nodiva divamaspṛśan I*
*bhṛguṁ hiṁsitvā sṛṁjayā vaitahavyāḥ parābhavan II1 II*
*ye bṛhastsāmānamāṁgirasamārpayan brāhmaṇaṁ janāḥ I*
*petvasteṣāmubhayādamavistokānyāvayat II2 II*
*ye brāhmaṇaṁ pratyaṣṭhīvan ye vāsmiṁchhulkamīṣire I*
*asnaste madhye kulyāyāḥ keśān khādanta āsate II3 II*
*brahmagavī pachyamānā yāvat sābhi vijaṁgahe I*
*tejo rāṣṭrasya nirhanti na vīro jāyate vṛṣā II4 II*
*krūramasyā āśasanaṁ tṛṣṭa piśitamasyate I*
*kṣīraṁ yadasyāḥ pīyate tad vai pitṛṣu kilbiṣam II5 II*
*ugro rājā manyamāno brāhmaṇaṁ yo jighatsati I*
*parā tat sichyate rāṣṭraṁ brāhmaṇo yatra jīyate II6 II*
*aṣṭāpadī chaturakṣī chatuḥśrotrā chaturhanuḥ I*
*dvyāsyā dvijihvā bhūtvā sā rāṣṭramava dhūnute brahmajyasya II7 II*
*tad vai rāṣṭramā sravati nāvaṁ bhinnāmivodakam I*
*brahmāṇaṁ yatra hiṁsanti tad rāṣṭraṁ hanti duchchhunā II8 II*

*taṁ vṛkṣā apa sedhanti chchhāyāṁ no mopa gā iti* ।
*yo brāhmaṇasya saddhanamabhi nārada manyate* ॥9 ॥
*viṣametad devakṛtaṁ rājā varuṇo'bravīt* ।
*na brāhmaṇasya gāṁ jagdhvā rāṣṭre jāgāra kaśchana* ॥10 ॥
*navaiva tā navatayo yā bhūmirvyadhūnuta* ।
*prajāṁ hiṁsitvā brāhmaṇīmasaṁbhavyaṁ parābhavan* ॥11 ॥
*yāṁ mṛtāyānubaghnanti kūdyaṁ padayopanīm* ।
*tad vai brahmajya te devā upastaraṇamabruvan* ॥12 ॥
*aśrūṇi kṛpamāṇasya yāni jītasya vāvṛtuḥ* ।
*taṁ vai brahmajya te devā apāṁ bhāgamadhārayan* ॥13 ॥
*yena mṛtaṁ snapayanti śmaśrūṇi yenondate* ।
*taṁ vai brahmajya te devā apāṁ bhāgamadhārayan* ॥14 ॥
*na varṣaṁ maitrāvaruṇaṁ brahmajyamabhi varṣati* ।
*nāsmai samitiḥ kalpate na mitraṁ nayate vaśam* ॥15 ॥

५. ब्रह्मजाया (Brahmajāyā) -

अ. (Av.) ५.१७.१-१८

तेऽवदन् प्रथमा ब्रह्मकिल्बिषेऽकूपारः सलिलो मातरिश्वा ।
वीडुहरास्तप उग्रं मयोभूरापो देवीः प्रथमजा ऋतस्य ॥१ ॥
सोमो राजा प्रथमो ब्रह्मजायां पुनः प्रायच्छदहृणीयमानः ।
अन्वर्तिता वरुणो मित्र आसीदग्निर्होता हस्तगृह्या निनाय ॥२ ॥
हस्तेनैव ग्राह्य आधिरस्या ब्रह्मजायेति चेदवोचत् ।
न दूताय प्रहेया तस्थ एषा तथा राष्ट्रं गुपितं क्षत्रियस्य ॥३ ॥
यामाहुस्तारकैषा विकेशीति दुच्छुनां ग्राममवपद्यमानाम् ।
सा ब्रह्मजाया वि दुनोति राष्ट्रं यत्र प्रापादि शश उल्कुषीमान् ॥४ ॥
ब्रह्मचारी चरति वेविषद् विषः स देवानां भवत्येकमंगम् ।
तेन जायामन्वविन्दद् बृहस्पतिः सोमेन नीतां जुह्वं१ न देवाः ॥५ ॥
देवा वा एतस्यामवदन्त पूर्वे सप्तऋषयस्तपसा ये निषेदुः ।
भीमा जाया ब्राह्मणस्योपनीता दुर्धां दधाति परमे व्योमन् ॥६ ॥
ये गर्भा अवपद्यन्ते जगद् यच्चापलुप्यते । वीरा ये तृह्यनते मिथो ब्रह्मजाया हिनस्ति तान् ॥७ ॥
उत यत् पतयो दश स्त्रियाः पूर्वे अब्राह्मणः । ब्रह्मा चेद्धस्तमग्रहीत् स एव पतिरेकधा ॥८ ॥
ब्राह्मण एव पतिर्न राजन्यो३ न वैश्यः । तत् सूर्यः प्रब्रुवन्नेति पंचभ्यो मानवेभ्यः ॥९ ॥
पुनर्वै देवा अददुः पुनर्मनुष्या अददुः । राजानः सत्यं गृह्णाना ब्रह्मजायां पुनर्ददुः ॥१० ॥
पुनर्दाय ब्रह्मजायां कृत्वा देवैर्निकिल्बिषम् । ऊर्जं पृथिव्या भक्त्वोरुगायमुपासते ॥११ ॥
नास्य जाया शतवाही कल्याणी तल्पमा शये । यस्मिन् राष्ट्रे निरुध्यते ब्रह्मजायाचित्या ॥१२ ॥
न विकर्णः पृथुशिरास्तस्मिन् वेश्मनि जायते । यस्मिन् राष्ट्रे निरुध्यते ब्रह्मजायाचित्या ॥१३ ॥
नात्य क्षत्ता निष्कग्रीवः सूनानामेत्यग्रतः । यस्मिन् राष्ट्रे निरुध्यते ब्रह्मजायाचित्या ॥१४ ॥
नास्य श्वेतः कृष्णकर्णो धुरि युक्तो महीयते । यस्मिन् राष्ट्रे निरुध्यते ब्रह्मजायाचित्या ॥१५ ॥
नात्य क्षेत्रे पृष्करिणी नाण्डीकं जायते बिसम् । यस्मित् राष्ट्रे निरुध्यते ब्रह्मजायाचित्या ॥१६ ॥
नास्मै पृश्निं वि दुहन्ति येऽस्या दोहमुपासते । यस्मिन् राष्ट्रे निरुध्यते ब्रह्मजायाचितया ॥१७ ॥
नास्य धेनुः कल्याणी नानड्वान्त्सहते धुरम् । विजानिर्यत्र ब्राह्मणो रात्रिं वसति पापया ॥१८ ॥
*te'vadan prathamā brahmakilbiṣe'kūpāraḥ salilo mātariśvā* ।
*vīḍuharāstapa ugraṁ mayobhūrāpo devīḥ prathamajā ṛtasya* ॥1 ॥
*somo rājā prathamo brahmajāyāṁ punaḥ prāyachchhadahṛṇīyamānaḥ* ।
*anvartitā varuṇo mitra āsīdagnirhotā hastagṛhyā nindruāya* ॥2 ॥
*hastenaiva grāhya ādhirasyā brahmajāyeti chedavochat* ।
*na dūtāya praheyā tastha eṣā tathā rāṣṭraṁ gupitaṁ kṣatriyasya* ॥3 ॥
*yāmāhustārakaiṣā vikeśīti duchchhunāṁ grāmamavapadyamānām* ।
*sā brahmajāyā vi dunoti rāṣṭraṁ yatra prāpādi śaśa ulkuṣīmān* ॥4 ॥
*brahmachārī charati veviṣad viṣaḥ sa devānāṁ bhavatyekamaṅgam* ।
*tena jāyāmanvavindad bṛhaspatiḥ somena nītāṁ juhvaṁ1 na devāḥ* ॥5 ॥

*devā vā etasyāmavadanta pūrve saptarṣayastapasā ye niṣeduḥ* ।
*bhīmā jāyā brāhmaṇasyopanītā durdhāṁ dadhāti parame vyoman* ॥6॥
*ye garbhā avapadyante jagad yachchāpalupyate* ।
*vīrā ye tṛhyanate mitho brahmajāyā hinasti tān* ॥7॥
*uta yat patayo daśa striyāḥ pūrve abrāhmaṇaḥ* ।
*brahyā cheddhastamagrahīt sa eva patirekadhā* ॥8॥
*brāhmaṇa eva patirna rājanyo3 na vaiśyaḥ* ।
*tat sūryaḥ prabruvanneti paṁchabhyo mānavebhyaḥ* ॥9॥
*punarvai devā adaduḥ punarmanuṣyā adaduḥ* ।
*rājānaḥ satyaṁ gṛhṇānā brahmajāyāṁ punardaduḥ* ॥10॥
*punardāya brahmajāyāṁ kṛtvā devairnikilbiṣam* ।
*ūrjaṁ pṛthivyā bhaktvorugāyamupāsate* ॥11॥
*nāsya jāyā śatavāhī kalyāṇī talpamā śaye* ।
*yasmin rāṣṭre nirudhyate brahmajāyāchityā* ॥12॥
*na vikarṇaḥ pṛthuśirāstasmin veśmani jāyate* ।
*yasmin rāṣṭre nirudhyate brahmajāyāchityā* ॥13॥
*nātya kṣattā niṣkagrīvaḥ sūnānāmetyagrataḥ* ।
*yasmin rāṣṭre nirudhyate brahyajāyāchityā* ॥14॥
*nāsya śvetaḥ kṛṣṇakarṇo dhuri yukto mahīyate* ।
*yasmin rāṣṭre nirudhyate brahmajāyāchityā* ॥15॥
*nātya kṣetre pṛṣkariṇī nāṇḍīkaṁ jāyate bisam* ।
*yasmin rāṣṭre nirudhyate brahmajāyāchityā* ॥16॥
*nāsmai pṛśniṁ vi duhanti ye'syā dohamupāsate* ।
*yasmin rāṣṭre nirudhyate brahmajāyāchitayā* ॥17॥
*nāsya dhenuḥ kalyāṇī nānaḍvāntsahate dhuram* ।
*vijāniryatra brāhmaṇo rātriṁ vasati pāpayā* ॥18॥

## ४९१. मरीचिः काश्यपः (Marīchiḥ Kāśyapaḥ)

१. अग्निः (Agniḥ) - अ. (Av.) ७.६२.१

अ. (Av.) ७.६२.१

अयमग्निः सत्पतिर्वृद्धवृष्णो रथीव पत्तीनजयत् पुरोहितः ।
नाभा पृथिव्यां निहितो दविद्युतदधस्पदं कृणुतां ये पृतन्यवः ॥१॥
*ayamagniḥ satpatirvṛddhavṛṣṇo rathīva pattīnajayat purohitaḥ* ।
*nābhā pṛthivyāṁ nihito davidyutadadhaspadaṁ kṛṇutāṁ ye pṛtanyavaḥ* ॥1॥

२. जातवेदा (Jātavedā) -ऋ. (Rv.) १.९९.१ अ. (Av.) ७.६३.१

ऋ. (Rv.) ८.५४.१-२

जातवेदसे सुनवाम सोममरातीयतो नि दहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥१॥
*jātavedase sunavāma somamarātīyato ni dahāti vedaḥ* ।
*sa naḥ parṣadati durgāṇi viśvā nāveva sindhuṁ duritātyagniḥ* ॥1॥

अ. (Av.) ७.६३.१

पृतनाजितं सहमानमग्निमुक्थैर्हवामहे परमात् सधस्थात् ।
स नः पर्षदति दुर्गाणि विश्वा क्षामद् देवोऽति दुरितान्यग्निः ॥१॥
*pṛtanājitaṁ sahamānamagnimukthairhavāmahe paramāt sadhasthāt* ।
*sa naḥ parṣadati durgāṇi viśvā kṣāmad devo'ti duritānyagniḥ* ॥1॥

## ४९२. महीयवः (Mahīyavaḥ)

१. अग्निः (Agniḥ) - य. (Yv.) २६.१६

उच्चा ते जातमन्धसो दिवि सद्भूम्या ददे। उग्रं शर्म महि श्रवः ॥१६॥
*uchchā te jātamandhaso divi sadbhūmyā dade । ugraṁ śarma mahi śravaḥ* ॥16॥

२. इन्द्रः (Indraḥ) - य. (Yv.) २६.१७

स नऽइन्द्राय यज्यवे वरुणाय मरुद्भ्यः। वरिवोवित्परि स्रव ॥१७॥
*sa na'indrāya yajyave varuṇāya marudbhyaḥ | varivovitpari srava ॥17॥*

३. विद्वान् (Vidvān) - य. (Yv.) २६.१८

एना विश्वान्यर्यऽआ द्युम्नानि मानुषाणाम्। सिषासन्तो वनामहे ॥१८॥
*enā viśvānyarya'ā dyumnāni mānuṣāṇām | siṣāsanto vanāmahe ॥18॥*

## ४९३. मातरिश्वा काण्वः (Mātariśvā Kāṇvaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.५४.१; २; ५-८

ऋ. (Rv.) ८.५४.१-२

एतत्त इन्द्र वीर्यं गीर्भिर्गृणन्ति कारवः ।
ते स्तोभन्त ऊर्जमावन् घृतश्चुतं पौरासो नक्षन्धीतिभिः ॥१॥
नक्षन्त इन्द्रमवसे सुकृत्यया येषां सुतेषु मन्दसे ।
यथा संवर्ते अमदो यथा कृश एवास्मे इन्द्र मत्सव ॥२॥
*etatta indra vīryaṁ gīrbhirgṛṇanti kāravaḥ |*
*te stobhanta ūrjamāvan ghṛtaśchutaṁ paurāso nakṣandhītibhiḥ ॥1॥*
*nakṣanta indramavase sukṛtyayā yeṣāṁ suteṣu mandase |*
*yathā saṁvarte amado yathā kṛśa evāsme indra matsava ॥2॥*

ऋ. (Rv.) ८.५४.५-८

यदिन्द्र राधो अस्ति ते माघोनं मघवत्तम ।
तेन नो बोधि सधमाद्यो वृधे भगो दानाय वृत्रहन् ॥५॥
आजिपते नृपते त्वमिद्धि नो वाज आ वक्षि सुक्रतो ।
वीती होत्राभिरुत देववीतिभिः ससवांसो वि शृण्विरे ॥६॥
सन्ति ह्यर्१र्य आशिष इन्द्र आयुर्जनानाम्।
अस्मान्नक्षस्व मघवन्नुपावसे धुक्षस्व पिप्युषीमिषम् ॥७॥
वयं त इन्द्र स्तोमेभिर्विधेम त्वमस्माकं शतक्रतो ।
महि स्थूरं शशयं राधो अह्रयं प्रस्कण्वाय नि तोशय ॥८॥
*yadindra rādho asti te māghonaṁ maghavattama |*
*tena no bodhi sadhamādyo vṛdhe bhago dānāya vṛtrahan ॥5॥*
*ājipate nṛpate tvamiddhi no vāja ā vakṣi sukrato |*
*vītī hotrābhiruta devavītibhiḥ sasavāṁso vi śṛṇvire ॥6॥*
*santi hya1rya āśiṣa indra āyurjanānām |*
*asmānnakṣasva maghavannupāvase dhukṣasva pipyuṣīmiṣam ॥7॥*
*vayaṁ ta indra stomebhirvidhema tvamasmākaṁ śatakrato |*
*mahi sthūraṁ śaśayaṁ rādho ahrayaṁ praskaṇvāya ni tośaya ॥8॥*

२. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) ८.५४.३-४

आ नो विश्वे सजोषसो देवासो गन्तनोप नः ।
वसवो रुद्रा अवसे न आ गमंछृण्वन्तु मरुतो हवम् ॥३॥
पूषा विष्णुर्हवनं मे सरस्वत्यवन्तु सप्त सिन्धवः ।
आपो वातः पर्वतासो वनस्पतिः शृणोतु पृथिवी हवम् ॥४॥
*ā no viśve sajoṣaso devāso gantanopa naḥ |*
*vasavo rudrā avase na ā gamaṁchhṛṇvantu maruto havam ॥3॥*
*pūṣā viṣṇurhavanaṁ me sarasvatyavantu sapta sindhavaḥ |*
*āpo vātaḥ parvatāso vanaspatiḥ śṛṇotu pṛthivī havam ॥4॥*

## ४९४. मातृनामा (Mātṛnāmā)

१. ओषधिः (Oṣadhiḥ) - अ. (Av.) ४.२०.१-९

आ पश्यति प्रति पश्यति परा पश्यति पश्यति ।
दिवमन्तरिक्षमाद् भूमिं सर्वं तद् देवि पश्यति ॥१॥
तिस्रो दिवस्तिस्रः पृथिवीः षट् चेमाः प्रदिशः पृथक् ।

त्वयाहं सर्वा भूतानि पश्यानि देव्योषधे ॥२॥
दिव्यस्य सुपर्णस्य तस्य हासि कनीनिका ।
सा भूमिमा रुरोहिथ वह्यं श्रान्ता वधूरिव ॥३॥
तां मे सहस्राक्षो देवो दक्षिणे हस्त आ दधत् । तयाहं सर्वं पश्यामि यश्च शूद्र उतार्यः ॥४॥
आविष्कृणुष्व रूपाणि मात्मानमप गूहथाः । अथो सहस्रचक्षो त्वं प्रति पश्याः किमीदिनः ॥५॥
दर्शय मा यातुधानान् दर्शय यातुधान्यः । पिशाचान्त्सर्वान् दर्शयेति त्वा रभ ओषधे ॥६॥
कश्यपस्य चक्षुरसि शुन्याश्च चतुरक्ष्याः। वीध्रे सूर्यमिव सर्पन्तं मा पिशाचं तिरस्करः ॥७॥
उदग्रभं परिपाणाद् यातुधानं किमीदिनम्। तेनाहं सर्वं पश्याम्युत शूद्रमुतार्यम् ॥८॥
यो अन्तरिक्षेण पतति दिवं यश्चातिसर्पति। भूमिं यो मन्यते नाथं तं पिशाचं प्र दर्शय ॥९॥
*ā paśyati prati paśyati parā paśyati paśyati /*
*divamantarikṣamād bhūmiṁ sarvaṁ tad devi paśyati //1 //*
*tisro divastisraḥ pṛthivīḥ ṣaṭ chemāḥ pradiśaḥ pṛthak /*
*tvayāhaṁ sarvā bhūtāni paśyāni devyoṣadhe //2 //*
*divyasya suparṇasya tasya hāsi kanīnikā /*
*sā bhūmimā rurohitha vahyaṁ śrāntā vadhūriva //3 //*
*tāṁ me sahasrākṣo devo dakṣiṇe hasta ā dadhat /*
*tayāhaṁ sarvaṁ paśyāmi yaścha śūdra utāryaḥ //4 //*
*āviṣkṛṇuṣva rūpāṇi mātmānamapa gūhathāḥ /*
*atho sahasrachakṣo tvaṁ prati paśyāḥ kimīdinaḥ //5 //*
*darśaya mā yātudhānān darśaya yātudhānyaḥ /*
*piśāchāntsarvān darśayeti tvā rabha oṣadhe //6 //*
*kaśyapasya chakṣurasi śunyāścha chaturakṣayāḥ /*
*vīdhre sūryamiva sarpantaṁ mā piśāchaṁ tiraskaraḥ //7 //*
*udagrabhaṁ paripāṇād yātudhānaṁ kimīdinam /*
*tenāhaṁ sarvaṁ paśyāmyuta śūdramutāryam //8 //*
*yo antarikṣeṇa patati divaṁ yaśchātisarpati /*
*bhūmiṁ yo manyate nāthaṁ taṁ piśāchaṁ pra darśaya //9 //*

२. गन्धर्वाप्सरसः (Gandharvāpsarasaḥ) - अ. (Av.) २.२.१-५

दिव्यो गन्धर्वो भुवनस्य यस्पतिरेक एव नमस्यो विक्ष्वीड्यः ।
तं त्वा यौमि ब्रह्मणा दिव्य देव नमस्ते अस्तु दिवि ते सधस्थम् ॥१॥
दिवि स्पृष्टो यजतः सूर्यत्वगवयाता हरसो दैव्यस्य ।
मृडाद् गन्धर्वो भुवनस्य यस्पतिरेक एव नमस्यः सुशेवाः ॥२॥
अनवद्याभिः समु जग्म आभिरप्सरास्वपि गन्धर्व आसीत् ।
समुद्र आसां सदनं म आहुर्यतः सद्य आ च परा च यन्ति ॥३॥
अभ्रिये दिद्युन्नक्षत्रिये या विश्वावसुं गन्धर्वं सचध्वे। ताभ्यो वो देवीर्नम इत् कृणोमि ॥४॥
या क्लन्दास्तमिषीचयोऽक्षकामा मनोमुहः । ताभ्यो गन्धर्वपत्नीभ्योऽप्सराभ्योऽकरं नमः ॥५॥
*divyo gandharvo bhuvanasya yaspatireka eva namasyo vikṣavīḍyaḥ /*
*taṁ tvā yaumi brahmaṇā divya deva namaste astu divi te sadhastham //1 //*
*divi spṛṣṭo yajataḥ sūryatvagavayātā haraso daivyasya /*
*mṛḍād gandharvo bhuvanasya yaspatireka eva namasyaḥ suśevāḥ //2 //*
*anavadyābhiḥ samu jagma ābhirapsarāsvapi gandharva āsīt /*
*samudra āsāṁ sadanaṁ ma āhuryataḥ sadya ā cha parā cha yanti //3 //*
*abhriye didyunnakṣatriye yā viśvāvasuṁ gandharvaṁ sachadhve /*
*tābhyo vo devīrnama it kṛṇomi //4 //*
*yā klandāstamiṣīchayo'kṣakāmā manomuhaḥ /*
*tābhyo gandharvapatnībhyo'psarābhyo'karaṁ namaḥ //5 //*

३. ब्रह्मणस्पतिः (Brahmaṇaspatiḥ) - अ. (Av.) ८.६.१५

येषां पश्चात् प्रपदानि पुरः पार्ष्णीः पुरो मुखा ।
खलजाः शकधूमजा उरुण्डा ये च मट्मटाः कुम्भमुष्का अयाशवः ।
तानस्या ब्रह्मणस्पते प्रतीबोधेन नाशय ॥१५॥

*yeṣāṁ paśchāt prapadāni puraḥ pārṣṇīḥ puro mukhā ।*
*khalajāḥ śakadhūmajā uruṇḍā ye cha maṭmaṭāḥ kumbhamuṣkā ayāśavaḥ ।*
*tānasyā brahmaṇaspate pratībodhena nāśaya ॥15 ॥*

४. मन्त्रोक्ताः अथवा मातृनामा (Mantroktāḥ Athavā Mātṛnāmā) - अ. (Av.) ८.६.१-१४; १६-२६

अ. (Av.) ८.६.१-१४

यौ ते मातोन्ममार्ज जातायाः पतिवेदनौ। दुर्णामा तत्र मा गृधदलिंश उत वत्सपः ॥१॥
पलालानुपलालौ शर्कुं कोकं मलिम्लुचं पलीजकम्। आश्रेषं वव्रिवाससमृक्षग्रीवं प्रमीलिनम्॥२॥
मा सं वृतो मोप सृप ऊरू माव सृपोऽन्तरा। कृणोम्यस्यै भेषजं बजं दुर्णामचातनम् ॥३॥
दुर्णामा च सुनामा चोभा संवृतममिच्छतः। अरायानप हन्मः सुनामा स्त्रैणामिच्छताम् ॥४॥
यः कृष्णः केश्यसुर स्तम्बज उत तुण्डिकः। अरायानस्या मुष्काभ्यां भंससोऽप हन्मसि ॥५॥
अनुजिघ्रं प्रमृशन्तं क्रव्यादमुत रेरिहम्। अरायांछ्वंकिष्किणो बजः पिंगो अनीनशत् ॥६॥
यस्त्वा स्वप्ने निपद्यते भ्राता भूत्वा पितेव च। बजस्तान्त्सहतामितः क्लीबरूपांस्तिरीटिनः ॥७॥
यस्त्वा स्वपन्तीं त्सरति यस्त्वा दिप्सति जाग्रतीम्।
छायामिव प्र तान्त्सूर्यः परिक्रामन्ननीनशत् ॥८॥
यः कृणोति मृतवत्सामवतोकामिमां स्त्रियम्। तमोषधे त्वं नाशयास्याः कमलमिंजवम् ॥९॥
ये शालाः परिनृत्यन्ति सायं गर्दभनादिनः। कुसूला ये च कुक्षिलाः कुकुभाः करुमाः स्रिमाः ।
तानोषधे त्वं गन्धेन विषूचीनान् वि नाशय ॥१०॥
ये कुकुन्धाः कुकूरभाः कृत्तीर्दूर्शानि बिभ्रति ।
क्लीबाइव प्रनृत्यन्तो वने ये कुर्वते घोषं तानितो नाशयामसि ॥११॥
ये सूर्यं न तितिक्षन्त आतमपन्तममुं दिवः ।
अरायान् बस्तवासिनो दुर्गन्धींल्लोहितास्यान् मककान् नाशयामसि ॥१२॥
य आत्मानमतिमात्रमंस आधाय बिभ्रति। स्त्रीणां श्रोणिप्रतोदिन इन्द्र रक्षांसि नाशय ॥१३॥
ये पूर्वे वध्वो३ यन्ति हस्ते शृंगाणि बिभ्रतः ।
आपाकेस्थाः प्रहासिन स्तम्बे ये कुर्वते ज्योतिस्तानितो नाशयामसि ॥१४॥

*yau te mātonmamārja jātāyāḥ pativedanau ।*
*durṇāmā tatra mā gṛdhadaliṁśa uta vatsapaḥ ॥1 ॥*
*palālānupalālau śarkuṁ kokaṁ malimluchaṁ palījakam ।*
*āśreṣaṁ vavrivāsasamṛkṣagrīvaṁ pramīlinam ॥2 ॥*
*mā saṁ vṛto mopa sṛpa ūrū māva sṛpo'ntarā ।*
*kṛṇomyasyai bheṣajaṁ bajaṁ durṇāmachātanam ॥3 ॥*
*durṇāmā cha sunāmā chobhā saṁvṛtamamichchhataḥ ।*
*arāyānapa hanmaḥ sunāmā straiṇāmichchhatām ॥4 ॥*
*yaḥ kṛṣṇaḥ keśyasura stambaja uta tuṇḍikaḥ ।*
*arāyānasyā muṣkābhyāṁ bhaṁsaso'pa hanmasi ॥5 ॥*
*anujighraṁ pramṛśantaṁ kravyādamuta reriham ।*
*arāyāṁchhvaṁkiṣkiṇo bajaḥ piṁgo anīnaśat ॥6 ॥*
*yastvā svapne nipadyate bhrātā bhūtvā piteva cha ।*
*bajastāntsahatāmitaḥ klībarūpāṁstirīṭinaḥ ॥7 ॥*
*yastvā svapantīṁ tsarati yastvā dipsati jāgratīm ।*
*chhāyāmiva pra tāntsūryaḥ parikrāmannanīnaśat ॥8 ॥*
*yaḥ kṛṇoti mṛtavatsāmavatokāmimāṁ striyam ।*
*tamoṣadhe tvaṁ nāśayāsyāḥ kamalamiṁjavam ॥9 ॥*
*ye śālāḥ parinṛtyanti sāyaṁ gardabhanādinaḥ ।*
*kusūlā ye cha kukṣilāḥ kukubhāḥ karumāḥ srimāḥ ।*
*tānoṣadhe tvaṁ gandhena viṣūchīnān vi nāśaya ॥10 ॥*
*ye kukundhāḥ kukūrabhāḥ kṛttīrdūrśāni bibhrati ।*
*klībāiva pranṛtyanto vane ye kurvate ghoṣaṁ tānito nāśayāmasi ॥11 ॥*
*ye sūryaṁ na titikṣanta ātamapantamamuṁ divaḥ ।*
*arāyān bastavāsino durgandhīllohitāsyān makakān nāśayāmasi ॥12 ॥*
*ya ātmānamatimātramaṁsa āghāya bibhrati ।*

*strīṇāṁ śroṇipratodina indra rakṣāṁsi nāśaya ॥13॥*
*ye pūrve vadhvo3 yanti haste śṛṁgāṇi bibhrataḥ ।*
*āpākesthāḥ prahāsina stambe ye kurvate jyotistānito nāśayāmasi ॥14॥*

अ. (Av.) ८.६.१६-२६

पर्यस्ताक्षा अप्रचंकशा अस्त्रैणाः सन्तु पण्डगाः ।
अव भेषज पादय य इमां संविवृत्सत्यपतिः स्वपतिं स्त्रियम् ॥१६॥
उद्धर्षिणं मुनिकेशं जम्भयन्तं मरीमृशम् ।
उपेषन्तमुदुम्बलं तुण्डेलमुत शालुडम्। पदा प्र विध्य पार्ष्ण्या स्थालीं गौरिव स्पन्दना ॥१७॥
यस्ते गर्भं प्रतिमृशाज्जातं वा मारयाति ते। पिंगस्तमुग्रधन्वा कृणोतु हृदयाविधम् ॥१८॥
ये अम्नो जातान् मारयन्ति सूतिका अनुशेरते। स्
त्रीभागान् पिंगो गन्धर्वान् वातो अभ्रमिवाजतु॥१९॥
परिसृष्टं धारयतु यद्धितं माव पादि तत्। गर्भं त उग्रौ रक्षतां भेषजौ नीविभार्यौ ॥२०॥
पवीनसात् तङ्गल्वा३च्छायकादुत नग्नकात्।
प्रजायै पत्ये त्वा पिंग परि पातु किमीदिनः॥२१॥
द्व्यास्याच्चतुरक्षात् पंचपादादनङ्गरेः। वृन्तादभि प्रसर्पतः परि पाहि वरीवृतात् ॥२२॥
य आमं मांसमदन्ति पौरुषेयं च ये क्रविः। गर्भान् खादन्ति केशवास्तानितो नाशयामसि ॥२३॥
ये सूर्यात् परिसर्पन्ति स्नुषेव श्वशुरादधि।
बजश्च तेषां पिंगश्च हृदयेऽधि नि विध्यताम् ॥२४॥
पिंग रक्ष जायमानं मा पुमांसं स्त्रियं क्रन्।
आण्डादो गर्भान्मा दभन् बाधस्वेतः किमीदिनः ॥२५॥
अप्रजास्त्वं मार्तवत्समाद् रोदमघमावयम्।
वृक्षादिव स्रजं कृत्वाप्रिये प्रति मुंच तत् ॥२६॥

*paryastākṣā aprachaṁkaśā astraiṇāḥ santu paṇḍagāḥ ।*
*ava bheṣaja pādaya ya imāṁ saṁvivṛtsatyapatiḥ svapatiṁ striyam ॥16॥*
*uddharṣiṇaṁ munikeśaṁ jambhayantaṁ marīmṛśam ।*
*upeṣantamudumbalaṁ tuṇḍelamuta śāluḍam ।*
*padā pra vidhya pārṣṇyā sthālīṁ gauriva spandanā ॥17॥*
*yaste garbhaṁ pratimṛśājjātaṁ vā mārayāti te ।*
*piṁgastamugradhanvā kṛṇotu hṛdayāvidham ॥18॥*
*ye amno jātān mārayanti sūtikā anuśerate ।*
*trībhāgān piṁgo gandharvān vāto abhramivājatu ॥19॥*
*parisṛṣṭaṁ dhārayatu yaddhitaṁ māva pādi tat ।*
*garbhaṁ ta ugrau rakṣatāṁ bheṣajau nīvibhāryau ॥20॥*
*pavīnasāt taṅgalvā3chchhāyakāduta nagnakāt ।*
*prajāyai patye tvā piṁga pari pātu kimīdinaḥ ॥21॥*
*dvyāsyāchchaturakṣāt paṁchapādādanaṅgareḥ ।*
*vṛntādabhi prasarpataḥ pari pāhi varīvṛtāt ॥22॥*
*ya āmaṁ māṁsamadanti pauruṣeyaṁ cha ye kraviḥ ।*
*garbhān khādanti keśavāstānito nāśayāmasi ॥23॥*
*ye sūryāt parisarpanti snuṣeva śvaśurādadhi ।*
*bajaścha teṣāṁ piṁgaścha hṛdaye'dhi ni vidhyatām ॥24॥*
*piṁga rakṣa jāyamānaṁ mā pumāṁsaṁ striyaṁ kran ।*
*āṇḍādo garbhānmā dabhan bādhasvetaḥ kimīdinaḥ ॥25॥*
*aprajāstvaṁ mārtavatsamād rodamaghamāvayam ।*
*vṛkṣādiva srajaṁ kṛtvāpriye prati muṁcha tat ॥26॥*

## ४९५. मान्धाता यौवनाश्वः (Māndhātā Yauvanāśvaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.१३४.१-६; सा. (Sv.) १०९०-१०९२

ऋ. (Rv.) १०.१३४.१-६

उभे यदिन्द्र रोदसी आपप्राथेषाइव ।
महान्तं त्वा महीनां सम्राजं चर्षणीनां। देवी जनित्र्यजीजनद् भद्रा जनित्र्यजीजनत् ॥१॥

अव स्म दुर्हणायतो मर्तस्य तनुहि स्थिरम् ।
अधस्पदं तमीं कृधि यो अस्माँ आदिदेशति देवी जनित्रयजीजनदभद्रा जनित्र्यजीजनत् ॥२॥
अव त्या बृहतीरिषो विश्वश्चन्द्रा अमित्रहन् ।
शचीभिः शक्र धनुहीन्द्र विश्वाभिरूतिभिर्देवी जनित्र्यजीजनद् भद्रा जनित्र्यजीजनत् ॥३॥
अव यत्त्वं शतक्रतविन्द्र विश्वानि धूनुषे ।
रयिं न सुन्वते सचा सहस्रिणीभिरूतिभिर्देवी जनित्र्यजीजनद् भद्रा जनित्र्यजीजनत् ॥४॥
अव स्वेदा इवाभितो विष्वक्पतन्तु दिद्यवः ।
दूर्वायाइव तन्तवो व्य१स्मदेतु दुर्मतिर्देवी जनित्र्यजीजनद् भद्रा जनित्र्यजीजनत् ॥५॥
दीर्घं ह्यंकुशं यथा शक्ंित बिभर्षि मन्तुमः ।
पूर्वेण मघवन्पदाजो वयां यथा यमो देवी जनित्र्यजीजनद् भद्रा जनित्र्यजीजनत् ॥६॥
*ubhe yadindra rodasī āpaprātheṣāiva ।*
*mahāntaṁ tvā mahīnāṁ samrājaṁ charṣaṇīnāṁ ।*
*devī janitrayajījanad bhadrā janitrayajījanat ॥1॥*
*ava sma durhaṇāyato martasya tanuhi sthiram ।*
*adhaspadaṁ tamīṁ kṛdhi yo asmām̐ ādideśati devī janitrayajījanadabhadrā janitrayajījanat ॥2॥*
*ava tyā bṛhatīriṣo viśvaśchandrā amitrahan ।*
*śachībhiḥ śakra dhranuhīndra viśvābhirūtibhirdevī janitrayajījanad bhadrā janitrayajījanat ॥3॥*
*ava yattvaṁ śatakratavindra viśvāni dhūnuṣe ।*
*rayiṁ na sunvate sachā sahasriṇībhirūtibhirdevī janitrayajījanad bhadrā janitrayajījanat ॥4॥*
*ava svedā ivābhito viṣvakpatantu didyavaḥ ।*
*dūrvāyāiva tantavo vya1smadetu durmatirdevī janitrayajījanad bhadrā janitrayajījanat ॥5॥*
*dīrghaṁ hyaṁkuśaṁ yathā śakiṁta bibharṣi mantumaḥ ।*
*pūrveṇa maghavanpadājo vayāṁ yathā yamo devī janitrayajījanad bhadrā janitrayajījanat ॥6॥*

सा. (Sv.) १०९०-१०९२

उभे यदिन्द्र रोदसी आपप्राथोषा इव ।
महान्तं त्वा महीनां सम्राजं चर्षणीनाम्। देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥१॥
दीर्घं ह्यंकुशं यथा शक्तिं बिभर्षि मन्तुमः ।
पूर्वेण मघवन्पदा वयामजो यथा यमः। देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥२॥
अव स्म दुर्हणायतो मर्त्तस्य तनुहि स्थिरम् ।
अधस्पदं तमीं कृधि यो अस्माँ अभिदासति। देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥३॥
*ubhe yadindra rodasī āpaprāthoṣā iva ।*
*mahāntaṁ tvā mahīnāṁ saprājaṁ charṣaṇīnām ।*
*devī janitrayajījanadbhadrā janitrayajījanat ॥1॥*
*dīrghaṁ hmaṁkuśaṁ yathā śaktiṁ bibharṣi mantumaḥ ।*
*pūrveṇa maghavanpadā vayāmajo yathā yamaḥ ।*
*devī janitrayajījanadbhadrā janitrayajījanat ॥2॥*
*ava sma durhṛṇāyato marttasya tanuhi sthiram ।*
*adhaspadaṁ tamīṁ kṛdhi yo asmām̐ abhidāsati ।*
*devī janitrayajījanadbhadrā janitrayajījanat ॥3॥*

**४९६. मान्धाता यौवनाश्वः (पूर्वार्द्ध); गोधा ऋषिका (उत्तरार्द्ध) (Māndhātā Yauvanāśvaḥ [Pūrvārddha]; Godhā Ṛṣikā [Uttarārddha])**

१. इन्द्रः (Indraḥ) - सा. (Sv.) १०९१

दीर्घं ह्यंकुशं यथा शक्ति बिभर्षि मन्तुमः ।
पूर्वेण मघवन्पदा वयामजो यथा यमः ।
देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥२॥
*dīrghaṁ hmaṁkuśaṁ yathā śakti bibharṣi mantumaḥ ।*

*pūrveṇa maghavanpadā vayāmajo yathā yamaḥ* ।
*devī janitrayajījanadbhadrā janitrayajījanat* ॥2॥

**४९७. मान्धाता यौवनाश्वः (ऋसर्व. १०.१३४.१); मेधातिथिः काण्वः (साग्री. सास्वा.); मरुतो यौवनाश्वः (सार्षेदी.) (Māndhātā Yauvanāśvaḥ [Rss. 10.134.1]; Medhātithiḥ Kāṇvaḥ [Ssb. Sas.]; Maruto Yauvanāśvaḥ [Sad.])**

१. इन्द्रः (Indraḥ) - सा. (Sv.) ३७९

उभे यदिन्द्र रोदसी आपप्राथोषा इव ।
महान्तं त्वा महीनां सम्राजं चर्षणीनाम् देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥१०॥
*ubhe yadindra rodasī āpaprāthoṣā iva* ।
*mahāntaṁ tvā mahīnāṁ samrājaṁ charṣaṇīnām devī janitrayajījanadbhadrā janitrayajījanat* ॥10॥

**४९८. मुद्गलः (Mudgalaḥ)**

१. विद्वांसः (Vidvāṁsaḥ) - य. (Yv.) २६.१९

अनु वीरैरनु पुष्यास्म गोभिरन्वश्वैरनु सर्वेण पुष्टैः ।
अनु द्विपदानु चतुष्पदा वयं देवा नो यज्ञमृतुथा नयन्तु ॥१९॥
*anu vīrairanu puṣyāsma gobhiranvaśvairanu sarveṇa puṣṭaiḥ* ।
*anu dvipadānu chatuṣpadā vayaṁ devā no yajñamṛtuthā nayantu* ॥19॥

**४९९. मुद्गलो भार्म्यश्वः (Mudgalo Bhārmyaśvaḥ)**

१. द्रुघण इन्द्रो वा (Drughaṇa Indro Vā) - ऋ. (Rv.) १०.१०२.१-१२

प्र ते रथं मिथूकृतमिन्द्रोऽवतु धृष्णुया ।
अस्मिन्नाजौ पुरुहूत श्रवाय्ये धनुभक्षेषु नोऽव ॥१॥
उत्स्म वातो वहति वासो अस्या अधिरथं यदजयत्सहस्रम् ।
रथीरभून्मुद्गलानी गविष्टौ भरे कृतं व्यचेदिन्द्रसेना ॥२॥
अन्तर्यच्छ जिघांसतो वज्रमिन्द्राभिदासतः ।
दासस्य वा मघवन्नार्यस्य वा सनुतर्यवया वधम् ॥३॥
उद्नो ह्रदमपिबज्जर्हृषाणः कूटं स्म तृंहदभिमातिमेति ।
प्र मुष्कभारः श्रव इच्छमानोऽजिरं बाहू अभरत्सिषासन् ॥४॥
न्यक्रन्दयन्नुपयन्त एनममेहयन्वृषभं मध्य आजेः ।
तेनं सूभर्वं शतवत्सहस्रं गवां मुद्गलः प्रधने जिगाय ॥५॥
कर्कदवे वृषभो युक्त आसीदवावचीत्सारथिरस्य केशी ।
दुधेर्युक्तस्य द्रवतः सहानस ऋच्छन्ति ष्मा निष्पदो मुद्गलानीम् ॥६॥
उत प्रधिमुदहन्नस्य विद्वानुपायुनग्वंसगमत्र शिक्षन् ।
इन्द्र उदावत्पतिमघ्न्यानामरंहत पद्याभिः ककुद्मान् ॥७॥
शुनमष्ट्राव्यचरत्कपर्दी वरत्रायां दार्वानह्यमानः ।
नृम्णानि कृण्वन्बहवे जनाय गाः पस्पशानस्तविषीरधत्त ॥८॥
इमं तं पश्य वृषभस्य युंजं काष्ठाया मध्ये द्रुघणं शयानम् ।
येन जिगाय शतवत्सहस्रं गवां मुद्गलः पृतनाज्येषु ॥९॥
आरे अघा को न्वि१ त्था ददर्श यं युञ्जन्ति तम्वा स्थापयन्ति ।
नास्मै तृणं नोदकमा भरन्त्युत्तरो धुरो वहति प्रदेदिशत् ॥१०॥
परिवृक्तेव पतिविद्यमानट् पीप्याना कूचक्रेणेव सिंचन् ।
एषैष्या चिद्रथ्या जयेम सुमंगलं सिनवदस्तु सातम् ॥११॥
त्वं विश्वस्य जगतश्चक्षुरिन्द्रासि चक्षुषः ।
वृषा यदाजिं वृषणा सिषाससि चोदयन्वध्रिणा युजा ॥१२॥
*pra te rathaṁ mithūkṛtamindro'vatu dhṛṣṇuyā* ।
*asminnājau puruhūta śravāyye dhanubhakṣeṣu no'va* ॥1॥
*utsma vāto vahati vāso asyā adhirathaṁ yadajayatsahasram* ।

*rathīrabhūnmudgalānī gaviṣṭau bhare kṛtaṁ vyachedindrasenā ॥2 ॥*
*antaryachchha jighāṁsato vajramindrābhidāsataḥ ।*
*dāsasya vā maghavannāāryasya vā sanutaryavayā vadham ॥3 ॥*
*udno hradamapibajjarhṛṣāṇaḥ kūṭaṁ sma tṛṁhadabhimātimeti ।*
*pra muṣkabhāraḥ śrava ichchhamāno'jiraṁ bāhū abharatsiṣāsan ॥4 ॥*
*nyakrandayannupayanta enamamehayanvṛṣabhaṁ madhya ājeḥ ।*
*tenaṁ sūbharvaṁ śatavatsahasraṁ gavāṁ mudgalaḥ pradhane jigāya ॥5 ॥*
*karkadave vṛṣabho yukta āsīdavāvachītsārathirasya keśī ।*
*dudheryuktasya dravataḥ sahānasa ṛchchhanti ṣmā niṣpado mudgalānīm ॥6 ॥*
*uta pradhimaduhannasya vidvānupāyunagvaṁsagamatra śikṣan ।*
*indra udāvatpatimaghnyānāmaraṁhata padyābhiḥ kakudmān ॥7 ॥*
*śunamaṣṭrāvyacharatkapardī varatrāyāṁ dārvānahyamānaḥ ।*
*nṛmṇāni kṛṇvanbahave janāya gāḥ paspaśānastaviṣīradhatta ॥8 ॥*
*imaṁ taṁ paśya vṛṣabhasya yuṁjaṁ kāṣṭhāyā madhye drughaṇaṁ śayānam ।*
*yena jigāya śatavatsahasraṁ gavāṁ mudgalaḥ pṛtanājyeṣu ॥9 ॥*
*āre aghā ko nvi1 tthā dadarśa yaṁ yujjanti tamvā sthāpayanti ।*
*nāsmai tṛṇaṁ nodakamā bharantyuttaro dhuro vahati pradediśat ॥10 ॥*
*parivṛkteva patividyamānaṭ pīpyānā kūchakreṇeva siṁchan ।*
*eṣaiṣyā chidrathyā jayema sumaṁgalaṁ sinavadastu sātam ॥11 ॥*
*tvaṁ viśvasya jagataśchakṣurindrāsi chakṣuṣaḥ ।*
*vṛṣā yadājiṁ vṛṣaṇā siṣāsasi chodayanvadhriṇā yujā ॥12 ॥*

## ५००. मुनयो वातरशनाः (Munayo Vātaraśanāḥ)

१. केशिनः (Keśinaḥ) - ऋ. (Rv.) १०.१३६.१-७

केश्य२ग्निं केशी विषं केशी बिभर्ति रोदसी। केशी विश्वं स्वर्दृशे केशीदं ज्योतिरुच्यते ॥१॥
मुनयो वातरशनाः पिशंगा वसते मला। वातस्यानु ध्राजिं यन्ति यद्देवासो अविक्षत ॥२॥
उन्मदिता मौनेयेन वाताँ आ तस्थिमा वयम्। शरीरेदस्माकं यूयं मर्तासो अभि पश्यथ ॥३॥
अन्तरिक्षेण पतति विश्वा रूपावचाकशत्। मुनिर्देवस्येदेवस्य सौकृत्याय सखा हितः ॥४॥
वातस्याश्वो वायोः सखाथो देवेषितो मुनिः। उभौ समुद्रावा क्षेति यश्च पूर्व उतापरः ॥५॥
अप्सरसां गन्धर्वाणां मृगाणां चरणे चरन्। केशी केतस्य विद्वान्त्सखा स्वादुर्मदिन्तमः ॥६॥
वायुरस्मा उपामन्थत्पिनष्टि स्मा कुनन्नमा। केशी विषस्य पात्रेण यदुद्रेणापिबत्सह ॥७॥

*keśya2gniṁ keśī viṣaṁ keśī bibharti rodasī ।*
*keśī viśvaṁ svardṛśe keśīdaṁ jyotiruchyate ॥1 ॥*
*munayo vātaraśanāḥ piśaṁgā vasate malā ।*
*vātasyānu dhrājiṁ yanti yaddevāso avikṣata ॥2 ॥*
*unmaditā mauneyena vātāṁ̐ ā tasthimā vayam ।*
*śarīredasmākaṁ yūyaṁ martāso abhi paśyatha ॥3 ॥*
*antarikṣeṇa patati viśvā rūpāvachākaśat ।*
*munirdevasyedevasya saukṛtyāya sakhā hitaḥ ॥4 ॥*
*vātasyāśvo vāyoḥ sakhātho deveṣito muniḥ ।*
*ubhau samudrāvā kṣeti yaścha pūrva utāparaḥ ॥5 ॥*
*apsarasāṁ gandharvāṇāṁ mṛgāṇāṁ charaṇe charan ।*
*keśī ketasya vidvāntsakhā svādurmadintamaḥ ॥6 ॥*
*vāyurasmā upāmanthatpinaṣṭi smā kunannamā ।*
*keśī viṣasya pātreṇa yadudreṇāpibatsaha ॥7 ॥*

## ५०१. मूर्धन्वान् आंगिरसो वामदेव्यो वा (Mūrdhanvān son of Aṁgiras or of Vāmadeva)

१. सूर्यवैश्वानरौ (Sūryavaiśvānarau) - ऋ. (Rv.)१०.८८.१-१९

हविष्यान्तमजरं स्वर्विदि दिविस्पृश्याहुतं जुष्टमग्नौ ।
तस्य भर्मणे भुवनाय देवा धर्मणे कं स्वधया पप्रथन्त ॥१॥
गीर्णं भुवनं तमसापगूळहमाविः स्वरभवज्जाते अग्नौ ।
तस्य देवाः पृथिवी द्यौरुतापोऽरणयन्नोषधीः सख्ये अस्य ॥२॥
देवेभिर्न्विषितो यज्ञियेभिरग्निं स्तोषाण्यजरं बृहन्तम् ।

यो भानुना पृथिवीं द्यामुतेमामाततान रोदसी अन्तरिक्षम् ॥३॥
यो होतासीत्प्रथमो देवजुष्टो यं समांजन्नाज्येना वृणानाः ।
स पतत्रीत्वरं रथा जगद्यच्छ्वांत्रमग्निरकृणोज्जातवेदाः ॥४॥
यज्जातवेदो भुवनस्य मूर्धन्नतिष्ठो अग्ने सह रोचनेन ।
तं त्वाहेम मतिभिर्गीर्भिरुक्थैः स यज्ञियो अभवो रोदसिप्राः ॥५॥
मूर्धा भुवो भवति नक्तमग्निस्ततः सूर्यो जायते प्रातरुद्यन् ।
मायामू तु यज्ञियानामेतामपो यत्तूर्णिश्चरति प्रजानन् ॥६॥
दृशेन्यो यो महिना समिद्धोऽरोचत दिवियोनिर्विभावा ।
तस्मिन्नग्नौ सूक्तवाकेन देवा हविर्विश्व आजुहवुस्तनूपाः ॥७॥
सूक्तवाकं प्रथममादिदग्निमादिद्धविरजनयन्त देवाः ।
स एषां यज्ञो अभवत्तनूपास्तं द्यौर्वेद तं पृथिवी तमापः ॥८॥
यं देवासोऽजनयन्ताग्निं यस्मिन्नाजुहवुर्भुवनानि विश्वा ।
सो अर्चिषा पृथिवीं द्यामुतेमामृजूयमानो अतपन्महित्वा ॥९॥
स्तोमेन हि दिवि देवासो अग्निमजीजनंछक्तिभी रोदसिप्राम् ।
तमू अकृण्वन् त्रेधाभुवेकं स ओषधीः पचति विश्वरूपाः ॥१०॥
यदेदेनमदधुर्यज्ञियासो दिवि देवाः सूर्यमादितेयम् ।
यदा चरिष्णू मिथुनावभूतामादित्प्रापश्यन्भुवनानि विश्वा ॥११॥
विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन् ।
आ यस्ततानोषसो विभातीरपो ऊर्णोति तमो अर्चिपा यन् ॥१२॥
वैश्वानरं कवयो यज्ञियासोऽग्निं देवा अजनयन्नजुर्यम् ।
नक्षत्रं प्रतनममिनच्चरिष्णु यक्षस्याध्यक्षं तविषं बृहन्तम् ॥१३॥
वैश्वानरं विश्वहा दीदिवांसं मन्त्रैरग्निं कविमच्छा वदामः ।
यो महिम्ना परिबभूवोर्वी उतावस्तादुत देवः परस्तात् ॥१४॥
द्वे स्रुती अशृणवं पितृणामहं देवानामुत मर्त्यानाम् ।
ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं च ॥१५॥
द्वे समीची बिभृतश्चरन्तं शीर्षतो जाते मनसा विमृष्टम् ।
स प्रत्यङ्विश्वा भुवनानि तस्थावप्रयुच्छन्तरणिर्भ्राजमानः ॥१६॥
यत्रा वेदेते अवरः परश्च यज्ञन्योः कतरो नौ वि वेद ।
आ शेकूरित्सधमादं सखायो नक्षन्त यज्ञं क इदं वि वोचत् ॥१७॥
कत्यग्नयः कति सूर्यासः कत्युषासः कत्यु स्विदापः ।
नोपस्पिजं वः पितरो वदामि पृच्छामि वः कवयो विद्मने कम् ॥१८॥
यावन्मात्रमुषसो न प्रतीकं सुपर्ण्यो३ वसते मातरिश्वः ।
तावद्दधात्युप यज्ञमायन्ब्राह्मणो होतुरवरो निषीदन् ॥१९॥
*haviṣyāntamajaraṁ svarvidi divispṛśyāhutaṁ juṣṭamagnau /*
*tasya bharmaṇe bhuvanāya devā dharmaṇe kaṁ svadhayā paprathanta //1//*
*gīrṇaṁ bhuvanaṁ tamasāpagūḻahamāviḥ svarabhavajjāte agnau /*
*tasya devāḥ pṛthivī dyaurutāpo'raṇayannoṣadhīḥ sakhye asya //2//*
*devebhirnirvaṣito yajñiyebhiragiṁna stoṣāṇyajaraṁ bṛhantam /*
*yo bhānunā pṛthivīṁ dyāmutemāmātatāna rodasī antarikṣam //3//*
*yo hotāsītprathamo devajuṣṭo yaṁ samāṁjannājyenā vṛṇānāḥ /*
*sa patatrāītvaraṁ rathā jagadyachchhvāṁtramagnirakṛṇojjātavedāḥ //4//*
*yajjātavedo bhuvanasya mūrdhannatiṣṭho agne saha rochanena /*
*taṁ tvāhema matibhirgīrbhirukthaiḥ sa yajñiyo abhavo rodasiprāḥ //5//*
*mūrdhā bhuvo bhavati naktamagnistataḥ sūryo jāyate prātarudyan /*
*māyāmū tu yajñiyānāmetāmapo yattūrṇiścharati prajānan //6//*
*dṛśenyo yo mahinā samiddho'rochata diviyonirvibhāvā /*
*tasminnagnau sūktavākena devā havirviśva ājuhavustanūpāḥ //7//*
*sūktavākaṁ prathamamādidagnimādiddhavirajanayanta devāḥ /*
*sa eṣāṁ yajño abhavattanūpāstaṁ dyaurveda taṁ pṛthivī tamāpaḥ //8//*

*yaṁ devāso'janayantāgiṁna yasminnājuhavurbhuvanāni viśvā ।*
*so archiṣā pṛthivīṁ dyāmutemāmṛjūyamāno atapanmahitvā ॥9 ॥*
*stomena hi divi devāso agnimajījanaṁchhaktibhī rodasiprām ।*
*tamū akṛṇvan tredhābhuvekaṁ sa oṣadhīḥ pachati viśvarūpāḥ ॥10 ॥*
*yadedenamadadhuryajñiyāso divi devāḥ sūryamāditeyam ।*
*yadā chariṣṇū mithunāvabhūtāmāditprāpaśyanbhuvanāni viśvā ॥11 ॥*
*viśvasmā agiṁna bhuvanāya devā vaiśvānaraṁ ketumahnāmakṛṇvan ।*
*ā yastatānoṣaso vibhātīrapo ūrṇoti tamo archipā yan ॥12 ॥*
*vaiśvānaraṁ kavayo yajñiyāso'giṁna devā ajanayannajuryam ।*
*nakṣatraṁ pratanamaminachchariṣṇu yakṣasyādhyakṣaṁ taviṣaṁ bṛhantam ॥13 ॥*
*vaiśvānaraṁ viśvahā dīdivāṁsaṁ mantrairagiṁna kavimachchhā vadāmaḥ ।*
*yo mahimnā paribabhūvorvī utāvastāduta devaḥ parastāt ॥14 ॥*
*dve srutī aśṛṇavaṁ pitṛṇāmahaṁ devānāmuta martyānām ।*
*tābhyāmidaṁ viśvamejatsameti yadantarā pitaraṁ mātaraṁ cha ॥15 ॥*
*dve samīchī bibhṛtaścharantaṁ śīrṣato jāte manasā vimṛṣṭam ।*
*sa pratyaṅviśvā bhuvanāni tasthāvaprayuchchhantaraṇirbhrājamānaḥ ॥16 ॥*
*yatrā vedete avaraḥ paraścha yajñanyoḥ kataro nau vi veda ।*
*ā śekūritsadhamādaṁ sakhāyo nakṣanta yajñaṁ ka idaṁ vi vochat ॥17 ॥*
*katyagnayaḥ kati sūryāsaḥ katyuṣāsaḥ katyu svidāpaḥ ।*
*nopaspijaṁ vaḥ pitaro vadāmi pṛchchhāmi vaḥ kavayo vidmane kam ॥18 ॥*
*yāvanmātramuṣaso na pratīkaṁ suparṇyo3 vasate mātariśvaḥ ।*
*tāvaddadhātyupa yajñamāyanbrāhmaṇo hoturavaro niṣīdan ॥19 ॥*

## ५०२. मृगः (Mṛgaḥ)

१. अग्निः (Agniḥ) - सा. (Sv.) १८२८-१८३०

नमः सखिभ्यः पूर्वसद्भ्यो नमः साकंनिषेभ्यः । युंजे वाचं शतपदीं ॥१ ॥
युंज वाचं शतपदीं गाये सहस्रवर्तनि । गायत्रं त्रैष्टुभं जगत् ॥२ ॥
गायत्रं त्रैष्टुभं जगद्विश्वा रूपाणि सम्भृता । देवा ओकांसि चक्रिरे ॥३ ॥
*namaḥ sakhibhyaḥ pūrvasadbhyo namaḥ sākaṁniṣebhyaḥ । yuṁje vāchaṁ śatapadīṁ ॥1 ॥*
*yuṁja vāchaṁ śatapadīṁ gāye sahasravartani । gāyatraṁ traiṣṭubhaṁ jagat ॥2 ॥*
*gāyatraṁ traiṣṭubhaṁ jagadviśvā rūpāṇi sambhṛtā । devā okāṁsi chakrire ॥3 ॥*

## ५०३. मृगारः (Mṛgāraḥ)

१. अग्निः (Agniḥ) - अ. (Av.) ४.२३.१-७

अग्नेर्मन्वे प्रथमस्य प्रचेतसः प्रांचजन्यस्यबहुधा यमिन्धते ।
विशोविशः प्रविशिवांसमीमहे स नो मुंचत्वंहसः ॥१ ॥
यथा हव्यं वहसि जातवेदो यथा यज्ञं कल्पयसि प्रजानन् ।
एवा देवेभ्यः सुमति न आ वह स नो मुंचत्वंहसः ॥२ ॥
यामन्यामन्नुपयुक्तं बहिष्ठं कर्मन्कर्मन्नाभगम् ।
अग्निमीडे रक्षोहणं यज्ञवृधं घृताहुतं स नो मुंचत्वंहसः ॥३ ॥
सुजातं जातवेदसमग्निं वैश्वानरं विभुम् ।
हव्यवाहं हवामहे स नो मुंचत्वंहसः ॥४ ॥
येन ऋषयो बलमद्योतयन् युजा येनासुराणामयुवन्त मायाः ।
येनाग्निना पणीनिन्द्रो जिगाय स नो मुंचत्वंहसः ॥५ ॥
येन देवा अमृतमन्वविन्दन् येनौषधीर्मधुमतीरकृण्वन् ।
येन देवाः स्व१राभरन्त्स नो मुंचत्वंहसः ॥६ ॥
यस्येदं प्रदिशि यद् विरोचते यज्जातं जनितव्यं च केवलम् ।
स्तौम्यग्निं नाथितो जोहवीमि स नो मुंचत्वंहसः ॥७ ॥
*agnermanve prathamasya prachetasaḥ prāṁchajanyasyabahudhā yamindhate ।*
*viśoviśaḥ praviśivāṁsamīmahe sa no muṁchatvaṁhasaḥ ॥1 ॥*
*yathā havyaṁ vahasi jātavedo yathā yajñaṁ kalpayasi prajānan ।*
*evā devebhyaḥ sumati na ā vaha sa no muṁchatvaṁhasaḥ ॥2 ॥*

*yāmanyāmannupayuktaṁ bahiṣṭhaṁ karmankarmannābhagam ।*
*agnimīḍe rakṣohaṇaṁ yajñavṛdhaṁ ghṛtāhutaṁ sa no muṁchatvaṁhasaḥ ॥3॥*
*sujātaṁ jātavedasamagiṁna vaiśvānaraṁ vibhum ।*
*havyavāhaṁ havāmahe sa no muṁchatvaṁhasaḥ ॥4॥*
*yena ṛṣayo balamadyotayan yujā yenāsurāṇāmayuvanta māyāḥ ।*
*yenāgninā paṇīnindro jigāya sa no muṁchatvaṁhasaḥ ॥5॥*
*yena devā amṛtamanvavindan yenauṣadhīrmadhumatīrakṛṇvan ।*
*yena devāḥ sva1rābharantsa no muṁchatvaṁhasaḥ ॥6॥*
*yasyedaṁ pradiśi yad virochate yajjātaṁ janitavyaṁ cha kevalam ।*
*staumyagiṁna nāthito johavīmi sa no muṁchatvaṁhasaḥ ॥7॥*

२. इन्द्रः (Indraḥ) - अ. (Av.) ४.२४.१-७

इन्द्रस्य मन्महे शश्वदिदस्य मन्महे वृत्रघ्न स्तोमा उप मेम आगुः ।
यो दाशुषः सुकृतो हवमति स नो मुंचत्वंहसः ॥१॥
य उग्रीणमुग्रबाहुर्युयुर्यो दानवानां बलमारुरोज ।
येन जिताः सिन्धवो येन गावः स नो मुंचत्वंहसः ॥२॥
यश्चर्षणिप्रो वृषभः स्वर्विद् यस्मै ग्रावाणः प्रवदन्ति नृम्णम् ।
यस्याध्वरः सप्तहोता मदिष्ठः स नो मुंचत्वंहसः ॥३॥
यस्य वशास ऋषभास उक्षणो यस्मै मीयन्ते स्वरवः स्वर्विदे ।
यस्मै शुक्रः पवते ब्रह्मशुम्भितः स नो मुंचत्वंहसः ॥४॥
यस्य जुष्टिं सोमिनः कामयन्ते यं हवन्त इषुमन्तं गविष्टौ ।
यस्मिन्नर्कः शिश्रिये यस्मिन्नोजः स नो मुंचत्वहसः ॥५॥
यः प्रथमः कर्मकृत्याय जज्ञे यस्य वीर्यं प्रथमस्यानुबद्धम् ।
येनोद्यतो वज्रोऽभ्यायताहिं स नो मुंचत्वंहसः ॥६॥
यः सङ्ग्रामान् नयति सं युधे वशी यः पुष्टानि संसृजति द्वयानि ।
स्तौमीन्द्रं नाथितो जोवीमि स नो मुंचत्वंहसः ॥७॥
*indrasya manmahe śaśvadidasya manmahe vṛtraghna stomā upa mema āguḥ ।*
*yo dāśuṣaḥ sukṛto havamati sa no muṁchatvaṁhasaḥ ॥1॥*
*ya ugrīṇamugrabāhuryuyuryo dānavānāṁ balamāruroja ।*
*yena jitāḥ sindhavo yena gāvaḥ sa no muṁchatvaṁhasaḥ ॥2॥*
*yaścharṣaṇipro vṛṣabhaḥ svarvid yasmai grāvāṇaḥ pravadanti nṛmṇam ।*
*yasyādhvaraḥ saptahotā madiṣṭhaḥ sa no muṁchatvaṁhasaḥ ॥3॥*
*yasya vaśāsa ṛṣabhāsa ukṣaṇo yasmai mīyante svaravaḥ svarvide ।*
*yasmai śukraḥ pavate brahmaśumbhitaḥ sa no muṁchatvaṁhasaḥ ॥4॥*
*yasya juṣṭiṁ sominaḥ kāmayante yaṁ havanta iṣumantaṁ gaviṣṭau ।*
*yasminnarkaḥ śiśriye yasminnojaḥ sa no muṁchatvahasaḥ ॥5॥*
*yaḥ prathamaḥ karmakṛtyāya jajñe yasya vīryaṁ prathamasyānubaddham ।*
*yenodyato vajro'bhyāyatāhiṁ sa no muṁchatvaṁhasaḥ ॥6॥*
*yaḥ saṅgrāmān nayati saṁ yudhe vaśī yaḥ puṣṭāni saṁsṛjati dvayāni ।*
*staumīndraṁ nāthito jovīmi sa no muṁchatvaṁhasaḥ ॥7॥*

३. द्यावापृथिवी (Dyāvāpṛthivī) - अ. (Av.) ४.२६.१-७

मन्वे वां द्यावापृथिवी सुभोजसौ सजेतसौ ये अप्रथेथाममिता योजनानि ।
प्रतिष्ठे ह्यभवतं वसूनां ते नो मुंचतमंहसः ॥१॥
प्रतिष्ठे ह्यभवतं वसूनां प्रवृद्धे देवी सुभगे उरूची ।
द्यावापृथिवी भवतं मे स्योने ते नो मुंचतमंहसः ॥२॥
असन्तापे सुतपसौ हुवेऽहमुर्वी गम्भीरे कविभिर्नमस्ये ।
द्यावापृथिवी भवतं मे स्योने ते नो मुंचतमंहसः ॥३॥
ये अमृतं बिभृथो ये हवींषि ये स्रोत्या बिभृथो ये मनुष्यान् ।
द्यावापृथिवी भवतं मे स्योने ते नो मुंचतमंहसः ॥४॥
ये उस्रिया बिभृथो ये वनस्पतीन् ययोर्वां विश्वा भुवनान्यन्तः ।
द्यावापृथिवी भवतं मे स्योने ते नो मुंचतमंहसः ॥५॥

ये कीलालेन तर्पयथो ये घृतेन याभ्यामृते न किं चन शक्नुवन्ति ।
द्यावापृथिवी भवतं मे स्योने ते नो मुंचतमंहसः ॥६॥
यन्मेदमभिशोचति येनयेन वा कृतं पौरुषेयान्न दैवात् ।
स्तौमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुंचतमंहसः ॥७॥
*manve vāṁ dyāvāpṛthivī subhojasau sajetasau ye aprathethāmamitā yojanāni* ।
*pratiṣṭhe hyabhavataṁ vasūnāṁ te no muṁchatamaṁhasaḥ* ॥1॥
*pratiṣṭhe hyabhavataṁ vasūnāṁ pravṛddhe devī subhage urūchī* ।
*dyāvāpṛthivī bhavataṁ me syone te no muṁchatamaṁhasaḥ* ॥2॥
*asantāpe sutapasau huve'hamurvī gambhīre kavibhirnamasye* ।
*dyāvāpṛthivī bhavataṁ me syone te no muṁchatamaṁhasaḥ* ॥3॥
*ye amṛtaṁ bibhṛtho ye havīṁṣi ye srotyā bibhṛtho ye manuṣyān* ।
*dyāvāpṛthivī bhavataṁ me syone te no muṁchatamaṁhasaḥ* ॥4॥
*ye usriyā bibhṛtho ye vanaspatīn yayorvāṁ viśvā bhuvanānyantaḥ* ।
*dyāvāpṛthivī bhavataṁ me syone te no muṁchatamaṁhasaḥ* ॥5॥
*ye kīlālena tarpayatho ye ghṛtena yābhyāmṛte na kiṁ chana śaknuvanti* ।
*dyāvāpṛthivī bhavataṁ me syone te no muṁchatamaṁhasaḥ* ॥6॥
*yanmedamabhiśochati yenayena vā kṛtaṁ pauruṣeyānna daivāt* ।
*staumi dyāvāpṛthivī nāthito johavīmi te no muṁchatamaṁhasaḥ* ॥7॥

४. भवाशर्वौ (Bhavāśarvau) - अ. (Av.) ४.२८.१-७

भवाशर्वौ मन्वे वां तस्य वित्तं ययोर्वामिदं प्रदिशि यद् विरोचते ।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुंचतमंहसः ॥१॥
ययोरभ्यध्व उत यद् दूरे चिद् यौ विदिताविषुभृतामसिष्ठौ ।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुंचतमंहसः ॥२॥
सहस्राक्षौ वृत्रहणा हुवेऽहं दूरेगव्यूती स्तुवन्नेम्युग्रौ ।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुंचतमंहसः ॥३॥
यावारेभाथे बहु साकमग्रे प्र चेदस्राष्ट्रमभिभां जनेषु ।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुंचतमंहसः ॥४॥
ययोर्वधान्नापपद्यते कश्चनान्तर्देवेषूत मानुषेषु ।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुंचतमंहसः ॥५॥
यः कृत्याकृन्मूलकृद् यातुधानो नि तस्मिन् धत्तां वज्रमुग्रौ ।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुंचतमंहसः ॥६॥
अधि नो ब्रूतं पृतनासूग्रौ सं वज्रेण सृजतं यः किमीदी ।
स्तौमि भवाशर्वौ नाथितो जोहवीमि तौ नो मुंचतमंहसः ॥७॥
*bhavāśarvau manve vāṁ tasya vittaṁ yayorvāmidaṁ pradiśi yad virochate* ।
*yāvasyeśāthe dvipado yau chatuṣpadastau no muṁchatamaṁhasaḥ* ॥1॥
*yayorabhyadhva uta yad dūre chid yau viditāviṣubhṛtāmasiṣṭhau* ।
*yāvasyeśāthe dvipado yau chatuṣpadastau no muṁchatamaṁhasaḥ* ॥2॥
*sahasrākṣau vṛtrahaṇā huve'haṁ dūregavyūtī stuvannemyugrau* ।
*yāvasyeśāthe dvipado yau chatuṣpadastau no muṁchatamaṁhasaḥ* ॥3॥
*yāvārebhāthe bahu sākamagre pra chedasrāṣṭramabhibhāṁ janeṣu* ।
*yāvasyeśāthe dvipado yau chatuṣpadastau no muṁchatamaṁhasaḥ* ॥4॥
*yayorvadhānnāpapadyate kaśchanāntardeveṣūta mānuṣeṣu* ।
*yāvasyeśāthe dvipado yau chatuṣpadastau no muṁchatamaṁhasaḥ* ॥5॥
*yaḥ kṛtyākṛnmūlakṛd yātudhāno ni tasmin dhattāṁ vajramugrau* ।
*yāvasyeśāthe dvipado yau chatuṣpadastau no muṁchatamaṁhasaḥ* ॥6॥
*adhi no brūtaṁ pṛtanāsūgrau saṁ vajreṇa sṛjataṁ yaḥ kimīdī* ।
*staumi bhavāśarvau nāthito johavīmi tau no muṁchatamaṁhasaḥ* ॥7॥

५. मरुतः (Marutaḥ) - अ. (Av.) ४.२७.१-७

मरुतां मन्वे अधि मे ब्रुवन्तु प्रेमं वाजं वाजसाते अवन्तु ।
आशूनिव सुयमानह्व ऊतये ते नो मुंचन्त्वंहसः ॥१॥

उत्समक्षितं व्यचन्ति ये सदा य आसिंचन्ति रसमोषधीषु ।
पुरो दधे मरुतः पृश्निमातृंस्ते नो मुंचन्त्वंहसः ॥२॥
पयो धेनूनां रसमोषधीनां जवमर्वतां कवयो य इन्वथ ।
शग्मा भवन्तु मरुतो नः स्योनास्ते नो मुंचन्त्वंहसः ॥३॥
अपः समुद्राद् दिवमुद् वहन्ति दिवस्पृथिवीमभि ये सृजन्ति ।
ये अद्भिरीशाना मरुतश्चरन्ति ते नो मुंचन्त्वंहसः ॥४॥
ये कीलालेन तर्पयन्ति ये घृतेन ये वा वयो मेदसा संसृजन्ति ।
ये अद्भिरीशाना मरुतो वर्षयन्ति ते नो मुंचन्त्वंहसः ॥५॥
यदीदिदं मरुतो मारुतेन यदि देवा दैव्येनेदृगार ।
यूयमीशिध्वे वसवस्तस्य निष्कृतेस्ते नो मुंचन्त्वंहसः ॥६॥
तिग्ममनीकं विदितं सहस्वन् मारुतं शर्धः पुतनासूग्रम् ।
स्तौमि मरुतो नाथितो जोहवीमि ते नो मुंचन्त्वंहसः ॥७॥
*marutāṁ manve adhi me bruvantu premaṁ vājaṁ vājasāte avantu /*
*āśūniva suyamānahva ūtaye te no muṁchantvaṁhasaḥ //1 //*
*utsamakṣitaṁ vyachanti ye sadā ya āsiṁchanti rasamoṣadhīṣu /*
*puro dadhe marutaḥ pṛśnimātṛṁste no muṁchantvaṁhasaḥ //2 //*
*payo dhenūnāṁ rasamoṣadhīnāṁ javamarvatāṁ kavayo ya invatha /*
*śagmā bhavantu maruto naḥ syonāste no muṁchantvaṁhasaḥ //3 //*
*apaḥ samudrād divamud vahanti divaspṛthivīmabhi ye sṛjanti /*
*ye adbhirīśānā marutaścharanti te no muṁchantvaṁhasaḥ //4 //*
*ye kīlālena tarpayanti ye ghṛtena ye vā vayo medasā saṁsṛjanti /*
*ye adbhirīśānā maruto varṣayanti te no muṁchantvaṁhasaḥ //5 //*
*yadīdidaṁ maruto mārutena yadi devā daivyenedṛgāra /*
*yūyamīśidhve vasavastasya niṣkṛteste no muṁchantvaṁhasaḥ //6 //*
*tigmamanīkaṁ viditaṁ sahasvan mārutaṁ śardhaḥ putanāsūgram /*
*staumi maruto nāthito johavīmi te no muṁchantvaṁhasaḥ //7 //*

६. मित्रावरुणौ (Mitrāvaruṇau) - अ. (Av.) ४.२९.१-७

मन्वे वां मित्रावरुणावृतावृधौ सचेतसौ द्रुह्वणो या नुदेथे ।
प्र सत्यावानमवथो भरेषु तौ नो मुंचतमंहसः ॥१॥
सचेतसौ द्रुह्मणो यौ नुदेथे प्र सत्यावानमवथो भरेषु ।
यौ गच्छथो नृचक्षसौ बभ्रुणा सुतं तौ नो मुंचतमंहसः ॥२॥
यावंगिरसमवथो यावगस्तिं मित्रावरुणा जमदग्निमत्त्रिम् ।
यौ कश्यपवथो यौ वसिष्ठं तौ नो मुंचतमंहसः ॥३॥
यौ श्यावाश्वमवथो वध्र्यश्वं मित्रावरुणा पुरुमीढमत्त्रिम् ।
यौ विमदमवथः सप्तवध्रिं तौ नो मुंचतमंहसः ॥४॥
यौ भरद्वाजमवथो यौ गविष्ठिरं विश्वामित्रं वरुण मित्र कुत्सम् ।
यौ कक्षीवन्तमवथः प्रोत कण्वं तौ नो मुंचतमंहसः ॥५॥
यौ मेधतिथिमवथो यौ त्रिशोकं मित्रावरुणावुशनां काव्यं यौ ।
यौ गोतममवथः प्रोत मुद्गलं तौ नो मुंचतमंहसः ॥६॥
ययो रथः सत्यवर्त्मर्जुरश्मिर्मिथुया चरन्तमभियाति दूषयन् ।
स्तौमि मित्रावरुणौ नाथितो जोहवीमि तौ नो मुंचतमंहसः ॥७॥
*manve vāṁ mitrāvaruṇāvṛtāvṛdhau sachetasau druhvaṇo yā nudethe /*
*pra satyāvānamavatho bhareṣu tau no muṁchatamaṁhasaḥ //1 //*
*sachetasau druhmaṇo yau nudethe pra satyāvānamavatho bhareṣu /*
*yau gachchhatho nṛchakṣasau babhruṇā sutaṁ tau no muṁchatamaṁhasaḥ //2 //*
*yāvaṁgirasamavatho yāvagasiṁta mitrāvaruṇā jamadagnimattrim /*
*yau kaśyapavatho yau vasiṣṭhaṁ tau no muṁchatamaṁhasaḥ //3 //*
*yau śyāvāśvamavatho vadhyraśvaṁ mitrāvaruṇā purumīḍhamattrim /*
*yau vimadamavathaḥ saptavadhriṁ tau no muṁchatamaṁhasaḥ //4 //*
*yau bharadvājamavatho yau gaviṣṭhiraṁ viśvāmitraṁ varuṇa mitra kutsam /*

*yau kakṣīvantamavathaḥ prota kaṇvaṁ tau no muṁchatamaṁhasaḥ ॥5॥*
*yau medhatithimavatho yau triśokaṁ mitrāvaruṇāvuśanāṁ kāvyaṁ yau ।*
*yau gotamamavathaḥ prota mudgalaṁ tau no muṁchatamaṁhasaḥ ॥6॥*
*yayo rathaḥ satyavartmarjuraśmirmithuyā charantamabhiyāti dūṣayan ।*
*staumi mitrāvaruṇau nāthito johavīmi tau no muṁchatamaṁhasaḥ ॥7॥*

७. वायुसवितारौ (Vāyusavitārau) - अ. (Av.) ४.२५.१-७

वायोः सवितुर्विदथानि मन्महे यावात्मन्वद् विशथो यौ च रक्षथः ।
यौ विश्वस्य परिभू बभूवथुस्तौ नो मुंचतमंहसः ॥१॥
ययोः सङ्ख्याता वरिमा पार्थिवानि याभ्यां रजो युपितमन्तरिक्षे ।
ययोः प्रायं नान्वानशे कश्चन तौ नो मुंचतमंहसः ॥२॥
तव व्रते नि विशन्ते जनासस्त्वय्युदिते प्रेरते चित्रभानो ।
युवं वायो सविता च भुवनानि रक्षथस्तौ मुंचतमंहसः ॥३॥
अपेतो वायो सविता च दुष्कृतमप रक्षांसि शिमिदां च सेधतम् ।
सं ह्यृ३र्जया सृजथः सं बलेन तौ नो मुंचतमंहसः ॥४॥
रयिं मे पोषं सवितोत वायुस्तनू दक्षमा सुवतां सुशेवम् ।
अयक्ष्मतातिं मह इह धत्त तौ नो मुंचतमंहसः ॥५॥
प्र सुमतिं सवितवार्य ऊतये महस्वन्तं मत्सरं मादयाथः ।
अर्वाग् वामस्य प्रवतो नि यच्छतं तौ नो मुंचतमंहसः ॥६॥
उप श्रेष्ठा न आशिषो देवयोर्धामन्नस्थिरन् ।
स्तौमि देवं सवितारं च वायुं तौ नो मुंचतमंहसः ॥७॥
*vāyoḥ saviturvidathāni manmahe yāvātmanvad viśatho yau cha rakṣathaḥ ।*
*yau viśvasya paribhū babhūvathustau no muṁchatamaṁhasaḥ ॥1॥*
*yayoḥ saṅkhyātā varimā pārthivāni yābhyāṁ rajo yupitamantarikṣe ।*
*yayoḥ prāyaṁ nānvānaśe kaśchana tau no muṁchatamaṁhasaḥ ॥2॥*
*tava vrate ni viśante janāsastvayyudite prerate chitrabhāno ।*
*yuvaṁ vāyo savitā cha bhuvanāni rakṣathastau muṁchatamaṁhasaḥ ॥3॥*
*apeto vāyo savitā cha duṣkṛtamapa rakṣāṁsi śimidāṁ cha sedhatam ।*
*saṁ hyṛ3rjayā sṛjathaḥ saṁ balena tau no muṁchatamaṁhasaḥ ॥4॥*
*rayiṁ me poṣaṁ savitota vāyustanū dakṣamā suvatāṁ suśevam ।*
*ayakṣmatātiṁ maha iha dhatta tau no muṁchatamaṁhasaḥ ॥5॥*
*pra sumatiṁ savitavārya ūtaye mahasvantaṁ matsaraṁ mādayāthaḥ ।*
*arvāg vāmasya pravato ni yachchhataṁ tau no muṁchatamaṁhasaḥ ॥6॥*
*upa śreṣṭhā na āśiṣo devayordhāmannasthiran ।*
*staumi devaṁ savitāraṁ cha vāyuṁ tau no muṁchatamaṁhasaḥ ॥7॥*

## ५०४. मृळीको वासिष्ठः (Mṛḷīko Vāsiṣṭhaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १०.१५०.१-५

समिद्धश्चित्समिध्यसे देवेभ्यो हव्यवाहन ।
आदित्यै रुद्रैर्वसुभिर्न आ गहि मृळीकाय न आ गहि ॥१॥
इमं यज्ञमिदं वचो जुजुषाण उपागहि ।
मर्तासस्त्वा समिधान हवामहे मृळीकाय हवामहे ॥२॥
त्वामु जातवेदसं विश्ववारं गृणे धिया ।
अग्ने देवाँ आ वह नः प्रियव्रतान्मृळीकाय प्रियव्रतान् ॥३॥
अग्निर्देवो देवानमभवत्पुरोहितोऽग्निं मनुष्या३ऋषयः समीधिरे ।
अग्निं महो धनसातावहं हुवे मृळीकं धनसातये ॥४॥
अग्निरत्रिं भरद्वाजं गविष्ठिरं प्रावन्नः कण्वं त्रसदस्युमाहवे ।
अग्निं वसिष्ठो हवते पुरोहितो मृळीकाय पुरोहितः ॥५॥
*samiddhaśchitsamidhyase devebhyo havyavāhana ।*
*ādityai rudrairvasubhirna ā gahi mṛḷīkāya na ā gahi ॥1॥*
*imaṁ yajñamidaṁ vacho jujuṣāṇa upāgahi ।*

*martāsastvā samidhāna havāmahe mṛḻīkāya havāmahe //2 //*
*tvāmu jātavedasaṁ viśvavāraṁ gṛṇe dhiyā /*
*agne devām̐ ā vaha naḥ priyavratānmṛḻīkāya priyavratān //3 //*
*agnirdevo devānamabhavatpurohito'gniṁ manuṣyā3kraṣayaḥ samīdhire /*
*agiṁna maho dhanasātāvahaṁ huve mṛḻīkaṁ dhanasātaye //4 //*
*agniratriṁ bharadvājaṁ gaviṣṭhiraṁ prāvannaḥ kaṇvaṁ trasadasyumāhave /*
*agiṁna vasiṣṭho havate purohito mṛḻīkāya purohitaḥ //5 //*

२. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.९७.२५-२७

अर्वाँ इव श्रवसे सातिमच्छेन्द्रस्य वायोरभि वीतिमर्ष ।
स नः सहस्रा बृहतीरिषो दा भवा सोम द्रविणोवित्पुनानः ॥२५॥
देवाव्यो नः परिषिच्यमानाः क्षयं सुवीरं धन्वन्तु सोमाः ।
आयज्यवः सुमतिं विश्ववारा होतारो न दिवियजो मन्द्रतमाः ॥२६॥
एवा देव देवताते पवस्व महे सोम प्सरसे देवपानः ।
महश्चिद्धि ष्मसि हिताः समर्ये कृधि सुष्ठाने रोदसी पुनानः ॥२७॥
*arvām̐ iva śravase sātimachchhendrasya vāyorabhi vītimarṣa /*
*sa naḥ sahasrā bṛhatīriṣo dā bhavā soma draviṇovitpunānaḥ //25 //*
*devāvyo naḥ pariṣichyamānāḥ kṣayaṁ suvīraṁ dhanvantu somāḥ /*
*āyajyavaḥ sumatiṁ viśvavārā hotāro na diviyajo mandratamāḥ //26 //*
*evā deva devatāte pavasva mahe soma psarase devapānaḥ /*
*mahaśchiddhi ṣmasi hitāḥ samarye kṛdhi suṣṭhāne rodasī punānaḥ //27 //*

## ५०५. मेधः (Medhaḥ)

१. वैश्वानरः (Vaiśvānaraḥ) - य. (Yv.) ३३.९२

दिवि पृष्टो अरोचताग्निर्वैश्वानरो बृहन् ।
क्ष्मया वृधानऽओजसा चनोहितो ज्योतिषा बाधते तमः ॥९२॥
*divi pṛṣṭo arochatāgnirvaiśvānaro bṛhan /*
*kṣamayā vṛdhāna'ojasā chanohito jyotiṣā bādhate tamaḥ //92 //*

## ५०६. मेधाकामः (Medhākāmaḥ)

१. इन्द्रः (Indraḥ) - य. (Yv.) ३२.१३

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्। सनिं मेधामयासिषं स्वहा ॥१३॥
*sadasaspatimadbhutaṁ priyamindrasya kāmyam / saniṁ medhāmayāsiṣaṁ svahā //13 //*

२. परमात्मा (Paramātmā) - य. (Yv.) ३२.१४

यां मेधां देवगणाः पितरश्चोपासते। तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा ॥१४॥
*yāṁ medhāṁ devagaṇāḥ pitaraśchopāsate / tayā māmadya medhayāgne medhāvinaṁ kuru svāhā //14 //*

३. परमेश्वर-विद्वांसौ (Parameśvara-Vidvāṁsau) - य. (Yv.) ३२.१५

मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः।
मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ॥१५॥
*medhāṁ me varuṇo dadātu medhāmagniḥ prajāpatiḥ /*
*medhāmindraścha vāyuścha medhāṁ dhātā dadātu me svāhā //15 //*

## ५०७. मेधातिथिः (Medhātithiḥ)

१. अग्निः (Agniḥ) - य. (Yv.) १७.२-७; ९; ३३.१०

य. (Yv.) १७.२-७

इमा मेऽअग्नऽइष्टका धेनवः सन्त्वेका व दश च दश च शतं च शतं च सहस्रं च सहस्रं चायुतं चायुतं च नियुतं च नियुतं च प्रयुतं चार्बुदं च न्यर्बुदं च समुद्रश्च मध्यं चान्तश्च परार्द्धश्चैता मेऽअग्नऽइष्टका धेनवः सन्त्वमुत्रामुष्मिँल्लोके ॥२॥
ऋतव स्थऽऋतावृधऽऋतुष्ठा स्थऽऋतावृधः ।

घृतश्च्युतो मधुश्च्युतो विराजो नाम कामदुघाऽअक्षीयमाणाः ॥३॥
समुद्रस्य त्वावकयाग्ने परि व्ययामसि। पावकोऽअस्मभ्यं यिशवो भव ॥४॥
हिमस्य त्वा जरायुणाग्ने परि व्ययामसि। पावकोऽअस्मभ्यं शिवो भव ॥५॥
उप ज्मन्नुप वेतसेऽवतर नदीष्वा। अग्ने पित्तमपामसि मण्डूकि ताभिरागहि सेमं नो यज्ञं पावकवर्णं शिवं कृधि ॥६॥
अपामिदं न्ययनं समुद्रस्य निवेशनम् ।
आन्याँस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यं शिवो भव ॥७॥
*imā me'agna'iṣṭakā dhenavaḥ santvekā va daśa cha daśa cha śataṁ cha śataṁ cha sahasraṁ cha sahasraṁ chāyutaṁ chāyutaṁ cha niyutaṁ cha niyutaṁ cha prayutaṁ chārbudaṁ cha nyarbudaṁ cha samudraścha madhyaṁ chāntaścha parārddhaśchaitā me'agna'iṣṭakā dhenavaḥ santvamutrāmuṣmiṁlloke ॥2॥*
*ṛtava stha'ṛtāvṛdha'ṛtuṣṭhā stha'ṛtāvṛdhaḥ ।*
*ghṛtaśchyuto madhuśchyuto virājo nāma kāmadughā'akṣīyamāṇāḥ ॥3॥*
*samudrasya tvāvakayāgne pari vyayāmasi । pāvako'asmabhyaṁ yiśavo bhava ॥4॥*
*himasya tvā jarāyuṇāgne pari vyayāmasi । pāvako'asmabhyaṁ śivo bhava ॥5॥*
*upa jmannupa vetase'vatara nadīṣvā । agne pittamapāmasi maṇḍūki tābhirāgahi semaṁ no yajñaṁ pāvakavarṇaṁ śivaṁ kṛdhi ॥6॥*
*apāmidaṁ nyayanaṁ samudrasya niveśanam ।*
*ānyāṁste'asmattapantu hetayaḥ pāvako'asmabhyaṁ śivo bhava ॥7॥*

य. (Yv.) १७.९

स नः पावक दीदिवोऽग्ने देवाँ२ऽइहावह। उप यज्ञं हविश्च नः ॥९॥
*sa naḥ pāvaka dīdivo'gne devāṁ2'ihāvaha । upa yajñaṁ haviścha naḥ ॥9॥*

य. (Yv.) ३३.१०

विश्वेभिः सोम्यं मध्वग्नऽइन्द्रेण वायुना। पिबा मित्रस्य धामभिः ॥१०॥
*viśvebhiḥ somyaṁ madhvagna'indreṇa vāyunā । pibā mitrasya dhāmabhiḥ ॥10॥*

२. अग्नाविष्णू (Agnāviṣṇū) - अ. (Av.) ७.२९.१-२

अग्नाविष्णू महि तद् वां महित्वं पाथो घृतस्य गुह्यस्य नाम ।
दमेदमे सप्त रत्ना दधानौ प्रति वां जिह्वा घृतमा चरण्यात् ॥१॥
अग्नाविष्णू महि धाम प्रियं वां वीथो घृतस्य गुह्या जुषाणौ ।
दमेदमे सुष्टुत्या वावृधानौ प्रति वां जिह्वा घृतमुच्चरण्यात् ॥२॥
*agnāviṣṇū mahi tad vāṁ mahitvaṁ pātho ghṛtasya guhyasya nāma ।*
*damedame sapta ratnā dadhānau prati vāṁ jihvā ghṛtamā charaṇyāt ॥1॥*
*agnāviṣṇū mahi dhāma priyaṁ vāṁ vītho ghṛtasya guhyā juṣāṇau ।*
*damedame suṣṭutyā vāvṛdhānau prati vāṁ jihvā ghṛtamuchcharaṇyāt ॥2॥*

३. अश्विनौ (Aśvinau) - य. (Yv.) ७.११

या वां कशा मधुमत्यश्विना सूनृतावती। तया यज्ञं मिमिक्षतम् ।
उपयामगृहीतोऽस्यश्विभ्यां त्वैष ते योनिर्माध्वीभ्यां त्वा ॥११॥
*yā vāṁ kaśā madhumatyaśvinā sūnṛtāvatī । tayā yajñaṁ mimikṣatam ।*
*upayāmagṛhīto'syaśvibhyāṁ tvaiṣa te yonirmādhvībhyāṁ tvā ॥11॥*

४. आपः (Āpaḥ) - य. (Yv.) ६.१०; १३

य. (Yv.) ६.१०

अपां पेरुरस्यापो देवीः स्वदन्तु स्वात्तं चित्सद्देवहविः ।
सं ते प्राणो वातेन गच्छतां समंगाानि यजत्रैः सं यज्ञपतिराशिषा ॥१०॥
देवीरापः शुद्धा वोड्ढं सुपरिविष्टा देवेषु सुपरिविष्टावयं परिवेष्टारो भूयास्म ॥१३॥
*apāṁ perurasyāpo devīḥ svadantu svāttaṁ chitsaddevahaviḥ ।*
*saṁ te prāṇo vātena gachchhatāṁ samaṁgāāni yajatraiḥ saṁ yajñapatirāśiṣā ॥10॥*
*devīrāpaḥ śuddhā voḍḍhvaṁ supariviṣṭā deveṣu supariviṣṭāvayaṁ pariveṣṭāro bhūyāsma ॥13॥*

५. इडा (Iḍā) - अ. (Av.) ७.२७.१

इडैवास्माँ अनु वस्तां व्रतेन यस्याः पदे पुनते देवयन्तः ।
घृतपदी शक्वरी सोमपृष्ठोप यज्ञमस्थित वैश्वदेवी ॥१॥
*iḍaivāsmām̐ anu vastāṁ vratena yasyāḥ pade punate devayantaḥ ।*
*ghṛtapadī śakvarī somapṛṣṭhopa yajñamasthita vaiśvadevī ॥1॥*

६. इन्द्रवायू (Indravāyū) - य. (Yv.) ३३.४५

इन्द्रवायू बृहस्पतिं मित्राग्निं पूषणं भगम्। आदित्यान्मारुतं गणम् ॥४५॥
*indravāyū bṛhaspatiṁ mitrāgiṁna pūṣaṇaṁ bhagam । ādityānmārutaṁ gaṇam ॥45॥*

७. त्वष्टा (Tvaṣṭā) - य. (Yv.) ६.७

उपावीरस्युप देवान्दैवीर्विशः प्रागुरुशिजो वह्नितमान्।
देव त्वष्टर्वसु रम हव्या ते स्वदन्ताम्॥७॥
*upāvīrasyupa devāndaivīrviśaḥ prāguruśijo vahnitamān ।*
*deva tvaṣṭarvasu rama havyā te svadantām ॥7॥*

८. दम्पती (Dampatī) - य. (Yv.) ८.३२

मही द्यौः पृथिवी च नऽइमं यज्ञं मिमिक्षताम्। पिपृतां नो भरीमभिः ॥३२॥
*mahī dyauḥ pṛthivī cha na'imaṁ yajñaṁ mimikṣatām । pipṛtāṁ no bharīmabhiḥ ॥32॥*

९. द्यावापृथिवी (Dyāvāpṛthivī) - य. (Yv.) ६.१६

रक्षसां भागोऽसि निरस्तं रक्षऽइदमहं रक्षोऽभितिष्ठामीदमहं रक्षोऽववबाधऽइदमहं रक्षोऽधमं तमो नयामि। घृतेन द्यावापृथिवी प्रार्णुवाथां वायो वे स्तोकानामग्निराज्यस्य वेतु स्वाहा स्वाहाकृतेऽऊर्ध्वनभसं मारुतं गच्छतम् ॥१६॥
*rakṣasāṁ bhāgo'si nirastaṁ rakṣa'idamahaṁ rakṣo'bhitiṣṭhāmīdamahaṁ rakṣo'vavabādha'idamahaṁ rakṣo'dhamaṁ tamo nayāmi । ghṛtena dyāvāpṛthivī prārṇuvāthāṁ vāyo ve stokānāmagnirājyasya vetu svāhā svāhākṛte'ūrdhvanabhasaṁ mārutaṁ gachchhatam ॥16॥*

१०. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.२.१-१०

पवस्व देववीरति पवित्रं सोम रंह्या। इन्द्रमिन्दो वृषा विश ॥१॥
आ वच्यस्व महि प्सरो वृषेन्दो द्युम्नवत्तमः। आ योनिं धर्णसिः सदः ॥२॥
अधुक्षत प्रियं मधु धारा सुतस्य वेधसः। अपो वसिष्ट सुक्रतुः ॥३॥
महान्तं त्वा महीरन्वापो अर्षन्ति सिन्धवः। यद्गोभिर्वासयिष्यसे ॥४॥
समुद्रो अप्सु मामृजे विष्टम्भे धरुणो दिवः। सोमः पवित्रे अस्मयुः ॥५॥
अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः। सं सूर्येण रोचते ॥६॥
गिरस्त इन्द ओजसा मर्मृज्यन्ते अपस्युवः। याभिर्मदाय शुम्भसे ॥७॥
तं त्वा मदाय घृष्वय उ लोककृत्नुमीमहे। तव प्रशस्तयो महीः ॥८॥
अस्मभ्यमिन्दविन्द्रयुर्मध्वः पवस्व धारया। पर्जन्यो वृष्टिमाँ इव ॥९॥
गोषा इन्दो नृषा अस्यश्वसा वाजसा उत। आत्मा यज्ञस्य पूर्व्यः ॥१०॥
*pavasva devavīrati pavitraṁ soma raṁhyā । indramindo vṛṣā viśa ॥1॥*
*ā vachyasva mahi psaro vṛṣendo dyumnavattamaḥ । ā yoni dharṇasiḥ sadaḥ ॥2॥*
*adhukṣata priyaṁ madhu dhārā sutasya vedhasaḥ । apo vasiṣṭa sukratuḥ ॥3॥*
*mahāntaṁ tvā mahīranvāpo arṣanti sindhavaḥ । yadgobhirvāsayiṣyase ॥4॥*
*samudro apsu māmṛje viṣṭmbhe dharuṇo divaḥ । somaḥ pavitre asmayuḥ ॥5॥*
*achikradadvṛṣā harirmahānmitro na darśataḥ । saṁ sūryeṇa rochate ॥6॥*
*girasta inda ojasā marmṛjyante apasyuvaḥ । yābhirmadāya śumbhase ॥7॥*
*taṁ tvā madāya ghṛṣvaya u lokakṛtnumīmahe । tava praśastayo mahīḥ ॥8॥*
*asmabhyamindavindrayurmadhvaḥ pavasva dhārayā । parjanyo vṛṣṭimām̐ iva ॥9॥*
*goṣā indo nṛṣā asyaśvasā vājasā uta । ātmā yajñasya pūrvyaḥ ॥10॥*

११. पृथिवी (Pṛthivī) - य. (Yv.) ३५.२१; ३६.१३

य. (Yv.) ३५.२१

स्योना पृथिवी नो भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः। अप नः शोशुचदघम् ॥२१॥
*syonā pṛthivī no bhavānṛkṣarā niveśanī । yachchhā naḥ śarma saprathāḥ । apa naḥ śośuchadagham ॥21॥*

य. (Yv.) ३६.१३

स्योना पृथिवी नो भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः ॥१३॥
*syonā pṛthivī no bhavānṛkṣarā niveśanī / yachchhā naḥ śarma saprathāḥ //13 //*

१२. बृहस्पतिः (Bṛhaspatiḥ) - य. (Yv.) ३.२९

यो रेवान् योऽअमीवहा वसुवित् पुष्टि वर्द्धनः। स नः सिषक्तु यस्तुरः ॥२९॥
*yo revān yo'amīvahā vasuvit puṣṭi varddhanaḥ / sa naḥ siṣaktu yasturaḥ //29 //*

१३. मरुतः (Marutaḥ) - य. (Yv.) १७.१

अश्मन्नूर्जं पर्वते शिश्रियाणामद्भ्यऽओषधीभ्यो वनस्पतिभ्योऽअधि सम्भृतं पयः। तां नऽइषमूर्ज धत्त मरुतः संरराणाऽअश्मँस्ते क्षुन् मयि तऽऊर्ग्यं द्विष्मस्तं ते शुगृच्छतु ॥१॥
*aśmannūrjaṁ parvate śiśriyāṇāmadbhya'oṣadhībhyo vanaspatibhyo'adhi sambhṛtaṁ payaḥ / tāṁ na'iṣamūrja dhatta marutaḥ saṁrarāṇā'aśmaṁ̐ste kṣun mayi ta'ūrgyaṁ dviṣmastaṁ te śugṛchchhatu //1 //*

१४. महेन्द्रः (Mahendraḥ) - य. (Yv.) ३३.९७

अस्येदिन्द्रो वावृधे वृष्ण्यँ शवो मदे सुतस्य विष्णवि। अद्या तमस्य महिमानमायवोऽनु ष्टुवन्ति पूर्वथा पूर्वथा। इमाऽउ त्वा। यस्यायम्। अयं सहस्रम्। ऊर्ध्वऽऊ षु णः ॥९७॥
*asyedindro vāvṛdhe vṛṣṇyaṁ̐ śavo made sutasya viṣṇavi / adyā tamasya mahimānamāyavo'nu ṣṭuvanti pūrvathā pūrvathā / imā'u tvā / yasyāyam / ayaṁ sahasram / ūrdhva'ū ṣu ṇaḥ //97 //*

१५. वरुणाः (Varuṇāḥ) - य. (Yv.) ३३.४६

वरुणः प्राविता भुवन्मित्रो विश्वभिरूतिभिः। कारतां नः सुराधसः ॥४६॥
*varuṇaḥ prāvitā bhuvanmitro viśvabhirūtibhiḥ / kāratāṁ naḥ surādhasaḥ //46 //*

१६. वातः (Vātaḥ) - य. (Yv.) ६.११-१२; १४-१५

य. (Yv.) ६.११-१२

घृतेनाक्तौ पशूँस्त्रायेथां रेवति यजमाने प्रियं धा आ विश ।
उरोरन्तरिक्षात्सजूर्देवेन वातेनास्य हविषस्त्मना यज समस्य तन्वा भव ।
वर्षो वर्षीयासि यज्ञे यज्ञपतिं धाः स्वाहा देवेभ्यो देवेभ्यः स्वाहा ॥११॥
महिर्भूर्मा पृदाकुर्नमस्त आतानानर्वा प्रेहि। घृतस्य कुल्या उप ऋतस्य पथ्या अनु ॥१२॥
*ghṛtenāktau paśūṁ̐strāyethāṁ revati yajamāne priyaṁ dhā ā viśa /*
*urorantarikṣātsajūrdevena vātenāsya haviṣastmanā yaja samasya tanvā bhava /*
*varṣo varṣīyāsi yajñe yajñapatiṁ dhāḥ svāhā devebhyo devebhyaḥ svāhā //11 //*
*mahirbhūrmā pṛdākurnamasta ātānānarvā prehi /*
*ghṛtasya kulyā upa ṛtasya pathyā anu //12 //*

य. (Yv.) ६.१४-१५

वाचं ते शुन्धामि प्राणं ते शुन्धामि चक्षुस्ते शुन्धामि श्रोत्रं ते शुन्धामि नाभि ते शुन्धामि मेढ्रं ते शुन्धामि पायुं ते शुन्धामि चरित्राँस्ते शुन्धामि ॥१४॥
मनस्त आ प्यायतां वाक्त आ प्यायतां प्राणस्त आ प्यायतां चक्षुस्त आ प्यायतां श्रोत्रं त आ प्यायताम्। यत्ते क्रूरं यदास्थितं तत्तं आ प्यायतां निष्ट्यायतां तत्ते शुध्यतु शमहोभ्यः। ओषधे त्रायस्व स्वधिते मैनं हिंसीः ॥१५॥
*vāchaṁ te śundhāmi prāṇaṁ te śundhāmi chakṣuste śundhāmi śrotraṁ te śundhāmi nābhi te śundhāmi meḍhraṁ te śundhāmi pāyuṁ te śundhāmi charitrāṁ̐ste śundhāmi //14 //*
*manasta ā pyāyatāṁ vākta ā pyāyatāṁ prāṇasta ā pyāyatāṁ chakṣusta ā pyāyatāṁ śrotraṁ ta ā pyāyatām / yatte krūraṁ yadāsthitaṁ tattaṁ ā pyāyatāṁ niṣṭyāyatāṁ tatte śudhyatu śamahobhyaḥ / oṣadhe trāyasva svadhite mainaṁ hiṁsīḥ //15 //*

१७. विद्वान् (Vidvān) - य. (Yv.) २६.२०-२१; २३

य. (Yv.) २६.२०-२१

अग्ने पत्नीरिहा वह देवानामुशतीरुप। त्वष्टारं सोमपीतये ॥२०॥
अभि यज्ञं गृणीहि नो ग्रावो नेष्टः पिब ऋतुना। त्वं हि रत्नधा असि ॥२१॥

*agne patnīrihā vaha devānāmuśatīrupa । tvaṣṭāraṁ somapītaye ॥20 ॥*
*abhi yajñaṁ gṛṇīhi no gnāvo neṣṭaḥ piba ṛtunā । tvaṁ hi ratnadhā asi ॥21 ॥*

य. (Yv.) २६.२३

तवायं सोमस्त्वमेह्यर्वाङ् शश्वत्तमं सुमना अस्य पाहि ।
अस्मिन् यज्ञे बर्हिष्या निषद्या दधिष्वेमं जठर इन्दुमिन्द्र ॥२३ ॥
*tavāyaṁ somastvamehyarvāṅ śaśvattamaṁ sumanā asya pāhi ।*
*asmin yajñe barhiṣyā niṣadyā dadhiṣvemaṁ jaṭhara indumindra ॥23 ॥*

१८. विद्वांसः (Vidvāṁsaḥ) - य. (Yv.) ५.१५

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पांसुरे स्वाहा ॥१५॥
*idaṁ viṣṇurvichakrame tredhā nidadhe padam । samūḍhamasya pāṁsure svāhā ॥15 ॥*

१९. विभिन्दोर् दानस्तुतिः (Vibhindor Dānastutiḥ) - ऋ. (Rv.) ८.२.४१-४२

शिक्षा विभिन्दो अस्मै चत्वार्ययुता ददत्। अष्टा परः सहस्रा ॥४१॥
उत सु त्ये पयोवृधा माकी रणस्य नप्त्या। जनित्वनाय मामहे ॥४२॥
*śikṣā vibhindo asmai chatvāryayutā dadat । aṣṭā paraḥ sahasrā ॥41 ॥*
*uta su tye payovṛdhā mākī raṇasya naptyā । janitvanāya māmahe ॥42 ॥*

२०. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.) ३३.८१-८३

इमाऽउ त्वा पुरूवसो गिरो वर्द्धन्तु या मम ।
पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥८१॥
यस्यायं विश्वऽआर्यो दासः शेवधिपाऽअरिः ।
तिरश्चिदर्य्ये रुशमे पवीरवि तुभ्येत्सोऽअज्यते रयिः ॥८२॥
अयं सहस्रमृषिभिः सहस्कृतः समुद्रऽइव पप्रथे ।
सत्यः सोऽअस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ॥८३॥
*imā'u tvā purūvaso giro varddhantu yā mama ।*
*pāvakavarṇāḥ śuchayo vipaśchito'bhi stomairanūṣata ॥81 ॥*
*yasyāyaṁ viśva'āryo dāsaḥ śevadhipā'ariḥ ।*
*tiraśchidaryye ruśame pavīravi tubhyetso'ajyate rayiḥ ॥82 ॥*
*ayaṁ sahasramṛṣibhiḥ sahaskṛtaḥ samudra'iva paprathe ।*
*satyaḥ so'asya mahimā gṛṇe śavo yajñeṣu viprarājye ॥83 ॥*

२१. विष्णुः (Viṣṇuḥ) - अ. (Av.) ७.२५.१-२; ७.२६.१-८

अ. (Av.) ७.२५.१-२

ययोरोजसा स्कभिता रजांसि यौ वीर्यै र्वीरतमा शविष्ठा ।
यौ पत्येते अप्रतीतौ सहोभिर्विष्णुमगन् वरुणं पूर्वहूतिः ॥१॥
यस्येदं प्रदिशि यद् विरोचते प्र चानति वि च चष्टे शचीभिः पुरा देवस्य धर्मणा सहोभिर्विष्णुमगन् वरुणं पूर्वहूतिः ॥२॥
*yayorojasā skabhitā rajāṁsi yau vīryai rvīratamā śaviṣṭhā ।*
*yau patyete apratītau sahobhirviṣṇumagan varuṇaṁ pūrvahūtiḥ ॥1 ॥*
*yasyedaṁ pradiśi yad virochate pra chānati vi cha chaṣṭe śachībhiḥ purā devasya dharmaṇā sahobhirviṣṇumagan varuṇaṁ pūrvahūtiḥ ॥2 ॥*

अ. (Av.) ७.२६.१-८

विष्णोर्नु कं प्रा वोचं वीर्याणि यः पार्थिवानि विममे रजांसि ।
यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः ॥१॥
प्र तद् विष्णु स्तवते वीर्या णि मृगो न भीमः कुचरो गिरिष्ठाः ।
परावत आ जगम्यात् परस्याः ॥२॥
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ।
उरु विष्णो वि क्रमस्वोरु क्षयाय नस्कृधि । घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर ॥३॥
इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदा । समूढमस्य पांसुरे ॥४॥
त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः । इतो धर्माणि धारयन् ॥५॥

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ॥६॥
तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिविव चक्षुराततम् ॥७॥
दिवो विष्ण उत वा पृथिव्या मही विष्ण उरोरन्तरिक्षात् ।
हस्तौ पृणस्व बहुभिर्वसव्यैराप्रयच्छ दक्षिणादोत सव्यात् ॥८॥
*viṣṇornu kaṁ prā vochaṁ vīryāṇi yaḥ pārthivāni vimame rajāṁsi /*
*yo askabhāyaduttaraṁ sadhasthaṁ vichakramāṇastredhorugāyaḥ //1 //*
*pra tad viṣṇu stavate vīryā ṇi mṛgo na bhīmaḥ kucharo giriṣṭhāḥ /*
*parāvata ā jagamyāt parasyāḥ //2 //*
*yasyoruṣu triṣu vikramaṇeṣvadhikṣiyanti bhuvanāni viśvā /*
*uru viṣṇo vi kramasvoru kṣayāya naskṛdhi /*
*ghṛtaṁ ghṛtayone piba prapra yajñapatiṁ tira //3 //*
*idaṁ viṣṇurvi chakrame tredhā ni dadhe padā / samūḍhamasya pāṁsure //4 //*
*trīṇi padā vi chakrame viṣṇurgopā adābhyaḥ / ito dharmāṇi dhārayan //5 //*
*viṣṇoḥ karmāṇi paśyata yato vratāni paspaśe / indrasya yujyaḥ sakhā //6 //*
*tad viṣṇoḥ paramaṁ padaṁ sadā paśyanti sūrayaḥ / diviva chakṣurātatam //7 //*
*divo viṣṇa uta vā pṛthivyā mahī viṣṇa urorantarikṣāt /*
*hastau pṛṇasva bahubhirvasavyairāprayachchha dakṣiṇādota savyāt //8 //*

२२. वेदः (Vedaḥ) - य. (Yv.) ६.४-५; ५.१५; अ. (Av.) ७.२८.१

य. (Yv.) ६.४-५

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यः सखा ॥४॥
तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम् ॥५॥
*viṣṇoḥ karmāṇi paśyata yato vratāni paspaśe / indrasya yujyaḥ sakhā //4 //*
*tadviṣṇoḥ paramaṁ padaṁ sadā paśyanti sūrayaḥ / divīva chakṣurātatam //5 //*

य. (Yv.) ५.१५

इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्। समूढमस्य पांसुरे स्वाहा ॥१५॥
*idaṁ viṣṇurvi chakrame tredhā ni dadhe padam / samūḍhamasya pāṁsure svāhā //15 //*

अ. (Av.) ७.२८.१

वेदः स्वस्तिर्द्रुघणः स्वसितः परशुर्वेदिः परर्शुर्नः स्वस्ति ।
हविष्कृतो यज्ञिया यज्ञकामास्ते देवासो यज्ञमिमं जुषन्ताम् ॥१॥
*vedaḥ svastirdrughaṇaḥ svasitaḥ paraśurvediḥ pararśurnaḥ svasti /*
*haviṣkṛto yajñiyā yajñakāmāste devāso yajñamimaṁ juṣantām //1 //*

२३. सविता (Savitā) - य. (Yv.) २२.१०; ३०.४

य. (Yv.) २२.१०

हिरण्यपाणिमूतये सवितारमुप ह्वये। स चेत्ता देवता पदम् ॥१०॥
*hiraṇyapāṇimūtaye savitāramupa hvaye / sa chettā devatā padam //10 //*

य. (Yv.) ३०.४

विभक्तारं हवामहे वसोश्चित्रस्य राधसः। सवितारं नृचक्षसम् ॥४॥
*vibhaktāraṁ havāmahe vasośchitrasya rādhasaḥ / savitāraṁ nṛchakṣasam //4 //*

२४. सोमः (Somaḥ) - य. (Yv.) २६.२२

द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत। नेष्ट्राहृतुभिरिष्यत ॥२२॥
*draviṇodāḥ pipīṣati juhota pra cha tiṣṭhata / neṣṭrādṛtubhiriṣyata //22 //*

**५०८. मेधातिथिः काण्वः (Medhātithiḥ Kāṇvaḥ)**

१. अग्निः (Agniḥ) - ऋ. (Rv.) १.१२.१-१२; १.१५.१२; १.२२.९; १०; १.२३.२३-२४; सा. (Sv.) ३; १६; ३२; ७९०-७९२; ८४४-८४६

ऋ. (Rv.) १.१२.१-१२

अग्निं दूतं वृणीमहे होतारं विश्ववेदसम्। अस्य यज्ञस्य सुक्रतुम् ॥१॥
अग्निमग्निं हवीमभिः सदा हवन्त विश्पतिम्। हव्यवाहं पुरुप्रियम् ॥२॥

अग्ने देवाँ इहा वह जज्ञानो वृक्रबर्हिषे। असि होता न ईड्यः ॥३॥
ताँ उशतो वि बोधय यदग्ने यासि दूत्यम्। देवैरा सत्सि बर्हिषि ॥४॥
घृताहवन दीदिवः प्रति ष्म रिषतो दह। अग्ने त्वं रक्षस्विनः ॥५॥
अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा। अव्यवाड् जुह्वास्यः ॥६॥
कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे। देवममीवचातनम् ॥७॥
यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति। तस्य स्म प्राविता भव ॥८॥
यो अग्निं देववीतये हविष्माँ आविवासति। तस्मै पावक मृळय ॥९॥
स नः पावक दीदिवोऽग्ने देवाँ इहा वह। उप यज्ञं हविश्च नः ॥१०॥
स नः स्तवान आ भर गायत्रेण नवीयसा। रयिं वीरवतीमिषम् ॥११॥
अग्ने शुक्रेण शोचिषा विश्वाभिर्देवहूतिभिः। इमं स्तोमं जुषस्व नः ॥१२॥
*agimna dūtaṁ vṛṇīmahe hotāraṁ viśvavedasam | asya yajñasya sukratum ||1||*
*agnimagimna havīmabhi5 sadā havanta viśpatim | havyavāhaṁ purupriyam ||2||*
*agne devām̐ ihā vaha jajñāno vṛkrabarhiṣe | asi hotā na īḍyaḥ ||3||*
*tām̐ uśato vi bodhaya yadagne yāsi dūtyam | devairā satsi barhiṣi ||4||*
*ghṛtāhavana dīdivaḥ prati ṣma riṣato daha | agne tvaṁ rakṣasvinaḥ ||5||*
*agnināgniḥ samidhyate kavirgṛhapatiryuvā | avyavāḍ juhvāsyaḥ ||6||*
*kavimagnimupa stuhi satyadharmāṇamadhvare | devamamīvachātanam ||7||*
*yastvāmagne haviṣpatirdūtaṁ deva saparyati | tasya sma prāvitā bhava ||8||*
*yo agimna devavītaye haviṣmām̐ āvivāsati | tasmai pāvaka mṛḷaya ||9||*
*sa naḥ pāvaka dīdivo'gne devām̐ ihā vaha | upa yajñaṁ haviścha naḥ ||10||*
*sa naḥ stavāna ā bhara gāyatreṇa navīyasā | rayiṁ vīravatīmiṣam ||11||*
*agne śukreṇa śochiṣā viśvābhirdevahūtibhiḥ | imaṁ stomaṁ juṣasva naḥ ||12||*

ऋ. (Rv.) १.१५.१२

गार्हपत्येन सन्त्य ऋतुना यज्ञनीरसि। देवान् देवयते यज ॥१२॥
*gārhapatyena santya ṛtunā yajñanīrasi | devān devayate yaja ||12||*

ऋ. (Rv.) १.२२.९-१०

अग्ने पत्नीरिहा वह देवानामुशतीरुप। त्वष्टारं सोमपीतये ॥९॥
आ ग्ना अग्न इहावसे होत्रां यविष्ठ भारतीम्। वरूत्रीं धिषणां वह ॥१०॥
*agne patnīrihā vaha devānāmuśatīrupa | tvaṣṭāraṁ somapītaye ||9||*
*ā gnā agna ihāvase hotrāṁ yaviṣṭha bhāratīm | varūtrīṁ dhiṣaṇāṁ vaha ||10||*

ऋ. (Rv.) १.२३.२३-२४

आपो अद्यान्वचारिषं रसेन समगस्महि। पयस्वानग्न आ गहि तं मा सं सृज वर्चसा ॥२३॥
सं माग्ने वर्चसा सृज सं प्रजया समायुषा। विद्युर्मे अस्य देवा इन्द्रो विद्यात्सह ऋषिभिः ॥२४॥
*āpo adyāānvachāriṣaṁ rasena samagasmahi |*
*payasvānagna ā gahi taṁ mā saṁ sṛja varchasā ||23||*
*saṁ māgne varchasā sṛja saṁ prajayā samāyuṣā |*
*vidyurme asya devā indro vidyātsaha ṛṣibhiḥ ||24||*

सा. (Sv.) ३

अग्निं दूतं वृणीमहे होतारं विश्ववेदसम्। अस्य यज्ञस्य सुक्रतुम् ॥३॥
*agniṁ dūtaṁ vṛṇīmahe hotāraṁ viśvavedasam | asya yajñasya sukratum ||3||*

सा. (Sv.) १६

प्रति त्यं चारुमध्वरं गोपीथाय प्र हूयसे। मरुद्भिरग्न आ गहि ॥६॥
*prati tyaṁ chārumadhvaraṁ gopīthāya pra hūyase | marudbhiragna ā gahi ||6||*

सा. (Sv.) ३२

कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे। देवममीवचातनम् ॥१२॥
*kavimagnimupa stuhi satyadharmāṇamadhvare | devamamīvachātanam ||12||*

सा. (Sv.) ७९०-७९२

अग्निं दूतं वृणीमहे होतारं विश्ववेदसम्। अस्य यज्ञस्य सुक्रतुम् ॥१॥
अग्निमग्निं हवीमभिः सदा हवन्त विश्पतिम्। हव्यवाहं पुरुप्रियम् ॥२॥

अग्ने देवाँ इहा वह जज्ञानो वृक्तबर्हिषे। असि होता न ईड्यः ॥३॥
*agniṁ dūtaṁ vṛṇīmahe hotāraṁ viśvavedasam । asya yajñasya sukratum ॥1॥*
*agnimagniṁ havīmabhiḥ sadā havanta viśpatim । havyavāhaṁ purupriyam ॥2॥*
*agne devām̐ ihā vaha jajñāno vṛktabarhiṣe । asi hotā na īḍyaḥ ॥3॥*

सा. (Sv.) ८४४-८४६

अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा। हव्यवाड् जुह्वास्य ॥१॥
यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति। तस्य स्म प्राविता भव ॥२॥
यो अग्निं देववीतये हविष्माँ आविवासति। तस्मै पावक मृडय ॥३॥
*agnināgniḥ samidhyate kavirgṛhapatiryuvā । havyavāḍ juhvāsya ॥1॥*
*yastvāmagne haviṣpatirdūtaṁ deva saparyati । tasya sma prāvitā bhava ॥2॥*
*yo agniṁ devavītaye haviṣmām̐ āvivāsati । tasmai pāvaka mṛḍaya ॥3॥*

२. अग्नि मरुतश्च (Agni Marutaścha) - ऋ. (Rv.) १.१९.१-९

प्रति त्यं चारुमध्वरं गोपीथाय प्र हूयसे। मरुद्भिरग्न आ गहि ॥१॥
नहि देवो न मर्त्यो महस्तव क्रतुं परः। मरुद्भिरग्न आ गहि ॥२॥
ये महो रजसो विदुर्विश्वे देवासो अद्रुहः। मरुद्भिरग्न आ गहि ॥३॥
य उग्रा अर्कमानृचुरनाधृष्टास ओजसा। मरुद्भिरग्न आ गहि ॥४॥
ये शुभ्रा घोरवर्पसः सुक्षत्रासो रिशादसः। मरुद्भिरग्न आ गहि ॥५॥
ये नाकस्याधि रोचने दिवि देवास आसते। मरुद्भिरग्न आ गहि ॥६॥
य ईंखयन्ति पर्वतान् तिरः समुद्रमर्णवम्। मरुद्भिरग्न आ गहि ॥७॥
आ ये तन्वन्ति रश्मिभिस्तिरः समुद्रमोजसा। मरुद्भिरग्न आ गहि ॥८॥
अभि त्वा पूर्वपीतये सृजामि सोम्यं मधु। मरुद्भिरग्न आ गहि ॥९॥
*prati tyaṁ chārumadhvaraṁ gopīthāya pra hūyase । marudbhiragna ā gahi ॥1॥*
*nahi devo na martyo mahastava kratuṁ paraḥ । marudbhiragna ā gahi ॥2॥*
*ye maho rajaso vidurviśve devāso adruhaḥ । marudbhiragna ā gahi ॥3॥*
*ya ugrā arkamānṛchuranādhṛṣṭāsa ojasā । marudbhiragna ā gahi ॥4॥*
*ye śubhrā ghoravarpasaḥ sukṣatrāso riśādasaḥ । marudbhiragna ā gahi ॥5॥*
*ye nākasyādhi rochane divi devāsa āsate । marudbhiragna ā gahi ॥6॥*
*ya īṁkhayanti parvatān tiraḥ samudramarṇavam । marudbhiragna ā gahi ॥7॥*
*ā ye tanvanti raśmibhistiraḥ samudramojasā । marudbhiragna ā gahi ॥8॥*
*abhi tvā pūrvapītaye sṛjāmi somyaṁ madhu । marudbhiragna ā gahi ॥9॥*

३. अश्विनौ (Aśvinau) - ऋ. (Rv.) १.१५.११; १.२२.१-४

ऋ. (Rv.) १.१५.११

अश्विना पिबतं मधु दीद्यग्नी शुचिव्रता। ऋतुना यज्ञवाहसा ॥११॥
*aśvinā pibataṁ madhu dīdyagnī śuchivratā । ṛtunā yajñavāhasā ॥11॥*

ऋ. (Rv.) १.२२.१-४

प्रातर्युजा वि बोधयाश्विनावेह गच्छताम्। अस्य सोमस्य पीतये ॥१॥
या सुरथा रथीतमोभा देवा दिविस्पृशा। अश्विना ता हवामहे ॥२॥
या वां कशा मधुमत्याश्विना सूनृतावती। तया यज्ञं मिमिक्षतम् ॥३॥
नहि वामस्ति दूरके यत्रा रथेन गच्छथः। अश्विना सोमिनो गृहम् ॥४॥
*prātaryujā vi bodhayāśvināveha gachchhatām । asya somasya pītaye ॥1॥*
*yā surathā rathītamobhā devā divispṛśā । aśvinā tā havāmahe ॥2॥*
*yā vāṁ kaśā madhumatyāśvinā sūnṛtāvatī । tayā yajñaṁ mimikṣatam ॥3॥*
*nahi vāmasti dvarake yatrā rathena gachchhathaḥ । aśvinā somino gṛham ॥4॥*

४. आपः (Āpaḥ) - ऋ. (Rv.) १.२३.१६-२२

अम्बयो यन्त्यध्वभिर्जामयो अध्वरीयताम्। पृंचतीर्मधुना पयः ॥१६॥
अमूर्या उप सूर्ये याभिर्वा सूर्यः सह। ता नो हिन्वन्त्वध्वरम् ॥१७॥
अपो देवीरुप ह्वये यत्र गावः पिबन्तिनः। सिन्धुभ्यः कर्त्वं हविः ॥१८॥
अप्स्वऽन्तरमृत्मप्सु भेषजमपामुत प्रशस्तये। देवा भवत वाजिनः ॥१९॥

अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा। अग्निं च विश्वशंभुवमापश्च विश्वभेषजीः ॥२०॥
आपः पृणीत भेषजं वरूथं तन्वे३ मम। ज्योक् च सूर्यं दृशे ॥२१॥
*ambayo yantyadhvabhirjāmayo adhvarīyatām / pṛṁchatīrmadhunā payaḥ //16 //*
*amūryā upa sūrye yābhirvā sūryaḥ saha / tā no hinvantvadhvaram //17 //*
*apo devīrupa hvaye yatra gāvaḥ pibantinaḥ / sindhubhyaḥ kartvaṁ haviḥ //18 //*
*apsva'ntaramṛtmapsu bheṣajamapāmuta praśastaye / devā bhavata vājinaḥ //19 //*
*apsu me somo abravīdantarviśvāni bheṣajā /*
*agiṁna cha viśvaśaṁbhuvamāpaścha viśvabheṣajīḥ //20 //*
*āpaḥ pṛṇīta bheṣajaṁ varūthaṁ tanve3 mama / jyok cha sūryaṁ dṛśe //21 //*

५ण् इळः (Iḷaḥ) - ऋण् १ण्१३ण्४

अग्ने सुखतमे रथे देवाँ ईळित आ वह। असि होता मनुर्हितः ॥४॥
*agne sukhatame rathe devām̐ īḷita ā vaha / asi hotā manurhitaḥ //4 //*

६. इळा (Iḷā) - सा. (Sv.) १३५०

अग्ने सुखतमे रथे देवाँ ईडित आ वह। असि होता मनुर्हितः ॥४॥
*agne sukhatame rathe devām̐ īḍita ā vaha / asi hotā manurhitaḥ //4 //*

७. इद् सामिद् अग्निर् वा (Id Sāmid Agnir Vā) - सा. (Sv.) १३४७

सुषमिद्धो न आ वह देवाँ अग्ने हविष्मते। होतः पावक यक्षि च ॥१॥
*suṣamiddho na ā vaha devām̐ agne haviṣmate / hotaḥ pāvaka yakṣi cha //1 //*

८. इध्मः समिद्धोऽग्निर् वा (Idhmaḥ Samiddho'gnir Vā) - ऋ. (Rv.) १.१३.१

सुसमिद्धो न आ वह देवाँ अग्ने हविष्मते। होतः पावकः यक्षि च ॥१॥
*susamiddho na ā vaha devām̐ agne haviṣmate / hotaḥ pāvakaḥ yakṣi cha //1 //*

९. इन्द्रः (Indraḥ) - ऋ. (Rv.) १.१५.५; १.१६.१-९; ८.३२.१-३०; ८.३३.१-१९; सा. (Sv.) १३९; १४६; २१७; २२२; २२३; २२९; २३०; २३९; १८०४-१८०६

ऋ. (Rv.) १.१५.५

ब्राह्मणादिन्द्र राधसः पिबा सोममृतूँरनु। तवेद्धि सख्यमस्तृतम् ॥५॥
*brāhmaṇadindra rādhasaḥ pibā somamṛtūm̐ranu / taveddhi sakhyamastṛtam //5 //*

ऋ. (Rv.) १.१६.१-९

आ त्वा वहन्तु हरयो वृषणं सोमपीतये। इन्द्र त्वा सूरचक्षसः ॥१॥
इमा धाना घृतस्नुवो हरी इहोप वक्षतः। इन्द्रं सुखतमे रथे ॥२॥
इन्द्र प्रातर्हवामह इन्द्रं प्रयत्ध्वरे। इन्द्रं सोमस्य पीतये ॥३॥
उप नः सुतमा गहि हरिभिरिन्द्र केशिभिः। सुते हि त्वा हवामहे ॥४॥
सेमं नः स्तोममा गह्युपेदं सवनं सुतम्। गौरो न तृषितः पिब ॥५॥
इमे सोमास इन्दवः सुतासो अधि बर्हिषि। ताँ इन्द्र सहसे पिब ॥६॥
अयं ते स्तोमो अग्रियो हृदिस्पृगस्तु शंतमः। अथा सोमं सुतं पिब ॥७॥
विश्वमित्सवनं सुतमिन्द्रो मदाय गच्छति। वृत्रहा सोमपीतये ॥८॥
सेमं नः काममा पृण गोभिरश्वैः शतक्रतो। स्तवाम त्वा स्वाध्यः ॥९॥
*ā tvā vahantu harayo vṛṣaṇaṁ somapītaye / indra tvā sūrachakṣasaḥ //1 //*
*imā dhānā ghṛtasnuvo harī ihopa vakṣataḥ / indraṁ sukhatame rathe //2 //*
*indra prātarhavāmaha indraṁ prayatdhvare / indraṁ somasya pītaye //3 //*
*upa naḥ sutamā gahi haribhirindra keśibhiḥ / sute hi tvā havāmahe //4 //*
*semaṁ naḥ stomamā gahyupedaṁ savanaṁ sutam / gauro na tṛṣitaḥ piba //5 //*
*ime somāsa indavaḥ sutāso adhi barhiṣi / tām̐ indra sahase piba //6 //*
*ayaṁ te stomo agriyo hṛdispṛgastu śaṁtamaḥ / athā somaṁ sutaṁ piba //7 //*
*viśvamitsavanaṁ sutamindro madāya gachchhati / vṛtrahā somapītaye //8 //*
*semaṁ naḥ kāmamā pṛṇa gobhiraśvaiḥ śatakrato / stavāma tvā svādhyaḥ //9 //*

ऋ. (Rv.) ८.३२.१-३०

प्र कृतान्यृजीषिणः कण्वा इन्द्रस्य गाथया। मदे सोमस्य वोचत ॥१॥
यः सृबिन्दमनर्शनिं पिप्रुं दासमहीशुवम्। वधीदुग्रो रिणन्नपः ॥२॥

न्यर्बुदस्य विष्टपं वषर्माणं बृहतस्तिर। कृषे तदिन्द्रं पौंस्यम् ॥३॥
प्रति श्रुताय वो धृषत्तूर्णाशं न गिरेरधि। हुवे सुशिप्रमूतये ॥४॥
स गोरश्वस्य वि व्रजं मन्दानः सोम्येभ्यः। पुरं न शूर दर्षसि ॥५॥
यदि मे रारणः सुत उक्थे वा दधसे चनः। आरादुप स्वधा गहि ॥६॥
वयं घा ते अपि ष्मसि स्तोतार इन्द्र गिर्वणः। त्वं नो जिन्व सोमपाः ॥७॥
उत नः पितुमा भर संरराणो अविक्षितम्। मघवन्भूरि ते वसु ॥८॥
उत नो गोमतस्कृधि हिरण्यवतो अश्विनः। इळाभिः सं रभेमहि ॥९॥
बृबदुक्थं हवामहे सृप्रकरस्नमूतये। साधु कृण्वन्तमवसे ॥१०॥
यः संस्थे चिच्छतक्रतुरादीं कृणोति वृत्रहा। जरितृभ्यः पुरूवसुः ॥११॥
स नः शक्रश्चिदा शकद्दानवाँ अन्तराभरः। इन्द्रो विश्वाभिरूतिभिः ॥१२॥
यो रायो३ वनिर्महान्त्सुपारः सुन्वतः सखा। तमिन्द्रमभि गायत ॥१३॥
आयन्तारं महि स्थिरं पृतनासु श्रवोजितम्। भूरेरीशानमोजसा ॥१४॥
नकिरस्य शचीनां नियन्ता सूनृतानाम्। नकिर्वक्ता न दादिति ॥१५॥
न नूनं ब्रह्मणमृणं प्राशूनामस्ति सुन्वताम्। न सोमो अप्रता पपे ॥१६॥
पन्य इदुप गायत पन्य उक्थानि शंसत। ब्रह्मा कृणोत पन्य इत् ॥१७॥
पन्य आ दर्दिरच्छता सहस्रा वाज्यवृतः। इन्द्रो यो यज्वनो वृधः ॥१८॥
वि षू चर स्वधा अनु कृष्टीनामन्वाहुवः। इन्द्र पिब सुतानाम् ॥१९॥
पिब स्वधैनवानामुत यस्तुग्र्ये सचा। उतायमिन्द्र यस्तव ॥२०॥
अतीहि मन्युषाविणं सुषुवांसमुपारणे। इमं रातं सुतं पिब ॥२१॥
इहि तिस्रः परावत इहि पंच जनाँ अति। धेना इन्द्रावचाकशत ॥२२॥
सूर्यो रश्मिं यथा सृजा त्वा यच्छन्तु म गिरः। निम्नाषो न सध्र्यक् ॥२३॥
अध्वर्यवा तु हि षिंच सोमं वीराय शिप्रिणे। भरा सुतस्य पीतये ॥२५॥
य उद्नः फलिगं भिनन्य१ क्सिन्धूँरवासृजत्। यो गोषु पक्वं धारयत् ॥२५॥
अहन्वृत्रमृचीषम औणबाभमहीशुवम्। हिमेनाविध्यदर्बुदम् ॥२६॥
प्र व उग्राय निष्टुरेऽषाळहाय प्रसक्षिणे। देवत्तं ब्रह्म गायत ॥२७॥
यो विश्वान्यभि व्रता सोमस्य मदे अन्धसः। इन्द्रो देवेषु चेतति ॥२८॥
इह त्या सधमाद्या हरी हिरण्यकेश्या। वोळहामभि प्रयो हितम् ॥२९॥
अर्वांचं त्वा पुरुष्टुत प्रियमेधस्तुता हरी। सोमपेयाय वक्षतः ॥३०॥

*pra kṛtānyṛjīṣiṇaḥ kaṇvā indrasya gāthayā | made somasya vochata ॥1॥*
*yaḥ sṛbindamanarśaniṁ pipruṁ dāsamahīśuvam | vadhīdugro riṇannapaḥ ॥2॥*
*nyarbudasya viṣṭapaṁ vaṣarmāṇaṁ bṛhatastira | kṛṣe tadindraṁ pauṁsyam ॥3॥*
*prati śrutāya vo dhṛṣattūrṇāśaṁ na gireradhi | huve suśipramūtaye ॥4॥*
*sa goraśvasya vi vrajaṁ mandānaḥ somyebhyaḥ | puraṁ na śūra darṣasi ॥5॥*
*yadi me rāraṇaḥ suta ukthe vā dadhase chanaḥ | ārādupa svadhā gahi ॥6॥*
*vayaṁ ghā te api ṣmasi stotāra indra girvaṇaḥ | tvaṁ no jinva somapāḥ ॥7॥*
*uta naḥ pitumā bhara saṁrarāṇo avikṣitam | maghavanbhūri te vasu ॥8॥*
*uta no gomataskṛdhi hiraṇyavato aśvinaḥ | iḻābhiḥ saṁ rabhemahi ॥9॥*
*bṛbadukthaṁ havāmahe sṛprakarasnamūtaye | sādhu kṛṇvantamavase ॥10॥*
*yaḥ saṁsthe chichchhatakraturādīṁ kṛṇoti vṛtrahā | jaritṛbhyaḥ purūvasuḥ ॥11॥*
*sa naḥ śakraśchidā śakaddānavām̐ antarābharaḥ | indro viśvābhirūtibhiḥ ॥12॥*
*yo rāyo3 vanirmahāntsupāraḥ sunvataḥ sakhā | tamindramabhi gāyata ॥13॥*
*āyantāraṁ mahi sthiraṁ pṛtanāsu śravojitam | bhūrerīśānamojasā ॥14॥*
*nakirasya śachīnāṁ niyantā sūnṛtānām | nakirvaktā na dāditi ॥15॥*
*na nūnaṁ brahmaṇamṛṇaṁ prāśūnāmasti sunvatām | na somo apratā pape ॥16॥*
*panya idupa gāyata panya ukthāni śaṁsata | brahmā kṛṇota panya it ॥17॥*
*panya ā dardirachchhatā sahasrā vājyavṛtaḥ | indro yo yajvano vṛdhaḥ ॥18॥*
*vi ṣū chara svadhā anu kṛṣṭīnāmanvāhuvaḥ | indra piba sutānām ॥19॥*
*piba svadhainavānāmuta yastugrye sachā | utāyamindra yastava ॥20॥*
*atīhi manyuṣāviṇaṁ suṣṭuvāṁsamupāraṇe | imaṁ rātaṁ sutaṁ piba ॥21॥*
*ihi tisraḥ parāvata ihi paṁcha janām̐ ati | dhenā indrāvachākaśata ॥22॥*

*sūryo raśiṁma yathā sṛjā tvā yachchhantu ma giraḥ । nimmāṣo na sadhyrak ॥23 ॥*
*adhvaryavā tu hi ṣiṁcha somaṁ vīrāya śipriṇe । bharā sutasya pītaye ॥25 ॥*
*ya udnaḥ phaligaṁ bhinnya1 ksindhūm̐ravāsṛjat । yo goṣu pakvaṁ dhārayat ॥25 ॥*
*ahanvṛtramṛchīṣama auṇabābhamahīśuvam । himenāvidhyadarbudam ॥26 ॥*
*pra va ugrāya niṣṭure'ṣāḷahāya prasakṣiṇe । devattaṁ brahma gāyata ॥27 ॥*
*yo viśvānyabhi vratā somasya made andhasaḥ । indro deveṣu chetati ॥28 ॥*
*iha tyā sadhamādyā harī hiraṇyakeśyā । voḷahāmabhi prayo hitam ॥29 ॥*
*arvāṁchaṁ tvā puruṣṭuta priyamedhastutā harī । somapeyāya vakṣataḥ ॥30 ॥*

ऋ. (Rv.) ८.३३.१-१९

वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः ।
पवित्रस्य प्रस्रवणेषु वृत्रहन् परि स्तोतार आसते ॥१॥
स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिनः ।
कदा सुतं तृषाण ओक आ गम इन्द्र स्वब्दीव वंसगः ॥२॥
कण्वेभिर्धृष्णवा धृषद्वाजं दर्षि सहस्रिणम् ।
पिशंगरूपं मघवन् विचर्षणे मक्षू गोमन्तमीमहे ॥३॥
पाहि गायान्धसो मद इन्द्राय मेध्यातिथे ।
यः संमिश्लो हर्योर्यः सुते सचा वज्री रथो हिरण्ययः ॥४॥
यः सुषव्यः सुदक्षिण इनो यः सुक्रतुर्गृणे ।
य आकरः सहस्रा यः शतामघ इन्द्रो यः पूर्भिदारितः ॥५॥
यो धृषितो योऽवृतो यो अस्ति श्मश्रुषु श्रितः ।
विभूतद्युम्नश्च्यवनः पुरुष्टुतः क्रत्वा गौरिव शाकिनः ॥६॥
क ईं वेद सुते सचा पिबन्तं कद्वयो दधे ।
अयं यः पुरो विभिनत्त्योजसा मन्दानः शिप्र्यन्धसः ॥७॥
दाना मृगो न वारणः पुरुत्रा चरथं दधे ।
नकिष्ट्वा नि यमदा सुते गमो महाँश्चरस्योजसा ॥८॥
य उग्रः सन्ननिष्टृतः स्थिरो रणाय संस्कृतः ।
यदि स्तोतुर्मघवा श्रृणवद्धवं नेन्द्रो योषत्या गमत् ॥९॥
सत्यमित्था वृषेदसि वृषजूतिर्नोऽवृतः ।
वृषा ह्युग्र शुण्विषे परावति वृषो अर्वावति श्रुतः ॥१०॥
वृषणस्ते अभीशवो वृषा कशा हिरण्ययी ।
वृषा रथो मघवन्वृषणा हरी वृषा त्वं शतक्रतो ॥११॥
वृषा सोता सुनोतु ते वृषन्नृजीषिन्ना भर ।
वृषा दधन्वे वृषणं नदीष्वा तुभ्यं स्थातर्हरीणाम् ॥१२॥
एन्द्र याहि पीतये मधु शविष्ठ सोम्यम् ।
नायमच्छा मघवा श्रृणवद् गिरो ब्रह्मोक्था च सुक्रतुः ॥१३॥
वहन्तु त्वा रथेष्ठामा हरयो रथयुजः । तिरश्चिदर्यं सवनानि वृत्रहन्नन्येषां या शतक्रतो ॥१४॥
अस्माकमद्यान्तमं स्तोमं धिष्व महामह ।
अस्माकं ते सवना सन्तु शंतमा मदाय द्युक्ष सोमपाः ॥१५॥
नहि षस्तव नो मम शास्त्रे अन्यस्य रण्यति । यो अस्मान्वीर आनयत् ॥१६॥
इन्द्रश्चिद् घा तदब्रवीत्स्त्रिया अशास्यं मनः । उतो अह क्रतुं रघुम् ॥१७॥
सप्ती चिद् घा मदच्युता मिथुना वहतो रथम् । एवेद्धूर्वृष्ण उत्तरा ॥१८॥
अधः पश्यस्व मोपरि संतरां पादकौ हर ।
मा ते कशप्लकौ दृशन् स्त्री हि ब्रह्मा बभूविथ ॥१९॥

*vayaṁ gha tvā sutāvanta āpo na vṛktabarhiṣaḥ ।*
*pavitrasya prasravaṇeṣu vṛtrahan pari stotāra āsate ॥1 ॥*
*svaranti tvā sute naro vaso nireka ukthinaḥ ।*
*kadā sutaṁ tṛṣāṇa oka ā gama indra svabdīva vaṁsagaḥ ॥2 ॥*
*kaṇvebhirdhṛṣṇavā dhṛṣadvājaṁ darṣi sahasriṇam ।*
*piśaṁgarūpaṁ maghavan vicharṣaṇe makṣū gomantamīmahe ॥3 ॥*

*pāhi gāyāndhaso mada indrāya medhyātithe ।*
*yaḥ saṁmiślo haryoryaḥ sute sachā vajrī ratho hiraṇyayaḥ ॥4॥*
*yaḥ suṣavyaḥ sudakṣiṇa ino yaḥ sukraturgṛṇe ।*
*ya ākaraḥ sahasrā yaḥ śatāmagha indro yaḥ pūrbhidāritaḥ ॥5॥*
*yo dhṛṣito yo'vṛto yo asti śmapruṣu śritaḥ ।*
*vibhūtadyumnaśchyavanaḥ puruṣṭutaḥ kratvā gauriva śākinaḥ ॥6॥*
*ka īṁ veda sute sachā pibantaṁ kadvayo dadhe ।*
*ayaṁ yaḥ puro vibhinattyojasā mandānaḥ śipyrandhasaḥ ॥7॥*
*dānā mṛgo na vāraṇaḥ purutrā charathaṁ dadhe ।*
*nakiṣṭvā ni yamadā sute gamo mahāṁścharasyojasā ॥8॥*
*ya ugraḥ sannaniṣṭṛtaḥ sthiro raṇāya saṁskṛtaḥ ।*
*yadi stoturmaghavā śṛṇavaddhavaṁ nendro yoṣatyā gamat ॥9॥*
*satyamitthā vṛṣedasi vṛṣajūtirno'vṛtaḥ ।*
*vṛṣā hyugra śuṇviṣe parāvati vṛṣo arvāvati śrutaḥ ॥10॥*
*vṛṣaṇaste abhīśavo vṛṣā kaśā hiraṇyayī ।*
*vṛṣā ratho maghavanvṛṣaṇā harī vṛṣā tvaṁ śatakrato ॥11॥*
*vṛṣā sotā sunotu te vṛṣannṛjīṣinnā bhara ।*
*vṛṣā dadhanve vṛṣaṇaṁ nadīṣvā tubhyaṁ sthātarharīṇām ॥12॥*
*endra yāhi pītaye madhu śaviṣṭha somyam ।*
*nāyamachchhā maghavā śṛṇavad giro brahmokthā cha sukratuḥ ॥13॥*
*vahantu tvā ratheṣṭhāmā harayo rathayujaḥ ।*
*tiraśchidaryaṁ savanāni vṛtrahannanyeṣāṁ yā śatakrato ॥14॥*
*asmākamadyāntamaṁ stomaṁ dhiṣva mahāmaha ।*
*asmākaṁ te savanā santu śaṁtamā madāya dyukṣa somapāḥ ॥15॥*
*nahi ṣastava no mama śāstre anyasya raṇyati । yo asmānvīra ānayat ॥16॥*
*indraśchid ghā tadabravītstriyā aśāsyaṁ manaḥ । uto aha kratuṁ raghum ॥17॥*
*saptī chid ghā madachyutā mithunā vahato ratham । eveddhrarvṛṣṇa uttarā ॥18॥*
*adhaḥ paśyasva mopari saṁtarāṁ pādakau hara ।*
*mā te kaśaplakau dṛśan strī hi brahmā babhūvitha ॥19॥*

सा. (Sv.) १३९

सोमानां स्वरणं कृणुहि बृह्मणस्पते। कक्षीवन्तं य औशिजः ॥५॥
*somānāṁ svaraṇaṁ kṛṇuhi bṛhmaṇaspate । kakṣīvantaṁ ya auśijaḥ ॥5॥*

सा. (Sv.) १४६

इमा उ त्वा पुरूवसोऽभि प्र नो नोनुवुर्गिरः। गावो वत्सं न धेनवः ॥२॥
*imā u tvā purūvaso'bhi pra no nonuvurgiraḥ । gāvo vatsaṁ na dhenavaḥ ॥2॥*

सा. (Sv.) २१७

बृबदुक्थं हवामहे सृप्रकरस्नमूतये। साधः कृण्वन्तमवसे ॥४॥
*bṛbadukthaṁ havāmahe sṛprakarasnamūtaye । sādhaḥ kṛṇvantamavase ॥4॥*

सा. (Sv.) २२२-२२३

इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्। समूढमस्य पांसुले ॥९॥
अतीहि मन्युषाविणं सुषुवां समुपेरय। अस्य रातौ सुतं पिब ॥१०॥
*idaṁ viṣṇurvi chakrame tredhā ni dadhe padam । samūḍhamasya pāṁsule ॥9॥*
*atīhi manyuṣāviṇaṁ suṣuvāṁ samuperaya । asya rātau sutaṁ piba ॥10॥*

सा. (Sv.) २२९-२३०

ब्राह्मणादिन्द्र राधसः पिबा सोममृतूँ रनु। तवेदं सख्यमस्तृतम् ॥७॥
वयं घा ते अपि स्मसि स्तोतार इन्द्र गिर्वणः। त्वं नो जिन्व सोमपाः ॥८॥
*brāhmaṇādindra rādhasaḥ pibā somamṛtūṁ ranu । tavedaṁ sakhyamastṛtam ॥7॥*
*vayaṁ ghā te api smasi stotāra indra girvaṇaḥ । tvaṁ no jinva somapāḥ ॥8॥*

सा. (Sv.) २३९

पिबा सुतस्य रसिनो मत्स्वा न इन्द्र गोमतः ।
आपिर्नो बोधि सधमाद्ये वृधे३ऽस्माँ अवन्तु ते धियः ॥७॥

*pibā sutasya rasino matsvā na indra gomataḥ |*
*āpirno bodhi sadhamādye vṛdhe3'smāṁ avantu te dhiyaḥ ||7 ||*

सा. (Sv.) १८०४-१८०६

रेवाँ इद्रेवत स्तोता स्यात्त्वावतो मघोनः । प्रेदु हरिवः सुतस्य ॥१॥
उक्थं च न शस्यमानं नागो रयिरा चिकेत । न गायत्रं गीयमानम् ॥२॥
मा न इन्द्र पीयत्नवे मा शर्धते परा दाः । शिक्षा शचीवः शचीभिः ॥३॥
*revāṁ idrevata stotā syāttvāvato maghonaḥ | predu harivaḥ sutasya ||1 ||*
*uktham cha na śasyamānaṁ nāgo rayirā chiketa | na gāyatraṁ gīyamānam ||2 ||*
*mā na indra pīyatnave mā śardhate parā dāḥ | śikṣā śachīvaḥ śachībhiḥ ||3 ||*

१०. इन्द्रः - (साग्री. सास्वा.) सदसस्पतिः (ऋसर्व. १. १८. ६) (Indraḥ - [Ssb. Sas.] Sadasaspatiḥ [Rss. 1. 18. 6)) - सा. (Sv.) १७१

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिं मेधामयासिषम् ॥७॥
*sadasaspatimadbhutaṁ priyamindrasya kāmyam | saniṁ medhāmayāsiṣam ||7 ||*

११. इन्द्रो मरुत्वान् (Indro Marutvān) - ऋ. (Rv.) १.२३.७-९

मरुत्वन्तं हवामह इन्द्रमा सोमपीतये । सजूर्गणेन तृम्पतु ॥७॥
इन्द्रजयेष्ठा मरुद्गणा देवासः पूषरातयः । विश्वे मम श्रुता हवम् ॥८॥
हत वृत्रं सुदानव इन्द्रेण सहसा युजा । मा नो दुःशंस ईशत ॥९॥
*marutvantaṁ havāmaha indramā somapītaye | sajūrgaṇena tṛmpatu ||7 ||*
*indrajayeṣṭhā marudgaṇā devāsaḥ pūṣarātayaḥ | viśve mama śrutā havam ||8 ||*
*hata vṛtraṁ sudānava indreṇa sahasā yujā | mā no duḥśaṁsa īśata ||9 ||*

१२. इन्द्रवायू (Indravāyū) - ऋ. (Rv.) १.२३.२-३

उभा देवा दिविस्पृशेन्द्रवायू हवामहे । अस्य सोमस्य पीतये ॥२॥
इन्द्रवायु देवा मनोजुवा विप्रा हवन्त ऊतये । सहस्राक्षा धियस्पती ॥३॥
*ubhā devā divispṛśendravāyū havāmahe | asya somasya pītaye ||2 ||*
*indravāyu devā manojuvā viprā havanta ūtaye | sahasrākṣā dhiyaspatī ||3 ||*

१३. इन्द्राग्नी (Indrāgnī) - ऋ. (Rv.) १.२१.१-६

इहेन्द्राग्नी उप ह्वये तयोरित्स्तोममुश्मसि । ता सोमं सोमपातमा ॥१॥
ता यज्ञेषु प्र शंसतेन्द्राग्नी शुम्भता नरः । ता गायत्रेषु गायत ॥२॥
ता मित्रस्य प्रशस्तय इन्द्राग्नी ता हवामहे । सोमपा सोमपीतये ॥३॥
उग्रा सन्ता हवामह उपेदं सवनं सुतम् । इन्द्राग्नी एह गच्छताम् ॥४॥
ता महान्ता सदस्पती इन्द्राग्नी रक्ष उब्जतम् । अप्रजाः सन्त्वत्रिणः ॥५॥
तेन सत्येन जागृतमधि प्रचेतुनो पदे । इन्द्राग्नी शर्म यच्छतम् ॥६॥
*ihendrāgnī upa hvaye tayoritstomamuśmasi | tā somaṁ somapātamā ||1 ||*
*tā yajñeṣu pra śaṁsatendrāgnī śumbhatā naraḥ | tā gāyatreṣu gāyata ||2 ||*
*tā mitrasya praśastaya indrāgnī tā havāmahe | somapā somapītaye ||3 ||*
*ugrā santā havāmaha upedaṁ savanaṁ sutam | indrāgnī eha gachchhatām ||4 ||*
*tā mahāntā sadaspatī indrāgnī rakṣa ubjatam | aprajāḥ santvatriṇaḥ ||5 ||*
*tena satyena jāgṛtamadhi prachetuno pade | indrāgnī śarma yachchhatam ||6 ||*

१४. इन्द्राणीवरुणानी अग्नाय्यः (Indrāṇīvaruṇānī Agnāyyaḥ) - ऋ. (Rv.) १.२२.१२

इहेन्द्राणीमुप ह्वये वरुणानीं स्वस्तये । अग्नायीं सोमपीतये ॥१२॥
*ihendrāṇīmupa hvaye varuṇānīṁ svastaye | agnāyīṁ somapītaye ||12 ||*

१५. इन्द्रावरुणौ (Indrāvaruṇau) - ऋ. (Rv.) १.१७.१-९

इन्द्रावरुणयोरहं सम्राजोरव आ वृणे । ता नो मृळात ईदृशे ॥१॥
गन्तारा हि स्थोऽवसे हवं विप्रस्य मावतः । धर्तारा चर्षणीनाम् ॥२॥
अनुकामं तर्पयेथामिन्द्रावरुण राय आ । ता वां नेदिष्ठमीमहे ॥३॥
युवाकु हि शचीनां युवाकु सुमतीनाम् । भूयाम वाजदाव्नाम् ॥४॥
इन्द्रः सहस्रदाव्नां वरुणः शंस्यानाम् । क्रतुर्भवत्युक्थ्यः ॥५॥

तयोरिदवसा वयं सनेम नि च धीमहि। स्यादुत प्ररेचनम् ॥६॥
इन्द्रावरुण वामहं हुवे चित्राय राधसे। अस्मान्त्सु जिग्युषस्कृतम् ॥७॥
इन्द्रावरुण नू नु वां सिषासन्तीषु धीष्वा। अस्मभ्यं शर्म यच्छतम् ॥८॥
प्र वामश्नोतु सुष्टुतिरिन्द्रावरुण यां हुवे। यामृधाथे सधस्तुतिम् ॥९॥
*indrāvaruṇayorahaṁ samrājorava ā vṛṇe । tā no mṛḷāta īdṛśe ॥1॥*
*gantārā hi stho'vase havaṁ viprasya māvataḥ । dhartārā charṣaṇīnām ॥2॥*
*anukāmaṁ tarpayethāmindrāvaruṇa rāya ā । tā vāṁ nediṣṭhamīmahe ॥3॥*
*yuvāku hi śachīnāṁ yuvāku sumatīnām । bhūyāma vājadānnām ॥4॥*
*indraḥ sahasradāvnāṁ varuṇaḥ śaṁsyānām । kraturbhavatyukthyaḥ ॥5॥*
*tayoridavasā vayaṁ sanema ni cha dhīmahi । syāduta prarechanam ॥6॥*
*indrāvaruṇa vāmahaṁ huve chitrāya rādhase । asmāntsu jigyuṣaskṛtam ॥7॥*
*indrāvaruṇa nū nu vāṁ siṣāsantīṣu dhīṣvā । asmabhyaṁ śarma yachchhatam ॥8॥*
*pra vāmaśnotu suṣṭutirindrāvaruṇa yāṁ huve । yāmṛdhāthe sadhastutim ॥9॥*

१६. उषासानक्ता (Uṣāsānaktā) - ऋ. (Rv.) १.१३.७

नक्तोषासा सुपेशसास्मिन् यज्ञ उप ह्वये। इदं नो बर्हिरासदे ॥७॥
*naktoṣāsā supeśasāsmin yajña upa hvaye । idaṁ no barhirāsade ॥7॥*

१७. ऋतवः (Ṛtavaḥ) - ऋ. (Rv.) १.१५.१

इन्द्र सोमं पिब ऋतुनाऽऽत्वा विशन्त्विदन्दवः। मत्सरासस्तदोकसः ॥१॥
*indra somaṁ piba ṛtunā''tvā viśantvidandavaḥ । matsarāsastadokasaḥ ॥1॥*

१८. ऋभवः (Ṛbhavaḥ) - ऋ. (Rv.) १.२०.१-८

अयं देवाय जन्मने स्तोमो विप्रेभिरासया। अकारि रत्नधातमः ॥१॥
य इन्द्राय वचोयुजा ततक्षुर्मनसा हरी। शमीभिर्यज्ञमाशत ॥२॥
तक्षन्नासत्याभ्यां परिज्मानं सुखं रथम्। तक्षन्धेनुं सबर्दुघाम् ॥३॥
युवाना पितरा पुनः सत्यमन्त्रा ऋजूयवः। ऋभ्वो विष्ट्यक्रत ॥४॥
सं वो मदासो अग्मतेन्द्रेण च मरुत्वता। आदित्येभिश्च राजभिः ॥५॥
उत त्यं चमसं नवं त्वष्टुर्देवस्य निष्कृतम्। अकर्त चतुरः पुनः ॥६॥
ते नो रत्नानि धत्तन त्रिरा साप्तानि सुन्वते। एकमेकं सुशस्तिभिः ॥७॥
अधारयन्त वह्नयोऽभजन्त सुकृत्यया। भागं देवेषु यज्ञियम् ॥८॥
*ayaṁ devāya janmane stomo viprebhirāsayā । akāri ratnadhātamaḥ ॥1॥*
*ya indrāya vachoyujā tatakṣurmanasā harī । śamībhiryajñamāśata ॥2॥*
*takṣannāsatyābhyāṁ parijmānaṁ sukhaṁ ratham । takṣandhenuṁ sabardughām ॥3॥*
*yuvānā pitarā punaḥ satyamantrā ṛjūyavaḥ । ṛbhvo viṣṭyakrata ॥4॥*
*saṁ vo madāso agmatendreṇa cha marutvatā । ādityebhiścha rājabhiḥ ॥5॥*
*uta tyaṁ chamasaṁ navaṁ tvaṣṭurdevasya niṣkṛtam । akarta chaturaḥ punaḥ ॥6॥*
*te no ratnāni dhattana trirā sāptāni sunvate । ekamekaṁ suśastibhiḥ ॥7॥*
*adhārayanta vahnayo'bhajanta sukṛtyayā । bhāgaṁ deveṣu yajñiyam ॥8॥*

१९. तनूनपात् (Tanūnapāt) - ऋ. (Rv.) १.१३.२; सा. (Sv.) १३४८

ऋ. (Rv.) १.१३.२

मधुमन्तं तनूनपाद् यज्ञं देवेषु नः कवे। अद्या कृणुहि वीतये ॥२॥
*madhumantaṁ tanūnapād yajñaṁ deveṣu naḥ kave । adyā kṛṇuhi vītaye ॥2॥*

सा. (Sv.) १३४८

मधुमन्तं तनूनपाद्यज्ञं देवेषु नः कवे। अद्या कृणुह्यूतये ॥२॥
*madhumantaṁ tanūnapādyajñaṁ deveṣu naḥ kave । adyā kṛṇuhyūtaye ॥2॥*

२०. त्वष्टा (Tvaṣṭā) - ऋ. (Rv.) १.१३.१०; १.१५.३.४

ऋ. (Rv.) १.१३.१०

इह त्वष्टारमग्रियं विश्वरूपमुप ह्वये। अस्माकमस्तु केवलः ॥१०॥
*iha tvaṣṭāramagriyaṁ viśvarūpamupa hvaye । asmākamastu kevalaḥ ॥10॥*

ऋ. (Rv.) १.१५.३-४

अभि यज्ञं गृणीहि नो ग्नावो नेष्टः पिब ऋतुना। त्वं हि रत्नधा असि ॥३॥
अग्ने देवाँ इहा वह सादया योनिषु त्रिषु। परि भूष पिब ऋतुना ॥४॥
*abhi yajñaṁ gṛṇīhi no gnāvo neṣṭaḥ piba ṛtunā । tvaṁ hi ratnadhā asi ॥3॥*
*agne devām̐ ihā vaha sādayā yoniṣu triṣu । pari bhūṣa piba ṛtunā ॥4॥*

२१. तिस्रो देव्यः सरस्वती-इळा-भारत्यः (Tisro Devyaḥ Sarasvatī-Iḷā-Bhāratyaḥ) - ऋ. (Rv.) १.१३.९

इळा सरस्वती मही तिस्रो देवीर्मयोभुवः। बर्हिः सीदन्त्वस्रिधः ॥९॥
*iḷā sarasvatī mahī tisro devīrmayobhuvaḥ । barhiḥ sīdantvasridhaḥ ॥9॥*

२२. देवीर् द्वारः (Devīr Dvāraḥ) - ऋ. (Rv.) १.१३.६

वि श्रयन्तामृतावृधो द्वारो देवीरसश्चतः। अद्या नूनं च यष्टवे ॥६॥
*vi śrayantāmṛtāvṛdho dvāro devīrasaśchataḥ । adyā nūnaṁ cha yaṣṭave ॥6॥*

२३. देव्यः (Devyaḥ) - ऋ. (Rv.) १.२२.११

अभि नो देवीरवसा महः शर्मणा नृपत्नीः। अच्छिन्नपत्राः सचन्ताम् ॥११॥
*abhi no devīravasā mahaḥ śarmaṇā nṛpatnīḥ । achchhinnapatrāḥ sachantām ॥11॥*

२४. देव्यौ होतारौ प्र्रचेतसौ (Devyau Hotārau Prrachetasau) - ऋ. (Rv.) १.१३.८

ता सुजिह्वा उप ह्वये होतारा दैव्या कवी। यज्ञं नो यक्षतामिमम् ॥८॥
*tā sujihvā upa hvaye hotārā daivyā kavī । yajñaṁ no yakṣatāmimam ॥8॥*

२५. द्रविणोदा (Draviṇodā) - ऋ. (Rv.) १.१५.७-१०

द्रविणोदा द्रविणसो ग्रावहस्तासो अध्वरे। यज्ञेषु देवमीळते ॥७॥
द्रविणोदा ददातु नो वसूनि यानि श्रृण्विरे। देवेषु ता वनामहे ॥८॥
द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत। नेष्ट्राद्दतुभिरिष्यत ॥९॥
यत्त्वा तुरीयमृतुभिर्द्रविणोदो यजामहे। अध ष्मा नो ददिर्भव ॥१०॥
*draviṇodā draviṇaso grāvahastāso adhvare । yajñeṣu devamīḷate ॥7॥*
*draviṇodā dadātu no vasūni yāni śṛṇvire । deveṣu tā vanāmahe ॥8॥*
*draviṇodāḥ pipīṣati juhota pra cha tiṣṭhata । neṣṭrādṛtubhiriṣyata ॥9॥*
*yattvā turīyamṛtubhirdraviṇodo yajāmahe । adha ṣmā no dadirbhava ॥10॥*

२६. द्यावापृथिव्यौ (Dyāvāpṛthivyau) - ऋ. (Rv.) १.२२.१३-१४

मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्। पिपृतां नो भरीमभिः ॥१३॥
तयोरिद् घृतवत्पयो विप्रा रिहन्ति धीतिभिः। गन्धर्वस्य ध्रुवे पदे ॥१४॥
*mahī dyauḥ pṛthivī cha na imaṁ yajñaṁ mimikṣatām । pipṛtāṁ no bharīmabhiḥ ॥13॥*
*tayorid ghṛtavatpayo vigrā rihanti dhītibhiḥ । gandharvasya dhruve pade ॥14॥*

२७. नराशंसः (Narāśaṁsaḥ) - ऋ. (Rv.) १.१३.३; सा. (Sv.) १३४९

ऋ. (Rv.) १.१३.३

नराशंसमिह प्रियमस्मिन् यज्ञ उप ह्वये। मधुजिह्वं हविष्कृतम् ॥३॥
*narāśaṁsamiha priyamasmin yajña upa hvaye । madhujihvaṁ haviṣkṛtam ॥3॥*

सा. (Sv.) १३४९

नराशंसमिह प्रियमस्मिन्यज्ञ उप ह्वये। मधुजिह्वं हविष्कृतम् ॥३॥
*narāśaṁsamiha priyamasminyajña upa hvaye । madhujihvaṁ haviṣkṛtam ॥3॥*

२८. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ४९७; १०३७-१०४६

सा. (Sv.) ४९७

अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः। संसूर्येण दिद्युते ॥१॥
*achikradadvṛṣā harirmahānmitro na darśataḥ । saṁsūryeṇa didyute ॥1॥*

सा. (Sv.) १०३७-१०४६

पवस्व देववीरति पवित्रं सोम रंह्या। इन्द्रमिन्दो वृषा विश ॥१॥

आ वच्यस्व महि पसरो वृषेन्दो द्युम्रवत्तमः। आ योनि धर्णासिः सदः ॥२॥
अधुक्षत प्रियं मधु धारा सुतस्य वेधसः। अपो वसिष्ट सुक्रतुः ॥३॥
महान्तं त्वा महीरन्वापो अर्षन्ति सिन्धवः। यद्गोभिर्वासयिष्यसे ॥४॥
समुद्रो अप्सु मामृजे विष्टम्भो धरुणो दिवः। सोमः पवित्रे अस्मयुः ॥५॥
अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः। सं सूर्येण दिद्युते ॥६॥
गिरस्त इन्द ओजसा मर्मृज्यन्ते अपस्युवः। याभिर्मदाय शुम्भसे ॥७॥
तं त्वा मदाय घृष्वय उ लोककृत्नुमीमहे। तव प्रशस्तये महे ॥८॥
गोषा इन्दो नृषा अस्यश्वसा वाजसा उत। आत्मा यज्ञस्य पूर्व्यः ॥९॥
अस्मभ्यमिन्दविन्द्रियं मधोः पवस्व धारया। पर्जन्यो वृष्टिमाँ इव ॥१०॥
*pavasva devavīrati pavitraṁ soma raṁhyā | indramindo vṛṣā viśa ||1 ||*
*ā vachyasva mahi pasaro vṛṣendo dyumravattamaḥ | ā yoni dharṇāsiḥ sadaḥ ||2 ||*
*adhukṣata priyaṁ madhu dhārā sutasya vedhasaḥ | apo vasiṣṭa sukratuḥ ||3 ||*
*mahāntaṁ tvā mahīranvāpo arṣanti sindhavaḥ | yadgobhirvāsayiṣyase ||4 ||*
*samudro apsu māmṛje viṣṭambho dharuṇo divaḥ | somaḥ pavitre asmayuḥ ||5 ||*
*achikradadvṛṣā harirmahānmitro na darśataḥ | saṁ sūryeṇa didyute ||6 ||*
*girasta inda ojasā marmṛjyante apasyuvaḥ | yābhirmadāya śumbhase ||7 ||*
*taṁ tvā madāya ghṛṣvaya u lokakṛtnumīmahe | tava praśastaye mahe ||8 ||*
*goṣā indo nṛṣā asyaśvasā vājasā uta | ātmā yajñasya pūrvyaḥ ||9 ||*
*asmabhyamindavindriyaṁ madhoḥ pavasva dhārayā | parjanyo vṛṣṭimām̐ iva ||10 ||*

२९. पूषा (Pūṣā) - ऋ. (Rv.) १.२३.१३-१५

आ पूषिंचत्रबर्हिषमाघृणे धरुणं दिवः। आजा नष्टं यथा पशुम् ॥१३॥
पूषा राजानमाघृणिरपगूळहं गुहा हितम्। अविन्दच्चित्रबर्हिषम् ॥१४॥
उतो स मह्यमिन्दुभिः षडयुक्ताँ अनुसेषिधत्। गोभिर्यवं न चर्कृषत्॥१५॥
*ā pūṣiṁchatrabarhiṣamāghṛṇe dharuṇaṁ divaḥ | ājā naṣṭaṁ yathā paśum ||13 ||*
*pūṣā rājānamāghṛṇirapagūḷahaṁ guhā hitam | avindachchitrabarhiṣam ||14 ||*
*uto sa mahyamindubhiḥ ṣaḍayuktām̐ anuseṣidhat | gobhiryavaṁ na charkṛṣat ||15 ||*

३०. पृथिवी (Pṛthivī) - ऋ. (Rv.) १.२२.१५

सयोना पृथिवी भवानृक्षरा निवेशनी। यच्छाः न शर्म सप्रथः ॥१५॥
*sayonā pṛthivī bhavānṛkṣarā niveśanī | yachchhāḥ na śarma saprathaḥ ||15 ||*

३१. बाद्यहः (Bādyahaḥ) - ऋ. (Rv.) १.१३.५

स्तृणीत बर्हिरानुषग् घृतपृष्ठं मनीषिणः। यत्रामृतस्य चक्षणम् ॥५॥
*stṛṇīta barhirānuṣag ghṛtapṛṣṭhaṁ manīṣiṇaḥ | yatrāmṛtasya chakṣaṇam ||5 ||*

३२. ब्रह्मणस्पतिः (Brahmaṇaspatiḥ) - ऋ. (Rv.) १.१८.१-३; सा. (Sv.) १४६३

ऋ. (Rv.) १.१८.१-३

सोमानं स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवन्तं य औशिजः ॥१॥
यो रेवान् यो अमीवहा वसुवित् पुष्टिवर्धनः। स नः सिषक्तु यस्तुरः ॥२॥
मा नः शंसो अररुषो धूर्तिः प्रणङ् मर्त्यस्य। रक्षा णो ब्रह्मणस्पते ॥३॥
*somānaṁ svaraṇaṁ kṛṇuhi brahmaṇaspate | kakṣīvantaṁ ya auśijaḥ ||1 ||*
*yo revān yo amīvahā vasuvit puṣṭivardhanaḥ | sa naḥ siṣaktu yasturaḥ ||2 ||*
*mā naḥ śaṁso araruṣo dhūrtiḥ praṇaṅ martyasya | rakṣā ṇo brahmaṇaspate ||3 ||*

सा. (Sv.) १४६३

सोमानां स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवन्तं य औशिजः ॥२॥
*somānāṁ svaraṇaṁ kṛṇuhi brahmaṇaspate | kakṣīvantaṁ ya auśijaḥ ||2 ||*

३३. ब्रह्मणस्पतिर्-इन्द्र-सोमश्च (Brahmaṇaspatir-Indra-Somaścha) - ऋ. (Rv.) १.१८.४

स घा वीरो न रिष्यति यमिन्द्रो ब्रह्मणस्पतिः। सोमो हिनोति मर्त्यम्॥४॥
*sa ghā vīro na riṣyati yamindro brahmaṇaspatiḥ | somo hinoti martyam ||4 ||*

३४. ब्रह्मणस्पति-दक्षिणे (Brahmaṇaspati-Dakṣiṇe) - ऋ. (Rv.)१.१८.५

त्वं तं ब्रह्मणस्पते सोम इन्द्रश्च मर्त्यम्। दक्षिणा पात्वंहसः ॥५॥
*tvaṁ taṁ brahmaṇaspate soma indraścha martyam । dakṣiṇā pātvaṁhasaḥ ॥5॥*

३५. मरुतः (Marutaḥ) - ऋ. (Rv.) १.१५.२

मरुतः पिबत ऋतुना पोत्राद् यज्ञं पुनीतन। यूयं हि ष्ठा सुदानवः ॥२॥
*marutaḥ pibata ṛtunā potrād yajñaṁ punītana । yūyaṁ hi ṣṭhā sudānavaḥ ॥2॥*

३६. मित्रावरुणौ (Mitrāvaruṇau) - ऋ. (Rv.) १.१५.६; १.२३.४-६; सा. (Sv.) ७९३-७९५

ऋ. (Rv.) १.१५.६

युवं दक्षं धृतव्रत मित्रावरुण दूळभम्। ऋतुना यज्ञमाशाथे ॥६॥
*yuvaṁ dakṣaṁ dhṛtavrata mitrāvaruṇa dūḷabham । ṛtunā yajñamāśāthe ॥6॥*

ऋ. (Rv.) १.२३.४-६

मित्रं वयं हवामहे वरुणं सोमपीतये। जज्ञानां पूतदक्षसा ॥४॥
ऋतेन यावृतावृधावृतस्य ज्योतिषस्पती। ता मित्रावरुणा हुवे ॥५॥
वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः। करतां नः सुराधसः ॥६॥
*mitraṁ vayaṁ havāmahe varuṇaṁ somapītaye । jajñānāṁ pūtadakṣasā ॥4॥*
*ṛtena yāvṛtāvṛdhāvṛtasya jyotiṣaspatī । tā mitrāvaruṇā huve ॥5॥*
*varuṇaḥ prāvitā bhuvanmitro viśvābhirūtibhiḥ । karatāṁ naḥ surādhasaḥ ॥6॥*

सा. (Sv.) ७९३-७९५

मित्रं वयं हवामहे वरुणं सोमपीतये। या जाता पूतदक्षसा ॥१॥
ऋतेन यावृतावृधावृतस्य ज्योतिषस्पती। ता मित्रावरुणा हुवे ॥२॥
वरुणः प्रविता भुवन्मित्रो विश्वाभिरूतिभिः। कारतां नः सुराधसः ॥३॥
*mitraṁ vayaṁ havāmahe varuṇaṁ somapītaye । yā jātā pūtadakṣasā ॥1॥*
*ṛtena yāvṛtāvṛdhāvṛtasya jyotiṣaspatī । tā mitrāvaruṇā huve ॥2॥*
*varuṇaḥ pravitā bhuvanmitro viśvābhirūtibhiḥ । kāratāṁ naḥ surādhasaḥ ॥3॥*

३७. वनस्पतिः (Vanaspatiḥ) - ऋ. (Rv.) १.१३.११

अव सृजा वनस्पते देव देवेभ्यो हविः। प्र दातुरस्तु चेतनम् ॥११॥
*ava sṛjā vanaspate deva devebhyo haviḥ । pra dāturastu chetanam ॥11॥*

३८. वायुः (Vāyuḥ) - ऋ. (Rv.) १.२३.१

तीव्राः सोमास आ गह्याशीर्वन्तः सुता इमे। वायो तान्प्रस्थितान्पिब ॥१॥
*tīvrāḥ somāsa ā gahyāśīrvantaḥ sutā ime । vāyo tānprasthitānpiba ॥1॥*

३९. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १.१४.१-१२; १.२३.१०-१२

ऋ. (Rv.) १.१४.१-१२

ऐभिरग्ने दुवो गिरो विश्वेभिः सोमपीतये। देवेभिर्याहि यक्षि च ॥१॥
आ त्वा कण्वा अहूषत गृणन्ति विप्र ते धियः। देवेभिरग्न आ गहि ॥२॥
इन्द्रवायू बृहस्पतिं मित्राग्निं पूषणं भगम्। आदित्यान् मारुतं गणम् ॥३॥
प्र वो भ्रियन्त इन्दवो मत्सरा मादयिष्णवः। द्रप्सा मध्वश्चमूषदः ॥४॥
ईळते त्वामवस्यवः कण्वासो वृक्तबर्हिषः। हविष्मन्तो अरंकृतः ॥५॥
घृतपृष्ठा मनोयुजो ये त्वा वहन्ति वह्नयः। आ देवान्त्सोमपीतये ॥६॥
तान् यजत्राँ ऋतावृधोऽग्ने पत्नीवतस्कृधि। मध्वः सुजिह्व पायय ॥७॥
ये यजत्रा य ईड्यास्ते ते पिबन्तु जिह्वया। मधोरग्ने वषट्कृति ॥८॥
आकीं सूर्यस्य रोचनाद् विश्वान् देवाँ उषर्बुधः। विप्रो होतेह वक्षति ॥९॥
विश्वेभिः सोम्यं मध्वऽग्न इन्द्रेण वायुना। पिबा मित्रस्य धामभिः ॥१०॥
त्वं होता मनुर्हितोऽग्ने यज्ञेषु सीदसि। सेमं नो अध्वरं यज ॥११॥
युक्ष्वा ह्यरुषी रथे हरितो देव रोहितः। ताभिर्देवाँ इहा वह ॥१२॥
*aibhiragne duvo giro viśvebhiḥ somapītaye । devebhiryāhi yakṣi cha ॥1॥*
*ā tvā kaṇvā ahūṣata gṛṇanti vipra te dhiyaḥ । devebhiragna ā gahi ॥2॥*
*indravāyū bṛhaspatiṁ mitrāgiṁna pūṣaṇaṁ bhagam । ādityān mārutaṁ gaṇam ॥3॥*
*pra vo bhriyanta indavo matsarā mādayiṣṇavaḥ । drapsā madhvaśchamūṣadaḥ ॥4॥*

*īḻate tvāmavasyavaḥ kaṇvāso vṛktabarhiṣaḥ । haviṣmanto araṁkṛtaḥ ॥5 ॥*
*ghṛtapṛṣṭhā manoyujo ye tvā vahanti vahnayaḥ । ā devāntsomapītaye ॥6 ॥*
*tān yajatrāṁ ṛtāvṛdho'gne patnīvataskṛdhi । madhvaḥ sujihva pāyaya ॥7 ॥*
*ye yajatrā ya īḍyāste te pibantu jihvayā । madhoragne vaṣaṭkṛti ॥8 ॥*
*ākīṁ sūryasya rochanād viśvān devāṁ uṣarbudhaḥ । vipro hoteha vakṣati ॥9 ॥*
*viśvebhiḥ somyaṁ madhva'gna indreṇa vāyunā । pibā mitrasya dhāmabhiḥ ॥10 ॥*
*tvaṁ hotā manurhito'gne yajñeṣu sīdasi । semaṁ no adhvaraṁ yaja ॥11 ॥*
*yukṣavā hyaruṣī rathe harito deva rohitaḥ । tābhirdevāṁ ihā vaha ॥12 ॥*

ऋ. (Rv.) १.२३.१०-१२

विश्वान्देवान्हवामहे मरुतः सोमपीतये। उग्रा हि पृश्निमातरः ॥१० ॥
जयतामिव तन्यतुर्मरुतामेति धृष्णुया। यच्छुभं याथना नरः ॥११ ॥
हस्काराद्विद्युतस्पर्यतो जाता अवन्तु नः। मरुतो मृळयन्तु नः ॥१२ ॥
*viśvāndevānhavāmahe marutaḥ somapītaye । ugrā hi pṛśnimātaraḥ ॥10 ॥*
*jayatāmiva tanyaturmarutāmeti dhṛṣṇuyā । yachchhubhaṁ yāthanā naraḥ ॥11 ॥*
*haskārādvidyutasparyato jātā avantu naḥ । maruto mṛḻayantu naḥ ॥12 ॥*

४०. विष्णुः (Viṣṇuḥ) - ऋ. (Rv.) १.२२.१७-२१; सा. (Sv.) १६६९-१६७३

ऋ. (Rv.) १.२२.१७-२१

इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्। समूळ्हमस्य पांसुरे ॥१७ ॥
त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः। अतो धर्माणि धारयन्॥१८ ॥
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यः सखा॥१९ ॥
तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम् ॥२० ॥
तद्विप्रासो विपन्यवो जागृवांसः समिन्धते। विष्णोर्यत्परमं पदम् ॥२१ ॥
*idaṁ viṣṇurvi chakrame tredhā ni dadhe padam । samūḻahamasya pāṁsure ॥17 ॥*
*trīṇi padā vi chakrame viṣṇurgopā adābhyaḥ । ato dharmāṇi dhārayan ॥18 ॥*
*viṣṇoḥ karmāṇi paśyata yato vratāni paspaśe । indrasya yujyaḥ sakhā ॥19 ॥*
*tadviṣṇoḥ paramaṁ padaṁ sadā paśyanti sūrayaḥ । divīva chakṣurātatam ॥20 ॥*
*tadviprāso vipanyavo jāgṛvāṁsaḥ samindhate । viṣṇoryatparamaṁ padam ॥21 ॥*

सा. (Sv.) १६६९-१६७३

इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्। समूढमस्य पांसुले ॥१ ॥
त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः। अतो धर्माणि धारयन् ॥२ ॥
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यः सखा ॥३ ॥
तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम् ॥४ ॥
तद्विप्रासो विपन्जुवो जागृवांसः समिन्धते। विष्णोर्यत्परमं पदम् ॥५ ॥
*idaṁ viṣṇurvi chakrame tredhā ni dadhe padam । samūḍhamasya pāṁsule ॥1 ॥*
*trīṇi padā vi chakrame viṣṇurgopā adābhyaḥ । ato dharmāṇi dhārayan ॥2 ॥*
*viṣṇoḥ karmāṇi paśyata yato vratāni paspaśe । indrasya yujyaḥ sakhā ॥3 ॥*
*tadviṣṇoḥ paramaṁ padaṁ sadā paśyanti sūrayaḥ । divīva chakṣurātatam ॥4 ॥*
*tadviprāso vipanjuvo jāgṛvāṁsaḥ samindhate । viṣṇoryatparamaṁ padam ॥5 ॥*

४१. विष्णुर् देवा वा (Viṣṇur Devā Vā) - ऋ. (Rv.) १.२२.१६; सा. (Sv.) १६७४

ऋ. (Rv.) १.२२.१६

अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे। पृथिव्याः सप्त धामभिः ॥१६ ॥
*ato devā avantu no yato viṣṇurvichakrame । pṛthivyāḥ sapta dhāmabhiḥ ॥16 ॥*

सा. (Sv.) १६७४

अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे। पृथिव्या अधि सानवि ॥६ ॥
*ato devā avantu no yato viṣṇurvichakrame । pṛthivyā adhi sānavi ॥6 ॥*

४२. सदस्पतिः (Sadaspatiḥ) - ऋ. (Rv.) १.१८.६-८

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्। सनिं मेधामयासिषम् ॥६ ॥
यस्मादृते न सिध्यति यज्ञो विपश्चितश्चन। स धीनां योगमिन्वति ॥७ ॥

आदृध्नोति हविष्कृतिं प्रांचं कृणोत्यध्वरम्। होत्रा देवेषु गच्छति ॥८॥
*sadasaspatimadbhutaṁ priyamindrasya kāmyam | saniṁ medhāmayāsiṣam ||6 ||*
*yasmādṛte na sidhyati yajño vipaśchitaśchana | sa dhīnāṁ yogaminvati ||7 ||*
*ādṛdhnoti haviṣkṛtiṁ prāṁchaṁ kṛṇotyadhvaram | hotrā deveṣu gachchhati ||8 ||*

४३. सदस्पतिर् नाराशंसो वा (Sadaspatir Nārāśaṁso Vā) - ऋ. (Rv.) १.१८.९

नराशंसं सुधृष्टममपश्यं सप्रथस्तमम्। दिवो न सद्ममखसम् ॥९॥
*narāśaṁsaṁ sudhṛṣṭamamapaśyaṁ saprathastamam | divo na sadmamakhasam ||9 ||*

४४. सविता (Savitā) - ऋ. (Rv.) १.२२.५-८

हिरण्यपाणिमूतये सवितारमुप ह्वये। स चेत्ता देवता पदम् ॥५॥
अपां नपातमवसे सवितारमुप स्तुहि। तस्य व्रतान्युश्मसि ॥६॥
विभक्तारं हवामहे वसोश्चित्रस्य राधसः। सवितारं नृचक्षसम् ॥७॥
सखाय आ नि षीदत सविता स्तोम्यो नु नः। दाता राधांसि शुम्भति ॥८॥
*hiraṇyapāṇimūtaye savitāramupa hvaye | sa chettā devatā padam ||5 ||*
*apāṁ napātamavase savitāramupa stuhi | tasya vratānyuśmasi ||6 ||*
*vibhaktāraṁ havāmahe vasośchitrasya rādhasaḥ | savitāraṁ nṛchakṣasam ||7 ||*
*sakhāya ā ni ṣīdata savitā stomyo nu naḥ | dātā rādhāṁsi śumbhati ||8 ||*

४५. स्वाहाकृतयः (Svāhākṛtayaḥ) - ऋ. (Rv.) १.१३.१२

स्वाहा यज्ञं कृणोतनेन्द्राय यज्वनो गृहे। तत्र देवाँ उप ह्वये ॥१२॥
*svāhā yajñaṁ kṛṇotanendrāya yajvano gṛhe | tatra devāṁ̐ upa hvaye ||12 ||*

## ५०९. मेधातिथिः काण्वः (साग्री. सास्वा.); शंयुर् बार्हस्पत्यः (ऋसर्व. ८.४५.२५); भरद्वाजः (सार्षेदी.) (Medhātithiḥ Kāṇvaḥ [Ssb. Sas.]; Śaṁyur Bārhaspatyaḥ [Rss. 8.45.25]; Bharadvājaḥ [Sad.])

१. इन्द्रः (साग्री. सास्वा.सार्षेदी.); इन्द्रापूषणौ (ऋसर्व. . ८.४५.२५) - सा. (Sv.) १४६

इमा उ त्वा पुरूवसोऽभि प्र नोनुवुर्गिरः। गावो वत्सं न धेनवः ॥२॥
*imā u tvā purūvaso'bhi pra nonuvurgiraḥ | gāvo vatsaṁ na dhenavaḥ ||2 ||*

## ५१०. मेधातिथिः काण्वः प्रियमेधश्च आंगिरसः (Medhātithiḥ Kāṇvaḥ Priyamedhaścha Āṁgirasaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.२.१-४०; सा. (Sv.) १२३; १२४; १५७; २२५; २२७; ७१९-७२१; १६५७-१६५९; अ. (Av.) २०.१८.१-३

ऋ. (Rv.) ८.२.१-४०

इदं वसो सुतमन्धः पिबा सुपूर्णमुदरम्। अनाभयिन्नरिमा ते ॥१॥
नृभिर्धूतः सुतो अश्नैरव्यो वारैः परिपूतः। अश्वो न निक्तो नदीषु ॥२॥
तं ते यवं यथा गोभिः स्वादुमकर्म श्रीणन्तः। इन्द्र त्वास्मिन्त्सधमादे ॥३॥
इन्द्र इत्सोमपा एक इन्द्रः सुतपा विश्वायुः। अन्तर्देवान् मर्त्याँश्च ॥४॥
न यं शुक्रो न दुराशीर्न तृप्रा उरुव्यचसम्। अपस्पृण्वते सुहार्दम् ॥५॥
गोभिर्यदीमन्ये अस्मन्मृगं न व्रा मृगयन्ते। अभित्सरन्ति धेनुभिः ॥६॥
त्रयः कोशासः श्चोतन्ति तिस्रश्चम्व१ः सुपूर्णाः। समाने अधि भार्मन् ॥८॥
शुचिरसि पुरुनिष्ठाः क्षीरैर्मध्यत आशीर्तः। दध्ना मन्दिष्ठः शूरस्य ॥९॥
इमे त इन्द्र सोमास्तीव्रा अस्मे सुतासः। शुक्रा आशिरं याचन्ते ॥१०॥
ताँ आशिरं पुरोळाशमिन्द्रेमं सोमं श्रीणीहि। रेवन्तं हि त्वा शृणोमि ॥११॥
हृत्सु पीतासो युध्यन्ते दुर्मदासो न सुरायाम्। ऊधर्न नग्ना जरन्ते ॥१२॥
रेवाँ इद्रेवतः स्तोता स्यात्त्वावतो मघोनः। प्रेदु हरिवः श्रुतस्य ॥१३॥
उक्थं चन शस्यमानमगोररिरा चिकेत। न गायत्रं गीयमानम् ॥१४॥
मा न इन्द्र पीयत्नवे मा शर्धते परा दाः। शिक्षा शचीवः शचीभिः ॥१५॥
वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः। कण्वा उक्थेभिर्जरन्ते ॥१६॥
न घेमन्यदा पपन वज्रिन्नपसो नविष्टौ। तवेदु स्तोमं चिकेत ॥१७॥
इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति। यन्ति प्रमादमतन्द्राः ॥१८॥

ओ षु प्र याहि वाजेभिर्मा अभ्य१स्मान। महाँ इव युवजानिः ॥१९॥
मो ष्व१द्य दुर्हणावान्त्सायं करदारे अस्मत्। अश्रीरइव जामाता ॥२०॥
विद्मा ह्यस्य वीरस्य भूरिदावरीं सुमतिम्। त्रिषु जातस्य मनांसि ॥२१॥
आ तू षिंच कण्वमन्तं न घा विद्म शवसानात्। यशस्तरं शतमूतेः ॥२२॥
ज्येष्ठेन सोतरिन्द्राय सोमं वीराय शक्राय। भरा पिबन्नर्याय ॥२३॥
यो वेदिष्ठो अव्यथिष्वश्वावन्तं जरितृभ्यः। वाजं स्तोतृभ्यो गोमन्तम् ॥२४॥
पन्यंपन्यमित्सोतार आ धावत मद्याय। सोमं वीराय शूराय ॥२५॥
पाता वृत्रहा सुतमा घा गमन्नारे अस्मत्। नि यमते शतमूतिः ॥२६॥
एह हरी ब्रह्मयुजा शग्मा वक्षतः सखायम्। गीर्भिः श्रुतं गिर्वणसम् ॥२७॥
स्वादवः सोमा आ याहि श्रीताः सोमा आ याहि ।
शिप्रिन्नृषीवः शचीवो नायमच्छा सधमादम् ॥२८॥
स्तुतश्च यास्त्वा वर्धन्ति महे राधसे नृम्णाय। इन्द्र कारिणं वृधन्तः ॥२९॥
गिरश्च यास्ते गिर्वाह उक्था च तुभ्यं तानि। सत्रा दधिरे शवांसि ॥३०॥
एवेदेष तुविकूर्मिवाजाँ एको वज्रहस्तः। सनादमृक्तो दयते ॥३१॥
हन्ता वृत्रं दक्षिणेनेन्द्रः पुरू पुरुहूतः। महान्महीभिः शचीभिः ॥३२॥
यस्मिन् विश्वाश्चर्षणय उत च्यौत्ना ज्रयांसि च। अनु घेन्मन्दी मघोनः ॥३३॥
एष एतानि चकारेन्द्रो विश्वा योऽति शृण्वे। वाजदावा मघोनाम् ॥३४॥
प्रभर्ता रथं गव्यन्तमपाकाच्चिद्यमवति। इनो वसु स हि वोळ्हा ॥३५॥
सनिता विप्रो अर्वद्भिर्हन्ता वृत्रं नृभिः शूरः। सत्योऽविता विधन्तम् ॥३६॥
यजध्वैनं प्रियमेधा इन्द्रं सत्राचा मनसा। यो भूत्सोमैः सत्यमद्वा ॥३७॥
गाथश्रवसं सतपतिं श्रवस्कामं पुरुत्मानम्। कण्वासो गात वाजिनम् ॥३८॥
य ऋते चिद्गास्पदेभ्यो दात् सखा नृभ्यः शचीवान्। ये अस्मिन्काममश्रियन् ॥३९॥
इत्था धीवन्तमद्रिवः काण्वं मेध्यातिथिम्। मेषो भूतो३ऽभि यन्नयः ॥४०॥

*idaṁ vaso sutamandhaḥ pibā supūrṇamudaram | anābhayinnarimā te ||1 ||*
*nṛbhirdhūtaḥ suto aśnairavyo vāraiḥ paripūtaḥ | aśvo na nikto nadīṣu ||2 ||*
*taṁ te yavaṁ yathā gobhiḥ svādumakarma śrīṇantaḥ | indra tvāsmintsadhamāde ||3 ||*
*indra itsomapā eka indraḥ sutapā viśvāyuḥ | antardevān matyām̐ścha ||4 ||*
*na yaṁ śukro na durāśīrna tṛprā uruvyachasam | apaspṛṇvate suhārdam ||5 ||*
*gobhiryadīmanye asmanmṛgaṁ na vrā mṛgayante | abhitsaranti dhenubhiḥ ||6 ||*
*trayaḥ kośāsaḥ śchotanti tisraśchamva1ḥ supūrṇāḥ | samāne adhi bhārman ||8 ||*
*śuchirasi puruniṣṭhāḥ kṣīrairmadhyata āśīrtaḥ | dadhnā mandiṣṭhaḥ śūrasya ||9 ||*
*ime ta indra somāstīvrā asme sutāsaḥ | śukrā āśiraṁ yāchante ||10 ||*
*tām̐ āśiraṁ puroḷāśamindremaṁ somaṁ śrīṇīhi | revantaṁ hi tvā śṛṇomi ||11 ||*
*hṛtsu pītāso yudhyante durmadāso na surāyām | ūdharna nagnā jarante ||12 ||*
*revām̐ idrevataḥ stotā syāttvāvato maghonaḥ | predu harivaḥ śrutasya ||13 ||*
*ukthaṁ chana śasyamānamagorarirā chiketa | na gāyatraṁ gīyamānam ||14 ||*
*mā na indra pīyatnave mā śardhate parā dāḥ | śikṣā śachīvaḥ śachībhiḥ ||15 ||*
*vayamu tvā tadidarthā indra tvāyantaḥ sakhāyaḥ | kaṇvā ukthebhirjarante ||16 ||*
*na ghemanyadā papana vajrinnapaso naviṣṭau | tavedu stomaṁ chiketa ||17 ||*
*ichchhanti devāḥ sunvantaṁ na svapnāya spṛhayanti | yanti pramādamatandrāḥ ||18 ||*
*o ṣu pra yāhi vājebhirmā abhya1smāna | mahām̐ iva yuvajāniḥ ||19 ||*
*mo ṣva1dya durhaṇāvāntsāyaṁ karadāre asmat | aśrīraiva jāmātā ||20 ||*
*vidmā hyasya vīrasya bhūridāvarīṁ sumatim | triṣu jātasya manāṁsi ||21 ||*
*ā tū ṣiṁcha kaṇvamantaṁ na ghā vidma śavasānāt | yaśastaraṁ śatamūteḥ ||22 ||*
*jyeṣṭhena sotarindrāya somaṁ vīrāya śakrāya | bharā pibannaryāya ||23 ||*
*yo vediṣṭho avyathiṣvaśvāvantaṁ jaritṛbhyaḥ | vājaṁ stotṛbhyo gomantam ||24 ||*
*panyaṁpanyamitsotāra ā dhāvata madyāya | somaṁ vīrāya śūrāya ||25 ||*
*pātā vṛtrahā sutamā ghā gamannāre asmat | ni yamate śatamūtiḥ ||26 ||*
*eha harī brahmayujā śagmā vakṣataḥ sakhāyam | gīrbhiḥ śrutaṁ girvaṇasam ||27 ||*
*svādavaḥ somā ā yāhi śrītāḥ somā ā yāhi |*
*śiprinnṛṣīvaḥ śachīvo nāyamachchhā sadhamādam ||28 ||*

*stutaścha yāstvā vardhanti mahe rādhase nṛmṇāya | indra kāriṇaṁ vṛdhantaḥ ||29 ||*
*giraścha yāste girvāha ukthā cha tubhyaṁ tāni | satrā dadhire śavāṁsi ||30 ||*
*evedeṣa tuvikūrmivājām̐ eko vajrahastaḥ | sanādamṛkto dayate ||31 ||*
*hantā vṛtraṁ dakṣiṇenendraḥ purū puruhūtaḥ | mahānmahībhiḥ śachībhiḥ ||32 ||*
*yasmin viśvāścharṣaṇaya uta chyautnā jrayāṁsi cha | anu ghenmandī maghonaḥ ||33 ||*
*eṣa etāni chakārendro viśvā yo'ti śṛṇve | vājadāvā maghonām ||34 ||*
*prabhartā rathaṁ gavyantamapākāchchidyamavati | ino vasu sa hi voḷahā ||35 ||*
*sanitā vipro arvadbhirhantā vṛtraṁ nṛbhiḥ śūraḥ | satyo'vitā vidhantam ||36 ||*
*yajadhvainaṁ priyamedhā indraṁ satrāchā manasā | yo bhūtsomaiḥ satyamadvā ||37 ||*
*gāthaśravasaṁ satapatiṁ śravaskāmaṁ purutmānam | kaṇvāso gāta vājinam ||38 ||*
*ya ṛte chidgāspadebhyo dāt sakhā nṛbhyaḥ śachīvān | ye asminkāmamaśriyan ||39 ||*
*itthā dhīvantamadrivaḥ kāṇvaṁ medhyātithim | meṣo bhūto3'bhi yannayaḥ ||40 ||*

सा. (Sv.) १२३-१२४

पन्यंपन्यमित्सोतार आ धावत मद्याय। सोमं वीराय शूराय ॥९॥
इदं वसो सुतमन्धः पिबा सुपूर्णमुदरम्। अनाभयिन्ररिमा ते ॥१०॥
*panyaṁpanyamitsotāra ā dhāvata madyāya | somaṁ vīrāya śūrāya ||9 ||*
*idaṁ vaso sutamandhaḥ pibā supūrṇamudaram | anābhayinrarimā te ||10 ||*

सा. (Sv.) १५७

वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः। कण्वा उक्थेभिर्जरन्ते ॥३॥
*vayamu tvā tadidarthā indra tvāyantaḥ sakhāyaḥ | kaṇvā ukthebhirjarante ||3 ||*

सा. (Sv.) २२५

उक्थं च न शस्यमानं नागो रयिरा चिकेत। न गायत्रं गीयमानम् ॥३॥
*ukthaṁ cha na śasyamānaṁ nāgo rayirā chiketa | na gāyatraṁ gīyamānam ||3 ||*

सा. (Sv.) २२७

आ याह्युपः नः सुतं वाजेभिर्मा हृणीयथाः। महाँ इव युवजानिः ॥५॥
*ā yāhyupaḥ naḥ sutaṁ vājebhirmā hṛṇīyathāḥ | mahām̐ iva yuvajāniḥ ||5 ||*

सा. (Sv.) ७१९-७२१

वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः। कण्वा उक्थेभिर्जरन्ते ॥१॥
न घेमन्यदा पपन वजिन्नपसो नविष्टौ। तवेदु स्तोमैश्चिकेत ॥२॥
इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति। यन्ति प्रमादमतन्द्राः ॥३॥
*vayamu tvā tadidarthā indra tvāyantaḥ sakhāyaḥ | kaṇvā ukthebhirjarante ||1 ||*
*na ghemanyadā papana vajinnapaso naviṣṭau | tavedu stomaiśchiketa ||2 ||*
*ichchhanti devāḥ sunvantaṁ na svapnāya spṛhayanti | yanti pramādamatandrāḥ ||3 ||*

सा. (Sv.) १६५७-१६५९

पन्यंपन्यमित्सोतार आ धावत मद्याय। सोमं वीराय शूराय ॥१॥
एह हरी ब्रह्मयुजा शग्मा वक्षतः सखायम्। इन्द्रं गीर्भिर्गिर्वणसम् ॥२॥
पाता वृत्रहा सुतमा घा गमन्नारे अस्मत्। नि यमते शतमूतिः ॥३॥
*panyaṁpanyamitsotāra ā dhāvata madyāya | somaṁ vīrāya śūrāya ||1 ||*
*eha harī brahmayujā śagmā vakṣataḥ sakhāyam | indraṁ gīrbhirgirvaṇasam ||2 ||*
*pātā vṛtrahā sutamā ghā gamannāre asmat | ni yamate śatamūtiḥ ||3 ||*

अ. (Av.) २०.१८.१-३

वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः। कण्वा उक्थेभिर्जरन्ते ॥१॥
न घेमन्यदा पपन वज्रिन्नपसो नविष्टौ। त्वेदु स्तोमं चिकेत ॥२॥
इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति। यन्ति प्रमादमतन्द्राः ॥३॥
*vayamu tvā tadidarthā indra tvāyantaḥ sakhāyaḥ | kaṇvā ukthebhirjarante ||1 ||*
*na ghemanyadā papana vajrinnapaso naviṣṭau | tvedu stomaṁ chiketa ||2 ||*
*ichchhanti devāḥ sunvantaṁ na svapnāya spṛhayanti | yanti pramādamatandrāḥ ||3 ||*

## ५११. मेधातिथि-मेध्यातिथी काण्वौ (Medhātithi-Medhyātithī Kāṇvau)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.१.३-२९; सा. (Sv.) ५२; २४४; २४५; २७१; २९१; २९२;

३०७; १३९१-१३९३

ऋ. (Rv.) ८.१.३-२९

यच्चिद्धित्वा जना इमे नाना हवन्त ऊतये ।
अस्माकं ब्रह्मोदमिन्द्र भूतु तेऽहा विश्वा च वर्धनम् ॥३॥
वि तर्तूर्यन्ते मघवन् विपश्चितोऽर्यो विपो जनानाम् ।
उप क्रमस्व पुरुरूपमा भर वाजं नेदिष्ठमूतये ॥४॥
महे चन त्वामद्रिवः परा शुल्काय देयाम् ।
न सहस्राय नायुताय वज्रिवो न शताय शतामघ ॥५॥
वस्याँ इन्द्रासि मे पितुरुत भ्रातुरभुंजतः ।
माता च मे छदयथः समा वसो वसुत्वनाय राधसे ॥६॥
क्वेयथ क्वेदसि पुरुत्रा चिद्धि ते मनः ।
अलर्षि युध्म खजकृत पुरन्दर प्र गायत्रा अगासिषुः ॥७॥
प्रास्मै गायत्रमर्चत वावातुर्यः पुरन्दरः ।
याभिः काण्वस्योप बर्हिरासदं यासद्वज्री भिनत्पुरः ॥८॥
ये ते सन्ति दशग्विनः शतिनो ये सहस्रिणः ।
अश्वासो ये ते वृषणो रघुद्रुवस्तेभिर्नस्तूयमा गहि ॥९॥
आ त्व१द्य सबर्दुघां हुवे गायत्रवेपसम् । इन्द्रं धेनुं सुदुघामन्यामिषमुरुधारामरंकृतम् ॥१०॥
यत्तुदत् सूर एतशं वंकू वातस्य पर्णिना ।
वहत् कुत्समार्जुनेयं शतक्रतुस्त्सरद् गन्धर्वमस्तृतम् ॥११॥
य ऋते चिदभिश्रिषः पुरा जत्रुभ्यः आतृदः ।
सन्धाता सन्धिं मघवा पुरूवसुरिष्कर्ता विह्रुतंपुनः ॥१२॥
मा भूम निष्ट्याइवेन्द्र त्वदरणा इव । वनानि न प्रजहितान्यद्रिवो दुरोषासो अमन्महि ॥१३॥
अमन्महीदनाशवोऽनुग्रासश्च वृत्रहन् । सकृत्सु ते महता शूर राधसानु स्तोमं मुदीमहि ॥१४॥
यदि स्तोमं मम श्रवदस्माकमिन्द्रमिन्दवः ।
तिरः पवित्रं ससृवांस आशवो मन्दनतु तुग्र्यावृधः ॥१५॥
आ त्व१द्य सधस्तुतिं वावातुः सख्युरा गहि ।
उपस्तुतिर्मघोनां प्र त्वावत्वधा ते वश्मि सुष्टुतिम् ॥१६॥
सोता हि सोममाद्रिभिरेमेनमप्सु धावत ।
गव्या वस्त्रेव वासयन्त इन्नरो निर्धुक्षन्वक्षणाभ्यः ॥१७॥
अध ज्मो अध वा दिवो बृहतो रोचनादधि ।
अया वर्धस्व त्नवा गिरा ममा जाता सुकृतो पृण ॥१८॥
इन्द्राय सु मदिन्तमं सोमं सोता वरेण्यम् ।
शक्र एणं पीपयद्विश्वया धिया हिन्वानं न वाजयुम् ॥१९॥
मा त्वा सोमस्य गल्दया सदा याचन्नहं गिरा ।
भूर्णिं मृगं न सवनेषु चुक्रुधं क इशानं न याचिषत् ॥२०॥
मदेनेषितं मदमुग्रमुग्रेण शवसा । विश्वेषां तरुतारं मदच्युतं मदे हि ष्मा ददाति नः ॥२१॥
शेवारे वार्या पुरु देवो मर्ताय दाशुषे ।
स सुन्वते च स्तुवते च रासते विश्वगूर्तो अरिष्टुतः ॥२२॥
एन्द्र याहि मत्स्व चित्रेण देव राधसा ।
सरो न प्रास्युदरं सपीतिभिरा सोमेभिरुरु स्फिरम् ॥२३॥
आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये ।
ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये ॥२४॥
आ त्वा रथे हिरण्यये हरी मयूरशेप्या ।
शितिपृष्ठा वहतां मध्वो अन्धसो विवक्षणस्य पीतये ॥२५॥
पिबा त्व१स्य गिर्वणः सुतस्य पूर्वपा इव ।
परिष्कृतस्य रसिन इयमासुतिश्चारुर्मदाय पत्यते ॥२६॥
य एको अस्ति दंसना महाँ उग्रो अभि व्रतैः ।

गमत्स शिप्री न स योषदा गमद्धवं न परि वर्जति ॥२७॥
त्वं पुरं चरिष्ण्वं वधैः शुष्णस्य सं पिणक् ।
त्वं भा अनु चरो अध द्विता यदिन्द्र हव्यो भुवः ॥२८॥
मम त्वा सूर उदिते मम मध्यन्दिने दिवः ।
मम प्रपित्वे अपिशर्वरे वसवा स्तोमासो अवृत्सत ॥२९॥
*yachchiddhitvā janā ime nānā havanta ūtaye ।*
*asmākaṁ brahmodamindra bhūtu te'hā viśvā cha vardhanam ॥3॥*
*vi tartūryante maghavan vipaśchito'ryo vipo janānām ।*
*upa kramasva pururūpamā bhara vājaṁ nediṣṭhamūtaye ॥4॥*
*mahe chana tvāmadrivaḥ parā śulkāya deyām ।*
*na sahasrāya nāyutāya vajrivo na śatāya śatāmagha ॥5॥*
*vasyāṁ̐ indrāsi me pituruta bhrāturabhuṁjataḥ ।*
*mātā cha me chhadayathaḥ samā vaso vasutvanāya rādhase ॥6॥*
*kveyatha kvedasi purutrā chiddhi te manaḥ ।*
*alarṣi yudhma khajakṛta purandara pra gāyatrā agāsiṣuḥ ॥7॥*
*prāsmai gāyatramarchata vāvāturyaḥ purandaraḥ ।*
*yābhiḥ kāṇvasyopa barhirāsadaṁ yāsadvajrī bhinatpuraḥ ॥8॥*
*ye te santi daśagvinaḥ śatino ye sahasriṇaḥ ।*
*aśvāso ye te vṛṣaṇo raghudruvastebhirnastūyamā gahi ॥9॥*
*ā tva1dya sabardughāṁ huve gāyatravepasam । indraṁ dhenuṁ*
*sudughāmanyāmiṣamurudhārāmaraṁkṛtam ॥10॥*
*yattudat sūra etaśaṁ vaṁkū vātasya parṇinā ।*
*vahat kutsamārjuneyaṁ śatakratustsarad gandharvamastṛtam ॥11॥*
*ya ṛte chidabhiśriṣaḥ purā jatrubhyaḥ ātṛdaḥ ।*
*sandhātā saniṁdha maghavā purūvasuriṣkartā vihrutaṁpunaḥ ॥12॥*
*mā bhūma niṣṭyāivendra tvadaraṇā iva ।*
*vanāni na prajahitānyadrivo duroṣāso amanmahi ॥13॥*
*amanmahīdanāśavo'nugrāsaścha vṛtrahan ।*
*sakṛtsu te mahatā śūra rādhasānu stomaṁ mudīmahi ॥14॥*
*yadi stomaṁ mama śravadasmākamindramindavaḥ ।*
*tiraḥ pavitraṁ sasṛvāṁsa āśavo mandanatu tugryāvṛdhaḥ ॥15॥*
*ā tva1dya sadhastutiṁ vāvātuḥ sakhyurā gahi ।*
*upastutirmaghonāṁ pra tvāvatvadhā te vaśmi suṣṭutim ॥16॥*
*sotā hi somamādribhiremenamapsu dhāvata ।*
*gavyā vastreva vāsayanta innaro nirdhukṣanvakṣaṇābhyaḥ ॥17॥*
*adha jmo adha vā divo bṛhato rochanādadhi ।*
*ayā vardhasva tnavā girā mamā jātā sukṛto pṛṇa ॥18॥*
*indrāya su madintamaṁ somaṁ sotā vareṇyam ।*
*śakra eṇaṁ pīpayadviśvayā dhiyā hinvānaṁ na vājayum ॥19॥*
*mā tvā somasya galdayā sadā yāchannahaṁ girā ।*
*bhūrṇiṁ mṛgaṁ na savaneṣu chukrudhaṁ ka iraśānaṁ na yāchiṣat ॥20॥*
*madeneṣitaṁ madamugramugreṇa śavasā ।*
*viśveṣāṁ tarutāraṁ madachyutaṁ made hi ṣmā dadāti naḥ ॥21॥*
*śevāre vāryā puru devo martāya dāśuṣe ।*
*sa sunvate cha stuvate cha rāsate viśvagūrto ariṣṭutaḥ ॥22॥*
*endra yāhi matsva chitreṇa deva rādhasā ।*
*saro na prāsyudaraṁ sapītibhirā somebhiruru sphiram ॥23॥*
*ā tvā sahasramā śataṁ yuktā rathe hiraṇyaye ।*
*brahmayujo haraya indra keśino vahantu somapītaye ॥24॥*
*ā tvā rathe hiraṇyaye harī mayūraśepyā ।*
*śitipṛṣṭhā vahatāṁ madhvo andhaso vivakṣaṇasya pītaye ॥25॥*
*pibā tva1sya girvaṇaḥ sutasya pūrvapā iva ।*
*pariṣkṛtasya rasina iyamāsutiśchārurmadāya patyate ॥26॥*
*ya eko asti daṁsanā mahāṁ̐ ugro abhi vrataiḥ ।*

*gamatsa śiprī na sa yoṣadā gamaddhavaṁ na pari varjati ॥27 ॥*
*tvaṁ puraṁ chariṣṇvaṁ vadhaiḥ śuṣṇasya saṁ piṇak ।*
*tvaṁ bhā anu charo adha dvitā yadindra havyo bhuvaḥ ॥28 ॥*
*mama tvā sūra udite mama madhyandine divaḥ ।*
*mama prapitve apiśarvare vasavā stomāso avṛtsata ॥29 ॥*

सा. (Sv.) ५२

अध ज्मो अध वा दिवो बृहतो रोचनादधि।
अया वर्धस्व तन्वा गिरा ममा जाता सुक्रतो पृण ॥८॥
*adha jmo adha vā divo bṛhato rochanādadhi ।*
*ayā vardhasva tanvā girā mamā jātā sukrato pṛṇa ॥8 ॥*

सा. (Sv.) २४४-२४५

य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः।
सन्धाता सन्धिं मघवा पुरूवसुर्निष्कर्ता विह्रुतं पुनः ॥२॥
आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये।
ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये ॥३॥
*ya ṛte chidabhiśriṣaḥ purā jatrubhya ātṛdaḥ ।*
*sandhātā sandhiṁ maghavā purūvasurniṣkartā vihratam punaḥ ॥2 ॥*
*ā tvā sahasramā śataṁ yuktā rathe hiraṇyaye ।*
*brahmayujo haraya indra keśino vahantu somapītaye ॥3 ॥*

सा. (Sv.) २७१

क्वेयथ क्वेदसि पुरुत्रा चिद्धि ते मनः। अलर्षि युध्म खजकृत्पुरंदर प्र गायत्रा अगासिषुः ॥९॥
*kveyatha kvedasi purutrā chiddhi te manaḥ ।*
*alarṣi yudhma khajakṛtpuraṁdara pra gāyatrā agāsiṣuḥ ॥9 ॥*

सा. (Sv.) २९१-२९२

महे च न त्वाद्रिवः परा शुल्काय दीयसे।
न सहस्राय नायुताय वज्रिवो न शताय शतामघ ॥९॥
वस्याँ इन्द्रासि मे पितुरुत भ्रातुरभुंजतः।
माता च मे छदयथः समा वसो वसुत्वनाय राधसे ॥१०॥
*mahe cha na tvādrivaḥ parā śulkāya dīyase ।*
*na sahasrāya nāyutāya vajrivo na śatāya śatāmagha ॥9 ॥*
*vasyām̐ indrāsi me pituruta bhrāturabhuṁjataḥ ।*
*mātā cha me chhadayathaḥ samā vaso vasutvanāya rādhase ॥10 ॥*

सा. (Sv.) ३०७

आ त्वा सोमस्य गल्दया सदा याचन्नहं ज्या ।
भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत् ॥५॥
*ā tvā somasya galdayā sadā yāchannahaṁ jyā ।*
*bhūrṇiṁ mṛgaṁ na savaneṣu chukrudhaṁ ka īśānaṁ na yāchiṣat ॥5 ॥*

सा. (Sv.) १३९१-१३९३

आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये।
ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये ॥१॥
आ त्वा रथे हिरण्यये हरी मयूरशेप्या।
शितिपृष्ठा वहतां मध्वो अन्धसो विवक्षणस्य पीतये ॥२॥
पिबा त्व३स्य गिर्वणः सुतस्य पूर्वपा इव।
परिष्कृतस्य रसिन इयमासुतिश्चारुर्मदाय पत्यते ॥३॥
*ā tvā sahasramā śataṁ yuktā rathe hiraṇyaye ।*
*brahmayujo haraya indra keśino vahantu somapītaye ॥1 ॥*
*ā tvā rathe hiraṇyaye harī mayūraśepyā ।*
*śitipṛṣṭhā vahatāṁ madhvo andhaso vivakṣaṇasya pītaye ॥2 ॥*
*pibā tva3sya girvaṇaḥ sutasya pūrvapā iva ।*

*pariṣkṛtasya rasina iyamāsutiśchārurmadāya patyate //3 //*

## ५१२. मेधातिथि-मेध्यातिथी काण्वौ (ऋसर्व.); मेधातिथि-मेध्यातिथी काण्वौ; विश्वामित्र इत्येके (साग्री. सास्वा. सार्षेदी.) (Medhātithi-Medhyātithī Kāṇvau [Rss.]; Medhātithi-Medhyātithī Kāṇvau; Viśvāmitra Ityeke [Ssb. Sas. Sad.])

१. इन्द्रः (Indraḥ) - सा. (Sv.) २९५

आ त्वाउद्य सबर्दुघां हुवे गायत्रवेपसम्। इन्द्रं धेनुं सुदुघामन्यामिषमुरुधारामरंकृतम् ॥३॥
*ā tvā3dya sabardughāṁ huve gāyatravepasam / indraṁ dhenuṁ sudughāmanyāmiṣamurudhārāmaraṁkṛtam //3 //*

## ५१३. मेध्यः काण्वः (Medhyaḥ Kāṇvaḥ)

१. अश्विनौ (Aśvinau) - ऋ. (Rv.) ८.५७.१-४

युवं देवा क्रतुना पूर्व्येण युक्ता रथेन तविषं यजत्रा ।
आगच्छतं नासत्या शचीभिरिदं तृतीयं सवनं पिबाथः ॥१॥
युवां देवास्त्रय एकादशासः सत्याः सत्यस्य दद्दशे पुरस्तात् ।
अस्माकं यज्ञं सवनं जुषाणा पातं सोममश्विना दीद्यग्नी ॥२॥
पनाय्यं तदश्विना कृतं वां वृषभो दिवो रजसः पृथिव्याः ।
सहस्रं शंसा उत ये गविष्टौ सर्वाँ इत्ताँ उप याता पिबध्यै ॥३॥
अयं वां भागो निहितो यजत्रेमा गिरो नासत्योप यातम् ।
पिबतं सोमं मधुमन्तमस्मे प्र दाश्वांसमवतं शचीभिः ॥४॥
*yuvaṁ devā kratunā pūrvyeṇa yuktā rathena taviṣaṁ yajatrā /*
*āgachchhataṁ nāsatyā śachībhiridaṁ tṛtīyaṁ savanaṁ pibāthaḥ //1 //*
*yuvāṁ devāstraya ekādaśāsaḥ satyāḥ satyasya dadṛśe purastāt /*
*asmākaṁ yajñaṁ savanaṁ juṣāṇā pātaṁ somamaśvinā dīdyagnī //2 //*
*panāyyaṁ tadaśvinā kṛtaṁ vāṁ vṛṣabho divo rajasaḥ pṛthivyāḥ /*
*sahasraṁ śaṁsā uta ye gaviṣṭau savaṁār ittāṁ upa yātā pibadhyai //3 //*
*ayaṁ vāṁ bhāgo nihito yajatremā giro nāsatyopa yātam /*
*pibataṁ somaṁ madhumantamasme pra dāśvāṁsamavataṁ śachībhiḥ //4 //*

२. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.५३.१-८

उपमं त्वा मघोनांज्येष्ठंच वृषभाणाम् । पूर्भित्तमं मघवन्निन्द्र गोविदमीशानं राय ईमहे ॥१॥
य आयुं कुत्समतिथिग्वमर्दयो वावृधानो दिवेदिवे ।
तं त्वा वयं हर्यश्वं शतक्रतुं वाजयन्तो हवामहे ॥२॥
आ नो विश्वेषां रसं मध्वः सिंचन्त्वद्रयः । ये परावति पुन्विरे जनेष्वा ये अर्वावतीन्दवः ॥३॥
विश्वा द्वेषांसि जहि चाव चा कृधि विश्वे सन्वन्त्वा वसु ।
शीष्टेषु चित्ते मदिरासो अंशवो यत्रा सोमस्य तृम्पसि ॥४॥
इन्द्र नेदीय एदिहि मितमेधाभिरूतिभिः । आ शंतम शंतमाभिरभिष्टिभिरा स्वापे स्वपिभिः ॥५॥
अजितुरं सत्पतिं विश्वचर्षणिं कृधि प्रजास्वाभगम् ।
प्र सू तिरा शचीभिर्ये त उक्थिनः क्रतुं पुनत आनुषक् ॥६॥
यस्ते साधिष्ठोऽवसे ते स्याम भरेषु ते । वयं होत्राभिरुत देवहूतिभिः ससवांसो मनामहे ॥७॥
अहं हि ते हरिवो ब्रह्म वाजयुराजिं यामि सदोतिभिः।
त्वामिदेव तममे समश्वयुर्गव्युरग्रे मथीनाम् ॥८॥
*upamaṁ tvā maghonāṁjyeṣṭhaṁcha vṛṣabhāṇām /*
*pūrbhittamaṁ maghavannindra govidamīśānaṁ rāya īmahe //1 //*
*ya āyuṁ kutsamatithigvamardayo vāvṛdhāno divedive /*
*taṁ tvā vayaṁ haryaśvaṁ śatakratuṁ vājayanto havāmahe //2 //*
*ā no viśveṣāṁ rasaṁ madhvaḥ siṁchantvadrayaḥ /*
*ye parāvati punvire janeṣvā ye arvāvatīndavaḥ //3 //*
*viśvā dveṣāṁsi jahi chāva chā kṛdhi viśve sanvantvā vasu /*
*śīṣṭeṣu chitte madirāso aṁśavo yatrā somasya tṛmpasi //4 //*
*indra nedīya edihi mitamedhābhirūtibhiḥ /*

*ā śaṁtama śaṁtamābhirabhiṣṭibhirā svāpe svapibhiḥ ॥5 ॥*
*ajituraṁ satpatiṁ viśvacharṣaṇiṁ kṛdhi prajāsvābhagam ।*
*pra sū tirā śachībhirye ta ukthinaḥ kratuṁ punata ānuṣak ॥6 ॥*
*yaste sādhiṣṭho'vase te syāma bhareṣu te ।*
*vayaṁ hotrābhiruta devahūtibhiḥ sasavāṁso manāmahe ॥7 ॥*
*ahaṁ hi te harivo brahma vājayurājiṁ yāmi sadotibhiḥ ।*
*tvāmideva tamame samaśvayurgavyuragre mathīnām ॥8 ॥*

३. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) ८.५८.२-३

एक एवाग्निर्बहुधा समिद्ध एकः सूर्यो विश्वमनु प्रभूतः ।
एकैवोषाः सर्वमिदं वि भात्येकं वा इदं वि बभूव सर्वम् ॥२॥
ज्योतिष्मन्तं केतुमन्तं त्रिचक्रं सुखं रथं सुषदं भूरिवारम् ।
चित्रामघा यस्य योगेऽधिजज्ञे तं वां हुवे अतिरिक्तं पिबध्यै ॥३॥
*eka evāgnirbahudhā samiddha ekaḥ sūryo viśvamanu prabhūtaḥ ।*
*ekaivoṣāḥ sarvamidaṁ vi bhātyekaṁ vā idaṁ vi babhūva sarvam ॥2 ॥*
*jyotiṣmantaṁ ketumantaṁ trichakraṁ sukhaṁ rathaṁ suṣadaṁ bhūrivāram ।*
*chitrāmaghā yasya yoge'dhijajñe taṁ vāṁ huve atiriktaṁ pibadhyai ॥3 ॥*

४. विश्वेदेवा ऋत्विजो वा (Viśvedevā Ṛtvijo Vā) - ऋ. (Rv.) ८.५८.१

यमृत्विजो बहुधा कल्पयन्तः सचेतसो यज्ञमिमं वहन्ति ।
यो अनूचानो ब्राह्मणो युक्त आसीत्का स्वित्तत्र यजमानस्य संवित् ॥१॥
*yamṛtvijo bahudhā kalpayantaḥ sachetaso yajñamimaṁ vahanti ।*
*yo anūchāno brāhmaṇo yukta āsītkā svittatra yajamānasya saṁvit ॥1 ॥*

## ५१४. मेध्यः काण्वः (साग्री. सास्वा. ऋसर्व.); बालखिल्याः (सार्षेदी.) (Medhyaḥ Kāṇvaḥ [Ssb. Sas. Rss.]; Bālakhilyāḥ [Sad.])

१. इन्द्रः (Indraḥ) - सा. (Sv.) २८२

इन्द्र नेदीय एदिहि मितमेधाभिरूतिभिः। आ शंतम शंतमाभिरभिष्टिभिरा स्वापे स्वापिभिः ॥१०॥
*indra nedīya edihi mitamedhābhirūtibhiḥ ।*
*ā śaṁtama śaṁtamābhirabhiṣṭibhirā svāpe svāpibhiḥ ॥10 ॥*

## ५१५. मेध्यातिथिः (Medhyātithiḥ)

१. अग्निः (Agniḥ) - अ. (Av.) २०.१०१.१-३

अग्ंिन दूतं वृणीमहे होतारं विश्ववेदसम्। अस्य यज्ञस्य सुक्रतुम् ॥१॥
अग्निमग्ंिन हवीमभिः सदा हवन्त विश्पतिम्। हव्यवाहं पुरुप्रियम् ॥२॥
अग्ने देवाँ इहा वह जज्ञानो वृक्तबर्हिषे। असि होता न ईड्यः ॥३॥
*agiṁna dūtaṁ vṛṇīmahe hotāraṁ viśvavedasam । asya yajñasya sukratum ॥1 ॥*
*agnimagiṁna havīmabhiḥ sadā havanta viśpatim । havyavāhaṁ purupriyam ॥2 ॥*
*agne devām̐ ihā vaha jajñāno vṛktabarhiṣe । asi hotā na īḍyaḥ ॥3 ॥*

२. अश्विनौ (Aśvinau) - अ. (Av.) २०.१४३.९

पनाय्यं तदश्विना कृतं वां वृषभो दिवो रजसः पृथिव्याः ।
सहस्रं शंसा उत ये गविष्टौ सर्वां इत्ताँ उप याता पिबध्यै ॥९॥
*panāyyaṁ tadaśvinā kṛtaṁ vāṁ vṛṣabho divo rajasaḥ pṛthivyāḥ ।*
*sahasraṁ śaṁsā uta ye gaviṣṭau sarvām̐ ittām̐ upa yātā pibadhyai ॥9 ॥*

३. इन्द्रः (Indraḥ) - अ. (Av.) २०.९.३-४; २०.१०.१-२; २०.४९.६-७; २०.५०.१-२; २०.५२.१-३; २०.५३.१-३; २०.५७.११-१६; २०.५९.१-२; २०.८५.३-४; २०.९९.१-२; २०.१०४.१-२; २०.११६.१-२; २०.११८.३-४

अ. (Av.) २०.९.३-४

तत् त्वा यामि सुवीर्यं तद् ब्रह्म पूर्वचित्तये ।
येना यतिभ्यो भृगवे धने हिते येन प्रस्कण्वमाविथ ॥३॥
येना समुद्रमसृजो महीरपस्तदिन्द्र वृष्णि ते शवः ।

सद्यः सो अस्य महिमा न संनशे यं क्षोणीरनुचक्रदे ॥४॥
*tat tvā yāmi suvīryaṁ tad brahma pūrvachittaye* ।
*yenā yatibhyo bhṛgave dhane hite yena praskaṇvamāvitha* ॥3॥
*yenā samudramasṛjo mahīrapastadindra vṛṣṇi te śavaḥ* ।
*sadyaḥ so asya mahimā na saṁnaśe yaṁ kṣoṇīranuchakrade* ॥4॥

अ. (Av.) २०.१०.१-२

उदु त्ये मधुमत्तमा गिर स्तोमास ईरते ।
सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथाइव ॥१॥
कण्वाइव भृगवः सूर्याइव विश्वमिद् धीतमानुशः ।
इन्द्रं स्तोमेभिर्महयन्त आयवः प्रियमेधासो अस्वरन् ॥२॥
*udu tye madhumattamā gira stomāsa īrate* ।
*satrājito dhanasā akṣitotayo vājayanto rathāiva* ॥1॥
*kaṇvāiva bhṛgavaḥ sūryāiva viśvamid dhītamānuśaḥ* ।
*indraṁ stomebhirmahayanta āyavaḥ priyamedhāso asvaran* ॥2॥

अ. (Av.) २०.४९.६-७

तत् त्वा यामि सुवीर्यं तद् ब्रह्म पूर्वचित्तये ।
येना यतिभ्यो भृगवे धने हिते येन प्रस्कण्वमाविथ ॥६॥
येना समुद्रमसृजो महीरपस्तदिन्द्र वृष्णि ते शवः ।
सद्यः सो अस्य महिमा न संनशे यं क्षोणीरनुचक्रदे ॥७॥
*tat tvā yāmi suvīryaṁ tad brahma pūrvachittaye* ।
*yenā yatibhyo bhṛgave dhane hite yena praskaṇvamāvitha* ॥6॥
*yenā samudramasṛjo mahīrapastadindra vṛṣṇi te śavaḥ* ।
*sadyaḥ so asya mahimā na saṁnaśe yaṁ kṣoṇīranuchakrade* ॥7॥

अ. (Av.) २०.५०.१-२

कन्नव्यो अतसीनां तुरो गृणीत मर्त्यः ।
नही न्वस्य महिमानमिन्द्रियं स्वर्गृणन्त आनशुः ॥१॥
कदु स्तुवन्त ऋतयन्त देवत ऋषिः को विप्र ओहते ।
कदा हवं मघवन्निन्द्र सुन्वतः कदु स्तुवत आ गमः ॥२॥
*kannavyo atasīnāṁ turo gṛṇīta martyaḥ* ।
*nahī nvasya mahimānamindriyaṁ svargṛṇanta ānaśuḥ* ॥1॥
*kadu stuvanta ṛtayanta devata ṛṣiḥ ko vipra ohate* ।
*kadā havaṁ maghavannindra sunvataḥ kadu stuvata ā gamaḥ* ॥2॥

अ. (Av.) २०.५२.१-३

वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः ।
पवित्रस्य प्रस्रवणेषु वृत्रहन् परि स्तोतार आसते ॥१॥
स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिनः ।
कदा सुतं तृषाण ओक आ गम इन्द्र स्वब्दीव वंसगः ॥२॥
कण्वेभिधृष्णवा धृषद् वाजं दर्षि सहस्रिणम् ।
पिशंगरूपं मघवन् विचर्षणे मक्षू गोमन्तमीमहे ॥३॥
*vayaṁ gha tvā sutāvanta āpo na vṛktabarhiṣaḥ* ।
*pavitrasya prasravaṇeṣu vṛtrahan pari stotāra āsate* ॥1॥
*svaranti tvā sute naro vaso nireka ukthinaḥ* ।
*kadā sutaṁ tṛṣāṇa oka ā gama indra svabdīva vaṁsagaḥ* ॥2॥
*kaṇvebhidhṛṣṇavā dhṛṣad vājaṁ darṣi sahasriṇam* ।
*piśaṁgarūpaṁ maghavan vicharṣaṇe makṣū gomantamīmahe* ॥3॥

अ. (Av.) २०.५३.१-३

क ईं वेद सुते सचा पिबन्तं कद् वयो दधे ।
अयं यः पुरो विभिनत्त्योजसा मन्दानः शिप्र्यन्धसः ॥१॥
दाना मृगो न वारणः पुरुत्रा चरथं दधे ।

नकिष्ट्वा नि यमदा सुते गमो महांश्चरस्योजसा ॥२॥
य उग्रः सन्ननिष्टृतः स्थिरो रणाय संस्कृतः ।
यदि स्तोतुर्मघवा श्रृणवद्धवं नेन्द्रो योषत्या गमत् ॥३॥
*ka īṁ veda sute sachā pibantaṁ kad vayo dadhe /*
*ayaṁ yaḥ puro vibhinattyojasā mandānaḥ śipryandhasaḥ //1 //*
*dānā mṛgo na vāraṇaḥ purutrā charathaṁ dadhe /*
*nakiṣṭvā ni yamadā sute gamo mahāṁścharasyojasā //2 //*
*ya ugraḥ sannaniṣṭṛtaḥ sthiro raṇāya saṁskṛtaḥ /*
*yadi stoturmaghavā śṛṇavaddhavaṁ nendro yoṣatyā gamat //3 //*

अ. (Av.) २०.५७.११-१६

क ईं वेद सुते सचा पिबन्तं कद् वयो दधे ।
अयं यः पुरो विभिनत्त्योजसा मन्दानः शिप्र्यन्धसः ॥११॥
दाना मृगो न वारणः पुरुत्रा चरथं दधे ।
नकिष्ट्वा नि यमदा सुते गमो महांश्चरस्योजसा ॥१२॥
य उग्रः सन्ननिष्टृत स्थिरो रणाय संस्कृतः ।
यदि स्तोतुर्मघवा श्रृणवद्धवं नेन्द्रो योषत्या गमत् ॥१३॥
वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः ।
पवित्रस्य प्रस्रवणेषु वृत्रहन् परि स्तोतार आसते ॥१४॥
स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिनः ।
कदा सुतं तृषाण ओक आ गम इन्द्र स्वब्दीव वंसगः ॥१५॥
कण्वेभिधृष्णवा धृषद् वाजं दर्षि सहस्रिणम् ।
पिशंगरूपं मघवन् विचर्षणे मक्षू गोमन्तमीमहे ॥१६॥
*ka īṁ veda sute sachā pibantaṁ kad vayo dadhe /*
*ayaṁ yaḥ puro vibhinattyojasā mandānaḥ śipryandhasaḥ //11 //*
*dānā mṛgo na vāraṇaḥ purutrā charathaṁ dadhe /*
*nakiṣṭvā ni yamadā sute gamo mahāṁścharasyojasā //12 //*
*ya ugraḥ sannaniṣṭṛta sthiro raṇāya saṁskṛtaḥ /*
*yadi stoturmaghavā śṛṇavaddhavaṁ nendro yoṣatyā gamat //13 //*
*vayaṁ gha tvā sutāvanta āpo na vṛktabarhiṣaḥ /*
*pavitrasya prasravaṇeṣu vṛtrahan pari stotāra āsate //14 //*
*svaranti tvā sute naro vaso nireka ukthinaḥ /*
*kadā sutaṁ tṛṣāṇa oka ā gama indra svabdīva vaṁsagaḥ //15 //*
*kaṇvebhidhṛṣṇavā dhṛṣad vājaṁ darṣi sahasriṇam /*
*piśaṁgarūpaṁ maghavan vicharṣaṇe makṣū gomantamīmahe //16 //*

अ. (Av.) २०.५९.१-२

उदु त्ये मधुमत्तमा गिर स्तोमास ईरते ।
सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथाइव ॥१॥
कण्वाइव भृगवः सूर्याइव विश्वमिद्धीतमानशुः ।
इन्द्रं स्तोमेभिर्महयन्त आयवः प्रियमेधासो अस्वरन् ॥२॥
*udu tye madhumattamā gira stomāsa īrate /*
*satrājito dhanasā akṣitotayo vājayanto rathāiva //1 //*
*kaṇvāiva bhṛgavaḥ sūryāiva viśvamiddhītamānaśuḥ /*
*indraṁ stomebhirmahayanta āyavaḥ priyamedhāso asvaran //2 //*

अ. (Av.) २०.८५.३-४

यच्चिद्धि त्वा जना इमे नाना हवन्त ऊतये ।
अस्माकं ब्रह्मेदमिन्द्र भृतु तेऽहा विश्वा च वर्धनम् ॥३॥
वि तर्तूर्यन्ते मघवन् विपश्चितोऽर्यो विपो जनानाम् ।
उप क्रमस्व पुरुरूपमा भर वाजं नेदिष्ठमूतये ॥४॥
*yachchiddhi tvā janā ime nānā havanta ūtaye /*
*asmākaṁ brahmedamindra bhṛtu te'hā viśvā cha vardhanam //3 //*

*vi tartūryante maghavan vipaśchito'ryo vipo janānām ।*
*upa kramasva pururūpamā bhara vājaṁ nediṣṭhamūtaye ॥4॥*

अ. (Av.) २०.९९.१-२

अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः ।
समीचीनास ऋभवः समस्वरन् रुद्रा गृणन्त पूर्व्यम् ॥१॥
अस्येदिन्द्रो वावृधे वृष्ण्यं शवो मदे सुतस्य विष्णवि ।
अद्या तमस्य महिमानमायवोऽनु ष्टुवन्ति पूर्वथा ॥२॥
*abhi tvā pūrvapītaya indra stomebhirāyavaḥ ।*
*samīchīnāsa ṛbhavaḥ samasvaran rudrā gṛṇanta pūrvyam ॥1॥*
*asyedindro vāvṛdhe vṛṣṇyaṁ śavo made sutasya viṣṇavi ।*
*adyā tamasya mahimānamāyavo'nu ṣṭuvanti pūrvathā ॥2॥*

अ. (Av.) २०.१०४.१-२

इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम ।
पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥१॥
अयं सहस्रमृषिभिः सहस्कृतः समुद्रइव पप्रथे ।
सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ॥२॥
*imā u tvā purūvaso giro vardhantu yā mama ।*
*pāvakavarṇāḥ śuchayo vipaśchito'bhi stomairanūṣata ॥1॥*
*ayaṁ sahasramṛṣibhiḥ sahaskṛtaḥ samudraiva paprathe ।*
*satyaḥ so asya mahimā gṛṇe śavo yajñeṣu viprarājye ॥2॥*

अ. (Av.) २०.११६.१-२

मा भूम निष्ट्याइवेन्द्र त्वदरणाइव। वनानि न प्रजहितान्यद्रिवो दुरोषासो अमन्महि ॥१॥
अमन्महीदनाशवोऽनुग्रासश्च वृत्रहन्। सुकृत् सु ते महता शूर राधसानु स्तोमं मुदीमहि ॥२॥
*mā bhūma niṣṭyāivendra tvadaraṇāiva । vanāni na prajahitānyadrivo duroṣāso amanmahi ॥1॥*
*amanmahīdanāśavo'nugrāsaścha vṛtrahan । sukṛt su te mahatā śūra rādhasānu stomaṁ mudīmahi ॥2॥*

अ. (Av.) २०.११८.३-४

इन्द्रमिद् देवतातय इन्द्रं प्रयत्यध्वरे ।
इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये ॥३॥
इन्द्रो मह्ना रोदसी पप्रथच्छव इन्द्रः सूर्यमरोचयत् ।
इन्द्रे ह विश्वा भुवनानि येमिरे इन्द्रे सुवानास इन्दवः ॥४॥
*indramid devatātaya indraṁ prayatyadhvare ।*
*indraṁ samīke vanino havāmaha indraṁ dhanasya sātaye ॥3॥*
*indro mahnā rodasī paprathachchhava indraḥ sūryamarochayat ।*
*indre ha viśvā bhuvanāni yemire indre suvānāsa indavaḥ ॥4॥*

४. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.४१.१-६; ९.४२.१-६; ९.४३.१-६

ऋ. (Rv.) ९.४१.१-६

प्र ये गावो न भूर्णयस्त्वेषा अयासो अक्रमुः। घ्नन्तः कृष्णामप त्वचम् ॥१॥
सुवितस्य मनामहेऽति सेतुं दुराव्यम्। साह्वांसो दस्युमव्रतम् ॥२॥
शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः। चरन्ति विद्युतो दिवि ॥३॥
आ पवस्व महीमिषं गोमदिन्दो हिरण्यवत्। अश्वावद्वाजवत् सुतः ॥४॥
स पवस्व विचर्षण आ मही रोदसी पृण। उषाः सूर्यो न रश्मिभिः ॥५॥
परि णः शर्मयन्त्या धारया सोम विश्वतः। सरा रसेव विष्टपम् ॥६॥
*pra ye gāvo na bhūrṇayastveṣā ayāso akramuḥ । ghnantaḥ kṛṣṇāmapa tvacham ॥1॥*
*suvitasya manāmahe'ti setuṁ durāvyam । sāhvāṁso dasyumavratam ॥2॥*
*śṛṇve vṛṣṭeriva svanaḥ pavamānasya śuṣmiṇaḥ । charanti vidyuto divi ॥3॥*
*ā pavasva mahīmiṣaṁ gomadindo hiraṇyavat । aśvāvadvājavat sutaḥ ॥4॥*
*sa pavasva vicharṣaṇa ā mahī rodasī pṛṇa । uṣāḥ sūryo na raśmibhiḥ ॥5॥*

*pari ṇaḥ śarmayantyā dhārayā soma viśvataḥ । sarā raseva viṣṭapam ॥6 ॥*

ऋ. (Rv.) ९.४२.१-६

जनयन् रोचना दिवो जनयन्नप्सु सूर्यम्। वसानो गा अपो हरिः ॥१॥
एष प्रत्नेन मन्मना देवो देवेभ्यस्परि। धारया पवते सुतः ॥२॥
वावृधानाय तूर्वये पवन्ते वाजसातये। सोमाः सहस्रपाजसः ॥३॥
दुहानः प्रत्नमित्पयः पवित्रे परि षिच्यते। क्रन्दन्देवाँ अजीजनत् ॥४॥
अभि विश्वानि वार्याभि देवाँ ऋतावृधः। सोमः पुनानो अर्षति ॥५॥
गोमन्नः सोम वीरदश्वावद्वाजवत्सुतः। पवस्व बृहतीरिषः ॥६॥

*janayan rochanā divo janayannapsu sūryam । vasāno gā apo hariḥ ॥1 ॥*
*eṣa pratnena manmanā devo devebhyaspari । dhārayā pavate sutaḥ ॥2 ॥*
*vāvṛdhānāya tūrvaye pavante vājasātaye । somāḥ sahasrapājasaḥ ॥3 ॥*
*duhānaḥ pratnamitpayaḥ pavitre pari ṣichyate । krandandevām̐ ajījanat ॥4 ॥*
*abhi viśvāni vāryābhi devām̐ ṛtāvṛdhaḥ । somaḥ punāno arṣati ॥5 ॥*
*gomannaḥ soma vīradaśvāvadvājavatsutaḥ । pavasva bṛhatīriṣaḥ ॥6 ॥*

ऋ. (Rv.) ९.४३.१-६

यो अत्य इव मृजयते गोभिर्मदाय हर्यतः। तं गीर्भिर्वासयामसि ॥१॥
तं नो विश्वा अवस्युवो गिरः शुम्भन्ति पूर्वथा। इन्दुमिन्द्राय पीतये ॥२॥
पुनानो याति हर्यतः सोमो गीर्भिः परिष्कृतः। विप्रस्य मेध्यातिथेः ॥३॥
पवमान विदा रयिमस्मभ्यं सोम सुश्रियम्। इन्दो सहस्रवर्चसम् ॥४॥
इन्दुरत्यो न वाजसृत्कनिक्रन्ति पवित्र आ। यदक्षारति देवयुः ॥५॥
पवस्व वाजसातये विप्रस्य गृणतो वृधे। सोम रास्व सुवीर्यम् ॥६॥

*yo atya iva mṛjayate gobhirmadāya haryataḥ । taṁ gīrbhirvāsayāmasi ॥1 ॥*
*taṁ no viśvā avasyuvo giraḥ śumbhanti pūrvathā । indumindrāya pītaye ॥2 ॥*
*punāno yāti haryataḥ somo gīrbhiḥ pariṣkṛtaḥ । viprasya medhyātitheḥ ॥3 ॥*
*pavamāna vidā rayimasmabhyaṁ soma suśriyam । indo sahasravarchasam ॥4 ॥*
*induratyo na vājasṛtkanikranti pavitra ā । yadakṣārati devayuḥ ॥5 ॥*
*pavasva vājasātaye viprasya gṛṇato vṛdhe । soma rāsva suvīryam ॥6 ॥*

## ५१६. मेध्यातिथिः काण्वः (Medhyātithiḥ Kāṇvaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.३.१-२०; सा. (Sv.) २८९; ८६४-८६६; १३६२-१३६३; १४२१-१४२२; १५७३-१५७४; १५८७-१५८८; १६०७-१६०८; १६९६-१६९८

ऋ. (Rv.) ८.३.१-२०

पिबा सुतस्य रसिनो मत्स्वा न इन्द्र गोमतः ।
आपिर्नो बोधि सधमाद्यो वृधे३स्माँ अवन्तु ते धियः ॥१॥
भूयाम ते सुमतौ वाजिनो वयं मा नः स्तरभिमातये ।
अस्माञ्चित्राभिरवतादभिष्टिभिरा नः सुम्नेषु यामय ॥२॥
इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम ।
पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥३॥
अयं सहस्रमृषिभिः सहस्कृतः समुद्र इव पप्रथे ।
सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ॥४॥
इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे ।
इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये ॥५॥
इन्द्रो मह्ना रोदसी पप्रथच्छव इन्द्रः सूर्यमरोचयत् ।
इन्द्रे ह विश्वा भुवनानि येमिर इन्द्रे सुवानास इन्दवः ॥६॥
अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः ।
समीचीनास ऋभवः समस्वरन् रुद्रा गृणन्त पूर्व्यम् ॥७॥
अस्येदिन्द्रो वावृधे वृष्ण्यं शवो मदे सुतस्य विष्णवि ।
अद्या तमस्य महिमानमायवोऽनु ष्टुवन्ति पूर्वथा ॥८॥

तत्त्वा यामि सुवीर्यं तद् ब्रह्म पूर्वचित्तये ।
येना यतिभ्यो भृगवे धने हिते येन प्रस्कण्वमाविथ ॥९॥
येना समुद्रमसृजो महीरपस्तदिन्द्र वृष्णि ते शवः ।
सद्यः सा अस्य महिमा न संनशे यं क्षोणीरनुचक्रदे ॥१०॥
शग्धी न इन्द्र यत्त्वा रयिं यामि सुवीर्यम् ।
शग्धि वाजाय प्रथमं सिषासते शग्धि स्तोमाय पूर्व्य ॥११॥
शग्धी नो अस्य यद्ध पौरमाविथ धिय इन्द्र सिषासतः ।
शग्धि यथा रुशमं श्यावकं कृपमिन्द्र प्रावः स्वर्णरम् ॥१२॥
कन्नव्यो अतसीनां तुरो गृणीत मर्त्यः ।
नही न्वस्य महिमानमिन्द्रियं स्वर्गृणन्त आनशुः ॥१३॥
कदु स्तुवन्त ऋतयन्त देवत ऋषिः को विप्र ओहते ।
कदा हवं मघवन्निन्द्र सुन्वतः कदु स्तुवत आ गमः ॥१४॥
उदु त्ये मधुमत्तमा गिरः स्तोमास ईरते ।
सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथा इव ॥१५॥
कण्वाइव भृगवः सूर्या इव विश्वमिद्धीतमानशुः ।
इन्द्रं स्तोमेभिर्महयन्त आयवः प्रियमेधासो अस्वरन् ॥१६॥
युक्ष्वा हि वृत्रहन्तम हरी इन्द्र परावतः ।
अर्वाचीनो मघवन्त्सोमपतिय उग्र ऋष्वेभिरा गहि ॥१७॥
इमे हि ते कारवो वावशुर्धिया विप्रासो मेधसातये ।
स त्वं नो मघवन्निन्द्र गिर्वणो वेनो न शृणुधी हवम् ॥१८॥
निरिन्द्र बृहतीभ्यो वृत्रं धनुभ्यो अस्फुरः ।
निरर्बुदस्य मृगयस्य मायिनो निः पर्वतस्य गा आजः ॥१९॥
निरग्नयो रुरुचुर्निरु सूर्यो निः सोम इन्द्रियो रसः ।
निरन्तरिक्षादधमो महामहिं कृषे तदिन्द्र पौंस्यम् ॥२०॥

*pibā sutasya rasino matsvā na indra gomataḥ /*
*āpirno bodhi sadhamādyo vṛdhe3smām̐ avantu te dhiyaḥ //1 //*
*bhūyāma te sumatau vājino vayaṁ mā naḥ starabhimātaye /*
*asmāñchitrābhiravatādabhiṣṭibhirā na: sumneṣu yāmaya //2 //*
*imā u tvā purūvaso giro vardhantu yā mama /*
*pāvakavarṇāḥ śuchayo vipaśchito'bhi stomairanūṣata //3 //*
*ayaṁ sahasramṛṣibhiḥ sahaskṛtaḥ samudra iva paprathe /*
*satyaḥ so asya mahimā gṛṇe śavo yajñeṣu viprarājye //4 //*
*indramiddevatātaya indraṁ prayatyadhvare /*
*indraṁ samīke vanino havāmaha indraṁ dhanasya sātaye //5 //*
*indro mahnā rodasī paprathachchhava indraḥ sūryamarochayat /*
*indre ha viśvā bhuvanāni yemira indre suvānāsa indavaḥ //6 //*
*abhi tvā pūrvapītaya indra stomebhirāyavaḥ /*
*samīchīnāsa ṛbhavaḥ samasvaran rudrā gṛṇanta pūrvyam //7 //*
*asyedindro vāvṛdhe vṛṣṇyaṁ śavo made sutasya viṣṇavi /*
*adyā tamasya mahimānamāyavo'nu ṣṭuvanti pūrvathā //8 //*
*tattvā yāmi suvīryaṁ tad brahma pūrvachittaye /*
*yenā yatibhyo bhṛgave dhane hite yena praskaṇvamāvitha //9 //*
*yenā samudramasṛjo mahīrapastadindra vṛṣṇi te śavaḥ /*
*sadyaḥ sā asya mahimā na saṁnaśe yaṁ kṣoṇīranuchakrade //10 //*
*śagdhī na indra yattvā rayiṁ yāmi suvīryam /*
*śagdhi vājāya prathamaṁ siṣāsate śagdhi stomāya pūrvya //11 //*
*śagdhī no asya yaddha pauramāvitha dhiya indra siṣāsataḥ /*
*śagdhi yathā ruśamaṁ śyāvakaṁ kṛpamindra prāvaḥ svarṇaram //12 //*
*kannavyo atasīnāṁ turo gṛṇīta martyaḥ /*
*nahī nvasya mahimānamindriyaṁ svargṛṇanta ānaśuḥ //13 //*
*kadu stuvanta ṛtayanta devata ṛṣiḥ ko vipra ohate /*

*kadā havaṁ maghavannindra sunvataḥ kadu stuvata ā gamaḥ //14 //*
*udu tye madhumattamā giraḥ stomāsa īrate /*
*satrājito dhanasā akṣitotayo vājayanto rathā iva //15 //*
*kaṇvāiva bhṛgavaḥ sūryā iva viśvamiddhītamānaśuḥ /*
*indraṁ stomebhirmahayanta āyavaḥ priyamedhāso asvaran //16 //*
*yukṣavā hi vṛtrahantama harī indra parāvataḥ /*
*arvāchīno maghavantsomapatiya ugra ṛṣvebhirā garhi //17 //*
*ime hi te kāravo vāvaśurdhiyā viprāso medhasātaye /*
*sa tvaṁ no maghavannindra girvaṇo veno na śṛṇudhī havam //18 //*
*nirindra bṛhatībhyo vṛtraṁ dhanubhyo asphuraḥ /*
*nirarbudasya mṛgayasya māyino niḥ parvatasya gā ājaḥ //19 //*
*niragnayo ruruchurniru sūryo niḥ soma indriyo rasaḥ /*
*nirantarikṣādadhamo mahāmahiṁ kṛṣe tadindra pauṁsyam //20 //*

सा. (Sv.) २८९

पाहि गा अन्धसो मद इन्द्राय मेध्यातिथे।
यः संमिश्लो हर्योर्यो हिरण्यय इन्द्रो वज्री हिरण्ययः ॥७॥
*pāhi gā andhaso mada indrāya medhyātithe /*
*yaḥ saṁmiślo haryoryo hiraṇyaya indro vajrī hiraṇyayaḥ //7 //*

सा. (Sv.) ८६४-८६६

वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः ।
पवित्रस्य प्रस्रवणेषु वृत्रहन्परि स्तोतार आसते ॥१॥
स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिनः ।
कदा सुतं तृषाण ओक आ गमदिन्द्र स्वब्दीव वंसगः ॥२॥
कण्वेभिर्धृष्णवा धृषद्वाजं दर्षि सहस्रिणम् ।
पिशंगरूपं मघवन्विचर्षणे मक्षू गोमन्तमीमहे ॥३॥
*vayaṁ gha tvā sutāvanta āpo na vṛktabarhiṣaḥ /*
*pavitrasya prasravaṇeṣu vṛtrahanpari stotāra āsate //1 //*
*svaranti tvā sute naro vaso nireka ukthinaḥ /*
*kadā sutaṁ tṛṣāṇa oka ā gamadindra svabdīva vaṁsagaḥ //2 //*
*kaṇvebhirdhṛṣṇavā dhṛṣadvājaṁ darṣi sahasriṇam /*
*piśaṁgarūpaṁ maghavanvicharṣaṇe makṣū gomantamīmahe //3 //*

सा. (Sv.) १३६२-१३६३

उदु त्ये मधुमत्तमा गिरः स्तोमास ईरते ।
सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथा इव ॥१॥
कण्वा इव भृगवः सूर्या इव विश्वमिद्धीतमाशत ।
इन्द्रं स्तोमेभिर्महयन्त आयवः प्रियमेधासो अस्वरन् ॥२॥
*udu tye madhumattamā giraḥ stomāsa īrate /*
*satrājito dhanasā akṣitotayo vājayanto rathā iva //1 //*
*kaṇvā iva bhṛgavaḥ sūryā iva viśvamiddhītamāśata /*
*indraṁ stomebhirmahayanta āyavaḥ priyamedhāso asvaran //2 //*

सा. (Sv.) १४२१-१४२२

पिबा सुतस्य रसिनो मत्स्वा न इन्द्र गोमतः ।
आपिर्नो बोधि सधमाद्ये वृधे३ऽस्माँ अवन्तु ते धियः ॥१॥
भूयाम ते सुमतौ वाजिनो वयं मा न स्तरभिमातये ।
अस्मान् चित्राभिरवतादभिष्टिभिरा नः सुम्नेषु यामय ॥२॥
*pibā sutasya rasino matsvā na indra gomataḥ /*
*āpirno bodhi sadhamādye vṛdhe3'smām̐ avantu te dhiyaḥ //1 //*
*bhūyāma te sumatau vājino vayaṁ mā na starabhimātaye /*
*asmān chitrābhiravatādabhiṣṭibhirā naḥ sumneṣu yāmaya //2 //*

सा. (Sv.) १५७३-१५७४

अभि त्वा पूर्वपीतये इन्द्र स्तोमेभिरायवः । समीचीनास ऋभवः समस्वरन्रुदा गृणन्त पूर्व्यम् ॥१॥
अस्येदिन्द्रो वावृधे वृष्ण्यं शवो मदे सुतस्य विष्णवि।
अद्या तमस्य महिमानमायवोऽनु ष्टुवन्ति पूर्वथा॥२॥
*abhi tvā pūrvapītaye indra stomebhirāyavaḥ ।*
*samīchīnāsa ṛbhavaḥ samasvaranrudā gṛṇanta pūrvyam ॥1॥*
*asyedindro vāvṛdhe vṛṣṇyaṁ śavo made sutasya viṣṇavi ।*
*adyā tamasya mahimānamāyavo'nu ṣṭuvanti pūrvathā ॥2॥*

सा. (Sv.) १५८७-१५८८

इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे ।
इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये ॥१॥
इन्द्रो मह्ना रोदसी पप्रथच्छव इन्द्रः सूर्य मरोचयत् ।
इन्द्रे ह विश्वा भुवनानि येमिरे इन्द्रे स्वानास इन्दवः ॥२॥
*indramiddevatātaya indraṁ prayatyadhvare ।*
*indraṁ samīke vanino havāmaha indraṁ dhanasya sātaye ॥1॥*
*indro mahnāā rodasī paprathachchhava indraḥ sūrya marochayat ।*
*indre ha viśvā bhuvanāni yemire indre svānāsa indavaḥ ॥2॥*

सा. (Sv.) १६०७-१६०८

इमा उत्वा पुरूवसो गिरो वर्धन्तु या मम ।
पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥१॥
अयं सहस्रमृषिभिः सहस्कृतः समुद्र इव पप्रथे ।
सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्राराज्ये ॥२॥
*imā utvā purūvaso giro vardhantu yā mama ।*
*pāvakavarṇāḥ śuchayo vipaśchito'bhi stomairanūṣata ॥1॥*
*ayaṁ sahasramṛṣibhiḥ sahaskṛtaḥ samudra iva paprathe ।*
*satyaḥ so asya mahimā gṛṇe śavo yajñeṣu viprārājye ॥2॥*

सा. (Sv.) १६९६-१६९८

क ई वेद सुते सचा पिबन्तं कद् वयो दधे ।
अयं यः पुरो विभिनत्त्योजसा मन्दानः शिप्र्यन्धसः ॥१॥
दाना मृगो न वारणः पुरुत्रा च रथं दधे ।
न किष्ट्वा नि यमदा सुते गमो महा श्चरस्योजसा ॥२॥
य उग्रः सन्ननिष्टृतः स्थिरो रणाय संस्कृतः ।
यदि स्तोमुर्मघवा श्रृणवद्धवं नेन्द्रो योषत्या गमत् ॥३॥
*ka ī veda sute sachā pibantaṁ kad vayo dadhe ।*
*ayaṁ yaḥ puro vibhinattyojasā mandānaḥ śipryandhasaḥ ॥1॥*
*dānā mṛgo na vāraṇaḥ purutrā cha rathaṁ dadhe ।*
*na kiṣṭvā ni yamadā sute gamo mahā ścharasyojasā ॥2॥*
*ya ugraḥ sannaniṣṭtataḥ sthiro raṇāya saṁskṛtaḥ ।*
*yadi stomurmaghavā śṛṇavaddhavaṁ nendro yoṣatyā gamat ॥3॥*

२. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ४९१; ७५९-७६०; ८९२-८९७

सा. (Sv.) ४९१

प्र यद्गावो न भूर्णयस्त्वेषा अयासो अक्रमुः। घ्नन्तः कृष्णामप त्वचम् ॥५॥
*pra yadgāvo na bhūrṇayastveṣā ayāso akramuḥ । ghnantaḥ kṛṣṇāmapa tvacham ॥5॥*

सा. (Sv.) ७५९-७६०

एष प्रत्नेन मन्मना देवो देवेभ्यस्परि। कविर्विप्रेण वावृधे ॥२॥
दुहानः प्रत्नमित्पयः पवित्रे परि षिच्यसे। क्रन्दं देवाँ अजीजनः ॥३॥
*eṣa pratnena manmanā devo devebhyaspari । kavirvipreṇa vāvṛdhe ॥2॥*
*duhānaḥ pratnamitpayaḥ pavitre pari ṣichyase । krandaṁ devām̐ ajījanaḥ ॥3॥*

सा. (Sv.) ८९२-८९७

प्र यद्गावो न भूर्णयस्त्वेषा अयासो अक्रमुः। घ्नन्तः कृष्णमप त्वचम् ॥१॥
सुवितस्य वनामहेऽति सेतुं दुराय्यम्। साह्याम दस्युमव्रतम् ॥२॥
शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः। चरन्ति विद्युतो दिवि ॥३॥
आ पवस्व महीमिषं गोमदिन्दो हिरण्यवत्। अश्ववत्सोम वीरवत् ॥४॥
पवस्व विश्वचर्षण आ मही रोदसी पृण।उषाः सूर्यो न रश्मिभिः ॥५॥
परिणः शर्मयन्त्या धारया सोम विश्वतः। सरा रसेव विष्टपम् ॥६॥

*pra yadgāvo na bhūrṇayastveṣā ayāso akramuḥ | ghnantaḥ kṛṣṇamapa tvacham ||1 ||*
*suvitasya vanāmahe'ti setuṁ durāyyam | sāhmāma dasyumavratam ||2 ||*
*śṛṇve vṛṣṭeriva svanaḥ pavamānasya śuṣmiṇaḥ | charanti vidyuto divi ||3 ||*
*ā pavasva mahīmiṣaṁ gomadindo hiraṇyavat | aśvavatsoma vīravat ||4 ||*
*pavasva viśvacharṣaṇa ā mahī rodasī pṛṇa |uṣāḥ sūryo na raśmibhiḥ ||5 ||*
*pariṇaḥ śarmayantyā dhārayā soma viśvataḥ | sarā raseva viṣṭapam ||6 ||*

३. पाकस्थाम्नः कौरयाणस्य दानस्तुतिः (Pākasthāmnaḥ Kaurayāṇasya Dānastutiḥ) - ऋ. (Rv.) ८.३.२१-२४

यं मे दुरिन्द्रो मरुतः पाकस्थामा कौरयाणः।
विश्वेषां त्मना शोभिष्ठमुपेव दिवि धावमानम्॥२१॥
रोहितं मे पाकस्थामा सुधुरं कक्ष्यप्राम्। अदाद्रायो विबोधनम् ॥२२॥
यस्मा अन्ये दश प्रति धुरं वहन्ति वह्नयः। अस्तं वयो न तुग्र्यम् ॥२३॥
आत्मा पितुस्तनूर्वास ओजोदा अभ्यंजनम्।
तुरीयमिद्रोहितस्य पाकस्थामानं भोजं दातारमब्रवम्॥२४॥

*yaṁ me durindro marutaḥ pākasthāmā kaurayāṇaḥ |*
*viśveṣāṁ tmanā śobhiṣṭhamupeva divi dhāvamānam ||21 ||*
*rohitaṁ me pākasthāmā sudhuraṁ kakṣayaprām | adādrāyo vibodhanam ||22 ||*
*yasmā anye daśa prati dhuraṁ vahanti vahnayaḥ | astaṁ vayo na tugryam ||23 ||*
*ātmā pitustanūrvāsa ojodā abhyaṁjanam |*
*turīyamidrohitasya pākasthāmānaṁ bhojaṁ dātāramabravam ||24 ||*

**५१७. मेध्यातिथिः काण्वः (ऋसर्व. ८.३.७; ८.३३.१; ८.३.१७ सार्षेदी.); मेधातिथिः काण्वः (साग्री. सास्वा.) (Medhyātithiḥ Kāṇvaḥ [Rss. 8.3.7; 8.33.1; 8.3.17 Sad.]; Medhātithiḥ Kāṇvaḥ [Ssb. Sas.])**

१. इन्द्रः (Indraḥ) - सा. (Sv.) २५६; २६१; ३०१

सा. (Sv.) २५६

अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः। समीचीनास ऋभवः समस्वरन्रुद्रा गृणनतपूर्व्यम् ॥४॥

*abhi tvā pūrvapītaya indra stomebhirāyavaḥ |*
*samīchīnāsa ṛbhavaḥ samasvaranrudā gṛṇanatapūrvyam ||4 ||*

सा. (Sv.) २६१

वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः।
पवित्रस्य प्रस्रवणेषु वृत्रहन्परि स्तोतार आसते॥९॥

*vayaṁ gha tvā sutāvanta āpo na vṛktabarhiṣaḥ |*
*pavitrasya prasravaṇeṣu vṛtrahanpari stotāra āsate ||9 ||*

सा. (Sv.) ३०१

युङ्क्ष्वा हि वृत्रहन्तम हरी इन्द्र परावतः।
अर्वाचीनो मघवन्त्सोमपीतये उग्र ऋष्वेभिरा गहि ॥९॥

*yuṅkṣavā hi vṛtrahantama harī indra parāvataḥ |*
*arvāchīno maghavantsomapītaye ugra ṛṣvebhirā gahi ||9 ||*

**५१८. मेध्यातिथिः काण्वः (ऋसर्व. ८.३३.७; ८.३३.१०); मेधातिथिः काण्वः (साग्री. सास्वा. सार्षेदी.) (Medhyātithiḥ Kāṇvaḥ [Rss. 8.33.7; 8.33.10]; Medhātithiḥ Kāṇvaḥ [Ssb. Sas.**

**Sad.])**

१. इन्द्रः (Indraḥ) - सा. (Sv.) २६३; २९७

सा. (Sv.) २६३

सत्यमित्था वृषेदसि वृषजूतिर्नोऽविता। वृषा ह्युग्र शृण्विषे परावति वृषो अर्वावति श्रुतः ॥१॥
*satyamitthā vṛṣedasi vṛṣajūtirno'vitā /*
*vṛṣā hyugra śṛṇivaṣe parāvati vṛṣo arvāvati śrutaḥ //1 //*

सा. (Sv.) २९७

क ईं वेद सचा पिबन्तं कद्वयो दधे। अयं यः पुरो विभिनत्त्योजसा मन्दानः शिप्र्यन्धसः ॥५॥
*ka īṁ veda sachā pibantaṁ kadvayo dadhe /*
*ayaṁ yaḥ puro vibhinattyojasā mandānaḥ śipryandhasaḥ //5 //*

५१९. **मेध्यातिथिः काण्वः (ऋसर्व. ८.३.५; य. ८.३.३); मेधातिथिर् मेध्यातिथिर् वा काण्वः (साग्री. सास्वा.); मेधातिथिः (सार्षेदी.) (Medhyātithiḥ Kāṇvaḥ [Rss. 8.3.5; YV. 8.3.3]; Medhātithir Medhyātithir Vā Kāṇvaḥ [Ssb. Sas.]; Medhātithiḥ [Sad.])**

१. इन्द्रः (Indraḥ) - सा. (Sv.) २४९-२५०

इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे। इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये ॥७॥
इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम।
पावकवर्णाः शुचयो विपश्चितोऽभिस्तोमैरनूषत ॥८॥
*indramiddevatātaya indraṁ prayatyadhvare /*
*indraṁ samīke vanino havāmaha indraṁ dhanasya sātaye //7 //*
*imā u tvā purūvaso giro vardhantu yā mama /*
*pāvakavarṇāḥ śuchayo vipaśchito'bhistomairanūṣata //8 //*

५२०. **मेध्यातिथिर् वा काण्वः (ऋसर्व. ८.३.१५ सार्षेदी.); मेधातिथिर् मेध्यातिथिर् वा काण्वः (साग्री. सास्वा.) (Medhyātithir Vā Kāṇvaḥ [Rss. 8.3.15 Sad.]; Medhātithir Medhyātithir Vā Kāṇvaḥ [Ssb. Sas.])**

१. इन्द्रः (Indraḥ) - सा. (Sv.) २५१

उदु त्ये मधुमत्तसा गिर स्तोमास ईरते।
सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथा इव ॥९॥
*udu tye madhumattasā gira stomāsa īrate /*
*satrājito dhanasā akṣitotayo vājayanto rathā iva //9 //*

५२१. **यक्ष्मनाशनः प्राजापत्यः (Yakṣamanāśanaḥ Prājāpatyaḥ)**

१. राजयक्ष्मघ्नम् (Rājayakṣamaghnam) - ऋ. (Rv.) १०.१६१.१-५

मुंचामि त्वा हविषा जीवनाय कमज्ञातयक्ष्मादुत राजयक्ष्मात् ।
ग्राहिर्जग्राह यदि वैतदेनं तस्या इन्द्राग्नी प्र मुमुक्तमेनम् ॥१॥
यदि क्षितायुर्यदि वा परेतो यदि मृत्योरन्तिकं नीत एव ।
तमा हरामि निर्ऋतेरुपस्थादस्पार्षमेनं शतशारदाय ॥२॥
सहस्राक्षेण शतशारदेन शतायुषा हविषाहार्षमेनम् ।
शतं यथेमं शरदो नयातीन्द्रो विश्वस्य दुरितस्य पारम् ॥३॥
शतं जीव शरदो वर्धमानः शतं हेमन्तांछतमु वसन्तान् ।
शतमिन्द्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः ॥४॥
आहार्षं त्वाविद त्वा पुनरागाः पुनर्नव । सर्वांग सर्वं ते चक्षुः सर्वमायुश्च तेऽविदम् ॥५॥
*muṁchāmi tvā haviṣā jīvanāya kamajñātayakṣamāduta rājayakṣamāt /*
*grāhirjagrāha yadi vaitadenaṁ tasyā indrāgnī pra mumuktamenam //1 //*
*yadi kṣitāyuryadi vā pareto yadi mṛtyorantikaṁ nīta eva /*
*tamā harāmi nirṛterupasthādaspārṣamenaṁ śataśāradāya //2 //*
*sahasrākṣeṇa śataśāradena śatāyuṣā haviṣāhārṣamenam /*
*śataṁ yathemaṁ śarado nayātīndro viśvasya duritasya pāram //3 //*

*śataṁ jīva śarado vardhamānaḥ śataṁ hemantāṁchhatamu vasantān /*
*śatamindrāgnī savitā bṛhaspatiḥ śatāyuṣā haviṣemaṁ punarduḥ //4 //*
*āhārṣaṁ tvāvida tvā punarāgāḥ punarnava / sarvāṁga sarvaṁ te chakṣuḥ sarvamāyuścha te'vidam //5 //*

## ५२२. यजत आत्रेयः (Yajata Ātreyaḥ)

१. मित्रावरुणौ (Mitrāvaruṇau) - ऋ. (Rv.) ५.६७.१-५; ५.६८.१-५; सा. (Sv.) १४६५-१४६७

ऋ. (Rv.) ५.६७.१-५

बळित्था देव निष्कृतमादित्या यजतं बृहत्। वरुण मित्रार्यमन्वर्षिष्ठं क्षत्रमाशाथे ॥१॥
आ यद्योनि हिरण्ययं वरुण मित्र सदथः। धर्तारा चर्षणीनां यन्तं सुम्नं रिशादसा ॥२॥
विश्वे हि विश्ववेदसो वरुणो मित्रो अर्यमा। व्रता पदेव सश्चिरे पान्ति मर्त्यं रिषः ॥३॥
ते हि सत्या ऋतस्पृश ऋतावानो जनेजने। सुनीथासः सुदानवोंऽहोश्चिदुरुचक्रयः ॥४॥
को नु वां मित्रास्तुतो वरुणो वा तनूनाम्। तत्सु वामेषते मतिरत्रिभ्य एषते मतिः ॥५॥
*baḻitthā deva niṣkṛtamādityā yajataṁ bṛhat /*
*varuṇa mitrāryamanvarṣiṣṭhaṁ kṣatramāśāthe //1 //*
*ā yadyoni hiraṇyayaṁ varuṇa mitra sadathaḥ /*
*dhartārā charṣaṇīnāṁ yantaṁ sumnaṁ riśādasā //2 //*
*viśve hi viśvavedaso varuṇo mitro aryamā /*
*vratā padeva saśchire pānti martyaṁ riṣaḥ //3 //*
*te hi satyā ṛtaspṛśa ṛtāvāno janejane / sunīthāsaḥ sudānavoṁ'hośchiduruchakrayaḥ //4 //*
*ko nu vāṁ mitrāstuto varuṇo vā tanūnām / tatsu vāmeṣate matiratribhya eṣate matiḥ //5 //*

ऋ. (Rv.) ५.६८.१-५

प्र वो मित्राय गायत वरुणाय विपा गिरा। महिक्षत्रावृतं बृहत् ॥१॥
सम्राजा या घृतयोनि मित्रश्चोभा वरुणश्च। देवा देवेषु प्रशस्ता ॥२॥
ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य। महि वां क्षत्रं देवेषु ॥३॥
ऋतमृतेन सपन्तेषिरं दक्षमाशाते। अद्रुहा देवौ वर्धेते ॥४॥
वृष्टिद्यावा रीत्यापेषस्पती दानुमत्याः। बृहन्तं गर्तमाशाते ॥५॥
*pra vo mitrāya gāyata varuṇāya vipā girā / mahikṣatrāvṛtaṁ bṛhat //1 //*
*samrājā yā ghṛtayoni mitraśchobhā varuṇaścha / devā deveṣu praśastā //2 //*
*tā naḥ śaktaṁ pārthivasya maho rāyo divyasya / mahi vāṁ kṣatraṁ deveṣu //3 //*
*ṛtamṛtena sapanteṣiraṁ dakṣamāśāte / adruhā devau vardhete //4 //*
*vṛṣṭidyāvā rītyāpeṣaspatī dānumatyāḥ / bṛhantaṁ gartamāśāte //5 //*

सा. (Sv.) १४६५-१४६७

ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य। महि वां क्षत्रं देवेषु ॥१॥
ऋतमृतेन सपन्तेषिरं दक्षमाशाते। अद्रुहा देवौ वर्धते ॥२॥
वृष्टिद्यावा रीत्यापेषस्पती दानुमत्याः। बृहन्तं गर्तमाशाते ॥३॥
*tā naḥ śaktaṁ pārthivasya maho rāyo divyasya / mahi vāṁ kṣatraṁ deveṣu //1 //*
*ṛtamṛtena sapanteṣiraṁ dakṣamāśāte / adruhā devau vardhate //2 //*
*vṛṣṭidyāvā rītyāpeṣaspatī dānumatyāḥ / bṛhantaṁ gartamāśāte //3 //*

## ५२३. यज्ञपुरुषः (Yajñapuruṣaḥ)

१. विद्वांसः (Vidvāṁsaḥ) - य. (Yv.) २२.२

इमामगृभ्णान् रशनामृतस्य पूर्व आयुषि विदथेषु कव्या ।
सा नो अस्मिन्त्सुत आ बभूव ऋतस्य सामन्त्सरमारपन्ती ॥२॥
*imāmagṛbhṇān raśanāmṛtasya pūrva āyuṣi vidatheṣu kavyā /*
*sā no asmintsuta ā babhūva ṛtasya sāmantsaramārapantī //2 //*

## ५२४. यज्ञः प्राजापत्यः (Yajñaḥ Prājāpatyaḥ)

१. भाववृत्तम् (Bhāvavṛttam) - ऋ. (Rv.) १.३०.१-७

आ व इन्दं क्रिविं यथा वाजयन्तः शतक्रतुम्। मंहिष्ठं सिंच इन्दुभिः ॥१॥

शतं वा यः शुचीनां सहस्रं वा समाशिराम्। एदु निम्नं न रीयते ॥२॥
सं यन्मदाय शुष्मिण एना ह्यस्योदरे। समुद्रो न व्यचो दधे ॥३॥
अयमु ते समतसि कपोत इव गर्भधिम्। वचस्तच्चिन्न ओहसे ॥४॥
स्तोत्रं राधानां पते गिर्वाहो वीर यस्य ते। विभूतिरस्तु सूनृता ॥५॥
ऊर्ध्वस्तिष्ठा न ऊतयेऽस्मिन्वाजे शतक्रतो। समन्येषु ब्रवावहै ॥६॥
योगेयोगे तवस्तरं वाजेवाजे हवामहे। सखाय इन्द्रमूतये ॥७॥
*ā va indaṁ kriviṁ yathā vājayantaḥ śatakratum / maṁhiṣṭhaṁ siṁcha indubhiḥ //1 //*
*śataṁ vā yaḥ śuchīnāṁ sahasraṁ vā samāśirām / edu nimnaṁ na rīyate //2 //*
*saṁ yanmadāya śuṣmiṇa enā hyasyodare / samudro na vyacho dadhe //3 //*
*ayamu te samatasi kapota iva garbhadhim / vachastachchinna ohase //4 //*
*stotraṁ rādhānāṁ pate girvāho vīra yasya te / vibhūtirastu sūnṛtā //5 //*
*ūrdhvastiṣṭhā na ūtaye'sminvāje śatakrato / samanyeṣu bravāvahai //6 //*
*yogeyoge tavastaraṁ vājevāje havāmahe / sakhāya indramūtaye //7 //*

## ५२५. याज्ञवल्क्यः (Yājñavalkyaḥ)

१. अग्न्यादयः (Agnyādayaḥ) - य. (Yv.) २६.१

अग्निश्च पृथिवी च सन्नते ते मे सं नमतामदो वायुश्चाऽन्तरिक्षं च सन्नते ते मे सं नमतामदऽआदित्यश्च द्यौश्च सन्नते ते मे सं नमतामदऽआपश्च वरुणश्च सन्नते ते मे सं नमतामदः सप्त संसदोऽअष्टमी भूतसाधनी सकामाँ२ऽअध्वनस्कुरु संज्ञानमस्तु मेऽमुना ॥१॥
*agniścha pṛthivī cha sannate te me saṁ namatāmado vāyuśchā'ntarikṣaṁ cha sannate te me saṁ namatāmada'ādityaścha dyauścha sannate te me saṁ namatāmada'āpaścha varuṇaścha sannate te me saṁ namatāmadaḥ sapta saṁsado'aṣṭamī bhūtasādhanī sakāmām̐2'adhvanaskuru saṁjñānamastu me'munā //1 //*

२. आपः (Āpaḥ) - य. (Yv.) ३.२०

अन्ध स्थान्धो वो भक्षीय मह स्थ महो वो भक्षीयोर्ज्ज स्थोर्ज्जं वो भक्षीय रायस्पोष स्थ रायस्पोषं वो भक्षीय ॥२०॥
*andha sthāndho vo bhakṣīya maha stha maho vo bhakṣīyorjja sthorjjaṁ vo bhakṣīya rāyaspoṣa stha rāyaspoṣaṁ vo bhakṣīya //20 //*

३. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.) ३.२१

रेवती रमध्वमस्मिन्योनावस्मिन् गोष्ठे ऽस्मिँल्लोके ऽस्मिन् क्षये। इहैव स्त मापगात ॥२१॥
*revatī ramadhvamasminyonāvasmin goṣṭhe 'smim̐lloke 'smin kṣaye / ihaiva sta māpagāta //21 //*

## ५२६. यमः (Yamaḥ)

१. अग्निः (Agniḥ) - अ. (Av.) ७.६४.२;

अ. (Av.) ७.६४.२

इदं यत् कृष्णः शकुनिरवामृक्षन्निर्ऋते ते मुखेन। अग्निर्मा तस्मादेनसो गार्हपत्यः प्र मुंचतु ॥२॥
*idaṁ yat kṛṣṇaḥ śakuniravāmṛkṣannirṛte te mukhena / agnirmā tasmādenaso gārhapatyaḥ pra muṁchatu //2 //*

२. आपः (Āpaḥ) - अ. (Av.) ७.६४.१

इदं यत् कृष्णः शकुनिरभिनिष्पतन्नपीपतत्।
आपो मा तस्मात् सर्वस्माद् दुरितात् पान्त्वंहसः ॥१॥
*idaṁ yat kṛṣṇaḥ śakunirabhiniṣpatannapīpatat /*
*āpo mā tasmāt sarvasmād duritāt pāntvaṁhasaḥ //1 //*

३. दुःष्वप्ननाशनम् (Duḥṣvapnanāśanam) - अ. (Av.) ७.२३.१; ७.१००.१; ७.१०१.१; १६.५.१-१०; १६.६.१-११; १६.७.१-१३; १६.८.१-३३; १९.५६.१-६; १९.५७.१-५

अ. (Av.) ७.२३.१

दौःष्वप्न्यं दौर्जीवित्यं रक्षो अभ्वमराय्यः। दुर्णाम्नीः सर्वा दुर्वाचस्ता अस्मन्नाशयामसि ॥१॥
*dauḥṣvapnyaṁ daurjīvityaṁ rakṣo abhvamarāyyaḥ / durṇāmnīḥ sarvā durvāchastā asmannāśayāmasi //1 //*

अ. (Av.) ७.१००.१

पर्यावर्ते दुःष्वप्न्यात् पापात् स्वप्न्यादभूत्याः। ब्रह्माहमन्तरं कृण्वे परा स्वप्नमुखाः शुचः ॥१॥

*paryāvarte duḥṣvapnyāt pāpāt svapnyādabhṛtyāḥ । brahmāhamantaraṁ kṛṇve parā svapnamukhāḥ śuchaḥ ॥1॥*

अ. (Av.) ७.१०१.१

यत् स्वप्ने अन्नमश्नामि न प्रातरधिगम्यते। सर्वं तदस्तु मे शिवं नहि तद् दृश्यते दिवा ॥१॥

*yat svapne annamaśnāmi na prātaradhigamyate । sarvaṁ tadastu me śivaṁ nahi tad dṛśyate divā ॥1॥*

अ. (Av.) १६.५.१-१०

विद्म ते स्वप्न जनित्रं ग्राह्याः पुत्रोऽसि यमस्य करणः ॥१॥
अन्तोऽसि मृत्युरसि ॥२॥
तं त्वा स्वप्न तथा सं विद्म स नः स्वप्न दुःष्वप्नयात् पाहि ॥३॥
विद्म ते स्वप्न जनित्रं निर्ऋत्याः पुत्रोऽसि यमस्य करणः ।
अन्तकोऽसि मृत्युरसि। तं त्वा स्वप्न तथा सं विद्म स नः स्वप्न दुःष्वप्न्यात् पाहि ॥४॥
विद्म तं स्वप्न जनित्रमभूत्याः पुत्रोऽसि यमस्य करणः ।
अन्तकोऽसि मृत्युरसि। तं त्वा स्वप्न तथा सं विद्म स नः स्वप्न दुःष्वप्न्यात् पाहि ॥५॥
विद्म ते स्वप्न जनित्रं निर्भूतयाः पुत्रोऽसि यमस्य करणः ।
अन्तकोऽसि मृत्युरसि। तं त्वा स्वप्न तथा सं विद्म स नः स्वप्न दुःष्वप्न्यात् पाहि ॥६॥
विद्म ते स्वप्न जनित्रं पराभूत्याः पुत्रोऽसि यमस्य करणः ।
अन्तकोऽसि मृत्युरसि। तं त्वा स्वप्न तथा सं विद्म स नः स्वप्न दुःष्वप्न्यात् पाहि ॥७॥
विद्म ते स्वप्न जनित्रं देवजामीनां पुत्रोऽसि यमस्य करणः ॥८॥
अन्तकोऽसि मृत्युरसि ॥९॥
तं त्वा स्वप्न तथा सं विद्म स नः स्वप्न दुःष्वप्न्यात् पाहि ॥१०॥

*vidma te svapna janitraṁ grāhyāḥ putro'si yamasya karaṇaḥ ॥1॥*
*anto'si mṛtyurasi ॥2॥*
*taṁ tvā svapna tathā saṁ vidma sa naḥ svapna duḥṣvapnayāt pāhi ॥3॥*
*vidma te svapna janitraṁ nirṛtyāḥ putro'si yamasya karaṇaḥ ।*
*antako'si mṛtyurasi । taṁ tvā svapna tathā saṁ vidma sa naḥ svapna duḥṣvapnyāt pāhi ॥4॥*
*vidma taṁ svapna janitramabhūtyāḥ putro'si yamasya karaṇaḥ ।*
*antako'si mṛtyurasi । taṁ tvā svapna tathā saṁ vidma sa naḥ svapna duḥṣvapnyāt pāhi ॥5॥*
*vidma te svapna janitraṁ nirbhūtayāḥ putro'si yamasya karaṇaḥ ।*
*antako'si mṛtyurasi । taṁ tvā svapna tathā saṁ vidma sa naḥ svapna duḥṣvapnyāt pāhi ॥6॥*
*vidma te svapna janitraṁ parābhūtyāḥ putro'si yamasya karaṇaḥ ।*
*antako'si mṛtyurasi । taṁ tvā svapna tathā saṁ vidma sa naḥ svapna duḥṣvapnyāt pāhi ॥7॥*
*vidma te svapna janitraṁ devajāmīnāṁ putro'si yamasya karaṇaḥ ॥8॥*
*antako'si mṛtyurasi ॥9॥*
*taṁ tvā svapna tathā saṁ vidma sa naḥ svapna duḥṣvapnyāt pāhi ॥10॥*

अ. (Av.) १६.६.१-११

अजैष्माद्यासनामाद्या भूमानागसो वयम् ॥१॥
उषो यस्माद् दुःष्वप्न्यादभैष्माप तदुच्छतु ॥२॥
द्विषते तत् परा वह शपते तत् परा वह ॥३॥
यं द्विष्मो यश्च नो द्वेष्टि तस्मा एनद् गमयामः ॥४॥
उषा देवी वाचा संविदाना वाग् देव्युषसा संविदाना ॥५॥
उषस्पतिर्वाचस्पतिना संविदानो वाचस्पतिरुषस्पतिना संविदानः ॥६॥
तेऽमुष्मै परा वहन्त्वरायान् दुर्णाम्नः सदान्वाः ॥७॥

कुम्भीका दूषीकाः पीयकान् ॥८॥
जाग्रद्दुः ष्वप्न्यं स्वप्नेदुः ष्वप्न्यम् ॥९॥
अनागमिष्यतो वरानवित्तेः संकल्पानमुच्या द्रुहः पाशान् ॥१०॥
तदमुष्मा अग्ने देवाः परा वहन्तु वध्रिर्यथासद् विथुरो न साधुः ॥११॥
*ajaiṣmādyāsanāmādyā bhūmānāgaso vayam ॥1॥*
*uṣo yasmād duḥsvapnyādabhaiṣmāpa taduchchhatu ॥2॥*
*dviṣate tat parā vaha śapate tat parā vaha ॥3॥*
*yaṁ dviṣmo yaścha no dveṣṭi tasmā enad gamayāmaḥ ॥4॥*
*uṣā devī vāchā saṁvidānā vāg devyu1ṣasā saṁvidānā ॥5॥*
*uṣaspatirvāchaspatinā saṁvidāno vāchaspatiruṣaspatinā saṁvidānaḥ ॥6॥*
*te'muṣmai parā vahantvarāyān durṇāmnaḥ sadānvāḥ ॥7॥*
*kumbhīkā dūṣīkāḥ pīyakān ॥8॥*
*jāgradduḥ ṣvapnyaṁ svapneduḥ ṣvapnyam ॥9॥*
*anāgamiṣyato varānavitteḥ saṁkalpānamuchyā druhaḥ pāśān ॥10॥*
*tadamuṣmā agne devāḥ parā vahantu vadhriryathāsad vithuro na sādhuḥ ॥11॥*

अ. (Av.) १६.७.१-१३

तेनैनं विध्याम्यभूतयैनं विध्यामि निर्भूतयैनं विध्यामि पराभूत्यैनं विध्यामि ग्राह्यैनं विध्यामि तमसैनं विध्यामि ॥१॥
देवानामेनं घोरैः क्रूरैः प्रैषेरभिप्रेष्यामि ॥२॥
वैश्वानरस्यैनं दंष्ट्रयोरपि दधामि ॥३॥
एवानेवाव सा गरत् ॥४॥
यो३समान् द्वेष्टि तमात्मा द्वेष्टु यं वयं द्विष्मः स आत्मानं द्वेष्टु ॥५॥
निर्द्विषन्तं दिवो निः पृथिव्या निरन्तरिक्षाद् भजाम ॥६॥
सुयामंश्चाक्षुष ॥७॥
इदमहमामुष्यायणे३मुष्याः पुत्रे दुःष्वप्न्यं मृजे ॥८॥
यददोअदो अभ्यगच्छन् यद् दोषा यत् पूर्वां रात्रिम् ॥९॥
यज्जाग्रद् यत् सुप्तो यद् दिवा यन्नक्तम् ॥१०॥
यदहरहरभिगच्छामि तस्मादेनमव दये ॥११॥
तं जहि तेन मन्दस्व तस्य पृष्टीरपि शृणीहि ॥१२॥
स मा जीवीत् तं प्राणो जहातु ॥१३॥
*tenainaṁ vidhyāmyabhūtayainaṁ vidhyāmi nirbhūtayainaṁ vidhyāmi parābhūtyainaṁ vidhyāmi grāhyainaṁ vidhyāmi tamasainaṁ vidhyāmi ॥1॥*
*devānāmenaṁ ghoraiḥ krūraiḥ praiṣerabhipreṣyāmi ॥2॥*
*vaiśvānarasyainaṁ daṁṣṭrayorapi dadhāmi ॥3॥*
*evānevāva sā garat ॥4॥*
*yo3samān dveṣṭi tamātmā dveṣṭu yaṁ vayaṁ dviṣmaḥ sa ātmānaṁ dveṣṭu ॥5॥*
*nirdviṣantaṁ divo niḥ pṛthivyā nirantarikṣād bhajāma ॥6॥*
*suyāmaṁśchākṣuṣa ॥7॥*
*idamahamāmuṣyāyaṇe3muṣyāḥ putre duḥṣvapnyaṁ mṛje ॥8॥*
*yadadoado abhyagachchhan yad doṣā yat pūrvāṁ rātrim ॥9॥*
*yajjāgrad yat supto yad divā yannaktam ॥10॥*
*yadaharaharabhigachchhāmi tasmādenamava daye ॥11॥*
*taṁ jahi tena mandasva tasya pṛṣṭīrapi śṛṇīhi ॥12॥*
*sa mā jīvīt taṁ prāṇo jahātu ॥13*

अ. (Av.) १६.८.१-३३

जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञो३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ॥१॥
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ॥२॥
स ग्राह्याः पाशान्मा मोचि ॥३॥
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥४॥
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञो३ऽस्माकं पशवोऽस्माकं प्रजा अस्माकं

वीरा अस्माकम्। तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। स निर्ऋत्याः पाशान्मा मोचि।तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥५॥

जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽसमाकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् । तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। सोऽभूत्याः पाशान्मा मोचि। तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥६॥

जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्राह्मास्माकं स्वरस्माकं यज्ञोऽस्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम्। तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। स निर्भूत्याः पाशान्मा मोचि । तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥७॥

जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञो३ऽस्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम्। तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः । स पराभूत्याः पाशान्मा मोचि । तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥८॥

जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञो३ऽस्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् । तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः । स देवजामीनां पाशान्मा मोचि । तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥९॥

जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञो३ऽस्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् । तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः । स बृहस्पतेः पाशान्मा मोचि ।तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥१०॥

तिजमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञो३ऽस्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् । तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः । स प्रजापतेः पाशान्मा मोचि । तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥११॥

जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञो३ऽस्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् । तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः । स ऋषीणां पाशान्मा मोचि । तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥१२॥

जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम्। तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः । स आर्षेयाणां पाशान्मा मोचि । तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥१३॥

जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् । तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः । सोऽंगिरसां पाशान्मा मोचि । तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥१४॥

जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् । तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः । स अंगिरसानां पाशान्मा मोचि । तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥१५॥

जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् । तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः । सोऽथर्वणां पाशान्मा मोचि । तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥१६॥

जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम्। तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः । स आर्थर्वणानां पाशान्मा मोचि । तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥१७॥

जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् । तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः । स वनस्पतीनां पाशान्मा मोचि । तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥१८॥

जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम्। तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। स वानस्पत्यानां पाशान्मा मोचि । तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥१९॥

जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् । तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः । स ऋतूनां पाशान्मा मोचि । तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥२०॥

जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम्। तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। स आर्तवानां पाशान्मा मोचि। तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥२१॥
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम्। तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। स मासानां पाशान्मा मोचि। तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥२२॥
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम्। तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। सोऽर्धमासानां पाशान्मा मोचि। तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥२३॥
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम्। तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। सोहोरात्रयोः पाशान्मा मोचि। तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥२४॥
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम्। तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। सोऽह्नोः संयतोः पाशान्मा मोचि। तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥२५॥
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम्। तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। स द्यावापृथिव्योः पाशान्मा मोचि। तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥२६॥
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम्। तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। स इन्द्राग्न्योः पाशान्मा मोचि। तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥२७॥
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम्। तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। स मित्रावरुणयोः पाशान्मा मोचि। तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥२८॥
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम्। तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। स राज्ञो वरुणस्य पाशान्मा मोचि। तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥२९॥
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ॥३०॥
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ॥३१॥
स मृत्योः पड्वीशात् पाशान्मा मोचि ॥३२॥
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ॥३३॥

*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ svarasmākaṁ yajño3smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam //1 //*
*tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ //2 //*
*sa grāhyāḥ pāśānmā mochi //3 //*
*tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi //4 //*
*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ svarasmākaṁ yajño3'smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam / tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ / sa nirṛtyāḥ pāśānmā mochi /tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi //5 //*
*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ svarasmākaṁ yajño'samākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam / tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ / so'bhūtyāḥ pāśānmā mochi / tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi //6 //*
*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brāhmāsmākaṁ svarasmākaṁ yajño'smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam / tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ / sa nirbhūtyāḥ pāśānmā mochi /*

*tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi ॥7॥*
*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ svarasmākaṁ yajño3'smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam । tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ । sa parābhūtyāḥ pāśānmā mochi । tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi ॥8॥*
*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ svarasmākaṁ yajño3'smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam । tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ । sa devajāmīnāṁ pāśānmā mochi । tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi ॥9॥*
*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ svarasmākaṁ yajño3'smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam । tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ । sa bṛhaspateḥ pāśānmā mochi ।tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi ॥10॥*
*tijamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ svarasmākaṁ yajño3'smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam । tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ । sa prajāpateḥ pāśānmā mochi । tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi ॥11॥*
*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ svarasmākaṁ yajño3'smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam । tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ । sa ṛṣīṇāṁ pāśānmā mochi । tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi ॥12॥*
*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ svarasmākaṁ yajño'3smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam । tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ । sa ārṣeyāṇāṁ pāśānmā mochi । tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi ॥13॥*
*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ svarasmākaṁ yajño'3smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam । tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ । so'ṁgirasāṁ pāśānmā mochi । tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi ॥14॥*
*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ svarasmākaṁ yajño'3smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam । tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ । sa aṁgirasānāṁ pāśānmā mochi । tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi ॥15॥*
*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ svarasmākaṁ yajño'3smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam । tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ । so'tharvaṇāṁ pāśānmā mochi । tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi ॥16॥*
*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ svarasmākaṁ yajño'3smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam । tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ । sa ārtharvaṇānāṁ pāśānmā mochi । tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi ॥17॥*
*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ svarasmākaṁ yajño'3smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam । tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ । sa vanaspatīnāṁ pāśānmā mochi । tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ*

*pādayāmi ॥18॥*
*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ svarasmākaṁ yajño'3smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam । tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ । sa vānaspatyānāṁ pāśānmā mochi । tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi ॥19॥*
*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ svarasmākaṁ yajño'3smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam । tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ । sa ṛtūnāṁ pāśānmā mochi । tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi ॥20॥*
*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ svarasmākaṁ yajño'3smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam । tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ । sa ārtavānāṁ pāśānmā mochi । tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi ॥21॥*
*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ svarasmākaṁ yajño'3smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam । tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ । sa māsānāṁ pāśānmā mochi । tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi ॥22॥*
*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ svarasmākaṁ yajño'3smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam । tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ । so'rdhamāsānāṁ pāśānmā mochi । tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi ॥23॥*
*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ svarasmākaṁ yajño'3smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam । tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ । sohorātrayoḥ pāśānmā mochi । tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi ॥24॥*
*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ svarasmākaṁ yajño'3smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam । tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ । so'hnoḥ saṁyatoḥ pāśānmā mochi । tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi ॥25॥*
*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ svarasmākaṁ yajño'3smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam । tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ । sa dyāvāpṛthivyoḥ pāśānmā mochi । tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi ॥26॥*
*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ svarasmākaṁ yajño'3smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam । tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ । sa indrāgnyoḥ pāśānmā mochi । tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi ॥27॥*
*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ svarasmākaṁ yajño'3smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam । tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ । sa mitrāvaruṇayoḥ pāśānmā mochi । tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi ॥28॥*
*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ svarasmākaṁ yajño'3smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam । tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ । sa rājño varuṇasya pāśānmā mochi । tasyedaṁ varchastejaḥ prāṇamāyurni*

*veṣṭayāmīdamenamadharāṁchaṁ pādayāmi ॥29॥*
*jitamasmākamudbhinnamasmākamṛtamasmākaṁ tejo'smākaṁ brahmāsmākaṁ*
*svarasmākaṁ yajño'3smākaṁ paśavo'smākaṁ prajā asmākaṁ vīrā asmākam ॥30॥*
*tasmādamuṁ nirbhajāmo'mumāmuṣyāyaṇamamuṣyāḥ putramasau yaḥ ॥31॥*
*sa mṛtyoḥ paḍvīśāt pāśānmā mochi ॥32॥*
*tasyedaṁ varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi ॥33॥*

अ. (Av.) १९.५६.१-६

यमस्य लोकादध्या बभूविथ प्रमदा मर्त्यान् प्र युनक्षि धीरः ।
एकाकिना सरथं यासि विद्वान्त्स्वप्नं मिमानो असुरस्य योनौ ॥१॥
बन्धस्त्वाग्रे विश्वचया अपश्यत् पुरा रात्र्या जनितोरेके अह्नि ।
ततः स्वप्नेदमध्या बभ्रविथ भिषग्भ्यो रूपमपगूहमानः ॥२॥
बृहद्गावासुरेभ्योऽधिं देवानुपावर्तत महिमानमिच्छन् ।
तस्मै स्वप्नाय दधुराधिपतयं त्रयस्त्रिंशासः स्वरानशानाः ॥३॥
नैतां विदुः पितरो नोत देवा येषां जल्पिश्चरत्यन्तरेदम् ।
त्रिते स्वप्नमदधुराप्त्ये नर आदित्यासो वरुणेनानुशिष्टाः ॥४॥
यस्य क्रूरमभजन्त दुष्कृतोऽस्वप्नेन सुकृतः पुण्यमायुः ।
स्वर्मदसि परमेण बन्धुना तप्यमानस्य मनसोऽधि जज्ञिषे ॥५॥
विद्म ते सर्वाः परिजाः पुरस्ताद् विद्म स्वप्न यो अधिपा इहा ते ।
यशस्विनो नो यशसेह पाह्यराद् द्विषेभिरप याहि दूरम् ॥६॥
*yamasya lokādadhyā babhūvitha pramadā martyān pra yunakṣi dhīraḥ ।*
*ekākinā sarathaṁ yāsi vidvāntsvapnaṁ mimāno asurasya yonau ॥1॥*
*bandhastvāgre viśvachayā apaśyat purā rātrayā janitoreke ahni ।*
*tataḥ svapnedamadhyā babhravitha bhiṣagbhyo rūpamapagūhamānaḥ ॥2॥*
*bṛhadgāvāsurebhyo'dhiṁ devānupāvartata mahimānamichchhan ।*
*tasmai svapnāya dadhurādhipatayaṁ trayastriṁśāsaḥ svarānaśānāḥ ॥3॥*
*naitāṁ viduḥ pitaro nota devā yeṣāṁ jalpiścharatyantaredam ।*
*trite svapnamadadhurāptye nara ādityāso varuṇenānuśiṣṭāḥ ॥4॥*
*yasya krūramabhajanta duṣkṛto'svapnena sukṛtaḥ puṇyamāyuḥ ।*
*svarmadasi parameṇa bandhunā tapyamānasya manaso'dhi jajñiṣe ॥5॥*
*vidma te sarvāḥ parijāḥ purastād vidma svapna yo adhipā ihā te ।*
*yaśasvino no yaśaseha pāhyarād dviṣebhirapa yāhi dūram ॥6॥*

अ. (Av.) १९.५७.१-५

यथा कलां यथा शफं यथर्णं संनयन्ति ।
एवा दुःष्वप्न्यं सर्वमाप्रिये सं नयामसि ॥१॥
सं राजानो अगुः समृणान्यगुः सं कुष्ठा अगुः सं कला अगुः ।
समस्मासु यद् दुःष्वप्न्यं निर्द्विषते दुःष्वप्न्यं सुवाम ॥२॥
देवानां पत्नीनां गर्भ यमस्य कर यो भद्रः स्वप्न ।
स मम यः पापस्तद् द्विषते प्र हिण्मः। मा तृष्टानामसि कृष्णशकुनेर्मुखम् ॥३॥
तं त्वा स्वप्न तथा सं विद्म स त्वं स्वप्नाश्वइव कायमश्वइव नीनाहम् ।
अनास्माकं देवपीयुं पियारुं वप यदस्मासु दुःष्वप्न्यं यद्गोषु यच्च नो गृहे ॥४॥
अनास्माकस्तद् देवपीयुः पियारुर्निष्कमिव प्रति मुंचताम् ।
नवारत्नीनपमया अस्माकं ततः परि। दुःष्वप्न्यं सर्वं द्विषते निर्दयामसि ॥५॥
*yathā kalāṁ yathā śaphaṁ yatharṇaṁ saṁnayanti ।*
*evā duḥṣvapnyaṁ sarvamāpriye saṁ nayāmasi ॥1॥*
*saṁ rājāno aguḥ samṛṇānyaguḥ saṁ kuṣṭhā aguḥ saṁ kalā aguḥ ।*
*samasmāsu yad duḥṣvapnyaṁ nirdviṣate duḥṣvapnyaṁ suvāma ॥2॥*
*devānāṁ patnīnāṁ garbha yamasya kara yo bhadraḥ svapna ।*
*sa mama yaḥ pāpastad dviṣate pra hiṇmaḥ । mā tṛṣṭānāmasi kṛṣṇaśakunermukham ॥3॥*
*taṁ tvā svapna tathā saṁ vidma sa tvaṁ svapnāśvaiva kāyamaśvaiva nīnāham ।*
*anāsmākaṁ devapīyuṁ piyāruṁ vapa yadasmāsu duḥṣvapnyaṁ yadgoṣu yachcha no gṛhe*

*॥4 ॥*
*anāsmākastad devapīyuḥ piyārurniṣkamiva prati mumchatām ।*
*navāratnīnapamayā asmākam tataḥ pari ।*
*duḥṣvapnyam sarvam dviṣate nirdayāmasi ॥5 ॥*

४. प्रजापतिः (Prajāpatiḥ) - अ. (Av.) १६.९.१
जितमस्माकमुद्भिन्नमस्माकमभ्यष्ठां विश्वाः पृतना अरातीः ॥१॥
*jitamasmākamudbhinnamasmākamabhyaṣṭhām viśvāḥ pṛtanā arātīḥ ॥1 ॥*

५. मन्त्रोक्ताः (Mantroktāḥ) - अ. (Av.) १६.९.२
तदग्निराह तदु सोम आह पूषा मा धात् सुकृतस्य लोके ॥२॥
*tadagnirāha tadu soma āha pūṣā mā dhāt sukṛtasya loke ॥2 ॥*

६. यमः (Yamaḥ) - ऋ. (Rv.) १०.१४.१-५; १०.१४.१३-१६
ऋ. (Rv.) १०.१४.१-५
परेयिवांसं प्रवतो महीरनु बहुभ्यः पन्थामनुपस्पशानम् ।
वैवस्वतं संगमनं जनानां यमं राजानं हविषा दुवस्य ॥१॥
यमो नो गातुं प्रथमो विवेद नैषा गव्यूतिरपभर्तवा उ ।
यत्रा नः पूर्वे पितरः परेयुरेना जज्ञनाः पथ्या३ अनु स्वाः ॥२॥
मातली कव्यैर्यमो अंगिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः ।
याँश्च देवा वावृधुर्ये च देवान्त्स्वाहान्ये स्वधयान्ये मदन्ति ॥३॥
इमं यम प्रस्तरमा हि सीदांगिरोभिः पितृभिः संविदानः ।
आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन्हविषा मादयस्व ॥४॥
अंगिरोभिरा गहि यज्ञियेभिर्यम वैरूपैरिह मादयस्व ।
विवस्वन्तं हुवे यः पिता तेऽस्मिन्यज्ञे बर्हिष्या निषद्य ॥५॥
*pareyivāṁsam pravato mahīranu bahubhyaḥ panthāmanupaspaśānam ।*
*vaivasvatam saṁgamanam janānām yamam rājānam haviṣā duvasya ॥1 ॥*
*yamo no gātum prathamo viveda naiṣā gavyūtirapabhartavā u ।*
*yatrā naḥ pūrve pitaraḥ pareyurenā jajñanāḥ pathyā3 anu svāḥ ॥2 ॥*
*mātalī kavyairyamo aṁgirobhirbṛhaspatirṛkvabhirvāvṛdhānaḥ ।*
*yāṁścha devā vāvṛdhurye cha devāntsvāhānye svadhayānye madanti ॥3 ॥*
*imam yama prastaramā hi sīdāṁgirobhiḥ pitṛbhiḥ saṁvidānaḥ ।*
*ā tvā mantrāḥ kaviśastā vahantvenā rājanhaviṣā mādayasva ॥4 ॥*
*aṁgirobhirā gahi yajñiyebhiryama vairūpairiha mādayasva ।*
*vivasvantam huve yaḥ pitā te'sminyajñe barhiṣyā niṣadya ॥5 ॥*

ऋ. (Rv.) १०.१४.१३-१६
यमाया सोमं सुनुत यमाय जुहुता हविः। यमं ह यज्ञो गच्छत्यग्निदूतो अरंकृतः ॥१३॥
यमाय घृतवद्धविर्जुहोत प्र च तिष्ठत। स नो देवेष्वा यमद्दीर्घमायुः प्र जीवसे ॥१४॥
यमाय मधुमत्तमं राज्ञे हव्यं जुहोतन। इदं नम ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः ॥१५॥
त्रिकदुकेभिः पतति षळुर्वीरेकमिद् बृहत्।
त्रिष्टुब्गायत्री छन्दांसि सर्वा ता यम आहिता ॥१६॥
*yamāyā somam sunuta yamāya juhutā haviḥ ।*
*yamam ha yajño gachchhatyagnidūto aramkṛtaḥ ॥13 ॥*
*yamāya ghṛtavaddhavirjuhota pra cha tiṣṭhata ।*
*sa no deveṣvā yamaddīrghamāyuḥ pra jīvase ॥14 ॥*
*yamāya madhumattamam rājñe havyam juhotana ।*
*idam nama ṛṣibhyaḥ pūrvajebhyaḥ pūrvebhyaḥ pathikṛdbhyaḥ ॥15 ॥*
*trikadukebhiḥ patati ṣaḷurvīrekamid bṛhat ।*
*triṣṭubgāyatrī chhandāṁsi sarvā tā yama āhitā ॥16 ॥*

७. लिङ्गोक्ता (Liṅgoktā) - ऋ. (Rv.) १०.१४.६
अंगिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः ।
तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥६॥

*aṁgiraso naḥ pitaro navagvā atharvāṇo bhṛgavaḥ somyāsaḥ /*
*teṣāṁ vayaṁ sumatau yajñiyānāmapi bhadre saumanase syāma //6 //*

८. लिङेक्ता पितरो वा (Liṅektā Pitaro Vā) - ऋ. (Rv.) १०.१४.७-९

प्रेहि प्रेहि पथिभिः पूर्व्येभिर्यत्रा नः पूर्वे पितरः परेयुः ।
उभा राजाना स्वधया मदन्ता यमं पश्यासि वरुणं च देवम् ॥७ ॥
सं गच्छस्व पितृभिः सं यमेनेष्टापूर्तेन परमे व्योमन् ।
हित्वायावद्यं पुनरस्तमेहि सं गच्छस्व तन्वा सुवर्चाः ॥८ ॥
अपेत वीत वि च सर्पतातोऽस्मा एतं पितरो लोकमक्रन् ।
अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्यवसानमस्मै ॥९ ॥

*prehi prehi pathibhiḥ pūrvyebhiryatrā naḥ pūrve pitaraḥ pareyuḥ /*
*ubhā rājānā svadhayā madantā yamaṁ paśyāsi varuṇaṁ cha devam //7 //*
*saṁ gachchhasva pitṛbhiḥ saṁ yameneṣṭāpūrtena parame vyoman /*
*hitvāyāvadyaṁ punarastamehi saṁ gachchhasva tanvā suvarchāḥ //8 //*
*apeta vīta vi cha sarpatāto'smā etaṁ pitaro lokamakran /*
*ahobhiradbhiraktabhirvyaktaṁ yamo dadātyavasānamasmai //9 //*

९. श्वानौ (Śvānau) - ऋ. (Rv.) १०.१४.१०-१२

अति द्रव सारमेयौ श्वानौ चतुरक्षौ शबलौ साधुनां पथा ।
अथा पितृन्त्सुविदत्राँ उपेहि यमेन ये सधमादं मदन्ति ॥१० ॥
यौ ते श्वानौ यम रक्षितारौ चतुरक्षौ पथिरक्षी नृचक्षसौ ।
ताभ्यामेनं परि दोहि राजन्त्स्वस्ति चास्मा अन्मीवं च धेहि ॥११ ॥
उरूणसावसुतृपा उदुम्बलौ यमस्य दूतौ चरतो जनाँ अनु ।
तावस्मभ्यं दृशये सूर्याय पुनर्दातामसुमद्येह भद्रम् ॥१२ ॥

*ati drava sārameyau śvānau chaturakṣau śablau sādhunāṁ pathā /*
*athā pitṛntsuvidatrām̐ upehi yamena ye sadhamādaṁ madanti //10 //*
*yau te śvānau yama rakṣitārau chaturakṣau pathirakṣī nṛchakṣasau /*
*tābhyāmenaṁ pari dohi rājantsvasti chāsmā anmīvaṁ cha dhehi //11 //*
*urūṇasāvasutṛpā udumbalau yamasya dūtau charato janām̐ anu /*
*tāvasmabhyaṁ dṛśaye sūryāya punardātāmasumadyeha bhadram //12 //*

१०. सूर्यः (Sūryaḥ) - अ. (Av.) १६.९.३-४

अगन्म स्वः१ स्वरगन्म सं सूर्यस्य ज्योतिषागन्म ॥३ ॥
वस्योभूयाय वसुमान् यज्ञो वसु वंशिषीय वसुमान् भूयासं वसु मयि धेहि ॥४ ॥

*aganma svaḥ1 svaraganma saṁ sūryasya jyotiṣāganma //3 //*
*vasyobhūyāya vasumān yajño vasu vaṁśiṣīya vasumān bhūyāsaṁ vasu mayi dhehi //4 //*

११. स्वर्गः ओदनः अग्निः (Svargaḥ Odanaḥ Agniḥ) - अ. (Av.) १२.३.१-६०

पुमान् पुंसोऽधि तिष्ठ चर्मेहि तत्र ह्वयस्व यतमा प्रिया ते ।
यावन्तावग्रे प्रथमं समेयथुस्तद् वां वयो यमराज्ये समानम् ॥१ ॥
तावद् वां चक्षुस्तति वीर्याणि तावत् तेजस्ततिधा वाजिनानि ।
अग्निः शरीरं सचते यदैधोऽधा पक्वान्मिथुना सं भवाथः ॥२ ॥
समस्मिँल्लोके समु देवयाने सं स्मा समेतं यमराज्येषु ।
पूतौ पवित्रैरुप तद्धयेथां यद्यद् रेतो अधि वां संबभूव ॥३ ॥
आपस्पुत्रासो अभि सं विशध्वमिमं जीवं जीवधन्याः समेत्य ।
तासां भजध्वममृतं यमाहुर्यमोदनं पचति वां जनित्री ॥४ ॥
यं वां पिता पचति यं च माता रिप्रान्निर्मुक्त्यसै शमलाच्च वाचः ।
स ओदनः शतधारः स्वर्ग उभे व्याप नभसी महित्वा ॥५ ॥
उभे नभसी उभयांश्च लोकान् ये यज्वनामभिजिताः स्वर्गाः ।
तेषां ज्योतिष्मान् मधुमान् यो अग्रे तस्मिन् पुत्रैर्जरसि सं श्रयेथाम् ॥६ ॥
प्राचींप्राचीं प्रदिशमा रभेथामेतं श्रद्दधानाः सचन्ते ।
यद् वां पक्वं परिविष्टमग्नौ तस्य गुप्तये दम्पती सं श्रयेथाम् ॥७ ॥

दक्षिणां दिशमभि नक्षमाणौ पर्यावर्तेथामभि पात्रमेतत् ।
तस्मिन् वां यमः पितृभिः संविदानः पक्काय शर्म बहुलं नि यच्छात् ॥८॥
प्रतीचीं दिशामियमिद् वरं यस्यां सोमो अधिपा मृडिता च ।
तस्यां श्रयेथां सुकृतः सचेथामधा पक्कान्मिथुना सं भवाथः ॥९॥
उत्तरं राष्ट्रं प्रजयोत्तरावद् दिशामुदीची कृणवन्नो अग्रम् ।
पाङ्क्तं छन्दः पुरुषो बभूव विश्वैर्विश्वंगैः सह सं भवेम ॥१०॥
ध्रुवेयं विराण्नमो अस्त्वस्यै शिवा पुत्रेभ्य उत मह्यमस्तु ।
सा नो देव्यदिते विश्ववार इर्यइव गोपा अभि रक्ष पक्कम् ॥११॥
पितेव पुत्रानभि सं स्वजस्व नः शिवा नो वाता इह वान्तु भूमौ ।
यमोदनं पचतो देवते इह तन्नस्तप उत सत्यं च वेत्तु ॥१२॥
यद्यत् कृष्णः शकुन एह गत्वा त्सरन् विषक्तं बिल आससाद ।
यद्वा दास्या३र्द्रहस्ता समङ्क्त उलूखलं मुसलं शुम्भतापः ॥१३॥
अयं ग्रावा पृथुबुध्नो वयोधाः पूतः पवित्रैरप हन्तु रक्षः ।
आ रोह चर्म महि शर्म यच्छ मा दम्पती पौत्रमघं नि गाताम् ॥१४॥
वनस्पतिः सह देवैर्न आगन् रक्षः पिशाचाँ अपबाधमानः ।
स उच्छ्रयातै प्र वदाति वाचं तेन लोकाँ अभि सर्वांजयेम ॥१५॥
सप्त मेधान् पशवः पर्यगृह्णन् य एषां ज्योतिष्माँ उत यश्चकर्श ।
त्रयस्त्रिंशद् देवतास्तान्त्सचन्ते स नः स्वर्गमभि नेष लोकम् ॥१६॥
स्वर्गं लोकमभि नो नयासि सं जायया सह पुत्रैः स्याम ।
गृह्णामि हस्तमनु मैत्वत्र मा नस्तारीन्निर्ऋतिर्मो अरातिः ॥१७॥
ग्राहिं पाप्मानमति ताँ अयाम तमो व्यस्य प्र वदासि वल्गु ।
वानस्पत्य उद्यतो मा जिहिंसीर्मा तण्डुलं वि शरीर्देवयन्तम् ॥१८॥
विश्वव्यचा घृतपृष्ठो भविष्यन्त्सयोनिर्लोकमुप याह्येतम् ।
वर्षवृद्धमुप यच्छ शूर्पं तुषं पलावानप तद् विनक्तु ॥१९॥
त्रयो लोकाः संमिता ब्राह्मणेन द्यौरेवासौ पृथिव्य१न्तरिक्षम् ।
अंशून् गृभीत्वान्वारभेथामा प्यायन्तां पुनरा यन्तु शूर्पम् ॥२०॥
पृथग् रूपाणि बहुधा पशूनामेकरूपो भवसि सं समृद्ध्या ।
एतां त्वचं लोहिनीं तां नुदस्व ग्रावा शुम्भाति मलगइव वस्त्रा ॥२१॥
पृथिवीं त्वा पृथिव्यामा वेशयामि तनूः समानि विकृता त एषा ।
यद्यद् द्युत्तं लिखितमर्पणेन तेन मा सुस्रोर्ब्रह्मणापि तद् वपामि ॥२२॥
जनित्रीव प्रति हर्यासि सूनुं सं त्वा दधामि पृथिवीं पृथिव्या ।
उखा कुम्भी वेद्यां मा व्यथिष्ठा यज्ञायुधैराज्येनातिषक्ता ॥२३॥
अग्निः पचन् रक्षतु त्वा पुरस्तादिन्द्रो रक्षतु दक्षिणतो मरुत्वान् ।
वरुणास्त्वा दृंहाद्धरुणे प्रतीच्या उत्तरात् त्वा सोमः सं ददातै ॥२४॥
पूताः पवित्रैः पवन्ते अभ्राद् दिवं च यन्ति पृथिवीं च लोकान् ।
ता जीवलाः जीवधन्याः प्रतिष्ठाः पात्र आसिक्ताः पर्यग्निरिन्धाम् ॥२५॥
आ यन्ति दिवः पृथिवीं सचन्ते भूम्याः सचन्ते अध्यन्तरिक्षम् ।
शुद्धाः सतीस्ता उ शुम्भन्त एव ता नः स्वर्गमभि लोकं नयन्तु ॥२६॥
उतेव प्रभ्वीरुत संमितास उत शुक्राः शुचयश्चामृतासः ।
ता ओदनं दंपतिभ्यां प्रशिष्टा आपः शिक्षन्तीः पचता सुनाथाः ॥२७॥
संख्याता स्तोकाः पृथिवीं सचन्ते प्राणापानैः संमिता ओषधीभिः ।
असंख्याता ओप्यमानाः सुवर्णाः सर्वं व्यापुः शुचयः शुचित्वम् ॥२८॥
उद्योधन्त्यभि वल्गन्ति तप्ताः फेनमस्यन्ति बहुलांश्च बिन्दून् ।
योषेव दृष्ट्वा पतिमृत्वियायैतैस्तण्डुलैर्भवता समापः ॥२९॥
उत्थापय सीदतो बुध्न एनानद्भिरात्मानमभि सं स्पृशन्ताम् ।
अमासि पात्रैरुदकं यदेतन्मितास्तण्डुलाः प्रदिशो यदीमाः ॥३०॥
प्र यच्छ पर्शुं त्वरया हरौषमहिंसन्त ओषधीर्दान्तु पर्वन् ।

यासां सोमः परि राज्यं बभूवामन्युता नो वीरुधो भवन्तु ॥३१॥
यां नवं बर्हिरोदनाय स्तृणीत प्रियं हृदश्चक्षुषो वल्ग्वस्तु ।
तस्मिन् देवाः सह दैवीर्विशन्त्विमं प्राश्नन्त्वृतुभिर्निषद्य ॥३२॥
वनस्पते स्तीर्णमा सीद बर्हिरग्निष्टोमैः संमितो देवताभिः ।
त्वष्ट्रेव रूपं सुकृतं स्वधित्यैना एहाः परि पात्रे ददृश्राम् ॥३३॥
षष्ट्यां शरत्सु निधिपा अभीच्छात् स्वः पक्वेनाभ्यश्नवातै ।
उपैनं जीवान् पितरश्च पुत्रा एतं स्वर्गं गमयान्तमग्नेः ॥३४॥
धर्ता ध्रियस्व धरुणे पृथिव्या अच्युतं त्वा देवताश्च्यावयन्तु ।
तं त्वा दम्पती जीवन्तौ जीवपुत्रावुद् वासयातः पर्यग्निधानात् ॥३५॥
सर्वान्त्समागा अभिजित्य लोकान् यावन्तः कामाः समतीतृपस्तान् ।
वि गाहेथामायवनं च दर्विरेकस्मिन् पात्रे अध्युद्धरैनम् ॥३६॥
उप स्तृणीहि प्रथय पुरस्ताद् घृतेन पात्रमभि घारयैतत् ।
वाश्रेवोस्रा तरुणं स्तनस्युमिमं देवासो अभिहिंकृणोत ॥३७॥
उपास्तरीकरो लोकमेतमुरुः प्रथतामसमः स्वर्गः ।
तस्मिंछ्रयातै महिषः सुपर्णो देवा एनं देवताभ्यः प्र यच्छान् ॥३८॥
यद्यज्जाया पचति त्वत् परःपरः पतिर्वा जाये त्वत् तिरः ।
सं तत् सृजेथां सह वां तदस्तु संपादयन्तौ सह लोकमेकम् ॥३९॥
यावन्तो अस्याः पृथिवीं सचन्ते अस्मत् पुत्राः परि ये संबभूवुः ।
सर्वांस्ताँ उप पात्रे ह्वयेथां नाभिं जानानाः शिशवः समायान् ॥४०॥
वसोर्या धारा मधुना प्रपीना घृतेन मिश्रा अमृतस्य नाभयः ।
सर्वास्ता अव रुन्धे स्वर्गः षष्ट्यां शरत्सु निधिपा अभीच्छात् ॥४१॥
निधिं निधिपा अभ्येनमिच्छादनीश्वरा अभितः सन्तु येऽन्ये ।
अस्माभिर्दत्तो निहितः स्वर्गस्त्रिभिः काण्डैस्त्रीन्त्स्वर्गानरुक्षत् ॥४२॥
अग्नी रक्षस्तपतु यद् विदेवं क्रव्यात् पिशाच इह मा प्र पास्त ।
नुदाम एनमप रुध्मो अस्मदादित्या एनमंगिरसः सचन्ताम् ॥४३॥
आदित्येभ्यो अंगिरोभ्यो मध्विदं घृतेन मिश्रं प्रति वेदयामि ।
शुद्धहस्तौ ब्राह्मणस्यानिहत्यैतं स्वर्गं सुकृतावपीतम् ॥४४॥
इदं प्रापमुत्तमं काण्डमस्य यस्माल्लोकात् परमेष्ठी समाप ।
आ सिंच सर्पिर्घृतवत् समङ्ग्ध्येष भागो अंगिरसो नो अत्र ॥४५॥
सत्याय च तपसे देवताभ्यो निधिं शेवधिं परि दद्म एतम् ।
मा नो द्यूतेऽव गान्मा समित्यां मा स्मान्यस्मा उत्सृजता पुरा मत् ॥४६॥
अहं पचाम्यहं ददामि ममेदु कर्मन् करुणेऽधि जाया ।
कौमारो लोको अजनिष्ट पुत्रोऽन्वारभेथां वय उत्तरावत् ॥४७॥
न किल्विषमत्र नाधारो अस्ति न यन्मित्रैः सममान एति ।
अनूनं पात्रं निहितं न एतत् पक्तारं पक्वः पुनरा विशाति ॥४८॥
प्रियं प्रियाणां कृणवाम तमस्ते यन्तु यतमे द्विषन्ति ।
धेनुरनड्वान् वयोवय आयदेव पौरुषेयमप मृत्युं नुदन्तु ॥४९॥
समग्नयो विदुरन्यो अन्यं य ओषधीः सचते यश्च सिन्धून् ।
यावन्तो देवा दिव्याऽतपन्ति हिरण्यं ज्योतिः पचतो बभूव ॥५०॥
एषा त्वचां पुरुषे सं बभूवानग्नाः सर्वे पशवो ये अन्ये ।
क्षत्रेणात्मानं परि धापयाथोऽमोतं वासो मुखमोदनस्य ॥५१॥
यदक्षेषु वदा यत् समित्यां यद्वा वदा अनृतं वित्तकाम्या ।
समानं तन्तुमभि संवसानौ तस्मिन्त्सर्वं शमलं सादयाथः ॥५२॥
वर्षं वनुष्वापि गच्छ देवांस्त्वचो धूमं पर्युत्पातयासि ।
विश्वव्यचा घृतपृष्ठो भविष्यन्त्सयोनिर्लोकमुप याह्येतम् ॥५३॥
तन्वं स्वर्गो बहुधा वि चक्रे यथा विद आत्मन्नन्यवर्णाम् ।
अपाजैत् कृष्णां रुशतीं पुनानो या लोहिनी तां ते अग्नौ जुहोमि ॥५४॥

प्राच्यै त्वा दिशे३ग्नयेऽधिपतयेऽसिताय रक्षित्र आदित्यायेमुषमते ।
एतं परि दद्मस्तं नो गोपायतास्माकमैतोः ।
दिष्टं नो अत्र जरसे नि नेषज्जरा मृत्यवे परि णो ददात्वथ पक्वेन सह सं भवेम ॥५५॥
दक्षिणायै त्वा दिश इन्द्रायाधिपतये तिरश्चिराजये रक्षित्रे यमायेषुमते ।
एतं परि दद्मस्तं नो गोपायतास्माकमैतोः ।
दिष्टं नो अत्र जरसे नि नेषज्जरा मृत्यवे परि णो ददात्वथ पक्वेन सह सं भवेम ॥५६॥
प्रतीच्यै त्वा दिशे वरुणायाधिपतये पृदाकवे रक्षित्रेऽन्नायेषुमते ।
एतं परि दद्मस्तं नो गोपायतास्माकमैतोः ।
दिष्टं नो अत्र जरसे नि नेषज्जरा मृत्यवे परि णो ददात्वथ पक्वेन सह सं भवेम ॥५७॥
उदीच्यै त्वा दिशे सोमायाधिपतये स्वजाय रक्षित्रेऽशन्या इषुमत्यै ।
एतं परि दद्मस्तं नो गोपायतास्माकमैतोः ।
दिष्टं नो अत्र जरसे नि नेषज्जरा मृत्यवे परि णो ददात्वथ पक्वेन सह सं भवेम ॥५८॥
ध्रुवायै त्वा दिशे विष्णवेऽधिपतये कल्माषग्रीवाय रक्षित्र ओषधीभ्य इषुमतीभ्यः ।
एतं परि दद्मस्तं नो गोपायतास्माकमैतोः ।
दिष्टं नो अत्र जरसे नि नेषज्जरा मृत्यवे परि णो ददात्वथ पक्वेन सह सं भवेम ॥५९॥
ऊर्ध्वायै त्वा दिशे बृहस्पतयेऽधिपतये श्वित्राय रक्षित्रे वर्षायेषुमते ।
एतं परि दद्मस्तं नो गोपायतास्माकमैतोः ।
दिष्टं नो अत्र जरसे नि नेषज्जरा मृत्यवे परि णो ददात्वथ पक्वेन सह सं भवेम ॥६०॥

*pumān puṁso'dhi tiṣṭha charmehi tatra hvayasva yatamā priyā te /*
*yāvantāvagre prathamaṁ sameyathustad vāṁ vayo yamarājye samānam //1 //*
*tāvad vāṁ chakṣustati vīryāṇi tāvat tejastatidhā vājināni /*
*agniḥ śarīraṁ sachate yadaidho'dhā pakvānmithunā saṁ bhavāthāḥ //2 //*
*samasiṁ̐malloke samu devayāne saṁ smā sametaṁ yamarājyeṣu /*
*pūtau pavitrairupa taddhvayethāṁ yadyad reto adhi vāṁ saṁbabhūva //3 //*
*āpasputrāso abhi saṁ viśadhvamimaṁ jīvaṁ jīvadhanyāḥ sametya /*
*tāsāṁ bhajadhvamamṛtaṁ yamāhuryamodanaṁ pachati vāṁ janitrī //4 //*
*yaṁ vāṁ pitā pachati yaṁ cha mātā riprānnirmuktyasai śamalāchcha vāchaḥ /*
*sa odanaḥ śatadhāraḥ svarga ubhe vyāpa nabhasī mahitvā //5 //*
*ubhe nabhasī ubhayāṁścha lokān ye yajvanāmabhijitāḥ svargāḥ /*
*teṣāṁ jyotiṣmān madhumān yo agre tasmin putrairjarasi saṁ śrayethām //6 //*
*prāchīṁprāchīṁ pradiśamā rabhethāmetaṁ śraddadhānāḥ sachante /*
*yad vāṁ pakvaṁ pariviṣṭamagnau tasya guptaye dampatī saṁ śrayethām //7 //*
*dakṣiṇāṁ diśamabhi nakṣamāṇau paryāvartethāmabhi pātrametat /*
*tasmin vāṁ yamaḥ pitṛbhiḥ saṁvidānaḥ pakvāya śarma bahulaṁ ni yachchhāt //8 //*
*pratīchīṁ diśāmiyamid varaṁ yasyāṁ somo adhipā mṛḍitā cha /*
*tasyāṁ śrayethāṁ sukṛtaḥ sachethāmadhā pakvānmithunā saṁ bhavāthaḥ //9 //*
*uttaraṁ rāṣṭraṁ prajayottarāvad diśāmudīchī kṛṇavanno agram /*
*pānnktaṁ chhandaḥ puruṣo babhūva viśvairviśvaṁgaiḥ saha saṁ bhavema //10 //*
*dhruveyaṁ virāṇnamo astvasyai śivā putrebhya uta mahyamastu /*
*sā no devyadite viśvavāra iryaiva gopā abhi rakṣa pakvam //11 //*
*piteva putrānabhi saṁ svajasva naḥ śivā no vātā iha vāntu bhūmau /*
*yamodanaṁ pachato devate iha tannastapa uta satyaṁ cha vettu //12 //*
*yadyat kṛṣṇaḥ śakuna eha gatvā tsaran viṣaktaṁ bila āsasāda /*
*yadvā dāsyā3rdrahastā samaṅkta ulūkhalaṁ musalaṁ śumbhatāpaḥ //13 //*
*ayaṁ grāvā pṛthubudhno vayodhāḥ pūtaḥ pavitrairapa hantu rakṣaḥ /*
*ā roha charma mahi śarma yachchha mā dampatī pautramaghaṁ ni gātām //14 //*
*vanaspatiḥ saha devairna āgan rakṣaḥ piśāchāṁ̐ apabādhamānaḥ /*
*sa uchchhrayātai pra vadāti vāchaṁ tena lokāṁ̐ abhi sarvāṁrajayema //15 //*
*sapta medhān paśavaḥ paryagṛhṇan ya eṣāṁ jyotiṣmāṁ̐ uta yaśchakarśa /*
*trayastriṁśad devatāstāntsachante sa naḥ svargamabhi neṣa lokam //16 //*
*svargaṁ lokamabhi no nayāsi saṁ jāyayā saha putraiḥ syāma /*
*gṛhṇāmi hastamanu maitvatra mā nastārīnniṛrtirmo arātiḥ //17 //*

*grāhiṁ pāpmānamati tām̐ ayāma tamo vyasya pra vadāsi valgu* ।
*vānaspatya udyato mā jihiṁsīrmā taṇḍulaṁ vi śarīrdevayantam* ॥18॥
*viśvavyachā ghṛtapṛṣṭho bhaviṣyantsayonirlokamupa yāhyetam* ।
*varṣavṛddhamupa yachchha śūrpaṁ tuṣaṁ palāvānapa tad vinaktu* ॥19॥
*trayo lokāḥ saṁmitā brāhmaṇena dyaurevāsau pṛthivya1ntarikṣam* ।
*aṁśūn gṛbhītvānvārabhethāmā pyāyantāṁ punarā yantu śūrpam* ॥20॥
*pṛthag rūpāṇi bahudhā paśūnāmekarūpo bhavasi saṁ samṛddhyā* ।
*etāṁ tvachaṁ lohinīṁ tāṁ nudasva grāvā śumbhāti malagaiva vastrā* ॥21॥
*pṛthivīṁ tvā pṛthivyāmā veśayāmi tanūḥ samāni vikṛtā ta eṣā* ।
*yadyad dyuttaṁ likhitamarpaṇena tena mā susrorbrahmaṇāpi tad vapāmi* ॥22॥
*janitrīva prati haryāsi sūnuṁ saṁ tvā dadhāmi pṛthivīṁ pṛthivyā* ।
*ukhā kumbhī vedyāṁ mā vyathiṣṭhā yajñāyudhairājyenātiṣaktā* ॥23॥
*agniḥ pachan rakṣatu tvā purastādindro rakṣatu dakṣiṇato marutvān* ।
*varuṇāstvā dṛṁhāddharuṇe pratīchyā uttarāt tvā somaḥ saṁ dadātai* ॥24॥
*pūtāḥ pavitraiḥ pavante abhrād divaṁ cha yanti pṛthivīṁ cha lokān* ।
*tā jīvalāḥ jīvadhanyāḥ pratiṣṭhāḥ pātra āsiktāḥ paryagnirindhām* ॥25॥
*ā yanti divaḥ pṛthivīṁ sachante bhūmyāḥ sachante adhyantarikṣam* ।
*śuddhāḥ satīstā u śumbhanta eva tā naḥ svargamabhi lokaṁ nayantu* ॥26॥
*uteva prabhvīruta saṁmitāsa uta śukrāḥ śuchayaśchāmṛtāsaḥ* ।
*tā odanaṁ daṁpatibhyāṁ praśiṣṭā āpaḥ śikṣantīḥ pachatā sāunāthāḥ* ॥27॥
*saṁkhyātā stokāḥ pṛthivīṁ sachante prāṇāpānaiḥ saṁmitā oṣadhībhiḥ* ।
*asaṁkhyātā opyamānāḥ suvarṇāḥ sarva vyāpuḥ śuchayaḥ śuchitvam* ॥28॥
*udyodhantyabhi valganti taptāḥ phenamasyanti bahulāṁścha bindūn* ।
*yoṣeva dṛṣṭvā patimṛtviyāyaitaistaṇḍulairbhavatā samāpaḥ* ॥29॥
*utthāpaya sīdato budhna enānadbhirātmānamabhi saṁ spṛśantām* ।
*amāsi pātrairudakaṁ yadetanmitāstaṇḍulāḥ pradiśo yadīmāḥ* ॥30॥
*pra yachchha parśuṁ tvarayā harauṣamahiṁsanta oṣadhīrdāntu parvan* ।
*yāsāṁ somaḥ pari rājyaṁ babhūvāmanyutā no vīrudho bhavantu* ॥31॥
*yāṁ navaṁ barhirodanāya stṛṇīta priyaṁ hṛdaśchakṣuṣo valgvastu* ।
*tasmin devāḥ saha daivīrviśantvimaṁ prāśnantvṛtubhirniṣadya* ॥32॥
*vanaspate stīrṇamā sīda barhiragniṣṭomaiḥ saṁmito devatābhiḥ* ।
*tvaṣṭreva rūpaṁ sukṛtaṁ svadhityainā ehāḥ pari pātre dadṛśrām* ॥33॥
*ṣaṣṭyāṁ śaratsu nidhipā abhīchchhāt svaḥ pakvenābhyaśnavātai* ।
*upainaṁ jīvān pitaraścha putrā etaṁ svargaṁ gamayāntamagneḥ* ॥34॥
*dhartā dhriyasva dharuṇe pṛthivyā achyutaṁ tvā devatāśchyāvayantu* ।
*taṁ tvā dampatī jīvantau jīvaputrāvud vāsayātaḥ paryagnidhānāt* ॥35॥
*sarvāntsamāgā abhijitya lokān yāvantaḥ kāmāḥ samatītṛpastān* ।
*bi gāhethāmāyavanaṁ cha darvirekasmin pātre adhyuddharainam* ॥36॥
*upa stṛṇīhi prathaya purastād ghṛtena pātramabhi ghārayaitat* ।
*vāśrevosrā taruṇaṁ stanasyumimaṁ devāso abhihiṁkṛṇota* ॥37॥
*upāstarīkaro lokametamuruḥ prathatāmasamaḥ svargaḥ* ।
*tasmiṁchhrayātai mahiṣaḥ suparṇo devā enaṁ devatābhyaḥ pra yachchhān* ॥38॥
*yadyajjāyā pachati tvat paraḥparaḥ patirvā jāye tvat tiraḥ* ।
*saṁ tat sṛjethāṁ saha vāṁ tadastu saṁpādayantau saha lokamekam* ॥39॥
*yāvanto asyāḥ pṛthivīṁ sachante asmat putrāḥ pari ye saṁbabhūvuḥ* ।
*sarvāṁstām̐ upa pātre hvayethāṁ nābhiṁ jānānāḥ śiśavaḥ samāyān* ॥40॥
*vasoryā dhārā madhunā prapīnā ghṛtena miśrā amṛtasya nābhayaḥ* ।
*sarvāstā ava rundhe svargaḥ ṣaṣṭyāṁ śaratsu nidhipā abhīchchhāt* ॥41॥
*nidhi nidhipā abhyenamichchhādanīśvarā abhitaḥ santu ye3nye* ।
*asmābhirdatto nihitaḥ svargastribhiḥ kāṇḍaistrīntsvargānarukṣat* ॥42॥
*agnī rakṣastapatu yad videvaṁ kravyāt piśācha iha mā pra pāsta* ।
*nudāma enamapa rudhmo asmadādityā enamaṁgirasaḥ sachantām* ॥43॥
*ādityebhyo aṁgirobhyo madhvidaṁ ghṛtena miśraṁ prati vedayāmi* ।
*śuddhahastau brāhmaṇasyānihatyaitaṁ svargaṁ sukṛtāvapītam* ॥44॥
*idaṁ prāpamuttamaṁ kāṇḍamasya yasmāllokāt parameṣṭhī samāpa* ।

*ā siṁcha sarpirghṛvat samaṅgdhyeṣa bhāgo aṁgiraso no atra //45 //*
*satyāya cha tapase devatābhyo nidhiṁ śevadhiṁ pari dadma etam /*
*mā no dyūte'va gānmā samityāṁ mā smānyasmā utsṛjatā purā mat //46 //*
*ahaṁ pachāmyahaṁ dadāmi mamedu karman karuṇe'dhi jāyā /*
*kaumāro loko ajaniṣṭa putro3nvārabhethāṁ vaya uttarāvat //47 //*
*na kilviṣamatra nādhāro asti na yanmitraiḥ samamamāna eti /*
*anūnaṁ pātraṁ nihitaṁ na etat paktāraṁ pakvaḥ punarā viśāti //48 //*
*priyaṁ priyāṇāṁ kṛṇavāma tamaste yantu yatame dviṣanti /*
*dhenuranaḍvān vayovaya āyadeva pauruṣeyamapa mṛtyuṁ nudantu //49 //*
*samagnayo viduranyo anyaṁ ya oṣadhīḥ sachate yaścha sindhūn /*
*yāvanto devā divyā3tapanti hiraṇyaṁ jyotiḥ pachato babhūva //50 //*
*eṣā tvachāṁ puruṣe saṁ babhūvānagnāḥ sarve paśavo ye anye /*
*kṣatreṇātmānaṁ pari dhāpayātho'motaṁ vāso mukhamodanasya //51 //*
*yadakṣeṣu vadā yat samityāṁ yadvā vadā anṛtaṁ vittakāmyā /*
*samānaṁ tantumabhi saṁvasānau tasmintsarvaṁ śamalaṁ sādayāthaḥ //52 //*
*varṣaṁ vanuṣvāpi gachchha devāṁstvacho dhūmaṁ paryutpātayāsi /*
*viśvavyachā ghṛtapṛṣṭho bhaviṣyantsayonirlokamupa yāhyetam //53 //*
*tanvaṁ svargo bahudhā vi chakre yathā vida ātmannanyavarṇām /*
*apājait kṛṣṇāṁ ruśatīṁ punāno yā lohinī tāṁ te agnau juhomi //54 //*
*prāchyai tvā diśe3gnaye'dhipataye'sitāya rakṣitra ādityāyemuṣamate /*
*etaṁ pari dadmastaṁ no gopāyatāsmākamaitoḥ /*
*diṣṭaṁ no atra jarase ni neṣajjarā mṛtyave pari ṇo dadātvatha pakvena saha saṁ bhavema //55 //*
*dakṣiṇāyai tvā diśa indrāyādhipataye tiraśchirājaye rakṣitre yamāyeṣumate /*
*etaṁ pari dadmastaṁ no gopāyatāsmākamaitoḥ /*
*diṣṭaṁ no atra jarase ni neṣajjarā mṛtyave pari ṇo dadātvatha pakvena saha saṁ bhavema //56 //*
*pratīchyai tvā diśe varuṇāyādhipataye pṛdākave rakṣitre'nnāyeṣumate /*
*etaṁ pari dadmastaṁ no gopāyatāsmākamaitoḥ /*
*diṣṭaṁ no atra jarase ni neṣajjarā mṛtyave pari ṇo dadātvatha pakvena saha saṁ bhavema //57 //*
*udīchyai tvā diśe somāyādhipataye svajāya rakṣitre'śanyā iṣumatyai /*
*etaṁ pari dadmastaṁ no gopāyatāsmākamaitoḥ /*
*diṣṭaṁ no atra jarase ni neṣajjarā mṛtyave pari ṇo dadātvatha pakvena saha saṁ bhavema //58 //*
*dhruvāyai tvā diśe viṣṇave'dhipataye kalmāṣagrīvāya rakṣitra oṣadhībhya iṣumatībhyaḥ /*
*etaṁ pari dadmastaṁ no gopāyatāsmākamaitoḥ /*
*diṣṭaṁ no atra jarase ni neṣajjarā mṛtyave pari ṇo dadātvatha pakvena saha saṁ bhavema //59 //*
*ūrdhvāyai tvā diśe bṛhaspataye'dhipataye śvitrāya rakṣitre varṣāyeṣumate /*
*etaṁ pari dadmastaṁ no gopāyatāsmākamaitoḥ /*
*diṣṭaṁ no atra jarase ni neṣajjarā mṛtyave pari ṇo dadātvatha pakvena saha saṁ bhavema //60 //*

## ५२७. यमी (Yamī)

### १. भाववृत्तम् (Bhāvavṛttam) - ऋ. (Rv.) १०.१५४.१-५

सोम एकेभ्यः पवते घृतमेक उपासते। योभ्यो मधु प्रधावति ताँश्चिदेवापि गच्छवात् ॥१॥
तपसा ये अनाधृष्यास्तपसा ये स्वर्ययुः। तपो ये चक्रिरे महस्ताँश्चिदेवापि गच्छतात् ॥२॥
ये युध्यन्ते प्रधनेषु शरासो ये तनूत्यजः। ये वा सहस्रदक्षिणास्ताँश्चिदेवापि गच्छतात् ॥३॥
ये चित्पूर्व ऋतसाप ऋतावान ऋतावृधः। पितॄन्तपस्वतो यम ताँश्चिदेवापि गच्छतात् ॥४॥
सहस्रणीथाः कवयो ये गोपायन्ति सूर्यम्। ऋषीन्तपस्वतो यम तपोजाँ अपि गच्छतात् ॥५॥

*soma ekebhyaḥ pavate ghṛtameka upāsate /*
*yobhyo madhu pradhāvati tāṁśchidevāpi gachchhavāt //1 //*
*tapasā ye anādhṛṣyāstapasā ye svaryayuḥ /*

*tapo ye chakrire mahastām̐śchidevāpi gachchhatāt //2 //*
*ye yudhyante pradhaneṣu śarāso ye tanūtyajaḥ /*
*ye vā sahasradakṣiṇāstām̐śchidevāpi gachchhatāt //3 //*
*ye chitpūrva ṛtasāpa ṛtāvāna ṛtāvṛdhaḥ /*
*pitṛntapasvato yama tām̐śchidevāpi gachchhatāt //4 //*
*sahasraṇīthāḥ kavayo ye gopāyanti sūryam /*
*ṛṣīntapasvato yama tapojām̐ api gachchhatāt //5 //*

## ५२८. ययातिः (Yayātiḥ)

१. सोमः पवमानः (Somaḥ Pavamānaḥ) - अ. (Av.) २०.१३७.४-६

सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः। पवित्रवन्तो अक्षरन् देवान् गच्छन्तु वो मदाः ॥४॥
इन्दुरिन्द्राय पवत इति देवासो अब्रुवन्। वाचस्पतिर्मखस्यते विश्वस्येशान ओजसा ॥५॥
सहस्रधारः पवते समुद्रो वाचमींखयः। सोमः पती रयीणां सखेन्द्रस्य दिवेदिवे ॥६॥
*sutāso madhumattamāḥ somā indrāya mandinaḥ /*
*pavitravanto akṣaran devān gachchhantu vo madāḥ //4 //*
*indurindrāya pavata iti devāso abruvan / vāchaspatirmakhasyate viśvasyeśāna ojasā //5 //*
*sahasradhāraḥ pavate samudro vāchamīṁkhayaḥ /*
*somaḥ patī rayīṇāṁ sakhendrasya divedive //6 //*

## ५२९. ययातिर् नाहुषः (Yayātir Nāhuṣaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ५४७; ८७२-८७४

सा. (Sv.) ५४७

सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः। पवित्रवन्तो अक्षरन् देवान् गच्छन्तु वो मदाः ॥३॥
*sutāso madhumattamāḥ somā indrāya mandinaḥ /*
*pavitravanto akṣaran devān gachchhantu vo madāḥ //3 //*

सा. (Sv.) ८७२-८७४

सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः। पवित्रवन्तो अक्षरं देवान् गच्छन्तु वो मदाः ॥१॥
इन्दुरिन्द्राय पवत इति देवासो अब्रुवन्। वाचस्पतिर्मखस्यते विश्वस्येशान ओजसः ॥२॥
सहस्रधारः पवते समुद्रो वाचमींखयः। सोमस्यती रयीणां सखेन्द्रस्य दिवेदिवे ॥३॥
*sutāso madhumattamāḥ somā indrāya mandinaḥ /*
*pavitravanto akṣaraṁ devān gachchhantu vo madāḥ //1 //*
*indurindrāya pavata iti devāso abruvan / vāchaspatirmakhasyate viśvasyeśāna ojasaḥ //2 //*
*sahasradhāraḥ pavate samudro vāchamīṁkhayaḥ /*
*somasyatī rayīṇāṁ sakhendrasya divedive //3 //*

ऋ. (Rv.) ९.१०१.४-६

सुतासो मधुमत्तमः सोमा इन्द्राय मन्दिनः। पवित्रवन्तो अक्षरन्देवान्गच्छन्तु वो मदाः ॥४॥
इन्दुरिन्द्राय पवत इति देवासो अब्रुवन्। वाचस्पतिर्मखस्यते विश्वस्येशान ओजसा ॥५॥
सहस्रधारः पवते समुद्रो वाचमीङ्खयः। सोमः पती रयीणां सखेन्द्रस्य दिवेदिवे ॥६॥
*sutāso madhumattamaḥ somā indrāya mandinaḥ /*
*pavitravanto akṣarandevāngachchhantu vo madāḥ //4 //*
*indurindrāya pavata iti devāso abruvan / vāchaspatirmakhasyate viśvasyeśāna ojasā //5 //*
*sahasradhāraḥ pavate samudro vāchamīṅkhayaḥ /*
*somaḥ patī rayīṇāṁ sakhendrasya divedive //6 //*

## ५३०. रक्षोहाः (Rakṣohāḥ)

१. गर्भदोषनाशनम् (Garbhadoṣanāśanam) - अ. (Av.) २०.९६.११-१६

ब्रह्मणाग्निः संविदानो रक्षोहा बाधतामितः। अमीवा यस्ते गर्भं दुर्णामा योनिमाशये ॥११॥
यस्ते गर्भममीवा दुर्णामा योनिमाशये। अग्निष्टं ब्रह्मणा सह निष्क्रव्यादमनीनशत् ॥१२॥
यस्ते हन्ति पतयन्तं निषत्स्नुं यः सरीसृपम्। जातं यस्ते जिघांसति तमितो नाशयामसि ॥१३॥
यस्त ऊरू विहरत्यन्तरा दम्पती शये। योनिं यो अन्तरारेळिह तमितो नाशयामसि ॥१४॥
यस्त्वा भ्राता पतिर्भूत्वा जारो भूत्वा निपद्यते। प्रजां यस्ते निघांसति तमितो नाशयामसि ॥१५॥

यस्त्वा स्वप्नेन तमसा मोहयित्वा निपद्यते। प्रजां यस्ते जिघांसति तमितो नाशयामसि ॥१६॥
*brahmaṇāgniḥ saṁvidāno rakṣohā bādhatāmitaḥ |*
*amīvā yaste garbhaṁ durṇāmā yonimāśaye ||11 ||*
*yaste garbhamamīvā durṇāmā yonimāśaye |*
*agniṣṭaṁ brahmaṇā saha niṣkravyādamanīnaśat ||12 ||*
*yaste hanti patayantaṁ niṣatsnuṁ yaḥ sarīsṛpam |*
*jātaṁ yaste jighāṁsati tamito nāśayāmasi ||13 ||*
*yasta ūrū viharatyantarā dampatī śaye | yoniṁ yo antarāreḷiha tamito nāśayāmasi ||14 ||*
*yastvā bhrātā patirbhūtvā jāro bhūtvā nipadyate |*
*prajāṁ yaste nighāṁsati tamito nāśayāmasi ||15 ||*
*yastvā svapnena tamasā mohayitvā nipadyate |*
*prajāṁ yaste jighāṁsati tamito nāśayāmasi ||16 ||*

## ५३१. रक्षोहा ब्राह्मः (Rakṣohā Brāhmaḥ)

१. गर्भसंस्रावे प्रायश्चित्तम् (Garbhasaṁsrāve Prrāyaśchittam) - ऋ. (Rv.) १०.१६२.१-६

ब्रह्मणाग्निः संविदानो रक्षोहा बाधतामितः। अमीवा यस्ते गर्भं दुर्णामा योनिमाशये ॥१॥
यस्ते गर्भममीवा दुर्णामा योनिमाशये। अग्निष्टं ब्रह्मणा सह निष्क्रव्यादमनीनशत् ॥२॥
यस्ते हन्ति पतयन्तं निषत्सनुं यः सरीसृपम्। जातं यस्ते जिघांसति तमितो नाशयामसि ॥३॥
यस्त ऊरू विहरत्यन्तरा दम्पती शये। योनिं यो अन्तरारेळिह तमितो नाशयामसि ॥४॥
यस्त्वा भ्राता पतिर्भूतवा जारो भूत्वा निपद्यते। प्रजां यस्ते जिघांसति तमितो नाशयामसि ॥५॥
यस्त्वा स्वप्नेन तमसा मोहयित्वा निपद्यते। प्रजां यस्ते निघांसति तमितो नाशयामसि ॥६॥
*brahmaṇāgniḥ saṁvidāno rakṣohā bādhatāmitaḥ |*
*amīvā yaste garbhaṁ durṇāmā yonimāśaye ||1 ||*
*yaste garbhamamīvā durṇāmā yonimāśaye |*
*agniṣṭaṁ brahmaṇā saha niṣkravyādamanīnaśat ||2 ||*
*yaste hanti patayantaṁ niṣatsanuṁ yaḥ sarīsṛpam |*
*jātaṁ yaste jighāṁsati tamito nāśayāmasi ||3 ||*
*yasta ūrū viharatyantarā dampatī śaye | yoniṁ yo antarāreḷiha tamito nāśayāmasi ||4 ||*
*yastvā bhrātā patirbhūtavā jāro bhūtvā nipadyate |*
*prajāṁ yaste jighāṁsati tamito nāśayāmasi ||5 ||*
*yastvā svapnena tamasā mohayitvā nipadyate |*
*prajāṁ yaste nighāṁsati tamito nāśayāmasi ||6 ||*

## ५३२. रहूगणः (Rahūgaṇaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.३७.१-६; ९.३८.१-६

ऋ. (Rv.) ९.३७.१-६

स सुतः पीतये वृषा सोमः पवित्रे अर्षति। विघ्नन्नक्षांसि देवयुः ॥१॥
स पवित्रे विचक्षणो हरिरर्षति धर्णसिः। अभि योनिं कनिक्रदत् ॥२॥
स वाजी रोचना दिवः पवमानो वि धावति। रक्षोहा वारमव्ययम् ॥३॥
स त्रितस्याधि सानवि पवमानो अरोचयत्। जामिभिः सूर्यं सह ॥४॥
स वृत्रहा वृषा सुतो वरिवोविददाभ्यः। सोमो वाजमिवासरत् ॥५॥
स देवः कविनेषितो३ भि द्रोणानि धावति। इन्दुरिन्द्राय मंहना ॥६॥
*sa sutaḥ pītaye vṛṣā somaḥ pavitre arṣati | vighnannakṣāṁsi devayuḥ ||1 ||*
*sa pavitre vichakṣaṇo harirarṣati dharṇasiḥ | abhi yoniṁ kanikradat ||2 ||*
*sa vājī rochanā divaḥ pavamāno vi dhāvati | rakṣohā vāramavyayam ||3 ||*
*sa tritasyādhi sānavi pavamāno arochayat | jāmibhiḥ sūryaṁ saha ||4 ||*
*sa vṛtrahā vṛṣā suto varivovidadābhyaḥ | somo vājamivāsarat ||5 ||*
*sa devaḥ kavineṣito3 bhi droṇāni dhāvati | indurindrāya maṁhanā ||6 ||*

ऋ. (Rv.) ९.३८.१-६

एष उ स्य वृषा रथोऽव्यो वारेभिरर्षति। गच्छन् वाजं सहस्रिणम् ॥१॥
एतं त्रितस्य योषणो हरिं हिन्वन्त्यद्रिभिः। इन्दुमिन्द्राय पीतये ॥२॥

एतं त्यं हरितो दश ममृज्यन्ते अपस्युवः। याभिर्मदाय शुम्भते ॥३॥
एष स्य मानुषीष्वा श्येनो न विक्षु सीदति। गच्छंजारो न योषितम्॥४॥
एष स्य मद्यो रसोऽव चष्टे दिवः शिशुः। य इन्द्रर्वारमाविशत् ॥५॥
एष स्य पीतये सुतो हरिरर्षति धर्णसिः। क्रन्दन्योनिमभि प्रियम् ॥६॥
*eṣa u sya vṛṣā ratho'vyo vārebhirarṣati | gachchhan vājaṁ sahasriṇam ||1 ||*
*etaṁ tritasya yoṣaṇo hari hinvantyadribhiḥ | indumindrāya pītaye ||2 ||*
*etaṁ tyaṁ harito daśa mamṛjyante apasyuvaḥ | yābhirmadāya śumbhate ||3 ||*
*eṣa sya mānuṣīṣvā śyeno na vikṣu sīdati | gachchhaṁjāro na yoṣitam ||4 ||*
*eṣa sya madyo raso'va chaṣṭe divaḥ śiśuḥ | ya indrarvāramāviśat ||5 ||*
*eṣa sya pītaye suto harirarṣati dharṇasiḥ | krandanyonimabhi priyam ||6 ||*

## ५३३. रहूगण आंगिरसः (Rahūgaṇa Āṁgirasaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) १२७४-१२७९; १२९२-१२९७

सा. (Sv.) १२७४-१२७९

एष उ स्य वृषा रथोऽव्या वारेभिरव्यत। गच्छन्वाजं सहस्रिणम् ॥१॥
एतं त्रितस्य योषणो हरिं हिन्वन्त्यद्रिभिः। इन्दुमिन्द्राय पीतये ॥२॥
एष स्य मानुषीष्वा श्येनो न विक्षु सीदति। गच्छंजारो न योषितम्॥३॥
एष स्य मद्यो रसोऽव चष्टे दिवः शिशुः। य इन्दुर्वारमाविशत् ॥४॥
एष स्य पीतये सुतो हरिरर्षति धर्णसिः। क्रन्दन्योनिमभि प्रियम् ॥५॥
एषं त्यं हरितो दश मर्मृज्यन्ते अपस्युवः। याभिर्मदाय शुम्भते ॥६॥
*eṣa u sya vṛṣā ratho'vyā vārebhiravyata | gachchhanvājaṁ sahasriṇam ||1 ||*
*etaṁ tritasya yoṣaṇo hariṁ hinvantyadribhiḥ | indumindrāya pītaye ||2 ||*
*eṣa sya mānuṣīṣvā śyeno na vikṣu sīdati | gachchhaṁjāro na yoṣitam ||3 ||*
*eṣa sya madyo raso'va chaṣṭe divaḥ śiśuḥ | ya indurvāramāviśat ||4 ||*
*eṣa sya pītaye suto harirarṣati dharṇasiḥ | krandanyonimabhi priyam ||5 ||*
*eṣaṁ tyaṁ harito daśa marmṛjyante apasyuvaḥ | yābhirmadāya śumbhate ||6 ||*

सा. (Sv.) १२९२-१२९७

स सुतः पीतये वृषा सोमः पवित्रे अर्षति। विघ्नन्रक्षांसि देवयुः ॥१॥
स पवित्रे विचक्षणो हरिरर्षति धर्णसिः। अभि याोनिं कनिक्रदत्॥२॥
स वाजी रोचनं दिवः पवमानो वि धावति। रक्षोहा वारमव्ययम्॥३॥
स त्रितस्याधि सानवि पवमानो अरोचयत्। जामिभिः सूर्यं सह ॥४॥
स वृत्रहा वृषा सुतो वरिवोविददाभ्यः। सोमो वाजमिवासरत् ॥५॥
स देवः कविनेषितो३ऽभि द्रोणानि धावति। इन्दुरिन्द्राय हयन् ॥६॥
*sa sutaḥ pītaye vṛṣā somaḥ pavitre arṣati | vighnanrakṣāṁsi devayuḥ ||1 ||*
*sa pavitre vichakṣaṇo harirarṣati dharṇasiḥ | abhi yāoniṁ kanikradat ||2 ||*
*sa vājī rochanaṁ divaḥ pavamāno vi dhāvati | rakṣohā vāramavyayam ||3 ||*
*sa tritasyādhi sānavi pavamāno arochayat | jāmibhiḥ sūryaṁ saha ||4 ||*
*sa vṛtrahā vṛṣā suto varivovidadābhyaḥ | somo vājamivāsarat ||5 ||*
*sa devaḥ kavineṣito3'bhi droṇāni dhāvati | indurindrāya hayan ||6 ||*

## ५३४. रम्याक्षी (Ramyākṣī)

१. इन्द्रः (Indraḥ) - य. (Yv.) २६.४

इन्द्र गोमन्निहा याहि पिबा सोमं शतक्रतो। विद्यद्भिर्ग्रावभिः सुतम् ।
उपयामगृहीतोऽसीन्द्राय त्वा गोमतऽएष ते योनि रिन्द्राय त्वा गोमते ॥४॥
*indra gomannihā yāhi pibā somaṁ śatakrato | vidyadbhirgrāvabhiḥ sutam |*
*upayāmagṛhīto'sīndrāya tvā gomata'eṣa te yoni rindrāya tvā gomate ||4 ||*

२. सूर्यः (Sūryaḥ) - य. (Yv.) २६.५

इन्द्रा याहि वृत्रहन् पिबा सोमं शत क्रतो। गोमद्भिर्ग्रावभिः सुतम् ।
उपयामगृहीतोऽसीन्द्राय त्वा गोमतऽएष ते योनिरिन्द्राय त्वा गोमते ॥५॥
*indrā yāhi vṛtrahan pibā somaṁ śata krato | gomadbhirgrāvabhiḥ sutam |*

*upayāmagṛhīto'sīndrāya tvā gomata'eṣa te yonirindrāya tvā gomate ॥5॥*

## ५३५. रातहव्य आत्रेयः (Rātahavya Ātreyaḥ)

१. मित्रावरुणौ (Mitrāvaruṇau) - ऋ. (Rv.) ५.६५.१-६; ५.६६.१-६

ऋ. (Rv.) ५.६५.१-६

यश्चिकेत स सुक्रतुर्देवत्रा स ब्रवीतु नः। वरुणो यस्य दर्शतो मित्रो वा वनते गिरः ॥१॥
ता हि श्रेष्ठवर्चसा राजाना दीर्घश्रुत्तमा। ता सत्पती ऋतावृध ऋतावाना जनेजने ॥२॥
ता वामियानोऽवसे पूर्वा उप ब्रुवे सचा। स्वश्वासः सु चेतुना वाजाँ अभि प्र दावने ॥३॥
मित्रो अंहोश्चिदादुरु क्षयाय गातुं वनते। मित्रस्य हि प्रतूर्वतः सुमतिरस्ति विधतः ॥४॥
वयं मित्रस्यावसि स्याम सप्रथस्तमे। अनेहसस्त्वोतयः सत्रा वरुणशेषसः ॥५॥
युवं मित्रेमं जनं यतथः सं च नयथः ।
मा मघोनः परि ख्यतं मो अस्माकमृषीणां गोपीथे न उरुष्यतम् ॥६॥

*yaśchiketa sa sukraturdevatrā sa bravītu naḥ ।*
*varuṇo yasya darśato mitro vā vanate giraḥ ॥1॥*
*tā hi śreṣṭhavarchasā rājānā dīrghaśruttamā । tā satpatī ṛtāvṛdha ṛtāvānā janejane ॥2॥*
*tā vāmiyāno'vase pūrvā upa bruve sachā ।*
*svaśvāsaḥ su chetunā vājām̐ abhi pra dāvane ॥3॥*
*mitro aṁhośchidāduru kṣayāya gātuṁ vanate ।*
*mitrasya hi pratūrvataḥ sumatirasti vidhataḥ ॥4॥*
*vayaṁ mitrasyāvasi syāma saprathastame । anehasastvotayaḥ satrā varuṇaśeṣasaḥ ॥5॥*
*yuvaṁ mitremaṁ janaṁ yatathaḥ saṁ cha nayathaḥ ।*
*mā maghonaḥ pari khyataṁ mo asmākamṛṣīṇāṁ gopīthe na uruṣyatam ॥6॥*

ऋ. (Rv.) ५.६६.१-६

आ चिकितान सुक्रतू देवौ मर्त रिशादसा। बरुणाय ऋतपेशसे दधीत प्रयसे महे ॥१॥
ता हि क्षत्रमविह्रुतं सम्यगसुर्य१माशाते। अध व्रतेव मानुषं स्व१र्ण धायि दर्शतम् ॥२॥
ता वामेषे रथानामुर्वीं गव्यूतिमेषाम्। रातहव्यस्य सुष्टुतिं दधृक्स्तोमैर्मनामहे ॥३॥
अधा हि काव्या युवं दक्षस्य पूर्भिरद्भुता। नि केतुना जनानां चिकेथे पूतदक्षसा ॥४॥
तदृतं पृथिवि बृहच्छव एष ऋषीणाम्। ज्रयसानावरं पृथ्वति क्षरन्ति यामभिः ॥५॥
आ यद्वामीयचक्षसा मित्र वयं च सूरयः। व्यचिष्ठे बहुपाय्ये यतेमहि स्वराज्ये ॥६॥

*ā chikitāna sukratū devau marta riśādasā । baruṇāya ṛtapeśase dadhīta prayase mahe ॥1॥*
*tā hi kṣatramavihrutaṁ samyagasurya1māśāte ।*
*adha vrateva mānuṣaṁ sva1rṇa dhāyi darśatam ॥2॥*
*tā vāmeṣe rathānāmurvīṁ gavyūtimeṣām ।*
*rātahavyasya suṣṭutiṁ dadhṛkstomairmanāmahe ॥3॥*
*adhā hi kāvyā yuvaṁ dakṣasya pūrbhiradbhutā ।*
*ni ketunā janānāṁ chikethe pūtadakṣasā ॥4॥*
*tadṛtaṁ pṛthivi bṛhachchhava eṣa ṛṣīṇām ।*
*jrayasānāvaraṁ pṛthvati kṣaranti yāmabhiḥ ॥5॥*
*ā yadvāmīyachakṣasā mitra vayaṁ cha sūrayaḥ ।*
*vyachiṣṭhe bahupāyye yatemahi svarājye ॥6॥*

## ५३६. रेणुः (Reṇuḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.८९.१-४; ६-१८

ऋ. (Rv.) १०.८९.१-४

इन्द्रं स्तवा नृतमं यस्य मह्ना विबबाधे रोचना वि ज्मो अन्तान् ।
आ यः पप्रौ चर्षणीधृद्वरोभिः प्र सिन्धुभ्यो रिरिचानो महित्वा ॥१॥
स सूर्यः पर्युरू वरांस्येन्द्रो ववृत्याद्रथ्येव चक्रा ।
अतिष्ठन्तमपस्यं१ न सर्गं कृष्णा तमांसि त्विष्या जघान ॥२॥
समानमस्मा अनपावृदर्च क्ष्मया दिवो असमं ब्रह्म नव्यम् ।
वि यः पृष्ठेव जनिमान्यर्य इन्द्रश्चिकाय न सखायमीषे ॥३॥

इन्द्राय गिरो अनिशितसर्गा अपः प्रेरयं सगरस्य बुध्नात् ।
यो अक्षेणेव चक्रिया शचीभिर्विष्वक्तस्तम्भ पृथिवीमुत द्याम् ॥४॥
*indraṁ stvā nṛtamaṁ yasya mahnā vibabādhe rochanā vi jmo antān /*
*ā yaḥ paprau charṣaṇīdhṛdvarobhiḥ pra sindhubhyo ririchāno mahitvā //1 //*
*sa sūryaḥ paryurū varāṁsyendro vavṛtyādrathyeva chakrā /*
*atiṣṭhantamapasyaṁ1 na sargaṁ kṛṣṇā tamāṁsi tviṣyā jaghāna //2 //*
*samānamasmā anapāvṛdarcha kṣamayā divo asamaṁ brahma navyam /*
*vi yaḥ pṛṣṭheva janimānyarya indraśchikāya na sakhāyamīṣe //3 //*
*indrāya giro aniśitasargā apaḥ prerayaṁ sagarasya budhnāt /*
*yo akṣeṇeva chakriyā śachībhirviṣvaktastambha pṛthivīmuta dyām //4 //*

ऋ. (Rv.) १०.८९.६-१८

न यस्य द्यावापृथिवी न धन्व नान्तरिक्षं नाद्रयः सोमो अक्षाः ।
यदस्य मन्युरधिनीयमानः श्रृणाति वीळु रुजति स्थिराणि ॥६॥
जघान वृत्रं स्वधितिर्वनेव रुरोज पुरो अरदन्न सिन्धून् ।
बिभेद गिरिं नवमिन्न कुम्भमा गा इन्द्रो अकृणुत स्वयुग्भिः ॥७॥
त्वं ह त्यदृणाया इन्द्र धीरोऽसिर्न पर्व वृजिना श्रृणासि ।
प्र ये मित्रस्य वरुणस्य धाम युजं न जना मिनन्ति मित्रम् ॥८॥
प्र ये मित्रं प्रार्यमणं दुरेवाः प्र संगिरः प्र वरुणं मिनन्ति ।
न्यश्मित्रेषु वधमिन्द्र तुम्रं वृषन्वृषाणमरुषं शिशीहि ॥९॥
इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्रो अपामिन्द्र इत्पर्वतानाम् ।
इन्द्रो वृधामिन्द्र इन्मेधिराणामिन्द्रः क्षेमे योगे हव्य इन्द्रः ॥१०॥
प्राक्तुभ्य इन्द्रः प्र वृधो अहभ्यः प्रान्तरिक्षात्प्र समुद्रस्य धासेः ।
प्र वातस्य प्रथसः प्र ज्मो अन्तात्प्र सिन्धुभ्यो रिरिचे प्र क्षितिभ्यः ॥११॥
प्र शोशुचत्या उषसो न केतुरसिन्वा ते वर्ततामिन्द्र हेतिः ।
अश्मेव विध्य दिव आ सृजानस्तपिष्ठेन हेषसा द्रोघमित्रान् ॥१२॥
अन्वह मासा अन्विद्वनान्यन्वोषधीरनु पर्वतासः ।
अन्विन्द्रं रोदसी वावशाने अन्वापो अजिहत जायमानम् ॥१३॥
कर्हि स्वित्सा त इन्द्र चत्यासदघस्य यद्भिनदो रक्ष एषत् ।
मित्रक्रुवो यच्छसने न गावः पृथिव्या आपृगमुया शयन्ते ॥१४॥
शत्रूयन्तो अभि ये नस्ततस्रे महि व्राधन्त ओगणास इन्द्र ।
अन्धेनामित्रास्तमसा सचन्तां सुज्योतिषो अक्तवस्ताँ अभि ष्युः ॥१५॥
पुरूणि हि त्वा सवना जनानां ब्रह्माणि मन्दन्गृणतामृषीणाम् ।
इमामाघोषन्नवसा सहूतिं तिरो विश्वाँ अर्चतो याह्यर्वाङ् ॥१६॥
एवा ते वयमिन्द्र भुंजतीनां विद्याम सुमतीनां नवानाम् ।
विद्याम वस्तोरवसा गृणन्तो विश्वामित्रा उत त इन्द्र नूनम् ॥१७॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
श्रृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥१८॥
*na yasya dyāvāpṛthivī na dhanva nāntarikṣaṁ nādrayaḥ somo akṣāḥ /*
*yadasya manyuradhinīyamānaḥ śṛṇāti vīḻu rujati sthirāṇi //6 //*
*jaghāna vṛtraṁ svadhitirvaneva ruroja puro aradanna sindhūn /*
*bibheda giriṁ navaminna kumbhamā gā indro akṛṇuta svayugbhiḥ //7 //*
*tvaṁ ha tyadṛṇāyā indra dhīro'sirna parva vṛjinā śṛṇāsi /*
*pra ye mitrasya varuṇasya dhāma yujaṁ na janā minanti mitram //8 //*
*pra ye mitraṁ prāryamaṇaṁ durevāḥ pra saṁgiraḥ pra varuṇaṁ minanti /*
*nya1mitreṣu vadhamindra tumraṁ vṛṣanvṛṣāṇamaruṣaṁ śiśīhi //9 //*
*indro diva indra īśe pṛthivyā indro apāmindra itparvatānām /*
*indro vṛdhāmindra inmedhirāṇāmindraḥ kṣeme yoge havya indraḥ //10 //*
*prāktubhya indraḥ pra vṛdho ahabhyaḥ prāntarikṣātpra samudrasya dhāseḥ /*
*pra vātasya prathasaḥ pra jmo antātpra sindhubhyo ririche pra kṣitibhyaḥ //11 //*
*pra śośuchatyā uṣaso na keturasinvā te vartatāmindra hetiḥ /*

*aśmeva vidhya diva ā sṛjānastapiṣṭhena heṣasā droghamitrān //12 //*
*anvaha māsā anvidvanānyanvoṣadhīranu parvatāsaḥ /*
*anvindraṁ rodasī vāvaśāne anvāpo ajihata jāyamānam //13 //*
*karhi svitsā ta indra chatyāsadaghasya yadbhinado rakṣa eṣat /*
*mitrakruvo yachchhasane na gāvaḥ pṛthivyā āpṛgamuyā śayante //14 //*
*śatrūyanto abhi ye nastatasre mahi vrādhanta ogaṇāsa indra /*
*andhenāmitrāstamasā sachantāṁ sujyotiṣo aktavastām̐ abhi ṣyuḥ //15 //*
*purūṇi hi tvā savanā janānāṁ brahmāṇi mandangṛṇatāmṛṣīṇām /*
*imāmāghoṣannavasā sahūtiṁ tiro viśvām̐ archato yāhyarvāṅ //16 //*
*evā te vayamindraṁ bhuṁjatīnāṁ vidyāma sumatīnāṁ navānām /*
*vidyāma vastoravasā gṛṇanto viśvāmitrā uta ta indra nūnam //17 //*
*śunaṁ huvema maghavānamindramasminbhare nṛtamaṁ vājasātau /*
*śṛṇvantamugramūtaye samatsu ghnantaṁ vṛtrāṇi saṁjitaṁ dhanānām //18 //*

२. इन्द्रासोमौ (Indrāsomau) - ऋ. (Rv.) १०.८९.५

आपन्तमन्युस्तृपलप्रभर्मा धुनिः शिमीवांछरुमाँ ऋजीषी ।
सोमो विश्वन्यतसा वनानि नार्वगिन्द्रं प्रतिमानानि देभुः ॥५॥
*āpantamanyustṛpalaprabharmā dhuniḥ śimīvāṁchharumām̐ ṛjīṣī /*
*somo viśvanyatasā vanāni nārvagindraṁ pratimānāni debhuḥ //5 //*

## ५३७. रेणुर् वैश्वामित्रः (Reṇur Vaiśvāmitraḥ)

१. इन्द्रः (Indraḥ) - सा. (Sv.) ३३९

इन्द्राय गिरो अनिशितसर्गा अपः प्रैरयत्सगरस्य बुध्नात् ।
यो अक्षेणेव चक्रियौ शचीभिर्विष्वक्तस्तम्भ पृथिवीमुत द्याम् ॥८॥
*indrāya giro aniśitasargā apaḥ prairayatsagarasya budhnāt /*
*yo akṣeṇeva chakriyau śachībhirviṣvaktastambha pṛthivīmuta dyām //8 //*

२. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.७०.१-१०

त्रिरस्मै सप्त धेनवो दुदुह्रे सत्यामाशिरं पूर्व्ये व्योमनि ।
चन्वार्यन्या भुवनानि निर्णिजे चारूणि चक्रे यदृतैरवर्धत ॥१॥
स भिक्षमाणो अमृतस्य चारुण उभे द्यावा काव्येना वि शश्रथे ।
तेजिष्ठा अपो मंहना परि व्यत यदी देवस्य श्रवसा सदो विदुः ॥२॥
ते अस्य सन्तु केतवोऽमृत्यवोऽदाभ्यासो जनुषीं उभे अनु ।
येभिर्नृम्णा च देव्या च पुनत आदिद्राजानं मनना अगृभ्णत ॥३॥
स मृज्यमानो दशभिः सुकर्मभिः प्र मध्यमासु मातृषु प्रमे सचा ।
व्रतानि पानो अमृतस्य चारुण उभे नृचक्षा अनु पश्यते विशौ ॥४॥
स मर्मृजान इन्द्रियाय धायस ओभे अन्ता रोदसी हर्षते हितः ।
वृषा शुष्मेण बाधते वि दुर्मतीरादेदिशानः शर्यहेव शुरुधः ॥५॥
स मातरा न ददृशान उस्रियो नानददेति उरुतामिव स्वनः ।
जानन्नृतं प्रथमं यत्स्वर्णरं प्रशस्तये कमवृणीत सुक्रतुः ॥६॥
रुवति भीमो वृषभस्तविष्यया श्रृंगे शिशानो हरिणी विचक्षणः ।
आ योनिं सोमः सुकृतं नि षीदति गव्ययी त्वग्भवति निर्णिगव्ययी ॥७॥
शुचिः पुनानस्तन्वमरेपसमव्ये हरिर्न्यधाविष्ट सानवि ।
जुष्टो मित्राय वरुणाय वायवे त्रिधातु मधु क्रियते सुकर्मभिः ॥८॥
पवस्व सोम देववीतये वृषेन्द्रस्य हार्दि सोमधानमा विश ।
पुरा नो वाधाद् दुरिताति पारया क्षेत्रविद्धि दिश आहा विपृच्छते ॥९॥
हितो न सप्तिरभि वाजमर्षेन्द्रस्येन्दो जठरमा पवस्व ।
नावा न सिन्धुमति पर्षि विद्वांछूरो न युध्यन्नव नो निदः स्पः ॥१०॥
*trirasmai sapta dhenavo daduhre satyāmāśiraṁ pūrvye vyomani /*
*chanvāryanyā bhuvanāni nirṇije chārūṇi chakre yadṛtairavardhata //1 //*
*sa bhikṣamāṇo amṛtasya chāruṇa ubhe dyāvā kāvyenā vi śaśrathe /*
*tejiṣṭhā apo maṁhanā pari vyata yadī devasya śravasā sado viduḥ //2 //*

*te asya santu ketavo'mṛtyavo'dābhyāso januṣīṁ ubhe anu* ।
*yebhirnṛmṇā cha devyā cha punata ādidrājānaṁ mananā agṛbhṇata* ॥3॥
*sa mṛjyamāno daśabhiḥ sukarmabhiḥ pra madhyamāsu mātṛṣu prame sachā* ।
*vratāni pāno amṛtasya chāruṇa ubhe nṛchakṣā anu paśyate viśau* ॥4॥
*sa marmṛjāna indriyāya dhāyasa obhe antā rodasī rhaṣate hitaḥ* ।
*vṛṣā śuṣmeṇa bādhate vi durmatīrādediśānaḥ śaryaheva śurudhaḥ* ॥5॥
*sa mātarā na dadṛśāna usriyo nānadadeti urutāmiva svanaḥ* ।
*jānannṛtaṁ prathamaṁ yatsvarṇaraṁ praśastaye kamavṛṇīta sukratuḥ* ॥6॥
*ruvati bhīmo vṛṣabhastaviṣyayā śṛṅge śiśāno hariṇī vichakṣaṇaḥ* ।
*ā yoniṁ somaḥ sukṛtaṁ ni ṣīdati gavyayī tvagbhavati nirṇigavyayī* ॥7॥
*śuchiḥ punānastanvamarepasamavye harirnyadhāviṣṭa sānavi* ।
*juṣṭo mitrāya varuṇāya vāyave tridhātu madhu kriyate sukarmabhiḥ* ॥8॥
*pavasva seāma devavītaye vṛṣendrasya hārdi somadhānamā viśa* ।
*purā no vādhād duritāti pārayā kṣetraviddhi diśa āhā vipṛchchhate* ॥9॥
*hito na saptirabhi vājamarṣendrasyendo jaṭharamā pavasva* ।
*nāvā na sindhumati parṣi vidvāṁchchhūro na yudhyannava no nidaḥ spaḥ* ॥10॥

## ५३८. रेभः (Rebhaḥ)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.५४.१-३; २०.५५.१-३

अ. (Av.) २०.५४.१-३

विश्वाः पृतना अभिभूतरं नरं सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे ।
क्रत्वा वरिष्ठं वर आमुरिमुतोग्रमोजिष्ठं तवसं तरस्विनम् ॥१॥
समीं रेभासो अस्वरन्निन्द्रं सोमस्य पीतये ।
स्वर्पतिं यदीं वृधे धृतव्रतो ह्योजसा समूतिभिः ॥२॥
नोम नमन्ति चक्षसा मेषं विप्रा अभिस्वरा ।
सुदीतयो वो अद्रुहोऽपि कर्णे तरस्विनः समृक्वभिः ॥३॥
*viśvāḥ pṛtanā abhibhūtaraṁ naraṁ sajūstatakṣurindraṁ jajanuścha rājase* ।
*kratvā variṣṭhaṁ vara āmurimutogramojiṣṭhaṁ tavasaṁ tarasvinam* ॥1॥
*samīṁ rebhāso asvarannindraṁ somasya pītaye* ।
*svarpatiṁ yadīṁ vṛdhe dhṛtavrato hyojasā samūtibhiḥ* ॥2॥
*noma namanti chakṣasā meṣaṁ viprā abhisvarā* ।
*sudītayo vo adruho'pi karṇe tarasvinaḥ samṛkvabhiḥ* ॥3॥

अ. (Av.) २०.५५.१-३

तमिन्द्रं जोहवीमि मघवानमुग्रं सत्रा दधानमप्रतिष्कुतं शवांसि ।
मंहिष्ठो गीर्भिरा च यज्ञियो ववर्तद् राये नो विश्वा सुपथा कृणोतु वज्री ॥१॥
या इन्द्र भुज आभरः स्वर्वां॰ असुरेभ्यः
स्तोतारमिन्मघवन्नस्य वर्धय ये च त्वे वृक्तबर्हिषः ॥२॥
यमिन्द्र दधिषे त्वमश्वं गां भागमव्ययम् ।
यजमाने सुन्वति दक्षिणावति तस्मिन् तं धेहि मा पणौ ॥३॥
*tamindraṁ johavīmi maghavānamugraṁ satrā dadhānamapratiṣkutaṁ śavāṁsi* ।
*maṁhiṣṭho gīrbhirā cha yajñiyo vavartad rāye no viśvā supathā kṛṇotu vajrī* ॥1॥
*yā indra bhuja ābharaḥ svarvā॰ asurebhyaḥ*
*stotāraminmaghavannasya vardhaya ye cha tve vṛktabarhiṣaḥ* ॥2॥
*yamindra dadhiṣe tvamaśvaṁ gāṁ bhāgamavyayam* ।
*yajamāne sunvati dakṣiṇāvati tasmin taṁ dhehi mā paṇa* ॥3॥

## ५३९. रेभः काश्यपः (Rebhaḥ Kāśyapaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.९७.१-१५; सा. (Sv.) २५४; २६०; २६४; ३७०; ४६०; ९३०-९३२

ऋ. (Rv.) ८.९७.१-१५

या इन्द्र भुज आभरः स्वर्वाँ असुरेभ्यः ।

स्तोतारमिन्मघवन्नस्य वर्धय ये च त्वे वृक्तबर्हिरषः ॥१॥
यमिन्द्र दधिषे त्वमश्वं गां भगमव्ययम्।
यजमाने सुन्वति दक्षिणावति तस्मिन् तं धेहि मा पणौ ॥२॥
य इन्द्र सस्त्यव्रतोऽनुष्वापमदेवयुः। स्वैः ष एवैर्मुमुरत्पोष्यं रयिं सनुतर्धेहि तं ततः ॥३॥
यच्छक्रासि परावति यदर्वावति वृत्रहन्।
अतस्त्वा गीर्भिर्द्युगदन्द्र केशिभिः सुतावाँ आ विवासति ॥४॥
यद्वासि रोचने दिवः समुद्रस्याधि विष्टपि।
यत्पार्थिवे सदने वृत्रहन्तम यदन्तरिक्ष आ गहि ॥५॥
स नः सोमेषु सोमपाः सुतेषु शवसस्पते। मादयस्व राधसा सुनृतावतेन्द्र राया परीणसा ॥६॥
मा न इन्द्र परा वृणग्भवा नः सधमाद्यः।
त्वं न ऊती त्वमिन्न आप्यं मा न इन्द्र परा वृणक् ॥७॥
अस्मे इन्द्र सचा सुते नि षदा पीतये मधु।
कृधी जरित्रे मघवन्नवो महदस्मे इन्द्र सचा सुते ॥८॥
न त्वा देवास आशत न मर्त्यासो अद्रिवः ।
विश्वा जातानि शवसाभिभूरसि न त्वा देवास आशत ॥९॥
विश्वः पृतना अभिभूतरं नरं सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे ।
क्रत्वा वरिष्ठं वर आमुरिमुतोग्रमोजिष्ठं तवसं तरस्विनम् ॥१०॥
समीं रेभासो अस्वरन्निन्द्रं सोमस्य पीतये। स्वर्पतिं यदीं वृधे धृव्रतो ह्योजसा समूतिभिः ॥११॥
नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरा ।
सुदीतयो वो अद्रुहोऽपि कर्णे तरस्विनः समृक्वभिः ॥१२॥
तमिन्द्रं जोहवीमि मघवानमुग्रं सत्रा दधानमप्रतिष्कुतं शवांसि ।
मंहिष्ठो गीर्भिरा च यज्ञियो ववर्तद्राये नो विश्वा सुपथा कृणोतु वज्री ॥१३॥
त्वं पुर इन्द्र चिकिदेना व्योजसा शविष्ठ शक्र नाशयध्यै ।
त्वद्विश्वानि भुवनानि वज्रिन् द्यावा रेजेते पृथिवी च भीषा ॥१४॥
तन्म ऋतमिन्द्र शूर चित्र पात्वपो न वज्रिन्दुरिताति पर्षि भूरि ।
कदा न इन्द्र राय आ दशस्येर्विश्वप्स्न्यस्य स्पृहयाय्यस्य राजन् ॥१५॥

*yā indra bhuja ābhara: svarvām̐ asurebhyaḥ ।*
*stotāraminmaghavannasya vardhaya ye cha tve vṛktabarhirașaḥ ॥1॥*
*yamindra dadhiṣe tvamaśvaṁ gāṁ bhagamavyayam ।*
*yajamāne sunvati dakṣiṇāvati tasmin taṁ dhehi mā paṇau ॥2॥*
*ya indra sastyavrato'nuṣvāpamadevayuḥ ।*
*svaiḥ ṣa evairmumuratpoṣyaṁ rayiṁ sanutardhehi taṁ tataḥ ॥3॥*
*yachchhakrāsi parāvati yadarvāvati vṛtrahan ।*
*atastvā gīrbhirdyugadandra keśibhiḥ sutāvām̐ ā vivāsati ॥4॥*
*yadvāsi rochane divaḥ samudrasyādhi viṣṭapi ।*
*yatpārthive sadane vṛtrahantama yadantarikṣa ā gahi ॥5॥*
*sa naḥ someṣu somapāḥ suteṣu śavasaspate ।*
*mādayasva rādhasā sunṛtāvatendra rāyā parīṇasā ॥6॥*
*mā na indra parā vṛṇagbhavā naḥ sadhamādyaḥ ।*
*tvaṁ na ūtī tvaminna āpyaṁ mā na indra parā vṛṇak ॥7॥*
*asme indra sachā sute ni ṣadā pītaye madhu ।*
*kṛdhī jaritre maghavannavo mahadasme indra sachā sute ॥8॥*
*na tvā devāsa āśata na martyāso adrivaḥ ।*
*viśvā jātāni śavasābhibhūrasi na tvā devāsa āśata ॥9॥*
*viśvaḥ pṛtanā abhibhūtaraṁ naraṁ sajūstatakṣurindraṁ jajanuścha rājase ।*
*kratvā variṣṭhaṁ vara āmurimutogramojiṣṭhaṁ tavasaṁ tarasvinam ॥10॥*
*samīṁ rebhāso asvarannindraṁ somasya pītaye ।*
*svarpatiṁ yadīṁ vṛdhe dhṛvrato hyojasā samūtibhiḥ ॥11॥*
*nemiṁ namanti chakṣasā meṣaṁ viprā abhisvarā ।*
*sudītayo vo adruho'pi karṇe tarasvinaḥ samṛkvabhiḥ ॥12॥*
*tamindraṁ johavīmi maghavānamugraṁ satrā dadhānamapratiṣkutaṁ śavāṁsi ।*

*maṁhiṣṭho gīrbhirā cha yajñiyo vavartadrāye no viśvā supathā kṛṇotu vajrī ॥13 ॥*
*tvaṁ pura indra chikidenā vyojasā śaviṣṭha śakra nāśayadhyai ।*
*tvadviśvāni bhuvanāni vajrin dyāvā rejete pṛthivī cha bhīṣā ॥14 ॥*
*tanma ṛtamindra śūra chitra pātvapo na vajrinduritāti parṣi bhūri ।*
*kadā na indra rāya ā daśasyerviśvapsnyasya spṛhayāyyasya rājan ॥15 ॥*

सा. (Sv.) २५४

या इन्द्र भुज आभरः स्वर्वां॰ असुरेभ्यः । स्तोतारमिन्मघवन्नस्य वर्धय ये च त्वे वृक्तबर्हिषः ॥२ ॥
*yā indra bhuja ābharaḥ svarvā॰ asurebhyaḥ ।*
*stotāraminmaghavannasya vardhaya ye cha tve vṛktabarhiṣaḥ ॥2 ॥*

सा. (Sv.) २६०

मा न इन्द्र परा वृणग्भवाः नः सधमाद्ये । त्वं न ऊती त्वमिन्न आप्यं मा न इन्द्र परावृणक् ।८ ।
*mā na indra parā vṛṇagbhavāḥ naḥ sadhamādye ।*
*tvaṁ na ūtī tvaminna āpyaṁ mā na indra parāvṛṇak ।8 ।*

सा. (Sv.) २६४

यच्छक्रासि परावति यदर्वावति वृत्रहन् ।
अतस्त्वा गीर्भिर्द्युगदिन्द्र केशिभिः सुतावाँ आ विवासति ॥२ ॥
*yachchhakrāsi parāvati yadarvāvati vṛtrahan ।*
*atastvā gīrbhirdyugadindra keśibhiḥ sutāvāṁ̐ ā vivāsati ॥2 ॥*

सा. (Sv.) ३७०

विश्वाः पृतना अभिभूतरं नरः सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे ।
क्रत्वे वरे स्थेमन्यामुरीमुतोग्रमोजिष्ठं तेरस तरस्विनम् ॥१ ॥
*viśvāḥ pṛtanā abhibhūtaraṁ naraḥ sajūstatakṣurindraṁ jajanuścha rājase ।*
*kratve vare sthemanyāmurīmutogramojiṣṭhaṁ terasa tarasvinam ॥1 ॥*

सा. (Sv.) ४६०

तमिन्द्रं जोहवीमि मघवानमुग्रं सत्रा दधानमप्रतिष्कुतं श्रवांसि भूरि ।
मंहिष्ठो गीर्भिरा च यज्ञियो ववर्त राये नो विश्वा सुपथा कृणोतु वज्री ॥४ ॥
*tamindraṁ johavīmi maghavānamugraṁ satrā dadhānamapratiṣkutaṁ śravāṁsi bhūri ।*
*maṁhiṣṭho gīrbhirā cha yajñiyo vavarta rāye no viśvā supathā kṛṇotu vajrī ॥4 ॥*

सा. (Sv.) ९३०-९३२

विश्वाः पृतना अभिभूतरं नरः सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे ।
क्रत्वे वरे स्थेमन्यामुरीमुतोग्रमोजिष्ठं तरसं तरस्विनम् ॥१ ॥
नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरे ।
सुदीतयो वो अद्रुहोऽपि कर्णे तरस्विनः समृक्वभिः ॥२ ॥
समु रेभासो अस्वरन्निन्द्रं सोमस्य पीतये ।
स्वः पतिर्यदी वृधे धृतव्रतो ह्योजसा समूतिभिः ॥३ ॥
*viśvāḥ pṛtanā abhibhūtaraṁ naraḥ sajūstatakṣurindraṁ jajanuścha rājase ।*
*kratve vare sthemanyāmurīmutogramojiṣṭhaṁ tarasaṁ tarasvinam ॥1 ॥*
*nemiṁ namanti chakṣasā meṣaṁ viprā abhisvare ।*
*sudītayo vo adruho'pi karṇe tarasvinaḥ samṛkvabhiḥ ॥2 ॥*
*samu rebhāso asvarannindraṁ somasya pītaye ।*
*svaḥ patiryadī vṛdhe dhṛtavrato hyojasā samūtibhiḥ ॥3 ॥*

## ५४०. रेभसूनू काश्यपौ (Rebhasūnū Kāśyapau)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.९९.१-८; ९.१००.१-९; सा. (Sv.) ५५०; ५५१; १०१६-१०१८; १६३१-१६३३

ऋ. (Rv.) ९.९९.१-८

आ हर्ताय धृष्णवे धनुस्तन्वन्ति पौंस्यम् । शुक्रां वयन्त्यसुराय निर्णिजं विपामग्रे महीयुवः ॥१ ॥
अध क्षपा परिष्कृतो वाजाँ अभि प्र गाहते । यदी विवस्वतो धियो हरिं हिन्वन्ति यातवे ॥२ ॥
तमस्य मर्जयामसि मदो य इन्द्रपातमः । यं गाव आसभिर्दधुः पुरा नूनं च सूरयः ॥३ ॥

तं गाथया पुराण्या पुनानमभ्यनूषत। उतो कृपन्त धीतयो देवानां नाम बिभ्रतीः ॥४॥
तमुक्षमाणमव्यये वारे पुनन्ति धर्णसिम्। दूतं न पूर्वचित्तय आ शासते मनीषिणः ॥५॥
स पुनानो मदिन्तमः सेमश्चमूषु सीदति। पशौ न रेत आदधत्पतिर्वचस्यते धियः ॥६॥
स मृज्यते सुकर्मभिर्देवो देवेभ्यः सुतः। विदे यदासु संददिर्महीरपो वि गाहते ॥७॥
सुत इन्दो पवित्र आ नृभिर्यतो वि नीयसे। इन्द्राय मत्सरिन्तमश्चमूष्वा नि षीदसि ॥८॥
*ā rhatāya dhṛṣṇave dhunastanvanti pauṁsyam |*
*śukrāṁ vayantyasurāya nirṇijaṁ vipāmagraṁ mahīyuvaḥ ||1 ||*
*adha kṣapā pariṣkṛto vājām̐ abhi pra gāhate |*
*yadī vivasvato dhiyo hariṁ hinvanti yātave ||2 ||*
*tamasya marjayāmasi mado ya indrapātamaḥ |*
*yaṁ gāva āsabhirdadhuḥ purā nūnaṁ cha sūrayaḥ ||3 ||*
*taṁ gāthayā purāṇyā punānamabhyanūṣata |*
*uto kṛpanta dhītayo devānāṁ nāma bibhṛtīḥ ||4 ||*
*tamukṣamāṇamavyaye vāre punanti dharṇasim |*
*dūtaṁ na pūrvachittaya ā śāsate manīṣiṇaḥ ||5 ||*
*sa punāno madintamaḥ semaśchamūṣu sīdati |*
*paśau na reta ādadhatpatirvachasyate dhiyaḥ ||6 ||*
*sa mṛjyate sukarbhabhidrevo devebhyaḥ sutaḥ |*
*vide yadāsu saṁdadirmahīrapo vi gāhate ||7 ||*
*suta indo pavitra ā nṛbhiryato vi nīyase | indrāya matsarintamaśchamūṣvā ni ṣīdasi ||8 ||*

ऋ. (Rv.) ९.१००.१-९

अभी नवन्ते अद्रुहः प्रियमिन्द्रस्य काम्यम्। वत्सं न पूर्व आयुनि जातं रिहन्ति मातरः ॥१॥
पुनान इन्दवा भर सोम द्विबर्हसं रयिम्। त्वं वसूनि पुष्यसि विश्वानि दाशुषो गृहे ॥२॥
त्वं धियं मनोयुजं सृजा वृष्टिं न तन्यतुः। त्वं वसूनि पार्थिवा दिव्या च सोम पुष्यसि ॥३॥
परि ते जिग्युपो यथा धारा सुतस्य धावति। रंहमाणा व्य१व्ययं वारं वाजीव सानसिः ॥४॥
क्रत्वे दक्षाय नः कवे पवस्व सोम धारया। इन्द्राय पातवे सुतो मित्राय वरुणाय च ॥५॥
पवस्व वाजसातमः पवित्रे धारया सुतः। इन्द्राय सोम विष्णवे देवेभ्यो मधुमत्तमः ॥६॥
त्वां रिहन्ति मातरो हरि पवित्रे अद्रुहः। वत्सं जातं न धेनवः पवमान विधर्मणि ॥७॥
पवमान महि श्रवश्चित्रेभिर्यासि रश्मिभिः। शर्धन्तमांसि जिघ्नसे विश्वानि दाशुषो गृहे ॥८॥
त्वं द्यां च महिव्रत पृथिवीं चाति जभ्रिषे। प्रति द्रापिममुंचथाः पवमान महित्वना ॥९॥
*abhī navante adruhaḥ priyamindrasya kāmyam |*
*vatsaṁ na pūrva āyuni jātaṁ rihanti mātaraḥ ||1 ||*
*punāna indavā bhara soma dvibarhasaṁ rayim |*
*tvaṁ vasūni puṣyasi viśvāni dāśuṣo gṛhe ||2 ||*
*tvaṁ dhiyaṁ manoyujaṁ sṛjā vṛṣṭiṁ na tanyatuḥ |*
*tvaṁ vasūni pārthivā divyā cha soma puṣyasi ||3 ||*
*pari te jigyupo yathā dhārā sutasya dhāvati |*
*raṁhamāṇā vya1vyayaṁ vāraṁ vājīva sānasiḥ ||4 ||*
*kratve dakṣāya naḥ kave pavasva soma dhārayā |*
*indrāya pātave suto mitrāya varuṇāya cha ||5 ||*
*pavasva vājasātamaḥ pavitre dhārayā sutaḥ |*
*indrāya soma viṣṇave devebhyo madhumattamaḥ ||6 ||*
*tvāṁ rihanti mātaro hari pavitre adruhaḥ |*
*vatsaṁ jātaṁ na dhenavaḥ pavamāna vidharmaṇi ||7 ||*
*pavamāna mahi śravaśchitrebhiryāsi raśmibhiḥ |*
*śardhantamāṁsi jighnase viśvāni dāśuṣo gṛhe ||8 ||*
*tvaṁ dyāṁ cha mahivrata pṛthivīṁ chāti jabhriṣe |*
*prati drāpimamuṁchathāḥ pavamāna mahitvanā ||9 ||*

सा. (Sv.) ५५०-५५१

अभी नवन्ते अद्रुहः प्रियमिन्द्रस्य काम्यम्। वत्सं न पूर्व आयुनि जातं रिहन्ति मातरः ॥६॥
आ हर्यताय धृष्णवे धनुष्टन्वन्ति पौंस्यम्। शुक्रा वि यन्त्यसुराय निर्णिजे विपामग्रे महीयुवः ।७॥

*abhī navante adruhaḥ priyamindrasya kāmyam |*
*vatsaṁ na pūrva āyuni jātaṁ rihanti mātaraḥ ||6 ||*
*ā haryatāya dhṛṣṇave dhanuṣṭanvanti pauṁsyam |*
*śukrā vi yantyasurāya nirṇije vipāmagre mahīyuvaḥ |7 ||*

सा. (Sv.) १०१६-१०१८

पवस्व वाजसातये पवित्रे धारया सुतः। इन्द्राय सोम विष्णवे देवेभ्यो मधुमत्तरः ॥१॥
त्वां रिहन्ति धीतयो हरिं पवित्रे अद्रुहः। वत्सं जातं न मातरः पवमान विधर्मणि ॥२॥
त्वं द्यां च महिव्रत पृथिवीं चाति जभ्रिषे। प्रति द्रापिममुंचथाः पवमान महित्वना ॥३॥
*pavasva vājasātaye pavitre dhārayā sutaḥ |*
*indrāya soma viṣṇave devebhyo madhumattaraḥ ||1 ||*
*tvāṁ rihanti dhītayo hariṁ pavitre adruhaḥ |*
*vatsaṁ jātaṁ na mātaraḥ pavamāna vidharmaṇi ||2 ||*
*tvaṁ dyāṁ cha mahivrata pṛthivīṁ chāti jabhriṣe |*
*prati drāpimamuṁchathāḥ pavamāna mahitvanā ||3 ||*

सा. (Sv.) १६३१-१६३३

अध क्षपा परिष्कृतो वाजाँ अभि प्र गाहसे। यदी विवस्वतो धियो हरिं हिन्वन्ति यातवे ॥१॥
तमस्य मर्जयामसि मदो य इन्द्रपातमः। यं गाव आसभिर्दधुः पुरा नूनं न सूरयः ॥२॥
तं गाथया पुराण्या पुनानमभ्यनूषत। उतो कृपन्त धीतयो देवानां नाम बिभ्रतीः ॥३॥
*adha kṣapā pariṣkṛto vājām̐ abhi pra gāhase |*
*yadī vivasvato dhiyo hariṁ hinvanti yātave ||1 ||*
*tamasya marjayāmasi mado ya indrapātamaḥ |*
*yaṁ gāva āsabhirdadhuḥ purā nūnaṁ na sūrayaḥ ||2 ||*
*taṁ gāthayā purāṇyā punānamabhyanūṣata |*
*uto kṛpanta dhītayo devānāṁ nāma bibhratīḥ ||3 ||*

## ५४१. रोमशा ब्रह्मवादिनी (Romaśā Brahmavādinī)

१. विद्वांसः (Vidvāṁsaḥ) - ऋ. (Rv.) १.१२६.७

उपोप मे परा मृश मा मे दभ्राणि मन्यथाः। सर्वाहमस्मि रोमशा गन्धारीणामिवाविका ॥७॥
*upopa me parā mṛśa mā me dabhrāṇi manyathāḥ |*
*sarvāhamasmi romaśā gandhārīṇāmivāvikā ||7 ||*

## ५४२. लब ऐन्द्रः (Laba Aindraḥ)

२. आत्मस्तुतिः (Ātmastutiḥ) - ऋ. (Rv.) १०.११९.१-१३

इति वा इति मे मनो गामश्वं सनुयामिति। कुवित्सोमस्यापामिति ॥१॥
प्र वाताइव दोधत उन्मा पीता अयंसत। कुवित्सोमस्यापामिति ॥२॥
उन्मा पीता अयंसत रथमश्वा इवाशवः। कुवित्सोमस्यापामिति ॥३॥
उप मा मतिरस्थित वाश्रा पुत्रमिव प्रियम्। कुवित्सोमस्यापामिति ॥४॥
अहं तष्टेव बन्धुरं पर्यचामि हृदा मतिम्। कुवित्सोमस्यापामिति ॥५॥
नहि मे अक्षिपच्चनाच्छान्त्सुः पंच कृष्टयः। कुवित्सोमस्यापामिति ॥६॥
नहि मे रोदसी उभे अन्यं पक्षं चन प्रति। कुवित्सोमस्यापामिति ॥७॥
अभि द्यां महिना भुवमभी३मां पृथिवीं महीम्। कुवित्सोमस्यापामिति ॥८॥
हन्ताहं पृथिवीमिमां नि दधानीह वेह वा। कुवित्सोमस्यापामिति ॥९॥
ओषमित्पृथिवीमहं जंघनानीह वेह वा। कुवित्सोमस्यापामिति ॥१०॥
दिवि मे अन्यः पक्षो३धो अन्यमचीकृषम्। कुवित्सोमस्यापामिति ॥११॥
अहमस्मि महामहोऽभिनभ्यमुदीषितः। कुवित्सोमस्यापामिति ॥१२॥
गृहो याम्यरंकृतो देवेभ्यो हव्यवाहनः। कुवित्सोमस्यापामिति ॥१३॥
*iti vā iti me mano gāmaśvaṁ sanuyāmiti | kuvitsomasyāpāmiti ||1 ||*
*pra vātāiva dodhata unmā pītā ayaṁsata | kuvitsomasyāpāmiti ||2 ||*
*unmā pītā ayaṁsata rathamaśvā ivāśavaḥ | kuvitsomasyāpāmiti ||3 ||*
*upa mā matirasthita vāśrā putramiva priyam | kuvitsomasyāpāmiti ||4 ||*

*ahaṁ taṣṭeva bandhuraṁ paryachāmi hṛdā matim । kuvitsomasyāpāmiti ॥5 ॥*
*nahi me akṣipachchanāchchhāntsuḥ paṁcha kṛṣṭayaḥ । kuvitsomasyāpāmiti ॥6 ॥*
*nahi me rodasī ubhe anyaṁ pakṣaṁ chana prati । kuvitsomasyāpāmiti ॥7 ॥*
*abhi dyāṁ mahinā bhuvamabhī3māṁ pṛthivīṁ mahīm । kuvitsomasyāpāmiti ॥8 ॥*
*hantāhaṁ pṛthivīmimāṁ ni dadhānīha veha vā । kuvitsomasyāpāmiti ॥9 ॥*
*oṣamitpṛthivīmahaṁ jaṁghanānīha veha vā । kuvitsomasyāpāmiti ॥10 ॥*
*divi me anyaḥ pakṣo3dho anyamachīkṛṣam । kuvitsomasyāpāmiti ॥11 ॥*
*ahamasmi mahāmaho'bhinabhyamudīṣitaḥ । kuvitsomasyāpāmiti ॥12 ॥*
*gṛho yāmyaraṁkṛto devebhyo havyavāhanaḥ । kṛvitsomasyāpāmiti ॥13 ॥*

## ५४३. लुशः (Luśaḥ)

१. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.) ३३.५२

विश्वेऽअद्य मरुतो विश्वऽऊती विश्वे भवन्त्वग्नयः समिद्धाः ।
विश्वे नो देवाऽअवमा गमन्तु विश्वमम्तु द्रविणं वाजोऽअस्मै ॥५२ ॥
*viśve'adya maruto viśva'ūtī viśve bhavantvagnayaḥ samiddhāḥ ।*
*viśve no devā'avamā gamantu viśvamamtu draviṇaṁ vājo'asmai ॥52 ॥*

## ५४४. लुशो धानाकः (Luśo Dhānākaḥ)

१. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १०.३५.१-१४; १०.३६.१-१४

ऋ. (Rv.) १०.३५.१-१४

अबुध्रमु त्य इन्द्रवन्तो अग्नयो ज्योतिर्भरन्त उषसो व्युष्टिषु ।
मही द्यावापृथिवी चेततामपोऽद्या देवनामव आ वृणीमहे ॥१ ॥
दिवस्पृथिव्योरव आ वृणीमहे मातृन्त्सिन्धून्पर्वतांछर्यणावतः ।
अनागास्त्वं सूर्यमुषासमीमहे भद्रं सोमः सुवानो अद्या कृणोतु नः ॥२ ॥
द्यावा नो अद्य पृथिवी अनागसो मही त्रायेतां सुविताय मातरा ।
उषा उच्छन्त्यप बाधतामघं स्वस्त्य१ग्निं समिधानमीमहे ॥३ ॥
इयं न उस्रा प्रथमा सुदेव्यं रेवत्सनिभ्यो रेवती व्युच्छतु ।
आरे मन्युं दुर्विदत्रस्य धीमहि स्वस्त्य१ग्निं समिधानमीमहे ॥४ ॥
प्र याः सिस्रते सूर्यस्य रश्मिभिर्ज्योतिर्भन्तीरुषसो व्युष्टिषु ।
भद्रा नो अद्य श्रवसे व्युच्छत स्वस्त्य१ग्निं समिधानमीमहे ॥५ ॥
अनमीवा उषस आ चरन्तु न उदग्नयो जिहतां ज्योतिषा बृहत् ।
आयुक्षातामश्विना तूतुजि रथं स्वस्त्य१ग्निं समिधानमीमहे ॥६ ॥
श्रेष्ठं नो अद्य सवितर्वरेण्यं भागमा सुव स हि रत्नधा असि ।
रायो जनित्रीं धिषणामुप ब्रुवे स्वस्त्य१ग्निं समिधानमीमहे ॥७ ॥
पिपर्तु मा तदृतस्य प्रवाचनं देवानां यन्मनुष्या३ अमन्महि ।
विश्वा इदुस्राः स्पळुदेति सूर्यः स्वस्त्य१ग्निं समिधानमीमहे ॥८ ॥
अद्वेषो अद्य बर्हिषः स्तरीमणि ग्राव्णां योगे मन्मनः साध ईमहे ।
आदित्यानां शर्मणि स्था भुरण्यसि स्वस्त्य१ग्निं समिधानमीमहे ॥९ ॥
आ नो बर्हिः सधमादे बृहद्दिवि देवाँ ईळे सादया सप्त होतृन् ।
इन्द्रं मित्रं वरुणं सातये भगं स्वस्त्य१ग्निं समिधानमीमहे ॥१० ॥
त आदित्या आ गता सर्वतातये वृधे नो यज्ञमवता सजोषसः ।
बृहस्पतिं पूषणमश्विना भगं स्वस्त्य१ग्निं समिधानमीमहे ॥११ ॥
तन्नो देवा यच्छत सुप्रवाचनं छर्दिरादित्याः सुभरं नृपाय्यम् ।
पश्वे तोकाय तनयाय जीवसे स्वस्त्य१ग्निं समिधानमीमहे ॥१२ ॥
विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः ।
विश्वे नो देवा अवसा गमन्तु विश्वमस्तु द्रविणं वाजो अस्मे ॥१३ ॥
यं देवासोऽवथ वाजसातौ यं त्रायध्वे यं पिपृथात्यंहः ।
यो वो गोपीथे न भयस्य वेद ते स्याम देववीतये तुरासः ॥१४ ॥
*abudhramu tya indravanto agnayo jyotirbharanta uṣaso vyuṣṭiṣu ।*

*mahī dyāvāpṛthivī chetatāmapo'dyā devanāmava ā vṛṇīmahe ॥1॥*
*divaspṛthivyorava ā vṛṇīmahe mātṛntsindhūnparvatāṁchharyaṇāvataḥ ।*
*anāgāstvaṁ sūryamuṣāsamīmahe bhadraṁ somaḥ suvāno adyā kṛṇotu naḥ ॥2॥*
*dyāvā no adya pṛthivī anāgaso mahī trāyetāṁ suvitāya mātarā ।*
*uṣā uchchhantyapa bādhatāmaghaṁ svastya1giṁna samidhānamīmahe ॥3॥*
*iyaṁ na usrā prathamā sudevyaṁ revatsanibhyo revatī vyuchchhatu ।*
*āre manyuṁ durvidatrasya dhīmahi svastya1giṁna samidhānamīmahe ॥4॥*
*pra yāḥ sisrate sūryasya raśmibhirjyotirbhantīruṣaso vyuṣṭiṣu ।*
*bhadrā no adya śravase vyuchchhata svastya1giṁna samidhānamīmahe ॥5॥*
*anamīvā uṣasa ā charantu na udagnayo jihatāṁ jyotiṣā bṛhat ।*
*āyukṣātāmaśvinā tūtuji rathaṁ svastya1giṁna samidhānamīmahe ॥6॥*
*śreṣṭhaṁ no adya savitarvareṇyaṁ bhāgamā suva sa hi ratnadhā asi ।*
*rāyo janitrīṁ dhiṣaṇāmupa bruve svastya1giṁna samidhānamīmahe ॥7॥*
*pipartu mā tadṛtasya pravāchanaṁ devānāṁ yanmanuṣyā3 amanmahi ।*
*viśvā idusrāḥ spaḷudeti sūryaḥ svastya1giṁna samidhānamīmahe ॥8॥*
*adveṣo adya barhiṣaḥ starīmaṇi grāvṇāṁ yoge manmanaḥ sādha īmahe ।*
*ādityānāṁ śarmaṇi sthā bhuraṇyasi svastya1giṁna samidhānamīmahe ॥9॥*
*ā no barhiḥ sadhamāde bṛhaddivi devām̐ īḷe sādayā sapta hotṛn ।*
*indraṁ mitraṁ varuṇaṁ sātaye bhagaṁ svastya1giṁna samidhānamīmahe ॥10॥*
*ta ādityā ā gatā sarvatātaye vṛdhe no yajñamavatā sajoṣasaḥ ।*
*bṛhaspatiṁ pūṣaṇamaśvinā bhagaṁ svastya1giṁna samidhānamīmahe ॥11॥*
*tanno devā yachchhata supravāchanaṁ chhardirādityāḥ subharaṁ nṛpāyyam ।*
*paśve tokāya tanayāya jīvase svastya1giṁna samidhānamīmahe ॥12॥*
*viśve adya maruto viśva ūtī viśve bhavantvagnayaḥ samiddhāḥ ।*
*viśve no devā avasā gamantu viśvamastu draviṇaṁ vājo asme ॥13॥*
*yaṁ devāso'vatha vājasātau yaṁ trāyadhve yaṁ pipṛthātyaṁhaḥ ।*
*yo vo gopīye na bhayasya veda te syāma devavītaye turāsaḥ ॥14॥*

ऋ. (Rv.) १०.३६.१-१४

उषासानक्ता बृहती सुपेशसा द्यावाक्षामा वरुणो मित्रो अर्यमा ।
इन्द्रं हुवे मरुतः पर्वताँ अप आदित्यान्द्यावापृथिवी अपः स्वः ॥१॥
द्यौश्च नः पृथिवी च प्रचेतस ऋतावरी रक्षतामंहसो रिषः ।
मा दुर्विदत्रा निर्ऋतिर्न ईशत तद्देवानामवो अद्या वृणीमहे ॥२॥
विश्वस्मान्नो आदितिः पात्वंहसो माता मित्रस्य वरुणस्य रेवतः ।
स्वर्वज्ज्योतिरवृकं नशीमहि तद्देवानामवो अद्या वृणीमहे ॥३॥
ग्रावा वदन्नप रक्षांसि सेधतु दुष्वप्न्यं निर्ऋतिं विश्वमत्रिणम् ।
आदित्यं शर्म मरुतामशीमहि तद्देवानामवो अद्या वृणीमहे ॥४॥
एन्द्रो बर्हिः सीदतु पिन्वतामिळा बृहस्पतिः सामभिर्ऋक्वो अर्चतु ।
सुप्रकेतं जीवसे मन्म धीमहि तद्देवानामवो अद्या वृणीमहे ॥५॥
दिविस्पृशं यज्ञमस्माकमश्विना जीराध्वरं कृणुतं सुम्नमिष्टये ।
प्राचीनरश्मिमाहुतं घृतेन तद्देवानामवो अद्या वृणीमहे ॥६॥
उप ह्वये सुहवं मारुतं गणं पावकमृष्वं सख्याय शंभुवम् ।
रायस्पोषं सौश्रवसाय धीमहि तद्देवानामवो अद्या वृणीमहे ॥७॥
अपां पेरुं जीवधन्यं भरामहे देवाव्यं सुहवमध्वरश्रियम् ।
सुरश्मिं सोममिन्द्रियं यमीमहि तद्देवानामवो अद्या वृणीमहे ॥८॥
सनेम तत्सुसनिता सनित्वभिर्वयं जीवा जीवपुत्रा अनागसः ।
ब्रह्मद्विषो विष्वगेनो भरेरत तद्देवानामवो अद्या वृणीमहे ॥९॥
ये स्था मनोर्यज्ञियास्ते शृणोतन यद्वो देवा ईमहे तद्ददातन ।
जैत्रं क्रतुं रयिमद्वीरवद्यशस्तद्देवानामवो अद्या वृणीमहे ॥१०॥
महदद्य महतामा वृणीमहेऽवो देवानो बृहतामनर्वणाम् ।
यथा वसु वीरजातं नशामहै तद्देवानामवो अद्या वृणीमहे ॥११॥
महो अग्नेः समिधानस्य शर्मण्यनागा मित्रे वरुणे स्वस्तये ।

श्रेष्ठै स्याम सवितुः सवीमनि तद्देवानामवो अद्या वृणीमहे ॥१२॥
ये सवितुः सत्यसवस्य विश्वे मित्रस्य व्रते वरुणस्य देवाः ।
ते सौभगं वीरवद्गोमदप्नो दधातन द्रविणं चित्रमस्मे ॥१३॥
सविता पश्चातात्सविता पुरस्तात्सवितोत्तरात्तात्सविताधरात्तात् ।
सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः ॥१४॥
*uṣāsānaktā bṛhatī supeśasā dyāvākṣāmā varuṇo mitro aryamā /*
*indraṁ huve marutaḥ parvatāṁ̐ apa ādityāndyāvāpṛthivī apaḥ svaḥ //1 //*
*dyauścha naḥ pṛthivī cha prachetasa ṛtāvarī rakṣatāmaṁhaso riṣaḥ /*
*mā durvidatrā nirṛtirna īśata taddevānāmavo adyā vṛṇīmahe //2 //*
*viśvasmānno āditiḥ pātvaṁhaso mātā mitrasya varuṇasya revataḥ /*
*svarvajjyotiravṛkaṁ naśīmahi taddevānāmavo adyā vṛṇīmahe //3 //*
*grāvā vadannapa rakṣāṁsi sedhatu duṣvaṣnyaṁ nirṛtiṁ viśvamatriṇam /*
*ādityaṁ śarma marutāmaśīmahi taddevānāmavo adyā vṛṇīmahe //4 //*
*endro barhiḥ sīdatu pinvatāmiḻā bṛhaspatiḥ sāmabhirṛkvo archatu /*
*supraketaṁ jīvase manma dhīmahi taddevānāmavo adyā vṛṇīmahe //5 //*
*divispṛśaṁ yajñamasmākamaśvinā jīrādhvaraṁ kṛṇutaṁ sumnamiṣṭaye /*
*prāchīnaraśmimāhutaṁ ghṛtena taddevānāmavo adyā vṛṇīmahe //6 //*
*upa hvaye suhavaṁ mārutaṁ gaṇaṁ pāvakamṛṣvaṁ sakhyāya śaṁbhuvam /*
*rāyaspoṣaṁ sauśravasāya dhīmahi taddevānāmavo adyā vṛṇīmahe //7 //*
*apāṁ peruṁ jīvadhanyaṁ bharāmahe devāvyaṁ suhavamadhvaraśriyam /*
*suraśimma somamindriyaṁ yamīmahi taddevānāmavo adyā vṛṇīmahe //8 //*
*sanema tatsusanitā sanitvabhirvayaṁ jīvā jīvaputrā anāgasaḥ /*
*brahmadviṣo viṣvageno bharerata taddevānāmavo adyā vṛṇīmahe //9 //*
*ye sthā manoryajñiyāste śṛṇotana yadvo devā īmahe taddadātana /*
*jaitraṁ kratuṁ rayimadvīravadyaśastaddevānāmavo adyā vṛṇīmahe //10 //*
*mahadadya mahatāmā vṛṇīmahe'vo devāno bṛhatāmanarvaṇām /*
*yathā vasu vīrajātaṁ naśāmahai taddevānāmavo adyā vṛṇīmahe //11 //*
*maho agneḥ samidhānasya śarmaṇyanāgā mitre varuṇe svastaye /*
*śreṣṭhai syāma savituḥ savīmani taddevānāmavo adyā vṛṇīmahe //12 //*
*ye savituḥ satyasavasya viśve mitrasya vrate varuṇasya devāḥ /*
*te saubhagaṁ vīravadgomadapno dadhātana draviṇaṁ chitramasme //13 //*
*savitā paśchātātsavitā purastātsavitottarāttātsavitādharāttāt /*
*savitā naḥ suvatu sarvatātiṁ savitā no rāsatāṁ dīrghamāyuḥ //14 //*

२. सविता (Savitā) - य. (Yv.) ३३.१७

महोऽअग्नेः समिधानस्य शर्मण्यनागा मित्रे वरुणे स्वस्तये ।
श्रेष्ठे स्याम सवितुः सवीमनि तद्देवानामवोऽअद्या वृणीमहे ॥१७॥
*maho'agneḥ samidhānasya śarmaṇyanāgā mitre varuṇe svastaye /*
*śreṣṭhe syāma savituḥ savīmani taddevānāmavo'adyā vṛṇīmahe //17 //*

## ५४५. लोपामुद्रा (Lopāmudrā)

१. अग्निः (Agniḥ) - य. (Yv.) १७.११; १२; १५; ३६.२०

य. (Yv.) १७.११-१२

नमस्ते हरसे शोचिषे नमस्तेऽअस्त्वर्चिषे ।
अन्याँस्ते अस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यं शिवो भव ॥११॥
*namaste harase śochiṣe namaste'astvarchiṣe /*
*anyāṁ̐ste asmattapantu hetayaḥ pāvako'asmabhyaṁ śivo bhava //11 //*

य. (Yv.) १७.१५

प्राणदा अपानदा व्यानदा वर्चोदा वरिवोदाः ।
अन्याँस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यं शिवो भव ।१५॥
*prāṇadā apānadā vyānadā varchodā varivodāḥ /*
*anyāṁ̐ste asmattapantu hetayaḥ pāvako asmabhyaṁ śivo bhava /15 //*

य. (Yv.) ३६.२०

नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे ।
अन्याँस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यं शिवो भव ॥२० ॥
*namaste harase śochiṣe namaste astvarchiṣe /*
*anyām̐ste asmattapantu hetayaḥ pāvako asmabhyaṁ śivo bhava //20 //*

२. प्राणः (Prāṇaḥ) - य. (Yv.) १७.१३-१४

ये देवा देवानां यज्ञिया यज्ञियानां संवत्सरीणमुप भागमासते ।
अहुतादो हविषो यज्ञेऽअस्मिन्त्स्वयं पिबन्तु मधुनो घृतस्य ॥१३ ॥
ये दे़ा देवेष्वधि देवत्वमायन् ये ब्रह्मणः पुर एतारो अस्य ।
येभ्यो न ऋते पवते धाम किंचन न ते दिवो न पृथिव्या अधि स्नुषु ॥१४ ॥
*ye devā devānāṁ yajñiyā yajñiyānāṁ saṁvatsarīṇamupa bhāgamāsate /*
*ahutādo haviṣo yajñe'asmintsvayaṁ pibantu madhuno ghṛtasya //13 //*
*ye deā deveṣvadhi devatvamāyan ye brahmaṇaḥ pura etāro asya /*
*yebhyo na ṛte pavate dhāma kiṁchana na te divo na pṛthivyā adhi snuṣu //14 //*

## ५४६. लोपामुद्रा-अगस्त्यौ (सास्वा.); रति (अजमेर) (Lopāmudrā-Agastyau [Sas.]; Rati [Ajmer])

१. लोपामुद्रा (सास्वा.) दम्पती (अजमेर) - ऋ. (Rv.) १.१७९.१-२

पूर्वीरहं शरदः शश्रमाणा दोषा वस्तोरुषसो जरयन्तीः ।
मिनाति श्रियं जरिमा तनूनामप्यू नु पत्नीर्वृषणो जगम्युः ॥१ ॥
ये चिद्धि पूर्व ऋतसाप आसन्त्साकं देवेभिरवदन्नृतानि ।
ते चिदवासुर्नह्यन्तमापुः समू नु पत्नीर्वृषभिर्जगम्युः ॥२ ॥
*pūrvīrahaṁ śaradaḥ śaśramāṇā doṣā vastoruṣaso jarayantīḥ /*
*mināti śriyaṁ jarimā tanūnāmapyū nu patnīrvṛṣaṇo jagamyuḥ //1 //*
*ye chiddhi pūrva ṛtasāpa āsantsākaṁ devebhiravadannṛtāni /*
*te chidavāsurnahyantamāpuḥ samū nu patnīrvṛṣabhirjagamyuḥ //2 //*

२. अगस्त्यः (सास्वा.) दम्पती (अजमेर) (Agastyaḥ [Sas.] Dampatī [Ajamera]) - ऋ. (Rv.) १.१७९.३-४

न मृषा श्रान्तं यदवन्ति देवा विश्वा इत्स्पृधे अभ्यश्नवाव ।
जयोवेदत्र शतनीथमाजिं यत्सम्यंचा मिथुनावभ्यजाव ॥३ ॥
नदस्य मा रुधतः काम आगन्नित आजातो अमुतः कुतश्चित् ।
लोपामुद्रा वृषणं नी रिणाति धीरमधीरा धयति श्वसन्तम् ॥४ ॥
*na mṛṣā śrāntaṁ yadavanti devā viśvā itspṛdhe abhyaśnavāva /*
*jayovedatra śatanīthamājiṁ yatsamyaṁchā mithunāvabhyajāva //3 //*
*nadasya mā rudhataḥ kāma āgannita ājāto amutaḥ kutaśchit /*
*lopāmudrā vṛṣaṇaṁ nī riṇāti dhīramadhīrā dhayati śvasantam //4 //*

३. अगस्त्य शिष्यः (सास्वा.) दम्पती (अजमेर) (Agastya Śiṣyaḥ [Sas.] Dampatī [Ajamera]) - ऋ. (Rv.) १.७९.५-६

स इधानो वसुष्कविरग्निरीळेन्यो गिरा। रेवदस्मभ्यं पुर्वणीक दीदिहि ॥५ ॥
क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः। स तिग्मजम्भ रक्षसो दह प्रति ॥६ ॥
*sa idhāno vasuṣkaviragnirīḷenyo girā / revadasmabhyaṁ purvaṇīka dīdihi //5 //*
*kṣapo rājannuta tmanāgne vastorutoṣasaḥ / sa tigmajambha rakṣaso daha prati //6 //*

## ५४७. लौगाक्षिः (Laugākṣiḥ)

१. ईश्वरः (Īśvaraḥ) - य. (Yv.) २६.२

यथेमां वाचं कल्याणीमावदानि जनेभ्यः। ब्रह्मराजन्याभ्यां शूद्राय चार्य्याय च स्वाय चारणाय । प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृध्यतामुप मादो नमतु ॥२ ॥
*yathemāṁ vāchaṁ kalyāṇīmāvadāni janebhyaḥ / brahmarājanyābhyāṁ śūdrāya chāryyāya cha svāya chāraṇāya / priyo devānāṁ dakṣiṇāyai dāturiha bhūyāsamayaṁ me kāmaḥ samṛdhyatāmupa mādo namatu //2 //*

## ५४८. वत्सः (Vatsaḥ)

१. अग्निः (Agniḥ) - य. (Yv.) ४.१६-१७; २८; २९; ३२

य. (Yv.) ४.१६-१७

त्वमग्ने व्रतपाऽअसि देवऽआ मर्त्येष्वा। त्वं यज्ञेष्वीड्यः ।
रास्वेयत्सोमा भूयो भर देवो नः सविता वसो र्दाता वस्वदात् ॥१६॥
एषा ते शुक्र तनूरेतद्वर्चस्तया सम्भव भ्राजंगच्छ। जूरसि धृता मनसा जुष्टा विष्णवे ॥१७॥
*tvamagne vratapā'asi deva'ā martyeṣvā | tvaṁ yajñeṣvīḍyaḥ |*
*rāsveyatsomā bhūyo bhara devo naḥ savitā vaso rdātā vasvadāt ॥16॥*
*eṣā te śukra tanūretadvarchastayā sambhava bhrājaṁgachchha |*
*jūrasi dhṛtā manasā juṣṭā viṣṇave ॥17॥*

य. (Yv.) ४.२८-२९

परि माग्ने दुश्चरिताद्बाधस्वा मा सुचरिते भज। उदायुषा स्वायुषोदस्थाममृताँ २ऽअनु ॥२८॥
प्रति पन्थामपद्महि स्वस्तिगामनेहसम्। येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ॥२९॥
*pari māgne duścharitādbādhasvā mā sucharite bhaja |*
*udāyuṣā svāyuṣodasthāmamṛtām̐ 2'anu ॥28॥*
*prati panthāmapadmahi svastigāmanehasam |*
*yena viśvāḥ pari dviṣo vṛṇakti vindate vasu ॥29॥*

य. (Yv.) ४.३२

सूर्य्यस्य चक्षुरारोहाग्नेरक्ष्णः कनीनकम्। यत्रैतशेभिरीयसे भ्राजमानो विपश्चिता ॥३२॥
*sūryyasya chakṣurārohāgnerakṣaṇaḥ kanīnakam |*
*yatraitaśebhirīyase bhrājamāno vipaśchitā ॥32॥*

२. इन्द्रः (Indraḥ) - अ. (Av.) २०.१०७.१-३; २०.११५.१-३; २०.१३८.१-३

अ. (Av.) २०.१०७.१-३

समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः। समुद्रायेव सिन्धवः ॥१॥
ओजस्तदस्य तित्विष उभे यत् समवर्तयत्। इन्द्रश्चर्मेव रोदसी ॥२॥
वि चिद् वुत्रस्य दोधतो वज्रेण शतपर्वणा। शिरो बिभेद वृष्णिना ॥३॥
*samasya manyave viśo viśvā namanta kṛṣṭayaḥ | samudrāyeva sindhavaḥ ॥1॥*
*ojastadasya titviṣa ubhe yat samavartayat | indraścharmeva rodasī ॥2॥*
*vi chid vutrasya dodhato vajreṇa śataparvaṇā | śiro bibheda vṛṣṇinā ॥3॥*

अ. (Av.) २०.११५.१-३

अहमिद्धि पितुष्परि मेधामृतस्य जग्रभ। अहं सूर्यइवाजनि ॥१॥
अहं प्रत्नेन मन्मना गिरः शुम्भामि कण्ववत्। येनेन्द्रः शुष्ममिद् दधे ॥२॥
ये त्वामिन्द्र न तुष्टुवुर्ऋषयो ये च तुष्टुवुः। ममेद् वर्धस्व सुष्टुतः ॥३॥
*ahamiddhi pituṣpari medhāmṛtasya jagrabha | ahaṁ sūryaivājani ॥1॥*
*ahaṁ pratnena manmanā giraḥ śumbhāmi kaṇvavat | yenendraḥ śuṣmamid dadhe ॥2॥*
*ye tvāmindra na tuṣṭuvurṛṣayo ye cha tuṣṭuvuḥ | mamed vardhasva suṣṭutaḥ ॥3॥*

अ. (Av.) २०.१३८.१-३

महाँ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँइव। स्तोमैर्वत्सस्य वावृधे ॥१॥
प्रजामृतस्य पिप्रतः प्र यद् भरन्त वह्नयः। विप्रा ऋतस्य वाहसा ॥२॥
कण्वा इन्द्रं यदक्रत स्तोमैर्यज्ञस्य साधनम्। जामि ब्रुवत आयुधम् ॥३॥
*mahām̐ indro ya ojasā parjanyo vṛṣṭimām̐iva | stomairvatsasya vāvṛdhe ॥1॥*
*prajāmṛtasya piprataḥ pra yad bharanta vahnayaḥ | viprā ṛtasya vāhasā ॥2॥*
*kaṇvā indraṁ yadakrata stomairyajñasya sādhanam | jāmi bruvata āyudham ॥3॥*

३. प्रजापतिः (Prajāpatiḥ) - य. (Yv.) ७.४०

महाँ२ऽइन्द्रो यऽओजसा पर्जन्यो वृष्टिमाँ२ऽइव। स्तोमैर्वत्सस्य वावृधे ।
उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा ॥४०॥
*mahām̐2'indro ya'ojasā parjanyo vṛṣṭimām̐2'iva | stomairvatsasya vāvṛdhe |*

*upayāmagṛhīto'si mahendrāya tvaiṣa te yonirmahendrāya tvā //40 //*

४. यजमानः (Yajamānaḥ) - य. (Yv.) ४.३४

भद्रो मेऽसि प्रच्यवस्व भुवस्पते विश्वान्यभि धामानि।
मा त्वा परिपरिणो विदन् मा त्वा परिपन्थिनो विदन् मा त्वा वृकाऽअघायवो विदन्।
श्येनो भूत्वा परापत यजमानस्य गृहान् गच्छ तन्नौ सँस्कृतम् ॥३४॥
*bhadro me'si prachyavasva bhuvaspate viśvānyabhi dhāmāni /*
*mā tvā paripariṇo vidan mā tvā paripanthino vidan mā tvā vṛkā'aghāyavo vidan /*
*śyeno bhūtvā parāpata yajamānasya gṛhān gachchha tannau saṁskṛtam //34 //*

५. यज्ञः (Yajñaḥ) - य. (Yv.) ४.२४; २६

य. (Yv.) ४.२४

एष ते गायत्रो भागऽइति मे सोमाय ब्रूतादेष ते त्रैष्टुभो भागऽइति मे सोमाय ब्रूतादेष ते जागतो भागऽइति मे सोमाय ब्रूताच्छन्दोनामानां साम्राज्यंगच्छेति मे सोमाय ब्रूतादास्माकोऽसि शुक्रस्ते ग्रह्यो विचितस्त्वा विचिन्वन्तु ॥२४॥
*eṣa te gāyatro bhāga'iti me somāya brūtādeṣa te traiṣṭubho bhāga'iti me somāya brūtādeṣa te jāgato bhāga'iti me somāya brūtāchchhandonāmānāṁ sāmrājyaṁgachchheti me somāya brūtādāsmāko'si śukraste grahyo vichitastvā vichinvantu //24 //*

य. (Yv.) ४.२६

शुक्रं त्वा शुक्रेण क्रीणामि चन्द्रं चन्द्रेणामृतममृतेन। सग्मे ते गोरस्मे ते चन्द्राणि तपसस्तनूरसि प्रजापतेर्वर्णः परमेण पशुना क्रीयसे सहस्रपोषं पुषेयम् ॥२६॥
*śukraṁ tvā śukreṇa krīṇāmi chandraṁ chandreṇāmṛtamamṛtena / sagme te gorasme te chandrāṇi tapasastanūrasi prajāpatervarṇaḥ parameṇa paśunā krīyase sahasrapoṣaṁ puṣeyam //26 //*

६. वरुणः (Varuṇaḥ) - य. (Yv.) ४.३०-३१

अदित्यास्त्वगस्यादित्यै सदऽआसीद। अस्तभ्नाद् द्यां वृषभोऽअन्तरिक्षममिमीत वरिमाणम्पृथिव्याः। आसीदद्विश्वा भुवनानि सम्राड् विश्वेत्तानि वरुणस्य व्रतानि ॥३०॥
वनेषु व्य न्तरिक्षं ततान वाजमर्वत्सु पयऽउस्रियासु ।
हृत्सु क्रतुं वरुणो विक्ष्व ग्निं दिवि सूर्य्यमदधात् सोमद्रौ ॥३१॥
*adityāstvagasyādityai sada'āsīda / astabhnād dyāṁ vṛṣabho'antarikṣamamimīta varimāṇampṛthivyāḥ / āsīdadviśvā bhuvanāni samrāḍ viśvettāni varuṇasya vratāni //30 //*
*vaneṣu vya ntarikṣaṁ tatāna vājamarvatsu paya'usriyāsu /*
*hṛtsu kratuṁ varuṇo vikṣava giṁna divi sūryyamadadhāt somadrau //31 //*

७. वाग्विद्युतः (Vāgvidyutaḥ) - य. (Yv.) ४.१८-२३

तस्यास्ते सत्यसवसः प्रसवे तन्वो यन्त्रमशीय स्वाहा।
शुक्रमसि चन्द्रमस्यमृतमसि वैश्वदेवमसि ॥१८॥
चिदसि मनासि धीरसि दक्षिणासि क्षत्रियासि यज्ञियास्यदितिरस्युभयतः शीर्ष्णी ।
सा नः सुप्राची सुप्रतीच्येधि मित्रस्त्वा पदि बध्नीतां पूषाऽध्वनस्पात्विन्द्रायाध्यक्षाय ॥१९॥
अनु त्वा माता मन्यतामनु पिताऽनु भ्राता सगर्भ्योऽनु सखा सयूथ्यः ।
सा देवि देवमच्छेहीन्द्राय सोमं रुद्रस्त्वावर्त्तयतु स्वस्ति सोमसखा पुनरेहि ॥२०॥
वस्व्यस्यदितिरस्यादित्यासि रुद्रासि चन्द्रासि।
बृहस्पतिष्ट्वा सुम्ने रम्णातु रुद्रो वसुभिराचके ॥२१॥
अदित्यास्त्वा मूर्द्धन्नाजिघर्म्मि देवयजने पृथिव्याऽइडायास्पदमसि घृतवत् स्वाहा ।
अस्मे रमस्वास्मे ते बन्धुस्त्वे रायो मे रायो मा वयं रायस्पोषेण वियौष्म तोतो रायः ॥२२॥
समख्ये देव्या धिया सं दक्षिणयोरुचक्षसा ।
मा मऽआयुः प्रमोषीर्मोऽअहं तव वीरं विदेय तव देवि सन्दृशि ॥२३॥
*tasyāste satyasavasaḥ prasave tanvo yantramaśīya svāhā /*
*śukramasi chandramasyamṛtamasi vaiśvadevamasi //18 //*
*chidasi manāsi dhīrasi dakṣiṇāsi kṣatriyāsi yajñiyāsyaditirasyubhayataḥ śīrṣṇī /*
*sā naḥ suprāchī supratīchyedhi mitrastvā padi badhnītāṁ*
*pūṣā'dhvanaspātvindrāyādhyakṣāya //19 //*

*anu tvā mātā manyatāmanu pitā'nu bhrātā sagarbhyo'nu sakhā sayūthyaḥ /*
*sā devi devamachchhehīndrāya somaṁ rudrastvāvarttayatu svasti somasakhā punarehi //20 //*
*vasvyasyaditirasyādityāsi rudrāsi chandrāsi /*
*bṛhaspatiṣṭvā sumne ramṇātu rudro vasubhirāchake //21 //*
*adityāstvā mūrddhannājighamirma devayajane pṛthivyā'iḍāyāspadamasi ghṛtavat svāhā /*
*asme ramasvāsme te bandhustve rāyo me rāyo mā vayaṁ rāyaspoṣeṇa viyauṣma toto rāyaḥ //22 //*
*samakhye devyā dhiyā saṁ dakṣiṇayoruchakṣasā /*
*mā ma'āyuḥ pramoṣīrmo'ahaṁ tava vīraṁ videya tava devi sandṛśi //23 //*

८. विद्वान् (Vidvān) - य. (Yv.) ४.२७; २६.१५

य. (Yv.) ४.२७

मित्रो नऽएहि सुमित्रधऽइन्द्रस्योरुमाविश दक्षिणमुशन्नुशन्तं स्योनः स्योनम् ।
स्वान भ्राजांघारे बम्भारे हस्त सुहस्त कृशानवेते वः सोमक्रयणास्तान्नक्षध्वं मा वो दभन् ॥२७ ॥
*mitro na'ehi sumitradha'indrasyorumāviśa dakṣiṇamuśannuśantaṁ syonaḥ syonam /*
*svāna bhrājāṁghāre bambhāre hasta suhasta kṛśānavete vaḥ somakrayaṇāstānnakṣadhvaṁ mā vo dabhan //27 //*

य. (Yv.) २६.१५

उपह्वरे गिरीणां संगमे च नदीनाम्। धिया विप्रोऽअजायत ॥१५ ॥
*upahvare girīṇāṁ saṁgame cha nadīnām / dhiyā vipro'ajāyata //15 //*

९. सूर्य्यः (Sūryyaḥ) - य. (Yv.) ४.३५-३६

नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत ।
दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्य्याय शंसत ॥३५ ॥
वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्यऽऋतसदन्यसि वरुणस्यऽऋतसदनमसि
वरुणस्यऽऋतसदनमासीद ॥३६ ॥
*namo mitrasya varuṇasya chakṣase maho devāya tadṛtaṁ saparyata /*
*dūredṛśe devajātāya ketave divasputrāya sūryyāya śaṁsata //35 //*
*varuṇasyottambhanamasi varuṇasya skambhasarjanī stho varuṇasya'ṛtasadanyasi*
*varuṇasya'ṛtasadanamasi varuṇasya'ṛtasadanamāsīda //36 //*

११. सूर्य्य विद्वांसौ (Sūryya Vidvāṁsau) - य. (Yv.) ४.३३

उस्रावेतं धूर्षाहौ युज्येथामनश्रूऽअवीरहणो ब्रह्मचोदनौ। स्वस्ति यजमानस्य गृहान् गच्दतम्।३३ ॥
*usrāvetaṁ dhūrṣāhau yujyethāmanaśrū'avīrahaṇo brahmachodanau / svasti yajamānasya gṛhān gachdatam /33 //*

## ५४९. वत्स आग्नेयः (Vatsa Āgneyaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १०.१८७.१-५

प्राग्नये वाचमीरय वृषभाय क्षितीनाम्। स नः पर्षदति द्विषः ॥१ ॥
यः परस्याः परावतस्तिरो धन्वातिरोचते। स नः पर्षदति द्विषः ॥२ ॥
यो रक्षांसि निजूर्वति वृषा शुक्रेण शोचिषा। स नः पर्षदति द्विषः ॥३ ॥
यो विश्वाभि विपश्यति भुवना सं च पश्यति। स नः पर्षदति द्विषः ॥४ ॥
यो अस्य पारे रजसः शुक्रो अग्निरजायत। स नः पर्षदति द्विषः ॥५ ॥
*prāgnaye vāchamīraya vṛṣabhāya kṣitīnām / sa naḥ parṣadati dviṣaḥ //1 //*
*yaḥ parasyāḥ parāvatastiro dhanvātirochate / sa naḥ parṣadati dviṣaḥ //2 //*
*yo rakṣāṁsi nijūrvati vṛṣā śukreṇa śochiṣā / sa naḥ parṣadati dviṣaḥ //3 //*
*yo viśvābhi vipaśyati bhuvanā saṁ cha paśyati / sa naḥ parṣadati dviṣaḥ //4 //*
*yo asya pāre rajasaḥ śukro agnirajāyata / sa naḥ parṣadati dviṣaḥ //5 //*

## ५५०. वत्सः काण्वः (Vatsaḥ Kāṇvaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ८.११.१-१०; सा. (Sv.) ८; २०; ११६६-११६८

ऋ. (Rv.) ८.११.१-१०

त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा। त्वं यज्ञेष्वीड्यः ॥१॥
त्वमसि प्रशस्यो विदथेषु सहन्त्य। अग्ने रथीरध्वराणाम् ॥२॥
स त्वमस्मदप द्विषो युयोधि जातवेदः। अदेवीरग्ने अरातीः ॥३॥
अन्ति चित्सन्तमह यज्ञं मर्तस्य रिपोः। नोप वेषि जातवेदः ॥४॥
मर्ता अमर्त्यस्य ते भूरि नाम मनामहे। विप्रासो जातवेदसः ॥५॥
विप्रं विप्रासोऽवसे देवं मर्तास ऊतये। अग्निं गीर्भिर्हवामहे ॥६॥
आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात्। अग्ने त्वांकामया गिरा ॥७॥
पुरुत्रा हि सदृङ्ङसि विशो विश्वा अनु प्रभुः। समत्सु त्वा हवामहे॥८॥
समत्स्वग्निमवसे वाजयन्तो हवामहे। वाजेषु चित्रराधसम् ॥९॥
प्रत्नो हि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि ।
स्वां चाग्ने तन्वं पिप्रयस्वास्मभ्यं च सौभगमा यजस्व ॥१०॥

*tvamagne vratapā asi deva ā martyeṣvā | tvaṁ yajñeṣvīḍyaḥ ||1 ||*
*tvamasi praśasyo vidatheṣu sahantya | agne rathīradhvarāṇām ||2 ||*
*sa tvamasmadapa dviṣo yuyodhi jātavedaḥ | adevīragne arātīḥ ||3 ||*
*anti chitsantamaha yajñaṁ martasya ripoḥ | nopa veṣi jātavedaḥ ||4 ||*
*martā amartyasya te bhūri nāma manāmahe | viprāso jātavedasaḥ ||5 ||*
*vipraṁ viprāso'vase devaṁ martāsa ūtaye | agiṁna gīrbhirhavāmahe ||6 ||*
*ā te vatso mano yamatparamāchchitsadhasthāt | agne tvāṁkāmayā girā ||7 ||*
*purutrā hi sadṛṅṅasi viśo viśvā anu prabhuḥ | samatsu tvā havāmahe ||8 ||*
*samatsvagnimavase vājayanto havāmahe | vājeṣu chitrarādhasam ||9 ||*
*pratno hi kamīḍyo adhvareṣu sanāchcha hotā navyaścha satsi |*
*svāṁ chāgne tanvaṁ piprayasvāsmabhyaṁ cha saubhagamā yajasva ||10 ||*

सा. (Sv.) ८

आ ते वत्सा मनो यमत्परमाच्चित्सधस्थात्। अग्ने त्वां कामये गिरा ॥८॥
*ā te vatsā mano yamatparamāchchitsadhasthāt | agne tvāṁ kāmaye girā ||8 ||*

सा. (Sv.) २०

आदित्प्रत्नस्य रेतसो ज्योतिः पश्यन्ति वासरम्। परो यदिध्यते दिवि ॥१०॥
*āditpratnasya retaso jyotiḥ paśyanti vāsaram | paro yadidhyate divi ||10 ||*

सा. (Sv.) ११६६-११६८

आ ते वत्सा मनो यमत्परमाच्चित्सधस्थात्। अग्ने त्वां कामये गिरा॥१॥
पुरुत्रा हि सदृङ्ङसि दिशो विश्वा अनु प्रभुः। समत्सु त्वा हवामहे ॥२॥
समत्स्वग्निमवसे वाजयन्तो हवामहे। वाजेषु चित्रराधसम् ॥३॥
*ā te vatsā mano yamatparamāchchitsadhasthāt | agne tvāṁ kāmaye girā ||1 ||*
*purutrā hi sadṛṅṅasi diśo viśvā anu prabhuḥ | samatsu tvā havāmahe ||2 ||*
*samatsvagnimavase vājayanto havāmahe | vājeṣu chitrarādhasam ||3 ||*

२. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.६.१-४५; सा. (Sv.) १३७; १४३; १५२; १८२; १८७; १३०७; १३०८; १३०९; १५००-१५०२; १६५१-१६५३

ऋ. (Rv.) ८.६.१-४५

महाँ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँ इव। स्तोमैर्वत्सस्य वावृधे ॥१॥
प्रजामृतस्य पिप्रतः प्र यद्भरन्त वह्नयः। विप्रा ऋतस्य वाहसा ॥२॥
कण्वा इन्द्रं यदक्रत स्तोमैर्यज्ञस्य साधनम्। जामि ब्रुवत आयुधम् ॥३॥
समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः। समुद्रायेव सिन्धवः ॥४॥
ओजस्तदस्य तित्विष उभे यत्समवर्तयत्। इन्द्रश्चर्मेव रोदसी ॥५॥
वि चिद्वृत्रस्य दोधतो वज्रेण शतपर्वणा। शिरो बिभेद वृष्णिना ॥६॥
इमा अभि प्र णोनुमो विपामग्रेषु धीतयः। अग्नेः शोचिर्न दिद्युतः ॥७॥
गुहा सतीरुप त्मना प्र यच्छोचन्त धीतयः। कण्वा ऋतस्य धारया ॥८॥
प्र तमिन्द्र नशीमहि रयिं गोमन्तमश्विनम्। प्र ब्रह्म पूर्वचित्तये ॥९॥

अहमिद्धि पितुष्परि मेधामृतस्य जग्रभ। अहं सूर्य इवाजनि ॥१०॥
अहं प्रत्नेन मन्मना गिरः शुम्भामि कण्ववत्। येनेन्द्रः शुष्ममिद्दधे ॥११॥
ये त्वामिन्द्र न तुष्टुवुॠषयो ये च तुष्टुवुः। ममेद्वर्धस्व सुष्टुतः ॥१२॥
यदस्य मन्युरध्वनीद्वि वृत्रं पर्वशो रुजन्। अपः समुद्रमैरयत् ॥१३॥
नि शुष्ण इन्द्र धर्णसिं वज्रं जघन्थ दस्यवि। वृषा ह्युग्र शृण्विषे ॥१४॥
न द्याव इन्द्रमोजसा नान्तरिक्षाणि वज्रिणम्। न विव्यचन्त भूमयः ॥१५॥
यस्त इन्द्र महीरपः स्तभूयमान आशयत्। नि तं पद्यासु शिश्नथः ॥१६॥
य इमे रोदसी मही समीची समजग्रभीत्। तमोभिरिन्द्र तं गुहः ॥१७॥
य इन्द्र यतयस्त्वा भृगवो ये च तुष्टुवुः। ममेदुग्र श्रुधी हवम् ॥१८॥
इमास्त इन्द्र पृश्नयो घृतं दुहत आशिरम्। एनामृतस्य पिप्युषीः ॥१९॥
या इन्द्र प्रस्वस्त्वासा गर्भमचक्रिरन्। परि धर्मेव सूर्यम् ॥२०॥
त्वामिच्छवसस्पते कण्वा उक्थेन वावृधुः। त्वां सुतास इन्दवः ॥२१॥
तवेदिन्द्र प्रणीतिषूत प्रशस्तिरद्रिवः। यज्ञो वितन्तसाय्यः ॥२२॥
आ न इन्द्र महीमिषं पुरं न दर्षि गोमतीम्। उत प्रजां सुवीर्यम् ॥२३॥
उत त्यदाश्वश्व्यं यदिन्द्र नाहुषीष्वा। उग्रे विक्षु प्रदीदयत् ॥२४॥
अभि व्रजं न तत्निषे सूर उपाकचक्षसम्। यदिन्द्र मृळयासि नः ॥२५॥
यदंग तविषीयस इन्द्र प्रराजसि क्षितीः। महाँ अपार ओजसा ॥२६॥
तं त्वा हविष्मतीर्विश उप ब्रुवत ऊतये। उरुज्रयसमिन्दुभिः ॥२७॥
उपह्वरे गिरीणां संगथे च नदीनाम्। धिया विप्रो अजायत ॥२८॥
अतः समुद्रमुद्वतश्चिकित्वाँ अव पश्यति। यतो विपान एजति ॥२९॥
आदित्प्रत्नस्य रेतसो ज्योतिष्पश्यन्ति वासरम्। परो यदिध्यते दिवा ॥३०॥
कण्वास इन्द्र ते मतिं विश्वे वर्धन्ति पौंस्यम्। उतो शविष्ठ वृष्ण्यम् ॥३१॥
इमां म इन्द्र सुष्टुतिं जुषस्व प्र सु मामव। उत प्र वर्धया मतिम् ॥३२॥
उत ब्रह्मण्या वयं तुभ्यं प्रवृद्ध वज्रिवः। विप्रा अतक्ष्म जीवसे ॥३३॥
अभि कण्वा अनूषतापो न प्रवता यतीः। इन्द्रं वनन्वती मतिः ॥३४॥
इन्द्रमुक्थानि वावृधुः समुद्रमिव सिन्धवः। अनुत्तमन्युमजरम् ॥३५॥
आ नो याहि परावतो हरिभ्यां हर्यताभ्याम्। इममिन्द्र सुतं पिब ॥३६॥
त्वामिद्वृत्रहन्तम जनासो वृक्तबर्हिषः। हवन्ते वाजसातये ॥३७॥
अनु त्वा रोदसी उभे चक्रं न वर्त्येतशम्। अनु सुवानास इन्दवः ॥३८॥
मन्दस्वा सु स्वर्णर उतेन्द्र शर्यणावति। मत्स्वा विवस्वतो मती ॥३९॥
वावृधान उप द्यवि वृषा वज्र्यरोरवीत्। वृत्रहा सोमपातमः ॥४०॥
ऋषिर्हि पूर्वजा अस्येक ईशान ओजसा। इन्द्र चोष्कूयसे वसु ॥४१॥
अस्माकं त्वा सुताँ उप वीतपृष्ठा अभि प्रयः। शतं वहन्तु हरयः ॥४२॥
हमां सु पूर्व्यां धियं मधार्घृतस्य पिप्युषीम्। कण्वा उक्थेन वावृधुः ॥४३॥
इन्द्रमिद्विमहीनां मेधे वृणीत मर्त्यः। इन्द्रं सनिष्युरूतये ॥४४॥
अर्वाँचं त्वा पुरुष्टुत प्रियेमेधस्तुता हरी। सोमपेयाय वक्षतः ॥४५॥

*mahām̐ indro ya ojasā parjanyo vṛṣṭimām̐ iva | stomairvatsasya vāvṛdhe ||1||*
*prajāmṛtasya pipratah pra yadbharanta vahnayaḥ | viprā ṛtasya vāhasā ||2||*
*kaṇvā indraṁ yadakrata stomairyajñasya sādhanam | jāmi bruvata āyudham ||3||*
*samasya manyave viśo viśvā namanta kṛṣṭayaḥ | samudrāyeva sindhavaḥ ||4||*
*ojastadasya titviṣa ubhe yatsamavartayat | indraścharmeva rodasī ||5||*
*vi chidvṛtrasya dodhato vajreṇa śataparvaṇā | śiro bibheda vṛṣṇinā ||6||*
*imā abhi pra ṇonumo vipāmagreṣu dhītayaḥ | agneḥ śochirna didyutaḥ ||7||*
*guhā satīrupa tmanā pra yachchhochanta dhītayaḥ | kaṇvā ṛtasya dhārayā ||8||*
*pra tamindra naśīmahi rayiṁ gomantamaśvinam | pra brahma pūrvachittaye ||9||*
*ahamiddhi pituṣpari medhāmṛtasya jagrabha | ahaṁ sūrya ivājani ||10||*
*ahaṁ pratnena manmanā giraḥ śumbhāmi kaṇvavat | yenendraḥ śuṣmamiddadhe ||11||*
*ye tvāmindra na tuṣṭuvurṛṣayo ye cha tuṣṭuvuḥ | mamedvardhasva suṣṭutaḥ ||12||*
*yadasya manyuradhvanīdvi vṛtraṁ parvaśo rujan | apaḥ samudramairayat ||13||*

*ni śuṣṇa indra dharṇasiṁ vajraṁ jaghantha dasyavi । vṛṣā hyugra śṛṇviṣe ॥14॥*
*na dyāva indramojasā nāntarikṣāṇi vajriṇam । na vivyachanta bhūmayaḥ ॥15॥*
*yasta indra mahīrapaḥ stabhūyamāna āśayat । ni taṁ padyāsu śiśnathaḥ ॥16॥*
*ya ime rodasī mahī samīchī samajagrabhīt । tamobhirindra taṁ guhaḥ ॥17॥*
*ya indra yatayastvā bhṛgavo ye cha tuṣṭuvuḥ । mamedugra śrudhī havam ॥18॥*
*imāsta indra pṛśnayo ghṛtaṁ duhata āśiram । enāmṛtasya pipyuṣīḥ ॥19॥*
*yā indra prasvastvāsā garbhamachakriran । pari dharmeva sūryam ॥20॥*
*tvāmichchhavasaspate kaṇvā ukthena vāvṛdhuḥ । tvāṁ sutāsa indavaḥ ॥21॥*
*tavedindra praṇītiṣūta praśastiradrivaḥ । yajño vitantasāyyaḥ ॥22॥*
*ā na indra mahīmiṣaṁ puraṁ na darṣi gomatīm । uta prajāṁ subīryam ॥23॥*
*uta tyadāśvśvyaṁ yadindra nāhuṣīṣvā । ugre vikṣu pradīdayat ॥24॥*
*abhi vrajaṁ na tatniṣe sūra upākachakṣasam । yadindra mṛḷayāsi naḥ ॥25॥*
*yadaṁga taviṣīyasa indra prarājasi kṣitīḥ । mahāṁ̐ apāra ojasā ॥26॥*
*taṁ tvā haviṣmatīrviśa upa bruvata ūtaye । urujrayasamindubhiḥ ॥27॥*
*upahvare girīṇāṁ saṁgathe cha nadīnām । dhiyā vipro ajāyata ॥28॥*
*ataḥ samudramudvataśchikitvāṁ̐ ava paśyati । yato vipāna ejati ॥29॥*
*āditpratnasya retaso jyotiṣpaśyanti vāsaram । paro yadidhyate divā ॥30॥*
*kaṇvāsa indra te matiṁ viśve vardhanti pauṁsyam । uto śaviṣṭha vṛṣṇyam ॥31॥*
*imāṁ ma indra suṣṭutiṁ juṣasva pra su māmava । uta pra vardhayā matim ॥32॥*
*uta brahmaṇyā vayaṁ tubhyaṁ pravṛddha vajrivaḥ । viprā atakṣama jīvase ॥33॥*
*abhi kaṇvā anṛṣatāpo na pravatā yatīḥ । indraṁ vananvatī matiḥ ॥34॥*
*indramukthāni vāvṛdhuḥ samudramiva sindhavaḥ । anuttamanyumajaram ॥35॥*
*ā no yāhi parāvato haribhyāṁ haryatābhyām । imamindra sutaṁ piba ॥36॥*
*tvāmidvṛtrahantama janāso vṛktabarhiṣaḥ । havante vājasātaye ॥37॥*
*anu tvā rodasī ubhe chakraṁ na vartyetaśam । anu suvānāsa indavaḥ ॥38॥*
*mandasvā su svarṇara utendra śaryaṇāvati । matsvā vivasvato matī ॥39॥*
*vāvṛdhāna upa dyavi vṛṣā vajryaroravīt । vṛtrahā somapātamaḥ ॥40॥*
*ṛṣirhi pūrvajā asyeka īśāna ojasā । indra choṣkūyase vasu ॥41॥*
*asmākaṁ tvā sutāṁ̐ upa vītapṛṣṭhā abhi prayaḥ । śataṁ vahantu harayaḥ ॥42॥*
*hamāṁ su pūrvyāṁ̐ dhiyaṁ madhārghṛtasya pipyuṣīm । kaṇvā ukthena vāvṛdhuḥ ॥43॥*
*indramidvimahīnāṁ medhe vṛṇīta martyaḥ । indraṁ saniṣyurūtaye ॥44॥*
*arvāṁ̐chaṁ tvā puruṣṭuta priyemedhastutā harī । somapeyāya vakṣataḥ ॥45॥*

सा. (Sv.) १३७

समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः। समुद्रायेव सिन्धवः ॥३॥
*samasya manyave viśo viśvā namanta kṛṣṭayaḥ । samudrāyeva sindhavaḥ ॥3॥*

सा. (Sv.) १४३

उपह्वरे गिरीणां संगमे च नदीनाम्। धिया विप्रो अजायत ॥९॥
*upahvare girīṇāṁ saṁgame cha nadīnām । dhiyā vipro ajāyata ॥9॥*

सा. (Sv.) १५२

अहमिद्धि पितुष्परि मेधामृतस्य जग्रह। अहं सूर्य इवाजनि ॥८॥
*ahamiddhi pituṣpari medhāmṛtasya jagraha । ahaṁ sūrya ivājani ॥8॥*

सा. (Sv.) १८२

ओजस्तदस्य तित्विष उभे यत्समवर्तयत्। इन्द्रश्चर्मेव रोदसी ॥८॥
*ojastadasya titviṣa ubhe yatsamavartayat । indraścharmeva rodasī ॥8॥*

सा. (Sv.) १८७

इमास्त इन्द्र पृश्नयो घृतं दुहत आशिरम्। एनामृतस्य पिप्युषीः ॥३॥
*imāsta indra pṛśnayo ghṛtaṁ duhata āśiram । enāmṛtasya pipyuṣīḥ ॥3॥*

सा. (Sv.) १३०७-१३०९

महाँ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँ इव। स्तोमैर्वत्सस्य वावृधे ॥४॥
कण्वा इन्द्रं यदक्रत स्तोमैर्यज्ञस्य साधनम्। जामि ब्रुवत आयुधा ॥५॥
प्रजामृतस्य पिप्रतः प्र यद्भरन्त वह्नयः। विप्रा ऋतस्य वाहसा ॥६॥

*mahām̐ indro ya ojasā parjanyo vṛṣṭimām̐ iva / stomairvatsasya vāvṛdhe //4 //*
*kaṇvā indraṁ yadakrata stomairyajñasya sādhanam / jāmi bruvata āyudhā //5 //*
*prajāmṛtasya pipratah pra yadbharanta vahnayaḥ / viprā ṛtasya vāhasā //6 //*

सा. (Sv.) १५००-१५०२

अहमिद्धि पितुष्परि मेधामृतस्य जग्रह। अहं सूर्य इवाजनि ॥१॥
अहं प्रत्नेन जन्मना गिरः शुम्भामि कण्ववत्। येनेन्द्रः शुष्ममिद्दधे ॥२॥
ये तवामिन्द्र न तुष्टवुर्ऋषयो ये च तुष्टुवुः। ममेद्वर्धस्व सुष्टुतः ॥३॥
*ahamiddhi pituṣpari medhāmṛtasya jagraha / ahaṁ sūrya ivājani //1 //*
*ahaṁ pratnena janmanā giraḥ śumbhāmi kaṇvavat / yenendraḥ śuṣmamiddadhe //2 //*
*ye tavāmindra na tuṣṭuvurṛṣayo ye cha tuṣṭuvuḥ / mamedvardhasva suṣṭutaḥ //3 //*

सा. (Sv.) १६५१-१६५३

समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः। समुद्रायेव सिन्धवः ॥१॥
वि चिद्वृत्रस्य दोधतः शिरो बिभेद वृष्णिना। वज्रेण शतपर्वणा ॥२॥
ओजस्तदस्य तित्विष उभे यत्समवर्तयत्। इन्द्रश्चर्मेव रोदसी ॥३॥
*samasya manyave viśo viśvā namanta kṛṣṭayaḥ / samudrāyeva sindhavaḥ //1 //*
*vi chidvṛtrasya dodhataḥ śiro bibheda vṛṣṇinā / vajreṇa śataparvaṇā //2 //*
*ojastadasya titviṣa ubhe yatsamavartayat / indraścharmeva rodasī //3 //*

३. तिरिन्दिरस्य पारशव्यस्य दानस्तुतिः (Tirindirasya Pāraśavyasya Dānastutiḥ) - ऋ. (Rv.) ८.६.४६-४८

शतमहं तिरिन्दरे सहस्रं पर्शावा ददे। राधांसि याद्वानाम् ॥४६॥
त्रीणि शतान्यर्वतां सहस्रा दश गोनाम्। ददुष्पज्राय साम्ने ॥४७॥
उदानट् ककुहो दिवमुष्ट्रांचतुर्युजो ददत्। श्रवसा याद्वं जनम् ॥४८॥
*śatamahaṁ tirindare sahasraṁ parśāvā dade / rādhāṁsi yādvānām //46 //*
*trīṇi śatānyarvatāṁ sahasrā daśa gonām / daduṣpajrāya sāmne //47 //*
*udānaṭ kakuho divamuṣṭāṁchaturyujo dadat / śravasā yādvaṁ janam //48 //*

## ५५१. वत्सप्रिः (Vatsapriḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १०.४५.१-१२; १०.४६.१-१०; य. (Yv.) १२.१; ६-१०; १८-२९; ३३; ४०-४१

ऋ. (Rv.) १०.४५.१-१२

दिवस्परि प्रथमं जज्ञे अग्निरस्मद् द्वितीयं परि जातवेदाः ।
तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वाधीः ॥१॥
विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते धाम विभृता पुरुत्रा ।
विद्मा ते नाम परमं गुहा यद्विद्मा तमुत्सं यत आजगन्थ ॥२॥
समुद्रे त्वा नृमणा अप्स्व१न्तर्नृचक्षा ईधे दिवो अग्न ऊधन् ।
तृतीये त्वा रजसि तस्थिवांसपामुपस्थे महिषा अवर्धन् ॥३॥
अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समंजन् ।
सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः ॥४॥
श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः ।
वसुः सूनुः सहसो अप्सु राजा वि भात्यग्र उषसामिधानः ॥५॥
विश्वस्य केतुर्भुवनस्य गर्भ आ रोदसी अपृणाज्जायमानः ।
वीळुं चिदद्रिमभिनत्परायंजना यदग्निमयजन्त पंच ॥६॥
उशिक्पावको अरतिः सुमेधा मर्तेष्वग्निरमृतो नि धायि ।
इयर्ति धूममरुषं भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षन् ॥७॥
दृशानो रुक्म उर्विया व्यद्यौदुर्मर्षमायुः श्रिये रुचानः ।
अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौर्जनयत्सुरेताः ॥८॥
यस्ते अद्य कृणवद्भद्रशोचेऽपूपं देव घृतवन्तमग्ने ।
प्र तं नय प्रतरं वस्यो अच्छाभि सुम्नं दवेभक्तं यविष्ठ ॥९॥

आ तं भज सौश्रवसेष्वग्न उक्थउक्थ आ भज शस्यमाने ।
प्रियः सूर्ये प्रियो अग्ना भवात्युज्जातेन भिनददुज्जनित्वैः ।१० ॥
त्वामग्ने यजमाना अनु द्यून्विश्वा दधिरे वार्याणि ।
त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुशिजो वि वव्रुः ॥११ ॥
अस्ताव्यग्निर्नरां सुशेवो वैश्वानर ऋषिभिः सोमगोपाः ।
अद्वेषे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मे सुवीरम् ॥१२ ॥
*divaspari prathamaṁ jajñe agnirasmad dvitīyaṁ pari jātavedāḥ /*
*tṛtīyamapsu nṛmaṇā ajasramindhāna enaṁ jarate svādhīḥ //1 //*
*vidmā te agne tredhā trayāṇi vidmā te dhāma vibhṛtā purutrā /*
*vidmā te nāma paramaṁ guhā yadvidmā tamutsaṁ yata ājagantha //2 //*
*samudre tvā nṛmaṇā apsva1ntarnṛchakṣā īdhe divo agna ūdhan /*
*tṛtīye tvā rajasi tasthivāṁsapāmupasthe mahiṣā avardhan //3 //*
*akrandadagniḥ stanayanniva dyauḥ kṣāmā rerihadvīrudhaḥ samaṁjan /*
*sadyo jajñāno vi hīmiddho akhyadā rodasī bhānunā bhātyantaḥ //4 //*
*śrīṇāmudāro dharuṇo rayīṇāṁ manīṣāṇāṁ prārpaṇaḥ somagopāḥ /*
*vasuḥ sūnuḥ sahaso apsu rājā vi bhātyagra uṣasāmidhānaḥ //5 //*
*viśvasya ketubhruvanasya garbha ā rodasī apṛṇājjāyamānaḥ /*
*vīḻuṁ chidadrimabhinatparāyaṁjanā yadagnimayajanta paṁcha //6 //*
*uśikpāvako aratiḥ sumedhā marteṣvagniramṛto ni dhāyi /*
*iyarti dhūmamaruṣaṁ bharibhraduchchhukreṇa śochiṣā dyāminakṣan //7 //*
*dṛśāno rukma urviyā vyadyauddurmarṣamāyuḥ śriye ruchānaḥ /*
*agniramṛto abhavadvayobhiryadenaṁ dyaurjanayatsuretāḥ //8 //*
*yaste adya kṛṇavadbhadraśoche'pūpaṁ deva ghṛtavanmagne /*
*pra taṁ naya prataraṁ vasyo achchhābhi sumnaṁ davebhaktaṁ yaviṣṭha //9 //*
*ā taṁ bhaja sauśravaseṣvagna ukthauktha ā bhaja śasyamāne /*
*priyaḥ sūrye priyo agnā bhavātyujjātena bhinadadujjanitvaiḥ /10 //*
*tvāmagne yajamānā anu dyūnviśvā dadhire varyāṇi /*
*tvayā saha draviṇamichchhamānā vrajaṁ gomantamuśijo vi vavruḥ //11 //*
*astāvyagnirnarāṁ suśevo vaiśvānara ṛṣibhiḥ somagopāḥ /*
*adveṣe dyāvāpṛthivī huvema devā dhatta rayimasme suvīram //12 //*

ऋ. (Rv.) १०.४६.१-१०

प्र होता जातो महान्नभोविन्नृषद्वा सीददपामुपस्थे ।
दधिर्यो धायि स ते वयांसि यन्ता वसूनि विधते तनूपाः ॥१ ॥
इमं विधन्तो अपां सधस्थे पशुं न नष्टं पदैरनु ग्मन् ।
गुहा चतन्तमुशिजो नमोभिरिच्छन्तो धीरा भृगवोऽविन्दन् ॥२ ॥
इमं त्रितो भूर्यविन्ददिच्छन्वैभूवसो मूर्धन्यघ्न्यायाः ।
स शेवृधो जात आ हर्म्येषु नाभिर्युवा भवति रोचनस्य ॥३ ॥
मन्द्रं होतारमुशिजो नमोभिः प्रांचं नेतारमध्वराणाम् ।
विशामकृण्वन्नरतिं पावकं हव्यवाहं दधतो मानुषेषु ॥४ ॥
प्र भूर्जयन्तं महां विपोधां मूरा अमूरं पुरां दर्माणम् ।
नयन्तो गर्भं वनां धियं धुर्हिरिश्मश्रुं नार्वाणं धनर्चम् ॥५ ॥
नि पस्त्यासु त्रितः स्तभूयन्परिवीतो योनौ सीददन्तः ।
अतः सङ्गृभ्या विशां दमूना विधर्मणायन्त्रैरीयते नॄन् ॥६ ॥
अस्याजरासो दमामरित्रा अर्चद्धूमासो अग्नयः पावकाः ।
श्वितीचयः श्वात्रासो भुरण्यवो वनर्षदो वायवो न सोमाः ॥७ ॥
प्र जिह्वया भरते वेपो अग्निः प्र वयुनानि चेतसा पृथिव्याः ।
तमायवः शुचयन्तं पावकं मन्द्रं होतारं दधिरे यजिष्ठम् ॥८ ॥
द्यावा यमग्निं पृथिवी जरिष्टामापस्त्वष्टा भृगवो यं सहोभिः ।
ईळेन्यं प्रथमं मातरिश्वा देवास्ततक्षुर्मनवे यजत्रम् ॥९ ॥
यं त्वा देवा दधिरे हव्यवाहं पुरुस्पृहो मानुषासो यजत्रम् ।

स यामन्नग्ने स्तुवते वयो धाः प्र देवयन्यशसः सं हि पूर्वीः ॥१०॥
*pra hotā jāto mahānnabhovinnṛṣadvā sīdadapāmupasthe* ।
*dadhiryo dhāyi sa te vayāṁsi yantā vasūni vidhate tanūpāḥ* ॥1॥
*imaṁ vidhanto apāṁ sadhasthe paśuṁ na naṣṭaṁ padairanu gman* ।
*guhā chatantamuśijo namobhirichchhanto dhīrā bhṛgavo'vindan* ॥2॥
*imaṁ trito bhūryavindadichchhanvaibhūvaso mūrdhanyaghnyāyāḥ* ।
*sa śevṛdho jāta ā harmyeṣu nābhiryuvā bhavati rochanasya* ॥3॥
*mandraṁ hotāramuśijo namobhiḥ prāṁchaṁ netāramadhvarāṇām* ।
*viśāmakṛṇvannaratiṁ pāvakaṁ havyavāhaṁ dadhato mānuṣeṣu* ॥4॥
*pra bhūrjayantaṁ mahāṁ vipodhāṁ mūrā amūraṁ purāṁ darmāṇam* ।
*nayanto garbhaṁ vanāṁ dhiyaṁ dhurhiriśmaśruṁ nārvāṇaṁ dhanarcham* ॥5॥
*ni pastyāsu tritaḥ stabhūyanparivīto yonau sīdadantaḥ* ।
*ataḥ saṅgṛbhyā viśāṁ damūnā vidharmaṇāyantrairīyate nṝn* ॥6॥
*asyājarāso damāmaritrā archaddhūmāso agnayaḥ pāvakāḥ* ।
*śvitīchayaḥ śvātrāso bhuraṇyavo vanarṣado vāyavo na somāḥ* ॥7॥
*pra jihvayā bharate vepo agniḥ pra vayunāni chetasā pṛthivyāḥ* ।
*tamāyavaḥ śuchayantaṁ pāvakaṁ mandraṁ hotāraṁ dadhire yajiṣṭham* ॥8॥
*dyāvā yamagiṁna pṛthivī jariṣṭāmāpastvaṣṭā bhṛgavo yaṁ sahobhiḥ* ।
*īḻenyaṁ prathamaṁ mātariśvā devāstatakṣurmanave yajatram* ॥9॥
*yaṁ tvā devā dadhire havyavāhaṁ puruspṛho mānuṣāso yajatram* ।
*sa yāmannagne stuvate vayo dhāḥ pra devayanyaśasaḥ saṁ hi pūrvīḥ* ॥10॥

य. (Yv.) १२.१

दृशानो रुकमऽउर्व्या व्यद्यौद् दुर्मर्षमायुः श्रिये रुचानः ।
अग्निरमृतोऽअभवद्वयोभिर्यदेनं द्यौरजनयत्सुरेता ॥१॥
*dṛśāno rukama'urvyā vyadyaud durmarṣamāyuḥ śriye ruchānaḥ* ।
*agniramṛto'abhavadvayobhiryadenaṁ dyaurajanayatsuretā* ॥1॥

य. (Yv.) १२.६-१०

अक्रन्ददग्नि स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समंजन् ।
सद्यो जज्ञानो वि हीमिद्धोऽअख्यदा रोदसी भानुना भात्यन्तः ॥६॥
अग्नेऽभ्यावर्त्तिन्नाभि मा निवर्त्तस्वायुषा वर्चसा प्रजया धनेन। सन्या मेध्या रय्या पोषेण ॥७॥
अग्नेऽअंगिरः शतं ते सन्त्वावृतः सहस्रं तऽउपावृतः ।
अधा पोषस्य पोषेण पुनर्नो नष्टमाकृधि पुनर्नो रयिमाकृधि ॥८॥
पुनरूर्जा निवर्त्तस्व पुनरग्नऽइषायुषा। पुनर्नः पाह्यंहसः ॥९॥
सह रय्या निवर्त्तस्वाग्ने पिन्वस्व धारया। विश्वप्स्न्या विश्वप्स्न्या विश्वतस्परि ॥१०॥
*akrandadagni stanayanniva dyauḥ kṣāmā rerihadvīrudhaḥ samaṁjan* ।
*sadyo jajñāno vi hīmiddho'akhyadā rodasī bhānunā bhātyantaḥ* ॥6॥
*agne'bhyāvarttinnābhi mā nivarttasvāyuṣā varchasā prajayā dhanena* । *sanyā medhyā rayyā poṣeṇa* ॥7॥
*agne'aṁgiraḥ śataṁ te santvāvṛtaḥ sahasraṁ ta'upāvṛtaḥ* ।
*adhā poṣasya poṣeṇa punarno naṣṭamākṛdhi punarno rayimākṛdhi* ॥8॥
*punarūrjā nivarttasva punaragna'iṣāyuṣā* । *punarnaḥ pāhyaṁhasaḥ* ॥9॥
*saha rayyā nivarttasvāgne pinvasva dhārayā* । *viśvapsnyā viśvapsnyā viśvataspari* ॥10॥

य. (Yv.) १२.१८-२९

दिवस्परि प्रथमं जज्ञेऽअग्निरस्मद्द्वितीयं परि जातवेदाः ।
तृतीयमप्सु नृमणाऽअजस्रमिन्धानऽएनं जरते स्वाधीः ॥१८॥
विद्मा तेऽअग्ने त्रेधा त्र्याणि विद्मा ते धाम विभृता पुरुत्रा ।
विद्मा ते नाम परमं गुहा यद्विद्मा तमुत्सं यतऽआजगन्थ ॥१९॥
समुद्रे त्वा नृमणाऽअप्स्व न्तर्नृचक्षाऽईधे दिवो अग्नऽऊधन् ।
तृतीये त्वा रजसि तस्थिवांसमपामुपस्थे महिषाऽअवर्धन् ॥२०॥
अक्रन्ददग्नि स्तनयन्निव द्यौः क्षामारेरिहद् वीरुधः समंजन् ।
सद्यो जज्ञानो वि हीमिद्धोऽअख्यदा रोदसी भानुना भात्यन्तः ॥२१॥

श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः ।
वसुः सूनुः सहसोऽअप्सु राजा विभात्यग्रऽउषसामिधानः ॥२२॥
विश्वस्य केतुर्भुवनस्य गर्भऽआ रोदसीऽअपृणाज्जायमानः ।
वीडुं चिदद्रिमभिनत् परायंजना यदग्निमयजन्त पंच ॥२३॥
उशिक् पावको अरतिः सुमेधा मर्त्येष्वग्निरमृतो नि धायि ।
इयर्त्ति धूममरुषं भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षन् ॥२४॥
दृशानो रुक्मऽउर्व्या व्यद्यौदुर्मर्षमायुः श्रिये रुचानः ।
अग्निरमृतोऽअभवद्वयोभिर्यदेनं द्यौरजनयत्सुरेताः ॥२५॥
यस्तेऽअद्य कृणवद्भद्रशोचेऽपूपं देव घृतवन्तमग्ने ।
प्र तं नय प्रतरं वस्योऽअच्छाभि सुम्नं देवभक्तं यविष्ठ ॥२६॥
आ तं भज सौश्रवसेष्वग्नऽउक्थऽउक्थऽआभज शस्यमाने ।
प्रियः सूर्य्ये प्रियोऽअग्ना भवात्युज्जातेन भिनददुज्जनित्वैः ॥२७॥
त्वामग्ने यजमानाऽअनु द्यून् विश्वा वसु दधिरे वार्य्याणि ।
त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुशिजो विवव्रुः ॥२८॥
अस्ताव्यग्निर्नरां सुशेवो वैश्वानरऽऋषिभिः सोमगोपाः ।
अद्वेषे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मे सुवीरम् ॥२९॥

*divaspari prathamaṁ jajñe'agnirasmaddvitīyaṁ pari jātavedāḥ /*
*tṛtīyamapsu nṛmaṇā'ajasramindhāna'enaṁ jarate svādhīḥ //18 //*
*vidmā te'agne tredhā trayāṇi vidmā te dhāma vibhṛtā purutrā /*
*vidmā te nāma paramaṁ guhā yadvidmā tamutsaṁ yata'ājagantha //19 //*
*samudre tvā nṛmaṇā'apsva ntarnṛchakṣā'īdhe divo agna'ūdhan /*
*tṛtīye tvā rajasi tasthivāṁsamapāmupasthe mahiṣā'avardhan //20 //*
*akrandadagni stanayanniva dyauḥ kṣāmārerihad vīrudhaḥ samaṁjan /*
*sadyo jajñāno vi hīmiddho'akhyadā rodasī bhānunā bhātyantaḥ //21 //*
*śrīṇāmudāro dharuṇo rayīṇāṁ manīṣāṇāṁ prārpaṇaḥ somagopāḥ /*
*vasuḥ sūnuḥ sahaso'apsu rājā vibhātyagra'uṣasāmidhānaḥ //22 //*
*viśvasya keturbhuvanasya garbha'ā rodasī'apṛṇājjāyamānaḥ /*
*vīḍuṁ chidadrimabhinat parāyaṁjanā yadagnimayajanta paṁcha //23 //*
*uśik pāvako aratiḥ sumedhā martyeṣvagniramṛto ni dhāyi /*
*iyartti dhūmamaruṣaṁ bharibhraduchchhukreṇa śochiṣā dyāāminakṣan //24 //*
*dṛśāno rukma'urvyā vyadyauddurmarṣamāyuḥ śriye ruchānaḥ /*
*agniramṛto'abhavadvayobhiryadenaṁ dyaurajanayatsuretāḥ //25 //*
*yaste'adya kṛṇavadbhadraśoche'pūpaṁ deva ghṛtavantamagne /*
*pra taṁ naya prataraṁ vasyo'achchhābhi sumnaṁ devabhaktaṁ yaviṣṭha //26 //*
*ā taṁ bhaja sauśravaseṣvagna'uktha'uktha'ābhaja śasyamāne /*
*priyaḥ sūryye priyo'agnā bhavātyujjātena bhinadadujjanitvaiḥ //27 //*
*tvāmagne yajamānā'anu dyūn viśvā vasu dadhire vāryyāṇi /*
*tvayā saha draviṇamichchhamānā vrajaṁ gomantamuśijo vivavruḥ //28 //*
*astāvyagnirnarāṁ suśevo vaiśvānara'ṛṣibhiḥ somagopāḥ /*
*adveṣe dyāvāpṛthivī huvema devā dhatta rayimasme suvīram //29 //*

य. (Yv.) १२.३३

अक्रन्ददग्नि स्तनयन्निव द्यौः क्षामा रेरिहद् वीरुधः समंजन् ।
सद्यो जज्ञानो वि हीमिद्धोऽअख्यदा रोदसी भानुना भात्यन्तः ॥३३॥

*akrandadagni stanayanniva dyauḥ kṣāmā rerihad vīrudhaḥ samaṁjan /*
*sadyo jajñāno vi hīmiddho'akhyadā rodasī bhānunā bhātyantaḥ //33 //*

य. (Yv.) १२.४०-४१

पुनरूर्जा निवर्त्तस्व पुनरग्नऽइषायुषा। पुनर्नः पाह्यंहसः ॥४०॥
सह रय्या निवर्त्तस्वाग्ने पिन्वस्व धारया। विश्वप्स्न्या विश्वतस्परि ॥४१॥

*punarūrjā nivarttasva punaragna'iṣāyuṣā / punarnaḥ pāhyaṁhasaḥ //40 //*
*saha rayyā nivarttasvāgne pinvasva dhārayā / viśvapsnyā viśvataspari //41 //*

२. अग्नयः (Agnayaḥ) - य. (Yv.) ३३.१

अस्याजरासो दमामरित्राऽअर्चद्धूमासोऽअग्नयः पावकाः ।
श्वितीचयः श्वात्रासो भुरण्यवो वनर्षदो वायवो न सोमाः ॥१॥
*asyājarāso damāmaritrā'archaddhūmāso'agnayaḥ pāvakāḥ /*
*śvitīchayaḥ śvātrāso bhuraṇyavo vanarṣado vāyavo na somāḥ //1 //*

## ५५२. वत्सप्रिर् भालन्दनः (Vatsaprir Bhālandanaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.६८.१-१०

प्र देवमच्छा मधुमन्त इन्दवोऽसिष्यदन्त गाव आ न धेनवः ।
बर्हिषदो वचनावन्त ऊधभिः परिस्रुतमुस्रिया निर्णिजं धिरे ॥१॥
स रोरुवदभि पूर्वा अचिक्रददुपारुहः श्रथयन्त्स्वादते हरिः ।
तिरः पवित्रं परियन्नुरु ज्रयो नि शर्याणि दधते देव आ वरम् ॥२॥
वि यो ममे यम्या संयती मदः साकंवृधा पयसा पिन्वदक्षिता ।
मही अपारे रजसी विवेविददभिव्रजन्नक्षितं पाज आ ददे ॥३॥
स मातरा विचरन्वाजयन्नपः प्र मेधिरः स्वधया पिन्वते पदम् ।
अंशुर्यवेन पिपिशे यतो नृभिः सं जामिभिर्नसते रक्षते शिरः ॥४॥
सं दक्षेण मनसा जायते कविरृतस्य गर्भो निहितो यमा परः ।
यूना ह सन्ता प्रथमं वि जज्ञतुर्गुहा हितं जनिम नेममुद्यतम् ॥५॥
मन्द्रस्य रूपं विविदुर्मनीषिणः श्येनो यदन्धो अभरत्परावतः ।
तं मर्जयन्त सुवृधं नदीष्वाँ उशन्तमंशुं परियन्तमृग्मियम् ॥६॥
त्वां मृजन्ति दश योषणः सुतं सोम ऋषिभिर्मतिभिर्धीतिभिर्हितम् ।
अव्यो वारेभिरुत देवहूतिभिर्नृभिर्यतो वाजमा दर्षि सातये ॥७॥
परिप्रयन्तं वय्यं सुषंसदं सोमं मनीषा अभ्यनूषत स्तुभः ।
यो धारया मधुमाँ ऊर्मिणा दिव इयर्ति वाचं रयिषाळमर्त्यः ॥८॥
अयं दिव इयर्ति विश्वमा रजः सोमः पुनानः कलशेषु सीदति ।
अद्भिर्गोभिर्मृज्यते अद्रिभिः सुतः पुनान इन्दुर्वरिवो विदत्प्रियम् ॥९॥
एवा नः सोम परिषिच्यमानो वयो दधिच्चित्रतमं पवस्व ।
अद्वेषे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मे सुवीरम् ॥१०॥
*pra devamachchhā madhumanta indavo'siṣyadanta gāva ā na dhenavaḥ /*
*barhiṣado vachanāvanta ūdhabhiḥ parisrutamusriyā nirṇijaṁ dhire //1 //*
*sa roruvadabhi pūrvā achikradadupāruhaḥ śrathayantsvādate hariḥ /*
*tiraḥ pavitraṁ pariyannuru jrayo ni śaryāṇi dadhate deva ā varam //2 //*
*vi yo mame yamyā saṁyatī madaḥ sākaṁvṛghā payasā pinvadakṣitā /*
*mahī apāre rajasī vivevidadabhivrajannakṣitaṁ pāja ā dade //3 //*
*sa mātarā vicharanvājayannapaḥ pra medhiraḥ svadhayā pinvate padam /*
*aṁśuryavena pipiśe yato nṛbhiḥ saṁ jāmibhirnasate rakṣate śiraḥ //4 //*
*saṁ dakṣeṇa manasā jāyate kavirṛtasya garbho nihito yamā paraḥ /*
*yūnā ha santā prathamaṁ vi jajñatarguhā hitaṁ jinima nemamudyatam //5 //*
*mandrasya rūpaṁ vividurmanīṣiṇaḥ śyeno yadandho abharatparāvataḥ /*
*taṁ marjayanta suvṛdha nadīṣvām̐ uśantamaṁśuṁ pariyantamṛgmiyam //6 //*
*tvāṁ mṛjanti daśa yoṣaṇaḥ sutaṁ soma ṛṣibhirmatibhirdhītibhirhitam /*
*avyo vārebhiruta devahūtibhirnṛbhiryato vājamā darṣi sātaye //7 //*
*pariprayantaṁ vayyaṁ suṣaṁsadaṁ somaṁ manīṣā abhyanūṣata stubhaḥ /*
*yo dhārayā madhumām̐ ūrmiṇā diva iyarti vāchaṁ rayiṣāḷamartyaḥ //8 //*
*ayaṁ diva iyarti viśvamā rajaḥ somaḥ punānaḥ kalaśeṣu sīdati /*
*adbhirgobhirmṛjyate adribhiḥ sutaḥ punāna indurvarivo vidatpriyam //9 //*
*evā naḥ soma pariṣichyamāno vayo dadhichchitratamaṁ pavasva /*
*adveṣe dyāvāpṛthivī huvema devā dhatta rayimasme suvīram //10 //*

## ५५३. वत्सप्रिर् भालन्दनः (साग्री. सास्वा. ऋसर्व.); वत्स (सार्षेदी. ७४); वत्सप्रिय (सार्षेदी. ७७) (Vatsaprir Bhālandanaḥ [Ssb. Sas. Rss.]; Vatsa [Sad. 74]; Vatsapriya [Sad. 77])

१. अग्निः (Agniḥ) - सा. (Sv.) ७४; ७७

सा. (Sv.) ७४

प्र भूर्जयन्तं महां विपोधां मूरैरमूरं पुरां दर्माणम् ।
नयन्तं गीर्भिर्वना धियं धा हरिश्मश्रुं न वर्मणा धनर्चिम् ॥२॥
*pra bhūrjayantaṁ mahāṁ vipodhāṁ mūrairamūraṁ purāṁ darmāṇam /*
*nayantaṁ gīrbhirvanā dhiyaṁ dhā hariśmaśruṁ na varmaṇā dhanarchim //2 //*

सा. (Sv.) ७७

प्र होता जातो महान्नभोविन्नृषद्मा सीददपां विवर्ते ।
दधद्यो धायी सुते वयांसि यन्ता वसूनि विधते तनूपाः ॥५॥
*pra hotā jāto mahānnabhovinnṛṣadmā sīdadapāṁ vivarte /*
*dadhadyo dhāyī sute vayāṁsi yantā vasūni vidhate tanūpāḥ //5 //*

२. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ५६३

प्र देवमच्छा मधुमन्त इन्दवोऽसिष्यदन्त गाव आ न धेनवः ।
बर्हिषदो वचनावन्त ऊधभिः परिस्रुतमुस्रिया निर्णिजं धिरे ॥१०॥
*pra devamachchhā madhumanta indavo'siṣyadanta gāva ā na dhenavaḥ /*
*barhiṣado vachanāvanta ūdhabhiḥ parisrutamusriyā nirṇijaṁ dhire //10 //*

## ५५४. वत्सारः (Vatsāraḥ)

१. अग्निः (Agniḥ) - य. (Yv.) १२.११५; १३.१-२

य. (Yv.) १२.११५

आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात्। अग्ने त्वां कामया गिरा ॥११५॥
*ā te vatso mano yamatparamāchchitsadhasthāt / agne tvāṁ kāmayā girā //115 //*

य. (Yv.) १३.१-२

मयि गृह्णाम्यग्रेऽअग्निं रायस्पोषाय सुप्रजास्त्वाय सुवीर्य्याय। मासु देवताः सचन्ताम् ॥१॥
अपां पृष्ठमसि योनिरग्नेः समुद्रमभितः पिन्वमानम् ।
वर्धमानो महाँ२ऽआ च पुष्करे दिवो मात्रया वरिम्णा प्रथस्व ॥२॥
*mayi gṛhṇāmyagre'agniṁ rāyaspoṣāya suprajāstvāya suvīryyāya / māsu devatāḥ sachantām //1 //*
*apāṁ pṛṣṭhamasi yoniragneḥ samudramabhitaḥ pinvamānam /*
*vardhamāno mahāṁ̐2'ā cha puṣkare divo mātrayā varimṇā prathasva //2 //*

२. आदित्यः (Ādityaḥ) - य. (Yv.) १३.३

ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेनऽआवः ।
स बुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥३॥
*brahma jajñānaṁ prathamaṁ purastādvi sīmataḥ surucho vena'āvaḥ /*
*sa budhnyā'upamā'asya viṣṭhāḥ sataścha yonimasataścha vivaḥ //3 //*

३. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.) ३३.४९

इन्द्राग्नी मित्रावरुणादितिं स्वः पृथिवीं द्यां मरुतः पर्वताँ२ऽअपः ।
हुवे विष्णुं पूषणं ब्रह्मणस्पतिं भगं नु शंसं सवितारमूतये ॥४९॥
*indrāgnī mitrāvaruṇāditiṁ svaḥ pṛthivīṁ dyāṁ marutaḥ parvatāṁ̐2'apaḥ /*
*huve viṣṇuṁ pūṣaṇaṁ brahmaṇaspatiṁ bhagaṁ nu śaṁsaṁ savitāramūtaye //49 //*

## ५५५. वत्सारः काश्यपः (Vatsāraḥ Kāśyapaḥ)

१. प्रजापतिः (Prajāpatiḥ) - य. (Yv.) ७.१८

सुप्रजाः प्रजाः प्रजनयन् परीह्यभि रायस्पोषेण यजमानम्। संजग्मानो दिवा पृथिव्या मन्थी मन्थिशोचिषा निरस्तो मर्को मन्थिनोऽधिष्ठानमसि ॥१८॥
*suprajāḥ prajāḥ prajanayan parīhyabhi rāyaspoṣeṇa yajamānam / saṁjagmāno divā pṛthivyā manthī manthiśochiṣā nirasto marko manthino'dhiṣṭhānamasi //18 //*

२. यज्ञः (Yajñaḥ) - य. (Yv.) ७.२०

उपयामगृहीतोऽस्याग्रयणोऽसि स्वाग्रयणः।
पाहि यज्ञं पाहि यज्ञपतिं विष्णुस्त्वामिन्द्रियण पातु विष्णुं त्वं पाह्यभि सवनानि पाहि ॥२०॥
*upayāmagṛhīto'syāgrayaṇo'si svāgrayaṇaḥ । pāhi yajñaṁ pāhi yajñapatiṁ*
*viṣṇustvāmindriyaṇa pātu viṣṇuṁ tvaṁ pāhyabhi savanāni pāhi ॥20॥*

३. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.) ७.१२-१७; १९; २२-२३

य. (Yv.) ७.१२-१७

तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदं स्वर्विदम्। प्रतीचीनं वृजनं दोहसे धुनिमाशुं जयन्तमनु यासु वर्द्धसे।
उपयामगृहीतोऽसि शण्डाय त्वैष ते योनिर्वीरतां पाह्यपमृष्टः शण्डो दवास्त्वा शुक्रपाः प्रणयन्त्वनाधृष्टासि ॥१२॥
सुवीरो वीरान् प्रजनयन् परीह्यभि रायस्पोषेण यजमानम् ।
संजग्मानो दिवा पृथिव्या शुक्रः शुक्रशोचिषा निरस्तः शण्डः शुक्रस्याधिष्ठानमसि ॥१३॥
अच्छिन्नस्य ते देव सोम सुवीर्य्यस्य रायस्पोषस्य ददितारः स्याम ।
सा प्रथमा सँस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रोऽग्निः ॥१४॥
स प्रथमो बृहस्पतिश्चिकित्वाँस्तस्माऽइन्द्राय सुतमाजुहोत स्वाहा ।
तृम्पन्तु होत्रा मध्वो याः स्विष्टा याः स्विष्टा याः सुप्रीताः सुहुता यत्स्वाहायाडग्नीत् ॥१५॥
अयं वेनश्चोदयत् पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने। इममपां संगमे सूर्य्यस्य शिशुं न विप्रा मतिभि रिहन्ति।
उपयामगृहीतोऽसि मर्काय त्वा ॥१६॥
मनो न येषु हवनेषु तिग्मं विपः शच्या वनुथो द्रवन्ता। आ यः शर्य्याभिस्तुविनृम्णोऽअस्या श्रीणीतादिशं गभस्तावेष ते योनिः प्रजाः पाह्यपमृष्टो मर्को देवास्त्वा मन्थिपाः प्रणयन्त्वनाधृष्टासि ॥१७॥
*taṁ pratnathā pūrvathā viśvathemathā jyeṣṭhatātiṁ barhiṣadaṁ svarvidam । pratīchīnaṁ vṛjanaṁ dohase dhunimāśuṁ jayantamanu yāsu varddhase । upayāmagṛhīto'si śaṇḍāya tvaiṣa te yonirvīratāṁ pāhyapamṛṣṭaḥ śaṇḍo davāstvā śukrapāḥ praṇayantvanādhṛṣṭāsi ॥12॥*
*suvīro vīrān prajanayan parīhyabhi rāyaspoṣeṇa yajamānam ।*
*saṁjagmāno divā pṛthivyā śukraḥ śukraśochiṣā nirastaḥ śaṇḍaḥ śukrasyādhiṣṭhānamasi ॥13॥*
*achchhinnasya te deva soma suvīryyasya rāyaspoṣasya daditāraḥ syāma ।*
*sā prathamā saṁ̐skṛtirviśvavārā sa prathamo varuṇo mitro'gniḥ ॥14॥*
*sa prathamo bṛhaspatiśchikitvāṁ̐stasmā'indrāya sutamājuhota svāhā ।*
*tṛmpantu hotrā madhvo yāḥ sviṣṭā yāḥ sviṣṭā yāḥ suprītāḥ suhutā yatsvāhāyāḍagnīt ॥15॥*
*ayaṁ venaśchodayat pṛśnigarbhā jyotirjarāyū rajaso vimāne । imamapāṁ saṁgame sūryyasya śiśuṁ na viprā matibhi rihanti । upayāmagṛhīto'si markāya tvā ॥16॥*
*mano na yeṣu havaneṣu tigmaṁ vipaḥ śachyā vanutho dravantā । ā yaḥ śaryyābhistuvinṛmṇo'asyā śrīṇītādiśaṁ gabhastāveṣa te yoniḥ prajāḥ pāhyapamṛṣṭo marko devāstvā manthipāḥ praṇayantvanādhṛṣṭāsi ॥17॥*

य. (Yv.) ७.१२-१९

ये देवासो दिव्येक दश स्थ पृथिव्यामध्येकादश स्थ ।
अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ॥१९॥
उपयामगृहीतोऽसीन्द्राय त्वा बृहद्वते वयस्वतऽउक्थाव्यं गृह्णामि। यत्तऽइन्द्र बृहद्वयस्तस्मै त्वा विष्णवे त्वैष ते योनिरुक्थे भयस्त्वा देवेभ्यस्त्वा देवाव्यं यज्ञस्यायुषे गृह्णामि ॥२२॥
मित्रावरुणाभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्राय त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्राग्निभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्रावरुणाभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्राबृहस्पतिभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्राविष्णुभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामि ॥२३॥
*ye devāso divyeka daśa stha pṛthivyāmadhyekādaśa stha ।*
*apsukṣito mahinaikādaśa stha te devāso yajñamimaṁ juṣadhvam ॥19॥*
*upayāmagṛhīto'sīndrāya tvā bṛhadvate vayasvata'ukthāvyaṁ gṛhṇāmi । yatta'indra bṛhadvayastasmai tvā viṣṇave tvaiṣa te yonirukthe bhayastvā devebhpastvā devāvyaṁ yajñasyāyuṣe gṛhṇāmi ॥22॥*
*mitrāvaruṇābhyāṁ tvā devāvyaṁ yajñasyāyuṣe gṛhṇāmīndrāya tvā devāvyaṁ yajñasyāyuṣe gṛhṇāmīndrāgnibhyāṁ tvā devāvyaṁ yajñasyāyuṣe gṛhṇāmīndrāvaruṇābhyāṁ tvā devāvyaṁ yajñasyāyuṣe gṛhṇāmīndrābṛhaspatibhyāṁ tvā devāvyaṁ yajñasyāyuṣe*

*gṛhṇāmīndrāviṣṇubhyāṁ tvā devāvyaṁ yajñasyāyuṣe gṛhṇāmi //23 //*

४. सोमः (Somaḥ) - य. (Yv.) ७.२१

सोमः पवते सोमः पवतेऽस्मै ब्रह्मणेऽस्मै क्षत्रायास्मै सुन्वते यजमानाय पवत इष ऊर्जे पवतेऽद्भ्य ओषधीभ्यः पवते द्यावापृथिवीभ्यां पवते सुभूताय पवते विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥२१॥

*somaḥ pavate somaḥ pavate'smai brahmaṇe'smai kṣatrāyāsmai sunvate yajamānāya pavata iṣa ūrje pavate'dbhya oṣadhībhyaḥ pavate dyāvāpṛthivībhyāṁ pavate subhūtāya pavate viśvebhyastvā devebhya eṣa te yonirviśvebhyastvā devebhyaḥ //21 //*

## ५५६. वम्रो वैखानसः (Vamro Vaikhānasaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.९९.१-१२

कं नश्चित्रमिषण्यसि चिकित्वान्पृथुग्मानं वाश्रं वावृधध्यै ।
कत्तस्य दातु शवसो व्युष्टौ तक्षद्वज्रं वृत्रतुरमपिन्वत् ॥१॥
स हि द्युता विद्युता वेति साम पृथुं योनिमसुरत्वा ससाद ।
स सनीळेभिः प्रसहानो अस्य भ्रातुर्न ऋते सप्तथस्य मायाः ॥२॥
स वाजं यातापदुष्पदा यन्त्स्वर्षाता परि षदत्सनिष्यन् ।
अनर्वा यच्छतदुरस्य वेदो घ्नंछश्नदेवाँ अभि वर्पसा भूत् ॥३॥
स यह्व्यो३ वनीर्गोष्वर्वा जुहोति प्रधन्यासु सस्रिः ।
अपादो यत्र युजयासोऽरथा द्रोण्यश्वास ईरते घृतं वाः ॥४॥
स रुद्रेभिरशस्तवार ऋभ्वा हित्वी गयमारेअवद्य आगात् ।
वम्रस्य मन्ये मिथुना विवव्री अन्नमभीत्यारोदयन्मुषायन् ॥५॥
स इद्दासं तुवीरवं पतिर्दन्षळक्षं त्रिशीर्षाणं दमन्यत् ।
अस्य त्रितो न्वोजसा वृधानो विपा वराहमयोअग्रया हन् ॥६॥
स द्रुह्वणे मनुष ऊर्ध्वसान आ साविषदर्शसानाय शरुम् ।
स नृतमो नहुषोऽस्मत्सुजातः पुरोऽभिनदर्हन्दस्युहत्ये ॥७॥
सो अभ्रियो न यवस उदन्यन्क्षया गातुं विदन्नो अस्मे ।
उप यत्सीददिन्दुं शरीरैः श्येनोऽयोपाष्टिर्हन्ति दस्यून् ॥८॥
स व्राधतः शवसानेभिरस्य कुत्साय शुष्णं कृपणे परादात् ।
अयं कविमनयच्छस्यमानमत्कं यो अस्य सनितोत नृणाम् ॥९॥
अयं दशस्यन्नर्येभिरस्य दस्मो देवेभिर्वरुणो न मायी ।
अयं कनीन ऋतुपा अवेद्यमिमीतारुं यश्चतुष्पात् ॥१०॥
अस्य स्तोमेभिरौशिज ऋजिश्वा व्रजं दरयद्वृषभेण पिप्रोः ।
सुत्वा यद्यजतो दीदयद्गीः पुर इयानो अभि वर्पसा भूत् ॥११॥
एवा महो असुर वक्षथाय वम्रकः षड्भिरुप सर्पदिन्द्रम् ।
स इयानः करति स्वस्तिमस्मा इषमूर्जं सुक्षितिं विश्वमाभाः ॥१२॥

*kaṁ naśchitramiṣaṇyasi chikitvānpṛthugmānaṁ vāśraṁ vāvṛdhadhyai /*
*kattasya dātu śavaso vyuṣṭau takṣadvajraṁ vṛtraturamapinvat //1 //*
*sa hi dyutā vidyutā veti sāma pṛthuṁ yonimasuratvā sasāda /*
*sa sanīḷebhiḥ prasahāno asya bhrāturna ṛte saptathasya māyāḥ //2 //*
*sa vājaṁ yātāpaduṣpadā yantsvarṣātā pari ṣadatsaniṣyan /*
*anarvā yachchhatadurasya vedo ghnaṁchhaśnadevām̐ abhi varpasā bhūt //3 //*
*sa yahvyo3 vanīrgoṣvarvā juhoti pradhanyāsu sasriḥ /*
*apādo yatra yujayāso'rathā droṇyaśvāsa īrate ghṛtaṁ vāḥ //4 //*
*sa rudrebhiraśastavāra ṛbhvā hitvī gayamāreavadya āgāt /*
*vamrasya manye mithunā vivavrī annamabhītyārodayanmuṣāyan //5 //*
*sa iddāsaṁ tuvīravaṁ patirdanṣaḷakṣaṁ triśīrṣāṇaṁ damanyat /*
*asya trito nvojasā vṛdhāno vipā varāhamayoagrayā han //6 //*
*sa druhvaṇe manuṣa ūrdhvasāna ā sāviṣadarśasānāya śarum /*
*sa nṛtamo nahuṣo'smatsujātaḥ puro'bhinadarhandasyuhatye //7 //*
*so abhriyo na yavasa udanyankṣayā gātuṁ vidanno asme /*
*upa yatsīdadinduṁ śarīraiḥ śyeno'yopāṣṭirhanti dasyūn //8 //*

*sa vrādhataḥ śavasānebhirasya kutsāya śuṣṇaṁ kṛpaṇe parādāt /*
*ayaṁ kavimanayachchhasyamānamatkaṁ yo asya sanitota nṛṇām //9 //*
*ayaṁ daśasyannaryebhirasya dasmo devebhirvaruṇo na māyī /*
*ayaṁ kanīna ṛtupā avedyamibhītārāruṁ yaśchatuṣpāt //10 //*
*asya stomebhirauśija ṛjiśvā vrajaṁ darayadvṛṣabheṇa piprāḥ /*
*sutvā yadyajato dīdayadgīḥ pura iyāno abhi varpasā bhūt //11 //*
*evā maho asura vakṣathāya vamrakaḥ ṣaḍbhirupa sarpadindram /*
*sa iyānaḥ karati svastimasmā iṣamūrjaṁ sukṣitiṁ viśvamābhāḥ //12 //*

## ५५७. वरुणः (Varuṇaḥ)

१. अग्न्यादयो मन्त्रोक्ताः (Agnyādayo Mantroktāḥ) - य. (Yv.) १०.५

सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयात्। अग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा पूष्णे स्वाहा बृहस्पतये स्वाहेन्द्राय स्वाहा घोषाय स्वाहा श्लोकाय स्वाहांशाय स्वाहा भगाय स्वाहार्य्यम्णे स्वाहा ॥५॥
*somasya tviṣirasi taveva me tviṣirbhūyāt / agnaye svāhā somāya svāhā savitre svāhā sarasvatyai svāhā pūṣṇe svāhā bṛhaspataye svāhendrāya svāhā ghoṣāya svāhā ślokāya svāhāṁśāya svāhā bhagāya svāhāryyamṇe svāhā //5 //*

२. अपांपतिः (Apāṁpatiḥ) - य. (Yv.) १०.३

अर्थेत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहार्थेत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तौजस्वती स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहौजस्वती स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तापः परिवाहिणी स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहापः परिवाहिणी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तापां पतिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहाऽपां पतिरसि राष्ट्रदा राष्ट्रममुष्मै देह्यपां गर्भोऽसि राष्ट्रदा राष्ट्रं मे देहि स्वाहाऽपां गर्भोऽसि राष्ट्रदा राष्ट्रममुष्मै देहि ॥३॥
*artheta stha rāṣṭradā rāṣṭraṁ me datta svāhārtheta stha rāṣṭradā rāṣṭramamuṣmai dattaujasvatī stha rāṣṭradā rāṣṭraṁ me datta svāhaujasvatī stha rāṣṭradā rāṣṭramamuṣmai dattāpaḥ parivāhiṇī stha rāṣṭradā rāṣṭraṁ me datta svāhāpaḥ parivāhiṇī stha rāṣṭradā rāṣṭramamuṣmai dattāpāṁ patirasi rāṣṭradā rāṣṭraṁ me dehi svāhā'pāṁ patirasi rāṣṭradā rāṣṭramamuṣmai dehyapāṁ garbho'si rāṣṭradā rāṣṭraṁ me dehi svāhā'pāṁ garbho'si rāṣṭradā rāṣṭramamuṣmai dehi //3 //*

३. आपः (Āpaḥ) - य. (Yv.) १०.१; ६

य. (Yv.) १०.१

अपो देवा मधुमतीरगृभ्णन्नूर्जस्वती राजस्व श्चितानाः ।
याभिर्मित्रावरुणावभ्यषिंचन् याभिरिन्द्रमनयन्नत्यरातीः ॥१॥
*apo devā madhumatīragṛbhṇannūrjasvatī rājasva śchitānāḥ /*
*yābhirmitrāvaruṇāvabhyaṣiṁchan yābhirindramanayannatyarātīḥ //1 //*

य. (Yv.) १०.६

पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । अनिभृष्टमसि वाचो बन्धुस्त षोजाः सोमस्य दात्रमसि स्वहा राजस्वः ॥६॥
*pavitre stho vaiṣṇavyau saviturvaḥ prasava'utpunāmyachchhidreṇa pavitreṇa sūryasya raśmibhiḥ / anibhṛṣṭamasi vācho bandhusta ṣojāḥ somasya dātramasi svahā rājasvaḥ //6 //*

४. ओषधिः (Oṣadhiḥ) - य. (Yv.) १२.९९

सहस्व मेऽरातीः सहस्व पृतना यतः। सहस्व संर्व पाप्मानं सहमानास्योषधे ॥९९॥
*sahasva me'arātīḥ sahasva pṛtanā yataḥ / sahasva saṁrva pāpmānaṁ sahamānāsyoṣadhe //99 //*

५. क्षेत्रपतिः (Kṣetrapatiḥ) - य. (Yv.) १२.१७

शिवो भूत्वा मह्यमग्नेऽअथो सीद शिवस्त्वम्। शिवाः कृतवा दिशः सर्वा स्वं योनिमिहासदः ॥१७॥
*śivo bhūtvā mahyamagne'atho sīda śivastvam / śivāḥ kṛtavā diśaḥ sarvā svaṁ yonimihāsadaḥ //17 //*

६. परमात्मा (Paramātmā) - य. (Yv.) १०.१५

सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयात्। मृत्योः पाह्योजोऽसि सहोऽस्यमृतमसि ॥१५॥

*somasya tviṣirasi taveva me tviṣirbhūyāt । mṛtyoḥ pāhyojo'si saho'syamṛtamasi ॥15 ॥*

७. प्रजापतिः (Prajāpatiḥ) - य. (Yv.) १०.९

आविर्मर्य्याऽआवित्तोऽअग्निर्गृहपतिरावित्तऽइन्द्रो वृद्धश्रवाऽआवित्तौ मित्रावरुणौ धृतव्रतावावित्तः पूषा विश्ववेदाऽआवित्ते द्यावापृथिवी विश्वशम्भुवावावित्तादितिरुरुशर्म्मा ॥९ ॥

*āvirmaryyā'āvitto'agnirgṛhapatirāvitta'indro vṛddhaśravā'āvittau mitrāvaruṇau dhṛtavratāvāvittaḥ pūṣā viśvavedā'āvitte dyāvāpṛthivī viśvaśambhuvāvāvittāditiruruśarmmā ॥9 ॥*

८. भिषग्वराः (Bhiṣagvarāḥ) - य. (Yv.) १२.९७

नाशयित्री बलासस्यार्शसऽउपचितामसि। अथो शतस्य यक्ष्माणां पाकारोरसि नाशनी ॥९७ ॥

*nāśayitrī balāsasyārśasa'upachitāmasi । atho śatasya yakṣamāṇāṁ pākārorasi nāśanī ॥97 ॥*

९. भिषजः (Bhiṣajaḥ) - य. (Yv.) १२.९४; १०१

य. (Yv.) १२.९४

याश्चेदमुपश्रृण्वन्ति याश्च दूरं परागताः। सर्वाः संगत्य वीरुधेऽस्यै संदत्त वीर्य्यम् ॥९४ ॥

*yāśchedamupaśṛṇvanti yāścha dūraṁ parāgatāḥ । sarvāḥ saṁgatya vīrudhe'syai saṁdatta vīryyam ॥94 ॥*

य. (Yv.) १२.१०१

त्वमुत्तमास्योषधे तव वृक्षाऽउपस्तयः। उपस्तिरस्तु सोऽस्माकं योऽअस्माँ२ऽअभिदासति ॥१०१ ॥

*tvamuttamāsyoṣadhe tava vṛkṣā'upastayaḥ ।*
*upastirastu so'smākaṁ yo'asmāँ2'abhidāsati ॥101 ॥*

१०. मित्रावरुणौ (Mitrāvaruṇau) - य. (Yv.) १०.१६

हिरण्यरूपाऽउषसो विरोकऽउभाविन्द्राऽउदिथः सूर्य्यश्च।
अरोहतं वरुण मित्र गर्त्तं ततश्चक्षाथामदितिं दितिं च मित्रोऽसि वरुणोऽसि ॥१६ ॥

*hiraṇyarūpā'uṣaso viroka'ubhāvindrā'udithaḥ sūryyaścha । arohataṁ varuṇa mitra garttaṁ tataśchakṣāthāmaditiṁ ditiṁ cha mitro'si varuṇo'si ॥16 ॥*

११. यजमानः (Yajamānaḥ) - य. (Yv.) १०.८; १०-१४

य. (Yv.) १०.८

क्षत्रस्योल्वमसि क्षत्रस्य जराय्वसि क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसीन्द्रस्य वार्त्रध्नमसि मित्रस्यासि वरुणस्यासि त्वयायं वृत्र वधेत्। दृवासि रुजासि क्षुमासि। पातैनं प्रांचं पातैनं प्रत्यंचं पातैनं तिर्यंचं दिग्भ्यः पात ॥८ ॥

*kṣatrasyolvamasi kṣatrasya jarāyvasi kṣatrasya yonirasi kṣatrasya nābhirasīndrasya vārtradhnamasi mitrasyāsi varuṇasyāsi tvayāyaṁ vṛtra vadhet । dṛvāsi rujāsi kṣumāsi । pātainaṁ prāṁchaṁ pātainaṁ pratyaṁchaṁ pātainaṁ tiryaṁchaṁ digbhyaḥ pāta ॥8 ॥*

य. (Yv.) १०.१०-१४

अवेष्टा दन्दशूक्राः प्राचीमा रोह गायत्री त्वाऽवतु रथन्तरं साम त्रिवृत्स्तोमो वसन्त ऋतुर्ब्रह्म द्रविणम् ॥१० ॥
दक्षिणामा रोह त्रिष्टुप् त्वाऽवतु बृहत्साम पंचदश स्तोमो ग्रीष्म ऋतुः क्षत्रं द्रविणम् ॥११ ॥
प्रतीचीमा रोह जगती त्वाऽवतु वैरूपं साम सप्तदा स्तोमो वर्षा ऋतुर्विड् द्रविणम् ॥१२ ॥
उदीचीमा रोहानुष्टुप् तवाऽवतु वैराजं सामैकविंश स्तोमः शरद्दतृः फलं द्रविणम् ॥१३ ॥
ऊर्ध्वामा रोह पङ्क्तिस्त्वाऽवतु शाक्वररैवते सामनी त्रिणवत्रयस्त्रिंशौ स्तोमौ हेमन्तशिशिरावृतू वर्चो द्रविणं प्रत्यस्तं नमुचेः शिरः ॥१४ ॥

*aveṣṭā dandaśūkrāḥ prāchīmā roha gāyatrī tvā'vatu rathantaraṁ sāma trivṛtstomo vasanta ṛturbrahma draviṇam ॥10 ॥*
*dakṣiṇāmā roha triṣṭup tvā'vatu bṛhatsāma paṁchadaśa stomo grīṣma ṛtuḥ kṣatraṁ draviṇam ॥11 ॥*
*pratīchīmā roha jagatī tvā'vatu vairūpaṁ sāma saptadā stomo varṣā ṛturviḍ draviṇam ॥12 ॥*
*udīchīmā rohānuṣṭup tavā'vatu vairājaṁ sāmaikaviṁśa stomaḥ śaradṛtṛḥ phalaṁ draviṇam ॥13 ॥*
*ūrdhvāmā roha paṅktistvā'vatu śākvararaivate sāmanī triṇavatrayastriṁśau stomau hemantaśiśirāvṛtū varcho draviṇaṁ pratyastaṁ namucheḥ śiraḥ ॥14 ॥*

१२. वरुणः (Varuṇaḥ) - य. (Yv.) १०.७

सधमादो द्युम्निनीरापऽएताऽअनाधृष्टाऽअपस्यो वसानाः ।
पस्त्यासु चक्रे वरुणः सधस्थमपां शिशुर्मातृतमास्वन्तः ॥७॥
sadhamādo dyumninīrāpa'etā'anādhṛṣṭā'apasyo vasānāḥ ।
pastyāsu chakre varuṇaḥ sadhasthamapāṁ śiśurmātṛtamāsvantaḥ ॥7॥

१३. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.) ९.३५-३६

एष ते निर्ऋते भागस्तं जुषस्व स्वाहाऽग्निनेत्रेभ्यो देवेभ्यः पुरःसद्भ्यः स्वाहा यमनेत्रेभ्यो देवेभ्यो दक्षिणासद्भ्यः स्वाहा विश्वदेवनेत्रेभ्यो देवेभ्यः पश्चात्सद्भ्यः स्वाहा मित्रावरुणनेत्रेभ्यो वा मरुन्नेत्रेभ्यो वा देवेभ्यऽउत्तरासद्भ्यः स्वाहा सोमनेत्रेभ्यो देवेभ्यऽउपरिसद्भ्यो दुवस्वद्भ्यः स्वाहा ॥३५॥
ये देवा अग्निनेत्राः पुरःसदस्तेभ्यः स्वाहा ये देवा यमनेत्रा दक्षिणासदस्तेभ्यः स्वाहा ये देवा विश्वदेवनेत्राः पश्चात्सदस्तेभ्यः स्वाहा ये देवा मित्रावरुणनेत्रा वा मरुन्नेत्रा वोत्तरासदस्तेभ्यः स्वाहा ये देवाः सोमनेत्रा उपरिसदो दुवस्वन्तस्तेभ्यः स्वाहा ॥३६॥
*eṣa te nirṛte bhāgastaṁ juṣasva svāhā'gninetrebhyo devebhyaḥ puraḥsadbhyaḥ svāhā yamanetrebhyo devebhyo dakṣiṇāsadbhyaḥ svāhā viśvadevanetrebhyo devebhyaḥ paśchātsadbhyaḥ svāhā mitrāvaruṇanetrebhyo vā marunnetrebhyo vā devebhya'uttarāsadbhyaḥ svāhā somanetrebhyo devebhya'uparisadbhyo duvasvadbhyaḥ svāhā ॥35॥*
*ye devā agninetrāḥ puraḥsadastebhyaḥ svāhā ye devā yamanetrā dakṣiṇāsadastebhyaḥ svāhā ye devā viśvavedevanetrāḥ paśchātsadastebhyaḥ svāhā ye devā mitrāvaruṇanetrā vā marunnetrā vottarāsadastebhyaḥ svāhā ye devāḥ somanetrā uparisado duvasvantastebhyaḥ svāhā ॥36॥*

१४. वृषा (Vṛṣā) - य. (Yv.) १०.२

वृष्णऽऊर्मिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृष्णऽऊर्मिरसि राष्ट्रदा राष्ट्रममुष्मै देहि वृषसेनोऽसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृषसेनोऽसि राष्ट्रदा राष्ट्रममुष्मै देहि ॥२॥
*vṛṣṇa'ūrmirasi rāṣṭradā rāṣṭraṁ me dehi svāhā vṛṣṇa'ūrmirasi rāṣṭradā rāṣṭramamuṣmai dehi vṛṣaseno'si rāṣṭradā rāṣṭraṁ me dehi svāhā vṛṣaseno'si rāṣṭradā rāṣṭramamuṣmai dehi ॥2॥*

१५. वैद्याः (Vaidyāḥ) - य. (Yv.) १२.९१-९३; ९५; ९६; ९८; १००

य. (Yv.) १२.९१-९३

अवपतन्तीरवदन्दिवऽओषधयस्परि। यं जीवमश्नवामहै न स रिष्याति पूरुषः ॥९१॥
याऽओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः। तासामसि त्वमुत्तमारं कामाय शं हृदे ॥९२॥
याऽओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु। बृहस्पतिप्रसूताऽअस्यै संदत्त वीर्य्यम् ॥९३॥
*avapatantīravadandiva'oṣadhayaspari । yaṁ jīvamaśnavāmahai na sa riṣyāti pūruṣaḥ ॥91॥*
*yā'oṣadhīḥ somarājñīrbahvīḥ śatavichakṣaṇāḥ ।*
*tāsāmasi tvamuttamāraṁ kāmāya śaṁ hṛde ॥92॥*
*yā'oṣadhīḥ somarājñīrviṣṭhitāḥ pṛthivīmanu ।*
*bṛhaspatiprasūtā'asyai saṁdatta vīryyam ॥93॥*

य. (Yv.) १२.९५-९६

मा वो रिषत् खनिता यस्मै चाहं खनामि वः। द्विपाच्चतुष्पादस्माकं सर्वमस्त्वनातुरम् ॥९५॥
ओषधयः समवदन्त सोमेन सह राज्ञा। यस्मै कृणोति ब्राह्मणस्तं राजन् पारयामसि ॥९६॥
*mā vo riṣat khanitā yasmai chāhaṁ khanāmi vaḥ ।*
*dvipāchchatuṣpādasmākaṁ sarvamastvanāturam ॥95॥*
*oṣadhayaḥ samavadanta somena saha rājñā ।*
*yasmai kṛṇoti brāhmaṇastaṁ rājan pārayāmasi ॥96॥*

य. (Yv.) १२.९८

त्वां गन्धर्वाऽअखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः। त्वामोषधे सोमो राजा विद्वान् यक्ष्मादमुच्यत।९८॥
*tvāṁ gandharvā'akhanaṁ̐stvāmindrastvāṁ bṛhaspatiḥ ।*
*tvāmoṣadhe somo rājā vidvān yakṣamādamuchyata ।98॥*

य. (Yv.) १२.१००

दीर्घायुस्तऽओषधे खनिता यस्मै च त्वा खनाम्यहम् ।
अथो त्वं दीर्घायुर्भूतवा शतवल्शा वि रोहतात् ॥१०० ॥
*dīrghāyusta'oṣadhe khanitā yasmai cha tvā khanāmyaham /*
*atho tvaṁ dīrghāyurbhūtavā śatavalśā vi rohatāt //100 //*

१६. सूर्य्यादयो मन्त्रोक्ताः (Sūryyādayo Mantroktāḥ) - य. (Yv.) १०.४

सूर्य्यत्वचस स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा सूर्य्यत्वचस स्थ राष्ट्रदा राष्ट्रमुष्मै दत्त सूर्यवर्चस स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा सूर्यवर्चस स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त मान्दा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा मान्दा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त व्रजक्षित स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा व्रजक्षित स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त वाशा स्थ राष्ट्रदा राष्ट्रं मं दत्त स्वाहा वाशा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त शविष्ठा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा शविष्ठा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त शक्वरी स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा शक्वरी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त जनभृत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा जनभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त विश्वभृत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा विश्वभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तापः स्वराज स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त। मधुमतीर्मधुमतीभिः पृच्यन्तां महि क्षत्रं क्षत्रियाय वन्वानाऽअनाधृष्टाः सीदत सहौजसो महि क्षत्रं क्षत्रियाय दधतीः ॥४ ॥

*sūryyatvachasa stha rāṣṭradā rāṣṭraṁ me datta svāhā sūryyatvachasa stha rāṣṭradā rāṣṭramuṣmai datta sūryavarchasa stha rāṣṭradā rāṣṭraṁ me datta svāhā sūryavarchasa stha rāṣṭradā rāṣṭramamuṣmai datta māndā stha rāṣṭradā rāṣṭraṁ me datta svāhā māndā stha rāṣṭradā rāṣṭramamuṣmai datta vrajakṣita stha rāṣṭradā rāṣṭraṁ me datta svāhā vrajakṣita stha rāṣṭradā rāṣṭramamuṣmai datta vāśā stha rāṣṭradā rāṣṭraṁ maṁ datta svāhā vāśā stha rāṣṭradā rāṣṭramamuṣmai datta śaviṣṭhā stha rāṣṭradā rāṣṭraṁ me datta svāhā śaviṣṭhā stha rāṣṭradā rāṣṭramamuṣmai datta śakvarī stha rāṣṭradā rāṣṭraṁ me datta svāhā śakvarī stha rāṣṭradā rāṣṭramamuṣmai datta janabhṛta stha rāṣṭradā rāṣṭraṁ me datta svāhā janabhṛta stha rāṣṭradā rāṣṭramamuṣmai datta viśvabhṛta stha rāṣṭradā rāṣṭraṁ me datta svāhā viśvabhṛta stha rāṣṭradā rāṣṭramamuṣmai dattāpaḥ svarāja stha rāṣṭradā rāṣṭramamuṣmai datta / madhumatīrmadhumatībhiḥ pṛchyantāṁ mahi kṣatraṁ kṣatriyāya vanvānā'anādhṛṣṭāḥ sīdata sahaujaso mahi kṣatraṁ kṣatriyāya dadhatīḥ //4 //*

## ५५८. वव्रिर् आत्रेयः (Vavrir Ātreyaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ५.१९.१-५

अभ्यवस्थाः प्र जायन्ते प्र वव्रेर्वव्रिश्चिकेत। उपस्थे मातुर्वि चष्टे ॥१ ॥
जुहुरे वि चितयन्तोऽनिमिषं नृम्णं पान्ति। आ दृळहां पुरं विविशुः ॥२ ॥
आ श्वैत्रेयस्य जन्तवो द्युमद्वर्धन्त कृष्टयः। निष्कग्रीवो बृहदुक्थ एना मध्वा न वाजयुः ॥३ ॥
प्रियं दुग्धं न काम्यमजामि जाम्योः सचा। घर्मो न वाजजठरोऽदब्धः शश्वतो दभः ॥४ ॥
क्रीळन्नो रश्म आ भुवः सं भस्मना वायुना वेविदानः ।
ता अस्य सन्धृषजो न तिग्माः सुसंशिता वक्ष्यो वक्षणेस्थाः ॥५ ॥
*abhyavasthāḥ pra jāyante pra vavrervavriśchiketa / upasthe māturvi chaṣṭe //1 //*
*juhure vi chitayanto'nimiṣaṁ nṛmṇaṁ pānti / ā dṛḷahāṁ puraṁ viviśuḥ //2 //*
*ā śvaitreyasya jantavo dyumadvardhanta kṛṣṭayaḥ /*
*niṣkagrīvo bṛhaduktha enā madhvā na vājayuḥ //3 //*
*priyaṁ dugdhaṁ na kāmyamajāmi jāmyoḥ sachā /*
*gharmo na vājajaṭharo'dabdhaḥ śaśvato dabhaḥ //4 //*
*krīḷanno raśma ā bhuvaḥ saṁ bhasmanā vāyunā vevidānaḥ /*
*tā asya sandhṛṣajo na tigmāḥ susaṁśitā vakṣayo vakṣaṇesthāḥ //5 //*

## ५५९. वशोऽश्व्यः (Vaśo'śvyaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.४६.१-२०; २९-३१; ३३

ऋ. (Rv.) ८.४६.१-२०

त्वावतः पुरूवसो वयमिन्द्र प्रणेतः। स्मसि स्थातर्हरीणाम् ॥१ ॥
त्वां हि सत्यमद्रिवो विद्म दातारमिषाम्। विद्म दातारं रयीणाम् ॥२ ॥
आ यस्य ते महिमानं शतमूते शतक्रतो। गीर्भिर्गृणन्ति कारवः ॥३ ॥

सुनीथो घा स मर्त्यो यं मरुतो यमर्यमा। मित्रः पान्त्यद्रुहः ॥४॥
दधानो गोमदश्ववत्सुवीर्यमादित्यजूत एधते। सदा राया पुरुस्पृहा ॥५॥
तमिन्द्रं दानमीमहे शवसानमभीर्वम्। ईशानं राय ईमहे ॥६॥
तस्मिन्हि सन्त्यूतयो विश्वा अभीरवः सचा। तमा वहन्तु सप्तयः पुरूवसुं मदाय हरयः सुतम्।७।
यस्ते मदो वरेण्यो य इन्द्र वृत्रहन्तमः। य आददिः स्व१र्नृभिर्यः पृतनासु दुष्टरः ॥८॥
यो दुष्टरो विश्ववार श्रवाय्यो वाजेष्वस्ति तरुता ।
स नः शविष्ठ सवना वसो गहि गमेम गोमति व्रजे ॥९॥
गव्यो षु णो यथा पुराश्वयोत रथया। वरिवस्य महामह ॥१०॥
नहि ते शूर राधसोऽन्तं विन्दामि सत्रा।
दशस्या नो मघवन्नू चिदद्रिवो धियो वाजेभिराविथ ॥११॥
य ऋष्वः श्रावयत्सखा विश्वेत्स वेद जनिमा पुरुष्टुतः ।
तं विश्वे मानुषा युगेन्द्रं हवन्ते तविषं यतस्रुचः ॥१२॥
स नो वाजेष्वविता पुरूवसुः पुरः स्थाता। मघवा वृत्रहा भुवत् ॥१३॥
अभि वो वीरमन्धसो मदेषु गाय गिरा महा विचेतसम्।
इन्द्रं नाम श्रुत्यं शाकिनं वचो यथा ॥१४॥
ददी रेक्णस्तन्वे ददिर्वसु ददिर्वाजेषु पुरुहूत वाजिनम्। नूनमथ ॥१५॥
विश्वेषामिरज्यन्तं वसूनां सासह्वांसं चिदस्य वर्पसः। कृपयतो नूनमत्यथ ॥१६॥
महः सु वो अरमिषे स्तवामहे मीळ्हुषे अरंगमाय जग्मये ।
यज्ञेभिर्गीर्भिर्विश्वमनुषां मरुतामियक्षसि गाये त्वा नमसा गिरा ॥१७॥
ये पातयन्ते अज्मभिर्गिरीणां स्नुभिरेषाम्। यज्ञं महिष्वणीनां सुम्नं तुविष्वणीनां प्राध्वरे ॥१८॥
प्रभंगं दुर्मतीनामिन्द्र शविष्ठा भर। रयिमस्मभ्यं युज्यं चोदयन्मते ज्येष्ठं चोदयन्मते ॥१९॥
सनितः सुसनितरुग्र चित्र चेतिष्ठ सूनृत।
प्रासहा सम्राट् सहुरिं सहन्तं भुजयुं वाजेषु पूर्व्यम् ॥२०॥

*tvāvataḥ purūvaso vayamindra praṇetaḥ | smasi sthātarharīṇām ||1||*
*tvāṁ hi satyamadrivo vidma dātārabhiṣām | vidma dātāraṁ rayīṇām ||2||*
*ā yasya te mahimānaṁ śatamūte śatakrato | gīrbhirgṛṇanti kāravaḥ ||3||*
*sunītho ghā sa martyo yaṁ maruto yamaryamā | mitraḥ pāntyadruhaḥ ||4||*
*dadhāno gomadaśvavatsuvīryamādityajūta edhate | sadā rāyā puruspṛhā ||5||*
*tamindraṁ dānamīmahe śavasānamabhīrvam | īśānaṁ rāya īmahe ||6||*
*tasminhi santyūtayo viśvā abhīravaḥ sachā |*
*tamā vahantu saptayaḥ purūvasuṁ madāya harayaḥ sutam |7|*
*yaste mado vareṇyo ya indra vṛtrahantamaḥ |*
*ya ādadiḥ sva1rnṛbhiryaḥ pṛtanāsu duṣṭaraḥ ||8||*
*yo duṣṭaro viśvavāra śravāyyo vājeṣvasti tarutā |*
*sa naḥ śaviṣṭha savanā vaso gahi gamema gomati vraje ||9||*
*gavyo ṣu ṇo yathā purāśvayota rathayā | varivasya mahāmaha ||10||*
*nahi te śūra rādhaso'ntaṁ vindāmi satrā |*
*daśasyā no maghavannū chidadrivo dhiyo vājebhirāvitha ||11||*
*ya ṛṣvaḥ śrāvayatsakhā viśvetsa veda janimā puruṣṭutaḥ |*
*taṁ viśve mānuṣā yugendraṁ havante taviṣaṁ yatasruchaḥ ||12||*
*sa no vājeṣvavitā purūvasuḥ puraḥ sthātā | maghavā vṛtrahā bhuvat ||13||*
*abhi vo vīramandhaso madeṣu gāya girā mahā vichetasam |*
*indraṁ nāma śrutyaṁ śākinaṁ vacho yathā ||14||*
*dadī rekṇastanve dadirvasu dadirvājeṣu puruhūta vājinam | nūnamatha ||15||*
*viśveṣāmirajyantaṁ vasūnāṁ sāsahvāṁsaṁ chidasya varpasaḥ |*
*kṛpayato nūnamatyatha ||16||*
*mahaḥ su vo aramiṣe stavāmahe mīḻahuṣe araṁgamāya jagmaye |*
*yajñebhirgīrbhirviśvamanuṣāṁ marutāmiyakṣasi gāye tvā namasā girā ||17||*
*ye pātayante ajmabhirgirīṇāṁ snubhireṣām |*
*yajñaṁ mahiṣvaṇīnāṁ sumnaṁ tuviṣvaṇīnāṁ prādhvare ||18||*
*prabhaṁgaṁ durmatīnāmindra śaviṣṭhā bhara |*

*rayimasmabhyaṁ yujyaṁ chodayanmate jyeṣṭhaṁ chodayanmate ॥19॥*
*sanitaḥ susanitarugra chitra chetiṣṭha sūnṛta ।*
*prāsahā samrāṭ sahuriṁ sahantaṁ bhujayuṁ vājeṣu pūrvyam ॥20॥*

ऋ. (Rv.) ८.४६.२९-३१

अध प्रियमिषिराय षष्टिं सहस्रासनम्। अश्वानामिन्न वृषणाम् ॥२९॥
गावो न यूथमुप यन्ति वध्रय उप मा यन्ति वध्रयः ॥३०॥
अध यच्चारथे गणे शतमुष्ट्राँ अचिक्रदत्। अध श्वित्नेषु विंशतिं शता ॥३१॥
*adha priyamiṣirāya ṣaṣṭiṁ shasrāsanam । aśvānāminna vṛṣaṇām ॥29॥*
*gāvo na yūthamupa yanti vadhraya upa mā yanti vadhrayaḥ ॥30॥*
*adha yachchārathe gaṇe śatamuṣṭrām̐ achikradat । adha śvitneṣu viṁśatiṁ śat ॥31॥*

ऋ. (Rv.) ८.४६.३३

अध स्या योषणा मही प्रतीची वशमश्व्यम्। अधिरुक्मा वि नीयते ॥३३॥
*adha syā yoṣaṇā mahī pratīchī vaśamaśvyam । adhirukmā vi nīyate ॥33॥*

२. पृथुश्रवसः कानीनस्य दानस्तुतिः (Pṛthuśravasaḥ Kānīnasya Dānastutiḥ) - ऋ. (Rv.) ८.४६.२१-२४

आ स एतु य ईवदाँ अदेवः पूर्तमाददे ।
यथा चिद्वशो अश्व्यः पृथुश्रवसि कानीतेऽस्या व्युष्याददे ॥२१॥
षष्टिं सहस्राश्व्यस्यायुतासनमुष्ट्राणां विंशतिं शता ।
दश श्यावीनां शता दश त्र्यरुषीणां दश गवां सहस्रा ॥२२॥
दश श्यावा ऋधद्रयो वीतवारास आशवः ।
मथ्रा नेमिं नि वावृतुः ॥२३॥
दानासः पृथुश्रवसः कानीतस्य सुराधसः ।
रथं हिरण्ययं ददन् मंहिष्ठः सूरिरभूद्वर्षिष्ठमकृत श्रवः ॥२४॥
*ā sa etu ya īvadām̐ adevaḥ pūrtamādade ।*
*yathā chidvaśo aśvyaḥ pṛthuśravasi kānīte'syā vyuṣyādade ॥21॥*
*ṣaṣṭiṁ sahasrāśvyasyāyutāsanamuṣṭrāṇāṁ viṁśatiṁ śatā ।*
*daśa śyāvīnāṁ śatā daśa trayaruṣīṇāṁ daśa gavāṁ sahasrā ॥22॥*
*daśa śyāvā ṛdhadrayo vītavārāsa āśavaḥ ।*
*mathrā nemiṁ ni vāvṛtuḥ ॥23॥*
*dānāsaḥ pṛthuśravasaḥ kānītasya surādhasaḥ ।*
*rathaṁ hiraṇyayaṁ dadan maṁhiṣṭhaḥ sūrirabhūdvarṣiṣṭhamakṛta śravaḥ ॥24॥*

३. वायुः (Vāyuḥ) - ऋ. (Rv.) ८.४६.२५-२८; ३२

ऋ. (Rv.) ८.४६.२५-२८

आ नो वायो महे तने याहि मखाय पाजसे ।
वयं हि ते चकृमा भूरि दावने सद्यश्चिन्महि दावने ॥२५॥
यो अश्वेभिर्वहते वस्त उस्रास्त्रिः सप्त सप्तीनाम् ।
एभिः सोमेभिः सोमसुद्भिः सोमपा दानाय शुक्रपूतपाः ॥२६॥
यो म इमं चिदुत्मनामन्दच्चित्रं दावने ।
अरट्वे अक्षे नहुषे सुकृत्वनि सुकृत्तराय सुक्रतुः ॥२७॥
उचथ्ये३ वपुर्षि यः स्वराळुत वायो घृतस्नाः ।
अश्वेषितं रजेषितं शुनेषितं प्राज्म तदिदं नु तत् ॥२८॥
शतं दासे बल्बूथे विप्रस्तरुक्ष आ ददे ।
ते ते वायविमे जना मदन्तीन्द्रगोपा मदन्ति देवगोपाः ॥३२॥
*ā no vāyo mahe tane yāhi makhāya pājase ।*
*vayaṁ hi te chakṛmā bhūri dāvane sadyaśchinmahi dāvane ॥25॥*
*yo aśvebhirvahate vasta usrāstriḥ sapta saptīnām ।*
*ebhiḥ somebhiḥ somasudbhiḥ somapā dānāya śukrapūtapāḥ ॥26॥*
*yo ma imaṁ chidutmanāmandachchitraṁ dāvane ।*
*araṭve akṣe nahuṣe sukṛtvani sukṛttarāya sukratuḥ ॥27॥*

*uchathye3 vapurṣi yaḥ svarāḻuta vāyo ghṛtasnāḥ /*
*aśveṣitaṁ rajeṣitaṁ śuneṣitaṁ prājma tadidaṁ nu tat //28 //*
*śataṁ dāse balbūthe viprastarukṣa ā dade /*
*te te vāyavime janā madantīndragopā madanti devagopāḥ //32 //*

**५६०. वशः अश्व्यः (ऋसर्व. ८.४६.१०; ८.४६.१; ८.४६.४; ८.४६.१४); वत्सः काण्वः (साग्री. सास्वा.); वंशः (सार्षेदी.) (Vaśaḥ Aśvyaḥ [Rss. 8.46.10; 8.46.1; 8.46.4; 8.46.14]; Vatsaḥ Kāṇvaḥ [Ssb. Sas.]; Vaṁśaḥ [Sad.])**

१. इन्द्रः (Indraḥ) - सा. (Sv.) १८६; १९३; २०६; २६५

सा. (Sv.) १८६

गव्यो षु णो यथा पुराश्वयोत रथया। वरिवस्या महोनाम् ॥२॥
*gavyo ṣu ṇo yathā purāśvayota rathayā / varivasyā mahonām //2 //*

सा. (Sv.) १९३

त्वावतः पुरूवसो वयमिन्द्र प्रणेतः। स्मसि स्थार्तर्हरीणाम् ॥९॥
*tvāvataḥ purūvaso vayamindra praṇetaḥ / smasi sthārtarharīṇām //9 //*

सा. (Sv.) २०६

सुनीथो घा स मर्त्यो यं मरुतो यमर्यमा। मित्रास्पान्त्यद्रुहः ॥३॥
*sunītho ghā sa martyo yaṁ maruto yamaryamā / mitrāspāntyadruhaḥ //3 //*

सा. (Sv.) २६५

अभि वो वीरमन्धसो मदेषु गाय गिरा महा विचेतसम्। इन्द्रं नाम श्रुत्यं शाकिनं वचो यथा॥३॥
*abhi vo vīramandhaso madeṣu gāya girā mahā vichetasam / indraṁ nāma śrutyaṁ śākinaṁ vacho yathā //3 //*

**५६१. वसिष्ठः (Vasiṣṭhaḥ)**

१. अग्निः (Agniḥ) - ऋ. (Rv.) ७.१.१-२५; ७.३.१-१०; ७.४.१-१०; ७.८.१-७; ७.९.१-६; ७.१०.१-५; ७.११.१-५; ७.१२.१-३; ७.१४.१-३; ७.१५.१-१५; ७.१६.१-१२; ७.१७.१-७; ७.५०.२; ७.१०४.१०; १४; य. (Yv.) १५.६२; १७.७६; २१.९; अ. (Av.) ३.२०.१-२; ५; ३.२१.१-७

ऋ. (Rv.) ७.१.१-२५

अग्निं नरो दीधितिभिररण्योर्हस्तच्युती जनयन्त प्रशस्तम्। दूरेदृशं गृहपतिमथर्युम् ॥१॥
तमग्निमस्ते वसवो न्यृण्वन्त्सुप्रतिचक्षमवसे कुतश्चित्। दक्षाय्यो यो दम आस नित्यः ॥२॥
प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ। त्वां शश्वन्त उप यन्ति वाजाः ॥३॥
प्र ते अग्नयोऽग्निभ्यो वरं निः सुवीरासः शोशुचन्त द्युमन्तः। यत्रा नरः समासते सुजाताः ॥४॥
दा नो अग्ने धिया रयिं सुवीरं स्वपत्यं सहस्य प्रशस्तम्। न यं यावा तरति यातुमावान् ॥५॥
उप यमेति युवतिः सुदक्षं दोषा वस्तोर्हविष्मती घृताची। उप स्वैनमरमतिर्वसूयुः ॥६॥
विश्वा अग्नेऽप दहारातीर्येभिस्तपोभिरदहो जरूथम्। प्र निस्वरं चातयस्वामीवाम् ॥७॥
आ यस्ते अग्न इधते अनीकं वसिष्ठ शुक्र दीदिवः पावक। उतो न ऐभिः स्तवथैरिह स्याः।८॥
वि ये ते अग्ने भेजिरे अनीकं मर्ता नरः पित्र्यासः पुरुत्रा। उतो न एभिः सुमना इह स्याः॥९॥
इमे नरो वृत्रहत्येषु शूरा विश्वा अदेवीरभि सन्तु मायाः। ये मे धियं पनयन्त प्रशस्ताम् ॥१०॥
मा शूने अग्ने नि षदाम नृणां माशेषसोऽवीरता परि त्वा। प्रजावतीषु दुर्यासु दुर्य ॥११॥
यमश्वी नित्यमुपयाति यज्ञं प्रजावन्तं स्वपत्यं क्षयं नः। स्वजन्मना शेषसा वावृधानम् ॥१२॥
पाहि नो अग्ने रक्षसो अजुष्टात् पाहि धूर्तेररुषो अघायोः। त्वा युजा पृतनायूँरभि ष्याम्॥१३॥
सेदग्निरग्नीँरत्यस्त्वन्यान्यत्र वाजी तनयो वीळुपाणिः। सहस्रपाथा अक्षरा समेति ॥१४॥
सेदग्निर्यो वनुष्यतो निपाति समेद्धारमंहस उरुष्यात्। सुजातासः परि चरन्ति वीराः ॥१५॥
अयं सो अग्निराहुतः पुरुत्रा यमीशानः समिदिन्धे हविष्मान। परि यमेत्यध्वरेषु होता ॥१६॥
त्वे अग्न आहवनानि भूरीशानास आ जुहुयाम नित्या। उभा कृण्वन्तो वहतू मियेधे ॥१७॥
इमो अग्ने वीततमानि हव्याजस्रो वक्षि देवतातिमच्छ। प्रति न ईं सुरभीणि व्यन्तु ॥१८॥

मा नो अग्नेऽवीरते परा दा दुर्वाससेऽमतये मा नो अस्यै ।
मा नः क्षुधे मा रक्षस ऋतावो मा नो दमे मा वन आ जुहूर्थाः ॥१९॥
नू मे ब्रह्माण्यग्न उच्छशाधि त्वं देव मघवद्भ्यः सुषूदः ।
रातौ स्यामोभयास आ ते यूयं पात स्वस्तिभिः सदा नः ॥२०॥
त्वमग्ने सुहवो रण्वसंदृक् सुदीति सूनो सहसो दिदीहि ।
मा त्वे सचा तनये नित्य आ धङ्मा वीरो अस्मन्नर्यो वि दासीत् ॥२१॥
मा नो अग्ने दुर्भृतये सचैषु देवेद्धेष्वग्निषु प्र वोचः ।
मा ते अस्मान्दुर्मतयो भृमाच्चिद्देवस्य सूनो सहसो नशन्त ॥२२॥
स मर्तो अग्ने स्वनीक रेवानमर्त्ये य आजुहोति हव्यम् ।
स देवता वसुवनिं दधाति यं सुरिरर्थी पुच्छमान एति ॥२३॥
महो नो अग्ने सुवितस्य विद्वान् रयिं सरिभ्य आ वहा बृहन्तम् ।
येन वयं सहसावन्मदेमाविक्षितास आयुषा सुवीराः ॥२४॥
नू मे ब्रह्माण्यग्न उच्छशाधि त्वं देव मघवद्भ्यः सुषूदः ।
रातौ स्यामोभयास आ ते यूयं पात स्वस्तिभिः सदा नः ॥२५॥

*agiṁna naro dīdhitibhiraraṇyorhastachyutī janayanta praśastam /*
*dūredṛśaṁ gṛhapatimatharyum //1 //*
*tamagnimaste vasavo nyṛṇvantsupratichakṣamavase kutaśchit /*
*dakṣāyyo yo dama āsa nityaḥ //2 //*
*preddho agne dīdihi puro no'jasrayā sūrmyā yaviṣṭha /*
*tvāṁ śaśvanta upa yanti vājāḥ //3 //*
*pra te agnayo'ginabhyo varaṁ niḥ suvīrāsaḥ śośuchanta dyumantaḥ /*
*yatrā naraḥ samāsate sujātāḥ //4 //*
*dā no agne dhiyā rayiṁ suvīraṁ svapatyaṁ sahasya praśastam /*
*na yaṁ yāvā tarati yātumāvān //5 //*
*upa yameti yuvatiḥ sudakṣaṁ doṣā vasterhaviṣmatī ghṛtāchī /*
*upa svainamaramatirvasūyuḥ //6 //*
*viśvā agne'pa dahārātīryebhistapobhiradaho jarūtham /*
*pra nisvaraṁ chātayasvāmīvām //7 //*
*ā yaste agna idhate anīkaṁ vasiṣṭha śukra dīdivaḥ pāvaka /*
*uto na aibhiḥ stavathairiha syāḥ /8 //*
*vi ye te agne bhejire anīkaṁ martā naraḥ pitrayāsaḥ purutrā /*
*uto na ebhiḥ sumanā iha syāḥ //9 //*
*ime naro vṛtrahatyeṣu śūrā viśvā adevīrabhi santu māyāḥ /*
*ye me dhiyaṁ panayanta praśastām //10 //*
*mā śūne agne ni ṣadāma nṛṇāṁ māśeṣaso'vīratā pari tvā /*
*prajāvatīṣu duryāsu durya //11 //*
*yamaśvī nityamupayāti yajñaṁ prajāvantaṁ svapatyaṁ kṣayaṁ naḥ /*
*svajanmanā śeṣasā vāvṛdhānam //12 //*
*pāhi no agne rakṣaso ajuṣṭāt pāhi dhūrteraraṛuṣo aghāyoḥ /*
*tvā yujā pṛtanāyūm̐rabhi ṣyām //13 //*
*sedagniragnīm̐ratyastvanyānyatra vājī tanayo vīḷupāṇiḥ /*
*sahasrapāthā akṣarā sameti //14 //*
*sedagniryo vanuṣyato nipāti sameddhāramaṁhasa uruṣyāt /*
*sujātāsaḥ pari charanti vīrāḥ //15 //*
*ayaṁ so agnirāhutaḥ purutrā yamīśānaḥ samidindhe haviṣmāna /*
*pari yametyadhvareṣu hotā //16 //*
*tve agna āhavanāni bhūrīśānāsa ā juhuyāma nityā /*
*ubhā kṛṇvanto vahatū miyedhe //17 //*
*imo agne vītatamāni havyājasro vakṣi devatātimachchha /*
*prati na īṁ surabhīṇi vyantu //18 //*
*mā no agne'vīrate parā dā durvāsase'mataye mā no asyai /*
*mā naḥ kṣudhe mā rakṣasa ṛtāvo mā no dame mā vana ā juhūrthāḥ //19 //*
*nū me brahmāṇyagna uchchhaśādhi tvaṁ deva maghavadbhyaḥ suṣūdaḥ /*

*rātau syāmobhayāsa ā te yūyaṁ pāta svastibhiḥ sadā naḥ ॥20॥*
*tvamagne suhavo raṇvasaṁdṛk sudīti sūno sahaso didīhi ।*
*mā tve sachā tanaye nitya ā dhaṅamā vīro asmannaryo vi dāsīt ॥21॥*
*mā no agne durbhṛtaye sachaiṣu deveddheṣvagniṣu pra vochaḥ ।*
*mā te asmāndurmatayo bhṛmāchchiddevasya sūno sahaso naśanta ॥22॥*
*sa marto agne svanīka revānamartye ya ājuhoti havyam ।*
*sa devatā vasuvaniṁ dadhāti yaṁ surirarthī puchchhamāna eti ॥23॥*
*maho no agne suvitasya vidvān rayiṁ saribhya ā vahā bṛhantam ।*
*yena vayaṁ sahasāvanmademāvikṣitāsa āyuṣā suvīrāḥ ॥24॥*
*nū me brahmāṇyagna uchchhaśādhi tvaṁ deva maghavadbhyaḥ suṣūdaḥ ।*
*rātau syāmobhayāsa ā te yūyaṁ pāta svastibhiḥ sadā naḥ ॥25॥*

ऋ. (Rv.) ७.३.१-१०

अगिंन देवमग्निभिः सजोषा यजिष्ठं दूतमध्वरे कृणुध्वम् ।
यो मर्त्येषु निध्रुविर्ऋतावा तपुर्मूर्धा घृतान्नः पावकः ॥१॥
प्रोथदश्वो न यवसेऽविष्यन्यदा महः संवरणाद्व्यस्थात् ।
आदस्य वातो अनु वाति शोचिरध स्म ते व्रजनं कृष्णमस्ति ॥२॥
उद्यस्य ते नवजातस्य वृष्णोऽग्ने चरन्त्यजरा इधानाः ।
अच्छा द्यामरुषो धूम एति सं दूतो अग्न ईयसे हि देवान् ॥३॥
वि यस्य ते पृथिव्यां पाजो अश्रेत्तृषु यदन्ना समवृक्त जम्भैः ।
सेनेव सृष्टा प्रसितिष्ठ एति यवं न दस्म जुहा विवेक्षि ॥४॥
तमिद्दोषा तमुषसि यविष्ठमग्निमत्यं न मर्जयन्त नरः ।
निशिशाना अतिथिमस्य योनौ दीदाय शोचिराहुतस्य वृषणः ॥५॥
सुसंदृक्ते स्वनीक प्रतीकं वि यद्रुक्मो न रोचस उपाके ।
दिवो न ते तन्यतुरेति शुष्मश्चित्रो न सूरः प्रति चक्षि भानुम् ॥६॥
यथा वः स्वाहाग्नये दाशेम परीळाभिर्घृतवद्भिश्च हव्यैः ।
तेभिर्नो अग्ने अमितैर्महोभिः शतं पूर्भिरायसीभिर्नि पाहि ॥७॥
या वा ते सन्ति दाशुषे अधृष्टा गिरो वा याभिर्नृवतीरुरुष्याः ।
ताभिर्नः सूनो सहसो नि पाहि स्मत्सूरींजरितृंजातवेदः ॥८॥
निर्यत्पूतेव स्वधितिः शुचिर्गात् स्वया कृपा तन्वा३ रोचमानः ।
आ यो मात्रोरुशेन्यो जनिष्ट देवयज्याय सुक्रतुः पावकः ॥९॥
एता नो अग्ने सौभगा दिदीह्यपि क्रतुं सुचेतसं वतेम ।
विश्वा स्तोतृभ्यो गृणते च सन्तु यूयं पात स्वस्तिभिः सदा नः ॥१०॥

*agiṁna devamagnibhiḥ sajoṣā yajiṣṭhaṁ dūtamadhvare kṛṇudhvam ।*
*yo martyeṣu nidhruvirṛtāvā tapurmūrdhā ghṛtānnaḥ pāvakaḥ ॥1॥*
*prothadaśvo na yavase'viṣyanyadā mahaḥ saṁvaraṇādvyasthāt ।*
*ādasya vāto anu vāti śochiradha sma te vrajanaṁ kṛṣṇamasti ॥2॥*
*udyasya te navajātasya vṛṣṇo'gne charantyajarā idhānāḥ ।*
*achchhā dyāmaruṣo dhūma eti saṁ dūto agna īyase hi devān ॥3॥*
*vi yasya te pṛthivyāṁ pājo aśrettṛṣu yadannā samavṛkta jambhaiḥ ।*
*seneva sṛṣṭā prasitiṣṭha eti yavaṁ na dasma juhā vivekṣi ॥4॥*
*tamiddoṣā tamuṣasi yaviṣṭhamagnimatyaṁ na marjayanta naraḥ ।*
*niśiśānā atithimasya yonau dīdāya śochirāhutasya vṛṣaṇaḥ ॥5॥*
*susaṁdṛkte svanīka pratīkaṁ vi yadrukmo na rochasa upāke ।*
*divo na te tanyatureti śuṣmaśchinno na sūraḥ prati chakṣi bhānum ॥6॥*
*yathā vaḥ svāhāgnaye dāśema parīḷāabhirghṛtavadbhiścha havyaiḥ ।*
*tebhirno agne amitairmahobhiḥ śataṁ pūrbhirāyasībhirni pāhi ॥7॥*
*yā vā te santi dāśuṣe adhṛṣṭā giro vā yābhirnṛvatīruruṣyāḥ ।*
*tābhirnaḥ sūno sahaso ni pāhi smatsūrīṁjaritṛṁjātavedaḥ ॥8॥*
*niryatpūteva svadhitiḥ śuchirgāt svayā kṛpā tanvā3 rochamānaḥ ।*
*ā yo mātroruśenyo janiṣṭa devayajyāya sukratuḥ pāvakaḥ ॥9॥*
*etā no agne saubhagā didīhyapi kratuṁ suchetasaṁ vatema ।*

*viśvā stotṛbhyo gṛṇate cha santu yūyaṁ pāta svastibhiḥ sadā naḥ ॥10॥*

ऋ. (Rv.) ७.४.१-१०

प्र वः शुक्राय भानवे भरध्वं हव्यं मतिं चाग्नये सुपूतम् ।
यो दैव्यानि मानुषा जनूंष्यन्तर्विश्वानि विद्मना जिगाति ॥१॥
स गृत्सो अग्निस्तरुणश्चिदस्तु यतो यविष्ठो अजनिष्ट मातुः ।
सं यो वना युवते शुचिदन् भूरि चिदन्ना समिदत्ति सद्यः ॥२॥
अस्य देवस्य संसद्यनीके यं मर्तासः श्येतं जगृभ्रे ।
नि यो गृभं पौरुषेयीमुवोच दुरोकमग्निरायवे शुशोच ॥३॥
अयं कविरकविषु प्रचेता मर्तेष्वग्निरमृतो नि धायि ।
स मा नो अत्र जुहुरः सहस्वः सदा त्वे सुमनसः स्याम ॥४॥
आ यो योनिं देवकृतं ससाद क्रत्वा ह्य१ ग्निरमृताँ अतारीत् ।
तमोषधीश्च वनिनश्च गर्भं भूमिश्च विश्वधायसं बिभर्ति ॥५॥
ईशे ह्य१ग्निरमृतस्य भूरेरीशे रायः सुवीर्यस्य दातोः ।
मा त्वा वयं सहसावन्नवीरा माप्सवः परि षदाम मादुवः ॥६॥
परिषद्यं ह्यरणस्य रेक्णो नित्यस्य रायः पतयः स्याम ।
न शेषो अग्ने अन्यजातमस्त्यचेतानस्य मा पथो वि दुक्षः ॥७॥
नहि ग्रभायारणः सुशेवोऽन्योदर्यो मनसा मन्तवा उ ।
अधा चिदोकः पुनरित्स एत्या नो वाज्यभीषाळेतु नव्यः ॥८॥
त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात् ।
सं त्वा धवस्मन्वदभ्येतु पाथः सं रयिः स्पृहयाय्यः सहस्री ॥९॥
एता नो अग्ने सौभगा दिदीह्यपि क्रतुं सुचेतसं वतेम ।
विश्वा स्तोतृभ्यो गृणते च सन्तु यूयं पात स्वस्तिभिः सदा नः ॥१०॥

*pra vaḥ śukrāya bhānave bharadhvaṁ havyaṁ matiṁ chāgnaye supūtam ।*
*yo daivyāni mānuṣā janūṁṣyantarviśvāni vidmanā jigāti ॥1॥*
*sa gṛtso agnistaruṇaśchidastu yato yaviṣṭho ajaniṣṭa mātuḥ ।*
*saṁ yo vanā yuvate śuchidan bhūri chidannā samidatti sadyaḥ ॥2॥*
*asya devasya saṁsadyanīke yaṁ martāsaḥ śyetaṁ jagṛbhre ।*
*ni yo gṛbhaṁ pauruṣeyīmuvocha durokamagnirāyave śuśocha ॥3॥*
*ayaṁ kavirakaviṣu prachetā marteṣvagniramṛto ni dhāyi ।*
*sa mā no atra juhuraḥ sahasvaḥ sadā tve sumanasaḥ syāma ॥4॥*
*ā yo yoniṁ devakṛtaṁ sasāda kratvā hya1 gniramṛtām̐ atārīt ।*
*tamoṣadhīścha vaninaścha garbhaṁ bhūmiścha viśvadhāyasaṁ bibharti ॥5॥*
*īśe hya1gniramṛtasya bhūrerīśe rāyaḥ suvīryasya dātoḥ ।*
*mā tvā vayaṁ sahasāvannavīrā māpsavaḥ pari ṣadāma māduvaḥ ॥6॥*
*pariṣadyaṁ hyaraṇasya rekṇo nityasya rāyaḥ patayaḥ syāma ।*
*na śeṣo agne anyajātamastyachetānasya mā patho vi dukṣaḥ ॥7॥*
*nahi grabhāyāraṇaḥ suśevo'nyodaryo manasā mantavā u ।*
*adhā chidokaḥ punaritsa etyā no vājyabhīṣāḻetu navyaḥ ॥8॥*
*tvamagne vanuṣyato ni pāhi tvamu naḥ sahasāvannavadyāt ।*
*saṁ tvā dhavasmanvadabhyetu pāthaḥ saṁ rayiḥ spṛhayāyyaḥ sahasrī ॥9॥*
*etā no agne saubhagā didīhyapi kratuṁ suchetasaṁ vatema ।*
*viśvā stotṛbhyo gṛṇate cha santu yūyaṁ pāta svastibhiḥ sadā naḥ ॥10॥*

ऋ. (Rv.) ७.८.१-७

इन्धे राजा समर्यो नमोभिर्यस्य प्रतीकमाहुतं घृतेन ।
नरो हव्येभिरीळते सबाध आग्निरग्र उषसामशोचि ॥१॥
अयमु ष्य सुमहाँ अवेदि होता मन्द्रो मनुषो यह्वो अग्निः ।
वि भा अकः ससृजानः पृथिव्यां कृष्णपविरोषधीभिर्ववक्षे ॥२॥
कया नो अग्ने वि वसः सुवृक्तिं कामु स्वधामृणवः शस्यमानः ।
कदा भवेम पतयः सुदत्र रायो वन्तारो दुष्टरस्य साधोः ॥३॥
प्रप्रायमग्निर्भरतस्य शृण्वे वि यत्सूर्यो न रोचते बृहद्भाः ।

अभि यः पुरुं पृतनासु तस्थौ द्युतानो दैव्यो अतिथिः शुशोच ॥४॥
असन्नित्त्वे आहवनानि भूरि भुवो विश्वेभिः सुमना अनीकैः ।
स्तुतश्चिदग्ने शृण्विषे गृणानः स्वयं वर्धस्व तन्वं सुजात ॥५॥
इदं वचः शतसाः संसहस्रमुदग्नये जनिषीष्ट द्विबर्हाः ।
शं यत्सतोतृभ्य आपये भवाति द्युमदमीवचातनं रक्षोहा ॥६॥
नू त्वामग्न ईमहे वसिष्ठा ईशानं सूनो सहसो वसूनाम् ।
इषं स्तोतृभ्यो मघवद्भ्य आनड्यूयं पात स्वस्तिभिः सदा नः ॥७॥
*indhe rājā samaryo namorbhyisya pratīkamāhutaṁ ghutena /*
*naro havyebhirīḻate sabādha āgniragra uṣasāmaśochi //1 //*
*ayamu ṣya sumahām̐ avedi hotā mandro manuṣo yahvo agniḥ /*
*vi bhā akaḥ sasṛjānaḥ pṛthivyāṁ kṛṣṇapaviroṣadhībhirvavakṣe //2 //*
*kayā no agne vi vasaḥ suvṛktiṁ kāmu svadhāmṛṇavaḥ śasyamānaḥ /*
*kadā bhavema patayaḥ sudatra rāyo vantāro duṣṭarasya sādhoḥ //3 //*
*praprāyamagnirbharatasya śṛṇve vi yatsūryo na rochate bṛhadbhāḥ /*
*abhi yaḥ puruṁ pṛtanāsu tasthau dyutāno daivyo atithiḥ śuśocha //4 //*
*asannittve āhavanāni bhūri bhuvo viśvebhiḥ sumanā anīkaiḥ /*
*stutaśchidagne śṛṇviṣe gṛṇānaḥ svayaṁ vardhasva tanvaṁ sujāta //5 //*
*idaṁ vachaḥ śatasāḥ saṁsahasramudagnaye janiṣīṣṭa dvibarhāḥ /*
*śaṁ yatsatotṛbhya āpaye bhavāti dyumadamīvachātanaṁ rakṣohā //6 //*
*nū tvāmagna īmahe vasiṣṭhā īśānaṁ sūno sahaso vasūnām /*
*iṣaṁ stotṛbhyo maghavadbhya ānaḍyūyaṁ pāta svastibhiḥ sadā naḥ //7 //*

ऋ. (Rv.) ७.९.१-६

अबोधि जार उषसामुपस्थाद्धोता मन्द्रः कवितमः पावकः ।
दधाति केतुमुभयस्य जन्तोर्हव्या देवेषु द्रविणं सुकृत्सु ॥१॥
स सुक्रतुर्यो वि दुरः पणीनां पुनानो अर्कं पुरुभोजसं नः ।
होता मन्द्रो विशां दमूनास्तिरस्तमो ददृशे राम्याणाम् ॥२॥
अमूरः कविरदितिर्विवस्वान्त्सुसंसन्मित्रो अतिथिः शिवो नः ।
चित्रभानुरुषसां भात्यग्रेऽपां गर्भः प्रस्व१ आ विवेश ॥३॥
ईळेन्यो वो मनुषो युगेषु समनगा अशुचज्जातवेदाः ।
सुसंदृशा भानुना यो विभाति प्रति गावः समिधानं बुधन्त ॥४॥
अग्ने याहि दूत्यं१ मा रिषण्यो देवाँ अच्छा ब्रह्मकृता गणेन ।
सरस्वतीं मरुतो अश्विनापो यक्षि देवान्नत्न्धेयाय विश्वान् ॥५॥
त्वामग्ने समिधानो वसिष्ठो जरूथं हन् यक्षि राये पुरन्धिम् ।
पुरुणीथा जातवेदो जरस्व यूयं पात स्वस्तिभिः सदा नः ॥६॥
*abodhi jāra uṣasāmupasthāddhotā mandraḥ kavitamaḥ pāvakaḥ /*
*dadhāti ketumubhayasya jantorhavyā deveṣu draviṇaṁ sukṛtsu //1 //*
*sa sukraturyo vi duraḥ paṇīnāṁ punāno arkaṁ purubhojasaṁ naḥ /*
*hotā mandro viśāṁ damūnāstirastamo dadṛśe rāmyāṇām //2 //*
*amūraḥ kaviraditirvivasvāntsusaṁsanmitro atithiḥ śivo naḥ /*
*chitrabhānuruṣasāṁ bhātyagre'pāṁ garbhaḥ prasva1 ā viveśa //3 //*
*īḻenyo vo manuṣo yugeṣu samanagā aśuchajjātavedāḥ /*
*susaṁdṛśā bhānunā yo vibhāti prati gāvaḥ samidhānaṁ budhanta //4 //*
*agne yāhi dūtyaṁ1 mā riṣaṇyo devām̐ achchhā brahmakṛtā gaṇena /*
*sarasvatīṁ maruto aśvināpeā yakṣi devānnatndheyāya viśvān //5 //*
*tvāmagne samidhāno vasiṣṭho jarūthaṁ han yakṣi rāye purandhim /*
*puruṇīthā jātavedo jarasva yūyaṁ pāta svastibhiḥ sadā naḥ //6 //*

ऋ. (Rv.) ७.१०.१-५

उषो न जारः पृथु पाजो अश्रेद्दविद्युतद्दीद्यच्छोशुचानः ।
वृषा हरिः शुचिरा भाति भासा धियो हिन्वान उशतीरजीगः ॥१॥
स्व१र्ण वस्तोरुषसामरोचि यज्ञं तन्वाना उशिजो न मन्म ।

अग्निर्जन्मानि देव आ वि विद्वान्द्रवद् दूतो देवयावा वनिष्ठः ॥२॥
अच्छा गिरो मतयो देवयन्तीरग्निं यन्ति द्रविणं भिक्षमाणाः ।
सुसंदृशं सुप्रतीकं स्वंचं हव्यवाहमरतिं मानुषाणाम् ॥३॥
इन्द्रं नो अग्ने वसुभिः सजोषा रुद्रं रुद्रेभिरा वहा बृहन्तम् ।
आदित्येभिरदितिं विश्वजन्यां बृहस्पतिमृक्वभिर्विश्ववारम् ॥४॥
मन्द्रं होतारमुशिजो यविष्ठमग्निं विश ईळते अध्वरेषु ।
स हि क्षपावाँ अभवद्रयीणमतन्द्रो दूतो यजथाय देवान् ॥५॥
*uṣo na jāraḥ pṛthu pājo aśveddavidyutaddīdyachchhośuchānaḥ* /
*vṛṣā hariḥ śuchirā bhāti bhāsā dhiyo hinvāna uśatīrajīgaḥ* //1//
*sva1rṇa vastoruṣasābharochi yajñaṁ tanvānā uśijo na manma* /
*agnirjanmāni deva ā vi vidvāndravad dūto devayāvā vaniṣṭhaḥ* //2//
*achchhā giro matayo devayantīragiṁna yanti draviṇaṁ bhikṣamāṇāḥ* /
*susaṁdṛśaṁ supratīkaṁ svaṁchaṁ havyavāhamaratiṁ mānuṣāṇām* //3//
*indraṁ no agne vasubhiḥ sajoṣā rudraṁ rudrebhirā vahā bṛhantam* /
*ādityebhiraditiṁ viśvajanyāṁ bṛhaspatimṛkvabhirviśvavāram* //4//
*mandraṁ hotāramuśijo yaviṣṭhamagiṁna viśa īḻate adhvareṣu* /
*sa hi kṣapāvām̐ abhavadrayīṇamatandro dūto yajathāya devān* //5//

ऋ. (Rv.) ७.११.१-५

महाँ अस्यध्वरस्य प्रकेतो न ऋते त्वदमृता मादयन्ते ।
आ विश्वेभिः सरथं याहि देवैर्न्यग्ने होता प्रथमः सदेह ॥१॥
त्वामीळते अजिरं दूत्याय हविष्मन्तः सदमिन्मानुषासः ।
यस्य देवैरासदो बर्हिरग्नेऽहान्यस्मै सुदिना भवन्ति ॥२॥
त्रिश्चिदक्तोः प्र चिकितुर्वसूनि त्वे अन्तर्दाशुषे मर्त्याय ।
मनुष्वदग्न इह यक्षि देवान्भवा नो दूतो अभिशस्तिपावा ॥३॥
अग्निरीशे बृहतो अध्वरस्याग्निर्विश्वस्य हविषः कृतस्य ।
क्रतुं ह्यस्य वसवो जुषन्ताथा देवा दधिरे हव्यवाहम् ॥४॥
आग्ने वह हविरद्याय देवानिन्द्रज्येष्ठास इह मादयन्ताम् ।
इमं यज्ञं दिवि देवेषु धेहि यूयं पात स्वस्तिभिः सदा नः ॥५॥
*mahām̐ asyachcharasya praketo na ṛte tvadamṛtā mādayante* /
*ā viśvebhiḥ sarathaṁ yāhi devairnyagne hotā prathamaḥ sadeha* //1//
*tvāmīḻate ajiraṁ dūtyāya haviṣmantaḥ sadaminmānuṣāsaḥ* /
*yasya devairāsado barhiragne'hānyasmai sudinā bhavanti* //2//
*triśchidaktoḥ pra chikiturvasūni tve antardāśuṣe martyāya* /
*manuṣvadagna iha yakṣi devānbhavā no dūto abhiśastipāvā* //3//
*agnirīśe bṛhato adhvarasyāgnirviśvasya haviṣaḥ kṛtasya* /
*kratuṁ hyasya vasavo juṣantāthā devā dadhire havyavāham* //4//
*āgne vaha haviradyāya devānindrajyeṣṭhāsa iha mādayantām* /
*imaṁ yajñaṁ divi deveṣu dhehi yūyaṁ pāta svastibhiḥ sadā naḥ* //5//

ऋ. (Rv.) ७.१२.१-३

अगन्म महा नमसा यविष्ठं यो दीदाय समिद्धः स्वे दुरोणे ।
चित्रभानुं रोदसी अन्तरुर्वी स्वाहुतं विश्वतः प्रत्यंचम् ॥१॥
स मह्ना विश्वा दुरितानि साह्वानग्निष्टवे दम आ जातवेदाः ।
स नो रक्षिषद् दुरितादवद्यादस्मान्गृणत उत नो मघोनः ॥२॥
त्वं वरुण उत मित्रो अग्ने त्वां वर्धन्ति मतिभिर्वसिष्ठाः ।
त्वं वसु सुषणनानि सन्तु यूयं पात स्वस्तिभिः सदा नः ॥३॥
*aganma mahā namasā yaviṣṭhaṁ yo dīdāya samiddhaḥ sve duroṇe* /
*chitrabhānuṁ rodasī antarurvī svāhutaṁ viśvataḥ pratyaṁcham* //1//
*sa mahnā viśvā duritāni sāhvānagniṣṭave dama ā jātavedāḥ* /
*sa no rakṣiṣad duritādavadyādasmāngṛṇata uta no maghonaḥ* //2//
*tvaṁ varuṇa uta mitro agne tvāṁ vardhanti matibhirvasiṣṭhāḥ* /

*tvaṁ vasu suṣaṇanāni santu yūyaṁ pāta svastibhiḥ sadā naḥ  ॥3 ॥*

ऋ. (Rv.) ७.१४.१-३

समिधा जातवेदसे देवाय देवहुतिभिः ।
हविर्भिः शुक्रशोचिषे नमस्विनो वयं दाशेमाग्नये ॥१॥
वयं ते अग्ने समिधा विधेम वयं दाशेम सुष्टुती यजत्र ।
वयं घृतेनाध्वरस्य होतर्वयं देव हविषा भद्रशोचे ॥२॥
आ नो देवेभिरुप देवहूतिमग्ने याहि वषट्कृतिं जुषाणः ।
तुभ्यं देवाय दाशतः स्याम यूयं पात स्वस्तिभिः सदा नः ॥३॥

*samidhā jātavedase devāya devahutibhiḥ ।*
*havirbhiḥ śukraśochiṣe namasvino vayaṁ dāśemāgnaye ॥1 ॥*
*vayaṁ te agne samidhā vidhema vayaṁ dāśema suṣṭutī yajatra ।*
*vayaṁ ghṛtenādhvarasya hotarvayaṁ deva haviṣā bhadraśoche ॥2 ॥*
*ā no devebhirupa devahūtimagne yāhi vaṣaṭkṛtiṁ juṣāṇaḥ ।*
*tubhyaṁ devāya dāśataḥ syāma yūyaṁ pāta svastibhiḥ sadā naḥ ॥3 ॥*

ऋ. (Rv.) ७.१५.१-१५

उपसद्याय मीळ्हुष आस्ये जुहुता हविः। यो नो नेदिष्ठमाप्यम् ॥१॥
यः पंच चर्षणीरभि निषसाद् दमेदमे। कविगृहपतिर्युवा ॥२॥
स नो वेदो अमात्यमग्नी रक्षतु विश्वतः। उतास्मान्पात्वंहसः ॥३॥
नवं नु स्तोममग्नये दिवः श्येनाय जीजनम्। वस्वः कुविद्वनाति नः ॥४॥
स्पार्हा यस्य श्रियो दृशे रयिर्वीरवतो यथा। अग्रे यज्ञस्य शोचतः ॥५॥
सेमां वेतु वषट्कृतिमग्निर्जुषत नो गिरः। यजिष्ठो हव्यवाहनः ॥६॥
नि त्वा नक्ष्य विश्पते द्युमन्तं देव धीमहि। सुवीरमग्न आहुत ॥७॥
क्षप उस्रश्च दीदिहि स्वग्नयस्त्वया वयम्। सुवीरस्त्वमस्मयुः ॥८॥
उप त्वा सातये नरो विप्रासो यन्ति धीतिभिः। उपाक्षरा सहस्रिणी ॥९॥
अग्नी रक्षांसि सेधति शुक्रशोचिरमर्त्यः। शुचिः पावक ईड्यः ॥१०॥
स नो राधांस्या भरेशानः सहसो यहो। भगश्च दातु वार्यम् ॥११॥
त्वमग्ने वीरवद्यशो देवश्च सविता भगः। दितिश्च दाति वार्यम् ॥१२॥
अग्ने रक्षा णो अंहसः प्रति ष्म देव रीषतः। तपिष्ठैरजरो दह ॥१३॥
अधा मही न आयस्यनाधृष्टो नृपीतये। पूर्भवा शतभुजिः ॥१४॥
त्वं नः पाह्यंहसो दोषावस्तरघायतः। दिवा नक्तमदाभ्य ॥१५॥

*upasadyāya mīḷahuṣa āsye juhutā haviḥ । yo no nediṣṭhamāpyam ॥1 ॥*
*yaḥ paṁcha charṣaṇīrabhi niṣasād damedame । kavigṛhapatiryuvā ॥2 ॥*
*sa no vedo amātyamagnī rakṣatu viśvataḥ । utāsmānpātvaṁhasaḥ ॥3 ॥*
*navaṁ nu stomamagnaye divaḥ śyenāya jījanam । vasvaḥ kuvidvanāti naḥ ॥4 ॥*
*spārhā yasya śriyo dṛśe rayirvīravato yathā । agre yajñasya śochataḥ ॥5 ॥*
*semāṁ vetu vaṣaṭkṛtimagnirjuṣata no giraḥ । yajiṣṭho havyavāhanaḥ ॥6 ॥*
*ni tvā nakṣaya viśpate dyumantaṁ deva dhīmahi । suvīramagna āhuta ॥7 ॥*
*kṣapa usraścha dīdihi svagnayastvayā vayam । suvīrastvamasmayuḥ ॥8 ॥*
*upa tvā sātaye naro viprāso yanti dhītibhiḥ । upākṣarā sahasriṇī ॥9 ॥*
*agnī rakṣāṁsi sedhati śukraśochiramartyaḥ । śuchiḥ pāvaka īḍyaḥ ॥10 ॥*
*sa no rādhāṁsyā bhareśānaḥ sahaso yaho । bhagaścha dātu vāryam ॥11 ॥*
*tvamagne vīravadyaśo devaścha savitā bhagaḥ । ditiścha dāti vāryam ॥12 ॥*
*agne rakṣā ṇo aṁhasaḥ prati ṣma deva rīṣataḥ । tapiṣṭhairajaro daha ॥13 ॥*
*adhā mahī na āyasyanādhṛṣṭo nṛpītaye । pūrbhavā śatabhujiḥ ॥14 ॥*
*tvaṁ naḥ pāhyaṁhaso doṣāvastaraghāyataḥ । divā naktamadābhya ॥15 ॥*

ऋ. (Rv.) ७.१६.१-१२

एना वो अग्निं नमसोर्जो नपातमा हुवे । प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतम् ॥१॥
स योजते अरुषा विश्वभोजसा स दुद्रवत्स्वाहुतः । सुब्रह्मा यज्ञः सुशमी वसूनां देवं राधो जनानम् ॥२॥
उदस्य शोचिरस्थादाजुह्वानस्य मीळ्हुषः । उद्धूमासो अरुषासो दिविस्पृशः समग्निमिन्धते नरः ॥३॥
तं त्वा दूतं कृण्महे यशस्तमं देवाँ आ वीतये वह ।

विश्वा सूनो सहसो मर्तभोजना रास्व तद्यत्त्वेमहे ॥४॥
त्वमग्ने गृहपतिस्त्वं होता नो अध्वरे । त्वं पोता विश्ववार प्रचेता यक्षि वेषि च वार्यम् ॥५॥
कृधि रत्नं यजमानाय सुक्रतो त्वं हि रत्नधा असि । आ न ऋते शिशीहि विश्वमृत्विजं सुशंसो यश्च दक्षते ॥६॥
त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः । यन्तारो ये मघवानो जनानामूर्वान्दयन्त गोनाम् ॥७॥
येषामिळा घृतहस्ता दुरोण आँ अपि प्राता निषीदति । ताँस्त्रायस्व सहस्य द्रुहो निदो यच्छा नः शर्म दीर्घश्रुत् ॥८॥
स मन्द्रया च जिह्वया वह्निरासा विदुष्टरः । अग्ने रयिं मघवद्भ्यो न आ वह हव्यदातिं च सूदय ॥९॥
ये राधांसि ददत्यश्व्या मघा कामेन श्रवसो महः । ताँ अंहसः पिपृहि पर्तृभिष्टं शतं पूर्भिर्यविष्ठ्य ॥१०॥
देवो वो द्रविणोदाः पूर्णां विवष्ट्यासिचम् । उद्वा सिंचध्वमुप वा पृणध्वमादिद्वो देव ओहते ॥११॥
तं होतारमध्वरस्य प्रचेतसं वह्निं देवा अकृण्वत । दधाति रत्नं विधते सुवीर्यमग्निर्जनाय दाशुषे ॥१२॥

*enā vo agiṁna namasorjo napātamā huve ।*
*priyaṁ chetiṣṭhamaratiṁ svadhvaraṁ viśvasya dūtamamṛtam ॥1॥*
*sa yojate aruṣā viśvabhojasā sa dudravatsvāhutaḥ ।*
*subrahyā yajñaḥ suśamī vasūnāṁ devaṁ rādho janānam ॥2॥*
*udasya śochirasthādājuhvānasya mīḻahuṣaḥ ।*
*uddhūmāso aruṣāso divispṛśaḥ samagnimindhate naraḥ ॥3॥*
*taṁ tvā dūtaṁ kṛṇmahe yaśastamaṁ devām̐ ā vītaye vaha ।*
*viśvā sūno sahaso martabhojanā rāsva tadyattvemahe ॥4॥*
*tvamagne gṛhapatistvaṁ hotā no adhvare ।*
*tvaṁ potā viśvavāra prachetā yakṣi veṣi cha vāryam ॥5॥*
*kṛdhi ratnaṁ yajamānāya sukrato tvaṁ hi ratnadhā asi ।*
*ā na ṛte śiśīhi viśvamṛtvijaṁ suśaṁso yaścha dakṣate ॥6॥*
*tve agne svāhuta priyāsaḥ santu sūrayaḥ ।*
*yantāro ye maghavāno janānāmūrvāndayanta gonām ॥7॥*
*yeṣāmiḻā ghṛtahastā duroṇa ām̐ api prātā niṣīdati ।*
*tām̐strāyasva sahasya druho nido yachchhā naḥ śarma dīrghaśrut ॥8॥*
*sa mandrayā cha jihvayā vahnirāsā viduṣṭaraḥ ।*
*agne rayiṁ maghavadbhyo na ā vaha havyadātiṁ cha sūdaya ॥9॥*
*ye rādhāṁsi dadatyaśvyā maghā kāmena śravaso mahaḥ ।*
*tām̐ aṁhasaḥ pipṛhi partṛbhiṣṭvaṁ śataṁ pūrbhiryaviṣṭhya ॥10॥*
*devo vo draviṇodāḥ pūrṇāṁ vivaṣṭyāsicham ।*
*udvā siṁchadhvamupa vā pṛṇadhvamādidvo deva ohate ॥11॥*
*taṁ hotāramadhvarasya prachetasaṁ vahni devā akṛṇvata ।*
*dadhāti ratnaṁ vidhate suvīryamagnirjanāya dāśuṣe ॥12॥*

ऋ. (Rv.) ७.१७.१-७

अग्ने भव सुषमिधा समिद्ध उत बर्हिरुर्विया वि स्तृणीताम् ॥१॥
उत द्वार उशतीर्वि श्रयन्तामुत देवाँ उशत आ वहेह ॥२॥
अग्ने वीहि हविषा यक्षि देवान्त्स्वध्वरा कृणुहि जातवेदः ॥३॥
स्वध्वरा करति जातवेदा यक्षद्देवाँ अमृतान्पिप्रयच्च ॥४॥
वंस्व विश्वा वार्याणि प्रचेतः सत्या भवन्त्वाशिषो नो अद्य ॥५॥
त्वामु ते दधिरे हव्यवाहं देवासो अग्न ऊर्ज आ नपातम् ॥६॥
ते ते देवाय दाशतः स्याम महो नो रत्ना वि दध इयानः ॥७॥

*agne bhava suṣamidhā samiddha uta barhirurviyā vi stṛṇītām ॥1॥*
*uta dvāra uśatīrvi śrayantāmuta devām̐ uśata ā vaheha ॥2॥*
*agne vīhi haviṣā yakṣi devāntsvadhvarā kṛṇuhi jātavedaḥ ॥3॥*
*svadhvarā karati jātavedā yakṣaddevām̐ amṛtānpiprayachcha ॥4॥*
*vaṁsva viśvā vāryāṇi prachetaḥ satyā bhavantvāśiṣo no adya ॥5॥*
*tvāmu te dadhire havyavāhaṁ devāso agna ūrja ā napātam ॥6॥*
*te te devāya dāśataḥ syāma maho no ratnā vi dadha iyānaḥ ॥7॥*

ऋ. (Rv.) ७.५०.२

यद्विजामन्परुषि वन्दनं भुवदष्ठीवन्तौ परि कुल्फौ च देहत् ।
अग्निष्टच्छोचन्नप बाधतामितो मा मां पद्येन रपसा विदत्त्सरुः ॥२॥

*yadvijāmanparuṣi vandanaṁ bhuvadaṣṭhīvantau pari kulphau cha dehat* ।
*agniṣṭachchhochannapa bādhatāmito mā māṁ padyena rapasā vidattsaruḥ* ॥2॥

ऋ. (Rv.) ७.१०४.१०

यो नो रसं दिप्सति पित्वो अग्ने यो अश्वानां यो गवां यस्तनूनाम् ।
रिपुः स्तेनः स्तेयकृद्दभ्रमेतु नि ष हीयतां तन्वा३ तना च ॥१०॥
*yo no rasaṁ dipsati pitvo agne yo aśvānāṁ yo gavāṁ yastanūnām* ।
*ripuḥ stenaḥ steyakṛddabhrametu ni ṣa hīyatāṁ tanvā3 tanā cha* ॥10॥

ऋ. (Rv.) ७.१०४.१४

यदि वाहमनृतदेव आम मोघं वा देवाँ अप्यूहे अग्ने ।
किमस्मभ्यं जातवेदो हृणीषे द्रोघवाचस्ते निर्ऋथं सचन्ताम् ॥१४॥
*yadi vāhamanṛtadeva āma moghaṁ vā devām̐ apyūhe agne* ।
*kimasmabhyaṁ jātavedo hṛṇīṣe droghavāchaste nirṛthaṁ sachantām* ॥14॥

य. (Yv.) १५.६२

प्रोथदश्वो न यवसेऽविष्यन्यदा महः संवरणाद्व्यस्थात् ।
आदस्य वातोऽअनु वाति शोचिरध स्म ते व्रजनं कृष्णमस्ति ॥६२॥
*prothadaśvo na yavase'viṣyanyadā mahaḥ saṁvaraṇādvyasthāt* ।
*ādasya vāto'anu vāti śochiradha sma te vrajanaṁ kṛṣṇamasti* ॥62॥

य. (Yv.) १७.७६

प्रेद्धोऽअग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ। त्वां शश्वन्तऽउपयन्ति वाजाः ॥७६॥
*preddho'agne dīdihi puro no'jasrayā sūrmyā yaviṣṭha* ।
*tvāṁ śaśvanta'upayanti vājāḥ* ॥76॥

य. (Yv.) २१.९

प्र बाहवा सिसृतं जीवसे नऽआ नो गव्यूतिमुक्षतं घृतेन ।
आ म जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवेमा ॥९॥
*pra bāhavā sisṛtaṁ jīvase na'ā no gavyūtimukṣataṁ ghṛtena* ।
*ā ma jane śravayataṁ yuvānā śrutaṁ me mitrāvaruṇā havemā* ॥9॥

अ. (Av.) ३.२०.१-२

अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः। तं जानन्नग्न आ रोहाधा नो वर्धया रयिम् ॥१॥
अग्ने अच्छा वदेह नः प्रत्यङ् नः सुमना भव। प्र णो यच्छ विशां पते धनदा असि नस्त्वम्।२।
*ayaṁ te yonirṛtviyo yato jāto arochathāḥ* ।
*taṁ jānannagna ā rohādhā no vardhayā rayim* ॥1॥
*agne achchhā vadeha naḥ pratyaṅ naḥ sumanā bhava* ।
*pra ṇo yachchha viśāṁ pate dhanadā asi nastvam* ।2।

अ. (Av.) ३.२०.५

त्वं नो अग्ने अग्निभिर्ब्रह्म यज्ञं च वर्धय। त्वं नो देव दातवे रयिं दानाय चोदय ॥५॥
*tvaṁ no agne agnibhirbrahma yajñaṁ cha vardhaya* ।
*tvaṁ no deva dātave rayiṁ dānāya chodaya* ॥5॥

अ. (Av.) ३.२१.१-७

ये अग्नयो अप्स्व१न्तर्ये वृत्रे ये पुरुषे ये अश्मसु ।
य आविवेशौषधीर्यो वनस्पतींस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥१॥
यः सोमे अन्तर्यो गोष्वन्तर्य आविष्टो वयःसु यो मृगेषु ।
य आविवेश द्विपदो यश्चतुष्पदस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥२॥
य इन्द्रेण सरथं याति देवो वैश्वानर उत विश्वदाव्यः ।
यं जोहवीमि पृतनासु सासहिं तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥३॥
यो देवो विश्वाद् यमु काममाहुर्यं दातारं प्रतिगृह्णन्तमाहुः ।
यो धीरः शक्रः परिभूरदाभ्यम्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥४॥
यं त्वा होतारं मनसाभि संविदुस्त्रयोदश भौवनाः पंच मानवाः ।
वर्चोधसे यशसे सूनृतावते तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥५॥

उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे ।
वैश्वानरज्येष्ठेभ्यस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥६॥
दिवं पृथिवीमन्वन्तरिक्षं ये विद्युतमनुसंचरन्ति ।
ये दिक्ष्व१न्तर्ये वाते अन्तस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥७॥
*ye agnayo apsva1rntye vṛtre ye puruṣe ye aśmasu /*
*ya āviveśauṣadhīryo vanaspatīṁstebhyo agnibhyo hutamastvetat //1 //*
*yaḥ some antaryo goṣvantarya āviṣṭo vayaḥsu yeā mṛgeṣu /*
*ya āviveśa dvipado yaśchatuṣpadastebhyo agnibhyo hutamastvetat //2 //*
*ya indreṇa sarathaṁ yāti devo vaiśvānara uta viśvadāvyaḥ /*
*yaṁ johavīmi pṛtanāsu sāsahiṁ tebhyo agnibhyo hutamastvetat //3 //*
*yo devo viśvād yamu kāmamāhuryaṁ dātāraṁ pratigṛhṇantamāhuḥ /*
*yo dhīraḥ śakraḥ paribhūradābhyamtebhyo agnibhyo hutamastvetat //4 //*
*yaṁ tvā hotāraṁ manasābhi saṁvidustrayodaśa bhauvanāḥ paṁcha mānavāḥ /*
*varchodhase yaśase sūnṛtāvate tebhyo agnibhyo hutamastvetat //5 //*
*ukṣānnāya vaśānnāya somapṛṣṭhāya vedhase /*
*vaiśvānarajyeṣṭhebhyastebhyo agnibhyo hutamastvetat //6 //*
*divaṁ pṛthivīmanvantarikṣaṁ ye vidyutamanusaṁcharanti /*
*ye dikṣava1ntarye vāte antastebhyo agnibhyo hatamastvetat //7 //*

२. अग्न्यादयो लिङोक्ताः (Agnyādayo Liṅoktāḥ) - य. (Yv.) ३४.३४

प्रातरग्निं प्रातरिन्द्रं हवामहे प्रातर्मित्रावरुणा प्रातरश्विना ।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रं हुवेम ॥३४॥
*prātaragniṁ prātarindraṁ havāmahe prātarmitrāvaruṇā prātaraśvinā /*
*prātarbhagaṁ pūṣaṇaṁ brahmaṇaspatiṁ prātaḥ somamuta rudraṁ huvema //34 //*

३. अर्यमा भगः बृहस्पतिः देवी (Aryamā Bhagaḥ Bṛhaspatiḥ Devī) - अ. (Av.) ३.२०.३

प्र णो यच्छत्वर्यमा प्र भगः प्र बृहस्पतिः । प्र देवीः प्रोत सूनृता रयिं देवी दधातु मे ॥३॥
*pra ṇo yachchhatvaryamā pra bhagaḥ pra bṛhaspatiḥ /*
*pra devīḥ prota sūnṛtā rayiṁ devī dadhātu me //3 //*

४. अर्यमा बृहस्पतिः इन्द्रः वातः विष्णुः सरस्वती सविता वाजी (Aryamā Bṛhaspatiḥ Indraḥ Vātaḥ Viṣṇuḥ Sarasvatī Savitā Vājī) - **अ. (Av.) ३.२०.७**

अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय। वातं विष्णुं सरस्वतीं सवितारं च वाजिनम् ॥७॥
*aryamaṇaṁ bṛhaspatimindraṁ dānāya chodaya /*
*vātaṁ viṣṇuṁ sarasvatīṁ savitāraṁ cha vājinam //7 //*

५. अश्विनौ (Aśvinau) - ऋ. (Rv.) ७.६७.१-१०; ७.६८.१-९; ७.६९.१-८; ७.७०.१-७; ७.७१.१-६; ७.७२.१-५; ७.७३.१-५; ७.७४.१-६; य. (Yv.) ३३.८८

ऋ. (Rv.) ७.६७.१-१०

प्रति वां रथं नृपती जरध्यै हविष्मता मनसा यज्ञियेन ।
यो वां दूतो न धिष्ण्यावजीगरच्छा सूनुर्न पितरा विवक्मि ॥१॥
अशोच्यग्निः समिधानो अस्मे उपो अदृश्रन्तमसश्चिदन्ताः ।
अचेति केतुरुषसः पुरस्ताच्छ्रिये दिवो दुहितुर्जायमानः ॥२॥
अभि वां नूनमश्विना सुहोता स्तोमैः सिषक्ति नासत्या विवक्वान् ।
पूर्वीभिर्यातं पथ्याभिरर्वाक्स्वर्विदा वसुमता रथेन ॥३॥
अवोर्वां नुनमश्विना युवाकुर्हुवे यद्वां सुते माध्वी वसूयुः ।
आ वां वहन्तु स्थविरासो अश्वाः पिबाथो अस्मे सुषुता मधूनि ॥४॥
प्राचीमु देवाश्विना धियं मेऽमृध्रां सातये कृतं वसूयुम् ।
विश्वा अवष्टिं वाज आ पुरन्धीस्ता नः शक्तं शचीपती शचीभिः ॥५॥
अविष्टं धीष्वश्विना न आसु प्रजावद्रेतो अह्रयं नो अस्तु ।
आ वां तोके तनये तूतुजानाः सुरत्नासो देववीतिं गमेम ॥६॥
एष स्य वां पूर्वगत्वेव सख्ये निधिर्हितो माध्वी रातो अस्मे ।

अहेळता मनसा यातमर्वागश्नन्ता हव्यं मानुषीषु विक्षु ॥७॥
एकस्मिन्योगे भुरणा समाने परि वां सप्त स्रवतो रथो गात् ।
न वायन्ति सुभ्वो देवयुक्ता ये वां धूर्षु तरणयो वहन्ति ॥८॥
असश्चता मघवद्भ्यो हि भूतं ये राया मघदेयं जुनन्ति ।
प्र ये बन्धुं सूनृताभिस्तिरन्ते गव्या पृंचन्तो अश्व्या मघानि ॥९॥
नू मे हवमा श्रृणुतं युवाना यासिष्टं वर्तिरश्विनाविरावत् ।
धत्तं रत्नानि जरतं च सूरीन् यूयं पात स्वस्तिभिः सदा नः ॥१०॥
*prati vāṁ rathaṁ nṛpatī jaradhyai haviṣmatā manasā yajñiyena /*
*yo vāṁ dūto na dhiṣṇyāvajīgarachchhā sūnurna pitarā vivakmi //1//*
*aśochyagniḥ samidhāno asme upo adṛśrantamasaśchidantāḥ /*
*acheti keturuṣasaḥ purastāchchhriye divo duhiturjāyamānaḥ //2//*
*abhi vāṁ nūnamaśvinā suhotā stomaiḥ siṣakti nāsatyā vivakvān /*
*pūrvībhiryātaṁ pathyābhirarvāksvarvidā vasumatā rathena //3//*
*avorvāṁ nunamaśvinā yuvākurhuve yadvāṁ sute mādhvī vasūyuḥ /*
*ā vāṁ vahantu sthavirāso aśvāḥ pibātho asme suṣutā madhūni //4//*
*prāchīmu devāśvinā dhiyaṁ me'mṛdhrāāṁ sātaye kṛtaṁ vasūyum /*
*viśvā avaṣṭiṁ vāja ā purandhīstā naḥ śaktaṁ śachīpatī śachībhiḥ //5//*
*aviṣṭaṁ dhīṣvaśvinā na āsu prajāvadreto ahrayaṁ no astu /*
*ā vāṁ toke tanaye tṛtujānāḥ suratnāso devavītiṁ gamema //6//*
*eṣa sya vāṁ pūrvagatveva sakhye nidhirhito mādhvī rāto asme /*
*aheḻatā manasā yātamarvāgaśnantā havyaṁ mānuṣīṣu vikṣu //7//*
*ekasminyoge bhuraṇā samāne pari vāṁ sapta sravato ratho gāt /*
*na vāyanti subhvo devayuktā ye vāṁ dhūrṣu taraṇayo vahanti //8//*
*asaśchatā maghavadbhyo hi bhūtaṁ ye rāyā maghadeyaṁ junanti /*
*pra ye bandhuṁ sūnṛtābhistirante gavyā pṛṁchanto aśvyā maghāni //9//*
*nū me havamā śṛṇutaṁ yuvānā yāsiṣṭaṁ vartiraśvināvirāvat /*
*dhattaṁ ratnāni jarataṁ cha sūrīn yūyaṁ pāta svastibhiḥ sadā naḥ //10//*

ऋ. (Rv.) ७.६८.१-९

आ शुभ्रा यातमश्विना स्वश्वा गिरो दस्रा जुजुषाणा युवाकोः ।
हव्यानि च प्रतिभृता वीतं नः ॥१॥
प्र वामन्धांसि मद्यान्यस्थुररं गन्तं हविषो वीतये मे ।
तिरो अर्यो हवनानि श्रुतं नः ॥२॥
प्र वां रथो मनोजवा इयर्ति तिरो रजांस्यश्विना शतोतिः ।
अस्मभ्यं सूर्यावसू इयानः ॥३॥
अयं ह यद्वां देवया उ अद्रिरूर्ध्वो विवक्ति सोमसुद्युवभ्याम् ।
आ वल्गू विप्रो ववृतीत हव्यैः ॥४॥
चित्रं ह यद्वां भोजनं न्वस्ति न्यत्रये महिष्वन्तं युयोतम् ।
यो वामोमानं दधते प्रियः सन् ॥५॥
उत त्यद्वां जुरते अश्विना भूच्च्यवानाय प्रतीत्यं हविर्दे ।
अधि यद्वर्प इतऊति धत्थः ॥६॥
उत त्यं भुज्युमश्विना सखायो मध्ये जहुर्दुरेवासः समुद्रे ।
निरी पर्षदरावा यो युवाकुः ॥७॥
वृकाय चिज्जसमानाय शक्तमुत श्रुतं शयवे हूयमाना ।
यावघ्न्यामपिन्वतमपो न स्तर्यं चिच्छक्त्यश्विना शचीभिः ॥८॥
एष स्य कारुर्जरते सूक्तैरग्रे बुधान उषसां सुमन्मा ।
इषा तं वर्धदघ्न्या पयोभिर्यूयं पात स्वस्तिभिः सदा न ॥९॥
*ā śubhrā yātamiśvinā svaśvā giro dasrā jujuṣāṇā yuvākoḥ /*
*havyāni cha pratibhṛtā vītaṁ naḥ //1//*
*pra vāmandhāṁsi madyānyasthuraraṁ gantaṁ haviṣo vītaye me /*
*tiro aryo havanāni śrutaṁ naḥ //2//*

*pra vāṁ ratho manojavā iyarti tiro rajāṁsyaśvinā śatotiḥ ।*
*asmabhyaṁ sūryāvasū iyānaḥ ॥3 ॥*
*ayaṁ ha yadvāṁ devayā u adrirūrdhvo vivakti somasudyuvabhyām ।*
*ā valgū vipro vavṛtīta havyaiḥ ॥4 ॥*
*chitraṁ ha yadvāṁ bhojanaṁ nvasti nyatraye mahiṣvantaṁ yuyotam ।*
*yo vāmomānaṁ dadhate priyaḥ san ॥5 ॥*
*uta tyadvāṁ jurate aśvinā bhūchchyavānāya pratītyaṁ havirde ।*
*adhi yadvarpa itaūti dhatthaḥ ॥6 ॥*
*uta tyaṁ bhujyumaśvinā sakhāyo madhye jahurdurevāsaḥ samudre ।*
*nirī parṣadarāvā yo yuvākuḥ ॥7 ॥*
*vṛkāya chijjasamānāya śaktamuta śrutaṁ śayave hūyamānā ।*
*yāvaghnyāmapinvatamapo na staryaṁ chichchhaktyaśvinā śachībhiḥ ॥8 ॥*
*eṣa sya kārurjarate sūktairagre budhāna uṣasāṁ sumanmā ।*
*iṣā taṁ vardhadaghnyā payobhiryūyaṁ pāta svastibhiḥ sadā na ॥9 ॥*

ऋ. (Rv.) ७.६९.१-८

आ वां रथो रोदसी बद्बधानो हिरण्ययो वृषभिर्यात्वश्वैः ।
घृतवर्तनिः पविभी रुचान इषां वोळ्हा नृपतिर्वाजिनीवान् ॥१ ॥
स पप्रथानो अभि पंच भूमा त्रिवन्धुरो मनसा यातु युक्तः ।
विशो येन गच्छथो देवयन्तीः कुत्रा चिद्याममश्विना दधाना ॥२ ॥
स्वश्वा यशसा यातमर्वाग्दस्रा निधिं मधुमन्तं पिबाथः ।
वि वां रथो वध्वा३ यादमानोऽन्तान्दिवो बाधते वर्तनिभ्याम् ॥३ ॥
युवोः श्रियं परि योषावृणीत सूरो दुहिता परितक्म्यायाम् ।
यद्देवयन्तमवथः शचीभिः परि घ्रंसमोमना वां वयो गात् ॥४ ॥
यो ह स्य वां रथिरा वस्त उस्रा रथो युजानः परियाति वर्तिः ।
तेन नः शं योरुषसो व्युष्टौ न्यश्विना वहतं यज्ञे अस्मिन् ॥५ ॥
नरा गौरेव विद्युतं तृषाणास्माकमद्य सवनोप यातम् ।
पुरुत्रा हि वां मतिभिर्हवन्ते मा वामन्ये नि यमन्देवयन्तः ॥६ ॥
युवं भुज्युमवविद्धं समुद्र उदूहथुरर्णसो अस्रिधानैः ।
पतत्रिभिरश्रमैरव्यथिभिर्दंसनाभिरश्विना पारयन्ता ॥७ ॥
नू मे हवमा शृणुतं युवाना यासिष्टं वर्तिरश्विनाविरावत् ।
धत्तं रत्नानि जरतं च सूरीन् यूयं पात स्वस्तिभिः सदा नः ॥८ ॥
*ā vāṁ ratho rodasī badbadhāno hiraṇyayo vṛṣabhiryātvaśvaiḥ ।*
*ghṛtavartaniḥ pavibhī ruchāna iṣāṁ voḷahā nṛpatirvājinīvān ॥1 ॥*
*sa paprathāno abhi paṁcha bhūmā trivandhuro manasā yātu yuktaḥ ।*
*viśo yena gachchhatho devayantīḥ kutrā chidyāmamaśvinā dadhānā ॥2 ॥*
*svaśvā yaśasā yātamarvāgdasrā nidhiṁ madhumantaṁ pibāthaḥ ।*
*vi vāṁ ratho vadhvā3 yādamāno·ntāndivo bādhate vartanibhyām ॥3 ॥*
*yuvoḥ śriyaṁ pari yoṣāvṛṇīta sūro duhitā paritakmyāyām ।*
*yaddevayantamavathaḥ śachībhiḥ pari ghraṁsamomanā vāṁ vayo gāt ॥4 ॥*
*yo ha sya vāṁ rathirā vasta usrā ratho yujānaḥ pariyāti vartiḥ ।*
*tena naḥ śaṁ yoruṣaso vyuṣṭau nyaśvinā vahataṁ yajñe asmin ॥5 ॥*
*narā gaureva vidyutaṁ tṛṣāṇāsmākamadya savanopa yātam ।*
*purutrā hi vāṁ matibhirhavante mā vāmanye ni yamandevayantaḥ ॥6 ॥*
*yuvaṁ bhujyumavaviddhaṁ samudra udūhathurarṇaso asridhānaiḥ ।*
*patatribhiraśramairavyathibhirdaṁsanābhiraśvinā pārayantā ॥7 ॥*
*nū me havamā śuṇutaṁ yuvānā yāsiṣṭaṁ vartiraśvināvirāvat ।*
*dhattaṁ ratnāni jarataṁ cha sūrīn yūyaṁ pāta svastibhiḥ sadā naḥ ॥8 ॥*

ऋ. (Rv.) ७.७०.१-७

आ विश्ववाराश्विना गतं नः प्र तत्स्थानमवाचि वां पृथिव्याम् ।
अश्वो न वाजी शुनपृष्ठो अस्थादा यत्सेदथुर्ध्रुवसे न योनिम् ॥१ ॥
सिषक्ति सा वां सुमतिश्चनिष्ठातापि घर्मो मनुषो दुरोणे ।

ये वां समुद्रान्त्सरितः पिपर्त्येतग्वा चिन्न सुयुजा युजानः ॥२॥
यानि स्थानान्यश्विना दधाथे दिवो यह्वीष्वोषधीषु विक्षु ।
नि पर्वतस्य मूर्धनि सदन्तेषं जनाय दाशुषे वहन्ता ॥३॥
चनिष्टं देवा ओषधीष्वप्सु यद्योग्या अश्नवैथे ऋषीणाम् ।
पुरूणि रत्ना दधतौ न्य१स्मे अनु पूर्वाणि चख्यथुर्युगानि ॥४॥
शुश्रुवांसा चिदश्विना पुरूण्यभि ब्रह्माणि चक्षाथे ऋषीणाम् ।
प्रति प्र यातं वरमा जनायास्मे वामस्तु सुमतिश्चनिष्ठा ॥५॥
यो वां यज्ञो नासत्या हविष्मान् कृतब्रह्मा समर्यो३ भवाति ।
उप प्र यातं वरमा वसिष्ठमिमा ब्रह्माण्यृच्यन्ते युवभ्याम् ॥६॥
इयं मनीषा इयमश्विना गीरिमां सुवृक्तिं वृषणा जुषेथाम् ।
इमा ब्रह्माणि युवयून्यग्मन्यूयं पात स्वस्तिभिः सदा नः ॥७॥

*ā viśvavārāśvinā gataṁ naḥ pra tatsthānamavāchi vāṁ pṛthivyām |*
*aśvo na vājī śunapṛṣṭho asthādā yatsedathurdhruvase na yonim ||1||*
*siṣakti sā vāṁ sumatiśchaniṣṭhātāpi gharmo manuṣo duroṇe |*
*ye vāṁ samudrāntsaritaḥ pipartyetagvā chinna suyujā yujānaḥ ||2||*
*yāni sthānānyaśvinā dadhāthe divo yahvīṣvoṣadhīṣu vikṣu |*
*ni parvatasya mūrdhani sadanteṣaṁ janāya dāśuṣe vahantā ||3||*
*chaniṣṭaṁ devā oṣadhīṣvapsu yadyogyā aśnavaithe ṛṣīṇām |*
*purūṇi ratnā dadhatau nya1sme anu pūrvāṇi chakhyathuryugāni ||4||*
*śuśruvāṁsā chidaśvinā purūṇyabhi brahmāṇi chakṣāthe ṛṣīṇām |*
*prati pra yātaṁ varamā janāyāsme vāmastu sumatiśchaniṣṭhā ||5||*
*yo vāṁ yajño nāsatyā haviṣmān kṛtabrahmā samaryo3 bhavāti |*
*upa pra yātaṁ varamā vasiṣṭhamimā brahmāṇyṛchyante yuvabhyām ||6||*
*iyaṁ manīṣā iyamaśvinā gīrimāṁ suvṛktiuṁ vṛṣaṇā juṣethām |*
*imā brahmāṇi yuvayūnyagmanyūyaṁ pāta svastibhiḥ sadā naḥ ||7||*

ऋ. (Rv.) ७.७१.१-६

अप स्वसुरुषसो नग्जिहीते रिणक्ति कृष्णीररुषाय पन्थाम् ।
अश्वामघा गोमघा वां हुवेम दिवा नक्तं शरुमस्मद्युयोतम् ॥१॥
उपायातं दाशुषे मर्त्याय रथेन वाममश्विना वहन्ता ।
युयुतमस्मदनिराममीवां दिवा नक्तं माध्वी त्रासीथां नः ॥२॥
आ वां रथमवमस्यां व्युष्टौ सुम्नायवो वृषणो वर्तयन्तु ।
स्यूमगभस्तिमृतयुग्भिरश्वैराश्विना वसुमन्तं वहेथाम् ॥३॥
यो वां रथो नृपती अस्ति वोळहा त्रिबन्धुरो वसुमाँ उस्रयामा ।
आ न एना नासत्योप यातमभि यद्वां विश्वप्स्न्यो जिगाति ॥४॥
युवं च्यवानं जरसोऽमुमुक्तं नि पेदव ऊहथुराशुमश्वम् ।
निरंहसस्तमसः स्पर्तमत्रिं नि जाहुषं शिथिरे धातमन्तः ॥५॥
इयं मनीषा इयमश्विना गीरिमां सुवृक्तिं वृषणा जुषेथाम् ।
इमा ब्रह्माणि युवयून्यग्मन् यूयं पात स्वस्तिभिः सदा नः ॥६॥

*apa svasuruṣaso nagjihīte riṇakti kṛṣṇīraruṣāya panthām |*
*aśvāmaghā gomaghā vāṁ huvema divā naktaṁ śarumasmadyuyotam ||1||*
*upāyātaṁ dāśuṣe martyāya rathena vāmamaśvinā vahantā |*
*yuyutamasmadanirāmamīvāṁ divā naktaṁ mādhvī trāsīthāṁ naḥ ||2||*
*ā vāṁ rathamavamasyāṁ vyuṣṭau sumnāyavo vṛṣaṇo vartayantu |*
*syūmagabhastimṛtayugbhiraśvairāśvinā vasumantaṁ vahethām ||3||*
*yo vāṁ ratho nṛpatī asti voḷahā tribandhuro vasumām̐ usrayāmā |*
*ā na enā nāsatyopa yātamabhi yadvāṁ viśvapsnyo jigāti ||4||*
*yuvaṁ chyavānaṁ jaraso'mumuktaṁ ni pedava ūhathurāśumaśvam |*
*niraṁhasastamasaḥ spartamatriṁ ni jāhuṣaṁ śithire dhātamantaḥ ||5||*
*iyaṁ manīṣā iyamaśvinā gīrimāṁ suvṛktiṁ vṛṣaṇā juṣethām |*
*imā brahmāṇi yuvayūnyagman yūyaṁ pāta svastibhiḥ sadā naḥ ||6||*

ऋ. (Rv.) ७.७२.१-५

आ गोमता नासत्या रथेनाश्वावता पुरुश्चन्द्रेण यातम् ।
अभि वां विश्वा नियुतः सचन्ते स्पार्हया श्रिया तन्वा शुभाना ॥१॥
आ नो देवेभिरुप यातमर्वाक् सजोषसा नासत्या रथेन ।
युवोर्हि नः सख्या पित्र्याणि समानो बन्धुरुत तस्य वित्तम् ॥२॥
उदु स्तोमासो अश्विनोरबुध्रंजामि ब्रह्माण्युषसश्च देवीः ।
आविवासन्नोदसी धिष्ण्येमे अच्छा विप्रो नासत्या विवक्ति ॥३॥
वि चेदुच्छन्त्यश्विना उषासः प्र वां ब्रह्माणि कारवो भरन्ते ।
ऊर्ध्वं भानुं सविता देवो अश्रेद् बृहदग्नयः समिधा जरन्ते ॥४॥
आ पश्चातान्नासत्या पुरस्तादाश्विना यातमधरादुदक्तात् ।
आ विश्वतः पांचजन्येन राया यूयं पात स्वस्तिभिः सदा नः ॥५॥
*ā gomatā nāsatyā rathenāśvāvatā puruśchandreṇa yātam |*
*abhi vāṁ viśvā niyutaḥ sachante spārhayā śriyā tanvā śubhānā ||1||*
*ā no devebhirupa yātamarvāk sajoṣasā nāsatyā rathena |*
*yuvorhi naḥ sakhyā pitrayāṇi samāno bandhuruta tasya vittam ||2||*
*udu stomāso aśvinorabudhraṁjāmi brahmāāṇyuṣasaścha devīḥ |*
*āvivāsannodasī dhiṣṇyeme achchhā vipro nāsatyā vivakti ||3||*
*vi cheduchchhantyaśvinā uṣāsaḥ pra vāṁ brahmāṇi kāravo bharante |*
*ūrdhvaṁ bhānuṁ savitā devo aśred bṛhadagnayaḥ samidhā jarante ||4||*
*ā paśchātānnāsatyā purastādāśvinā yātamadharādudaktāt |*
*ā viśvataḥ pāṁchajanyena rāyā yūyaṁ pāta svastibhiḥ sadā naḥ ||5||*

ऋ. (Rv.) ७.७३.१-५

अतारिष्म तमसस्पारमस्य प्रति स्तोमं देवयन्तो दधानाः ।
पुरुदंसा पुरुतमा पुराजामर्त्या हवते अश्विना गीः ॥१॥
न्यु प्रियो मनुषः सादि होता नासत्या यो यजते वन्दते च ।
अश्नीतं मध्वो अश्विना उपाक आ वां वोचे विदथेषु प्रयस्वान् ॥२॥
अहेम यज्ञं पथामुराणा इमां सुवृक्तिं वृषणा जुषेथाम् ।
श्रुष्टीवेव प्रेषितो वामबोधि प्रति स्तोमैर्जरमाणो वसिष्ठः ॥३॥
उप त्या वह्नी गमतो विशं नो रक्षोहणा संभृता वीळुपाणी ।
समन्धांस्यग्मत मत्सराणि मा नो मर्धिष्टमा गतं शिवेन ॥४॥
आ पश्चातान्नासत्या पुरस्तादाश्विना यातमधरादुदक्तात् ।
आ विश्वतः पांचजन्येन राया यूयं पात स्वस्तिभिः सदा नः ॥५॥
*atāriṣma tamasaspāramasya prati stomaṁ devayanto dadhānāḥ |*
*purudaṁsā purutamā purājāmartyā havate aśvinā gīḥ ||1||*
*nyu priyo manuṣaḥ sādi hotā nāsatyā yo yajate vandate cha |*
*aśnītaṁ madhvo aśvinā upāka ā vāṁ voche vidatheṣu prayasvān ||2||*
*ahema yajñaṁ pathāmurāṇā imāṁ suvṛktiṁ vṛṣaṇā juṣethām |*
*śruṣṭīveva preṣito vāmabodhi prati stomairjaramāṇo vasiṣṭhaḥ ||3||*
*upa tyā vahnī gamato viśaṁ no rakṣohaṇā saṁbhṛtā vīḻupāṇī |*
*samandhāṁsyagmata matsarāṇi mā no mardhiṣṭamā gataṁ śivena ||4||*
*ā paśchātānnāsatyā purastādāśvinā yātamadharādudaktāt |*
*ā viśvataḥ pāṁchajanyena rāyā yūyaṁ pāta svastibhiḥ sadā naḥ ||5||*

ऋ. (Rv.) ७.७४.१-६

इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना ।
अयं वामह्वेऽवसे शचीवसू विशंविशं हि गच्छथः ॥१॥
युवं चित्रं ददथुर्भेजनं नरा चोदेथां सूनृतावते ।
अर्वाग्रथं समनसा नि यच्छतं पिबतं सोम्यं मधु ॥२॥
आ यातमुपभूषतं मध्वः पिबतमश्विना ।
दुग्धं पयो वृषणा जेन्यावसू मा नो मर्धिष्टमा गतम् ॥३॥

अश्वासो ये वामुप दाशुषो गृहं युवां दीयन्ति बिभ्रतः ।
मक्षूयुभिर्नरा हयेभिरश्विना देवा यातमस्मयू ॥४॥
अधा ह यन्तो अश्विना पृक्षः सचन्त सूरयः ।
ता यंसतो मघवद्भ्यो ध्रुवं यशश्छर्दिरस्मभ्यं नासत्या ॥५॥
प्र ये ययुरवृकासो रथा इव नृपातारो जनानाम् ।
उत स्वेन शवसा श्रशुवुर्नर उत क्षियन्ति सुक्षितिम् ॥६॥
*imā u vāṁ diviṣṭaya usrā havante aśvinā ।*
*ayaṁ vāmahve'vase śachīvasū viśaṁviśaṁ hi gachchhathaḥ ॥1॥*
*yuvaṁ chitraṁ dadathurbhejanaṁ narā chodethāṁ sūnṛtāvate ।*
*arvāgrathaṁ samanasā ni yachchhataṁ pibataṁ somyaṁ madhu ॥2॥*
*ā yātamupabhūṣataṁ madhvaḥ pibatamaśvinā ।*
*dugdhaṁ payo vṛṣaṇā jenyāvasū mā no mardhiṣṭamā gatam ॥3॥*
*aśvāso ye vāmupa dāśuṣo gṛhaṁ yuvāṁ dīyanti bibhrataḥ ।*
*makṣūyubhirnarā hayebhiraśvinā devā yātamasmayū ॥4॥*
*adhā ha yanto aśvinā pṛkṣaḥ sachanta sūrayaḥ ।*
*tā yaṁsato maghavadbhyo dhruvaṁ yaśaśchhardirasmabhyaṁ nāsatyā ॥5॥*
*pra ye yayuravṛkāso rathā iva nṛpātāro janānām ।*
*uta svena śavasā śraśuvurnara uta kṣiyanti sukṣitim ॥6॥*

य. (Yv.) ३३.८८

आ यातमुप भूषतं मध्वः पिबतमश्विना।
दुग्धं पयो वृषणा जेन्यावसू मा नो मर्धिष्टमा गतम्॥८८॥
*ā yātamupa bhūṣataṁ madhvaḥ pibatamaśvinā ।*
*dugdhaṁ payo vṛṣaṇā jenyāvasū mā no mardhiṣṭamā gatam ॥88॥*

६. अहिः (Ahiḥ) - ऋ. (Rv.) ७.३४.१६

अब्जामुक्थैरहिं गृणीषे बुध्ने नदीनां रजःसु षीदन् ॥१६॥
*abjāmukthairahiṁ gṛṇīṣe budhne nadīnāṁ rajaḥsu ṣīdan ॥16॥*

७. अहिर्बुध्न्यः (Ahirbudhnyaḥ) - ऋ. (Rv.) ७.३४.१७

मा नोऽहिर्बुध्न्यो रिषे धान्मा यज्ञो अस्य स्रिधदृतायोः ॥१७॥
*mā no'hirbudhnyo riṣe dhānmā yajño asya sridhadṛtāyoḥ ॥17॥*

८. आदित्यः (Ādityaḥ) - ऋ. (Rv.) ७.६६.४-१३

यदद्य सूर उदितेनागा मित्रो अर्यमा। सुवाति सविता भगः ॥४॥
सुप्रावीरस्तु स क्षयः प्र नु यामन्त्सुदानवः। ये नो अंहोऽतिपिप्रति ॥५॥
उत स्वराजो अदितिरदब्धस्य व्रतस्य ये। महो राजान ईशते ॥६॥
प्रति वां सूर उदिते मित्रं गृणीषे वरुणम्। अर्यमणं रिशादसम् ॥७॥
राया हिरण्यया मतिरियमवृकाय शवसे। इयं विप्रा मेधसातये ॥८॥
ते स्याम देव वरुण ते मित्र सूरिभिः सह। इषं स्वश्च धीमहि ॥९॥
बहवः सूरचक्षसोऽग्निजिह्वा ऋतावृधः ।
त्रीणि ये येमुर्विदथानि धीतिभिर्विश्वानि परिभूतिभिः ॥१०॥
वि ये दधुः शरदं मासमादहर्यज्ञमक्तुं चादृचम् ।
अनाप्यं वरुणो मित्रो अर्यमा क्षत्रं राजान आशत ॥११॥
तद्वो अद्य मनामहे सूक्तैः सूर उदिते ।
यदोहते वरुणो मित्रो अर्यमा यूयमृतस्य रथ्यः ॥१२॥
ऋतावान् ऋतजाता ऋतावृधो घोरासो अनृतद्विषः ।
तेषां वः सुम्ने सुच्छर्दिष्टमे नरः स्याम ये च सूरयः ॥१३॥
*yadadya sūra uditenāgā mitro aryamā । suvāti savitā bhagaḥ ॥4॥*
*suprāvīrastu sa kṣayaḥ pra nu yāmantsudānavaḥ । ye no aṁho'tipiprati ॥5॥*
*uta svarājo aditiradabdhasya vratasya ye । maho rājāna īśate ॥6॥*
*prati vāṁ sūra udite mitraṁ gṛṇīṣe varuṇam । aryamaṇaṁ riśādasam ॥7॥*
*rāyā hiraṇyayā matiriyamavṛkāya śavase । iyaṁ viprā medhasātaye ॥8॥*

*te syāma deva varuṇa te mitra sūribhiḥ saha । iṣaṁ svaścha dhīmahi ॥9॥*
*bahavaḥ sūrachakṣaso'ginajihvā ṛtāvṛdhaḥ ।*
*trīṇi ye yemurvidathāni dhītibhirviśvāni paribhūtibhiḥ ॥10॥*
*vi ye dadhuḥ śaradaṁ māsamādaharyajñamaktuṁ chādṛcham ।*
*anāpyaṁ varuṇo mitro aryamā kṣatraṁ rājāna āśata ॥11॥*
*tadvo adya manāmahe sūktaiḥ sūra udite ।*
*yadohate varuṇo mitro aryamā yūyamṛtasya rathyaḥ ॥12॥*
*ṛtāvān ṛtajātā ṛtāvṛdho ghorāso anṛtadviṣaḥ ।*
*teṣāṁ vaḥ sumne suchchhardiṣṭame naraḥ syāma ye cha sūrayaḥ ॥13॥*

९. आदित्याः (Ādityāḥ) - ऋ. (Rv.) ७.५१.१-३; ७.५२.१-३

ऋ. (Rv.) ७.५१.१-३

आदित्यानामवसा नूनतने सक्षीमहि शर्मणा शंतमेन ।
अनागास्त्वे अदितित्वे तुरास इमं यज्ञं दधतु श्रोषमाणः ॥१॥
आदित्यासो अदितिर्मादयन्तां मित्रो अर्यमा वरुणो रजिष्ठाः ।
अस्माकं सन्तु भुवनस्य गोपाः पिबन्तु सोममवसे नो अद्य ॥२॥
आदित्या विश्वे मरुतश्च विश्वे देवाश्च विश्व ऋभवश्च विश्वे ।
इन्द्रो अग्निरश्विना तुष्टुवाना यूयं पात स्वस्तिभिः सदा नः ॥३॥
*ādityānāmavasā nūnatane sakṣīmahi śarmaṇā śaṁtamena ।*
*anāgāstve adititve turāsa imaṁ yajñaṁ dadhatu śroṣamāṇaḥ ॥1॥*
*ādityāso aditirmādayantāṁ mitro aryamā varuṇo rajiṣṭhāḥ ।*
*asmākaṁ santu bhuvanasya gopāḥ pibantu somamavase no adya ॥2॥*
*ādityā viśve marutaścha viśve devāścha viśva ṛbhavaścha viśve ।*
*indro agniraśvinā tuṣṭuvānā yūyaṁ pāta svastibhiḥ sadā naḥ ॥3॥*

ऋ. (Rv.) ७.५२.१-३

आदित्यासो अदित्यः स्याम पूर्देवत्रा वसवो मर्त्यत्रा ।
सनेम मित्रावरुणा सनन्तो भवेम द्यावापृथिवी भवन्तः ॥१॥
मित्रस्तन्नो वरुणो मामहन्त शर्म तोकाय तनयाय गोपाः ।
मा वो भुजेमान्यजातमेनो मा तत्कर्म बसवो यच्चयध्वे ॥२॥
तुरण्यवोऽङ्गिरसो नक्षन्त रत्नं देवस्य सवितुरियानाः ।
पिता च तन्नो महान्यजत्रो विश्वे देवाः समनसो जुषन्त ॥३॥

१०. आपः (Āpaḥ) - ऋ. (Rv.) ७.४७.१-४; ७.४९.१-४; य. (Yv.) १२.३५

ऋ. (Rv.) ७.४७.१-४

आपो यं वः प्रथमं देवयन्त इन्द्रपानमूर्मिमकृण्वतेळः ।
तं वो वयं शुचिमरिप्रमद्य घृतप्रुषं मधुमन्तं वनेम ॥१॥
तमुर्मिमापो मधुमत्तमं वोऽपां नपादवत्वाशुहेमा ।
यस्मिन्निन्द्रो वसुभिर्मादयाते तमश्याम देवयन्तो वो अद्य ॥२॥
शतपवित्राः स्वधया मदन्तीर्देवीर्देवानामपि यन्ति पाथः ।
ता इन्द्रस्य न मिनन्ति व्रतानि सिन्धुभ्यो हव्यं घृतवज्जुहोत ॥३॥
याः सूर्यो रश्मिभिराततान याभ्य इन्द्रो अरदद् गातुमूर्मिम् ।
ते सिन्धवो वरिवो धातना नो यूयं पात स्वस्तिभिः सदा नः ॥४॥
*āpo yaṁ vaḥ prathamaṁ devayanta indrapānamūrmimakṛṇvateḷaḥ ।*
*taṁ vo vayaṁ śuchimaripramadya ghṛtapruṣaṁ madhumantaṁ vanema ॥1॥*
*tamurmimāpo madhumattamaṁ vo'pāṁ napādavatvāśuhemā ।*
*yasminnindro vasubhirmādayāte tamaśyāma devayanto vo adya ॥2॥*
*śatapavitrāḥ svadhayā madantīrdevīrdevānāmapi yanti pāthaḥ ।*
*tā indrasya na minanti vratāni sindhubhyo havyaṁ ghṛtavajjuhota ॥3॥*
*yāḥ sūryo raśmibhirātatāna yābhya indro aradad gātumūrmim ।*
*te sindhavo varivo dhātanā no yūyaṁ pāta svastibhiḥ sadā naḥ ॥4॥*

ऋ. (Rv.) ७.४९.१-४

समुद्रज्येष्ठाः सलिलस्य मध्यात्पुनाना यन्त्यनिविशमानाः ।
इन्द्रो या वज्री वृषभो रराद ता आपो देवीरिह म मवन्तु ॥१॥
या आपो दिव्या उत वा स्रवन्ति खनित्रिमा उत वा याः स्वयंजाः ।
समुद्रार्था याः शुचयः पावकास्ता आपो देवीरिह मामवन्तु ॥२॥
यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यज्जनानाम् ।
मधुश्चुतः शुचयो याः पावकास्ता आपो देवीरिह मामवन्तु ॥३॥
यासु राजा वरुणो यासु सोमो विश्वे देवा यासूर्जं मदान्त ।
वैश्वानरो यास्वग्निः प्रविष्टस्ता आपो देवीरिह मामवन्तु ॥४॥

*samudrajyeṣṭhāḥ salilasya madhyātpunānā yantyaniviśamānāḥ ।*
*indro yā vajrī vṛṣabho rarāda tā āpo devīriha ma mavantu ॥1॥*
*yā āpo divyā uta vā sravanti khanitrimā uta vā yāḥ svayaṁjāḥ ।*
*samudrārthā yāḥ śuchayaḥ pāvakāstā āpo devīriha māmavantu ॥2॥*
*yāsāṁ rājā varuṇo yāti madhye satyānṛte avapaśyajjanānām ।*
*madhuśchutaḥ śuchayo yāḥ pāvakāstā āpo devīriha māmavantu ॥3॥*
*yāsu rājā varuṇo yāsu somo viśve devā yāsūrjaṁ madānta ।*
*vaiśvānaro yāsvagniḥ praviṣṭastā āpo devīriha māmavantu ॥4॥*

य. (Yv.) १२.३५

आपो देवीः प्रतिगृभ्णीत भस्मैतत्स्योने कृणुध्वं सुरभाऽउ लोकं ।
तस्मै नमन्तां जनयः सुपत्नीर्मातेव पुत्रं बिभृताप्स्वेनत् ॥३५॥

*āpo devīḥ pratigṛbhṇīta bhasmaitatsyone kṛṇudhvaṁ surabhā'u lokaṁ ।*
*tasmai namantāṁ janayaḥ supatnīrmāteva putraṁ bibhṛtāpsvenat ॥35॥*

११. आप्रम् (Āpram) - ऋ. (Rv.) ७.२.१-११

जुषस्व नः समिधमग्ने अद्य शोचा बृहद्यजतं धूममृण्वन् ।
उप स्पृश दिव्यं सानु स्तू पैः सं रश्मिभिस्ततनः सूर्यस्य ॥१॥
नराशंसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः ।
ये सुक्रतवः शुचयो धियं धाः स्वदन्ति देवा उभयानि हव्या ॥२॥
ईळेन्यं वो असुरं रसुदक्षमन्तर्दूतं रोदसी सत्यवाचम् ।
मनुष्वदग्निं मनुना समिद्धं समध्वराय सदमिन्महेम ॥३॥
सपर्यवो भरमाणां अभिज्ञु प्र वृंजते नमसा बर्हिरग्नौ ।
आजुह्वाना घृतपृष्ठं पृषद्वदध्वर्यवो हविषा मर्जयध्वम् ॥४॥
स्वाध्यो३ वि दुरो देवयन्तोऽशिश्रयू रथयुर्देवताता ।
पूर्वी शिशुं न मातरा रिहाणे समग्रुवो न समनेष्वंजन् ॥५॥
उत योषणे दिव्ये मही न उषासानक्ता सुदुघेव धेनुः ।
बर्हिषदा पुरहूते मघोनी आ यज्ञिये सुविताय श्रयेताम् ॥६॥
विप्रा यज्ञेषु मानुषेषु कारू मन्ये वां जातवेदसा यजध्यै ।
ऊर्ध्वं नो अध्वरं कृतं हवेषु ता देवेषु वनथो वार्याणि ॥७॥
आ भारती भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः ।
सरस्वती सारस्वतेभिरर्वाक् तिस्रो देवीर्बर्हिरेदं सदन्तु ॥८॥
तन्नस्तुरीपमध पोषयित्नु देव त्वष्टर्वि रराणः स्यस्व ।
यतो वीरः कर्मण्यः सुदक्षो यक्तग्रावा जायते देवकामः ॥९॥
वनस्पतेऽव सुजोप देवानग्निर्हविः शमिता सूदयाति ।
सेदु होता सत्यतरो यजाति यथा देवानां जनिमानि वेद ॥१०॥
आ याह्यग्नपे समिधानो अर्वाङ् इन्द्रेण देवैः सरथं तुरेभिः ।
बर्हिर्न आस्तामदितिः सुपुत्रा स्वाहा देवा अमृता मादयन्ताम् ॥११॥

*juṣasva naḥ samidhamagne adya śochā bṛhadyajataṁ dhūmamṛṇvan ।*
*upa spṛśa divyaṁ sānu stū paiḥ saṁ raśmibhistatanaḥ sūryasya ॥1॥*
*narāśaṁsasya mahimānameṣāmupa stoṣāma yajatasya yajñaiḥ ।*

*ye sukratavaḥ śuchayo dhiyaṁ dhāḥ svadanti devā ubhayāni havyā //2 //*
*īḻenyaṁ vo asuraṁ rasudakṣamantardūtaṁ rodasī satyavācham /*
*manuṣvadagiṁna manunā samiddhaṁ samadhvarāya sadaminmahema //3 //*
*saparyavo bharamāṇāṁ abhijñu pra vṛṁjate namasā barhiragnau /*
*ājuhvānā ghṛtapṛṣṭhaṁ pṛṣadvadadhvaryavo haviṣā marjayadhvam //4 //*
*svādhyo3 vi duro devayanto'śiśrayū rathayurdevatātā /*
*pūrvī śiśuṁ na mātarā rihāṇe samagruvo na samaneṣvaṁjan //5 //*
*uta yoṣaṇe divye mahī na uṣāsānaktā sudugheva dhenuḥ /*
*barhiṣadā purahūte maghonī ā yajñiye suvitāya śrayetām //6 //*
*viprā yajñeṣu mānuṣeṣu kārū manye vāṁ jātavedasā yajadhyai /*
*ūrdhvaṁ no adhvaraṁ kṛtaṁ haveṣu tā deveṣu vanatho vāryāṇi //7 //*
*ā bhāratī bhāratībhiḥ sajoṣā iḻā devairmanuṣyebhiragniḥ /*
*sarasvatī sārasvatebhirarvāk tisro devīrbarhiredaṁ sadantu //8 //*
*tannasturīpamadha poṣayinnu deva tvaṣṭarvi rarāṇaḥ syasva /*
*yato vīraḥ karmaṇyaḥ sudakṣo yaktagrāvā jāyate devakāmaḥ //9 //*
*vanaspate'va sujopa devānagnirhaviḥ śamitā sūdayāti /*
*sedu hotā satyataro yajāti yathā devānāṁ janimāni veda //10 //*
*ā yāhyagnape samidhāno arvāṅ indreṇa devaiḥ sarathaṁ turebhiḥ /*
*barhirna āstāmaditiḥ suputrā svāhā devā amṛtā mādayantām //11 //*

१२. इन्द्रः (Indraḥ) - ऋ. (Rv.) ७.१८.१-२१; ७.१९.१-११; ७.२०.१-१०; ७.२१.१-१०; ७.२२.१-९; ७.२३.१-६; ७.२४.१-६; ७.२५.१-६; ७.२६.१-५; ७.२७.१-५; ७.२८.१-५; ७.२९.१-५; ७. ३०.१-५; ७.३१.१-१२; ७.३२.१-२७; ७.५५.२-८; ७.९७.१; ७.९८.१-६; ७.१०४.८; १६; १९-२२; २४; य. (Yv.) १२.३४; २०.५४; २६.१०; ३३.१८; अ. (Av.) २०.१२.१-६; २०.१८.४-६; २०.१७.१२; २०.५९.३-४; २०.७३.१-३; २०.८२.१-२; २०.८७.१-६; २०.११७.१-३

ऋ. (Rv.) ७.१८.१-२१

त्वे ह यत्पिरश्चिन्न इन्द्र विश्वा वामा जरितारो असन्वन् ।
त्वे गावः सुदुघास्त्वे ह्यश्वास्त्वं वसु देवयते वनिष्ठः ॥१॥
राजेव हि जनिभिः क्षेष्येवाव द्युभिरभि विदुष्कविः सन् ।
पिशा गिरो मघवन् गोभिरश्वैस्त्वायतः शिशीहि राये अस्मान् ॥२॥
इमा उ त्वा पस्पृधानासो अत्र मन्द्रा गिरो देवयन्तीरुप स्थुः ।
अर्वाची ते पथ्या राय एतु स्याम ते सुमताविन्द्र शर्मन् ॥३॥
धेनुं न त्वा सूयवसे दुदुक्षन्नुप ब्रह्माणि ससृजे वसिष्ठः ।
त्वामिन्मे गोपतिं विश्व आहा न इन्द्रः सुमतिं गन्त्वच्छ ॥४॥
अर्णांसि चित्पप्रथाना सुदास इन्द्रो गाधान्यकृणोत्सुपारा ।
शर्धन्तं शिम्युमुचथस्य नव्यः शापं सिन्धूनामकृणोदशस्तीः ॥५॥
पुरोळा इत्तुर्वशो यक्षुरासीद्राये मत्स्यासो निशिता अपीव ।
श्रुष्टिं चक्रुर्भृगवो द्रुह्यवश्च सखा सखायमतरद्विषूचोः ॥६॥
आ पक्थासो भलानसो भनन्तालिनासो विषाणिनः शिवासः ।
आ योऽनयत्सधमा आर्यस्य गव्या तृत्सुभ्यो अजगन्युधा नृन् ॥७॥
दुराध्यो३ अदितिं स्रेवयन्तोऽचेतसो वि जगृभ्रे परुष्णीम् ।
मह्नाविव्यक् पृथिववीं पत्यमानः पशुष्कविरशयच्चायमानः ॥८॥
ईयुरर्थं न न्यर्थं परुष्णीमाशुश्चनेदभिपित्वं जगाम ।
सुदास इन्द्रः सुतुकाँ अमित्रानरन्धयन्मानुषे वध्रिवाचः ॥९॥
ईयुर्गावो न यवसादगोपा यथाकृतमभि मित्रं चितासः ।
पृश्निगावः पृश्निनिप्रेषितासः श्रुष्टिं चक्रुर्नियुतो रन्तयश्च ॥१०॥
एकं च यो विंशतिं च श्रवस्या वैकर्णयोर्जनान्राजा न्यस्तः ।
दस्मो न सद्मन्नि शिशाति बर्हिः शूरः सर्गमकृणोदिन्द्र एषाम् ॥११॥
अध श्रुतं कवषं वृद्धमप्स्वनु द्रुह्युं नि वृणग्वज्रबाहुः ।
वृणाना अत्र सख्याय सख्यं त्वायन्तो ये अमदन्ननु त्वा ॥१२॥

वि सद्यो विश्वा दृंहितान्येषामिन्द्रः पुरः सहसा सप्त दर्दः ।
व्यानवस्य तृत्सवे गयं भाग्जेष्म पूरुं विदथे मृध्रवाचम् ॥१३॥
नि गव्यवोऽनवो द्रुह्यवश्च षष्टिः शता सुषुपुः षट् सहस्रा ।
षष्टिर्वीरासो अधि षड् दुवोयु विश्वेदिन्द्रस्य वीर्या कृतानि ॥१४॥
इन्द्रणैते तृत्सवो वेविषाणा आपो न सृष्टा अधवन्त नीचीः ।
दुर्मित्रसः प्रकलविन् मिमाना जहुर्विश्वानि भोजना सुदासे ॥१५॥
अर्धं वीरस्य शृतपामनिन्द्रं पराश र्धन्तं ननुदे अभि क्षाम् ।
इन्द्रो मन्युं मन्युम्यो मिमाय भेजे पथो वर्तनि पत्यमानः ॥१६॥
आध्रेण चित्तद्वेकं चकार सिंह्यं चित्पेत्वेना जघान ।
अव स्रक्तीर्वेश्यावृश्चदिन्द्रः प्रायच्छद्विश्वा भोजना सुदासे ॥१७॥
शश्वन्तो हि शत्रवो रारधुष्टे भेदस्य चिच्छर्धतो विन्द रन्धिम् ।
मर्तौं एनः स्तुवतो यः कृणोति तिग्मं तस्मिन्नि जहि वज्रमिन्द्र ॥१८॥
आवदिन्द्रं यमुना तृत्सवश्च प्रात्र भेदं सर्वताता मुषायत् ।
अजासश्च शिग्रवो यक्षवश्च बलिं शीर्षाणि जभ्रुरश्व्यानि ॥१९॥
न त इन्द्र सुमतयो न रायः संचक्षे पूर्वा उषसो न नूत्नाः ।
देवकं चिन्मान्यमानं जघन्थाव त्मना बृहतः शम्बरं भेत् ॥२०॥
प्र ये गृहादममदुस्त्वाया पराशरः शतयातुर्वसिष्ठः ।
न ते भोजस्य सख्यं मृषन्ताधा सुरिभ्यः सुदिना व्युच्छान् ॥२१॥

*tve ha yatpiraśchinna indra viśvā vāmā jaritāro asanvan /*
*tve gāvaḥ sudughāstve hyaśvāstvaṁ vasu devayate vaniṣṭhaḥ //1 //*
*rājeva hi janibhiḥ kṣeṣyevāva dyubhirabhi viduṣkaviḥ san /*
*piśā giro maghavan gobhiraśvaistvāyataḥ śiśīhi rāye asmān //2 //*
*imā u tvā paspṛdhānāso atra mandrā giro devayantīrupa sthuḥ /*
*arvāchī te pathyā rāya etu syāma te sumatāvindra śarman //3 //*
*dhenuṁ na tvā sūyavase dudukṣannupa brahmāṇi sasṛje vasiṣṭhaḥ /*
*tvāminme gopatiṁ viśva āhā na indraḥ sumatiṁ gantvachchha //4 //*
*arṇāṁsi chitpaprathānā sudāsa indro gādhānyakṛṇotsupārā /*
*śardhantaṁ śimyumuchathasya navyaḥ śāpaṁ sindhūnāmakṛṇodaśastīḥ //5 //*
*puroḷā itturvaśo yakṣurāsīdrāye matsyāso niśitā apīva /*
*śruṣṭiṁ chakrurbhṛgavo druhyavaścha sakhā sakhāyamataradviṣūchoḥ //6 //*
*ā pakthāso bhalānaso bhanantālināso viṣāṇinaḥ śivāsaḥ /*
*ā yo'nayatsadhamā āryasya gavyā tṛtsubhyo ajaganyudhā nṛn //7 //*
*durādhyo3 aditiṁ srevayanto'chetaso vi jagṛbhre paruṣṇīm /*
*mahnāvivyak pṛthivavīṁ patyamānaḥ paśuṣkaviraśayachchāyamānaḥ //8 //*
*īyurarthaṁ na nyarthaṁ paruṣṇīmāśuśchanedabhipitvaṁ jagāma /*
*sudāsa indraḥ sutukām̐ amitrānarandhayanmānuṣe vadhrivāchaḥ //9 //*
*īyurgāvo na yavasādagopā yathākṛtamabhi mitraṁ chitāsaḥ /*
*pṛśnigāvaḥ pṛśninipreṣitāsaḥ śruṣṭiṁ chakrurniyuto rantayaścha //10 //*
*ekaṁ cha yeā viṁśatiṁ cha śravasyā vaikarṇayorjanānnājā nyastaḥ /*
*dasmo na sadmanni śiśāti barhiḥ śūraḥ sargamakṛṇodindra eṣām //11 //*
*adha śrutaṁ kavaṣaṁ vṛddhamapsvanu druhyuṁ ni vṛṇagvajrabāhuḥ /*
*vṛṇānā atra sakhyāya sakhyaṁ tvāyanto ye amadannanu tvā //12 //*
*vi sadyo viśvā dṛṁhitānyeṣāmindraḥ puraḥ sahasā sapta dardaḥ /*
*vyānavasya tṛtsave gayaṁ bhāgjeṣma pūruṁ vidathe mṛdhravācham //13 //*
*ni gavyavo'navo druhyavaścha ṣaṣṭiḥ śatā suṣupuḥ ṣaṭ sahasrā /*
*ṣaṣṭirvīrāso adhi ṣaḍ duvoyu viśvedindrasya vīryā kṛtāni //14 //*
*indraṇaite tṛtsavo veviṣāṇā āpo na sṛṣṭā adhavanta nīchīḥ /*
*durmitrasaḥ prakalavin mimānā jahurviśvāni bhojanā sudāse //15 //*
*ardhaṁ vīrasya śṛtapāmanindraṁ parāśa rdhantaṁ nanude abhi kṣām /*
*indro manyuṁ manyumyo mimāya bheje patho vartani patyamānaḥ //16 //*
*ādhreṇa chittadvekaṁ chakāra siṁhyaṁ chitpetvenā jaghāna /*
*ava sraktīrveśyāvṛśchadindraḥ prāyachchhadviśvā bhojanā sudāse //17 //*

*śaśvanto hi śatravo rāradhuṣṭe bhedasya chichchhardhato vinda randhim ।*
*mataṁār enaḥ stuvato yaḥ kṛṇoti tigmaṁ tasminni jahi vajramindra ॥18॥*
*āvadindraṁ yamunā tṛtsavaścha prātra bhedaṁ sarvatātā muṣāyat ।*
*ajāsaścha śigravo yakṣavaścha baliṁ śīrṣāṇi jabhruraśvyāni ॥19॥*
*na ta indra sumatayo na rāyaḥ saṁchakṣe pūrvā uṣaso na nūtnāḥ ।*
*devakaṁ chinmānyamānaṁ jaghanthāva tmanā bṛhataḥ śambaraṁ bhet ॥20॥*
*pra ye gṛhādamamadustvāyā parāśaraḥ śatayāturvasiṣṭhaḥ ।*
*na te bhojasya sakhyaṁ mṛṣantādhā suribhyaḥ sudinā vyuchchhān ॥21॥*

ऋ. (Rv.) ७.१९.१-११

यस्तिग्मश्रृंगो वृषभो न भीम एकः कृष्टीश्च्यावयति प्र विश्वाः ।
यः शश्वतो अदाशुषो गयस्य प्रयन्तासि सुष्वितराय वेदः ॥१॥
त्वं ह त्यदिन्द्र कुत्समावः शुश्रूषमाणस्तन्वा समर्ये ।
दासं यच्छुष्णं कुयवं न्यस्मा अरन्धय आर्जुनेयाय शिक्षन् ॥२॥
त्वं धृष्णो धृषता वीतहव्यं प्रावो विश्वाभिरूतिभिः सुदासम् ।
प्र पौरुकुत्सिं त्रसदस्युमावः क्षेत्रसाता वृत्रत्येषु पुरुम् ॥३॥
त्वं नृभिर्नृमणो देववीतौ भूरीणि वृत्रा हर्यश्व हंसि ।
त्वं नि दस्युं चुमुरिं धुनिं चास्वापयो दभीतये सुहन्तु ॥४॥
तव च्यौत्नानि वज्रहस्त तानि नव यत्पुरो नवतिं च सद्यः ।
निवेशने शततमाविवेषीरहंच वृत्रं नमुचिमुताहन् ॥५॥
सना ता त इन्द्र भोजनानि रातहव्याय दाशुषे सुदासे ।
वृष्णे ते हरी वृषणा युनज्मि व्यन्तु ब्रह्माणि पुरुशाक वाजम् ॥६॥
मा ते अस्यां सहसावन्परिष्टावघाय भूम हरिवः परादै ।
त्रायस्व नोऽवृकेभिर्वरूथैस्तव प्रियासः सूरिषु स्याम ॥७॥
प्रियास इत्ते मघवन्नभिष्टौ नरो मदेम शरणे सखायः ।
नि तुर्वशं नि याद्वं शिशीह्यतिथिग्वाय शंस्यं करिष्यन् ॥८॥
सद्यश्चिन्नु ते मघवन्नभिष्टौ नरः शंसन्त्युक्थशाम उक्था ।
ये ते हवेभिर्वि पणींरदाशन्नस्मान्वृणीष्व युज्याय तस्मै ॥९॥
एते स्तोमा नरां नृतम तुभ्यस्मद्र्यंचो ददतो मघानि ।
तेषामिन्द्र वृत्रहत्ये शिवो भूः सखा च शूरोऽविता च नृणाम् ॥१०॥
नू इन्द्र शूर स्तवमान ऊती ब्रह्मजूतस्तन्वा वावृधस्व ।
उप नो वाजान्मिमीह्युप स्तीन्यूयं पात स्वस्तिभिः सदा नः ॥११॥

*yastigmaśṛṁgo vṛṣabho na bhīma ekaḥ kṛṣṭīśchyāvayati pra viśvāḥ ।*
*yaḥ śaśvato adāśuṣo gayasya prayantāsi suṣvitarāya vedaḥ ॥1॥*
*tvaṁ ha tyadindra kutsamāvaḥ śuśrūṣamāṇastanvā samarye ।*
*dāsaṁ yachchhuṣṇaṁ kuyavaṁ nyasmā arandhaya ārjuneyāya śikṣan ॥2॥*
*tvaṁ dhṛṣṇo dhṛṣatā vītahavyaṁ prāvo viśvābhirūtibhiḥ sudāsam ।*
*pra paurukutiṁsa trasadasyumāvaḥ kṣetrasātā vṛtratyeṣu purum ॥3॥*
*tvaṁ nṛbhirnṛmaṇo devavītau bhūrīṇi vṛtrā haryaśva haṁsi ।*
*tvaṁ ni dasyuṁ chumuriṁ dhuniṁ chāsvāpayo dabhītaye suhantu ॥4॥*
*tava chyautnāni vajrahasta tāni nava yatpuro navatiṁ cha sadyaḥ ।*
*niveśane śatatamāviveṣīrahaṁcha vṛtraṁ namuchimutāhan ॥5॥*
*sanā tā ta indra bhojanāni rātahavyāya dāśuṣe sudāse ।*
*vṛṣṇe te harī vṛṣaṇā yunajmi vyantu brahmāṇi puruśāka vājam ॥6॥*
*mā te asyāṁ sahasāvanpariṣṭāvaghāya bhūma harivaḥ parādai ।*
*trāyasva no'vṛkebhirvarūthaistava priyāsaḥ sūriṣu syāma ॥7॥*
*priyāsa itte maghavannabhiṣṭau naro madema śaraṇe sakhāyaḥ ।*
*ni turvaśaṁ ni yādvaṁ śiśīhyatithigvāya śaṁsyaṁ kariṣyan ॥8॥*
*sadyaśchinnu te maghavannabhiṣṭau naraḥ śaṁsantyukthaśāma ukthā ।*
*ye te havebhirvi paṇīṁradāśannasmānvṛṇīṣva yujyāya tasmai ॥9॥*
*ete stomā narāṁ nṛtama tubhyasmadyraṁcho dadato maghāni ।*
*teṣāmindra vṛtrahatye śivo bhūḥ sakhā cha śūro'vitā cha nṛṇām ॥10॥*

*nū indra śūra stavamāna ūtī brahmajūtastanvā vāvṛdhasva ।*
*upa no vājānmimīhyupa stīnyūyaṁ pāta svastibhiḥ sadā naḥ ॥11॥*

ऋ. (Rv.) ७.२०.१-१०

उग्रो जज्ञे वीर्याय स्वधावांचक्रिरपो नर्यो यत्करिष्यन् ।
जग्मिर्युवा नृषदनमवोभिस्त्राता न इन्द्र एनसो महश्चित् ॥१॥
हन्ता वृत्रमिन्द्रः श्रशुवानः प्रावीन्नु वीरो जरितारमूती ।
कर्ता सुदासे अह वा उ लोकं दाता वसु मुहुरा दाशुषे भूत् ॥२॥
युध्मो अनर्वा खजकृत्समद्वा शूरः सत्राषाड् जनुषेमषाळहः ।
व्यास इन्द्रः पृतनाः स्वोजा अधा विश्वं शत्रूयन्तं जघान ॥३॥
उभे चिदिन्द्र रोदसी महित्वा पप्राथ तविषीभिस्तुविष्मः ।
नि वज्रमिन्द्रो हरिवान्मिमिक्षन्त्समन्धसा मदेषु वा उवोच ॥४॥
वृषा जजान वृषणं रणाय तमु चिन्नारी नर्यं ससूव ।
प्र यः सेनानीरध नृभ्यो अस्तीनः सत्वा गवेष्णः स धृष्णुः ॥५॥
नू चित्स भ्रेषते जनो न रेषन्मनो यो अस्य घोरमाविवासात् ।
यज्ञैर्य इन्द्रे दधते दुवांसि क्षयत्स राय ऋतपा ऋतेजाः ॥६॥
यदिन्द्र पूर्वो अपराय शिक्षन्नयज्ज्यायान् कनीयसो देष्णम् ।
अमृत इत्पर्यासीत दूरमा चित्र चित्र्यं भरा रयिं नः ॥७॥
यस्त इन्द्र प्रियो जनो ददाशदसन्निरेके अद्रिवः सखा ते ।
वयं ते अस्यां सुमतौ चनिष्ठाः स्याम वरूथे अघ्नतो नृपीतौ ॥८॥
एष स्तोमो अचिक्रदद्वृषा त उत स्तामुर्मघवन्नक्रपिष्ट ।
रायस्कामो जरितारं त आगन्त्वमंग शक्र वस्व आ शको नः ॥९॥
स न इन्द्र त्वयताया इषे धास्त्मना च ये मघवानो जुनन्ति ।
वस्वी षु ते जरित्रे अस्तु शक्तिर्यूयं पात स्वस्तिभिः सदा न ॥१०॥

*ugro jajñe vīryāya svadhāvāṁchakrirapo naryo yatkariṣyan ।*
*jagmiryuvā nṛṣadanamavobhistrātā na indra enaso mahaśchit ॥1॥*
*hantā vṛtramindraḥ śraśuvānaḥ prāvīnnu vīro jaritāramūtī ।*
*kartā sudāse aha vā u lokaṁ dātā vasu muhurā dāśuṣe bhūt ॥2॥*
*yudhmo anarvā khajakṛtsamadvā śūraḥ satrāṣāḍ januṣemaṣāḷahaḥ ।*
*vyāsa indraḥ pṛtanāḥ svojā adhā viśvaṁ śatrūyantaṁ jaghāna ॥3॥*
*ubhe chidindra rodasī mahitvā paprātha taviṣībhistuviṣmaḥ ।*
*ni vajramindro harivānmimikṣantsamandhasā madeṣu vā uvocha ॥4॥*
*vṛṣā jajāna vṛṣaṇaṁ raṇāya tamu chinnārī naryaṁ sasūva ।*
*pra yaḥ senānīradha nṛbhyo astīnaḥ satvā gaveṣṇaḥ sa dhṛṣṇuḥ ॥5॥*
*nū chitsa bhreṣate jano na reṣanmano yo asya ghoramāvivāsāt ।*
*yajñairya indre dadhate duvāṁsi kṣayatsa rāya ṛtapā ṛtejāḥ ॥6॥*
*yadindra pūrvo aparāya śikṣannayajjyāyān kanīyaso deṣṇam ।*
*amṛta itparyāsīta dūramā chitra chitrayaṁ bharā rayiṁ naḥ ॥7॥*
*yasta indra priyo jano dadāśadasannireke adrivaḥ sakhā te ।*
*vayaṁ te asyāṁ sumatau chaniṣṭhāḥ syāma varūthe aghnato nṛpītau ॥8॥*
*eṣa stomo achikradadvṛṣā ta uta stāmurmaghavannakrapiṣṭa ।*
*rāyaskāmo jaritāraṁ ta āgantvamaṁga śakra vasva ā śako naḥ ॥9॥*
*sa na indra tvayatāyā iṣe dhāstmanā cha ye maghavāno junanti ।*
*vasvī ṣu te jaritre astu śaktiryūyaṁ pāta svastibhiḥ sadā na ॥10॥*

ऋ. (Rv.) ७.२१.१-१०

असावि देवं गोऋजीकमन्धो न्यस्मिन्निन्द्रो जनुषेमुवोच ।
बोधामसि त्वा हर्यश्व यज्ञैर्बोधा नः स्तोममन्धसो मदेषु ॥१॥
प्र यन्ति यज्ञं विपयन्ति बर्हिः सोममादो विदथे दुध्रवाचः ।
न्यु भ्रियन्ते यशसो गृभादा दूरउपब्दो वृषणो नृषाचः ॥२॥
त्वमिन्द्र स्रवितवा अपस्फः परिष्ठिता अहिना शूर पूर्वीः ।
त्वद्वाक्रे रथ्यो३ न धेना रेजन्ते विश्वा कृत्रिमाणि भीषा ॥३॥

भीमो विवेषायुधेभिरेषामपांसि विश्वा नर्याणि विद्वान् ।
इन्द्रः पुरो जर्हृषाणो वि दूधोद्विवज्रहस्तो महिना जघान ॥४॥
न यातव इन्द्र जूजुवुर्नो न वन्दना शविष्ठ वेद्यभिः ।
स शर्धदर्यो विषुणस्य जन्तोर्मा शिश्नदेवा अपि गुर्ऋतं नः ॥५॥
अभि क्रत्वेन्द्र भूरध ज्मन्न ते विव्यङ्महिमानं रजांसि ।
स्वेना हि वृत्रं शवसा जघन्थ न शत्रुरन्तं विविदद्युधा ते ॥६॥
देवाश्चित्ते असुर्याय पूर्वेऽनु क्षत्राय ममिरे सहांसि ।
इन्द्रो मघानि दयते विषह्येन्द्रं वाजस्य जोहुवन्त सातौ ॥७॥
कीरिश्चिद्धि त्वामवसे जुहावेशानमिन्द्र सौभगस्य भूरेः ।
अवो बभूथ शतमूते अस्मे अभिक्षत्तुस्त्वावतो वरूता ॥८॥
सखायस्त इन्द्र विश्वह स्याम नमोवृधासो महिना तरुत्र ।
वन्वन्तु स्मा तेऽवसा समीके३ भीतिमर्यो वनुषां शवांसि ॥९॥
स न इन्द्र त्वयताया इषे धास्त्मना च ये मघवानो जुनन्ति ।
वस्वी षु ते जरित्रे अस्तु शक्तियूयं पात स्वस्तिभिः सदा नः ॥१०॥

*asāvi devaṁ gorjīkamandho nyasminnindro januṣemuvocha ।*
*bodhāmasi tvā haryaśva yajñairbodhā naḥ stomamandhaso madeṣu ॥1॥*
*pra yanti yajñaṁ vipayanti barhiḥ somamādo vidathe dudhravāchaḥ ।*
*nyu bhriyante yaśaso gṛbhādā dūraupabdo vṛṣaṇo nṛṣāchaḥ ॥2॥*
*tvamindra sravitavā apasphaḥ pariṣṭhitā ahinā śūra pūrvīḥ ।*
*tvadvākre rathyo3 na dhenā rejante viśvā kṛtrimāṇi bhīṣā ॥3॥*
*bhīmo viveṣāyudhebhireṣāmapāṁsi viśvā naryāṇi vidvān ।*
*indraḥ puro jarhṛṣāṇo vi dūdhodvivajrahasto mahinā jaghāna ॥4॥*
*na yātava indra jūjuvurno na vandanā śaviṣṭha vedyabhiḥ ।*
*sa śardhadaryo viṣuṇasya jantormā śiśnadevā api gurṛtaṁ naḥ ॥5॥*
*abhi kratvendra bhūradha jmanna te vivyaṅmahimānaṁ rajāṁsi ।*
*svenā hi vṛtraṁ śavasā jaghantha na śatrurantaṁ vividadyudhā te ॥6॥*
*devāśchitte asuryāya pūrve'nu kṣatrāya mamire sahāṁsi ।*
*indro maghāni dayate viṣahyendraṁ vājasya johuvanta sātau ॥7॥*
*kīriśchiddhi tvāmavase juhāveśānamindra saubhagasya bhūreḥ ।*
*avo babhūtha śatamūte asme abhikṣattustvāvato varūtā ॥8॥*
*sakhāyasta indra viśvaha syāma namovṛdhāso mahinā tarutra ।*
*vanvantu smā te'vasā samīke3 bhītimaryo vanuṣāṁ śavāṁsi ॥9॥*
*sa na indra tvayatāyā iṣe dhāstmanā cha ye maghavāno junanti ।*
*vasvī ṣu te jaritre astu śaktiyūyaṁ pāta svastibhiḥ sadā naḥ ॥10॥*

ऋ. (Rv.) ७.२२.१-९

पिबा सोममिन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वद्रिः। सोतुर्बाहुभ्यां सुयतो नार्वा ॥१॥
यस्ते मदो युज्यश्चारुरस्ति येन वृत्राणि हर्यश्व हंसि। स त्वामिन्द्र प्रभूवसो ममत्तु ॥२॥
बोधा सु मे मघवन्वाचमेमां या ते वसिष्ठो अर्चति प्रशस्तिम्। इमा ब्रह्म सधमादे जुषस्व ॥३॥
श्रुधी हवं विपिपानस्याद्रेर्बोधा विप्रस्यार्चतो मनीषाम्। कृष्वा दुवांस्यन्तमा सचेमा ॥४॥
न ते गिरो अपि मृष्ये तुरस्य न सुष्टुतिमसुर्यस्य विद्वान्। सदा ते नाम स्वयशो विवक्मि॥५॥
भूरि हि ते सवना मानुषेषु भुरि मनीषी हवते त्वामित्। मारे अस्मन्मघवंज्योक्कः ॥६॥
तुभ्येदिमा सवना शूर विश्वा तुभ्यं ब्रह्माणि वर्धना कृणोमि। त्वं नुभिर्हव्यो विश्वधासि ॥७॥
नू चिन्नु ते मन्यमानस्य दस्मोदश्नुवन्ति महिमानमुग्र। न वीर्यमिन्द्र ते न राधः ॥८॥
ये च पूर्व ऋषयो ये च नूत्ना इन्द्र ब्रह्माणि जनयन्त विप्राः।
अस्मे ते सन्त् सख्या शिवानि यूयं पात स्वस्तिभिः सदा नः ॥९॥

*pibā somamindra mandatu tvā yaṁ te suṣāva haryaśvadriḥ ।*
*soturbāhubhyāṁ suyato nārvā ॥1॥*
*yaste mado yujyaśchārurasti yena vṛtrāṇi haryaśva haṁsi ।*
*sa tvāmindra prabhūvaso mamattu ॥2॥*
*bodhā su me maghavanvāchamemāṁ yā te vasiṣṭho archati praśastim ।*
*imā brahma sadhamāde juṣasva ॥3॥*

*śrudhī havaṁ vipipānasyādrerbodhā viprasyārchato manīṣām |*
*kṛṣvā duvāṁsyantamā sachemā ||4 ||*
*na te giro api mṛṣye turasya na suṣṭutimasuryasya vidvān |*
*sadā te nāma svayaśo vivakmi ||5 ||*
*bhūri hi te savanā mānuṣeṣu bhuri manīṣī havate tvāmit |*
*māre asmanmaghavaṁjyokkaḥ ||6 ||*
*tubhyedimā savanā śūra viśvā tubhyaṁ brahmāṇi vardhanā kṛṇomi |*
*tvaṁ nubhirhavyo viśvadhāsi ||7 ||*
*nū chinnu te manyamānasya dasmodaśnuvanti mahimānamugra |*
*na vīryamindra te na rādhaḥ ||8 ||*
*ye cha pūrva ṛṣayo ye cha nūtnā indra brahmāṇi janayanta viprāḥ |*
*asme te sant sakhyā śivāni yūyaṁ pāta svastibhiḥ sadā naḥ ||9 ||*

ऋ. (Rv.) ७.२३.१-६

उदु ब्रह्माण्यैरत श्रवस्येन्द्रं समर्ये महया वसिष्ठ ।
आ यो विश्वानि शवसा ततानोपश्रोता म ईवतो वचांसि ॥१॥
अयामि घोष इन्द्र देवजामिरिरज्यन्त यच्छुरुधो विवाचि ।
नहि स्वमायुश्चिकिते जनेषु तानीदंहांस्यति पर्ष्यस्मान् ॥२॥
युजे रथं गवेषणं हरिभ्यामुप ब्रह्माणि जुजुषाणमस्थुः ।
वि बाधिष्ट स्य रोदसी महित्वेन्द्रो वृत्राण्यप्रती जघन्वान् ॥३॥
आपश्चित्पिप्युः स्तर्यो३ न गावो नक्षन्नृतं जरितारस्त इन्द्र ।
याहि वायुर्न नियुतो नो अच्छा त्वं हि धीभिर्दयसे वि वाजान् ॥४॥
ते त्वा मदा इन्द्र मादयन्तु शुष्मिणं तुविराधसं जरित्रे ।
एको देवत्रा दयसे हि मर्तानस्मिंछूर सवने मादयस्व ॥५॥
एवेदिन्द्रं वृषणं वज्रबाहुं वसिष्ठासो अभ्यर्चन्त्यर्कैः ।
स नः स्तुतो वीरवद्धातु गोमद्यूयं पात स्वस्तिभिः सदा नः ॥६॥

*udu brahmāṇyairata śravasyendraṁ samarye mahayā vasiṣṭha |*
*ā yo viśvāni śavasā tatānopaśrotā ma īvato vachāṁsi ||1 ||*
*ayāmi ghoṣa indra devajāmirirajyanta yachchhurudho vivāchi |*
*nahi svamāyuśchikite janeṣu tānīdaṁhāṁsyati parṣyasmān ||2 ||*
*yuje rathaṁ gaveṣaṇaṁ haribhyāmupa brahmāṇi jujuṣāṇamasthuḥ |*
*vi bādhiṣṭa sya rodasī mahitvendro vṛtrāṇyapratī jaghanvān ||3 ||*
*āpaśchitpipyuḥ rstyo3 na gāvo nakṣannṛtaṁ jaritārasta indra |*
*yāhi vāyurna niyuto no achchhā tvaṁ hi dhībhirdayase vi vājān ||4 ||*
*te tvā madā indra mādayantu śuṣmiṇaṁ tuvirādhasaṁ jaritre |*
*eko devatrā dayase hi martānasmiṁdūra savane mādayasva ||5 ||*
*evedindraṁ vṛṣaṇaṁ vajrabāhuṁ vasiṣṭhāso abhyarchantyarkaiḥ |*
*sa naḥ stuto vīravaddhātu gomadyūyaṁ pāta svastibhiḥ sadā naḥ ||6 ||*

ऋ. (Rv.) ७.२४.१-६

योनिष्ट इन्द्र सदने अकारि तमा नृभिः पुरुहूत प्र याहि ।
असो यथा नोऽविता वृधे च ददो वसूनि ममदश्च सोमैः ॥१॥
गृभीतं ते मन इन्द्र द्विबर्हाः सुतः सोमः परिषिक्ता मधूनि ।
विसृष्टधेना भरते सुवृक्तिरियमिन्द्रं जोहुवती मनीषा ॥२॥
आ नो दिव आ पृथिव्या ऋजीषिन्निदं बर्हिः सोमपेयाय याहि ।
वहन्तु त्वा हरयो मद्र्यंचमाङ्गूषमच्छा तवसं मदाय ॥३॥
आ नो विश्वाभिरूतिभिः सजोषा ब्रह्म जुषाणो हर्यश्वयाहि ।
वरीवृजत् स्थविरेभिः सुशिप्रास्मे दधद्वृषणं शुष्ममिन्द्र ॥४॥
एष स्तोमो मह उग्राय वाहे धुरी३ वात्यो न वाजयन्नधायि ।
इन्द्र त्वायमर्क ईट्टे वसूनां दिवीव द्यामधि नः श्रोमतं धाः ॥५॥
एवा न इन्द्र वार्यस्य पूर्धि प्र ते महीं सुमतिं वेविदाम ।
इषं पिन्व मघवद्भ्यः सुवीरां यूयं पात स्वस्तिभिः सदा नः ॥६॥

*yoniṣṭa indra sadane akāri tamā nṛbhiḥ puruhūta pra yāhi ।*
*aso yathā no'vitā vṛdhe cha dado vasūni mamadaścha somaiḥ ॥1॥*
*gṛbhītaṁ te mana indra dvibarhāḥ sutaḥ somaḥ pariṣiktā madhūni ।*
*visṛṣṭadhenā bharate suvṛktiriyamindraṁ johuvatī manīṣā ॥2॥*
*ā no diva ā pṛthivyā ṛjīṣinnidaṁ barhiḥ somapeyāya yāhi ।*
*vahantu tvā harayo madyraṁchamāṅgūṣamachchhā tavasaṁ madāya ॥3॥*
*ā no viśvābhirūtibhiḥ sajoṣā brahma juṣāṇo haryaśvayāhi ।*
*varīvṛjat sthavirebhiḥ suśiprāsme dadhadvṛṣaṇaṁ śuṣmamindra ॥4॥*
*eṣa stomo maha ugrāya vāhe dhurī3 vātyo na vājayannadhāyi ।*
*indra tvāyamarka īṭṭe vasūnāṁ divīva dyāmadhi naḥ śromataṁ dhāḥ ॥5॥*
*evā na indra vāryasya pūrdhi pra te mahīṁ sumatiṁ vevidāma ।*
*iṣaṁ pinva maghavadbhyaḥ suvīrāṁ yūyaṁ pāta svastibhiḥ sadā naḥ ॥6॥*

ऋ. (Rv.) ७.२५.१-६

आ ते मह इन्द्रोत्युग्र समन्यवो यत्समरन्त सेनाः ।
पताति दिद्युन्नर्यस्य बाह्वोर्मा ते मनो विष्वद्र्य१ग्वि चारीत् ॥१॥
नि दुर्ग इन्द्र श्नथिह्यमित्रानभि ये नो मर्तासो अमन्ति ।
आरे तं शंस कृणुहि निनित्सोरा नो भर संभरणं वसूनाम् ॥२॥
शतं ते शिप्रिन्नूतयः सुदासे सहस्रं शंसा उत रातिरस्तु ।
जहि वधर्वनुषो मर्त्यस्यास्मे द्युम्नमधि रत्नं च धेहि ॥३॥
त्वावतो हीन्द्र क्रत्वे अस्मि त्वावतोऽवितुः शूर रातौ ।
विश्वेदहानि तविषीव उग्रँ ओकः कृणुष्व हरिवो न मर्धीः ॥४॥
कुत्सा एते हर्यश्वाय शूषमिन्द्रे सहो देवजूतमियानाः ।
सत्रा कृधि सुहना शूर वृत्रा वयं तरुत्राः सनुयाम वाजम् ॥५॥
एवा न इन्द्र वार्यस्य पूर्धि प्र ते महीं सुमतिं वेविदाम ।
इषं पिन्व मघवद्भ्यः सुवीरां यूयं पात स्वस्तिभिः सदा नः ॥६॥

*ā te maha indrotyugra samanyavo yatsamaranta senāḥ ।*
*patāti didyunnaryasya bāhvormā te mano viṣvadrya1 gvi chārīt ॥1॥*
*ni durga indra śnathihyamitrānabhi ye no martāso amanti ।*
*āre taṁ śaṁsa kṛṇuhi ninitsorā no bhara saṁbharaṇaṁ vasūnām ॥2॥*
*śataṁ te śiprinnūtayaḥ sudāse sahasraṁ śaṁsā uta rātirastu ।*
*jahi vadharvanuṣo martyasyāsme dyumnamadhi ratnaṁ cha dhehi ॥3॥*
*tvāvato hīndra kratve asmi tvāvato'vituḥ śūra rātau ।*
*viśvedahāni taviṣīva ugraṁ̐ okaḥ kṛṇuṣva harivo na mardhīḥ ॥4॥*
*kutsā ete haryaśvāya śūṣamindre saho devajūtamiyānāḥ ।*
*satrā kṛdhi suhanā śūra vṛtrā vayaṁ tarutrāḥ sanuyāma vājam ॥5॥*
*evā na indra vāryasya pūrdhi pra te mahīṁ sumatiṁ vevidāma ।*
*iṣaṁ pinva maghavadbhyaḥ suvīrāṁ yūyaṁ pāta svastibhiḥ sadā naḥ ॥6॥*

ऋ. (Rv.) ७.२६.१-५

न सोम इन्द्रमसुतो ममाद नाब्रह्माणो मघवानं सुतासः ।
तस्मा उक्थं जनये यज्जुजोषन्नृवन्नवीयः श्रृणवद्यथा नः ॥१॥
उक्थउक्थे सोम इन्द्रं ममाद नीथेनीथे मघवानं सुतासः ।
यदी सबाधः पितरं न पुत्राः समानदक्षा अवसे हवन्ते ॥२॥
चकार ता कृणवन्नूनमन्या यानि ब्रुवन्ति वेधसः सुतेषु ।
जनीरिव पतिरेकः समानो नि मामृजे पुर इन्द्रः सु सर्वाः ॥३॥
एवा तमाहुरुत श्रृण्व इन्द्र एको विभक्ता तरणिर्मघानाम् ।
मिथस्तुर ऊतयो यस्य पूर्वीरस्मे भद्राणि सश्चत प्रियाणि ॥४॥
एवा वसिष्ठ इन्द्रमूतये नृन्कृष्टीनां वृषभं सुते गृणाति ।
सहस्रिण उप नो माहि वाजान् यूयं पात स्वस्तिभिः सदा नः ॥५॥

*na soma indramasuto mamāda nābrahmāṇo maghavānaṁ sutāsaḥ ।*
*tasmā ukthaṁ janaye yajjujoṣannṛvannavīyaḥ śṛṇavadyathā naḥ ॥1॥*

*ukthaukthe soma indraṁ mamāda nīthenīthe maghavānaṁ sutāsaḥ ।*
*yadī sabādhaḥ pitaraṁḥ na putrāḥ samānadakṣā avase havante ॥2॥*
*chakāra tā kṛṇavannūnamanyā yāni bruvanti vedhasaḥ suteṣu ।*
*janīriva patirekaḥ samāno ni māmṛje pura indraḥ su sarvāḥ ॥3॥*
*evā tamāhuruta śṛṇva indra eko vibhaktā taraṇirmaghānām ।*
*mithastura ūtayo yasya pūrvīrasme bhadrāṇi saśchata priyāṇi ॥4॥*
*evā vasiṣṭha indramūtaye nṛnkṛṣṭīnāṁ vṛṣabhaṁ sute gṛṇāti ।*
*sahasriṇa upa no māhi vājān yūyaṁ pāta svastibhiḥ sadā naḥ ॥5॥*

ऋ. (Rv.) ७.२७.१-५

इन्द्रं नरो नेमधिता हवन्ते यत्पार्या युनजते धियस्ताः ।
शूरो नृषाता शवसश्चकान आ गोमती व्रजे भजा त्वं नः ॥१॥
य इन्द्र शुष्मो मघवन्ते अस्ति शिक्षा सखिभ्यः पुरुहूत नुभ्यः ।
त्वं हि दृळहा मघवन्विचेता अपा वृधि परिवृतं न राधः ॥२॥
इन्द्रो राजा जगतश्चर्षणीनामधि क्षमि विषुरूपं यदस्ति ।
तता ददाति दाशुषे वसूनि चोदद्राध उपस्तुतश्चिदर्वाक् ॥३॥
नू चिन्न इन्द्रो मघवा सहूती दानो वाजं नि यमते न ऊती ।
अनूना यस्य दक्षिणा पीपाय वामं नृभ्यो अभिवीता सखिभ्यः ॥४॥
नू इन्द्र राये वरिवस्कृधी न आ ते मनो ववृत्याम मघाय ।
गोमदश्वावद्रथवद्व्यन्तो यूयं पात स्वस्तिभिः सदा नः ॥५॥

*indraṁ naro nemadhitā havante yatpāryā yunajate dhiyastāḥ ।*
*śūro nṛṣātā śavasaśchakāna ā gomatī vraje bhajā tvaṁ naḥ ॥1॥*
*ya indra śuṣmo maghavante asti śikṣā sakhibhyaḥ puruhūta nubhyaḥ ।*
*tvaṁ hi dṛḻahā maghavanvichetā apā vṛdhi parivṛtaṁ na rādhaḥ ॥2॥*
*indro rājā jagataścharṣaṇīnāmadhi kṣami viṣurūpaṁ yadasti ।*
*tatā dadāti dāśuṣe vasūni chodadrādha upastutaśchidarvāk ॥3॥*
*nū chinna indro maghavā sahūtī dāno vājaṁ ni yamate na ūtī ।*
*anūnā yasya dakṣiṇā pīpāya vāmaṁ nṛbhyo abhivītā sakhibhyaḥ ॥4॥*
*nū indra rāye varivaskṛdhī na ā te mano vavṛtyāma maghāya ।*
*gomadaśvāvadrathavadvyanto yūyaṁ pāta svastibhiḥ sadā naḥ ॥5॥*

ऋ. (Rv.) ७.२८.१-५

ब्रह्मा ण इन्द्रोप याहि विद्वानर्वांचस्ते हरयः सन्तु युक्ताः ।
विश्वे चिद्धि त्वा विहवन्त मर्ता अस्माकमिच्छृणुहि विश्वमिन्व ॥१॥
हवं त इन्द्र महिमा व्यानड् ब्रह्म यत्पासि शवसिन्नृषीणाम् ।
आ यद्वज्रं दधिषे हस्त उग्र घोरः सन्क्रत्वा जनिष्ठा उषाळहः ॥२॥
तव प्रणीतीन्द्र जोहुवानान्त्सं यन्नृन्न रोदसी निनेथ ।
महे क्षत्राय शवसे हि जज्ञेऽत्रतुजिं चित्तूतुजिरशिश्नत् ॥३॥
एभिर्न इन्द्राहभिर्दशस्य दुर्भित्रासो हि क्षितयः पवन्ते ।
प्रति यच्चष्टे अनृतमनेना अव द्विता वरुणो मायी नः सात् ॥४॥
वोचेमेदिन्द्रं मघवानमेनं महो रायो राधसो यद्ददन्नः ।
यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः ॥५॥

*brahmā ṇa indropa yāhi vidvānarvāṁchaste harayaḥ santu yuktāḥ ।*
*viśve chiddhi tvā vihavanta martā asmākamichchhṛṇuhi viśvaminva ॥1॥*
*havaṁ ta indra mahimā vyānaḍ brahma yatpāsi śavasinnṛṣīṇām ।*
*ā yadvajraṁ dadhiṣe hasta ugra ghoraḥ sankratvā janiṣṭhā uṣāḻahaḥ ॥2॥*
*tava praṇītīndra johuvānāntsaṁ yannṛnna rodasī ninetha ।*
*mahe kṣatrāya śavase hi jajñe'tratujiṁ chittūtujiraśiśnat ॥3॥*
*ebhirna indrāhabhirdaśasya durbhitrāso hi kṣitayaḥ pavante ।*
*prati yachchaṣṭe anṛtamanenā ava dvitā varuṇo māyī naḥ sāt ॥4॥*
*vochemedindraṁ maghavānamenaṁ maho rāyo rādhaso yaddadannaḥ ।*
*yo archato brahmakṛtimaviṣṭho yūyaṁ pāta svastibhiḥ sadā naḥ ॥5॥*

ऋ. (Rv.) ७.२९.१-५

अयं सोम इन्द्र तुभ्यं सुन्व आ तु प्र याहि हरिवस्तदोकाः ।
पिबा त्व१स्य सुषुतस्य चारोर्ददो मघानि मघवन्नियानः ॥१॥
ब्रह्मन्वीर ब्रह्मकृतिं जुषाणोऽर्वाचीनो हरिमिर्याहि त्रयम् ।
अस्मिन्नू षु सवने मादयस्वोप ब्रह्माणि श्रृणव इमा नः ॥२॥
का ते अस्तयरंकृतिः सूक्तैः कदा नूनं ते मघवन् दाशेम ।
विश्वा मतीरा ततने त्वायाधा म इन्द्र श्रृणवो हवेमा ॥३॥
उतो घा ते पुरुष्या३ इदासन्येषां पूर्वेषामश्रृणोऋर्षीणाम् ।
अधाहं त्वा मघवंजोहवीमि त्वं न इन्द्रासि प्रमतिः पितेव ॥४॥
वोचेमेदिन्द्रं मघवानमेनं महो रायो राधसो यद्ददन्नः ।
यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः ॥५॥

*ayaṁ soma indra tubhyaṁ sunva ā tu pra yāhi harivastadokāḥ ।*
*pibā tva1sya suṣutasya chārordado maghāni maghavanniyānaḥ ॥1॥*
*brahmanvīra brahmakṛtiṁ juṣāṇo'rvāchīno harimiryāhi trayam ।*
*asminnū ṣu savane mādayasvopa brahmāṇi śṛṇava imā naḥ ॥2॥*
*kā te astayaraṁkṛtiḥ sūktaiḥ kadā nūnaṁ te maghavan dāśema ।*
*viśvā matīrā tatane tvāyādhā ma indra śṛṇavo havemā ॥3॥*
*uto ghā te puruṣyā3 idāsanyeṣāṁ pūrveṣāmaśṛṇoṛrṣīṇām ।*
*adhāhaṁ tvā maghavaṁjohavīmi tvaṁ na indrāsi pramatiḥ piteva ॥4॥*
*vochemedindraṁ maghavānamenaṁ maho rāyo rādhaso yaddadannaḥ ।*
*yo archato brahmakṛtimaviṣṭho yūyaṁ pāta svastibhiḥ sadā naḥ ॥5॥*

ऋ. (Rv.) ७.३०.१-५

आ नो देव शवसा याहि शुष्मिन्भवा वृध इन्द्र रायो अस्य ।
महे नृम्णाय नृपते सुवज्र महि क्षत्राय पौंस्याय शूर ॥१॥
हवन्त उ त्वा हव्यं विवाचि तन्रषु श्रराः सूर्यस्य सातौ ।
त्वं विश्वेषु सेन्यो जनेषु त्वं वृत्राणि रन्धया सुहन्तु ॥२॥
अहा यदिन्द्र सुदिना व्युच्छान्दधो यत्केतुमुपमं समत्सु ।
न्यृग्निः सीददसुरो न होता हुवानो अत्र सुभगाय देवान् ॥३॥
वयं ते त इन्द्र ये च देव स्तवन्त शूर ददतो मघानि ।
यच्छा सूरिभ्य उपमा वरूथं स्वाभुवो जरणामश्नवन्त ॥४॥
वोचेमेदिन्द्रं मघवानमेनं महो रायो राधसो यद्ददन्नः ।
यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः ॥५॥

*ā no deva śavasā yāhi śuṣminbhavā vṛdha indra rāyo asya ।*
*mahe nṛmṇāya nṛpate suvajra mahi kṣatrāya pauṁsyāya śūra ॥1॥*
*havanta u tvā havyaṁ vivāchi tanraṣu śṛrāḥ sūryasya sātau ।*
*tvaṁ viśveṣu senyo janeṣu tvaṁ vṛtrāṇi randhayā suhantu ॥2॥*
*ahā yadindra sudinā vyuchchhāndadho yatketumupamaṁ samatsu ।*
*nyṛgniḥ sīdadasuro na hotā huvāno atra subhagāya devān ॥3॥*
*vayaṁ te ta indra ye cha deva stavanta śūra dadato maghāni ।*
*yachchhā sūribhya upamā varūthaṁ svābhuvo jaraṇāmaśnavanta ॥4॥*
*vochemedindraṁ maghavānamenaṁ maho rāyo rādhaso yaddadannaḥ ।*
*yo archato brahmakṛtimaviṣṭho yūyaṁ pāta svastibhiḥ sadā naḥ ॥5॥*

ऋ. (Rv.) ७.३१.१-१२

प्र व इन्द्राय मादनं हर्यश्वाय गायत। सखायः सोमपाव्ने ॥१॥
शंसेदुक्थं सुदानव उत द्युक्षं यथा नरः। चकृमा सत्यराधसे ॥२॥
त्वं न इन्द्र वाजयुस्त्वं गव्युः शतक्रतो। त्वं हिरण्युर्वसो ॥३॥
वयमिन्द्र त्वायवोऽभि प्र णोनुमो वृषन्। विद्धी त्व१स्य नो वसो ॥४॥
मा नो निदे च वक्तवेऽर्यो रन्धीरराव्णे। त्वे अपि क्रतुर्मम ॥५॥
त्वं वर्मासि सप्रथः पुरोयोधश्च वृत्रहन्। त्वया प्रति ब्रुवे युजा ॥६॥

महाँ उतासि यस्य तेऽनु स्वधावरी सहः। मम्नाते इन्द्र रोदसी ॥७॥
तं त्वा मरुत्वती परि भुवद्वाणि सयावरी। नक्षमाणा सह द्युभिः ॥८॥
ऊर्ध्वासस्त्वानिवन्दवो भुवन्दस्ममुप द्यवि। सं ते नमन्त कृष्टयः ॥९॥
प्र वो महे महिवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम्। विशः पूर्वीः प्र चरा चर्षणिप्राः ॥१०॥
ऊरुव्यचसे महिने सुवृक्तिमिन्द्राय ब्रह्म जनयन्त विप्राः। तस्य व्रतानि न मिनन्ति धीराः ॥११॥
इन्द्र वाणीरनुत्तमन्युमेव सत्रा राजानं दधिरे सहध्यै। हर्यश्वाय बर्हया समापीन् ॥१२॥

*pra va indrāya mādanaṁ haryaśvāya gāyata | sakhāyaḥ somapāvne ||1||*
*śaṁsedukthaṁ sudānava uta dyukṣaṁ yathā naraḥ | chakṛmā satyarādhase ||2||*
*tvaṁ na indra vājayustvaṁ gavyuḥ śatakrato | tvaṁ hiraṇyurvaso ||3||*
*vayamindra tvāyavo'bhi pra ṇonumo vṛṣan | viddhī tva1sya no vaso ||4||*
*mā no nide cha vaktave'ryo randhīrarāvṇe | tve api kraturmama ||5||*
*tvaṁ varmāsi saprathaḥ puroyodhaścha vṛtrahan | tvayā prati bruve yujā ||6||*
*mahāṁ utāsi yasya te'nu svadhāvarī sahaḥ | mamnāte indra rodasī ||7||*
*taṁ tvā marutvatī pari bhuvadvāṇi sayāvarī | nakṣamāṇā saha dyubhiḥ ||8||*
*ūrdhvāsastvānivandavo bhuvandasmamupa dyavi | saṁ te namanta kṛṣṭayaḥ ||9||*
*pra vo mahe mahivṛdhe bharadhvaṁ prachetase pra sumatiṁ kṛṇudhvam |*
*viśaḥ pūrvīḥ pra charā charṣaṇiprāḥ ||10||*
*ūruvyachase mahine suvṛktimindrāya brahma janayanta viprāḥ |*
*tasya vratāni na minanti dhīrāḥ ||11||*
*indra vāṇīranuttamanyumeva satrā rājānaṁ dadhire sahadhyai |*
*haryaśvāya barhayā samāpīn ||12||*

ऋ. (Rv.) ७.३२.१-२७

मो षु त्वा वाघतश्चनारे अस्मन्नि रीरमन् ।
आरात्तच्चित् सधमादं न आ गहीह वा सन्नुप श्रुधि ॥१॥
इमे हि ते ब्रह्मकृतः सुते सचा मधौ न मक्ष आसते ।
इन्द्रे कामं जरितारो वसूयवो रथे न पादमा दधुः ॥२॥
रायस्कामो वज्रहस्तं सुदक्षिणं पुत्रो न पितरं हुवे ॥३॥
इम इन्द्राय सुन्विरे सोमासो दध्याशिरः ।
ताँ आ मदाय वज्रहस्त पीतये हरिभ्यां याह्योक आ ॥४॥
श्रवच्छुत्कर्ण ईयते वसूनां नू चिन्नो मर्धिषद् गिरः ।
सद्यश्चिद्यः सहस्राणि शता ददन्नकिर्दित्सन्तमा मिनत् ॥५॥
स वीरो अप्रतिष्कुत इन्द्रेण शूशुवे नृभिः ।
यस्ते गभीरा सवनानि वृत्रहन्त्सुनोत्या च धावति ॥६॥
भवा वरूथं मघवन्मघोनां यत्समजासि शर्धतः ।
वि त्वाहतस्य वेदनं भजेमह्या दूणाशो भरा गयम् ॥७॥
सुनोता सोमपाव्ने सोममिन्द्राय वज्रिणे ।
पचता पक्तीरवसे कृणुध्वमित्पृणन्नित्पृणते मयः ॥८॥
मा स्रेधत सोमिनो दक्षता महे कृणुध्वं राय आतुजे ।
तरणिरिज्जयति क्षेति पुष्यति न देवासः कवत्नवे ॥९॥
नकिः सुदासो रथं पर्यास न रीरमत् ।
इन्द्रो यस्याविता यस्य मरुतो गमत्स गोमति व्रजे ॥१०॥
गमद्वाजं वाजयन्निन्द्र मर्त्यो यस्य त्वमविता भुवः ।
अस्माकं बोध्यविता रथानामस्माकं शूर नृणाम् ॥११॥
उदिन्न्वस्य रिच्यतेंऽशो धनं न जिग्युषः ।
य इन्द्रो हरिवान्न दभन्ति तं रिपो दक्षं दधाति सोमिनि ॥१२॥
मन्त्रमखर्वं सुधितं सुपेशसं दधात यज्ञियेष्वा ।
पूर्वीश्चन प्रसितयस्तरन्ति तं य इन्द्रे कर्मणा भुवत् ॥१३॥
कस्तमिन्द्र त्वावसुमा मर्त्यो दधर्षति ।
श्रद्धा इत्ते मघवन्पार्ये दिवि वाजी वाजं सिषासति ॥१४॥

मघोनः स्म वृत्रहत्येषु चोदय ये ददति प्रिया वसु ।
तव प्रणीती हर्यश्व सुरिभिर्विश्वा तरेम दुरिता ॥१५॥
तवेदिन्द्रावमं वसु त्वं पुष्यसि मध्यमम् ।
सत्रा विश्वस्य परमस्य राजसि नकिष्ट्वा गोषु वृण्वते ॥१६॥
त्वं बिश्वस्य धनदा असि श्रुतो य ईं भवन्त्याजयः ।
त्वायं विश्वः पुरुहूत पार्थिवोऽवस्युर्नाम भिक्षते ॥१७॥
यदिन्द्र यावतस्त्वमेतावदहमीशीय ।
स्तोतारमिद्दिधिषेय रदावसो न पापत्वाय रासीय ॥१८॥
शिक्षेयमिन्महयते दिवेदिवे राय आ कुहचिद्विदे ।
नहि त्वदन्यमन्घवन्न आप्यं वस्यो अस्ति पिता चन ॥१९॥
तरणिरित्सिषासति वाजं पुरन्ध्या युजा ।
आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्रवम् ॥२०॥
न दुष्टुती मर्त्यो विन्दते वसु न स्रेधन्तं रयिर्नशत् ।
सुशक्तिरिन्मघवन्तुभ्यं मावते देष्णं यत्पार्ये दिवि ॥२१॥
अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः ।
ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥२२॥
न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥२३॥
अभी षतस्तदा भरेन्द्र ज्यायः कनीयसः ।
पुरूवसुर्हि मघवन्त्सनादसि भरेभरे च हव्यः ॥२४॥
परा णुदस्व मघवन्नमित्रान्त्सुवेदा नो वसू कृधि ।
अस्माकं बोध्यविता महाधने भवा वृधः सखीनाम् ॥२५॥
इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि ॥२६॥
मा नो अज्ञाता वृजना दुराध्यो३ माशिवासो अव क्रमुः ।
त्वया वयं प्रवतः शश्वतीरपोऽति शूर तरामसि ॥२७॥

*mo ṣu tvā vāghataśchanāre asmanni rīraman ।*
*ārāttachchit sadhamādaṁ na ā gahīha vā sannupa śrudhi ॥1॥*
*ime hi te brahmakṛtaḥ sute sachā madhau na makṣa āsate ।*
*indre kāmaṁ jaritāro vasūyavo rathe na pādamā dadhuḥ ॥2॥*
*rāyaskāmo vajrahastaṁ sudakṣiṇaṁ putro na pitaraṁ huve ॥3॥*
*ima indrāya sunvire somāso dadhyāśiraḥ ।*
*tām̐ ā madāya vajrahasta pītaye haribhyāṁ yāhyoka ā ॥4॥*
*śravachchhutkarṇa īyate vasūnāṁ nū chinno mardhiṣad giraḥ ।*
*sadyaśchidyaḥ sahasrāṇi śatā dadannakirditsantamā minat ॥5॥*
*sa vīro apratiṣkuta indreṇa śūśuve nṛbhiḥ ।*
*yaste gabhīrā savanāni vṛtrahantsunotyā cha dhāvati ॥6॥*
*bhavā varūthaṁ maghavanmaghonāṁ yatsamajāsi śardhataḥ ।*
*vi tvāhatasya vedanaṁ bhajemahyā dūṇāśo bharā gayam ॥7॥*
*sunotā somapāvne somamindrāya vajriṇe ।*
*pachatā paktīravase kṛṇudhvamitpṛṇannitpṛṇate mayaḥ ॥8॥*
*mā sredhata somino dakṣatā mahe kṛṇudhvaṁ rāya ātuje ।*
*taraṇirijjayati kṣeti puṣyati na devāsaḥ kavatnave ॥9॥*
*nakiḥ sudāso rathaṁ paryāsa na rīramat ।*
*indro yasyāvitā yasya maruto gamatsa gomati vraje ॥10॥*
*gamadvājaṁ vājayannindra martyo yasya tvamavitā bhuvaḥ ।*
*asmākaṁ bodhyavitā rathānāmasmākaṁ śūra nṛṇām ॥11॥*
*udinnvasya richyateṁ'śo dhanaṁ na jigyuṣaḥ ।*
*ya indro harivānna dabhanti taṁ ripo dakṣaṁ dadhāti somini ॥12॥*
*mantramakharvaṁ sudhitaṁ supeśasaṁ dadhāta yajñiyeṣvā ।*
*pūrvīśchana prasitayastaranti taṁ ya indre karmaṇā bhuvat ॥13॥*

*kastamindra tvāvasumā martyo dadharṣati ।*
*śraddhā itte maghavanpārye divi vājī vājaṁ siṣāsati ॥14॥*
*maghonaḥ sma vṛtrahatyeṣu chodaya ye dadati priyā vasu ।*
*tava praṇītī haryaśva suribhirviśvā tarema duritā ॥15॥*
*tavedindrāvamaṁ vasu tvaṁ puṣyasi madhyamam ।*
*satrā viśvasya paramasya rājasi nakiṣṭvā goṣu vṛṇvate ॥16॥*
*tvaṁ biśvasya dhanadā asi śruto ya īṁ bhavantyājayaḥ ।*
*tvāyaṁ viśvaḥ puruhūta pārthivo'vasyurnāma bhikṣate ॥17॥*
*yadindra yāvatastvametāvadahamīśīya ।*
*stotāramiddidhiṣeya radāvaso na pāpatvāya rāsīya ॥18॥*
*śikṣeyaminmahayate divedive rāya ā kuhachidvide ।*
*nahi tvadanyamanghavanna āpyaṁ vasyo asti pitā chana ॥19॥*
*taraṇiritsiṣāsati vājaṁ purandhyā yujā ।*
*ā va indraṁ puruhūtaṁ name girā nemiṁ taṣṭeva sudravam ॥20॥*
*na duṣṭutī martyo vindate vasu na sredhantaṁ rayirnaśat ।*
*suśaktirinmaghavantubhyaṁ māvate deṣṇaṁ yatpārye divi ॥21॥*
*abhi tvā śūra nonumo'dugdhā iva dhenavaḥ ।*
*īśānamasya jagataḥ svardṛśamīśānamindra tasthuṣaḥ ॥22॥*
*na tvāvām̐ anyo divyo na pārthivo na jāto na janiṣyate ।*
*aśvāyanto maghavannindra vājino gavyantastvā havāmahe ॥23॥*
*abhī ṣatastadā bharendra jyāyaḥ kanīyasaḥ ।*
*purūvasurhi maghavantsanādasi bharebhare cha havyaḥ ॥24॥*
*parā ṇudasva maghavannamitrāntsuvedā no vasū kṛdhi ।*
*asmākaṁ bodhyavitā mahādhane bhavā vṛdhaḥ sakhīnām ॥25॥*
*indra kratuṁ na ā bhara pitā putrebhyo yathā ।*
*śikṣā ṇo asminpuruhūta yāmani jīvā jyotiraśīmahi ॥26॥*
*mā no ajñātā vṛjanā durādhyo3 māśivāso ava kramuḥ ।*
*tvayā vayaṁ pravataḥ śaśvatīrapo'ti śūra tarāmasi ॥27॥*

ऋ. (Rv.) ७.५५.२-८

यदर्जुन सारमेय दतः पिशंग यच्छसे ।
वीव भ्राजन्त ऋष्टय उप स्रक्वेषु बप्सतो नि षु स्वप ॥२॥
स्तेनं राय सारमेय तस्करं वा पुनः सर ।
स्तोतृनिन्द्रस्य रायसि किमस्मान्दुच्छुनायसे नि षु स्वप ॥३॥
त्वं सुकरस्य दर्दृहि तव दर्दर्तु सूकरः ।
स्तोतृनिन्द्रस्य रायसि किमस्मान्दुच्छुनायसे नि षु स्वप ॥४॥
सस्तु माता सस्तु पिता सस्तु श्वा सन्तु विश्पतिः ।
ससन्तु सर्वे ज्ञातयः सस्त्वयमभितो जनः ॥५॥
य आस्ते यश्च चरति यश्च पश्यति नो जनः ।
तेषां सं हन्मो अक्षाणि यथेदं हर्म्यं तथा ॥६॥
सहस्रशृंगो वृषभो यः समुद्रादुदाचरत् ।
तेना सहस्येना वयं नि जनान्त्स्वापयामसि ॥७॥
प्रोष्ठेशया वह्येशया नारीर्यास्तल्पशीवरीः ।
स्त्रियो याः पुण्यगन्धास्ताः सर्वाः स्वापयामसि ॥८॥

*yadarjuna sārameya dataḥ piśaṁga yachchhase ।*
*vīva bhrājanta ṛṣṭaya upa srakveṣu bapsato ni ṣu svapa ॥2॥*
*stenaṁ rāya sārameya taskaraṁ vā punaḥ sara ।*
*stotṛnindrasya rāyasi kimasmānduchchhunāyase ni ṣu svapa ॥3॥*
*tvaṁ sukarasya dardṛhi tava dardartu sūkaraḥ ।*
*stotṛnindrasya rāyasi kimasmānduchchhunāyase ni ṣu svapa ॥4॥*
*sastu mātā sastu pitā sastu śvā santu viśpatiḥ ।*
*sasantu sarve jñātayaḥ sastvayamabhito janaḥ ॥5॥*
*ya āste yaścha charati yaścha paśyati no janaḥ ।*

*teṣāṁ saṁ hanmo akṣāṇi yathedaṁ harmyaṁ tathā ॥6॥*
*sahasraśṛṅgo vṛṣabho yaḥ samudrādudācharat ।*
*tenā sahasyenā vayaṁ ni janāntsvāpayāmasi ॥7॥*
*proṣṭheśayā vahyeśayā nārīryāstalpaśīvarīḥ ।*
*striyo yāḥ puṇyagandhāstāḥ sarvāḥ svāpayāmasi ॥8॥*

ऋ. (Rv.) ७.९७.१

यज्ञे दिवो नृषदने पृथिव्या नरो यत्र देवयवो मदन्ति ।
इन्द्राय यत्र सवनानि सुन्वे गमन्मदाय प्रथमं वयश्च ॥१॥
*yajñe divo nṛṣadane pṛthivyā naro yatra devayavo madanti ।*
*indrāya yatra savanāni sunve gamanmadāya prathamaṁ vayaścha ॥1॥*

ऋ. (Rv.) ७.९८.१-६

अध्वर्यवोऽरुणं दुग्धमंशुं जुहोतन वृषभाय क्षितीनाम् ।
गौराद्वेदीयाँ अवपानमिन्द्रो विश्वाहेद्याति सुतसोममिच्छन् ॥१॥
यद्दधिषे प्रदिवि चार्वन्नं दिवेदिवे पीतिमिदस्य वक्षि ।
उत हृदोत मनसा जुषाण उशन्निन्द्र प्रस्थितान् पाहि सोमान् ॥२॥
जज्ञानः सोमं सहसे पपाथ प्र ते माता महिमानमुवाच ।
एन्द्र पप्राथोर्व१ न्तरिक्षं युधा देवेभ्यो वरिवश्चकर्थ ॥३॥
यद्योधया महतो मन्यमानान्त्साक्षाम तान् बाहुभिः शाशदानान् ।
यद्वा नृभिर्वृत इन्द्राभियुध्यास्तं त्वयाजिं सौश्रवसं जयेम ॥४॥
प्रेन्द्रस्य वोचं प्रथमा कृतानि प्र नूतना मघवा या चकार ।
यदेददेवीरसहिष्ट माया अथाभवत्केवलः सोमो अस्य ॥५॥
तवेदं विश्वमभितः पशव्यं१ यत्पश्यसि चक्षसा सूर्यस्य ।
गवामसि गोपतिरेक इन्द्र भक्षीमहि ते प्रयतस्य वस्वः ॥६॥
*adhvaryavo'ruṇaṁ dugdhamaṁśuṁ juhotana vṛṣabhāya kṣitīnām ।*
*gaurādvedīyām̐ avapānamindro viśvāhedyāāti sutasomamichchhan ॥1॥*
*yaddadhiṣe pradivi chārvannaṁ divedive pītimidasya vakṣi ।*
*uta hṛdota manasā juṣāṇa uśannindra prasthitān pāhi somān ॥2॥*
*jajñānaḥ somaṁ sahase papātha pra te mātā mahimānamuvācha ।*
*endra paprāthorva1 ntarikṣaṁ yudhā devebhyo varivaśchakartha ॥3॥*
*yadyodhayā mahato manyamānāntsākṣāma tān bāhubhiḥ śāśadānān ।*
*yadvā nṛbhirvṛta indrābhiyudhyāstaṁ tvayājiṁ sauśravasaṁ jayema ॥4॥*
*prendrasya vochaṁ prathamā kṛtāni pra nūtanā maghavā yā chakāra ।*
*yadedadevīrasahiṣṭa māyā athābhavatkevalaḥ somo asya ॥5॥*
*tavedaṁ viśvamabhitaḥ paśavyaṁ1 yatpaśyasi chakṣasā sūryasya ।*
*gavāmasi gopatireka indra bhakṣīmahi te prayatasya vasvaḥ ॥6॥*

ऋ. (Rv.) ७.१०४.८

यो मा पाकेन मनसा चरन्तमभिचष्टे अनृतेभिर्वचोभिः ।
आपइव काशिना संगृभीता असन्नस्त्वासत इन्द्र वक्ता ॥८॥
*yo mā pākena manasā charantamabhichaṣṭe anṛtebhirvachobhiḥ ।*
*āpaiva kāśinā saṁgṛbhītā asannastvāsata indra vaktā ॥8॥*

ऋ. (Rv.) ७.१०४.१६

यो मायातुं यातुधानेत्याह यो वा रक्षाः शुचिरस्मीत्याह ।
इन्द्रस्तं हन्तु महता वधेन विश्वस्य जन्तोरधमस्पदीष्ट ॥१६॥
*yo māyātuṁ yātudhānetyāha yo vā rakṣāḥ śuchirasmītyāha ।*
*indrastaṁ hantu mahatā vadhena viśvasya jantoradhamaspadīṣṭa ॥16॥*

ऋ. (Rv.) ७.१०४.१६

प्र वर्तय दिवो अश्मानमिन्द्र सोमशितं मघवन्त्सं शिशाधि ।
प्राक्तादपाक्तादधरादुदक्तादभि जहि रक्षसः पर्वतेन ॥१९॥
*pra vartaya divo aśmānamindra somaśitaṁ maghavantsaṁ śiśādhi ।*
*prāktādapāktādadharādudaktādabhi jahi rakṣasaḥ parvatena ॥19॥*

ऋ. (Rv.) ७.१०४.१९-२२

एत उ त्ये पतयन्ति श्वयातव इन्द्रं दिप्सन्ति दिप्सवोऽदाभ्यम् ।
शिशीते शक्रः पिशुनेभ्यो वधं नूनं सृजदशनि यातुमद्भ्यः ॥२०॥
इन्द्रो यातूनामभवत् पराशरो हविर्मथीनामभ्या३ विवासताम् ।
अभीदु शक्रः परशुर्यथा वनं पात्रेव भिन्दन्त्सत एति रक्षसः ॥२१॥
उलूकयातुं शुशुलूकयातुं जहि श्वयातुमुत कोकयातुम् ।
सुपर्णयातुमुत गृध्रयातुं दृषदेव प्र मृण रक्ष इन्द्र ॥२२॥
*eta u tye patayanti śvayātava indraṁ dipsanti dipsavo'dābhyam ।*
*śiśīte śakraḥ piśunebhyo vadhaṁ nūnaṁ sṛjadaśani yātumadbhyaḥ ॥20॥*
*indro yātūnāmabhavat parāśaro havirmathīnāmabhyā3 vivāsatām ।*
*abhīdu śakraḥ paraśuryathā vanaṁ pātreva bhindantsata eti rakṣasaḥ ॥21॥*
*ulūkayātuṁ śuśulūkayātuṁ jahi śvayātumuta kokayātum ।*
*suparṇayātumuta gṛdhrayātuṁ dṛṣadeva pra mṛṇa rakṣa indra ॥22॥*

ऋ. (Rv.) ७.१०४.२४

इन्द्र जहि पुमांसं यातुधानमुत स्त्रियं यया शाशदानाम् ।
विग्रीवासो मूरदेवा ऋदन्तु मा ते दृशन्त्सूर्यमुच्चरन्तम् ॥२४॥
*indra jahi pumāṁsaṁ yātudhānamuta striyaṁ yayā śāśadānām ।*
*vigrīvāso mūradevā ṛdantu mā te dṛśantsūryamuchcharantam ॥24॥*

य. (Yv.) १२.३४

प्रप्रायमग्निर्भरतस्य शृण्वे वि यत्सूर्यो न रोचते बृहद्भाः ।
अभि यः पूरुं पृतनासु तस्थौ दीदाय दैव्योऽअतिथिः शिवो नः ॥३४॥
*praprāyamagnirbharatasya śṛṇve vi yatsūryo na rochate bṛhadbhāḥ ।*
*abhi yaḥ pūruṁ pṛtanāsu tasthau dīdāya daivyo'atithiḥ śivo naḥ ॥34॥*

य. (Yv.) २०.५४

एवेदिन्द्रं वृष्णं वज्रबाहुं बसिष्ठासोऽअभ्यर्चन्त्यर्कैः ।
स न स्तुतो वीरवद्धातु गोमद्यूयं पात स्वस्तिभिः सदा नः ॥५४॥
*evedindraṁ vṛṣṇaṁ vajrabāhuṁ basiṣṭhāso'abhyarchantyarkaiḥ ।*
*sa na stuto vīravaddhātu gomadyūyaṁ pāta svastibhiḥ sadā naḥ ॥54॥*

य. (Yv.) २६.१०

महाँ२ऽइन्द्रो वज्रहस्तः षोडशी शर्म यच्छतु। हन्तु पाप्मानं योऽसमान् द्वेष्टि। उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा ॥१०॥
*mahāṁ̐2'indro vajrahastaḥ ṣoḍaśī śarma yachchhatu । hantu pāpmānaṁ yo'samān dveṣṭi । upayāmagṛhīto'si mahendrāya tvaiṣa te yonirmahendrāya tvā ॥10॥*

य. (Yv.) ३३.१८

आपश्चित्पिप्यु स्तर्यो न गावो नक्षन्नृतं जरितारस्तऽइन्द्र ।
याहि वायुर्न नियुतो नोऽअच्छा त्वं हि धीभिर्दयसे वि वाजान् ॥१८॥
*āpaśchitpipyu staryo na gāvo nakṣannṛtaṁ jaritārasta'indra ।*
*yāhi vāyurna niyuto no'achchhā tvaṁ hi dhībhirdayase vi vājān ॥18॥*

अ. (Av.) २०.१२.१-६

उदु ब्रह्माण्यैरत श्रवस्येन्द्रं समर्ये महया वसिष्ठ ।
आ यो विश्वानि शवसा ततानोपश्रोता म ईवतो वचांसि ॥१॥
अयामि घोष इन्द्र देवजामिरिरज्यन्त यच्छुरुधो विवाचि ।
नहि स्वमायुश्चिकिते जनेषु तानीदंहांस्यति पर्ष्यस्मान् ॥२॥
युजे रथं गवेषणं हरिभ्यामुप ब्रह्माणि जुजुषाणमस्थुः ।
वि बाधिष्ट स्य रोदसी महित्वेन्द्रो वृत्राण्यप्रती जघन्वान् ॥३॥
आपश्चित् पिप्यु स्तर्यो३ न गावो नक्षन्नृतं जरितारस्त इन्द्र ।
याहि वायुर्न नियुतो नो अच्छा त्वं हि धीभिर्दयसे वि वाजान् ॥४॥
ते त्वा मदा इन्द्र मादयन्तु शुष्मिणं तुविराधसं जरित्रे ।

एको देवत्रा दयसे हि मार्तानस्मिंच्छूर सवने मादयस्व ॥५॥
एवेदिन्द्रं वृषणं वज्रबाहुं वसिष्ठासो अभ्यर्चन्त्यर्कैः ।
स न स्तुतो वीरवद् धातु गोमद् यूयं पात स्वस्तिभिः सदा नः ॥६॥
*udu brahmāṇyairata śravasyendraṁ samarye mahayā vasiṣṭha ।*
*ā yo viśvāni śavasā tatānopaśrotā ma īvato vachāṁsi ॥1॥*
*ayāmi ghoṣa indra devajāmirirajyanta yachchhurudho vivāchi ।*
*nahi svamāyuśchikite janeṣu tānīdaṁhāṁsyati parṣyasmān ॥2॥*
*yuje rathaṁ gaveṣaṇaṁ haribhyāmupa brahmāṇi jujuṣāṇamasthuḥ ।*
*vi bādhiṣṭa sya rodasī mahitvendro vṛtraṇyapratī jaghanvān ॥3॥*
*āpaśchit pipyu staryo3 na gāvo nakṣannṛtaṁ jaritārasta indra ।*
*yāhi vāyurna niyuto no achchhā tvaṁ hi dhībhirdayase vi vājān ॥4॥*
*te tvā madā indra mādayantu śuṣmiṇaṁ tuvirādhasaṁ jaritre ।*
*eko devatrā dayase hi mārtānasmiṁchchhūra savane mādayasva ॥5॥*
*evedindraṁ vṛṣaṇaṁ vajrabāhuṁ vasiṣṭhāso abhyarchantyarkaiḥ ।*
*sa na stuto vīravad dhātu gomad yūyaṁ pāta svastibhiḥ sadā naḥ ॥6॥*

अ. (Av.) २०.१८.४-६

वयमिन्द्र त्वायवोऽभि प्र णोनुमो वृषन्। विद्धी त्व१स्य नो वसो ॥४॥
मा नो निदे च वक्तवेऽर्यो रन्धीरराव्णे। त्वे अपि क्रतुर्मम ॥५॥
त्वं वर्मासि सप्रथः पुरोयोधश्च वृत्रहन्। त्वया प्रति ब्रुवे युजा ॥६॥
*vayamindra tvāyavo'bhi pra ṇonumo vṛṣan । viddhī tva1sya no vaso ॥4॥*
*mā no nide cha vaktave'ryo randhīrarāvṇe । tve api kraturmama ॥5॥*
*tvaṁ varmāsi saprathaḥ puroyodhaścha vṛtrahan । tvayā prati bruve yujā ॥6॥*

अ. (Av.) २०.१७.१२

बृहस्पते युवमिन्द्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य ।
धत्तं रयिं स्तुवते कीरये चिद्यूयं पात स्वस्तिभिः सदा नः ॥१२॥
*bṛhaspate yuvamindraścha vasvo divyasyeśāthe uta pārthivasya ।*
*dhattaṁ rayiṁ stuvate kīraye chidyūyaṁ pāta svastibhiḥ sadā naḥ ॥12॥*

अ. (Av.) २०.५९.३-४

उदिन्नवस्य रिच्यतेंऽशो धनं न जिग्युषः ।
य इन्द्रो हरिवान्न दभन्ति तं रिपो दक्षं दधाति सोमिनि ॥३॥
मन्त्रमखर्वं सुधितं सुपेशसं दधात यज्ञियेष्वा ।
पूर्वीश्चन प्रसितयस्तरन्ति तं य इन्द्रे कर्मणा भुवत् ॥४॥
*udinnavasya richyateṁ'śo dhanaṁ na jigyuṣaḥ ।*
*ya indro harivānna dabhanti taṁ ripo dakṣaṁ dadhāti somini ॥3॥*
*mantramakharvaṁ sudhitaṁ supeśasaṁ dadhāta yajñiyeṣvā ।*
*pūrvīśchana prasitayastaranti taṁ ya indre karmaṇā bhuvat ॥4॥*

अ. (Av.) २०.७३.१-३

तुभ्येदिमा सवना शूर विश्वा तुभ्यं ब्रह्माणि वर्धना कृणेमि। त्वं नृभिर्हव्यो विश्वधासि ॥१॥
नू चिन्नु ते मन्यमानस्य दस्मोदश्नुवन्ति महिमानमुग्र। न वीर्यमिन्द्र ते न राधः ॥२॥
प्र वो महे महिवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम्। विशः पूर्वीः प्र चरा चर्षणिप्राः ॥३॥
*tubhyedimā savanā śūra viśvā tubhyaṁ brahmāṇi vardhanā kṛṇemi ।*
*tvaṁ nṛbhirhavyo viśvadhāsi ॥1॥*
*nū chinnu te manyamānasya dasmodaśnuvanti mahimānamugra ।*
*na vīryamindra te na rādhaḥ ॥2॥*
*pra vo mahe mahivṛdhe bharadhvaṁ prachetase pra sumatiṁ kṛṇudhvam ।*
*viśaḥ pūrvīḥ pra charā charṣaṇiprāḥ ॥3॥*

अ. (Av.) २०.८२.१-२

यदिन्द्र यावतस्त्वमेतावदहमीशीय । स्तोतारमिद् दिधिषेय रदावसो न पापत्वाय रासीय ॥१॥
शिक्षेयमिन्महयते दिवेदिवे राय आ कुहचिद्विदे ।
नहि त्वदन्यन्मघवन् न आप्यं वस्यो अस्ति पिता चन ॥२॥

*yadindra yāvatastvametāvadahamīśīya ।*
*stotāramid didhiṣeya radāvaso na pāpatvāya rāsīya ॥1॥*
*śikṣeyaminmahayate divedive rāya ā kuhachidvide ।*
*nahi tvadanyanmaghavan na āpyaṁ vasyo asti pitā chana ॥2॥*

अ. (Av.) २०.८७.१-६

अध्वर्यवोऽरुणं दुग्धमंशुं जुहोतन वृषभाय क्षितीनाम् ।
गौराद् वेदीयाँ अवपानमिन्द्रो विश्वाहेद्याति सुतसोममिच्छन् ॥१॥
यद् दधिषे प्रदिवि चार्वन्नं दिवेदिवे पीतिमिदस्य वक्षि ।
उत हृदोत मनसा जुषाण उशन्निन्द्र प्रस्थितान् पाहि सोमान् ॥२॥
जज्ञानः सोमं सहसे पपाथ प्र ते माता महिमानमुवाच ।
एन्द्र पप्राथोर्व१न्तरिक्षं युधा देवेभ्यो वरिवश्चकर्थ ॥३॥
यद् योधया महतो मन्यमानान् साक्षाम तान् बाहुभिः शाशदानान् ।
यद्वा नृभिर्वृत इन्द्राभियुध्यायस्तं त्वपायाजिं सौश्रवसं जयेम ॥४॥
प्रेन्द्रस्य वोचं प्रथमा कृतानि प्र नूतना मघवा या चकार ।
यदेददेवीरसहिष्ट माया अथाभवत् केवलः सोमो अस्य ॥५॥
तवेदं विश्वमभितः पशव्यं१ यत् पश्यसि चक्षसा सूर्यस्य ।
गवामसि गोपतिरेक इन्द्र भक्षीमहि ते प्रयतस्य वस्वः ॥६॥
*adhvaryavo'ruṇaṁ dugdhamaṁśuṁ juhotana vṛṣabhāya kṣitīnām ।*
*gaurād vedīyām̐ avapānamindro viśvāhedyāti sutasomamichchhan ॥1॥*
*yad dadhiṣe pradivi chārvannaṁ divedive pītimidasya vakṣi ।*
*uta hṛdota manasā juṣāṇa uśannindra prasthitān pāhi seāmān ॥2॥*
*jajñānaḥ somaṁ sahase papātha pra te mātā mahimānamuvācha ।*
*endra paprāthorva1ntarikṣaṁ yudhā devebhyo varivaśchakartha ॥3॥*
*yad yodhayā mahato manyamānān sākṣāma tān bāhubhiḥ śāśadānān ।*
*yadvā nṛbhirvṛta indrābhiyudhyāyastaṁ tvapāyājiṁ sauśravasaṁ jayema ॥4॥*
*prendrasya vochaṁ prathamā kṛtāni pra nūtanā maghavā yā chakāra ।*
*yadedadevīrasahiṣṭa māyā athābhavat kevalaḥ somo asya ॥5॥*
*tavedaṁ viśvamabhitaḥ paśavyaṁ1 yat paśyasi chakṣasā sūryasya ।*
*gavāmasi gopatireka indra bhakṣīmahi te prayatasya vasvaḥ ॥6॥*

अ. (Av.) २०.११७.१-३

पिबा सोममिन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः । सोतुर्बाहुभ्यां सुयतो नार्वा ॥१॥
यस्ते मदो युज्यश्चरुरस्ति येन वृत्राणि हर्यश्व हंसि । त्वामिन्द्र प्रभूवसो ममत्तु ॥२॥
बोधा सु मे मघवन् वाचमेमां यां ते वसिष्ठो अर्चति प्रशस्तिम् ।
इमा ब्रह्म सधमादे जुषस्व ॥३॥
*pibā somamindra mandatu tvā yaṁ te suṣāva haryaśvādriḥ ।*
*soturbāhubhyāṁ suyato nārvā ॥1॥*
*yaste mado yujyaścharurasti yena vṛtrāṇi haryaśva haṁsi ।*
*tvāmindra prabhūvaso mamattu ॥2॥*
*bodhā su me maghavan vāchamemāṁ yāṁ te vasiṣṭho archati praśastim ।*
*imā brahma sadhamāde juṣasva ॥3॥*

१३. इन्द्राग्नी (Indrāgnī) - ऋ. (Rv.) ७.९३.१-८; ७.९४.१-१२; य. (Yv.) ३३.७६

ऋ. (Rv.) ७.९३.१-८

शुचिं नु स्तोमं नवजातमद्येन्द्राग्नी वृत्रहणा जुषेथाम् ।
उभा हि वां सुहवा जोहवीमि ता वाजं सद्य उशते धेष्ठा ॥१॥
ता सानसी शवसाना हि भूतं साकंवृधाा शवसा शूशुवांसा ।
क्षयन्तौ रायो यवसस्य भूरेः पृङ्क्तं वाजस्य स्थविरस्य घृष्वेः ॥२॥
उपो ह यद्विदथं वाजिनो गुर्धीभिर्विप्राः प्रमतिमिच्छमानाः ।
अर्वन्तो न काष्ठां नक्षमाणा इन्द्राग्नी जोहुवतो नरस्ते ॥३॥
गीर्भिर्विप्रः प्रमतिमिच्छमान ईट्टे रयिं यशसं पूर्वभाजम् ।

इन्द्राग्नी वृत्रहणा सुवज्रा प्र नो नव्येभिस्तिरतं देष्णैः ॥४॥
सं यन्मही मिथती स्पर्धमाने तनूरुचा शूरसाता यतैते ।
अदेवयुं विदथे देवयुभिः सत्रा हतं सोमसुता जनेन ॥५॥
इमामू षु सोमसुतिमुप न एन्द्राग्नी सौमनसाय यातम् ।
नू चिद्धि परिमम्नाथे अस्माना वां शश्वद्भिर्ववृतीय वाजैः ॥६॥
सो अग्न एना नमसा समिद्धोऽच्छा मित्रं वरुणमिन्द्रं वोचेः ।
यत्सीमागश्चकृमा तत्सु मृळ तदर्यमादितिः शिश्रथन्तु ॥७॥
एता अग्न आशुषाणास इष्टीर्युवोः सचाभ्यश्याम वाजान् ।
मेन्द्रो नो विष्णुर्मरुतः परि खयन्यूयं पात स्वस्तिभिः सदा नः ॥८॥
*śuchiṁ nu stomaṁ navajātamadyendrāgnī vṛtrahaṇā juṣethām |*
*ubhā hi vāṁ suhavā johavīmi tā vājaṁ sadya uśate dheṣṭhā ||1 ||*
*tā sānasāī śavasānā hi bhūtaṁ sākaṁvṛdhaā śavasā śṛśuvāṁsā |*
*kṣayantau rāyo yavasasya bhūreḥ pṛṅktaṁ vājasya sthavirasya ghṛṣveḥ ||2 ||*
*upo ha yadvidathaṁ vājino gurdhībhirviprāḥ pramatimichchhamānāḥ |*
*arvanto na kāṣṭhāṁ nakṣamāṇā indrāgnī johuvato naraste ||3 ||*
*gīrbhirvipraḥ pramatimichchhamāna īṭṭe rayiṁ yaśasaṁ pūrvabhājam |*
*indrāgnī vṛtrahaṇā suvajrā pra no navyebhistiratam deṣṇaiḥ ||4 ||*
*saṁ yanmahī mithatī spardhamāne tanūruchā śūrasātā yataite |*
*adevayuṁ vidathe devayubhiḥ satrā hataṁ somasutā janena ||5 ||*
*imāmū ṣu somasutimupa na endrāgnī saumanasāya yātam |*
*nū chiddhi parimamnāthe asmānā vāṁ śaśvadbhirvavṛtīya vājaiḥ ||6 ||*
*so agna enā namasā samiddho'chchhā mitraṁ varuṇamindraṁ vocheḥ |*
*yatsīmāgaśchakṛmā tatsu mṛḷa tadaryamāditiḥ śiśrathantu ||7 ||*
*etā agna āśuṣāṇāsa iṣṭīryuvoḥ sachābhyaśyāma vājān |*
*mendro no viṣṇurmarutaḥ pari khayanyūyaṁ pāta svastibhiḥ sadā naḥ ||8 ||*

ऋ. (Rv.) ७.९४.१-१२

इयं वामस्य मनमन इन्द्राग्नी पूर्व्यस्तुतिः। अभ्राद्वृष्टिरिवाजनि ॥१॥
श्रृणुतं जरितुर्हवमिन्द्राग्नी वनतं गिरः। ईशाना पिप्यतं धियः ॥२॥
मा पापत्वाय नो नरेन्द्राग्नी मभिशस्तये। मा नो रीरधतं निदे ॥३॥
इन्द्रे अग्ना नमो बृहत्सुवृक्तिमेरयामहे। धिया धेना अवस्यवः ॥४॥
ता हि शश्वन्त ईळत इत्था विप्रास ऊतये। सबाधो वाजसातये ॥५॥
ता वां गीर्भिर्विपन्यवः प्रयस्वन्तो हवामहे। मेधसाता सनिष्यवः ॥६॥
इन्द्राग्नी अवसा गतमस्मभ्यं चर्षणीसहा। मा नो दुःशंस ईशत ॥७॥
मा कस्य नो अररुषो धूतिःर् प्रणङ् मर्त्यस्य। इन्द्राग्नी शर्म यच्छतम् ॥८॥
गोमद्धिरण्यवद्वसु यद्वामश्वावदीमहे। इन्द्राग्नी तद्वनेमहि ॥९॥
यत्सोम आ सुते नर इन्द्राग्नी अजोहवुः। सप्तीवन्ता सपर्यवः ॥१०॥
उक्थेभिर्वृत्रहन्तमा या मन्दाना चिदा गिरा। आङ्गूषैराविवासतः ॥११॥
ताविदुःशंसं मर्त्यं दुर्विद्वांसं रक्षस्विनम्। आभोगं हन्मना हतमुदधिं हन्मना हतम् ॥१२॥
*iyaṁ vāmasya manamana indrāgnī pūrvyastutiḥ | abhrādvṛṣṭirivājani ||1 ||*
*śṛṇutaṁ jariturhavamindrāgnī vanataṁ giraḥ | īśānā pipyataṁ dhiyaḥ ||2 ||*
*mā pāpatvāya no narendrāgnī mabhiśastaye | mā no rīradhataṁ nide ||3 ||*
*indre agnā namo bṛhatsuvṛktimerayāmahe | dhiyā dhenā avasyavaḥ ||4 ||*
*tā hi śaśvanta īḷata itthā viprāsa ūtaye | sabādho vājasātaye ||5 ||*
*tā vāṁ gīrbhirvipanyavaḥ prayasvanto havāmahe | medhasātā saniṣyavaḥ ||6 ||*
*indrāgnī avasā gatamasmabhyaṁ charṣaṇīsahā | mā no duḥśaṁsa īśata ||7 ||*
*mā kasya no araruṣo dhūtiḥr praṇaṅ martyasya | indrāgnī śarma yachchhatam ||8 ||*
*gomaddhiraṇyavadvasu yadvāmaśvāvadīmahe | indrāgnī tadvanemahi ||9 ||*
*yatsoma ā sute nara indrāgnī ajohavuḥ | saptīvantā saparyavaḥ ||10 ||*
*ukthebhirvṛtrahantamā yā mandānā chidā girā | āṅgūṣairāvivāsataḥ ||11 ||*
*tāvidduḥśaṁsaṁ martyaṁ durvidvāṁsaṁ rakṣasvinam | ābhogaṁ hanmanā hatamudadhiṁ hanmanā hatam ||12 ||*

य. (Yv.) ३३.७६

उक्थेभिर्वृत्रहन्तमा या मन्दाना चिदा गिरा। आंगूषैराविवासतः ॥७६॥
*ukthebhirvṛtrahantamā yā mandānā chidā girā / āṁgūṣairāvivāsataḥ //76 //*

१४. इन्द्रादयः (Indrādayaḥ) - य. (Yv.) ८.५५

इन्द्रश्च मरुतश्च क्रयायोपोत्थितो ऽसुरः पण्यमानो मित्रः क्रीतो विष्णुः शिपिविष्ट उरावासन्नो विष्णुर्नरन्धिषः ॥५५॥
*indraścha marutaścha krayāyopotthito 'suraḥ paṇyamāno mitraḥ krīto viṣṇuḥ śipiviṣṭa urāvāsanno viṣṇurnarandhiṣaḥ //55 //*

१५. इन्द्राबृहस्पती (Indrābṛhaspatī) - ऋ. (Rv.) ७.९७.१०; ७.९८.७; अ. (Av.) २०.८७.७

ऋ. (Rv.) ७.९७.१०

बृहस्पते युवमिन्द्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य ।
धत्तं रयिं स्तुवते कीरये चिद्यूयं पात स्वस्तिभिः सदा नः ॥१०॥
*bṛhaspate yuvamindraścha vasvo divyasyeśāthe uta pārthivasya /*
*dhattaṁ rayiṁ stuvate kīraye chidyūyaṁ pāta svastibhiḥ sadā naḥ //10 //*

ऋ. (Rv.) ७.९८.७

बृहस्पते युवमिन्द्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य ।
धत्तं रयिं स्तुवते कीरये चिद्यूयं पात स्वस्तिभिः सदा नः ॥७॥
*bṛhaspate yuvamindraścha vasvo divyasyeśāthe uta pārthivasya /*
*dhattaṁ rayiṁ stuvate kīraye chidyūyaṁ pāta svastibhiḥ sadā naḥ //7 //*

अ. (Av.) २०.८७.७

बृहस्पते युवमिन्द्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य ।
धत्तं रयिं स्तुवते कीरये चिद् यूयं पात स्वस्तिभिः सदा नः ॥७॥
*bṛhaspate yuvamindraścha vasvo divyasyeśāthe uta pārthivasya /*
*dhattaṁ rayiṁ stuvate kīraye chid yūyaṁ pāta svastibhiḥ sadā naḥ //7 //*

१६. इन्द्राब्रह्मणस्पती (Indrābrahmaṇaspatī) - ऋ. (Rv.) ७.९७.३; ९

ऋ. (Rv.) ७.९७.३

तमु ज्येष्ठं नमसा हविर्भिः सुशेवं ब्रह्मणस्पतिं गृणीषे ।
इन्द्रं श्लोको महि दैव्यः सिषक्तु यो ब्रह्मणो देवकृतस्य राजा ॥३॥
*tamu jyeṣṭhaṁ namasā havirbhiḥ suśevaṁ brahmaṇaspatiṁ gṛṇīṣe /*
*indraṁ śloko mahi daivyaḥ siṣaktu yo brahmaṇo devakṛtasya rājā //3 //*

ऋ. (Rv.) ऋ. (Rv.) ७.९७.९

इयं वां ब्रह्मणस्पते सुवृक्तिब्रह्मेन्द्राय वज्रिणे अकारि ।
अविष्टं धियो जिगृतं पुरन्धीर्जजस्तमर्यो वनुषामरातीः ॥९॥
*iyaṁ vāṁ brahmaṇaspate suvṛktibrahmendrāya vajriṇe akāri /*
*aviṣṭaṁ dhiyo jigṛtaṁ purandhīrjajastamaryo vanuṣāmarātīḥ //9 //*

१७. इन्द्रावरुणौ (Indrāvaruṇau) - ऋ. (Rv.) ७.८२.१-१०; ७.८३.१-१०; ७.८४.१-५; ७.८५.१-५

ऋ. (Rv.) ७.८२.१-१०

इन्द्रावरुणा युवमध्वराय नो विशे जनाय महि शर्म यच्छतम् ।
दीर्घप्रयज्युमति यो वनुष्यति वयं जयेम पृतनासु दूढ्यः ॥१॥
सम्राळन्य स्वराळन्य उच्यते वां महान्ताविन्द्रावरुणा महावसू ।
विश्वे देवासः परमे व्योमनि सं वामोजो वृषणा सं बलं दधुः ॥२॥
अन्वपां खान्यतृन्तमोजसा सूर्यमैरयतं दिवि प्रभुम्।
इन्द्रावरुणा मदे अस्य मायिनोऽपिन्वतमपितः पिन्वतं धियः ॥३॥
युवामिद्युत्सु पृतनासु वह्नयो युवां क्षेमस्य प्रसवे मितज्ञवः ।
ईशाना वस्व उभयस्य कारव इन्द्रावरुणा सुहवा हवामहे ॥४॥
इन्द्रावरुणा यदिमानि चक्रथुर्विश्वा जातानि भुवनस्य मज्मना ।
क्षेमेण मित्रो वरुणं दुवस्यति मरुद्भिरुग्रः शुभमन्य ईयते ॥५॥

महे शुल्काय वरुणस्य नु त्विष ओजो मिमाते ध्रुवमस्य यत्स्वम् ।
अजामिमन्यः श्नथयन्तमातिरद्दभ्रेभिरन्यः प्र वृणोति भूयसः ॥६॥
न तमंहो न दुरितानि मर्त्यमिन्द्रावरुणा न तपः कुतश्चन ।
यस्य देवा गच्छथो वीथो अध्वरं न तं मर्तस्य नशते परिह्वृतिः ॥७॥
अर्वाङ् नरा दैव्येनावसा गतं शृणुतं हवं यदि मे जुजोषथः ।
युवोर्हि सख्यमुत वा यदाप्यं मार्डीकमिन्द्रावरुणा नि यच्छतम् ॥८॥
अस्माकमिन्द्रावरुणा भरेभरे पुरोयोधा भवतं कृष्ट्योजसा ।
यद्वां हवन्त उभये अध स्पृधि नरस्तोकस्य तनयस्य सातिषु ॥९॥
अस्मे इन्द्रो वरुणो मित्रो अर्यमा द्युम्नं यच्छन्तु महि शर्म सप्रथः ।
अवध्रं ज्योतिरदितेॠतावृधो देवस्य श्लोकं सवितुर्मनामहे ॥१०॥

*indrāvaruṇā yuvamadhvarāya no viśe janāya mahi śarma yachchhatam ।*
*dīrghaprayajyumati yo vanuṣyati vayaṁ jayema pṛtanāsu dūḍhyaḥ ॥1॥*
*samrāḻanya svarāḻanya uchyate vāṁ mahāntāvindrāvaruṇā mahāvasū ।*
*viśve devāsaḥ parame vyomani saṁ vāmojo vṛṣaṇā saṁ balaṁ dadhuḥ ॥2॥*
*anvapāṁ khānyatṛntamojasā sūryamairayataṁ divi prabhum ।*
*indrāvaruṇā made asya māyino'pinvatamapitaḥ pinvataṁ dhiyaḥ ॥3॥*
*yuvāmidyutsu pṛtanāsu vahnayo yuvāṁ kṣemasya prasave mitajñavaḥ ।*
*īśānā vasva ubhayasya kārava indrāvaruṇā suhavā havāmahe ॥4॥*
*indrāvaruṇā yadimāni chakrathurviśvā jātāni bhuvanasya majmanā ।*
*kṣemeṇa mitro varuṇaṁ duvasyati marudbhirugraḥ śubhamanya īyate ॥5॥*
*mahe śulkāya varuṇasya nu tviṣa ojo mimāte dhruvamasya yatsvam ।*
*ajāmimanyaḥ śnathayantamātiraddabhrebhiranyaḥ pra vṛṇoti bhūyasaḥ ॥6॥*
*na tamaṁho na duritāni martyamindrāvaruṇā na tapaḥ kutaśchana ।*
*yasya devā gachchhatho vītho adhvaraṁ na taṁ martasya naśate parihvṛtiḥ ॥7॥*
*arvāṅ narā daivyenāvasā gataṁ śṛṇutaṁ havaṁ yadi me jujoṣathaḥ ।*
*yuvorhi sakhyamuta vā yadāpyaṁ mārḍīkamindrāvaruṇā ni yachchhatam ॥8॥*
*asmākamindrāvaruṇā bharebhare puroyodhā bhavataṁ kṛṣṭyojasā ।*
*yadvāṁ havanta ubhaye adha spṛdhi narastokasya tanayasya sātiṣu ॥9॥*
*asme indro varuṇo mitro aryamā dyumnaṁ yachchhantu mahi śarma saprathaḥ ।*
*avadhraṁ jyotiraditeṛtāvṛdho devasya ślokaṁ saviturmanāmahe ॥10॥*

ऋ. (Rv.) ७.८३.१-१०

युवां नरा पश्यमानास आप्यं प्राचा गव्यन्तः पृथुपर्शवो ययुः ।
दासा च वृत्रा हतमार्याणि च सुदासमिन्द्रावरुणावसावतम् ॥१॥
यत्रा नरः समयन्ते कृतध्वजो यस्मिन्नाजा भवति किं चन प्रियम् ।
यत्रा भयन्ते भुवना स्वर्दृशस्तत्रा न इन्द्रावरुणाधि वोचतम् ॥२॥
सं भूम्या अन्ता ध्वसिरा अदृक्षतेन्द्रावरुणा दिवि घोष आरुहत् ।
अस्थुर्जनानामुप मामरातयोऽर्वागवसा हवनश्रुता गतम् ॥३॥
इन्द्रावरुणा वधनाभिरप्रति भेदं वन्वन्ता प्र सुदासमावतम् ।
ब्रह्माण्येषां शृणुतं हवीमनि सत्या तृत्सूनामभवत्पुरोहितिः ॥४॥
इन्द्रावरुणावभ्यां तपन्ति माघान्यर्यो वनुषामरातयः ।
युवं हि वस्व उभयस्य राजथोऽध स्मा नोऽवतं पार्ये दिवि ॥५॥
युवां हवन्त उभयास आजिष्विन्द्रं च वस्वो वरुणं च सातये ।
यत्र राजभिर्दशभिर्निबाधितं प्र सुदासभावतं तृत्सुभिः सह ॥६॥
दश राजानः समिता अयज्यवः सुदासमिन्द्रावरुणा न युयुधुः ।
सत्या नृणामद्मसदामुपस्तुतिर्देवा एषामभवन्देवहूतिषु ॥७॥
दाशराज्ञे परियत्ताय विश्वतः सुदास इन्द्रावरुणावशिक्षतम् ।
श्वित्यंचो यत्र नमसा कपर्दिनो धिया धीवन्तो असपन्त तृत्सवः ॥८॥
वृत्राण्यन्यः समिथेषु जिघ्नते व्रतान्यन्तो अभि रक्षते सदा ।
हवामहे वां वृषणा सुवृक्तिभिरस्मे इन्द्रावरुणा शर्म यच्छतम् ॥९॥
अस्मे इन्द्रो वरुणो मित्रे अर्यमा द्युम्नं यच्छन्तु महि शर्म सप्रथः ।

अवध्रं ज्योतिरदितेऋर्तावृधो देवस्य श्लोकं सवितुर्मनामहे ॥१०॥

*yuvāṁ narā paśyamānāsa āpyaṁ prāchā gavyantaḥ pṛthuparśavo yayuḥ ।*
*dāsā cha vṛtrā hatamāryāṇi cha sudāsamindrāvaruṇāvasāvatam ॥1॥*
*yatrā naraḥ samayante kṛtadhvajo yasminnāājā bhavati kiṁ chana priyam ।*
*yatrā bhayante bhuvanā svardṛśastatrā na indrāvaruṇādhi vochatam ॥2॥*
*saṁ bhūmyā antā dhvasirā adṛkṣatendrāvaruṇā divi ghoṣa āruhat ।*
*asthurjanānāmupa māmarātayo'rvāgavasā havanaśrutā gatam ॥3॥*
*indrāvaruṇā vadhanabhiraprati bhedaṁ vanvantā pra sudāsamāvatam ।*
*brahmāṇyeṣāṁ śṛṇutaṁ havīmani satyā tṛtsūnāmabhavatpurohitiḥ ॥4॥*
*indrāvaruṇāvabhyāṁ tapanti māghānyaryo vanuṣāmarātayaḥ ।*
*yuvaṁ hi vasva ubhayasya rājatho'dha smā no'vataṁ pārye divi ॥5॥*
*yuvāṁ havanta ubhayāsa ājiṣvindraṁ cha vasvo varuṇaṁ cha sātaye ।*
*yatra rājabhirdaśabhirnibādhitaṁ pra sudāsabhāvataṁ tṛtsubhiḥ saha ॥6॥*
*daśa rājānaḥ samitā ayajyavaḥ sudāsamindrāvaruṇā na yuyudhuḥ ।*
*satyā nṛṇāmadmasadāmupastutirdevā eṣāmabhavandevahūtiṣu ॥7॥*
*dāśarājñe pariyattāya viśvataḥ sudāsa indrāvaruṇāvaśikṣatam ।*
*śvityaṁcho yatra namasā kapardino dhiyā dhīvanto asapanta tṛtsavaḥ ॥8॥*
*vṛtrāṇyanyaḥ samitheṣu jighnate vratānyanto abhi rakṣate sadā ।*
*havāmahe vāṁ vṛṣaṇā suvṛktibhirasme indrāvaruṇā śarma yachchhatam ॥9॥*
*asme indro varuṇo mitre aryamā dyumnaṁ yachchhantu mahi śarma saprathaḥ ।*
*avadhraṁ jyotiraditeṛrtāvṛdho devasya ślokaṁ saviturmanāmahe ॥10॥*

ऋ. (Rv.) ७.८४.१-५

आ वां राजानवध्वरे ववृत्यां हवयेभिरिन्द्रावरुणा रमोभिः ।
प्र वां घृताची बाह्वोर्दधाना परि त्मना विषुरूपा जिगाति ॥१॥
युवो राष्ट्रं बृहदिन्वति द्यौर्यौ सेतृभिररज्जुभिः सिनीथः ।
परि नो हेळो वरुणस्य वृज्या उरुं न इन्द्रः कृणवदु लोकम् ॥२॥
कृतं नो यज्ञं विदथेषु चारुं कृतं ब्रह्माणि सूरिषु प्रशस्ता ।
उपो रयिर्देवजूतो न एतु प्र णः स्पार्हाभिरूतिभिस्तिरेतम् ॥३॥
अस्मे इन्द्रावरुणा विश्ववारं रयिं धत्तं वसुमन्तं पुरुक्षुम् ।
प्र य आदित्यो अनृता मिनात्यमिता शूरो दयते वसूनि ॥४॥
इयमिन्द्रं वरुणमष्ट मे गीः प्रावत्तोके तनये तूतुजाना ।
सुरत्नासो देववीतिं गमेम यूयं पात स्वस्तिभिः सदा नः ॥५॥

*ā vāṁ rājānavadhvare vavṛtyāṁ havayebhirindrāvaruṇā ramobhiḥ ।*
*pra vāṁ ghṛtāchī bāhvordadhānā pari tmanā viṣurūpā jigāti ॥1॥*
*yuvo rāṣṭraṁ bṛhadinvati dyauryau setṛbhirarajjubhiḥ sinīthaḥ ।*
*pari no heḷo varuṇasya vṛjyā uruṁ na indraḥ kṛṇavadu lokam ॥2॥*
*kṛtaṁ no yajñaṁ vidatheṣu chāruṁ kṛtaṁ brahmāṇi sūriṣu praśastā ।*
*upo rayirdevajūto na etu pra ṇaḥ spārhābhirūtibhistiretam ॥3॥*
*asme indrāvaruṇā viśvavāraṁ rayiṁ dhattaṁ vasumantaṁ purukṣum ।*
*pra ya ādityo anṛtā minātyamitā śūro dayate vasūni ॥4॥*
*iyamindraṁ varuṇamaṣṭa me gīḥ prāvattoke tanaye tṛtujānā ।*
*suratnāso devavītiṁ gamema yūyaṁ pāta svastibhiḥ sadā naḥ ॥5॥*

ऋ. (Rv.) ७.८५.१-५

पुनीषे वामरक्षसं मनीषां सोममिन्द्राय वरुणाय जुह्वत् ।
घृतप्रतीकामुषसं न देवीं ता नो यामन्नुरुष्यतामभीके ॥१॥
स्पर्धन्ते वा उ देवहूये अत्र येषु ध्वजेषु दिद्यवः पतन्ति ।
युवं ताँ इन्द्रावरुणावमित्रान्हतं पराचः शर्वा विषूचः ॥२॥
आपश्चिद्धि स्वयशसः सदःसु देवीरिन्द्रं वरुणं देवता धुः ।
कृष्टीरन्यो धारयति प्रविक्ता वृत्राण्यन्यो अप्रतीनिं हन्ति ॥३॥
स सुक्रतुऋर्तचिदस्तु होता य आदित्य शवसा वां नमस्वान् ।
आववर्तदवसे वां हविष्मानसदित्स सुविताय प्रयस्वान् ॥४॥

इयमिन्द्रं वरुणमष्ट मे गीः प्रावत्तोके तनये तूतुजाना ।
सुरत्नासो देववीतिं गमेम यूयं पात स्वस्तिभिः सदा नः ॥५॥
*punīṣe vāmarakṣasaṁ manīṣāṁ somamindrāya varuṇāya juhvat ।*
*ghṛtapratīkāmuṣasaṁ na devīṁ tā no yāmannuruṣyatāmabhīke ॥1॥*
*spardhante vā u devahūye atra yeṣu dhvajeṣu didyavaḥ patanti ।*
*yuvaṁ tāṁ̐ indrāvaruṇāvamitrānhataṁ parāchaḥ śarvā viṣūchaḥ ॥2॥*
*āpaśchiddhi svayaśasaḥ sadaḥsu devīrindraṁ varuṇaṁ devatā dhuḥ ।*
*kṛṣṭīranyo dhārayati praviktā vṛtrāṇyanyo apratīniṁ hanti ॥3॥*
*sa sukraturṛtachidastu hotā ya āditya śavasā vāṁ namasvān ।*
*āvavartadavase vāṁ haviṣmānasaditsa suvitāya prayasvān ॥4॥*
*iyamindraṁ varuṇamaṣṭa me gīḥ prāvattoke tanaye tṛtujānā ।*
*suratnāso devavītiṁ gamema yūyaṁ pāta svastibhiḥ sadā naḥ ॥5॥*

१८. इन्द्रवायू (Indravāyū) - ऋ. (Rv.) ७.९०.५-७; ७.९१.२; ४-७; ७.९२.२; ४; अ. (Av.) ३.२०.६

ऋ. (Rv.) ७.९०.५-७

ते सत्येन मनसा दीध्यानाः स्वेन युक्तासः क्रतुना वहन्ति ।
इन्द्रवायू वीरवाहं रथं वामीशानयोरभि पृक्षः सचन्ते ॥५॥
ईशानासो ये दधते स्वर्णो गोभिरश्वेभिर्वसुभिर्हिरण्यैः ।
इन्द्रवायू सूरयो विश्वमायुरर्वद्भिर्वीरैः पृतनासु सह्युः ॥६॥
अर्वन्तो न श्रवसो भिक्षमाणा इन्द्रवायू सुष्टुतिभिर्वसिष्ठाः ।
वाजयन्तः स्ववसे हुवेम यूयं पात स्वस्तिभिः सदा नः ॥७॥
*te satyena manasā dīdhyānāḥ svena yuktāsaḥ kratunā vahanti ।*
*indravāyū vīravāhaṁ rathaṁ vāmīśānayorabhi pṛkṣaḥ sachante ॥5॥*
*īśānāso ye dadhate svarṇo gobhiraśvebhirvasubhirhiraṇyaiḥ ।*
*indravāyū sūrayo viśvamāyurarvadbhirvīraiḥ pṛtanāsu sahyuḥ ॥6॥*
*arvanto na śravaso bhikṣamāṇā indravāyū suṣṭutibhirvasiṣṭhāḥ ।*
*vājayantaḥ svavase huvema yūyaṁ pāta svastibhiḥ sadā naḥ ॥7॥*

ऋ. (Rv.) ७.९१.२

उशन्ता दूता न दभाय गोपा मासश्च पाथः शरदश्च पूर्वीः ।
इन्द्रवायू सुष्टुतिर्वामियाना मार्डीकमीट्टे सुवितं च नव्यम् ॥२॥
*uśantā dṛtā na dabhāya gopā māsaścha pāthaḥ śaradaścha pūrvīḥ ।*
*indravāyū suṣṭutirvāmiyānā mārḍīkamīṭṭe suvitaṁ cha navyam ॥2॥*

ऋ. (Rv.) ७.९१.४-७

यावत्तरस्तन्वो३ यावदोजो यावन्नरश्चक्षसा दीध्यानाः ।
शुचिं सोमं शुचिपा पातमस्मे इन्द्रवायू सदतं बर्हिरेदम् ॥४॥
नियुवाना नियुतः सपार्हवीरा इन्द्रवायू सरथं यातमर्वाक् ।
इदं हि वां प्रभृतं मध्वो अग्रमध प्रीणाना वि मुमुक्तमस्मे ॥५॥
या वां शतं नियुतो याः सहस्रमिन्द्रवायू विश्ववाराः सचन्ते ।
आभिर्यातं सुविदत्राभिरर्वाक्पातं नरा प्रतिभृतस्य मध्वः ॥६॥
अर्वन्तो न श्रवसो भिक्षमाणा इन्द्रवायू सुष्टुतिभिर्वसिष्ठाः ।
वाजयन्तः स्ववसे हुवेम यूयं पात स्वस्तिभिः सदा नः ॥७॥
*yāvattarastanvo3 yāvadojo yāvannaraśchakṣasā dīdhyānāḥ ।*
*śuchiṁ somaṁ śuchipā pātamasme indravāyū sadataṁ barhiredam ॥4॥*
*niyuvānā niyutaḥ sapārhavīrā indravāyū sarathaṁ yātamarvāk ।*
*idaṁ hi vāṁ prabhṛtaṁ madhvo agramadha prīṇānā vi mumuktamasme ॥5॥*
*yā vāṁ śataṁ niyuto yāḥ sahasramindravāyū viśvavārāḥ sachante ।*
*ābhiryātaṁ suvidatrābhirarvākpātaṁ narā pratibhṛtasya madhvaḥ ॥6॥*
*arvanto na śravaso bhikṣamāṇā indravāyū suṣṭutibhirvasiṣṭhāḥ ।*
*vājayantaḥ svavase huvema yūyaṁ pāta svastibhiḥ sadā naḥ ॥7॥*

ऋ. (Rv.) ७.९२.२

प्र सोता जीरो अध्वरेष्वस्थात् सोममिन्द्राय वायवे पिबध्यै ।
प्र यद्वां मध्वो अग्रियं भरन्त्यध्वर्यवो देवयन्तः शचीभिः ॥२॥
*pra sotā jīro adhvareṣvasthāt somamindrāya vāyave pibadhyai ।*
*pra yadvāṁ madhvo agriyaṁ bharantyadhvaryavo devayantaḥ śachībhiḥ ॥2॥*

ऋ. (Rv.) ७.९२.४

ये वायव इन्द्रमादनास आदेवासो नितोशनासो अर्यः ।
घ्नन्तो वृत्राणि सूरिभिः ष्याम सासह्वांसो युधा नृभिरमित्रान् ॥४॥
*ye vāyava indramādanāsa ādevāso nitośanāso aryaḥ ।*
*ghnanto vṛtrāṇi sūribhiḥ ṣyāma sāsahvāṁso yudhā nṛbhiramitrān ॥4॥*

अ. (Av.) ३.२०.६

इन्द्रवायू उभाविह सुहवेह हवामहे ।
यथा नः सर्व इज्जनः संगत्यां सुमना असद् दानकामाश्च नो भुवत् ॥६॥
*indravāyū ubhāviha suhaveha havāmahe ।*
*yathā naḥ sarva ijjanaḥ saṁgatyāṁ sumanā asad dānakāmāścha no bhuvat ॥6॥*

१९. इन्द्राविष्णू (Indrāviṣṇū) - ऋ. (Rv.) ७.९९.४-६

उरुं यज्ञाय चक्रथुरु लोकं जनयन्ता सूर्यमुषासमग्निम् ।
दासस्य चिद्वृषशिप्रस्य माया जघ्नथुर्नरा पृतनाज्येषु ॥४॥
इन्द्राविष्णू दृंहिताः शम्बरस्य नव पुरो नवतिं च श्नथिष्टम् ।
शतं वर्चिनः सहस्रं च साकं हथो अप्रत्यसुरस्य वीरान् ॥५॥
इयं मनीषा बृहती बृहन्तोरुक्रमा तवसा वर्धयन्ती ।
ररे वां स्तोमं विदथेषु विष्णो पिन्वतमिषो वृजनेष्विन्द्र ॥६॥
*uruṁ yajñāya chakrathuru lokaṁ janayantā sūryamuṣāsamagnim ।*
*dāsasya chidvṛṣaśiprasya māyā jaghnathurnarā pṛtanājyeṣu ॥4॥*
*indrāviṣṇū dṛṁhitāḥ śambarasya nava puro navatiṁ cha śnathiṣṭam ।*
*śataṁ varchinaḥ sahasraṁ cha sākaṁ hatho apratyasurasya vīrān ॥5॥*
*iyaṁ manīṣā bṛhatī bṛhantorukramā tavasā vardhayantī ।*
*rare vāṁ stomaṁ vidatheṣu viṣṇo pinvatamiṣo vṛjaneṣvindra ॥6॥*

२०. इन्द्रासोमौ रक्षोहणौ (Indrāsomau Rakṣohaṇau) - ऋ. (Rv.) ७.१०४.१-७; १५; २५

ऋ. (Rv.) ७.१०४.१-७

इन्द्रासोमा तपतं रक्ष उब्जतं न्यर्पयतं वृषणा तमोवृधः ।
परा श्रृणीतमचितो न्योषतं हतं नुदेथां नि शिशीतमत्रिणः ॥१॥
इन्द्रासोमा समघशंसमभ्य१घं तपुर्ययस्तु चरुरग्निवाँ इव ।
ब्रह्मद्विषे क्रव्यादे घेरचक्षसे द्वेषो धत्तमनवायं किमीदिने ॥२॥
इन्द्रासोमा दुष्कृतो वव्रे अन्तरनारम्भणे तमसि प्र विध्यतम् ।
यथा नातः पुनरेकश्चनोदयत्तद्वामस्तु सहसे मन्युमच्छवः ॥३॥
इन्द्रासोमा वर्तयतं दिवो वधं सं पृथिव्या अघशंसाय तर्हणम् ।
उत्तक्षतं स्वर्यं१ पर्वतेभ्यो येन रक्षो वावृधानं निजूर्वथः ॥४॥
इन्द्रासोमा वर्तयतं दिवस्पर्यग्नितप्तेभिर्युवमश्महन्मभिः ।
तपुर्वधेभिरजरेभिरत्रिणो नि पर्शाने विध्यतं यन्तु निस्वरम् ॥५॥
इन्द्रासोमा परि वां भूतु विश्वत इयं मतिः कक्ष्याश्वेव वाजिना ।
यां वां होत्रां परिहिनोमि मेध्येमा ब्रह्माणि नृपतीव जिन्वतम् ॥६॥
प्रति स्मरेथां तुजयद्भिरेवैर्हतं द्रुहो रक्षसो भङ्गुरावतः ।
इन्द्रासोमा दुष्कृते मा सुगं भूद्यो नः कदा चिदभिदासति द्रुहा ॥७॥
*indrāsomā tapataṁ rakṣa ubjataṁ nyarpayataṁ vṛṣaṇā tamovṛdhaḥ ।*
*parā śṛṇītamachito nyoṣataṁ hataṁ nudethāṁ ni śiśītamatriṇaḥ ॥1॥*
*indrāsomā samaghaśaṁsamabhya1ghaṁ tapuryayastu charuragnivām̐ iva ।*
*brahmadviṣe kravyāde gherachakṣase dveṣo dhattamanavāyaṁ kimīdine ॥2॥*

*indrāsomā duṣkṛto vavre antaranārambhaṇe tamasi pra vidhyatam* ।
*yathā nātaḥ punarekaśchanodayattadvāmastu sahase manyumachchhavaḥ* ॥3॥
*indrāsomā vartayataṁ divo vadhaṁ saṁ pṛthivyā aghaśaṁsāya tarhaṇam* ।
*uttakṣataṁ svaryaṁ1 parvatebhyo yena rakṣo vāvṛdhānaṁ nijūrvathaḥ* ॥4॥
*indrāsomā vartayataṁ divasparyagnitaptebhiryuvamaśmahanmabhiḥ* ।
*tapurvadhebhirajarebhiratriṇo ni parśāne vidhyataṁ yantu nisvaram* ॥5॥
*indrāsomā pari vāṁ bhṛtu viśvata iyaṁ matiḥ kakṣayāśveva vājinā* ।
*yāṁ vāṁ hotrāṁ parihinomi medhyemā brahmāṇi nṛpatīva jinvatam* ॥6॥
*prati smarethāṁ tujayadbhirevairhataṁ druho rakṣaso bhaṅgurāvataḥ* ।
*indrāsomā duṣkṛte mā sugaṁ bhūdyo naḥ kadā chidabhidāsati druhā* ॥7॥

ऋ. (Rv.) ७.१०४.१५

अद्या मुरीय यदि यातुधानो अस्मि यदि वायुस्ततप पुरुषस्य ।
अधा स वीरैर्दशमिर्वि यूया यो मा मोघं यातुधानेत्याह ॥१५॥
*adyā murīya yadi yātudhāno asmi yadi vāyustatapa puruṣasya* ।
*adhā sa vīrairdaśamirvi yūyā yo mā moghaṁ yātudhānetyāha* ॥15॥

ऋ. (Rv.) ७.१०४.२५

प्रति चक्ष्व वि चक्ष्वेन्द्रश्च सोम जागृतम्। रक्षोभ्यो वधमस्यतमशनि यातुमद्भ्यः ॥२५॥
*prati chakṣava vi chakṣavendraścha soma jāgṛtam* । *rakṣobhyo vadhamasyatamaśani yātumadbhyaḥ* ॥25॥

२१. उषा (Uṣā) - ऋ. (Rv.) ७.४१.७; ७.७५.१-८; ७.७६.१-७; ७.७७.१-६; ७.७८.१-५; ७.७९.१-५; ७.८०.१-३; ७.८१.१-६; य. (Yv.) ३४.४०; अ. (Av.) १९.१२.१

ऋ. (Rv.) ७.४१.७

अश्वावतीर्गोमतीर्न उषासो वीरवतीः सदमुच्छन्तु भद्राः ।
घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वस्तिभिः सदा नः ॥७॥
*aśvāvatīrgomatīrna uṣāso vīravatīḥ sadamuchchhantu bhadrāḥ* ।
*ghṛtaṁ duhānā viśvataḥ prapītā yūyaṁ pāta svastibhiḥ sadā naḥ* ॥7॥

ऋ. (Rv.) ७.७५.१-८

व्यु१षा आवो दिविजा ऋतेनविष्कृण्वाना महिमानमागात् ।
अप द्रुहस्तम आवरजुष्टमंगिरस्तमा पथ्या अजीगः ॥१॥
महे नो अद्य सुविताय बोध्युषो महे सौभगाय प्र यन्धि ।
चित्रं रयिं यशसं धेह्यस्मे देवि मर्तेषु मानुषि श्रवस्युम् ॥२॥
एते त्ये भानवो दर्शतायाश्चित्रा उषसो अमृतास आगुः ।
जनयन्तो दैव्यानि व्रतान्यापृणन्तो अन्तरिक्षा व्यस्थुः ॥३॥
एषा स्या युजाना पराकात्पंच क्षितीः परि सद्यो जिगाति ।
अभिपश्यन्ती वयुना जनानां दिवो दुहिता भुवनस्य पत्नी ॥४॥
वाजिनीवती सूर्यस्य योषा चित्रामघा राय ईशे वसूनाम् ।
ऋषिष्टुता जरयन्ती मघोन्युषा उच्छति वह्निभिर्गृणाना ॥५॥
प्रति द्युतानामरुषासो अश्वाश्चित्रा अदृश्रनुषसं वहन्तः ।
याति शुभ्रा विश्वपिशा रथेन दधाति रत्नं विधते जनाय ॥६॥
सत्या सत्येभिर्महती महद्भिर्देवी देवेभिर्यजता यजत्रैः ।
रुजद् दृळहानिददुस्रियाणां प्रति गाव उषसं वावशन्त ॥७॥
नू नो गोमद्वीरवद्धेहि रत्नमुषो अश्वावत्पुरुभोजो अस्मे ।
मा नो बर्हिः पुरुषता निदे कर्यूयं पात स्वस्तिभिः सदा नः ॥८॥
*vyu1ṣā āvo divijā ṛtenaviṣkṛṇvānā mahimānamāgāt* ।
*apa druhastama āvarajuṣṭamaṁgirastamā pathyā ajīgaḥ* ॥1॥
*mahe no adya suvitāya bodhyuṣo mahe saubhagāya pra yandhi* ।
*chitraṁ rayiṁ yaśasaṁ dhehyasme devi marteṣu mānuṣi śravasyum* ॥2॥
*ete tye bhānavo darśatāyāśchitrā uṣaso amṛtāsa āguḥ* ।
*janayanto daivyāni vratānyāpṛṇanto antarikṣā vyasthuḥ* ॥3॥

*eṣā syā yujānā parākātpaṁcha kṣitīḥ pari sadyo jigāti ।*
*abhipaśyantī vayunā janānāṁ divo duhitā bhuvanasya patnī ॥4॥*
*vājinīvatī sūryasya yoṣā chitrāmaghā rāya īśe vasūnām ।*
*ṛṣiṣṭutā jarayantī maghonyuṣā uchchhati vahnibhirgṛṇānā ॥5॥*
*prati dyutānāmaruṣāso aśvāśchitrā adṛśrannuṣasaṁ vahantaḥ ।*
*yāti śubhrā viśvapiśā rathena dadhāti ratnaṁ vidhate janāya ॥6॥*
*satyā satyebhirmahatī mahadbhirdevī devebhiryajatā yajatraiḥ ।*
*rujad dṛḷahānidadadusriyāṇāṁ prati gāva uṣasaṁ vāvaśanta ॥7॥*
*nū no gomadvīravaddhehi ratnamuṣo aśvāvatpurubhojo asme ।*
*mā no barhiḥ puruṣatā nide karyūyaṁ pāta svastibhiḥ sadā naḥ ॥8॥*

ऋ. (Rv.) ७.७६.१-७

उदु ज्योतिरमृतं विश्वजन्यं विश्वानरः सविता देवो अश्रेत् ।
क्रत्वा देवानमजनिष्ट चक्षुराविरकर्भुवनं विश्वमुषाः ॥१॥
प्र मे पन्था देवयाना अदृश्रन्नमर्धन्तो वसुभिरिष्कृतासः ।
अभूदु केतुरुषसः पुरस्तात्प्रतीच्यागादधि हर्म्येभ्यः ॥२॥
तानीदहानि बहुलान्यासन्या प्राचीनमुदिता सूर्यस्य ।
यतः परि जारइवाचरन्त्युषो ददृक्षे न पुनर्यतीव ॥३॥
त इद्देवानां सधमाद आसन्नृतावानः कवयः पूर्व्यासः ।
गूळहं ज्योतिः पितरो अन्वविन्दन्त्सत्यमन्त्रा अजनयन्नुषासम् ॥४॥
समान ऊर्वे अधि संगतासः सं जानते न यतन्ते मिथस्ते ।
ते देवानां न मिनन्ति व्रतान्यमर्धन्तो वसुभिर्यादमानाः ॥५॥
प्रति त्वा स्तोमैरीळते वसिष्ठा उषर्बुधः सुभगे तुष्टुवांसः ।
गवां नेत्री वाजपत्नी न उच्छोषः सुजाते प्रथमा जरस्व ॥६॥
एषा नेत्री राधसः सूनृतानामुषा उच्छन्ती रिभ्यते वसिष्ठैः ।
दीर्घश्रुतं रयिमस्मे दधाना यूयं पात स्वस्तिभिः सदा नः ॥७॥

*udu jyotiramṛtaṁ viśvajanyaṁ viśvānaraḥ savitā devo aśret ।*
*kratvā devānamajaniṣṭa chakṣurāvirakarbhuvanaṁ viśvamuṣāḥ ॥1॥*
*pra me panthā devayānā adṛśrannamardhanto vasubhiriṣkṛtāsaḥ ।*
*abhūdu keturuṣasaḥ purastātpratīchyāgādadhi harmyebhyaḥ ॥2॥*
*tānīdahāni bahulānyāsanyā prāchīnamuditā sūryasya ।*
*yataḥ pari jāraivācharantyuṣo dadṛkṣe na punaryatīva ॥3॥*
*ta iddevānāṁ sadhamāda āsannṛtāvānaḥ kavayaḥ pūrvyāsaḥ ।*
*gūḷahaṁ jyotiḥ pitaro anvavindantsatyamantrā ajanayannuṣāsam ॥4॥*
*samāna ūrve adhi saṁgatāsaḥ saṁ jānate na yatante mithaste ।*
*te devānāṁ na minanti vratānyamardhanto vasubhiryādamānāḥ ॥5॥*
*prati tvā stomairīḷate vasiṣṭhā uṣarbudhaḥ subhage tuṣṭuvāṁsaḥ ।*
*gavāṁ netrī vājapatnī na uchchhoṣaḥ sujāte prathamā jarasva ॥6॥*
*eṣā netrī rādhasaḥ sūnṛtānāmuṣā uchchhantī ribhyate vasiṣṭhaiḥ ।*
*dīrghaśrutaṁ rayimasme dadhānā yūyaṁ pāta svastibhiḥ sadā naḥ ॥7॥*

ऋ. (Rv.) ७.७७.१-६

उपो रुरुचे युवतिर्न योषा विश्वं जीवं प्रसुवन्ती चरायै ।
अभूदग्निः समिधे मानुषाणामकर्ज्योतिर्बाधमाना तमांसि ॥१॥
विश्वं प्रतीची सप्रथा उदस्थाद्रुशद्वासो बिभ्रती शुक्रमश्वैत् ।
हिरण्यवर्णा सुदृशीकसंदृग् गवां माता नेत्र्यह्नामरोचि ॥२॥
देवानां चक्षुः सुभगा वहन्ती श्वेतं नयन्ती सुदृशीकमश्वम् ।
उषा अदर्शि रश्मिभिर्व्यक्ता चित्रामघा विश्वमनु प्रभूता ॥३॥
अन्तिवामा दूरे अमित्रमुच्छोर्वीं गव्यूतिमभ्यं कृधी नः ।
यावय द्वेष आ भरा वसूनि चोदय राधो गृणते मघोनि ॥४॥
अस्मे श्रेष्ठेभिर्भानुभिर्वि भाह्युषो देवि प्रतिरन्ती न आयुः ।
इषं च नो दधती विश्वावारे गोमदश्वावद्रथवच्च राधः ॥५॥

यां त्वा दिवो दुहितर्वर्धयन्त्युषः सुजाते मतिभिर्वसिष्ठाः ।
सास्मासु धा रयिमृष्वं बृहन्तं यूयं पात स्वस्तिभिः सदा नः ॥६॥
*upo ruruche yuvatirna yoṣā viśvaṁ jīvaṁ prasuvantī charāyai ।*
*abhūdagniḥ samidhe mānuṣāṇāmakarjyotirbādhamānā tamāṁsi ॥1॥*
*viśvaṁ pratīchī sapratha udasthādruśadvāso bibhratī śukramaśvait ।*
*hiraṇyavarṇā sudṛśīkasaṁdṛg gavāṁ mātā netrayahnāmarochi ॥2॥*
*devānāṁ chakṣuḥ subhagā vahantī śvetaṁ nayantī sudṛśīkamaśvam ।*
*uṣā adarśi raśmibhirvyaktā chitrāmaghā viśvamanu prabhūtā ॥3॥*
*antivāmā dūre amitramuchchhorvīṁ gavyūtimabhyaṁ kṛdhī naḥ ।*
*yāvaya dveṣa ā bharā vasūni chodaya rādho gṛṇate maghoni ॥4॥*
*asme śreṣṭhebhirbhānubhirvi bhāhyuṣo devi pratirantī na āyuḥ ।*
*iṣaṁ cha no dadhatī viśvāvāre gomadaśvāvadrathavachcha rādhaḥ ॥5॥*
*yāṁ tvā divo duhitarvardhayantyuṣaḥ sujāte matibhirvasiṣṭhāḥ ।*
*sāsmāsu dhā rayimṛṣvaṁ bṛhantaṁ yūyaṁ pāta svastibhiḥ sadā naḥ ॥6॥*

ऋ. (Rv.) ७.७८.१-५

प्रति केतवः प्रथमा अदृश्रन्नूर्ध्वा अस्या अञ्जयो वि श्रयन्ते ।
उषो अर्वाचा बृहता रथेन ज्योतिष्मता वाममस्मभ्यं वक्षि ॥१॥
प्रति षीमग्निर्जरते समिद्धः प्रति विप्रासो मतिभिर्गृणन्तः ।
उषा याति ज्योतिषा बाधमाना विश्वा तमांसि दुरिताप देवी ॥२॥
एता उ त्याः प्रत्यदृश्रन् पुरस्ताज्ज्योतिर्यच्छन्तीरुषसो विभातीः ।
अजीजनन्त्सूर्यं यज्ञमग्निमपाचीनं तमो अगादजुष्टम् ॥३॥
अचेति दिवो दुहिता मघोनी विश्वे पश्यन्त्युषसं विभातीम् ।
आस्थाद्रथं स्वधया युज्यमानमा यमश्वासः सुयुजो वहन्ति ॥४॥
प्रति त्वाद्य सुमनसो बुधन्तास्माकासो मघवानो वयं च ।
तिल्विलायध्वमुषसो विभातीर्यूयं पात स्वस्तिभिः सदा नः ॥५॥
*prati ketavaḥ prathamā adṛśrannūrdhvā asyā ajjayo vi śrayante ।*
*uṣo arvāchā bṛhatā rathena jyotiṣmatā vāmamasmabhyaṁ vakṣi ॥1॥*
*prati ṣīmagnirjarate samiddhaḥ prati viprāso matibhirgṛṇantaḥ ।*
*uṣā yāti jyotiṣā bādhamānā viśvā tamāṁsi duritāpa devī ॥2॥*
*etā u tyāḥ pratyadṛśran purastājjyotiryachchhantīruṣaso vibhātīḥ ।*
*ajījanantsūryaṁ yajñamagnimapāchīnaṁ tamo agādajuṣṭam ॥3॥*
*acheti divo duhitā maghonī viśve paśyantyuṣasaṁ vibhātīm ।*
*āsthādrathaṁ svadhayā yujyamānamā yamaśvāsaḥ suyujo vahanti ॥4॥*
*prati tvādya sumanaso budhantāsmākāso maghavāno vayaṁ cha ।*
*tilvilāyadhvamuṣaso vibhātīryūyaṁ pāta svastibhiḥ sadā naḥ ॥5॥*

ऋ. (Rv.) ७.७९.१-५

व्यु२षा आवः पथ्या३ जनानां पंच क्षितीतीर्मानुषीर्बोधीयन्ती सुसंदृग्निरुक्षभिर्भानुमश्रेद्वि सूर्यो रोदसी चक्षसावः ॥१॥
व्यंजते दिवो अन्तेष्वक्तून्विशो न युक्ता उषसो यतन्ते ।
सं ते गावस्तम आ वर्तयन्ति ज्योतिर्यच्छन्ति सवितेव बाहू ॥२॥
अभूदुषा इन्द्रतमा मघोन्यजीजनत् सुविताय श्रवांसि ।
वि दिवो देवी दुहिता दधात्यंगिरस्तमा सुकृते वसुनि ॥३॥
तावदुषो राधो अस्मभ्यं रास्व यावत्स्तोतृभ्यो अरदो गृणाना ।
यां त्वा जज्ञुर्वृषभस्या रवेण वि दृळहस्य दुरो अद्रेरौर्णोः ॥४॥
देवंदेवं राधसे चोदयन्त्यस्मद्र्यक्सूनृता ईरयन्ती ।
व्युच्छन्तीः न सनये धियो धा यूयं पात स्वस्तिभिः सदा नः ॥५॥
*vyu2ṣā āvaḥ pathyā3 janānāṁ paṁcha kṣiītīrmānuṣīrbodhīyantī*
*susaṁdṛgnirukṣabhirbhānumaśredvi sūryo rodasī chakṣasāvaḥ ॥1॥*
*vyaṁjate divo anteṣvaktūnviśo na yuktā uṣaso yatante ।*
*saṁ te gāvastama ā vartayanti jyotiryachchhanti saviteva bāhū ॥2॥*
*abhūduṣā indratamā maghonyajījanat suvitāya śravāṁsi ।*
*vi divo devī duhitā dadhātyaṁgirastamā sukṛte vasuni ॥3॥*

*tāvaduṣo rādho asmabhyaṁ rāsva yāvatstotṛbhyo arado gṛṇānā ।*
*yāṁ tvā jajñurvṛṣabhasyā raveṇa vi dṛḷahasya duro adreraurṇeḥ ॥4॥*
*devaṁdevaṁ rādhase chodayantyasmadyraksūnṛtā īrayantī ।*
*vyuchchhantīḥ na sanaye dhiyo dhā yūyaṁ pāta svastibhiḥ sadā naḥ ॥5॥*

ऋ. (Rv.) ७.८०.१-३

प्रति स्तोमेभिरुषसं वसिष्ठा गीर्भिर्विप्रासः प्रथमा अबुध्रन् ।
विवर्तयन्ती रजसी समन्ते आविष्कृण्वतीं भुवनानि विश्वा ॥१॥
एषा स्या नव्यमायुर्दधाना गूढ्वी तमो ज्योतिषोषा अबोधि ।
अग्र एति युवतिरह्रयाणा प्राचिकितत्सूर्यं यज्ञमग्निम् ॥२॥
अश्वावतीर्गोमतीर्न उषासो वीरवतीः सदमुच्छन्तु भद्राः ।
घृतं दुहाना विश्वतः प्रपीता ययं पात स्वस्तिभिः सदा नः ॥३॥
*prati stomebhiruṣasaṁ vasiṣṭhā gīrbhirviprāsaḥ prathamā abudhran ।*
*vivartayantī rajasī samante āviṣkṛṇvatīṁ bhuvanāni viśvā ॥1॥*
*eṣā syā navyamāyurdadhānā gūḍhvī tamo jyotiṣoṣā abodhi ।*
*agra eti yuvatirahrayāṇā prāchikitatsūryaṁ yajñamagnim ॥2॥*
*aśvāvatīrgomatīrna uṣāso vīravatīḥ sadamuchchhantu bhadrāḥ ।*
*ghṛtaṁ duhānā viśvataḥ prapītā yayaṁ pāta svastibhiḥ sadā naḥ ॥3॥*

ऋ. (Rv.) ७.८१.१-६

प्रत्यु अदर्श्यायत्यु१च्छन्ती दुहिता दिवः ।
अपो महि व्ययति चक्षसे तमो ज्योतिष्कृणोति सूनरी ॥१॥
उदुस्रियाः सृजते सूर्यः सचाँ उद्यन्नक्षत्रमर्चिवत् ।
तवेदुषो व्युषि सूर्यस्य च सं भक्तेन गमेमहि ॥२॥
प्रति त्वा दुहितर्दिव उषो जीरा अभुत्स्महि ।
या वहसि पुरु स्पार्हं वनन्वति रत्नं न दाशुषे मयः ॥३॥
उच्छन्ती या कृणोषि मंहना महि प्रख्यै देवि स्वर्दृशे ।
तस्यास्ते रत्नभाज ईमहे वयं स्याम मातुर्न सूनवः ॥४॥
तच्चित्रं राध आ भरोषो यद्दीर्घश्रुत्तमम् ।
यत्ते दिवो दुहितर्मर्तभोजनं तद्रास्व भुनजामहै ॥५॥
श्रवः सूरिभ्यो अमृतं वसुत्वनं वाजाँ अस्मभ्यं गोमतः ।
चोदयित्री मघोनः सूनृतावत्युषा उच्छदप स्रिधः ॥६॥
*pratyu adarśyāyatyu1chchhantī duhitā divaḥ ।*
*apo mahi vyayati chakṣase tamo jyotiṣkṛṇoti sūnarī ॥1॥*
*udusriyāḥ sṛjate sūryaḥ sachām̐ udyannakṣatramarchivat ।*
*taveduṣo vyuṣi sūryasya cha saṁ bhaktena gamemahi ॥2॥*
*prati tvā duhitardiva uṣo jīrā abhutsmahi ।*
*yā vahasi puru spārhaṁ vananvati ratnaṁ na dāśuṣe mayaḥ ॥3॥*
*uchchhantī yā kṛṇoṣi maṁhanā mahi prakhyai devi svardṛśe ।*
*tasyāste ratnabhāja īmahe vayaṁ syāma māturna sūnavaḥ ॥4॥*
*tachchitraṁ rādha ā bharoṣo yaddīrghaśruttamam ।*
*yatte divo duhitarmartabhojanaṁ tadrāsva bhunajāmahai ॥5॥*
*śravaḥ sūribhyo amṛtaṁ vasutvanaṁ vājām̐ asmabhyaṁ gomataḥ ।*
*chodayitrī maghonaḥ sūnṛtāvatyuṣā uchchhadapa sridhaḥ ॥6॥*

य. (Yv.) ३४.४०

अश्वावतीर्गोमतीर्नऽउषासो वीरवतीः सदमुच्छन्तु भद्राः ।
घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वम्तिभिः सदा नः ॥४०॥
*aśvāvatīrgomatīrna'uṣāso vīravatīḥ sadamuchchhantu bhadrāḥ ।*
*ghṛtaṁ duhānā viśvataḥ prapītā yūyaṁ pāta svamtibhiḥ sadā naḥ ॥40॥*

अ. (Av.) १९.१२.१

उषा अप स्वसुस्तमः सं वर्तयति वर्तनिं सुजातता ।
अया वाजं देवहितं सनेम मदेम शतहिमाः सुवीराः ॥१॥

*uṣā apa svasustamaḥ saṁ vartayati vartaniṁ sujātatā /*
*ayā vājaṁ devahitaṁ sanema madema śatahimāḥ suvīrāḥ //1 //*

२२. ऋभवः (Ṛbhavaḥ) - ऋ. (Rv.) ७.४८.१-३

ऋभुक्षणो वाजा मादयध्वमस्मे नरो मघवानः सुतस्य ।
आ वोऽर्वाचः क्रतवो न यातां विभ्वो रथं नर्यं वर्तयन्तु ॥१॥
ऋभुर्ऋभुभिरभि वः स्याम विभ्वो विभुभिः शवसा शवांसि ।
वाजो अस्माँ अवतु वाजसाताविन्द्रेण युजा तरुषेम वृत्रम् ॥२॥
ते चिद्धि पूर्वीरभि सन्ति शासा विश्वाँ अर्य उपरताति वन्वन् ।
इन्द्रो विभ्वाँ ऋभुक्षा वाजो अर्यः शत्रोर्मिथत्या कृणवन्वि नृम्णम् ॥३॥
*ṛbhukṣaṇo vājā mādayadhvamasme naro maghavānaḥ sutasya /*
*ā vo'rvāchaḥ kratavo na yātāṁ vibhvo rathaṁ naryaṁ vartayantu //1 //*
*ṛbhurṛbhubhirabhi vaḥ syāma vibhvo vibhubhiḥ śavasā śavāṁsi /*
*vājo asmām̐ avatu vājasātāvindreṇa yujā taruṣema vṛtram //2 //*
*te chiddhi pūrvīrabhi santi śāsā viśvām̐ arya uparatāti vanvan /*
*indro vibhvām̐ ṛbhukṣā vājo aryaḥ śatrormithatyā kṛṇavanvi nṛmṇam //3 //*

२३. ऋभवो विश्वेदेवा वा (Ṛbhavo Viśvedevā Vā) - ऋ. (Rv.) ७.४८.४

नू देवासो वरिवः कर्तना नो भूत नो विश्वेऽवसे सजोषाः ।
समस्मे इषं वसवो ददीरन् यूयं पात स्वस्तिभिः सदा नः ॥४॥
*nū devāso varivaḥ kartanā no bhūta no viśve'vase sajoṣāḥ /*
*samasme iṣaṁ vasavo dadīran yūyaṁ pāta svastibhiḥ sadā naḥ //4 //*

२४. ग्रावाणः (Grāvāṇaḥ) - ऋ. (Rv.) ७.१०४.१७

प्र या जिगाति खर्गलेव नक्तमप द्रुहा तन्वं१ गूहमाना ।
वव्राँ अनन्ताँ अव सा पदीष्ट ग्रावाणो घ्नन्तु रक्षस उपब्दैः ॥१७॥
*pra yā jigāti khargaleva naktamapa druhā tanvaṁ1 gūhamānā /*
*vavrām̐ Anantām̐ ava sā padīṣṭa grāvāṇo ghnantu rakṣasa upabdaiḥ //17 //*

२५.दिशः (Diśaḥ) - य. (Yv.) ९.२२

अस्मे वोऽअस्त्विन्द्रियमस्मे नृम्णमुत क्रतुरस्मे वर्चांसि सन्तु वः। नमो मात्रे पृथिव्यै नमो मात्रे पृथिव्याऽइयं ते राड्यन्तासि यमनो ध्रुवोऽसि धरुणः। कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा ॥२२॥
*asme vo'astvindriyamasme nṛmṇamuta kraturasme varchāṁsi santu vaḥ / namo mātre pṛthivyai namo mātre pṛthivyā'iyaṁ te rāḍyantāsi yamano dhruvo'si dharuṇaḥ / kṛṣyai tvā kṣemāya tvā rayyai tvā poṣāya tvā //22 //*

२६. देवाः (Devāḥ) - ऋ. (Rv.) ७.१०४.११

परः सो अस्तु तन्वा३ तना च तिस्रः पृथिवीरधो अस्तु विश्वः ।
प्रति शुष्यतु यशो अस्य देवा यो नो दिवा दिप्सति यश्च नक्तम् ॥१॥
*paraḥ so astu tanvā3 tanā cha tisraḥ pṛthivīradho astu viśvaḥ /*
*prati śuṣyatu yaśo asya devā yo no divā dipsati yaścha naktam //1 //*

२७. द्यावापृथिव्यौ (Dyāvāpṛthivyau) - ऋ. (Rv.) ७.५३.१-३

प्र द्यावा यज्ञैः पृथिवी नमोभिः सबाध ईळे बृहती यजत्रे ।
ते चिद्धि पूर्वे कवयो गृणन्तः पुरो मही दधिरे देवपुत्रे ॥१॥
प्र पूर्वजे पितरा नव्यसीभिर्गीर्भिः कृणुध्वं सदने ऋतस्य ।
आ नो द्यावापृथिवी दैव्येन जनेन यातं महि वां वरूथम् ॥२॥
उतो हि वां रत्नधेयानि सन्ति पुरूणि द्यावापृथिवी सुदासे ।
अस्मे धत्तं यदसदस्कृधोयु यूयं पात स्वस्तिभिः सदा नः ॥३॥
*pra dyāvā yajñaiḥ pṛthivī namobhiḥ sabādha īḻe bṛhatī yajatre /*
*te chiddhi pūrve kavayo gṛṇantaḥ puro mahī dadhire devaputre //1 //*
*pra pūrvaje pitarā navyasībhirgībhiḥ kuṇudhvaṁ sadane ṛtasya /*
*ā no dyāvāpṛthivī daivyena janena yātaṁ mahi vāṁ varūtham //2 //*
*uto hi vāṁ ratnadheyāni santi purūṇi dyāvāpṛthivī sudāse /*

*asme dhattaṁ yadasadaskṛdhoyu yūyaṁ pāta svastibhiḥ sadā naḥ ॥3॥*

२८. नद्यः (Nadyaḥ) - ऋ. (Rv.) ७.५०.४

याः प्रवतो निवत उद्वत उदन्वतीरनुदकाश्च याः। ता अस्मभ्यं पयसा पिन्वमानाः शिवा देवीरशिपदा भवन्तु सर्वा नद्यो अशिमिदा भवन्तु ॥४॥

*yāḥ pravato nivata udvata udanvatīranudakāścha yāḥ । tā asmabhyaṁ payasā pinvamānāḥ śivā devīraśipadā bhavantu sarvā nadyo aśimidā bhavantu ॥4॥*

२९. पंच प्रदिशः (Paṁcha Pradiśaḥ) - अ. (Av.) ३.२०.९

दुह्रां मे पंच प्रदिशो दुह्रामुर्वीर्यथाबलम्। प्रापेयं सर्वा आकूतीर्मनसा हृदयेन च ॥९॥

*duhrāṁ me paṁcha pradiśo duhrāmurvīryathābalam । prāpeyaṁ sarvā ākūtīrmanasā hṛdayena cha ॥9॥*

३०. परमात्मा (Paramātmā) - य. (Yv.) १५.६४

परमेष्ठी त्वा सादयतु दिवस्पृष्ठे व्यचस्वतीं प्रथस्वतीं दिवं यच्छ दिवं दृंह दिवं मा हिंसीः। विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय । सूर्यस्त्वाभिपातु मह्या स्वस्त्या छर्दिषा शन्तमेन तया देवतयाऽगिंरस्वद् ध्रुवे सीदतम् ॥६४॥

*parameṣṭhī tvā sādayatu divaspṛṣṭhe vyachasvatīṁ prathasvatīṁ divaṁ yachchha divaṁ dṛṁha divaṁ mā hiṁsīḥ । viśvasmai prāṇāyāpānāya vyānāyodānāya pratiṣṭhāyai charitrāya । sūryastvābhipātu mahyā svastyā chhardiṣā śantamena tayā devatayā'ṁgirasvad dhruve sīdatam ॥64॥*

३१. परमेष्ठी प्रजापतिः (Parameṣṭhī Prajāpatiḥ) - य. (Yv.) ८.५४

परमेष्ठ्यभिधीतः प्रजापतिर्वाचि व्याहृतायामन्धोऽअच्छेतः। सविता सन्यां विश्व कर्म्मा दीक्षायां पूषा सोमक्रयण्याम् ॥५४॥

*parameṣṭhyabhidhītaḥ prajāpatirvāchi vyāhṛtāyāmandho'achchhetaḥ । savitā sanyāṁ viśva karmmā dīkṣāyāṁ pūṣā somakrayaṇyām ॥54॥*

३२. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.६७.१९-२१; ९.९०.१-६; ९.९७.१-३

ऋ. (Rv.) ९.६७.१९-२१

ग्राव्णा तुन्नो अभिष्टुतः पवित्रं सोम गच्छसि। दधत्स्तोत्रे सुवीर्यम् ॥१९॥
एष तुन्नो अभिष्टुतः पवित्रमति गाहते। रक्षोहा वारमव्ययम् ॥२०॥
यदन्ति यच्च दूरके भयं विन्दति मामिह। पवमान वि तज्जहि ॥२१॥
*grāvṇā tunno abhiṣṭutaḥ pavitraṁ soma gachchhasi । dadhatstotre suvīryam ॥19॥*
*eṣa tunno abhiṣṭutaḥ pavitramati gāhate । rakṣohā vāramavyayam ॥20॥*
*yadanti yachcha dṛrake bhayaṁ vindati māmiha । pavamāna vi tajjahi ॥21॥*

ऋ. (Rv.) ९.९०.१-६

प्र हिन्वानो जनिता रोदस्यो रथे न वाजं सनिष्यन्नयासीत् ।
इन्द्रं गच्छन्नायुधा संशिशानो विश्वा वसु हस्तयोरादधानः ॥१॥
अभि त्रिपृष्ठं वृषणं वयोधामाङ्गूषणामवावशन्त वाणीः ।
वना वसानो वरुणो न सिन्धून्वि रत्नधा दयते वार्याणि ॥२॥
शूरग्रामः सर्ववीरः सहावांजेता पवस्व सनिता धनानि ।
तिग्मायुधः क्षिप्रधन्वा समत्स्वषाळहः साह्वान् पृतनासु शत्रून् ॥३॥
उरुगव्यूतिरभयानि कृण्वन्त्समीचीने आ पवस्वा पुरन्धी ।
अपः सिषासन्नुषसः स्व्१र्गाः सं चिक्रदो महो अस्मभ्यं वाजान् ॥४॥
मत्सि सोम वरुणं मत्सि मित्रं मत्सीन्द्रमिन्दो पवमान विष्णुम् ।
मत्सि सोम वरुणं मत्सि मित्रं मत्सीन्द्रमिन्दो पवमान विष्णुम् ।
मत्सि शर्धो मारुतं मत्सि देवान्मत्सि महामिन्द्रमिन्दो मदाय ॥५॥
एवा राजेव क्रतुमाँ अमेन विश्वा घनिघ्नदुरिता पवस्व ।
इन्दो सूक्ताय वचसे वयो धा यूयं पात स्व्स्तिभिः सदा नः ॥६॥
*pra hinvāno janitā rodasyo rathe na vājaṁ saniṣyannayāsīt ।*
*indraṁ gachchhannāyudhā saṁśiśāno viśvā vasu hastayorādadhānaḥ ॥1॥*

*abhi tripṛṣṭhaṁ vṛṣaṇaṁ vayodhāmāṅgūṣaṇāmavāvaśanta vāṇīḥ ।*
*vanā vasāno varuṇo na sindhūnvi ratnadhā dayate vāryāṇi ॥2 ॥*
*śūragrāmaḥ sarvavīraḥ sahāvāṁjetā pavasva sanitā dhanāni ।*
*tigmāyudhaḥ kṣipradhanvā samatsvaṣāḻahaḥ sāhvān pṛtanāsu śatrūn ॥3 ॥*
*urugavyūtirabhayāni kṛṇvantsamīchīne ā pavasvā purandhī ।*
*apaḥ siṣāsannuṣasaḥ sv1rgāḥ saṁ chikrado maho asmabhyaṁ vājān ॥4 ॥*
*matsi soma varuṇaṁ matsi mitraṁ matsīndramindo pavamāna viṣṇum ।*
*matsi soma varuṇaṁ matsi mitraṁ matsīndramindo pavamāna viṣṇum ।*
*matsi śardho mārutaṁ matsi devānmatsi mahāmindramindo madāya ॥5 ॥*
*evā rājeva kratumāṁ̐ amena viśvā ghanighnadduritā pavasva ।*
*indeā sūktāya vachase vayo dhā yūyaṁ pāta svstibhiḥ sadā naḥ ॥6 ॥*

ऋ. (Rv.) ९.९७.१-३

अस्य प्रेषा हेमना पूयमानो देवो देवभिः समपृक्त रसम् ।
सुतः पवित्रं पर्येति रेभन्मितेव सद्म पशुमान्ति होता ॥१ ॥
भद्रा वस्त्रा समन्या३ वसानो महान्कविर्निवचनानि शंसन् ।
आ वच्यस्व चम्वोः पूयमानो विचक्षणो जागृविर्देववीतौ ॥२ ॥
समु प्रियो मृज्यते सानो अव्ये यशस्तरो यशसां क्षैतो अस्मे ।
अभि स्वर धन्वा पूयमानो यूयं पात स्वस्तिभिः सदा नः ॥३ ॥
*asya preṣā hemanā pūyamāno devo devabhiḥ samapṛkta rasam ।*
*sutaḥ pavitraṁ paryeti rebhanmiteva sadma paśumānti hotā ॥1 ॥*
*bhadrā vastrā samanyā3 vasāno mahānkavirnivachanāni śaṁsan ।*
*ā vachyasva chamvoḥ pūyamāno vichakṣaṇo jāgṛvirdevavītau ॥2 ॥*
*samu priyo mṛjyate sāno avye yaśastaro yaśasāṁ kṣaito asme ।*
*abhi svara dhanvā pūyamāno yūyaṁ pāta svastibhiḥ sadā naḥ ॥3 ॥*

३३. प्रजापतिः (Prajāpatiḥ) - य. (Yv.) ९.१९-२०; २३-२५

य. (Yv.) ९.१९-२०

आ मा वाजस्य प्रसवो जगम्यादेमे द्यावापृथिवी विश्वरूपे ।
आ मा गन्तां पितरा मातरा चा मा सोमो अमृतत्त्वेन गम्यात् ।
वाजिनो वाजजितो वाजं ससृवांसो बृहस्पते र्भागमवजिघ्रत निमृजानाः ॥१९ ॥
आपये स्वाहा स्वापये स्वाहाऽपिजाय स्वाहा क्रतवे स्वहा वसवे स्वाहाऽहर्पतये स्वाहाऽह्ने मुग्धाय स्वाहा मुग्धाय वैनंशिनाय स्वाहा विनंशिनऽआन्त्यायनाय स्वाहाऽऽन्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाऽधिपतये स्वाहा ॥२० ॥
*ā mā vājasya prasavo jagamyādeme dyāvāpṛthivī viśvarūpe ।*
*ā mā gantāṁ pitarā mātarā chā mā somo amṛtattvena gamyāt ।*
*vājino vājajito vājaṁ sasṛvāṁso bṛhaspate rbhāgamavajighrata nimṛjānāḥ ॥19 ॥*
*āpaye svāhā svāpaye svāhā'pijāya svāhā kratave svahā vasave svāhā'harpataye svāhā'hne mugdhāya svāhā mugdhāya vainaṁśināya svāhā vinaṁśina'āntyāyanāya svāhā''ntyāya bhauvanāya svāhā bhuvanasya pataye svāhā'dhipataye svāhā ॥20 ॥*

य. (Yv.) ९.२३-२५

वाजस्येमं प्रसवः सुषुवेऽग्रे सोमं राजानमोषधीष्वप्सु ।
ताऽअस्मभ्य मधुमतीर्भवन्तु वयं राष्ट्रे जागृयाम पुरोहिताः स्वाहा ॥२३ ॥
वाजस्येमां प्रसवः शिश्रिये दिवमिमा च विश्वा भुवनानि सम्राट् ।
अदित्सन्तं दापयति प्रजानन्त्स नो रयिं सर्ववीरं नियच्छतु स्वाहा ॥२४ ॥
वाजस्य नु प्रसव आबभूवेमा च विश्वा भुवनानि सर्वतः ।
सनेमि राजा परियाति विद्वान् प्रजां पुष्टिं वर्धयमानोऽअस्मे स्वाहा ॥२५ ॥
*vājasyemaṁ prasavaḥ suṣuve'gre somaṁ rājānamoṣadhīṣvapsu ।*
*tā'asmabhya madhumatīrbhavantu vayaṁ rāṣṭre jāgṛyāma purohitāḥ svāhā ॥23 ॥*
*vājasyemāṁ prasavaḥ śiśriye divamimā cha viśvā bhuvanāni samrāṭ ।*
*aditsantaṁ dāpayati prajānantsa no rayiṁ sarvavīraṁ niyachchhatu svāhā ॥24 ॥*
*vājasya nu prasava ābabhūvemā cha viśvā bhuvanāni sarvataḥ ।*

*sanemi rājā pariyāti vidvān prajāṁ puṣṭiṁ vardhayamāno'asme svāhā //25 //*

३४. पृथिव्यन्तरिक्षे (Pṛthivyantarikṣe) - ऋ. (Rv.) ७.१०४.२३२

मा नो रक्षो अभि नड्यातुमावतामपोच्छतु मिथुना या किमीदिना ।
पृथिवी नः पार्थिवात् पात्वंहसोऽन्तरिक्षं दिव्यात्पात्वस्मान् ॥२३॥
*mā no rakṣo abhi naḍyātumāvatāmapochchhatu mithunā yā kimīdinā /*
*pṛthivī naḥ pārthivāt pātvaṁhaso'ntarikṣaṁ divyātpātvasmān //23 //*

३५. बृहस्पतिः (Bṛhaspatiḥ) - ऋ. (Rv.) ७.९७.२; ४-८; य. (Yv.) ९.१६; १८

ऋ. (Rv.) ७.९७.२

आ दैव्या वृणीमहेऽवांसि बृहस्पतिर्नो मह आ सखायः ।
यथा भवेम मीळ्हुषे अनागा यो नो दाता परावतः पितेव ॥२॥
*ā daivyā vṛṇīmahe'vāṁsi bṛhaspatirno maha ā sakhāyaḥ /*
*yathā bhavema mīḻahuṣe anāgā yo no dātā parāvataḥ piteva //2 //*

ऋ. (Rv.) ७.९७.४-८

स आ नो योनिं सदतु प्रेष्ठो बृहस्पतिर्विश्ववारो यो अस्ति ।
कामो रायः सुवीर्यस्य तं दात्पर्षन्नो अति सश्चतो अरिष्टान् ॥४॥
तमा नो अर्कममृताय जुष्टमिमे धासुरमृतासः पुराजाः ।
शुचिक्रन्दं यजतं पस्त्यानां बृहस्पतिमनर्वाणं हुवेम ॥५॥
तं शग्मासो अरुषासो अश्वा बृहस्पतिं सहवाहो वहन्ति ।
सहश्चिद्यस्य नीळवत्सधस्थं नभो न रूपमरुषं वसानाः ॥६॥
स हि शुचिः शतपत्रः स शुन्ध्युर्हिरण्यवाशीरीपिरः स्वर्षाः ।
बृहस्पतिः स स्वावेश ऋष्वः पुरू सखिभ्य आसुतिं करिष्ठः ॥७॥
देवी देवस्य रोदसी जनित्री बृहस्पति वापृधतुर्महित्वा ।
दक्षाय्याय दक्षता सखायः करद् ब्रह्मणे सुतरा सुगाधा ॥८॥
*sa ā no yoniṁ sadatu preṣṭho bṛhaspatirviśvavāro yo asti /*
*kāmo rāyaḥ suvīryasya taṁ dātparṣanno ati saśchato ariṣṭān //4 //*
*tamā no arkamamṛtāya juṣtamime dhāsuramṛtāsaḥ purājāḥ /*
*śuchikrandaṁ yajataṁ pastyānāṁ bṛhaspatimanarvāṇaṁ huvema //5 //*
*taṁ śagmāso aruṣāso aśvā bṛhaspatiṁ sahavāho vahanti /*
*sahaśchidyasya nīḻavatsadhasthaṁ nabho na rūpamaruṣaṁ vasānāḥ //6 //*
*sa hi śuchiḥ śatapatraḥ sa śundhyurhiraṇyavāśīrīpiraḥ svarṣāḥ /*
*bṛhaspatiḥ sa svāveśa ṛṣvaḥ purū sakhbhyi āsutiṁ kariṣṭhaḥ //7 //*
*devī devasya rodasī janitrī bṛhaspati vāpṛdhaturmahitvā /*
*dakṣāyyāya dakṣatā sakhāyaḥ karad brahmaṇe sutarā sugādhā //8 //*

य. (Yv.) ९.१६

शन्नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः ।
जम्भयन्तोऽहिं वृकं रक्षांसि सनेम्यस्मद्युयवन्नमीवाः ॥१६॥
*śanno bhavantu vājino haveṣu devatātā mitadravaḥ svarkāḥ /*
*jambhayanto'hiṁ vṛkaṁ rakṣāṁsi sanemyasmadyuyavannamīvāḥ //16 //*

य. (Yv.) ९.१८

वाजेवाजेऽवत वाजिनो नो धनेषु विप्राऽअमृताऽऋतज्ञाः ।
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥१८॥
*vājevāje'vata vājino no dhaneṣu viprā'amṛtā'ṛtajñāḥ /*
*asya madhvaḥ pibata mādayadhvaṁ tṛptā yāta pathibhirdevayānaiḥ //18 //*

३६. ब्रह्मणस्पतिः अभीवर्तमणिः (Brahmaṇaspatiḥ Abhīvartamaṇiḥ) - अ. (Av.) १.२९.१-६

अभीवर्तेन मणिना येनेन्द्रो अभिवावृधे। तेनास्मान् ब्रह्मणस्पतेऽभि राष्ट्राय वर्धय ॥१॥
अभिवृत्य सपत्नानभि या नो अरातयः। अभि पृतन्यन्तं तिष्ठाभि यो नो दुरस्यति ॥२॥
अभि त्वा देवः सविताभि सोमो अवीवृधत्। अभि त्वा विश्वाः भूतान्यभीवर्तो यथाससि ॥३॥
अभीवर्तो अभिभवः सपत्नक्षयणो मणिः। राष्ट्राय मह्यं बध्यतां सपत्नेभ्यः पराभुवे ॥४॥

उदसौ सूर्यो अगादुदिदं मामकं वचः। यथाहं शत्रुहोऽसान्यसपत्नः सपत्नहा ॥५॥
सपत्नक्षयणो वृषाभिराष्ट्रो विषासहिः। यथाहमेषां वीराणां विराजानि जनस्य च ॥६॥
*abhīvartena maṇinā yenendro abhivāvṛdhe । tenāsmān brahmaṇaspate'bhi rāṣṭrāya vardhaya ॥1॥ abhivṛtya sapatnānabhi yā no arātayaḥ । abhi pṛtanyantaṁ tiṣṭhābhi yo no durasyati ॥2॥ abhi tvā devaḥ savitābhi somo avīvṛdhat । abhi tvā viśvāḥ bhūtānyabhīvarto yathāsasi ॥3॥ abhīvarto abhibhavaḥ sapatnakṣayaṇo maṇiḥ । rāṣṭrāya mahyaṁ badhyatāṁ sapatnebhyaḥ parābhuve ॥4॥ udasau sūryo agādudidaṁ māmakaṁ vachaḥ । yathāhaṁ śatruho'sānyasapatnaḥ sapatnahā ॥5॥ sapatnakṣayaṇo vṛṣābhirāṣṭro viṣāsahiḥ । yathāhameṣāṁ vīrāṇāṁ virājāni janasya cha ॥6॥*

३७. भगः (Bhagaḥ) - ऋ. (Rv.) ७.४१.२-६

प्रातर्जितं भगमुग्रं हुवेम वयं पुत्रमदितेर्यो विधर्ता ।
आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह ॥२॥
भगर प्रणेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः ।
भग प्र णो जनय गोभिरश्वैर्भग नृभिर्नृवन्तः स्याम ॥३॥
उतेदानीं भगवन्तः स्यामोत प्रपित्व उत मध्ये अह्नाम् ।
उतोदिता मघवन्त्सूर्यस्य वयं देवानां सुमतौ स्याम ॥४॥
भग एव भगवाँ अस्तु देवास्तेन वयं भगवन्तः स्याम ।
तं त्वा भग सर्व इज्जोहवीति स नो भग पुरएता भवेह ॥५॥
समध्वरायोषसो नमन्त दधिक्रावेव शुचये पदाय ।
अर्वाचीनं वसुविदं भगं नो रथमिवाश्वा वाजिन आ वहन्तु ॥६॥
*prātarjitaṁ bhagamugraṁ huvema vayaṁ putramaditeryo vidhartā ।*
*ādhraśchidyaṁ manyamānasturaśchidrājā chidyaṁ bhagaṁ bhakṣītyāha ॥2॥*
*bhagara praṇetarbhaga satyarādho bhagemāṁ dhiyamudavā dadannaḥ ।*
*bhaga pra ṇo janaya gobhiraśvairbhaga nṛbhirnṛvantaḥ syāma ॥3॥*
*utedānīṁ bhagavantaḥ syāmota prapitva uta madhye ahnām ।*
*uoditā maghavantsūryasya vayaṁ devānāṁ sumatau syāma ॥4॥*
*bhaga eva bhagavām̐ astu devāstena vayaṁ bhagavantaḥ syāma ।*
*taṁ tvā bhaga sarva ijjohavīti sa no bhaga puraetā bhaveha ॥5॥*
*samadhvarāyoṣaso namanta dadhikrāveva śuchaye padāya ।*
*arvāchīnaṁ vasuvidaṁ bhagaṁ no rathamivāśvā vājina ā vahantu ॥6॥*

३८. मण्डूकाः (Maṇḍūkāḥ) - ऋ. (Rv.) ७.१०३.१-१०

संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः ।
वाचं पर्जन्यजिन्वितां प्र मण्डूका अवादिषुः ॥१॥
दिव्या आपो अभि यदेनमायन्दृतिं न शुष्कं सरसी शयानम् ।
गवामह न मायुर्वत्सिनीनां मण्डूकानां वग्नुरत्रा समेति ॥२॥
यदीमेनाँ उशतो अभ्यवर्षीत्तृष्यावतः प्रावृष्यागतायाम् ।
अख्खलीकृत्या पितरं न पुत्रो अन्यो अन्यमुप वदन्तमेति ॥३॥
अन्यो अन्यमनु गृभ्णात्येनोरपां प्रसर्गे यदमन्दिषाताम् ।
मण्डूको यदभिवृष्टः कनिष्कन्पृश्निः सम्पृङ्क्ते हरितेन वाचम् ॥४॥
यदेषामन्यो अन्यस्य वाचं शाक्तस्येव वदति शिक्षमाणः ।
सर्वं तदेषां समृधेव पर्व यत्सुवाचो वदथानाध्यप्सु ॥५॥
गोमायुरेको अजमायुरेकः पृश्निरेको हरित एक एषाम् ।
समानं नाम बिभ्रतो विरूपाः पुरुत्रा वाचं पिपिशुर्वदन्तः ॥६॥
ब्राह्मणासो अतिरात्रे न सोमे सरो न पूर्णमभितो वदन्तः ।
संवत्सरस्य तदहः परि ष्ठ यन्मण्डूकाः प्रावृषीणं बभूव ॥७॥
ब्राह्मणासः सोमिनो वाचमक्रत ब्रह्म कृण्वन्तः परिवत्सरीणम् ।
अध्वर्यवो धर्मिणः सिष्वदाना आविर्भवन्ति गुह्या न के चित् ॥८॥
देवहितिं जुगुपुर्द्वादशस्य ऋतुं नरो न प्र मिनन्त्येते ।
संवत्सरे प्रावृष्यागतायां तप्ता घर्मा अश्नुवते विसर्गम् ॥९॥

गोमायुरदादजमायुरदात्पृश्निरदाद्धरितो नो वसूनि ।
गवां मण्डूका ददतः शतानि सहस्रसावे प्र तिरन्त आयुः ॥१०॥
*saṁvatsaraṁ śaśayānā brāhmaṇā vratachāriṇaḥ /*
*vāchaṁ parjanyajinvitāṁ pra maṇḍūkā avādiṣuḥ //1 //*
*divyā āpo abhi yadenamāyandṛtiṁ na śuṣkaṁ sarasī śayānam /*
*gavāmaha na māyurvatsinīnāṁ maṇḍūkānāṁ vagnuratrā sameti //2 //*
*yadīmenāṁ uśato abhyavarṣīttṛṣyāvataḥ prāvṛṣyāgatāyām /*
*akhkhalīkṛtyā pitaraṁ na putro anyo anyamupa vadantameti //3 //*
*anyo anyamanu gṛbhṇātyenorapāṁ prasarge yadamandiṣātām /*
*maṇḍūko yadabhivṛṣṭaḥ kaniṣkranpṛśniḥ sampṛṅkte haritena vācham //4 //*
*yadeṣāmanyo anyasya vāchaṁ śāktasyeva vadati śikṣamāṇaḥ /*
*sarvaṁ tadeṣāṁ samṛdheva parva yatsuvācho vadathānādhyapsu //5 //*
*gomāyureko ajamāyurekaḥ pṛśnireko harita eka eṣām /*
*samānaṁ nāma bibhrato virūpāḥ purutrā vāchaṁ pipiśurvadantaḥ //6 //*
*brāhmaṇāso atirātre na some saro na pūrṇamabhito vadantaḥ /*
*saṁvatsarasya tadahaḥ pari ṣṭha yanmaṇḍūkāḥ prāvṛṣīṇaṁ babhūva //7 //*
*brāhmaṇāsaḥ somino vāchamakrata brahma kṛṇvantaḥ parivatsarīṇam /*
*adhvaryavo dharmiṇaḥ siṣvadānā āvirbhavanti guhyā na ke chit //8 //*
*devahitiṁ jugupurdvādaśasya ṛtuṁ naro na pra minantyete /*
*saṁvatsare prāvṛṣyāgatāyāṁ taptā gharmā aśnuvate visargam //9 //*
*gomāyuradādajamāyuradātpṛśniradāddharito no vasūni /*
*gavāṁ maṇḍūkā dadataḥ śatāni sahasrasāve pra tiranta āyuḥ //10 //*

३९. मन्त्रोक्ताः (Mantroktāḥ) - अ. (Av.) १९.१०.१-१०; १९.११.१-६

अ. (Av.) १९.१०.१-१०

शं नो इन्द्राग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या ।
शमिन्द्रासोमा सुविताय शं योः शं न इन्द्रापूषणा वाजसातौ ॥१॥
शे नो भगः शमु नः शंसो अस्तु शं नः पुरंधिः शमु सन्तु रायः ।
शं नः सत्यस्य सुयमस्य शंसः शं नो अर्यमा पुरुजातो अस्तु ॥२॥
शं नो धाता शमु धर्ता नो अस्तु शं न उरूची भवतु स्वधाभिः ।
शं रोदसी बृहती शं ना अद्रिः शं नो देवानां सुहवानि सन्तु ॥३॥
शं नो अगिनर्ज्योतिरनीको अस्तु शं नो मित्रावरुणावश्विना शम् ।
शं नः सुकृतां सुकृतानि सन्तु शं न इषिरो अभि वातु वातः ॥४॥
शं नो द्यावापृथिवी पूर्वहूतौ शमन्तरिक्षं दृशये नो अस्तु ।
शं न ओषधीर्वनिनो भवन्तु शं नो रजसस्पतिरस्तु जिष्णुः ॥५॥
शं न इन्द्रो वसुभिर्देवो अस्तु शमादित्येभिर्वरुणः सुशंसः ।
शं नो रुद्रो रुद्रेभिर्जलाषः शं नस्त्वष्टा ग्नाभिरिह श्रृणोतु ॥६॥
शं नः सोमो भवतु ब्रह्म शं नः शं नो ग्रावाणः शमु सन्तु यज्ञाः ।
शं नः स्वरूणां मितयो भवन्तु शं नः प्रस्वः१ शम्वस्तु वेदिः ॥७॥
शं नः सूर्य उरुचक्षा उदेतु शं नो भवन्तु प्रदिशश्चतस्रः ।
शं नः पर्वता ध्रुवयो भवन्तु शं नः सिन्धवः शमु सन्त्वापः ॥८॥
शं नो अदितिर्भवतु व्रतेभिः शं नो भवन्तु मरुतः स्वर्काः ।
शं नो विष्णुः शमु पूषा नो अस्तु शं नो भवित्रं शम्वस्तु वायुः ॥९॥
शं नो देवः सविता त्रायमाणः शं नो भवन्तूषसो विभातीः ।
शं नः पर्जन्यो भवतु प्रजाभ्यः शं नः क्षेत्रस्य पतिरस्तु शंभुः ॥१०॥
*śaṁ no indrāgnī bhavatāmavobhiḥ śaṁ na indrāvaruṇā rātahavyā /*
*śamindrāsomā suvitāya śaṁ yoḥ śaṁ na indrāpūṣaṇā vājasātau //1 //*
*śe no bhagaḥ śamu naḥ śaṁso astu śaṁ naḥ puraṁdhiḥ śamu santu rāyaḥ /*
*śaṁ naḥ satyasya suyamasya śaṁsaḥ śaṁ no aryamā purujāto astu //2 //*
*śaṁ no dhātā śamu dhartā no astu śaṁ na urūchī bhavatu svadhābhiḥ /*
*śaṁ rodasī bṛhatī śaṁ nā adriḥ śaṁ no devānāṁ suhavāni santu //3 //*

*śaṁ no aginarjyotiranīko astu śaṁ no mitrāvaruṇāvaśvinā śam* ।
*śaṁ naḥ sukṛtāṁ sukṛtāni santu śaṁ na iṣiro abhi vātu vātaḥ* ॥4॥
*śaṁ no dyāvāpṛthivī pūrvahūtau śamantarikṣaṁ dṛśaye no astu* ।
*śaṁ na oṣadhīrvanino bhavantu śaṁ no rajasaspatirastu jiṣṇuḥ* ॥5॥
*śaṁ na indro vasubhirdevo astu śamādityebhirvaruṇaḥ suśaṁsaḥ* ।
*śaṁ no rudro rudrebhirjalāṣaḥ śaṁ nastvaṣṭā gnābhiriha śṛṇotu* ॥6॥
*śaṁ naḥ somo bhavatu brahma śaṁ naḥ śaṁ no grāvāṇaḥ śamu santu yajñāḥ* ।
*śaṁ naḥ svarūṇāṁ mitayo bhavantu śaṁ naḥ prasva1ḥ śamvastu vediḥ* ॥7॥
*śaṁ naḥ sūrya uruchakṣā udetu śaṁ no bhavantu pradiśaśchatasraḥ* ।
*śaṁ naḥ parvatā dhruvayo bhavantu śaṁ naḥ sindhavaḥ śamu santvāpaḥ* ॥8॥
*śaṁ no aditirbhavatu vratebhiḥ śaṁ no bhavantu marutaḥ svarkāḥ* ।
*śaṁ no viṣṇuḥ śamu pūṣā no astu śaṁ no bhavitraṁ śamvastu vāyuḥ* ॥9॥
*śaṁ no devaḥ savitā trāyamāṇaḥ śaṁ no bhavantūṣaso bibhātīḥ* ।
*śaṁ naḥ parjanyo bhavatu prajābhyaḥ śaṁ naḥ kṣetrasya patirastu śaṁbhuḥ* ॥10॥

अ. (Av.) १९.११.१-६

शं नः सत्यस्य पतयो भवन्तु शं नो अर्वन्तः शमु सन्तु गावः ।
शं न ऋभवः सुकृतः सुहस्ताः शं नो भवन्तु पितरो हवेषु ॥१॥
शं नो देवा विश्वदेवा भवन्तु शं सरस्वती सह धीभिरस्तु ।
शमभिषाचः शमु रातिषाचः शं नो दिव्याः पार्थिवाः शं नो अप्याः ॥२॥
शं नो अज एकपाद्देवो अस्तु शं नोऽहिर्बुध्न्यः१ शं समुद्रः ।
शं नो अपां नपात् पेरुरस्तु शं नः पृश्निर्भवतु देवगोपा ॥३॥
आदित्या रुद्रा वसवो जुषन्तामिदं ब्रह्म क्रियमाणं नवीयः ।
शृण्वन्तु नो दिव्याः पार्थिवासो गोजाता उत ये यज्ञियासः ॥४॥
ये देवानामृत्विजो यज्ञियासो मनोर्यजत्रा अमृता ऋतज्ञाः ।
ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ॥५॥
तदस्तु मित्रावरुणा तदग्ने शं योरस्मभ्यमिदमस्तु शस्तम् ।
अशीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय ॥६॥

*śaṁ naḥ satyasya patayo bhavantu śaṁ no arvantaḥ śamu santu gāvaḥ* ।
*śaṁ na ṛbhavaḥ sukṛtaḥ suhastāḥ śaṁ no bhavantu pitaro haveṣu* ॥1॥
*śaṁ no devā viśvadevā bhavantu śaṁ sarasvatī saha dhībhirastu* ।
*śamabhiṣāchaḥ śamu rātiṣāchaḥ śaṁ no divyāḥ pārthivāḥ śaṁ no apyāḥ* ॥2॥
*śaṁ no aja ekapāddevo astu śaṁ no'hirbudhnyaḥ1 śaṁ samudraḥ* ।
*śaṁ no apāṁ napāt perurastu śaṁ naḥ pṛśnirbhavatu devagopā* ॥3॥
*ādityā rudrā vasavo juṣantāmidaṁ brahma kriyamāṇaṁ navīyaḥ* ।
*śṛṇvantu no divyāḥ pārthivāso gojātā uta ye yajñiyāsaḥ* ॥4॥
*ye devānāmṛtvijo yajñiyāso manoryajatrā amṛtā ṛtajñāḥ* ।
*te no rāsantāmurugāyamadya yūyaṁ pāta svastibhiḥ sadā naḥ* ॥5॥
*tadastu mitrāvaruṇā tadagne śaṁ yorasmabhyamidamastu śastam* ।
*aśīmahi gādhamuta pratiṣṭhāṁ namo dive bṛhate sādanāya* ॥6॥

४०. मरुतः (Marutaḥ) - ऋ. (Rv.) ७.५६.१-२५; ७.५७.१-७; ७.५८.१-६; ७.५९.१-११; ७.१०४.१८

ऋ. (Rv.) ७.५६.१-२५

क ईं व्यक्ता नरः सनीळाा रुद्रस्य मर्या अधा स्वश्वाः ॥१॥
नकिर्ह्येषां जनूंषि वेद ते अंग विद्रे मिथो जनित्रम् ॥२॥
अभि स्वपूभिर्मिथो वपन्त वातस्वनसः श्येना अस्पृध्रन् ॥३॥
एतानि धीरो निण्या चिकेत पृश्निर्यद्दूधो मही जभार ॥४॥
सा विट् सुवीरा मरुद्भिरस्तु सनात्सहन्ती पुष्यन्ती नृम्णम् ॥५॥
यामं येष्ठाः शुभा शोभिष्ठाः श्रिया संमिश्ला ओजोभिरुग्राः ॥६॥
उग्रं व ओजः स्थिरा शवांस्यधा मरुद्भिर्गणस्तुविष्मान् ॥७॥
शुभ्रो वः शुष्मः क्रुध्मी मनांसि धुनिर्मुनिरिव शर्धस्य धृष्णोः ॥८॥
सनेम्यस्मद्युयोत दिद्युं मा वो दुर्मतिरिह प्रणङ्क्ः ॥९॥

प्रिया वो नाम हुवें तुराणामा यत्तृपन्मरुतो वावशानाः ॥१०॥
स्वायुधास इष्मिणः सुनिष्का उत स्वयं तन्वः१ शुम्भमानाः ॥११॥
शुची वो हव्या मरुतः शुचीनां शुचिं हिनोम्यध्वरं शुचिभ्यः ।
ऋतेन सत्यमृतसाप आयंछुचिजन्मानः शुचयः पावकाः ॥१२॥
अंसेष्वा मरुतः खादयो वो वक्षःसु रुक्मा अपशिश्रियाणाः ।
वि विद्युतो न वृष्टिभी रुचाना अनु स्वधामायुधैर्यच्छमानाः ॥१३॥
प्र बुध्न्या व ईरते महांसि प्र नामानि प्रयज्यवस्तिरध्वम् ।
सहस्रियं दम्यं भागमेंतं गृहमेधीयं मरुतो जुषध्वम् ॥१४॥
यदि स्तुतस्य मरुतो अधीथेत्था विप्रस्य वाजिनो हवीमन् ।
मक्षू रायः सुवीर्यस्य दात नू चिद्यमन्य आदभदरावा ॥१५॥
अत्यासो न ये मरुतः स्वंचो यक्षदृशो न शुभयन्त मर्याः ।
ते हर्म्येष्ठाः शिशवो न शुभ्रा वत्सासो न प्रक्रीळिनः पयोधाः ॥१६॥
दशस्यन्तो नो मरुतो मृळन्तु वरिवस्यन्तो रोदसी सुमेके ।
आरे गोहा नृहा वधो वो अस्तु सुम्नेभिरस्मे वसवो नमध्वम् ॥१७॥
आ वो होता जोहवीति सत्तः सत्राचीं रातिं मरुतो गृणानः ।
य ईवतो वृषणो अस्ति गोपाः सो अद्वयावी हवते व उक्थैः ॥१८॥
इमे तुरं मरुतो रामयन्तीमे सहः सहस आ नमन्ति ।
इमे शंसं वनुष्यतो नि पान्ति गुरु द्वेषो अररुषे दधन्ति ॥१९॥
इमे रध्रं चिन्मरुतो जुनन्ति भृमिं चिद्यथा वसवो जुषन्त ।
अप बाधध्वं वृषणस्तमांसि धत्त विश्वं तनयं तोकमस्मे ॥२०॥
मा वो दात्रान्मरुतो निरराम मा पश्चाद्दघ्म रथ्यो विभागे ।
आ नः स्पार्हे भजतना वसव्ये३यदीं सुजातं वृषणो वो अस्ति ॥२१॥
सं यद्धनन्त मन्युभिर्जनासः शूरा यह्वीष्वोषधीषु विक्षु ।
अध स्मा नो मरुतो रुद्रियासस्त्रातारो भूत पृतनास्वर्यः ॥२२॥
भूरि चक्र मरुतः पित्र्याण्युक्थानि या वः शस्यन्ते पुरा चित् ।
मरुद्भिरुग्रः पृतनासु साळ्हा मरुद्भिरित्सनिता वाजमर्वा ॥२३॥
अस्मे वीरो मरुतः शुष्म्यस्तु जनानां यो असुरो विधर्ता ।
अपो येन सुक्षितये तरेमाध स्वमोको अभि वः स्याम ॥२४॥
तन्न इन्द्रो वरुणो मित्रो अग्निराप ओषधीर्वनिनो जुषन्त ।
शर्मन्त्स्याम मरुतामुपस्थे यूयं पात स्वस्तिभिः सदा नः ॥२५॥

*ka īṁ vyaktā naraḥ sanīḷāā rudrasya maryā adhā svaśvāḥ ॥1॥*
*nakirhyeṣāṁ janūṁṣi veda te aṁga vidre mitho janitram ॥2॥*
*abhi svapūbhirmitho vapanta vātasvanasaḥ śyenā aspṛdhran ॥3॥*
*etāni dhīro niṇyā chiketa pṛśniryadūdho mahī jabhāra ॥4॥*
*sā viṭ suvīrā marudbhirastu sanātsahantī puṣyantī nṛmṇam ॥5॥*
*yāmaṁ yeṣṭhāḥ śubhā śobhiṣṭhāḥ śriyā saṁmiślā ojobhirugrāḥ ॥6॥*
*ugraṁ va ojaḥ sthirā śavāṁsyadhā marudbhirgaṇastuviṣmān ॥7॥*
*śubhro vaḥ śuṣmaḥ krudhmī manāṁsi dhunirmuniriva śardhasya dhṛṣṇoḥ ॥8॥*
*sanemyasmadyuyota didyuṁ mā vo durmatiriha praṇaṅnaḥ ॥9॥*
*priyā vo nāma huveṁ turāṇāmā yattṛpanmaruto vāvaśānāḥ ॥10॥*
*svāyudhāsa iṣmiṇaḥ suniṣkā uta svayaṁ tanvaḥ1 śumbhamānāḥ ॥11॥*
*śuchī vo havyā marutaḥ śuchīnāṁ śuchiṁ hinomyadhvaraṁ śuchibhyaḥ ।*
*ṛtena satyamṛtasāpa āyaṁchhuchijanmānaḥ śuchayaḥ pāvakāḥ ॥12॥*
*aṁseṣvā marutaḥ khādayo vo vakṣaḥsu rukmā apaśiśriyāṇāḥ ।*
*vi vidyuto na vṛṣṭibhī ruchānā anu svadhāmāyudhairyachchhamānāḥ ॥13॥*
*pra budhnyā va īrate mahāṁsi pra nāmāni prayajyavastiradhvam ।*
*sahasriyaṁ damyaṁ bhāgameṁtaṁ gṛhamedhīyaṁ maruto juṣadhvam ॥14॥*
*yadi stutasya maruto adhīthetthā viprasya vājino havīman ।*
*makṣū rāyaḥ suvīryasya dāta nū chidyamanya ādabhadarāvā ॥15॥*
*atyāso na ye marutaḥ svaṁcho yakṣadṛśo na śubhayanta maryāḥ ।*

*te harmyeṣṭhāḥ śiśavo na śubhrā vatsāso na prakrīḻinaḥ payodhāḥ* ॥16॥
*daśasyanto no maruto mṛḻantu varivasyanto rodasī sumeke* ।
*āre gohā nṛhā vadho vo astu sumnebhirasme vasavo namadhvam* ॥17॥
*ā vo hotā johavīti sattaḥ satrāchīṁ rātiṁ maruto gṛṇānaḥ* ।
*ya īvato vṛṣaṇo asti gopāḥ so advayāvī havate va ukthaiḥ* ॥18॥
*ime turaṁ maruto rāmayantīme sahaḥ sahasa ā namanti* ।
*ime śaṁsaṁ vanuṣyato ni pānti guru dveṣo araruṣe dadhanti* ॥19॥
*ime radhraṁ chinmaruto junanti bhṛmi chidyathā vasavo juṣanta* ।
*apa bādhadhvaṁ vṛṣaṇastamāṁsi dhatta viśvaṁ tanayaṁ tokamasme* ॥20॥
*mā vo dātrānmaruto nirarāma mā paśchāddadhma rathyo vibhāge* ।
*ā naḥ spārhe bhajatanā vasavye3yadīṁ sujātaṁ vṛṣaṇo vo asti* ॥21॥
*saṁ yaddhananta manyubhirjanāsaḥ śūrā yahvīṣvoṣadhīṣu vikṣu* ।
*adha smā no maruto rudriyāsastrātāro bhūta pṛtanāsvaryaḥ* ॥22॥
*bhūri chakra marutaḥ pitrayāṇyukthāni yā vaḥ śasyante purā chit* ।
*marudbhirugraḥ pṛtanāsu sāḻhā marudbhiritsanitā vājamarvā* ॥23॥
*asme vīro marutaḥ śuṣmyastu janānāṁ yo asuro vidhartā* ।
*apo yena sukṣitaye taremādha svamoko abhi vaḥ syāma* ॥24॥
*tanna indro varuṇo mitro agnirāpa oṣadhīrvanino juṣanta* ।
*śarmantsyāma marutāmupasthe yūyaṁ pāta svastibhiḥ sadā naḥ* ॥25॥

ऋ. (Rv.) ७.५७.१-७

मध्वो वो नाम मारुतं यजत्राः प्र यज्ञेषु शवसा मदन्ति ।
ये रेजयन्ति रोदसी चिदुर्वी पिन्वन्त्युत्सं यदयासुरुग्राः ॥१॥
निचेतारो हि मरुतो गृणन्तं प्रणेतारो यजमानस्य मन्म ।
अस्माकमद्य विदथेषु बर्हिरा वीतये सदत पिप्रियाणाः ॥२॥
नैतावदन्ये मरुतो यथेमे भ्राजन्ते रुक्मैरायुधैस्तनूभिः ।
आ रोदसी विश्वपिशः पिशानाः समानमंज्यंजते शुभे कम् ॥३॥
ऋधक्सा वो मरुतो दिद्युदस्तु यद्व आगः पुरुषता कराम ।
मा वस्तस्यामपि भूमा यजत्रा अस्मे वो अस्तु सुमतिश्चनिष्ठा ॥४॥
कृते चिदत्र मरुतो रणन्तानवद्यासः शुचयः पावकाः ।
प्र णोऽवत सुमतिभिर्यजत्राः प्र वाजेभिस्तिरत पुष्यसे नः ॥५॥
उत स्तुतासो मरुतो व्यन्तु विश्वेभिर्नामभिर्नरो हवींषि ।
ददात नो अमृतस्य प्रजायै जिगृत रायः सूनृता मघानि ॥६॥
आ स्तुतासो मरुतो विश्व ऊती अच्छा सूरीन्त्सर्वताता जिगात ।
ये नस्त्मना शतिनो वर्धयन्ति यूयं पात स्वस्तिभिः सदा नः ॥७॥

*madhvo vo nāma mārutaṁ yajatrāḥ pra yajñeṣu śavasā madanti* ।
*ye rejayanti rodasī chidurvī pinvantyutsaṁ yadayāsurugrāḥ* ॥1॥
*nichetāro hi maruto gṛṇantaṁ praṇetāro yajamānasya manma* ।
*asmākamadya vidatheṣu barhirā vītaye sadata pipriyāṇāḥ* ॥2॥
*naitāvadanye maruto yatheme bhrājante rukmairāyudhaistanūbhiḥ* ।
*ā rodasī viśvapiśaḥ piśānāḥ samānamaṁjyaṁjate śubhe kam* ॥3॥
*ṛdhaksā vo maruto didyudastu yadva āgaḥ puruṣatā karāma* ।
*mā vastasyāmapi bhūmā yajatrā asme vo astu sumatiśchaniṣṭhā* ॥4॥
*kṛte chidatra maruto raṇantānavadyāsaḥ śuchayaḥ pāvakāḥ* ।
*pra ṇo'vata sumatibhiryajatrāḥ pra vājebhistirata puṣyase naḥ* ॥5॥
*uta stutāso maruto vyantu viśvebhirnāmabhirnaro havīṁṣi* ।
*dadāta no amṛtasya prajāyai jigṛta rāyaḥ sūnṛtā maghāni* ॥6॥
*ā stutāso maruto viśva ūtī achchhā sūrīntsarvatātā jigāta* ।
*ye nastmanā śatino vardhayanti yūyaṁ pāta svastibhiḥ sadā naḥ* ॥7॥

ऋ. (Rv.) ७.५८.१-६

प्र साकमुक्षे अर्चता गणाय यो दैव्यस्य धाम्नस्तुविष्मान् ।
उत क्षेदन्ति रोदसी महित्वा नक्षन्ते नाकं निरृतेरवंशात् ॥१॥

जनूश्चिद्वो मरुतस्त्वेष्येण भीमासस्तुविमन्यवोऽयासः ।
प्र ये महोभिरोजसोत सन्ति विश्वो वो यामन्भयते स्वर्दृक् ॥२॥
बृहद्वयो मघवद्भ्यो दधात जुजोषन्निन्मरुतः सुष्टुतिं नः ।
गतो नाध्वा वि तिराति जन्तुं प्र णः स्पार्हाभिरूतिभिस्तिरेत ॥३॥
युष्मोतो विप्रो मरुतः शतस्वी युष्मोतो अर्वा सहुरिः सहस्री ।
युष्मोतः सम्राळुत हन्ति वृत्रं प्र तद्वो अस्तु धूतयो देष्णम् ॥४॥
ताँ आ रुद्रस्य मीळ्हुषो विवासे कुविन्नंसन्ते मरुतः पुनर्नः ।
यत्सस्वर्ता जिहीळिरे यदाविरव तदेन ईमहे तुराणाम् ॥५॥
प्र सा वाचि सुष्टुतिर्मघोनामिदं सूक्तं मरुतो जुषन्त ।
आराच्चिद् द्वेषो वृषणो युयोत यूयं पात स्वस्तिभिः सदा नः ॥६॥

*pra sākamukṣe archatā gaṇāya yo daivyasya dhāmnastuviṣmān* ।
*uta kṣedanti rodasī mahitvā nakṣante nākaṁ nirṛteravaṁśāt* ॥1॥
*janūśchidvo marutastveṣyeṇa bhīmāsastuvimanyavo'yāsaḥ* ।
*pra ye mahobhirojasota santi viśvo vo yāmanbhayate rsvdṛk* ॥2॥
*bṛhadvayo maghavadbhyo dadhāta jujoṣanninmarutaḥ suṣṭutiṁ naḥ* ।
*gato nādhvā vi tirāti jantuṁ pra ṇaḥ spārhābhirūtibhistireta* ॥3॥
*yuṣmoto vipro marutaḥ śatasvī yuṣmoto arvā sahuriḥ sahasrī* ।
*yuṣmotaḥ samrāḻuta hanti vṛtraṁ pra tadvo astu dhūtayo deṣṇam* ॥4॥
*tāṁ̐ ā rudrasya mīḻahuṣo vivāse kuvinnaṁsante marutaḥ punarnaḥ* ।
*yatsasvartā jihīḻire yadāvirava tadena īmahe turāṇām* ॥5॥
*pra sā vāchi suṣṭutirmaghonāmidaṁ sūktaṁ maruto juṣanta* ।
*ārāchchid dveṣo vṛṣaṇo yuyota yūyaṁ pāta svastibhiḥ sadā naḥ* ॥6॥

ऋ. (Rv.) ७.५९.१-११

यं त्रायध्व इदमिदं देवासो यं च नयथ ।
तस्मा अग्ने वरुण मित्रार्यमन्मरुतः शर्म यच्छत ॥१॥
युष्माकं देवा अवसाहनि प्रिय ईजानस्तरति द्विषः ।
प्र स क्षयं तिरते वि महीरिषो यो वो वराय दाशति ॥२॥
नहि वश्चरमं चन वसिष्ठः परिमंसते ।
अस्माकमद्य मरुतः सुते सचा विश्वे पिबत कामिनः ॥३॥
नहि व ऊतिः पृतनासु मर्धति यस्मा अराध्वं नरः ।
अभि व आवर्त्सुमतिर्नवीयसी तूयं यात पिपीषवः ॥४॥
ओ षु घृष्विराधसो यातनान्धांसि पीतये ।
इमा वो हव्या मरुतो ररे हि कं मोष्व१न्यत्र गन्तन ॥५॥
आ च नो बर्हिः सदताविता च नः स्पार्हाणि दातवे वसु ।
अस्रेधन्तो मरुतः सोम्ये मधौ स्वाहेह मादयाध्वै ॥६॥
सस्वश्चिद्धि तन्वः१ शुम्भमाना आ हंसासो नीलपृष्ठा अपप्तन्।
विश्वं शर्धो अभितो मा नि षेद नरो न रण्वाः सवने मदन्तः ॥७॥
यो नो मरुतो अभि दुर्हृणायुस्तिरश्चित्तानि वसवो जिघांसति ।
द्रुहः पाशान्प्रति स मुचीष्ट तपिष्ठेन हन्मना हन्तना तम् ॥८॥
सांतपना इदं हविर्मरुतज्जुजुष्टन। युष्माकोती रिशदसः ॥९॥
गृहमेधास आ गत मरुतो माप भूतन। युष्माकोती सुदानवः ॥१०॥
इहेह वः स्वतवसः कवयः सूर्यत्वचः। यज्ञं मरुत आ वृणे ॥११॥

*yaṁ trāyadhva idamidaṁ devāso yaṁ cha nayatha* ।
*tasmā agne varuṇa mitrāryamanmarutaḥ śarma yachchhata* ॥1॥
*yuṣmākaṁ devā avasāhani priya ījānastarati dviṣaḥ* ।
*pra sa kṣayaṁ tirate vi mahīriṣo yo vo varāya dāśati* ॥2॥
*nahi vaścharamaṁ chana vasiṣṭhaḥ parimaṁsate* ।
*asmākamadya marutaḥ sute sachā viśve pibata kāminaḥ* ॥3॥
*nahi va ūtiḥ pṛtanāsu mardhati yasmā arādhvaṁ naraḥ* ।
*abhi va āvartsumatirnavīyasī tūyaṁ yāta pipīṣavaḥ* ॥4॥

*o ṣu ghṛṣvirādhaso yātanāndhāṁsi pītaye ।*
*imā vo havyā maruto rare hi kaṁ moṣva1nyatra gantana ॥5॥*
*ā cha no barhiḥ sadatāvitā cha naḥ spārhāṇi dātave vasu ।*
*asredhanto marutaḥ somye madhau svāheha mādayādhvai ॥6॥*
*sasvaśchiddhi tanvaḥ1 śumbhamānā ā haṁsāso nīlapṛṣṭhā apaptan ।*
*viśvaṁ śardho abhito mā ni ṣeda naro na raṇvāḥ savane madantaḥ ॥7॥*
*yo no maruto abhi durhṛṇāyustiraśchittāni vasavo jighāṁsati ।*
*druhaḥ pāśānprati sa muchīṣṭa tapiṣṭhena hanmanā hantanā tam ॥8॥*
*sāṁtapanā idaṁ havirmarutajjujuṣṭana । yuṣmākotī riśadasaḥ ॥9॥*
*gṛhamedhāsa ā gata maruto māpa bhūtana । yuṣmākotī sudānavaḥ ॥10॥*
*iheha vaḥ svatavasaḥ kavayaḥ sūryatvachaḥ । yajñaṁ maruta ā vṛṇe ॥11॥*

ऋ. (Rv.) ७.१०४.१८

वि तिष्ठध्वं मरुतो विक्ष्विश्च्छत गृभायत रक्षसः सं पिनष्टन ।
वयो ये भूत्वी पतयन्ति नक्तभिर्ये वा रिपो दधिरे देवे अध्वरे ॥१८॥
*vi tiṣṭhadhvaṁ maruto vikṣvi1chchhata gṛbhāyata rakṣasaḥ saṁ pinaṣṭana ।*
*vayo ye bhūtvī patayanti naktabhirye vā ripo dadhire deve adhvare ॥18॥*

४१. मित्रावरुणौ (Mitrāvaruṇau) - ऋ. (Rv.) ७.५०.१; ७.६०.२-१२; ७.६१.१-७; ७.६२.४-६; ७.६३.५; ६; ७.६४.१-५; ७.६५.१-५; ७.६६.१-३; १७-१९

ऋ. (Rv.) ७.५०.१

आ मां मित्रावरुणेह रक्षतं कुलाययद्विश्वयन्मा न आ गन् ।
अजकावं दुर्दृशीकं तिरो दधे मा मां पद्येन रपसा विदत्त्सरुः ॥१॥
*ā māṁ mitrāvaruṇeha rakṣataṁ kulāyayadviśvayanmā na ā gan ।*
*ajakāvaṁ durdṛśīkaṁ tiro dadhe mā māṁ padyena rapasā vidattsaruḥ ॥1॥*

ऋ. (Rv.) ७.६०.२-१२

एष स्य मित्रावरुणा नृचक्षा उभे उदेति सूर्यो अभि ज्मन् ।
विश्वस्य स्थातुर्जगतश्च गोपा ऋजु मर्तेषु वृजिना च पश्यन् ॥२॥
अयुक्त सप्त हरितः सधस्थाद्या ईं वहन्ति सूर्यं घृताचीः ।
धामानि मित्रावरुणा युवाकुः सं यो यूथेव जानिमानि चष्टे ॥३॥
उद्वां पृक्षासो मधुमन्तो अस्थुरा सूर्यो अरुहच्छुक्रमर्णः ।
यस्मा आदित्या अध्वनो रदन्ति मित्रो अर्यमा वरुणः सजोषाः ॥४॥
इमे चेतारो अनृतस्य भूरेर्मित्रो अर्यमा वरुणो हि सन्ति ।
इम ऋतस्य वावृधुर्दुरोणे शग्मासः पुत्रा अदितेरदब्धाः ॥५॥
इमे मित्रो वरुणो दूळभासोऽचेतसं चिच्चितयन्ति दक्षैः ।
अपि क्रतुं सचेतसं वतन्तस्तिरश्चिदंहः सुपथा नयन्ति ॥६॥
इमे दिवो अनिमिषा पृथिव्याश्चिकित्वांसो अचेतसं नयन्ति ।
प्रव्राजे चिन्नद्यो गाधमस्ति पारं नो अस्य विष्पितस्य पर्षन् ॥७॥
यद् गोपावददितिः शर्म भद्रं मित्रो यच्छन्ति वरुणः सुदासे ।
तस्मिन्ना तोकं तनयं दधाना मा कर्म देवहेळनं तुरासः ॥८॥
अव वेदिं होत्राभिर्यजेत रिपः काश्चिद्वरुणध्रुतः सः ।
परि द्वेषोभिरर्यमा वृणक्तूरुं सुदासे वृषणा उ लोकम् ॥९॥
सस्वश्चिद्धि समृतिस्त्वेष्येषामपीच्येन सहसा सहन्तै ।
युष्मद्भिया वृषणो रेजमाना दक्षस्य चिन्महिना मृळता नः ॥१०॥
यो ब्रह्मणे सुमतिमायजाते वाजस्य सातौ परमस्य रायः ।
सीक्षन्त मन्युं मघवानो अर्य उरु क्षयाय चक्रिरे सुधातु ॥११॥
इयं देव पुरोहितिर्युवभ्यां यज्ञेषु मित्रावरुणावकारि ।
विश्वानि दुर्गा पिपृतं तिरो नो यूयं पात स्वस्तिभिः सदा नः ॥१२॥
*eṣa sya mitrāvaruṇā nṛchakṣā ubhe udeti sūryo abhi jman ।*
*viśvasya sthāturjagataścha gopā ṛju marteṣu vṛjinā cha paśyan ॥2॥*
*ayukta sapta haritaḥ sadhasthādyā īṁ vahanti sūryaṁ ghṛtāchīḥ ।*

*dhāmāni mitrāvaruṇā yuvākuḥ saṁ yo yūtheva jānimāni chaṣṭe //3 //*
*udvāṁ pṛkṣāso madhumanto asthurā sūryo aruhachchhukramarṇaḥ /*
*yasmā ādityā adhvano radanti mitro aryamā varuṇaḥ sajoṣāḥ //4 //*
*ime chetāro anṛtasya bhūrermitro aryamā varuṇo hi santi /*
*ima ṛtasya vāvṛdhurduroṇe śagmāsaḥ putrā aditeradabdhāḥ //5 //*
*ime mitro varuṇo dūḷabhāso'chetasaṁ chichchitayanti dakṣaiḥ /*
*api kratuṁ sachetasaṁ vatantastiraśchidaṁhaḥ supathā nayanti //6 //*
*ime divo animiṣā pṛthivyāśchikitvāṁso achetasaṁ nayanti /*
*pravrāje chinnadyo gādhamasti pāraṁ no asya viṣpitasya parṣan //7 //*
*yad gopāvadaditiḥ śarma bhadraṁ mitro yachchhanti varuṇaḥ sudāse /*
*tasminnā tokaṁ tanayaṁ dadhānā mā karma devaheḷanaṁ turāsaḥ //8 //*
*ava vediṁ hotrābhiryajeta ripaḥ kāśchidvaruṇadhrutaḥ saḥ /*
*pari dveṣobhiraryamā vṛṇaktūruṁ sudāse vṛṣaṇā u lokam //9 //*
*sasvaśchiddhi samṛtistveṣyeṣāmapīchyena sahasā sahantai /*
*yuṣmadbhiyā vṛṣaṇo rejamānā dakṣasya chinmahinā mṛḷatā naḥ //10 //*
*yo brahmaṇe sumatimāyajāte vājasya sātau paramasya rāyaḥ /*
*sīkṣanta manyuṁ maghavāno arya uru kṣayāya chakrire sudhātu //11 //*
*iyaṁ deva purohitiryuvabhyāṁ yajñeṣu mitrāvaruṇāvakāri /*
*viśvāni durgā pipṛtaṁ tiro no yūyaṁ pāta svastibhiḥ sadā naḥ //12 //*

ऋ. (Rv.) ७.६१.१-७

उद्वां चक्षुर्वरुण सुप्रतीकं देवयोरेति सूर्यस्ततन्वान् ।
अभि यो विश्वा भुवनानि चष्टे सं मन्युं मर्त्येष्वा चिकेत ॥१॥
प्र वां स मित्रावरुणावृतावा विप्रो मन्मानि दीर्घश्रुदियर्ति ।
यस्य ब्रह्माणि सुक्रतू अवाथ आ यत्क्रत्वा न शरदः पृणैथे ॥२॥
प्रोरोर्मित्रावरुणा पृथिव्याः प्र दिव ऋष्वाद् बृहतः सुदान् ।
स्पशो दधाथे ओषधीषु विक्ष्वृधग्यतो अनिमिषं रक्षमाणाा ॥३॥
शंसा मित्रस्य वरुणस्य धाम शुष्मो रोदसी बद्बधे महित्वा ।
अयन्मासा अयज्वनामवीराः प्र यज्ञमन्मा वृजनं तिराते ॥४॥
अमूरा विश्वा वृषणाविमा वां न यासु चित्रं ददृशे न यक्षम् ।
द्रुहः सचन्ते अनृता जनानां न वां निण्यान्यचिते अभूवन् ॥५॥
समु वां यज्ञं महयं नमोभिर्हुवे वां मित्रावरुणा सबाधः ।
प्र वां मन्मान्यृचसे नवानि कृतानि ब्रह्म जुजुषन्निमानि ॥६॥
इयं देव पुरोहितिर्युवभ्यां यज्ञेषु मित्रावरुणावकारि ।
विश्वानि दुर्गा पिपृतं तिरो नो यूयं पात स्वस्तिभिः सदा नः ॥७॥
*udvāṁ chakṣurvaruṇa supratīkaṁ devayoreti sūryastatanvān /*
*abhi yo viśvā bhuvanāni chaṣṭe saṁ manyuṁ martyeṣvā chiketa //1 //*
*pra vāṁ sa mitrāvaruṇāvṛtāvā vipro manmāni dīrghaśrudiyarti /*
*yasya brahmāṇi sukratū avātha ā yatkratvā na śaradaḥ pṛṇaithe //2 //*
*prorormitrāvaruṇā pṛthivyāḥ pra diva ṛṣvād bṛhataḥ sudān /*
*spaśo dadhāthe oṣadhīṣu vikṣavṛdhagyato animiṣaṁ rakṣamāṇāā //3 //*
*śaṁsā mitrasya varuṇasya dhāma śuṣmo rodasī badbadhe mahitvā /*
*ayanmāsā ayajvanāmavīrāḥ pra yajñamanmā vrjanaṁ tirāte //4 //*
*amūrā viśvā vṛṣaṇāvimā vāṁ na yāsu chitraṁ dadṛśe na yakṣam /*
*druhaḥ sachante anṛtā janānāṁ na vāṁ niṇyānyachite abhūvan //5 //*
*samu vāṁ yajñaṁ mahayaṁ namobhirhuve vāṁ mitrāvaruṇā sabādhaḥ /*
*pra vāṁ manmānyṛchase navāni kṛtāni brahma jujuṣannimāni //6 //*
*iyaṁ deva purohitiryuvabhyāṁ yajñeṣu mitrāvaruṇāvakāri /*
*viśvāni durgā pipṛtaṁ tiro no yūyaṁ pāta svastibhiḥ sadā naḥ //7 //*

ऋ. (Rv.) ७.६२.४-६

द्यावाभूमी आदिते त्रासीथां नो ये वां जज्ञुः सुजनिमान ऋष्वे ।
मा हेळे भूम वरुणस्य वायोर्मा मित्रस्य प्रियतमस्य नृणाम् ॥४॥

प्र बाहवा सिसृतं जीवसे न आ नो गव्यूतिमुक्षतं घृतेन ।
आ नो जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवेमा ॥५॥
नू मित्रो वरुणो अर्यमा नस्त्मने तोकाय वरिवो दधन्तु ।
सुगा नो विश्वा सुपथानि सन्तु यूयं पात स्वस्तिभिः सदा नः ॥६॥
*dyāvābhūmī ādite trāsīthāṁ no ye vāṁ jajñuḥ sujanimāna ṛṣve /*
*mā heḷe bhūma varuṇasya vāyormā mitrasya priyatamasya nṛṇām //4 //*
*pra bāhavā sisṛtaṁ jīvase na ā no gavyūtimukṣataṁ ghṛtena /*
*ā no jane śravayataṁ yuvānā śrutaṁ me mitrāvaruṇā havemā //5 //*
*nū mitro varuṇo aryamā nastmane tokāya varivo dadhantu /*
*sugā no viśvā supathāni santu yūyaṁ pāta svastibhiḥ sadā naḥ //6 //*

ऋ. (Rv.) ७.६३.५-६

यत्रा चक्रुरमृता गातुमस्मै श्येनो न दीयन्नन्वेति पाथः ।
प्रति वां सूर उदिते विधेम नमोभिर्मित्रावरुणोत हव्यैः ॥५॥
नू मित्रो वरुणो अर्यमा नस्त्मने तोकाय वरिवो दधन्तु ।
सुगा नो विश्वा सुपथानि सन्तु यूयं पात स्वस्तिभिः सदा नः ॥६॥
*yatrā chakruramṛtā gātumasmai śyeno na dīyannanveti pāthaḥ /*
*prati vāṁ sūra udite vidhema namobhirmitrāvaruṇota havyaiḥ //5 //*
*nū mitro varuṇo aryamā nastmane tokāya varivo dadhantu /*
*sugā no viśvā supathāni santu yūyaṁ pāta svastibhiḥ sadā naḥ //6 //*

ऋ. (Rv.) ७.६४.१-५

दिवि क्षयन्ता रजसः पृथिव्यां प्र वां घृतस्य निर्णिजो ददीरन् ।
हव्यं नो मित्रो अर्यमा सुजातो राजा सुक्षत्रो वरुणो जुषन्त ॥१॥
आ राजाना मह ऋतस्य गोपा सिन्धुपती क्षत्रिया यातमर्वाक् ।
इळां नो मित्रावरुणोत वृष्टिमव दिव इन्वतं जीरदानू ॥२॥
मित्रस्तन्नो वरुणो देवो अर्यः प्र सधिष्ठेभिः पथिभिर्नयन्तु ।
ब्रवद्यथा न आदरिः सुदास इषा मदेम सह देवगोपाः ॥३॥
यो वां गर्तं मनसा तक्षदेतमूर्ध्वां धीतिं कृणवद्धारयच्च ।
उक्षेथां मित्रावरुणा घृतेन ता राजाना सुक्षितीस्तर्पयेथाम् ॥४॥
एष स्तोमो वरुणा मित्र तुभ्यं सोमः शुक्रो न वायवेऽयामि ।
अविष्टं धियो जिगृतं पुरन्धीर्यूयं पात स्वस्तिभिः सदा नः ॥५॥
*divi kṣayantā rajasaḥ pṛthivyāṁ pra vāṁ ghṛtasya nirṇijo dadīran /*
*havyaṁ no mitro aryamā sujāto rājā sukṣatro varuṇo juṣanta //1 //*
*ā rājānā maha ṛtasya gopā sindhupatī kṣatriyā yātamarvāk /*
*iḻāṁ no mitrāvaruṇota vṛṣṭimava diva invataṁ jīradānū //2 //*
*mitrastanno varuṇo devo aryaḥ pra sadhiṣṭhebhiḥ pathibhirnayantu /*
*bravadyathā na ādariḥ sudāsa iṣā madema saha devagopāḥ //3 //*
*yo vāṁ gartaṁ manasā takṣadetamūrdhvāṁ dhītiṁ kṛṇavaddhārayachcha /*
*ukṣethāṁ mitrāvaruṇā ghṛtena tā rājānā sukṣitīstarpayethām //4 //*
*eṣa stomo varuṇā mitra tubhyaṁ somaḥ śukro na vāyave'yāmi /*
*aviṣṭaṁ dhiyo jigṛtaṁ pṛrandhīryūyaṁ pāta svastibhiḥ sadā naḥ //5 //*

ऋ. (Rv.) ७.६५.१-५

प्रति वां सूर उदिते सूक्तैर्मित्रं हुवे वरुणं पूतदक्षम् ।
ययोरसुर्य१ मक्षितं ज्येष्ठं विश्वस्य यामन्नाचिता जिगत्नु ॥१॥
ता हि देवानामसुरा तावर्या ता नः क्षितीः करतमूर्जयन्तीः ।
अश्याम मित्रावरुणा वयं वां द्यावा च यत्र पीपयन्नहा च ॥२॥
ता भूरिपाशवनृतस्य सेतू दुरत्येतू रिपवे मर्त्याय ।
ऋतस्य मित्रावरुणा पथा वामपो न नावा दुरिता तरेम ॥३॥
आ नो मित्रावरुणा हव्यजुष्टिं घृतैर्गव्यूतिमुक्षतिळाभिः ।
प्रतिवामत्र वरमा जनाय पृणीतमुद्नो दिव्यस्य चारोः ॥४॥

एष स्तोमो वरुण मित्र तुभ्यं सोमः शुक्रो न वायवेऽयामि ।
अविष्टं धियो जिगृतं पुरन्धीर्यूयं पात स्वस्तिभिः सदा नः ॥५॥
*prati vāṁ sūra udite sūktairmitraṁ huve varuṇaṁ pūtadakṣam /*
*yayorasurya1 makṣitaṁ jyeṣṭhaṁ viśvasya yāmannāchitā jigatnu //1 //*
*tā hi devānāmasurā tāvaryā tā naḥ kṣitīḥ karatamūrjayantīḥ /*
*aśyāma mitrāvaruṇā vayaṁ vāṁ dyāvā cha yatra pīpayannahā cha //2 //*
*tā bhūripāśavanṛtasya setū duratyetū ripave martyāya /*
*ṛtasya mitrāvaruṇā pathā vāmapo na nāvā duritā tarema //3 //*
*ā no mitrāvaruṇā havyajuṣṭiṁ ghṛtairgavyūtimukṣatiḷāābhiḥ /*
*prativāmatra varamā janāya pṛṇītamudno divyasya chāroḥ //4 //*
*eṣa stomo varuṇa mitra tubhyaṁ somaḥ śukro na vāyave'yāmi /*
*aviṣṭaṁ dhiyo jigṛtaṁ purandhīryūyaṁ pāta svastibhiḥ sadā naḥ //5 //*

ऋ. (Rv.) ७.६६.१-३

प्र मित्रयोर्वरुणयोः स्तोमो न एतु शूष्यः। नमस्वान्तुविजातयोः ॥१॥
या धारयन्त देवाः सुदक्षा दक्षपितरा। असुर्याय प्रमहसा ॥२॥
ता नः स्तिपा तनूपा वरुण जरितृणाम्। मित्र साधयतं धियः ॥३॥
*pra mitrayorvaruṇayoḥ stomo na etu śūṣyaḥ / namasvāntuvijātayoḥ //1 //*
*yā dhārayanta devāḥ sudakṣā dakṣapitarā / asuryāya pramahasā //2 //*
*tā naḥ stipā tanūpā varuṇa jaritṛṇām / mitra sādhayataṁ dhiyaḥ //3 //*

ऋ. (Rv.) ७.६६.१७-१९

काव्येभिरदाभ्या यातं वरुण द्युमत्। मित्रश्च सोमपीतये ॥१७॥
दिवो धामभिर्वरुण मित्रश्चा यातमद्रुहा। पिबतं सोममातुजी ॥१८॥
आ यातं मित्रावरुणा जुषाणावाहुतिं नरा। पातं सोममृतावृधा ॥१९॥
*kāvyebhiradābhyā yātaṁ varuṇa dyumat / mitraścha somapītaye //17 //*
*divo dhāmabhirvaruṇa mitraśchā yātamadruhā / pibataṁ somamātujī //18 //*
*ā yātaṁ mitrāvaruṇā juṣāṇāvāhutiṁ narā / pātaṁ somamṛtāvṛdhā //19 //*

४२. यज्ञः (Yajñaḥ) - य. (Yv.) ८.६२; ९.२१

य. (Yv.) ८.६२

यज्ञस्य दोहो विततः पुरुत्रा सोऽअष्टधा दिवमन्वाततान ।
स यज्ञ धुक्ष्व महि मे प्रजायां रायस्पोषं विश्वमायुरशीय स्वाहा ॥६२॥
*yajñasya doho vitataḥ purutrā so'aṣṭadhā divamanvātatāna /*
*sa yajña dhukṣava mahi me prajāyāṁ rāyaspoṣaṁ viśvamāyuraśīya svāhā //62 //*

य. (Yv.) ९.२१

आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पतां श्रोत्रं यज्ञेन कल्पतां पृष्ठं यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम्। प्रजापतेः प्रजाऽअभूम स्वर्देवाऽअगन्मामृताऽअभूम ॥२१॥
*āyuryajñena kalpatāṁ prāṇo yajñena kalpatāṁ chakṣuryajñena kalpatāṁ śrotraṁ yajñena kalpatāṁ pṛṣṭhaṁ yajñena kalpatāṁ yajño yajñena kalpatām / prajāpateḥ prajā'abhūma svardevā'aganmāmṛtā'abhūma //21 //*

४३. रुद्रः (Rudraḥ) - ऋ. (Rv.) ७.४६.१-४; ७.५९.१२; य. (Yv.) ३.६०; ६१

ऋ. (Rv.) ७.४६.१-४

इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाव्ने ।
अषाळहाय सहमानाय वेधसे तिग्मायुधाय भरता श्रृणोतु नः ॥१॥
स हि क्षयेण क्षम्यस्य जन्मनः साम्राज्येन दिव्यस्य चेतति ।
अवन्नवन्ती रुप नो दुरश्चरानमीवो रुद्र जासु नो भव ॥२॥
या ते दिद्युदवसृष्टा दिवस्परि क्ष्मया चरति परि सा वृणक्तु नः ।
सहस्रं ते स्वपिवात भेषजा मा नस्तोकेषु तनयेषु रीरिषः ॥३॥
मा नो वधी रुद्र मा परा दा मा ते भूम प्रसितौ हीळितस्य ।
आ नो भज बर्हिषि जीवशंसे यूयं पात स्वस्तिभिः सदा नः ॥४॥

*imā rudrāya sthiradhanvane giraḥ kṣipreṣave devāya svadhāvne ।*
*aṣāḷahāya sahamānāya vedhase tigmāyudhāya bharatā śṛṇotu naḥ ॥1॥*
*sa hi kṣayeṇa kṣamyasya janmanaḥ sāmrājyena divyasya chetati ।*
*avannavantī rupa no duraścharānamīvo rudra jāsu no bhava ॥2॥*
*yā te didyudavasṛṣṭā divaspari kṣamayā charati pari sā vṛṇaktu naḥ ।*
*sahasraṁ te svapivāta bheṣajā mā nastokeṣu tanayeṣu rīriṣaḥ ॥3॥*
*mā no vadhī rudra mā parā dā mā te bhūma prasitau hīḷitasya ।*
*ā no bhaja barhiṣi jīvaśaṁse yūyaṁ pāta svastibhiḥ sadā naḥ ॥4॥*

ऋ. (Rv.) ७.५९.१२

त्रयम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥१२॥
*trayambakaṁ yajāmahe sugandhi puṣṭivardhanam । urvārukamiva bandhanānmṛtyormukṣīya māmṛtāt ॥12॥*

य. (Yv.) ३.६०-६१

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्। त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम्। उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः ॥६०॥
एतत्ते रुद्रावसं तेन परो मूजवतोऽतीहि। अवततधन्वा पिनाकावसः कृत्तिवासाऽअहिंसन्नः शिवोऽती ॥६१॥
*trayambakaṁ yajāmahe suganiṁdha puṣṭivardhanam । urvārukamiva bandhanānmṛtyormukṣīya mā'mṛtāt । trayambakaṁ yajāmahe suganiṁdha pativedanam । urvārukamiva bandhanādito mukṣīya māmutaḥ ॥60॥*
*etatte rudrāvasaṁ tena paro mūjavato'tīhi । avatatadhanvā pinākāvasaḥ kṛttivāsā'ahiṁsannaḥ śivo'tī ॥61॥*

४४. लिङ्गोक्ता (Liṅgoktā) - ऋ. (Rv.) ७.४१.१; ७.४४.१-५

ऋ. (Rv.) ७.४१.१

प्रातरग्निं प्रातरिन्द्रं हवामहे प्रातर्मित्रवरुणा प्रातरश्विना ।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रं हुवेम ॥१॥
*prātaragiṁna prātarindraṁ havāmahe prātarmitravaruṇā prātaraśvinā ।*
*prātarbhagaṁ pūṣaṇaṁ brahmaṇaspatiṁ prātaḥ somamuta rudraṁ huvema ॥1॥*

ऋ. (Rv.) ७.४४.१-५

दधिक्रां वः प्रथममश्विनोषसमग्निं समिद्धं भगमूतये हुवे ।
इन्द्रं विष्णुं पूषणं ब्रह्मणस्पतिमादित्यान्द्यावापृथिवी अपः स्वः ॥१॥
दधिक्रामु नमसा बोधयन्त उदीराणा यज्ञमुपप्रयन्तः ।
इळां देवीं बर्हिषि सादयन्तोऽश्विना विप्रा सुहवा हुवेम ॥२॥
दधिक्रावाणं बुबुधानो अग्निमुप ब्रुव उषसं सूर्यं गाम् ।
ब्रध्नं मंश्चतोर्वरुणस्य बभ्रुं ते विश्वास्मद् दुरिता यावयन्तु ॥३॥
दधिक्रावा प्रथमो वाज्यर्वाग्रे रथानां भवति प्रजानन् ।
संविदान उषसा सूर्येणादित्येभिर्वसुभिरंगिरोभिः ॥४॥
आ नो दधिक्राः पथ्यामनक्त्वृतस्य पन्थामन्वेतवा उ ।
श्रृणोतु नो दैव्यं शर्धो अग्निः श्रृण्वन्तु विश्वे महिषा अमूराः ॥५॥
*dadhikrāṁ vaḥ prathamamaśvinoṣasamagiṁna samiddhaṁ bhagamūtaye huve ।*
*indraṁ viṣṇuṁ pūṣaṇaṁ brahmaṇaspatimādityāndyāvāpṛthivī apaḥ svaḥ ॥1॥*
*dadhikrāmu namasā bodhayanta udīrāṇā yajñamupaprayantaḥ ।*
*iḷāṁ devīṁ barhiṣi sādayanto'śvinā viprā suhavā huvema ॥2॥*
*dadhikrāvāṇaṁ bubudhāno agnimupa bruva uṣasaṁ sūryaṁ gām ।*
*bradhnaṁ maṁśchatorvaruṇasya babhruṁ te viśvāsmad duritā yāvayantu ॥3॥*
*dadhikrāvā prathamo vājyarvāgre rathānāṁ bhavati prajānan ।*
*saṁvidāna uṣasā sūryeṇādityebhirvasubhiraṁgirobhiḥ ॥4॥*
*ā no dadhikrāḥ pathyāmanaktvṛtasya panthāmanvetavā u ।*
*śṛṇotu no daivyaṁ śardho agniḥ śṛṇvantu viśve mahiṣā amūrāḥ ॥5॥*

४५. वरुणः (Varuṇaḥ) - ऋ. (Rv.) ७.८६.१-८; ७.८७.१-७; ७.८८.१-७; ७.८९.१-५

ऋ. (Rv.) ७.८६.१-८

धीरा त्वस्य महिना जनूंषि वि यस्तस्तम्भ रोदसी चिदुर्वी ।
प्र नाकमृष्वं नुनुदे बृहन्तं द्विता नक्षत्रं पप्रथच्च भूम ॥१॥
उत स्वया तन्वा३ सं वदे तत्कदा न्व१न्तर्वरुणे भुवानि ।
किं मे हव्यमहृणानो जुषेत कदा मृळीकं सुमना अभि ख्यम् ॥२॥
पृच्छे तदेनो वरुण दिदृक्षूपो एमि चिकितुषो विपृच्छम् ।
समानमिन्मे कवयश्चिदाहुरयं ह तुभ्यं वरुणो हृणीते ॥३॥
किमाग आस वरुण ज्येष्ठं यत्सतोतारं जिघांससि सखायम् ।
प्र तन्मे वोचो दूळभ स्वधावोऽव त्वानेना नमसा तुर इयाम् ॥४॥
अव द्रुग्धानि पित्र्या सृजा नोऽव या वयं चकृमा तनूभिः ।
अव राजन्पशुतृपं न तायुं सृजा वत्सं न दाम्नो वसिष्ठम् ॥५॥
न स स्वो दक्षो वरुण ध्रुतिः सा सुरा मन्युर्विभीदको अचित्तिः ।
अस्ति ज्यायान्कनीयस उपारे स्वप्नश्चनेदनृतस्य प्रयोता ॥६॥
अरं दासो न मीळ्हुषे कराण्यहं देवाय भूर्णयेऽनागाः ।
अचेतयदचितो देवो अर्यो गृत्सं राये कवितरो जुनाति ॥७॥
अयं सु तुभ्यं वरुण स्वधावो हृदि स्तोम उपश्रितश्चिदस्तु ।
शं नः क्षेमे शमु योगे नो अस्तु यूयं पात स्वस्तिभिः सदा नः ॥८॥

*dhīrā tvasya mahinā janūṁṣi vi yastastambha rodasī chidurvī /*
*pra nākamṛṣvaṁ nunude bṛhantaṁ dvitā nakṣatraṁ paprathachcha bhūma //1//*
*uta svayā tanvā3 saṁ vade tatkadā nva1ntarvaruṇe bhuvāni /*
*kiṁ me havyamahṛṇāno juṣeta kadā mṛḻīkaṁ sumanā abhi khyam //2//*
*pṛchchhe tadeno varuṇa didṛkṣūpo emi chikituṣo vipṛchchham /*
*samānaminme kavayaśchidāhurayaṁ ha tubhyaṁ varuṇo hṛṇīte //3//*
*kimāga āsa varuṇa jyeṣṭhaṁ yatsatotāraṁ jighāṁsasi sakhāyam /*
*pra tanme vocho dūḻabha svadhāvo'va tvānenā namasā tura iyām //4//*
*ava drugdhāni pitrayā sṛjā no'va yā vayaṁ chakṛmā tanūbhiḥ /*
*ava rājanpaśutṛpaṁ na tāyuṁ sṛjā vatsaṁ na dāmno vasiṣṭham //5//*
*na sa svo dakṣo varuṇa dhrutiḥ sā surā manyurvibhīdako achittiḥ /*
*asti jyāyānkanīyasa upāre svapnaśchanedanṛtasya prayotā //6//*
*araṁ dāso na mīḻahuṣe karāṇyahaṁ devāya bhūrṇaye'nāgāḥ /*
*achetayadachito devo aryo gṛtsaṁ rāye kavitaro junāti //7//*
*ayaṁ su tubhyaṁ varuṇa svadhāvo hṛdi stoma upaśritaśchidastu /*
*śaṁ naḥ kṣeme śamu yoge no astu yūyaṁ pāta svastibhiḥ sadā naḥ //8//*

ऋ. (Rv.) ७.८७.१-७

रदत्पथा वरुणः सूर्याया प्रार्णांसि समुद्रिया नदीनाम् ।
सर्गो न सृष्टो अर्वतीरृतायंचकार महीरवनीरहभ्यः ॥१॥
आत्मा ते वातो रज आ नवीनोत्पशुर्न भूर्णिर्यवसे ससवान् ।
अन्तर्मही बृहती रोदसीमे विश्वा ते धाम वरुण प्रियाणि ॥२॥
परि स्पशो वरुणस्य स्मदिष्टा उभे पश्यन्ति रोदसी सुमेके ।
ऋतावानः कव्यो यज्ञधीराः प्रचेतसो य इषयन्त मन्म ॥३॥
उवाच मे वरुणो मेधिराय त्रिः सप्त नामाघ्न्या बिभर्ति ।
विद्वान्पदस्य गुह्या न वोचद्युगाय विप्र उपराय शिक्षन् ॥४॥
तिस्रो द्यावो निहिता अन्तरस्मिन्तिस्रो भूमीरुपराः षड्विधानाः ।
गृत्सो राजा वरुणश्चक्र एतं दिवि प्रेंख हिरण्ययं शुभे कम् ॥५॥
अव सिन्धुं वरुणो द्यौरिव स्याद् द्रप्सो न श्वेतो मृगस्तुविष्मान् ।
गम्भीरशंसो रजसो विमानः सुपारक्षत्रः सतो अस्य राजा ॥६॥
यो मृळयाति चक्रुषे चिदागो वयं स्याम वरुणे अनागाः ।
अनु व्रतान्यदितेरृर्धन्तो यूयं पात स्वस्तिभिः सदा नः ॥७॥

*radatpathā varuṇaḥ sūryāyā prārṇāṁsi samudriyā nadīnām /*

*sargo na sṛṣṭo arvatīṛrtāyaṁchakāra mahīravanīrahabhyaḥ ॥1 ॥*
*ātmā te vāto raja ā navīnotpaśurna bhūrṇiryavase sasavān ।*
*antarmahī bṛhatī rodasīme viśvā te dhāma varuṇa priyāṇi ॥2 ॥*
*pari spaśo varuṇasya smadiṣṭā ubhe paśyanti rodasī sumeke ।*
*ṛtāvānaḥ kavyo yajñadhīrāḥ prachetaso ya iṣayanta manma ॥3 ॥*
*uvācha me varuṇo medhirāya triḥ sapta nāmādhnyā bibharti ।*
*vidvānpadasya guhyā na vochadyugāya vipra uparāya śikṣan ॥4 ॥*
*tisro dyāvo nihitā antarasmintisro bhūmīruparāḥ ṣaḍvidhānāḥ ।*
*gṛtso rājā varuṇaśchakra etaṁ divi preṁkha hiraṇyayaṁ śubhe kam ॥5 ॥*
*ava sindhuṁ varuṇo dyauriva sthād drapso na śveto mṛgastuviṣmān ।*
*gambhīraśaṁso rajaso vimānaḥ supārakṣatraḥ sato asya rājā ॥6 ॥*
*yo mṛḻayāti chakruṣe chidāgo vayaṁ syāma varuṇe anāgāḥ ।*
*anu vratānyaditeṛrdhanto yūyaṁ pāta svastibhiḥ sadā naḥ ॥7 ॥*

ऋ. (Rv.) ७.८८.१-७

प्र शुन्ध्युवं वरुणाय प्रेष्ठां मतिं वसिष्ठ मीळ्हुषे भरस्व ।
य ईमर्वांचं करते यजत्रं सहस्रामघं वृषणं बृहन्तम् ॥१ ॥
अधा न्वस्य संदृशं जगन्वानग्नेरनीकं वरुणस्य मंसि ।
स्व१र्यदश्मन्नधिपा उ अन्धोऽभि मा वपुर्दृशये निनीयात् ॥२ ॥
आ यद्रुहाव वरुणश्च नावं प्र यत्समुद्रमीरयाव मध्यम् ।
अधि यदपां स्नुभिश्चराव प्र प्रेंख ईंखयावहै शुभे कम् ॥३ ॥
वसिष्ठं ह वरुणो नाव्याधादृषिं चकार स्वपा महोभिः ।
स्तोतारं विप्रः सुदिनत्वे अह्नां यान्नु द्यावस्ततनन्यादुषासः ॥४ ॥
क्व१ त्यानि नौ सख्या बभूवुः सचावहे यदवृकं पुरा चित् ।
बृहन्तं मानं वरुण स्वधावः सहस्रद्वारं जगमा गृहं ते ॥५ ॥
य आपिर्नित्यो वरुण प्रियः सन्त्वामागांसि कृणवत्सखा ते ।
मा त एनस्वन्तो यक्षिन् भुजेम यन्धि ष्मा विप्रः स्तुवते वरूथम् ॥६ ॥
ध्रुवासु त्वासु क्षितिषु क्षियन्तो व्य१स्मत् पाशं वरुणो मुमोचत् ।
अवो वन्वाना अदितेरुपस्थाद्यूयं पात स्वस्तिभिः सदा नः ॥७ ॥

*pra śundhyuvaṁ varuṇāya preṣṭhāṁ matiṁ vasiṣṭha mīḻhuṣe bharasva ।*
*ya īmarvāṁchaṁ karate yajatraṁ sahasrāmaghaṁ vṛṣaṇaṁ bṛhantam ॥1 ॥*
*adhā nvasya saṁdṛśaṁ jaganvānagneranīkaṁ varuṇasya maṁsi ।*
*sva1ryadaśmannadhipā u andho'bhi mā vapurdṛśaye ninīyāt ॥2 ॥*
*ā yadruhāva varuṇaścha nāvaṁ pra yatsamudramīrayāva madhyam ।*
*adhi yadapāṁ snubhiścharāva pra preṁkha īṁkhayāvahai śubhe kam ॥3 ॥*
*vasiṣṭhaṁ ha varuṇo nāvyādhādṛṣiṁ chakāra svapā mahobhiḥ ।*
*stotāraṁ vipraḥ sudinatve ahnāṁ yānnu dyāvastatananyāduṣāsaḥ ॥4 ॥*
*kva1 tyāni nau sakhyā babhūvuḥ sachāvahe yadavṛkaṁ purā chit ।*
*bṛhantaṁ mānaṁ varuṇa svadhāvaḥ sahasradvāraṁ jagamā gṛhaṁ te ॥5 ॥*
*ya āpirnityo varuṇa priyaḥ santvāmāgāṁsi kṛṇavatsakhā te ।*
*mā ta enasvanto yakṣin bhujema yandhi ṣmā vipraḥ stuvate varūtham ॥6 ॥*
*dhruvāsu tvāsu kṣitiṣu kṣiyanto vya1smat pāśaṁ varuṇo mumochat ।*
*avo vanvānā aditerupasthādyūyaṁ pāta svastibhiḥ sadā naḥ ॥7 ॥*

ऋ. (Rv.) ७.८९.१-५

मो षु वरुण मृन्मयं गृहं राजन्नहं गमम्। मृळा सुक्षत्र मृळय ॥१ ॥
यदेमि प्रस्फुरन्निव दृतिर्न ध्मातो अद्रिवः। मृळा सुक्षत्र मृळय ॥२ ॥
क्रत्वः समह दीनता प्रतीपं जगमा शुचे। मृळा सुक्षत्र मृळय ॥३ ॥
अपां मध्ये तस्थिवांसं तृष्णाविदज्जरितारम्। मृळा सुक्षत्र मृळय ॥४ ॥
यत्किं चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्या३ श्चरामसि ।
अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः ॥५ ॥

*mo ṣu varuṇa mṛnmayaṁ gṛhaṁ rājannahaṁ gamam । mṛḻā sukṣatra mṛḻaya ॥1 ॥*
*yademi prasphuranniva dṛtirna dhmāto adrivaḥ । mṛḻā sukṣatra mṛḻaya ॥2 ॥*

*kratvaḥ samaha dīnatā pratīpaṁ jagamā śuche । mṛḻā sukṣatra mṛḻaya ॥3 ॥*
*apāṁ madhye tasthivāṁsaṁ tṛṣṇāvidajjaritāram । mṛḻā sukṣatra mṛḻaya ॥4 ॥*
*yatiṁka chedaṁ varuṇa daivye jane'bhidrohaṁ manuṣyā3 ścharāmasi ।*
*achittī yattava dharmā yuyopima mā nastasmādenaso deva rīriṣaḥ ॥5 ॥*

४६. वरुणौ (Varuṇau) - य. (Yv.) ३३.७१

गावऽउपावतावतं मही यज्ञस्य रप्सुदा। उभा कर्णा हिरण्यया ॥७१॥
*gāva'upāvatāvataṁ mahī yajñasya rapsudā । ubhā karṇā hiraṇyayā ॥71 ॥*

४७. वसिष्ठः (Vasiṣṭhaḥ) - ऋ. (Rv.) ७.१०४.२३

मा नो रक्षो अभि नड्यातुमावतामपोच्छतु मिथुना या किमीदिना ।
पृथिवी नः पार्थिवात् पात्वंहसोऽन्तरिक्षं दिव्यात्पात्वस्मान् ॥२३॥
*mā no rakṣo abhi naḍyātumāvatāmapochchhatu mithunā yā kimīdinā ।*
*pṛthivī naḥ pārthivāt pātvaṁhaso'ntarikṣaṁ divyātpātvasmān ॥23 ॥*

४८. वाजिनः (Vājinaḥ) - ऋ. (Rv.) ७.३८.७-८

शं नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः ।
जम्भयन्तोऽहिं वृकं रक्षांसि सनेम्यस्मद्युयवन्नमीवाः ॥७॥
वाजेवाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः ।
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥८॥
*śaṁ no bhavantu vājino haveṣu devatātā mitadravaḥ svarkāḥ ।*
*jambhayanto'hiṁ vṛkaṁ rakṣāṁsi sanemyasmadyuyavannamīvāḥ ॥7 ॥*
*vājevāje'vata vājino no dhaneṣu viprā amṛtā ṛtajñāḥ ।*
*asya madhvaḥ pibata mādayadhvaṁ tṛptā yāta pathibhirdevayānaiḥ ॥8 ॥*

४९. वायुः (Vāyuḥ) - ऋ. (Rv.) ७.९०.१-४; ७.९१.१; ३; ७.९२.१; ३-५; य. (Yv.) ७.७; २७.२३; २४; २७; २८; ३५; ३३.४४; ७०

ऋ. (Rv.) ७.९०.१-४

प्र वीरया शुचयो दद्रिरे वामध्वर्युभिर्मधुमन्तः सुतासः ।
वह वायो नियुतो याह्यच्छा पिबा सुतस्यान्धसो मदाय ॥१॥
ईशानाय प्रहुतिं यस्त आनट्छुचिं सोमं शुचिपास्तुभ्यं वायो ।
कृणोषि तं मर्त्येषु प्रशस्तं जातोजातो जायते वाज्यस्य ॥२॥
राये नु यं जज्ञतू रोदसीमे राये देवी धिषणा धाति देवम् ।
अध वायुं नियुतः सश्चत स्वा उत श्वेतं वसुधितिं निरेके ॥३॥
उच्छन्नुषसः सुदिना अरिप्रा उरु ज्योतिर्विविदुर्दीध्यानाः ।
गव्यं चिदूर्वमुशिजो वि वव्रुस्तेषामनु प्रदिवः सस्रुरापः ॥४॥
*pra vīrayā śuchayo dadrire vāmadhvaryubhirmadhumantaḥ sutāsaḥ ।*
*vaha vāyo niyuto yāhyachchhā pibā sutasyāndhaso madāya ॥1 ॥*
*īśānāya prahutiṁ yasta ānaṭchhuchiṁ somaṁ śuchipāstubhyaṁ vāyo ।*
*kṛṇoṣi taṁ martyeṣu praśastaṁ jātojāto jāyate vājyasya ॥2 ॥*
*rāye nu yaṁ jajñatū rodasīme rāye devī dhiṣaṇā dhāti devam ।*
*adha vāyuṁ niyutaḥ saśchata svā uta śvetaṁ vasudhitiṁ nireke ॥3 ॥*
*uchchhannuṣasaḥ sudinā ariprā uru jyotirvividurdīdhyānāḥ ।*
*gavyaṁ chidūrvamuśijo vi vavrusteṣāmanu pradivaḥ sasrurāpaḥ ॥4 ॥*

ऋ. (Rv.) ७.९१.१

कुविदंगः नमसा ये वृधासः पुरा देवा अनवद्यास आसन्।
ते वायवे मनवे बाधितायावासयन्नुषसं सूर्येण ॥१॥
*kuvidaṁgaḥ namasā ye vṛdhāsaḥ purā devā anavadyāsa āsan ।*
*te vāyave manave bādhitāyāvāsayannuṣasaṁ sūryeṇa ॥1 ॥*

ऋ. (Rv.) ७.९१.३

पीवोअन्नाँ रयिवृधः सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः ।
ते वायवे समनसो वि तस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः ॥३॥

*pīvoannām̐ rayivṛdhaḥ sumedhāḥ śvetaḥ siṣakti niyutāmabhiśrīḥ /*
*te vāyave samanaso vi tasthurviśvennaraḥ svapatyāni chakruḥ //3 //*

ऋ. (Rv.) ७.९२.१

आ वीयो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार ।
उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्व पेयम् ॥१॥
*ā vīyo bhūṣa śuchipā upa naḥ sahasraṁ te niyuto viśvavāra /*
*upo te andho madyamayāmi yasya deva dadhiṣe pūrva peyam //1 //*

ऋ. (Rv.) ७.९२.३-५

प्र याभिर्यासि दाश्वांसमच्छा नियुद्भिर्वायविष्टये दुरोणे ।
नि नो रयिं सुभेजसं युवस्व नि वीरं गव्यमश्व्यं च राधः ॥३॥
ये वायव इन्द्रमादनास आदेवासो नितोशनासो अर्यः ।
घ्नन्तो वृत्राणि सूरिभिः ष्याम सासह्वांसो युधा नृभिरमित्रान् ॥४॥
आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुप याहि यज्ञम् ।
वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥५॥
*pra yābhiryāsi dāśvāṁsamachchhā niyudbhirvāyaviṣṭaye duroṇe /*
*ni no rayiṁ subhejasaṁ yuvasva ni vīraṁ gavyamaśvyaṁ cha rādhaḥ //3 //*
*ye vāyava indramādanāsa ādevāso nitośanāso aryaḥ /*
*ghnanto vṛtrāṇi sūribhiḥ ṣyāma sāsahvāṁso yudhā nṛbhiramitrān //4 //*
*ā no niyudbhiḥ śatinībhiradhvaraṁ sahasriṇībhirupa yāhi yajñam /*
*vāyo asmintsavane mādayasva yūyaṁ pāta svastibhiḥ sadā naḥ //5 //*

य. (Yv.) ७.७

आ वायो भूष शुचिपाऽउप नः सहस्रं ते नियुतो विश्ववार ।
उपो तेऽअन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयं वायवे त्वा ॥७॥
*ā vāyo bhūṣa śuchipā'upa naḥ sahasraṁ te niyuto viśvavāra /*
*upo te'andho madyamayāmi yasya deva dadhiṣe pūrvapeyaṁ vāyave tvā //7 //*

य. (Yv.) २७.२३-२४

पीवोऽअन्ना रयिवृधः सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः ।
ते वायवे समनसो वि तस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः ॥२३॥
राये नु यं जज्ञतू रोदसीमे राये देवी धिषणा धाति देवम् ।
अध वायुं नियुतः सश्चत स्वाऽउत श्वेतं वसुधितिं निरेके ॥२४॥
*pīvo'annā rayivṛdhaḥ sumedhāḥ śvetaḥ siṣakti niyutāmabhiśrīḥ /*
*te vāyave samanaso vi tasthurviśvennaraḥ svapatyāni chakruḥ //23 //*
*rāye nu yaṁ jajñatū rodasīme rāye devī dhiṣaṇā dhāti devam /*
*adha vāyuṁ niyutaḥ saśchata svā'uta śvetaṁ vasudhitiṁ nireke //24 //*

य. (Yv.) २७.२७-२८

प्र याभिर्यासि दाश्वांसमच्छा नियुद्भिर्वायविष्टये दुरोणे ।
नि नो रयिं सुभोजसं युवस्व नि वीरं गव्यमश्व्यं च राधः ॥२७॥
आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुप याहि यज्ञम् ।
वायोऽअस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥२८॥
*pra yābhiryāsi dāśvāṁsamachchhā niyudbhirvāyaviṣṭaye duroṇe /*
*ni no rayiṁ subhojasaṁ yuvasva ni vīraṁ gavyamaśvyaṁ cha rādhaḥ //27 //*
*ā no niyudbhiḥ śatinībhiradhvaraṁ sahasriṇībhirupa yāhi yajñam /*
*vāyo'asmintsavane mādayasva yūyaṁ pāta svastibhiḥ sadā naḥ //28 //*

य. (Yv.) २७.३५

अभि त्वा शूर नोनुमोऽदुग्धाऽइव धेनवः । ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥३५॥
*abhi tvā śūra nonumo'dugdhā'iva dhenavaḥ / īśānamasya jagataḥ rsvdṛśamīśānamindra tasthuṣaḥ //35 //*

य. (Yv.) ३३.४४

प्र वावृजे सुप्रया बर्हिरेषामा विश्पतीव बीरिटऽइयाते ।

विशामक्तोरुषसः पूर्वहूतौ वायुः पूषा स्वस्तये नियुत्वान् ॥४४॥
*pra vāvṛje suprayā barhireṣāmā viśpatīva bīriṭa'iyāte I*
*viśāmaktoruṣasaḥ pūrvahūtau vāyuḥ pūṣā svastaye niyutvān ॥44॥*

य. (Yv.) ३३.७०

प्र वीरया शुचयो दद्रिरे वामध्वर्युभिर्मधुमन्तः सुतासः ।
वह वायो नियुतो याह्यच्छा पिबा सुतस्यान्धसो मदाय ॥७०॥
*pra vīrayā śuchayo dadrire vāmadhvaryubhirmadhumantaḥ sutāsaḥ I*
*vaha vāyo niyuto yāhyachchhā pibā sutasyāndhaso madāya ॥70॥*

५०. वायुः त्वष्टा (Vāyuḥ Tvaṣṭā) - अ. (Av.) ३.२०.१०

गोसनिं वाचमुदेयं वर्चसा माभ्युदिहि। आ रुन्धां सर्वतो वायुस्त्वष्टा पोषं दधातु मे ॥१०॥
*gosaniṁ vāchamudeyaṁ varchasā mābhyudihi I ā rundhāṁ sarvato vāyustvaṣṭā poṣaṁ dadhātu me ॥10॥*

५१. वास्तोष्पतिः (Vāstoṣpatiḥ) - ऋ. (Rv.) ७.५४.१-३; ७.५५.१

ऋ. (Rv.) ७.५४.१-३

वास्तोष्पते प्रति जानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः ।
यत्त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे ॥१॥
वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो ।
अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो जुषस्व ॥२॥
वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या ।
पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः ॥३॥
*vāstoṣpate prati jānīhyasmāntsvāveśo anamīvo bhavā naḥ I*
*yattvemahe prati tanno juṣasva śaṁ no bhava dvipade śaṁ chatuṣpade ॥1॥*
*vāstoṣpate prataraṇo na edhi gayasphāno gobhiraśvebhirindo I*
*ajarāsaste sakhye syāma piteva putrānprati no juṣasva ॥2॥*
*vāstoṣpate śagmayā saṁsadā te sakṣīmahi raṇvayā gātumatyā I*
*pāhi kṣema uta yoge varaṁ no yūyaṁ pāta svastibhiḥ sadā naḥ ॥3॥*

ऋ. (Rv.) ७.५५.१

अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन्। सखा सुशेव एधि नः ॥१॥
*amīvahā vāstoṣpate viśvā rūpāṇyāviśan I sakhā suśeva edhi naḥ ॥1॥*

५२. विदुषी (Viduṣī) - य. (Yv.) १५.६३

आयोष्ट्वा सदने सादयाम्यवतश्छायायां समुद्रस्य हृदये रश्मीवतीं भास्वतीमा या द्यां भास्या पृथिवीमोर्वन्तरिक्षम् ॥६३॥
*āyoṣṭvā sadane sādayāmyavataśchhāyāyāṁ samudrasya hṛdaye raśmīvatīṁ bhāsvatīmā yā dyāṁ bhāsyā pṛthivīmorvantarikṣam ॥63॥*

५३. विद्वांसः (Vidvāṁsaḥ) - य. (Yv.) ३३.१४

त्वेऽअग्ने स्वाहुत प्रियासः सन्तु सूरयः। यन्तारो ये मघवानो जनानामूर्वान्दयन्त गोनाम् ॥१४॥
*tve'agne svāhuta priyāsaḥ santu sūrayaḥ I yantāro ye maghavāno janānāmūrvāndayanta gonām ॥14॥*

५४. विश्वकर्मा (Viśvakarmā) - य. (Yv.) १७.७८

चित्तिं जुहोमि मनसा घृतेन यथा देवाऽइहागमन्वीतिहोत्राऽऋतावृधः ।
पत्ये विश्वस्य भूमनो जुहोमि विश्वकर्मणे विश्वाहा दाभ्यं हविः ॥७८॥
*chittiṁ juhomi manasā ghṛtena yathā devā'ihāgamanvītihotrā'ṛtāvṛdhaḥ I*
*patye viśvasya bhūmano juhomi viśvakarmaṇe viśvāhā dābhyaṁ haviḥ ॥78॥*

५५. विश्वानि भुवनानि (Viśvāni Bhuvanāni) - अ. (Av.) ३.२०.८

वाजस्य नु प्रसवे सं बभूविमेमा च विश्वा भुवनान्यन्तः ।
उतादित्सन्तं दापयतु प्रजानन् रयिं च नः सर्ववीरं नि यच्छ ॥८॥
*vājasya nu prasave saṁ babhūvimemā cha viśvā bhuvanānyantaḥ I*

*utāditsantaṁ dāpayatu prajānan rayiṁ cha naḥ rsavīraṁ ni yachchha ॥8॥*

५६. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) ७.३४.१-१५; १८-२५; ७.३५.१-१५; ७.३६.१-९; ७.३७.१-८; ७.३९.१-७; ७.४०.१-७; ७.४२.१-६; ७.४३.१-५; ७.५०.३; य. (Yv.) ८.५७-६१

ऋ. (Rv.) ७.३४.१-१५

प्र शुक्रैतु देवी मनीषा अस्मत्सुतष्टो रथो न वाजी ॥१॥
विदुः पृथिव्या दिवो जमित्रं शृण्वन्त्यापो अध क्षरन्तीः ॥२॥
आपश्चिदस्मै पिन्वन्त पृथ्वीर्वृत्रेषु शूरा मंसन्त उग्राः ॥३॥
आ धूर्ष्वस्मै दधाताश्वानिन्द्रो न वज्री हिरण्यबाहुः ॥४॥
अभि प्र स्थाताहेव यज्ञं यातेव पत्मन्तमना हिनोत ॥५॥
त्मना समत्सु हिनोत यज्ञं दधात केतुं जनाय वीरम् ॥६॥
उदस्य शुष्माद्भानुर्नार्त बिभर्ति भारं पृथिवी न भूम ॥७॥
ह्वयामि देवाँ अयातुरग्ने साधन्नृतेन धियं दधामि ॥८॥
अभि वो देवीं धियं दधिध्वं प्र वो देवत्रा वाचं कृणुध्वम् ॥९॥
आ चष्ट आसां पाथो नदीनां वरुण उग्रः सहस्रचक्षाः ॥१०॥
राजा राष्ट्रानां पेशो नदीनामनुत्तमस्मै क्षत्रं विश्वायु ॥११॥
अविष्टो अस्मान्विश्वासु विक्ष्वद्युं कृणोत शंसं निनित्सोः ॥१२॥
व्येतु दिद्युद् द्विषामशेवा युयोत विष्वग्रपस्तनूनाम् ॥१३॥
अवीन्नो अग्निर्हव्यान्नमोभिः प्रेष्ठो अस्मा अधायि स्तोमः ॥१४॥
सजूर्देवेभिरपां नपातं सखायं कृध्वं शिवो नो अस्तु ॥१५॥

*pra śukraitu devī manīṣā asmatsutaṣto ratho na vājī ॥1॥*
*viduḥ pṛthivyā divo jamitraṁ śṛṇvantyāpo adha kṣarantīḥ ॥2॥*
*āpaśchidasmai pinvanta pṛthvīrvṛtreṣu śūrā maṁsanta ugrāḥ ॥3॥*
*ā dhūrṣvasmai dadhātāśvānindro na vajrī hiraṇyabāhuḥ ॥4॥*
*abhi pra sthātāheva yajñaṁ yāteva patmantamanā hinota ॥5॥*
*tmanā samatsu hinota yajñaṁ dadhāta ketuṁ janāya vīram ॥6॥*
*udasya śuṣmādbhānurnārta bibharti bhāraṁ pṛthivī na bhūma ॥7॥*
*hvayāmi devām̐ ayāturagne sādhannṛtena dhiyaṁ dadhāmi ॥8॥*
*abhi vo devīṁ dhiyaṁ dadhidhvaṁ pra vo devatrā vāchaṁ kṛṇudhvam ॥9॥*
*ā chaṣṭa āsāṁ pātho nadīnāṁ varuṇa ugraḥ sahasrachakṣāḥ ॥10॥*
*rājā rāṣṭrānāṁ peśo nadīnāmanuttamasmai kṣatraṁ viśvāyu ॥11॥*
*aviṣṭo asmānviśvāsu vikṣavadyuṁ kṛṇota śaṁsaṁ ninitsoḥ ॥12॥*
*vyetu didyud dviṣāmaśevā yuyota viṣvagrapastanūnām ॥13॥*
*avīnno agnirhavyānnamobhiḥ preṣṭho asmā adhāyi stomaḥ ॥14॥*
*sajūrdevebhirapāṁ napātaṁ sakhāyaṁ kṛdhvaṁ śivo no astu ॥15॥*

ऋ. (Rv.) ७.३४.१८-२५

उत न एषु नृषु श्रवो धुः प्र राये यन्तु शर्धन्तो अर्यः ॥१८॥
तपन्ति शत्रुं स्व१र्ण भूमा महासेनासो अमेभिरेषाम् ॥१९॥
आ यन्नः पत्नीर्गमन्त्यच्छा त्वष्टा सुपाणिर्दधातु वीरान् ॥२०॥
प्रति नः स्तोमं त्वष्टा जुषेत स्यादस्मे अरमतिर्वसूयुः ॥२१॥
ता नो रासन्रातिषाचो वसून्या रोदसी वरुणानी शृणोतु ।
वरूत्रीभिः सुशरणो नो अस्तु त्वष्टा सुदत्रो वि दधातु रायः ॥२२॥
तन्नो रायः पर्वतास्तन्न आपस्तद्रातिषाच ओषधीरुत द्यौः ।
वनस्पतिभिः पृथिवी सजोषा उभे रोदसी परि पासतो नः ॥२३॥
अनु तदुर्वी रोदसी जिहातामनु द्युक्षो वरुण इन्द्रसखा ।
अनु विश्वे मरुतो ये सहासो रायः स्याम धरुणं धियध्यै ॥२४॥
तन्न इन्द्रो वरुणो मित्रो अग्निराप ओषधीर्वनिनो जुषन्त ।
शर्मन्त्स्याम मरुतामुपस्थे यूयं पात स्वस्तिभिः सदा नः ॥२५॥

*uta na eṣu nṛṣu śravo dhuḥ pra rāye yantu śardhanto aryaḥ ॥18॥*
*tapanti śatruṁ sva1rṇa bhūmā mahāsenāso amebhireṣām ॥19॥*

*ā yannaḥ patnīrgamantyachchhā tvaṣṭā supāṇirdadhātu vīrān ॥20॥*
*prati naḥ stomaṁ tvaṣṭā juṣeta syādasme aramatirvasūyuḥ ॥21॥*
*tā no rāsanrātiṣācho vasūnyā rodasī varuṇānī śṛṇotu ।*
*varūtrībhiḥ suśaraṇo no astu tvaṣṭā sudatro vi dadhātu rāyaḥ ॥22॥*
*tanno rāyaḥ parvatāstanna āpastadrātiṣācha oṣadhīruta dyauḥ ।*
*vanaspatibhiḥ pṛthivī sajoṣā ubhe rodasī pari pāsato naḥ ॥23॥*
*anu tadurvī rodasī jihātāmanu dyukṣo varuṇa indrasakhā ।*
*anu viśve maruto ye sahāso rāyaḥ syāma dharuṇaṁ dhiyadhyai ॥24॥*
*tanna indro varuṇo mitro agnirāpa oṣadhīrvanino juṣanta ।*
*śarmantsyāma marutāmupasthe yūyaṁ pāta svastibhiḥ sadā naḥ ॥25॥*

ऋ. (Rv.) ७.३५.१-१५

शं न इन्द्राग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या ।
शमिन्द्रासोमा सुविताय शं योः शं न इन्द्रापूषणा वाजसातौ ॥१॥
शं नो भगः शमु नः शंसो अस्तु शं नः पुरन्धिः शमु सन्तु रायः ।
शं नः सत्यस्य सुयमस्य शंसः शं नो अर्यमा पुरुजातो अस्तु ॥२॥
शं नो धाता शमु धर्ता नो अस्तु शं न उरूची भवतु स्वधाभिः ।
शं रोदसी बृहती शं नो अद्रिः शं नो देवानां सुहवानि सन्तु ॥३॥
शं नो अग्निर्ज्योतिरनीको अस्तु शं नो मित्रावरुणावश्विना शम् ।
शं नः सुकृतां सुकृतानि सन्तु शं न इषिरो अभि वातु वातः ॥४॥
शं नो द्यावापृथिवी पूर्वहूतौ शमन्तरिक्षं दृशये नो अस्तु ।
शं न ओषधीर्वनिनो भवन्तु शं नो रजसस्पतिरस्तु जिष्णुः ॥५॥
शं न इन्द्रो वसुभिर्देवो अस्तु शमादित्येभिर्वरुणः सुशंसः ।
शं नो रुद्रो रुद्रेभिर्जलाषः शं नस्त्वष्टा ग्नाभिरिह श्रृणोतु ॥६॥
शं नः सोमो भवतु ब्रह्म शं नः शं नो ग्रावाणः शमु सन्तु यज्ञाः ।
शं नः स्वरूणां मितयो भवन्तु शं नः प्रस्वः१ शम्वस्तु वेदिः ॥७॥
शं नः सूर्य उरुचक्षा उदेतु शं नश्चतस्रः प्रदिशो भवन्तु ।
शं नः पर्वता ध्रुवयो भवन्तु शं नः सिन्धवः शमु सन्त्वापः ॥८॥
शं नो अदितिर्भवतु व्रतेभिः शं नो भवन्तु मरुतः स्वर्काः ।
शं नो विष्णुः शमु पूषा नो अस्तु शं नो भवित्रं शम्वस्तु वायुः ॥९॥
शं नो देवः सविता त्रायमाणः शं नो भवन्तूषसो विभातीः ।
शं नः पर्जन्यो भवतु प्रजाभ्यः शं नः क्षेत्रस्य पतिरस्तु शम्भुः ॥१०॥
शं नो देवा विश्वदेवा भवन्तु शं सरस्वती सह धीभिरस्तु ।
शमभिषाचः शमु रातिषाचः शं नो दिव्याः पार्थिवाः शं नो अप्याः ॥११॥
शं नः सत्यस्य पतयो भवन्तु शं नो अर्वन्तः शमु सन्तु गावः ।
शं न ऋभवः सुकृतः सुहस्ताः शं नो भवन्तु पितरो हवेषु ॥१२॥
शं नो अज एकपाद्देवो अस्तु शं नोऽहिर्बुध्न्यः१ शं समुद्रः ।
शं नो अपां नपात्पेरुरस्तु शं नः पृश्निर्भवतु देवगोपा ॥१३॥
आदित्या रुद्रा वसवो जुषन्तेदं ब्रह्म क्रियमाणं नवीयः ।
श्रृण्वन्तु नो दिव्याः पार्थिवासो गोजाता उत ये यज्ञियासः ॥१४॥
ये देवानां यज्ञिया यज्ञियानां मनोर्यजत्रा अमृता ऋतज्ञाः ।
ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ॥१५॥

*śaṁ na indrāgnī bhavatāmavobhiḥ śaṁ na indrāvaruṇā rātahavyā ।*
*śamindrāsomā suvitāya śaṁ yoḥ śaṁ na indrāpūṣaṇā vājasātau ॥1॥*
*śaṁ no bhagaḥ śamu naḥ śaṁso astu śaṁ naḥ purandhiḥ śamu santu rāyaḥ ।*
*śaṁ naḥ satyasya suyamasya śaṁsaḥ śaṁ no aryamā purujāto astu ॥2॥*
*śaṁ no dhātā śamu dhartā no astu śaṁ na urūchī bhavatu svadhābhiḥ ।*
*śaṁ rodasī bṛhatī śaṁ no adriḥ śaṁ no devānāṁ suhavāni santu ॥3॥*
*śaṁ no agnirjyotiranīko astu śaṁ no mitrāvaruṇāvaśvinā śam ।*
*śaṁ naḥ sukṛtāṁ sukṛtāni santu śaṁ na iṣiro abhi vātu vātaḥ ॥4॥*
*śaṁ no dyāvāpṛthivī pūrvahūtau śamantarikṣaṁ dṛśaye no astu ।*

*śaṁ na oṣadhīrvanino bhavantu śaṁ no rajasaspatirastu jiṣṇuḥ ॥5॥*
*śaṁ na indro vasubhirdevo astu śamādityebhirvaruṇaḥ suśaṁsaḥ ।*
*śaṁ no rudro rudrebhirjalāṣaḥ śaṁ nastvaṣṭā gnābhiriha śṛṇotu ॥6॥*
*śaṁ naḥ somo bhavatu brahma śaṁ naḥ śaṁ no grāvāṇaḥ śamu santu yajñāḥ ।*
*śaṁ naḥ svarūṇāṁ mitayo bhavantu śaṁ naḥ prasvaḥ1 śaṁvastu vediḥ ॥7॥*
*śaṁ naḥ sūrya uruchakṣā udetu śaṁ naśchatasraḥ pradiśo bhavantu ।*
*śaṁ naḥ parvatā dhruvayo bhavantu śaṁ naḥ sindhavaḥ śamu santvāpaḥ ॥8॥*
*śaṁ no aditirbhavatu vratebhiḥ śaṁ no bhavantu marutaḥ svarkāḥ ।*
*śaṁ no viṣṇuḥ śamu pūṣā no astu śaṁ no bhavitraṁ śaṁvastu vāyuḥ ॥9॥*
*śaṁ no devaḥ savitā trāyamāṇaḥ śaṁ no bhavantūṣaso vibhātīḥ ।*
*śaṁ naḥ parjanyo bhavatu prajābhyaḥ śaṁ naḥ kṣetrasya patirastu śambhuḥ ॥10॥*
*śaṁ no devā viśvadevā bhavantu śaṁ sarasvatī saha dhībhirastu ।*
*śamabhiṣāchaḥ śamu rātiṣāchaḥ śaṁ no divyāḥ pārthivāḥ śaṁ no apyāḥ ॥11॥*
*śaṁ naḥ satyasya patayo bhavantu śaṁ no arvantaḥ śamu santu gāvaḥ ।*
*śaṁ na ṛbhavaḥ sukṛtaḥ suhastāḥ śaṁ no bhavantu pitaro haveṣu ॥12॥*
*śaṁ no aja ekapāddevo astu śaṁ no'hirbudhnyaḥ1 śaṁ samudraḥ ।*
*śaṁ no apāṁ napātperurastu śaṁ naḥ pṛśnirbhavatu devagopā ॥13॥*
*ādityā rudrā vasavo juṣantedaṁ brahma kriyamāṇaṁ navīyaḥ ।*
*śṛṇvantu no divyāḥ pārthivāso gojātā uta ye yajñiyāsaḥ ॥14॥*
*ye devānāṁ yajñiyā yajñiyānāṁ manoryajatrā amṛtā ṛtajñāḥ ।*
*te no rāsantāmurugāyamadya yūyaṁ pāta svastibhiḥ sadā naḥ ॥15॥*

ऋ. (Rv.) ७.३६.१-९

प्र ब्रह्मैतु सदनादृतस्य वि रश्मिभिः ससृजे सूर्यो गाः ।
वि सानुना पृथिवी सस्र उर्वी पृथु प्रतीकमध्येधे अग्निः ॥१॥
इमां वां मित्रावरुणा सुवृक्तिमिषं न कृण्वे असुरा नवीयः ।
इनो वामन्यः पदवीरदब्धो जनं च मित्रो यतति ब्रुवाणः ॥२॥
आ वातस्य ध्रजतो रन्त इत्या अपीपयन्त धेनवो न सूदाः ।
महो दिवः सदने जायमानोऽचिक्रदद् वृषभः सस्मिन्नूधन् ॥३॥
गिरा य एता युनजद्धरी त इन्द्र प्रिया सुरथा शूर धायू ।
प्र यो मन्युं रिरिक्षतो मिनात्या सुक्रतुमर्यमणं ववृत्याम् ॥४॥
यजन्ते अस्य सख्यं वयश्च नमस्विनः स्व ऋतस्य धामन् ।
वि पृक्षा बाबधे नृभिः स्तवान इदं नमो रुद्राय प्रेष्ठम् ॥५॥
आ यत्साकं यशसो वावशानाः सरस्वती सप्तथी सिन्धुमाता ।
याः सुष्वयन्त सुदुघाः सुधारा अभि स्वेन पयसा पीप्यानाः ॥६॥
उत त्ये नो मरुतो मन्दसाना धियं तोकं च वाजिनोऽवन्तु ।
मा नः परि ख्यदक्षरा चरन्त्यवीवृधन्युज्यं ते रयिं नः ॥७॥
प्र वो महीमरमतिं कृणुध्वं प्र पूषणं विदथ्यं१ न वीरम् ।
भगं धियोऽवितारं नो अस्याः सातौ वाजं रातिषाचं पुरन्धिम् ॥८॥
अच्छायं वो मरुतः श्लोक एत्वच्छा विष्णुं निषिक्तपामवोभिः ।
उत प्रजायै गृणते वयो धुर्यूयं पात स्वस्तिभिः सदा नः ॥९॥

*pra brahmaitu sadanādṛtasya vi raśmibhiḥ sasṛje sūryo gāḥ ।*
*vi sānunā pṛthivī sasra urvī pṛthu pratīkamadhyedhe agniḥ ॥1॥*
*imāṁ vāṁ mitrāvaruṇā suvṛktimiṣaṁ na kṛṇve asurā navīyaḥ ।*
*ino vāmanyaḥ padavīradabdho janaṁ cha mitro yatati bruvāṇaḥ ॥2॥*
*ā vātasya dhrajato ranta ityā apīpayanta dhenavo na sūdāḥ ।*
*maho divaḥ sadane jāyamāno'chikradad vṛṣabhaḥ sasminnūdhan ॥3॥*
*girā ya etā yunajaddharī ta indra priyā surathā śūra dhāyū ।*
*pra yo manyuṁ ririkṣato minātyā sukratumaryamaṇaṁ vavṛtyām ॥4॥*
*yajante asya sakhyaṁ vayaścha namasvinaḥ sva ṛtasya dhāman ।*
*vi pṛkṣā bābadhe nṛbhiḥ stavāna idaṁ namo rudrāya preṣṭham ॥5॥*
*ā yatsākaṁ yaśaso vāvaśānāḥ sarasvatī saptathī sindhumātā ।*
*yāḥ suṣvayanta sudughāḥ sudhārā abhi svena payasā pīpyānāḥ ॥6॥*

*uta tye no maruto mandasānā dhiyaṁ tokaṁ cha vājino'vantu |*
*mā naḥ pari khyadakṣarā charantyavīvṛdhanyujyaṁ te rayiṁ naḥ ||7 ||*
*pra vo mahīmaramatiṁ kṛṇudhvaṁ pra pūṣaṇaṁ vidathyaṁ1 na vīram |*
*bhagaṁ dhiyo'vitāraṁ no asyāḥ sātau vājaṁ rātiṣāchaṁ purandhim ||8 ||*
*achchhāyaṁ vo marutaḥ śloka etvachchhā viṣṇuṁ niṣiktapāmavobhiḥ |*
*uta prajāyai gṛṇate vayo dhuryūyaṁ pāta svastibhiḥ sadā naḥ ||9 ||*

ऋ. (Rv.) ७.३७.१-८

आ वो वाहिष्ठो वहतु स्तवध्यै रथो वाजा ऋभुक्षणो अमृक्तः ।
अभि त्रिपृष्ठैः सवनेषु सोमैर्मदे सुशिप्रा महभिः पृणध्वम् ॥१॥
यूयं ह रत्नं मघवत्सु धत्थ स्वर्दृश ऋभुक्षणो अमृक्तम् ।
सं यज्ञेषु स्वधावन्तः पिबध्वं वि नो राधांसि मतिभिर्दयध्वम् ॥२॥
उवोचिथ हि मघवन्देष्णं महो अर्भस्य वसुनो विभागे ।
उभा ते पूर्णा वसुना गभस्ती न सूनृता नि यमते वसव्या ॥३॥
त्वमिन्द्र स्वयशा ऋभुक्षा वाजो न साधुरस्तमेष्यृक्वा ।
वयं नु ते दाश्वांसः स्याम ब्रह्म कृण्वन्तो हरिवो वसिष्ठाः ॥४॥
सनितासि प्रवतो दाशुषे चिद्याभिर्विवेषो हर्यश्व धीभिः ।
ववन्मा नु ते युज्याभिरूती कदा न इन्द्र राय आ दशस्येः ॥५॥
वासयसीव वेधसस्त्वं नः कदा न इन्द्र वचसो बुबोधः ।
अस्तं तात्या धिया रयिं सुवीरं पृक्षो नो अर्वा न्युहीत वाजी ॥६॥
अभि यं देवी निरृर्तिश्चिदीशे नक्षन्त इन्द्रं शरदः सुपृक्षः ।
उप त्रिबन्धुर्जरदष्टिमेत्यस्ववेशं यं कृणवन्त मर्ताः ॥७॥
आ नो राधांसि सवितः स्तवध्या आ रायो यन्तु पर्वतस्य रातौ ।
सदा नो दिव्यः पायुः सिषक्तु यूयं पात स्वस्तिभिः सदा नः ॥८॥
*ā vo vāhiṣṭho vahatu stavadhyai ratho vājā ṛbhukṣaṇo amṛktaḥ |*
*abhi tripṛṣṭhaiḥ savaneṣu somairmade suśiprā mahabhiḥ pṛṇadhvam ||1 ||*
*yūyaṁ ha ratnaṁ maghavatsu dhattha svardṛśa ṛbhukṣaṇo amṛktam |*
*saṁ yajñeṣu svadhāvantaḥ pibadhvaṁ vi no rādhāṁsi matibhirdayadhvam ||2 ||*
*uvochitha hi maghavandeṣṇaṁ maho arbhasya vasuno vibhāge |*
*ubhā te pūrṇā vasunā gabhastī na sūnṛtā ni yamate vasavyā ||3 ||*
*tvamindra svayaśā ṛbhṛkṣā vājo na sādhurastameṣyṛkvā |*
*vayaṁ nu te dāśvāṁsaḥ syāma brahma kṛṇvanto harivo vasiṣṭhāḥ ||4 ||*
*sanitāsi pravato dāśuṣe chidyābhirviveṣo haryaśva dhībhiḥ |*
*vavanmā nu te yujyābhirūtī kadā na indra rāya ā daśasyeḥ ||5 ||*
*vāsayasīva vedhasastvaṁ naḥ kadā na indra vachaso bubodhaḥ |*
*astaṁ tātyā dhiyā rayiṁ suvīraṁ pṛkṣo no arvā nyuhīta vājī ||6 ||*
*abhi yaṁ devī nirṛtiśchidīśe nakṣanta indraṁ śaradaḥ supṛkṣaḥ |*
*upa tribandhurjaradaṣṭimetyasvaveśaṁ yaṁ kṛṇavanta martāḥ ||7 ||*
*ā no rādhāṁsi savitaḥ stavadhyā ā rāyo yantu parvatasya rātau |*
*sadā no divyaḥ pāyuḥ siṣaktu yūyaṁ pāta svastibhiḥ sadā naḥ ||8 ||*

ऋ. (Rv.) ७.३९.१-७

ऊर्ध्वो अग्निः सुमतिं वस्वो अश्रेत्प्रतीची जूर्णिर्देवतातिमेति ।
भेजाते अद्री रथ्येव पन्थामृतं होता न इषितो यजाति ॥१॥
प्र वावृजे सुप्रया बर्हिरेषामा विश्पतीव बीरिट इयाते ।
विशामक्तोरुषसः पूर्वहूतौ वायुः पूषा स्वस्तये नियुत्वान् ॥२॥
ज्मया अत्र वसवो रन्त देवा उरावन्तरिक्षे मर्जयन्त शुभ्राः ।
अर्वाक् पथ उरुज्रयः कृणुध्वं श्रोता दूतस्य जग्मुषो नो अस्य ॥३॥
ते हि यज्ञेषु यज्ञियास ऊमाः सधस्थं विश्वे अभि सन्ति देवाः ।
ताँ अध्वर उशतो यक्ष्यग्ने श्रुष्टी भगं नासत्या पुरन्धिम् ॥४॥
आग्ने गिरो दिव आ पृथिव्या मित्रं वह वरुणमिन्द्रमग्निम् ।
आर्यमणमदितिं विष्णुमेषां सरस्वती मरुतो मादयन्ताम् ॥५॥

रे हव्यं मतिभिर्यज्ञियानां नक्षत्कामं मर्त्यानामसिन्वन् ।
धाता रयिमविदस्यं सदासां सक्षीमहि युज्येभिर्नु देवैः ॥६॥
नू रोदसी अभिष्टुते वसिष्ठैर्ऋतावानो वरुणो मित्रो अग्निः ।
यच्छन्तु चन्द्रा उपमं नो अर्कं यूयं पात स्वस्तिभिः सदा नः ॥७॥
*ūrdhvo agniḥ sumatiṁ vasvo aśretpratīchī jūrṇirdevatātimeti ।*
*bhejāte adrī rathyeva panthāmṛtaṁ hotā na iṣito yajāti ॥1॥*
*pra vāvṛje suprayā barhireṣāmā viśpatīva bīriṭa iyāte ।*
*viśāmaktoruṣasaḥ pūrvahūtau vāyuḥ pūṣā svastaye niyutvān ॥2॥*
*jmayā atra vasavo ranta devā urāvantarikṣe marjayanta śubhrāḥ ।*
*arvāk patha urujrayaḥ kṛṇudhvaṁ śrotā dūtasya jagmuṣo no asya ॥3॥*
*te hi yajñeṣu yajñiyāsa ūmāḥ sadhasthaṁ viśve abhi santi devāḥ ।*
*tāṁ̐ adhvara uśato yakṣayagne śruṣṭī bhagaṁ nāsatyā purandhim ॥4॥*
*āgne giro diva ā pṛthivyā mitraṁ vaha varuṇamindramagnim ।*
*āryamaṇamaditiṁ viṣṇumeṣāṁ sarasvatī maruto mādayantām ॥5॥*
*rare havyaṁ matibhiryajñiyānāṁ nakṣatkāmaṁ martyānāmasinvan ।*
*dhātā rayimavidasyaṁ sadāsāṁ sakṣīmahi yujyebhirnu devaiḥ ॥6॥*
*nū rodasī abhiṣṭute vasiṣṭhairṛtāvāno varuṇo mitro agniḥ ।*
*yachchhantu chandrā upamaṁ no arkaṁ yūyaṁ pāta svastibhiḥ sadā naḥ ॥7॥*

ऋ. (Rv.) ७.४०.१-७

ओ श्रुष्टिर्विदथ्या३ समेतु प्रति स्तोमं दधीमहि तुराणाम् ।
यदद्य देवः सविता सुवाति स्यामास्य रत्निनो विभागे ॥१॥
मित्रस्तन्नो वरुणो रोदसी च द्युभक्तमिन्द्रो अर्यमा ददातु ।
दिदेष्टु देव्यदिति रेक्णो वायुश्च यन्नियुवैते भगश्च ॥२॥
सेदुग्रो अस्तु मरुतः स शुष्मी ये मर्त्यं पृषदश्वा अवाथ ।
उतेमग्निः सरस्वती जुनन्ति न तस्य रायः पर्येतास्ति ॥३॥
अयं हि नेता वरुण ऋतस्य मित्रो राजानो अर्यमापो धुः ।
सुहवा देव्यदितिरनर्वा ते नो अंहो अति पर्षन्नरिष्टान् ॥४॥
अस्य देवस्य मीळ्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः ।
विदे हि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विनाविरावत् ॥५॥
मात्र पूषन्नाधृण इरस्यो वरूत्री यद्रातिषाचश्च रासन् ।
मयोभुवो नो अर्वन्तो नि पान्तु वृष्टिं परिज्मा वातो ददातु ॥६॥
नू रोदसी अभिष्टुते वसिष्ठैर्ऋतावानो वरुणो मित्रो अग्निः ।
यच्छन्तु चन्द्रा उपमे नो अर्कं यूयं पात स्वस्तिभिः सदा नः ॥७॥
*o śruṣṭirvidathyā3 sametu prati stomaṁ dadhīmahi turāṇām ।*
*yadadya devaḥ savitā suvāti syāmāsya ratnino vibhāge ॥1॥*
*mitrastanno varuṇo rodasī cha dyubhaktamindro aryamā dadātu ।*
*dideṣṭu devyaditi rekṇo vāyuścha yanniyuvaite bhagaścha ॥2॥*
*sedugro astu marutaḥ sa śuṣmī ye martyaṁ pṛṣadaśvā avātha ।*
*utemagniḥ sarasvatī junanti na tasya rāyaḥ paryetāsti ॥3॥*
*ayaṁ hi netā varuṇa ṛtasya mitro rājāno aryamāpo dhuḥ ।*
*suhavā devyaditiranarvā te no aṁho ati parṣannariṣṭān ॥4॥*
*asya devasya mīḻahuṣo vayā viṣṇoreṣasya prabhṛthe havirbhiḥ ।*
*vide hi rudro rudriyaṁ mahitvaṁ yāsiṣṭaṁ vartiraśvināvirāvat ॥5॥*
*mātra pūṣannādhṛṇa irasyo varūtrī yadrātiṣāchaścha rāsan ।*
*mayobhuvo no arvanto ni pāntu vṛṣṭiṁ parijmā vāto dadātu ॥6॥*
*nū rodasī abhiṣṭute vasiṣṭhairṛtāvāno varuṇo mitro agniḥ ।*
*yachchhantu chandrā upame no arkaṁ yūyaṁ pāta svastibhiḥ sadā naḥ ॥7॥*

ऋ. (Rv.) ७.४२.१-६

प्र ब्रह्मणो अंगिरसो नक्षन्त प्र क्रन्दनुर्नभन्यस्य वेतु ।
प्र धेनव उदप्रुतो नवन्त युज्यातामद्री अध्वरस्य पेशः ॥१॥
सुगस्ते अग्ने सनवित्तो अध्वा युङ्क्ष्व सुते हरितो रोहितश्च ।

ये वा सद्मन्नरुषा वीरवाहो हुवे देवानां जनिमानि सत्तः ॥२॥
समु वो यज्ञं महयन्नमोभिः प्र होता मन्द्रो रिरिच उपाके ।
यजस्व सु पुर्वणीक देवाना यज्ञियामरमतिं ववृत्याः ॥३॥
यदा वीरस्य रेवतो दुरोणे स्योनशीरतिथिराचिकेतत् ।
सुप्रीतो अग्निः सुधितो दम आ स विशे दाति वार्यमियत्यै ॥४॥
इमं नो अग्ने अध्वरं जुषस्व मरुत्स्विन्द्रे यशसं कृधी नः ।
आ नक्ता बर्हिः सदतामुषासोशन्ता मित्रावरुणा यजेह ॥५॥
एवाग्निं सहस्यं१ वसिष्ठो रायस्कामो विश्वप्स्न्यस्य स्तौत् ।
इषं रयिं पप्रथद्वाजमस्मे यूयं पात स्वस्तिभिः सदा नः ॥६॥

*pra brahmaṇo aṁgiraso nakṣanta pra krandanurnabhanyasya vetu /*
*pra dhenava udapruto navanta yujyātāmadrī adhvarasya peśaḥ //1 //*
*sugaste agne sanavitto adhvā yuṅkṣava sute harito rohitaścha /*
*ye vā sadmannaruṣā vīravāho huve devānāṁ janimāni sattaḥ //2 //*
*samu vo yajñaṁ mahayannamobhiḥ pra hotā mandro ririca upāke /*
*yajasva su purvaṇīka devānā yajñiyāmaramatiṁ vavṛtyāḥ //3 //*
*yadā vīrasya revato duroṇe syonaśīratithirāchiketat /*
*suprīto agniḥ sudhito dama ā sa viśe dāti vāryamiyatyai //4 //*
*imaṁ no agne adhvaraṁ juṣasva marustivandre yaśasaṁ kṛdhī naḥ /*
*ā naktā barhiḥ sadatāmuṣāsośantā mitrāvaruṇā yajeha //5 //*
*evāgiṁna sahasyaṁ1 vasiṣṭho rāyaskāmo viśvapsnyasya staut /*
*iṣaṁ rayiṁ paprathadvājamasme yūyaṁ pāta svastibhiḥ sadā naḥ //6 //*

ऋ. (Rv.) ७.४३.१-५

प्र वो यज्ञेषु देवयन्तो अर्चन्द्यावा नमोभिः पृथिवी इषध्यै ।
येषां ब्रह्माण्यस्मानि विप्रा विष्वग्वियन्ति वनिनो न शाखाः ॥१॥
प्र यज्ञ एतुं हेत्वो न सप्तिरुद्यच्छध्वं समनसो घृताचीः ।
स्तृणीत बर्हिरध्वराय साधूर्ध्वा शोचींषि देवयून्यस्थुः ॥२॥
आ पुत्रासो न मातरं विभृत्राः सानौ देवासो बर्हिषः सदन्तु ।
आ विश्वची विदथ्यामनक्त्वग्ने मा नो देवताता मृधस्कः ॥३॥
ते सीषपन्त जोषमा यजत्रा ऋतस्य धाराः सुदुघा दुहानाः ।
ज्येष्ठं वो अद्य मह आ वसूनामा गन्तन समनसो यति ष्ठ ॥४॥
एवा नो अग्ने विक्ष्वा दशस्य त्वया वयं सहसावन्नास्क्राः ।
राया युजा सधमादो अरिष्टा यूयं पात स्वस्तिभिः सदा नः ॥५॥

*pra vo yajñeṣu devayanto archandyāvā namobhiḥ pṛthivī iṣadhyai /*
*yeṣāṁ brahmāṇyasmāni viprā viṣvanviyanti vanino na śākhāḥ //1 //*
*pra yajña etuṁ hetvo na saptirudyachchhadhvaṁ samanaso ghṛtāchīḥ /*
*stṛṇīta barhiradhvarāya sādhūrdhvā śochīṁṣi devayūnyasthuḥ //2 //*
*ā putrāso na mātaraṁ vibhṛtrāḥ sānau devāso barhiṣaḥ sadantu /*
*ā viśvachī vidathyāmanaktvagne mā no devatātā mṛdhaskaḥ //3 //*
*te sīṣapanta joṣamā yajatrā ṛtasya dhārāḥ sudughā duhānāḥ /*
*jyeṣṭhaṁ vo adya maha ā vasūnāmā gantana samanaso yati ṣṭha //4 //*
*evā no agne vikṣavā daśasya tvayā vayaṁ sahasāvannāskrāḥ /*
*rāyā yujā sadhamādo ariṣṭā yūyaṁ pāta svastibhiḥ sadā naḥ //5 //*

ऋ. (Rv.) ७.५०.३

यच्छल्मलौ भवति यन्नदीषु यदोषधीभ्यः परि जायते विषम् ।
विश्वे देवा निरितस्तत्सुवन्तु मा मां पद्येन रपसा विदत्त्सरुः ॥३॥

*yachchhalmalau bhavati yannadīṣu yadoṣadhībhyaḥ pari jāyate viṣam /*
*viśve devā niritastatsuvantu mā māṁ padyena rapasā vidattsaruḥ //3 //*

य. (Yv.) ८.५७-६१

विश्वे देवाऽअंशुषु न्युप्तो विष्णुराप्रीतपाऽआप्याय्यमानो यमः सूयमानो विष्णुः सम्भ्रियमाणो वायुः पूयमानः शुक्रः पूतः।
शुक्रः क्षीरश्रीर्मन्थी सक्तुश्रीः ॥५७॥

विश्वे देवाश्चमसेषून्नीतोऽसुर्होमायोद्यतो रुद्रो हूयमानो वातोऽभ्यावृतो नृचक्षाः प्रतिख्यातो भक्षो भक्ष्यमाणः पितरो नारशंसाः ॥५८॥
सन्नः सिन्धुरवभृथायोद्यतः समुद्रोऽभ्यवह्रियमाणः सलिः प्रप्लुतो ययोरोजसा स्कभिता रजांसि वीर्येभिर्वीरतमा शविष्ठा। या पत्येतेऽअप्रतीता सहोभिर्विष्णूऽअगन्वरुणा पूर्वहूतौ ॥५९॥
देवान् दिवमगन्यज्ञस्ततो मा द्रविणमष्टु मनुष्यानन्तरिक्षमगन्यज्ञस्ततो मा द्रविणमष्टु पितृन् पृथिवीमगन्यज्ञस्ततो मा द्रविणमष्टु यं कं च लोकमगन्यज्ञस्ततो मे भद्रमभूत् ॥६०॥
चतुस्त्रिंशत्तन्तवो ये वितत्निरे यऽइमं यज्ञं स्वधया ददन्ते । तेषां छिन्नं सम्वेतद्दधामि स्वाहा घर्मोऽअप्येतु देवान् ॥६१॥
*viśve devā'aṁśuṣu nyupto viṣṇurāprītapā'āpyāyyamāno yamaḥ sūyamāno viṣṇuḥ sambhriyamāṇo vāyuḥ pūyamānaḥ śukraḥ pūtaḥ । śukraḥ kṣīraśrīrmanthī saktuśrīḥ ॥57॥*
*viśve devāśchamaseṣūnnīto'surhomāyodyato rudro hūyamāno vāto'bhyāvṛto nṛchakṣāḥ pratikhyāto bhakṣo bhakṣayamāṇaḥ pitaro nāraśaṁsāḥ ॥58॥*
*sannaḥ sindhuravabhṛthāyodyataḥ samudro'bhyavahriyamāṇaḥ saliḥ prapluto yayorojasā skabhitā rajāṁsi vīryebhirvīratamā śaviṣṭhā । yā patyete'apratītā sahobhirviṣṇū'aganvaruṇā pūrvahūtau ॥59॥*
*devān divamaganyajñastato mā draviṇamaṣṭu manuṣyānantarikṣamaganyajñastato mā draviṇamaṣṭu pitṛn pṛthivīmaganyajñastato mā draviṇamaṣṭu yaṁ kaṁ cha lokamaganyajñastato me bhadramabhūt ॥60॥*
*chatustriṁśattantavo ye vitatnire ya'imaṁ yajñaṁ svadhayā dadante । teṣāṁ chhinnaṁ saṁvetaddadhāmi svāhā gharmo'apyetu devān ॥61॥*

५७. विश्वेदेवाः गृहस्थाः (Viśvedevāḥ Gṛhasthāḥ) - य. (Yv.) ८.५६

प्रोह्यमाणः सोम आगतो वरुण आसन्द्यामासन्नो ऽग्निराग्निध्र इन्द्रो हविर्धाने ऽथर्वोपावह्रियमाणः ॥५६॥
*prohyamāṇaḥ soma āgato varuṇa āsandyāmāsanno 'gnirāgnidhra indro havirdhāne 'tharvopāvahriyamāṇaḥ ॥56॥*

५८. विश्वेदेवाः इन्द्रः (Viśvedevāḥ Indraḥ) - अ. (Av.) ३.१९.१-८

संशितं म इदं ब्रह्म संशितं वीर्यं१ बलम्।
संशितं क्षत्रमजरमस्तु जिष्णु येषामस्मि पुरोहितः ॥१॥
समहमेषां राष्ट्रं स्यामि समोजो वीर्यं१ बलम्। वृश्चामि शत्रूणां बाहूननेन हविषाहम् ॥२॥
नीचैः पद्यन्तामधरे भवन्तु ये नः सूरिं मघवानं पृतन्यान् ।
क्षिणामि ब्रह्मणामित्रानुन्नयामि स्वानहम् ॥३।
तीक्ष्णीयांसः परशोरग्नेस्तीक्ष्णतरा उत। इन्द्रस्य वज्रात् तीक्ष्णीयांसो येषामस्मि पुरोहितः ॥४॥
एषामहमायुधा सं श्याम्येषां राष्ट्रं सुवीरं वर्धयामि ।
एषां क्षत्रमजरमस्तु जिष्णवे३षां चित्तं विश्वेऽवन्तु देवाः ॥५॥
उद्धर्षन्तां मघवन् वाजिनान्युद् वीराणां जयतामेतु घोषः ।
पृथग् घोषा उलुलयः केतुमन्त उदीरताम्। देवा इन्द्रजयेष्ठा मरुतो यन्तु सेनया ॥६॥
प्रेता जयता नर उग्रा वः सन्तु बाहवः। तीक्ष्णेषवोबलधन्वनो हतोग्रायुधा अबलानुग्रबाहवः॥७॥
अवसृष्टा परा पत शरव्ये ब्रह्मसंशिते।
जयामित्रान् प्र पद्यस्व जह्येषां वरंवरं मामीषां मोचि कश्चन ॥८॥
*saṁśitaṁ ma idaṁ brahma saṁśitaṁ vīryaṁ1 balam ।*
*saṁśitaṁ kṣatramajaramastu jiṣṇu yeṣāmasmi purohitaḥ ॥1॥*
*samahameṣāṁ rāṣṭraṁ syāmi samojo vīryaṁ1 balam । vṛśchāmi śatrūṇāṁ bāhūnanena haviṣāham ॥2॥*
*nīchaiḥ padyantāmadhare bhavantu ye naḥ sūriṁ maghavānaṁ pṛtanyān ।*
*kṣiṇāmi brahmaṇāmitrānunnayāmi svānaham ॥3।*
*tīkṣaṇīyāṁsaḥ paraśoragnestīkṣaṇatarā uta । indrasya vajrāt tīkṣaṇīyāṁso yeṣāmasmi purohitaḥ ॥4॥*
*eṣāmahamāyudhā saṁ śyāmyeṣāṁ rāṣṭraṁ suvīraṁ vardhayāmi ।*
*eṣāṁ kṣatramajaramastu jiṣṇve3ṣāṁ chittaṁ viśve'vantu devāḥ ॥5॥*
*uddharṣantāṁ maghavan vājinānyud vīrāṇāṁ jayatāmetu ghoṣaḥ ।*
*pṛthag ghoṣā ululayaḥ ketumanta udīratām । devā indrajayeṣṭhā maruto yantu senayā ॥6॥*
*pretā jayatā nara ugrā vaḥ santu bāhavaḥ । tīkṣaṇeṣavobaladhanvano hatogrāyudhā*

*abalānugrabāhavaḥ //7 //*
*avasṛṣṭā parā pata śaravye brahmasaṁśite /*
*jayāmitrān pra padyasva jahyeṣāṁ varaṁvaraṁ māmīṣāṁ mochi kaśchana //8 //*

५९. विश्वेदेवाः बृहस्पतिः वर्चः (Viśvedevāḥ Bṛhaspatiḥ Varchaḥ) - अ. (Av.) ३.२२.१-६

हस्तिवर्चसं प्रथतां बृहद् यशो अदित्या यत् तन्वः संबभूव ।
तत् सर्वे समदुर्मह्यमेतद् विश्वे देवा अदितिः सजोषाः ॥१॥
मित्रश्च वरुणश्चेन्द्रो रुद्रश्च चेततु। देवासो विश्वधायसस्ते मांजन्तु वर्चसा ॥२॥
येन हस्ती वर्चसा संबभूव येन राजा मनुष्येष्वप्स्व१न्तः ।
येन देवा देवतामग्र आयन् तेन मामद्य वर्चसाग्ने वर्चस्विनं कृणु ॥३॥
यत् ते वर्चो जातवेदो बृहद् भवत्याहुतेः ।
यावत् सूर्यस्य वर्च आसुरस्य च हस्तिनः। तावन्मे अश्विना वर्च आ धत्तां पुष्करस्रजा ॥४॥
यावच्चतस्रः प्रदिशश्चक्षुर्यावत् समश्नुते। तावत् समैत्विन्द्रियं मयि तद्धस्तिवर्चसम् ॥५॥
हस्ती मृगाणां सुषदामतिष्ठावान् बभूव हि। तस्य भगेन बर्चसाऽभि षिंचामि मामहम् ॥६॥

*hastivarchasaṁ prathatāṁ bṛhad yaśo adityā yat tanvaḥ saṁbabhūva /*
*tat sarve samadurmahyametad viśve devā aditiḥ sajoṣāḥ //1 //*
*mitraścha varuṇaśchendro rudraścha chetatu /*
*devāso viśvaghāyasaste māṁjantu varchasā //2 //*
*yena hastī varchasā saṁbabhūva yena rājā manuṣyeṣvapsva1ntaḥ /*
*yena devā devatāmagra āyan tena māmadya varchasāgne varchasvinaṁ kṛṇu //3 //*
*yat te varcho jātavedo bṛhad bhavatyāhuteḥ /*
*yāvat sūryasya varcha āsurasya cha hastinaḥ /*
*tāvanme aśvinā varcha ā dhattāṁ puṣkarasrajā //4 //*
*yāvachchatasraḥ pradiśaśchakṣuryāvat samaśnute /*
*tāvat samaitvindriyaṁ mayi taddhastivarchasam //5 //*
*hastī mṛgāṇāṁ suṣadāmatiṣṭhāvān babhūva hi /*
*tasya bhagena barchasā'bhi ṣiṁchāmi māmaham //6 //*

६०. विष्णुः (Viṣṇuḥ) - ऋ. (Rv.) ७.९९.१-३; ७; ७.१००.१-७

ऋ. (Rv.) ७.९९.१-३

परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति ।
उभे ते विद्म रजसी पृथिव्या विष्णो देव त्वं परमस्य वित्से ॥१॥
न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमाप ।
उदस्तभ्ना नाकमृष्वं बृहन्तं दाधर्थ प्राचीं ककुभं पृथिव्याः ॥२॥
इरावती धेनुमती हि भूतं सूयवसिनी मनुषे दशस्या ।
व्यस्तभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः ॥३॥

*paro mātrayā tanvā vṛdhāna na te mahitvamanvaśnuvanti /*
*ubhe te vidma rajasī pṛthivyā viṣṇo deva tvaṁ paramasya vitse //1 //*
*na te viṣṇo jāyamāno na jāto deva mahimnaḥ paramantamāpa /*
*udastabhnā nākamṛṣvaṁ bṛhantaṁ dādhartha prāchīṁ kakubhaṁ pṛthivyāḥ //2 //*
*irāvatī dhenumatī hi bhūtaṁ sūyavasinī manuṣe daśasyā /*
*vyastabhnā rodasī viṣṇavete dādhartha pṛthivīmabhito mayūkhaiḥ //3 //*

ऋ. (Rv.) ७.९९.७

वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥७॥

*vaṣaṭ te viṣṇavāsa ā kṛṇomi tanme juṣasva śipiviṣṭa havyam /*
*vardhantu tvā suṣṭutayo giro me yūyaṁ pāta svastibhiḥ sadā naḥ //7 //*

ऋ. (Rv.) ७.१००.१-७

नू मर्तो दयते सनिष्यन्यो विष्णव उरुगायाय दाशत् ।
प्र यः सत्राचा मनसा यजात एतावन्त नर्यमाविवासात् ॥१॥
त्वं विष्णो सुमतिं विश्वजन्यामप्रयुतामेवयावो मतिं दाः ।

पर्चो यथा नः सुवितस्य भूरेरश्वावतः पुरुश्चन्द्रस्य रायः ॥२॥
त्रिर्देवः पृथिवीमेष एतां वि चक्रमे शतर्चसं महित्वा ।
प्र विष्णुरस्तु तवसस्तवीयान्त्वेषं ह्यस्य स्थविरस्य नाम ॥३॥
वि चक्रमे पृथिवीमेष एतां क्षेत्राय विष्णुर्मनुषे दशस्यन् ।
ध्रुवासो अस्य कीरयो जनास उरुक्षितिं सुजनिमा चकार ॥४॥
प्र तत्ते अद्य शिपिविष्ट नामार्यः शंसामि वयुनानि विद्वान् ।
तं त्वा गृणामि तवसमतव्यान्क्षयन्तमस्य रजसः पराके ॥५॥
किमित्ते विष्णो परिचक्ष्यं भूत्प्र यद्ववक्षे शिपिविष्टो अस्मि ।
मा वर्षो अस्मदप गूह एतद्यदन्यरूपः समिथे बभूथ ॥६॥
वषट् ते विष्णवास आ कृणोभि तन्मे जुषस्व शिपिविष्ट हव्यम् ।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥७॥
*nū marto dayate saniṣyanyo viṣṇava urugāyāya dāśat /*
*pra yaḥ satrāchā manasā yajāta etāvanta naryamāvivāsāt //1 //*
*tvaṁ viṣṇo sumatiṁ viśvajanyāmaprayutāmevayāvo matiṁ dāḥ /*
*parcho yathā naḥ suvitasya bhūreraśvāvataḥ puruśchandrasya rāyaḥ //2 //*
*trirdevaḥ pṛthivīmeṣa etāṁ vi chakrame śatarchasaṁ mahitvā /*
*pra viṣṇurastu tavasastavīyāntveṣaṁ hyasya sthavirasya nāma //3 //*
*vi chakrame pṛthivīmeṣa etāṁ kṣetrāya viṣṇurmanuṣe daśasyan /*
*dhruvāso asya kīrayo janāsa urukṣitiṁ sujanimā chakāra //4 //*
*pra tatte adya śipiviṣṭa nāmāryaḥ śaṁsāmi vayunāni vidvān /*
*taṁ tvā gṛṇāmi tavasamatavyānkṣayantamasya rajasaḥ parāke //5 //*
*kimitte viṣṇo parichakṣayaṁ bhūtpra yadvavakṣe śipiviṣṭo asmi /*
*mā varṣo asmadapa gūha etadyadanyarūpaḥ samithe babhūtha //6 //*
*vaṣaṭ te viṣṇavāsa ā kṛṇobhi tanme juṣasva śipiviṣṭa havyam /*
*vardhantu tvā suṣṭutayo giro me yūyaṁ pāta svastibhiḥ sadā naḥ //7 //*

६१. वैश्वानरः (Vaiśvānaraḥ) - ऋ. (Rv.) ७.५.१-९; ७.६.१-७; ७.१३.१-३

ऋ. (Rv.) ७.५.१-९

प्राग्नये तवसे भरध्वं गिरं दिवो अरतये पृथिव्याः ।
यो विश्वेषाममृतानामुपस्थे वैश्वानरो वावृधे जागृवद्भिः ॥१॥
पृष्टो दिवि धाय्यग्निः पृथिव्यां नेता सिन्धूनां वृषभः स्तियानाम् ।
स मानुषीरभि विशा वि भाति वैश्वानरो वावृधानो वरेण ॥२॥
त्वद्भिया विश आयन्नसिक्नीरसमना जहतीर्भोजनानि ।
वैश्वानर पूरवे शोशुचानः पुरो यदग्ने दरयन्नदीदेः ॥३॥
तव त्रिधातु पृथिवी उत द्यौर्वैश्वानर व्रतमग्ने सचन्त ।
त्वं भासा रोदसी आ ततन्थाजस्रेण शोचिषा शोशुचानः ॥४॥
त्वामग्ने हरितो वावशााना गिरः सचन्ते धुनयो घृताचीः ।
पतिं कृष्ओीनां रथ्यं रयीणां वैश्वानरमुषसां केतुमह्नाम् ॥५॥
त्वं असुर्यं१ वसवो न्यृण्वन्क्रतुं हि ते मित्रमहो जुषन्त ।
त्वं दस्यूँरोकसो अग्न आज उरु ज्योतिर्जनयन्नार्याय ॥६॥
स जायमानः परमे व्योमन्वायुर्न पाथः परि पासि सद्यः ।
त्वं भुवना जनयन्नभि क्रन्नपत्याय जातवेदो दशस्यन् ॥७॥
तामग्ने अस्मे इषमेरयस्व वैश्वानर द्युमतीं जातवेदः ।
यया राधः पिन्वसि विश्ववार पृथु श्रवो दाशुषे मर्त्याय ॥८॥
तं नो अग्ने मघवद्भ्यः पुरुक्षु रयिं नि वाजं श्रुत्यं युवस्व ।
वैश्वानर महि नः शर्म यच्छ रुद्रेभिरग्ने वसुभिः सजोषाः ॥९॥
*prāgnaye tavase bharadhvaṁ giraṁ divo arataye pṛthivyāḥ /*
*yo viśveṣāmamṛtānāmupasthe vaiśvānaro vāvṛdhe jāgṛvadbhiḥ //1 //*
*pṛṣṭo divi dhāyyagniḥ pṛthivyāṁ netā sindhūnāṁ vṛṣabhaḥ stiyānām /*
*sa mānuṣīrabhi viśā vi bhāti vaiśvānaro vāvṛdhāno vareṇa //2 //*

*tvadbhiyā viśa āyannasiknīrasamanā jahatīrbhojanāni ।*
*vaiśvānara pūrave śośuchānaḥ puro yadagne darayannadīdeḥ ॥3॥*
*tava tridhātu pṛthivī uta dyaurvaiśvānara vratamagne sachanta ।*
*tvaṁ bhāsā rodasī ā tatanthājasreṇa śochiṣā śośuchānaḥ ॥4॥*
*tvāmagne harito vāvaśāānā giraḥ sachante dhunayo ghṛtāchīḥ ।*
*patiṁ kṛṣaīnāṁ rathyaṁ rayīṇāṁ vaiśvānaramuṣasāṁ ketumahnām ॥5॥*
*tvaṁ asuryaṁ1 vasavo nyṛṇvankratuṁ hi te mitramaho juṣanta ।*
*tvaṁ dasyūm̐rokaso agna āja uru jyotirjanayannāryāya ॥6॥*
*sa jāyamānaḥ parame vyomanvāyurna pāthaḥ pari pāsi sadyaḥ ।*
*tvaṁ bhuvanā janayannabhi krannapatyāya jātavedo daśasyan ॥7॥*
*tāmagne asme iṣamerayasva vaiśvānara dyumatīṁ jātavedaḥ ।*
*yayā rādhaḥ pinvasi viśvavāra pṛthu śravo dāśuṣe martyāya ॥8॥*
*taṁ no agne maghavadbhyaḥ purukṣu rayiṁ ni vājaṁ śrutyaṁ yuvasva ।*
*vaiśvānara mahi naḥ śarma yachchha rudrebhiragne vasubhiḥ sajoṣāḥ ॥9॥*

ऋ. (Rv.) ७.६.१-७

प्र सम्राजो असुरस्य प्रशस्तिं पुंसः कृष्टीनामनुमाद्यस्य ।
इन्द्रस्येव प्र तवसस्कृतानि वन्दे दारुं वन्दमानो विवक्मि ॥१॥
कविं केतुं धासिं भानुमद्रेर्हिन्वन्ति शं राज्यं रोदस्योः ।
पुरन्दरस्य गीर्भिरा विवासेऽग्नेर्व्रतानि पूर्व्या महानि ॥२॥
न्यक्रतून् ग्रथिनो मृध्रवाचः पणींरश्रद्धाँ अवृधाँ अयज्ञान् ।
प्रप्र तान्दस्यूँरग्निर्विवाय पूर्वश्चकारापराँ अयज्यून् ॥३॥
यो अपाचीने तमसि मदन्तीः प्राचीश्चकार नृतमः शचीभिः ।
तमीशानं वस्वो अग्निं गृणीषेऽनानतं दमयन्तं पृतन्यून् ॥४॥
यो देह्यो३ अनमयद्वधस्नैर्यो अर्यपत्नीरुषसश्चकार ।
स निरुध्या नहुषो यह्वो अग्निर्विशश्चक्रे बलिहृतः सहोभिः ॥५॥
यस्य शर्मन्नुप विश्वे जनास एवैस्तस्थुः सुमतिं भिक्षमाणाः ।
वैश्वानरो वरमा रोदस्योराग्निः ससाद पित्रोरुपस्थम् ॥६॥
आ देवो ददे बुध्न्या३ वसूनि वैश्वानर उदिता सूर्यस्य ।
आ समुद्रादवरादा परस्माददाग्निर्ददे दिव आ पृथिव्याः ॥७॥

*pra samrājo asurasya praśasiṁta pusaṁḥ kṛṣṭīnāmanumādyasya ।*
*indrasyeva pra tavasaskṛtāni vande dāruṁ vandamāno vivakmi ॥1॥*
*kaviṁ ketuṁ dhāsiṁ bhānumadrerhinvanti śaṁ rājyaṁ rodasyoḥ ।*
*purandarasya gīrbhirā vivāse'gnervratāni pūrvyā mahāni ॥2॥*
*nyakratūn grathino mṛdhravāchaḥ pūṇīṁraśraddhām̐ avṛdhām̐ ayajñān ।*
*prapra tāndasyūm̐ragnirvivāya pūrvaśchakārāparām̐ ayajyūn ॥3॥*
*yo apāchīne tamasi madantīḥ prāchīśchakāra nutamaḥ śachībhiḥ ।*
*tamīśānaṁ vasvo agiṁna gṛṇīṣe'nānataṁ damayantaṁ pṛtanyūn ॥4॥*
*yo dehyo3 anamayadvadhasnairyo aryapatnīruṣasaśchakāra ।*
*sa nirudhyā nahuṣo yahvo agnirviśaśchakre balihṛtaḥ sahobhiḥ ॥5॥*
*yasya śarmannupa viśvase janāsa evaistasthuḥ sumatiṁ bhikṣamāṇāḥ ।*
*vaiśvānaro varamā rodasyorāgniḥ sasāda pitrorupastham ॥6॥*
*ā devo dade budhnyā3 vasūni vaiśvānara uditā sūryasya ।*
*ā samudrādavarādā parasmādadāgnirdade diva ā pṛthivyāḥ ॥7॥*

ऋ. (Rv.) ७.१३.१-३

प्राग्नये विश्वशुचे धियन्धेऽसुरघ्ने मन्म धीतिं भरध्वम् ।
भरे हविर्न बर्हिषि प्रीणानो वैश्वानराय यतये मतीनाम् ॥१॥
त्वमग्ने शोचिषा शोशुचान आ रोदसी अपृणा जायमानः ।
त्वं देवाँ अभिशस्तेरमुंचो वैश्वानर जातवेदो महित्वा ॥२॥
जातो यदग्ने भुवना व्यख्यः पशून्न गोपा इर्यः परिज्मा ।
वैश्वानर ब्रह्मणे विन्द गातुं यूयं पात स्वस्तिभिः सदा नः ॥३॥

*prāgnaye viśvaśuche dhiyandhe'suraghne manma dhītiṁ bharadhvam ।*

*bhare havirna barhiṣi prīṇāno vaiśvānarāya yataye matīnām ॥1॥*
*tvamagne śochiṣā śośuchāna ā rodasī apṛṇā jāyamānaḥ ।*
*tvaṁ devām̐ abhiśasteramuṁcho vaiśvānara jātavedo mahitvā ॥2॥*
*jāto yadagne bhuvanā vyakhyaḥ paśūnna gopā iryaḥ parijmā ।*
*vaiśvānara brahmaṇe vinda gātuṁ yūyaṁ pāta svastibhiḥ sadā naḥ ॥3॥*

६२. सरस्वती (Sarasvatī) - ऋ. (Rv.) ७.९५.१-२; ४-६; ७.९६.१-३

ऋ. (Rv.) ७.९५.१-२

प्र क्षोदसा धायसा सस्र एषा सरस्वती धरुणमायसी पूः ।
प्रबाबधाना रथ्येव याति विश्वा अपो महिना सिन्धुरन्याः ॥१॥
एकाचेतत्सरस्वती नदीनां शुचिर्यती गिरिभ्य आ समुद्रात् ।
रायश्चेतन्ती भुवनस्य भूरेर्घृतं पयो दुदुहे नाहुषाय ॥२॥
*pra kṣodasā dhāyasā sasra eṣā sarasvatī dharuṇamāyasī pūḥ ।*
*prabābadhānā rathyeva yāti viśvā apo mahinā sindhuranyāḥ ॥1॥*
*ekāchetatsarasvatī nadīnāṁ śuchiryatī giribhya ā samudrāt ।*
*rāyaśchetantī bhuvanasya bhūrerghṛtaṁ payo duduhe nāhuṣāya ॥2॥*

ऋ. (Rv.) ७.९५.४-६

उत स्या नः सरस्वती जुषाणोप श्रवत् सुभगा यज्ञे अस्मिन् ।
मितज्ञुभिर्नमस्यैरियाना राया युजा चिदुत्तरा सखिभ्यः ॥४॥
इमा जुह्वाना युष्मदा नमोभिः प्रति स्तोमं सरस्वति जुषस्व ।
तव शर्मन्प्रियतमे दधाना उपस्थेयाम शरणं न वृक्षम् ॥५॥
अयमु ते सरस्वति वसिष्ठो द्वारावृतस्य सुभगे व्यावः ।
वर्ध शुभ्रे स्तुवते रासि वाजान् यूयं पात स्वस्तिभिः सदा नः ॥६॥
*uta syā naḥ sarasvatī juṣāṇopa śravat subhagā yajñe asmin ।*
*mitajñubhirnamasyairiyānā rāyā yujā chiduttarā sakhibhyaḥ ॥4॥*
*imā juhvānā yuṣmadā namobhiḥ prati stomaṁ sarasvati juṣasva ।*
*tava śarmanpriyatame dadhānā upastheyāma śaraṇaṁ na vṛkṣam ॥5॥*
*ayamu te sarasvati vasiṣṭho dvārāvṛtasya subhage vyāvaḥ ।*
*vardha śubhre stuvate rāsi vājān yūyaṁ pāta svastibhiḥ sadā naḥ ॥6॥*

ऋ. (Rv.) ७.९६.१-३

बृहदु गायिषो वचोऽसुर्या नदीदाम् ।
सरस्वतीमिन्महया सुवृक्तिभिः स्तोमैर्वसिष्ठ रोदसी ॥१॥
उभे यत्ते महिना शुभ्रे अन्धसी अधिक्षियन्ति पूरवः ।
सा नो बोध्यवित्री मरुत्सखा चोद राधो मघोनाम् ॥२॥
भद्रमिद्भद्रा कृणवत्सरस्वत्यकवारी चेतति वाजिनीवती ।
गृणाना जमदग्निवत्स्तुवाना च वसिष्ठवत् ॥३॥
*bṛhadu gāyiṣo vacho'suryā nadīdām ।*
*sarasvatīminmahayā suvṛktibhiḥ stomairvasiṣṭha rodasī ॥1॥*
*ubhe yatte mahinā śubhre andhasī adhikṣiyanti pūravaḥ ।*
*sā no bodhyavitrī marutsakhā choda rādho maghonām ॥2॥*
*bhadramidbhadrā kṛṇavatsarasvatyakavārī chetati vājinīvatī ।*
*gṛṇānā jamadagnivatstuvānā cha vasiṣṭhavat ॥3॥*

६३. सरस्वान् (Sarasvān) - ऋ. (Rv.) ७.९५.३; ७.९६.४-६

ऋ. (Rv.) ७.९५.३

स वावृधे नर्यो योषणासु वृषा शिशुर्वृषभो यज्ञियासु ।
स वाजिनं मघवद्भ्यो दधाति वि सातये तन्वं मामृजीत ॥३॥
*sa vāvṛdhe naryo yoṣaṇāsu vṛṣā śiśurvṛṣabho yajñiyāsu ।*
*sa vājinaṁ maghavadbhyo dadhāti vi sātaye tanvaṁ māmṛjīta ॥3॥*

ऋ. (Rv.) ७.९६.४-६

जनीयन्तो न्वग्रवः पुत्रीयन्तः सुदानवः। सरस्वन्तं हवामहे ॥४॥

ये ते सरस्व ऊर्मयो मधुमन्तो घृतश्चुतः। तेभिर्नोऽविता भव ॥५॥
पीपिवासं सरस्वतः स्तनं यो विश्वदर्शतः। भक्षीमहि प्रजामिषम् ॥६॥
*janīyanto nvagravaḥ putrīyantaḥ sudānavaḥ | sarasvantaṁ havāmahe ||4 ||*
*ye te sarasva ūrmayo madhumanto ghṛtaśchutaḥ | tebhirno'vitā bhava ||5 ||*
*pīpivāsaṁ sarasvataḥ stanaṁ yo viśvadarśataḥ | bhakṣīmahi prajāmiṣam ||6 ||*

६४. सविता (Savitā) - ऋ. (Rv.) ७.३८.१-६१; ७.४५.१-४; य. (Yv.) ३३.२०

ऋ. (Rv.) ७.३८.१-६

उदु ष्य देवः सविता ययाम हिरण्ययीमममतिं यामशिश्रेत् ।
नूनं भगो हव्यो मानुषेभिर्वि यो रत्ना पुरूवसुर्दधाति ॥१॥
उदु तिष्ठ सवितः श्रुध्य१स्य हिरण्यपाणे प्रभृतावृतस्य ।
व्यु१र्वी पृथ्वीममति सृजान आ नृभ्यो मर्त भोजनं सुवानः ॥२॥
अपि ष्टुतः सविता देवो अस्तु यमा चिद्विश्वे वसवो गृणन्ति ।
स नः स्तोमान्नमस्य१ श्चनो धाद्विश्वेभिः पातु पायुभिर्नि सूरीन् ॥३॥
अभि यं देव्यदितिर्गृणाति सवं देवस्य सवितुर्जुषाणा ।
अभि सम्राजो वरुणो गृणन्त्यभि मित्रासो अर्यमा सजोषाः ॥४॥
अभि ये मिथो वनुषः सपन्ते रातिं दिवो रातिषाचः पृथिव्याः ।
अहिर्बुधन्य उत नः शृणोतु वरूत्र्येकधेनुभिर्नि पातु ॥५॥
अनु तन्नो जास्पतिर्मंसीष्ट रत्नं देवस्य सवितुरियानः ।
भगमुग्रोऽवसे जोहवीति भगमनुग्रो अध याति रत्नम् ॥६॥
*udu ṣya devaḥ savitā yayāma hiraṇyayīmamatiṁ yāmaśiśret |*
*nūnaṁ bhago havyo mānuṣebhirvi yo ratnā purūvasurdadhāti ||1 ||*
*udu tiṣṭha savitaḥ śrudhya1sya hiraṇyapāṇe prabhṛtāvṛtasya |*
*vyu1rvī pṛthvīmamati sṛjāna ā nṛbhyo marta bhojanaṁ suvānaḥ ||2 ||*
*api ṣṭutaḥ savitā devo astu yamā chidviśve vasavo gṛṇanti |*
*sa naḥ stomānnamasya1 śchano dhādviśvebhiḥ pātu pāyubhirni sūrīn ||3 ||*
*abhi yaṁ devyaditirgṛṇāti savaṁ devasya saviturjuṣāṇā |*
*abhi samrājo varuṇo gṛṇantyabhi mitrāso aryamā sajoṣāḥ ||4 ||*
*abhi ye mitho vanuṣaḥ sapante rātiṁ divo rātiṣāchaḥ pṛthivyāḥ |*
*ahirbudhanya uta naḥ śṛṇotu varūtrayekadhenubhirni pātu ||5 ||*
*anu tanno jāspatirmaṁsīṣṭa ratnaṁ devasya savituriyānaḥ |*
*bhagamugro'vase johavīti bhagamanugro adha yāti ratnam ||6 ||*

ऋ. (Rv.) ७.४५.१-४

आ देवो यातु सविता सुरत्नोऽन्तरिक्षप्रा वहमानो अश्वैः ।
हस्ते दधानो नर्या पुरूणि निवेशयंच प्रसुवंच भूम ॥१॥
उदस्य बाहू शिथिरा बृहन्ता हिरण्यया दिवो अन्ताँ अनष्टाम् ।
नूनं सो अस्य महिमा पनिष्ट सूरश्चिदस्मा अनु दादपस्याम् ॥२॥
स घा नो देवः सविता सहावा साविषद्वसुपतिर्वसूनि ।
विश्रयमाणो अमतिमुरूचीं मर्तभोजनमध रासते नः ॥३॥
इमा गिरः सवितारं सुजिह्वं पूर्णगभस्तिमीळते सुपाणिम् ।
चित्रं वयो बृहदस्मे दधातु यूयं पात स्वस्तिभिः सदा नः ॥४॥
*ā devo yātu savitā suratno'ntarikṣaprā vahamāno aśvaiḥ |*
*haste dadhāno naryā purūṇi niveśayaṁcha prasuvaṁcha bhūma ||1 ||*
*udasya bāhū śithirā bṛhantā hiraṇyayā divo antām̐ anaṣṭām |*
*nūnaṁ so asya mahimā paniṣṭa sūraśchidasmā anu dādapasyām ||2 ||*
*sa ghā no devaḥ savitā sahāvā sāviṣadvasupatirvasūni |*
*viśrayamāṇo amatimurūchīṁ martabhojanamadha rāsate naḥ ||3 ||*
*imā giraḥ savitāraṁ sujihvaṁ pūrṇagabhastimīḷate supāṇim |*
*chitraṁ vayo bṛhadasme dadhātu yūyaṁ pāta svastibhiḥ sadā naḥ ||4 ||*

य. (Yv.) ३३.२०

यदद्य सूरऽउदितेऽनागा मित्रोऽअर्य्यमा। सुवाति सविता भगः ॥२०॥

*yadadya sūra'udite'nāgā mitro'aryyamā | suvāti savitā bhagaḥ ||20 ||*

६५. सविता भगो वा (Savitā Bhago Vā) - ऋ. (Rv.) ७.३८.६२

अनु तन्नो जास्पतिर्मंसीष्ट रत्नं देवस्य सवितुरियानः ।

भगमुग्रोऽवसे जोहवीति भगमनुग्रो अध याति रत्नम् ॥६॥

*anu tanno jāspatirmaṁsīṣṭa ratnaṁ devasya savituriyānaḥ |*

*bhagamugro'vase johavīti bhagamanugro adha yāti ratnam ||6 ||*

६६. सवित्रादयो मन्त्रोक्ताः (Savitrādayo Mantroktāḥ) - अ. (Av.) ३.२१.८-१०

हिरण्यपाणि सवितारमिन्द्रं बृहस्पतिं वरुणं मित्रमग्निम् ।

विश्वान् देवानंगिरसो हवामह इमं क्रव्यादं शमयन्त्वग्निम् ॥८॥

शान्तो अग्निः क्रव्याच्छान्तः पुरुषरेषणः। अथा यो विश्वदाव्य१स्तं क्रव्यादमशीशमम् ॥९॥

ये पर्वताः सोमपृष्ठा आप उत्तानशीवरीः। वातः पर्जन्य आदग्निस्ते क्रव्यादमशीशमन् ॥१०॥

*hiraṇyapāṇi savitāramindraṁ bṛhaspatiṁ varuṇaṁ mitramagnim |*

*viśvān devānaṁgiraso havāmaha imaṁ kravyādaṁ śamayantvagnim ||8 ||*

*śānto agniḥ kravyāchchhāntaḥ puruṣareṣaṇaḥ |*

*athā yo viśvadāvya1staṁ kravyādamaśīśamam ||9 ||*

*ye parvatāḥ somapṛṣṭhā āpa uttānaśīvarīḥ |*

*vātaḥ parjanya ādagniste kravyādamaśīśaman ||10 ||*

६७. सुदासः पैजवनस्य दानस्तुतिः (Sudāsaḥ Paijavanasya Dānastutiḥ) - ऋ. (Rv.) ७.१८.२२-२५

द्वे नप्तुर्देववतः शते गोर्द्वा रथा वधूमन्ता सुदासः ।

अर्हन्नग्ने पैजवनस्य दानं होतेव सद्म पर्येमि रेभन् ॥२२॥

चत्वारो मा पैजवनस्य दानाः स्मद्दिष्टयः कृशनिनो निरेके ।

ऋज्रासो मा पृथिविष्ठाः सुदासस्तोकं तोकाय श्रवसे वहन्ति ॥२३॥

यस्य श्रवो रोदसी अन्तरुर्वी शीर्ष्णेशीर्ष्णे विबभाजा विभक्ता ।

सप्तेदिन्द्रं न स्रवतो गृणन्ति नि युध्यामधिमशिशादभीके ॥२४॥

इमं नरो मरुतः सश्चतानु दिवोदासं न पितरं सुदासः ।

अविष्टना पैजवनस्य केतं दूणाशं क्षत्रमजरं दुवोयु ॥२५॥

*dve napturdevavataḥ śate gordvā rathā vadhūmantā sudāsaḥ |*

*arhannagne paijavanasya dānaṁ hoteva sadma paryemi rebhan ||22 ||*

*chatvāro mā paijavanasya dānāḥ smaddiṣṭayaḥ kṛśanino nireke |*

*ṛjrāso mā pṛthiviṣṭhāḥ sudāsastokaṁ tokāya śravase vahanti ||23 ||*

*yasya śravo rodasī antarurvī śīrṣṇeśīrṣṇe vibabhājā vibhaktā |*

*saptedindraṁ na sravato gṛṇanti ni yudhyāmadhimaśiśādabhīke ||24 ||*

*imaṁ nareā marutaḥ saśchatānu divodāsaṁ na pitaraṁ sudāsaḥ |*

*aviṣṭanā paijavanasya ketaṁ dūṇāśaṁ kṣatramajaraṁ duvoyu ||25 ||*

६८. सूर्यः (Sūryaḥ) - ऋ. (Rv.) ७.६०.१; ७.६२.१-३; ७.६३.१-४; ५; ७.६६.१४-१६

ऋ. (Rv.) ७.६०.१

यदद्य सूर्य ब्रवोऽनागा उद्यन्मित्राय वरुणाय सत्यम् ।

वयं देवत्रादिते स्याम तव प्रियासो अर्यमन् गृणन्तः ॥१॥

*yadadya sūrya bravo'nāgā udyanmitrāya varuṇāya satyam |*

*vayaṁ devatrādite syāma tava priyāso aryaman gṛṇantaḥ ||1 ||*

ऋ. (Rv.) ७.६२.१-३

उत्सूर्यो बृहदर्चींष्यश्रेत्पुरु विश्वा जनिम मानुषाणाम् ।

समो दिवा ददृशे रोचमानः क्रत्वा कृतः सुकृतः कर्तृभिर्भूत् ॥१॥

स सूर्य प्रति पुरो न उद्गा एभिः स्तोमेभिरेतशेभिरेवैः ।

प्र नो मित्राय वरुणाय वोचोऽनागसो अर्यम्णे अग्नये च ॥२॥

वि नः सहस्रं शुरुधो रदन्त्वृतावानो वरुणो मित्रो अग्निः ।

यच्छन्तु चन्द्रा उपमं नो अर्कमा नः काम पूषुरन्तु स्तवानाः ॥३॥
*utsūryo bṛhadarchīṁṣyaśretpuru viśvā janima mānuṣāṇām /*
*samo divā dadṛśe rochamānaḥ kratvā kṛtaḥ sukṛtaḥ kartṛbhirbhūt //1 //*
*sa sūrya prati puro na udgā ebhiḥ stomebhiretaśebhirevaiḥ /*
*pra no mitrāya varuṇāya vocho'nāgaso aryamṇe agnaye cha //2 //*
*vi naḥ sahasraṁ śurudho radantvṛtāvāno varuṇo mitro agniḥ /*
*yachchhantu chandrā upamaṁ no arkamā naḥ kāma pūṣurantu stavānāḥ //3 //*

ऋ. (Rv.) ७.६३.१-५

उद्वेति सुभगो विश्वचक्षाः साधारणः सूर्यो मानुषाणाम् ।
चक्षुर्मित्रस्य वरुणस्य देवश्चमेर्व यः समविव्यक्तमांसि ॥१॥
उद्वेति प्रसवीता जनानां महान् केतुरर्णवः सूर्यस्य ।
समानं चक्रं पर्याविवृत्सन्यदेतशो वहति धूर्षु युक्तः ॥२॥
विभ्राजमान उषसामुपस्थाद्रेभैरुदेत्यनुमद्यमानः ।
एष मे देवः सविता चच्छन्द यः समानं न प्रमिनाति धाम ॥३॥
दिवो रुक्म उरुचक्षा उदेति दूरेअर्थस्तरणिर्भ्राजमानः ।
नूनं जनाः सूर्येण प्रसूता अयन्नर्थानि कृणवन्नपांसि ॥४॥
यत्रा चक्रुरमृता गातुमस्मै श्येनो न दीयन्नन्वेति पाथः ।
प्रति वां सूर उदिते विधेम नमोभिर्मित्रावरुणोत हव्यैः ॥५॥
*udveti subhago viśvachakṣāḥ sādhāraṇaḥ sūryo mānuṣāṇām /*
*chakṣurmitrasya varuṇasya devaśchamerva yaḥ samavivyaktamāṁsi //1 //*
*udveti prasavītā janānāṁ mahān keturarṇavaḥ sūryasya /*
*samānaṁ chakraṁ paryāvivṛtsanyadetaśo vahati dhūrṣu yuktaḥ //2 //*
*vibhrājamāna uṣasāmupasthādrebhairudetyanumadyamānaḥ /*
*eṣa me devaḥ savitā chachchhanda yaḥ samānaṁ na pramināti dhāma //3 //*
*divo rukma uruchakṣā udeti dūrearthastaraṇirbhrājamānaḥ /*
*nūnaṁ janāḥ sūryeṇa prasūtā ayannarthāni kṛṇavannapāṁsi //4 //*
*yatrā chakruramṛtā gātumasmai śyeno na dīyannanveti pāthaḥ /*
*prati vāṁ sūra udite vidhema namobhirmitrāvaruṇota havyaiḥ //5 //*

ऋ. (Rv.) ७.६६.१४-१६

उदु त्यद्दर्शतं वपुर्दिव एति प्रतिह्वरे ।
यदीमाशुर्वहति देव एतशो विश्वस्मै चक्षसे अरम् ॥१४॥
शीर्ष्णः शीर्ष्णो जगतस्तस्थुषस्पतिं समया विश्वमा रजः ।
सप्त स्वसारः सुविताय सूर्यं वहन्ति हरितो रथे ॥१५॥
तच्चक्षुर्देवहितं शुक्रमुच्चरत् ।
पश्येम शरदः शतं जीवेम शरदः शतम् ॥१६॥
*udu tyaddarśataṁ vapurdiva eti pratihvare /*
*yadīmāśurvahati deva etaśo viśvasmai chakṣase aram //14 //*
*śīrṣṇaḥ śīrṣṇo jagatastasthuṣaspatiṁ samayā viśvamā rajaḥ /*
*sapta svasāraḥ suvitāya sūryaṁ vahanti harito rathe //15 //*
*tachchakṣurdevahitaṁ śukramuchcharat /*
*paśyema śaradaḥ śataṁ jīvema śaradaḥ śatam //16 //*

६९. सोमः (Somaḥ) - ऋ. (Rv.) ७.१०४.९; १२; १३

ऋ. (Rv.) ७.१०४.९

ये पाकशसं विहरन्त एवैर्ये वा भद्रं दूषयन्ति स्वधाभिः ।
अहये वा तान् प्रददातु सोम आ वा दधातु निर्ऋतेरुपस्थे ॥९॥
*ye pākaśasaṁ viharanta evairye vā bhadraṁ dūṣayanti svadhābhiḥ /*
*ahaye vā tān pradadātu soma ā vā dadhātu nirṛterupasthe //9 //*

ऋ. (Rv.) ७.१०४.१२-१३

सुवज्ञानं चिकितुषे जनाय सच्चासच्च वचसी पस्पृधाते ।

तयोर्यत्सत्यं यतरहृजीयस्तदित्सोमोऽवति हन्त्यासत् ॥१२॥
न वा उ सोमो वृजिनं हिनोति न क्षत्रियं मिथुया धारयन्तम् ।
हन्ति रक्षो र्हन्त्यासद्वदन्तमुभाविन्द्रस्य प्रसितौ शयाते ॥१३॥
*suvajñānaṁ chikituṣe janāya sachchāsachcha vachasī paspṛdhāte /*
*tayoryatsatyaṁ yataradṛjīyastaditsomo'vati hantyāsat //12 //*
*na vā u somo vṛjinaṁ hinoti na kṣatriyaṁ mithuyā dhārayantam /*
*hanti rakṣo rhantyāsadvadantamubhāvindrasya prasitau śayāte //13 //*

७०. सोमः अग्निः आदित्यः विष्णुः ब्रह्मा बृहस्पतिः (Somaḥ Agniḥ Ādityaḥ Viṣṇuḥ Brahmā Bṛhaspatiḥ) - अ. (Av.) ३.२०.४

सोमं राजानमवसेऽग्निं गीर्भिर्हवामहे। आदित्यं विष्णुं सूर्यं ब्रह्माणं च बृहस्पतिम् ॥४॥
*somaṁ rājānamavase'giṁna gīrbhirhavāmahe /*
*ādityaṁ viṣṇuṁ sūryaṁ brahmāṇaṁ cha bṛhaspatim //4 //*

## ५६२. वासिष्ठः अथर्वा वा (Vāsiṣṭhaḥ Atharvā Vā)

१. इन्द्रः क्षत्रियो राजा (Indraḥ Kṣatriyo Rājā) - अ. (Av.) ४.२२.१-७

इममिन्द्र वर्धय क्षत्रियं म इमं विशामेकवृषं कृणु त्वम् ।
निरमित्रानक्ष्णुह्यस्य सर्वांस्तान् रन्धयास्मा अहमुत्तरेषु ॥१॥
एमं भज ग्रामे अश्वेषु गोषु निष्टं भज यो अमित्रो अस्य ।
वर्ष्म क्षत्राणामयमस्तु राजेन्द्र शत्रुं रन्धय सर्वमस्मै ॥२॥
अयमस्तु धनपतिर्धनानामयं विशां विश्पतिरस्तु राजा ।
अस्मिन्निन्द्र महि वर्चांसि धेह्यवर्चसं कृणुहि शत्रुमस्य ॥३॥
अस्मै द्यावापृथिवी भूरि वामं दुहाथां घर्मदुघेइव धेनू ।
अयं राजा प्रिय इन्द्रस्य भूयात् प्रियो गवामोषधीनां पशूनाम् ॥४॥
युनज्मि त उत्तरावन्तमिन्द्रं येन जयन्ति न पराजयन्ते ।
यस्त्वा करदेकवृषं जनानामुत राज्ञामुत्तमं मानवानाम् ॥५॥
उत्तरस्त्वमधरे ते सपत्ना ये के च राजन् प्रतिशत्रवस्ते ।
एकवृष इन्द्रसखा जिगीवांछत्रूयतामा भरा भोजनानि ॥६॥
सिंहप्रतीको विशो अद्धि सर्वा व्याघ्रप्रतीकोऽव बाधस्व शत्रून् ।
एकवृष इन्द्रसखा जिगीवांछत्रूयतामा खिदा भोजनानि ॥७॥
*imamindra vardhaya kṣatriyaṁ ma imaṁ viśāmekavṛṣaṁ kṛṇu tvam /*
*niramitrānakṣaṇuhyasya sarvāṁstān randhayāsmā ahamuttareṣu //1 //*
*emaṁ bhaja grāme aśveṣu goṣu niṣṭaṁ bhaja yo amitro asya /*
*varṣma kṣatrāṇāmayamastu rājendra śatruṁ randhaya sarvamasmai //2 //*
*ayamastu dhanapatirdhanānāmayaṁ viśāṁ viśpatirastu rājā /*
*asminnindra mahi varchāṁsi dhehyavarchasaṁ kṛṇuhi śatrumasya //3 //*
*asmai dyāvāpṛthivī bhūri vāmaṁ duhāthāṁ gharmadugheiva dhenū /*
*ayaṁ rājā priya indrasya bhūyāt priyo gavāmoṣadhīnāṁ paśūnām //4 //*
*yunajmi ta uttarāvantamindraṁ yena jayanti na parājayante /*
*yastvā karadekavṛṣaṁ janānāmuta rājñāmuttamaṁ mānavānām //5 //*
*uttarastvamadhare te sapatnā ye ke cha rājan pratiśatravaste /*
*ekavṛṣa indrasakhā jigīvāṁchhatrūyatāmā bharā bhojanāni //6 //*
*siṁhapratīko viśo addhi sarvā vyāghrapratīko'va bādhasva śatrūn /*
*ekavṛṣa indrasakhā jigīvāṁchhatrūyatāmā khidā bhojanāni //7 //*

## ५६३. वसिष्ठः कुमारो वा आग्नेयः (Vasiṣṭhaḥ Kumāro Vā Āgneyaḥ)

१. पर्जन्यः (Parjanyaḥ) - ऋ. (Rv.) ७.१०१.१-६; ७.१०२.१-३

ऋ. (Rv.) ७.१०१.१-६

तिस्रो वाचः प्र वद ज्योतिरग्रा या एतद्दुह्रे मधुदोघमूधः ।
स वत्सं कृण्वन् गर्भमोषधीनां सद्यो जातो वृषभो रोरवीति ॥१॥
यो वर्धन ओषधीनां यो अपां यो विश्वस्य जगतो देव ईशे ।

स त्रिधातु शरणं शर्म यंसत्रिवर्तु ज्योतिः स्वभिष्ट्य१स्मे ॥२॥
स्तरीरु त्वद्भवति सूत उ त्वद्यथावशं तन्वं चक्र एषः ।
पितुः पयः प्रति गृभ्णाति माता तेन पिता वर्धते तेन पुत्रः ॥३॥
यस्मिन् विश्वानि भुवनानि तस्थुस्तिस्रो द्यावस्त्रेधा सस्रुरापः ।
त्रयः कोशास उपसेचनासो मध्वः श्चेतन्त्यभितो विरप्शम् ॥४॥
इदं वचः पर्जन्याय स्वराजे हृदो अस्त्वन्तरं तज्जुजोषत् ।
मयोभुवो वृष्टयः सन्त्वस्मे सपिप्पला ओषधीर्देवगोपाः ॥५॥
स रेतोधा वृषभः शश्वतीनां तस्मिन्नात्मा जगतस्तस्थुषश्च ।
तन्म ऋतं पातु शतशारदाय यूयं पात स्वस्तिभिः सदा नः ॥६॥
*tisro vāchaḥ pra vada jyeātiragrā yā etadduhre madhudoghamūdhaḥ* ।
*sa vatsaṁ kṛṇvan garbhamoṣadhīnāṁ sadyo jāto vṛṣabho roravīti* ॥1॥
*yo vardhana oṣadhīnāṁ yo apāṁ yo viśvasya jagato deva īśe* ।
*sa tridhātu śaraṇaṁ śarma yaṁsatrivartu jyotiḥ svabhiṣṭya1sme* ॥2॥
*starīru tvadbhavati sūta u tvadyathāvaśaṁ tanvaṁ chakra eṣaḥ* ।
*pituḥ payaḥ prati gṛbhṇāti mātā tena pitā vardhate tena putraḥ* ॥3॥
*yasmin viśvāni bhuvanāni tasthustisro dyāvastredhā sasrurāpaḥ* ।
*trayaḥ kośāsa upasechanāso madhvaḥ śchetantyabhito virapśam* ॥4॥
*idaṁ vachaḥ parjanyāya svarāje hṛdo astvantaraṁ tajjujoṣat* ।
*mayobhuvo vṛṣṭayaḥ santvasme sapippalā oṣadhīrdevagopāḥ* ॥5॥
*sa retodhā vṛṣabhaḥ śaśvatīnāṁ tasminnāātmā jagatastasthuṣaścha* ।
*tanma ṛtaṁ pātu śataśāradāya yūyaṁ pāta svastibhiḥ sadā naḥ* ॥6॥

ऋ. (Rv.) ७.१०२.१-३

पर्जन्याय प्र गायत दिवस्पुत्राय मीळ्हुषे। स नो यवसमिच्छतु ॥१॥
यो गर्भमोषधीनां गवां कृणेत्यर्वताम्। पर्जन्यः पुरुषीणाम् ॥२॥
तस्मा इदास्ये हविर्जुहोता मधुमत्तमम्। इळां नः संयतं करत् ॥३॥
*parjanyāya pra gāyata divasputrāya mīḻahuṣe । sa no yavasamichchhatu* ॥1॥
*yo garbhamoṣadhīnāṁ gavāṁ kṛṇetyarvatām । parjanyaḥ puruṣīṇām* ॥2॥
*tasmā idāsye havirjuhotā madhumattamam । iḻāṁ naḥ saṁyataṁ karat* ॥3॥

## ५६४. वसिष्ठपुत्राः (Vasiṣṭhaputrāḥ)

१. संस्तवो वसिष्ठस्य सपुत्रस्य इन्द्रेण वा संवादः - ऋ. (Rv.) ७.३३.१-१४

श्वित्यंचो मा दक्षिणतस्कपर्दा धियंजिन्वासो अभि हि प्रमन्दुः ।
उत्तिष्ठन्वोचे परि बर्हिषो नृन्न मे दूरादवितवे वसिष्ठाः ॥१॥
दूरादिन्द्रमनयन्ना सुतेन तिरो वैशन्तमति पान्तमुग्रम् ।
पाशद्युम्नस्य वायतस्य सोमात्सुतादिन्द्रोऽवृणीता वसिष्ठान् ॥२॥
एवेन्नु कं सिन्धुमेभिस्ततारेवेन्नु कं भेदमेभिर्जघान ।
एवेन्नु कं दाशराज्ञे सुदासं प्राविदिन्द्रो ब्रह्मणा वो वसिष्ठाः ॥३॥
जुष्टी नरो ब्रह्मणा वः पितृणामक्षमव्ययं न किला रिषाथ।
यच्छक्वरीषु बृहता रवेणेन्द्रे शुष्ममदधाता वसिष्ठाः ॥४॥
उद् द्यामिवेत्तृष्णजो नाथितासोऽदीधयुर्दाशराज्ञे वृतासः ।
वसिष्ठस्य स्तुवत इन्द्रो अश्रोदुरुं तृत्सुभ्यो अकृणोदु लोकम् ॥५॥
दण्डाइवेद्गोअजनास आसन्परिच्छिन्ना भरता अर्भकासः ।
अभवच्च पुरएता वसिष्ठ आदित्तृत्सूनां विशो अप्रथन्त ॥६॥
त्रयः कृण्वन्ति भुवनेषु रेतस्तिस्रः प्रजा आर्या ज्योतिरग्राः ।
त्रयो घर्मास उषसं सचन्ते सर्वाँ इत्ताँ अनु विदुर्वसिष्ठाः ॥७॥
सूर्यस्येव वक्षथो ज्योतिरेषां समुद्रस्येव महिमा गभीरः ।
वातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वेतवे वः ॥८॥
त इन्निण्यं हृदयस्य प्रकेतैः सहस्रवल्शमभि सं चरन्ति ।
यमेन ततं परिधिं वयन्तोऽप्सरस उप सेदुर्वसिष्ठाः ॥९॥

विद्युतो ज्योतिः परि सिंजहानं मित्रावरुणा यदपश्यतां त्वा ।
तत्ते जन्मोतैकं वसिष्ठागस्त्यो यत्त्वा विश आजभार ॥१०॥
उतासि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन्मनसोऽधि जातः ।
द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवाः पुष्करे त्वाददन्त ॥११॥
स प्रकेत उभयस्य प्रविद्वान्त्सहस्रदान उत वा सदानः ।
यमेन ततं परिधिं वयिष्यन्नप्सरसः परि जज्ञे वसिष्ठः ॥१२॥
सत्रे ह जाताविषिता नमोभिः कुम्भे रेतः सिषिचतुः समानम् ।
ततो ह मान उदियाय मध्यात्ततो जातमृषिमाहुर्वसिष्ठम् ॥१३॥
उक्थभृतं सामभृतं बिभर्ति ग्रावाणं बिभ्रत्प्र वदात्यग्रे ।
उपैनमाध्वं सुमनस्यमाना आ वो गच्छाति प्रतृदो वसिष्ठः ॥१४॥

*śvityaṁcho mā dakṣiṇataskapardā dhiyaṁjinvāso abhi hi pramanduḥ /*
*uttiṣṭhanvoche pari barhiṣo nṝnna me dūrādavitave vasiṣṭhāḥ //1 //*
*dūrādindramanayannā sutena tiro vaiśantamati pāntamugram /*
*pāśadyumnasya vāyatasya somātsutādindro'vṛṇītā vasiṣṭhān //2 //*
*evennu kaṁ sindhumebhistatārevennu kaṁ bhedamebhirjaghāna /*
*evennu kaṁ dāśarājñe sudāsaṁ prāvidindro brahmaṇā vo vasiṣṭhāḥ //3 //*
*juṣṭī naro brahmaṇā vaḥ pitṝṇāmakṣamavyayaṁ na kilā riṣātha /*
*yachchhakvarīṣu bṛhatā raveṇendre śuṣmamadadhātā vasiṣṭhāḥ //4 //*
*ud dyāmivettṛṣṇajo nāthitāso'dīdhayurdāśarājñe vṛtāsaḥ /*
*vasiṣṭhasya stuvata indro aśrodurum tṛtsubhyo akṛṇodu lokam //5 //*
*daṇḍāivedgoajanāsa āsanparichchhinnā bharatā arbhakāsaḥ /*
*abhavachcha puraetā vasiṣṭha ādittṛtsūnāṁ viśo aprathanta //6 //*
*trayaḥ kṛṇvanti bhuvaneṣu retastisraḥ prajā āryā jyotiragrāḥ /*
*trayo gharmāsa uṣasaṁ sachante sarvām̐ ittām̐ anu vidurvasiṣṭhāḥ //7 //*
*sūryasyeva vakṣatho jyotireṣāṁ samudrasyeva mahimā gabhīraḥ /*
*vātasyeva prajavo nānyena stomo vasiṣṭhā anvetave vaḥ //8 //*
*ta inniṇyaṁ hṛdayasya praketaiḥ sahasravalśamabhi saṁ charanti /*
*yamena tataṁ paridhiṁ vayanto'psarasa upa sedurvasiṣṭhāḥ //9 //*
*vidyuto jyotiḥ pari siṁjahānaṁ mitrāvaruṇā yadapaśyatāṁ tvā /*
*tatte janmotaikaṁ vasiṣṭhāgastyo yattvā viśa ājabhāra //10 //*
*utāsi maitrāvaruṇo vasiṣṭhorvaśyā brahmanmanaso'dhi jātaḥ /*
*drapsaṁ skannaṁ brahmaṇā daivyena viśve devāḥ puṣkare tvādadanta //11 //*
*sa praketa ubhayasya pravidvāntsahasradāna uta vā sadānaḥ /*
*yamena tataṁ paridhiṁ vayiṣyannapsarasaḥ pari jajñe vasiṣṭhaḥ //12 //*
*satre ha jātāviṣitā namobhiḥ kumbhe retaḥ siṣichatuḥ samānam /*
*tato ha māna udiyāya madhyāttato jātamṛṣimāhurvasiṣṭham //13 //*
*ukthabhṛtaṁ sāmabhṛtaṁ bibharti grāvāṇaṁ bibhratpra vadātyagre /*
*upainamādhvaṁ sumanasyamānā ā vo gachchhāti pratṛdo vasiṣṭhaḥ //14 //*

## ५६५. वासिष्ठो मैत्रावरुणिः (Vāsiṣṭho Maitrāvaruṇiḥ)

१. अग्निः (Agniḥ) - सा. (Sv.) २६; ३८; ४५; ५५; ६१; ७०; ७२; ७८; ७४९-७५०; १२१९-१२२१; १३०४-१३०६; १३७३-१३७५; १५१३-१५१४

सा. (Sv.) २६

नि त्वा नक्ष्य विश्पते द्युमन्तं धीमहे वयम्। सुवीरमग्न आहुत ॥६॥
*ni tvā nakṣaya viśpate dyumantaṁ dhīmahe vayam / suvīramagna āhuta //6 //*

सा. (Sv.) ३८

त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः। यन्तारो ये मघवानो जनानामूर्वं दयन्त गोनाम् ॥४॥
*tve agne svāhuta priyāsaḥ santu sūrayaḥ / yantāro ye maghavāno janānāmūrvaṁ dayanta gonām //4 //*

सा. (Sv.) ४५

एना वो अग्निं नमसोर्जो नपातमा हुवे। प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतम् ॥१॥

*enā vo agiṁna namasorjo napātamā huve /*
*priyaṁ chetiṣṭhamaratiṁ svadhvaraṁ viśvasya dūtamamṛtam //1 //*

सा. (Sv.) ५५

देवो वो द्रविणोदाः पूर्णां विवष्ट्वासिचम्। उद्वा सिंचध्वमुप वा पृणध्वमादिद्वो देव ओहते ॥१॥
*devo vo draviṇodāḥ pūrṇāṁ vivaṣṭvāsicham /*
*udvā siṁchadhvamupa vā pṛṇadhvamādidvo deva ohate //1 //*

सा. (Sv.) ६१

त्वमग्ने गृहपतिस्त्वं होता नो अध्वरे। त्वं पोता विश्ववार प्रचेता यक्षि यासि च वार्यम् ॥७॥
*tvamagne gṛhapatistvaṁ hotā no adhvare /*
*tvaṁ potā viśvavāra prachetā yakṣi yāsi cha vāryam //7 //*

सा. (Sv.) ७०

इन्धे राजा समर्यो नमोभिर्यस्य प्रतीकमाहुतं घृतेन ।
नरो हव्येभिरीडते सबाध आग्निरग्रमुषसामशोचि ॥८॥
*indhe rājā samaryo namobhiryasya pratīkamāhutaṁ ghṛtena /*
*naro havyebhirīḍate sabādha āgniragramuṣasāmaśochi //8 //*

सा. (Sv.) ७२

अगिं्न नरो दीधितिभिररण्योर्हस्तच्युतं जनयत प्रशस्तम्। दूरेदृशं गृहपतिमथव्युम् ॥१०॥
*agiṁna naro dīdhitibhiraraṇyorhastachyutaṁ janayata praśastam / dūredṛśaṁ gṛhapatimathavyum //10 //*

सा. (Sv.) ७८

प्र सम्राजमसुरस्य प्रशस्तं पुंसः कृष्टीनामनुमाद्यस्य ।
इन्द्रस्येव प्र तवसस्कृतानि वन्दद्वारा वन्दमाना विवष्टु ॥६॥
*pra samrājamasurasya praśastaṁ puṁsaḥ kṛṣṭīnāmanumādyasya /*
*indrasyeva pra tavasaskṛtāni vandadvārā vandamānā vivaṣṭu //6 //*

सा. (Sv.) ७४९-७५०

एना वो अग्निं नमसोर्जो नपातमा हुवे ।
प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतम् ॥१॥
स योजते अरुषा विश्वमोजसा स दुद्रवत्स्वाहुतः ।
सुब्रह्मा यज्ञः सुशमी वसूनां देवं राधो जनानाम् ॥२॥
*enā vo agniṁ namasorjo napātamā huve /*
*priyaṁ chetiṣṭhamaratiṁ svadhvaraṁ viśvasya dūtamamṛtam //1 //*
*sa yojate aruṣā viśvamojasā sa dudravatsvāhutaḥ /*
*subrahmā yajñaḥ suśamī vasūnāṁ devaṁ rādho janānām //2 //*

सा. (Sv.) १२१९-१२२१

अगिं्न वो देवमग्निभिः सजोषा यजिष्ठं दूतमध्वरे कृणुध्वम् ।
यो मर्त्येषु निध्रुविऋर्तावा तपुर्मूर्धा घृतान्नः पावकः ॥१॥
प्रोथदश्वो न यवसेऽविष्यन्यदा महः संवरणाद्व्यस्थात् ।
आदस्य वातो अनु वाति शोचिरध स्म ते वज्रनं कृष्णमस्ति ॥२॥
उद्यस्य ते नवजातस्य वृष्णोऽग्ने चरन्त्यजरा इधानाः ।
अच्छा द्यामरुषो धूम एषि सं दूतो अग्न ईयसे हि देवान् ॥३॥
*agiṁna vo devamagnibhiḥ sajoṣā yajiṣṭhaṁ dūtamadhvare kṛṇudhvam /*
*yo martyeṣu nidhruviṛrtāvā tapurmūrdhā ghṛtānnaḥ pāvakaḥ //1 //*
*prothadaśvo na yavase'viṣyanyadā mahaḥ saṁvaraṇādvyasthāt /*
*ādasya vāto anu vāti śochiradha sma te vajranaṁ kṛṣṇamasti //2 //*
*udyasya te navajātasya vṛṣṇo'gne charantyajarā idhānāḥ /*
*achchhā dyāmaruṣo dhūma eṣi saṁ dūto agna īyase hi devān //3 //*

सा. (Sv.) १३०४-१३०६

अगन्म महा नमसा यविष्ठं यो दीदाय समिद्धः स्वे दुरोणे ।

चित्रभानुं रोदसी अन्तरुर्वी स्वाहुतं विश्वतः प्रत्यंचम् ॥१॥
स मह्ना विश्वा दुरितानि साह्वानग्नि ष्टवे दम आ जातवेदाः ।
स नो रक्षिषद्दुरितादवद्यादस्मान्गृणत उत नो मघोनः ॥२॥
त्वं वरुण उत मित्रो अग्ने त्वां वर्धन्ति मतिभिर्वसिष्ठाः ।
त्वे वसु सुषणनानि सन्तु यूयं पात स्वस्तिभिः सदा नः ॥३॥
*aganma mahā namasā yaviṣṭhaṁ yo dīdāya samiddhaḥ sve duroṇe /*
*chitrabhānuṁ rodasī antarurvī svāhutaṁ viśvataḥ pratyaṁcham //1 //*
*sa mahnā viśvā duritāni sāhvānagni ṣṭave dama ā jātavedāḥ /*
*sa no rakṣiṣadduritādavadyādasmāngṛṇata uta no maghonaḥ //2 //*
*tvaṁ varuṇa uta mitro agne tvāṁ vardhanti matibhirvasiṣṭhāḥ /*
*tve vasu suṣaṇanāni santu yūyaṁ pāta svastibhiḥ sadā naḥ //3 //*

सा. (Sv.) १३७३-१३७५

अग्निं नरो दीधितिभिररण्योर्हस्तच्युतं जनयत प्रशस्तम्। दूरेदृशं गृहपतिमथव्युम् ॥१॥
तमग्निमस्ते वसवो न्यृण्वन्त्सुप्रतिचक्षमवसे कुतश्चित्। दक्षाय्यो यो दम आस नित्यः ॥२॥
प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ। त्वा शश्वन्त उप यन्ति वाजाः ॥३॥
*agniṁ naro dīdhitibhiraraṇyorhastachyutaṁ janayata praśastam /*
*dūredṛśaṁ gṛhapatimathavyum //1 //*
*tamagnimaste vasavo nyṛṇvantsupratichakṣamavase kutaśchit /*
*dakṣāyyo yo dama āsa nityaḥ //2 //*
*preddho agne dīdihi puro no'jasrayā sūrmyā yaviṣṭha / tvā śaśvanta upa yanti vājāḥ //3 //*

सा. (Sv.) १५१३-१५१४

देवो वो द्रविणोदाः पूर्णां विवष्ट्वासिचम्। उद्वा सिंचध्वमुप वा पृणध्वमादिद्वो देव ओहते ॥१॥
तं होतारमध्वरस्य प्रचेतसं वह्निं देवा अकृण्वत्।
दधाति रत्नं विधते सुवीर्यमग्निर्जनाय दाशुषे ॥२॥
*devo vo draviṇodāḥ pūrṇāṁ vivaṣṭvāsicham /*
*udvā siṁchadhvamupa vā pṛṇadhvamādidvo deva ohate //1 //*
*taṁ hotāramadhvarasya prachetasaṁ vahniṁ devā akṛṇvat /*
*dadhāti ratnaṁ vidhate suvīryamagnirjanāya dāśuṣe //2 //*

२. अश्विनौ (Aśvinau) - सा. (Sv.) ३०४; ७५३-७५४

सा. (Sv.) ३०४

इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना ।
अयं वामह्वेऽवसे शचीवसू विशं विशं हि गच्छथः ॥२॥
*imā u vāṁ diviṣṭaya usrā havante aśvinā /*
*ayaṁ vāmahve'vase śachīvasū viśaṁ viśaṁ hi gachchhathaḥ //2 //*

सा. (Sv.) ७५३-७५४

इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना ।
अयं वामह्वेऽवसे शचीवसू विशंविशं हि गच्छथः ॥१॥
युवं चित्रं ददथुर्भोजनं नरा चोदेथां सूनृतावते ।
अर्वाग्रथं समनसा नि यच्छतं पिबतं सोम्य मधु ॥२॥
*imā u vāṁ diviṣṭaya usrā havante aśvinā /*
*ayaṁ vāmahve'vase śachīvasū viśaṁviśaṁ hi gachchhathaḥ //1 //*
*yuvaṁ chitraṁ dadathurbhojanaṁ narā chodethāṁ sūnṛtāvate /*
*arvāgrathaṁ samanasā ni yachchhataṁ pibataṁ somya madhu //2 //*

३. आदित्यः (Ādityaḥ) - सा. (Sv.) १३५१-५३; १०६७-१०६९

सा. (Sv.) १३५१-५३

यदद्य सूर उदितेऽनागा मित्रो अर्यमा। सुवाति सविता भगः ॥१॥
सुप्रावीरस्तु स क्षयः प्र नु यामन्त्सुदानवः। ये नो अंहोऽतिपिप्रति ॥२॥
उत स्वराजो अदितिरदब्धस्य व्रतस्य ये। महो राजान ईशते ॥३॥

*yadadya sūra udite'nāgā mitro aryamā / suvāti savitā bhagaḥ //1 //*
*suprāvīrastu sa kṣayaḥ pra nu yāmantsudānavaḥ / ye no aṁho'tipiprati //2 //*
*uta svarājo aditiradabdhasya vratasya ye / maho rājāna īśate //3 //*

सा. (Sv.) १०६७-१०६९

प्रति वां सूर उदिते मित्रं गृणीषे वरुणम्। अर्यमणं रिशादसम् ॥१॥
राया हिरण्यया मतिरियमवृकाय शवसे। इयं विप्रा मेधसातये ॥२॥
ते स्याम देव वरुण ते मित्र सूरिभिः सह। इषं स्वश्च धीमहि ॥३॥
*prati vāṁ sūra udite mitraṁ gṛṇīṣe varuṇam / aryamaṇaṁ riśādasam //1 //*
*rāyā hiraṇyayā matiriyamavṛkāya śavase / iyaṁ viprā medhasātaye //2 //*
*te syāma deva varuṇa te mitra sūribhiḥ saha / iṣaṁ svaścha dhīmahi //3 //*

४. इन्द्रः (Indraḥ) - सा. (Sv.) १३२; १५६; २३३; २३८; २५९; २७०; २८०; २८४; २८५; २९३; ३०९; ३१०; ३१३; ३१४; ३१८; ३२८; ३३०; ३९८; ५८७; ७१६-७१८; ७३४-७३६; ८६७-८६८; ६८०-६८१; १४५६-१४५७; १६७५-१६७६; १६८२-१६८३; १७९३-१८००

सा. (Sv.) १३२

वयमिन्द्र त्वायवोऽभि प्र नोनुमो वृषन्। विद्धी त्वा ३ स्य नो वसो ॥८॥
*vayamindra tvāyavo'bhi pra nonumo vṛṣan / viddhī tvā 3 sya no vaso //8 //*

सा. (Sv.) १५६

प्र व इन्द्राय मादनं हर्यश्वाय गायत। सखायः सोमपाव ने ॥२॥
*pra va indrāya mādanaṁ haryaśvāya gāyata / sakhāyaḥ somapāva ne //2 //*

सा. (Sv.) २३३

अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः। ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥१॥
*abhi tvā śūra nonumo'dugdhā iva dhenavaḥ /*
*īśānamasya jagataḥ svardṛśamīśānamindra tasthuṣaḥ //1 //*

सा. (Sv.) २३८

तरणिरित्सिषासति वाजं पुरन्ध्या युजा। आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्रुवम् ॥६॥
*taraṇiritsiṣāsati vājaṁ purandhyā yujā / ā va indraṁ puruhūtaṁ name girā nemiṁ taṣṭeva sudruvam //6 //*

सा. (Sv.) २५९

इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि ॥७॥
*indra kratuṁ na ā bhara pitā putrebhyo yathā /*
*śikṣā ṇo asminpuruhūta yāmani jīvā jyotiraśīmahi //7 //*

सा. (Sv.) २७०

तवेदिन्द्रावमं वसु त्वं पुष्यसि मध्यमम् ।
सत्रा विश्वस्य परमस्य राजसि न किष्ट्वा गोषु वृण्वते ॥८॥
*tavedindrāvamaṁ vasu tvaṁ puṣyasi madhyamam /*
*satrā viśvasya paramasya rājasi na kiṣṭvā goṣu vṛṇvate //8 //*

सा. (Sv.) २८०

कस्मिन्द्र त्वा वसवा मर्त्यो दधर्षति ।
श्रद्धा हि ते मघवन्पार्ये दिवि वाजी वाजं सिषासति ॥८॥
*kasmindra tvā vasavā martyo dadharṣati /*
*śraddhā hi te maghavanpārye divi vājī vājaṁ siṣāsati //8 //*

सा. (Sv.) २८४-२८५

मो षु त्वा वाघतश्च नारे अस्मन्नि रीरमन् ।
आरात्ताद्वा सधमादं न आ गहीह वा सन्नुप श्रुधि ॥२॥
सुनोता सोमपाव्ने सोममिन्द्राय वज्रिणे ।
पचता पक्तीरवसे कृणुध्वमित्पृणन्नित्पृणते मयः ॥३॥

*mo ṣu tvā vāghataścha nāre asmanni rīraman /*
*ārāttādvā sadhamādaṁ na ā gahīha vā sannupa śrudhi //2 //*
*sunotā somapāvne somamindrāya vajriṇe /*
*pachatā paktīravase kṛṇudhvamitpṛṇannitpṛṇate mayaḥ //3 //*

सा. (Sv.) २९३

इम इन्द्राय सुन्विरे सोमासो दध्याशिरः ।
ताँ आ मदाय वज्रहस्त पीतये हरिभ्यां याह्योक आ ॥१॥
*ima indrāya sunvire somāso dadhyāśiraḥ /*
*tām̐ ā madāya vajrahasta pītaye haribhyāṁ yāhyoka ā //1 //*

सा. (Sv.) ३०९-३१०

अभीषतस्तदा भरेन्द्र ज्यायः कनीयसः। पुरूवसुर्हि मघवन्बभूविथ भरेभरे च हव्यः ॥७॥
यदिन्द्र यावतस्त्वमेतावदहमीशीय। स्तोतारमिद्दधिषे रदावसो न पापत्वाय रंसिषम् ॥८॥
*abhīṣatastadā bharendra jyāyaḥ kanīyasaḥ /*
*purūvasurhi maghavanbabhūvitha bharebhare cha havyaḥ //7 //*
*yadindra yāvatastvametāvadahamīśīya /*
*stotāramiddadhiṣe radāvaso na pāpatvāya raṁsiṣam //8 //*

सा. (Sv.) ३१३-३१४

असावि देवं गोऋजीकमन्धो न्यस्मिन्निन्द्रो जनुषेमुवोच ।
बोधमसि त्वा हर्यश्व यज्ञैर्बोधा न स्तोममन्धसो मदेषु ॥१॥
योनिष्ट इन्द्र सदने अकारि तमा नृभिः पुरुहूत प्र याहि ।
असो यथा नोऽविता वृधश्चिद्ददो वसूनि ममदश्च सोमैः ॥२॥
*asāvi devaṁ gorjīkamandho nyasminnindro januṣemuvocha /*
*bodhamasi tvā haryaśva yajñairbodhā na stomamandhaso madeṣu //1 //*
*yoniṣṭa indra sadane akāri tamā nṛbhiḥ puruhūta pra yāhi /*
*aso yathā no'vitā vṛdhaśchiddado vasūni mamadaścha somaiḥ //2 //*

सा. (Sv.) ३१८

इन्द्रं नरो नेमधिता हवन्ते यत्पार्या युनजते धियस्ताः ।
शूरो नृषाता श्रवसश्च काम आ गोमति व्रजे भजा त्वं नः ॥६॥
*indraṁ naro nemadhitā havante yatpāryā yunajate dhiyastāḥ /*
*śūro nṛṣātā śravasaścha kāma ā gomati vraje bhajā tvaṁ naḥ //6 //*

सा. (Sv.) ३२८

प्र वो महे महे वृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम्। विशः पूर्वी प्र चर चर्षणिप्राः ॥६॥
*pra vo mahe mahe vṛdhe bharadhvaṁ prachetase pra sumatiṁ kṛṇudhvam / viśaḥ pūrvī pra chara charṣaṇiprāḥ //6 //*

सा. (Sv.) ३३०

उदु ब्रह्माण्यैरत श्रवस्येन्द्रं समर्ये महया वसिष्ठ ।
आ यो विश्वानि श्रवसा ततानोपश्रोता म ईवतो वचांसि ॥८॥
*udu brahmāṇyairata śravasyendraṁ samarye mahayā vasiṣṭha /*
*ā yo viśvāni śravasā tatānopaśrotā ma īvato vachāṁsi //8 //*

सा. (Sv.) ३९८

पिबा सोममिन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः। सोतुर्बाहुभ्यां सुयतो नार्वा ॥८॥
*pibā somamindra mandatu tvā yaṁ te suṣāva haryaśvādriḥ / soturbāhubhyāṁ suyato nārvā //8 //*

सा. (Sv.) ५८७

इन्द्रो राजा जगतश्चर्षणीनामधि क्षमा विश्वरूपं यदस्य ।
ततो ददाति दाशुषे वसूनि चोदद्राध उपस्तुतं चिदर्वाक् ॥२॥
*indro rājā jagataścharṣaṇīnāmadhi kṣamā viśvarūpaṁ yadasya /*
*tato dadāti dāśuṣe vasūni chodadrādha upastutaṁ chidarvāk //2 //*

सा. (Sv.) ७१६-७१८

प्र व इन्द्राय मादनं हर्यश्वाय गायत। सखायः सोमपाव्ने ॥१॥
शंसेदुक्थं सुदानव उत द्युक्षं यथा नरः। यकृमा सत्यराधसे ॥२॥
त्वं न इन्द्र वाजयुस्त्वं गव्युः शतक्रतो। त्वं हिरण्ययुर्वसो ॥३॥
*pra va indrāya mādanaṁ haryaśvāya gāyata | sakhāyaḥ somapāvne ||1 ||*
*śaṁsedukthaṁ sudānava uta dyukṣaṁ yathā naraḥ | yakṛmā satyarādhase ||2 ||*
*tvaṁ na indra vājayustvaṁ gavyuḥ śatakrato | tvaṁ hiraṇyayurvaso ||3 ||*

सा. (Sv.) ७३४-७३६

इदं वसो सुतमन्धः पिबा सुपूर्णमुदरम्। अनाभयिन्नरिमा ते ॥१॥
नृभिर्धौतः सुतो अश्नैरव्या वारैः परिपूतः। अश्वो न निक्तो नदीषु ॥२॥
तं ते यवं यथा गोभिः स्वादुमकर्म श्रीणन्तः। इन्द्र त्वास्मिन्त्सधमादे ॥३॥
*idaṁ vaso sutamandhaḥ pibā supūrṇamudaram | anābhayinnarimā te ||1 ||*
*nṛbhirdhautaḥ suto aśnairavyā vāraiḥ paripūtaḥ | aśvo na nikto nadīṣu ||2 ||*
*taṁ te yavaṁ yathā gobhiḥ svādumakarma śrīṇantaḥ | indra tvāsmintsadhamāde ||3 ||*

सा. (Sv.) ८६७-८६८

तरणिरित्सिषासति वाजं पुरंध्या युजा ।
आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्रुवम् ॥१॥
न दुष्टुतिर्द्रविणोदेषु शस्यते न स्रेधन्तं रयिर्नशत् ।
सुशक्तिरिन्मघवन् तुभ्यं मावते देष्णं यत्पार्ये दिवि ॥२॥
*taraṇiritsiṣāsati vājaṁ puraṁdhyā yujā |*
*ā va indraṁ puruhūtaṁ name girā nemiṁ taṣṭeva sudruvam ||1 ||*
*na duṣṭutirdraviṇodeṣu śasyate na sredhantaṁ rayirnaśat |*
*suśaktirinmaghavan tubhyaṁ māvate deṣṇaṁ yatpārye divi ||2 ||*

सा. (Sv.) ६८०-६८१

सा. (Sv.) ६८०-६८१

अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः ।
ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥१॥
न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥२॥
*abhi tvā śūra nonumo'dugdhā iva dhenavaḥ |*
*īśānamasya jagataḥ svardṛśamīśānamindra tasthuṣaḥ ||1 ||*
*na tvāvām̐ anyo divyo na pārthivo na jāto na janiṣyate |*
*aśvāyanto maghavannindra vājino gavyantastvā havāmahe ||2 ||*

सा. (Sv.) १४५६-१४५७

इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि ॥१॥
मा नो अज्ञाता वृजना दुराध्यो३ माशिवासोऽव क्रमुः ।
त्वया वयं प्रवतः शश्वतीरपोऽति शूर तरामसि ॥२॥
*indra kratuṁ na ā bhara pitā putrebhyo yathā |*
*śikṣā ṇo asminpuruhūta yāmani jīvā jyotiraśīmahi ||1 ||*
*mā no ajñātā vṛjanā durādhyo3 māśivāso'va kramuḥ |*
*tvayā vayaṁ pravataḥ śaśvatīrapo'ti śūra tarāmasi ||2 ||*

सा. (Sv.) १६७५-१६७६

मो षु त्वा वाघतश्च नारे अस्मन्नि रीरमन् ।
आरात्ताद्वा सधमादं न आ गहीह वा सन्नुप श्रुधि ॥१॥
इमे हि ते ब्रह्मकृतः सु ते सचा मधौ न मक्ष आसते ।
इन्द्रे कामं जरितारो वसूयवो रथे न पादमा दधुः ॥२॥
*mo ṣu tvā vāghataśca nāre asmanni rīraman |*
*ārāttādvā sadhamādaṁ na ā gahīha vā sannupa śrudhi ||1 ||*

*ime hi te brahmakṛtaḥ su te sachā madhau na makṣa āsate /*
*indre kāmaṁ jaritāro vasūyavo rathe na pādamā dadhuḥ //2 //*

सा. (Sv.) १६८२-१६८३

कस्तमिन्द्र त्वा वसवा मर्त्यो दधर्षति ।
श्रद्धा इत् ते मघवन् पार्ये दिवि वाजी वाजं सिषासति ॥१॥
मघोनः स्म वृत्रहत्येषु चोदय ये ददति प्रिया वसु ।
तव प्रणीती हर्यश्व सूरिभिर्विश्वा तरेम दुरिता ॥२॥
*kastamindra tvā vasavā martyo dadharṣati /*
*śraddhā it te maghavan pārye divi vājī vājaṁ siṣāsati //1 //*
*maghonaḥ sma vṛtrahatyeṣu chodaya ye dadati priyā vasu /*
*tava praṇītī haryaśva sūribhirviśvā tarema duritā //2 //*

सा. (Sv.) १७९३-१८००

प्र वो महे महेवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम्। विशः पूर्वीः प्र चर चर्षणिप्राः ॥१॥
उरुव्यचसे महिने सुवृक्तिमिन्द्राय ब्रह्म जनयन्त विप्राः। तस्य व्रतानि न मिनन्ति धीराः ॥२॥
इन्द्रं वाणीरनुत्तमन्युमेव सत्रा राजानं दधिरे सहध्यै । हर्यश्वाय बर्हया समापीन् ॥३॥
यदिन्द्र यावतस्त्वमेतावदहमीशीय । स्तोतारमिद्दधिषे रदावसो न पापत्वाय रंसिषम् ॥४॥
शिक्षेयमिन्महयते दिवेदिवे राय आ कुहचिद्विदे । न हि त्वदन्यन्मघवन्न आप्यं वस्यो अस्ति पिता च न ॥५॥
श्रुधी हवं विपिपानस्याद्रेर्बोधा विप्रस्यार्चतो मनीषाम् । कृष्वा दुवांस्यन्तमा सचेमा ॥१॥
न ते गिरो अपि मृष्ये तुरस्य न सुष्टुतिमसुर्यस्य विद्वान् । सदा ते नाम स्वयशो विवक्मि ॥२॥
भूरि हि ते सवना मानुषेषु भूरि मनीषी हवते त्वामित् । मारे अस्मन्मघवं ज्योक्कः ॥३॥
*pra vo mahe mahevṛdhe bharadhvaṁ prachetase pra sumatiṁ kṛṇudhvam /*
*viśaḥ pūrvīḥ pra chara charṣaṇiprāḥ //1 //*
*uruvyachase mahine suvṛktimindrāya brahma janayanta viprāḥ /*
*tasya vratāni na minanti dhīrāḥ //2 //*
*indraṁ vāṇīranuttamanyumeva satrā rājānaṁ dadhire sahadhyai /*
*haryaśvāya barhayā samāpīn //3 //*
*yadindra yāvatastvametāvadahamīśīya /*
*stotāramiddadhiṣe radāvaso na pāpatvāya raṁsiṣam //4 //*
*śikṣeyaminmahayate divedive rāya ā kuhachidvide /*
*na hi tvadanyanmaghavanna āpyaṁ vasyo asti pitā cha na //5 //*
*śrudhī havaṁ vipipānasyādrerbodhā viprasyārchato manīṣām /*
*kṛṣvā duvāṁsyantamā sachemā //1 //*
*na te giro api mṛṣye turasya na suṣṭutimasuryasya vidvān /*
*sadā te nāma svayaśo vivakmi //2 //*
*bhūri hi te savanā mānuṣeṣu bhūri manīṣī havate tvāmit /*
*māre asmanmaghavaṁ jyokkaḥ //3 //*

५. इन्द्राग्नी (Indrāgnī) - सा. (Sv.) ९१६-९१८; ९२७-९२९; ८००-८०२

सा. (Sv.) ९१६-९१८

इयं वामस्य मन्मन इन्द्राग्नी पूर्व्यस्तुतिः। अभ्राद्वृष्टिरिवाजनि ॥१॥
शृणुतं जरितुर्हवमिन्द्राग्नी वनतं गिरः। ईशाना पिप्यतं धियः ॥२॥
मा पापत्वाय नो नरेन्द्राग्नी माभिशस्तये। मा नो रीरधतं निदे ॥३॥
*iyaṁ vāmasya manmana indrāgnī pūrvyastutiḥ / abhrādvṛṣṭirivājani //1 //*
*śṛṇutaṁ jariturhavamindrāgnī vanataṁ giraḥ / īśānā pipyataṁ dhiyaḥ //2 //*
*mā pāpatvāya no narendrāgnī mābhiśastaye / mā no rīradhataṁ nide //3 //*

सा. (Sv.) ९२७-९२९

पिबा सोममिन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः। सोतुर्बाहुभ्यां सुयतो नार्वा ॥१॥
यस्ते मदो युज्यश्चारुरस्ति येन वृत्राणि हर्यश्व हंसि। स त्वामिन्द्र प्रभूवसो ममत्तु ॥२॥
बोधा सु मे मघवन्वाचमेमां यां ते वसिष्ठो अर्चति प्रशस्तिम्। इमा ब्रह्म सधमादे जुषस्व ॥३॥
*pibā somamindra mandatu tvā yaṁ te suṣāva haryaśvādriḥ / soturbāhubhyāṁ suyato nārvā //1 //*

*yaste mado yujyaśchārurasti yena vṛtrāṇi haryaśva haṁsi । sa tvāmindra prabhūvaso mamattu ॥2 ॥*
*bodhā su me maghavanvāchamemāṁ yāṁ te vasiṣṭho archati praśastim ।*
*imā brahma sadhamāde juṣasva ॥3 ॥*

सा. (Sv.) ८००-८०२

इन्द्रे अग्ना नमो बृहत्सुवृक्तिमेरयामहे। धिया धेना अवस्यवः ॥१॥
ता हि शश्वन्त ईडत इत्था विप्राय ऊतये। सबाधो वाजसातये ॥२॥
ता वां गीर्भिर्विपन्यवः प्रयस्वन्तो हवामहे। मेधसाता सनिष्यवः ॥३॥
*indre agnā namo bṛhatsuvṛktimerayāmahe । dhiyā dhenā avasyavaḥ ॥1 ॥*
*tā hi śaśvanta īḍata itthā viprāya ūtaye । sabādho vājasātaye ॥2 ॥*
*tā vāṁ gīrbhirvipanyavaḥ prayasvanto havāmahe । medhasātā saniṣyavaḥ ॥3 ॥*

६. उषा (Uṣā) - सा. (Sv.) ३०३; ७५१-७५२

सा. (Sv.) ३०३

प्रत्यु अदर्श्यायत्यू३च्छन्ती दुहिता दिवः ।
अपो मही वृणुते चक्षुषा तमो ज्योतिष्कृणोति सूनरी ॥१॥
*pratyu adarśyāyatyū3chchhantī duhitā divaḥ ।*
*apo mahī vṛṇute chakṣuṣā tamo jyotiṣkṛṇoti sūnarī ॥1 ॥*

सा. (Sv.) ७५१-७५२

प्रत्यु अदर्श्यायत्यू३च्छन्ती दुहिता दिवः ।
अपो मही वृणुते चक्षुषा तमो ज्योतिष्कृणोति सूनरी ॥१॥
उदुस्रियाः सृजते सूर्यः सचा उद्यन्नक्षत्रमर्चिवत् ।
तवेदुषो व्युषि सूर्यस्य च सं भक्तेन गमेमहि ॥२॥
*pratyu adarśyāyatyū3chchhantī duhitā divaḥ ।*
*apo mahī vṛṇute chakṣuṣā tamo jyotiṣkṛṇoti sūnarī ॥1 ॥*
*udusriyāḥ sṛjate sūryaḥ sachā udyannakṣatramarchivat ।*
*taveduṣo vyuṣi sūryasya cha saṁ bhaktena gamemahi ॥2 ॥*

७. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ५२६; ५२८; ५३६; १३९९-१४०१; १४०८-१४१०

सा. (Sv.) ५२६

अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसम् ।
सुतः पवित्रं पर्येति रेभन् मितेव सद्म पशुमन्ति होता ॥४॥
*asya preṣā hemanā pūyamāno devo devebhiḥ samapṛkta rasam ।*
*sutaḥ pavitraṁ paryeti rebhan miteva sadma paśumanti hotā ॥4 ॥*

सा. (Sv.) ५२८

अभि त्रिपृष्ठं वृष्णं वयोधामंगोषिणमवावशन्त वाणीः ।
वना वसानो वरुणो न सिन्धुर्वि रत्नधा दयते वार्याणि ॥६॥
*abhi tripṛṣṭhaṁ vṛṣṇaṁ vayodhāmaṁgoṣiṇamavāvaśanta vāṇīḥ ।*
*vanā vasāno varuṇo na sindhurvi ratnadhā dayate vāryāṇi ॥6 ॥*

सा. (Sv.) ५३६

प्र हिन्वानो जनिता रोदस्यो रथो न वाजं सनिषन्नयासीत् ।
इन्द्रं गच्छन्नायुधा संशिशानो विश्वा वसु हस्तयोरादधानः ॥४॥
*pra hinvāno janitā rodasyo ratho na vājaṁ saniṣannayāsīt ।*
*indraṁ gachchhannāyudhā saṁśiśāno viśvā vasu hastayorādadhānaḥ ॥4 ॥*

सा. (Sv.) १३९९-१४०१

अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसम् ।
सुतः पवित्रं पर्येति रेभन्मितेव सद्म पशुमन्ति होता ॥१॥
भद्रा वस्त्रा समन्या३वसानो महान्कविर्निवचनानि शंसन् ।

आ वच्यस्व चम्वोः पूयमानो विचक्षणो जागृविर्देववीतौ ॥२॥
समु प्रियो मृज्यते सानो अव्ये यशस्तरो यशसां क्षैतो अस्मे ।
अभि स्वर धन्वा पूयमानो यूयं पात स्वस्तिभिः सदा नः ॥३॥
*asya preṣā hemanā pūyamāno devo devebhiḥ samapṛkta rasam /*
*sutaḥ pavitraṁ paryeti rebhanmiteva sadma paśumanti hotā //1 //*
*bhadrā vastrā samanyā3vasāno mahānkavirnivachanāni śaṁsan /*
*ā vachyasva chamvoḥ pūyamāno vichakṣaṇo jāgṛvirdevavītau //2 //*
*samu priyo mṛjyate sāno avye yaśastaro yaśasāṁ kṣaito asme /*
*abhi svara dhanvā pūyamāno yūyaṁ pāta svastibhiḥ sadā naḥ //3 //*

सा. (Sv.) १४०८-१४१०

अभि त्रिपृष्ठं वृषणं वयोधामंगोषिणमवावशंत वाणीः ।
वना वसानो वरुणो न सिन्धुर्वि रत्नधा दयते वार्याणि ॥१॥
शूरग्रामः सर्ववीरः सहावान् जेता पवस्व सनिता धनानि ।
तिग्मायुधः क्षिप्रधन्वा समतस्वषाढः साह्वान्पृतनासु शत्रून् ॥२॥
उरुगव्यूतिरभयानि कृण्वन्त्समीचीने आ पवस्वा पुरन्धी ।
अपः सिषासन्नुषसः स्वऽ३र्गाः सं चिक्रदो महो अस्मभ्यं वाजान् ॥३॥
*abhi tripṛṣṭhaṁ vṛṣaṇaṁ vayodhāmaṁgoṣiṇamavāvaśaṁta vāṇīḥ /*
*vanā vasāno varuṇo na sindhurvi ratnadhā dayate vāryāṇi //1 //*
*śūragrāmaḥ sarvavīraḥ sahāvān jetā pavasva sanitā dhanāni /*
*tigmāyudhaḥ kṣipradhanvā samatasvaṣāḍhaḥ sāhvānpṛtanāsu śatrūn //2 //*
*urugavyūtirabhayāni kṛṇvantsamīchīne ā pavasvā purandhī /*
*apaḥ siṣāsannuṣasaḥ sva'3rgāḥ saṁ chikrado maho asmabhyaṁ vājān //3 //*

८. मरुतः (Marutaḥ) - सा. (Sv.) २४१; ४३३

सा. (Sv.) २४१

न हि वश्चरमं च न वसिष्ठः परिमंसते ।
अस्माकमद्य मरुतः सुते सचा विश्वे पिबन्तु कामिनः ॥९॥
*na hi vaścharamaṁ cha na vasiṣṭhaḥ parimaṁsate /*
*asmākamadya marutaḥ sute sachā viśve pibantu kāminaḥ //9 //*

सा. (Sv.) ४३३

क ईं वयक्ता नरः सनीडा रुद्रस्य मर्या अथा स्वश्वाः ॥७॥
*ka īṁ vayaktā naraḥ sanīḍā rudrasya maryā athā svaśvāḥ //7 //*

९. विष्णुः (Viṣṇuḥ) - सा. (Sv.) १६२५-१६२७

किमित्ते विष्णो परिचक्षि नाम प्र यद्ववक्षे शिपिविष्टो अस्मि ।
मा वर्पो अस्मदप गूह एतद्यदन्यरूपः समिथे बभूथ ॥१॥
प्र तत्ते अद्य शिपिविष्ट हव्यमर्यः शंसामि वयुनानि विद्वान् ।
तं त्वा गृणामि तवसमतव्यान्क्षयन्त मस्य रजसः पराके ॥२॥
वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥३॥
*kimitte viṣṇo parichakṣi nāma pra yadvavakṣe śipiviṣṭo asmi /*
*mā varpo asmadapa gūha etadyadanyarūpaḥ samithe babhūtha //1 //*
*pra tatte adya śipiviṣṭa havyamaryaḥ śaṁsāmi vayunāni vidvān /*
*taṁ tvā gṛṇāmi tavasamatavyānkṣayanta masya rajasaḥ parāke //2 //*
*vaṣaṭ te viṣṇavāsa ā kṛṇomi tanme juṣasva śipiviṣṭa havyam /*
*vardhantu tvā suṣṭutayo giro me yūyaṁ pāta svastibhiḥ sadā naḥ //3 //*

१०. सरस्वान् (Sarasvān) - सा. (Sv.) १४६०

जनीयन्तो न्वग्रवः पुत्रीयन्तः सुदानवः। सरस्वन्तं हवामहे ॥१॥
*janīyanto nvagravaḥ putrīyantaḥ sudānavaḥ / sarasvantaṁ havāmahe //1 //*

**५६६. वासिष्ठो मैत्रावैरुणिः (साग्री. सास्वा.); वामदेव (सार्षेदी.) (Vāsiṣṭho Maitrāvairuṇiḥ [Ssb. Sas.];**

Vāmadeva [Sad.])

१. अग्निः (Agniḥ) - सा. (Sv.) २४

अग्ने रक्षा णो अं हसः प्रति स्म देव रीषतः। तपिष्ठैरजरो दह ॥४॥
*agne rakṣā ṇo aṁ hasaḥ prati sma deva rīṣataḥ । tapiṣṭhairajaro daha ॥4॥*

२. इन्द्रः (Indraḥ) - सा. (Sv.) ४५६

इन्द्रो विश्वस्य राजति ॥१०॥
*indro viśvasya rājati ॥10॥*

## ५६७. वसिष्ठः शक्तिर्वा (Vasiṣṭhaḥ Śaktirvā)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ७.३२.२६२

इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि ॥२६॥
*indra kratuṁ na ā bhara pitā putrebhyo yathā ।*
*śikṣā ṇo asminpuruhūta yāmani jīvā jyotiraśīmahi ॥26॥*

## ५६८. वासुर् भरद्वाजः (Vāsur Bharadvājaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ५६२; १३१६-१३१८

सा. (Sv.) ५६२

असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।
पुनानो वारमत्येष्यव्ययं श्येनो न योनिं घृतवन्तमासदत् ॥९॥
*asāvi somo aruṣo vṛṣā harī rājeva dasmo abhi gā achikradat ।*
*punāno vāramatyeṣyavyayaṁ śyeno na yoniṁ ghṛtavantamāsadat ॥9॥*

सा. (Sv.) १३१६-१३१८

असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।
पुनानो वारमत्येष्यव्ययं श्येनो न योनिं घृतवन्तमासदत् ॥१॥
पर्जन्य पिता महिषस्य पार्णिनो नाभा पृथिव्या गिरिषु क्षयं दधे ।
स्वसार आपो अभि गा उदासरन्त्सं ग्रावभिर्वसते वीते अध्वरे ॥२॥
कविर्वेधस्या पर्येषि महिनमत्यो न मृष्टो अभि वाजमर्षसि ।
अपसेधन् दुरिता सोम नो मृड घृता वसानः परि यासि निर्णिजम् ॥३॥
*asāvi somo aruṣo vṛṣā harī rājeva dasmo abhi gā achikradat ।*
*punāno vāramatyeṣyavyayaṁ śyeno na yoniṁ ghṛtavantamāsadat ॥1॥*
*parjanya pitā mahiṣasya pārṇino nābhā pṛthivyā giriṣu kṣayaṁ dadhe ।*
*svasāra āpo abhi gā udāsarantsaṁ grāvabhirvasate vīte adhvare ॥2॥*
*kavirvedhasyā paryeṣi mahinamatyo na mṛṣṭo abhi vājamarṣasi ।*
*apasedhan duritā soma no mṛḍa ghṛtā vasānaḥ pari yāsi nirṇijam ॥3॥*

## ५६९. वसुकर्णो वासुक्रः (Vasukarṇo Vāsukraḥ)

१. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १०.६५.१-१५; १०.६६.१-१५

ऋ. (Rv.) १०.६५.१-१५

अग्निरिन्द्रो वरुणो मित्रो अर्यमा वायुः पूषा सरस्वती सजोषसः ।
आदित्या विष्णुर्मरुतः स्वर्बृहत्सोमो रुद्रो अदितिर्ब्रणस्पतिः ॥१॥
इन्द्राग्नी वृत्रहत्येषु सत्पती मिथो हिन्वाना तन्वा३ समोकसा ।
अन्तरिक्षं मह्या पप्रुरोजसा सोमो घृतश्रीर्महिमानमीरयन् ॥२॥
तेषां हि मह्ना महतामनर्वणां स्तोमाँ इयर्म्यृतज्ञा ऋतावृधाम् ।
ये अप्सवमर्णवं चित्रराधसस्ते नो रासन्तां महये सुमित्र्याः ॥३॥
स्वर्णरमन्तरिक्षाणि रोचना द्यावाभूमी पृथिवीं स्कम्भुरोजसा ।
पृक्षाइव महयन्तः सुरातयो देवाः स्तवन्ते मनुषाय सूरयः ॥४॥
मित्राय शिक्ष वरुणाय दाशुषे या सम्राजा मनसा न प्रयुच्छतः ।

ययोर्धाम धर्मणा रोचते बृहद्ययोरुभे रोदसी नाधसी वृतौ ॥५॥
या गौर्वर्तनिं पर्येति निष्कृतं पयो दुहाना व्रतनीरवारतः ।
सा प्रब्रुवाणा वरुणाय दाशुषे देवेभ्यो दाशद्धविषा विवस्वते ॥६॥
दिवक्षसो अग्निजिह्वा ऋतावृध ऋतस्य योनिं विमृशन्त आसते ।
द्यां स्कभित्व्य१ प आ चक्रुरोजसा यज्ञं जनित्वी तन्वी३ नि मामृजुः ॥७॥
परिक्षिता पितरा पूर्वजावरी ऋतस्य योना क्षयतः समोकसा ।
द्यावापृथिवी वरुणाय सव्रते घृतवत्पयो महिषाय पिन्वतः ॥८॥
पर्जन्यावाता वृषभा पुरीषिणेन्द्रवायू वरुणो मित्रे अर्यमा ।
देवाँ आदित्याँ अदितिं हवामहे ये पार्थिवासो दिव्यासो अप्सु ये ॥९॥
त्वष्टारं वायुमृभवो य ओहते दैव्या होतारा उषसं स्वस्तये ।
बृहस्पतिं वृत्रखादं सुमेधसमिन्द्रियं सोमं धनसा उ ईमहे ॥१०॥
ब्रह्म गामश्वं जनयन्त ओषधीर्वनस्पतीन्पृथिवीं पर्वताँ अपः ।
सूर्यं दिवि रोहयन्तः सुदानव आर्या व्रता विसृजन्तो अधि क्षमि ॥११॥
भुज्युमंहसः पिपृथो निरश्विना श्यावं पुत्रं वध्रिमत्या अजिन्वतम् ।
कमद्युवं विमदायोहथुर्युवं विष्णाप्वं१ विश्वकायाव सृजथः ॥१२॥
पावीरवी तन्यतुरेकपादजो दिवो धर्ता सिन्धुरापः समुद्रियः ।
विश्वे देवाः सह धीभिः पुरन्ध्या मनोर्यजत्रा अमृता ऋतज्ञाः ।
रातिषाचो अभिषाचः स्वर्विदः स्व१ र्गिरो ब्रह्म सूक्तं जुषेरत ॥१४॥
देवान्वस्ष्ठिो अमृतान्ववन्दे ये विश्वा भुवनाभि प्रतस्थुः ।
ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ॥१५॥

*agnirindro varuṇo mitro aryamā vāyuḥ pūṣā sarasvatī sajoṣasaḥ /*
*ādityā viṣṇurmarutaḥ svarbṛhatsomo rudro aditirbraṇaspatiḥ //1 //*
*indrāgnī vṛtrahatyeṣu satpatī mitho hinvānā tanvā3 samokasā /*
*antarikṣaṁ mahyā paprurojasā somo ghṛtaśrīrmahimānamīrayan //2 //*
*teṣāṁ hi mahnā mahatāmanarvaṇāṁ stomām̐ iyarmyṛtajñā ṛtāvṛdhām /*
*ye apsavamarṇavaṁ chitrarādhasaste no rāsantāṁ mahaye sumitrayāḥ //3 //*
*svarṇaramantarikṣāṇi rochanā dyāvābhūmī pṛthivīṁ skambhurojasā /*
*pṛkṣāiva mahayantaḥ surātayeā devāḥ stavante manuṣāya sūrayaḥ //4 //*
*mitrāya śikṣa varuṇāya dāśuṣe yā samrājā manasā na prayuchchhataḥ /*
*yayordhāma dharmaṇā rochate bṛhadyayorubhe rodasī nādhasī vṛtau //5 //*
*yā gaurvartāniṁ paryeti niṣkṛtaṁ payo duhānā vratanīravārataḥ /*
*sā prabruvāṇā varuṇāya dāśuṣe devebhyo dāśaddhaviṣā vivasvate //6 //*
*divakṣaso agnijihvā ṛtāvṛdha ṛtasya yoniṁ vimṛśanta āsate /*
*dyāṁ skabhitvya1 pa ā chakrurojasā yajñaṁ janitvī tanvī3 ni māmṛjuḥ //7 //*
*parikṣitā pitarā pūrvajāvarī ṛtasya yonā kṣayataḥ samokasā /*
*dyāvāpṛthivī varuṇāya savrate ghṛtavatpayo mahiṣāya pinvataḥ //8 //*
*parjanyāvātā vṛṣabhā purīṣiṇendravāyū varuṇo mitre aryamā /*
*devām̐ ādityām̐ aditiṁ havāmahe ye pārthivāso divyāso apsu ye //9 //*
*tvaṣṭāraṁ vāyumṛbhavo ya ohate daivyā hotārā uṣasaṁ svastaye /*
*bṛhaspatiṁ vṛtrakhādaṁ sumedhasamindriyaṁ somaṁ dhanasā u īmahe //10 //*
*brahma gāmaśvaṁ janayanta oṣadhīrvanaspatīnpṛthivīṁ parvatām̐ apaḥ /*
*sūryaṁ divi rohayantaḥ sudānava āryā vratā visṛjanto adhi kṣami //11 //*
*bhujyumaṁhasaḥ pipṛtho niraśvinā śyāvaṁ putraṁ vadhrimatyā ajinvatam /*
*kamadyuvaṁ vimadāyohathuryuvaṁ viṣṇāpvaṁ1 viśvakāyāva sṛjathaḥ //12 //*
*pāvīravī tanyaturekapādajo divo dhartā sindhurāṣaḥ samudriyaḥ /*
*viśve devāḥ saha dhībhiḥ purandhyā manoryajatrā amṛtā ṛtajñāḥ /*
*rātiṣācho abhiṣāchaḥ svarvidaḥ sva1 rgiro brahma sūktaṁ juṣerata //14 //*
*devānvasṣṭhio amṛtānvavande ye viśvā bhuvanābhi pratasthuḥ /*
*te no rāsantāmurugāyamadya yūyaṁ pāta svastibhiḥ sadā naḥ //15 //*

ऋ. (Rv.) १०.६६.१-१५

देवान्हुवे बृहच्छ्रवसः स्वस्तये ज्योतिष्कृतो अध्वरस्य प्रचेतसः ।

ये वावृधुः प्रतरं विश्वेदस इन्द्रजयेष्ठासो अमृता ऋतावृधः ॥१॥
इन्द्रप्रसूता वरुणप्रशिष्टा ये सूर्यस्य ज्योतिषो भागमानशुः ।
मरुद्गणे वृजने मन्म धीमहि माघोने यज्ञं जनयन्त सूरयः ॥२॥
इन्द्रो वसुभिः परि पातु नो गयमादित्यैर्नो अदितिः शर्म यच्छतु ।
रुद्रो रुद्रेभिर्देवो मृळयाति नस्त्वष्टा नो ग्नाभिः सुविताय जिन्वतु ॥३॥
अदितिर्द्यावापृथिवी ऋतं महदिन्द्राविष्णू मरुतः स्वर्बृहत् ।
देवाँ आदित्याँ अवसे हवामहे वसुन्रुद्रान्त्सवितारं सुदंससम् ॥४॥
सरस्वान्धीभिर्वरुणो धृतव्रतः पूषा विष्णुर्महिमा वायुरश्विना ।
ब्रह्मकृतो अमृता विश्ववेदसः शर्म नो यंसन् त्रिवरूथमंहसः ॥५॥
वृषा यज्ञो वृषणः सन्तु यज्ञिया वृषणो देवा वृषणो हविषकृतः ।
वृषणा द्यावापृथिवी ऋतावरी वृषा पर्जन्यो वृषणो वृषस्तुभः ॥६॥
अग्नीषोमा वृषणा वाजसातये पुरुप्रशस्ता वृषणा उप ब्रुवे ।
यावीजिरे वृषणो देवयज्यया ता नः शर्म त्रिवरूथं वि यंसतः ॥७॥
धृतव्रताः क्षत्रिया यज्ञनिष्कृतो बृहद्दिवा अध्वराणामभिश्रियः ।
अग्निहोतार ऋतसापो अद्रुहोऽपो असृजन्ननु वृत्रतूर्ये ॥८॥
द्यावापृथिवी जनयन्नभि व्रताप ओषधीर्वनिनानि यज्ञिया ।
अन्तरिक्षं स्व१रा पप्रुरूतये वशं देवासस्तन्वी३नि मामृजुः ॥९॥
धर्तारो दिव ऋभवः सुहस्ता वातापर्जन्या महिषस्य तन्यतोः ।
आप ओषधीः प्र तिरन्तु नो गिरो भगो रातिर्वाजिनो यन्तु मे हवम् ॥१०॥
समुद्रः सिन्धू रजो अन्तरिक्षमज एकपात्तनयित्नुरर्णवः ।
अहिर्बुध्न्यः श्रृणवद्वचांसि मे विश्वे देवास उत सूरयो मम ॥११॥
स्याम वो मनवो देववीतये प्रांचं नो यज्ञं प्र णयत साधुया ।
आदित्या रुद्रा वसवः सुदानव इमा ब्रह्म शस्यमानानि जिन्वत ॥१२॥
दैव्या होतारा प्रथमा पुरोहित ऋतस्य पन्थामन्वेमि साधुया ।
क्षेत्रस्य पतिं प्रतिवेशमीमहे विश्वान्देवाँ अमृताँ अप्रयुच्छतः ॥१३॥
वसिष्ठासः पितृवद्वाचमक्रत देवाँ ईळाना ऋषिवत्स्वस्तये ।
प्रीता इव ज्ञातयः काममेत्यास्मे देवासोऽव धूनुता वसु ॥१४॥
देवान्वसिष्ठो अमृतान्ववन्दे ये विश्वा भुवनाभि प्रतस्थुः ।
ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ॥१५॥

*devānhuve bṛhachchhravasaḥ svastaye jyotiṣkṛto adhvarasya prachetasaḥ /*
*ye vāvṛdhuḥ prataraṁ viśvedasa indrajayeṣṭhāso amṛtā ṛtāvṛdhaḥ //1 //*
*indraprasūtā varuṇapraśiṣṭā ye sūryasya jyotiṣo bhāgamānaśuḥ /*
*marudgaṇe vṛjane manma dhīmahi māghone yajñaṁ janayanta sūrayaḥ //2 //*
*indro vasubhiḥ pari pātu no gayamādityairno aditiḥ śarma yachchhatu /*
*rudro rudrebhirdevo mṛḷayāti nastvaṣṭā no gnābhiḥ suvitāya jinvatu //3 //*
*aditirdyāvāpṛthivī ṛtaṁ mahadindrāviṣṇū marutaḥ svarbṛhat /*
*devām̐ ādityām̐ avase havāmahe vasunrudrāntsavitāraṁ sudaṁsasam //4 //*
*sarasvāndhībhirvaruṇo dhṛtavrataḥ pūṣā viṣṇurmahimā vāyuraśvinā /*
*brahmakṛto amṛtā viśvavedasaḥ śarma no yaṁsan trivarūthamaṁhasaḥ //5 //*
*vṛṣā yajño vṛṣaṇaḥ santu yajñiyā vṛṣaṇo devā vṛṣaṇo haviṣakṛtaḥ /*
*vṛṣaṇā dyāvāpṛthivī ṛtāvarī vṛṣā parjanyo vṛṣaṇo vṛṣastubhaḥ //6 //*
*agnīṣomā vṛṣaṇā vājasātaye purupraśastā vṛṣaṇā upa bruve /*
*yāvījire vṛṣaṇo devayajyayā tā naḥ śarma trivarūthaṁ vi yaṁsataḥ //7 //*
*dhṛtavratāḥ kṣatriyā yajñaniṣkṛto bṛhaddivā adhvarāṇāmabhiśriyaḥ /*
*agnihotāra ṛtasāpo adruho'po asṛjannanu vṛtratūrye //8 //*
*dyāvāpṛthivī janayannabhi vratāpa oṣadhīrvanināni yajñiyā /*
*antarikṣaṁ sva1rā paprurūtaye vaśaṁ devāsastanvī3ni māmṛjuḥ //9 //*
*dhartāro diva ṛbhavaḥ suhastā vātāparjanyā mahiṣasya tanyatoḥ /*
*āpa oṣadhīḥ pra tirantu no giro bhago rātirvājino yantu me havam //10 //*
*samudraḥ sindhū rajo antarikṣamaja ekapāttanayitnurarṇavaḥ /*

*ahirbudhnyaḥ śṛṇavadvachāṁsi me viśve devāsa uta sūrayo mama //11 //*
*syāma vo manavo devavītaye prāṁchaṁ no yajñaṁ pra ṇayata sādhuyā /*
*ādityā rudrā vasavaḥ sudānava imā brahma śasyamānāni jinvata //12 //*
*daivyā hotārā prathamā purohita ṛtasya panthāmanvemi sādhuyā /*
*kṣetrasya patiṁ prativeśamīmahe viśvāndevāṁ amṛtāṁ aprayuchchhataḥ //13 //*
*vasiṣṭhāsaḥ pitṛvadvāchamakrata devāṁ īḻāānā ṛṣivatsvastaye /*
*prītā iva jñātayaḥ kāmametyāsme devāso·va dhūnutā vasu //14 //*
*devānvasiṣṭho amṛtānvavande ye viśvā bhuvanābhi pratasthuḥ /*
*te no rāsantāmurugāyamadya yūyaṁ pāta svastibhiḥ sadā naḥ //15 //*

## ५७०. वसुक्रः (Vasukraḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.२९.१-८; अ. (Av.) २०.७३.४-६; २०.७६.१-८

ऋ. (Rv.) १०.२९.१-८

वने न वा यो न्यधायि चाकंछुचिर्वां स्तोमो भुरणावजीगः ।
यस्येदिन्द्रः पुरुदिनेषु होता नृणां नर्यो नृतमः क्षपावान् ॥१॥
प्र ते अस्या उषसः प्रापरस्या नृतौ स्याम नृतमस्य नृणाम् ।
अनु त्रिशोकः शतमावहन्नृन्कुत्सेन रथो यो असत्ससवान् ॥२॥
कस्ते मद इन्द्र रन्त्यो भूद्दुरो गिरो अभ्यु१ग्रो वि धाव ।
कद्वाहो अर्वागुप मा मनीषा आ त्वा शक्यामुपसं राधे अन्नैः ॥३॥
कदु द्युम्नमिन्द्र त्वावतो नृन्कया धिया करसे कन्न आगन् ।
मित्राो न सत्य उरुगाय भृत्या अन्ने समस्य यदसन्मनीषाः ॥४॥
प्रेरय सूरो अर्थं न पारं ये अस्य कामं जानिधाइव ग्मन् ।
गिरश्चर ये ते तुविजात पूर्वीर्नर इन्द्र प्रतिशिक्षन्त्यन्नैः ॥५॥
मात्रे नु ते सुमिते इन्द्र पूर्वी द्यौर्मज्मना पृथिवी काव्येन ।
वराय ते घृतवन्तः सुतासः स्वाद्मन्भवन्तु पीतये मधूनि ॥६॥
आ मध्वो अस्मा असिचन्नमत्रमिन्द्राय पूर्णं स हि सत्यराधाः ।
स वावृधे वरिमन्ना पृथिव्या अभि क्रत्वा नर्यः पौंस्यैश्च ॥७॥
व्यानळिन्द्रः पृतनाः खोजा आस्मै यतन्ते सख्याय पूर्वीः ।
आ स्मा रथं न पृतनासु तिष्ठ यं भद्रया सुमत्या चोदयासे ॥८॥

*vane na vā yo nyadhāyi chākaṁchhuchirvāṁ stomo bhuraṇāvajīgaḥ /*
*yasyedindraḥ purudineṣu hotā nṛṇāṁ naryo nṛtamaḥ kṣapāvān //1 //*
*pra te asyā uṣasaḥ prāparasyā nṛtau syāma nṛtamasya nṛṇām /*
*anu triśokaḥ śatamāvahannṛnkutsena ratho yo asatsasavān //2 //*
*kaste mada indra rantyo bhūdduro giro abhyu1gro vi dhāva /*
*kadvāho arvāgupa mā manīṣā ā tvā śakyāmupasaṁ rādhe annaiḥ //3 //*
*kadu dyumnamindra tvāvato nṛnkayā dhiyā karase kanna āgan /*
*mitrāo na satya urugāya bhṛtyā anne samasya yadasanmanīṣāḥ //4 //*
*preraya sūro arthaṁ na pāraṁ ye asya kāmaṁ jānidhāiva gman /*
*giraśchara ye te tuvijāta pūrvīrnara indra pratiśikṣantyannaiḥ //5 //*
*mātre nu te sumite indra pūrvī dyaurmajmanā pṛthivī kāvyena /*
*varāya te ghṛtavantaḥ sutāsaḥ svādmanbhavantu pītaye madhūni //6 //*
*ā madhvo asmā asichannamatramindrāya pūrṇaṁ sa hi satyarādhāḥ /*
*sa vāvṛdhe varimannā pṛthivyā abhi kratvā naryaḥ pauṁsyaiścha //7 //*
*vyānaḻindraḥ pṛtanāḥ khojā āsmai yatante sakhyāya pūrvīḥ /*
*ā smā rathaṁ na pṛtanāsu tiṣṭha yaṁ bhadrayā sumatyā chodayāse //8 //*

अ. (Av.) २०.७३.४-६

यदा वज्रं हिरण्यमिदथा रथं हरी यमस्य वहतो वि सूरिभिः ।
आ तिष्ठति मघवा सनश्रुत इन्द्रो वाजस्य दीर्घश्रवसस्पतिः ॥४॥
सो चिन्नु वृष्टिर्यूथ्या३ स्वा सचाँ इन्द्रः श्मश्रूणि हरिताभि प्रुष्णुते ।
अव वेति सुक्षयं सुते मधूदिद्धूनोति वातो यथा वनम् ॥५॥

यो वाचा विवाचो मृध्रवाचः पुरू सहस्राशिवा जघान ।
तत्तदिदस्य पौंस्यं गृणीमसि पितेव यस्तविषीं वावृधे शवः ॥६॥
*yadā vajraṁ hiraṇyamidathā rathaṁ harī yamasya vahato vi sūribhiḥ /*
*ā tiṣṭhati maghavā sanaśruta indro vājasya dīrghaśravasaspatiḥ //4 //*
*so chinnu vṛṣṭiryūthyā3 svā sachām̐ indraḥ śmaśrūṇi haritābhi pruṣṇute /*
*ava veti sukṣayaṁ sute madhūdiddhūnoti vāto yathā vanam //5 //*
*yo vāchā vivācho mṛdhravāchaḥ purū sahasrāśivā jaghāna /*
*tattadidasya pauṁsyaṁ gṛṇīmasi piteva yastaviṣīṁ vāvṛdhe śavaḥ //6 //*

अ. (Av.) २०.७६.१-८

वने न वायो न्यधायि चाकंछुचिर्वां स्तोमो भुरणावजीगः ।
यस्येदिन्द्रः पुरुदिनेषु होता नृणां नर्यो नृतमः क्षपावान् ॥१॥
प्र ते अस्या उषसः प्रापरस्या नृतौ स्याम नृतमस्य नृणाम् ।
अनु त्रिशोकः शतमावहन्नृन् कुत्सेन रथो यो असत् ससवान् ॥२॥
कस्ते मद इन्द्र रन्त्यो भूद् दुरो गिरो अभ्यु१ग्रो वि धाव ।
कद् वाहो अर्वागुप मा मनीषा आ त्वा शक्यामुपमं राधो अन्नैः ॥३॥
कदु द्युम्नमिन्द्र त्वावतो नृन कया धिया करसे कन्न आगन् ।
मित्रो न सत्य उरुगाय भृत्या अन्ने समस्य यदसन्मनीषाः ॥४॥
प्रेरय सूरो अर्थं न पारं ये अस्य कामं जनिधा इव ग्मन् ।
गिरश्च ये ते तुविजात पूर्वीर्नर इन्द्र प्रतिशिक्षन्त्यन्नैः ॥५॥
मात्रे नु ते सुमिते इन्द्र पूर्वी द्यौर्मज्मना पृथिवी काव्येन ।
वराय ते घृतवन्तः सुतासः स्वाद्मन् भवन्तु पीतये मधूनि ॥६॥
आ मध्वो अस्मा असिचन्नमत्रमिन्द्राय पूर्णं स हि सत्यराधाः ।
स वावृधे वरिमन्ना पृथिव्या अभि क्रत्वा नर्यः पौंस्यैश्च ॥७॥
व्यानळिन्द्रः पृतनाः स्वोजा आस्मै यतन्ते सख्याय पूर्वीः ।
आ स्मा रथं न पृतनासु तिष्ठ यं भद्रया सुमत्या चोदयासे ॥८॥
*vane na vāyo nyadhāyi chākaṁchhuchirvāṁ stomo bhuraṇāvajīgaḥ /*
*yasyedindraḥ purudineṣu hotā nṛṇāṁ naryo nṛtamaḥ kṣapāvān //1 //*
*pra te asyā uṣasaḥ prāparasyā nṛtau syāma nṛtamasya nṛṇām /*
*anu triśokaḥ śatamāvahannṛn kutsena ratho yeā asat sasavān //2 //*
*kaste mada indra rantyo bhūd duro giro abhyu1gro vi dhāva /*
*kad vāho arvāgupa mā manīṣā ā tvā śakyāmupamaṁ rādho annaiḥ //3 //*
*kadu dyumnamindra tvāvato nṛna kayā dhiyā karase kanna āgan /*
*mitro na satya urugāya bhṛtyā anne samasya yadasanmanīṣāḥ //4 //*
*preraya sūro arthaṁ na pāraṁ ye asya kāmaṁ janidhā iva gman /*
*giraścha ye te tuvijāta pūrvīrnara indra pratiśikṣantyannaiḥ //5 //*
*mātre nu te sumite indra pūrvī dyaurmajmanā pṛthivī kāvyena /*
*varāya te ghṛtavantaḥ sutāsaḥ svādman bhavantu pītaye madhūni //6 //*
*ā madhvo asmā asichannamatramindrāya pūrṇaṁ sa hi satyarādhāḥ /*
*sa vāvṛdhe varimannā pṛthivyā abhi kratvā naryaḥ pauṁsyaiścha //7 //*
*vyānaḷindraḥ pṛtanāḥ svojā āsmai yatante sakhyāya pūrvīḥ /*
*ā smā rathaṁ na pṛtanāsu tiṣṭha yaṁ bhadrayā sumatyā chodayāse //8 //*

## ५७१. वसुक्र ऐन्द्रः (Vasukra Aindraḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.२७.१-२४

असत्सु मे जरितः सभिवेगो यत्सुन्वते यजमानाय शिक्षम् ।
अनाशीर्दामहमस्मि प्रहन्ता सत्यध्वृतं वृजिनायन्तमाभुम् ॥१॥
यदीदहं युधये संनयान्यदेवयून्तन्वा३ शूशुजानान् ।
अमा ते तुम्रं वृषभं पचानि तीव्रं सुतं पंचदशं नि षिंचम् ॥२॥
नाहं तं वेद य इति ब्रवीत्यदेवयून्त्समरणे जघन्वान् ।
यदावाख्यत्समरणमृघावदादिद्ध मे वृषभा प्र ब्रुवन्ति ॥३॥

यदज्ञातेषु वृजनेष्वासं विश्वे सतो मघवानो म आसन् ।
जिनामि वेत्क्षेम आ सन्तमाभुं प्र तं क्षिणां पर्वते पादगृह्य ॥४॥
न वा उ मां वृजने वारयन्ते न पर्वतासो यदहं मनस्ये ।
मम स्वनात्कृधुकर्णो भयात एवेदनु द्यून्किरणः समेजात ॥५॥
दर्शन्न्वत्र शृतपाँ अनिन्द्रान्बाहुक्षदः शरवे पत्यमानान् ।
घृषुं वा ये निनिदुः सखायमध्यू न्वेषु पवयो ववृत्युः ॥६॥
अभूर्वौक्षीर्व्यु१ आयुरानड् दर्षन्नु पूर्वो अपरो नु दर्शत् ।
द्वे पवस्ते परि तं न भूतो यो अस्य पारे रजसो विवेष ॥७॥
गावो यवं प्रयुता अर्यो अक्षन्ता अपश्यं सहगोपाश्चरन्तीः ।
हवा इदर्यो अभितः समायन्कियदासु स्वपतिश्छन्दयाते ॥८॥
सं यद्वयं यवसादो जनानामहं यवाद उर्वज्रे अन्तः ।
अत्रा युक्तोऽवसातारमिच्छादथो अयुक्तं युनजद्ववन्वान् ॥९॥
अत्रेदु मे मंससे सत्यमुक्तं द्विपाच्च यच्चतुष्पात्संसृजानि ।
स्त्रीभिर्यो अत्र वृषणं पृतन्यादयुद्धो अस्य वि भजानि वेदः ॥१०॥
यस्यानक्षा दुहिता जात्वास कस्तां विद्वाँ अभि मन्याते अन्धाम् ।
कतरो मेनिं प्रति तं मुचाते य ईं वहाते य ईं वा वरेयात् ॥११॥
कियती योषा मर्यतो वधूयोः परिप्रीता पन्यसा वार्येण ।
भद्रा वधूर्भवति यत्सुपेशाः स्वयं सा मित्रं वनुते जने चित् ॥१२॥
पत्तो जगार प्रत्यंचमत्ति शीर्ष्णा शिरः प्रति दधौ वरूथम् ।
आसीन ऊर्ध्वामुपसि क्षिणाति न्यङ्ङुत्तानामन्वेति भूमिम् ॥१३॥
बृहन्नच्छायो अपलाशो अर्वा तस्थौ माता विषितो अत्ति गर्भः ।
अन्यस्या वत्सं रिहती मिमाय कया भुवा नि दधे धेनुरूधः ॥१४॥
सप्त वीरासो अधरादुदायन्नष्टोत्तरात्तात्समजग्मिरन्ते ।
नव पश्चातात्स्थिविमन्त आयन्दश प्राक्सानु वि तिरन्त्यश्नः ॥१५॥
दशानामेकं कपिलं समानं तं हिन्वन्ति क्रतवे पार्याय ।
गर्भं माता सुधितं वक्षणास्ववेनन्तं तुषयन्ती बिभर्ति ॥१६॥
पीवानं मेषमपचन्त वीरा न्युप्ता अक्षा अनु दीव आसन् ।
द्वा धनुं बृहतीमप्स्व१न्तः पवित्रवन्ता चरतः पुनन्ता ॥१७॥
वि क्रोशनासो विष्वंच आयन्पचाति नेमो नहि पक्षदर्धः ।
अयं मे देवः सविता तदाह द्रवन्न इद्वनवत्सर्पिरन्नः ॥१८॥
अपश्यं ग्रामं वहमानमारादचक्रया स्वधया वर्तमानम् ।
सिषक्त्यर्यः प्र युगा जनानां सद्यः शिश्ना प्रमिनानो नवीयान् ॥१९॥
एतौ मे गावौ प्रमरस्य युक्तौ मो षु प्र सेधीर्मुहुरिन्ममन्धि ।
आपश्चिदस्य वि नशन्त्यर्थं सूरश्च मर्क उपरो बभूवान् ॥२०॥
अयं यो वज्रः पुरुधा विवृत्तोऽवः सूर्यस्य बृहतः पुरीषात् ।
श्रव इदेना परो अन्यदस्ति तदव्यथी जरिमाणस्तरन्ति ॥२१॥
वृक्षेवृक्षे नियता मीमयद्गौस्ततो वयः प्र पतान् पुरुषादः ।
अथेदं विश्वं भुवनं भयात इन्द्राय सुन्वदृषये च शिक्षत् ॥२२॥
देवानां माने प्रथमा अतिष्ठन्कृन्तत्रादेषामुपरा उदायन् ।
त्रयस्तपन्ति पृथिवीमनूपा द्वा बृबूकं वहतः पुरीषम् ॥२३॥
सा ते जीवातुरुत तस्य विद्धि मा स्मैतादृगप गूहः समर्ये ।
आविः स्वः कृणुते गूहते बुसं स पादुरस्य निर्णिजो न मुच्यते ॥२४॥

*asatsu me jaritaḥ sabhivego yatsunvate yajamānāya śikṣam ।*
*anāśīrdāmahamasmi prahantā satyadhvṛtaṁ vṛjināyantamābhum ॥1॥*
*yadīdahaṁ yudhaye saṁnayānyadevayūntanvā3 śūśujānān ।*
*amā te tumraṁ vṛṣabhaṁ pachāni tīvraṁ sutaṁ paṁchadaśaṁ ni ṣiṁcham ॥2॥*
*nāhaṁ taṁ veda ya iti bravītyadevayūntsamaraṇe jaghanvān ।*
*yadāvākhyatsamaraṇamṛghāvadādiddha me vṛṣabhā pra bruvanti ॥3॥*

*yadajñāteṣu vṛjaneṣvāsaṁ viśve sato maghavāno ma āsan* ।
*jināmi vetkṣema ā santamābhuṁ pra taṁ kṣiṇāṁ parvate pādagṛhya* ॥4॥
*na vā u māṁ vṛjane vārayante na parvatāso yadahaṁ manasye* ।
*mama svanātkṛdhukarṇo bhayāta evedanu dyūnkiraṇaḥ samejāta* ॥5॥
*darśannvatra śṛtapāṁ anindrānbāhukṣadaḥ śarave patyamānān* ।
*ghṛṣuṁ vā ye ninidhuḥ sakhāyamadhyū nveṣu pavayo vavṛtyuḥ* ॥6॥
*abhūrvaukṣīrvyu1 āyurānaḍ darṣannu pūrvo aparo nu darśat* ।
*dve pavaste pari taṁ na bhūto yo asya pāre rajaso viveṣa* ॥7॥
*gāvo yavaṁ prayutā aryo akṣantā apaśyaṁ sahagopāścharantīḥ* ।
*havā idaryo abhitaḥ samāyankiyadāsu svapatiśchhandayāte* ॥8॥
*saṁ yadvayaṁ yavasādo janānāmahaṁ yavāda urvajre antaḥ* ।
*atrā yukto'vasātāramichchhādatho ayuktaṁ yunajadvavanvān* ॥9॥
*atredu me maṁsase satyamuktaṁ dvipāchcha yachchatuṣpātsaṁsṛjāni* ।
*strībhiryo atra vṛṣaṇaṁ pṛtanyādayuddho asya vi bhajāni vedaḥ* ॥10॥
*yasyānakṣā duhitā jātvāsa kastāṁ vidvāṁ abhi manyāte andhām* ।
*kataro meniṁ prati taṁ muchāte ya īṁ vahāte ya īṁ vā vareyāt* ॥11॥
*kiyatī yoṣā maryato vadhūyoḥ paripritā panyasā vāryeṇa* ।
*bhadrā vadhūrbhavati yatsupeśāḥ svayaṁ sā mitraṁ vanute jane chit* ॥12॥
*patto jagāra pratyaṁchamatti śīrṣṇā śiraḥ prati dadhau varūtham* ।
*āsīna ūrdhvāmupasi kṣiṇāti nyaṅduttānāmanveti bhūmim* ॥13॥
*bṛhannachchhāyo apalāśo arvā tasthau mātā viṣito atti garbhaḥ* ।
*anyasyā vatsaṁ rihatī mimāya kayā bhuvā ni dadhe dhūnurūdhaḥ* ॥14॥
*sapta vīrāso adharādudāyannaṣṭottarāttātsamajagmirante* ।
*nava paśchātātsthivimanta āyandaśa prāksānu vi tirantyaśanaḥ* ॥15॥
*daśānāmekaṁ kapilaṁ samānaṁ taṁ hinvanti kratave pāryāya* ।
*garbhaṁ mātā sudhitaṁ vakṣaṇāsvavenantaṁ tuṣayantī bibharti* ॥16॥
*pīvānaṁ meṣamapachanta vīrā nyuptā akṣā anu dīva āsan* ।
*dvā dhanuṁ bṛhatīmapsva1ntaḥ pavitravantā charataḥ punantā* ॥17॥
*vi krośanāso viṣvaṁcha āyanpachāti nemo nahi pakṣadardhaḥ* ।
*ayaṁ me devaḥ savitā tadāha dravanna idvanavatsarpirannaḥ* ॥18॥
*apaśyaṁ grāmaṁ vahamānamārādachakrayā svadhayā vartamānam* ।
*siṣaktayaryaḥ pra yugā janānāṁ sadyaḥ śiśnā praminano navīyān* ॥19॥
*etau me gāvau pramarasya yuktau mo ṣu pra sedhīrmuhurinmamandhi* ।
*āpaśchidasya vi naśantyarthaṁ sūraścha marka uparo babhūvān* ॥20॥
*ayaṁ yo vajraḥ purughā vivṛtto'vaḥ sūryasya bṛhataḥ purīṣāt* ।
*śrava idenā paro anyadasti tadavyathī jarimāṇastaranti* ॥21॥
*vṛkṣevṛkṣe niyatā mīmayadgaustato vayaḥ pra patān puruṣādaḥ* ।
*athedaṁ viśvaṁ bhuvanaṁ bhayāta indrāya sunvadṛṣaye cha śikṣat* ॥22॥
*devānāṁ māne prathamā atiṣṭhankṛntatrādeṣāmuparā udāyan* ।
*trayastapanti pṛthivīmanūpā dvā bṛbūkaṁ vahataḥ purīṣam* ॥23॥
*sā te jīvāturuta tasya viddhi mā smaitādṛgapa gūhaḥ samarye* ।
*āviḥ svaḥ kṛṇute gūhate busaṁ sa pādurasya nirṇijo na muchyate* ॥24॥

## ५७२. वसुमना रौहिदश्वः (Vasumanā Rauhidaśvaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.१७९.३

श्रातं मन्य ऊधनि श्रातमग्नौ सुश्रातं मन्ये तदृतं नवीयः ।
माध्यन्दिनस्य सवनस्य दध्नः पिबेन्द्र वज्रिन्पुरुकृज्जुषाणः ॥३॥
*śrātaṁ manya ūdhani śrātamagnau suśrātaṁ manye tadṛtaṁ navīyaḥ* ।
*mādhyandinasya savanasya dadhnaḥ pibendra vajrinpurukṛjjuṣāṇaḥ* ॥3॥

## ५७३. वसुर् भारद्वाजः (Vasur Bhāradvājaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.८०.१-५; ९.८१.१-५; ९.८२.१-५

ऋ. (Rv.) ९.८०.१-५

सोमस्य धारा पवते नृचक्षस ऋतेन देवान्हवते दिवस्परि ।

बृहस्पते रवथेना वि दिद्युते समुद्रासो न सवनानि विव्यचुः ॥१॥
यं त्वा वाजिन्नध्न्या अभ्यनूषतायोहतं योनिमा रोहसि द्युमान् ।
मघोनामायुः प्रतिरन्महि श्रव इन्द्राय सोम पवसे वृषा मदः ॥२॥
एन्द्रस्य कुक्षा पवते मदिन्तम ऊर्जं वसानः श्रवसे सुमंगलः ।
प्रत्यङ् स विश्वा भुवनाभि पप्रथे क्रीळन्हरिरत्यः स्यन्दते वृषा ॥३॥
तं त्वा देवेभ्यो मधुमत्तमं नरः सहस्रधारं दुहते दश क्षिपः ।
नृभिः सोम प्रच्युतो ग्रावभिः सुतो विश्वान्देवाँ आ पवस्वा सहस्रजित् ॥४॥
तं त्वा हस्तिनो मधुमन्तमद्रिभिर्दुहन्त्यप्सु वृषभं दश क्षिपः ।
इन्द्र सोम मादयन्दैव्यं जनं सिन्धोरिवोर्मिः पवमानो अर्षसि ॥५॥
*somasya dhārā pavate nṛchakṣasa ṛtena devānhavate divaspari ।*
*bṛhaspate ravathenā vi didyute samudrāso na savanāni vivyachuḥ ॥1॥*
*yaṁ tvā vājinnadhnyā abhyanūṣatāyohataṁ yonimā rohasi dyumān ।*
*maghonāmāyuḥ pratiranmahi śrava indrāya soma pavase vṛṣā madaḥ ॥2॥*
*endrasya kukṣā pavate madintama ūrjaṁ vasānaḥ śravase sumaṁgalaḥ ।*
*pratyaṅ sa viśvā bhuvanābhi paprathe krīḻanhariratyaḥ syandate vṛṣā ॥3॥*
*taṁ tvā devebhyo madhumattamaṁ naraḥ sahasradhāraṁ duhate daśa kṣipaḥ ।*
*nṛbhiḥ soma prachyuto grāvabhiḥ suto viśvāndevām̐ ā pavasvā sahasrajit ॥4॥*
*taṁ tvā hastino madhumantamadribhirduhantyapsu vṛṣabhaṁ daśa kṣipaḥ ।*
*indra soma mādayandaivyaṁ janaṁ sindhorivormiḥ pavamāno arṣasi ॥5॥*

ऋ. (Rv.) ९.८१.१-५

प्र सोमस्य पवमानस्योर्मय इन्द्रस्य यन्ति जठरं सुपेशसः ।
दध्ना यदीमुन्नीता यशसा गवां दानाय शूरमुदमन्दिषुः सुताः ॥१॥
अच्छा हि सोमः कलशाँ असिष्यददत्यो न वोळहा रघुवर्तनिर्वृषा ।
अथा देवानामुभयस्य जन्मनो विद्वाँ अश्नोत्यमुत इतश्च यत् ॥२॥
आ नः सोम पवमानः किरा वस्विन्दो भव मघवा राधसो महः ।
शिक्षा वयोधो वसवे सु चेतुना मा नो गयमारे अस्मत्परा सिचः ॥३॥
आ नः पूषा पवमानः सुरातयो मित्रो गच्छन्तु वरुणः सजोषसः ।
बृहस्पतिर्मरुतो वायुरश्विना त्वष्टा सविता सुयमा सरस्वती ॥४॥
उभे द्यावापृथिवी विश्वमिन्वे अर्यमा देवो अदितिर्विधाता ।
भगो नृशंस उर्व१ न्तरिक्षं विश्वे देवाः पवमानं जुषन्त ॥५॥
*pra somasya pavamānasyormaya indrasya yanti jaṭharaṁ supeśasaḥ ।*
*dadhnā yadīmunnītā yaśasā gavāṁ dānāya śūramudamandiṣuḥ sutāḥ ॥1॥*
*achchhā hi somaḥ kalaśām̐ asiṣyadadatyo na voḻahā raghuvartanirvṛṣā ।*
*athā devānāmubhayasya janmano vidvām̐ aśnotyamuta itaścha yat ॥2॥*
*ā naḥ soma pavamānaḥ kirā vasvindo bhava maghavā rādhaso mahaḥ ।*
*śikṣā vayodho vasave su chetunā mā no gayamāre asmatparā sichaḥ ॥3॥*
*ā naḥ pūṣā pavamānaḥ surātayo mitro gachchhantu varuṇaḥ sajoṣasaḥ ।*
*bṛhaspatirmaruto vāyuraśvinā tvaṣṭā savitā suyamā sarasvatī ॥4॥*
*ubhe dyāvāpṛthivī viśvaminve aryamā devo aditirvidhātā ।*
*bhago nṛśaṁsa urva1 ntarikṣaṁ viśve devāḥ pavamānaṁ juṣanta ॥5॥*

ऋ. (Rv.) ९.८२.१-५

असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।
पुनानो वारं पर्येत्यव्ययं श्येनो न योनिं घृतवन्तमासदम् ॥१॥
कविर्वेधस्या पर्येषि महिनमत्यो न मृष्टो अभि वाजमर्षसि ।
अपसेधन्दुरिता सोम मृळय घृतं वसानः परि यासि निर्णिजम् ॥२॥
पर्जन्यः पिता पहिषस्य पर्णिनो नाभा पृथिव्या गिरिषु क्षयं दधे ।
स्वसार आपो अभि गा उतासरन्त्सं ग्रावभिर्नसते वीते अध्वरे ॥३॥
जायेव पत्यावधि शेव मंहसे प्रजाया गर्भ श्रृणुहि ब्रवीमि ते ।
अन्तर्वणीषु प्र चरा सु जीवसेऽनिन्द्यो वृजने सोम जागृहि ॥४॥

यथा पूर्वेभ्यः शतसा अमृध्रः सहस्रसाः पर्यया वाजमिन्दो ।
एवा पवस्व सुविताय नव्यसे तव व्रतमन्वापः सचन्ते ॥५॥
*asāvi somo aruṣo vṛṣā harī rājeva dasmo abhi gā achikradat /*
*punāno vāraṁ paryetyavyayaṁ śyeno na yoniṁ ghṛtavantamāsadam //1 //*
*kavirvedhasyā paryeṣi mahinamatyo na mṛṣṭo abhi vājamarṣasi /*
*apasedhanduritā soma mṛḷaya ghṛtaṁ vasānaḥ pari yāsi nirṇijam //2 //*
*parjanyaḥ pitā pahiṣasya parṇino nābhā pṛthivyā giriṣu kṣayaṁ dadhe /*
*svasāra āpo abhi gā utāsarantsaṁ grāvabhirnasate vīte adhvare //3 //*
*jāyeva patyāvadhi śeva maṁhase prajāyā garbha śṛṇuhi bravīmi te /*
*antarvaṇīṣu pra charā su jīvase'nindyo vṛjane soma jāgṛhi //4 //*
*yathā pūrvebhyaḥ śatasā amṛdhraḥ sahasrasāḥ paryayā vājamindo /*
*evā pavasva suvitāya navyase tava vratamanvāpaḥ sachante //5 //*

## ५७४. वसुयुः (Vasuyuḥ)

१. अग्निः (Agniḥ) - य. (Yv.) १७.८

अग्ने पावक रोचिषा मन्द्रया देव जिह्वया। आ देवान् वक्षि यक्षि च ॥८॥
*agne pāvaka rochiṣā mandrayā deva jihvayā / ā devān vakṣi yakṣi cha //8 //*

## ५७५. वसुश्रुत आत्रेयः (Vasuśruta Ātreyaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ५.३.१-१२; ५.४.१-११; ५.६.१-१०; सा. (Sv.) ४१९; ४२५; १७३७-१७३९

ऋ. (Rv.) ५.३.१-१२

त्वमग्ने वरुणो जायसे यत्त्वं मित्रो भवसि यत्समिद्धः ।
त्वे विश्वे सहसस्पुत्र देवास्त्वमिन्द्रो दाशुषे मर्त्याय ॥१॥
त्वमर्यमा भवसि यत्कनीनां नाम स्वधावन्गुह्यं बिभर्षि ।
अंजन्ति मित्रं सुधितं न गोभिर्यद्दम्पती समनसा कृणोषि ॥२॥
तव श्रिये मरुतो मर्जयन्त रुद्र यत्ते जनिम चारु चित्रम् ।
पदं यद्विष्णोरुपमं निधायि तेन पासि गुह्यं नाम गोनाम् ॥३॥
तव श्रिया सुदृशो देव देवाः पुरू दधाना अमृतं सपन्त ।
होतारमग्निं मनुषो नि षेदुर्दशस्यन्त उशिजः शंसमायोः ॥४॥
न त्वद्धोता पूर्वो अग्ने यजीयान्न काव्यैः परो अस्ति स्वधावः ।
विशश्च यस्या अतिथिर्भवासि स यज्ञेन वनवद्देव मर्तान् ॥५॥
वयमग्ने वनुयाम त्वोता वसूयवो हविषा बुध्यमानाः ।
वयं समर्ये विदथेष्वह्नां वयं राया सहस्पुत्र मर्तान् ॥६॥
यो न आगो अभ्येनो भरात्यधीदघमघशंसे दधात ।
जही चिकित्वो अभिशस्तिमेतामग्ने यो नो मर्चयति द्वयेन ॥७॥
त्वामस्या व्युषि देव पूर्वे दूतं कृण्वाना अयजन्त हव्यैः ।
संस्थे यदग्न ईयसे रयीणां देवो मर्तैर्वसुभिरिध्यमानः ॥८॥
अव स्पृधि पितरं योधि विद्वान्पुत्रो यस्ते सहसः सून ऊहे ।
कदा चिकित्वो अभि चक्षसे नोऽग्ने कदाँ ऋतचिद्यातयासे ॥९॥
भूरि नाम वन्दमानो दधाति पिता वसो यदि तज्जोषयासे ।
कुविद्देवस्य सहसा चकानः सुम्नमग्निर्वनते वावृधानः ॥१०॥
त्वमंग जरितारं यविष्ठ विश्वान्यग्ने दुरिताति पर्षि ।
स्तेना अदृश्रन् रिपवो जनासोऽज्ञातकेता वृजिना अभूवन् ॥११॥
इमे यामासस्त्वद्रिगभूवन्वसवे वा तदिदागो अवाचि ।
नाहायमग्निरभिषस्तये नो न रीषते वावृधानः परा दात् ॥१२॥
*tvamagne varuṇeā jāyase yattvaṁ mitro bhavasi yatsamiddhaḥ /*
*tve viśve sahasasputra devāstvamindro dāśuṣe martyāya //1 //*
*tvamaryamā bhavasi yatkanīnāṁ nāma svadhāvanguhyaṁ bibharṣi /*

*aṁjanti mitraṁ sudhitaṁ na gobhiryaddampatī samanasā kṛṇoṣi ॥2॥*
*tava śriye maruto majaryanta rudra yatte janima chāru chitram ।*
*padaṁ yadviṣṇorupamaṁ nidhāyi tena pāsi guhyaṁ nāma gonām ॥3॥*
*tava śriyā sudṛśo deva devāḥ purū dadhānā amṛtaṁ sapanta ।*
*hotāramagiṁna manuṣo ni ṣedurdaśasyanta uśijaḥ śaṁsamāyoḥ ॥4॥*
*na tvaddhotā pūrvo agne yajīyānna kāvyaiḥ paro asti svadhāvaḥ ।*
*viśaścha yasyā atithirbhavāsi sa yajñena vanavaddeva martān ॥5॥*
*vayamagne vanuyāma tvotā vasūyavo haviṣā budhyamānāḥ ।*
*vayaṁ samarye vidatheṣvahnāṁ vayaṁ rāyā sahasputra martān ॥6॥*
*yo na āgo abhyeno bharātyadhīdaghamaghaśaṁse dadhāta ।*
*jahī chikitvo abhiśastimetāmagne yo no marchayati dvayena ॥7॥*
*tvāmasyā vyuṣi deva pūrve dūtaṁ kṛṇvānā ayajanta havyaiḥ ।*
*saṁsthe yadagna īyase rayīṇāṁ devo martairvasubhiridhyamānaḥ ॥8॥*
*ava spṛdhi pitaraṁ yodhi vidvānputro yaste sahasaḥ sūna ūhe ।*
*kadā chikitvo abhi chakṣase no'gne kadāṁ̐ ṛtachidyātayāse ॥9॥*
*bhūri nāma vandamāno dadhāti pitā vaso yadi tajjoṣayāse ।*
*kuviddavasya sahasā chakānaḥ sumnamagnirvanate vāvṛdhānaḥ ॥10॥*
*tvamaṁga jaritāraṁ yaviṣṭha viśvānyagne duritāti parṣi ।*
*stenā adṛśran ripavo janāso'jñātaketā vṛjinā abhūvan ॥11॥*
*ime yāmāsastvadrigabhūvanvasave vā tadidāgo avāchi ।*
*nāhāyamagnirabhiṣastaye no na rīṣate vāvṛdhānaḥ parā dāt ॥12॥*

ऋ. (Rv.) ५.४.१-११

त्वामग्ने वसुपतिं वसूनामभि प्र मन्दे अध्वरेषु राजन् ।
त्वया वाजं वाजयन्तो जयेमाभि ष्याम पृत्सुतीर्मर्त्यानाम् ॥१॥
हव्यवाळग्निरजरः पिता नो विभुर्विभावा सुदृशीको अस्मे ।
सुगार्हपत्याः समिषो दिदीह्यस्मद्र्यक् सं मिमीहि श्रवांसि ॥२॥
विशां कविं विश्पतिं मानुषीणां शुचिं पावकं घृतपृष्ठमग्निम् ।
नि होतारं विश्वविदं दधिध्वे स देवेषु वनते वार्याणि ॥३॥
जुषस्वाग्न इळया सजोषा यतमानो रश्मिभिः सूर्यस्य ।
जुषस्व नः समिधं जातवेद आ च देवान्हविरद्याय वक्षि ॥४॥
जुष्टो दमूना अतिथिर्दुरोण इमं नो यज्ञमुप याहि विद्वान् ।
विश्वा अग्ने अभियुजो विहत्या शत्रूयतामा भरा भोजनानि ॥५॥
वधेन दस्युं प्र हि चातयस्व वयः कृण्वानस्तन्वे३ स्वायै ।
पिपर्षि यत्सहसस्पुत्र देवान्त्सो अग्ने पाहि नृतम वाजे अस्मान् ॥६॥
वयं ते अग्न उक्थैर्विधेम वयं हव्यैः पावक भद्रशोचे ।
अस्मे रयिं विश्ववारं समिन्वास्मे विश्वानि द्रविणानि धेहि ॥७॥
अस्माकमग्ने अध्वरं जुषस्व सहसः सूनो त्रिषधस्थ हव्यम् ।
वयं देवेषु सुकृतः स्याम शर्मणा नस्त्रिवरूथेन पाहि ॥८॥
विश्वानि नो दुर्गहा जातवेदः सिन्धुं न नावा दुरिताति पर्षि ।
अग्ने अत्रिवन्नमसा गृणानो३स्माकं बोध्यविता तनूनाम् ॥९॥
यस्त्वा हृदा कीरिणा मन्यमानोऽमर्त्यं मर्त्यो जोहवीमि ।
जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्याम् ॥१०॥
यस्मै त्वं सुकृते जातवेद उ लोकमग्ने कृणवः स्योनम् ।
अश्विनं स पुत्रिणं वीरवन्तं गोमन्तं रयिं नशते स्वस्ति ॥११।

*tvāmagne vasupatiṁ vasūnāmabhi pra mande adhvareṣu rājan ।*
*tvayā vājaṁ vājayanto jayemābhi ṣyāma pṛtsutīrmartyānām ॥1॥*
*havyavāḷagnirajaraḥ pitā no vibhurvibhāvā sudṛśīko asme ।*
*sugārhapatyāḥ samiṣo didīhyasmadrya1k saṁ mimīhi śravāṁsi ॥2॥*
*viśāṁ kaviṁ viśpatiṁ mānuṣīṇāṁ śuchiṁ pāvakaṁ ghṛtapṛṣṭhamagnim ।*
*ni hotāraṁ viśvavidaṁ dadhidhve sa deveṣu vanate vāryāṇi ॥3॥*
*juṣasvāgna iḷayā sajoṣā yatamāno raśmibhiḥ sūryasya ।*

*juṣasva naḥ samidhaṁ jātaveda ā cha devānhaviradyāya vakṣi //4 //*
*juṣṭo damūnā atithirduroṇa imaṁ no yajñamupa yāhi vidvān /*
*viśvā agne abhiyujo vihatyā śatrūyatāmā bharā bhojanāni //5 //*
*vadhena dasyuṁ pra hi chātayasva vayaḥ kṛṇvānastanve3 svāyai /*
*piparṣi yatsahasasputra devāntso agne pāhi nṛtama vāje asmān //6 //*
*vayaṁ te agna ukthairvidhema vayaṁ havyaiḥ pāvaka bhadraśoche /*
*asme rayiṁ viśvavāraṁ saminvāsme viśvāni draviṇāni dhehi //7 //*
*asmākamagne adhvaraṁ juṣasva sahasaḥ sūno triṣadhastha havyam /*
*vayaṁ deveṣu sukṛtaḥ syāma śarmaṇā nastrivarūthena pāhi //8 //*
*viśvāni no durgahā jātavedaḥ sindhuṁ na nāvā duritāti parṣi /*
*agne atrivannamasā gṛṇāno3smākaṁ bodhyavitā tanūnām //9 //*
*yastvā hṛdā kīriṇā manyamāno'martyaṁ martyo johavīmi /*
*jātavedo yaśo asmāsu dhehi prajābhiragne amṛtatvamaśyām //10 //*
*yasme tvaṁ sukṛte jātaveda u lokamagne kṛṇavaḥ syonam /*
*aśvinaṁ sa putriṇaṁ vīravantaṁ gomantaṁ rayiṁ naśate svasti //11 /*

ऋ. (Rv.) ५.६.१-१०

अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः ।
अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिन इषं स्तोतृभ्य आ भर ॥१॥
सो अग्निर्यो वसुर्गृणे सं यमायन्ति धेनवः ।
समर्वन्तो रघुद्रुवः सं सुजातासः सूरय इषं स्तोतृभ्य आ भर ॥२॥
अग्निर्हि वाजिनं विशे ददाति विश्वचर्षणिः ।
अग्नी राये स्वाभुवं स प्रीतो याति वार्यमिषं स्तोतृभ्य आ भर ॥३॥
आ ते अग्न इधीमहि द्युमन्तं देवाजरम् ।
यद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषं स्तोतृभ्य आ भर ॥४॥
आ ते अग्न ऋचा हविः शुक्रस्य शोचिषस्पते ।
सुंश्चन्द्र दस्म विश्पते हव्यवाट् तुभ्यं हूयत इषं स्तोतृभ्य आ भर ॥५॥
प्रो त्ये अग्नयोऽग्निषु विश्व पुष्यन्ति वार्यम् ।
ते हिन्विरे त इन्विरे त इषण्यन्त्यानुषगिषं स्तोतृभ्य आ भर ॥६॥
तव त्ये अग्ने अर्चयो महि व्राधन्त वाजिनः ।
ये पत्वभिः शफानां व्रजा भरुन्त गोनामिषं स्तोतृभ्य आ भर ॥७॥
नवा नो अग्न आ भर स्तोतृभ्यः सुक्षितीरिषः ।
ते स्याम य आनृचुस्त्वादूतासो दमेदम इषं स्तोतृभ्य आ भर ॥८॥
उभे सुश्चन्द्र सर्पिषो दर्वी श्रीणीष आसनि ।
उतो न उत्पुपूर्या उक्थेषु शवसस्पत इषं स्तोतृभ्य आ भर ॥९॥
एवाँ अग्निमजुर्यमुर्गीर्भिर्यज्ञेभिरानुषक् ।
दधदस्मे सुवीर्यमुत त्यादाश्वश्व्यमिषं स्तोतृभ्य आ भर ॥१०॥

*agiṁna taṁ manye yo vasurastaṁ yaṁ yanti dhenavaḥ /*
*astamarvanta āśavo'staṁ nityāso vājina iṣaṁ stotṛbhya ā bhara //1 //*
*so agniryo vasurgṛṇe saṁ yamāyanti dhenavaḥ /*
*samarvanto raghudruvaḥ saṁ sujātāsaḥ sūraya iṣaṁ stotṛbhya ā bhara //2 //*
*agnirhi vājinaṁ viśe dadāti viśvacharṣaṇiḥ /*
*agnī rāye svābhuvaṁ sa prīto yāti vāryamiṣaṁ stotṛbhya ā bhara //3 //*
*ā te agna idhīmahi dyumantaṁ devājaram /*
*yaddha syā te panīyasī samiddīdayati dyavīṣaṁ stotṛbhya ā bhara //4 //*
*ā te agna ṛchā haviḥ śuṛsya śochiṣaspate /*
*suṁśchandra dasma viśpate havyavāṭ tubhyaṁ hūyata iṣaṁ stotṛbhya ā bhara //5 //*
*pro tye agnayo'gniṣu viśva puṣpanti vāryam /*
*te hinvire ta invire ta iṣaṇyantyānuṣagiṣaṁ stotṛbhya ā bhara //6 //*
*tava tye agne archayo mahi vrādhanta vājinaḥ /*
*ye patvabhiḥ śaphānāṁ vrajā bharunta gonāmiṣaṁ stotṛbhya ā bhara //7 //*
*navā no agna ā bhara stotṛbhyaḥ sukṣitīriṣaḥ /*

*te syāma ya ānṛchustvādūtāso damedama iṣaṁ stotṛbhya ā bhara //8 //*
*ubhe suśchandra sarpiṣo darvī śrīṇīṣa āsani /*
*uto na utpupūryā uktheṣu śavasaspata iṣaṁ stotṛbhya ā bhara //9 //*
*evām̐ agnimajuryamurgīrbhiryajñebhirānuṣak /*
*dadhadasme suvīryamuta tyādāśvaśvyamiṣaṁ stotṛbhya ā bhara //10 //*

सा. (Sv.) ४१९

आ ते अग्न दधीमहि द्युमन्तं देवाजरम् ।
यद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषं स्तोतृभ्य आ भर ॥१॥
*ā te agna dadhīmahi dyumantaṁ devājaram /*
*yaddha syā te panīyasī samiddīdayati dyavīṣaṁ stotṛbhya ā bhara //1 //*

सा. (Sv.) ४२५

अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः ।
अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिन इषं स्तोतृभ्य आ भर ॥७॥
*agniṁ taṁ manye yo vasurastaṁ yaṁ yanti dhenavaḥ /*
*astamarvanta āśavo'staṁ nityāso vājina iṣaṁ stotṛbhya ā bhara //7 //*

सा. (Sv.) १७३७-१७३९

अगि्ंन तं मन्ये यो वसुरस्तं यं यन्ति धेनवः ।
अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिन इषं स्तोतृभ्य आ भर ॥१॥
अग्निर्हि वाजिनं विशे ददाति विश्वचर्षणिः ।
अग्नी राये स्वाभुवं सु प्रीतो याति वार्यमिष स्तोतृभ्य आ भर ॥२॥
सो अग्निर्यो वसुर्गृणे सं यमायन्ति धेनवः ।
समर्वन्तो रघुद्रुवः सं सुजातासः सूरय इषं स्तोतृभ्य आ भर ॥३॥
*agiṁna taṁ manye yo vasurastaṁ yaṁ yanti dhenavaḥ /*
*astamarvanta āśavo'staṁ nityāso vājina iṣaṁ stotṛbhya ā bhara //1 //*
*agnirhi vājinaṁ viśe dadāti viśvacharṣaṇiḥ /*
*agnī rāye svābhuvaṁ su prīto yāti vāryamiṣa stotṛbhya ā bhara //2 //*
*so agniryo vasurgṛṇe saṁ yamāyanti dhenavaḥ /*
*samarvanto raghudruvaḥ saṁ sujātāsaḥ sūraya iṣaṁ stotṛbhya ā bhara //3 //*

२. आप्री (१. इध्म अथवा समिद्ध अग्निः २. नाराशंस ३. इळ ४. बर्हि ५. देवीद्वार ६. उषासानक्ता ७. दिव्य होता प्रचेतस ८. सरस्वती इळा भारती ९. त्वष्टा १०. वनस्पति ११. स्वाहाकृतिः) (Āprī (1. Idhma Athavā Samiddha Agniḥ 2. nārāśaṁsa 3. Iḻa 4. Barhi 5. Devīdvāra 6. Uṣāsānaktā 7. Divya Hotā Prachetasa 8. Sarasvatī Iḻā Bhāratī 9. Tvaṣṭā 10. Vanaspati 11. Svāhākṛtiḥ)) - ऋ. (Rv.) ५.५.१-११

ऋ. (Rv.) ५.५.१-११

सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन। अग्नये जातवेदसे ॥१॥
नराशंसः सुषूदतीमं यज्ञमदाभ्यः कविर्हि मधुहस्त्यः ॥२॥
ईळितो अग्न आ वहेन्द्रं चित्रमिह प्रियम्। सुखै रथेभिरूतये ॥३॥
ऊर्णम्रदा वि प्रथस्वाभ्य१र्का अनूषत। भवा नः शुभ्र सातये ॥४॥
देवीर्द्वारो वि श्रयध्वं सुप्रायणा न ऊतये। प्रप्र यज्ञं प्रणीतन ॥५॥
सुप्रतीके वयोवृधा यह्वी ऋतस्य मातरा। दोषामुषासमीमहे ॥६॥
वातस्य पत्मन्नीळिता दैव्या होतारा मनुषः। इमं नो यज्ञमा गतम् ॥७॥
इळा सरस्वती मही तिस्रो देवीर्मयोभुवः। बर्हिः सीदन्त्वस्रिधः ॥८॥
शिवस्त्वष्टरिहा गहि विभुः पोष उत त्मना। यज्ञे यज्ञे न उदव ॥९॥
यत्र वेत्थ वनस्पते देवानां गुह्या नामानि। तत्र हव्यानि गामय ॥१०॥
स्वाहाग्नये वरुणाय स्वाहेन्द्राय मरुद्भ्यः। स्वाहा देवेभ्यो हविः ॥११॥
*susamiddhāya śochiṣe ghṛtaṁ tīvraṁ juhotana / agnaye jātavedase //1 //*
*narāśaṁsaḥ suṣūdatīmaṁ yajñamadābhyaḥ kavirhi madhuhastyaḥ //2 //*
*īḻito agna ā vahendraṁ chitramiha priyam / sukhai rathebhirūtaye //3 //*

*ūrṇamradā vi prathasvābhya1rkā anūṣata | bhavā naḥ śubhra sātaye ॥4॥*
*devīrdvāro vi śrayadhvaṁ suprāyaṇā na ūtaye | prapra yajñaṁ praṇītana ॥5॥*
*supratīke vayovṛdhā yahvī ṛtasya mātarā | doṣāmuṣāsamīmahe ॥6॥*
*vātasya patmannīḻitā daivyā hotārā manuṣaḥ | imaṁ no yajñamā gatam ॥7॥*
*iḻā sarasvatī mahī tisro devīrmayobhuvaḥ | barhiḥ sīdantvasridhaḥ ॥8॥*
*śivastvaṣṭarihā gahi vibhuḥ poṣa uta tmanā | yajñe yajñe na udava ॥9॥*
*yatra vettha vanaspate devānāṁ guhyā nāmāni | tatra havyāni gāmaya ॥10॥*
*svāhāgnaye varuṇāya svāhendrāya marudbhyaḥ | svāhā devebhyo haviḥ ॥11॥*

३. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) १०२२-१०२४

आ ते अग्न इधीमहि द्युमन्तं देवाजरम् ।
यद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषं स्तोतृभ्य आ भर ॥१॥
आ ते अग्न ऋचा हविः शुक्रस्य ज्योतिषस्पते ।
सुश्चन्द्र दस्म विश्पते हव्यवाट् तुभ्यं हूयत इषं स्तोतृभ्य आ भर ॥२॥
ओभे सुश्चन्द्र विश्पते दर्वी श्रीणीष आसनि ।
उतो न उत्पुपूर्या उक्थेषु शवसस्पत इषं स्तोतृभ्य आ भर ॥३॥

*susamiddhāya śochiṣe ghṛtaṁ tīvraṁ juhotana | agnaye jātavedase ॥1॥*
*narāśaṁsaḥ suṣūdatīmaṁ yajñamadābhyaḥ kavirhi madhuhastyaḥ ॥2॥*
*īḻito agna ā vahendraṁ chitramiha priyam | sukhi rathebhirūtaye ॥3॥*
*ūrṇamradā vi prathasvābhya1rkā anūṣata | bhavā naḥ śubhra sātaye ॥4॥*
*devīrdvāro vi śrayadhvaṁ suprāyaṇā na ūtaye | prapra yajñaṁ praṇītana ॥5॥*
*supratīke vayovṛdhā yahvī ṛtasya mātarā | doṣāmuṣāsamīmahe ॥6॥*
*vātasya patmannīḻitā divyā hotārā manuṣaḥ | imaṁ no yajñamā gatam ॥7॥*
*iḻā sarasvatī mahī tisro devīrmayobhuvaḥ | barhiḥ sīdantvasridhaḥ ॥8॥*
*śivastvaṣṭarihā gahi vibhuḥ poṣa uta tmanā | yajñe yajñe na udava ॥9॥*
*yatra vettha vanaspate devānāṁ guhyā nāmāni | tatra havyāni gāmaya ॥10॥*
*svāhāgnaye varuṇāya svāhendrāya marudbhyaḥ | svāhā devebhyo haviḥ ॥11॥*

## ५७६. वसूयव आत्रेयः (Vasūyava Ātreyaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ५.२५.१-९; ५.२६.१-९; सा. (Sv.) ८६; १५२१-१५२३

ऋ. (Rv.) ५.२५.१-९

अच्छा वो अग्निमवसे देवं गासि स नो वसुः। रासत्पुत्र ऋषूणामृतावा पर्षति द्विषः ॥१॥
स हि सत्यो यं पूर्वे चिद्देवासश्चिद्यमीधिरे। होतारं मन्द्रजिह्वमित्सुदीतिभिर्विभावसुम् ॥२॥
स नो धीती वरिष्ठया श्रेष्ठया च सुमत्या। अग्ने रायो दिदीहि नः सुवृक्तिभिर्वरेण्य ॥३॥
अग्निर्देवेषु राजत्यग्निर्मर्तेष्वाविशन्। अग्निर्नो हव्यवाहनोऽग्निं धीभिः सपर्यत ॥४॥
अग्निस्तुविश्रवस्तमं तुविब्रह्माणमुत्तमम्। अतूर्तं श्रावयत्पतिं पुत्रं ददाति दाशुषे ॥५॥
अग्निर्ददाति सत्पतिं सासाह यो युधा नृभिः। अग्निरत्यं रघुष्यदं जेतारमपराजितम् ॥६॥
यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो। महिषीव त्वद्रयिस्त्वद्वाजा उदीरते ॥७॥
तव द्युमन्तो अर्चयो ग्रावेवोच्यते बृहत्। उतो ते तन्यतुर्यथा स्वानो अर्त त्मना दिवः ॥८॥
एवाँ अग्निं वसूयवः सहसानं ववन्दिम। स नो विश्वा अति द्विषः पर्षन्नावेव सुक्रतुः ॥९॥

*achchhā vo agnimavase devaṁ gāsi sa no vasuḥ | rāsatputra ṛṣūṇāmṛtāvā parṣati dviṣaḥ ॥1॥*
*sa hi satyeā yaṁ pūrve chiddevāsaśchidyamīdhire | hotāraṁ mandrajihvamitsudītibhirvibhāvasum ॥2॥*
*sa no dhītī variṣṭhayā śreṣṭhayā cha sumatyā | agne rāyo didīhi naḥ suvṛktibhirvareṇya ॥3॥*
*agnirdeveṣu rājatyagnirmarteṣvāviśan | agnirno havyavāhano'giṁna dhībhiḥ saparyata ॥4॥*
*agnistuviśravastamaṁ tuvibrahmāṇamuttamam | atūrtaṁ śrāvayatpatiṁ putraṁ dadāti dāśuṣe ॥5॥*
*agnirdadāti satpatiṁ sāsāha yo yudhā nṛbhiḥ | agniratyaṁ raghuṣyadaṁ jetāramaparājitam ॥6॥*

*yadvāhiṣṭhaṁ tadagnaye bṛhadarcha vibhāvaso । mahiṣīva tvadrayistvadvājā udīrate ॥7 ॥*
*tava dyumanto archayo grāvevochyate bṛhat । uto te tanyaturyathā svāno arta tmanā divaḥ ॥8 ॥*
*evām̐ agiṁna vasūyavaḥ sahasānaṁ vavandima । sa no viśvā ati dviṣaḥ parvannāveva sukratuḥ ॥9 ॥*

ऋ. (Rv.) ५.२६.१-९

अग्ने पावक रोचिषा मन्द्रया देव जिह्वया। आ देवान्वक्षि यक्षि च ॥१॥
तं त्वा घृतस्नवीमहे चित्रभानो स्वर्दृशम्। देवाँ आ वीतये वह ॥२॥
वीतिहोत्रं त्वा कवे द्युम्न्तिं समिधीमहि। अग्ने बृहन्तमध्वरे ॥३॥
अग्ने विश्वेभिरा गहि देवेभिर्हव्यदातये। होतारं त्वा वृणीमहे ॥४॥
यजमानाय सुन्वत आग्ने सुवीर्यं वह। देवैरा सत्सि बर्हिषि ॥५॥
समिधानः सहस्रजिदग्ने धर्माणि पुष्यसि। देवानां दूत उक्थ्यः ॥६॥
न्यग्निं जातवेदसं होत्रवाहं यविष्ठ्यम्। दधाता देवमृत्विजम् ॥७॥
प्र यज्ञ एत्वानुषगद्या देवव्यचस्तमः। स्तृणीत बर्हिरासदे ॥८॥
एदं मरुतो अश्विना मित्रः सीदन्तु वरुणः। देवासः सर्वया विशा ॥९॥
*agne pāvaka rochiṣā mandrayā deva jihvayā । ā devānvakṣi yakṣi cha ॥1 ॥*
*taṁ tvā ghṛtasnavīmahe chitrabhāno svardṛśam । devām̐ ā vītaye vaha ॥2 ॥*
*vītihotraṁ tvā kave dyumntiṁ samidhīmahi । agne bṛhantamadhvare ॥3 ॥*
*agne viśvebhirā gahi devebhirhavyadātaye । hotāraṁ tvā vṛṇīmahe ॥4 ॥*
*yajamānāya sunvata āgne suvīryaṁ vaha । devairā satsi barhiṣi ॥5 ॥*
*samidhānaḥ sahasrajidagne dharmāṇi puṣyasi । devānāṁ dūta ukthyaḥ ॥6 ॥*
*nyagiṁna jātavedasaṁ hotravāhaṁ yaviṣṭhyam । dadhātā devamṛtvijam ॥7 ॥*
*pra yajña etvānuṣagadyā devavyachastamaḥ । stṛṇīta barhirāsade ॥8 ॥*
*edaṁ maruto aśvinā mitraḥ sīdantu varuṇaḥ । devāsaḥ sarvayā viśā ॥9 ॥*

सा. (Sv.) ८६

यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो। महिषीव त्वद्रयिस्त्वद्वाजा उदीरते ॥६॥
*yadvāhiṣṭhaṁ tadagnaye bṛhadarcha vibhāvaso । mahiṣīva tvadrayistvadvājā udīrate ॥6 ॥*

सा. (Sv.) १५२१-१५२३

अग्ने पावक रोचिषा मन्द्रया देव जिह्वया। आ देवान्वक्षि यक्षि च ॥१॥
तं त्वा घृतस्नवीमहे चित्रभानो स्वर्दृशम्। देवाँ आ वीतये वह ॥२॥
वीतिहोत्रं त्वा कवे द्युमन्तं समिधीमहि। अग्ने बृहन्तमध्वरे ॥३॥
*agne pāvaka rochiṣā mandrayā deva jihvayā । ā devānvakṣi yakṣi cha ॥1 ॥*
*taṁ tvā ghṛtasnavīmahe chitrabhāno svardṛśam । devām̐ ā vītaye vaha ॥2 ॥*
*vītihotraṁ tvā kave dyumantaṁ samidhīmahi । agne bṛhantamadhvare ॥3 ॥*

## ५७७. वागाम्भृणी (Vāgāmbhṛṇī)

१. वागाम्भृणी (Vāgāmbhṛṇī) - ऋ. (Rv.) १०.१२५.१-८

अहं रुद्रेभिर्वसुभिश्चराम्यमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा ॥१॥
अहं सोमसाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगम् ।
अहं दधामि द्रविणं हविष्मते सुप्राव्ये१यजमानाय सुन्वते ॥२॥
अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम् ॥३॥
मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं श्रृणोत्युक्तम् ।
अमन्तवो मां त उप क्षियन्ति श्रधि श्रुत श्रद्धिवं ते वदामि ॥४॥
अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः ।
यं कामये तंतमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ॥५॥
अहं रुद्राय धनुरा तनोमि ब्रह्मद्विषे शरवे हन्त्वा उ ।
अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आ विवेश ॥६॥

अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वेन्तः समुद्रे ।
ततो वि तिष्ठे भुवनानु विश्वोतामूं द्यां वर्ष्मणोप स्पृशामि ॥७॥
अहमेव वात इव प्र वाम्यारभमाणा भुवनानि विश्वा ।
परो दिवा पर एना पृथिव्यैतावती महिना सं बभूव ॥८॥
*ahaṁ rudrebhirvasubhiścharāmyamādityairuta viśvadevaiḥ ।*
*ahaṁ mitrāvaruṇobhā bibharmyahamindrāgnī ahamaśvinobhā ॥1॥*
*ahaṁ somasāhanasaṁ bibharmyahaṁ tvaṣṭāramuta pūṣaṇaṁ bhagam ।*
*ahaṁ dadhāmi draviṇaṁ haviṣmate suprāvye1yajamānāya sunvate ॥2॥*
*ahaṁ rāṣṭrī saṁgamanī vasūnāṁ chikituṣī prathamā yajñiyānām ।*
*tāṁ mā devā vyadadhuḥ purutrā bhūristhātrāṁ bhūryāveśayantīm ॥3॥*
*mayā so annamatti yo vipaśyati yaḥ prāṇiti ya īṁ śṛṇotyuktam ।*
*amantavo māṁ ta upa kṣiyanti śradhi śruta śraddhivaṁ te vadāmi ॥4॥*
*ahameva svayamidaṁ vadāmi juṣṭaṁ devebhiruta mānuṣebhiḥ ।*
*yaṁ kāmaye taṁtamugraṁ kṛṇomi taṁ brahmāṇaṁ tamṛṣiṁ taṁ sumedhām ॥5॥*
*ahaṁ rudrāya dhanurā tanomi brahmadviṣe śarave hantvā u ।*
*ahaṁ janāya samadaṁ kṛṇomyahaṁ dyāvāpṛthivī ā viveśa ॥6॥*
*ahaṁ suve pitaramasya mūrdhanmama yonirapsventaḥ samudre ।*
*tato vi tiṣṭhe bhuvanānu viśvotāmūṁ dyāṁ varṣmaṇopa spṛśāmi ॥7॥*
*ahameva vāta iva pra vāmyārabhamāṇā bhuvanāni viśvā ।*
*paro divā para enā pṛthivyaitāvatī mahinā saṁ babhūva ॥8॥*

## ५७८. वातजूतिः (Vātajūtiḥ)

१. केशिनः (Keśinaḥ) - ऋ. (Rv.) १०.१३६.२

मुनयो वातरशनाः पिशंगा वसते मला। वातस्यानु ध्राजिं यन्ति यद्देवासो अविक्षत ॥२॥
*munayo vātaraśanāḥ piśaṁgā vasate malā ।*
*vātasyānu dhrājiṁ yanti yaddevāso avikṣata ॥2॥*

## ५७९. वामदेवः (Vāmadevaḥ)

१. अग्निः (Agniḥ) - सा. (Sv.) १०; ८२; य. (Yv.) २.२७-३०; ३.१५; ३६; १३.९-१४; १७.८९; ९०; २७.३९

सा. (Sv.) १०

अग्ने विवस्वदा भरास्मभ्यमूतये महे। देवो ह्यसि नो दृशे ॥१०॥
*agne vivasvadā bharāsmabhyamūtaye mahe । devo hyasi no dṛśe ॥10॥*

सा. (Sv.) ८२

यदि वीरो अनु ष्यादग्निमिन्धीत मर्त्यः। आजुह्वद्भव्यमानुषक् शर्म भक्षीत दैव्यम् ॥२॥
*yadi vīro anu ṣyādagnimindhīta martyaḥ ।*
*ājuhvadbhavyamānuṣak śarma bhakṣīta daivyam ॥2॥*

य. (Yv.) २.२७-३०

अग्ने गृहपते सुगृहपतिस्त्वयाऽग्नेहं गृहपतिना भूयासं सुगृहपतिस्त्वं मयाऽग्ने गृहपतिना भूयाः ।
अस्थूरि णौ गार्हपत्यानि सन्तु शतं हिमाः सूर्यस्यावृतमन्वावर्ते ॥२७॥
अग्ने व्रतपते व्रतमचारिषं तदशकं तन्मेऽराधीदमहं यऽएवाऽस्मि सोऽस्मि ॥२८॥
अग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहा। अपहताऽअसुरा रक्षांसि वेदिषदः ॥२९॥
ये रूपाणि प्रतिमुंचमानाऽअसुराः सन्तः स्वधया चरन्ति ।
पुरापुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकात् प्रणुदात्यस्मात् ॥३०॥
*agne gṛhapate sugṛhapatistvayā'gnehaṁ gṛhapatinā bhūyāsaṁ sugṛhapatistvaṁ mayā'gne gṛhapatinā bhūyāḥ ।*
*asthūri ṇau gārhapatyāni santu śataṁ himāḥ sūryasyāvṛtamanvāvarte ॥27॥*
*agne vratapate vratamachāriṣaṁ tadaśakaṁ tanme'rādhīdamahaṁ ya'evā'smi so'smi ॥28॥*
*agnaye kavyavāhanāya svāhā somāya pitṛmate svāhā ।*
*apahatā'asurā rakṣāṁsi vediṣadaḥ ॥29॥*
*ye rūpāṇi pratimuṁchamānā'asurāḥ santaḥ svadhayā charanti ।*

*purāpuro nipuro ye bharantyagniṣṭām̐llokāt praṇudātyasmāt* //30 //

य. (Yv.) ३.१५

अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठोऽअध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे ॥१५॥
*ayamiha prathamo dhāyi dhātṛbhirhotā yajiṣṭho'adhvareṣvīḍyaḥ* /
*yamapnavāno bhṛgavo viruruchurvaneṣu chitraṁ vibhvaṁ viśeviśe* //15 //

य. (Yv.) ३.३६

परि ते दूडभो रथोऽस्माँ २ऽअश्नोतु विश्वतः। येन रक्षसि दाशुषः ॥३६॥
*pari te dūḍabho ratho'smām̐ 2'aśnotu viśvataḥ / yena rakṣasi dāśuṣaḥ* //36 //

य. (Yv.) १३.९-१४

कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ२ऽइभेन ।
तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षमस्तपिष्ठैः ॥९॥
तव भ्रमासऽआशुया पतन्त्यनु स्पृश धृषता शोशुचानः ।
तपूंष्यग्ने जुह्वा पतंगानसन्दितो विसृज विष्वगुल्काः ॥१०॥
प्रति स्पशो विसृज तूर्णितमो भवा पायुर्विशोऽअस्या अदब्धः ।
यो नो दूरेऽअघशंसो योऽअन्त्यग्ने माकिष्टे व्यथिरादधर्षीत् ॥११॥
उदग्ने तिष्ठ प्रत्यातनुष्व न्य मित्रा २ऽओषतात्तिग्महेते ।
यो नोऽअरातिं समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम् ॥१२॥
ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने ।
अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्रमृणीहि शत्रून् ।
अग्नेष्ट्वा तेजसा सादयामि ॥१३॥
अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्याऽअयम् ।
अपां रेतांसि जिन्वति। इन्द्रस्य त्वौजसा सादयामि ॥१४॥
*kṛṇuṣva pājaḥ prasitiṁ na pṛthvīṁ yāhi rājevāmavām̐2'ibhena* /
*tṛṣvīmanu prasitiṁ drūṇāno'stāsi vidhya rakṣamastapiṣṭhaiḥ* //9 //
*tava bhramāsa'āśuyā patantyanu spṛśa dhṛṣatā śośuchānaḥ* /
*tapūṁṣyagne juhvā pataṁgānasandito visṛja viṣvagulkāḥ* //10 //
*prati spaśo visṛja tūrṇitamo bhavā pāyurviśo'asyā adabdhaḥ* /
*yo no dūre'aghaśaṁso yo'antyagne mākiṣṭe vyathirādadharṣīt* //11 //
*udagne tiṣṭha pratyātanuṣva nya mitrā 2'oṣatāttigmahete* /
*yo no'arātiṁ samidhāna chakre nīchā taṁ dhakṣayatasaṁ na śuṣkam* //12 //
*ūrdhvo bhava prati vidhyādhyasmadāviṣkṛṇuṣva daivyānyagne* /
*ava sthirā tanuhi yātujūnāṁ jāmimajāmiṁ pramṛṇīhi śatrūn* /
*agneṣṭvā tejasā sādayāmi* //13 //
*agnirmūrddhā divaḥ kakutpatiḥ pṛthivyā'ayam* /
*apāṁ retāṁsi jinvati / indrasya tvaujasā sādayāmi* //14 //

य. (Yv.) १७.८९-९०

समुद्रादूर्मिर्मधुमाँ२ऽउदारदुपांशुना सममृतत्वमानट् ।
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥८९॥
वयं नाम प्र ब्रवामा घृतस्यास्मिन् यज्ञे धारयामा नमोभिः ।
उप ब्रह्मा शृणवच्छस्यमानं चतुः शृंगोऽवमीद् गौरऽएतत् ॥९०॥
*samudrādūrmirmadhumām̐2'udāradupāṁśunā samamṛtatvamānaṭ* /
*ghṛtasya nāma guhyaṁ yadasti jihvā devānāmamṛtasya nābhiḥ* //89 //
*vayaṁ nāma pra bravāmā ghṛtasyāsmin yajñe dhārayāmā namobhiḥ* /
*upa brahmā śṛṇavachchhasyamānaṁ chatuḥ śṛṁgo'vamīd gaura'etat* //90 //

य. (Yv.) २७.३९

कया नश्चित्रऽआ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता ॥३९॥
*kayā naśchitra'ā bhuvadūtī sadāvṛdhaḥ sakhā / kayā śachiṣṭhayā vṛtā* //39 //

२. अग्निवरुणौ (Agnivaruṇau) - य. (Yv.) २१.३-४

त्वं नोऽअग्ने वरुणस्य विद्वान् देवस्य हेडोऽअव यासिसीष्ठाः ।
याजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्र मुमुग्ध्यस्मत् ॥३॥
स त्वं नोऽअग्नेऽवमो भवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ ।
अव यक्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो नऽएधि ॥४॥
*tvaṁ no'agne varuṇasya vidvān devasya heḍo'ava yāsisīṣṭhāḥ ।*
*yājiṣṭho vahnitamaḥ śośuchāno viśvā dveṣāṁsi pra mumugdhyasmat ॥3॥*
*sa tvaṁ no'agne'vamo bhavotī nediṣṭho'asyā'uṣaso vyuṣṭau ।*
*ava yakṣava no varuṇaṁ rarāṇo vīhi mṛḍīkaṁ suhavo na'edhi ॥4॥*

३. अश्विनौ (Aśvinau) - अ. (Av.) २०.१४३.८

मधुमतीरोषधीर्द्याव आपो मधुमन्नो भवत्वन्तरिक्षम् ।
क्षेत्रस्य पतिर्मधुमान्नो अस्त्वरिष्यन्तो अन्वेनं चरेम ॥८॥
*madhumatīroṣadhīrdyāva āpo madhumanno bhavatvantarikṣam ।*
*kṣetrasya patirmadhumānno astvariṣyanto anvenaṁ charema ॥8॥*

४. आदित्यः (Ādityaḥ) - य. (Yv.) २१.५

महीम् षु मातरं सुव्रतानामृतस्य पत्नीमवसे हुवेम ।
तुविक्षत्रामजरन्तीमुरूचीं सुशर्माणमदितिं सुप्रणीतिम् ॥५॥
*mahīm ṣu mātaraṁ suvratānāmṛtasya patnīmavase huvema ।*
*tuvikṣatrāmajarantīmurūchīṁ suśarmāṇamaditiṁ supraṇītim ॥5॥*

५. आपः (Āpaḥ) - य. (Yv.) २.३४

ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम्। स्वधा स्थ तर्पयत मे पितॄन् ॥३४॥
*ūrjaṁ vahantīramṛtaṁ ghṛtaṁ payaḥ kīlālaṁ parisrutam । svadhā stha tarpayata me pitṝn ॥34॥*

६. आसन्दी राजपत्नी (Āsandī Rājapatnī) - य. (Yv.) १०.२६

स्योनासि सुषदासि क्षत्रस्य योनिरसि ।
स्योनामासीद सुषदामासीद क्षत्रस्य योनिमासीद ॥२६॥
*syonāsi suṣadāsi kṣatrasya yonirasi ।*
*syonāmāsīda suṣadāmāsīda kṣatrasya yonimāsīda ॥26॥*

७. इन्द्रः (Indraḥ) - सा. (Sv.) १११३-१११५; अ. (Av.) २०.७७.१-८; २०.१२४.१-३; य. (Yv.) २.२२; २०.४७-४९; २७.४०; ४१; ३३.६५; ३६.४; ६

सा. (Sv.) १११३-१११५

प्र व इन्द्राय वृत्रहन्तमाय विप्राय गाथं गायत यं जुजोषते ॥१॥
अर्चन्त्यर्कं मरुतः स्वर्का आ स्तोभति श्रुतो युवा स इन्द्रः ॥२॥
उप प्रक्षे मधुमति क्षियन्तः पुष्येम रयिं धीमहे त इन्द्र ॥३॥
*pra va indrāya vṛtrahantamāya viprāya gāthaṁ gāyata yaṁ jujoṣate ॥1॥*
*archantyarkaṁ marutaḥ svarkā ā stobhati śruto yuvā sa indraḥ ॥2॥*
*upa prakṣe madhumati kṣiyantaḥ puṣyema rayiṁ dhīmahe ta indra ॥3॥*

अ. (Av.) २०.७७.१-८

आ सत्यो यातु मघवाँ ऋजीषी द्रवन्त्वस्य हरय उप नः ।
तस्मा इदन्धः सुषुमा सुदक्षमिहाभिपित्वं करते गृणानः ॥१॥
अव स्य शूराध्वनो नान्तेऽस्मिन् नो अद्य सवने मन्दध्यै ।
शंसात्युक्थमुशनेव वेधाश्चिकितुषे असुर्याय मन्म ॥२॥
कविर्न निण्यं विदथानि साधन् वृषा यत् सेकं विपिपानो अर्चात् ।
दिव इत्था जीजनत् सप्त कारूनह्वा चिच्चक्रुर्वयुना गृणन्तः ॥३॥
स्वर्यद् वेदि सुद्दशीकमर्कैर्महि ज्योती रुरुचुर्यद्ध वस्तोः ।
अन्धा तमांसि दुधिता विचक्षे नृभ्यश्चकार नृतमो अभिष्टौ ॥४॥
ववक्ष इन्द्रो अमितमृजीष्यु१भे आ पप्रौ रोदसी महित्वा ।
अतश्चिदस्य महिमा वि रेचयभि यो विश्वा भुवना बभूव ॥५॥

विश्वानि शक्रो नर्याणि विद्वानपो रिरेच सखिभिर्निकामैः ।
अश्मानं चिद् ये बिभिदुर्वचोभिर्व्रजं गोमन्तमुशिजो वि वव्रुः ॥६॥
अपो वृत्रं वव्रिवांसं पराहन् प्रावत् ते वज्रं पृथिवी सचेताः ।
प्रार्णांसि समुद्रियाण्यैनोः पतिर्भवेंछवसा शूर धृष्णो ॥७॥
अपो यदद्रिं पुरुहूत दर्दराविर्भुवत् सरमा पूर्व्यं ते ।
स नो नेता वाजमा दर्षि भूरिं गोत्रा रुजन्नंगिरोभिर्गृणानः ॥८॥
*ā satyo yātu maghavām̐ ṛjīṣī dravantvasya haraya upa naḥ /*
*tasmā idandhaḥ suṣumā sudakṣamihābhipitvaṁ karate gṛṇānaḥ //1 //*
*ava sya śūrādhvano nānte'smin no adya savane mandadhyai /*
*śaṁsātyukthamuśaneva vedhāśchikituṣe asuryāya manma //2 //*
*kavirna niṇyaṁ vidathāni sādhan vṛṣā yat sekaṁ vipipāno archāt /*
*diva itthā jījanat sapta kārūnahnā chichchakrurvayunā gṛṇantaḥ //3 //*
*sva1ryad vedi sudṛśīkamarkaimahi jyotī ruruchuryaddha vastoḥ /*
*andhā tamāṁsi dudhitā vichakṣe nṛbhyaśchakāra nṛtamo abhiṣṭau //4 //*
*vavakṣa indro amitamṛjīṣyu1bhe ā paprau rodasī mahitvā /*
*ataśchidasya mahimā vi rechayabhi yo viśvā bhuvanā babhūva //5 //*
*viśvāni śakro naryāṇi vidvānapo rirecha sakhibhirnikāmaiḥ /*
*aśmānaṁ chid ye bibhidurvachobhirvrajaṁ gomantamuśijo vi vavruḥ //6 //*
*apo vṛtraṁ vavrivāṁsaṁ parāhan prāvat te vajraṁ pṛthivī sachetāḥ /*
*prārṇāṁsi samudriyāṇyainoḥ patirbhaveṁchhavasā śūra dhṛṣṇo //7 //*
*apo yadadriṁ puruhūta dardarāvirbhuvat saramā pūrvyaṁ te /*
*sa no netā vājamā darṣi bhūriṁ gotrā rujannaṁgirobhirgṛṇānaḥ //8 //*

अ. (Av.) २०.१२४.१-३

कया नश्चित्र आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता ॥१॥
कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः। दृळहा चिदारुजे वसु ॥२॥
अभी षु णः सखीनामविता जरितृणाम्। शतं भवास्यूतिभिः ॥३॥
*kayā naśchitra ā bhuvadūtī sadāvṛdhaḥ sakhā / kayā śachiṣṭhayā vṛtā //1 //*
*kastvā satyo madānāṁ maṁhiṣṭho matsadandhasaḥ / dṛḷahā chidāruje vasu //2 //*
*abhī ṣu ṇaḥ sakhīnāmavitā jaritṛṇām / śataṁ bhavāsyūtibhiḥ //3 //*

य. (Yv.) २.२२

सं बर्हिरङ्क्तां हविषा घृतेन समादित्यैर्वसुभिः सम्मरुद्भिः ।
समिन्द्रो विश्वदेवेभिरङ्क्तां दिव्यं नभो गच्छतु यत् स्वाहा ॥२२॥
*saṁ barhiraṅktāṁ haviṣā ghṛtena samādityairvasubhiḥ sammarudbhiḥ /*
*samindro viśvadevebhiraṅktāṁ divyaṁ nabho gachchhatu yat svāhā //22 //*

य. (Yv.) २०.४७-४९

आ यत्विन्द्रोऽवसऽउप नऽइह स्तुतः सधमादस्तु शूरः ।
वावृधानस्तविपीर्यस्य पूर्वीर्द्यौर्न क्षत्रमभिभूति पुष्यात् ॥४७॥
आ नऽइन्द्रो दूरादा नऽआसादभिष्टि कृदवसे यासदुग्रः ।
ओजिष्ठेभिर्नृपतिर्वज्रबाहुः संगेः समत्सु तुर्वणिः पृतन्यून् ॥४८॥
आ न इन्द्रो हरिभिर्यात्वच्छार्वाचीनोऽवसे राधसे च ।
तिष्ठति वज्री मघवा विरप्शीमं यज्ञमनु नो वाजसातौ ॥४९॥
*ā yatvindro'vasa'upa na'iha stutaḥ sadhamādastu śūraḥ /*
*vāvṛdhānastavipīryasya pūrvīrdyaurna kṣatramabhibhūti puṣyāt //47 //*
*ā na'indro dūrādā na'āsādabhiṣṭi kṛdavase yāsadugraḥ /*
*ojiṣṭhebhirnṛpatirvajrabāhuḥ saṁgeḥ samatsu turvaṇiḥ pṛtanyūn //48 //*
*ā na indro haribhiryātvachchhārvāchīno'vase rādhase cha /*
*tiṣṭhati vajrī maghavā virapśīmaṁ yajñamanu no vājasātau //49 //*

य. (Yv.) २७.४०-४१

कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः। दृढा चिदारुजे वसु ॥४०॥
अभी षु णः सखीनामविता जरितृणाम्। शतं भवास्यूतये ॥४१॥

*kastvā satyo madānāṁ maṁhiṣṭho matsadandhasaḥ । dṛḍhā chidāruje vasu ॥40॥*
*abhī ṣu ṇaḥ sakhīnāmavitā jaritṝṇām । śataṁ bhavāsyūtaye ॥41॥*

य. (Yv.) ३३.६५

आ तू नऽइन्द्र वृत्रहन्नस्माकमर्द्धमा गहि । महान्महीभिरूतिभिः ॥६५॥
*ā tū na'indra vṛtrahannasmākamarddhamā gahi । mahānmahībhirūtibhiḥ ॥65॥*

य. (Yv.) ३६.४

कया नश्चित्रऽआ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥४॥
kayā naśchitra'ā bhuvadūtī sadāvṛdhaḥ sakhā । kayā śachiṣṭhayā vṛtā ॥4॥

य. (Yv.) ३६.६

अभी षु णः सखीनामविता जरितृणाम् । शतं भवास्यूतिभिः ॥६॥
*abhī ṣu ṇaḥ sakhīnāmavitā jaritṝṇām । śataṁ bhavāsyūtibhiḥ ॥6॥*

८. इन्द्राबृहस्पतिः (Indrābṛhaspatiḥ) - अ. (Av.) २०.१३.१

इन्द्रश्च सोमं पिबतं बृहस्पतेऽस्मिन् यज्ञे मन्दसाना वृषण्वसू ।
आ वां विशन्त्विन्दवः स्वाभुवोऽस्मे रयिं सर्ववीरं नि यच्छतम् ॥१॥
*indraścha somaṁ pibataṁ bṛhaspate'smin yajñe mandasānā vṛṣaṇvasū ।*
*ā vāṁ viśantvindavaḥ svābhuvo'sme rayiṁ sarvavīraṁ ni yachchhatam ॥1॥*

९. ईश्वरः (Īśvaraḥ) - य. (Yv.) २.२६

स्वयंभूरसि श्रेष्ठो रश्मिर्वर्चोदाऽअसि वर्चो मे देहि । सूर्यस्यावृतमन्वावर्ते ॥२६॥
*svayaṁbhūrasi śreṣṭho raśmirvarchodā'asi varcho me dehi । sūryasyāvṛtamanvāvarte ॥26॥*

१०. त्वष्टा (Tvaṣṭā) - य. (Yv.) २.२४

सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सं शिवेन ।
त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् ॥२४॥
*saṁ varchasā payasā saṁ tanūbhiraganmahi manasā saṁ śivena ।*
*tvaṣṭā sudatro vidadhātu rāyo'numārṣṭu tanvo yadviliṣṭam ॥24॥*

११. दधिक्रा (Dadhikrā) - अ. (Av.) २०.१३७.३

दधिक्रावणो अकारिषं जिष्णोरश्वस्य वाजिनः । सुरभि नो मुखा करत प्र ण आयूंषि तारिषत् ।३।
*dadhikrāvaṇo akāriṣaṁ jiṣṇoraśvasya vājinaḥ । surabhi no mukhā karata pra ṇa āyūṁṣi tāriṣat ।3।*

१२. द्यावापृथिव्यौ विश्वेदेवाः (Dyāvāpṛthivyau Viśvedevāḥ) - अ. (Av.) ३.९.१-६

कर्शफस्य विशफस्य द्यौः पिता पृथिवी माता ।
यथाभिचक्र देवास्तथाप कृणुता पुनः ॥१॥
अश्रेष्माणो अधारयन् तथा तन्मनुना कृतम् ।
कृणोमि वध्रि विष्कन्धं मुष्काबर्हो गवामिव ॥२॥
पिशंगे सूत्रे खृगलं तदा बध्नन्ति वेधसः ।
श्रवस्युं शुष्मं काबवं वध्रिं कृण्वन्तु बन्धुरः ॥३॥
येना श्रवस्यवश्चरथ देवा इवासुरमायया ।
शुनां कपिरिव दूषणो बन्धुरा काबवस्य च ॥४॥
दुष्ट्यै हि त्वा भतस्यामि दूषयिष्यामि काबवम् ।
उदाशवो रथा इव शपथेभिः सरिष्यथ ॥५॥
एकशतं विष्कन्धानि विष्ठिता पृथिवीमनु ।
तेषां त्वामग्र उज्जहरुर्मणिं विष्कन्धदूषणम् ॥६॥
*karśaphasya viśaphasya dyauḥ pitā pṛthivī mātā ।*
*yathābhichakra devāstathāpa kṛṇutā punaḥ ॥1॥*
*aśreṣmāṇo adhārayan tathā tanmanunā kṛtam ।*
*kṛṇomi vadhri viṣkandhaṁ muṣkābarho gavāmiva ॥2॥*
*piśaṁge sūtre khṛgalaṁ tadā badhnanti vedhasaḥ ।*
*śravasyuṁ śuṣmaṁ kābavaṁ vadhriṁ kṛṇvantu bandhuraḥ ॥3॥*

*yenā śravasyavaścharatha devā ivāsuramāyayā ।*
*śunāṁ kapiriva dūṣaṇo bandhurā kābavasya cha ॥4॥*
*duṣṭyai hi tvā bhatasyāmi dūṣayiṣyāmi kābavam ।*
*udāśavo rathā iva śapathebhiḥ sariṣyatha ॥5॥*
*ekaśataṁ viṣkandhāni viṣṭhitā pṛthivīmanu ।*
*teṣāṁ tvāmagra ujjaharurmaṇiṁ viṣkandhadūṣaṇam ॥6॥*

१३. पितरः (Pitaraḥ) - य. (Yv.) २.३१-३३

अत्र पितरो मादयध्वं यथाभागमावृषायध्वम्। अमीमदन्त पितरो यथाभागमावृ षायिषत ॥३१॥
नमो व पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो देष्मैतद्वः पितरो वासः ॥३२॥
आधत्त पितरो गर्भं कुमारं पुष्करस्रजम्। यथेह पुरुषोऽसत् ॥३३॥
*atra pitaro mādayadhvaṁ yathābhāgamāvṛṣāyadhvam । amīmadanta pitaro yathābhāgamāvṛ ṣāyiṣata ॥31॥*
*namo va pitaro rasāya namo vaḥ pitaraḥ śoṣāya namo vaḥ pitaro jīvāya namo vaḥ pitaraḥ svadhāyai namo vaḥ pitaro ghorāya namo vaḥ pitaro manyave namo vaḥ pitaraḥ pitaro namo vo gṛhānnaḥ pitaro datta sato vaḥ pitaro deṣmaitadvaḥ pitaro vāsaḥ ॥32॥*
*ādhatta pitaro garbhaṁ kumāraṁ puṣkarasrajam । yatheha puruṣo'sat ॥33॥*

१४. प्रजापतिः (Prajāpatiḥ) - य. (Yv.) २.२१; २३; ३.३७

य. (Yv.) २.२१

वेदोऽसि येन त्वं देव वेद देवेभ्यो वेदोऽभवस्तेन मह्यं वेदो भूयाः ।
देवा गातुविदो गातुं वित्त्वा गातुमित। मनसस्पतऽइमं देव यज्ञं स्वाहा वाते धाः ॥२१॥
*vedo'si yena tvaṁ deva veda devebhyo vedo'bhavastena mahyaṁ vedo bhūyāḥ ।*
*devā gātuvido gātuṁ vittvā gātumita । manasaspata'imaṁ deva yajñaṁ svāhā vāte dhāḥ ॥21॥*

य. (Yv.) २.२३

कस्त्वा विमुंचति स त्वा विमुंचति कस्मै त्वा विमुंचति तस्मै त्वा विमुंचति ।
पोषाय रक्षसां भागोऽसि ॥२३॥
*kastvā vimuṁchati sa tvā vimuṁchati kasmai tvā vimuṁchati tasmai tvā vimuṁchati ।*
*poṣāya rakṣasāṁ bhāgo'si ॥23॥*

य. (Yv.) ३.३७

भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्यां सुवीरो वीरैः सुपोषः पोषैः ।
नर्य प्रजां मे पाहि शंस्य पशून् मे पाह्यथर्य पितुं मे पाहि ॥३७॥
*bhūrbhuvaḥ svaḥ suprajāḥ prajābhiḥ syāṁ suvīro vīraiḥ supoṣaḥ poṣaiḥ ।*
*narya prajāṁ me pāhi śaṁsya paśūn me pāhyatharya pituṁ me pāhi ॥37॥*

१५. बृहस्पतिः (Bṛhaspatiḥ) - अ. (Av.) २०.८८.१-६

यस्तस्तम्भ सहसा वि ज्मो अन्तान् बृहस्पतिस्त्रिषधस्थो रवेण ।
तं प्रत्नास ऋषयो दीध्यानाः पुरो विप्रा दधिरे मन्द्रजिह्वम् ॥१॥
धुनेतयः सुप्रकेतं मदन्तो बृहस्पते अभि ये नस्ततस्रे ।
पृषन्तं सृप्रमदब्धमूर्वं बृहस्पते रक्षतादस्य योनिम् ॥२॥
बृहस्पते या परमा परावदत आ त ऋतस्पृशो नि षेदुः ।
तुभ्यं खाता अवता आद्रिदुग्धा मध्व श्चोतन्त्यभितो विरप्शम् ॥३॥
बृहस्पतिः प्रथमं जायमानो महो ज्योतिषः परमे व्योमन् ।
सप्तास्यस्तुविजातो रवेण वि सप्तरश्मिरधमत् तमांसि ॥४॥
स सुष्टुभा स ऋक्वता गणेन वलं रुरोज फलिगं रवेण ।
बृहस्पतिरुस्त्रिया हव्यसूदः कनिक्रदद् वावशतीरुदाजत् ॥५॥
एवा पित्रे विश्वदेवाय वृष्णे यज्ञैर्विधेम नमसा हविर्भिः ।
बृहस्पते सुप्रजा वीरवन्तो वयं स्याम पतयो रयीणाम् ॥६॥

*yastastambha sahasā vi jmo antān bṛhaspatistriṣadhastho raveṇa /*
*taṁ pratnāsa ṛṣayo dīdhyānāḥ puro viprā dadhire mandrajihvam //1 //*
*dhunetayaḥ supraketaṁ madanto bṛhaspate abhi ye nastatasre /*
*pṛṣantaṁ sṛpramadabdhamūrvaṁ bṛhaspate rakṣatādasya yonim //2 //*
*bṛhaspate yā paramā parāvadata ā ta ṛtaspṛśo ni ṣeduḥ /*
*tubhyaṁ khātā avatā ādridugdhā madhva śchotantyabhito virapśam //3 //*
*bṛhaspatiḥ prathamaṁ jāyamāno maho jyotiṣaḥ parame vyoman /*
*saptāsyastuvijāto raveṇa vi saptaraśmaradhamat tamāṁsi //4 //*
*sa suṣṭubhā sa ṛkvatā gaṇena valaṁ ruroja phaligaṁ raveṇa /*
*bṛhaspatirusriyā havyasūdaḥ kanikradad vāvaśatīrudājat //5 //*
*evā pitre viśvadevāya vṛṣṇe yajñairvidhema namasā havibhiḥ /*
*bṛhaspate suprajā vīravanto vayaṁ syāma patayo rayīṇām //6 //*

१६. यज्ञपुरुषः (Yajñapuruṣaḥ) - य. (Yv.) १७.९१-९९

चत्वारि श्रृङ्गा त्रयोऽअस्य पादा द्वे शीर्षे सप्त हस्तासोऽअस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ२ऽआविवेश ॥९१॥
त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन् ।
इन्द्रऽएकं सूर्यऽएकंजजान वेनादेकं स्वधया निष्टक्षुः ॥९२॥
एताऽअर्षन्ति हृद्यात्समुद्रा च्छतव्रजा रिपुणा नावचक्षे ।
घृतस्य धाराऽअभिचाकशीमि हिरण्ययो वेतसो मध्यऽआसाम् ॥९३॥
सम्यक् स्रवन्ति सरितो न धेनाऽअन्तर्हृदा मनसा पूयमानाः ।
एतेऽअर्षन्त्यूर्मयो घृतस्य मृगाऽइव क्षिपणोरीषमाणाः ॥९४॥
सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः ।
घृतस्य धाराऽअरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ॥९५॥
अभिप्रवन्त समनेव योषाः कल्याण्यः स्मयमानासोऽअग्निम् ।
घृतस्य धाराः समिधो नसन्त ता जुषाणो हर्यति जातवेदाः ॥९६॥
कन्याऽइव वहतुमेतवाऽउऽअंज्यंजा नाऽअभि चाकशीमि ।
यत्र सोमः सूयते यत्र यज्ञो घृतस्य धाराऽअभि तत्पवन्ते ॥९७॥
अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त ।
इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत्पवन्ते ॥९८॥
धामन्ते विश्वं भुवनमाधि श्रितमन्तः समुद्रे हृद्य न्तरायुषि ।
अपामनीके समिथे यऽआभृतस्तमश्याम मधुमन्तं तऽऊर्मिम् ॥९९॥
*chatvāri śṛṅgā trayo'asya pādā dve śīrṣe sapta hastāso'asya /*
*tridhā baddho vṛṣabho roravīti maho devo matyāṁ̐r2'āviveśa //91 //*
*tridhā hitaṁ paṇibhirguhyamānaṁ gavi devāso ghṛtamanvavindan /*
*indra'ekaṁ sūrya'ekaṁjajāna venādekaṁ svadhayā niṣṭtakṣuḥ //92 //*
*etā'arṣanti hṛdyātsamudrā chchhatavrajā ripuṇā nāvachakṣe /*
*ghṛtasya dhārā'abhichākaśīmi hiraṇyayo vetaso madhya'āsām //93 //*
*samyak sravanti sarito na dhenā'antarhṛdā manasā pūyamānāḥ /*
*ete'arṣantyūrmayo ghṛtasya mṛgā'iva kṣipaṇorīṣamāṇāḥ //94 //*
*sindhoriva prādhvane śūghanāso vātapramiyaḥ patayanti yahvāḥ /*
*ghṛtasya dhārā'aruṣeā na vājī kāṣṭhā bhindannūrmibhiḥ pinvamānaḥ //95 //*
*abhipravanta samaneva yoṣāḥ kalyāṇya: smayamānāso'agnim /*
*ghṛtasya dhārāḥ samidho nasanta tā juṣāṇo haryati jātavedāḥ //96 //*
*kanyā'iva vahatumetavā'u'aṁjyaṁjā nā'abhi chākaśīmi /*
*yatra somaḥ sūyate yatra yajño ghṛtasya dhārā'abhi tatpavante //97 //*
*abhyarṣata suṣṭutiṁ gavyamājimasmāsu bhadrā draviṇāni dhatta /*
*imaṁ yajñaṁ nayata devatā no ghṛtasya dhārā madhumatpavante //98 //*
*dhāmante viśvaṁ bhuvanamādhi śritamantaḥ samudre hṛdya ntarāyuṣi /*
*apāmanīke samithe ya'ābhṛtastamaśyāma madhumantaṁ ta'ūrmim //99 //*

१७. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.) ३३.५४

देवेभ्यो हि प्रथमं यज्ञियेभ्योऽमृतत्वं सुवसि भागमुत्तमम् ।

आदिद्दाामानं सवि तर्व्यूणुर्षेऽनूचीना जीविता मानुषेभ्यः ॥५४॥
*devebhyo hi prathamaṁ yajñiyebhyo'mṛtatvaṁ suvasi bhāgamuttamam ।*
*ādiddāāmānaṁ savi tarvyūṇurṣe'nūchīnā jīvitā mānuṣebhyaḥ ॥54॥*

१८. विष्णुः (Viṣṇuḥ) - य. (Yv.) २.२५

दिवि विष्णुर्व्यक्रंस्त जागतेन च्छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मो ऽन्तरिक्षे विष्णुर्व्यक्रंस्त त्रैष्टुभेन च्छन्दसा ततो निर्भक्तो योऽस्मान् द्वेष्टि यं च वयं द्विष्मः पृथिव्यां विष्णुर्व्य क्रंस्त गायत्रेण च्छन्दसा ततो निर्भक्तो योस्मान्द्वेष्टि यं च वयं द्विष्मोऽस्मादन्नादस्यै प्रतिष्ठायाऽअगन्म स्वः सं ज्योतिषाभूम ॥२५॥
*divi viṣṇurvyakraṁsta jāgatena chchhandasā tato nirbhakto yo'smāndveṣṭi yaṁ cha vayaṁ dviṣmo 'ntarikṣe viṣṇurvyakraṁsta traiṣṭubhena chchhandasā tato nirbhakto yo'smān dveṣṭi yaṁ cha vayaṁ dviṣmaḥ pṛthivyāṁ viṣṇurvya kraṁsta gāyatreṇa chchhandasā tato nirbhakto yosmāndveṣṭi yaṁ cha vayaṁ dviṣmo'smādannādasyai pratiṣṭhāyā'aganma svaḥ saṁ jyotiṣābhūma ॥25॥*

१९. सरस्वती (Sarasvatī) - अ. (Av.) ७.५७.१-२

यदाशसा वदतो मे विचुक्षुभे यद् याचमानस्य चरतो जनाँ अनु ।
यदात्मनि तन्वो मे विरिष्टं सरस्वती तदा पृणद् घृतेन ॥१॥
सप्त क्षरन्ति शिशवे मरुत्वते पित्रे पुत्रासो अप्यवीवृतन्नृतानि ।
उभे इदस्योभे अस्य राजत उभे यतेते उभे अस्य पुष्यतः ॥२॥
*yadāśasā vadato me vichukṣubhe yad yāchamānasya charato janām̐ anu ।*
*yadātmani tanvo me viriṣṭaṁ sarasvatī tadā pṛṇad ghṛtena ॥1॥*
*sapta kṣaranti śiśave marutvate pitre putrāso apyavīvṛtannṛtāni ।*
*ubhe idasyobhe asya rājata ubhe yatete ubhe asya puṣyataḥ ॥2॥*

२०. सूर्य्यः (Sūryyaḥ) - य. (Yv.) १०.२४; २५

हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऽऋतजा ऽअद्रिजा ऽऋतं बृहत् ॥२४॥
इयदस्यायुरस्यायुर्मयि धेहि युङ्ङसि वर्चोऽसि वर्चो मयि धेह्यूर्गस्यूर्जं मयि धेहि। इन्द्रस्य वां वीर्यकृतो बाहूऽअभ्युपावहरामि ॥२५॥
*haṁsaḥ śuchiṣadvasurantarikṣasaddhotā vediṣadatithirduroṇasat ।*
*nṛṣadvarasadṛtasadvyomasadabjā gojā 'ṛtajā 'adrijā 'ṛtaṁ bṛhat ॥24॥*
*iyadasyāyurasyāyurmayi dhehi yuṅṅasi varcho'si varcho mayi dhehyūrgasyūrjjaṁ mayi dhehi । indrasya vāṁ vīryakṛto bāhū'abhyupāvaharāmi ॥25॥*

## ५८०. वामदेवो गौतमः (Vāmadevo Gautamaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ४.१.१; ५-२०; ४.२.१-२०; ४.३.१-१६; ४.६.१-११; ४.७.१-११; ४.८.१-८; ४.९.१-८; ४.१०.१-८; ४.११.१-६; ४.१२.१-६; ४.१३.१-५; ४.१५.१-६; सा. (Sv.) १२; २३; ३०; ६९; ६०६; ६१५; १७७७-१७७९

ऋ. (Rv.) ४.१.१

त्वां ह्यग्ने सदमित्समन्यवो देवासो देवमरतिं न्येरिर इति क्रत्वा न्येरिरे ।
अमर्त्यं यजत मर्त्येष्वा देवमादेवं जनत प्रचेतसं विश्वमादेवं जनत प्रचेतसम् ॥१॥
*tvāṁ hyagne sadamitsamanyavo devāso devamaratiṁ nyerira iti kratvā nyerire ।*
*amartyaṁ yajata martyeṣvā devamādevaṁ janata prachetasaṁ viśvamādevaṁ janata prachetasam ॥1॥*

ऋ. (Rv.) ४.१.५-२०

स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ।
अव यक्ष्व नो वरुणं रराणो वीहि मृळीकं सुहवो न एधि ॥५॥
अस्य श्रेष्ठा सुभगस्य संदृग्देवस्य चित्रतमा मर्त्येषु ।
शुचि घृतं न तप्तमघ्न्यायाः स्पार्हा देवस्य मंहनेव धेनोः ॥६॥
त्रिरस्य ता परमा सन्ति सत्या स्पार्हा देवस्य जनिमान्यग्नेः ।
अनन्ते अन्तः परिवीत आगाच्छुचिः शुक्रो अर्यो रोरुचानः ॥७॥

स दूतो विश्वेदभि वष्टि सद्मा होता हिरण्यरथो रंसुजिह्वः ।
रोहिदश्वो वपुष्यो विभावा सदा रण्वः पितुमतीव संसत् ॥८॥
स चेतन्यमनुषो यज्ञबन्धुः प्र तं मह्या रशनया नयन्ति ।
स क्षेत्यस्य दुर्यासु साधन्देवो मर्तस्य सधनित्वमाप ॥९॥
स तू नो अग्निर्नयतु प्रजानन्नच्छा रत्नं देवभक्तं यदस्य ।
धिया यद्विश्वे अमृता अकृण्वन्द्यौष्पिता जनिता सत्यमुक्षन् ॥१०॥
स जायत प्रथमः पस्त्यासु महो बुध्ने रजसो अस्य योनौ ।
अपादशीर्षा गुहमानो अन्तायोयुवानो वृषभस्य नीळे ॥११॥
प्र शर्ध आर्त प्रथमं विपन्याँ ऋतस्य योना वृषभस्य नीळे ।
स्पार्हो युवा वपुष्यो विभावा सप्त प्रियासोऽजनयन्त वृष्णे ॥१२॥
अस्माकमत्र पितरो मनुष्या अभि प्र सेदुर्ऋतमाशुषाणाः ।
अश्मव्रजाः सुदुघा वव्रे अन्तरुदुस्रा आजन्नुषसो हुवानाः ॥१३॥
ते मर्मृजत ददृवांसो अद्रिं तदेषामन्ये अभितो वि वोचन् ।
पश्वयन्त्रासो अभि कारमर्चन्विदन्त ज्योतिश्चकृपन्त धीभिः ॥१४॥
ते गव्यता मनसा दृध्रमुब्धं गा येमानं परि षन्तमद्रिम् ।
दृळहं नरो वचसा दैव्येन व्रजं गोमन्तमुशिजो वि वव्रुः ॥१५॥
ते मन्वत प्रथमं नाम धेनिस्त्रिः सप्त मातुः परमाणि विन्दन् ।
तज्जानतीरभ्यनूषत व्रा आविर्भुवदरुणीर्यशसा गोः ॥१६॥
नेशत्तमो दुधितं रोचत द्यौरुद्देव्या उषसो भानुरर्त ।
आ सूर्यो बृहतस्तिष्ठदज्राँ ऋजु मर्तेषु वृजिना च पश्यन् ॥१७॥
आदित्पश्चा बुबुधाना व्यख्यन्नादिद्रत्नं धारयन्त द्युभक्तम् ।
विश्वे विश्वासु दुर्यासु देवा मित्र धिये वरुण सत्यमस्तु ॥१८॥
अच्छा वोचेय शुशुचानमग्निं होतारं विश्वभरसं यजिष्ठम् ।
शुच्यूधो अतृणन्न गवामन्धो न पूतं परिषिक्तमंशोः ॥१९॥
विश्वेषमदितिर्यज्ञियानां विश्वेषामतिथिर्मानुषाणाम् ।
अग्निर्देवानामव आवृणानः सुमृळीको भवतु जातवेदाः ॥२०॥

*sa tvaṁ no agne'vamo bhavotī nediṣṭho asyā uṣaso vyuṣṭau /*
*ava yakṣava no varuṇaṁ rarāṇo vīhi mṛḻīkaṁ suhavo na edhi //5 //*
*asya śreṣṭhā subhagasya saṁdṛgdevasya chitratamā martyeṣu /*
*śuchi ghṛtaṁ na taptamadhnyāyāḥ spārhā devasya maṁhaneva dhenoḥ //6 //*
*trirasya tā paramā santi satyā spārhā devasya janimānyagneḥ /*
*anante antaḥ parivīta āgāchchhuchiḥ śukro aryo roruchānaḥ //7 //*
*sa dūto viśvedabhi vaṣṭi sadmā hotā hiraṇyaratho raṁsujihvaḥ /*
*rohidaśvo vapuṣyo vibhāvā sadā raṇvaḥ pitumatīva saṁsat //8 //*
*sa chetanyamanuṣo yajñabandhuḥ pra taṁ mahyā raśanayā nayanti /*
*sa kṣetyasya duryāsu sādhandevo martasya sadhanitvamāpa //9 //*
*sa tū no agnirnayatu prajānannachchhā ratnaṁ devabhakta yadasya /*
*dhiyā yadviśve amṛtā akṛṇvandyauṣpitā janitā satyamukṣan //10 //*
*sa jāyata prathamaḥ pastyāsu maho budhne rajaso asya yonau /*
*apādaśīrṣā guhamāno antāyoyuvāno vṛṣabhasya nīḻe //11 //*
*pra śardha ārta prathamaṁ vipanyām̐ ṛtasya yonā vṛṣabhasya nīḻe /*
*spārho yuvā vapuṣyo vibhāvā sapta priyāso'janayanta vṛṣṇe //12 //*
*asmākamatra pitaro manuṣyā abhi pra sedurṛtamāśuṣāṇāḥ /*
*aśmavrajāḥ sudughā vavre antarudusrā ājannuṣaso huvānāḥ //13 //*
*te marmṛjata dadṛvāṁso adriṁ tadeṣāmanye abhito vi vochan /*
*paśvayantrāso abhi kāramarchanvidanta jyotiśchakṛpanta dhībhiḥ //14 //*
*te gavyatā manasā dṛdhramubdhaṁ gā yemānaṁ pari ṣantamadrim /*
*dṛḻahaṁ naro vachasā daivyena vrajaṁ gomantamuśijo vi vavruḥ //15 //*
*te manvata prathamaṁ nāma dhenistraḥ sapta mātuḥ paramāṇi vindan /*
*tajjānatīrabhyanūṣata vrā āvirbhuvadaruṇīryaśasā goḥ //16 //*
*neśattamo dudhitaṁ rochata dyauruddevyā uṣaso bhānurarta /*

*ā sūryo bṛhatastiṣṭhadajrām̐ ṛju marteṣu vṛjinā cha paśyan ॥17॥*
*āditpaśchā bubudhānā vyakhyannadidratnaṁ dhārayanta dyubhaktam ।*
*viśve viśvāsu duryāsu devā mitra dhiye varuṇa satyamastu ॥18॥*
*achchhā vocheya śuśuchānamagiṁna hotāraṁ viśvabharasaṁ yajiṣṭham ।*
*śuchyūdho atṛṇanna gavāmandho na pūtaṁ pariṣiktamaṁśoḥ ॥19॥*
*viśveṣamaditiryajñiyānāṁ viśveṣāmatithirmānuṣāṇām ।*
*agnirdevānāmava āvṛṇānaḥ sumṛḷīko bhavatu jātavedāḥ ॥20॥*

ऋ. (Rv.) ४.२.१-२०

यो मर्त्येष्वमृत ऋतावा देवो देवेष्वरतिर्निधायि ।
होता यजिष्ठो मह्ना शुचध्यै हव्यैरग्निर्मनुष ईरयध्यै ॥१॥
इह त्वं सूनो सहसो नो अद्य जातो जाताँ उभयाँ अन्तरग्ने ।
दूत ईयसे युयुजान ऋष्व ऋजुमुष्कान्वृषणः शुक्रांश्च ॥२॥
अत्या वृधस्नू रोहिता घृतस्नू ऋतस्य मन्ये मनसा जविष्ठा ।
अन्तरीयसे अरुषा युजानो युष्मांश्च देवान्विश आ च मर्तान् ॥३॥
अर्यमणं वरुणं मित्रमेषामिन्द्राविष्णू मरुतो अश्विनोत ।
स्वश्वो अग्ने सुरथः सुराधा एदु वह सुहविषे जनाय ॥४॥
गोमाँ अग्नेऽविमाँ अश्वी यज्ञो नृवत्सखा सदमिदप्रमृष्यः ।
इळावाँ एषो असुर प्रजावान्दीर्घो रयिः पृथुबुध्नः सभावान् ॥५॥
यस्त इध्मं जभरत्सिष्विदानो मूर्धानं वा ततपते त्वाया ।
भुवस्तस्य स्वतवाँः पायुरग्ने विश्वस्मात्सीमघायत उरुष्य ॥६॥
यस्ते भरादन्नियते चिदन्नं निशिषन्मन्द्रमतिथिमुदीरत् ।
आ देवयुरिनधते दुरोणे तस्मिन् रयिर्ध्रुवो अस्तु दास्वान् ॥७॥
यस्त्वा दोषा य उषसि प्रशंसात्प्रियं वा त्वा कृणवते हविष्मान् ।
अश्वो न स्वे दम आ हेम्यावान्तमंहसः पीपरो दाश्वांसम् ॥८॥
यस्तुभ्यमग्ने अमृताय दाशद् दुवस्त्वे कृणवते यतस्रुक् ।
न स राया शशमानो वि योषन्नैनमंहः परि वरदघायोः ॥९॥
यस्य त्वमग्ने अध्वरं जुजोषो देवो मर्तस्य सुधितं रराणः ।
प्रीतेदसद्धोत्रा सा यविष्ठासाम यस्य विधतो वृधासः ॥१०॥
चित्तिमचित्तिं चिनबद्वि विद्वान्पृष्ठेव वीता वृजिना च मर्तान् ।
राये च नः स्वपत्याय देव दितिं च रास्वादितिमुरुष्य ॥११॥
कविं शशासुः कवयोऽदब्धा निधारयन्तो दुर्यास्वायोः ।
अतस्त्वं दृश्याँ अग्न एतान्पड्भिः पश्येरद्भुताँ अर्य एवैः ॥१२॥
त्वमग्ने वाघते सुप्रणीतिः सुतसोमाय विधते यविष्ठ ।
रत्नं भर शशमानाय घृष्वे पृथु श्चन्द्रमवसे चर्षणिप्राः ॥१३॥
अधा ह यद्वमग्ने त्वाया पडभिर्हस्तेभिश्चकृमा तनूभिः ।
रथं न क्रन्तो अपसा भुरिजोरृतं येमुः सुध्य आशुषाणाः ॥१४॥
अधा मातुरुषसः सप्त विप्रा जायेमहि प्रथमा वेधसो नृन् ।
दिवस्पुत्रा अंगिरसो भवेमाद्रिं रुजेम धनिनं शुचन्तः ॥१५॥
अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतमाशुषणाः ।
शुचीदयन्दीधितिमुक्थशासः क्षामा भिन्दन्तो अरुणीरप व्रन् ॥१६॥
सुकर्माणः सुरुचो देवयन्तोऽयो न देवा जनिमा धमन्तः ।
शुचन्तो अग्निं ववृधन्त इन्द्रमूर्वं गव्यं परिषदन्तो अग्मन् ॥१७॥
आ यूथेव क्षुमति पश्वो अख्यद्देवानां यज्जनिमान्त्युग्र ।
मर्तानां चिदुर्वशीरकृप्रन्वृधे चिदर्य उपरस्यायोः ॥१८॥
अकर्म ते स्वपसो अभूम ऋतमवस्रन्नुषसो विभातीः ।
अनूनमग्निं पुरुधा सुश्चन्द्रं देवस्य मर्मृजतश्चारु चक्षुः ॥१९॥
एता ते अग्न उचथानि वेधोऽवोचाम कवये ता जुषस्व ।
उच्छोचस्व कृणुहि वस्यसो नो महो रायः पुरुवार प्र यन्धि ॥२०॥

*yo martyeṣvamṛta ṛtāvā devo deveṣvaratirnidhāyi ।*
*hotā yajiṣṭho mahnā śuchadhyai havyairagnirmanuṣa īrayadhyai ॥1 ॥*
*iha tvaṁ sūno sahaso no adya jāto jātām̐ ubhayām̐ antaragne ।*
*dūta īyase yuyujāna ṛṣva ṛjumuṣkānvṛṣaṇaḥ śukrāṁścha ॥2 ॥*
*atyā vṛdhasnū rohitā ghṛtasnū ṛtasya manye manasā javiṣṭhā ।*
*antarīyase aruṣā yujāno yuṣmāṁścha devānviśa ā cha martān ॥3 ॥*
*aryamaṇaṁ varuṇaṁ mitrameṣāmindrāviṣṇū maruto aśvinota ।*
*svaśvo agne surathaḥ surādhā edu vaha suhaviṣe janāya ॥4 ॥*
*gomām̐ agne'pivamām̐ aśvī yajño nṛvatsakhā sadamidapramṛṣyaḥ ।*
*iḻāvām̐ eṣo asura prajāvāndīrgho rayiḥ pṛthubudhnaḥ sabhāvān ॥5 ॥*
*yasta idhmaṁ jabharatsiṣvidāno mūrdhānaṁ vā tatapate tvāyā ।*
*bhuvastasya svatavām̐ḥ pāyuragne viśvasmātsīmaghāyata uruṣya ॥6 ॥*
*yaste bharādanniyate chidannaṁ niśiṣanmandramatithimudīrat ।*
*ā devayurinadhate duroṇe tasmin rayirdhruvo astu dāsvān ॥7 ॥*
*yastvā doṣā ya uṣasi praśaṁsātpriyaṁ vā tvā kṛṇavate haviṣmān ।*
*aśvo na sve dama ā hemyāvāntamaṁhasaḥ pīparo dāśvāṁsam ॥8 ॥*
*yastubhyamagne amṛtāya dāśad duvastve kṛṇavate yatasruk ।*
*na sa rāyā śaśamāno vi yoṣannainamaṁhaḥ pari varadaghāyoḥ ॥9 ॥*
*yasya tvamagne adhvaraṁ jujoṣo devo martasya sudhitaṁ rarāṇaḥ ।*
*prītedasaddhotrā sā yaviṣṭhāsāma yasya vidhato vṛdhāsaḥ ॥10 ॥*
*chittimachittiṁ chinabadvi vidvānpṛṣṭheva vītā vṛjinā cha martān ।*
*rāye cha naḥ svapatyāya deva ditiṁ cha rāsvāditimuruṣya ॥11 ॥*
*kaviṁ śaśāsuḥ kavayo'dabdhā nidhārayanto duryāsvāyoḥ ।*
*atastvaṁ dṛśyām̐ agna etānpaḍbhiḥ paśyeradbhutām̐ arya evaiḥ ॥12 ॥*
*tvamagne vāghate supraṇītiḥ sutasomāya vidhate yaviṣṭha ।*
*ratnaṁ bhara śaśamānāya ghṛṣve pṛthu śrandramavase charṣaṇiprāḥ ॥13 ॥*
*adhā ha yadvamagne tvāyā paḍabhirhastebhiśchakṛmā tanūbhiḥ ।*
*rathaṁ na kranto apasā bhurijorṛtaṁ yemuḥ sudhya āśuṣāṇāḥ ॥14 ॥*
*adhā māturuṣasaḥ sapta viprā jāyemahi prathamā vedhaso nṛn ।*
*divasputrā aṁgiraso bhavemādriṁ rujema dhaninaṁ śuchantaḥ ॥15 ॥*
*adhā yathā naḥ pitaraḥ parāsaḥ pratnāso agna ṛtamāśuṣaṇāḥ ।*
*śuchīdayandīdhitimukthaśāsaḥ kṣāmā bhindanto aruṇīrapa vran ॥16 ॥*
*sukarmāṇaḥ surucho devayanto'yo na devā janimā dhamantaḥ ।*
*śuchanto agiṁna vavṛdhanta indramūrvaṁ gavyaṁ pariṣadanto agman ॥17 ॥*
*ā yūtheva kṣumati paśvo akhyaddevānāṁ yajjanimāntyugra ।*
*martānāṁ chidurvaśīrakṛpranvṛdhe chidarya uparasyāyoḥ ॥18 ॥*
*akarma te svapaso abhūma ṛtamavasrannuṣaso vibhātīḥ ।*
*anūnamagiṁna purudhā suśchandraṁ devasya marmṛjataśchāru chakṣuḥ ॥19 ॥*
*etā te agna uchathāni vedho'vochāma kavaye tā juṣasva ।*
*uchchhochasva kṛṇuhi vasyaso no maho rāyaḥ puruvāra pra yandhi ॥20 ॥*

ऋ. (Rv.) ४.३.१-१६

आ वो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः ।
अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपवसे कृणुध्वम् ॥१॥
अयं योनिश्चकृमा यं वयं ते जायेव पत्य उशती सुवासाः ।
अर्वाचीनः परिवीतो नि षीदेमा उ ते स्वपाक प्रतीचीः ॥२॥
आशृण्वते अदृपिताय मन्म नृचक्षसे सुमृळीकाय वेधः ।
देवाय शस्तिममृताय शंस ग्रावेव सोता मधुषुद् यमीळे ॥३॥
त्वं चिन्नः शम्या अग्ने अस्या ऋतस्य बोध्यृतचित्स्वाधीः ।
कदा त उक्था सधमाद्यानि कदा भवन्ति सख्या गृहे ते ॥४॥
कथा ह तद्वरुणाय त्वमग्ने कथा दिवे गर्हसे कन्न आगः ।
कथा मित्राय मीळहुषे पृथिव्यै ब्रवः कदर्यम्णे कद्भगाय ॥५॥
कद्धिष्ण्यासु वृधसानो अग्ने कद्वाताय प्रतवसे शुभंये ।
परिज्मने नासत्याय क्षे ब्रवः कदग्ने रुद्राय नृघ्ने ॥६॥

कथा महे पुष्टिंभराय पूष्णे कद्रुद्राय सुमखाय हविर्दे ।
कद्विष्णव उरुगायाय रेतो ब्रवः कदग्ने शरवे बृहत्यै ॥७॥
कथा शर्धाय मरुतामृताय कथा सूरे बृहते पृच्छ्यमानः ।
प्रति ब्रवोऽदित्ये तुराय साधा दिवो जातवेदश्चिकित्वान् ॥८॥
ऋतेन ऋतं नियतमीळ आ गोरामा सचा मधुमत्पक्वमग्ने ।
कृष्णा सती रुशता धासिनैषा जामर्येण पयसा पीपाय ॥९॥
ऋतेन हि ष्मा वृषभश्चिदक्तः पुमाँ अग्निः पयसा पृष्ठ्येन ।
असपन्दमानो अचरद्वयोधा वृषा शुक्रं दुदुहे पृश्निरूधः ॥१०॥
ऋतेनाद्रिं व्यसन्भिदन्तः समंगिरसो नवन्त गोभिः ।
शुनं नरः परि षदन्नुषासमाविः स्वरभवज्जाते अग्नौ ॥११॥
ऋतेन देवीरमृता अमृक्ता अर्णोभिरापो मधुमद्भिरग्ने ।
वाजी न सर्गेषु प्रस्तुभानः प्र सदमित्स्रवितवे दधन्युः ॥१२॥
मा कस्य यक्षं सदमिद्धुरो गा मा वेशस्य प्रमिनतो मापेः ।
मा भ्रातुरग्ने अनृजोऋर्णं वेर्मा सख्युर्दक्षं रिपोर्भुजेम ॥१३॥
रक्षा णो अग्ने तव रक्षणेभी रारक्षाणः सुमख प्रीणानः ।
प्रति ष्फुर वि रुज वीड्वंहो जहि रक्षो महि चिद्वावृधनम् ॥१४॥
एभिर्भव सुमना अग्ने अर्कैरिमान्त्स्पृश मन्मभिः शूर वाजान् ।
उत ब्रह्माण्यंगिरो जुषस्व सं ते शस्तिर्देववाता जरेत ॥१५॥
एता विश्वा विदुषे तुभ्यं वेधो नीथान्यग्ने निण्या वचांसि ।
निवचना कवये काव्यान्यशंसिषं मतिभिर्विप्र उक्थैः ॥१६॥

*ā vo rājānamadhvarasya rudraṁ hotāraṁ satyayajaṁ rodasyoḥ /*
*agiṁna purā tanayitnorachittāddhiraṇyarūpavase kṛṇudhvam //1 //*
*ayaṁ yoniśchakṛmā yaṁ vayaṁ te jāyeva patya uśatī suvāsāḥ /*
*arvāchīnaḥ parivīto ni ṣīdemā u te svapāka pratīchīḥ //2 //*
*āśṛṇvate adṛpitāya manma nṛchakṣase sumṛḻīkāya vedhaḥ /*
*devāya śastimamṛtāya śaṁsa grāveva sotā madhuṣud yamīḻe //3 //*
*tvaṁ chinnaḥ śamyā agne asyā ṛtasya bodhyṛtachitsvādhīḥ /*
*kadā ta ukthā sadhamādyāni kadā bhavanti sakhyā gṛhe te //4 //*
*kathā ha tadvaruṇāya tvamagne kathā dive garhase kanna āgaḥ /*
*kathā mitrāya mīḻahuṣe pṛthivyai bravaḥ kadaryamṇe kadbhagāya //5 //*
*kaddhiṣṇyāsu vṛdhasāno agne kadvātāya pratavase śubhaṁye /*
*parijmane nāsatyāya kṣe bravaḥ kadagne rudrāya nṛghne //6 //*
*kathā mahe puṣṭiṁbharāya pūṣṇe kadrudrāya sumakhāya havirde /*
*kadviṣṇava urugāyāya reto bravaḥ kadagne śarave bṛhatyai //7 //*
*kathā śardhāya marutāmṛtāya kathā sūre bṛhate pṛchchhyamānaḥ /*
*prati bravo'ditye turāya sādhā divo jātavedaśchikitvān //8 //*
*ṛtena ṛtaṁ niyatamīḻa ā gorāmā sachā madhumatpakvamagne /*
*kṛṣṇā satī ruśatā dhāsinaiṣā jāmaryeṇa payasā pīpāya //9 //*
*ṛtena hi ṣmā vṛṣabhaśchidaktaḥ pumām̐ agniḥ payasā pṛṣṭhyena /*
*asapandamāno acharadvayodhā vṛṣā śukraṁ duduhe pṛśnirūdhaḥ //10 //*
*ṛtenādriṁ vyasanbhidantaḥ samaṁgiraso navanta gobhiḥ /*
*śunaṁ naraḥ pari ṣadannuṣāsamāviḥ svarabhavajjāte agnau //11 //*
*ṛtena devīramṛtā amṛktā arṇobhirāpo madhumadbhiragne /*
*vājī na sargeṣu prastubhānaḥ pra sadamitsravitave dadhanyuḥ //12 //*
*mā kasya yakṣaṁ sadamiddhuro gā mā veśasya praminato māpeḥ /*
*mā bhrāturagne anṛjorṛṇaṁ vermā sakhyurdakṣaṁ riporbhujema //13 //*
*rakṣā ṇo agne tava rakṣaṇebhī rārakṣāṇaḥ sumakha prīṇānaḥ /*
*prati ṣphura vi ruja vīḍvaṁho jahi rakṣo mahi chidvāvṛdhanam //14 //*
*ebhirbhava sumanā agne arkairimāntspṛśa manmabhiḥ śūra vājān /*
*uta brahmāṇyaṁgiro juṣasva saṁ te śastirdevavātā jareta //15 //*
*etā viśvā viduṣe tubhyaṁ vedho nīthānyagne niṇyā vachāṁsi /*
*nivachanā kavaye kāvyānyaśaṁsiṣaṁ matibhirvipra ukthaiḥ //16 //*

ऋ. (Rv.) ४.६.१-११

ऊर्ध्व ऊ षु णो अध्वरस्य होतरग्ने तिष्ठ देवताता यजीयान् ।
त्वं हि विश्वमभ्यसि मन्म प्र वेधसश्चित्तिरसि मनीषाम् ॥१॥
अमूरो होता न्यसादि विक्ष्व१ग्निर्मन्द्रो विदथेषु प्रचेताः ।
ऊर्ध्वं भानुं सवितेवाश्रेन्मेतेव धूमं स्तभायदुप द्याम् ॥२॥
यता सुजूर्णी रातिनी घृताची प्रदक्षिणिद् देवतातिमुराणः ।
उदु स्वरुर्नवजा नाक्रः पश्वो अनक्ति सुधितः सुमेकः ॥३॥
स्तीर्णे बर्हिषि समिधाने अग्ना ऊर्ध्वो अध्वर्युर्जुजुषाणो अस्थात् ।
पर्यग्निः पशुपा न होता त्रिविष्ट्येति प्रदिव उराणः ॥४॥
परि त्मना मितद्रुरेति होताग्निर्मन्द्रो मधुवचा ऋतावा ।
द्रवन्त्यस्य वाजिनो न शोका भयन्ते विश्वा भुवना यदभ्राट् ॥५॥
भद्रा ते अग्ने स्वनीक संदृग्घोरस्य सतो विषुणस्य चारुः ।
न यत्ते शोचिस्तमसा वरन्त न ध्वस्मानस्तन्वी३ रेप आ धुः ॥६॥
न यस्य सातुर्जनितोरवारि न मातरापितरा नू चिदिष्टौ ।
अधा मित्रो न सुधितः पावको३ग्निर्दीदाय मानुषीषु विक्षु ॥७॥
द्विर्यं पंच जीजनन्संवसानाः स्वसारो अग्ंिन मनुषीषु विक्षु ।
उषर्बुधमथर्यो३ न दन्तं शुक्रं स्वासं परशुं न तिग्मम् ॥८॥
तव त्ये अग्ने हरितो घृतस्ना रोहितास ऋज्वंचः स्वंचः ।
अरुषासो वृषण ऋजुमुष्का आ देवतातिमह्वन्त दस्माः ॥९॥
ये ह त्ये ते सहमाना अयासस्त्वेषासो मारुतं न शर्धः ॥१०॥
अकारि ब्रह्म समिधान तुभ्यं शंसात्युक्थं यजते व्यू धाः ।
होतारमग्ंिन मनुषो नि षेदुर्नमस्यन्त उशिजः शंसमायोः ॥११॥

*ūrdhva ū ṣu ṇo adhvarasya hotaragne tiṣṭha devatātā yajīyān /*
*tvaṁ hi viśvamabhyasi manma pra vedhasaśchittirasi manīṣām //1 //*
*amūro hotā nyasādi vikṣava1gnirmandro vidatheṣu prachetāḥ /*
*ūrdhvaṁ bhānuṁ savitevāśrenmeteva dhūmaṁ stabhāyadupa dyām //2 //*
*yatā sujūrṇī rātinī ghṛtāchī pradakṣiṇid devatātimurāṇaḥ /*
*udu svarurnavajā nākraḥ paśvo anakti sudhitaḥ sumekaḥ //3 //*
*stīrṇe barhiṣi samidhāne agnā ūrdhvo adhvaryurjujuṣāṇo asthāt /*
*paryagniḥ paśupā na hotā triviṣṭyeti pradiva urāṇaḥ //4 //*
*pari tmanā mitadrureti hotāgnirmandro madhuvachā ṛtāvā /*
*dravantyasya vājino na śokā bhayante viśvā bhuvanā yadabhrāṭ //5 //*
*bhadrā te agne svanīka saṁdṛgghorasya sato viṣuṇasya chāruḥ /*
*na yatte śochistamasā varanta na dhvasmānastanvī3 repa ā dhuḥ //6 //*
*na yasya sāturjanitoravāri na mātarāpitarā nū chidiṣṭau /*
*adhā mitro na sudhitaḥ pāvako3gnirdīdāya mānuṣīṣu vikṣu //7 //*
*dviryaṁ paṁcha jījanansaṁvasānāḥ svasāro agiṁna manuṣīṣu vikṣu /*
*uṣarbudhamatharyo3 na dantaṁ śukraṁ svāsaṁ paraśuṁ na tigmam //8 //*
*tava tye agne harito ghṛtasnā rohitāsa ṛjvaṁchaḥ svaṁchaḥ /*
*aruṣāseā vṛṣaṇa ṛjumuṣkā ā devatātimahvanta dasmāḥ //9 //*
*ye ha tye te sahamānā ayāsastveṣāso mārutaṁ na śardhaḥ //10 //*
*akāri brahma samidhāna tubhyaṁ śaṁsātyukthaṁ yajate vyū dhāḥ /*
*hotāramagiṁna manuṣo ni ṣedurnamasyanta uśijaḥ śaṁsamāyoḥ //11 //*

ऋ. (Rv.) ४.७.१-११

अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे ॥१॥
अग्ने कदा त आनुषग्भुवद्देवस्य चेतनम् ।
अधा हि त्वा जगृभ्रिरे मर्तासो विक्ष्वीड्यम् ॥२॥
ऋतावानं विचेतसं पश्यन्तो द्यामिव स्तृभिः ।
विश्वेषामध्वराणां हस्तकर्तारं दमेदमे ॥३॥

आशुं दूतं विवस्वतो विश्वा यश्चर्षणीरभि ।
आ जभ्रुः केतुमायवो भृगवाणं विशेविशे ॥४॥
तमीं होतारमानुषक्चिकित्वांसं नि षेदिरे ।
रण्वं पावकशोचिषं यजिष्ठं सप्त धामभिः ॥५॥
तं शश्वतीषु मातृषु वन आ वीतमश्रितम् ।
चित्रं सन्तं गुहा हितं सुवेदं कूचिदर्थिनम् ॥६॥
ससस्य यद्वियुता सस्मिन्नू धन्नृतस्य धामन् रणयन्त देवाः ।
महाँ अग्निर्नमसा रातहव्यो वेरध्वराय सदमिदृतावा ॥७॥
वेरध्वरस्य दूत्यानि विद्वानुभे अन्ता रोदसी संचिकित्वान् ।
दूत ईयसे प्रदिव उराणो विदुष्टरो दिव आरोगधनानि ॥८॥
कृष्णं त एम रुशतः पुरो भाश्चरिष्णव१र्चिर्वपुषामिदेकम् ।
यदप्रवीता दधते ह गर्भं सद्यश्चिज्जातो भवसीदु दूतः ॥९॥
सद्यो जातस्य ददृशानमोजो यदस्य वातो अनुवाति शोचिः ।
वृणक्ति तिग्मामतसेषु जिह्वां स्थिरा चिदन्ना दयते वि जम्भैः ॥१०॥
तृषु यदन्ना तृषुणा ववक्ष तृषुं दूतं कृणुते यह्वो अग्निः ।
वातस्य मेळिं सचते निजूर्वन्नाशुं न वाजयते हिन्वे अर्वा ॥११॥
*ayamiha prathamo dhāyi dhātṛbhirhotā yajiṣṭho adhvareṣvīḍyaḥ /*
*yamapnavāno bhṛgavo viruruchurvaneṣu chitraṁ vibhvaṁ viśeviśe //1 //*
*agne kadā ta ānuṣagbhuvaddevasya chetanam /*
*adhā hi tvā jagṛbhrire martāso vikṣvīḍyam //2 //*
*ṛtāvānaṁ vichetasaṁ paśyanto dyāmiva stṛbhiḥ /*
*viśveṣāmadhvarāṇāṁ hastakartāraṁ damedame //3 //*
*āśuṁ dūtaṁ vivasvato viśvā yaścharṣaṇīrabhi /*
*ā jabhruḥ ketumāyavo bhṛgavāṇaṁ viśeviśe //4 //*
*tamīṁ hotāramānuṣakchikitvāṁsaṁ ni ṣedire /*
*raṇvaṁ pāvakaśochiṣaṁ yajiṣṭhaṁ sapta dhāmabhiḥ //5 //*
*taṁ śaśvatīṣu mātṛṣu vana ā vītamaśritam /*
*chitraṁ santaṁ guhā hitaṁ suvedaṁ kūchidarthinam //6 //*
*sasasya yadviyutā sasminnū dhannṛtasya dhāman raṇayanta devāḥ /*
*mahāṁ̐ agnirnamasā rātahavyo veradhvarāya sadamidṛtāvā //7 //*
*veradhvarasya dūtyāni vidvānubhe antā rodasī saṁchikitvān /*
*dūta īyase pradiva urāṇo viduṣṭaro diva ārogadhanāni //8 //*
*kṛṣṇaṁ ta ema ruśataḥ puro bhāścharіṣṇava1rchirvapuṣāmidekam /*
*yadapravītā dadhate ha garbhaṁ sadyaśchijjāto bhavasīdu dūtaḥ //9 //*
*sadyo jātasya dadṛśānamojo yadasya vāto anuvāti śochiḥ /*
*vṛṇakti tigmāmataseṣu jihvāṁ sthirā chidannā dayate vi jambhaiḥ //10 //*
*tṛṣu yadannā tṛṣuṇā vavakṣa tṛṣuṁ dūtaṁ kṛṇute yahvo agniḥ /*
*vātasya meḻiṁ sachate nijūrvannāśuṁ na vājayate hinve arvā //11 //*

ऋ. (Rv.) ४.८.१-८

दूतं वो विश्ववेदसं हव्यवाहममर्त्यम्। यजिष्ठमृंजसे गिरा ॥१॥
स हि वेदा वसुधितिं महाँ आरोधनं दिवः। स देवाँ एह वक्षति ॥२॥
स वेद देव आनमं देवाँ ऋतायते दमे। दाति प्रियाणि चिद्वसु ॥३॥
स होता सेदु दूत्यं चिकित्वाँ अन्तरीयते। विद्वाँ आरोधनं दिवः ॥४॥
ते स्याम ये अग्नये ददाशुर्हव्यदातिभिः। य ईं पुष्यन्त इन्धते ॥५॥
ते राया ते सुवीर्यैः ससवांसो वि शृण्विरे। ये अग्ना दधिरे दुवः ॥६॥
अस्मे रायो दिवेदिवे सं चरन्तु पुरुस्पृहः। अस्मे वाजास ईरताम् ॥७॥
स विप्रश्चर्षणीनां शवसा मानुषणाम्। अति क्षिप्रेव विध्यति ॥८॥
*dūtaṁ vo viśvavedasaṁ havyavāhamamartyam / yajiṣṭhamṛṁjase girā //1 //*
*sa hi vedā vasudhitiṁ mahāṁ̐ ārodhanaṁ divaḥ / sa devāṁ̐ eha vakṣati //2 //*
*sa veda deva ānamaṁ devāṁ̐ ṛtāyate dame / dāti priyāṇi chidvasu //3 //*
*sa hotā sedu dūtyaṁ chikitvāṁ̐ antarīyate / vidvāṁ̐ ārodhanaṁ divaḥ //4 //*

*te syāma ye agnaye dadāśurhavyadātibhiḥ / ya īṁ puṣyanta indhate //5 //*
*te rāyā te suvīryaiḥ sasavāṁso vi śṛṇvire / ye agnā dadhire duvaḥ //6 //*
*asme rāyo divedive saṁ charantu puruspṛhaḥ / asme vājāsa īratām //7 //*
*sa vipraścharṣaṇīnāṁ śavasā mānuṣaṇām / ati kṣipreva vidhyati //8 //*

ऋ. (Rv.) ४.९.१-८

अग्ने मृळ महाँ असि य ईमा देवयुं जनम्। इयेथ बर्हिरासदम् ॥१॥
स मानुषीषु दूळभो विक्षु प्रावरमर्त्यः। दूतो विश्वेषां भूवत् ॥२॥
स सद्म परि णीयते होता मन्द्रो दिविष्टिषु। उत पोता नि षदति ॥३॥
उत ग्ना अग्निरध्वर उतो गृहपतिर्दमे। उत ब्रह्मा नि षीदति ॥४॥
वेषि ह्यध्वरीयतामुपवक्ता जनानाम्। हव्या च मानुषाणम् ॥५॥
वेषीद्वस्य दूत्यं१ यस्य जुजोषो अध्वरम्। हव्यं मर्तस्य वोळहवे ॥६॥
अस्माकं जोष्यध्वरमस्माकं यज्ञमंगिरः। अस्माकं श्रृणुधी हवम् ॥७॥
परि ते दूळभो रथोऽस्माँ अश्नोतु विश्वतः। येन रक्षसि दाशुषः ॥८॥

*agne mṛḷa mahāṁ̐ asi ya īmā devayuṁ janam / iyetha barhirāsadam //1 //*
*sa mānuṣīṣu dūḷabho vikṣu prāvaramartyaḥ / dūto viśveṣāṁ bhūvat //2 //*
*sa sadma pari ṇīyate hotā mandro diviṣṭiṣu / uta potā ni ṣadati //3 //*
*uta gnā agniradhvara uto gṛhapatirdame / uta brahmā ni ṣīdati //4 //*
*veṣi hyadhvarīyatāmupavaktā janānām / havyā cha mānuṣāṇam //5 //*
*veṣīdvasya dūtyaṁ1 yasya jujoṣo adhvaram / havyaṁ martasya voḷahave //6 //*
*asmākaṁ joṣyadhvaramasmākaṁ yajñamaṁgiraḥ / asmākaṁ śṛṇudhī havam //7 //*
*pari te dūḷabho ratho'smāṁ̐ aśnotu viśvataḥ / yena rakṣasi dāśuṣaḥ //8 //*

ऋ. (Rv.) ४.१०.१-८

अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रं हृदिस्पृशम्। ऋध्यामा त ओहैः ॥१॥
अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः। रथीऋर्तस्य बृहतो बभूथ ॥२॥
एभिर्नो अर्कैर्भवा नो अर्वाङ् स्व१र्ण ज्योतिः। अग्ने विश्वेभिः सुमना अनीकैः ॥३॥
अभिष्टे अद्य गीर्भिर्गृणन्तोऽग्ने दाशेम। प्र ते दिवो न स्तनयन्ति शुष्माः ॥४॥
तव स्वादिष्ठाग्ने संदृष्टिरिदा चिदह्न इदा चिदक्तोः। श्रिये रुक्मो न रोचत उपाके ॥५॥
घृतं न पूतं तनूररेपाः शुचि हिरण्यम्। तत्ते रुक्मो नरोचत स्वधावः ॥६॥
कृतं चिद्धि ष्मा सनेमि द्वेषोऽग्नय इनोषि मर्तात्। इत्था यजमानादृतावः ॥७॥
शिवा नः सख्या सन्तु भ्रात्राग्ने देवेषु युष्मे। सा नो नाभिः सदने सस्मिन्नूधन् ॥८॥

*agne tamadyāśvaṁ na stomaiḥ kratuṁ na bhadraṁ hṛdispṛśam / ṛdhyāmā ta ohaiḥ //1 //*
*adhā hyagne kratorbhadasya dakṣasya sādhoḥ / rathīṛrtasya bṛhato babhūtha //2 //*
*ebhirno arkairbhavā no arvāṅ sva1rṇa jyotiḥ / agne viśvebhiḥ sumanā anīkaiḥ //3 //*
*abhiṣṭe adya gīrbhirgṛṇanto'gne dāśema / pra te divo na stanayanti śuṣmāḥ //4 //*
*tava svādiṣṭhāgne saṁdṛṣṭiridā chidahna idā chidaktoḥ / śriye rukmo na rochata upāke //5 //*
*ghṛtaṁ na pūtaṁ tanūrarepāḥ śuchi hiraṇyam / tatte rukmo narochata svadhāvaḥ //6 //*
*kṛtaṁ chidvi ṣmā sanemi dveṣo'gnaya inoṣi martāt / itthā yajamānādṛtāvaḥ //7 //*
*śivā naḥ sakhyā santu bhrātrāgne deveṣu yuṣme / sā no nābhiḥ sadane sasminnūdhan //8 //*

ऋ. (Rv.) ४.११.१-६

भद्रं ते अग्ने सहसिन्ननीकमुपाक आ रोचते सूर्यस्य ।
रुशद्दृशे ददृशे नक्तया चिदरूक्षितं दृश आ रूपे अन्नम् ॥१॥
वि षाह्यग्ने गृणते मनीषां खं वेषसा तुविजात स्तवानः ।
विश्वेभिर्यद्वावनः शुक्र देवैस्तन्नो रास्व सुमहो भूरि मन्म ॥२॥
त्वदग्ने काव्या त्वन्मनीषास्त्वदुक्था जायन्ते राध्यानि ।
त्वेदेति द्रविणं वीरपेषा इत्थाधिये दाशुषे मर्त्याय ॥३॥
त्वद्वाजी वाजंभरो विहाया अभिष्टिकृज्जायते सत्यशुष्मः ।
त्वद्रयिर्देवजूतो मयोभुस्त्वदाशुर्जूजुवाँ अग्ने अर्वा ॥४॥
त्वामग्ने प्रथमं देवयन्तो देवं मर्ता अमृत मन्द्रजिह्वम् ।

द्वेषोयुतमा विवासन्ति धीभिर्दमूनसं गृहपतिममूरम् ॥५॥
आरे अस्मदमतिमारे अंह आरे विश्वां दुर्मतिं यन्निपासि ।
दोषा शिवः सहसः सूनो अग्ने यं देव आ चित्सचसे स्वस्ति ॥६॥
*bhadraṁ te agne sahasinnanīkamupāka ā rochate sūryasya* ।
*ruśaddṛśe dadṛśe naktayā chidarūkṣitaṁ dṛśa ā rūpe annam* ॥1॥
*vi ṣāhyagne gṛṇate manīṣāṁ khaṁ veṣasā tuvijāta stavānaḥ* ।
*viśvebhiryadvāvanaḥ śukra devaistanno rāsba sumaho bhūri manma* ॥2॥
*tvadagne kāvyā tvanmanīṣāstvadukthā jāyante rādhyāni* ।
*tvedeti draviṇaṁ vīrapeṣā itthādhiye dāśuṣe martyāya* ॥3॥
*tvadvājī vājaṁbharo vihāyā abhiṣṭikṛjjāyate satyaśuṣmaḥ* ।
*tvadrayirdevajūto mayobhustvadāśurjūjuvāṁ̐ agne arvā* ॥4॥
*tvāmagne prathamaṁ devayanto devaṁ martā amṛta mandrajihvam* ।
*dveṣoyutamā vivāsanti dhībhirdamūnasaṁ gṛhapatimamūram* ॥5॥
*āre asmadamatimāre aṁha āre viśvāṁ durmatiṁ yannipāsi* ।
*doṣā śivaḥ sahasaḥ sūno agne yaṁ deva ā chitsachase svasti* ॥6॥

ऋ. (Rv.) ४.१२.१-६

यस्त्वामग्न इनधते यतस्रुक् त्रिस्ते अन्नं कृणवत्सस्मिन्नहन् ।
स सु द्युम्नैरभ्यस्तु प्रसक्षत्तव क्रत्वा जातवेदश्चिकित्वान् ॥१॥
इध्मं यस्ते जभरच्छश्रमाणे महो अग्ने अनीकमा सपर्यन् ।
स इधानः प्रति दोषामुषासं पुष्यन् रयिं सचते घ्नन्नमित्रान् ॥२॥
अग्निरीशे बृहतः क्षत्रियस्यानिर्वाजस्य परमस्य रायः ।
दधाति रत्नं विधते यविष्ठो व्यानुषङ्गर्त्याय स्वधावान् ॥३॥
यच्चिद्धि ते पुरुषत्रा यविष्ठाचित्तिभिश्चकृमा कच्चिदागः ।
कृधी ष्व१स्माँ अदितेरनागान्व्येनांसि शिश्रथो विष्वगग्ने ॥४॥
महश्चिदग्न एनसो अभीक ऊर्वाद्देवानामुत मर्त्यानाम् ।
मा ते सखायः सदमिद्रिषाम यच्छा तोकाय तनयाय शं योः ॥५॥
यथा ह त्यद्वसवो गौर्यं चित्पदि षिताममुंचता यजत्राः ।
एवो ष्व१स्मन्मुंचता व्यंहः प्र तार्यग्ने प्रतरं न आयुः ॥६॥
*yastvāmagna inadhate yatasruk triste annaṁ kṛṇavatsasminnahan* ।
*sa su dyumnairabhyastu prasakṣattava kratvā jātavedaśchikitvān* ॥1॥
*idhmaṁ yaste jabharachchhaśramāṇe maho agne anīkamā saparyan* ।
*sa idhānaḥ prati doṣāmuṣāsaṁ puṣyan rayiṁ sachate ghnannamitrān* ॥2॥
*agnirīśe bṛhataḥ kṣatriyasyānirvājasya paramasya rāyaḥ* ।
*dadhāti ratnaṁ vidhate yaviṣṭho vyānuṣaṁmartyāya svadhāvān* ॥3॥
*yachchiddhi te puruṣatrā yaviṣṭhāchittibhiśchakṛmā kachchidāgaḥ* ।
*kṛdhī ṣva1smāṁ̐ aditeranāgānvyenāṁsi śiśratho viṣvagagne* ॥4॥
*mahaśchidagna enaso abhīka ūrvāddevānāmuta martyānām* ।
*mā te sakhāyaḥ sadamidriṣāma yachchhā tokāya tanayāya śaṁ yoḥ* ॥5॥
*yathā ha tyadvasavo gauryaṁ chitpadi ṣitāmamuṁchatā yajatrāḥ* ।
*evo ṣva1smanmuṁchatā vyaṁhaḥ pra tāryagne prataraṁ na āyuḥ* ॥6॥

ऋ. (Rv.) ४.१३.१-५

प्रत्यग्निरुषसामग्रमख्यद्विभातीनां सुमना रत्नधेयम् ।
यातमश्विना सुकृतो दुरोणमुत्सूर्यो ज्योतिषा देव इति ॥१॥
ऊर्ध्वं भानुं सविता देवो अश्रेद्द्रप्सं दविध्वद्गविषो न सत्वा ।
अनु व्रतं वरुणो यन्ति मित्रो यत्सूर्यं दिव्यारोहयन्ति ॥२॥
यं सीमकृण्वन्तमसे विपृचे ध्रुवक्षेमा अनवस्यन्तो अर्थम् ।
तं सूर्यं हरितः सप्त यह्वीः स्पशं विश्वस्य जगतो वहन्ति ॥३॥
वहिष्ठेभिर्विहरन्यासि तन्तुमवव्ययन्नसितं देव वस्म ।
दविध्वतो रश्मयः सूर्यस्य चर्मेवावाधुस्तमो अप्स्व१न्तः ॥४॥
अनायतो अनिबद्धः कथायं न्यङ्ङुत्तानोऽव पद्यते न ।

कया याति स्वधया को ददर्श दिवः स्कम्भः समृतः पाति नाकम् ॥५॥
*pratyagniruṣasāmagramakhyadvibhātīnāṁ sumanā ratnadheyam /*
*yātamaśvinā sukṛto duroṇamutsūryo jyotiṣā deva iti //1 //*
*ūrdhvaṁ bhānuṁ savitā devo aśreddrapsaṁ davidhvadgaviṣo na satvā /*
*anu vrataṁ varuṇo yanti mitro yatsūryaṁ divyārohayanti //2 //*
*yaṁ sīmakṛṇvantamase vipṛche dhruvakṣemā anavasyanto artham /*
*taṁ sūryaṁ haritaḥ sapta yahvīḥ spaśaṁ viśvasya jagato vahanti //3 //*
*vahiṣṭhobhirviharanyāsi tantumavavyayannasitaṁ deva vasma /*
*davidhvato raśmayaḥ sūryasya charmevāvādhustamo apsva1ntaḥ //4 //*
*anāyato anibaddhaḥ kathāyaṁ nyaṅṅuttāno'va padyate na /*
*kayā yāti svadhayā ko dadarśa divaḥ skambhaḥ samṛtaḥ pāti nākam //5 //*

ऋ. (Rv.) ४.१५.१-६

अग्निर्होता नो अध्वरे वाजी सन्परि णीयते। देवो देवेषु यज्ञियः ॥१॥
परि त्रिविष्ट्यध्वरं यात्यग्नी रथीरिव। आ देवेषु प्रयो दधत् ॥२॥
परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत्। दधद्रत्नानि दाशुषे ॥३॥
अयं यः सृञ्जये पुरो दैववाते समिध्यते। द्युमाँ अमित्रदम्भनः ॥४॥
अस्य घा वीर ईवतोऽग्नेरीशीत मर्त्यः। तिग्मजम्भस्य मीळ्हुषः ॥५॥
तमर्वन्तं न सानसिमरुषं न दिवः शिशुम्। मर्मृज्यन्ते दिवेदिवे ॥६॥
*agnirhotā no adhvare vājī sanpari ṇīyate / devo deveṣu yajñiyaḥ //1 //*
*pari triviṣṭyadhvaraṁ yātyagnī rathīriva / ā deveṣu prayo dadhat //2 //*
*pari vājapatiḥ kaviragnirhavyānyakramīt / dadhadratnāni dāśuṣe //3 //*
*ayaṁ yaḥ sṛjjaye puro daivavāte samidhyate / dyumāṁ amitradambhanaḥ //4 //*
*asya ghā vīra īvato'gnerīśīta martyaḥ / tigmajambhasya mīḻahuṣaḥ //5 //*
*tamarvantaṁ na sānasimaruṣaṁ na divaḥ śiśum / marmṛjyante divedive //6 //*

सा. (Sv.) १२

दूतं वो विश्ववेदसं हव्यवाहममर्त्यम्। यजिष्ठमृंजसे गिरा ॥२॥
*dūtaṁ vo viśvavedasaṁ havyavāhamamartyam / yajiṣṭhamṛṁjase girā //2 //*

सा. (Sv.) २३

अग्ने मृड महाँ अस्यय आ देवयुं जनम्। इयेथ बर्हिरासदम् ॥३॥
*agne mṛḍa mahāṁ asyaya ā devayuṁ janam / iyetha barhirāsadam //3 //*

सा. (Sv.) ३०

परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत्। दधद्रत्नानि दाशुषे ॥१०॥
*pari vājapatiḥ kaviragnirhavyānyakramīt / dadhadratnāni dāśuṣe //10 //*

सा. (Sv.) ६९

आ वो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः ।
अग्नि्ंन पुरातनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम् ॥७॥
*ā vo rājānamadhvarasya rudraṁ hotāraṁ satyayajaṁ rodasyoḥ /*
*agiṁna purātanayitnorachittāddhiraṇyarūpamavase kṛṇudhvam //7 //*

सा. (Sv.) ६०६

ते मन्वत प्रथमं नाम गोनां त्रिः सप्त परमं नाम जानन् ।
ता जानतीरभ्यनूषत क्षा आविर्भुवन्नरुणीर्यशसा गावः ॥५॥
*te manvata prathamaṁ nāma gonāṁ triḥ sapta paramaṁ nāma jānan /*
*tā jānatīrabhyanūṣata kṣā āvirbhuvannaruṇīryaśasā gāvaḥ //5 //*

सा. (Sv.) ६१५

भ्राजन्त्यग्ने समिधान दीदिवो जिह्वा चरत्यन्तरासनि ।
स त्वं नो अग्ने पयसा वसुविद्रयिं वर्चो दृशेऽदाः ॥१॥
*bhrājantyagne samidhāna dīdivo jihvā charatyantarāsani /*
*sa tvaṁ no agne payasā vasuvidrayiṁ varcho dṛśe'dāḥ //1 //*

सा. (Sv.) १७७७-१७७९

अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रं हृदिस्पृशम्। ऋध्यामा त ओहैः ॥१॥
अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः। रथीऋर्तस्य बृहतो बभूथ ॥२॥
एभिर्नो अर्कैर्भवा नो अर्वाङ्क्ष्वर्ण ज्योतिः। अग्ने विश्वेभिः सुमना अनीकैः ॥३॥

२. अग्निः (साग्री. सास्वा.) ऋतवः (सार्षेदी.) (Agniḥ [Ssb. Sas.] Ṛtavaḥ [Sad.]) - सा. (Sv.) ६१६

वसन्त इन्नु रन्त्यो ग्रीष्म इन्नु रन्त्यः। वर्षाण्यनु शरदो हेमन्तः शिशिर इन्नु रन्त्यः ॥२॥
*vasanta innu rantyo grīṣma innu rantyaḥ । varṣāṇyanu śarado hemantaḥ śiśira innu rantyaḥ ॥2॥*

३. अग्नि लिङ्गोक्ता वा (Agni Liṅgoktā Vā) - ऋ. (Rv.) ४.१४.१-५

प्रत्यग्निरुषसो जातवेदा अख्यद्देवो रोचमाना महोभिः ।
आ नासत्योरुगाया रथेनेमं यज्ञमुप नो यातमच्छ ॥१॥
ऊर्ध्वं केतुं सविता देवो अश्रेज्ज्योतिर्विश्वस्मै भुवनाय कृण्वन् ।
आप्रा द्यावापृथिवी अन्तरिक्षं वि सूर्यो रश्मिभिश्चेकितानः ॥२॥
आवहन्त्यरुणीर्ज्योतिषागान्मही चित्रा रश्मिभिश्चेकिताना ।
प्रबोधयन्ती सुविताय देव्यु१षा ईयते सुयुजा रथेन ॥३॥
आ वां वहिष्ठा इह ते वहन्तु रथा अश्वास उषसो व्युष्टौ ।
इमे हि वां मधुपेयाय सोमा अस्मिन्यज्ञे वृषणा मादयेथाम् ॥४॥
अनायतो अनिबद्धः कथायं न्यङ्ङुत्तानोऽव पद्यते न ।
कया याति स्वधया को ददर्श दिवः स्कम्भः समृतः पाति नाकम् ॥५॥
*pratyagniruṣaso jātavedā akhyaddevo rochamānā mahobhiḥ ।*
*ā nāsatyorugāyā rathenemaṁ yajñamupa no yātamachchha ॥1॥*
*ūrdhvaṁ ketuṁ savitā devo aśrejjyotirviśvasmai bhuvanāya kṛṇvan ।*
*āprā dyāvāpṛthivī antarikṣaṁ vi sūryo raśmibhiśchekitānaḥ ॥2॥*
*āvahantyaruṇīrjyotiṣāgānmahī chitrā raśmibhiśchekitānā ।*
*prabodhayantī suvitāya devyu1ṣā īyate suyujā rathena ॥3॥*
*ā vāṁ vahiṣṭhā iha te vahantu rathā aśvāsa uṣaso vyuṣṭau ।*
*ime hi vāṁ madhupeyāya somā asminyajñe vṛṣaṇā mādayethām ॥4॥*
*anāyato anibaddhaḥ kathāyaṁ nyaṅṅuttāno'va padyate na ।*
*kayā yāti svadhayā ko dadarśa divaḥ skambhaḥ samṛtaḥ pāti nākam ॥5॥*

४. अग्निर् वा वरुणश्च (Agnir Vā Varuṇaścha) - ऋ. (Rv.) ४.१.२-४

स भ्रातरं वरुणमग्न आ ववृत्स्व देवाँ अच्छा सुमती यज्ञवनसं ज्येष्ठं यज्ञवनसम् ।
ऋतावानमादित्यं चर्षणीधृतं राजानं चर्षणीधृतम् ॥२॥
सखे सखायमभ्यो ववृत्स्वाशुं न चक्रं रथ्येव रंह्यास्मभ्यं दस्म रंह्या ।
अग्ने मृळीकं वरुणे सचा विदो मरुत्सु विश्वभानुषु ।
तोकाय तुजे शुशुचान शं कृध्यस्मभ्यं दस्म शं कृधि ॥३॥
त्वं नो अग्ने वरुणस्य विद्वान्देवस्य होळोऽव यासिसीष्ठाः ।
यजिष्ठो वह्नितमः शोशुचानो विश्वे द्वेषांसि प्र मुमुग्ध्यस्मत् ॥४॥
*sa bhrātaraṁ varuṇamagna ā vavṛtsva devāṅ achchhā sumatī yajñavanasaṁ jyeṣṭhaṁ yajñavanasam ।*
*ṛtāvānamādityaṁ charṣaṇīdhṛtaṁ rājānaṁ charṣaṇīdhṛtam ॥2॥*
*sakhe sakhāyamabhyo vavṛtsvāśuṁ na chakraṁ rathyeva raṁhyāsmabhyaṁ dasma raṁhyā ।*
*agne mṛḷīkaṁ varuṇe sachā vido marutsu viśvabhānuṣu ।*
*tokāya tuje śuśuchāna śaṁ kṛdhyasmabhyaṁ dasma śaṁ kṛdhi ॥3॥*
*tvaṁ no agne varuṇasya vidvāndevasya hoḷo'va yāsisīṣṭhāḥ ।*
*yajiṣṭho vahnitamaḥ śośuchāno viśve dveṣāṁsi pra mumugdhyasmat ॥4॥*

५. अग्निः सूर्यो वा अप्रो वा गावो वा घृतइ वा (Agniḥ Sūryo Vā Apro Vā Gāvo Vā Ghṛtai Vā) - ऋ. (Rv.) ४.५८.१-११

समुद्रादूर्मिर्मधुमाँ उदारदुपांशुना सममृतत्वमानट् ।
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥१॥
वयं नाम प्र ब्रवामा घृतस्यास्मिन्यज्ञे धारयामा नमोभिः ।
उप ब्रह्मा श्रृणवच्छस्यमानं चतुःश्रृंगोऽवमीद् गौर एतत् ॥२॥
चत्वारि श्रृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यों आ विवेश ॥३॥
त्रिधा हितं पणिभिगुर्ह्यमानं गवि देवासो घृतमन्वविन्दन् ।
इन्द्र एकं सूर्य एकं जजान बेनादेकं स्वधया निष्टतक्षुः ॥४॥
एता अर्षन्ति हृद्यात्समुद्राच्छातव्रजा रिपुणा नावचक्षे ।
घृतस्य धारा अभि चाकशीमि हिरण्ययो वेतसो मध्य आसाम् ॥५॥
सम्यक्स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः ।
एते अर्षन्त्यूर्मयो घृतस्य मृगा इव क्षिपणोरीषमाणाः ॥६॥
सिन्धोरिव प्राध्वने शूधनासो वातप्रमियः पतयन्ति यह्वाः ।
घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ॥७॥
अभि प्रवन्त समनेव योषाः कल्याण्यः१ स्मयमानासो अग्निम् ।
घृतस्य धाराः समिधो नसन्त ता जुषाणो हर्यति जातवेदाः ॥८॥
कन्या इव वहतुमेतवा उ अंज्यंजाना अभि चाकशीमि ।
यत्र सोमः सूयते यत्र यज्ञो घृतस्य धारा अभि तत्पवन्ते ॥९॥
अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त ।
इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत्पवन्ते ॥१०॥
धामन्ते विश्वे भुवनमधि श्रितमन्तः समुद्रे हृद्य१न्तरायुषि ।
अपामनीके समिथे य आभृतस्तमश्याम मधुमन्तं त ऊर्मिम् ॥११॥
*samudrādūrmirmadhumāṁ udāradupāṁśunā samamṛtatvamānaṭ ।*
*ghṛtasya nāma guhyaṁ yadasti jihvā devānāmamṛtasya nābhiḥ ॥1॥*
*vayaṁ nāma pra bravāmā ghṛtasyāsminyajñe dhārayāmā namobhiḥ ।*
*upa brahmā śṛṇavachchhasyamānaṁ chatuḥśṛṁgo'vamīd gaura etat ॥2॥*
*chatvāri śṛṅagā trayo asya pādā dve śīrṣe sapta hastāso asya ।*
*tridhā baddho vṛṣabho roravīti maho devo martyāṁ ā viveśa ॥3॥*
*tridhā hitaṁ paṇibhigurhyamānaṁ gavi devāso ghṛtamanvavindan ।*
*indra ekaṁ sūrya ekaṁ jajāna benādekaṁ svadhayā niṣṭatakṣuḥ ॥4॥*
*etā arṣanti hṛdyātsamudrāchchhātavrajā ripuṇā nāvachakṣe ।*
*ghṛtasya dhārā abhi chākaśīmi hiraṇyayo vetaso madhya āsām ॥5॥*
*samyaksravanti sarito na dhenā antarhṛdā manasā pūyamānāḥ ।*
*ete arṣantyūrmayo ghṛtasya mṛgā iva kṣipaṇorīṣamāṇāḥ ॥6॥*
*sindhoriva prādhvane śūdhanāso vātapramiyaḥ patayanti yahvāḥ ।*
*ghṛtasya dhārā aruṣo na vājī kāṣṭhā bhindannūrmibhiḥ pinvamānaḥ ॥7॥*
*abhi pravanta samaneva yoṣāḥ kalyāṇyaḥ1 smayamānāso agnim ।*
*ghṛtasya dhārāḥ samidho nasanta tā juṣāṇo haryati jātavedāḥ ॥8॥*
*kanyā iva vahatumetavā u aṁjyaṁjānā abhi chākaśīmi ।*
*yatra somaḥ sūyate yatra yajño ghṛtasya dhārā abhi tatpavante ॥9॥*
*abhyarṣata suṣṭutiṁ gavyamājimasmāsu bhadrā draviṇāni dhatta ।*
*imaṁ yajñaṁ nayata devatā no ghṛtasya dhārā madhumatpavante ॥10॥*
*dhāmante viśve bhuvanamadhi śritamantaḥ samudre hṛdya1ntarāyuṣi ।*
*apāmanīke samithe ya ābhṛtastamaśyāma madhumantaṁ ta ūrmim ॥11॥*

६. अश्विनौ (Aśvinau) - ऋ. (Rv.) ४.१५.९-१०; ४.४५.१-७

ऋ. (Rv.) ४.१५.९-१०

एष वां देवावश्विना कुमारः साहदेव्यः। दीर्घायुरस्तु सोमकः ॥९॥
तं युवं देवावश्विना कुमारं साहदेव्यम्। दीर्घायुषं कृणोतन ॥१०॥
*eṣa vāṁ devāvaśvinā kumāraḥ sāhadevyaḥ । dīrghāyurastu somakaḥ ॥9॥*
*taṁ yuvaṁ devāvaśvinā kumāraṁ sāhadevyam । dīrghāyuṣaṁ kṛṇotana ॥10॥*

ऋ. (Rv.) ४.४५.१-७

एष स्य भानुरुदियर्ति युज्यते रथः परिज्मा दिवो अस्य सानवि ।
पृक्षासो अस्मिन्मिथुना अधि त्रयो दृतिस्तुरीयो मधुनो वि रप्शते ॥१॥
उद्वां पृक्षासो मधुमन्त ईरते रथा अश्वास उषसो व्युष्टिषु ।
अपोर्णुवन्तस्तम आ परीवृतं स्व१र्ण शुक्रं तन्वन्त आ रजः ॥२॥
मध्वः पिबतं मधुपेभिरासभिरुत प्रियं मधुने युंजाथां रथम् ।
आ वर्तनिं मधुना जिन्वथस्पथो दृतिं वहेथे मधुमन्तमश्विना ॥३॥
हंसासो ये वां मधुमन्तो अस्रिधो हिरण्यपर्णा उहुव उषर्बुधः ।
उदप्रुतो मन्दिनो मन्दिनिस्पृशो मध्वो न मक्षः सवनानि गच्छथः ॥४॥
स्वध्वरासो मधुमन्तो अग्नय उस्रा जरन्ते प्रति वस्तोरश्विना ।
यन्नित्तहस्तस्तरणिर्विचक्षणः सोमं सुषाव मधुमन्तमद्रिभिः ॥५॥
आकेनिपासो अहभिर्दविध्वतः स्व१र्ण शुक्रं तन्वन्त आ रजः ।
सूरश्चिदश्वान्युयुजान ईयते विश्वाँ अनु स्वधया चेतथस्पिाः ॥६॥
प्र वामवोचमश्विना धियन्धा रथः स्वश्वो अजरो यो अस्ति ।
येन सद्यः परि रजांसि याथो हविष्मन्तं तरणिं भोजमच्छ ॥७॥

*eṣa sya bhānurudiyarti yujyate rathaḥ parijmā divo asya sānavi ।*
*pṛkṣāso asminmithunā adhi trayo dṛtisturīyo madhuno vi rapśate ॥1॥*
*udvāṁ pṛkṣāso madhumanta īrate rathā aśvāsa uṣaso vyuṣṭiṣu ।*
*aporṇuvantastama ā parīvṛtaṁ sva1rṇa śukraṁ tanvanta ā rajaḥ ॥2॥*
*madhvaḥ pibataṁ madhupebhirāsabhiruta priyaṁ madhune yuṁjāthāṁ ratham ।*
*ā vartaniṁ madhunā jinvathaspatho dṛtiṁ vahethe madhumantamaśvinā ॥3॥*
*haṁsāso ye vāṁ madhumanto asridho hiraṇyaparṇā uhuva uṣarbudhaḥ ।*
*udapruto mandino mandinispṛśo madhvo na makṣaḥ savanāni gachchhathaḥ ॥4॥*
*svadhvarāso madhumanto agnaya usrā jarante prati vastoraśvinā ।*
*yannitthastastaraṇirvichakṣaṇaḥ somaṁ suṣāva madhumantamadribhiḥ ॥5॥*
*ākenipāso ahabhirdavidhvataḥ sva1rṇa śukraṁ tanvanta ā rajaḥ ।*
*sūraśchidaśvānyuyujāna īyate viśvāṁ̐ anu svadhayā chetathaspiāḥ ॥6॥*
*pra vāmavochamaśvinā dhiyandhā rathaḥ svaśvo ajaro yo asti ।*
*yena sadyaḥ pari rajāṁsi yātho haviṣmantaṁ taraṇiṁ bhojamachchha ॥7॥*

७. इन्द्रः (Indraḥ) - ऋ. (Rv.) ४.१६.१-२१; ४.१७.१-२१; ४.१९.१-११; ४.२०.१-११; ४.२१.१-११; ४.२२.१-११; ४.२३.१-७; ११; ४.२५.१-८; ४.२६.१-७; ४.२७.१-५; ४.२९.१-५; ४.३०.१-८; १२-२४; ४.३१.१-१५; ४.३२.१-२२; सा. (Sv.) १६९; १७२; १८१; १९०; १९६; २०३; २०९; २१२; २२४; २८८; २९८; २९९; ३२७; ३३५; ३३६; ३३७; ३६९; ३७०; ३७२; ५८८; ६२३; ६८२-६८४

ऋ. (Rv.) ४.१६.१-२१

आ सत्यो यातु मघवाँ ऋजीषी द्रवन्त्वस्य हरय उप नः ।
तस्मा इदन्धः सुषुमा सुदक्षमिहाभिपित्वं करते गृणानः ॥१॥
अव स्य शुराध्वनो नान्तेऽस्मिन्नो अद्य सवने मन्दध्यै ।
शंसात्युक्थमुशनेव वेधाश्चिकितुषे असुर्याय मन्म ॥२॥
कविर्न निण्यं विदथानि साधन्वृषा यत्सेकं विपिपानो अर्चात् ।
दिव इत्था जीजनत्सप्त कारूनह्ना चिच्चक्रुर्वयुना गृणन्तः ॥३॥
स्व१र्यद्वेदि सुदृशीकमर्कैर्महि ज्योति रुरुचुर्यद्ध वस्तोः ।
अन्धा तमांसि दुधिता विचक्षे नृभ्यश्चकार नृतमो अभिष्टौ ॥४॥
ववक्ष इन्द्रो अमितमृजीष्यु१भे आ पप्रौ रोदसी महित्वा ।
अतश्चिदस्य महिमा वि रेच्यभि यो विश्वा भुवना बभूव ॥५॥
विश्वानि शक्रो नर्याणि विद्वानपो रिरेच सखिभिर्निकामैः ।
अश्मानं चिद्य बिभिदुर्वचोभिर्व्रजं गोमन्तमुशिजो वि वव्रुः ॥६॥
अपो बृत्रं वव्रिवांसं पराहन्प्रावत्ते वज्रं पृथिवी सचेताः ।

प्रार्णांसि समुद्रियाण्यैनोः पतिर्भवञ्छवसा शूर धृष्णो ॥७॥
अपो यदद्रिं पुरुहूत दर्दराविर्भुवत्सरमा पूर्व्यं ते ।
स नो नेता वाजमा दर्षि भूरिं गोत्रा रुजन्नंगिरोभिर्गृणानः ॥८॥
अच्छा कविं नृमणो गा अभिष्टौ स्वर्षाता मघवन्नाधमानम् ।
ऊतिभिस्तमिषणो द्युम्नहूतौ न मायावानब्रह्मा दस्युरर्त ॥९॥
आ दस्युघ्ना मनसा याह्यस्तं भुवत्ते कुत्सः सख्ये निकामः ।
स्वे योनौ नि षदतं सरूपा वि वां चिकित्सदृतचिद्ध नारी ॥१०॥
यासि कुत्सेन सरथमवस्युस्तोदो वातस्य हर्योरीशानः ।
ऋज्रा वाजं न गध्यं युयूषन्कविर्यदहन्पार्याय भूषात् ॥११॥
कुत्साय शुष्णमशुषं नि बर्हीः प्रपित्वे अह्नः कुयवं सहस्रा ।
सद्यो दस्यून्प्र मृण कुत्स्येन प्र सूरश्चक्रं बृहतादभीके ॥१२॥
त्वं पिप्रुं मृगयं शूशुवांसमृजिश्वने वैदथिनाय रन्धीः ।
पंचाशत्कृष्णा नि वपः सहस्रात्कं न पुरो जरिमा वि दर्दः ॥१३॥
सूर उपाके तन्वं१ दधानो वि यत्ते चेत्यमृतस्य वर्पः ।
मृगो न हस्ती तविषीमुषाणः सिंहो न भीम आयुधानि बिभ्रत् ॥१४॥
इन्द्रं कामा वसूयन्तो अग्मन्त्स्वर्मीळ्हे न सवने चकानाः ।
श्रवस्यवः शशमानास उक्थैरोको न रण्वा सुदृशीव पुष्टिः ॥१५॥
तमिद्व इन्द्रं सुहवं हुवेम यस्ता चकार नर्या पुरूणि ।
यो मावते जरित्रे गध्यं चिन्मक्षू वाजं भरति स्पार्हराधाः ॥१६॥
तिग्मा यदन्तरशनिः पताति कस्मिंश्चिच्छूर मुहुके जनानाम् ।
घोरा यदर्य समृतिर्भवात्यध स्मा नस्तन्वो बोधि गोपाः ॥१७॥
भुवोऽविता वामदेवस्य धीनां भुवः सखावृको वाजसातौ ।
त्वामनु प्रमतिमा जगन्मोरुशंसो जरित्रे विश्वध स्याः ॥१८॥
एभिर्नृभिरिन्द्र त्वायुभिष्ट्वा मघवद्भिर्मघवन्विश्व आजौ ।
द्यावा न द्युम्नैरभि सन्तो अर्यः क्षपो मदेम शरदश्च पूर्वीः ॥१९॥
एवेदिन्द्राय वृषभाय वृष्णे ब्रह्माकर्म भृगवो न रथम् ।
नू चिद्यथा नः सख्या वियोषदसन्न उग्रोऽविता तनूपाः ॥२०॥
नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो३ न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥२१॥

*ā satyo yātu maghavām̐ ṛjīṣī dravantvasya haraya upa naḥ* ।
*tasmā idandhaḥ suṣumā sudakṣamihābhipitvaṁ karate gṛṇānaḥ* ॥1॥
*ava sya śurādhvano nānte'sminno adya savane mandadhyai* ।
*śaṁsātyukthamuśaneva vedhāśchikituṣe asuryāya manma* ॥2॥
*kavirna niṇyaṁ vidathāni sādhanvṛṣā yatsekaṁ vipipāno archāt* ।
*diva itthā jījanatsapta kārūnahnā chichchakrurvayunā gṛṇantaḥ* ॥3॥
*sva1ryadvedi sudṛśīkamarkairmahi jyoti ruruchuryaddha vastoḥ* ।
*andhā tamāṁsi dudhitā vichakṣe nṛmyaśchakāra nṛtamo abhiṣṭau* ॥4॥
*vavakṣa indro amitamṛjīṣyu1bhe ā paprau rodasī mahitvā* ।
*ataśchidasya mahimā vi rechyabhi yo viśvā bhuvanā babhūva* ॥5॥
*viśvāni śakro naryāṇi vidvānapo rirecha sakhibhirnikāmaiḥ* ।
*aśmānaṁ chidya bibhidurvachobhirvrajaṁ gomantamuśijo vi vavruḥ* ॥6॥
*apo bṛtraṁ vavrivāṁsaṁ parāhanprāvatte vajraṁ pṛthivī sachetāḥ* ।
*prārṇāṁsi samudriyāṇyainoḥ patirbhavṁchhavasā śūra dhṛṣṇo* ॥7॥
*apo yadadriṁ puruhūta dardarāvibhruvatsaramā pūrvyaṁ te* ।
*sa no netā vājamā darṣi bhūriṁ gotrā rujannaṁgirobhirgṛṇānaḥ* ॥8॥
*achchhā kaviṁ nṛmaṇo gā abhiṣṭau svarṣātā maghavannādhamānam* ।
*ūtibhistamiṣaṇo dyṛmnahūtau na māyāvānabrahmā dasyurarta* ॥9॥
*ā dasyughnā manasā yāhyastaṁ bhuvatte kutsaḥ sakhye nikāmaḥ* ।
*sve yonau ni ṣadataṁ sarūpā vi vāṁ chikitsadṛtachiddha nārī* ॥10॥
*yāsi kutsena sarathamavasyustodo vātasya haryorīśānaḥ* ।

*ṛjrā vājaṁ na gadhyaṁ yuyūṣankaviryadahanpāryāya bhūṣāt ॥11॥*
*kutsāya śuṣṇamaśuṣaṁ ni barhīḥ prapitve ahnaḥ kuyavaṁ sahasrā ।*
*sadyo dasyūnpra mṛṇa kutsyena pra sūraśchakraṁ bṛhatādabhīke ॥12॥*
*tvaṁ pipruṁ mṛgayaṁ śūśuvāṁsamṛjiśvane vaidathināya randhīḥ ।*
*paṁchāśatkṛṣṇā ni vapaḥ sahasrātkaṁ na puro jarimā vi dardaḥ ॥13॥*
*sūra upāke tanvaṁ1 dadhāno vi yatte chetyamṛtasya varpaḥ ।*
*mṛgo na hastī taviṣīmuṣāṇaḥ siṁho na bhīma āyudhāni bibhrat ॥14॥*
*indraṁ kāmā vasūyanto agmantsvarmīḷahe na savane chakānāḥ ।*
*śravasyavaḥ śaśamānāsa ukthairoko na raṇvā sudṛśīva puṣṭiḥ ॥15॥*
*tamidva indraṁ suhavaṁ huvema yastā chakāra naryā purūṇi ।*
*yo māvate jaritre gadhyaṁ chinmakṣū vājaṁ bharati spārharādhāḥ ॥16॥*
*tigmā yadantaraśaniḥ patāti kasmiśchichchhūra muhuke janānām ।*
*ghorā yadarya samṛtirbhavātyadha smā nastanvo bodhi gopāḥ ॥17॥*
*bhuvo'vitā vāmadevasya dhīnāṁ bhuvaḥ sakhāvṛko vājasātau ।*
*tvāmanu pramatimā jaganmoruśaṁso jaritre viśvadha syāḥ ॥18॥*
*ebhirnṛbhirindra tvāyubhiṣṭvā maghavadbhirmaghavanviśva ājau ।*
*dyāvā na dyumnerabhi santo aryaḥ kṣapo madema śaradaścha pūrvīḥ ॥19॥*
*evedindrāya vṛṣabhāya vṛṣṇe brahmākarma bhṛgavo na ratham ।*
*nū chidyathā naḥ sakhyā viyoṣadasanna ugro'vitā tanūpāḥ ॥20॥*
*nū ṣṭuta indra nū gṛṇāna iṣaṁ jaritre nadyo3 na pīpeḥ ।*
*akāri te harivo brahma navyaṁ dhiyā syāma rathyaḥ sadāsāḥ ॥21॥*

ऋ. (Rv.) ४.१७.१-२१

त्वं महाँ इन्द्र तुभ्यं ह क्षा अनु क्षत्रं मंहना मन्यत द्यौः ।
त्वं वृत्रं शवसा जघन्वान्त्सृजः सिन्धूँरहिना जग्रसानान् ॥१॥
तव त्विषो जनिमन्रेजत द्यौ रेजद्भूमिर्भिया स्वस्य मन्योः ।
ऋघायन्त सुभ्वः१ पर्वतास आर्दन्धन्वानि सरयन्त आपः ॥२॥
भिनद्गिरिं शवसा वज्रमिष्णन्नाविष्कृण्वानः सहसान ओजः ।
वधीद्वृत्रं वज्रेण मन्दसानः सरन्नापो जवसा हतवृष्णीः ॥३॥
सुवीरस्ते जनिता मन्यत द्यौरिन्द्रस्य कर्ता स्वपस्तमो भूत् ।
य ईं जजान स्वर्यं सुवज्रमनपच्युतं सदसो न भूम ॥४॥
य एक इच्च्यावयति प्र भूमा राजा कृष्टीनां पुरुहूत इन्द्रः ।
सत्यमेनमनु विश्वे मदन्ति रातिं देवस्य गृणतो मघोनः ॥५॥
सत्रा सोमा अभवन्नस्य विश्वे सत्रा मदासो बृहतो मदिष्ठाः ।
सत्राभवो वसुपतिर्वसूनां दत्रे विश्वा अधिथा इन्द्र कृष्टीः ॥६॥
त्वमध प्रथमं जायमानोऽमे विश्वा अधिथा इन्द्र कृष्टीः ।
त्वं प्रति प्रवत आशयानमहिं वज्रेण मघवन्वि वृश्चः ॥७॥
सत्राहणं दाधृषिं तुम्रमिन्द्रं महामपारं वृषभं सुवज्रम् ।
हन्ता यो वृत्रं सनितोत वाजं दाता मघानि मघवा सुराधाः ॥८॥
अयं वृतश्चातयते समीचीर्य अजिषु मघवा शृण्व एकः ।
अयं वाजं भरति यं सनोत्यस्य प्रियासः सख्ये स्याम ॥९॥
अयं शृण्वे अध जयन्नुत घ्नन्नयमुत प्र कृणुते युधा गाः ।
यदा सत्यं कृणुते मन्युमिन्द्रो विश्वं दृळहं भयत एजदस्मात् ॥१०॥
समिन्द्रो गा अजयत्सं हिरण्या समश्विया मघवा यो ह पूर्वीः ।
एभिर्नृभिर्नतमो अस्य शाकै रायो विभक्ता संभरश्च वस्वः ॥११॥
कियत्स्विदिन्द्रो अध्येति मातुः कियत्पितुर्जनितुर्यो जजान ।
यो अस्य शुष्मं मुहुकैरियर्ति वातो न जूतः स्तनयद्भिरभ्रैः ॥१२॥
क्षियन्तं त्वमक्षियन्तं कृणोतीयर्ति रेणुं मघवा समोहम् ।
विभंजनुरशनिमाँ इव द्यौरुत स्तोतारं मघवा वसौ धात् ॥१३॥
अयं चक्रमिषणत्सूर्यस्य न्येतशं रीरमत्ससृमाणम् ।
आ कृष्ण ईं जुहुराणो जिघर्ति त्वचो बुध्ने रजसो अस्य योनौ ॥१४॥

असिक्न्यां यजमानो न होता ॥१५॥
गवयन्त इन्द्रं सख्याय विप्रा अश्वायन्तो वृषणं वाजयन्तः ।
जनीयन्तो जनिदामक्षितोतिमा च्यावयामोऽवते न कोशम् ॥१६॥
त्राता नो बोधि ददृशान आपिरभिख्याता मर्डिता सोम्यानाम् ।
सखा पिता पितृतमः पितृणां कर्तेमु लोकमुशते वयोधाः ॥१७॥
सखीयतामविता बोधि सखा गृणान इन्द्र स्तुवते वयो धाः।
वयं ह्या ते चकृमा सबाध आभिः शमीभिर्महयन्त इन्द्र ॥१८॥
स्तुत इन्द्रो मघवा यद्ध वृत्रा भुरीण्येको अप्रतीनि हन्ति ।
अस्य प्रियो जरिता यस्य शर्मन्नकिर्देवा वारयन्ते न मर्ताः ॥१९॥
एवा न इन्द्रो मघवा विरप्शी करत्सत्या चर्षणीधृदनर्वा ।
त्वं राजा जनुषां धेह्यस्मे अधि श्रवो माहिनं यज्जरित्रे ॥२०॥
नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो३ न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥२१॥

*tvaṁ mahām̐ indra tubhyaṁ ha kṣā anu kṣatraṁ maṁhanā manyata dyauḥ /*
*tvaṁ vṛtraṁ śavasā jaghanvāntsṛjaḥ sindhūm̐rahinā jagrasānān //1 //*
*tava tviṣo janimannejata dyau rejadbhūmirbhiyā svasya manyoḥ /*
*ṛghāyanta subhvaḥ1 parvatāsa ārdandhanvāni sarayanta āpaḥ //2 //*
*bhinadgiriṁ śavasā vajramiṣṇannāviṣkṛṇvānaḥ sahasāna ojaḥ /*
*vadhīdvṛtraṁ vajreṇa mandasānaḥ sarannāpo javasā hatavṛṣṇīḥ //3 //*
*suvīraste janitā manyata dyaurindrasya kartā svapatsatamo bhūt /*
*ya īṁ jajāna svaryaṁ suvajramanapachyutaṁ sadaso na bhūma //4 //*
*ya eka ichchyāvayati pra bhūmā rājā kṛṣṭīnāṁ puruhūta indraḥ /*
*satyamenamanu viśve madanti rātiṁ devasya gṛṇato maghonaḥ //5 //*
*satrā somā abhavannasya viśve satrā madāso bṛhato madiṣṭhāḥ /*
*satrābhavo vasupatirvasūnāṁ datre viśvā adhithā indra kṛṣṭīḥ //6 //*
*tvamadha prathamaṁ jāyamāno'me viśvā adhithā indra kṛṣṭīḥ /*
*tvaṁ prati pravata āśayānamahiṁ vajreṇa madhavanvi vṛśchaḥ //7 //*
*satrāhaṇaṁ dādhṛṣiṁ tumramindraṁ mahāmapāraṁ vṛṣabhaṁ suvajram /*
*hantā yo vṛtraṁ sanitota vājaṁ dātā maghāni maghavā surādhāḥ //8 //*
*ayaṁ vṛtaśchātayate samīchīrya ajiṣu maghavā śṛṇva ekaḥ /*
*ayaṁ vājaṁ bharati yaṁ sanotyasya priyāsaḥ sakhye syāma //9 //*
*ayaṁ śṛṇve adha jayannuta ghnannayamuta pra kṛṇute yudhā gāḥ /*
*yadā satyaṁ kṛṇute manyumindro viśvaṁ dṛḷahaṁ bhayata ejadasmāt //10 //*
*samindro gā ajayatsaṁ hiraṇyā samaśviyā maghavā yo ha pūrvīḥ /*
*ebhirnṛbhirnatamo asya śākai rāyo vibhaktā saṁbharaścha vasvaḥ //11 //*
*kiyatsvidindro adhyeti mātuḥ kiyatpiturjanituryo jajāna /*
*yo asya śuṣmaṁ muhukairiyarti vāto na jūtaḥ stanayadbhirabhraiḥ //12 //*
*kṣiyantaṁ tvamakṣiyantaṁ kṛṇetīyarti reṇuṁ maghavā samoham /*
*vibhaṁjanuraśanimām̐ iva dyauruta stotāraṁ maghavā vasau dhāt //13 //*
*ayaṁ chakramiṣaṇatsūryasya nyetaśaṁ rīramatsasṛmāṇam /*
*ā kṛṣṇa īṁ juhurāṇo jigharti tvacho budhne rajaso asya yonau //14 //*
*asiknyāṁ yajamāno na hotā //15 //*
*gavayanta indraṁ sakhyāya viprā aśvāyanto vṛṣaṇaṁ vājayantaḥ /*
*janīyanto janidāmakṣitotimā chyāvayāmo'vate na kośam //16 //*
*trātā no bodhi dadṛśāna āpirabhikhyātā marḍitā somyānām /*
*sakhā pitā pitṛtamaḥ pitṛṇāṁ kartemu lokamuśate vayodhāḥ //17 //*
*sakhīyatāmavitā bodhi sakhā gṛṇāna indra stuvate vayo dhāḥ /*
*vayaṁ hyā te chakṛmā sabādha ābhiḥ śamībhirmahayanta indra //18 //*
*stuta indro maghavā yaddha vṛtrā bhurīṇyeko apratīni hanti /*
*asya priyo jaritā yasya śarmannakirdevā vārayante na martāḥ //19 //*
*evā na indro maghavā virapśī karatsatyā charṣaṇīdhṛdanarvā /*
*tvaṁ rājā januṣāṁ dhehyasme adhi śravo māhinaṁ yajjaritre //20 //*
*nū ṣṭuta indra nū gṛṇāna iṣaṁ jaritre nadyo3 na pīpeḥ /*

*akāri te harivo brahma navyaṁ dhiyā syāma rathyaḥ sadāsāḥ* *//21 //*

ऋ. (Rv.) ४.१९.१-११

एवा त्वामिन्द्र वज्रिन्नत्र विश्वे देवासः सुहवास ऊमाः ।
महामुभे रोदसी वृद्धमृष्वं निरेकमिद्वृणते वृत्रहत्ये ॥१॥
अवासृजन्त जिव्रयो न देवा भुवः सम्राळिन्द्र सत्ययोनिः ।
अहन्नहिं परिशयानमर्णः प्र वर्तनीररदो विश्वधेनाः ॥२॥
अतृप्णुवन्तं वियतमबुध्यमबुध्यमानं सुषुपाणमिन्द्र ।
सप्त प्रति प्रवत आशयानमहिं वज्रेण वि रिणा अपर्वन् ॥३॥
अक्षोदयच्छवसा क्षाम बुध्नं वार्ण वातस्तविषीभिरिन्द्रः ।
दृळहान्यौभ्नादुशमान ओजोऽवाभिनत्ककुभः पर्वतानाम् ॥४॥
अभि प्र दद्रुर्जनयो न गर्भं रथाइव प्र ययुः साकमद्रयः ।
अतर्पयो विसृत उब्ज ऊर्मीन्त्वं वृताँ अरिणा इन्द्र सिन्धून् ॥५॥
त्वं महीमवनिं विश्वधेनां तुर्वीतये वय्याय क्षरन्तीम् ।
अरमयो नमसैजदर्णः सुतरणाँ अकृणोरिन्द्र सिन्धून् ॥६॥
प्राग्रुवो नभन्वो३ न वक्वा ध्वस्रा अपिन्वद्युवतीऋर्तज्ञाः ।
धन्वान्यज्राँ अपृणक्तृषाणाँ अधोगिन्द्रः स्तर्यो३ दंसुपत्नीः ॥७॥
पूर्वीरुषसः शरदश्च गूर्ता वृत्रं जघन्वाँ असृजद्वि सिन्धून् ।
परिष्ठिता अतृणद्बद्बधानाः सीरा इन्द्रः स्रवितवे पृथिव्या ॥८॥
वम्रीभिः पुत्रमग्रुवो अदानं निवेशनाद्धरिव आ जभर्थ ।
व्य१न्धो अख्यदहिमाददानो निर्भूदुखच्छित्समरन्त पर्व ॥९॥
प्र ते पूर्वाणि करणानि विप्राविद्वाँ आह विदुषे करांसि ।
यथायथा वृष्ण्यानि स्वगूर्ताऽपांसि राजन्नर्याविवेषीः ॥१०॥
नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो३ न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥११॥

*evā tvāmindra vajrinnatra viśve devāsaḥ suhavāsa ūmāḥ /*
*mahāmubhe rodasī vṛddhamṛṣvaṁ nirekamidvṛṇate vṛtrahatye //1 //*
*avāsṛjanta jivrayo na devā bhuvaḥ samrāḷindra satyayoniḥ /*
*ahannahiṁ pariśayānamarṇaḥ pra vartanīrarado viśvadhenāḥ //2 //*
*atṛpṇuvantaṁ viyatamabudhyamabudhyamānaṁ suṣupāṇamindra /*
*sapta prati pravata āśayānamahiṁ vajreṇa vi riṇā aparvan //3 //*
*akṣodayachchhavasā kṣāma budhnaṁ vārṇa vātastaviṣībhirindraḥ /*
*dṛḷahānyaubhnāduśamāna ojo'vābhinatkakubhaḥ parvatānām //4 //*
*abhi pra dadrurjanayo na garbhaṁ rathāiva pra yayuḥ sākamadrayaḥ /*
*atarpayo visṛta ubja ūrmīntvaṁ vṛtām̐ ariṇā indra sindhūn //5 //*
*tvaṁ mahīmavani viśvadhenāṁ turvītayaṁ vayyāya kṣarantīm /*
*aramayo namasaijadarṇaḥ sutaraṇām̐ akṛṇorindra sindhūn //6 //*
*prāgruvo nabhanvo3 na vakvā dhvasrā apinvadyuvatīṛrtajñāḥ /*
*dhanvānyajrām̐ apṛṇaktuṣāṇām̐ adhegindraḥ staryo3 daṁsupatnīḥ //7 //*
*pūrvīruṣasaḥ śaradaścha gūrtā vṛtraṁ jaghanvām̐ asṛjadvi sindhūn /*
*pariṣṭhitā atṛṇadbadbadhānāḥ sīrā indraḥ sravitave pṛthivyā //8 //*
*vamrībhiḥ putramagruvo adānaṁ niveśanāddhariva ā jabhartha /*
*vya1ndho akhyadahimādadāno nirbhūdukhachchhitsamaranta parva //9 //*
*pra te pūrvāṇi karaṇāni viprāvidvām̐ āha viduṣe karāṁsi /*
*yathāyathā vṛṣṇyāni svagūrtā'pāṁsi rājannaryāviveṣīḥ //10 //*
*nū ṣṭuta indra nū gṛṇāna iṣaṁ jaritre nadyo3 na pīpeḥ /*
*akāri te harivo brahma navyaṁ dhiyā syāma rathyaḥ sadāsāḥ //11 //*

ऋ. (Rv.) ४.२०.१-११

आ न इन्द्रो दूरादा न आसादभिष्टिकृदवसे यासदुग्रः ।
ओजिष्ठेभिर्नृपतिर्वज्रबाहुः संगे समत्सु तुर्वणिः पृतन्यून् ॥१॥
आ न इन्द्रो हरिभिर्यात्वच्छार्वाचीनोऽवसे राधसे च ।

तिष्ठाति वज्री मघवा विरप्शीमं यज्ञमनु नो वाजसातौ ॥२॥
इमं यज्ञं त्वमस्माकमिन्द्र पुरो दधत्सनिष्यसि क्रतुं नः ।
श्वघ्नीव वज्रिन्त्सनये धनानां त्वया वयमर्य आजिं जयेम ॥३॥
उशन्नु षु णः सुमना उपाके सोमस्य नु सुषुतस्य स्वधावः ।
पा इन्द्र प्रतिभृतस्य मधवः समन्धसा ममदः पृष्ठ्येन ॥४॥
वि यो ररप्श ऋषिभिर्नवेभिवृक्षो न पक्वः सृण्यो न जेता ।
मर्यो न योषामभिमन्यमानोऽच्छा विवक्मि पुरुहूतमिन्द्रम् ॥५॥
गिरिर्न यः स्वतवाँ ऋष्व इन्द्रः सनादेव सहसे जात उग्रः ।
आदर्ता वज्रं स्थविरं न भीम उद्नेव कोशं वसुना न्यृष्टम् ॥६॥
न यस्य वर्ता जनुषा न्वस्ति न राधस आमरीता मघस्य ।
उद्वावृषाणस्तविषीव उग्रास्मभ्यं दद्धि पुरुहूत रायः ॥७॥
ईक्षे रायः क्षयस्य चर्षणीनामुत व्रजमपवर्तासि गोनाम् ।
शिक्षानरः समिथेषु प्रहावान्वस्वो राशिमभिनेतासि भूरिम् ॥८॥
कया तच्छृण्वे शच्या शचिष्ठो यया कृणोति मुहु का चिदृष्वः ।
पुरु दाशुषे विचयिष्ठो अंहोऽथा दधाति द्रविणं जरित्रे ॥९॥
मा नो मर्धीरा भरा दद्धि तन्नः प्र दाशुषे दातवे भूरि यत्ते ।
नव्ये देष्णे शस्ते अस्मिन्त उक्थे प्र ब्रवाम वयमिन्द्र स्तुवन्तः ॥१०॥
नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो३ न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥११॥

*ā na indro dūrādā na āsādabhiṣṭikṛdavase yāsadugraḥ /*
*ojiṣṭhebhirnṛpatirvajrābāhuḥ saṁge samatsu turvaṇiḥ pṛtanyūn //1//*
*ā na indro haribhiryātvachchhārvāchīno'vase rādhase cha /*
*tiṣṭhāti vajrī maghavā virapśīmaṁ yajñamanu no vājasātau //2//*
*imaṁ yajñaṁ tvamasmākamindra puro dadhatsaniṣyasi kratuṁ naḥ /*
*śvaghnīva vajrintsanaye dhanānāṁ tvayā vayamarya ājiṁ jayema //3//*
*uśannu ṣu ṇaḥ sumanā upāke somasya nu suṣutasya svadhāvaḥ /*
*pā indra pratibhṛtasya madhavaḥ samandhasā mamadaḥ pṛṣṭhyena //4//*
*vi yo rarapśa ṛṣibhirnavebhivṛkṣo na pakvaḥ sṛṇyo na jetā /*
*maryo na yoṣāmabhimanyamāno'chchhā vivakmi puruhūtamindram //5//*
*girirna yaḥ sbatavām̐ ṛṣva indraḥ sanādeva sahase jāta ugraḥ /*
*ādartā vajraṁ sthaviraṁ na bhīma udneva kośaṁ vasunā nyṛṣṭam //6//*
*na yasya vartā januṣā nvasti na rādhasa āmarītā maghasya /*
*udvāvṛṣāṇastaviṣīva ugrāsmabhyaṁ daddhi puruhūta rāyaḥ //7//*
*īkṣe rāyaḥ kṣayasya charṣaṇīnāmuta vrajamapavartāsi gonām /*
*śikṣānaraḥ samitheṣu prahāvānvasvo rāśimabhinetāsi bhūrim //8//*
*kayā tachchhṛṇve śachyā śachiṣṭho yayā kṛṇoti muhu kā chidṛṣvaḥ /*
*puru dāśuṣe vichayiṣṭho aṁho'thā dadhāti draviṇaṁ jaritre //9//*
*mā no mardhīrā bharā daddhi tannaḥ pra dāśuṣe dātave bhūri yatte /*
*navye deṣṇe śaste asminta ukthe pra bravāma vayamindra stuvantaḥ //10//*
*nū ṣṭuta indra nū gṛṇāna iṣaṁ jaritre nadyo3 na pīpeḥ /*
*akāri te harivo brahma navyaṁ dhiyā syāma rathyaḥ sadāsāḥ //11//*

ऋ. (Rv.) ४.२१.१-११

आ यात्विन्द्रोऽवस उप न इह स्तुतः सधमादस्तु शूरः ।
वावृधनस्तविषीर्यस्य पूर्वीर्द्यौर्न क्षत्रमभिभूति पुष्यात् ॥१॥
तस्येदिह स्तवथ वृष्ण्यानि तुविद्युम्नस्य तुविराधसो नृन् ।
यस्य क्रतुर्विदथ्यो३ न सम्राट् साह्वान्तरुत्रो अभ्यस्ति कृष्टीः ॥२॥
आ यात्विन्द्रो दिव आ पृथिव्या मक्षू समुद्रादुत वा पुरीषात् ।
स्वर्णरादवसे नो मरुत्वान् परावतो वा सदनादृतस्य ॥३॥
स्थूरस्य रायो बृहतो य ईशे तमु ष्टवाम विदथेष्विन्द्रम् ।
यो वायुना जयति गोमतीषु प्र धृष्णुया नयति वस्यो अच्छ ॥४॥

उप यो नमो नमसि स्तभायन्नियर्ति वाचं जनयन्यजध्यै ।
ऋंजसानः पुरुवार उक्थैरेन्द्रं कृण्वीत सदनेषु होता ॥५॥
धिषा यदि धिषण्यन्तः सरण्यान्त्सदन्तो अद्रिमौशिजस्य गोहे ।
आ दुरोषाः पास्त्यस्य होता यो नो महान्त्संवरणेषु वह्निः ॥६॥
सत्रा यदीं भार्वरस्य वृष्णः सिषक्ति शुष्मः स्तुवते भराय ।
गुहा यदीमौशिजस्य गोहे प्र यद्धिये प्रायसे मदाय ॥७॥
वि यद्वरांसि पर्वतस्य वृण्वे पयोभिर्जिन्वे अपां जवांसि ।
विदद्गौरस्य गवयस्य गोहे यदी वाजाय सुध्यो३ वहन्ति ॥८॥
भद्रा ते हस्ता सुकृतोत पाणी प्रयन्तारा स्तुवते राध इन्द्र ।
का ते निषत्तिः किमु नो ममत्सि किं नोदुदु हर्षसे दातवा उ ॥९॥
एवा वस्व इन्द्रः सत्यः सम्राड्ढन्ता वृत्रं वरिवः पूरवे कः ।
पुरुष्टुत क्रत्वा नः शग्धि रायो भक्षीय तेऽवसो दैवयस्य ॥१०॥
नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो३ न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥११॥

*ā yātvindro'vasa upa na iha stutaḥ sadhamādastu śūraḥ /*
*vāvṛdhanastaviṣīryasya pūrvīrdyārna kṣatramabhibhūti puṣyāt //1 //*
*tasyediha stavatha vṛṣṇyāni tuvidyumnasya tuvirādhaso nṛn /*
*yasya kraturvidathyo3 na samrāṭ sāhvāntarutro abhyasti kṛṣṭīḥ //2 //*
*ā yātvindro diva ā pṛthivyā makṣū samudrāduta vā purīṣāt /*
*svarṇarādavase no marutvān parāvato vā sadanādṛtasya //3 //*
*sthūrasya rāyo bṛhato ya īśe tamu ṣṭavāma vidatheṣvindram /*
*yo vāyunā jayati gomatīṣu pra dhṛṣṇuyā nayati vasyo achchha //4 //*
*upa yo namo namasi stabhāyanniyarti vāchaṁ janayanyajadhyai /*
*ṛṁjasānaḥ puruvāra ukthairendraṁ kṛṇvīta sadaneṣu hotā //5 //*
*dhiṣā yadi dhiṣaṇyantaḥ saraṇyāntsadanto adrimauśijasya gohe /*
*ā duroṣāḥ pāstyasya hotā yo no mahāntsaṁvaraṇeṣu vahniḥ //6 //*
*satrā yadīṁ bhārvarasya vṛṣṇaḥ siṣakti śuṣmaḥ stuvate bharāya /*
*guhā yadīmauśijasya gohe pra yaddhiye prāyase madāya //7 //*
*vi yadvarāṁsi parvatasya vṛṇve payobhirjinve apāṁ javāṁsi /*
*vidadgaurasya gavayasya gohe yadī vājāya sudhyo3 vahanti //8 //*
*bhadrā te hastā sukṛtota pāṇī prayantārā stuvate rādha indra /*
*kā te niṣattiḥ kimu no mamatsi kiṁ nodudu harṣase dātavā u //9 //*
*evā vasva indraḥ satyaḥ samrāḍḍhantā vṛtraṁ varivaḥ pūrave kaḥ /*
*puruṣṭuta kratvā naḥ śagdhi rāyo bhakṣīya te'vaso daivayasya //10 //*
*nū ṣṭuta indra nū gṛṇāna iṣaṁ jaritre nadyo3 na pīpeḥ /*
*akāri te harivo brahma navyaṁ dhiyā syāma rathyaḥ sadāsāḥ //11 //*

ऋ. (Rv.) ४.२२.१-११

यन्न इन्द्रो जुजुषे यच्च वष्टि तन्नो महान्करति शुष्म्या चित् ।
ब्रह्म स्तोमं मघवा सोममुक्था यो अश्मानं शवसा बिभ्रदेति ॥१॥
वृषा वृषन्धिं चतुरश्रिमस्यन्नुग्रो बाहुभ्यां नृतमः शचीवान् ।
श्रिये परुष्णीमुषमाण ऊर्णां यस्याः पर्वाणि सख्याय विव्ये ।
यो देवो देवतमो जायमानो महो वाजेभिर्महद्भिश्च शुष्मैः ।
दधानो वज्रं बाह्वोरुशन्तं द्याममेन रेजयत्प्र भूम ॥३॥
विश्वा रोधांसि प्रवतश्च पूर्वीर्द्यौर्ऋष्वाज्जनिमन्रेजत क्षाः ।
आ मातरा भरति शुष्म्या गोर्नृवत्परिज्मन्नोनुवन्त वाताः ॥४॥
ता तू त इन्द्र महतो महानि विश्वेष्वित्सवनेषु प्रवाच्या ।
यच्छूर धृष्णो धृषता दधृष्वानहिं वज्रेण शवसाविवेषीः ॥५॥
ता तू ते सत्या तुविनृम्ण विश्वा प्र धेनवः सिस्रते वृष्ण ऊध्नः ।
अधा ह त्वद्वृषमणो भियानाः प्र सिन्धवो जवसा चक्रमन्तः ॥६॥
अत्राह ते हरिवस्ता उ देवीरवोभिरिन्द्र स्तवन्त स्वसारः ।

यत्सीमनु प्र मुचो बद्बधाना दीर्घामनु प्रसितिं स्यन्दयैध्य ॥७॥
पिपीळे अंशुर्मद्यो न सिन्धुरा त्वा शमी शशमानस्य शक्तिः ।
अस्मद्र्यक्शुशुचानस्य यम्या आशुर्न रश्मिं तुव्योजसं गोः ॥८॥
अस्मे वर्षिष्ठा कृणुहि ज्येष्ठा नृम्णानि सत्रा सहुरे सहांसि ।
अस्मभ्यं वृत्रा सुहनानि रन्धि जहि वधर्वनुषो मर्त्यस्य ॥९॥
अस्माकमित्सु शृणुहि त्वमिन्द्रास्मभ्यं चित्राँ उप माहि वाजान् ।
अस्मभ्यं विश्वा इषणः पुरंधीरस्माकं सु मघवन्बोधि गोदाः ॥१०॥
नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो३ न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥११॥
*yanna indro jujuṣe yachcha vaṣṭi tanno mahānkarati śuṣmyā chit /*
*brahma stomaṁ maghavā somamukthā yo aśmānaṁ śavasā bibhradeti //1 //*
*vṛṣā vṛṣaniṁdha chaturaśrimasyannugro bāhubhyāṁ nṛtamaḥ śachīvān /*
*śriye paruṣṇīmuṣamāṇa ūrṇāṁ yasyāḥ parvāṇi sakhyāya vivye /*
*yo devo devatamo jāyamāno maho vājebhirmahadbhiścha śuṣmaiḥ /*
*dadhāno vajraṁ bāhvoruśantaṁ dyāmamena rejayatpra bhūma //3 //*
*viśvā rodhāṁsi pravataścha parvīrdyaurṛṣvājjanimanrejata kṣāḥ /*
*ā mātarā bharati śuṣmyā gornṛvatparijmannonuvanta vātāḥ //4 //*
*tā tū ta indra mahato mahāni viśveṣvitsavaneṣu pravāchyā /*
*yachchhūra dhṛṣṇo dhṛṣatā dadhṛṣvānahiṁ vajreṇa śavasāviveṣīḥ //5 //*
*tā tū te satyā tuvinṛmṇa viśvā pra dhenavaḥ sisrate vṛṣṇa ūdhnaḥ /*
*adhā ha tvadvṛṣamaṇo bhiyānāḥ pra sindhavo javasā chakramantaḥ //6 //*
*atrāha te harivastā u devīravobhirindra stavanta svasāraḥ /*
*yatsīmanu pra mucho badbadhānā dīrghāmanu prasitiṁ syandayaidhya //7 //*
*pipīḻe aṁśurmadyo na sindhurā tvā śamī śaśamānasya śaktiḥ /*
*asmadyrakśuśuchānasya yamyā āśurna raśmiṁ tuvyojasaṁ goḥ //8 //*
*asme varṣiṣṭhā kṛṇuhi jyeṣṭhā nṛmṇāni satrā sahure sahāṁsi /*
*asmabhyaṁ vṛtrā suhanāni randhi jahi vadharvanuṣo martyasya //9 //*
*asmākamitsu śṛṇuhi tvamindrāsmabhyaṁ chitrāṁ upa māhi vājān /*
*asmabhyaṁ viśvā iṣaṇaḥ puraṁdhīrasmākaṁ su maghavanbodhi godāḥ //10 //*
*nū ṣṭuta indra nū gṛṇāna iṣaṁ jaritre nadyo3 na pīpeḥ /*
*akāri te harivo brahma navyaṁ dhiyā syāma rathyaḥ sadāsāḥ //11 //*

ऋ. (Rv.) ४.२३.१-७

कथा महामवृधत्कस्य होतुर्यज्ञं जुषाणो अभि सोममूधः ।
पिबन्नुशानो जुषमाणो अन्धो ववक्ष ऋष्वः शुचते धनाय ॥१॥
को अस्य वीरः सधमादमाप समानंश सुमतिभिः को अस्य ।
कदस्य चित्रं चिकिते कदूती वृधे भुवच्छशमानस्य यज्योः ॥२॥
कथा शृणोति हूयमानमिन्द्रः कथा शृण्वन्नवसामस्य वेद ।
का अस्य पूर्वीरुपमातयो ह कथैनमाहुः पपुरिं जरित्रे ॥।
कथा सबाधः शशमानो अस्य नशदभि द्रविणं दीध्यानः ।
देवो भुवन्नवेदा म ऋतानां नमो जगृभ्वाँ अभि यज्जुजोषत् ॥४।
कथा कदस्या उषसो व्युष्टौ देवो मर्तस्य सख्यं जुजोष ।
कथा कदस्य सख्यं सखिभ्यो ये अस्मिन्कामं सुयुजं ततस्रे ॥।
किमादमत्रं सख्यं सखिभ्यः कदा नु ते भ्रात्रं प्र ब्रवाम ।
श्रिये सुदृशो वपुरस्य सर्गाः स्व१र्ण चित्रतममिष आ गोः ॥६॥
द्रुहं जिघांसन्ध्वरसमनिन्द्रां तेतिक्ते तिग्मा तुजसे अनीका ।
ऋणा चिद्यत्र ऋणया न उग्रो दूरे अज्ञाता उषसो बबाधे ॥७॥
*kathā mahāmavṛdhatkasya hoturyajñaṁ juṣāṇo abhi somamūdhaḥ /*
*pibannuśāno juṣamāṇo andho vavakṣa ṛṣvaḥ śuchate dhanāya //1 //*
*ko asya vīraḥ sadhamādamāpa samānaṁśa sumatibhiḥ ko asya /*
*kadasya chitraṁ chikite kadūtī vṛdhe bhuvachchhaśamānasya yajyoḥ //2 //*
*kathā śṛṇoti hūyamānamindraḥ kathā śṛṇvannavasāmasya veda /*

*kā asya pūrvīrupamātayo ha kathainamāhuḥ papuriṁ jaritre* ।। ।
*kathā sabādhaḥ śaśamāno asya naśadabhi draviṇaṁ dīdhyānaḥ* ।
*devo bhuvannavedā ma ṛtānāṁ namo jagṛbhvām̐ abhi yajjujoṣat* ।।4 ।
*kathā kadasyā uṣaso vyuṣṭau devo martasya sakhyaṁ jujoṣa* ।
*kathā kadasya sakhyaṁ sakhibhyo ye asminkāmaṁ suyujaṁ tatasre* ।। ।
*kimādamatraṁ sakhyaṁ sakhibhyaḥ kadā nu te bhrātraṁ pra bravāma* ।
*śriye sudṛśo vapurasya sargāḥ sva1rṇa chitratamamiṣa ā goḥ* ।।6 ।।
*druhaṁ jighāṁsandhvarasamanindrāṁ tetikte tigmā tujase anīkā* ।
*ṛṇā chidyatra ṛṇayā na ugro dūre ajñātā uṣaso babādhe* ।।7 ।।

ऋ. (Rv.) ४.२३.११

नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो३ न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥११॥
*nū ṣṭuta indra nū gṛṇāna iṣaṁ jaritre nadyo3 na pīpeḥ* ।
*akāri te harivo brahma navyaṁ dhiyā syāma rathyaḥ sadāsāḥ* ।।11 ।।

ऋ. (Rv.) ४.२५.१-८

को अद्य नर्यो देवकाम उशन्निन्द्रस्य सख्यं जुजोष ।
को वा महेऽवसे पार्याय समिद्धे अग्नौ सुतसोम ईट्टे ॥१॥
को नानाम वचसा सोम्याय मनायुर्वा भवति वस्त उस्राः ।
क इन्द्रस्य युज्यं कः सखित्वं को भ्रात्रं वष्टि कवये क ऊती ॥२॥
को देवानामवो अद्या वृणीते क आदित्याँ अदिति ज्योतिरीट्टे ।
कस्याश्विनाविन्द्रो अग्निः सुतस्यांशोः पिबन्ति मनसाविवेनम् ॥३॥
तस्मा अग्निर्भारतः शर्म यंसज्ज्योक्पश्यात्सूर्यमुच्चरन्तम् ।
य इन्द्राय सुनवामेत्याह नरे नर्याय नृतमाय नृणाम् ॥४॥
न तं जिनन्ति बहवो न दभ्रा उर्वस्मा अदितिः शर्म यंसत ।
प्रियः सुकृत्प्रिय इन्द्रे मनायुः प्रियः सुप्रावीः प्रियो अस्य सोमी ॥५॥
सुप्राव्यः प्राशुषाळेष वीरः सुष्वेः पक्तिं कृणुते केवलेन्द्रः ।
नासुष्वेरापिर्न सखा न जामिर्दुष्प्राव्योऽवहन्तेदवाचः ॥६॥
न रेवता पणिना सख्यमिन्द्रोऽसुन्वता सुतपाः सं गृणीते ।
आस्य वेदः खिदति हन्ति नग्नं वि सुष्वये पक्तये केवलो भूत् ॥७॥
इन्द्रं परेऽवरे मध्यमास इन्द्रं यान्तोऽवसितास इन्द्रम् ।
इन्द्रं क्षियन्त उत युध्यमाना इन्द्रं नरो वाजयन्तोहवन्ते ॥८॥
*ko adya naryo devakāma uśannindrasya sakhyaṁ jujoṣa* ।
*ko vā mahe'vase pāryāya samiddhe agnau sutasoma īṭṭe* ।।1 ।।
*ko nānāma vachasā somyāya manāyurvā bhavati vasta usrāḥ* ।
*ka indrasya yujyaṁ kaḥ sakhitvaṁ ko bhrātraṁ vaṣṭi kavaye ka ūtī* ।।2 ।।
*ko devānāmavo adyā vṛṇīte ka ādityām̐ aditi jyotirīṭṭe* ।
*kasyāśvināvindro agniḥ sutasyāṁśoḥ pibanti manasāvivenam* ।।3 ।।
*tasmā agnirbhārataḥ śarma yaṁsajjyokpaśyātsūryamuchcharantam* ।
*ya indrāya sunavāmetyāha nare naryāya nṛtamāya nṛṇām* ।।4 ।।
*na taṁ jinanti bahavo na dabhrā urvasmā aditiḥ śarma yaṁsata* ।
*priyaḥ sukṛtpriya indre manāyuḥ priyaḥ suprāvīḥ priyo asya somī* ।।5 ।।
*suprāvyaḥ prāśuṣāḻeṣa vīraḥ suṣveḥ paktiṁ kṛṇute kevalendraḥ* ।
*nāsuṣverāpirna sakhā na jāmirduṣprāvyo'vahantedavāchaḥ* ।।6 ।।
*na revatā paṇinā sakhyamindro'sunvatā sutapāḥ saṁ gṛṇīte* ।
*āsya vedaḥ khidati hanti nagnaṁ vi suṣvaye paktaye kevalo bhūt* ।।7 ।।
*indraṁ pare'vare madhyamāsa indraṁ yānto'vasitāsa indram* ।
*indraṁ kṣiyanta uta yudhyamānā indraṁ naro vājayantohavante* ।।8 ।।

ऋ. (Rv.) ४.२६.१-७

अहं मनुरभवं सूर्यश्चाहं कक्षीवाँ ऋषिरस्मि विप्रः ।
अहं कुत्समार्जुनेयं न्यृंजेऽहं कविरुशना पश्यता मा ॥१॥

अहं भूमिमददामार्यायाहं वृष्टिं दाशुषे मर्त्याय ।
अहमपो अनयं वावशाना मम देवासो अनु केतमायन् ॥२॥
अहं पुरो मन्दसानो व्यैरं नव साकं नवतीः शम्बरस्य ।
शततमं वेश्यं सर्वताता दिवोदासमतिथिग्वं यदावम् ॥३॥
प्र सु ष विभ्यो मरुतो विरस्तु प्र श्येनः श्येनेभ्य आशुपत्वा ।
अचक्रया यत्स्वधया सुपर्णो हव्यं भरन्मनवे देवजुष्टम् ॥४॥
भरद्यदि विरतो वेविजानः पथोरुणा मनोजवा असर्जि ।
तूयं ययौ मधुना सोम्येनोत श्रवो विविदे श्येनो अत्र ॥५॥
ऋजीपी श्येनो ददमानो अंशुं परावतः शकुनामन्द्रं मदम् ।
सोमं भरद्दादृहाणो देवावान्दिवो अमुष्मादुत्तरादादाय ॥६॥
आदाय श्येनो अभरत्सोमं सहस्रं सवाँ अयुतं च साकम् ।
अत्रा पुरन्धिरजहादरातीर्मदे सोमस्य मूरा अमूरः ॥७॥
*ahaṁ manurabhavaṁ sūryaśchāhaṁ kakṣīvām̐ ṛṣirasmi vipraḥ* ।
*ahaṁ kutsamārjuneyaṁ nyṛñje'haṁ kaviruśanā paśyatā mā* ॥1॥
*ahaṁ bhūmimadadāmāryāyāhaṁ vṛṣṭiṁ dāśuṣe martyāya* ।
*ahamapo anayaṁ vāvaśānā mama devāso anu ketamāyan* ॥2॥
*ahaṁ puro mandasāno vyairaṁ nava sākaṁ navatīḥ śambarasya* ।
*śatatamaṁ veśyaṁ sarvatātā divodāsamatithigvaṁ yadāvam* ॥3॥
*pra su ṣa vibhyo maruto virastu pra śyenaḥ śyenebhya āśupatvā* ।
*achakrayā yatsvadhayā suparṇo havyaṁ bharanmanave devajuṣṭam* ॥4॥
*bharadyadi virato vevijānaḥ pathoruṇā manojavā asarji* ।
*tūyaṁ yayau madhunā somyenota śravo vivide śyeno atra* ॥5॥
*ṛjīpī śyeno dadamāno aṁśuṁ parāvataḥ śakunāmandraṁ madam* ।
*somaṁ bharaddādṛhāṇo devāvāndivo amuṣmāduttarādādāya* ॥6॥
*ādāya śyeno abharatsomaṁ sahasraṁ savām̐ ayutaṁ cha sākam* ।
*atrā purandhirajahādarātīrmade somasya mūrā amūraḥ* ॥7॥

ऋ. (Rv.) ४.२७.१-५

गर्भे नु सन्नन्वेषमवेदमहं देवानां जानिमानि विश्वा ।
शतं मा पुर रआयसीररक्षन्नध श्येनौ जवसा निरदीयम् ॥१॥
न घा स मामप जोषं जभाराभीमास त्वक्षसा वीर्येण ।
ईर्मा षुरन्धिरजहादरातीरुत वाताँ अतरच्छूशुवानः ॥२॥
अव यच्छ्येनो अस्वनीदध द्योर्वि यद्यदि वात ऊहुः पुरंधिम् ।
सृजद्यदस्मा अव ह क्षिपज्ज्यां कृशानुरस्ता मनसा भुरण्यन् ॥३॥
ऋजिप्य ईमिन्द्रावतो न भुज्युं श्येनो जभार बृहतो अधि ष्णोः ।
अन्तः पतत्पतत्र्यस्य पर्णमध यामनि प्रसितस्य तद्वेः ॥४॥
अध श्वेतं कलशं गोभिरक्तमापिप्यानं मघवा शुक्रमन्धः ।
अध्वर्युभिः प्रयतं मध्वो अग्रमिन्द्रो मदाय प्रति धतिपबध्यै शूरो मदाय प्रति धत्पिबध्यै ॥५॥
*garbhe nu sannanveṣamavedamahaṁ devānāṁ jānimāni viśvā* ।
*śataṁ mā pura raāyasīrarakṣannadha śyenau javasā niradīyam* ॥1॥
*na ghā sa māmapa joṣaṁ jabhārābhīmāsa tvakṣasā vīryeṇa* ।
*īrmā ṣurandhirajahādarātīruta vātām̐ atarachchhūśuvānaḥ* ॥2॥
*ava yachchhyeno asvanīdadha dyorvi yadyadi vāta ūhuḥ puraṁdhim* ।
*sṛjadyadasmā ava ha kṣipajjyāṁ kṛśānurastā manasā bhuraṇyan* ॥3॥
*ṛjipya īmindrāvato na bhujyuṁ śyeno jabhāra bṛhato adhi ṣṇoḥ* ।
*antaḥ patatpatatrayasya parṇamadha yāmani prasitasya tadveḥ* ॥4॥
*adha śvetaṁ kalaśaṁ gobhiraktamāpipyānaṁ maghavā śukramandhaḥ* ।
*adhvaryubhiḥ prayataṁ madhvo agramindro madāya prati dhatipabadhyai śūro madāya prati dhatpibadhyai* ॥5॥

ऋ. (Rv.) ४.२९.१-५

आ नः स्तुत उप वाजेभिरूती इन्द्र याहि हरिभिर्मन्दसानः ।

तिरश्चिदर्यः सवना पुरूण्याङ्गूषेभिर्गृणानः सत्यराधाः ॥१॥
आ हि ष्मा याति नर्यश्चिकित्वान्हूयमानः सोतृभिरुप यज्ञम् ।
स्वश्वे यो अभीरुर्मन्यमानः सुष्वाणेभिर्मदति सं ह वीरैः ॥२॥
श्रावयेदस्य कर्णा वाजयध्यै जुष्टामनु प्र दिशं मन्दयध्यै ।
उद्वावृषाणो राधसे तुविष्मान्करन्न इन्द्रः सुतीर्थाभ्यं च ॥३॥
अच्छा यो गन्ता नाधमानमूती इत्था विप्रं हवमानं गृणन्तम् ।
उप त्मनि दधानो धुर्या३ शून्त्सहस्राणि शतानि वज्रबाहुः ॥४॥
त्वोतासो मघवन्निन्द्र विप्रा वयं ते स्याम सूरयो गृणन्तः ।
भेजानासो बृहद्दिवस्य राय आकाय्यस्य दावने पुरुक्षोः ॥५॥
*ā naḥ stuta upa vājebhirūtī indra yāhi haribhirmandasānaḥ /*
*tiraśchidaryaḥ savanā purūṇyāṅgūṣebhirgṛṇānaḥ satyarādhāḥ //1 //*
*ā hi ṣmā yāti naryaśchikitvānhūyamānaḥ sotṛbhirupa yajñam /*
*svaśve yo abhīrurmanyamānaḥ suṣvāṇebhirmadati saṁ ha vīraiḥ //2 //*
*śrāvayedasya karṇā vājayadhyai juṣṭāmanu pra diśaṁ mandayadhyai /*
*udvāvṛṣāṇo rādhase tuviṣmānkaranna indraḥ sutīrthābhyaṁ cha //3 //*
*achchhā yo gantā nādhamānamūtī itthā vipraṁ havamānaṁ gṛṇantam /*
*upa tmani dadhāno dhuryā3 śūntsahasrāṇi śatāni vajrabāhuḥ //4 //*
*tvotāso maghavannindra viprā vayaṁ te syāma sūrayo gṛṇantaḥ /*
*bhejānāso bṛhaddivasya rāya ākāyyasya dāvane purukṣoḥ //5 //*

ऋ. (Rv.) ४.३०.१-८

नकिरिन्द्र त्वदुत्तरो न ज्यायाँ अस्ति वृत्रहन्। नकिरेवा यथा त्वम् ॥१॥
सत्रा ते अनु कृष्टयो विश्व चक्रेव वावृतुः। सत्रा महाँ असि श्रुतः ॥२॥
विश्वे चनेदना त्वा देवास इन्द्र युयुधुः। यदहा नक्तमातिरः ॥३॥
यत्रोत बाधितेभ्यश्चक्रं कुत्साय युध्यते। मुषाय इन्द्र सुर्यम् ॥४॥
यत्र देवाँ ऋघायतो विश्वाँ अयुध्य एक इत्। त्वमिन्द्र वनूँरहन् ॥५॥
यत्रोत मर्त्याय कमरिणा इन्द्र सूर्यम्। प्रावः शचीभिरेतशम् ॥६॥
किमादुतासि वृत्रहन्मघवन्मन्युमत्तमः। अत्राह दानुमातिरः ॥७॥
एतद्धेदुत वीर्य१मिन्द्र चकर्थ पौंस्यम्। स्त्रियं यद्दुर्हणायुवं वधीर्दुहितरं दिवः ॥८॥
*nakirindra tvaduttaro na jyāyām̐ asti vṛtrahan / nakirevā yathā tvam //1 //*
*satrā te anu kṛṣṭayo viśva chakreva vāvṛtuḥ / satrā mahām̐ asi śrutaḥ //2 //*
*viśve chanedanā tvā devāsa indra yuyudhuḥ / yadahā naktamātiraḥ //3 //*
*yatrota bādhitebhyaśchakraṁ kutsāya yudhyate / muṣāya indra suryam //4 //*
*yatra devām̐ ṛghāyato viśvām̐ ayudhya eka it / tvamindra vanūm̐rahan //5 //*
*yatrota martyāya kamariṇā indra sūryam / prāvaḥ śachībhiretaśam //6 //*
*kimādutāsi vṛtrahanmaghavanmanyumattamaḥ / atrāha dānumātiraḥ //7 //*
*etaddheduta vīrya1mindra chakartha pauṁsyam / striyaṁ yaddurhaṇāyuvaṁ vadhīrduhitaraṁ divaḥ //8 //*

ऋ. (Rv.) ४.३०.१२-२४

उत सिन्धुं विबाल्यं वितस्थानामधि क्षमि। परि ष्ठा इन्द्र मायया ॥१२॥
उत शुष्णस्य धृष्णुया प्र मृक्षो अभि वेदनम्। पुरो यदस्य संपिणक् ॥१३॥
उत दासं कौलितरं बृहतः पर्वतादधि। अवाहन्निन्द्र शम्बरम् ॥१४॥
उत दासस्य वर्चिनः सहस्राणि शतावधीः। अधि पंच प्रधीँरिव ॥१५॥
उत त्यं पुत्रमग्रुवः परावृक्तं शतक्रतुः। उक्थेष्विन्द्र आभजत ॥१६॥
उत त्या तुर्वशायदू अस्नातारा शचीपतिः। इन्द्रो विद्वाँ अपारयत् ॥१७॥
उत त्या सद्य आर्या सरयोरिन्द्र पारतः। अर्णाचित्ररथावधीः ॥१८॥
अनु द्वा जहिता नयोऽन्धं श्रोणं च वृत्रहन्। न तत्ते सुम्नमष्टवे ॥१९॥
शतमश्मन्मयीनां पुरामिन्द्रो व्यास्यत्। दिवो दासाय दाशुषे ॥२०॥
अस्वापयद्दभीतये सहस्रा त्रिंशतं हथैः। दासानामिन्द्रो मायया ॥२१॥
स घेदुतासि वृत्रहन्त्समान इन्द्र गोपतिः। यस्ता विश्वानि चिच्युषे ॥२२॥

उत नूनं यदिन्द्रियं करिष्या इन्द्र पौंस्यम्। अद्या नकिष्टदा मिनत् ॥२३॥
वामंवामं त आदुरे देवो ददात्वर्यमा। वामं पूषा वामं भगो वामं देवः करूळती ॥२४॥
*uta sindhuṁ vibālyaṁ vitasthānāmadhi kṣami | pari ṣṭhā indra māyayā ||12 ||*
*uta śuṣṇasya dhṛṣṇuyā pra mṛkṣo abhi vedanam | puro yadasya saṁpiṇak ||13 ||*
*uta dāsaṁ kaulitaraṁ bṛhataḥ parvatādadhi | avāhannindra śambaram ||14 ||*
*uta dāsasya varchinaḥ sahasrāṇi śatāvadhīḥ | adhi paṁcha pradhīām̐riva ||15 ||*
*uta tyaṁ putramagruvaḥ parāvṛktaṁ śatakratuḥ | ukthesvindra ābhajata ||16 ||*
*uta tyā turvaśāyadū asnātārā śachīpatiḥ | indro vidvām̐ apārayat ||17 ||*
*uta tyā sadya āryā sarayorindra pārataḥ | arṇāchitrarathāvadhīḥ ||18 ||*
*anu dvā jahitā nayo'ndhaṁ śroṇaṁ cha vṛtrahan | na tatte sumnamaṣṭave ||19 ||*
*śatamaśmanmayīnāṁ purāmindro vyāsyat | divo dāsāya dāśuṣe ||20 ||*
*asvāpayaddabhītaye sahasrā triṁśataṁ hathaiḥ | dāsānāmindro māyayā ||21 ||*
*sa ghedutāsi vṛtrahantsamāna indra gopatiḥ | yastā viśvāni chichyuṣe ||22 ||*
*uta nūnaṁ yadindrayaṁ kariṣyā indra pauṁsyam | adyā nakiṣṭadā minat ||23 ||*
*vāmaṁvāmaṁ ta ādure devo dadātvaryamā | vāmaṁ pūṣā vāmaṁ bhago vāmaṁ devaḥ karūḷatī ||24 ||*

ऋ. (Rv.) ४.३१.१-१५

कया नश्चित्र आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता ॥१॥
कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः। दृळहा चिदारुजे वसु ॥२॥
अभी षु णः सखीनामविता जरितृणाम्। शतं भवास्यूतिभिः ॥३॥
अभी न आ ववृत्स्व चक्रं न वृत्तमर्वतः। नियुद्भिश्चर्षणीनाम् ॥४॥
प्रवता हि ऋतूनामा हा पदेव गच्छसि। अभक्षि सूर्ये सचा ॥५॥
सं यत्त इन्द्र मन्यवः सं चक्राणि दधन्विरे। अध त्वे अध सूर्ये ॥६॥
उत स्मा हि त्वामाहुरिन्मघवानं शचीपते। दातारमविदीधयुम् ॥७॥
उत स्मा सद्य इत्परि शशमानाय सुन्वते। पुरू चिन्मंहसे वसु ॥८॥
नहि ष्मा ते शतं चन राधो वरन्त आमुरः। न च्यौत्नानि करिष्यतः ॥९॥
अस्माँ अवन्तु ते शतमस्मान्त्सहस्रमूतयः। अस्मान्विश्वा अभिष्टयः ॥१०॥
अस्माँ इहा वृणीहष्व सख्याय स्वस्तये। महो राये दिवित्मते ॥११॥
अस्माँ अविड्ढि विश्वहेन्द्र राया परीणसा। अस्मान्विश्वाभिरूतिभिः ॥१२॥
अस्मभ्यं ताँ अपा वृधि व्रजाँ अस्तेव गोमतः। नवाभिरिन्द्रोतिभिः ॥१३॥
अस्माकं धृष्णुया रथो द्युमाँ इन्द्रानपच्युतः। गव्युरश्वयुरीयते ॥१४॥
अस्माकमुत्तमं कृधि श्रवो देवेषु सूर्य। वर्षिष्ठं द्यामिवोपरि ॥१५॥
*kayā naśchitra ā bhuvadūtī sadāvṛdhaḥ sakhā | kayā śachiṣṭhayā vṛtā ||1 ||*
*kastvā satyo madānāṁ maṁhiṣṭho matsadandhasaḥ | dṛḷahā chidāruje vasu ||2 ||*
*abhī ṣu ṇaḥ sakhīnāmavitā jaritṛṇām | śataṁ bhavāsyūtibhiḥ ||3 ||*
*abhī na ā vavṛtsva chakraṁ na vṛttamarvataḥ | niyudbhiścharṣaṇīnām ||4 ||*
*pravatā hi ṛtūnāmā hā padeva gachchhasi | abhakṣi sūrye sachā ||5 ||*
*saṁ yatta indra manyavaḥ saṁ chakrāṇi dadhanvire | adha tve adha sūrye ||6 ||*
*uta smā hi tvāmāhurinmaghavānaṁ śachīpate | dātāramavidīdhayum ||7 ||*
*uta smā sadya itpari śaśamānāya sunvate | purū chinmaṁhase vasu ||8 ||*
*nahi ṣmā te śataṁ chana rādho varanta āmuraḥ | na chyautnāni kariṣyataḥ ||9 ||*
*asmām̐ avantu te śatamasmāntsahasramūtayaḥ | asmānviśvā abhiṣṭayaḥ ||10 ||*
*asmām̐ ihā vṛṇīhaṣva sakhyāya svastaye | maho rāye divitmate ||11 ||*
*asmām̐ aviḍḍhi viśvahendra rāyā parīṇasā | asmānviśvābhirūtibhiḥ ||12 ||*
*asmabhyaṁ tām̐ apā vṛdhi vrajām̐ asteva gomataḥ | navābhirindrotibhiḥ ||13 ||*
*asmākaṁ dhṛṣṇuyā ratho dyumām̐ indrānapachyutaḥ | gavyuraśvayurīyate ||14 ||*
*asmākamuttamaṁ kṛdhi śravo deveṣu sūrya | varṣiṣṭhaṁ dyāmivopari ||15 ||*

ऋ. (Rv.) ४.३२.१-२२

आ तू न इन्द्र वृत्रहस्माकमर्धमा गहि। महान्महीभिरूतिभिः ॥१॥
भृमिश्चिद्घासि तूतुजिरा चित्र चित्रिणीष्वा चित्रं कृणोष्यूतये ॥२॥
दभ्रेभिश्चिच्छशीयांसं हंसि व्राधन्तमोजसा। सखिभिर्ये त्वे सचा ॥३॥

वयमिन्द्र त्वे सचा वयं त्वाभि नोनुमः। अस्माँ अस्माँ इदुदव ॥४॥
स नश्चित्राभिरद्रिवोऽनवद्याभिरूतिभिः। अनाधृष्टाभिरा गहि ॥५॥
भूयासो षु त्वावतः सखाय इन्द्र गोमतः। युजो वाजाय घृष्वये ॥६॥
त्वं ह्येक ईशिष इन्द्र वाजस्य गोमतः। स नो यन्धि महीमिषम् ॥७॥
न त्वा वरन्ते अन्यथा यद्दित्ससि स्तुतो मघम्। स्तोतृभ्य इन्द्र गिर्वणः ॥८॥
अभि त्वा गोतमा गिरानूषत प्र दावने। इन्द्र वाजाय घृष्वये ॥९॥
प्र ते वोचाम वीर्या३ या मन्दसान अरुजः। पुरो दासीरभीत्य ॥१०॥
ता ते गृणन्ति वेधसो यानि चकर्थ पौंस्या। सुतेष्विन्द्र गिर्वणः ॥११॥
अवीवृधन्त गोतमा इन्द्र त्वे स्तोमवाहसः। ऐषु धा वीरवद्यशः ॥१२॥
यच्चिद्धि शश्वतामसीन्द्र साधारणस्त्वम्। तं त्वा वयं हवामहे ॥१३॥
अर्वाचीनो वसो भवास्मे सु मत्स्वान्धसः। सोमानामिन्द्र सोमपाः ॥१४॥
अस्माकं त्वा मतीनामा स्तोम इन्द्र यच्छतु। अर्वागा वर्तया हरी ॥१५॥
पुरोळाशं च नो घसो जोषयासे गिरश्च नः। वधूयुरिव योषणाम् ॥१६॥
सहस्रं व्यतीनां युक्तानामिन्द्रमीमहे। शतं सोमस्य खार्यः ॥१७॥
सहस्रा ते शता वयं गवामा च्यावयामसि। अस्मत्रा राध एतु ते ॥१८॥
दश ते कलशानां हिरण्यानामधीमहि। भूरिदा असि वृत्रहन् ॥१९॥
भूरिदा भूरि देहि नो मा दभ्रं भूर्या भर। भूरि घेदिन्द्र दित्ससि ॥२०॥
भूरिदा ह्यसि श्रुतः पुरुत्रा शूर वृत्रहन्। आ नो भजस्व राधसि ॥२१॥
प्र ते बभ्रू विचक्षण शंसामि गोषणो नपात्। माभ्यां गा अनु शिश्रथः ॥२२॥

*ā tū na indra vṛtrahasmākamardhamā gahi | mahānmahībhirūtibhiḥ ||1 ||*
*bhṛmiśchidghāsi tūtujirā chitra chitriṇīṣvā chitraṁ kṛṇoṣyūtaye ||2 ||*
*dabhrebhiśchichchhaśīyāṁsaṁ haṁsi vrādhantamojasā | sakhibhirye tve sachā ||3 ||*
*vayamindra tve sachā vayaṁ tvābhi nonumaḥ | asmāṁ̐ asmāṁ̐ idudava ||4 ||*
*sa naśchitrābhiradrivo'navadyābhirūtibhiḥ | anādhṛṣṭābhirā gahi ||5 ||*
*bhūyāso ṣu tvāvataḥ sakhāya indra gomataḥ | yujo vājāya ghṛṣvaye ||6 ||*
*tvaṁ hyeka īśiṣa indra vājasya gomataḥ | sa no yandhi mahīmiṣam ||7 ||*
*na tvā varante anyathā yadditsasi stuto magham | stotṛbhya indra girvaṇaḥ ||8 ||*
*abhi tvā gotamā girānūṣata pra dāvane | indra vājāya ghṛṣvaye ||9 ||*
*pra te vochāma vīryā3 yā mandasāna arujaḥ | puro dāsīrabhītya ||10 ||*
*tā te gṛṇanti vedhaso yāni chakartha pauṁsyā | suteṣvindra girvaṇaḥ ||11 ||*
*avīvṛdhanta gotamā indra tve stomavāhasaḥ | aiṣu dhā vīravadyaśaḥ ||12 ||*
*yachchiddhi śaśvatāmasīndra sādhāraṇastvam | taṁ tvā vayaṁ havāmahe ||13 ||*
*arvāchīno vaso bhavāsme su matsvāndhasaḥ | somānāmindra somapāḥ ||14 ||*
*asmākaṁ tvā matīnāmā stoma indra yachchhatu | arvāgā vartayā harī ||15 ||*
*puroḷāśaṁ cha no ghaso joṣayāse giraścha naḥ | vadhūyuriva yoṣaṇām ||16 ||*
*sahasraṁ vyatīnāṁ yuktānāmindramīmahe | śataṁ somasya khāryaḥ ||17 ||*
*sahasrā te śatā vayaṁ gavāmā chyāvayāmasi | asmatrā rādha etu te ||18 ||*
*daśa te kalaśānāṁ hiraṇyānāmadhīmahi | bhūridā asi vṛtrahan ||19 ||*
*bhūridā bhūri dehi no mā dabhraṁ bhūryā bhara | bhūri ghedindra ditsasi ||20 ||*
*bhūridā hyasi śrutaḥ purutrā śūra vṛtrahan | ā no bhajasva rādhasi ||21 ||*
*pra te babhrū vichakṣaṇa śaṁsāmi goṣaṇo napāt | mābhyāṁ gā anu śiśrathaḥ ||22 ||*

सा. (Sv.) १६९

कया नश्चित्र आ भूवदूती सदावृधः सखा। कया शचिष्ठया वृता ॥५॥
*kayā naśchitra ā bhūvadūtī sadāvṛdhaḥ sakhā | kayā śachiṣṭhayā vṛtā ||5 ||*

सा. (Sv.) १७२

ये ते पन्था अधो दिवो येभिर्व्यश्वमैरयः। उत श्रोषन्तु नो भुवः ॥८॥
*ye te panthā adho divo yebhirvyaśvamairayaḥ | uta śroṣantu no bhuvaḥ ||8 ||*

सा. (Sv.) १८१

आ तू न इन्द्र वृत्रहन्नस्माकमर्धमा गहि। महान्महीभिरूतिभिः ॥७॥
*ā tū na indra vṛtrahannasmākamardhamā gahi | mahānmahībhirūtibhiḥ ||7 ||*

सा. (Sv.) १९०

क इमं नाहुवीष्वा इन्द्रं सोमस्य तर्पयात्। स नो वसून्या भरात् ॥६॥
*ka imaṁ nāhuvīṣvā indraṁ somasya tarpayāt । sa no vasūnyā bharāt ॥6॥*

सा. (Sv.) १९६

सदा व इन्द्रश्चर्कृषदा उपो नु स सपर्यन्। न देवो वृतः शूर इन्द्रः ॥३॥
*sadā va indraścharkṛṣadā upo nu sa saparyan । na devo vṛtaḥ śūra indraḥ ॥3॥*

सा. (Sv.) २०३

न कि इन्द्र त्वदुत्तरं न ज्यायो अस्ति वृत्रहन्। न क्येवं यथा त्वम् ॥१०॥
*na ki indra tvaduttaraṁ na jyāyo asti vṛtrahan । na kyevaṁ yathā tvam ॥10॥*

सा. (Sv.) २०९

अरं त इन्द्र श्रवसे गमेम शूर त्वावतः। अरं शक्र परेमणि ॥६॥
*araṁ ta indra śravase gamema śūra tvāvataḥ । araṁ śakra paremaṇi ॥6॥*

सा. (Sv.) २१२

इमे त इन्द्र सोमाः सुतासो ये च सोत्वाः। तेषां मत्स्व प्रभूवसो ॥९॥
*ime ta indra somāḥ sutāso ye cha sotvāḥ । teṣāṁ matsva prabhūvaso ॥9॥*

सा. (Sv.) २२४

कदु प्रचेतसे महे वचो देवाय शस्यते। तदिद्ध्यस्य वर्धनम् ॥२॥
*kadu prachetase mahe vacho devāya śasyate । tadiddhyasya vardhanam ॥2॥*

सा. (Sv.) २८८

यदा कदा च मीढुषे स्तोता जरेत मर्त्यः। आदिद्वन्देत वरुणं विपा गिरा धर्त्तारं विव्रतानाम्।६॥
*yadā kadā cha mīḍhuṣe stotā jareta martyaḥ । ādidvandeta varuṇaṁ vipā girā dharttāraṁ vivratānām ।6॥*

सा. (Sv.) २९८-२९९

यदिन्द्र शासो अव्रतं च्यवया सदसस्परि। अस्माकमंशुं मघवन्पुरुस्पृहं वसव्ये अधि बर्हय ॥६॥
त्वष्टा नो दैव्यं वचः पर्जन्यो ब्रह्मणस्पतिः। पुत्रैर्भ्रातृभिरदितिर्नु पातु नो दुष्टरं त्रामणं वचः।७॥
*yadindra śāso avrataṁ chyavayā sadasaspari । asmākamaṁśuṁ maghavanpuruspṛhaṁ vasavye adhi barhaya ॥6॥*
*tvaṣṭā no daivyaṁ vachaḥ parjanyo brahmaṇaspatiḥ । putrairbhrātṛbhiraditirnu pātu no duṣṭaraṁ trāmaṇaṁ vachaḥ ।7॥*

सा. (Sv.) ३२७

मेडिं न त्वा वज्रिणं भृष्टिमन्तं पुरुधस्मानं वृषभं स्थिरप्स्नुम् ।
करोष्यर्यस्तरुषीर्दुवस्युरिन्द्र द्युक्षं वृत्रहणं गृणीषे ॥५॥
*meḍiṁ na tvā vajriṇaṁ bhṛṣṭimantaṁ purudhasmānaṁ vṛṣabhaṁ sthirapsnum ।*
*karoṣyaryastaruṣīrduvasyurindra dyukṣaṁ vṛtrahaṇaṁ gṛṇīṣe ॥5॥*

सा. (Sv.) ३३५-३३७

सत्राहणं दाधृषिं तुम्रमिन्द्रं महामपारं वृषभं सुवज्रम् ।
हन्ता यो वृत्र सनितोत वाजं दाता मघानि मघवा सुराधाः ॥४॥
यो नो वनुष्यन्नभिदाति मर्त उगणा वा मन्यमानस्तुरो वा ।
क्षिधी युधा शवसा वा तमिन्द्राभी ष्याम वृषमणस्त्वोताः ॥५॥
यं वृत्रेषु क्षितयः स्पर्धमाना यं युक्तेषु तुरयन्तो हवन्ते ।
यं शूरसातौ यमपामुपज्मन्यं विप्रासो वाजयन्ते स इन्द्रः ॥६॥
*satrāhaṇaṁ dādhṛṣiṁ tumramindraṁ mahāmapāraṁ vṛṣabhaṁ suvajram ।*
*hantā yo vṛtra sanitota vājaṁ dātā maghāni maghavā surādhāḥ ॥4॥*
*yo no vanuṣyannabhidāti marta ugaṇā vā manyamānasturo vā ।*
*kṣidhī yudhā śavasā vā tamindrābhī ṣyāma vṛṣamaṇastvotāḥ ॥5॥*
*yaṁ vṛtreṣu kṣitayaḥ spardhamānā yaṁ yukteṣu turayanto havante ।*
*yaṁ śūrasātau yamapāmupajmanyaṁ viprāso vājayante sa indraḥ ॥6॥*

सा. (Sv.) ३६९-३७०

इन्द्राय गिरो अनिशितसर्गा अपः प्रैरयत्सगरस्य बुध्नात् ।
यो अक्षेणेव चक्रियौ शचीभिर्विष्वक्तस्तम्भ पृथिवीमुत द्याम् ॥८॥
विश्वाः पृतना अभिभूतरं नरः सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे ।
क्रत्वे वरे स्थेमन्यामुरीमुतोग्रमोजिष्ठं तरसं तरस्विनम् ॥१॥
*indrāya giro aniśitasargā apaḥ prairayatsagarasya budhnāt /*
*yeā akṣeṇeva chakriyau śachībhirviṣvaktastambha pṛthivīmuta dyām //8 //*
*viśvāḥ pṛtanā abhibhūtaraṁ naraḥ sajūstatakṣurindraṁ jajanuścha rājase /*
*kratve vare sthemanyāmurīmutogramojiṣṭhaṁ tarasaṁ tarasvinam //1 //*

सा. (Sv.) ३७२

समेत विश्वा ओजसा पतिं दिवो य एक इद्भूरतिथिर्जनानाम् ।
स पूर्व्यो नूतनमाजिगीषन् तं वर्तनीरनु वावृत एक इत् ॥३॥
*sameta viśvā ojasā patiṁ divo ya eka idbhūratithirjanānām /*
*sa pūrvyo nūtanamājigīṣan taṁ vartanīranu vāvṛta eka it //3 //*

सा. (Sv.) ५८८

यस्येदमा रजोयुजस्तुजे जने वनं स्वः। इन्द्रस्य रन्त्यं बृहत् ॥३॥
*yasyedamā rajoyujastuje jane vanaṁ svaḥ / indrasya rantyaṁ bṛhat //3 //*

सा. (Sv.) ६२३

हरी त इन्द्र श्मश्रूण्युतो ते हरितौ हरी। तं त्वा स्तुवन्ति कवयः पुरुषासो वनर्गवः ॥९॥
*harī ta indra śmaśrūṇyuto te haritau harī / taṁ tvā stuvanti kavayaḥ puruṣāso vanargavaḥ //9 //*

सा. (Sv.) ६८२-६८४

कया नश्चित्र आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता ॥१॥
कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः। दृढा चिदारुजे वसु ॥२॥
अभी षु णः सखीनामविता जरितॄणाम्। शतं भवास्यूतये ॥३॥
*kayā naśchitra ā bhuvadūtī sadāvṛdhaḥ sakhā / kayā śachiṣṭhayā vṛtā //1 //*
*kastvā satyo madānāṁ maṁhiṣṭho matsadandhasaḥ / dṛḍhā chidāruje vasu //2 //*
*abhī ṣu ṇaḥ sakhīnāmavitā jaritṝṇām / śataṁ bhavāsyūtaye //3 //*

८. इन्द्रः (साग्री. सास्वा.) आत्मा (सार्षेदी. पृ. ११६) (Indraḥ [Ssb. Sas.] Ātmā [Sad. Pṛ. 116)) - सा. (Sv.) ६२४; ६२५

यद्वर्चो हिरण्यस्य यद्वा वर्चो गवामुत। सत्यस्य ब्रह्मणो वर्चस्तेन मा संसृजामसि ॥१०॥
सहस्तन्न इन्द्र दद्ध्योज ईशे ह्यस्य महतो विरप्शिन् । क्रतुं न नृम्णं स्थविरं च वाजं वृत्रेषु शत्रून्त्सहना कृधी नः ॥११॥
*yadvarcho hiraṇyasya yadvā varcho gavāmuta /*
*satyasya brahmaṇo varchastena mā saṁsṛjāmasi //10 //*
*sahastanna indra daddhyoja īśe hyasya mahato virapśin /*
*kratuṁ na nṛmṇaṁ sthaviraṁ cha vājaṁ vṛtreṣu śatrūntsahanā kṛdhī naḥ //11 //*

९. इन्द्र उषा च (Indra Uṣā Cha) - ऋ. (Rv.) ४.३०.९-११

दिवश्चिद्धा दुहितरं महान्महीयमानाम्। उषासमिन्द्र सं पिणक् ॥९॥
अपोषा अनसः सरत्संपिष्टादह बिभ्युषी। नि यत्सीं शिश्नथद्वृषा ॥१०॥
एतदस्या अनः शये सुसंपिष्टं विपाश्या। ससार सीं परावतः ॥११॥
*divaśchiddhā duhitaraṁ mahānmahīyamānām / uṣāsamindra saṁ piṇak //9 //*
*apoṣā anasaḥ saratsaṁpiṣṭādaha bibhyuṣī / ni yatsīṁ śiśnathadvṛṣā //10 //*
*etadasyā anaḥ śaye susaṁpiṣṭaṁ vipāśyā / sasāra sīṁ parāvataḥ //11 //*

१०. इन्द्र ऋत देवो वा (Indra Ṛta Devo Vā) - ऋ. (Rv.) ४.२३.८-१०

ऋतस्य हि शुरुधः सन्ति पूर्वीऋर्तस्य धीतिर्वृजिनानि हन्ति ।
ऋतस्य श्लोको बधिरा ततर्द कर्णा बुधानः शुचमान आयोः ॥८॥
ऋतस्य दृळहा धरुणानि सन्ति पुरूणि चन्द्रा वपुषे वपूंषि ।
ऋतेन दीर्घमिषणन्त पृक्ष ऋतेन गाव ऋतमा विवेशुः ॥९॥

ऋतं येमान ऋतमिद्वनोत्यृतस्य शुष्मस्तुरया उ गव्युः ।
ऋताय पृथ्वी बहुले गभीरे ऋताय धेनू परमे दुहाते ॥१०॥
*ṛtasya hi śurudhaḥ santi pūrvīrṛtasya dhītirvṛjināni hanti ।*
*ṛtasya śloko badhirā tatarda karṇā budhānaḥ śuchamāna āyoḥ ॥8॥*
*ṛtasya dṛḷahā dharuṇāni santi purūṇi chandrā vapuṣe vapūṁṣi ।*
*ṛtena dīrghamiṣaṇanta pṛkṣa ṛtena gāva ṛtamā viveśuḥ ॥9॥*
*ṛtaṁ yemāna ṛtamidvanotyṛtasya śuṣmasturayā u gavyuḥ ।*
*ṛtāya pṛthvī bahule gabhīre ṛtāya dhenū parame duhāte ॥10॥*

११. इन्द्रवायू (Indravāyū) - ऋ. (Rv.) ४.४६.१-७; ४.४७.२-४; सा. (Sv.) १६२९-१६३०

ऋ. (Rv.) ४.४६.१-७

अग्रं पिबा मधूनां सुतं वायो दिविष्टषु । त्वं हि पूर्वपा असि ॥१॥
शतेना नो अभिष्टिभिर्नियुत्वाँ इन्द्रसारथिः । वायो सुतस्य तृम्पतम् ॥२॥
आ वां सहस्रं हरय इन्द्रवायू अभि प्रयः । वहन्तु सोमपीतये ॥३॥
रथं हिरण्यवन्धुरमिन्द्रवायू स्वध्वरम् । आ हि स्थाथो दिविस्पृशम् ॥४॥
रथेन पृथुपाजसा दाश्वांसमुप गच्छतम् । इन्द्रवायू इहा गतम् ॥५॥
इन्द्रवायू अयं सुतस्तं देवेभिः सजोषसा । पिबतं दाशुषो गृहे ॥६॥
इह प्रयाणमस्तु वमिन्द्रवायू विमोचनम् । इह वां सोमपीतये ॥७॥
*agraṁ pibā madhūnāṁ sutaṁ vāyo diviṣṭaṣu । tvaṁ hi pūrvapā asi ॥1॥*
*śatenā no abhiṣṭibhirniyutvām̐ indrasārathiḥ । vāyo sutasya tṛmpatam ॥2॥*
*ā vāṁ sahasraṁ haraya indravāyū abhi prayaḥ । vahantu somapītaye ॥3॥*
*rathaṁ hiraṇyavandhuramindravāyū svadhvaram । ā hi sthātho divispṛśam ॥4॥*
*rathena pṛthupājasā dāśvāṁsamupa gachchhatam । indravāyū ihā gatam ॥5॥*
*indravāyū ayaṁ sutastaṁ devebhiḥ sajoṣasā । pibataṁ dāśuṣo gṛhe ॥6॥*
*iha prayāṇamastu vamindravāyū vimochanam । iha vāṁ somapītaye ॥7॥*

ऋ. (Rv.) ४.४७.२-४

इन्द्रश्च वायवेषां सोमानां पीतिमर्हथः । युवां हि यन्तीन्दवो निम्नमापो न सध्र्यक् ॥२॥
वायविन्द्रश्च शुष्मिणा सरथं शवसस्पती । नियुत्वन्ता न ऊतय आ यातं सोमपीतये ॥३॥
या वां सन्ति पुरुस्पृहो नियुतो दाशुषे नरा । अस्मे ता यज्ञवाहसेन्द्रवायू नि यच्छतम् ॥४॥
*indraścha vāyaveṣāṁ somānāṁ pītimarhathaḥ ।*
*yuvāṁ hi yantīndavo nimnamāpo na sadhryak ॥2॥*
*vāyavindraścha śuṣmiṇā sarathaṁ śavasaspatī ।*
*niyutvantā na ūtaya ā yātaṁ somapītaye ॥3॥*
*yā vāṁ santi puruspṛho niyuto dāśuṣe narā ।*
*asme tā yajñavāhasendravāyū ni yachchhatam ॥4॥*

सा. (Sv.) १६२९-१६३०

इन्द्रश्च वायवेषां सोमानां पीतिमर्हथः । युवां हि यन्तीन्दवो निम्नमापो न सध्र्यक् ॥२॥
वायविन्द्रश्च शुष्मिणा सरथं शवसस्पती । नियुत्वन्ता न ऊतय आ यातं सोमपीतये ॥३॥
*indraścha vāyaveṣāṁ somānāṁ pītimarhathaḥ ।*
*yuvāṁ hi yantīndavo nimnamāpo na sadhryak ॥2॥*
*vāyavindraścha śuṣmiṇā sarathaṁ śavasaspatī ।*
*niyutvantā na ūtaya ā yātaṁ somapītaye ॥3॥*

१२. इन्द्रादितिः (Indrāditiḥ) - ऋ. (Rv.) ४.१८.१-१३

अयं पन्था अनुवित्तः पुराणो यतो देवा उदजायन्त विश्वे ।
अतश्चिदा जनिषीष्ट प्रवृद्धो मा मातरममुया पत्तवे कः ॥१॥
नाहमतो निरया दुर्गहैतत्तिरश्चता पार्श्वान्निर्गमाणि ।
बहूनि मे अकृता कर्त्वानि युध्यै त्वेन सं त्वेन पृच्छै ॥२॥
परायतीं मातरमन्वचष्ट न नानु गान्यनु नू गमानि ।
त्वष्टुर्गृहे अपिबत्सोममिन्द्रः शतधन्यं चम्वोः सुतस्य ॥३॥
किं स ऋधक् कृणवद्यं सहस्रं मासो जभार शरदश्च पूर्वीः ।

नही न्वस्य प्रतिमानमस्त्यन्तर्जातेषूत ये जनित्वाः ॥४॥
अवद्यमिव मन्यमाना गुहाकरिन्द्रं माता वीर्येणा न्यृष्टम् ।
अथोदस्थात्स्वयमत्कं वसान आ रोदसी अपृणाज्जायमानः ॥५॥
एता अर्षन्त्यललाभवन्तीॠतावरीरिव संक्रोशमानाः ।
एता वि पृच्छ किमिदं भनन्ति कमापो अद्रिं परिधिं रुजन्ति ॥६॥
किमु ष्विदस्मै निविदो भनन्तेन्द्रस्यावद्यं दिधिषन्त आपः ।
ममैतान्पुत्रो महता वधेन वृत्रं जघन्वाँ असृजद्वि सिन्धून् ॥७॥
ममच्चन त्वा युवतिः परास ममच्चन त्वा कुषवा जगार ।
ममच्चिदापः शिशवे ममृड्युर्ममच्चिदिन्द्रः सहसोदतिष्ठत् ॥८॥
ममच्चन ते मघवन्व्यंसो निविविध्वाँ अप हनू जघान ।
अधा निविद्ध उत्तरो बभूवाञ्छिरो दासस्य सं पिणग्वधेन॥९॥
गृष्टिः ससूव स्थविरं तवागामनाधृष्यं वृषभं तुम्रमिन्द्रम् ।
अरीळ्हं वत्सं चरथाय माता स्वयं गातुं तन्व इच्छमानम् ॥१०॥
उत माता महिषमन्ववेनदमी त्वा जहति पुत्र देवाः ।
अथाब्रवीद्वृत्रमिन्द्रो हनिष्यन्त्सखे विष्णो वितरं वि क्रमस्व ॥११॥
कस्ते मातरं विधवामचक्रच्छयुं कस्त्वामजिघांसच्चरन्तम् ।
कस्ते देवो अधि मार्डीक आसीद्यत्प्राक्षिणाः पितरं पादगृह्य ॥१२॥
अवर्त्या शुन आन्त्राणि पेचे न देवेषु विविदे मर्डितारम् ।
अपश्यं जायममहीयमानामधा मे श्येनो मध्वा जभार ॥१३॥

*ayaṁ panthā anuvittaḥ purāṇo yato devā udajāyanta viśve* ।
*ataśchidā janiṣīṣṭa pravṛddho mā mātaramamuyā pattave kaḥ* ॥1॥
*nāhamato nirayā durgahaitattiraśchatā pārśvānnirgamāṇi* ।
*bahūni me akṛtā kartvāni yudhyai tvena saṁ tvena pṛchchhai* ॥2॥
*parāyatīṁ mātaramanvachaṣṭa na nānu gānyanu nū gamāni* ।
*tvaṣṭurgṛhe apibatsomamindraḥ śatadhanyaṁ chamvoḥ sutasya* ॥3॥
*kiṁ sa ṛdhak kṛṇavadyaṁ sahasraṁ māso jabhāra śaradaścha pūrvīḥ* ।
*nahī nvasya pratimānamastyantarjāteṣūta ye janitvāḥ* ॥4॥
*avadyamiva manyamānā guhākarindraṁ mātā vīryeṇā nyṛṣṭam* ।
*athodasthātsvayamatkaṁ vasāna ā rodasī apṛṇājjāyamānaḥ* ॥5॥
*etā arṣantyalalābhavantīṛrtāvarīriva saṁkrośamānāḥ* ।
*etā vi pṛchchha kimidaṁ bhananti kamāpo adriṁ paridhiṁ rujanti* ॥6॥
*kimu ṣvidasmai nivido bhanantendrasyāvadyaṁ didhiṣanta āpaḥ* ।
*mamaitānputro mahatā vadhena vṛtraṁ jaghanvām̐ asṛjadvi sindhūn* ॥7॥
*mamachchana tvā yuvatiḥ parāsa mamachchana tvā kuṣavā jagāra* ।
*mamachchidāpaḥ śiśave mamṛdyurmamachchidindraḥ sahasodatiṣṭhat* ॥8॥
*mamachchana te maghavanvyaṁso nivividhvām̐ apa hanū jaghāna* ।
*adhā nividdha uttaro babhūvāñchhiro dāsasya saṁ piṇagvadhena* ॥9॥
*gṛṣṭiḥ sasūva sthaviraṁ tavāgāmanādhṛṣyaṁ vṛṣabhaṁ tumramindram* ।
*arīḷhaṁ vatsaṁ charathāya mātā svayaṁ gātuṁ tanva ichchhamānam* ॥10॥
*uta mātā mahiṣamanvavenadamī tvā jahati putra devāḥ* ।
*athābravīdvṛtramindro haniṣyantsakhe viṣṇo vitaraṁ vi kramasva* ॥11॥
*kaste mātaraṁ vidhavāmachakrajchhayuṁ kastvāmajighāṁsachcharantam* ।
*kaste devo adhi mārḍīka āsīdyatprākṣiṇāḥ pitaraṁ pādagṛhya* ॥12॥
*avartyā śuna āntrāṇi peche na deveṣu vivide marḍitāram* ।
*apaśyaṁ jāyamamahīyamānāmadhā me śyeno madhvā jabhāra* ॥13॥

१३. इन्द्राबृहस्पती (Indrābṛhaspatī) - ऋ. (Rv.) ४.४९.१-६; ४.५०.१०; ११

ऋ. (Rv.) ४.४९.१-६

इदं वामास्ये हविः प्रियमिन्द्राबृहस्पती। उक्थं मदश्च शस्यते ॥१॥
अयं वां परि षिच्यते सोम इन्द्राबृहस्पती। चरुर्मदाय पीतये ॥२॥
आ न इन्द्राबृहस्पती गृहमिन्द्रश्च गच्छतम्। सोमपा सोमपीतये ॥३॥

अस्मे इन्द्राबृहस्पती रयिं धत्तं शतग्विनम्। अश्वावन्तं सहस्रिणम् ॥४॥
इन्द्राबृहस्पती वयं सुते गीर्भिर्हवामहे। अस्य सोमस्य पीतये ॥५॥
सोममिन्द्राबृहस्पती पिबतं दाशुषो गृहे। मादयेथां तदोकसा ॥६॥
*idaṁ vāmāsye haviḥ priyamindrābṛhaspatī / ukthaṁ madaścha śasyate //1 //*
*ayaṁ vāṁ pari ṣichyate soma indrābṛhaspatī / charurmadāya pītaye //2 //*
*ā na indrābṛhaspatī gṛhamindraścha gachchhatam / somapā somapītaye //3 //*
*asme indrābṛhaspatī rayiṁ dhattaṁ śatagvinam / aśvāvantaṁ sahasriṇam //4 //*
*indrābṛhaspatī vayaṁ sute gīrbhirharvāmahe / asya somasya pītaye //5 //*
*somamindrābṛhaspatī pibataṁ dāśuṣo gṛhe / mādayethāṁ tadokasā //6 //*

ऋ. (Rv.) ४.५०.१०-११

इन्द्रश्च सोमं पिबतं बृहस्पतेऽस्मिन्यज्ञे मन्दसाना वृषण्वसू ।
आ वां विशन्त्विन्दवः स्वाभुवोऽस्मे रयिं सर्ववीरं नि यच्छतम् ॥१०॥
बृहस्पत इन्द्र वर्धतं नः सचा सा वां सुमतिर्भूत्वस्मे ।
अविष्टं धियो जिगृतं पुरंधीर्जजस्तमर्यो वनुषामरातीः ॥११॥
*indraścha somaṁ pibataṁ bṛhaspate'sminyajñe mandasānā vṛṣaṇvam /*
*ā vāṁ viśantvindavaḥ svābhuvo'sme rayiṁ sarvavīraṁ ni yachchhatam //10 //*
*bṛhaspata indra vardhataṁ naḥ sachā sā vāṁ sumatirbhūtvasme /*
*aviṣṭaṁ dhiyo jigṛtaṁ puraṁdhīrjajastamaryo vanuṣāmarātīḥ //11 //*

१४. इन्द्रावरुणौ (Indrāvaruṇau) - ऋ. (Rv.) ४.४१.१-११

इन्द्रा को वां वरुणा सुम्नमाप स्तोमो हविष्माँ अमृतो न होता ।
यो वां हृदि क्रतुमाँ अस्मदुक्तः पस्पर्शदिन्द्रावरुणा नमस्वान् ॥१॥
इन्द्रा ह यो वरुणा चक्र आपी देवौ मर्तः सख्याय प्रयस्वान् ।
स हन्ति वृत्रा समिथेषु शत्रूनवोभिर्वा महद्भिः स प्र शृण्वे ॥२॥
इन्द्रा ह रत्नं वरुणा धेष्ठेत्था नृभ्यः शशमानेभ्यस्ता ।
यदी सखाया सख्याय सोमैः सुतेभिः सुप्रयसा मादयैते ॥३॥
इन्द्रा युवं वरुणा दिद्युमस्मिन्नोजिष्ठमुग्रा नि वधिष्टं वज्रम् ।
यो नो दुरेवो वृकतिर्दभीतिस्तस्मिन्मिमाथामभिभूत्योजः ॥४॥
इन्द्रा युवं वरुणा भूतमस्या धियः प्रेतारा वृषभेव धेनाः ।
सा नो दुहीयद्यवसेव गत्वी सहस्रधारा पयसा मही गौः ॥५॥
तोके हिते तनय उर्वरासु सूरो दृशीके वृषणश्च पौंस्ये ।
इन्द्रा नो अत्र वरुणा स्यातामवोभिर्दस्मा परितक्म्यायाम् ॥६॥
युवामिद्ध्यवसे पूर्व्याय परि प्रभूती गविषः स्वापी ।
वृणीमहे सख्याय प्रियाय शूरा मंहिष्ठा पितरेव शंभू ॥७॥
ता वां धियोऽवसे वाजयन्तीराजिं न जग्मुर्युवयूः सुदानू ।
श्रिये न गाव उप सोममस्थुरिन्द्रं गिरो वरुणं मे मनीषाः ॥८॥
इमा इन्द्रं वरुणं मे मनीषा अग्मन्नुप द्रविणमिच्छमानाः ।
अपेमस्थुर्जोष्टार इव वस्वो रघ्वीरिव श्रवसो भिक्षमाणाः ॥९॥
अश्वयस्य त्मना रथ्यस्य पुष्टेर्नित्यस्य रायः पतयः स्याम ।
ता चक्राणा ऊतिभिर्नव्यसीभिरस्मत्रा रायो नियुतः सचन्ताम् ॥१०॥
आ नो बृहन्ता बृहतीभिरूती इन्द्र यातं वरुण वाजसातौ ।
यद्दिद्यवः पृतनासु प्रक्रीळान्तस्य वां स्याम सनितार आजेः ॥११॥
*indrā ko vāṁ varuṇā sumnamāpa stomo haviṣmām̐ amṛto na hotā /*
*yo vāṁ hṛdi kratumām̐ asmaduktaḥ pasparśadindrāvaruṇā namasvān //1 //*
*indrā ha yo varuṇā chakra āpī devau martaḥ sakhyāya prayasvān /*
*sa hanti vṛtrā samitheṣu śatrūnavobhirvā mahadbhiḥ sa pra śṛṇve //2 //*
*indrā ha ratnaṁ varuṇā dheṣṭhetthā nṛbhyaḥ śaśamānebhyastā /*
*yadī sakhāyā sakhyāya somaiḥ sutebhiḥ suprayasā mādayaite //3 //*
*indrā yuvaṁ varuṇā didyumasminnojiṣṭhamugrā ni vadhiṣṭaṁ vajram /*
*yo no durevo vṛkatirdabhītistasminmimāthāmabhibhūtyojaḥ //4 //*

*indrā yuvaṁ varuṇā bhūtamasyā dhiyaḥ pretārā vṛṣabheva dhenāḥ ।*
*sā no duhīyadyavaseva gatvī sahasradhārā payasā mahī gauḥ ॥5 ॥*
*toke hite tanaya urvarāsu sūro dṛśīke vṛṣaṇaścha pauṁsye ।*
*indrā no atra varuṇā syātāmavobhirdasmā paritakmyāyām ॥6 ॥*
*yuvāmiddhyavase pūrvyāya pari prabhūtī gaviṣaḥ svāpī ।*
*vṛṇīmahe sakhyāya priyāya śūrā maṁhiṣṭhā pitareva śambhū ॥7 ॥*
*tā vāṁ dhiyo'vase vājayantīrājiṁ na jagmuryuvayūḥ sudānū ।*
*śriye na gāva upa seāmamasthurindraṁ giro varuṇaṁ me manīṣāḥ ॥8 ॥*
*imā indaṁ varuṇaṁ me manīṣā agmannupa draviṇamichchhamānāḥ ।*
*apemasthurjoṣṭāra iva vasvo radhvīriva śravaso bhikṣamāṇāḥ ॥9 ॥*
*aśvayasya tmanā rathyasya puṣṭernityasya rāyaḥ patayaḥ syāma ।*
*tā chakrāṇā ūtibhirnavyasībhirasmatrā rāyo niyutaḥ sachantām ॥10 ॥*
*ā no bṛhantā bṛhatībhirūtī indra yātaṁ varuṇa vājasātau ।*
*yaddidyavaḥ pṛtanāsu prakrīḷāntasya vāṁ syāma sanitāra ājeḥ ॥11 ॥*

१५. इन्द्राश्वौ (Indrāśvau) - ऋ. (Rv.) ४.३२.२३-२४

कनीनकेव विद्रधे नवे द्रुपदे अर्भके। बभ्रू यामेषु शोभेते ॥२३ ॥
अरं म उस्रयाम्णेऽरमनुस्रयाम्णे। बभ्रू यामेष्वस्रिधा ॥२४ ॥
*kanīnakeva vidradhe nave drupade arbhake । babhrū yāmeṣu śobhete ॥23 ॥*
*araṁ ma usrayāmṇe'ramanusrayāmṇe । babhrū yāmeṣvasridhā ॥24 ॥*

१६. इन्द्रासोमौ (Indrāsomau) - ऋ. (Rv.) ४.२८.१-५

त्वा युजा तव तत्सोम सख्य इन्द्रो अपो मनवे सस्रुतस्कः ।
अहन्नहिमरिणात्सप्त सिन्धूनपावृणोदपिहितेव खानि ॥१ ॥
त्वा युजा नि खिदत्सूर्यस्येन्द्रश्चक्रं सहसा सद्य इन्दो ।
अधि ष्णुना बृहता वर्तमानं महो द्रुहो अप विश्वायु धायि ॥२ ॥
अहन्निन्द्रो अदहदग्निरिन्दो पुरा दस्यून्मध्यन्दिनादभीके ।
दुर्गे दुरोणे क्रत्वा न यातां पुरू सहस्रा शर्वा नि बर्हीत् ॥३ ॥
विश्वस्मात्सीमधमाँ इन्द्र दस्यून्विशो दासीरकृणोरप्रशस्ताः ।
अबाधेथाममृणतं नि शत्रूनविन्देथामपचितिं वधत्रैः ॥४ ॥
एवा सत्यं मघवाना युवं तदिन्द्रश्च सोमोर्वमश्व्यं गोः ।
आदर्दृतमपिहितान्यश्ना रिरिचथुः क्षाश्चित्ततृदाना ॥५ ॥
*tvā yujā tava tatsoma sakhya indro apo manave sasrutaskaḥ ।*
*ahannahimariṇātsapta sindhūnapāvṛṇodapihiteva khāni ॥1 ॥*
*tvā yujā ni khidatsūryasyendraśchakraṁ sahasā sadya indo ।*
*adhi ṣṇunā bṛhatā vartamānaṁ maho druho apa viśvāyu dhāyi ॥2 ॥*
*ahannindro adahadagnirindo purā dasyūnmadhyandinādabhīke ।*
*durge duroṇe kratvā na yātāṁ purū sahasrā śarvā ni barhīt ॥3 ॥*
*viśvasmātsīmadhamām̐ indra dasyūnviśo dāsīrakṛṇorapraśastāḥ ।*
*abādhethāmamṛṇataṁ ni śatrūnavindethāmapachitiṁ vadhatraiḥ ॥4 ॥*
*evā satyaṁ maghavānā yuvaṁ tadindraścha somorvamaśvyaṁ goḥ ।*
*ādardṛtamapihitānyaśnā ririchathuḥ kṣāśchittatṛdānā ॥5 ॥*

१७. उषा (Uṣā) - ऋ. (Rv.) ४.५१.१-११; ४.५२.१-७; सा. (Sv.) १७२५-१७२७

ऋ. (Rv.) ४.५१.१-११

इदमु त्यत्पुरुतमं पुरस्ताज्ज्योतिस्तमसो वयुनावदस्थात् ।
नूनं दिवो दुहितरो विभातीर्गातुं कृणवन्नुषसो जनाय ॥१ ॥
अस्थुरु चित्रा उषसः पुरस्तान्मिता इव स्वरवोऽध्वरेषु ।
व्यू व्रजस्य तमसो द्वारोच्छन्तीरव्रंछुच्यः पावकाः ॥२ ॥
उच्छन्तीरद्य चितयन्त भोजान् राधोदेयायोषसो मघोनीः ।
अचित्रे अन्तः पणयः ससन्त्वबुध्यमानास्तमसो विमध्ये ॥३ ॥
कुवित्स देवीः सनयो नवो वा यामो बभूयादुषसो वो अद्य ।

येना नवग्वे अंगिरे दशग्वे सप्तास्ये रेवती रेवदूष ॥४॥
यूयं हि देवीऋर्तयुग्भिरश्वैः परिप्रयाथ भुवनानि सद्यः ।
प्रबोधयन्तीरुषसः ससन्तं द्विपाच्चतुष्पाच्चरथाय जीवम् ॥५॥
क्व स्विदासां कतमा पुराणी यया विधाना विदधुऋर्भूणाम् ।
शुभं युच्छुभ्रा उषसश्चरन्ति न वि ज्ञायन्त सदृशीरजुर्याः ॥६॥
ता घा ता भद्रा उषसः पुरासुरभिष्टिद्युम्ना ऋतजातसत्याः ।
यास्वीजानः शशमान उक्थैः स्तुवंछंसंन्द्रविणं सद्य आप ॥७॥
ता आ चरन्ति समना पुरस्तात्समानतः समना पप्रथानाः ।
ऋतस्य देवीः सदसो बुधाना गवां न सर्गा उषसो जरन्ते ॥८॥
ता इन्न्वे३व समना समानीरमीतवर्णा उषसश्चरन्ति ।
गूहन्तीरभ्वमसितं रुशद्भिः शुक्रास्तनूभिः शुचयो रुचानाः ॥९॥
रयिं दिवो दुहितरो विभातीः प्रजावन्तं यच्छतास्मासु देवीः ।
स्योनादा वः प्रतिबुध्यमानाः सुवीर्यस्य पतयः स्याम ॥१०॥
तद्वो दिवो दुहितरो विभातीरुप ब्रुव उषसो यज्ञकेतुः ।
वयं स्याम यशसो जनेषु तद् द्यौश्च धत्तां पृथिवी च देवी ॥११॥
*idamu tyatpurutamaṁ purastājjyotistamaso vayunāvadasthāt /*
*nūnaṁ divo duhitaro vibhātīrgātuṁ kṛṇavannuṣaso janāya //1//*
*asthuru chitrā uṣasaḥ purastānmitā iva svaravo'dhvareṣu /*
*vyū vrajasya tamaso dvadyārochchhantīravraṁchhuchyaḥ pāvakāḥ //2//*
*uchchhantīradya chitayanta bhojān rādhodeyāyoṣaso maghonīḥ /*
*achitre antaḥ paṇayaḥ sasantvabudhyamānāstamaso vimadhye //3//*
*kuvitsa devīḥ sanayo navo vā yāmo babhūyāduṣaso vo adya /*
*yenā navagve aṁgire daśagve saptāsye revatī revadūṣa //4//*
*yūyaṁ hi devīṛrtayugbhiraśvaiḥ pariprayātha bhuvanāni sadyaḥ /*
*prabodhayantīruṣasaḥ sasantaṁ dvipāchchatuṣpāchcharathāya jīvam //5//*
*kva svidāsāṁ katamā purāṇī yayā vidhānā vidadhuṛrbhūṇām /*
*śubhaṁ yuchchhubhrā uṣasaścharanti na vi jñāyanta sadṛśīrajuryāḥ //6//*
*tā ghā tā bhadrā uṣasaḥ purāsurabhiṣṭidyumnā ṛtajātasatyāḥ /*
*yāsvījānaḥ śaśamāna ukthaiḥ stuvaṁchhaṁsaṁndraviṇaṁ sadya āpa //7//*
*tā ā charanti samanā purastātsamānataḥ samanā paprathānāḥ /*
*ṛtasya devīḥ sadaso budhānā gavāṁ na sargā uṣaso jarante //8//*
*tā innve3va samanā samānīramītavarṇā uṣasaścharanti /*
*gūhantīrabhvamasitaṁ ruśadbhiḥ śukrāstanūbhiḥ śuchayo ruchānāḥ //9//*
*rayiṁ divo duhitaro vibhātīḥ prajāvantaṁ yachchhatāsmāsu devīḥ /*
*syonādā vaḥ pratibudhyamānāḥ suvīryasya patayaḥ syāma //10//*
*tadvo divo duhitaro vibhātīrupa bruva uṣaso yajñaketuḥ /*
*vayaṁ syāma yaśaso janeṣu tad dyauścha dhattāṁ pṛthivī cha devī //11//*

ऋ. (Rv.) ४.५२.१-७

प्रति ष्या सूनरी जनी व्युच्छन्ती परि स्वसुः। दिवो अदिर्शि दुहिता ॥१॥
अश्वेव चित्रारुषी माता गवामृतावरी। सखाभूदश्विनोरुषाः ॥२॥
उत सखास्यश्विनोरुत माता गवामसि। उतोषो वस्व ईशिषे ॥३॥
यावयद् द्वेषसं तवा चिकित्वित्सूनृतावरि। प्रति स्तोमैरभुत्स्महि ॥४॥
प्रति भद्रा अदृक्षत गवां सर्गा न रश्मयः। ओषा अप्रा उरु ज्रयः ॥५॥
आपप्रुषी विभावरि व्यावर्ज्योतिषा तमः। उषो अनु स्वधामव ॥६॥
आ द्यां तनोषि रश्मिभिरान्तरिक्षमुरु प्रियम्। उषः शुक्रेण शोचिषा ॥७॥
*prati ṣyā sūnarī janī vyuchchhantī pari svasuḥ / divo adirśi duhitā //1//*
*aśveva chitrāruṣī mātā gavāmṛtāvarī / sakhābhūdaśvinoruṣāḥ //2//*
*uta sakhāsyaśvinoruta mātā gavāmasi / utoṣo vasva īśiṣe //3//*
*yāvayad dveṣasaṁ tavā chikitvitsūnṛtāvari / prati stomairabhutsmahi //4//*
*prati bhadrā adṛkṣata gavāṁ sargā na raśmayaḥ / oṣā aprā uru jrayaḥ //5//*
*āpapruṣī vibhāvari vyāvarjyotiṣā tamaḥ / uṣo anu svadhāmava //6//*

*ā dyāṁ tanoṣi raśmibhirāntarikṣamuru priyam / uṣaḥ śukreṇa śochiṣā //7 //*

सा. (Sv.) १७२५-१७२७

प्रति ष्या सूनरी जनी व्युच्छन्ती परि स्वसुः। दिवो अदर्शि दुहिता ॥१॥
अश्वेव चित्रारुषी माता गवामृतावरी। सखा भूदश्विनोरुषाः ॥२॥
उत सखास्यश्विनोरुत माता गवामसि। उतोषो वस्व ईशिषे ॥३॥
*prati ṣyā sūnarī janī vyuchchhantī pari svasuḥ / divo adarśi duhitā //1 //*
*aśveva chitrāruṣī mātā gavāmṛtāvarī / sakhā bhūdaśvinoruṣāḥ //2 //*
*uta sakhāsyaśvinoruta mātā gavāmasi / utoṣo vasva īśiṣe //3 //*

१८. ऋभवः (Ṛbhavaḥ) - ऋ. (Rv.) ४.३३.१-११; ४.३४.१-११; ४.३५.१-९; ४.३६.१-९; ४.३७.१-८

ऋ. (Rv.) ४.३३.१-११

प्र ऋभुभ्यो दूतमिव वाचमिष्य उपस्तिरे श्वैतरीं धेनुमीळे ।
ये वातजूतास्तरणिभिरेवैः परि द्यां सद्यो अपसो बभूवुः ॥१॥
यदारमक्रन्नृभवः पितृभ्यां परिविष्टी वेषणा दंसनाभिः ।
अदिद्देवानामुप सख्यमायन्धीरासः पुष्टिमवहन्मनायै ॥२॥
पुनर्ये चक्रुः पितरा युवाना सना यूपेव जरणा शयाना ।
ते वाजो विभ्वाँ ऋभुरिन्द्रवन्तो मधुप्सरसो नोऽवन्तु यज्ञम् ॥३॥
यत्संवत्समृभवो गामरक्षन्यत्संवत्समृभवो मा अपिंशन् ।
यत्संवत्समभरन्भासो अस्यास्ताभिः शमीभिरमृतत्वमाशुः ॥४॥
ज्येष्ठ आह चमसा द्वा करेति कनीयान्त्रीन्कृणवामेत्याह ।
कनिष्ठ आह चतुरस्करेति त्वष्ट ऋभवस्तत्पनयद्वचो वः ॥५॥
सत्यमूचुर्नर एवा हि चक्रुरनु स्वधामृभवो जग्मुरेताम् ।
विभ्राजमानांश्चमसाँ अहेवावेनत्त्वष्टा चतुरो ददृश्वान् ॥६॥
द्वादश द्यून्यदगोह्यस्यातिथ्ये रणन्नृभवः ससन्तः ।
सुक्षेत्राकृण्वन्ननयन्त सिन्धून्धन्वातिष्ठन्नोषधीर्निम्नमापः ॥७॥
रथं ये चक्रुः सुवृतं नरेष्ठां ये धेनुं विश्वजुवं विश्वरूपाम् ।
त आ तक्षन्त्वृभवो रयिं नः स्ववसः स्वपसः सुहस्ताः ॥८॥
अपो ह्येषामजुषन्त देवा अभि क्रत्वा मनसा दीध्यानाः ।
वाजो देवानामभवत्सुकर्मेन्द्रस्य ऋभुक्षा वरुणस्य विभ्वा ॥९॥
ये हरी मेधयोक्था मदन्त इन्द्राय चक्रुः सुयुजा ये अश्वा ।
ते रायस्पोषं द्रविणान्यस्मे धत्त ऋभवः क्षेमयन्तो न मित्रम् ॥१०॥
इदाह्नः पीतिमुत वो मदं धुर्न ऋते श्रान्तस्य सख्याय देवाः ।
ते नूनमस्मे ऋभवो वसूनि तृतीये अस्मिन्त्सवने दधात ॥११॥
*pra ṛbhubhyo dūtamiva vāchamiṣya upastire śvaitarīṁ dhenumīḻe /*
*ye vātajūtāstaraṇibhirevaiḥ pari dyāṁ sadyo apaso babhūvuḥ //1 //*
*yadāramakrannṛbhavaḥ pitṛbhyāṁ pariviṣṭī veṣaṇā daṁsanābhiḥ /*
*adiddevānāmupa sakhyamāyandhīrāsaḥ puṣṭimavahanmanāyai //2 //*
*punarye chakruḥ pitarā yuvānā sanā yūpeva jaraṇā śayānā /*
*te vājo vibhvām̐ ṛbhurindravanto madhupsaraso no'vantu yajñam //3 //*
*yatsaṁvatsamṛbhavo gāmarakṣanyatsaṁvatsamṛbhavo mā apiṁśan /*
*yatsaṁvatsamabharanbhāso asyāstābhiḥ śamībhiramṛtatvamāśuḥ //4 //*
*jyeṣṭha āha chamasā dvā kareti kanīyāntrīnkṛṇavāmetyāha /*
*kaniṣṭha āha chaturaskareti tvaṣṭa ṛbhavastatpanayadvacho vaḥ //5 //*
*satyamūchurnara evā hi chakruranu svadhāmṛbhavo jagmuretām /*
*vibhrājamānāṁśchamasām̐ ahevāvenattvaṣṭā chaturo dadṛśvān //6 //*
*dvādaśa dyūnyadagohyasyātithye raṇannṛbhavaḥ sasantaḥ /*
*sukṣetrākṛṇvannanayanta sindhūndhanvātiṣṭhannoṣadhīrnimnamāpaḥ //7 //*
*rathaṁ ye chakruḥ suvṛtaṁ nareṣṭhāṁ ye dhenuṁ viśvajuvaṁ viśvarūpām /*
*ta ā takṣantvṛbhavo rayiṁ naḥ svavasaḥ svapasaḥ suhastāḥ //8 //*
*apo hyeṣāmajuṣanta devā abhi kratvā manasā dīdhyānāḥ /*

*vājo devānāmabhavatsukarmendrasya ṛbhukṣā varuṇasya vibhvā //9 //*
*ye harī medhayokthā madanta indrāya chakruḥ suyujā ye aśvā /*
*te rāyaspoṣaṁ draviṇānyasme dhatta ṛbhavaḥ kṣemayanato na mitram //10 //*
*idāhnaḥ pītimuta vo madaṁ dhurna ṛte śrāntsya sakhyāya devāḥ /*
*te nūnamasme ṛbhavo vasūni tṛtīye asmintsavane dadhāta //11 //*

ऋ. (Rv.) ४.३४.१-११

ऋभुर्विभ्वा वाज इन्द्रो नो अच्छेमं यज्ञं रत्नधेयोप यात ।
इदा हि वो धिष्णा देव्यह्नामधात्पीतिं सं मदा अग्मता वः ॥१॥
विदानासो जन्मनो वाजरत्ना उत ऋतुभिॠभवो मादयध्वम् ।
सं वो मदा अग्मत सं पुरंधिः सुवीरामस्मे रयिमेरयध्वम् ॥२॥
अयं वो यज्ञ ऋभवोऽकारि यमा मनुष्वत्प्रदिवो दधिष्वे ।
प्र वोऽच्छा जुजुषाणासो अस्थुरभूत विश्वे अग्रियोत वाजाः ॥३॥
अभूद् वो विधते रत्नधेयमिदा नरो दाशुषे मर्त्याय ।
पिबत वाजा ऋभवो ददे वो महि तृतीयं सवनं मदाय ॥४॥
आ वाजा यातोप न ऋभुक्षा महो नरो द्रविणसो गृणानाः ।
आ वः पीतयोऽभिपित्वे अह्नामिमा अस्तं नवस्व इव ग्मन् ॥५॥
आ नपातः शवसो यातनोपेमं यज्ञं नमसा हूयमानाः ।
सजोषसः सूरयो यस्य च स्थ मध्वः पात रत्नधा इन्द्रवन्तः ॥६॥
सजोषा इन्द्र वरुणेन सोमं सजोषाः पाहि गिर्वणो मरुद्भिः ।
अग्रपाभिॠतुपाभिः सजोषा ग्नास्पत्नीभी रत्नधाभिः सजोषाः ॥७॥
सजोषस आदितयैर्मादयध्वं सजोषस ऋभवः पर्वतेभिः ।
सजोषसो दैव्येना सवित्रा सजोषसः सिन्धुभी रत्नधेभिः ॥८॥
ये अश्विना ये पितरा य ऊती धेनुं ततक्षुॠभवो ये अश्वा ।
ये अंसत्रा य ऋधग्रोदसी ये विभ्वो नरः स्वपत्यानि चक्रुः ॥९॥
ये गोमन्तं वाजवन्तं सुवीरं रयिं धत्थ वसुमन्तं पुरुक्षम् ।
ते अग्रेपा ऋभवो मन्दसाना अस्मे धत्त ये च रातिं गृणन्ति ॥१०॥
नापाभूत न वोऽतीतृषामानिः शस्ता ऋभवो यज्ञे अस्मिन् ।
समिन्द्रेण मदथ सं मरुद्भिः सं राजभी रत्नधेयाय देवाः ॥११॥

*ṛbhurvibhvā vāja indro no achchhemaṁ yajñaṁ ratnadheyopa yāta /*
*idā hi vo dhiṣṇā devyahnāmadhātpītiṁ saṁ madā agmatā vaḥ //1 //*
*vidānāso janmano vājaratnā uta ṛtubhiṛrbhavo mādayadhvam /*
*saṁ vo madā agmata saṁ puraṁdhiḥ suvīrāmasme rayimerayadhvam //2 //*
*ayaṁ vo yajña ṛbhavo'kāri yamā manuṣvatpradivo dadhiṣve /*
*pra vo'chchhā jujuṣāṇāso asthurabhūta viśve agriyota vājāḥ //3 //*
*abhūd vo vidhate ratnadheyamidā nareā dāśuṣe martyāya /*
*pibata vājā ṛbhavo dade vo mahi tṛtīyaṁ savanaṁ madāya //4 //*
*ā vājā yātopa na ṛbhukṣā maho naro draviṇaso gṛṇānāḥ /*
*ā vaḥ pītayo'bhipitve ahnāmimā astaṁ navasva iva gman //5 //*
*ā napātaḥ śavaso yātanopemaṁ yajñaṁ namasā hūyamānāḥ /*
*sajoṣasaḥ sūrayo yasya cha stha madhvaḥ pāta ratnadhā indravantaḥ //6 //*
*sajoṣā indra varuṇena somaṁ sajoṣāḥ pāhi girvaṇo marudbhiḥ /*
*agrapābhiṛtupābhiḥ sajoṣā gnāspatnībhī ratnadhābhiḥ sajoṣāḥ //7 //*
*sajoṣasa āditayairmādayadhvaṁ sajoṣasa ṛbhavaḥ parvatebhiḥ /*
*sajoṣaso daivyenā savitrā sajoṣasaḥ sindhubhī ratnadhebhiḥ //8 //*
*ye aśvinā ye pitarā ya ūtī dhenuṁ tatakṣuṛrbhavo ye aśvā /*
*ye aṁsatrā ya ṛdhagrodasī ye vibhvo naraḥ svapatyāni chakruḥ //9 //*
*ye gomantaṁ vājavantaṁ suvīraṁ rayiṁ dhattha vasumantaṁ purukṣam /*
*te agrepā ṛbhavo mandasānā asme dhatta ye cha rātiṁ gṛṇanti //10 //*
*nāpābhūta na vo'tītṛṣāmāniḥ śastā ṛbhavo yajñe asmin /*
*samindreṇa madatha saṁ marudbhiḥ saṁ rājabhī ratnadheyāya devāḥ //11 //*

ऋ. (Rv.) ४.३५.१-९

इहोप यात शवसो नपातः सौधन्वना ऋभवो माप भूत ।
अस्मिन्हि वः सवने रत्नधेयं गमन्त्विन्द्रमनु वो मदासः ॥१॥
आगन्नृभूणामिह रत्नधेयमभूत्सोमस्य सुषुतस्य पीतिः ।
सुकृत्यया यत्स्वपस्यया चँ एकं विचक्र चमसं चतुर्धा ॥२॥
व्यकृणोत चमसं चतुर्धा सखे वि शिक्षेत्यब्रवीत ।
अथैतं वाजा अमृतस्य पन्थां गणं देवानामृभवः सुहस्ताः ॥३॥
किंमयः स्विच्चमस एष आस यं कव्येन चतुरो चिचक्र ।
अथा सुनुध्वं सवनं मदाय पात ऋभवो मधुनः सोम्यस्य ॥४॥
शच्याकर्त पितरा युवाना याच्याकर्त्त चमसं देवपानम् ।
शच्या हरी धनुतरावतष्टेन्द्रवाहावृभवो वाजरत्नाः ॥५॥
यो वः सुनोत्यभिपित्वे अह्नां तीव्रं वाजासः सवनं मदाय ।
तस्मै रयिमृभवः सर्ववीरमा तक्षत वृषणो मन्दसानाः ॥६॥
प्रातः सुतमपिबो हर्यश्व माध्यन्दिनं सवनं केवलं ते ।
समृभुभिः पिबस्व रत्नधेभिः सखीँयाँ इन्द्र चकृषे सुकृत्या ॥७॥
ये देवासो अभवता सुकृत्या श्येना इवेदधि दिवि निषेद ।
ते रत्नं धात शवसो नपातः सौधन्वना अभवतामृतासः ॥८॥
यत्तृतीयं सवनं रत्नधेयमकृणुध्वं स्वपस्या सुहस्ताः ।
तदृभवः परिषिक्तं व एतत्सं मदेभिरिन्द्रियेभिः पिबध्वम् ॥९॥

*ihopa yāta śavaso napātaḥ saudhanvanā ṛbhavo māpa bhūta /*
*asminhi vaḥ savane ratnadheyaṁ gamantvindramanu vo madāsaḥ //1 //*
*āgannṛbhūṇāmiha ratnadheyamabhūtsomasya suṣutasya pītiḥ /*
*sukṛtyayā yatsvapasyayā chaṁ̐ ekaṁ vichakra chamasaṁ chaturdhā //2 //*
*vyakṛṇota chamasaṁ chaturdhā sakhe vi śikṣetyabravīta /*
*athaitaṁ vājā amṛtasya panthāṁ gaṇaṁ devānāmṛbhavaḥ suhastāḥ //3 //*
*kiṁmayaḥ svichchamasa eṣa āsa yaṁ kavyena chaturo chichakra /*
*athā sunudhvaṁ savanaṁ madāya pāta ṛbhavo madhunaḥ somyasya //4 //*
*śachyākarta pitarā yuvānā yāchyākartta chamasaṁ devapānam /*
*śachyā harī dhanutarāvataṣṭendravāhāvṛbhavo vājaratnāḥ //5 //*
*yo vaḥ sunotyabhipitve ahnāṁ tīvraṁ vājāsaḥ savanaṁ madāya /*
*tasmai rayimṛbhavaḥ sarvavīramā takṣata vṛṣaṇo mandasānāḥ //6 //*
*prātaḥ sutamapibo haryaśva mādhyandinaṁ savanaṁ kevalaṁ te /*
*samṛbhubhiḥ pibasva ratnadhebhiḥ sakhīm̐yām̐ indra chakṛṣe sukṛtyā //7 //*
*ye devāso abhavatā sukṛtyā śyenā ivedadhi divi niṣeda /*
*te ratnaṁ dhāta śavaso napātaḥ saudhanvanā abhavatāmṛtāsaḥ //8 //*
*yattṛtīyaṁ savanaṁ ratnadheyamakṛṇudhvaṁ svapasyā suhastāḥ /*
*tadṛbhavaḥ pariṣiktaṁ va etatsaṁ madebhirindriyebhiḥ pibadhvam //9 //*

ऋ. (Rv.) ४.३६.१-९

अनश्वो जातो अनभीशुरुक्थ्यो३ रथस्त्रिचक्रः परि वर्तते रजः ।
पहत्तद्वो देव्यस्य प्रवाचनं द्यामृभवः पृथिवीं यच्च पुष्यथ ॥१॥
रथं य चक्रुः सुवृतं सुचेतसोऽविह्वरन्तं मनस्परि ध्यया ।
ताँ ऊ न्व१स्य सवनस्य पीतय आ वो वाजा ऋभवो वेदयामसि ॥२॥
तद्वो वाजा ऋभवः सुप्रवाचनं देवेषु विभ्वो अभवन्वमहित्वनम् ।
जिव्री यत्सन्ता पितरा सनाजुरा पुनर्युवाना चरथाय धीतिभिः ।
अथा देवेष्वमृतत्वमानश श्रुष्टी वाजा ऋभवस्तद्व उक्थ्यम् ॥४॥
ऋभुतो रयिः प्रथमश्रवस्तमो वाजश्रुतासो यमजीजनन्नरः ।
विभ्वतष्टो विदथेषु प्रवाच्यो यं देवासोऽवथा स विचर्षणिः ॥५॥
स वाज्यर्वा स ऋषिर्वचस्यया स शूरो अस्ता पृतनासु दुष्टरः ।
स रायस्पोषं स सुवीर्यं दधे यं वाजो विभ्वाँ ऋभवो यमाविषुः ॥६॥

श्रेष्ठं वः पेशो अधि धायि दर्शतं स्तोमो वाजा ऋभवस्तं जुजुष्टन ।
धीरासो हि ष्ठा कवयो विपिश्चतस्तान्व एना ब्रह्मणा वेदयामसि ॥७॥
यूयमस्मभ्यं धिष्णाभ्यस्परि विद्वांसो विश्वा नर्याणि भोजना ।
द्युमन्तं वाजं वृषशुष्ममुत्तममा नो रयिमृभवस्तक्षता वयः ॥८॥
इह प्रजामिह रयिं रराणा इह श्रवो वीरवत्तक्षता नः ।
येन वयं चितयेमात्यन्यान्तं वाजं चित्रमृभवो ददा नः ॥९॥
*anaśvo jāto anabhīśurukthyo3 rathastrichakraḥ pari vartate rajaḥ /*
*pahattadvo devyasya pravāchanaṁ dyāmṛbhavaḥ pṛthivīṁ yachcha puṣyatha //1 //*
*rathaṁ ya chakruḥ suvṛtaṁ suchetaso'vihvarantaṁ manaspari dhyayā /*
*tām̐ ū nva1sya savanasya pītaya ā vo vājā ṛbhavo vedayāmasi //2 //*
*tadvo vājā ṛbhavaḥ supravāchanaṁ deveṣu vibhvo abhavanvamahitvanam /*
*jivrī yatsantā pitarā sanājurā punaryuvānā charathāya dhītibhiḥ /*
*athā deveṣvamṛtatvamānaśa śruṣṭī vājā ṛbhavastadva ukthyam //4 //*
*ṛbhuto rayiḥ prathamaśravastamo vājaśrutāso yamajījanannaraḥ /*
*vibhvataṣṭo vidatheṣu pravāchyo yaṁ devāso'vathā sa vicharṣaṇiḥ //5 //*
*sa vājyarvā sa ṛṣirvachasyayā sa śūro astā pṛtanāsu duṣṭaraḥ /*
*sa rāyaspoṣaṁ sa suvīryaṁ dadhe yaṁ vājo vibhvām̐ ṛbhavo yamāviṣuḥ //6 //*
*śreṣṭhaṁ vaḥ peśo adhi dhāyi darśataṁ stomo vājā ṛbhavastaṁ jujuṣṭana /*
*dhīrāso hi ṣṭhā kavayo vipiśchatastānva enā brahmaṇā vedayāmasi //7 //*
*yūyamasmabhyaṁ dhiṣṇābhyaspari vidvāṁso viśvā naryāṇi bhojanā /*
*dyumantaṁ vājaṁ vṛṣaśuṣmamuttamamā no rayimṛbhavastakṣatā vayaḥ //8 //*
*iha prajāmiha rayiṁ rarāṇā iha śravo vīravattakṣatā naḥ /*
*yena vayaṁ chitayemātyanyāntaṁ vājaṁ chitramṛbhavo dadā naḥ //9 //*

ऋ. (Rv.) ४.३७.१-८

उप नो वाजा अध्वरमृभुक्षा देवा यात पथिभिर्देवयानैः ।
यथा यज्ञं मनुषो विक्ष्वा३ सु दधिध्वे रण्वाः सुदिनेष्वह्नाम् ॥१॥
ते वो हृदे मनसे सन्तु यज्ञा जुष्टासो अद्य घृतनिर्णिजो गुः ।
प्र वः सुतासो हरयन्त पूर्णाः क्रत्वे दक्षाय हर्षयन्त पीताः ॥२॥
त्र्युदायंदेवहितं यथा वः स्तोमो वाजा ऋभुक्षणो ददे वः ।
जुह्वे मनुष्वदुपरासु विक्षु युष्मे सचा वृहद्दिवेषु सोमम् ॥३॥
पीबोअश्वाः शुचद्रथा हि भूतायः शिप्रा वाजिनः सुनिष्काः ।
इन्द्रस्य सूनो शवसो नपातोऽनु वश्चत्यग्रियं मदाय ॥४॥
ऋभुमृभुक्षणो रयिं वाजे वाजिन्तमं युजम् । इन्द्रस्वन्तं हवामहे सदासातममश्विनम् ॥५॥
सेदृभवो यमवथ यूयमिन्द्रश्च मर्त्यम् । धीभिरस्तु सनिता मेधसाता सो अर्वता ॥६॥
वि नो वाजा ऋभुक्षणः पथश्चितन यष्टवे । अस्मभ्यं सूरयः स्तुता विश्वा आशस्तरीषणि ॥७॥
तं नो वाजा ऋभुक्षण इन्द्र नासत्या रयिम्। समश्वं चर्षणिभ्य आ पुरु शस्त मघत्तये ॥८॥
*upa no vājā adhvaramṛbhukṣā devā yāta pathibhirdevayānaiḥ /*
*yathā yajñaṁ manuṣo vikṣavā3 su dadhidhve raṇvāḥ sudineṣvahnām //1 //*
*te vo hṛde manase santu yajñā juṣṭāso adya ghṛtanirṇijo guḥ /*
*pra vaḥ sutāso harayanta pūrṇāḥ kratve dakṣāya harṣayanta pītāḥ //2 //*
*trayudāyaṁdevahitaṁ yathā vaḥ stomo vājā ṛbhukṣaṇo dade vaḥ /*
*juhve manuṣvaduparāsu vikṣu yuṣme sachā vṛhaddiveṣu somam //3 //*
*pīboaśvāḥ śuchadrathā hi bhūtāyaḥ śiprā vājinaḥ suniṣkāḥ /*
*indrasya sūno śavaso napāto'nu vaśchatyagriyaṁ madāya //4 //*
*ṛbhumṛbhukṣaṇo rayiṁ vāje vājintamaṁ yujam /*
*indrasvantaṁ havāmahe sadāsātamamaśvinam //5 //*
*sedṛbhavo yamavatha yūyamindraścha martyam /*
*dhībhirastu sanitā medhasātā so arvatā //6 //*
*vi no vājā ṛbhukṣaṇaḥ pathaśchitana yaṣṭave /*
*asmabhyaṁ sūrayaḥ stutā viśvā āśastarīṣaṇi //7 //*
*taṁ no vājā ṛbhukṣaṇa indra nāsatyā rayim /*
*samaśvaṁ charṣaṇibhya ā puru śasta maghattaye //8 //*

१९. क्षेत्रपतिः (Kṣetrapatiḥ) - ऋ. (Rv.) ४.५७.१-३

क्षेत्रस्य पतिना वयं हितेनेव जयामसि । गामश्वं पोषयित्न्वा स नो मृळातीदृशे ॥१॥
क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व ।
मधुश्चुतं घृतमिव सुपूतमृतस्य नः पतयो मृळयन्तु ॥२॥
मधुमतीरोषधीर्द्याव आपो मधुमन्नो भवत्वन्तरिक्षम् ।
क्षेत्रस्य पतिर्मधुमान्नो अस्त्वरिष्यन्तो अन्वेनं चरेम ॥३॥

*kṣetrasya patinā vayaṁ hiteneva jayāmasi । gāmaśvaṁ poṣayitnvā sa no mṛḷāātīdṛśe ॥1॥*
*kṣetrasya pate madhumantamūrmiṁ dhenuriva payo asmāsu dhukṣava ।*
*madhuśchutaṁ ghṛtamiva supūtamṛtasya naḥ patayo mṛḷayantu ॥2॥*
*madhumatīroṣadhīrdyāva āpo madhumanno bhavatvantarikṣam ।*
*kṣetrasya patirmadhumānno astvariṣyanto anvenaṁ charema ॥3॥*

२०. गावः (Gāvaḥ) - सा. (Sv.) ६२६

सहर्षभाः सहवत्सा उदेत विश्वा रूपाणि बिभ्रतीर्द्व्यूध्नीः ।
उरुः पृथुरयं वो अस्तु लोक इमा आपः सुप्रपाणा इह स्त ॥१२॥

*saharṣabhāḥ sahavatsā udeta viśvā rūpāṇi bibhratīrdvyūdhnīḥ ।*
*uruḥ pṛthurayaṁ vo astu loka imā āpaḥ suprapāṇā iha sta ॥12॥*

**२१.** त्वष्टा पर्जन्य ब्रह्मणस्पति अदितिः (साग्री. सास्वा.) बहुदेवते इत्येके (सार्षेदी.) (Tvaṣṭā Parjanya Brahmaṇaspati Aditiḥ [Ssb. Sas.] Bahudevate Ityeke [Sad.]) - साण् २९९

त्वष्टा नो दैव्यं वचः पर्जन्यो ब्रह्मणस्पतिः।
पुत्रैर्भ्रातृभिरदितिर्नु पातु नो दुष्टरं त्रामणं वचः ॥७॥

*tvaṣṭā no daivyaṁ vachaḥ parjanyo brahmaṇaspatiḥ ।*
*putrairbhrātṛbhiraditirnu pātu no duṣṭaraṁ trāmaṇaṁ vachaḥ ॥7॥*

२२. दधिक्रा (Dadhikrā) - ऋ. (Rv.) ४.३८.२-१०; ४.३९.१-६; सा. (Sv.) ३५८

ऋ. (Rv.) ४.३८.२-१०

उत वाजिनं पुरुनिष्षिध्वानं दधिक्रामु ददथुर्विश्वकृष्टिम् ।
ऋजिप्यं श्येनं प्रुषितप्सुमाशुं चर्कृत्यमर्यो नृपतिं न शूरम् ॥२॥
यं सीमनु प्रवतेव द्रवन्तं विश्वः पूरुर्मदति हर्षमाणः ।
पड्भिर्गृध्यन्तं मेधयुं न शूरं रथतुरं वातमिव ध्रजन्तम् ॥३॥
यः स्मारुन्धानो गध्या समत्सु सनुतरश्चरति गोषु गच्छन् ।
आविरृजीको विदथा निचिक्यत्तिरो अरतिं पर्याय आयोः ॥४॥
उत स्मैनं वस्त्रमथिं न तायुमनु क्रोशन्ति क्षितयो भरेषु ।
नीचायमानं जसुरिं न श्येनं श्रवश्चाच्छा पशुमच्च यूथम् ॥५॥
उत स्मासु प्रथमः सरिष्यन्नि वेवेति श्रेणिभी रथानाम् ।
स्रजं कृण्वानो जन्यो न शुभ्वा रेणुं रेरिहत्किरणं ददश्वान् ॥६॥
उत स्य वाजी सहुरिरृतावा शुश्रुषमाणस्तन्वा समर्ये ।
तुरं यतीषु तुरयन्नृजिप्योऽधि भ्रुवोः किरते रेणुमृंजन् ॥७॥
उत स्मास्य तन्यतोरिव द्योरृघायतो अभियुजो भयन्ते ।
यदा सहस्रमभि षीमयोधीद्दुर्वर्तुः स्मा भवति भीम ऋंजन् ॥८॥
उत स्मास्य पनयन्ति जना जूतिं कृष्टिप्रो अभिभूतिमाशोः ।
उतैनमाहुः समिथे वियन्तः परा दधिक्रा असरत्सहस्रैः ॥९॥
आ दधिक्राः शवसा पंच कृष्टीः सूर्यइव ज्योतिषापस्ततान ।
सहस्रसाः शतसा वाज्यर्वा पृणक्तु मध्वा समिमा वचांसि ॥१०॥

*uta vājinaṁ puruniṣṣidhvānaṁ dadhikrāmu dadathurviśvakṛṣṭim ।*
*ṛjipyaṁ śyenaṁ pruṣitatsumāśuṁ charkṛtyamaryo nṛpatiṁ na śūram ॥2॥*
*yaṁ sīmanu pravateva dravantaṁ viśvaḥ pūrurmadati harṣamāṇaḥ ।*
*paḍbhirgṛdhyantaṁ medhayuṁ na śūraṁ rathaturaṁ vātamiva dhrajantam ॥3॥*
*yaḥ smārundhāno gadhyā samatsu sanutaraścharati goṣu gachchhan ।*
*āvirṛjīko vidathā nichikyattiro aratiṁ paryāya āyoḥ ॥4॥*

*uta smainaṁ vastramathiṁ na tāyumanu krośanti kṣitayo bhareṣu /*
*nīchāyamānaṁ jasuriṁ na śyenaṁ śravaśchāchchhā paśumachcha yūtham //5 //*
*uta smāsu prathamaḥ sariṣyanni veveti śreṇibhī rathānām /*
*srajaṁ kṛṇvāno janyo na śubhvā reṇuṁ rerihatkiraṇaṁ dadaśvān //6 //*
*uta sya vājī sahurirṛtāvā śuśruṣamāṇastanvā samarye /*
*turaṁ yatīṣu turayannṛjipyo'dhi bhruvoḥ kirate reṇumṛṁjan //7 //*
*uta smāsya tanyatoriva dyorṛghāyato abhiyujo bhayante /*
*yadā sahasramabhi ṣīmayodhīddurvartuḥ smā bhavati bhīma ṛṁjan //8 //*
*uta smāsya panayanti janā jūtiṁ kṛṣṭipro abhibhūtimāśoḥ /*
*utainamāhuḥ samithe viyantaḥ parā dadhikrā asaratsahasraiḥ //9 //*
*ā dadhikrāḥ śavasā paṁcha kṛṣṭīḥ sūryaiva jyotiṣāpastatāna /*
*sahasrasāḥ śatasā vājyarvā pṛṇaktu madhvā samimā vachāṁsi //10 //*

ऋ. (Rv.) ४.३९.१-६

आशुं दधिक्रां तमु नु ष्टवाम दिवस्पृथिव्या उत चर्किराम ।
उच्छन्तीर्मामुषसः सूदयन्त्वति विश्वानि दुरितानि पर्षन् ॥१॥
महश्चर्कर्म्यर्वतः क्रतुप्रा दधिक्राव्णः पुरुवारस्य वृष्णः ।
यं पुरुभ्यो दीदिवांसं नाग्निं ददथुर्मित्रावरुणा ततुरिम् ॥२॥
यो अश्वस्य दधिक्रावणो अकारीत्समिद्धे अग्ना उषसो व्युष्टौ ।
अनागसं तमदितिः कृणोतु स मित्रेण वरुणेना सजोषाः ॥३॥
दधिक्राव्ण इष ऊर्जो महो यदमन्महि मरुतां नाम भद्रम् ।
स्वस्तये वरुणं मित्रमग्निं हवामह इन्द्रं वज्रबाहुम् ॥४॥
इन्द्रमिवेदुभये वि ह्वयन्त उदीराणा यज्ञमुपप्रयन्तः ।
दधिक्रामु सूदनं मर्त्याय ददथुर्मित्रावरुणा नो अश्वम् ॥५॥
दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत्प्र ण आयूंषि तारिषत् ॥६॥

*āśuṁ dadhikrāṁ tamu nu ṣṭavāma divaspṛthivyā uta charkirāma /*
*uchchhantīrmāmuṣasaḥ sūdayantvati viśvāni duritāni parṣan //1 //*
*mahaścharkarmyarvataḥ kratuprā dadhikrāvṇaḥ puruvārasya vṛṣṇaḥ /*
*yaṁ purubhyo dīdivāṁsaṁ nāgiṁna dadathurmitrāvaruṇā taturim //2 //*
*yo aśvasya dadhikrāvaṇo akārītsamiddhe agnā uṣaso vyuṣṭau /*
*anāgasaṁ tamaditiḥ kṛṇotu sa mitreṇa varuṇenā sajoṣāḥ //3 //*
*dadhikrāvṇa iṣa ūrjo maho yadamanmahi marutāṁ nāma bhadram /*
*svastaye varuṇaṁ mitramagiṁna havāmaha indraṁ vajrabāhum //4 //*
*indramivedubhaye vi hvayanta udīrāṇā yajñamupaprayantaḥ /*
*dadhikrāmu sūdanaṁ martyāya dadathurmitrāvaruṇā no aśvam //5 //*
*dadhikrāvṇo akāriṣaṁ jiṣṇoraśvasya vājinaḥ /*
*surabhi no mukhā karatpra ṇa āyūṁṣi tāriṣat //6 //*

सा. (Sv.) ३५८

दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखा करत्प्र ण आयूंषि तारिषत्॥७॥
*dadhikrāvṇo akāriṣaṁ jiṣṇoraśvasya vājinaḥ / surabhi no mukhā karatpra ṇa āyūṁṣi tāriṣat //7 //*

२३. दधिक्रावा (Dadhikrāvā) - ऋ. (Rv.) ४.४०.१-४

दधिक्राव्ण इदु नु चर्किराम विश्वा इन्मामुषसः सूदयन्तु ।
अपामग्नेरुषसः सूर्यस्यबृहस्पतेरांगिरसस्य जिष्णोः ॥१॥
सत्वा भरिषो गविषो दुवन्यसच्छवस्यादिषु उषसस्तुरण्यसत् ।
सत्यो द्रवो द्रवरः पतङ्गरो दधिक्रावेषमूर्जं स्वर्जनत् ॥२॥
उत स्मास्य द्रवतस्तुरण्यतः पर्णं न वेरनु वाति प्रगर्धिनः ।
श्येनस्येव ध्रजतो अंकसं परि दधिक्राव्णः सहोर्जा तरित्रतः ॥३॥
उत स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्ष आसनि ।
क्रतुं दधिका अनु संतवीत्वत् पथामंकांस्यन्वापनीफणत् ॥४॥

*dadhikrāvṇa idu nu charkirāma viśvā inmāmuṣasaḥ sūdayantu ।*
*apāmagneruṣasaḥ sūryasyabṛhaspaterāṁgirasasya jiṣṇoḥ ॥1॥*
*satvā bhariṣo gaviṣo duvanyasachchhavasyādiṣu uṣasasturaṇyasat ।*
*satyo dravo dravaraḥ pataṅgaro dadhikrāveṣamūrjaṁ svarjanat ॥2॥*
*uta smāsya dravatasturaṇyataḥ parṇaṁ na veranu vāti pragardhinaḥ ।*
*śyenasyeva dhrajato aṁkasaṁ pari dadhikrāvṇaḥ sahorjā taritrataḥ ॥3॥*
*uta sya vājī kṣipaṇiṁ turaṇyati grīvāyāṁ baddho apikakṣa āsani ।*
*kratuṁ dadhrikā anu saṁtavītvat pathāmaṁkāṁsyanvāpanīphaṇat ॥4॥*

२४. द्यावापृथिवी (Dyāvāpṛthivī) - सा. (Sv.) ६२२; १५९६-१५९८

सा. (Sv.) ६२२

मन्ये वां द्यावापृथिवी सुभोजसौ ये अप्रथेथाममितमभि योजनम् ।
द्यावापृथिवी भवतं स्योने ते नो मुंचतमं हसः ॥८॥
*manye vāṁ dyāvāpṛthivī subhojasau ye aprathethāmamitamabhi yojanam ।*
*dyāvāpṛthivī bhavataṁ syone te no muṁchatamaṁ hasaḥ ॥8॥*

सा. (Sv.) १५९६-१५९८

प्र वां महि द्यवी अभ्युपस्तुतिं भरामहे। शुची उप प्रशस्तये ॥१॥
पुनाने तन्वा मिथः स्वेन दक्षेण राजथः। ऊह्याथे सनादृतम् ॥२॥
मही मित्रस्य साधथस्तरन्ती पिप्रती ऋतम्। परि यज्ञं निषेदथुः ॥३॥
*pra vāṁ mahi dyavī abhyupastutiṁ bharāmahe । śuchī upa praśastaye ॥1॥*
*punāne tanvā mithaḥ svena dakṣeṇa rājathaḥ । ūhyāthe sanādṛtam ॥2॥*
*mahī mitrasya sādhathastarantī pipratī ṛtam । pari yajñaṁ niṣedathuḥ ॥3॥*

२५. द्यावापृथिव्यौ (Dyāvāpṛthivyau) - ऋ. (Rv.) ४.३८.१; ४.५६.१-७

ऋ. (Rv.) ४.३८.१

उतो हि वां दात्रा सन्ति पूर्वा या पुरुभ्यस्त्रसदस्युर्नितोशे ।
क्षेत्रासां ददथुरुर्वरासां घनं दस्युभ्यो अभिभूतिमुग्रम् ॥१॥
*uto hi vāṁ dātrā santi pūrvā yā purubhyastrasadasyurnitośe ।*
*kṣetrāsāṁ dadathururvarāsāṁ ghanaṁ dasyubhyo abhibhūtimugram ॥1॥*

ऋ. (Rv.) ४.५६.१-७

मही द्यावापृथिवी इह ज्येष्ठे रुचा भवतां शुचयद्भिरर्कैः ।
यत्सीं वरिष्ठे बृहती विमिन्वन् रुवद्धोक्षा पप्रथानेभिरेवैः ॥१॥
देवी देवेभिर्यजते यजत्रैरमिनती तस्थतुरुक्षमाणे ।
ऋतावरी अद्रुहा देवपुत्रे यज्ञस्य नेत्री शुचयद्भिरर्कैः ॥२॥
स इत्स्वपा भुवनेष्वास य इमे द्यावापृथिवी जजान ।
उर्वी गभीरे रजसी सुमेके अवंशे धीरः शच्या समैरत् ॥३॥
नू रोदसी बृहद्भिर्नो वरूथैः पत्नीवद्भिरिषयन्ती सजोषाः ।
उरूची विश्वे यजते नि पातं धिया स्याम रथयः सदासाः ॥४॥
प्र वां महि द्यवी अभ्युपस्तुतिं भरामहे। शुची उप प्रशस्तये ॥५॥
पुनाने तन्वा मिथः स्वेन दक्षेण राजथः। ऊह्याथे सनादृतम् ॥६॥
मही मित्रस्य साधथस्तरन्ती पिप्रती ऋतम्। परि यज्ञं नि षेदथुः ॥७॥
*mahī dyāvāpṛthivī iha jyeṣthe ruchā bhavatāṁ śuchayadbhirarkaiḥ ।*
*yatsīṁ variṣṭhe bṛhatī viminvan ruvaddhokṣā paprathānebhirevaiḥ ॥1॥*
*devī devebhiryajate yajatrairaminatī tasthaturukṣamāṇe ।*
*ṛtāvarī adruhā devaputre yajñasya netrī śuchayadbhirarkaiḥ ॥2॥*
*sa itsvapā bhuvaneṣvāsa ya ime dyāvāpṛthivī jajāna ।*
*urvī gabhīre rajasī sumeke avaṁśe dhīraḥ śachyā samairat ॥3॥*
*nū rodasī bṛhadbhirno varūthaiḥ patnīvadbhiriṣayantī sajoṣāḥ ।*
*urūchī viśve yajate ni pātaṁ dhiyā syāma rathayaḥ sadāsāḥ ॥4॥*
*pra vāṁ mahi dyavī abhyupastutiṁ bharāmahe । śuchī upa praśastaye ॥5॥*
*punāne tanvā mithaḥ svena dakṣeṇa rājathaḥ । ūhyāthe sanādṛtam ॥6॥*

*mahī mitrasya sādhathastarantī pipratī ṛtam । pari yajñaṁ ni ṣedathuḥ ॥7॥*

२६. प्रजापतिः (Prajāpatiḥ) - सा. (Sv.) ६०२

मयि वर्चो अथो यशोऽथो यज्ञस्य यत्पयः । परमेष्ठी प्रजापतिर्दिवि द्यामिव दृंहतु ॥१॥
*mayi varcho atho yaśo'tho yajñasya yatpayaḥ । parameṣṭhī prajāpatirdivi dyāmiva dṛṁhatu ॥1॥*

२७. बृहस्पतिः (Bṛhaspatiḥ) - ऋ. (Rv.) ४.५०.१-९

यस्तस्तम्भ सहसा वि ज्मो अन्तान्बृहस्पतिस्त्रिषधस्थो रवेण ।
तं प्रत्नास ऋषयो दीध्यानाः पुरो विप्रा दधिरे मन्द्रजिह्वम् ॥१॥
धुनेतयः सुप्रकेतं मदन्तो बृहस्पते अभि ये नस्ततस्रे ।
पृषन्तं सृप्रमदब्धमूर्वं बृहस्पते रक्षतादस्य योनिम् ॥२॥
बृहस्पते या परमा परावदत आ त ऋतस्पृशो नि षेदुः ।
तुभ्यं खाता अवता अद्रिदुग्धा मध्वः श्चोतन्त्यभितो विरप्शम् ॥३॥
बृहस्पतिः प्रथमं जायमानो महो ज्योतिषः परमे व्योमन् ।
सप्तास्यस्तुविजातो रवेण वि सप्तरश्मिरधमत्तमांसि ॥४॥
स सुष्टुभा स ऋक्वता गणेन वलं रुरोज फलिगं रवेण ।
बृहस्पतिरुस्रिया हव्यसूदः कनिक्रदद्वावशतीरुदाजत् ॥५॥
एवा पित्रे विश्वदेवाय वृष्णे यज्ञैर्विधेम नमसा हविर्भिः ।
बृहस्पते सुप्रजा वीरवन्तो वयं स्याम पतयो रयीणाम् ॥६॥
स इद्राजा प्रतिजन्यानि विश्वा शुष्मेण तस्थावभि वीर्येण ।
बृहस्पतिं यः सुभृतं बिभर्ति वल्गूयति वन्दते पूर्वभाजम् ॥७॥
स इत्क्षेति सुधित ओकसि स्वे तस्मा इळा पिन्वते विश्वदानीम् ।
तस्मै विशः स्वयमेवा नमन्ते यस्मिन्ब्रह्मा राजनि पूर्व एति ॥८॥
अप्रतीतो जयति सं धनानि प्रतिजन्यान्युत या सजन्या ।
अवस्यवे यो वरिवः कृणोति ब्रह्मणे राजा तमवन्ति देवाः ॥९॥
*yastastambha sahasā vi jmo antānbṛhaspatistriṣadhastho raveṇa ।*
*taṁ pratnāsa ṛṣayo dīdhyānāḥ puro viprā dadhire mandrajihvam ॥1॥*
*dhunetayaḥ supraketaṁ madanto bṛhaspate abhi ye nastatasre ।*
*pṛṣantaṁ sṛpramadabdhamūrvaṁ bṛhaspate rakṣatādasya yonim ॥2॥*
*bṛhaspate yā paramā parāvadata ā ta ṛtaspṛśo ni ṣeduḥ ।*
*tubhyaṁ khātā avatā adridugdhā madhvaḥ śchetantyabhito virapśam ॥3॥*
*bṛhaspatiḥ prathamaṁ jāyamāno maho jyotiṣaḥ parame vyoman ।*
*saptāsyastuvijāto raveṇa vi saptaraśmiradhamattamāṁsi ॥4॥*
*sa suṣṭubhā sa ṛkvatā gaṇena valaṁ ruroja phaligaṁ raveṇa ।*
*bṛhaspatirusriyā havyasūdaḥ kanikradadvāvaśatīrudājat ॥5॥*
*evā pitre viśvadevāya vṛṣṇe yajñairvidhema namasā havirbhiḥ ।*
*bṛhaspate suprajā vīravanto vayaṁ syāma patayo rayīṇām ॥6॥*
*sa idrājā pratijanyāni viśvā śuṣmeṇa tasthāvabhi vīryeṇa ।*
*bṛhaspatiṁ yaḥ subhṛtaṁ bibharti valgūyati vandate pūrvabhājam ॥7॥*
*sa itkṣeti sudhita okasi sve tasmā iḻā pinvate viśvadānīm ।*
*tasmai viśaḥ svayamevā namante yasminbrahmā rājani pūrva eti ॥8॥*
*apratīto jayati saṁ dhanāni pratijanyānyuta yā sajanyā ।*
*avasyave yo varivaḥ kṛṇoti brahmaṇe rājā tamavanti devāḥ ॥9॥*

२८. रक्षोहाऽग्निः (Rakṣohā'gniḥ) - ऋ. (Rv.) ४.४.१-१५

कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन ।
तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः ॥१॥
तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता शोशुचानः ।
तपूंष्यग्ने जुह्वा पतंगानसंदितो वि सृज विष्वगुल्काः ॥२॥
प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः ।
यो नो दूरे अघशंसो यो अन्त्यग्ने माकिष्टे व्यथिरा दधर्षीत् ॥३॥

अदग्ने तिष्ठप्रत्या तनुष्व न्य१मित्राँ ओषतात्तिग्महेते ।
यो नो अरातिं समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम् ॥४॥
ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने ।
अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्र मृणीहि शत्रून् ॥५॥
स ते जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत् ।
विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो वि दुरो अभि द्यौत् ॥६॥
सेदग्ने अस्तु सुभगः सुदानुर्यस्त्वा नित्येन हविषा य उक्थैः ।
पिप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै सुदिना सासदिष्टिः ॥७॥
अर्चामि ते सुमतिं घेष्यर्वाक्सं ते वावाता जरतामियं गीः ।
स्वश्वास्त्वा सुरथा मर्जयेमास्मे क्षत्राणि धारयेरनु द्यून् ॥८॥
इह त्वा भूर्या चरेदुप त्मन्दोषावस्तर्दीदिवांस्मनु द्यून् ।
क्रीळन्तस्त्वा सुमनसः सपेमाभि द्युम्ना तस्थिवांसो जनानाम् ॥९॥
यस्त्वा स्वश्वः सुहिरण्यो अग्न उपयाति वसुमता रथेन ।
तस्य त्राता भवसि तस्य सखा यस्त आतिथ्यमानुषग्जुजोषत् ॥१०॥
महो रुजामि बन्धुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय ।
त्वं नो अस्य वचसश्चिकिद्धि होतर्यविष्ठ सुक्रतो दमूनाः ॥११॥
अस्वप्नजस्तरणयः सुशेवा अतन्द्रासोऽवृका अश्रमिष्ठा ।
ते पायवः सध्र्यंचो निषद्याग्ने तव नः पान्त्वमूर ॥१२॥
ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरितादरक्षन् ।
ररक्ष तान्त्सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो नाह देभुः ॥१३॥
त्वया वयं सधन्य१स्त्वोतास्तव प्रणीत्यश्याम वाजान् ।
उभा शंसा सूदय सत्यतातेऽनुष्ठुया कृणुह्यह्रयाण ॥१४॥
अया ते अग्ने समिधा विधेम प्रति स्तोमं शस्यमानं गृभाय ।
दहाशसो रक्षसः पाह्य१ स्मान्द्रुहो निदो मित्रमहो अवद्यात् ॥१५॥

*kṛṇuṣva pājaḥ prasitiṁ na pṛthvīṁ yāhi rājevāmavām̐ ibhena /*
*tṛṣvīmanu prasitiṁ druṇāno'stāsi vidhya rakṣasastapiṣṭhaiḥ //1 //*
*tava bhramāsa āśuyā patantyanu spṛśa dhṛṣatā śośuchānaḥ /*
*tapūṁṣyagne juhvā pataṁgānasaṁdito vi sṛja viṣvagulkāḥ //2 //*
*prati spaśo vi sṛja tūrṇitamo bhavā pāyurviśo asyā adabdhaḥ /*
*yo no dūre aghaśaṁso yo antyagne mākiṣṭe vyathirā dadharṣīt //3 //*
*adagne tiṣṭhapratyā tanuṣva nya1mitrām̐ oṣatāttigmahete /*
*yo no arātiṁ samidhāna chakre nīchā taṁ dhakṣayatasaṁ na śuṣkam //4 //*
*ūrdhvo bhava prati vidhyādhyasmadāviṣṇkṛṇuṣva daivyānyagne /*
*ava sthirā tanuhi yātujūnāṁ jāmimajāmiṁ pra mṛṇīhi śatrūn //5 //*
*sa te jānāti sumatiṁ yaviṣṭha ya īvate brahmaṇe gātumairat /*
*viśvānyasmai sudināni rāyo dyumnānyaryo vi duro abhi dyaut //6 //*
*sedagne astu subhagaḥ sudānuryastvā nityena haviṣā ya ukthaiḥ /*
*piprīṣati sva āyuṣi duroṇe viśvedasmai sudinā sāsadiṣṭiḥ //7 //*
*archāmi te sumatiṁ gheṣyarvāksaṁ te vāvātā jaratāmiyaṁ gīḥ /*
*svaśvāstvā surathā marjayemāsme kṣatrāṇi dhārayeranu dyūn //8 //*
*iha tvā bhūryā charedupa tmandoṣāvastardīdivāṁsmanu dyūn /*
*krīḷantastvā sumanasaḥ sapemābhi dyumnā tasthivāṁso janānām //9 //*
*yastvā svaśvaḥ suhiraṇyo agna upayāti vasumatā rathena /*
*tasya trātā bhavasi tasya sakhā yasta ātithyamānuṣagjujoṣat //10 //*
*maho rujāmi bandhutā vachobhistanmā piturgotamādanviyāya /*
*tvaṁ no asya vachasaśchikiddhi hotaryaviṣṭha sukrato damūnāḥ //11 //*
*asvapnajastaraṇayaḥ suśevā atandrāso'vṛkā aśramiṣṭhā /*
*te pāyavaḥ sadhryaṁcho niṣadyāgne tava naḥ pāntvamūra //12 //*
*ye pāyavo māmateyaṁ te agne paśyanto andhaṁ duritādarakṣan /*
*rarakṣa tāntsukṛto viśvavedā dipsanta idripavo nāha debhuḥ //13 //*
*tvayā vayaṁ sadhanya1stvotāstava praṇītyaśyāma vājān /*

*ubhā śaṁsā sūdaya satyatāte'nuṣṭhuyā kṛṇuhyahrayāṇa ॥14 ॥*
*ayā te agne samidhā vidhema prati stomaṁ śasyamānaṁ gṛbhāya ।*
*dahāśaso rakṣasaḥ pāhya1 smāndruho nido mitramaho avadyāt ॥15 ॥*

२९. रात्रिः (Rātriḥ) - सा. (Sv.) ६०८

आ प्रागाद्भद्रा युवतिरह्नः केतून्त्समीर्त्सति। अभूद्भद्रा निवेशनी विश्वस्य जगतो रात्री ॥७॥
*ā prāgādbhadrā yuvatirahnaḥ ketūntsamīrtsati । abhūdbhadrā niveśanī viśvasya jagato rātrī ॥7 ॥*

३०. लिंगोक्ता (साग्री. सास्वा.) द्यावापृथिवी इन्द्राबृहस्पतीभगश्च (सार्षेदी. पृ. ११२) (Liṁgoktā [Ssb. Sas.] Dyāvāpṛthivī Indrābṛhaspatībhagaścha [Sad. Pṛ. 112)) - सा. (Sv.) ६११

यशो मा द्यावापृथिवी यशो मेन्द्रबृहस्पती ।
यशो भगस्य विन्दतु यशो मा प्रतिमुच्यताम् ।
यशस्वया३स्याः संसदोऽहं प्रवहिता स्याम् ॥१०॥
*yaśo mā dyāvāpṛthivī yaśo mendrabṛhaspatī ।*
*yaśo bhagasya vindatu yaśo mā pratimuchyatām ।*
*yaśasvayā3syāḥ saṁsado'haṁ pravahitā syām ॥10 ॥*

३१. वायुः (Vāyuḥ) - ऋ. (Rv.) ४.४७.१; ४.४८.१-५; सा. (Sv.) १६२८

ऋ. (Rv.) ४.४७.१

वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु। आ याहि सोमपीतये स्पार्हो देव नियुत्वता ॥१॥
*vāyo śukro ayāmi te madhvo agraṁ diviṣṭiṣu । ā yāhi somapītaye spārho deva niyutvatā ॥1 ॥*

ऋ. (Rv.) ४.४८.१-५

विहि होत्रा अवीता विपो न रायो अर्यः। वायवा चन्द्रेण रथेन याहि सुतस्य पीतये ॥१॥
निर्युवाणो अशस्तीर्नियुत्वाँ इन्द्रसारथिः। वायवा चन्द्रेण रथेन याहि सुतस्य पीतये ॥२॥
अनु कृष्णे वसुधिति येमाते विश्वपेशसा। वायवा चन्द्रेण रथेन याहि सुतस्य पीतये ॥३॥
वहन्तु त्वा मनोयुजो युक्तासो नवतिर्नव। वायवा चन्द्रेण रथेन याहि सुतस्य पीतये ॥४॥
वायो शतं हरीणां युवस्य पोष्याणाम्। उत वा ते सहस्रिणो रथ आ यातु पाजसा ॥५॥
*vihi hotrā avītā vipo na rāyo aryaḥ । vāyavā chandreṇa rathena yāhi sutasya pītaye ॥1 ॥*
*niryuvāṇo aśastīrniyutvām̐ indrasārathiḥ ।*
*vāyavā chandreṇa rathena yāhi sutasya pītaye ॥2 ॥*
*anu kṛṣṇe vasudhiti yemāte viśvapeśasā ।*
*vāyavā chandreṇa rathena yāhi sutasya pītaye ॥3 ॥*
*vahantu tvā manoyujo yuktāso navatirnava ।*
*vāyavā chandreṇa rathena yāhi sutasya pītaye ॥4 ॥*
*vāyo śataṁ harīṇāṁ yuvasya poṣyāṇām । uta vā te sahasriṇo ratha ā yātu pājasā ॥5 ॥*

सा. (Sv.) १६२८

वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु। आ याहि सोमपीतये स्पार्हो देव नियुत्वता ॥९॥
*vāyo śukro ayāmi te madhvo agraṁ diviṣṭiṣu ।*
*ā yāhi somapītaye spārho deva niyutvatā ॥9 ॥*

३२. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) ४.५५.१-१०; सा. (Sv.) ५९१

ऋ. (Rv.) ४.५५.१-१०

को वस्त्राता वसवः को वरूता द्यावाभूमही अदिते त्रासीथां नः ।
सहीयसो वरुण मित्र मर्तात्को वोऽध्वरे वरिवो धाति देवाः ॥१॥
प्र ये धामानि पूर्व्याण्यर्चान्वि यदुच्छान्वियोतारो अमूराः ।
विधातारो वि ते दधुरजस्रा ऋतधीतयो रुरुचन्त दस्माः ॥२॥
प्र पस्त्या३मदितिं सिन्धुमर्कैः स्वस्तिमीळे सख्याय देवीम् ।
उभे यथा नो अहनी निपात उषासानक्ता करतामदब्धे ॥३॥
व्यर्यमा वरुणश्चेति पन्थामिषस्पतिः सुवितं गातुमग्निः ।
इन्द्राविष्णू नृवदु षु स्तवाना शर्म नो यन्तममवद्वरूथम् ॥४॥

आ पर्वतस्य मरुतामवांसि देवस्य त्रातुरव्रि भगस्य ।
पात्पतिर्जन्यादंहसो नो मित्रो मित्रियादुत न उरुष्येत् ॥५॥
नू रोदसी अहिना बुध्न्येन स्तुवीत देवी अप्येभिरिष्टैः ।
समुद्रं न संचरणे सनिष्यवो घर्मस्वरसो नद्यो३ अप व्रन् ॥६॥
देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन् ।
नहि मित्रस्य वरुणस्य धासिमर्हामसि प्रमियं सान्वग्नेः ॥७॥
अग्निरीशे वसव्यस्याग्निर्महः सौभगस्य। तान्यस्मभ्यं रासते ॥८॥
उषो मघोन्या वह सूनृते वार्या पुरु। अस्मभ्यं वाजिनीवति ॥९॥
तत्सु नः सविता भगो वरुणो मित्रो अर्यमा। इन्द्रो नो राधसा गमत् ॥१०॥
*ko vastrātā vasavaḥ ko varūtā dyāvābhūmahī adite trāsīthāṁ naḥ /*
*sahīyaso varuṇa mitra martātko vo'dhvare varivo dhāti devāḥ //1 //*
*pra ye dhāmāni pūrvyāṇyarchānvi yaduchchhānviyotāro amūrāḥ /*
*vidhātāro vi te dadhurajasrā ṛtadhītayo ruruchanta dasmāḥ //2 //*
*pra pastyā3maditiṁ sindhumarkaiḥ svastimīḻe sakhyāya devīm /*
*ubhe yathā no ahanī nipāta uṣāsānaktā karatāmadabdhe //3 //*
*vyaryamā varuṇaścheti panthāmiṣaspatiḥ suvitaṁ gātumagniḥ /*
*indrāviṣṇū nṛvadu ṣu stavānā śarma no yantamamavadvarūtham //4 //*
*ā parvatasya marutāmavāṁsi devasya trāturavri bhagasya /*
*pātpatirjanyādaṁhaso no mitro mitriyāduta na uruṣyet //5 //*
*nū rodasī ahinā budhnyena stuvīta devī apyebhiriṣṭaiḥ /*
*samudraṁ na saṁcharaṇe saniṣyavo gharmasvaraso nadyo3 apa vran //6 //*
*devairno devyaditirni pātu devastrātā trāyatāmaprayuchchhan /*
*nahi mitrasya varuṇasya dhāsimarhāmasi pramiyaṁ sānvagneḥ //7 //*
*agnirīśe vasavyasyāgnirmahaḥ saubhagasya / tānyasmabhyaṁ rāsate //8 //*
*uṣo maghonyā vaha sūnṛte vāryā puru / asmabhyaṁ vājinīvati //9 //*
*tatsu naḥ savitā bhago varuṇo mitro aryamā / indro no rādhasā gamat //10 //*

सा. (Sv.) ५९१

इमं वृषणं कृणुतैकमिन्माम् ॥६॥
*imaṁ vṛṣaṇaṁ kṛṇutaikaminmām //6 //*

३३. वैश्वानरः (Vaiśvānaraḥ) - ऋ. (Rv.) ४.५.१-१५

वैश्वानराय मीळ्हुषे सजोषाः कथा दाशेमाग्नये बृहद्भाः ।
अनूनेन बृहता वक्षथेनोप स्तभायदुपमिन्न रोधः ॥१॥
मा निन्दत य इमां मह्यं रातिं देवो ददौ मर्त्याय स्वधावान् ।
पाकाय गृत्सो अमृतो विचेता वैश्वानरो नृतमो यह्वो अग्निः ॥२॥
साम द्विबर्हा महि तिग्मभृष्टिः सहस्ररेता वृषभस्तुविष्मान् ।
पदं न गोरपगूळ्हं विविद्वानग्निर्मह्यं प्रेदु वोचन्मनीषाम् ॥३॥
प्र ताँ अग्निर्बभसत्तिग्मजम्भस्तपिष्ठेन शोचिषा यः सुराधाः ।
प्र ये मिनन्ति वरुणस्य धाम प्रिया मित्रस्य चेततो ध्रुवाणि ॥४॥
अभ्रातरो न योषणो व्यन्तः पतिरिपो न जनयो दुरेवाः ।
पापासः सन्तो अनृता असत्या इदं पदमजनता गभीरम् ॥५॥
इदं मे अग्ने कियते पावकामिनते गुरुं भारं न मन्म ।
बृहद्दधाथ धृषता गभीरं यह्वं पृष्ठं प्रयसा सप्तधातु ॥६॥
तमिन्न्वे३व समना समानमभि क्रत्वा पुनती धीतिरश्याः ।
ससस्य चर्मन्नधि चारु पृश्नेरग्रे रुप आरुपितं जबारु ॥७॥
प्रवाच्यं वचसः किं मे अस्य गुहा हितमुप निणिग्वदन्ति ।
यदुस्रियाणामप वारिव व्रन्पाति प्रियं रुपो अग्रं पदं वेः ॥८॥
इदमु त्यन्महि महामनीकं यदुस्रिया सचत पूर्व्यं गौः ।
ऋतस्य पदे अधि दीद्यानं गुहा रघुष्यद्रघुयद्विवेद ॥९॥
अध द्युतानः पित्रो सचासामनुत गुह्यं चारु पृश्नेः ।

मातुष्पदे परमे अन्ति षद् गोर्वृष्णः शोचिषः प्रयतस्य जिह्वा ॥१०॥
ऋतं वोचे नमसा पृच्छ्यमानस्तवाशसा जातवेदो यदीदम् ।
त्वमस्य क्षयसि यद्ध विश्वं दिवि यदु द्रविणं यत्पृथिव्याम् ॥११॥
किं नो अस्य द्रविणं कद्ध रत्नं वि नो वोचो जातवेदश्चिकित्वान् ।
गुहाध्वनः परमं यन्नो अस्य रेकु पदं न निदाना अगन्म ॥१२॥
का मर्यादा वयुना कद्ध वाममच्छा गमेम रघवो न वाजम् ।
कदा नो देवीरमृतस्य पत्नीः सूरो वर्णेन ततनन्नुषासः ॥१३॥
अनिरेण वचसा फल्ग्वेन प्रतीत्येन कृधुनातृपासः ।
अधा ते अग्ने किमिहा वदन्त्यनायुधास आसता सचन्ताम् ॥१४॥
अस्य श्रिये समिधानस्य वृष्णो वसोरनीकं दम आ रुरोच ।
रुशद्वसानः सुदृशीकरूपः क्षितिर्न राया पुरुवारो अद्यौत् ॥१५॥

*vaiśvānarāya mīḻhuṣe sajoṣāḥ kathā dāśemāgnaye bṛhadbhāḥ ।*
*anūnena bṛhatā vakṣathenopa stabhāyadupaminna rodhaḥ ॥1॥*
*mā nindata ya imāṁ mahyaṁ rātiṁ devo dadau martyāya svadhāvān ।*
*pākāya gṛtso amṛto vichetā vaiśvānaro nṛtamo yahvo agniḥ ॥2॥*
*sāma dvibarhā mahi tigmabhṛṣṭiḥ sahasraretā vṛṣabhastuviṣmān ।*
*padaṁ na gorapagūḻhaṁ vividvānagnirmahyaṁ predu vochanmanīṣām ॥3॥*
*pra tām̐ agnirbabhasattigmajmbhastapiṣṭhena śochiṣā yaḥ surādhāḥ ।*
*pra ye minanti varuṇasya dhāma priyā mitrasya chetato dhruvāṇi ॥4॥*
*abhrātaro na yoṣaṇo vyantaḥ patiripo na janayo durevāḥ ।*
*pāpāsaḥ santo anṛtā asatyā idaṁ padamajanatā gabhīram ॥5॥*
*idaṁ me agne kiyate pāvakāminate guruṁ bhāraṁ na manma ।*
*bṛhaddadhātha dhṛṣatā gabhīraṁ yahvaṁ pṛṣṭhaṁ prayasā saptadhātu ॥6॥*
*taminnve3va samanā samānamabhi kratvā punatī dhītiraśyāḥ ।*
*sasasya charmannadhi chāru pṛśneragre rupa ārupitaṁ jabāru ॥7॥*
*pravāchyaṁ vachasaḥ kiṁ me asya guhā hitamupa niṇigvadanti ।*
*yadusriyāṇāmapa vāriva vranpāti priyaṁ rupo agraṁ padaṁ veḥ ॥8॥*
*idamu tyanmahi mahāmanīkaṁ yadusriyā sachata pūrvyaṁ gauḥ ।*
*ṛtasya pade adhi dīdyānaṁ guhā raghuṣyadraghuyadviveda ॥9॥*
*adha dyutānaḥ pitro sachāsāmanuta guhyaṁ chāru pṛśneḥ ।*
*mātuṣpade parame anti ṣad gorvṛṣṇaḥ śochiṣaḥ prayatasya jihvā ॥10॥*
*ṛtaṁ voche namasā pṛchchhyamānastavāśasā jātavedo yadīdam ।*
*tvamasya kṣayasi yaddha viśvaṁ divi yadu draviṇaṁ yatpṛthivyām ॥11॥*
*kiṁ no asya draviṇaṁ kaddha ratnaṁ vi no vocho jātavedaśchikitvān ।*
*guhādhvanaḥ paramaṁ yanno asya reku padaṁ na nidānā aganma ॥12॥*
*kā maryādā vayunā kaddha vāmamachchhā gamema raghavo na vājam ।*
*kadā no devīramṛtasya patnīḥ sūro varṇena tatanannuṣāsaḥ ॥13॥*
*anireṇa vachasā phalgvena pratītyena kṛdhunātṛpāsaḥ ।*
*adhā te agne kimihā vadantyanāyudhāsa āsatā sachantām ॥14॥*
*asya śriye samidhānasya vṛṣṇo vasoranīkaṁ dama ā rurocha ।*
*ruśadvasānaḥ sṛdṛśīkarūpaḥ kṣitirna rāyā puruvāro adyaut ॥15॥*

३४. शुनाशीरौ (Śunāśīrau) - ऋ. (Rv.) ४.५७.५; ८

ऋ. (Rv.) ४.५७.५

शुनासीराविमां वाचं जुषेथां यद्दिवि चक्रथुः पयः। तेनेमामुप सिंचतम् ॥५॥
*śunāsīrāvimāṁ vāchaṁ juṣethāṁ yaddivi chakrathuḥ payaḥ । tenemāmupa siṁchatam ॥5॥*

ऋ. (Rv.) ४.५७.८

शुनं नः फाला वि कृषन्तु भूमिं शुनं कीनाशा अभि यन्तु वाहैः ।
शुनं पर्जन्यो मधुना पयोभिः शुनासीरा शुनमस्मासु धत्तम् ॥८॥
*śunaṁ naḥ phālā vi kṛṣantu bhūmiṁ śunaṁ kīnāśā abhi yantu vāhaiḥ ।*
*śunaṁ parjanyo madhunā payobhiḥ śunāsīrā śunamasmāsu dhattam ॥8॥*

३५. शूनः (Śūnaḥ) - ऋ. (Rv.) ४.५७.४

शुनं वाहाः शुनं नरः शुनं कृषतु लांगलम् ।
शुनं वरत्रा बध्यन्तां शुनमष्ट्रामुदिंगय ॥४॥
*śunaṁ vāhāḥ śunaṁ naraḥ śunaṁ kṛṣatu lāṁgalam /*
*śunaṁ varatrā badhyantāṁ śunamaṣṭrāmudiṁgaya //4 //*

३६. सविता (Savitā) - ऋ. (Rv.) ४.५४.१-६

अभूद्देवः सविता वन्द्यो नु नु इदानीमह्न उपवाच्यो नृभिः ।
वि यो रत्ना भजति मानवेभ्यः श्रेष्ठं नो अत्र द्रविणं यथा दधत् ॥१॥
देवेभ्यो हि प्रथमं यज्ञियेभ्योऽमृतत्वं सुवसि भागमुत्तमम् ।
आदिद्दामानं सवितर्व्यूर्णुषेऽनूचीना जीविता मानुषेभ्यः ॥२॥
अचित्ती यच्चकृमा दैव्ये जने दीनैर्दक्षैः प्रभूती पूरुषत्वता ।
देवेषु च सवितर्मानुषेषु च त्वं नो अत्र सुवतादनागसः ॥३॥
न प्रमिये सवितुर्दैव्यस्य तद्यथा विश्वं भुवनं धारयिष्यति ।
यत्पृथिव्या वरिमन्ना स्वङ्गुरिर्वर्ष्मन्दिवः सुवति सत्यमस्य तत् ॥४॥
इन्द्रजयेष्ठान् बृहद्भ्यः पर्वतेभ्यः क्षयाँ एभ्यः सुवसि पस्त्यावतः ।
यथायथा पतयन्तो बियेमिर एवैव तस्थुः सवितः सवाय ते ॥५॥
ये ते त्रिरहन्त्सवितः सवासो दिवेदिवे सौभगमासुवन्ति ।
इन्द्रो द्यावापृथिवी सिन्धुरद्भिरादित्यैनो अदितिः शर्म यंसत् ॥६॥
*abhūddevaḥ savitā vandyo nu nu idānīmahna upavāchyo nṛbhiḥ /*
*vi yo ratnā bhajati mānavebhyaḥ śreṣṭhaṁ no atra draviṇaṁ yathā dadhat //1 //*
*devebhyo hi prathamaṁ yajñiyebhyo'mṛtatvaṁ suvasi bhāgamuttamam /*
*ādiddāmānaṁ savitarvyūrṇuṣe'nūchīnā jīvitā mānuṣebhyaḥ //2 //*
*achittī yachchakṛmā daivye jane dīnairdakṣaiḥ prabhūtī pūruṣatvatā /*
*deveṣu cha savitarmānuṣeṣu cha tvaṁ no atra suvatādanāgasaḥ //3 //*
*na pramiye saviturdaivyasya tadyathā viśvaṁ bhuvanaṁ dhārayiṣyati /*
*yatpṛthivyā varimannā svaṅgurirvarṣmandivaḥ suvati satyamasya tat //4 //*
*indrajayeṣṭhān bṛhadbhyaḥ parvatebhyaḥ kṣayāṁ ebhyaḥ suvasi pastyāvataḥ /*
*yathāyathā patayanto biyemira evaiva tasthuḥ savitaḥ savāya te //5 //*
*ye te trirahantsavitaḥ savāso divedive saubhagamāsuvanti /*
*indro dyāvāpṛthivī sindhuradbhirādityaino aditiḥ śarma yaṁsat //6 //*

३७. सीता (Sītā) - ऋ. (Rv.) ४.५७.६-७

अर्वाची सुभगे भव सीते वन्दामहे त्वा ।
यथा नः सुभगाससि यथा नः सुफलाससि ॥६॥
इन्द्रः सीतां नि गृह्णातु तां पूषानु यच्छतु ।
सा नः पयस्वती दुहामुत्तरामुत्तरां समाम् ॥७॥
*arvāchī subhage bhava sīte vandāmahe tvā /*
*yathā naḥ subhagāsasi yathā naḥ suphalāsasi //6 //*
*indraḥ sītāṁ ni gṛhṇātu tāṁ pūṣānu yachchhatu /*
*sā naḥ payasvatī duhāmuttarāmuttarāṁ samām //7 //*

३८. सूर्यः (Sūryaḥ) - ऋ. (Rv.) ४.४०.५

हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतम् ॥५॥
*haṁsaḥ śuchiṣadvasurantarikṣasaddhotā vediṣadatithirduroṇasat /*
*nṛṣadvarasadṛtasadvyomasadabjā gojā ṛtajā adrijā ṛtam //5 //*

**५८१. वामदेवो गौतमः (साग्री. सास्वा.); वामदेवः विश्वामित्र इत्येके (सार्षेदी.) (Vāmadevo Gautamaḥ [Ssb. Sas.]; Vāmadevaḥ Viśvāmitra Ityeke [Sad.])**

१. इन्द्रः (Indraḥ) - सा. (Sv.) २९४

इम इन्द्र मदाय ते सोमाश्चिकित्र उक्थिनः ।

मधोः पपान उप नो गिरः शृणु रास्व स्तोत्राय गिर्वणः ॥२॥
*ima indra madāya te somāśchikitra ukthinaḥ /*
*madhoḥ papāna upa no giraḥ śṛṇu rāsva stotrāya girvaṇaḥ //2 //*

**५८२. वामदेवो गौतमः (साग्री. सास्वा. सार्षेदी.); यमो वैवस्वती (ऋसर्व. १०.१०.१) (Vāmadevo Gautamaḥ [Ssb. Sas. Sad.]; Yamo Vaivasvatī [Rss. 10.10.1])**

१. इन्द्रः (साग्री. सास्वा.) यमो वैवस्वतः (ऋसर्व.) (Indraḥ [Ssb. Sas.] Yamo Vaivasvataḥ [Rss.)) - ऋ. (Rv.) १०.१०.१; ३; ५-७; ११; १३; सा. (Sv.) ३४०

ऋ. (Rv.) १०.१०.१

ओ चित्सखायं सख्या ववृत्यां तिरः पुरू चिदर्णवं जगन्वान् ।
पितुर्नपातमा दधीत वेधा अधि क्षमि प्रतरं दीध्यानः ॥१॥
*o chitsakhāyaṁ sakhyā vavṛtyāṁ tiraḥ purū chidarṇavaṁ jaganvān /*
*piturnapātamā dadhīta vedhā adhi kṣami prataraṁ dīdhyānaḥ //1 //*

ऋ. (Rv.) १०.१०.३

उशन्ति घा ते अमृतास एतदेकस्य चित्त्यजसं मर्त्यस्य ।
नि ते मनो मनसि धाय्यस्मे जन्युः पतिस्तन्व१मा विविश्याः ॥३॥
*uśanti ghā te amṛtāsa etadekasya chittyajasaṁ martyasya /*
*ni te mano manasi dhāyyasme janyuḥ patistanva1mā viviśyāḥ //3 //*

ऋ. (Rv.) १०.१०.५-७

गर्भे नु नौ जनिता दम्पती कर्देवस्त्वष्टा सविता विश्वरूपः ।
नाकिरस्य प्र मिनन्ति व्रतानि वेद नावस्य पृथिवी उत द्यौः ॥५॥
को अस्य वेद प्रथमस्याह्नः क ईं ददर्श क इह प्र वोचत् ।
बृहन्मित्रस्य वरुणस्य धाम कदु ब्रव आहनो वीच्या नॄन् ॥६॥
यमस्य मा यम्यं१ काम आगन्त्समाने योनौ सहशेय्याय ।
जायेव पत्ये तन्वं रिरिच्यां वि चिद्वृहेव रथ्येव चक्रा ॥७॥
*garbhe nu nau janitā dampatī kardevastvaṣṭā savitā viśvarūpaḥ /*
*nākirasya pra minanti vratāni veda nāvasya pṛthivī uta dyauḥ //5 //*
*ko asya veda prathamasyāhnaḥ ka īṁ dadarśa ka iha pra vochat /*
*bṛhanmitrasya varuṇasya dhāma kadu brava āhano vīchyā nṛn //6 //*
*yamasya mā yamyaṁ1 kāma āgantsamāne yonau sahaśeyyāya /*
*jāyeva patye tanvaṁ ririchyāṁ vi chidvṛheva rathyeva chakrā //7 //*

ऋ. (Rv.) १०.१०.११

किं भ्रातासद्यदनाथं भवाति किमु स्वसा यन्निर्ऋतिर्निगच्छात् ।
काममूता बह्वे३ तद्रपामि तन्वा मे तन्वं१ सं पिपृग्धि ॥११॥
*kiṁ bhrātāsadyadanāthaṁ bhavāti kimu svasā yannirṛtirnigachchhāt /*
*kāmamūtā bahve3 tadrapāmi tanvā me tanvaṁ1 saṁ pipṛgdhi //11 //*

ऋ. (Rv.) १०.१०.१३

बतो बतासि यम नैव ते मनो हृदयं चाविदाम ।
अन्या किल त्वं कक्ष्येव युक्तं परि ष्वजाते लिबुजेव वृक्ष्म् ॥१३॥
*bato batāsi yama naiva te mano hṛdayaṁ chāvidāma /*
*anyā kila tvaṁ kakṣayeva yuktaṁ pari ṣvajāte libujeva vṛkṣam //13 //*

सा. (Sv.) ३४०

आ त्वा सखायः ववृत्युस्तिरः पुरू चिदर्णवां जगम्याः ।
पितुर्नपातमा दधीत वेधा अस्मिन्क्षये प्रतरां दीद्यानः ॥९॥
*ā tvā sakhāyaḥ vavṛtyustiraḥ purū chidarṇavāṁ jagamyāḥ /*
*piturnapātamā dadhīta vedhā asminkṣaye pratarāṁ dīdyānaḥ //9 //*

**५८३. वामदेवः गौतमः (साग्री. सार्षेदी.); यमोवैवस्वतः (ऋसर्व.) (Vāmadevaḥ Gautamaḥ [Ssb. Sad.]; Yamovaivasvataḥ [Rss.])**

१. इन्द्रः (साग्री. सार्षेदी.) यमीवैवस्वती (ऋसर्व.) (Indraḥ [Ssb. Sad.] Yamīvaivasvatī [Rss.)) - ऋ. (Rv.) १०.१०.२; ४; ८-१०; १२; १४

ऋ. (Rv.) १०.१०.२

न ते सखा सख्यं वष्टयेतत्सलक्ष्मा यदिषुरूपा भवाति ।
महस्पुत्रासो असुरस्य वीरा दिवो धर्तार उर्विया परि ख्यन् ॥२॥
*na te sakhā sakhyaṁ vaṣṭayetatsalakṣamā yadiṣurūpā bhavāti /*
*mahasputrāso asurasya vīrā divo dhartāra urviyā pari khyan //2 //*

ऋ. (Rv.) १०.१०.४

न यत्पुरा चकृमा कद्ध नूनमृता वदन्तो अनृतं रपेम ।
गन्धर्वो अप्स्वप्या च योषा सा नो नाभिः परमं जामि तन्नौ ॥४॥
*na yatpurā chakṛmā kaddha nūnamṛtā vadanto anṛtaṁ rapema /*
*gandharvo apsvapyā cha yoṣā sā no nābhiḥ paramaṁ jāmi tannau //4 //*

ऋ. (Rv.) १०.१०.८-१०

न तिष्ठन्ति न नि मिषन्त्येते देवानां स्पश इह ये चरन्ति ।
अन्येन मदाहनो याहि तूयं तेन वि वृह रथ्येव चक्रा ॥८॥
रात्रीभिरस्मा अहभिर्दशस्येत्सूर्यस्य चक्षुर्मुहुरुन्मिमीयात् ।
दिवा पृथिव्या मिथुना सबन्धू यमीर्यमस्य बिभृयादजामि ॥९॥
आ घा ता गच्छानुत्तरा युगानि यत्र जामयः कृणवन्नजामि ।
उप बर्बृहि वृषभाय बाहुमन्यमिच्छस्व सुभगे पतिं मत् ॥१०॥
*na tiṣṭhanti na ni miṣantyete devānāṁ spaśa iha ye charanti /*
*anyena madāhano yāhi tūyaṁ tena vi vṛha rathyeva chakrā //8 //*
*rātrībhirasmā ahabhirdaśasyetsūryasya chakṣurmuhurunmimīyāt /*
*divā pṛthivyā mithunā sabandhū yamīryamasya bibhṛyādajāmi //9 //*
*ā ghā tā gachchhānuttarā yugāni yatra jāmayaḥ kṛṇavannajāmi /*
*upa barbṛhi vṛṣabhāya bāhumanyamichchhasva subhage patiṁ mat //10 //*

ऋ. (Rv.) १०.१०.१२

न वा उ ते तन्वा तन्वं१ सं पपृच्यां पापमाहुर्यः स्वसारं निगच्छात् ।
अन्येन मत्प्रमुदः कल्पयस्व न ते भ्राता सुभगे वष्ट्येतत् ॥१२॥
*na vā u te tanvā tanvaṁ1 saṁ papṛchyāṁ pāpamāhuryaḥ svasāraṁ nigachchhāt /*
*anyena matpramudaḥ kalpayasva na te bhrātā subhage vaṣṭyetat //12 //*

ऋ. (Rv.) १०.१०.१४

अन्यम् षु त्वं यम्यन्य उ त्वां परि ष्वजाते लिबुजेव वृक्षम् ।
तस्य वा त्वं मन इच्छा स वा त्वाधा कृणुष्व संविदं सुभद्राम् ॥१४॥
*anyam ṣu tvaṁ yamyanya u tvāṁ pari ṣvajāte libujeva vṛkṣam /*
*tasya vā tvaṁ mana ichchhā sa vā tvādhā kṛṇuṣva saṁvidaṁ subhadrām //14 //*

**५८४. वामदेवो गौतमः (साग्री. सास्वा. ऋसर्व. ४.१०.१); अग्निः (सार्षेदी.) (Vāmadevo Gautamaḥ [Ssb. Sas. Rss. 4.10.1]; Agniḥ [Sad.])**

१. अग्निः (Agniḥ) - सा. (Sv.) ४३४

अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रं हृदिस्पृशम्। ऋध्यामा त ओहैः ॥८॥
*agne tamadyāśvaṁ na stomaiḥ kratuṁ na bhadraṁ hṛdispṛśam / ṛdhyāmā ta ohaiḥ //8 //*

**५८५. वामदेवो गौतमः (साग्री. सास्वा.); इन्द्राणी (सार्षेदी.) (Vāmadevo Gautamaḥ [Ssb. Sas.]; Indrāṇī [Sad.])**

१. इन्द्रः (Indraḥ) - सा. (Sv.) ३६१

कश्यपस्य स्वर्विदो यावाहुः सयुजाविति। ययोर्विश्वमपि व्रतं यज्ञं धीरा निचाय्य ॥२॥
*kaśyapasya svarvido yāvāhuḥ sayujāviti / yayorviśvamapi vrataṁ yajñaṁ dhīrā nichāyya //2 //*

**५८६. वामदेवः (सा.अजमेर); ऋण त्रसदस्य (सास्वा.) (Vāmadevaḥ [Sv. Ajmer]; Ṛṇa Trasadasya [Sas.])**

१. वाजिनः (Vājinaḥ) - सा. (Sv.) ४३५

आविर्मर्या आ वाजं वाजिनो अग्मं देवस्य सवितुः सवम्। स्वर्गां अर्वन्तो जयत ॥९॥
*āvirmaryā ā vājaṁ vājino agmaṁ devasya savituḥ savam | svargāṁ arvanto jayata ||9 ||*

**५८७. वामदेवः काश्यपः असितो देवलो वा (साग्री.); वामदेवः (सार्षेदी.) (Vāmadevaḥ Kāśyapaḥ Asito Devalo Vā [Ssb.]; Vāmadevaḥ [Sad.])**

१. अंगिराः (Aṁgirāḥ) - सा. (Sv.) ९३

राये अग्ने महे त्वा दानाय समिधीमहि। ईडिष्वा हि महे वृषं द्यावा होत्राय पृथिवी ॥३॥
*rāye agne mahe tvā dānāya samidhīmahi | īḍiṣvā hi mahe vṛṣaṁ dyāvā hotrāya pṛthivī ||3 ||*

**५८८. वामदेवः कश्यपो वा मारीचो मनुर् वा वैवस्वतः उभौ वा (साग्री. सास्वा.); वामदेवः (सार्षेदी.) (Vāmadevaḥ Kaśyapo Vā Mārīcho Manur Vā Vaivasvataḥ Ubhau Vā [Ssb. Sas.]; Vāmadevaḥ [Sad.])**

१. अग्निः (Agniḥ) - सा. (Sv.) ९०

जातः परेण धर्मणा यत्सवृद्भिः सहाभुवः। पिता यत्कश्यपस्याग्निः श्रद्धा माता मनुः कविः ॥१०॥
*jātaḥ pareṇa dharmaṇā yatsavṛdbhiḥ sahābhuvaḥ | pitā yatkaśyapasyāgniḥ śraddhā mātā manuḥ kaviḥ ||10 ||*

**५८९. वामदेवो गौतमः शाकपूतो वा (साग्री. सास्वा.); वामदेवो गौतमः (सार्षेदी.) (Vāmadevo Gautamaḥ Śākapūto Vā [Ssb. Sas.]; Vāmadevo Gautamaḥ [Sad.])**

१. इन्द्रः (Indraḥ) - सा. (Sv.) ३५३

आ नो वयो वयःशयं महान्तं गह्वरेष्ठाम्। महान्तं पूर्विणेष्ठामुग्रं वचो अपावधीः ॥२॥
*ā no vayo vayaḥśayaṁ mahāntaṁ gahvareṣṭhām | mahāntaṁ pūrviṇeṣṭhāmugraṁ vacho apāvadhīḥ ||2 ||*

**५९०. वारुणिः (Vāruṇiḥ)**

१. अग्निः (Agniḥ) - य. (Yv.) ११.७२

परमस्याः परावतो रोहिदश्वऽइहागहि। पुरीष्यः पुरुप्रियोऽग्ने त्वं तरा मुधः ॥७२॥
*paramasyāḥ parāvato rohidaśva'ihāgahi | purīṣyaḥ purupriyo'gne tvaṁ tarā mudhaḥ ||72 ||*

**५९१. वारुणः सत्यधृतिः - द्र. सत्यधृतिर् वारुणिः (Vāruṇaḥ Satyadhṛtiḥ - See Satyadhṛtir Vāruṇiḥ)**

**५९२. विदर्भिः (Vidarbhiḥ)**

१. अग्निः (Agniḥ) - य. (Yv.) २०.७८; ७९

यस्मिन्नश्वासऽऋषभासऽउक्षणो वशा मेषाऽअवसृष्टासऽआहुताः ।
कीलालपे सोमपृष्ठाय वेधसे हृदा मतिं जनय चारुमग्नये ॥७८॥
अहाव्यग्ने हविरास्ये ते स्रुचीव घृतं चम्वीव सोमः ।
वाजसनिं रयिमस्मे सुवीरं प्रशस्तं धेहि यशसं बृहन्तम् ॥७९॥
*yasminnaśvāsa'ṛpabhāsa'ukṣaṇo vaśā meṣā'avasṛṣṭāsa'āhutāḥ |*
*kīlālape somapṛṣṭhāya vedhase hṛdā matiṁ janaya chārumagnaye ||78 ||*
*ahāvyagne havirāsye te sruchīva ghṛtaṁ chamvīva somaḥ |*
*vājasaniṁ rayimasme suvīraṁ praśastaṁ dhehi yaśasaṁ bṛhantam ||79 ||*

२. अश्विसरस्वतीन्द्राः (Aśvisarasvatīndrāḥ) - य. (Yv.) २०.५५-६९; ७३-७७; ८०

य. (Yv.) २०.५५-६९

समिद्धोऽअग्निरश्विना तप्तो घर्मो विराट् सुतः। दुहे धेनुः सरस्वती सोमं शुक्रमि हेन्द्रियम्।५५॥
तनूपा भिषजा सुतेऽश्विनोभा सरस्वती। मध्वा रजांसीन्द्रियमिन्द्राय पथिभिर्वहान् ॥५६॥

इन्द्रायेन्दुं सरस्वती नराशंसेन नग्नहुम्। अधातामश्विना मधु भेषजं भिषजा सुते ॥५७॥
आजुह्वााना सरस्वतीन्द्रायेन्द्रिाणि वीर्यम्। इडाभिरश्विनाविषं समूर्जं सं रयिं दधुः ॥५८॥
अश्विना नमुचेः सुतं सोमं शुक्रं परिस्रुता। सरस्वती तमा भरद् बर्हिषेन्द्राय पातवे ॥५९॥
कवष्यो न व्यचस्वतीरश्विभ्यां न दुरो दिशः। इन्द्रो न रोदसीऽउभे दुहे कामान्त्सरस्वती॥६०॥
उषासानक्तमाश्विना दिवेन्द्रं सायमिन्द्रियैः। संजानाने सुपेशसा समंजाते सरस्वत्या ॥६१॥
पातं नोऽअश्विना दिवा पाहि नक्तं सरस्वति। दैव्या होतारा भिषजा पातमिन्द्रं सचा सुते।६२॥
तिस्रस्त्रेधा सरस्वत्यश्विना भारतीडा। तीव्रं परिस्रुता सोममिन्द्राय सुषुवुर्मदम् ॥६३॥
अश्विना भेषजं मधु भेषजं नः सरस्वती। इन्द्रे त्वष्टा यशः श्रियं रूपं रूपमधुः सुते ॥६४॥
ऋतुथेन्द्रो वनस्पतिः शश्मानः परिस्रुता। कीलालमश्विभ्यां मधु दुहे धेनुः सरस्वती ॥६५॥
गोभिर्न सोममश्विना मासरेण परिस्रुता। समधातं सरस्वत्या स्वाहेन्द्रे सुतं मधु ॥६६॥
अश्विना हविरिन्द्रियं नमुचेर्धिया सरस्वती। आ शुक्रमासुराद्वसु मघमिन्द्राय जभ्रिरे ॥६७॥
यमश्विना सरस्वती हविषेन्द्रमवर्द्धयन्। स बिभेद बलं मघं न मुचावासुरे सचा ॥६८॥
तमिन्द्रं पशवः सचाश्विनोभा सरस्वती। दधानाऽअभ्यनूषत हविषा यज्ञऽइन्द्रियैः ॥६९॥

*samiddho'agniriśvanā tapto gharmo virāṭ sutaḥ /*
*duhe dhenuḥ sarasvatī somaṁ śukrami hendriyam /55 //*
*tanūpā bhiṣajā sute'śvinobhā sarasvatī /*
*madhvā rajāṁsīndriyamindrāya pathibhirvahān //56 //*
*indrāyenduṁ sarasvatī narāśaṁsena nagnahum /*
*adhātāmaśvinā madhu bheṣajaṁ bhiṣajā sute //57 //*
*ājuhvāānā sarasvatīndrāyendriāṇi vīryam /*
*iḍābhiraśvināviṣaṁ samūrjaṁ saṁ rayiṁ dadhuḥ //58 //*
*aśvinā namucheḥ sutaṁ somaṁ śukraṁ parisrutā /*
*sarasvatī tamā bharad barhiṣendrāya pātave //59 //*
*kavaṣyo na vyachasvatīraśvibhyāṁ na duro diśaḥ /*
*indro na rodasī'ubhe duhe kāmāntsarasvatī //60 //*
*uṣāsānaktamāśvinā divendraṁ sāyamindriyaiḥ /*
*saṁjānāne supeśasā samaṁjāte sarasvatyā //61 //*
*pātaṁ no'aśvinā divā pāhi naktaṁ sarasvati /*
*daivyā hotārā bhiṣajā pātamindraṁ sachā sute /62 //*
*tisrastredhā sarasvatyaśvinā bhāratīḍā /*
*tīvraṁ parisrutā somamindrāya suṣuvurmadam //63 //*
*aśvinā bheṣajaṁ madhu bheṣajaṁ naḥ sarasvatī /*
*indre tvaṣṭā yaśaḥ śriyaṁ rūpaṁ rūpamadhuḥ sute //64 //*
*ṛtuthendro vanaspatiḥ śaśmānaḥ parisrutā /*
*kīlālamaśvibhyāṁ madhu duhe dhenuḥ sarasvatī //65 //*
*gobhirna somamaśvinā māsareṇa parisrutā /*
*samadhātaṁ sarasvatyā svāhendre sutaṁ madhu //66 //*
*aśvinā havirindriyaṁ namucherdhiyā sarasvatī /*
*ā śukramāsurādvasu maghamindrāya jarbhrire //67 //*
*yamaśvinā sarasvatī haviṣendramavarddhayan /*
*sa bibheda balaṁ maghaṁ na muchāvāsure sachā //68 //*
*tamindraṁ paśavaḥ sachāśvinobhā sarasvatī /*
*dadhānā'abhyanūṣata haviṣā yajña'indriyaiḥ //69 //*

य. (Yv.) २०.७३-७७

अश्विना गोभिरिन्द्रियमश्वेभिर्वीय र्ं बलम् ।
हविषेन्द्रं सरस्वती यजमानमवर्द्धयन् ॥७३॥
ता नासत्या सुपेशसा हिरण्यवर्त्तनी नरा ।
सरस्वती हविष्मतीन्द्र कर्मसु नोऽवत ॥७४॥
ता भिषजा सुकर्मणा सा सुदुघा सरस्वती ।
स वृत्रहा शतक्रतुरिन्द्राय दधुरिन्द्रियम् ॥७५॥
युवं सुराममश्विना नमुचावासुरे सचा ।

विपिपानाः सरस्वतीन्द्रं कर्मस्वावत ॥७६॥
पुत्रमिव पितरावश्विनोभेन्द्रावथुः काव्यैर्दंसनाभिः ।
यत्सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णक् ॥७७॥
*aśvinā gobhirindrayamaśvebhirvīya rṁ balam ।*
*haviṣendraṁ sarasvatī yajamānamavarddhayan ॥73॥*
*tā nāsatyā supeśasā hiraṇyavarttanī narā ।*
*sarasvatī haviṣmatīndra karmasu no'vata ॥74॥*
*tā bhiṣajā sukarmaṇā sā sudughā sarasvatī ।*
*sa vṛtrahā śatakraturindrāya dadhurindriyam ॥75॥*
*yuvaṁ surāmamaśvinā namuchāvāsure sachā ।*
*vipipānāḥ sarasvatīndraṁ karmasvāvata ॥76॥*
*putramiva pitarāvaśvinobhendrāvathuḥ kāvyairdaṁsanābhiḥ ।*
*yatsurāmaṁ vyapibaḥ śachībhiḥ sarasvatī tvā maghavannabhiṣṇak ॥77॥*

य. (Yv.) २०.८०

अश्विना तेजसा चक्षुः प्राणेन सरस्वती वीर्यम्। वाचेन्द्रो बलेनेन्द्राय दधुरिन्द्रयम् ॥८०॥
*aśvinā tejasā chakṣuḥ prāṇena sarasvatī vīryam । vāchendro balenendrāya dadhurindrayam ॥80॥*

३. इन्द्र-सवितृ-वरुणः (Indra-Savitṛ-Varuṇaḥ) - य. (Yv.) २०.७०-७२

यऽइन्द्रऽइन्द्रियं दधुः सविता वरुणो भगः। स सुत्रामा हविष्पतिर्यजमानाय सश्चत ॥७०॥
सविता वरुणो दधद्यजमानाय दाशुषे। आदत्त नमुचेर्वसु सुत्रामा बलमिन्द्रियम् ॥७१॥
वरुणः क्षत्रमिन्द्रियं भगेन सविता श्रियम्। सुत्रामा यशसा बलं दधाना यज्ञमाशत ॥७२॥
*ya'indra'indriyaṁ dadhuḥ savitā varuṇo bhagaḥ ।*
*sa sutrāmā haviṣpatiryajamānāya saśchata ॥70॥*
*savitā varuṇo dadhadyajamānāya dāśuṣe ।*
*ādatta namuchervasu sutrāmā balamindriyam ॥71॥*
*varuṇaḥ kṣatramindriyaṁ bhagena savitā śriyam ।*
*sutrāmā yaśasā balaṁ dadhānā yajñamāśata ॥72॥*

## ५९३. विधृतिः (Vidhṛtiḥ)

१. अग्निः (Agniḥ) - य. (Yv.) १७.६५-६९

क्रमध्वमग्निना नाकमुख्यं हस्तेषु बिभ्रतः ।
दिवस्पृष्ठं स्वर्गत्वा मिश्रा देवेभिराध्वम् ॥६५॥
प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरोऽअग्निर्भवेह ।
विश्वाऽआशा दीद्यानो विभा ह्यूर्जं नो धेहि द्विपदे चतुष्पदे ॥६६॥
पृथिव्याऽअहमुदन्तरिक्षमारुहमन्तरिक्षाद्दिवामारुहम् ।
दिवो नाकस्य पृष्ठात् स्वर्ज्योतिरगामहम् ॥६७॥
स्वर्यन्तो नापेक्षन्तऽआ द्यां रोहन्ति रोदसी ।
यज्ञं ये विश्वतोधारं सुविद्वांसो वितेनिरे ॥६८॥
अग्ने प्रहि प्रथमो देवयतां चक्षुर्देवानामुत मर्त्यानाम् ।
इयक्षमाणा भृगुभिः सजोषाः स्वर्य्यन्तु यजमानाः स्वस्ति ॥६९॥
*kramadhvamagninā nākamukhyaṁ hasteṣu bibhrataḥ ।*
*divaspṛṣṭhaṁ svargatvā miśrā devebhirādhvam ॥65॥*
*prāchīmanu pradiśaṁ prehi vidvānagneragne puro'agnirbhaveha ।*
*viśvā'āśā dīdyāno vibhā hyūrjaṁ no dhehi dvipade chatuṣpade ॥66॥*
*pṛthivyā'ahamudantarikṣamāruhamantarikṣāddivāmāruham ।*
*divo nākasya pṛṣṭhāt svarjyotiragāmaham ॥67॥*
*svaryanto nāpekṣanta'ā dyāṁ rohanti rodasī ।*
*yajñaṁ ye viśvatodhāraṁ suvidvāṁso vitenire ॥68॥*
*agne prahi prathamo devayatāṁ chakṣurdevānāmuta martyānām ।*
*iyakṣamāṇā bhṛgubhiḥ sajoṣāḥ svaryyantu yajamānāḥ svasti ॥69॥*

२. इन्द्रः (Indraḥ) - य. (Yv.) १७.६३

वाजस्य मा प्रसवऽउद्ग्राभेणोदग्रभीत्। अधा सपत्नानिन्द्रो मे निग्राभेणाधराँ२ऽअकः ॥६३॥
*vājasya mā prasava'udgrābheṇodagrabhīt |*
*adhā sapatnānindro me nigrābheṇādharām̐2'akaḥ ||63 ||*

३. इन्द्राग्नि: (Indrāgniḥ) - य. (Yv.) १७.६४

उद्ग्राभं च निग्राभं च ब्रह्म देवाऽअवीवृधन्। अधा सपत्नानिन्द्राग्नी मे विषूचीनान्व्यस्यताम्।६४।
*udgrābhaṁ cha nigrābhaṁ cha brahma devā'avīvṛdhan |*
*adhā sapatnānindrāgnī me viṣūchīnānvyasyatām |64 |*

४. यज्ञः (Yajñaḥ) - य. (Yv.) १७.६२

देवहूर्यज्ञऽआ च वक्षत्सुम्नहूर्यज्ञऽआ च वक्षत्। यज्ञदग्निर्देवो देवाँ२ऽआ च वक्षत् ॥६२॥
*devahūryajña'ā cha vakṣatsumnahūryajña'ā cha vakṣat |*
*yajñadagnirdevo devām̐2'ā cha vakṣat ||62 ||*

## ५९४. विप्रजूतिः (Viprajūtiḥ)

१. केशिनः (Keśinaḥ) - ऋ. (Rv.) १०.१३६.३

उन्मदिता मौनेयेन वाताँ आ तस्थिमा वयम्। शरीरेदस्माकं यूयं मर्तासो अभि पश्यथ ॥३॥
*unmaditā mauneyena vātām̐ ā tasthimā vayam |*
*śarīredasmākaṁ yūyaṁ martāso abhi paśyatha ||3 ||*

## ५९५. विप्रबन्धुः (Viprabandhuḥ)

१. बृहस्पतिः (Bṛhaspatiḥ) - य. (Yv.) ३.२८

सोमानं स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवन्तं यऽऔशिजः ॥२८॥
*somānaṁ svaraṇaṁ kṛṇuhi brahmaṇaspate | kakṣīvantaṁ ya'auśijaḥ ||28 ||*

## ५९६. विभ्राट् (Vibhrāṭ)

१. सूर्यः (Sūryaḥ) - य. (Yv.) ३३.३०

विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपताविवह्रुतम् ।
वातजूतो योऽअभिरक्षति त्मना प्रजाः पुपोष पुरुधा वि राजति ॥३०॥
*vibhrāḍ bṛhatpibatu somyaṁ madhvāyurdadhadyajñapatāvivahrutam |*
*vātajūto yo'abhirakṣati tmanā prajāḥ pupoṣa purudhā vi rājati ||30 ||*

## ५९७. विभ्राट् सौर्यः (Vibhrāṭ Sauryaḥ)

१. सूर्यः (Sūryaḥ) - ऋ. (Rv.) १०.१७०.१-४; सा. (Sv.) ६२८; १४५३-१४५५

ऋ. (Rv.) १०.१७०.१-४

विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् ।
वातजूतो यो अभिरक्षति त्मना प्रजाः पुपोष पुरुधा वि राजति ॥१॥
विभ्रड् बृहत्सुभृतं वाजसातमं धर्मन्दिवो धरुणे सत्यमर्पितम् ।
अमित्रहा वृत्रहा दस्युहन्तमं ज्योतिर्जज्ञे असुरहा सपत्नहा ॥२॥
इदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत् ।
विश्वभ्राड् भ्राजो महि सूर्यो दृश उरु पप्रथे सह ओजो अच्युतम् ॥३॥
विभ्राजंज्योतिषा स्व१रगच्छो रोचनं दिवः ।
येनेमा विश्वा भुवनान्याभृता विश्वकर्मणा विश्वदेव्यावता ॥४॥
*vibhrāḍ bṛhatpibatu somyaṁ madhvāyurdadhadyajñapatāvavihrutam |*
*vātajūto yo abhirakṣati tmanā prajāḥ pupoṣa purudhā vi rājati ||1 ||*
*vibhraḍ bṛhatsubhṛtaṁ vājasātamaṁ dharmandivo dharuṇe satyamarpitam |*
*amitrahā vṛtrahā dasyuhantamaṁ jyotirjajñe asurahā sapatnahā ||2 ||*
*idaṁ śreṣṭhaṁ jyotiṣāṁ jyotiruttamaṁ viśvajiddhanajiduchyate bṛhat |*
*viśvabhrāḍ bhrājo mahi sūryo dṛśa uru paprathe saha ojo achyutam ||3 ||*
*vibhrājaṁjyotiṣā sva1ragachchho rochanaṁ divaḥ |*
*yenemā viśvā bhuvanānyābhṛtā viśvakarmaṇā viśvadevyāvatā ||4 ||*

सा. (Sv.) ६२८

विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् ।
वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा वि राजति ॥२॥
*vibhrāḍ bṛhatpibatu somyaṁ madhvāyurdadhadyajñapatāvavihrutam /*
*vātajūto yo abhirakṣati tmanā prajāḥ piparti bahudhā vi rājati //2 //*

सा. (Sv.) १४५३-१४५५

विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् ।
वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा वि राजति ॥१॥
विभ्राड् बृहत्सुभृतं वाजसातमं धर्मं दिवो धरुणे सत्यमर्पितम् ।
अमित्रहा वृत्रहा दस्युहन्तमं जयोतिर्जज्ञे असुरहा सपत्नहा ॥२॥
इदं श्रेष्ठं जयोतिषां ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत् ।
विश्वभ्राड् भ्राजो महि सूर्यो दृश उरु पप्रथे सह ओजो अच्युतम् ॥३॥
*vibhrāḍ bṛhatpibatu somyaṁ madhvāyurdadhadyajñapatāvavihrutam /*
*vātajūto yo abhirakṣati tmanā prajāḥ piparti bahudhā vi rājati //1 //*
*vibhrāḍ bṛhatsubhṛtaṁ vājasātamaṁ dharmaṁ divo dharuṇe satyamarpitam /*
*amitrahā vṛtrahā dasyuhantamaṁ jayotirjajñe asurahā sapatnahā //2 //*
*idaṁ śreṣṭhaṁ jayotiṣāṁ jyotiruttamaṁ viśvajiddhanajiduchyate bṛhat /*
*viśvabhrāḍ bhrājo mahi sūryo dṛśa uru paprathe saha ojo achyutam //3 //*

५९८. **विमद ऐन्द्रः वसुकृद्वा वासुक्रः (साग्री. सास्वा.); विमद ऐन्द्रः वसुकृद्वा वसुक्रो वा प्राजापत्यः (ऋसर्व.); वसुकृद्दषि विमदो वा (सार्षेदी.) (Vimada Aindraḥ Vasukṛdvā Vāsukraḥ [Ssb. Sas.]; Vimada Aindraḥ Vasukṛdvā Vasukro Vā Prājāpatyaḥ [Rss.]; Vasukṛdṛṣi Vimado vā [Sad.])**

१. अग्निः (Agniḥ) - ऋ. (Rv.) १०.२०.१-१०; १०.२१.१-८; सा. (Sv.) ३३४

ऋ. (Rv.) १०.२०.१-१०

भद्रं नो अपि वातय मनः ॥१॥
अग्निमीळे भुजां यविष्ठं शासा मित्रं दुर्धरीतुम् । यस्य धर्मन्त्स्व१रेनीः सपर्यन्ति मातुरूधः ॥२॥
यमासा कृपनीळं भासाकेतुं वर्धयन्ति । भ्राजते श्रेणिदन् ॥३॥
अर्यो विशां गातुरेति प्र यदानड् दिवो अन्तान् । कविरभ्रं दीद्यानः ॥४॥
जुषद्धव्या मानुषस्योर्ध्वस्तस्थावृभ्वा यज्ञे । मिन्वन्त्सद्म पुर एति ॥५॥
स हि क्षेमो हविर्यज्ञः श्रुष्टीदस्य गातुरेति । अग्निं देवा वाशीमन्तम् ॥६॥
यज्ञासाहं दुव इषेऽग्निं पूर्वस्य शेवस्य । अद्रेः सूनुमायुमाहुः ॥७॥
नरो ये के चास्मदा विश्वेत्ते वाम आ स्युः । अग्निं हविषा वर्धन्तः ॥८॥
कृष्णः श्वेतोऽरुषो यामो अस्य ब्रध्न ऋज्र उत शोणो यशस्वान् ।
हिरण्यरूपं जनिता जजान ॥९॥
एवा ते अग्ने विमदो मनीषमूर्जो नपादमृतेभिः सजोषाः ।
गिर आ वक्षत्सुमतीरियान इषमूर्जं सुक्षितिं विश्वमाभाः ॥१०॥
*bhadraṁ no api vātaya manaḥ //1 //*
*agnimīḷe bhujāṁ yaviṣṭhaṁ śāsā mitraṁ durdharītum /*
*yasya dharmantsva1renīḥ saparyanti māturūdhaḥ //2 //*
*yamāsā kṛpanīḷaṁ bhāsāketuṁ vardhayanti / bhrājate śreṇidan //3 //*
*aryo viśāṁ gātureti pra yadānaḍ diveā antān / kavirabhraṁ dīdyānaḥ //4 //*
*juṣaddhavyā mānuṣasyordhvastasthāvṛbhvā yajñe / minvantsadma pura eti //5 //*
*sa hi kṣemo haviryajñaḥ śruṣṭīdasya gātureti / agiṁna devā vāśīmantam //6 //*
*yajñāsāhaṁ duva iṣe'giṁna pūrvasya śevasya / adreḥ sūnumāyumāhuḥ //7 //*
*naro ye ke chāsmadā viśvette vāma ā syuḥ / agiṁna haviṣā vardhantaḥ //8 //*
*kṛṣṇaḥ śveto'ruṣo yāmo asya bradhna ṛjra uta śoṇo yaśasvān /*
*hiraṇyarūpaṁ janitā jajāna //9 //*
*evā te agne vimado manīṣamūrjo napādamṛtebhiḥ sajoṣāḥ /*
*gira ā vakṣatsumatīriyāna iṣamūrjaṁ sukṣitiṁ viśvamābhāḥ //10 //*

ऋ. (Rv.) १०.२१.१-८

अग्निं न स्ववृक्तिभिर्होतारं त्वावृणीमहे ।
यज्ञाय स्तीर्णबर्हिषे वि वो मदे शीरं पावकशोचिषं विवक्षसे ॥१॥
त्वामु ते स्वाभुवः शुम्भन्त्यश्वराधसः ।
वेति त्वामुपसेचनी वि वो मद ऋजीतिरग्न आहुतिर्विवक्षसे ॥२॥
त्वे धर्माण आसते जुहूभिः सिंचतीरिव ।
कृष्णा रूपाण्यर्जुना वि वो मदे विश्वा अधि श्रियो धिषे विवक्षसे ॥३॥
यमग्ने मन्यसे रयिं सहसावन्नमर्त्य ।
तमा नो वाजसातये वि वो मदे यज्ञेषु चित्रमा भरा विवक्षसे ॥४॥
अग्निर्जातो अथर्वणा विदद्विश्वानि काव्या ।
भुवद्दूतो विवस्वतो वि वो मदे प्रियो यमस्य काम्यो विवक्षसे ॥५॥
त्वां यज्ञेष्वीळतेऽग्ने प्रयत्यध्वरे ।
त्वं वसूनि काम्या वि वो मदे विश्वा दधासि दाशुषे विवक्षसे ॥६॥
त्वां यज्ञेष्वृत्विजं चारुमग्ने नि षेदिरे ।
धृतप्रतीकं मनुषो वि वो मदे शुक्रं चेतिष्ठमक्षभिर्विवक्षसे ॥७॥
अग्ने शुक्रेण शेचिषोरु प्रथयसे बृहत् ।
अभिक्रन्दन्वृषायसे वि वो मदे गर्भं दधासि जमिषु विवक्षसे ॥८॥

*agiṁna na svavṛktibhirhotāraṁ tvāvṛṇīmahe |*
*yajñāya stīrṇabarhiṣe vi vo made śīraṁ pāvakaśochiṣaṁ vivakṣase ||1||*
*tvāmu te svābhuvaḥ śumbhantyaśvarādhasaḥ |*
*veti tvāmupasechanī vi vo mada ṛjītiragna āhutirvivakṣase ||2||*
*tve dharmāṇa āsate juhūbhiḥ siṁchatīriva |*
*kṛṣṇā rūpāṇyarjunā vi vo made viśvā adhi śriyo dhiṣe vivakṣase ||3||*
*yamagne manyase rayiṁ sahasāvannamartya |*
*tamā no vājasātaye vi vo made yajñeṣu chitramā bharā vivakṣase ||4||*
*agnirjāto atharvaṇā vidadviśvāni kāvyā |*
*bhuvaddūto vivasvato vi vo made priyo yamasya kāmyo vivakṣase ||5||*
*tvāṁ yajñeṣvīḷate'gne prayatyadhvare |*
*tvaṁ vasūni kāmyā vi vo made viśvā dadhāsi dāśuṣe vivakṣase ||6||*
*tvāṁ yajñeṣvṛtvijaṁ chārumagne ni ṣedire |*
*dhṛtapratīkaṁ manuṣo vi vo made śukraṁ chetiṣṭhamakṣabhirvivakṣase ||7||*
*agne śukreṇa śechiṣoru prathayase bṛhat |*
*abhikrandanvṛṣāyase vi vo made garbhaṁ dadhāsi jamiṣu vivakṣase ||8||*

सा. (Sv.) ३३४

यजामह इन्द्रं वज्रदक्षिणं हरीणां रथ्यां३विव्रतानाम् ।
प्र श्मश्रुभिर्दोधुवदूर्ध्वधा भुवद्वि सेनाभिर्भयमानो वि राधसा ॥३॥

*yajāmaha indraṁ vajradakṣiṇaṁ harīṇāṁ rathyāṁ3vivratānām |*
*pra śmaśrubhirdodhuvadūrdhvadhā bhuvadvi senābhirbhayamāno vi rādhasā ||3||*

२. अश्विनौ (Aśvinau) - ऋ. (Rv.) १०.२४.४-६

युवं शक्रा मायाविना समीची निरमन्थतम् ।
विमदेन यदीळिता नासत्या निरमन्थतम् ॥४॥
विश्वे देवा अकृपन्त समीच्योर्निष्पतन्त्योः ।
नासत्यावब्रुवन्देवाः पुनरा वहतादिति ॥५॥
मधुमन्मे परायणं मधुमत्पुनरायनम् ।
ता नो देवा देवतया युवं मधुमतस्कृतम् ॥६।

*yuvaṁ śakrā māyāvinā samīchī niramanthatam |*
*vimadena yadīḷitā nāsatyā niramanthatam ||4||*
*viśve devā akṛpanta samīchyorniṣpatantyoḥ |*
*nāsatyāvabruvandevāḥ punarā vahatāditi ||5||*
*madhumanme parāyaṇaṁ madhumatpunarāyanam |*

*tā no devā devatayā yuvaṁ madhumataskṛtam //6 /*

३. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.२२.१-१५; १०.२३.१-७; १०.२४.१-३

ऋ. (Rv.) १०.२२.१-१५

कुह श्रुत इन्द्रः कस्मिन्नद्य जने मित्रो न श्रूयते ।
ऋषीणां वा यः क्षये गुहा वा चर्कृषे गिरा ॥१॥
इह श्रुत इन्द्रो अस्मे अद्य स्तवे वज्र्यृचीषमः ।
मित्रो न यो जनेष्वा यशश्चक्रे असाम्या ॥२॥
महो यस्पतिः शवसो असाम्या महो नृम्णस्य तूतुजिः ।
भर्ता वज्रस्य धृष्णोः पिता पुत्रमिव प्रियम् ॥३॥
युजानो अश्वा वातस्य धुनी देवो देवस्य वज्रिवः ।
स्यन्ता पथा विरुक्मता सृजानः स्तोष्यध्वनः ॥४॥
त्वं त्या चिद्वातस्याश्वागा ऋज्रा त्मना वहध्यै ।
ययोर्देवो न मर्त्यो यन्ता नकिर्विदाय्यः ॥५॥
अध ग्मन्तोशना पृच्छते वां कदर्था न आ गृहम् ।
आ जग्मथुः पराकाद्दिवश्च ग्मश्च मर्त्यम् ॥६॥
आ न इन्द्र पृक्षसेऽस्माकं ब्रह्मोद्यतम् ।
तत्त्वा याचामहेऽवः शुष्णं यद्धन्नमानुषम् ॥७॥
अकर्मा दस्युरभि नो अमन्तुरन्यव्रतो अमानुषः ।
त्वं तस्या मित्रहन्वधर्दासस्य दम्भय ॥८॥
त्वं न इन्द्र शूर शूरैरुत त्वोतासो बर्हणा ।
पुरुत्रा ते वि पूर्तयो नवन्त क्षोणयो यथा ॥९॥
त्वं तान्वृत्रहत्ये चोदयो नृन्कार्पाणे शूर वज्रिवः ।
गुहा यदी कवीनां विशां नक्षत्रशवसाम् ॥१०॥
मक्षू ता त इन्द्र दानाप्नस आक्षाणे शूर वज्रिवः ।
यद्ध शुष्णस्य दम्भयो जातं विश्वं सयावभिः ॥११॥
माकुध्र्यगिन्द्र शूर वस्वीरस्मे भूवन्नभिष्टयः ।
वयंवयं त आसां सुम्ने स्याम वज्रिवः ॥१२॥
अस्मे ता त इन्द्र सन्तु सत्याहिंसन्तीरुपस्पृशः ।
विद्याम यासां भुजो धेनूनां न वज्रिवः ॥१३॥
अहस्ता यदपदी वर्धत क्षाः शचीभिर्वेद्यानाभ् ।
शुष्णं परि प्रदक्षिणिद्विश्वायवे नि शिश्नथः ॥१४॥
पिबापिबेदिन्द्र शूर सोमं मा रिषण्यो वसवान वसुः सन् ।
उत त्रायस्व गृणतो मघोनो महश्च रायो रेवतस्कृधी नः ॥१५॥

*kuha śruta indraḥ kasminnadya jane mitro na śrūyate /*
*ṛṣīṇāṁ vā yaḥ kṣaye guhā vā charkṛṣe girā //1 //*
*iha śruta indro asme adya stave vajryṛchīṣamaḥ /*
*mitro na yo janeṣvā yaśaśchakre asāmyā //2 //*
*maho yaspatiḥ śavaso asāmyā maho nṛmṇasya tūtujiḥ /*
*bhartā vajrasya dhṛṣṇoḥ pitā putramiva priyam //3 //*
*yujāno aśvā vātasya dhunī devo devasya vajrivaḥ /*
*syantā pathā virukmatā sṛjānaḥ stoṣyadhvanaḥ //4 //*
*tvaṁ tyā chidvātasyāśvāgā ṛjrā tmanā vahadhyai /*
*yayordevo na martyo yantā nakirvidāyyaḥ //5 //*
*adha gmantośanā pṛchchhate vāṁ kadarthā na ā gṛham /*
*ā jagmathuḥ parākāddivaścha gmaścha martyam //6 //*
*ā na indra pṛkṣase'smākaṁ brahmodyatam /*
*tattvā yāchāmahe'vaḥ śuṣṇaṁ yaddhannamānuṣam //7 //*
*akarmā dasyurabhi no amanturanyavrato amānuṣaḥ /*
*tvaṁ tasyā mitrahanvadhardāsasya dambhaya //8 //*

*tvaṁ na indra śūra śūrairuta tvotāso barhaṇā* ।
*purutrā te vi pūrtayo navanta kṣoṇayo yathā* ॥9 ॥
*tvaṁ tānvṛtrahatye chodayo nṛnkārpāṇe śūra vajrivaḥ* ।
*guhā yadī kavīnāṁ viśāṁ nakṣatraśavasām* ॥10 ॥
*makṣū tā ta indra dānāpnasa ākṣāṇe śūra vajrivaḥ* ।
*yaddha śuṣṇasya dambhayo jātaṁ viśvaṁ sayāvabhiḥ* ॥11 ॥
*mākudhryagindra śūra vasvīrasme bhūvannabhiṣṭayaḥ* ।
*vayaṁvayaṁ ta āsāṁ sumne syāma vajrivaḥ* ॥12 ॥
*asme tā ta indra santu satyāhiṁsantīrupaspṛśaḥ* ।
*vidyāma yāsāṁ bhujo dhenūnāṁ na vajrivaḥ* ॥13 ॥
*ahastā yadapadī vardhata kṣāḥ śachībhirvedyānābh* ।
*śuṣṇaṁ pari pradakṣiṇidviśvāyave ni śiśnathaḥ* ॥14 ॥
*pibāpibedindra śūra somaṁ mā riṣaṇyo vasavāna vasuḥ san* ।
*uta trāyasva gṛṇato maghono mahaścha rāyo revataskṛdhī naḥ* ॥15 ॥

ऋ. (Rv.) १०.२३.१-७

यजामह इन्द्रं वज्रदक्षिणं हरीणां रथ्यं१ विव्रतानाम् ।
प्र श्मश्रु दोधुवदूर्ध्वथा भूद्वि सेनाभिर्दयमानो वि राधसा ॥१॥
हरी न्वस्य या वने विदे वस्विन्द्रो मर्घैर्मघवा वृत्रहा भुवत् ।
ऋभुर्वाज ऋभुक्षाः पत्यते शवोऽव क्ष्णौमि दासस्य नाम चित् ॥२॥
यदा वज्रं हिरण्यमिदथा रथं हरी यमस्य वहतो वि सूरिभिः ।
आ तिष्ठति मघवा सनश्रुत इन्द्रो वाजस्य दीर्घश्रवसस्पतिः ॥३॥
सो चिन्नु वृष्टिर्यूथ्या३ स्वा सचाँ इन्द्रः श्मश्रूणि हरिताभि प्रुष्णुते ।
अव वेति सुक्ष्यं सुते मधुदिद् धूनोति वातो यथा वनम् ॥४॥
यो वाचा विवाचो मृध्रवाचः पुरू सहस्राशिवा जघान ।
तत्तदिदस्य पौंस्यं गृणीमसि पितेव यस्तविषीं वावृधे शवः ॥५॥
स्तोमं त इन्द्र विमदा अजीजनन्नपूर्व्यं पुरुतमं सुदानवे ।
विद्मा ह्यस्य भेजनमिनस्य यदा पशुं न गोपाः करामहे ॥६॥
माकिर्न एना सख्या वि यौषुस्तव चेन्द्र विमदस्य च ऋषेः ।
विद्मा हि ते प्रमतिं देव जामिवदस्मे ते सन्तु सख्या शिवानि ॥७॥

*yajāmaha indraṁ vajradakṣiṇaṁ harīṇāṁ rathyaṁ1 vivratānām* ।
*pra śmaśru dodhuvadūrdhvathā bhūdvi senābhirdayamāno vi rādhasā* ॥1 ॥
*harī nvasya yā vane vide vasvindro marghairmaghavā vṛtrahā bhuvat* ।
*ṛbhurvāja ṛbhukṣāḥ patyate śavo'va kṣaṇaumi dāsasya nāma chit* ॥2 ॥
*yadā vajraṁ hiraṇyamidathā rathaṁ harī yamasya vahato vi sūribhiḥ* ।
*ā tiṣṭhati maghavā sanaśruta indro vājasya dīrghaśravasaspatiḥ* ॥3 ॥
*so chinnu vṛṣṭiryūthyā3 svā sachām̐ indraḥ śmaśrūṇi haritābhi pruṣṇute* ।
*ava veti sukṣayaṁ sute madhudid dhūnoti vāto yathā vanam* ॥4 ॥
*yo vāchā vivācho mṛdhravāchaḥ purū sahasrāśivā jaghāna* ।
*tattadidasya pauṁsyaṁ gṛṇīmasi piteva yastaviṣīṁ vāvṛdhe śavaḥ* ॥5 ॥
*stomaṁ ta indra vimadā ajījanannapūrvyaṁ purutmaṁ sudānave* ।
*vidmā hyasya bhejanaminasya yadā paśuṁ na gopāḥ karāmahe* ॥6 ॥
*mākirna enā sakhyā vi yauṣustava chendra vimadasya cha ṛṣeḥ* ।
*vidmā hi te pramatiṁ deva jāmivadasme te santu sakhyā śivāni* ॥7 ॥

ऋ. (Rv.) १०.२४.१-३

इन्द्र सोममिमं पिब मधुमन्तं चमू सुतम् ।
अस्मे रयिं नि धारय वि वो मदे सहस्रिणं पुरूवसो विवक्षसे ॥१॥
त्वां यज्ञेभिरुक्थैरुप हव्येभिरीमहे ।
शचीपते शचीनां वि वो मदे श्रेष्ठं नो धेहि वार्यं विवक्षसे ॥२॥
यस्पतिर्वार्याणामसि रध्रस्य चोदिता ।
इन्द्र स्तोतृणामविता वि वो मदे द्विषो नः पाह्यंहसो विवक्षसे ॥३॥

*indra somamimaṁ piba madhumantaṁ chamū sutam* ।

*asme rayiṁ ni dhāraya vi vo made sahasriṇaṁ purūvaso vivakṣase //1 //*
*tvāṁ yajñebhirukthairupa havpyebhirīmahe /*
*śachīpate śachīnāṁ vi vo made śreṣṭhaṁ no dhehi vāryaṁ vivakṣase //2 //*
*yaspatirvāyāṇāmasi radhrasya choditā /*
*indra stotṛṇāmavitā vi vo made dviṣo naḥ pāhyaṁhaso vivakṣase //3 //*

४. पूषा (Pūṣā) - ऋ. (Rv.) १०.२६.१-९

प्र ह्यच्छा मनीषः स्पार्हा यन्ति नियुतः। प्र दस्रा नियुद्रथः पूषा अवष्टु माहिनः ॥१॥
यस्य त्यन्महित्वं वाताप्यमयं जनः। विप्र आ वंसद्धीतिभिश्चिकेत सुष्टुतीनाम् ॥२॥
स वेद सुष्टुतीनामिन्दुर्न पूषा वृषा। अभि प्सुरः प्रुषायति व्रजं न आ प्रुषायति ॥३॥
मंसीमहि त्वा वयमस्माकं देव पूषन्। मतीनां च साधनं विप्राणां चाधवम् ॥४॥
प्रत्यर्धिर्यज्ञानामश्वहयो रथानाम्। ऋषिः स यो मनुर्हितो विप्रस्य यावयत्सखः ॥५॥
आधीषमाणायाः पतिः शुचायाश्च शुचस्य च। वासोवायोऽवीनामा वासांसि मर्मृजत् ॥६॥
इनो वाजानां पतिरिनः पुष्टीनां सखा। प्र श्मश्रु हर्यतो दूधोद्वि वृथा यो अदाभ्यः ॥७॥
आ ते रथस्य पूषन्नजा धुरं ववृत्युः। विश्वस्यार्थिनः सखा सनोजा अनपच्युतः ॥८॥
अस्माकमूर्जा रथं पूषा अविष्टु माहिनः। भुवद्वाजानां वृध इमं नः शुणवद्धवम् ॥९॥
*pra hyachchhā manīṣaḥ spārhā yanti niyutaḥ /*
*pra dasrā niyudrathaḥ pūṣā avaṣṭiu māhinaḥ //1 //*
*yasya tyanmahitvaṁ vātāpyamayaṁ janaḥ /*
*vipra ā vaṁsaddhītibhiśchiketa suṣṭutīnām //2 //*
*sa veda suṣṭutīnāmindurna pūṣā vṛṣā / abhi psuraḥ pruṣāyati vrajaṁ na ā pruṣāyati //3 //*
*maṁsīmahi tvā vayamasmākaṁ deva pūṣan /*
*matīnāṁ cha sādhanaṁ viprāṇāṁ chādhavam //4 //*
*pratyardhiryajñānāmaśvahayo rathānām /*
*ṛṣiḥ sa yo manurhito viprasya yāvayatsakhaḥ //5 //*
*ādhiīṣamāṇāyāḥ patiḥ śuchāyāścha śuchasya cha / vāsovāyo'vīnāmā vāsāṁsi marmṛjat //6 //*
*ino vājānāṁ patirinaḥ puṣṭīnāṁ sakhā /*
*pra śmaśru haryato dūdhodvi vṛthā yo adābhyaḥ //7 //*
*ā te rathasya pūṣannajā dhuraṁ vavṛtyuḥ /*
*viśvasyārthinaḥ sakhā sanojā anapachyutaḥ //8 //*
*asmākamūrjā rathaṁ pūṣā aviṣṭu māhinaḥ /*
*bhuvadvājānāṁ vṛdha imaṁ naḥ śuṇavaddhavam //9 //*

५. सोमः (Somaḥ) - ऋ. (Rv.) १०.२५.१-११

भद्रं नो अपि वातय मनो दक्षमुत क्रतुम् ।
अधा ते सख्ये अन्धसो वि वो मदे रणन्गावो न यवसे विवक्षसे ॥१॥
हृदिस्पृशस्त आसते विश्वेषु सोम धामसु ।
अधा कामा इमे मम वि वो मदे तिष्ठन्ते वसूयवो विवक्षसे ॥२॥
उत व्रतानि सोम ते प्राहं मिनामि पाक्या ।
अधा पितेव सूनवे वि वो मदे मृळा नो अभि चिद्वधाद्विवक्षसे ॥३॥
समु प्र यन्ति धीतयः सर्गासोऽवताँ इव ।
क्रतुं नः सोम जीवसे वि वो मदे धारया चमसाँ इव विवक्षसे ॥४॥
तव त्ये सोम शक्तिभिर्निकामासो व्यृण्विरे ।
गृत्सस्य धीरास्तवसो वि वो मदे व्रजं गोमन्तमश्विनं विवक्षसे ॥५॥
पशुं नः सोम रक्षसि पुरुत्रा विष्ठितं जगत् ।
समाकृणोषि जीवसे वि वो मदे विश्वा सम्पश्यन्भुवना विवक्षसे ॥६॥
त्वं नः सोम विश्वतो गोपा अदाभ्यो भव ।
सेध राजन्नप स्रिधो वि वो मदे मा नो दुःशंस ईशता विवक्षसे ॥७॥
त्वं नः सोम सुक्रतुर्वयोधेयाय जागृहि ।
क्षेत्रवित्तरो मनुषो वि वो मदे द्रुहोः नः पाह्यंहसो विवक्षसे ॥८॥
त्वं नो वृत्रहन्तमेन्द्रस्येन्दो शिवः सखा ।

यत्सीं हवन्ते समिथे वि वो मदे युध्यमानास्तोकसातौ विवक्षसे ॥९॥
अयं घ स तुरो मद इन्द्रस्य वर्धत प्रियः ।
अयं कक्षीवतो महो वि वो मदे मतिं विप्रस्य वर्धयद्विवक्षसे ॥१०॥
अयं विप्राय दाशुषे वाजाँ इयर्ति गोमतः ।
अयं सप्तभ्य आ वरं वि वो मदे प्रान्धं श्रोणं च तारिषद्विवक्षसे ॥११॥
*bhadraṁ no api vātaya mano dakṣamuta kratum /*
*adhā te sakhye andhaso vi vio made raṇangāvo na yavase vivakṣase //1 //*
*hṛdispṛśasta āsate viśveṣu soma dhāmasu /*
*adhā kāmā ime mama vi vo made tiṣṭhante vasūyavo vivakṣase //2 //*
*uta vratāni soma te prāhaṁ mināmi pākyā /*
*adhā piteva sūnave vi vo made mṛḷā no abhi chidvadhādvivakṣase //3 //*
*samu pra yanti dhītayaḥ sargāso'vatām̐ iva /*
*kratuṁ naḥ soma jīvase vi vo made dhārayā chamasām̐ iva vivakṣase //4 //*
*tava tye soma śaktibhirnikāmāso vyṛṇvire /*
*gṛtsasya dhīrāstavaso vi vo made vrajaṁ gomantamaśvinaṁ vivakṣase //5 //*
*paśuṁ naḥ soma rakṣasi purutrā viṣṭhitaṁ jagat /*
*samākṛṇoṣi jīvase vi vo made viśvā sampaśyanbhuvanā vivakṣase //6 //*
*tvaṁ naḥ soma viśvato gopā adābhyo bhava /*
*sedha rājannapa sridho vi vo made mā no duḥśaṁsa īśatā vivakṣase //7 //*
*tvaṁ naḥ soma sukraturvayodheyāya jāgṛhi /*
*kṣetravittaro manuṣo vi vo made druhoḥ naḥ pāhyaṁhaso vivakṣase //8 //*
*tvaṁ no vṛtrahantamendrasyendo śivaḥ sakhā /*
*yatsīṁ havante samithe vi vo made yudhyamānāstokasātau vivakṣase //9 //*
*ayaṁ gha sa turo mada indrasya vardhata priyaḥ /*
*ayaṁ kakṣīvato maho vi vo made matiṁ viprasya vardhayadvivakṣase //10 //*
*ayaṁ viprāya dāśuṣe vājām̐ iyarti gomataḥ /*
*ayaṁ saptabhya ā varaṁ vi vo made prāndhaṁ śroṇaṁ cha tāriṣadvivakṣase //11 //*

**५९९. विमद ऐन्द्रः (साग्री. सास्वा.); प्राजापत्यो वा वसुकृद्वा वासुक्र (ऋसर्व. १०.२१.१; १०.२५.१); गोतमः (सार्षेदी.) (Vimada Aindraḥ [Ssb. Sas.]; Prājāpatyo Vā Vasukṛdvā Vāsukra [Rss. 10.21.1; 10.25.1]; Gotamaḥ [Sad.])**

१. अग्निः (Agniḥ) - सा. (Sv.) ४२०

आग्‌िंन न स्ववृक्तिभिर्होतारं त्वा वृणीमहे ।
शीरं पावकशोचिषं वि वो मदे यज्ञेषु स्तीर्णबर्हिषं विवक्षसे ॥२॥
*āgiṁna na svavṛktibhirhotāraṁ tvā vṛṇīmahe /*
*śīraṁ pāvakaśochiṣaṁ vi vo made yajñeṣu stīrṇabarhiṣaṁ vivakṣase //2 //*

२. सोमाः (Somāḥ) - सा. (Sv.) ४२२

भद्रं नो अपि वातय मनो दक्षमुत क्रतुम् ।
अथा ते सख्ये अन्धसो वि वो मदे राणा गावो न यवसे विवक्षसे ॥४॥
*bhadraṁ no api vātaya mano dakṣamuta kratum /*
*athā te sakhye andhaso vi vo made rāṇā gāvo na yavase vivakṣase //4 //*

**६००. विरुपः (Virupaḥ)**

१. अग्निः (Agniḥ) - ऋ. (Rv.) ८.७५.१-१६; अ. (Av.) २०.१.३; २०.१३२.१-१६; २०.१३४.१-६; २०.१३५.१-१३; २०.१३६.१-१६; य. (Yv.) ३.१२; ११.७१; १२.३६-३९; ११६; १३.३७-४५; १३.४७-५१

ऋ. (Rv.) ८.७५.१-१६

युक्ष्वा हि देवहुतमाँ अश्वाँ अग्ने रथीरिव। नि होता पूर्व्यः सदः ॥१॥
उत नो देव देवाँ अच्छा वोचो विदुष्टरः। श्रद्विश्व वार्या कृधि ॥२॥
त्वं ह यद्यविष्ठ्य सहसः सूनवाहुत। ऋतावा यज्ञियो भुवः ॥३॥

अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः। मूर्धा कवी रयीणम् ॥४॥
तं नेमिमृभवो यथा नमस्व सहूतिभिः। नेदीयो यज्ञमंगिरः ॥५॥
तस्मै नूनमभिद्यवे वाचा विरूप नित्यया। वृष्णे चोदस्व सुष्टुतिम् ॥६॥
कमु ष्विदस्य सेनयाग्नेरपाकचक्षसः। पणिं गोषु स्तरामहे ॥७॥
मा नो देवानां विशः प्रस्नातीरिवोस्राः। कृशं न हासुरघ्न्याः। ॥८॥
मा नः समस्य दूढ्य१: परिद्वेषसो अंहतिः । ऊर्मिर्न नावमा वधीत् ॥९॥
नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः। अमैरमित्रमर्दय ॥१०॥
कुवित्सु नो गविष्टयेऽग्ने संवेषिषो रयिम्। उरुकृदुरुणस्कृधि ॥११॥
मा नो अस्मिन्महाधने परा वर्ग्भारभृद्यथा। संवर्गं सं रयिं जय ॥१२॥
अन्यमस्मद्भिया इयमग्ने सिषक्तु दुच्दुना। वर्धा नो अमवच्छवः ॥१३॥
यस्याजुषन्नमस्विनः शमीभदुर्मखसस्य वा। तं घेदग्निवृरधावति ॥१४॥
परस्या अधि संवतोऽवराँ अभ्या तर। यत्राहमस्मि ताँ अव ॥१५॥
विद्मा हि ते पुरा वयमग्ने पितुर्यथावसः। अधा ते सुम्नमीमहे ॥१६॥
*yukṣavā hi devahutamām̐ aśvām̐ agne rathīriva | ni hotā pūrvyaḥ sadaḥ ॥1॥*
*uta no deva devām̐ achchhā vocho viduṣṭaraḥ | śradviśva vāryā kṛdhi ॥2॥*
*tvaṁ ha yadyaviṣṭhya sahasaḥ sūnavāhuta | ṛtāvā yajñiyo bhuvaḥ ॥3॥*
*ayamagniḥ sahasriṇo vājasya śatinaspatiḥ | mūrdhā kavī rayīṇam ॥4॥*
*taṁ nemimṛbhavo yathā namasva sahūtibhiḥ | nedīyo yajñamaṁgiraḥ ॥5॥*
*tasmai nūnamabhidyave vāchā virūpa nityayā | vṛṣṇe chodasva suṣṭutim ॥6॥*
*kamu ṣvidasya senayāgnerapākachakṣasaḥ | paṇiṁ goṣu starāmahe ॥7॥*
*mā no devānāṁ viśaḥ prasnātīrivosrāḥ | kṛśaṁ na hāsuradhnyāḥ | ॥8॥*
*mā naḥ samasya dūḍhya1ḥ paridveṣaso aṁhatiḥ | ūrmirna nāvamā vadhīt ॥9॥*
*namaste agna ojase gṛṇanti deva kṛṣṭayaḥ | amairamitramardaya ॥10॥*
*kuvitsu no gaviṣṭaye'gne saṁveṣiṣo rayim | urukṛduruṇaskṛdhi ॥11॥*
*mā no asminmahādhane parā vargbhārabhṛdyathā | saṁvargaṁ saṁ rayiṁ jaya ॥12॥*
*anyamasmadbhiyā iyamagne siṣaktu duchdunā | vardhā no amavachchhavaḥ ॥13॥*
*yasyājuṣannamasvinaḥ śamībhadurmakhasasya vā | taṁ ghedagnivṛradhāvati ॥14॥*
*parasyā adhi saṁvato'varām̐ abhyā tara | yatrāhamasmi tām̐ ava ॥15॥*
*vidmā hi te purā vayamagne pituryathāvasaḥ | adhā te sumnamīmahe ॥16॥*

अ. (Av.) २०.१.३

उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे। स्तोमैर्विधेमाग्नये ॥३॥
*ukṣānnāya vaśānnāya somapṛṣṭhāya vedhase | stomairvidhemāgnaye ॥3॥*

अ. (Av.) २०.१३२.१-१६

आदलाबुकमेककम् ॥१॥
अलाबुकं निखातकम् ॥२॥
कर्करिको निखातकः ॥३॥
तद् वात उन्मथायति ॥४॥
कुलायं कृणवादिति ॥५॥
उग्रं वनिषदाततम् ॥६॥
न वनिषदनाततम् ॥७॥
क एषां कर्करी लिखत् ॥८॥
क एषां दुन्दुभिं हनत् ॥९॥
यदीयं हनत् कथं हनत् ॥१०॥
देवी हनत् कुहनत् ॥११॥
पर्यागारं पुनःपुनः ॥१२॥
त्रीण्युष्ट्रस्य नामानि ॥१३॥
हिरण्य इत्येके अब्रवीत् ॥१४॥
द्वौ वा ये शिशवः ॥१५॥
नीलशिखण्डवाहनः ॥१६॥

*ādalābukamekakam* //1 //
*alābukaṁ nikhātakam* //2 //
*karkariko nikhātakaḥ* //3 //
*tad vāta unmathāyati* //4 //
*kulāyaṁ kṛṇavāditi* //5 //
*ugraṁ vaniṣadātatam* //6 //
*na vaniṣadanātatam* //7 //
*ka eṣāṁ karkarī likhat* //8 //
*ka eṣāṁ dundubhiṁ hanat* //9 //
*yadīyaṁ hanat kathaṁ hanat* //10 //
*devī hanat kuhanat* //11 //
*paryāgāraṁ punaḥpunaḥ* //12 //
*trīṇyuṣṭrasya nāmāni* //13 //
*hiraṇya ityeke abravīt* //14 //
*dvau vā ye śiśavaḥ* //15 //
*nīlaśikhaṇḍavāhanaḥ* //16 //

अ. (Av.) २०.१३४.१-६

इहेत्थ प्रागपागुदगधराग्-अरालागुदभर्त्सथ ॥१॥
इहेत्थ प्रागपागुदगधराग्-वत्साः पुरुषन्त आसते ॥२॥
इहेत्थ प्रागपागुदगधराग्-स्थालीपाको वि लीयते ॥३॥
इहेत्थ प्रागपागुदगधराग्-स वै पृथु लीयते ॥४॥
इहेत्थ प्रागपागुदगधराग्-आष्टे लाहणि लीशाथी ॥५॥
इहेत्थ प्रागपागुदगधराग्-अक्ष्लिली पुच्छिलीयते ॥६॥
*ihettha prāgapāgudagadharāg-arālāgudabhartsatha* //1 //
*ihettha prāgapāgudagadharāg-vatsāḥ puruṣanta āsate* //2 //
*ihettha prāgapāgudagadharāg-sthālīpāko vi līyate* //3 //
*ihettha prāgapāgudagadharāg-sa vai pṛthu līyate* //4 //
*ihettha prāgapāgudagadharāg-āṣṭe lāhaṇi līśāthī* //5 //
*ihettha prāgapāgudagadharāg-akṣalilī puchchhilīyate* //6 //

अ. (Av.) २०.१३५.१-१३

भुगित्यभिगतः शलित्यपक्रान्तः फलित्यभिष्ठितः ।
दुन्दुभिमाहननाभ्यां जरितरोऽथामो दैव ॥१॥
कोशबिले रजनि ग्रन्थेर्धानमुपानहि पादम् ।
उत्तमां जनिमां जन्यानुत्तमां जनीन् वर्त्मन्यात् ॥२॥
अलाबूनि पृषाताकान्यश्वत्थपलाशम् ।
पिपीलिकावटश्वसो विद्युत्स्वापर्णशफो गोशफो जरितरोऽथामो दैव ॥३॥
वीमे देवा अक्रंसताध्वर्यो क्षिप्रं प्रचर ।
सुसत्यमिद् गवामस्यसि प्रखुदसि ॥४॥
पत्नी यद्दृश्यते पत्नी यक्ष्यमाणा जरितरोऽथामो दैव ।
होता विष्टीमेन जरितरोऽथामो दैव ॥५॥
आदित्या ह जरितरंगिरोभ्यो दक्षिणामनयन् ।
तां ह जरितः प्रत्यायंस्तामु ह जरितः प्रत्यायन् ॥६॥
तां ह जरितर्नः प्रत्यगृभ्णंस्तामु ह जरितर्नः प्रत्यगृभ्णः ।
अजानेतरसं न वि चेतनानि यज्ञानेतरसं न पुरोगवामः ॥७॥
उत श्वेत आशुपत्वा उतो पद्याभिर्यविष्ठः ।
उतेमाशु मानं पिपर्ति ॥८॥
आदित्या रुद्रा वसवस्त्वेनु त इदं राधः प्रति गृभ्णीह्यंगिरः ।
इदं राधो विभु प्रभु इदं राधो बृहत् पृथु ॥९॥
देवा ददत्वासुरं तद् वो अस्तु सुचेतनम् ।
युष्माँ अस्तु दिवेदिवे प्रत्येव गृभायत ॥१०॥

त्वमिन्द्र शर्मरिणा हव्यं पारावतेभ्यः ।
विप्राय स्तुवते वसुवनिं दुरश्रवसे वह ॥११॥
त्वमिन्द्र कपोताय च्छिन्नपक्षाय वंचते ।
श्यामाकं पक्वं पीलु च वारस्मा अकृणोर्बहुः ॥१२॥
अरंगरो वावदीति त्रेधा बद्धो वरत्रया ।
इरामह प्रशंसत्यनिरामप सेधति ॥१३॥

*bhugityabhigataḥ śalityapakrāntaḥ phalityabhiṣṭhitaḥ /*
*dundubhimāhananābhyāṁ jaritaro'thāmo daiva //1 //*
*kośabile rajani grantherdhānamupānahi pādam /*
*uttamāṁ janimāṁ janyānuttamāṁ janīn vartmanyāt //2 //*
*alābūni pṛṣātākānyaśvatthapalāśam /*
*pipīlikāvaṭaśvaso vidyutsvāparṇaśapho gośapho jaritaro'thāmo daiva //3 //*
*vīme devā akraṁsatādhvaryo kṣipraṁ prachara /*
*susatyamid gavāmasyasi prakhudasi //4 //*
*patnī yadṛśyate patnī yakṣayamāṇā jaritaro'thāmo daiva /*
*hotā viṣṭīmena jaritaro'thāmo daiva //5 //*
*ādityā ha jaritaraṁgirobhyo dakṣiṇāmanayan /*
*tāṁ ha jaritaḥ pratyāyaṁstāmu ha jaritaḥ pratyāyan //6 //*
*tāṁ ha jaritarnaḥ pratyagṛbhṇaṁstāmu ha jaritarnaḥ pratyagṛbhṇaḥ /*
*ajānetarasaṁ na vi chetanāni yajñānetarasaṁ na purogavāmaḥ //7 //*
*uta śveta āśupatvā uto padyābhiryaviṣṭhaḥ /*
*utemāśu mānaṁ piparti //8 //*
*ādityā rudrā vasavastvenu ta idaṁ rādhaḥ prati gṛbhṇīhyaṁgiraḥ /*
*idaṁ rādho vibhu prabhu idaṁ rādho bṛhat pṛthu //9 //*
*devā dadatvāsuraṁ tad vo astu suchetanam /*
*yuṣmāṁ̐ astu divedive pratyeva gṛbhāyata //10 //*
*tvamindra śarmariṇā havyaṁ pārāvatebhyaḥ /*
*viprāya stuvate vasuvaniṁ duraśravase vaha //11 //*
*tvamindra kapotāya chchhinnapakṣāya vaṁchate /*
*śyāmākaṁ pakvaṁ pīlu cha vārasmā akṛṇorbahuḥ //12 //*
*araṁgaro vāvadīti tredhā baddho varatrayā /*
*irāmaha praśaṁsatyanirāmapa sedhati //13 //*

अ. (Av.) २०.१३६.१-१६

यदस्या अंहुभेद्याः कृधु स्थूलमुपातसत् ।
मुष्काविदस्या एजतो गोशफो शकुलाविव ॥१॥
यदा स्थूलेन पससाणौ मुष्का उपावधीत् ।
विष्वंचा वस्या वर्धतः विकतास्वेव गर्दभौ ॥२॥
यदल्पिकास्वल्पिका कर्कन्धूकेव पद्यते ।
वास्तिकमिव तेजनं यन्त्यवाताय वित्पति ॥३॥
यद् देवासो ललामगुं प्रविष्टीमिनमाविषुः ।
सकुला देदिश्यते नारी सत्यस्याक्षिभुवो यथा ॥४॥
महानग्न्यतृप्नद्वि मोक्रददस्थानासरन् ।
शक्तिकानना स्वचमशकं सक्तु पद्यम ॥५॥
महानग्न्युलूखलमतिक्रामन्त्यब्रवीत् ।
यथा तव वनस्पते निरघ्नन्ति तथैवेति ॥६॥
महानग्न्युप ब्रूते भ्रष्टोऽथाप्यभूभुवः ।
यथैव ते वनस्पते पिप्पति तथैवेति ॥७॥
महानग्न्युप ब्रूते भ्रष्टोऽथाप्यभूभुवः ।
यथा वयो विदाह्य स्वर्गे नमवदह्यते ॥८॥
महानग्न्युप ब्रूते स्वसावेशितं पसः ।
इत्थं फलस्य वृक्षस्य शूर्पे शूर्पं भजेमहि ॥९॥

महानग्नी कृकवाकं शम्यया परि धावति ।
अयं न विद्म यो मृगः शीर्ष्णा हरति धाणिकाम् ॥१० ॥
महानग्नी महानग्नं धावन्तमनु धावति ।
इमास्तदस्य गा रक्ष यभ मामद्ध्यौदनम् ॥११ ॥
सुदेवस्त्वा महानग्नीर्बबाधते महतः साधु खोदनम् ।
कुसं पीबरो नवत् ॥१२ ॥
वशा दग्धामिमाङ्गुरिं प्रसृजतोऽग्रतं परे ।
महान् वै भद्रो यभ मामद्ध्यौदनम् ॥१३ ॥
विदेवस्त्वा महानग्नीर्विबाधते महतः साधु खोदनम् ।
कुमारिका पिंगलिका कार्द भस्मा कु धावति ॥१४ ॥
महान् वै भद्रो बिल्वो महान् भद्र उदुम्बरः ।
महाँ अभिक्त बाधते महतः साधु खोदनम् ॥१५ ॥
यः कुमारी पिंगलिका वसन्तं पीबरी लभेत् ।
तैलकुण्डमिमाङ्गुष्ठं रोदन्तं शुदमुद्धरेत् ॥१६ ॥

*yadasyā aṁhubhedyāḥ kṛdhu sthūlamupātasat /*
*muṣkāvidasyā ejato gośapho śakulāviva //1 //*
*yadā sthūlena pasasāṇau muṣkā upāvadhīt /*
*viṣvaṁchā vasyā vardhataḥ vikatāsveva gardabhau //2 //*
*yadalpikāsvalpikā karkandhūkeva padyate /*
*vāsntikamiva tejanaṁ yantyavātāya vitpati //3 //*
*yad devāso lalāmaguṁ praviṣṭīminamāviṣuḥ /*
*sakulā dediśyate nārī satyasyākṣibhuvo yathā //4 //*
*mahānagnyatṛpnadvi mokradadasthānāsaran /*
*śaktikānanā svachamaśakaṁ saktu padyama //5 //*
*mahānagnyulūkhalamatikrāmantyabravīt /*
*yathā tava vanaspate niraghnanti tathaiveti //6 //*
*mahānagnyupa brūte bhraṣṭo'thāpyabhūbhuvaḥ /*
*yathaiva te vanaspate pippati tathaiveti //7 //*
*mahānagnyupa brūte bhraṣṭo'thāpyabhūbhuvaḥ /*
*yathā vayo vidāhya svarge namavadahyate //8 //*
*mahānagnyupa brūte svasāveśitaṁ pasaḥ /*
*itthaṁ phalasya vṛkṣasya śūrpe śūrpaṁ bhajemahi //9 //*
*mahānagnī kṛkavākaṁ śamyayā pari dhāvati /*
*ayaṁ na vidma yo mṛgaḥ śīrṣṇā harati dhāṇikām //10 //*
*mahānagnī mahānagnaṁ dhāvantamanu dhāvati /*
*imāstadasya gā rakṣa yabha māmaddhyaudanam //11 //*
*sudevastvā mahānagnīrbabādhate mahataḥ sādhu khodanam /*
*kusaṁ pībaro navat //12 //*
*vaśā dagdhāmimāṅguriṁ prasṛjato'grataṁ pare /*
*mahān vai bhadro yabha māmaddhyaudanam //13 //*
*videvastvā mahānagnīrvibādhate mahataḥ sādhu khodanam /*
*kumārikā piṁgalikā kārda bhasmā ku dhāvati //14 //*
*mahān vai bhadro bilvo mahān bhadra udumbaraḥ /*
*mahāṁ̐ abhikta bādhate mahataḥ sādhu khodanam //15 //*
*yaḥ kumārī piṁgalikā vasantaṁ pībarī labhet /*
*tailakuṇḍamimāṅguṣṭhaṁ rodantaṁ śudamuddharet //16 //*

य. (Yv.) ३.१२

अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्याऽअयम्। अपां रेतांसि जिन्वति ॥१२ ॥
*agnirmūrddhā divaḥ kakutpatiḥ pṛthivyā'ayam / apāṁ retāṁsi jinvati //12 //*

य. (Yv.) ११.७१

परस्याऽअधि संवतोऽवराँ२ऽअभ्यातर। यत्राहमस्मि ताँ२ऽअव ॥७१ ॥

*parasyā'adhi saṁvato'varām̐2'abhyātara । yatrāhamasmi tām̐2'ava ॥71॥*

य. (Yv.) १२.३६-३९

अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे। गर्भे सन् जायसे पुनः ॥३६॥
गर्भोऽअस्योषधीनां गर्भो वनस्पतीनाम्। गर्भो विश्वस्य भूतस्याग्ने गर्भोऽअपामसि ॥३७॥
प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने। संसृज्य मातृभिष्ट्वं ज्योतिष्मान् पुनरासदः ॥३८॥
पुनरासद्य सदनमपश्च पृथिवीमग्ने। शेषे मातुर्यथोपस्थेऽनतरस्यां शिवतमः ॥३९॥
*apsvagne sadhiṣṭava sauṣadhīranu rudhyase । garbhe san jāyase punaḥ ॥36॥*
*garbho'asyoṣadhīnāṁ garbho vanaspatīnām ।*
*garbho viśvasya bhūtasyāgne garbho'apāmasi ॥37॥*
*prasadya bhasmanā yonimapaścha pṛthivīmagne ।*
*saṁsṛjya mātṛbhiṣṭvaṁ jyotiṣmān punarāsadaḥ ॥38॥*
*punarāsadya sadanamapaścha pṛthivīmagne ।*
*śeṣe māturyathopasthe'natarasyāṁ śivatamaḥ ॥39॥*

य. (Yv.) १२.११६

तुभ्यं ताऽअंगिरस्तम विश्वाः सुक्षितयः पृथक्। अग्ने कामाय येमिरे ॥११६॥
*tubhyaṁ tā'aṁgirastama viśvāḥ sukṣitayaḥ pṛthak । agne kāmāya yemire ॥116॥*

य. (Yv.) १३.३७-४५

युक्ष्वा हि देवहूतमाँ२ऽअश्वाँ२ऽअग्ने रथीरिव । नि होता पूर्व्यः सदः ॥३७॥
सम्यक् स्रवन्ति सरितो न धेनाऽअन्तर्हृदा मनसा पूयमानाः ।
घृतस्य धाराऽअभिचाकशीमि हिरण्ययो वेतसो मध्येऽअग्नेः ॥३८॥
ऋचे त्वा रुचे त्वा भासे त्वा ज्योतिषे तवा ।
अभूदिदं विश्वस्य भुवनस्य वाजिनमग्नेर्वैश्वानरस्य च ॥३९॥
अग्निर्ज्योतिषा ज्योतिष्मान् रुक्मो वर्चसा वर्चस्वान् । सहस्रदाऽअसि सहस्राय त्वा ॥४०॥
आदित्यं गर्भं पयसा समङ्धि सहस्रस्य प्रतिमां विश्वरूपम् ।
परिवृङ्धि हरसा माभि मंस्थाः शतायुषं कृणुहि चीयमानः ॥४१॥
वातस्य जूतिं वरुणस्य नाभिमश्वं जज्ञानं सरिरस्य मध्ये ।
शिशुं नदीनां हरिमद्रिबुध्नमग्ने मा हिंसीः परमे व्योमन् ॥४२॥
अजस्रमिन्दुमरुषं भुरण्युमग्निमीडे पूर्वचित्तिं नमोभिः ।
स पर्वभिर्ऋतुशः कल्पमानो गां मा हिंसीरदितिं विराजम् ॥४३॥
वरूत्रीं त्वष्टुर्वरुणस्य नाभिमाविं जज्ञानां रजसः परस्मात् ।
महीं साहस्रीमसुरस्य मायामग्ने मा हिंसीः परमे व्योमन् ॥४४॥
योऽअग्निरग्नेरध्यजायत शोकात्पृथिव्याऽउत वा दिवस्परि ।
येन प्रजा विश्वकर्मा जजान तमग्ने हेडः परि ते वृणक्तु ॥४५॥
*yukṣavā hi devahūtamām̐2'aśvām̐2'agne rathīriva । ni hotā pūrvyaḥ sadaḥ ॥37॥*
*samyak sravanti sarito na dhenā'antarhṛdā manasā pūyamānāḥ ।*
*ghṛtasya dhārā'abhichākaśīmi hiraṇyayo vetaso madhye'agneḥ ॥38॥*
*ṛche tvā ruche tvā bhāse tvā jyotiṣe tavā ।*
*abhūdidaṁ viśvasya bhuvanasya vājinamagnervaiśvānarasya cha ॥39॥*
*agnirjyotiṣā jyotiṣmān rukmo varchasā varchasvān । sahasradā'asi sahasrāya tvā ॥40॥*
*ādityaṁ garbhaṁ payasā samaṅdhi sahasrasya pratimāṁ viśvarūpam ।*
*parivṛṅdhi harasā mābhi maṁsthāḥ śatāyuṣaṁ kṛṇuhi chīyamānaḥ ॥41॥*
*vātasya jūtiṁ varuṇasya nābhimaśvaṁ jajñānaṁ sarisya madhye ।*
*śiśuṁ nadīnāṁ harimadribudhnamagne mā hiṁsīḥ parame vyoman ॥42॥*
*ajasramindumaruṣaṁ bhuraṇyumagnimīḍe pūrvachittiṁ namobhiḥ ।*
*sa parvabhirṛtuśaḥ kalpamāno gāṁ mā hiṁsīraditiṁ virājam ॥43॥*
*varūtrīṁ tvaṣṭurvaruṇasya nābhimāviṁ jajñānāṁ rajasaḥ parasmāt ।*
*mahīṁ sāhasrīmasurasya māyāmagne mā hiṁsīḥ parame vyoman ॥44॥*
*yo'agninaragneradhyajāyata śokātpṛthivyā'uta vā divaspari ।*
*yena prajā viśvakarmā jajāna tamagne heḍaḥ pari te vṛṇaktu ॥45॥*

य. (Yv.) १३.४७-५१

इमं मा हिंसीर्द्विपादं पशुं सहस्राक्षो मेधाय चीयमानः ।
मयुं पशुं मेधमग्ने जुषस्व तेन चिन्वानस्तन्वो निषीद ।
मयुं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥४७॥
इमं मो हिंसीरेकशफं पशुं कनिक्रदं वाजिनं वाजिनेषु ।
गौरमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो निषीद ।
गौरं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्दतु ॥४८॥
इमं साहस्रं शतधारमुत्सं व्यच्यमानं सरिरस्य मध्ये ।
घृतं दुहानामदितिं जनायागने मा हिंसीः परमे व्योमन् ।
गवयमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो निषीद ।
गवयं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥४९॥
इममूर्णायुं वरुणस्य नाभिं त्वचं पशूनां द्विपदां चतुष्पदाम् ।
त्वष्टुः प्रजानां प्रथमं जनित्रमग्ने मा हिंसीः परमे व्योमन् ।
उष्ट्रमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो नि षीद।
उष्ट्रं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥५०॥
अजो ह्यग्नेरजनिष्ट शोकात्सोऽअपश्यज्जनितारमग्रे ।
तेन देवा देवतामग्रमायँस्तेन रोहमायन्नुप मेध्यासः ।
शरभमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो निषीद ।
शरभं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥५१॥

*imaṁ mā hiṁsīrdvipādaṁ paśuṁ sahasrākṣo medhāya chīyamānaḥ* ।
*mayuṁ paśuṁ medhamagne juṣasva tena chinvānastanvo niṣīda* ।
*mayuṁ te śugṛchchhatu yaṁ dviṣmastaṁ te śugṛchchhatu* ॥47॥
*imaṁ mo hiṁsīrekaśaphaṁ paśuṁ kanikradaṁ vājinaṁ vājineṣu* ।
*gauramāraṇyamanu te diśāmi tena chinvānastanvo niṣīda* ।
*gauraṁ te śugṛchchhatu yaṁ dviṣmastaṁ te śugṛchdatu* ॥48॥
*imaṁ sāhasraṁ śatadhāramutsaṁ vyachyamānaṁ sarirasya madhye* ।
*ghṛtaṁ duhānāmaditiṁ janāyāgane mā hiṁsīḥ parame vyoman* ।
*gavayamāraṇyamanu te diśāmi tena chinvānastanvo niṣīda* ।
*gavayaṁ te śugṛchchhatu yaṁ dviṣmastaṁ te śugṛchchhatu* ॥49॥
*imamūrṇāyuṁ varuṇasya nābhiṁ tvachaṁ paśūnāṁ dvipadāṁ chatuṣpadām* ।
*tvaṣṭuḥ prajānāṁ prathamaṁ janitramagne mā hiṁsīḥ parame vyoman* ।
*uṣṭramāraṇyamanu te diśāmi tena chinvānastanvo ni ṣīda* ।
*uṣṭraṁ te śugṛchchhatu yaṁ dviṣmastaṁ te śugṛchchhatu* ॥50॥
*ajo hyagnerajaniṣṭa śokātso'apaśyajjanitāramagre* ।
*tena devā devatāmagramāyaṁ̐stena rohamāyannupa medhyāsaḥ* ।
*śarabhamāraṇyamanu te diśāmi tena chinvānastanvo niṣīda* ।
*śarabhaṁ te śugṛchchhatu yaṁ dviṣmastaṁ te śugṛchchhatu* ॥51॥

२. सूर्यः (Sūryaḥ) - य. (Yv.) १३.४६

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणास्याग्नेः ।
आप्रा द्यावापृथिवीऽअन्तरिक्षं सूर्य्यऽआत्मा जगतस्तस्थुषश्च ॥४६॥
*chitraṁ devānāmudagādanīkaṁ chakṣurmitrasya varuṇāsyāgneḥ* ।
*āprā dyāvāpṛthivī'antarikṣaṁ sūryya'ātmā jagatastasthuṣaścha* ॥46॥

## ६०१. विरुप आंगिरसः (Virupa Āṁgirasaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ८.४३.१-३३; ८.४४.१-३०; सा. (Sv.) १५३२-१५३४; १५४१-१५४३; १६४८-१६५०; १७११-१७१३

ऋ. (Rv.) ८.४३.१-३३

इमे विप्रस्य वेधसोऽग्नेरस्तृतयज्वनः। गिरः स्तोमास ईरते ॥१॥
अस्मै तं प्रतिर्हयते जातवेदो विचर्षणे। अग्ने जनामि सुष्टुतिम् ॥२॥

आरोकाइव घेदह तिग्मा अग्ने तव त्विषः। दद्भिर्वनानि वप्सति ॥३॥
हरयो धूमकेतवो वातजूता उप द्यवि। यतन्ते वृथगग्नयः ॥४॥
एते त्ये वृथगग्नय इद्धासः समदृक्षत। उषसामिव केतवः ॥५॥
कृष्णा रजांसि पत्सुतः प्रयाणे जातवेदसः। अग्निर्यद्रोधति क्षमि ॥६॥
धासिं कृण्वान ओषधीर्वप्सदग्निर्न वायति। पुनर्यन्तरुणीरपि ॥७॥
जिह्वाभिरह नन्नमदर्चिषा जंजणाभवन्। अग्निर्वनेषु रोचते ॥८॥
अप्स्वग्ने सधिष्टव सौपधीरनु रुध्यसे। गर्भे संजायसे पुनः ॥९॥
उदग्ने तव तद् घृतादर्ची रोचत आहुतम्। निंसानं जुह्वो३ मुखे ॥१०॥
उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे। स्तोमैर्विधेमाग्नये ॥११॥
उत त्वा नमसा वयं होतर्वरेण्यक्रतो। अग्ने समिद्भिरीमहे ॥१२॥
उत त्वा भृगुवच्छुचे मनुष्वदग्न आहुत। अङ्गिरस्वद्धवामहे ॥१३॥
त्वं ह्यग्ने अग्निना विप्रो विप्रेण सन्त्सता। सखा सख्या समिध्यसे ॥१४॥
स त्वं विप्राय दाशुषे रयिं देहि सहस्रिणम्। अग्ने वीरवतीमिषम् ॥१५॥
अग्ने भ्रातः सहस्कृत रोहिदश्व शुचिव्रत। इमं स्तोमं जुषस्व मे ॥१६॥
उत त्वाग्ने मम स्तुतो वाश्राय प्रतिहर्यते। गोष्ठं गाव इवाशत ॥१७॥
तुभ्यं ता अंगिरस्तम विश्वाः सुक्षितयः पृथक्। अग्ने कामाय येमिरे ॥१८॥
अग्निं धीभिर्मनीषिणो मेधिरासो विपश्चितः। अद्मसद्याय हिन्विरे ॥१९॥
तं त्वाजम्मेषु वाजिनं तन्वाना अग्ने अध्वरम्। वह्निं होतारमीळते ॥२०॥
पुरुत्रा हि सदृङ्ङसि विशो विश्वा अनु प्रभुः। समत्सु त्वा हवामहे ॥२१॥
तं त्वा वयं हवामहे शृण्वन्तं जातवेदसम्। अग्ने घ्नन्तमप द्विषः ॥२३॥
विशां राजानमद्भुतमध्यक्षं धर्मणामिमम्। अग्निमीळे स उ श्रवत् ॥२४॥
अग्निं विश्वायुवेपसं मर्यं न वाजिनं हितम्। सप्तिं न वाजयामसि ॥२५॥
घ्नन्मृध्राण्यप द्विषो दहन् रक्षांसि विश्वहा। अग्ने तिग्मेन दीदिहि ॥२६॥
यं त्वा जनास इन्धते मनुष्वदंगिरस्तम्। अग्ने स बोधि म वचः ॥२७॥
यदग्ने दिविजा अस्यप्सुजा वा सहस्कृत। तं त्वा गीर्भिर्हवामहे ॥२८॥
तुभ्यं धेत्ते जना इमे विश्वाः सुक्षितयः पृथक्। धासिं हिन्वत्यत्तवे ॥२९॥
ते घेदग्ने स्वाध्योऽहा विश्वा नृचक्षसः। तरन्तः स्याम दुर्गहा ॥३०॥
अग्निं मन्द्रं पुरुप्रियं शीरं पावकशोचिषम्। हृद्भिर्मन्द्रेभिरीमहे ॥३१॥
स त्वमग्ने विभावसुः सृजन्त्सूर्यो न रश्मिभिः। शर्धन्तमांसि जिघ्नसे ॥३२॥
तत्ते सहस्व ईमहे दात्रं यन्नोपदस्यति। त्वदग्ने वार्यं वसु ॥३३॥

*ime viprasya vedhaso'gnerastṛtayajvanaḥ | giraḥ stomāsa īrate ||1 ||*
*asmai taṁ pratirhayate jātavedo vicharṣaṇe | agne janāmi suṣṭutim ||2 ||*
*ārokāiva ghedaha tigmā agne tava tviṣaḥ | dadbhirvanāni vapsati ||3 ||*
*harayo dhūmaketavo vātajūtā upa dyavi | yatante vṛthagannayaḥ ||4 ||*
*ete tye vṛthagagnaya iddhāsaḥ samadṛkṣata | uṣasāmiva ketavaḥ ||5 ||*
*kṛṣṇā rajāṁsi patsutaḥ prayāṇe jātavedasaḥ | agniryadrodhati kṣami ||6 ||*
*dhāsiṁ kṛṇvāna oṣadhīrvapsadagnirna vāyati | punaryantaruṇīrapi ||7 ||*
*jihvābhiraha nannamadirchipā jaṁjaṇābhavan | agnirvaneṣu rochate ||8 ||*
*apsvagne sadhiṣṭava saupadhīranu rudhyase | garbhe saṁjāyase punaḥ ||9 ||*
*udagne tava tad ghṛtādarchī rochata āhutam | niṁsānaṁ juhvo3 mukhe ||10 ||*
*ukṣānnāya vaśānnāya somapṛṣṭhāya vedhase | stomairvidhemāgnaye ||11 ||*
*uta tvā namasā vayaṁ hotarvareṇyakrato | agne samidbhirīmahe ||12 ||*
*uta tvā bhṛguvachchhuche manuṣvadagna āhuta | aṅgirasvaddhavāmahe ||13 ||*
*tvaṁ hyagne agninā vipro vipreṇa santsatā | sakhā sakhyā samidhyase ||14 ||*
*sa tvaṁ viprāya dāśuṣe rayiṁ dehi sahasriṇam | agne vīravatīmiṣam ||15 ||*
*agne bhrātaḥ sahaskṛta rohidaśva śuchivrata | imaṁ stomaṁ juṣasva me ||16 ||*
*uta tvāgne mama stuto vāśrāya pratiharyate | goṣṭhaṁ gāva ivāśata ||17 ||*
*tubhyaṁ tā aṁgirastama viśvāḥ sukṣitayaḥ pṛthak | agne kāmāya yemire ||18 ||*
*agiṁna dhībhirmanīṣiṇo medhirāso vipaśchitaḥ | admasadyāya hinvire ||19 ||*
*taṁ tvājammeṣu vājinaṁ tanvānā agne adhvaram | vahniṁ hotāramīḷate ||20 ||*

*purutrā hi sadṛṅṅasi viśo viśvā anu prabhuḥ | samatsu tvā havāmahe ||21 ||*
*taṁ tvā vayaṁ havāmahe śṛṇvantaṁ jātavedasam | agne ghnantamapa dviṣaḥ ||23 ||*
*viśāṁ rājānamadbhutamadhyakṣaṁ dharmaṇāmimam | agnimīḻe sa u śravat ||24 ||*
*agiṁna viśvāyuvepasaṁ maryaṁ na vājinaṁ hitam | sapiṁta na vājayāmasi ||25 ||*
*ghnanmṛdhrāṇyapa dviṣo dahan rakṣāṁsi viśvahā | agne tigmena dīdihi ||26 ||*
*yaṁ tvā janāsa indhate manuṣvadaṁgirastam | agne sa bodhi ma vachaḥ ||27 ||*
*yadagne divijā asyapsujā vā sahaskṛta | taṁ tvā gīrbhihavāmahe ||28 ||*
*tubhyaṁ dhette janā ime viśvāḥ sukṣitayaḥ pṛthak | dhāsiṁ hinvatyattave ||29 ||*
*te ghedagne svādhyo'hā viśvā nṛchakṣasaḥ | tarantaḥ syāma durgahā ||30 ||*
*agiṁna mandraṁ purupriyaṁ śīraṁ pāvakaśochiṣam | hṛdbhirmandrebhirīmahe ||31 ||*
*sa tvamagne vibhāvasuḥ sṛjantsūryo na raśmibhiḥ | śardhantamāṁsi jighnase ||32 ||*
*tatte sahasva īmahe dātraṁ yannopadasyati | tvadagne vāryaṁ vasu ||33 ||*

ऋ. (Rv.) ८.४४.१-३०

समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम्। अस्मिन् हव्या जुहोतन ॥१॥
अग्ने स्तोमं जुषस्व मे वर्धस्वानेन मन्मना। प्रति सूक्तानि हर्य नः ॥२॥
अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे। देवाँ आ सादयादिह ॥३॥
उत्ते बृहन्तो अर्चयः समिधानस्य दीदिवः। अग्ने शुक्रास ईरते ॥४॥
उप त्वा जुह्वो३ मम घृताचीर्यन्तु हर्यत। अग्ने हव्या जुषस्व नः ॥५॥
मन्द्रं होतारमृत्विजं चित्रभानुं विभावसुम्। अग्निमीळे स उ श्रवत् ॥६॥
प्रत्नं होतारमीड्यं जुष्टमग्निं कविक्रतुम्। अध्वराणामभिश्रियम् ॥७॥
जुषाणो अंगिरस्तमेमा हव्यान्यानुषक्। अग्ने यज्ञं नय ऋतुथा ॥८॥
समिधान उ सन्त्य शुक्रशोच इहा वह। चिकित्वान् दैव्यं जनम् ॥९॥
विप्रं होतारमद्रुहं धूमकेतुं विभावसुम्। यज्ञानां केतुमीमहे ॥१०॥
अग्ने नि पाहि नस्त्वं प्रति ष्म देव रीषतः। भिन्धि द्वेषः सहस्कृत ॥११॥
अग्निः प्रत्नेन मन्मना शुम्भानस्तन्वं१ स्वाम्। कविर्विप्रेण वावृधे ॥१२॥
ऊर्जो नपातमा हुवेऽग्निं पावकशोचिषम्। अस्मिन्यज्ञे स्वध्वरे ॥१३॥
स नो मित्रमहस्त्वमग्ने शुक्रेण शोचिषा। देवैरा सत्सि बर्हिषि ॥१४॥
यो अग्निं तन्वो३ दमे देवं मर्तः सपर्यति। तस्मा इद्दीदयद्वसु ॥१५॥
अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपां रेतांसि जिन्वति ॥१६॥
उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते। तव ज्योतीष्यर्चयः ॥१७॥
ईशिषे वार्यस्य हि दात्रस्याग्ने स्वर्पतिः। स्तोता स्यां तव शर्मणि ॥१८॥
त्वामग्ने मनीषिणस्त्वां हिन्वन्ति चित्तिभिः। त्वां वर्धन्तु नो गिरः ॥१९॥
अदब्धस्य स्वधावतो दूतस्य रेभतः सदा। अग्नेः सख्यं वृणीमहे ॥२०॥
अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः कविः। शुची रोचत आहुतः ॥२१॥
उत त्वा धीतयो मम गिरो वर्धन्तु विश्वहा। अग्ने सख्यस्य बोधि नः ॥२२॥
यदग्ने स्यामहं त्वं त्वं वा घा स्या अहम्। स्युष्टे सत्या इहाशिषः ॥२३॥
वसुर्वसुपतिर्हि कमस्यग्ने विभावसुः। स्याम ते सुमतावपि ॥२४॥
अग्ने धृतव्रताय ते समुद्रायेव सिन्धवः। गिरो वाश्रास ईरते ॥२५॥
युवानं विश्पतिं कविं विश्वादं पुरुवेपसम्। अग्निं शुम्भामि मन्मभिः ॥२६॥
यज्ञानां रथ्ये वयं तिग्मजम्भाय वीळवे। स्तोमैरिषेमाग्नये ॥२७॥
अयमग्ने त्वे अपि जरिता भूतु सन्त्य। तस्मै पावक मृळय ॥२८॥
धीरो ह्यस्यद्मसद् विप्रो न जिगृविः सदा। अग्ने दीदयसि द्यवि ॥२९॥
पुराग्ने दुरितेभ्यः पुरा मृध्रेभ्यः कवे। प्र ण आयुर्वसो तिर ॥३०॥

*samidhāgiṁna duvasyata ghṛtairbodhayatātithim | asmin havyā juhotana ||1 ||*
*agne stomaṁ juṣasva me vardhasvānena manmanā | prati sūktāni harya naḥ ||2 ||*
*agiṁna dūtaṁ puro dadhe havyavāhamupa bruve | devāṅ ā sādayādiha ||3 ||*
*utte bṛhanto archayaḥ samidhānasya dīdivaḥ | agne śukrāsa īrate ||4 ||*
*upa tvā juhvo3 mama ghṛtāchīryantu haryata | agne havyā juṣasva naḥ ||5 ||*
*mandraṁ hotāramṛtvijaṁ chitrabhānuṁ vibhāvasum | agnimīḻe sa u śravat ||6 ||*
*pratnaṁ hotāramīḍyaṁ juṣṭamagiṁna kavikratum | adhvarāṇāmabhiśriyam ||7 ||*

*juṣāṇo aṁgirastamemā havyānyānuṣak | agne yajñaṁ naya ṛtuthā ||8 ||*
*samidhāna u santya śukraśocha ihā vaha | chikitvān daivyaṁ janam ||9 ||*
*vipraṁ hotāramadruhaṁ dhūmaketuṁ vibhāvasum | yajñānāṁ ketumīmahe ||10 ||*
*agne ni pāhi nastvaṁ prati ṣma deva rīṣataḥ | bhindhi dveṣaḥ sahaskṛta ||11 ||*
*agniḥ pratnena manmanā śumbhānastanvaṁ1 svām | kavirvipreṇa vāvṛdhe ||12 ||*
*ūrjo napātamā huve'giṁna pāvakaśochiṣam | asminyajñe svadhvare ||13 ||*
*sa no mitramahastvamagne śukreṇa śochiṣā | devairā satsi barhiṣi ||14 ||*
*yo agiṁna tanvo3 dame devaṁ martaḥ saparyati | tasmā iddīdayadvasu ||15 ||*
*agnirmūrdhā divaḥ kakutpatiḥ pṛthivyā ayam | apāṁ retāṁsi jinvati ||16 ||*
*udagne śuchayastava śukrā bhrājanta īrate | tava jyotīṣyarchayaḥ ||17 ||*
*īśiṣe vāryasya hi dātrasyāgne svarpatiḥ | stotā syāṁ tava śarmaṇi ||18 ||*
*tvāmagne manīṣiṇastvāṁ hinvanti chittibhiḥ | tvāṁ vardhantu no giraḥ ||19 ||*
*adabdhasya svadhāvato dūtasya rebhataḥ sadā | agneḥ sakhyaṁ vṛṇīmahe ||20 ||*
*agniḥ śuchivratatamaḥ śuchirvipraḥ śuchiḥ kaviḥ | śuchī rochata āhutaḥ ||21 ||*
*uta tvā dhītayo mama giro vardhantu viśvahā | agne sakhyasya bodhi naḥ ||22 ||*
*yadagne syāmahaṁ tvaṁ tvaṁ vā ghā syā aham | syuṣṭe satyā ihāśiṣaḥ ||23 ||*
*vasurvasupatirhi kamasyagne vibhāvasuḥ | syāma te sumatāvapi ||24 ||*
*agne dhṛtavratāya te samudrāyeva sindhavaḥ | giro vāśrāsa īrate ||25 ||*
*yuvānaṁ viśpatiṁ kaviṁ viśvādaṁ puruvepasam | agiṁna śumbhāmi manmabhiḥ ||26 ||*
*yajñānāṁ rathye vayaṁ tigmajambhāya vīḻave | stomairiṣemāgnaye ||27 ||*
*ayamagne tve api jaritā bhūtu santya | tasmai pāvaka mṛḻaya ||28 ||*
*dhīro hyasyadmasad vipro na jigṛviḥ sadā | agne dīdayasi dyavi ||29 ||*
*purāgne duritebhyaḥ purā mṛdhrebhyaḥ kave | pra ṇa āyurvaso tira ||30 ||*

सा. (Sv.) १५३२-१५३४

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपां रेतांसि जिन्वति ॥१॥
ईशिषे वार्यस्य हि दात्रस्याग्ने स्वः पतिः। स्तोता स्यां तव शर्मणि ॥२॥
उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते। तव ज्योतींष्यर्चयः ॥३॥
*agnirmūrdhā divaḥ kakutpatiḥ pṛthivyā ayam | apāṁ retāṁsi jinvati ||1 ||*
*īśiṣe vāryasya hi dātrasyāgne svaḥ patiḥ | stotā syāṁ tava śarmaṇi ||2 ||*
*udagne śuchayastava śukrā bhrājanta īrate | tava jyotīṁṣyarchayaḥ ||3 ||*

सा. (Sv.) १५४१-१५४३

उत्त बृहन्तो अर्चयः समिधानस्य दीदिवः। अग्ने शुक्रास ईरते ॥१॥
उप त्वा जुह्व३ मम घृताचीर्यन्तु हर्यत। अग्ने हव्या जुषस्व नः ॥२॥
मन्द्रं होतारमृत्विजं चित्रभानुं विभावसुम्। अग्निमीडे स उ श्रवत् ॥३॥
*utta bṛhanto archayaḥ samidhānasya dīdivaḥ | agne śukrāsa īrate ||1 ||*
*upa tvā juhṇa3 mama ghṛtāchīryantu haryata | agne havyā juṣasva naḥ ||2 ||*
*mandraṁ hotāramṛtvijaṁ chitrabhānuṁ vibhāvasum | agnimīue sa u śravat ||3 ||*

सा. (Sv.) १६४८-१६५०

नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः। अमैरमित्रमर्दय ॥१॥
कुवित्सु नो गविष्टयेऽग्ने संवेषिषो रयिम्। उरुकृदुरु णस्कृधि ॥२॥
मा नो अग्ने महाधने परा वर्ग्भारभृद्यथा। संवर्गं सं रयिं जय ॥३॥
*namaste agna ojase gṛṇanti deva kṛṣṭayaḥ | amairamitramardaya ||1 ||*
*kuvitsu no gaviṣṭaye'gne saṁveṣiṣo rayim | urukṛduru ṇaskṛdhi ||2 ||*
*mā no agne mahādhane parā vargbhārabhṛdyathā | saṁvargaṁ saṁ rayiṁ jaya ||3 ||*

सा. (Sv.) १७११-१७१३

अग्निः प्रत्नेन जन्मना शुम्भानस्तन्वां३ स्वाम्। कविर्विप्रेण वावृधे ॥१॥
ऊर्जो नपातमा हुवेऽग्निं पावकशोचिषम्। अस्मिन्यज्ञे स्वध्वरे ॥२॥
स नो मित्रमहस्त्वमग्ने शुक्रेण शोचिषा। देवैरा सत्सि बर्हिषि ॥३॥
*agniḥ pratnena janmanā śumbhānastanvāṁ3 svām | kavirvipreṇa vāvṛdhe ||1 ||*
*ūrjo napātamā huve'giṁna pāvakaśochiṣam | asminyajñe svadhvare ||2 ||*
*sa no mitramahastvamagne śukreṇa śochiṣā | devairā satsi barhiṣi ||3 ||*

२. इन्द्रः (Indraḥ) - सा. (Sv.) १६४५-१६४७

तव त्यदिन्द्रियं बृहत्तव दक्षमुत क्रतुम्। वज्रं शिशाति धिषणा वरेण्यम् ॥४॥
तव द्यौरिन्द्र पौंस्यं पृथिवी वर्धति श्रवः। त्वामापः पर्वतासश्च हिन्विरे ॥५॥
त्वां विष्णुर्बृहन्क्षयो मित्रो गृणाति वरुणः। त्वां शुर्द्धो मदत्यनु मारुतम् ॥६॥
*tava tyadindriyaṁ bṛhattava dakṣamuta kratum / vajraṁ śiśāti dhiṣaṇā vareṇyam //4 //*
*tava dyaurindra pauṁsyaṁ pṛthivī vardhati śravaḥ / tvāmāpaḥ parvatāsaścha hinvire //5 //*
*tvāṁ viṣṇurbṛhankṣayo mitro gṛṇāti va3ṇaḥ / tvāṁ śurddho madatyanu mārutam //6 //*

६०२. विरुप अंगिरसः (साग्री. ऋसर्व.८.७५.१०); विश्वरुप आंगिरसः (सार्षेदी.); आयुङ्क्षाही (सास्वा.) (Virupa Aṁgirasaḥ [Ssb. Rss. 8.75.10]; Viśvarupa Āṁgirasaḥ [Sad.]; Āyuṅkṣavāhī [Sas.])

१. अग्निः (Agniḥ) - सा. (Sv.) ११

नमस्ते अग्ने ओजसे गृणन्ति देव कृष्टयः। अमैरमित्रमर्दय ॥१॥
*namaste agne ojase gṛṇanti deva kṛṣṭayaḥ / amairamitramardaya //1 //*

## ६०३. विरुपाक्षः (Virupākṣaḥ)

१. अग्निः (Agniḥ) - य. (Yv.) १२.३०

समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम्। आस्मिन् हव्या जुहोतन ॥३०॥
*samidhāgniṁ duvasyata ghṛtairbodhayatātithim / āsmin havyā juhotana //30 //*

## ६०४. विवस्वान (Vivasvāna)

१. परमेश्वरः (Parameśvaraḥ) - य. (Yv.) ८.३६

यस्मान्न जातः परोऽअन्योऽअस्ति यऽआविवेश भुवनानि विश्वा ।
प्रजापतिः प्रजया सं रराणस्त्रीणि ज्योतींषि सचते स षोडशी ॥३६॥
*yasmānna jātaḥ paro'anyo'asti ya'āviveśa bhuvanāni viśvā /*
*prajāpatiḥ prajayā saṁ rarāṇastrīṇi jyotīṁṣi sachate sa ṣoḍaśī //36 //*

२. सम्राड्माण्डलिकौ राजानौ (Samrāḍmāṇḍalikau Rājānau) - य. (Yv.) ८.३७

इन्द्रश्च सम्राड् वरुणश्च राजा तौ ते भक्षं चक्रतुरग्रऽएतम् ।
तयोरहमनु भक्षं भक्षयामि वाग्देवी जुषाणा सोमस्य तृप्यतु सह प्राणेन स्वाहा ॥३७॥
*indraścha samrāḍ varuṇaścha rājā tau te bhakṣaṁ chakraturagra'etam /*
*tayorahamanu bhakṣaṁ bhakṣayāmi vāgdevī juṣāṇā somasya tṛpyatu saha prāṇena svāhā //37 //*

## ६०५. विवस्वान्आदित्यः (Vivasvānādityaḥ)

१. हविर्धाने (Havirdhāne) - ऋ. (Rv.) १०.१३.१-५

युजे वां ब्रह्म पूर्व्यं नमोभिर्वि श्लोक एतु पथ्येव सूरेः ।
शृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः ॥१॥
यमे इव यतमाने यदैतं प्र वां भरन्मानुषा देवयन्तः ।
आ सीदतं स्वमु लोकं विदाने स्वास्थे भवतमिन्दवे नः ॥२॥
पंच पदानिं रुपो अन्वरोहं चतुष्पदीमन्वेमि व्रतेन ।
अक्षरेण प्रति मिम एतामृतस्य नाभावधि सं पुनामि ॥३॥
देवेभ्यः कमवृणीत मृत्यु प्रजायै कममृतं नावृणीत ।
बृहस्पतिं यज्ञमकृण्वत ऋषिं प्रियां यमस्तन्वं१ प्रारिरेचीत् ॥४॥
सप्त क्षरन्ति शिशवे मरुत्वते पित्रे पुत्रासो अप्यवीवतन्नृतम् ।
उभे इदस्योभयस्य राजत उभे यतेते उभयस्य पुष्यतः ॥५॥
*yuje vāṁ brahmā pūrvyaṁ namobhirvi śloka etu pathyeva sūreḥ /*
*śṛṇvantu viśve amṛtasya putrā ā ye dhāmāni divyāni tasthuḥ //1 //*
*yame iva yatamāne yadaitaṁ pra vāṁ bharanmānuṣā devayantaḥ /*
*ā sīdataṁ svamu lokaṁ vidāne svāsthe bhavatamindave naḥ //2 //*
*paṁcha padāniṁ rupo anvarohaṁ chatuṣpadīmanvemi vratena /*

*akṣareṇa prati mima etāmṛtasya nābhāvadhi saṁ punāmi //3 //*
*devebhyaḥ kamavṛṇīta mṛtyuṁ prajāyai kamamṛtaṁ nāvṛṇīta /*
*bṛhaspatiṁ yajñamakṛṇvata ṛṣiṁ priyāṁ yamastanvaṁ1 prārirechīt //4 //*
*sapta kṣaranti śiśave marutvate pitre putrāso apyavīvatannṛtam /*
*ubhe idasyobhayasya rājata ubhe yatete ubhayasya puṣyataḥ //5 //*

## ६०६. विवृहा काश्यपः (Vivṛhā Kāśyapaḥ)

१. यक्ष्मघ्नम् (Yakṣamaghnam) - ऋ. (Rv.) १०.१६३.१-६

अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि ।
यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया वि वृहामि ते ॥१॥
ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात् ।
यक्ष्मं दोष्ण्य१मंसाभ्यां बाहुभ्यां वि वृहामि ते ॥२॥
आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोर्हृदयादधि। यक्ष्मं मतस्नाभ्यां यक्नः प्लाशिभ्यो वि वृहामि ते ॥३॥
ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्याम् ।
यक्ष्मं श्रोणिभ्यां भासदाद्भंससो वि वृहामि ते ॥४॥
मेहनाद्वनंकरणाल्लोमभ्यस्ते नखेभ्यः । यक्ष्मं सर्वस्मादात्मनस्तमिदं वि वृहामि ते ॥५॥
अंगादंगाल्लोम्नोलोम्नो जातं पर्वणिपर्वणि ।
यक्ष्मं सर्वस्मादात्मनस्तमिदं वि वृहामि ते ॥६॥

*akṣībhyāṁ te nāsikābhyāṁ karṇābhyāṁ chhubukādadhi /*
*yakṣamaṁ śīrṣaṇyaṁ mastiṣkājjihvāyā vi vṛhāmi te //1 //*
*grīvābhyasta uṣṇihābhyaḥ kīkasābhyo anūkyāt /*
*yakṣamaṁ doṣṇya1maṁsābhyāṁ bāhubhyāṁ vi vṛhāmi te //2 //*
*āntrebhyaste gudābhyo vaniṣṭhorhṛdayādadhi /*
*yakṣamaṁ matasnābhyāṁ yaknaḥ plāśibhyo vi vṛhāmi te //3 //*
*ūrubhyāṁ te aṣṭhīvadbhyāṁ pāṣirṇabhyāṁ prapadābhyām /*
*yakṣamaṁ śreṇibhyāṁ bhāsadādbhaṁsaso vi vṛhāmi te //4 //*
*mehanādvanaṁkaraṇāllomabhyaste nakhebhyaḥ /*
*yakṣamaṁ sarvasmādātmanastamidaṁ vi vṛhāmi te //5 //*
*aṁgādaṁgāllomnolomno jātaṁ parvaṇiparvaṇi /*
*yakṣamaṁ sarvasmādātmanastamidaṁ vi vṛhāmi te //6 //*

## ६०७. विश्वकर्मा (Viśvakarmā)

१. अग्निः (Agniḥ) - य. (Yv.) १८.५८

यदाकूतात्समसुस्रोद्धृदो वा मनसो वा संभृतं चक्षुषो वा ।
तदन्तु प्रेत सुकृतामु लोकं यत्रऽऋषयो जग्मुः प्रथमजाः पुराणाः ॥५८॥
*yadākūtātsamasusroddhṛdo vā manaso vā saṁbhṛtaṁ chakṣuṣo vā /*
*tadantu preta sukṛtāmu lokaṁ yatra'ṛṣayo jagmuḥ prathamajāḥ purāṇāḥ //58 //*

२ण् प्रजापतिः (Prajāpatiḥ) . यण् १८ण्५९

एतं सधस्थ परि ते ददामि यमावहाच्छेवधि जातवेदाः ।
अन्वागनता यज्ञपतिर्वोऽअत्र तं स्म जानीत परमे व्योमन् ॥५९॥
*etaṁ sadhastha pari te dadāmi yamāvahāchchhevadhi jātavedāḥ /*
*anvāganatā yajñapatirvo'atra taṁ sma jānīta parame vyoman //59 //*

३. यज्ञः (Yajñaḥ) - य. (Yv.) १८.६४-६५

यद्दत्तं यत्परादानं यत्पूर्त्तं याश्च दक्षिणाः। तदग्निर्वैश्वकर्मणः स्वर्देवेषु नो दधत् ॥६४॥
यत्र धाराऽअनपेता मधोर्घृतस्य च याः। तदग्निर्वैश्वकर्मणः स्वर्देवेषु नो दधत् ॥६५॥
*yaddattaṁ yatparādānaṁ yatpūrttaṁ yāścha dakṣiṇāḥ /*
*tadagnirvaiśvakarmaṇaḥ svardeveṣu no dadhat //64 //*
*yatra dhārā'anapetā madhorghṛtasya cha yāḥ /*
*tadagnirvaiśvakarmaṇaḥ svardeveṣu no dadhat //65 //*

४. वायुः (Vāyuḥ) - य. (Yv.) १४.१२

विश्वकर्मा तवा सादयत्वन्तरिक्षस्य पृष्ठे व्यचस्वतीं प्रथस्वतीमन्तरिक्षं यच्छान्तरिक्षं दृंहान्तरिक्षं मा हिंसीः। विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय। वायुष्ट्वाभिपातु मह्या स्वस्त्या छर्दिषा शन्तमेन तया देवतयांगिरस्वद् ध्रुवा सीद ॥१२॥

*viśvakarmā tavā sādayatvantarikṣasya pṛṣṭhe vyachasvatīṁ prathasvatīmantarikṣaṁ yachchhāntarikṣaṁ dṛṁhāntarikṣaṁ mā hiṁsīḥ । viśvasmai prāṇāyāpānāya vyānāyodānāya pratiṣṭhāyai charitrāya । vāyuṣṭvābhipātu mahyā svastyā chhardiṣā śantamena tayā devatayāṁgirasvad dhruvā sīda ॥12॥*

## ६०८. विश्वकर्मा भौवनः (Viśvakarmā Bhauvanaḥ)

१. विश्वकर्मा (Viśvakarmā) - ऋ. (Rv.) १०.८१.१-७; १०.८२.१-७; सा. (Sv.) १५८९; य. (Yv.) १७.१७-३२

ऋ. (Rv.) १०.८१.१-७

य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत् पिता नः ।
स आशिषा द्रविणमिच्छमानः प्रथमच्छदवराँ आ विवेश ॥१॥
किं स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथासीत् ।
यतो भूमि जनयन्विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः ॥२॥
विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः ॥३॥
किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः ।
मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन् ॥४॥
या ते धामानि परमाणि यावमा या मध्यमा विश्वकर्मन्नुतेमा ।
शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तन्वं वृधानः ॥५॥
विश्वकर्मन हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम् ।
मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु ॥६॥
वाचस्पति विश्वकर्माणमूतये मनोजुवं वाजे अद्या हुवेम ।
स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्मा ॥७॥

*ya imā viśvā bhuvanāni juhvadṛṣirhotā nyasīdat pitā naḥ ।*
*sa āśiṣā draviṇamichchhamānaḥ prathamachchhadavarāṁ ā viveśa ॥1॥*
*kiṁ svidāsīdadhiṣṭhānamārambhaṇaṁ katamatsvitkathāsīt ।*
*yato bhūmi janayanviśvakarmā vi dyāmaurṇonmahinā viśvachakṣāḥ ॥2॥*
*viśvataśchakṣuruta viśvatomukho viśvatobāhuruta viśvataspāt ।*
*saṁ bāhubhyāṁ dhamati saṁ patatrairdyāvābhūmī janayandeva ekaḥ ॥3॥*
*kiṁ svidvanaṁ ka u sa vṛkṣa āsa yato dyāvāpṛthivī niṣṭatakṣuḥ ।*
*manīṣiṇo manasā pṛchchhatedu tadyadadhyatiṣṭhadbhuvanāni dhārayan ॥4॥*
*yā te dhāmāni paramāṇi yāvamā yā madhyamā viśvakarmannutemā ।*
*śikṣā sakhibhyo haviṣi svadhāvaḥ svayaṁ yajasva tanvaṁ vṛdhānaḥ ॥5॥*
*viśvakarmana haviṣā vāvṛdhānaḥ svayaṁ yajasva pṛthivīmuta dyām ।*
*muhyantvanye abhito janāsa ihāsmākaṁ maghavā sūrirastu ॥6॥*
*vāchaspati viśvakarmāṇamūtaye manojuvaṁ vāje adyā huvema ।*
*sa no viśvāni havanāni joṣadviśvaśambhūravase sādhukarmā ॥7॥*

ऋ. (Rv.) १०.८२.१-७

चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नमन्माने ।
यदेदन्ता अदद्दहन्त पूर्व आदिद् द्यावापृथिवी अप्रथेताम् ॥१॥
विश्वकर्मा विमना आद्विहाया धाता विधाता परमोत संदृक् ।
तेषामिष्टानि समिषा मदन्ति यत्रा सप्तऋषीन्पर एकमाहुः ॥२॥
यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा ।
यो देवानां नामधा एक एव तं सम्प्रश्नं भुवना यन्त्यन्या ॥३॥
त आयजन्त द्रविणं समस्मा ऋषयः पूर्वे जरितारो न भूना ।
असूर्ते सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि ॥४॥

परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति ।
कं स्विद्गर्भं प्रथमं दध्र आपो यत्र देवाः समपश्यन्त विश्वे ॥५॥
तमिद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे ।
अजस्य नाभावध्येकमर्पितं यस्मिन्विश्वानि भुवनानि तस्थुः ॥६॥
न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव ।
नीहारेण प्रवृता जल्प्या चासुतृप उक्थशासश्चरन्ति ॥७॥
*chakṣuṣaḥ pitā manasā hi dhīro ghṛtamene ajanannamanmāne* /
*yadedantā adadṛhanta pūrva ādid dyāvāpṛthivī aprathetām* //1 //
*viśvakarmā vimanā ādvihāyā dhātā vidhātā paramota saṁdṛk* /
*teṣāmiṣṭāni samiṣā madanti yatrā saptaṛṣīnpara ekamāhuḥ* //2 //
*yo naḥ pitā janitā yo vidhātā dhāmāni veda bhuvanāni viśvā* /
*yo devānāṁ nāmadhā eka eva taṁ sampraśnaṁ bhuvanā yantyanyā* //3 //
*ta āyajanta draviṇaṁ samasmā ṛṣayaḥ pūrve jaritāro na bhūnā* /
*asūrte sūrte rajasi niṣatte ye bhūtāni samakṛṇvannimāni* //4 //
*paro divā para enā pṛthivyā paro devebhirasurairyadasti* /
*kaṁ svidgarbhaṁ prathamaṁ dadhra āpo yatra devāḥ samapaśyanta viśve* //5 //
*tamidgarbhaṁ prathamaṁ dadhra āpo yatra devāḥ samagachchhanta viśve* /
*ajasya nābhāvadhyekamarpitaṁ yasminviśvāni bhuvanāni tasthuḥ* //6 //
*na taṁ vidātha ya imā jajānānyadyuṣmākamantaraṁ babhūva* /
*nīhāreṇa pravṛtā jalpyā chāsutṛpa ukthaśāsaścharanti* //7 //

सा. (Sv.) १५८९

विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व तन्वां३ स्वा हि ते ।
मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु ॥१॥
*viśvakarmanhaviṣā vāvṛdhānaḥ svayaṁ yajasva tanvāṁ3 svā hi te* /
*muhyantvanye abhito janāsa ihāsmākaṁ maghavā sūrirastu* //1 //

य. (Yv.) १७.१७-३२

यऽइमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत्पिता नः ।
सं आशिषा द्रविणामिच्छमानः प्रथमच्छदवराँ२ऽआविवेश ॥१७॥
किं स्विदासीदधिष्ठानमारम्भणं कतमत् स्वित्कथासीत् ।
यतो भूमि जनयन्विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः ॥१८॥
विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देवऽएकः ॥१९॥
किं स्विद्वनं कऽउ स वृक्षऽआस यतो द्यावापृथिवी निष्टतक्षुः ।
मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन् ॥२०॥
या ते धामानि परमाणि यावमा या मध्यमा विश्वकर्मन्नुतेमा ।
शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तन्वं वृधानः ॥२१॥
विश्वकर्मन् हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम् ।
मुह्यन्त्वन्येऽअभितः सपत्नाऽइहास्माकं मघवा सूरिरस्तु ॥२२॥
वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजेऽअद्या हुवेम ।
स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्मा ॥२३॥
विश्वकर्मन् हविषा वर्द्धनेन त्रातारमिन्द्रमकृणोरवध्यम् ।
तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथासत् ॥२४॥
चक्षुषः पिता मनसा हि धीरो घृतमेनेऽअजनन्नम्नमाने ।
यदेदन्ताऽअदद्दहन्त पूर्वऽआदिद् द्यावापृथिवीऽअप्रथेताम् ॥२५॥
विश्वकर्म्मा विमनाऽआद्विहाया धाता विधाता परमोत सन्दृक् ।
तेषामिष्टानि समिषा मदन्ति यत्रा सप्तऋषीन् परऽएकमाहुः ॥२६॥
यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा ।
यो देवानां नामधाऽएकऽएत तं सम्प्रश्नं भुवना यन्त्यन्या ॥२७॥
तऽआयजन्त द्रविणं समस्माऽऋषयः पूर्वे जरितारो न भूना ।

असूर्त्ते सूर्त्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि ॥२८॥
परो दिवा परऽएना पृथिव्या परो देवेभिरसुरैर्य्यदस्ति ।
कं स्विद् गर्भं प्रथमं दध्रऽआपो यत्र देवाः समपश्यन्त पूर्वे ॥२९॥
तमिद् गर्भं प्रथमं दध्रऽआपो यत्र देवाः समगच्छन्त विश्वे ।
अजस्य नाभावध्येकमर्पितं यास्मिन्विश्वानि भुवनानि तस्थुः ॥३०॥
न तं विदाथ यऽइमा जजानान्यद्युष्मा कमन्तरं बभूव ।
नीहारेण प्रावृता जल्प्या चासुतृपऽउक्थशासश्चरन्ति ॥३१॥
विश्वकर्मा ह्यजनिष्ट देवऽआदिद् गन्धर्वोऽअभवद् द्वितीयः ।
तृतीयः पिता जनितौषधीनामपां गर्भं व्यदधात्पुरुत्रा ॥३२॥

*ya'imā viśvā bhuvanāni juhvadṛṣirhotā nyasīdatpitā naḥ /*
*saṁ āśiṣā draviṇāmichchhamānaḥ prathamachchhadavarām̐2'āviveśa //17 //*
*kiṁ svidāsīdadhiṣṭhānamārambhaṇaṁ katamat svitkathāsīt /*
*yato bhūmi janayanviśvakarmā vi dyāmaurṇonmahinā viśvachakṣāḥ //18 //*
*viśvataśchakṣuruta viśvatomukho viśvatobāhuruta viśvataspāt /*
*saṁ bāhubhyāṁ dhamati saṁ patatrairdyāvābhūmī janayandeva'ekaḥ //19 //*
*kiṁ svidvanaṁ ka'u sa vṛkṣa'āsa yato dyāvāpṛthivī niṣṭtakṣuḥ /*
*manīṣiṇo manasā pṛchchhatedu tadyadaghyatiṣṭhadbhuvanāni dhārayan //20 //*
*yā te dhāmāni paramāṇi yāvamā yā madhyamā viśvakarmannutemā /*
*śikṣā sakhibhyo haviṣi svadhāvaḥ svayaṁ yajasva tanvaṁ vṛdhānaḥ //21 //*
*viśvakarman haviṣā vāvṛdhānaḥ svayaṁ yajasva pṛthivīmuta dyām /*
*muhyantvanye'abhitaḥ sapatnā'ihāsmākaṁ maghavā sūrirastu //22 //*
*vāchaspatiṁ viśvakarmāṇamūtaye manojuvaṁ vāje'adyā huvema /*
*sa no viśvāni havanāni joṣadviśvaśambhūravase sādhukarmā //23 //*
*viśvakarman haviṣā varddhanena trātāramindramakṛṇoravadhyam /*
*tasmai viśaḥ samanamanta pūrvīrayamugro vihavyo yathāsat //24 //*
*chakṣuṣaḥ pitā manasā hi dhīro ghṛtamene'ajanannamnamāne /*
*yadedantā'adadṛhanta pūrva'ādid dyāvāpṛthivī'aprathetām //25 //*
*viśvakarmmā vimanā'ādvihāyā dhātā vidhātā paramota sandṛk /*
*teṣāmiṣṭāni samiṣā madanti yatrā saptarṣīn para'ekamāhuḥ //26 //*
*yo naḥ pitā janitā yo vidhātā dhāmāni veda bhuvanāni viśvā /*
*yeā devānāṁ nāmadhā'eka'eta taṁ sampraśnaṁ bhuvanā yantyanyā //27 //*
*ta'āyajanta draviṇaṁ samasmā'ṛṣayaḥ pūrve jaritāro na bhūnā /*
*asūrtte sūrtte rajasi niṣatte ye bhūtāni samakṛṇvannimāni //28 //*
*paro divā para'enā pṛthivyā paro devebhirasurairyyadasti /*
*kaṁ svid garbhaṁ prathamaṁ dadhra'āpo yatra devāḥ samapaśyanta pūrve //29 //*
*tamid garbhaṁ prathamaṁ dadhra'āpo yatra devāḥ samagachchhanta viśve /*
*ajasya nābhāvadhyekamarpitaṁ yāsminviśvāni bhuvanāni tasthuḥ //30 //*
*na taṁ vidātha ya'imā jajānānyadyuṣmā kamantaraṁ babhūva /*
*nīhāreṇa prāvṛtā jalpyā chāsutṛpa'ukthaśāsaścharanti //31 //*
*viśvakarmā hyajaniṣṭa deva'ādid gandharvo'abhavad dvitīyaḥ /*
*tṛtīyaḥ pitā janitauṣadhīnāmapāṁ garbhaṁ vyadadhātpurutrā //32 //*

## ६०९. विश्वमनाः (Viśvamanāḥ)

१. अग्निः (Agniḥ) - य. (Yv.) ११.४१

उदुतिष्ठ स्व्ध्वरावा नो देव्या धिया ।
दृशे च भासा बृहता सुशुक्वनिराग्ने याहि सुशस्तिभिः ॥४१॥
*udutiṣṭha svdhvarāvā no devyā dhiyā /*
*dṛśe cha bhāsā bṛhatā suśukvanirāgne yāhi suśastibhiḥ //41 //*

२. इन्द्रः (Indraḥ) - अ. (Av.) २०.६४.४-६; २०.६५.१-३

अ. (Av.) २०.६४.४-६

एदु मध्वो मदिन्तरं सिंच वाध्वर्यो अन्धसः। एवा हि वीर स्तवते सदावृधः ॥४॥
इन्द्र स्थातर्हरीणां नकिष्टे पूर्व्यस्तुतिम्। उदानंश शवसा न भन्दना ॥५॥

तं वो वाजानां पतिमहूमहि श्रवस्यवः। अप्रायुभिर्यज्ञेभिर्वावृधेन्यम् ॥६॥
*edu madhvo madintaraṁ siṁcha vādhvaryo andhasaḥ /*
*evā hi vīra stavate sadāvṛdhaḥ //4 //*
*indra sthātarharīṇāṁ nakiṣṭe pūrvyastutim / udānaṁśa śavasā na bhandanā //5 //*
*taṁ vo vājānāṁ patimahūmahi śravasyavaḥ / aprāyubhiryajñebhirvāvṛdhenyam //6 //*

अ. (Av.) २०.६५.१-३

स्तुहीन्द्रं व्यश्वव्दनूर्मिं वाजिनं वाजिनं यमम्। अर्यो गयं मंहमानं वि दाशुषे ॥१॥
एवा नूनमुप स्तुहि वैयश्व दशमं नवम्। सुविद्वांसं चर्कृत्यं चरणीनाम् ॥२॥
वेत्था हि निर्ऋतीनां वज्रहस्त परिवृजम्। अहरहः शुन्ध्युः परिपदामिव ॥३॥
*stuhīndraṁ vyaśvavdanūrmiṁ vājinaṁ vājinaṁ yamam /*
*aryo gayaṁ maṁhamānaṁ vi dāśuṣe //1 //*
*evā nūnamupa stuhi vaiyaśva daśamaṁ navam /*
*suvidvāṁsaṁ charkṛtyaṁ charaṇīnām //2 //*
*vetthā hi nirṛtīnāṁ vajrahasta parivṛjam / aharahaḥ śundhyuḥ paripadāmiva //3 //*

## ६१०. विश्वमना वैयश्वः (Viśvamanā Vaiyaśvaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ८.२३.१-३०; सा. (Sv.) १०३; १०४; १०६; ११४

ऋ. (Rv.) ८.२३.१-३०

ईळिष्वा हि प्रतीव्यं१ यजस्व जातवेदसम्। चरिष्णुधूममगृभतिशोचिषम् ॥१॥
दामानं विश्वचर्षणेऽग्निं विश्वमनो गिरा। उत स्तुषे विष्पर्धसो रथानाम् ॥२॥
येषामाबाध ऋग्मिय इषः पृक्षश्च निग्रभे। उपविदा वह्निर्विन्दते सु ॥३॥
उदस्य शोचिरस्थाद्दीदियुषो वय१जरम्। तपुर्जम्भस्य सुद्युतो गणश्रियः ॥४॥
उदु तिष्ठ स्वध्वर स्तवानो देव्या कृपा। अभिख्या भासा बृहता शुशुक्निः ॥५॥
अग्ने याहिसुशस्तिभिर्हव्या जुह्वान आनुषक्। यथा दूतो बभूथ हव्यवाहनः ॥६॥
अग्निं वः पूर्व्यं हुवे होतारं चर्षणीनाम्। तमया वाचा गृणे तमु वः स्तुषे ॥७॥
यज्ञेभिरद्भुतक्रतुं यं कृपा सूदयन्त इत्। मित्रं न जने सुधितमृतावनि ॥८॥
ऋतावानमृतायवो यज्ञस्य साधनं गिरा। उपो एनं जुजुषुर्नमसस्पदे ॥९॥
अच्छा नो अंगिरस्तमं यज्ञासो यन्तु संयतः। होता यो अस्ति विक्ष्वा यशस्तमः ॥१०॥
अग्ने तव त्ये अजरेन्धानासो बृहद्भः। अश्वा इव वृषणस्तविषीयवः ॥११॥
स त्वं न ऊर्जां पते रयिं रास्व सुवीर्यम्। प्राव नस्तोके तनये समत्स्वा ॥१२॥
यद्वा उ विश्पतिः शितः सुप्रीतो मनुषो विशि। विश्वेदग्निः प्रति रक्षांसि सेधति ॥१३॥
श्रुष्ट्यग्ने नवस्य मे स्तोमस्य वीर विश्पते। नि मायिनस्तपुषा रक्षसो दह ॥१४॥
न तस्य मायया चन रिपुरीशीत मर्त्यः। यो अग्नये ददाश हव्यदातिभिः ॥१५॥
व्यश्वस्त्वा वसुविदमुक्षण्युरप्रीणादृषिः। महो राये तमु त्वा समिधीमहि ॥१६॥
उशना काव्यस्त्वा नि होतारमसादयत्। आयजिं त्वा मनवे जातवेदसम् ॥१७॥
विश्वे हि त्वा सजोषसो देवासो दूतमक्रत। श्रुष्टी देव प्रथमो यज्ञियो भुवः ॥१८॥
इमं घा वीरो अमृतं दूतं कृण्वीत मर्त्यः। पावकं कृष्णवर्तनिं विहायसम् ॥१९॥
तं हुवेम यतस्रुचः सुभासं शुक्रशोचिषम्। विशामग्निमजरं प्रत्नमीड्यम् ॥२०॥
यो अस्मै हव्यदातिभिराहुतिं मर्तोऽविधत्। भूरि पोषं स धत्ते वीरवद्यशः ॥२१॥
प्रथमं जातवेदसमग्निं यज्ञेषु पूर्व्यम्। प्रति स्रुगेति नमसा हविष्मती ॥२२॥
आभिर्विधेमाग्नये ज्येष्ठाभिर्व्यश्ववत्। मंहिष्ठाभिर्मतिभिः शुक्रशोचिषे ॥२३॥
नूनमर्च विहायसे स्तोमेभिः स्थूरयूप वत्। ऋषे वैयश्व दम्यायाग्नये ॥२४॥
अतिथिं मानुषाणां सूनुं वनस्पतीनाम्। विप्रा अग्निमवसे प्रत्नमीळते ॥२५॥
महो विश्वाँ अभिषतो३भिहव्यानि मानुषा। अग्ने नि षत्सि नमसाधि बर्हिषि ॥२६॥
वंस्वा नो वार्या पुरु वंस्व रायः पुरुस्पृहः। सुवीर्यस्य प्रजावतो यशस्वतः ॥२७॥
त्वं वरो सुषाम्णेऽग्ने जनाय चोदय। सदा वसो रातिं यविष्ठ शश्वते ॥२८॥
त्वं हि सुप्रतूरसि त्वं नो गोमतीरिषः। महो रायः सातिमग्ने अपा वृधि ॥२९॥
अग्ने त्वं यशा अस्या मित्रावरुणा वह। ऋतावाना सम्राजा पूतदक्षसा ॥३०॥

*īḻiṣvā hi pratīvyaṁ1 yajasva jātavedasam । chariṣṇudhūmamagṛbhatiśochiṣam ॥1 ॥*
*dāmānaṁ viśvacharṣaṇo'giṁna viśvamano girā । uta stuṣe viṣpardhaso rathānām ॥2 ॥*
*yeṣāmābādha ṛgmiya iṣaḥ pṛkṣaścha nigrabhe । upavidā vahnirvindate su ॥3 ॥*
*udasya śochirasthāddīdiyuṣo vaya1jaram । tapurjambhasya sudyuto gaṇaśriyaḥ ॥4 ॥*
*udu tiṣṭha svadhvara stavāno devyā kṛpā । abhikhyā bhāsā bṛhatā śuśukvinaḥ ॥5 ॥*
*agne yāhisuśastibhirhavyā juhvāna ānuṣak । yathā dūto babhūtha havyavāhanaḥ ॥6 ॥*
*agiṁna vaḥ pūrvyaṁ huve hotāraṁ charṣaṇīnām । tamayā vāchā gṛṇe tamu vaḥ stuṣe ॥7 ॥*
*yajñebhiradbhutakratuṁ yaṁ kṛpā sūdayanta it । mitraṁ na jane sudhitamṛtāvani ॥8 ॥*
*ṛtāvānamṛtāyavo yajñasya sādhanaṁ girā । upo enaṁ jujuṣurnamasaspade ॥9 ॥*
*achchhā no aṁgirastamaṁ yajñāso yantu saṁyataḥ । hotā yo asti vikṣavā yaśastamaḥ ॥10 ॥*
*agne tava tye ajarendhānāso bṛhadbhaḥ । aśvā iva vṛṣaṇastaviṣīyavaḥ ॥11 ॥*
*sa tvaṁ na ūrjāṁ pate rayiṁ rāsva suvīryam । prāva nastoke tanaye samatsvā ॥12 ॥*
*yadvā u viśpatiḥ śitaḥ suprīto manuṣo viśi । viśvedagniḥ prati rakṣāṁsi sedhati ॥13 ॥*
*śruṣṭyagne navasya me stomasya vīra viśpate । ni māyinastapuṣā rakṣaso daha ॥14 ॥*
*na tasya māyayā chana ripurīśīta martyaḥ । yo agnaye dadāśa havyadātibhiḥ ॥15 ॥*
*vyaśvastvā vasuvidamukṣaṇyurapriṇādṛṣiḥ ।*
*maho rāye tamu tvā samidhīmahi ॥16 ॥*
*uśanā kāvyastvā ni hotāramasādayat । āyajiṁ tvā manave jātavedasam ॥17 ॥*
*viśve hi tvā sajoṣaso devāso dūtamakrata ।*
*śruṣṭī deva prathamo yajñiyo bhuvaḥ ॥18 ॥*
*imaṁ ghā vīro amṛtaṁ dūtaṁ kṛṇvīta martyaḥ ।*
*pāvakaṁ kṛṣṇavartaniṁ vihāyasam ॥19 ॥*
*taṁ huvema yatasruchaḥ subhāsaṁ śukraśochiṣam ।*
*viśāmagnimajaraṁ pratnamīḍyam ॥20 ॥*
*yo asmai havyadātibhirāhutiṁ marto'vidhat ।*
*bhūri poṣaṁ sa dhatte vīravadyaśaḥ ॥21 ॥*
*prathamaṁ jātavedasamagiṁna yajñeṣu pūrvyam ।*
*prati srugeti namasā haviṣmatī ॥22 ॥*
*ābhirvidhemāgnaye jyeṣṭhābhirvyaśvavat ।*
*maṁhiṣṭhābhirmatibhiḥ śukraśochiṣe ॥23 ॥*
*nūnamarcha vihāyase stomebhiḥ sthūrayūpa vat ।*
*ṛṣe vaiyaśva damyāyāgnaye ॥24 ॥*
*atithi mānuṣāṇāṁ sūnuṁ vanaspatīnām । viprā agnimavase pratnamīḻate ॥25 ॥*
*maho viśvāṁ̐ abhiṣato3bhihavyāni mānuṣā । agne ni ṣatsi namasādhi barhiṣi ॥26 ॥*
*vaṁsvā no vāryā puru vaṁsva rāyaḥ puruspṛhaḥ ।*
*suvīryasya prajāvato yaśasvataḥ ॥27 ॥*
*tvaṁ varo suṣāmṇe'gne janāya chodaya । sadā vaso rātiṁ yaviṣṭha śaśvate ॥28 ॥*
*tvaṁ hi supratūrasi tvaṁ no gomatīriṣaḥ । maho rāyaḥ sātimagne apā vṛdhi ॥29 ॥*
*agne tvaṁ yaśā asyā mitrāvaruṇā vaha । ṛtāvānā samrājā pūtadakṣasā ॥30 ॥*

सा. (Sv.) १०३-१०४

ईडिष्वा हि प्रतीव्यां ३ यजस्व जातवेदसम् । चरिष्णुधूममगृभीतशोचिषम् ॥७ ॥
न तस्य मायया च न रिपुरीशीत मर्त्यः । यो अग्नये ददाश हव्यदातये ॥८ ॥
*īḍiṣvā hi pratīvyāṁ 3 yajasva jātavedasam । chariṣṇudhūmamagṛbhītaśochiṣam ॥7 ॥*
*na tasya māyayā cha na ripurīśīta martyaḥ । yo agnaye dadāśa havyadātaye ॥8 ॥*

सा. (Sv.) १०६

श्रुष्ट्यग्ने नवस्य मे स्तोमस्य वीर विश्पते । नि मायिनस्तपसा रक्षसो दह ॥१० ॥
*śruṣṭyagne navasya me stomasya vīra viśpate । ni māyinastapasā rakṣaso daha ॥10 ॥*

सा. (Sv.) ११४

यद्वा उ विश्पतिः शितः सुप्रीतो मनुषो विशे । विश्वेदग्निः प्रति रक्षांसि सेधति ॥८ ॥
*yadvā u viśpatiḥ śitaḥ suprīto manuṣo viśe ।*
*viśvedagniḥ prati rakṣāṁsi sedhati ॥8 ॥*

२. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.२४.१-२७; सा. (Sv.) ३८५-३८७; ३९०; ३९६; १५०९-१५११;

१६८४-१६८६

ऋ. (Rv.) ८.२४.१-२७

सखाय आ शिषामहि ब्रह्मेन्द्राय वज्रिणे । स्तुष ऊ षु वो नृतमाय धृष्णवे ॥१॥
शवसा ह्यसि श्रुतो वृत्रहत्येन वृत्रहा । मघैर्मघोनो अति शूर दाशसि ॥२।
स नः स्तवान आ भर रयिं चित्रश्रवस्तमम् निरेके चिद्यो हरिवो वसुर्ददिः ॥३॥
आ निरेकमुत प्रियमिन्द्र दर्षि जनानाम् धृषता धृष्णो स्तवमान आ भर ॥४॥
न ते सव्यं न दक्षिणं हस्तं वरन्त आमुरः न परिबाधो हरिवो गविष्टिषु ॥५॥
आ त्वा गोभिरिव व्रजं गीर्भिर्ऋणोम्यद्रिवः । आ स्मा कामं जरितुरा मनः पृण ॥६॥
विश्वानि विश्वमनसो धिया नो वृत्रहन्तम । उग्र प्रणेतरधि षू वसो गहि ॥७।
वयं ते अस्य वृत्रहन्विद्याम शूर नव्यसः वसोः स्पार्हस्य पुरुहूत राधसः ॥८॥
इन्द्र यथा ह्यस्ति तेऽपरीतं नृतो शवः । अमृक्ता रातिः पुरुहूत दाशुषे ॥९॥
आ वृषस्व महामह महे नृतम राधसे । दृळहश्चिद् दृह्य मघवन्मघत्तये ॥१०॥
नू अन्यत्रा चिदद्रिवस्त्वन्नो अग्मुराशसः। मघवच्छग्धि तव तन्न ऊतिभिः ॥११॥
नह्य१ङ्ग नृतो त्वदन्यं विन्दामि राधसे। राये द्युम्नाय शवसे च गिर्वणः ॥१२॥
एन्दुमिन्द्राय सिंचत पिबाति सोम्यं मधु । प्र राधसा चोदयाते महित्वना ॥१३॥
उपो हरीणां पतिं दक्षं पृंचन्तमब्रवम् । नूनं श्रुधि स्तुवतो अश्व्यस्य ॥१४॥
नह्यं१ग पुरा चन जज्ञे वीरतरस्त्वत् । नकी राया नैवथा न भ ॥१५॥
एदु मध्वो मदिन्तरं सिंच वाध्वर्यो अन्धसः। एवा हि वीरः स्तवते सदावृधः ॥१६॥
इन्द्र स्थातर्हरीणां नकिष्टे पूर्व्यस्तुतिम्। उदानंश शवसा न भन्दना ॥१७॥
तं वो वाजानां पतिमहूमहि श्रवस्यवः । अप्रायुभिर्यज्ञेभिर्वावृधेन्यम् ॥१८॥
एतोन्विन्द्रं स्तवाम सखायः स्तोम्यं नरम् । कृष्टीर्योविश्वा अभ्यस्त्येक इत् ॥१९॥
अगोरुधाय गविषे द्युक्षाय दस्म्यं वचः। घृतात्स्वादीयो मधुनश्च वोचत ॥२०॥
यस्यामितानि वीर्या३ न राधः पर्येतवे। ज्योतिर्न विश्वमभ्यस्ति दक्षिणा ॥२१॥
स्तुहीन्द्रं व्यश्ववदनूर्मिं वाजिनं यमम् । अर्यो गयं मंहमानं वि दाशुषे ॥२२॥
एवा नूनमुप स्तुहि वैयश्व दशमं नवम् । सुविद्वांसं चर्कृत्यं चरणीनाम् ॥२३॥
वेत्था हि निर्ऋतीनां वज्रहस्त परिवृजम् । अहरहः शुन्ध्युः परिपदामिव ॥२४॥
तदिन्द्राव आ भर येना दंसिष्ठ कृत्वने । द्विता कुत्साय शिश्नथो नि चोदय ॥२५॥
तमु त्वा नूनमीमहे नव्यं दंसिष्ठ सन्यसे । स त्वं नो विश्वा अभिमातीः सक्षणिः ॥२६॥
य ऋक्षादंहसो मुचद्यो वार्यात्सप्त सिन्धुषु। वधर्दासस्य तुविनृम्ण नीनमः ॥२७॥

*sakhāya ā śiṣāmahi brahmendrāya vajriṇe । stuṣa ū ṣu vo nṛtamāya dhṛṣṇave ॥1॥*
*śavasā hyasi śruto vṛtrahatyena vṛtrahā । maghairmaghono ati śūra dāśasi ॥2।*
*sa naḥ stavāna ā bhara rayiṁ chitraśravastamam nireke chidyo harivo vasurdadiḥ ॥3॥*
*ā nirekamuta priyamindra darṣi janānām dhṛṣatā dhṛṣṇo stavamāna ā bhara ॥4॥*
*na te savyaṁ na dakṣiṇaṁ hastaṁ varanta āmuraḥ na paribādho harivo gaviṣṭiṣu ॥5॥*
*ā tvā gobhiriva vrajaṁ gīrbhirṛṇomyadrivaḥ ।*
*ā smā kāmaṁ jariturā manaḥ pṛṇa ॥6॥*
*viśvāni viśvamanaso dhiyā no vṛtrahantama । ugra praṇetaradhi ṣū vaso gahi ॥7।*
*vayaṁ te asya vṛtrahanvidyāma śūra navyasaḥ vasoḥ spārhasya puruhūta rādhasaḥ ॥8॥*
*indra yathā hyasti te'parītaṁ nṛto śavaḥ । amṛktā rātiḥ puruhūta dāśuṣe ॥9॥*
*ā vṛṣasva mahāmaha mahe nṛtama rādhase ।*
*dṛḷahaśchid dṛhya maghavanmaghattaye ॥10॥*
*nū anyatrā chidadrivastvanno agmurāśasaḥ ।*
*maghavachchhagdhi tava tanna ūtibhiḥ ॥11॥*
*nahya1ṅga nṛto tvadanyaṁ vindāmi rādhase ।*
*rāye dyumnāya śavase cha girvaṇaḥ ॥12॥*
*endumindrāya siṁchata pibāti somyaṁ madhu ।*
*pra rādhasā chodayāte mahitvanā ॥13॥*
*upo harīṇāṁ patiṁ dakṣaṁ pṛṁchantamabravam ।*
*nūnaṁ śrudhi stuvato aśvyasya ॥14॥*

*nahyaṁ1ga purā chana jajñe vīratarastvat* ।
*nakī rāyā naivathā na bha* ॥15 ॥
*edu madhvo madintaraṁ siṁcha vādhvaryo andhasaḥ* ।
*evā hi vīraḥ stavate sadāvṛdhaḥ* ॥16 ॥
*indra sthātarharīṇāṁ nakiṣṭe pūrvyastutim* ।
*udānaṁśa śavasā na bhandanā* ॥17 ॥
*taṁ vo vājānāṁ patimahūmahi śravasyavaḥ* । *aprāyubhiryajñebhirvāvṛdhenyam* ॥18 ॥
*etonvindraṁ stavāma sakhāyaḥ stomyaṁ naram* ।
*kṛṣṭīryoviśvā abhyastyeka it* ॥19 ॥
*agorudhāya gaviṣe dyukṣāya dasmyaṁ vachaḥ* ।
*ghṛtātsvādīyo madhunaścha vochata* ॥20 ॥
*yasyāmitāni vīryā3 na rādhaḥ paryetave* । *jyotirna viśvamabhyasti dakṣiṇā* ॥21 ॥
*stuhīndraṁ vyaśvavadanūrmiṁ vājinaṁ yamam* ।
*aryo gayaṁ maṁhamānaṁ vi dāśuṣe* ॥22 ॥
*evā nūnamupa stuhi vaiyaśva daśamaṁ navam* ।
*suvidvāṁsaṁ charkṛtyaṁ charaṇīnām* ॥23 ॥
*vetthā hi nirṛtīnāṁ vajrahasta parivṛjam* । *aharahaḥ śundhyuḥ paripadāmiva* ॥24 ॥
*tadindrāva ā bhara yenā daṁsiṣṭha kṛtvane* ।
*dvitā kutsāya śiśnatho ni chodaya* ॥25 ॥
*tamu tvā nūnamīmahe navyaṁ daṁsiṣṭha sanyase* ।
*sa tvaṁ no viśvā abhimātīḥ sakṣaṇiḥ* ॥26 ॥
*ya ṛkṣādaṁhaso muchadyo vāryātsapta sindhuṣu* ।
*vadhardāsasya tuvinṛmṇa nīnamaḥ* ॥27 ॥

सा. (Sv.) ३८५-३८७

एदु मधोर्मदिन्तरं सिंचाध्वर्यो अन्धसः। एवा हि वीरस्तवते सदावृधः ॥५॥
एन्दुमिन्द्राय सिंचत पिबाति सोम्यं मधु। प्र राधांसि चोदयते महित्वना ॥६॥
एतो न्विन्द्रं स्तवाम सखायः स्तोम्यं नरम्। कृष्टीर्यो विश्वा अभ्यस्त्येक इत् ॥७॥
*edu madhormadintaraṁ siṁchādhvaryo andhasaḥ* । *evā hi vīrastavate sadāvṛdhaḥ* ॥5 ॥
*endumindrāya siṁchata pibāti somyaṁ madhu* । *pra rādhāṁsi chodayate mahitvanā* ॥6 ॥
*eto nvindraṁ stavāma sakhāyaḥ stomyaṁ naram* । *kṛṣṭīryo viśvā abhyastyeka it* ॥7 ॥

सा. (Sv.) ३९०

सखाय आ शिषामहे ब्रह्मेन्द्राय वज्रिणो। स्तुष ऊ षु वो नृतमाय धृष्णवे ॥१०॥
*sakhāya ā śiṣāmahe brahmendrāya vajriṇo* । *stuṣa ū ṣu vo nṛtamāya dhṛṣṇave* ॥10 ॥

सा. (Sv.) ३९६

वेत्था हि निर्ऋतीनां वज्रहस्त परिवृजम्। अहरहः शुन्ध्युः परिपदामिव ॥६॥
*vetthā hi nirṛtīnāṁ vajrahasta parivṛjam* । *aharahaḥ śundhyuḥ paripadāmiva* ॥6 ॥

सा. (Sv.) १५०९-१५११

एन्दुमिन्द्राय सिंचत पिबाति सोम्यं मधु। प्र राधांसि चोदयते महित्वना ॥१॥
उपो हरीणं पतिं राधः पृंचन्तमब्रवम्। नूनं श्रुधि स्तुवतो अश्व्यस्य ॥२॥
न ह्या३ग पुरा च न जज्ञे वीरतरस्त्वत्। न की राया नैवथा न भन्दना ॥३॥
*endumindrāya siṁchata pibāti somyaṁ madhu* । *pra rādhāṁsi chodayate mahitvanā* ॥1 ॥
*upo harīṇaṁ patiṁ rādhaḥ pṛṁchantamabravam* । *nūnaṁ śrudhi stuvato aśvyasya* ॥2 ॥
*na hyā3ga purā cha na jajñe vīratarastvat* । *na kī rāyā naivathā na bhandanā* ॥3 ॥

सा. (Sv.) १६८४-१६८६

एदु मधोर्मदिन्तरं सिंचाध्वर्यो अन्धसः। एवा हि वीर स्तवते सदावृधः ॥१॥
इन्द्र स्थातर्हरीणां न किष्टे पूर्व्यस्तुतिम्। उदानंश शवसा न भन्दना ॥२॥
तं वो वाजानां पतिमहूमहि श्रवस्यवः। अप्रायुभिर्यज्ञेभिर्वावृधेन्यम् ॥३॥
*edu madhormadintaraṁ siṁchādhvaryo andhasaḥ* । *evā hi vīra stavate sadāvṛdhaḥ* ॥1 ॥
*indra sthātarharīṇāṁ na kiṣṭe pūrvyastutim* । *udānaṁśa śavasā na bhandanā* ॥2 ॥
*taṁ vo vājānāṁ patimahūmahi śravasyavaḥ* । *aprāyubhiryajñebhirvāvṛdhenyam* ॥3 ॥

३. मित्रावरुणौ (Mitrāvaruṇau) - ऋ. (Rv.) ८.२५.१-९; १३-२४

ऋ. (Rv.) ८.२५.१-९

ता वां विश्वस्य गोपा देवा देवेषु यज्ञिया। ऋतवाना यजसे पूतदक्षसा ॥१॥
मित्रा तना न रथ्या३ वरुणो यश्च सुक्रतुः। सनात्सुजाता तनया धृतव्रता ॥२॥
ता माता विश्ववेदसासुर्याय प्रमहसा। मही जजानादितिऋर्तावरी ॥३॥
महान्ता मित्रावरुणा सम्राजा देवावसुरा। ऋतावानावृतमा घोषतो बृहत् ॥४॥
नपाता शवसो महः सूनू दक्षस्य सुक्रतू। सृप्रदानू इषो वास्त्वधि क्षितः ॥५॥
सं या दानूनि येमथुर्दिव्याः पार्थिवीरिषः। नभस्वतीरा वां चरन्तु वृष्टयः ॥६॥
अधि या बृहतो दिवो३भि यूथेव पश्यतः। ऋतावाना सम्राजा नमसे हिता ॥७॥
ऋतावाना नि षेदतुः साम्राज्याय सुक्रतु। धृतव्रता क्षत्रिया क्षत्रमाशतुः ॥८॥
अक्ष्णश्चिद्गातुवित्तरानुल्बणेन चक्षसा। नि चिन्मिषन्ता निचिरा नि चिक्यतुः ॥९॥
*tā vāṁ viśvasya gopā devā deveṣu yajñiyā | ṛtavānā yajase pūtadakṣasā ||1 ||*
*mitrā tanā na rathyā3 varuṇo yaścha sukratuḥ | sanātsujātā tanayā dhṛtavratā ||2 ||*
*tā mātā viśvavedasāsuryāya pramahasā | mahī jajānāditirṛtāvarī ||3 ||*
*mahāntā mitrāvaruṇā samrājā devāvasurā | ṛtāvānāvṛtamā ghoṣato bṛhat ||4 ||*
*napātā śavaso mahaḥ sūnū dakṣasya sukratū | sṛpradānū iṣo vāstvadhi kṣitaḥ ||5 ||*
*saṁ yā dānūni yemathurdivyāḥ pārthivīriṣaḥ | nabhasvatīrā vāṁ charantu vṛṣṭayaḥ ||6 ||*
*adhi yā bṛhato divo3bhi yūtheva paśyataḥ | ṛtāvānā samrājā namase hitā ||7 ||*
*ṛtāvānā ni ṣedatuḥ sāmrājyāya sukratu | dhṛtavratā kṣatriyā kṣatramāśatuḥ ||8 ||*
*akṣaṇaśchidgātuvittarānulbaṇena chakṣasā | ni chinmiṣantā nichirā ni chikyatuḥ ||9 ||*

ऋ. (Rv.) ८.२५.१३-२४

तद्वार्यं वृणीमहे वरिष्ठं गोपयत्यम्। मित्रो यत्पान्ति वरुणो यदर्यमा ॥१३॥
उत नः सिन्धुरपां तन्मरुतस्तदश्विना। इन्द्रो विष्णुर्मीढ्वांसः सजोषसः ॥१४॥
ते हि ष्मा वनुषो नरोऽभिमातिं कयस्य चित्। तिग्मं न क्षोदः प्रतिघ्नन्ति भूर्णयः ॥१५॥
अयमेक इत्था पुरूरु चष्टे वि विश्पतिः। तस्य व्रतान्यनु व्रतान्यनु वश्चरामसि ॥१६॥
अनु पूर्वाण्योक्या साम्राज्यस्य सश्चिम। मित्रस्य व्रता वरुणस्य दीर्घश्रुत् ॥१७॥
परि यो रश्मिना दिवोऽनतान्ममे पृथिव्याः। उभे आ पप्रौ रोदसी महित्वा ॥१८॥
उदु ष्य शरणे दिवो ज्योतिरयंस्त सूर्यः। अग्निर्न शुक्रः समिधान आहुतः ॥१९॥
वचो दीर्घप्रसद्मनीशे वाजस्य गोमतः। ईशे हि पित्वोऽविषस्य दावने ॥२०॥
तत्सूर्यं रोदसी उभे दोषा वस्तोरुप ब्रुवे। भोजेष्वस्माँ अभ्युच्चरा सदा ॥२१॥
ऋज्रमुक्षण्यायने रजतं हरयाणे। रथं युक्तमसनाम सुषामणि ॥२२॥
ता मे अश्व्यानां हरीणां नितोशना। उतो नु कृत्व्यानां नृवाहसा ॥२३॥
स्मदभीशू कशावन्ता विप्रा नविष्ठया मती। महो वाजिनावर्वन्ता सचासनम् ॥२४॥
*tadvāryaṁ vṛṇīmahe variṣṭhaṁ gopayatyam | mitro yatpānti varuṇo yadaryamā ||13 ||*
*uta naḥ sindhurapāṁ tanmarutastadaśvinā | indro viṣṇurmīḍhvāṁsaḥ sajoṣasaḥ ||14 ||*
*te hi ṣmā vanuṣo naro'bhimātiṁ kayasya chit |*
*tigmaṁ na kṣodaḥ pratighnanti bhūrṇayaḥ ||15 ||*
*ayameka itthā purūru chaṣṭe vi viśpatiḥ | tasya vratānyanu vratānyanu vaścharāmasi ||16 ||*
*anu pūrvāṇyokyā sāmrājyasya saśchima | mitrasya vratā varuṇasya dīrghaśrut ||17 ||*
*pari yo raśminā divo'natānmame pṛthivyāḥ | ubhe ā paprau rodasī mahitvā ||18 ||*
*udu ṣya śaraṇe divo jyotirayaṁsta sūryaḥ | agnirna śukraḥ samidhāna āhutaḥ ||19 ||*
*vacho dīrghaprasadmanīśe vājasya gomataḥ | īśe hi pitvo'viṣasya dāvane ||20 ||*
*tatsūryaṁ rodasī ubhe doṣā vastorupa bruve | bhojeṣvasmām̐ abhyuchcharā sadā ||21 ||*
*ṛjramukṣaṇyāyane rajataṁ harayāṇe | rathaṁ yuktamasanāma suṣāmaṇi ||22 ||*
*tā me aśvyānāṁ harīṇāṁ nitośanā | uto nu kṛtvyānāṁ nṛvāhasā ||23 ||*
*smadabhīśū kaśāvantā viprā naviṣṭhayā matī | maho vājināvarvantā sachāsanam ||24 ||*

४. वरोः सौषामणस्य दानस्तुतिः (Varoḥ Sauṣāmaṇasya Dānastutiḥ) - ऋ. (Rv.) ८.२४.२८-३०

यथा वरो सुषाम्णे सनिभ्य आवहो रयिम्। व्यश्वेभ्यः सुभगे वाजिनीवति ॥२८॥
आ नार्यस्य दक्षिणा व्यश्वाँ एतु सोमिनः। स्थूरं च राधः शतवत्सहस्रवत् ॥२९॥
यत्त्वा पृच्छादीजानः कुहया कुहयाकृते। एषो अपश्रितो वलो गोमतीमव तिष्ठति ॥३०॥
*yathā varo suṣāmṇe sanibhya āvaho rayim | vyaśvebhyaḥ subhage vājinīvati ||28 ||*

*ā nāryasya dakṣiṇā vyaśvām̐ etu sominaḥ । sthūraṁ cha rādhaḥ śatavatsahasravat ॥29 ॥*
*yattvā pṛchchhādījānaḥ kuhayā kuhayākṛte । eṣo apaśrito valo gomatīmava tiṣṭhati ॥30 ॥*

५. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) ८.२५.१०-१२

उत नो देव्यदितिरुरुष्यतां नासत्या। उरुष्यन्तु मरुतो वृद्धशवसः ॥१० ॥
ते नो नावमुरुष्यत दिवा नक्तं सुदानवः। अरिष्यन्तो नि पायुभिः सचेमहि ॥११ ॥
अघ्नते विष्णवे वयमरिष्यन्तः सुदानवे। श्रुधि स्वयावन्त्सिन्धो पूर्वचित्तये ॥१२ ॥
*uta no devyaditiruruṣyatāṁ nāsatyā । uruṣyantu maruto vṛddhaśavasaḥ ॥10 ॥*
*te no nāvamuruṣyata divā naktaṁ sudānavaḥ । ariṣyanto ni pāyubhiḥ sachemahi ॥11 ॥*
*aghnate viṣṇave vayamariṣyantaḥ sudānave । śrudhi svayāvantsindho pūrvachittaye ॥12 ॥*

## ६११. विश्वमना वैयश्व व्यश्वो वा आंगिरसः (Viśvamanā Vaiyaśva Vyaśvo Vā Āṁgirasaḥ)

१. अश्विनौ (Aśvinau) - ऋ. (Rv.) ८.२६.१-१९

युवोरु षू रथं हुव सधस्तुत्याय सूरिषु। अतूर्तदक्षा वृषणा वृषण्वसू ॥१ ॥
युवं वरो सुषाम्णे महे तने नासत्या। अवोभिर्याथो वृषणा वृषण्वसू ॥२ ॥
ता वामद्य हवामहे हव्येभिर्वाजिनीवसू। पूर्वीरिष इषयन्तावति क्षपः ॥३ ॥
आ वां वाहिष्ठो अश्विना रथो यातु श्रुतो नरा। उप स्तोमान्तुरस्य दर्शथः श्रिये ॥४ ॥
जुहुराणा चिदश्विना मन्येथां वृषण्वसू। युवं हि रुद्रा पर्षथो अति द्विषः ॥५ ॥
दस्रा हि विश्वमानुषङ्मक्षूभिः परिदीयथः। धियंजिन्वा मधुवर्णा शुभस्पती ॥६ ॥
उप नो यातमश्विना राया विश्वपुषा सह। मघवाना सुवीरावनपच्युता ॥७ ॥
आ मे अस्य प्रतीव्य१मिन्द्रनासत्या गतम्। देवा देवेभिरद्य सचनस्तमा ॥८ ॥
वयं हि वां हवामह उक्षण्यन्तो व्यश्ववत्। सुमतिभिरुप विप्राविहा गतम् ॥९ ॥
अश्विना स्वृषे स्तुहि कुवित्ते श्रवतो हवम्। नेदीयसः कूळयातः पणीँरुत ॥१० ॥
वैयश्वस्य श्रुतं नरोतो मे अस्य वेदथः। सजोषसा वरुणो मित्रो अर्यमा ॥११ ॥
युवादत्तस्य धिष्ण्या युवानीतस्य सुरिभिः। अहरहर्वृषणा मह्यं शिक्षतम् ॥१२ ॥
यो वां यज्ञेभिरावृतोऽधिवस्त्रा वधूरिव। सपर्यन्ता शुभे चक्राते अश्विना ॥१३ ॥
यो वामुरुव्यचस्तमं चिकेतति नृपाय्यम्। वर्तिरश्विना परि यातमस्मयू ॥१४ ॥
अस्मभ्यं सु वृषण्वसू यातं वर्तिर्नृपाय्यम्। विषुद्रुहेव यज्ञमूहथुर्गिरा ॥१५ ॥
वाहिष्ठो वां हवानां स्तोमो दूतो हुवन्नरा। युवाभ्यां भूत्वश्विना ॥१६ ॥
यददो दिवो अर्णव इषो वा मदथो गृहे। श्रुतमिन्मे अमर्त्या ॥१७ ॥
उत स्या श्वेतयावरी वाहिष्ठा वां नदीनाम्। सिन्धुर्हिरण्यवर्तनिः ॥१८ ॥
स्मदेतया सुकीर्त्याश्विना श्वेतया धिया। वहेथे शुभ्रयावाना ॥१९ ॥
*yuvoru ṣū rathaṁ huva sadhastutyāya sūriṣu । atūrtadakṣā vṛṣaṇā vṛṣaṇvasū ॥1 ॥*
*yuvaṁ varo suṣāmṇe mahe tane nāsatyā । avobhiryātho vṛṣaṇā vṛṣaṇvasū ॥2 ॥*
*tā vāmadya havāmahe havyebhirvājinīvasū । pūrvīriṣa iṣayantāvati kṣapaḥ ॥3 ॥*
*ā vāṁ vāhiṣṭho aśvinā ratho yātu śruto narā ।*
*upa stomānturasya darśathaḥ śriye ॥4 ॥*
*juhurāṇā chidaśvinā manyethāṁ vṛṣaṇvasū ।*
*yuvaṁ hi rudrā parṣatho ati dviṣaḥ ॥5 ॥*
*dasrā hi viśvamānuṣaṅmakṣūbhiḥ paridīyathaḥ ।*
*dhiyaṁjinvā madhuvarṇā śubhaspatī ॥6 ॥*
*upa no yātamaśvinā rāyā viśvapuṣā saha । maghavānā suvīrāvanapachyutā ॥7 ॥*
*ā me asya pratīvya1mindranāsatyā gatam । devā devebhiradya sachanastamā ॥8 ॥*
*vayaṁ hi vāṁ havāmaha ukṣaṇyanto vyaśvavat ।*
*sumatibhirupa viprāvihā gatam ॥9 ॥*
*aśvinā svṛṣe stuhi kuvitte śravato havam । nedīyasaḥ kūḷayātaḥ paṇīm̐ruta ॥10 ॥*
*vaiyaśvasya śrutaṁ naroto me asya vedathaḥ । sajoṣasā varuṇo mitro aryamā ॥11 ॥*
*yuvādattasya dhiṣṇyā yuvānītasya suribhiḥ ।*
*aharaharvṛṣaṇā mahyaṁ śikṣatam ॥12 ॥*
*yo vāṁ yajñebhirāvṛto'dhivastrā vadhūriva ।*
*saparyantā śubhe chakrāte aśvinā ॥13 ॥*
*yo vāmuruvyachastamaṁ chiketati nṛpāyyam ।*

*vartiraśvinā pari yātamasmayū ॥14 ॥*
*asmabhyaṁ su vṛṣaṇvasū yātaṁ vartirnṛpāyyam ।*
*viṣudruheva yajñamūhathurgirā ॥15 ॥*
*vāhiṣṭho vāṁ havānāṁ stomo dūto huvannarā । yuvābhyāṁ bhūtvaśvinā ॥16 ॥*
*yadado divo arṇava iṣo vā madatho gṛhe । śrutaminme amartyā ॥17 ॥*
*uta syā śvetayāvarī vāhiṣṭhā vāṁ nadīnām । sindhurhiraṇyavartaniḥ ॥18 ॥*
*smadetayā sukīrtyāśvinā śvetayā dhiyā । vahethe śubhrayāvānā ॥19 ॥*

२. वायुः (Vāyuḥ) - ऋ. (rv.) ८.२६.२०-२५

युक्ष्वा हि त्वं रथासहा युवस्व पोष्या वसो ।
आन्नो वायो मधु पिबास्माकं सवना गहि ॥२० ॥
तव वायवृतस्पते त्वष्टुर्जामारद्भुत। अवांस्या वृणीमहे ॥२१ ॥
त्वष्टुर्जामातरं वयमीशानं राय ईमहे। सुतावन्तो वायुं द्युम्ना जनासः ॥२२ ॥
वायो याहि शिवा दिवो वहस्वा सु स्वश्व्यम्। वहस्व महः पृथुपक्षसा रथे ॥२३ ॥
त्वां हि सुप्सरस्तमं नृषदनेषु हूमहे। ग्रावाणं नाश्वपृष्ठं मंहना ॥२४ ॥
स त्वं नो देव मनसा वायो मन्दानो अग्रियः। कृधि वाजाँ अपो धियः ॥२५ ॥
*yukṣavā hi tvaṁ rathāsahā yuvasva poṣyā vaso ।*
*ānno vāyo madhu pibāsmākaṁ savanā gahi ॥20 ॥*
*tava vāyavṛtaspate tvaṣṭurjāmāradbhuta । avāṁsyā vṛṇīmahe ॥21 ॥*
*tvaṣṭurjāmātaraṁ vayamīśānaṁ rāya īmahe ।*
*sutāvanto vāyuṁ dyumnā janāsaḥ ॥22 ॥*
*vāyo yāhi śivā divo vahasvā su svaśvyam । vahasva mahaḥ pṛthupakṣasā rathe ॥23 ॥*
*tvāṁ hi supsarastamaṁ nṛṣadaneṣu hūmahe ।*
*grāvāṇaṁ nāśvapṛṣṭhaṁ maṁhanā ॥24 ॥*
*sa tvaṁ no deva manasā vāyo mandāno agriyaḥ । kṛdhi vājāँ apo dhiyaḥ ॥25 ॥*

## ६१२. विश्वसामा आत्रेयः (Viśvasāmā Ātreyaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ५.२२.१-४

प्र विश्वसामन्नत्रिवदर्चा पावकशोचिषे । यो अध्वरेष्वीड्यो होता मन्द्रतमो विशि ॥१ ॥
न्य१ग्निं जातवेदसं दधाता देवमृत्विजम् । प्र यज्ञ एत्वानुषगद्या देवव्यचस्तमः ॥२ ॥
चिकित्विन्मनसं त्वा देवं मर्तास ऊतये । वरेण्यस्य तेऽवस इयानासो अमन्महि ॥३ ॥
अग्ने चिकिद्ध्य१स्य न इदं वचः सहस्य ।
तं त्वा सुशिप्र दम्पते स्तोमैर्वधन्त्यत्रयो गीर्भिः शुम्भन्त्यत्रयः ॥४ ॥
*pra viśvasāmannatrivadarchā pāvakaśochiṣe ।*
*yo adhvareṣvīḍye hotā mandratamo viśi ॥1 ॥*
*nya1giṁna jātavedasaṁ dadhātā devamṛtvijam ।*
*pra yajña etvānuṣagadyā devavyachastamaḥ ॥2 ॥*
*chikitvinmanasaṁ tvā devaṁ martāsa ūtaye ।*
*vareṇyasya te'vasa iyānāso amanmahi ॥3 ॥*
*agne chikiddhya1sya na idaṁ vachaḥ sahasya ।*
*taṁ tvā suśipra dampate stomairvadhantyatrayo gīrbhiḥ śumbhantyatrayaḥ ॥4 ॥*

## ६१३. विश्वरुपः (Viśvarupaḥ)

१. अग्निः (Agniḥ) - य. (Yv.) २२.१७; ३३.४

य. (Yv.) २२.१७

अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे। देवाँ२ऽआ सादयादिह ॥१७ ॥
*agniṁ dūtaṁ puro dadhe havyavāhamupa bruve । devāँ2'ā sādayādiha ॥17 ॥*

य. (Yv.) ३३.४

युक्ष्वा हि देवहूतमाँ२ऽअश्वाँ२ऽअग्ने रथीरिव। नि होता पूर्व्यः सदः ॥४ ॥
*yukṣavā hi devahūtamāँ2'aśvāँ2'agne rathīriva । ni hotā pūrvyaḥ sadaḥ ॥4 ॥*

२. अग्नयः (Agnayaḥ) - य. (Yv.) ३३.२

हरयो धूमकेतवो वातजूताऽउप द्यवि। यतन्ते वृथगग्नयः ॥२॥
*harayo dhūmaketavo vātajūtā'upa dyavi / yatante vṛthagagnayaḥ //2 //*

### ६१४. विश्ववाराः (Viśvavārāḥ)

१. अग्निः (Agniḥ) - य. (Yv.) ३३.१२

अग्ने शर्द्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु ।
सं जास्पत्यं सुयममा कृणुष्व शत्रूयतामभि तिष्ठा महांसि ॥१२॥
*agne śarddha mahate saubhagāya tava dyumnānyuttamāni santu /*
*saṁ jāspatyaṁ suyamamā kṛṇuṣva śatrūyatāmabhi tiṣṭhā mahāṁsi //12 //*

### ६१५. विश्ववारा आत्रेयी (Viśvavārā Ātreyī)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ५.२८.१-६

समिद्धो अग्निर्दिवि शोचिरश्रेत्प्रत्यङ्ङुषसमुर्विया वि भाति ।
एति प्राची विश्ववारा नमोभिर्देवाँ ईळाना हविषा घृताची ॥१॥
समिध्यमानो अमृतस्य राजसि हविष्कृण्वन्तं सचसे स्वस्तये ।
विश्वं स धत्ते द्रविणं यमिन्वस्यातिथ्यमग्ने नि च धत्त इत्पुरः ॥२॥
अग्ने शर्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु ।
सं जास्पत्यं सुयममा कृणुष्व शत्रूयतामभि तिष्ठा महांसि ॥३॥
समिद्धस्य प्रमहसोऽग्ने वन्दे तव श्रियम् । वृषभो द्युम्नवाँ असि समध्वरेष्विध्यसे ॥४॥
समिद्धो अग्न आहुत देवान्यक्षि स्वध्वर। त्वं हि हव्यवाळसि ॥५॥
आ जुहोता दुवस्यताग्निं प्रयत्यध्वरे। व्रणीध्वं हव्यवाहनम् ॥६॥
*samiddho agnirdivi śochiraśretpratyaṅḍuṣasamurviyā vi bhāti /*
*eti prāchī viśvavārā namobhirdevāṁ īḻānā haviṣā ghṛtāchī //1 //*
*samidhyamāno amṛtasya rājasi haviṣkṛṇvantaṁ sachase svastaye /*
*viśvaṁ sa dhatte draviṇaṁ yaminvasyātithyamagne ni cha dhatta itpuraḥ //2 //*
*agne śardha mahate saubhagāya tava dyumnānyuttamāni santu /*
*saṁ jāspatyaṁ suyamamā kṛṇuṣva śatrūyatāmabhi tiṣṭhā mahāṁsi //3 //*
*samiddhasya pramahaso'gne vande tava śriyam /*
*vṛṣabho dyumnavāṁ asi samadhvareṣvidhyase //4 //*
*samiddho agna āhuta devānyakṣi svadhvara / tvaṁ hi havyavāḻasi //5 //*
*ā juhotā duvasyatāgniṁ prayatyadhvare / vraṇīdhvaṁ havyavāhanam //6 //*

### ६१६. विश्वामित्रः (Viśvāmitraḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ३.१०.१-९; ३.२७.२-१५; अ. (Av.) २०.१३.४; २०.१०२.१-३; य. (Yv.) १२.४७-५४; १८.७२

ऋ. (Rv.) ३.१०.१-९

त्वामग्ने मनीषिणः सम्राजं चर्षणीनाम्। देवं मर्तास इन्धते समध्वरे ॥१॥
त्वां यज्ञेष्वृत्विजमग्ने होतारमीळते। गोपा ऋतस्य दीदिहि स्वे दमे ॥२॥
स घा यस्ते ददाशति समिधा जातवेदसे। सो अग्ने धत्ते सुवीर्यं स पुष्यति ॥३॥
स केतुरध्वराणामग्निर्देवेभिरा गमत्। अंजानः सप्त होतृभिर्हविष्मते ॥४॥
प्र होत्रे पूर्व्यं वचोऽग्नये भरता बृहत्। विपां ज्योतींषि बिभ्रते न वेधसे ॥५॥
अग्निं वर्धन्तु नो गिरो यतो जायत उक्थ्यः। महे वाजाय द्रविणाय दर्शतः ॥६॥
अग्ने यजिष्ठो अध्वरे देवान्देवयते यज। होता मन्द्रो वि राजस्यति स्रिधः ॥७॥
स नः पावक दीदिहि द्युमदस्मे सीवीर्यम्। भवा स्तोतृभ्यो अन्तमः स्वस्तये ॥८॥
तं त्वा विप्रा विपन्यवो जागृवांसः समिन्धते। हव्यवाहममर्त्यं सहोवृधम् ॥९॥
*tvāmagne manīṣiṇaḥ samrājaṁ charṣaṇīnām / devaṁ martāsa indhate samadhvare //1 //*
*tvāṁ yajñeṣvṛtvijamagne hotāramīḻate / gopā ṛtasya dīdihi sve dame //2 //*
*sa ghā yaste dadāśati samidhā jātavedase / so agne dhatte suvīryaṁ sa puṣyati //3 //*
*sa keturadhvarāṇāmagnirdevebhirā gamat / aṁjānaḥ sapta hotṛbhirhaviṣmate //4 //*
*pra hotre pūrvyaṁ vacho'gnaye bharatā bṛhat / vipāṁ jyotīṁṣi bibhrate na vedhase //5 //*

*agniṁ vadharntu no giro yato jāyata ukthyaḥ । mahe vājāya draviṇāya darśataḥ ॥6 ॥*
*agne yajiṣṭho adhvare devāndevayate yaja । hotā mandro vi rājasyati sridhaḥ ॥7 ॥*
*sa naḥ pāvaka dīdihi dyumadasme sīvīryam । bhavā stotṛbhyo antamaḥ svastaye ॥8 ॥*
*taṁ tvā viprā vipanyavo jāgṛvāṁsaḥ samindhate । havyavāhamamartyaṁ sahovṛdham ॥9 ॥*

ऋ. (Rv.) ३.२७.२-१५

ईळे अग्निं विपश्चितं गिरा यज्ञस्य साधनम्। श्रुष्टीवानं धितावानम् ॥२॥
अग्ने शकेम ते वयं यमं देवस्य वाजिनः। अति द्वेषांसि तरेम ॥३॥
समिध्यमानो अध्वरे३ऽग्निः पावक ईड्यः। शोचिष्केशस्तमीमहे ॥४॥
पृथुपाजा अमर्त्यो घृतनिर्णिक्स्वाहुतः। अग्निर्यज्ञस्य हव्यवाट् ॥५॥
तं सबाधो यतस्रुच इत्था धिया यज्ञवन्तः। आ चक्रुरग्निमूतये ॥६॥
होता देवो अमर्त्यः पुरस्तादेति मायया। विदथानि प्रचोदयन् ॥७॥
वाजी वाजेषु धीयतेऽध्वरेषु प्र णीयते। विप्रो यज्ञस्य साधनः ॥८॥
धिया चक्रे वरेण्यो भूतानां गर्भमा दधे। दक्षस्य पितरं तना ॥९॥
नि त्वा दधे वरेण्यं दक्षस्येळा सहस्कृत। अग्ने सुदीतिमुशिजम् ॥१०॥
अग्निं यन्तुरमप्तुरमृतस्य योगे वनुषः विप्रा वाजैः समिन्धते ॥११॥
ऊर्जो नपातमध्वरे दीदिवांसमुप द्यवि। अग्निमीळे कविक्रतुम् ॥१२॥
ईळेन्यो नमस्यस्तिरस्मांसि दर्शतः। समग्निरिध्यते वृषा ॥१३॥
वृषो अग्निः समिध्यतेऽश्वो न देववाहनः। तं हविष्मन्त ईळते ॥१४॥
वृषणं त्वा वयं वृषन्वृषणः समिधीमहि। अग्ने दीद्यतं बृहत् ॥१५॥

*īḻe agiṁna vipaśchitaṁ girā yajñasya sādhanam । śruṣṭīvānaṁ dhitāvānam ॥2 ॥*
*agne śakema te vayaṁ yamaṁ devasya vājinaḥ । ati dveṣāṁsi tarema ॥3 ॥*
*samidhyamāno adhvare3'ginaḥ pāvaka īḍyaḥ । śochiṣkeśastamīmahe ॥4 ॥*
*pṛthupājā amartyo ghṛtanirṇiksvāhutaḥ । agniryajñasya havyavāṭ ॥5 ॥*
*taṁ sabādho yatasrucha itthā dhiyā yajñavantaḥ । ā chakruragnimūtaye ॥6 ॥*
*hotā devo amartyaḥ purastādeti māyayā । vidathāni prachodayan ॥7 ॥*
*vājī vājeṣu dhīyate'dhvareṣu pra ṇīyate । vipro yajñasya sādhanaḥ ॥8 ॥*
*dhiyā chakre vareṇyo bhūtānāṁ garbhamā dadhe । dakṣasya pitaraṁ tanā ॥9 ॥*
*ni tvā dadhe vareṇyaṁ dakṣasyeḻā sahaskṛta । agne sudītimṛśijam ॥10 ॥*
*agiṁna yanturamapturamṛtasya yoge vanuṣaḥ viprā vājaiḥ samindhate ॥11 ॥*
*ūrjo napātamadhvare dīdivāṁsamupa dyavi । agnimīḻe kavikratum ॥12 ॥*
*īḻenyo namasyastirasmāṁsi darśataḥ । samagniridhyate vṛṣā ॥13 ॥*
*vṛṣo agniḥ samidhyate'śvo na devavāhanaḥ । taṁ haviṣmanta īḻate ॥14 ॥*
*vṛṣaṇaṁ tvā vayaṁ vṛṣanvṛṣaṇaḥ samidhīmahi । agne dīdyataṁ bṛhat ॥15 ॥*

अ. (Av.) २०.१३.४

ऐभिरग्ने सरथं याह्यर्वाङ् नानारथं वा विभवो ह्यश्वाः ।
पत्नीवतस्त्रिंशतं त्रींश्च देवाननुष्वधमा वह मादयस्व ॥४॥

*aibhiragne sarathaṁ yāhyarvāṅ nānārathaṁ vā vibhavo hyaśvāḥ ।*
*patnīvatastriṁśataṁ trīṁścha devānanuṣvadhamā vaha mādayasva ॥4 ॥*

अ. (Av.) २०.१०२.१-३

ईडेन्यो नमस्यस्तिरस्तमांसि दर्शतः। समग्निरिध्यते वृषा ॥१॥
वृषो अग्निः समिध्यतेऽश्वो न देववाहनः। तं हविष्मन्त ईडते ॥२॥
वृषणं त्वा वयं वृषन् वृषणः समिधीमहि। अग्ने दीद्यतं बृहत् ॥३॥

*īḍenyo namasyastirastamāṁsi darśataḥ । samagniridhyate vṛṣā ॥1 ॥*
*vṛṣo agniḥ samidhyate'śvo na devavāhanaḥ । taṁ haviṣmanta īḍate ॥2 ॥*
*vṛṣaṇaṁ tvā vayaṁ vṛṣan vṛṣaṇaḥ samidhīmahi । agne dīdyataṁ bṛhat ॥3 ॥*

य. (Yv.) १२.४७-५४

अयं सोऽअग्निर्यस्मिन्त्सोममिन्द्रः सुतं दधे जठरे वावशानः ।
सहस्रियं वाजमत्यं न सप्तिं ससवान्त्सन्त्स्तूयसे जातवेदः ॥४७॥
अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीष्वप्स्वा यजत्र ।

येनान्तरिक्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः ॥४८॥
अग्ने दिवोऽअर्णमच्छा जिगास्यच्छा देवाँ२ऽऽऊजिषे धिष्ण्या ये ।
या रोचने परस्तात् सूर्यस्य याश्चावस्तादुपतिष्ठन्तऽआपः ॥४९॥
पुरीष्यासोऽअग्नयः प्रावणेभिः सजोषसः ।
जुषन्तां यज्ञमद्रुहोऽनमीवाऽइषो महीः ॥५०॥
इडामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥५१॥
अयं ते योनिर्ऋत्वियो यतो जातोऽअरोचथाः ।
तं जानन्नग्नऽआ रोहाथा नो वर्धया रयिम् ॥५२॥
चिदसि तया देवतयांगिरस्वद् ध्रुवा सीद ।
परिचिदसि तया देवतयांगिरस्वद् ध्रुवा सीद ॥५३॥
लोकं पृण छिद्रं पृणाथो सीद ध्रुवा त्वम् ।
इन्द्राग्नी त्वा बृहस्पतिरस्मिन् योनावसीषदन् ॥५४॥
*ayaṁ so'agniryasmintsomamindraḥ sutaṁ dadhe jaṭhare vāvaśānaḥ /*
*sahasriyaṁ vājamatyaṁ na saptiṁ sasavāntsantstūyase jātavedaḥ //47//*
*agne yatte divi varchaḥ pṛthivyāṁ yadoṣadhīṣvapsvā yajatra /*
*yenāntarikṣamurvātatantha tveṣaḥ sa bhānurarṇavo nṛchakṣāḥ //48//*
*agne divo'arṇamachchhā jigāsyachchhā devām̐2''ūjiṣe dhiṣṇyā ye /*
*yā rochane parastāt sūryasya yāśchāvastādupatiṣṭhanta'āpaḥ //49//*
*purīṣyāso'agnayaḥ prāvaṇebhiḥ sajoṣasaḥ /*
*juṣantāṁ yajñamadruho'namīvā'iṣo mahīḥ //50//*
*iḍāmagne purudaṁsaṁ saniṁ goḥ śaśvattamaṁ havamānāya sādha /*
*syānnaḥ sūnustanayo vijāvāgne sā te sumatirbhūtvasme //51//*
*ayaṁ te yonirṛtviyo yato jāto'arochathāḥ /*
*taṁ jānannagna'ā rohāthā no vardhayā rayim //52//*
*chidasi tayā devatayāṁgirasvad dhruvā sīda /*
*parichidasi tayā devatayāṁgirasvad dhruvā sīda //53//*
*lokaṁ pṛṇa chhidraṁ pṛṇātho sīda dhruvā tvam /*
*indrāgnī tvā bṛhaspatirasmin yonāvasīṣadan //54//*

य. (Yv.) १८.७२

वैश्वानरो नऽऊतयऽआ प्र यातु परावतः। अग्निर्नः सुष्टुतीरुप ॥७२॥
*vaiśvānaro na'ūtaya'ā pra yātu parāvataḥ / agnirnaḥ suṣṭutīrupa //72//*

२. अग्न्यादयो मन्त्रोक्ताः (Agnyādayo Mantroktāḥ) - य. (Yv.) ११.६६

आकूतिमग्निं प्रयुजं स्वाहा मनो मेधामग्निं प्रयुजं स्वाहा चित्तं विज्ञातमग्निं प्रयुजं स्वाहा वाचो विधृतिमग्निं प्रयुजं स्वाहा प्रजापतये मनवे स्वहांग्नये वैश्वानराय स्वाहा ॥६६॥
*ākūtimagniṁ prayujaṁ svāhā mano medhāmagniṁ prayujaṁ svāhā chittaṁ vijñātamagniṁ prayujaṁ svāhā vācho vidhṛtimagniṁ prayujaṁ svāhā prajāpataye manave svahāṁgnaye vaiśvānarāya svāhā //66//*

३. अश्विनौ (Aśvinau) - अ. (Av.) ६.१४१.१-३

वायुरेनाः समाकरत् त्वष्टा पोषाय धियताम्। इन्द्र आभ्यो अधि ब्रवद् रुद्रो भूम्ने चिकित्सतु।१।
लोहितेन स्वधितिना मिथुनं कर्णयोः कृधि। अकर्तामश्विना लक्ष्म तदस्तु प्रजया बहु ॥२॥
यथा चक्रुर्देवासुरा यथा मनष्या उत। एवा सहस्रपोषाय कृणुतं लक्ष्माश्विना ॥३॥
*vāyurenāḥ samākarat tvaṣṭā poṣāya dhiyatām / indra ābhyo adhi bravad rudro bhūmne chikitsatu /1/*
*lohitena svadhitinā mithunaṁ karṇayoḥ kṛdhi / akartāmaśvinā lakṣama tadastu prajayā bahu //2//*
*yathā chakrurdevāsurā yathā manaṣyā uta / evā sahasrapoṣāya kṛṇutaṁ lakṣamāśvinā //3//*

४. इन्द्रः (Indraḥ) - अ. (Av.) २०.१.१; २०.६.१-९; २०.७.४; २०.८.३; २०.११.१-११; २०.१९.१-७; २०.२०.१-४; २०.२३.१-९; २०.२४.१-९; २०.५७.४-७; २०.८६.१; य. (Yv.) २०.२९; ५३;

३३.२२; २६.६३

अ. (Av.) २०.१.१

इन्द्र त्वा वृषभं वयं सुते सोमे हवामहे। स पाहि मध्वो अन्धसः ॥१॥
*indra tvā vṛṣabhaṁ vayaṁ sute some havāmahe । sa pāhi madhvo andhasaḥ ॥1॥*

अ. (Av.) २०.६.१-९

इन्द्र त्वा वृषभं वयं सुते सोमे हवामहे। स पाहि मध्वो अन्धसः ॥१॥
इन्द्र क्रतुविदं सुतं सोमं हर्य पुरुष्टुत। पिबा वृषस्व तातृपिम् ॥२॥
इन्द्र प्र णो धितावानं यज्ञं विश्वेभिर्देवेभिः। तिर स्तवान् विश्पते ॥३॥
इन्द्र सोमाः सुता इमे तव प्र यन्ति सत्पते। क्षयं चन्द्रास इन्दवः ॥४॥
दधिष्वा जठरे सुतं सोममिन्द्र वरेण्यम्। तव द्युक्षास इन्दवः ॥५॥
गिर्वणः पाहि नः सुतं मधोर्धाराभिरज्यसे। इन्द्र त्वादातमिद् यशः ॥६॥
अभि द्युम्नानि वनिन इन्द्रं सचन्ते अक्षिता। पीत्वी सोमस्य वावृधे ॥७॥
अर्वावतो न आ गहि परावतश्च वृत्रहन्। इमा जुषस्व नो गिरः ॥८॥
यदन्तरा परावतमर्वावतं च हूयसे। इन्द्रेह तत आ गहि ॥९॥
*indra tvā vṛṣabhaṁ vayaṁ sute some havāmahe । sa pāhi madhvo andhasaḥ ॥1॥*
*indra kratuvidaṁ sutaṁ somaṁ harya puruṣṭuta । pibā vṛṣasva tātṛpim ॥2॥*
*indra pra ṇo dhitāvānaṁ yajñaṁ viśvebhirdevebhiḥ । tira stavān viśpate ॥3॥*
*indra somāḥ sutā ime tava pra yanti satpate । kṣayaṁ chandrāsa indavaḥ ॥4॥*
*dadhiṣvā jaṭhare sutaṁ somamindra vareṇyam । tava dyukṣāsa indavaḥ ॥5॥*
*girvaṇaḥ pāhi naḥ sutaṁ madhordhārābhirajyase । indra tvādātamid yaśaḥ ॥6॥*
*abhi dyumnāni vanina indraṁ sachante akṣitā । pītvī somasya vāvṛdhe ॥7॥*
*arvāvato na ā gahi parāvataścha vṛtrahan । imā juṣasva no giraḥ ॥8॥*
*yadantarā parāvatamarvāvataṁ cha hūyase । indreha tata ā gahi ॥9॥*

अ. (Av.) २०.७.४

इन्द्र क्रतुविदं सुतं सोमं हर्य पुरुष्टुत। पिबा वृषस्य तातृपिम् ॥४॥
*indra kratuvidaṁ sutaṁ somaṁ harya puruṣṭuta । pibā vṛṣasya tātṛpim ॥4॥*

अ. (Av.) २०.८.३

अपूर्णो अस्यकलशः स्वाहा सेक्तेव कोशं सिसिचे पिबध्यै ।
समु प्रिया आववृत्रन् मदाय प्रदक्षिणिदभि सोमाय इन्द्रम् ॥३॥
*apūrṇo asyakalaśaḥ svāhā sekteva kośaṁ sisiche pibadhyai ।*
*samu priyā āvavṛtran madāya pradakṣiṇidabhi somāya indram ॥3॥*

अ. (Av.) २०.११.१-११

इन्द्रः पूर्भिदातिरद् दासमर्कैर्विदद्वसुर्दयमानो वि शत्रून् ।
ब्रह्मजूतस्तन्वा वावृधानो भूरिदात्र आपृणद् रोदसी उभे ॥१॥
मखस्य ते तविषस्य प्र जूतिमियर्मि वाचममृताय भूषन् ।
इन्द्र क्षितीनामसि मानुषीणां विशां दैवीनामुत पूर्वयावा ॥२॥
इन्द्रो वृत्रमवृणोच्छर्धनीतिः प्र मायिनाममिनाद् वर्पणीतिः ।
अहन् व्यंसमुशधग् वनेष्वाविर्धेना अकृणोद् राम्याणाम् ॥३॥
इन्द्रः स्वर्षा जनयन्नहानि जिगायोशिग्भिः पृतना अभिष्टिः ।
प्रारोचयन्मनवे केतुमह्नामविन्दज्ज्योतिर्बृहते रणाय ॥४॥
इन्द्रस्तुजो बर्हणा आ विवेश नृवद् दधानो नर्या पुरूणि ।
अचेतयद् धिय इमा जरित्रे प्रेमं वर्णमतिरच्छुक्रमासाम् ॥५॥
मही महानि पनयन्त्यस्येन्द्रस्य कर्म सुकृता पुरूणि ।
वृजनेन वृजिनान्त्सं पिपेष मायाभिर्दस्यूँरभिभूत्योजाः ॥६॥
युधेन्द्रो मह्ना वरिवश्चकार देवेभ्यः सत्पतिश्चर्षणिप्राः ।
विवस्वतः सदने अस्य तानि विप्रा उक्थेभिः कवयो गृणन्ति ॥७॥
सत्रासाहं वरेण्यं सहोदां ससवांसं स्वरपश्च देवीः ।
ससान यः पृथिवीं द्यामुतेमामिन्द्रं मदन्त्यनु धीरणासः ॥८॥

ससानात्याँ उत सूर्यं ससानेन्द्रः ससान पुरुभोजसं गाम् ।
हिरण्ययमुतभोगं ससान हत्वी दस्यून् प्रार्यं वर्णमावत् ॥९॥
इन्द्र ओषधीरसनोदहानि वनस्पतीँ रसनोदन्तरिक्षम् ।
बिभेद वलं नुनुदे विवाचोऽथाभवद् दमिताभिक्रतूनाम् ॥१०॥
शुनं हुवेम मघवानमिन्द्रमस्मिन् भरे नृतमं वाजसातौ ।
शुण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥११॥
*indraḥ pūrbhidātirad dāsamarkairvidadvasurdayamāno vi śatrūn /*
*brahmajūtastanvā vāvṛdhāno bhūridātra āpṛṇad rodasī ubhe //1//*
*makhasya te taviṣasya pra jūtimiyarmi vāchamamṛtāya bhūṣan /*
*indra kṣitīnāmasi mānuṣīṇāṁ viśāṁ daivīnāmuta pūrvayāvā //2//*
*indro vṛtramavṛṇochchhardhanītiḥ pra māyināmamināḍ varpaṇītiḥ /*
*ahan vyaṁsamuśadhag vaneṣvāvidhrenā akṛṇod rāmyāṇām //3//*
*indraḥ svarṣā janayannahāni jigāyośigbhiḥ pṛtanā abhiṣṭiḥ /*
*prārochayanmanave ketumahnāmavindajjyotirbṛhate raṇāya //4//*
*indrastujo barhaṇā ā viveśa nṛvad dadhāno nayī purūṇi /*
*achetayad dhiya imā jaritre premaṁ varṇamatirachchhukramāsām //5//*
*mahī mahāni panayantyasyendrasya karma sukṛtā purūṇi /*
*vṛjanena vṛjināntsaṁ pipeṣa māyābhirdasyūm̐rabhibhūtyojāḥ //6//*
*yudhendro mahnā varivaśchakāra devebhyaḥ satpatiścharṣaṇiprāḥ /*
*vivasvataḥ sadane asya tāni viprā ukthebhiḥ kavayo gṛṇanti //7//*
*satrāsāhaṁ vareṇyaṁ sahodāṁ sasavāṁsaṁ svarapaścha devīḥ /*
*sasāna yaḥ pṛthivīṁ dyāmutemāmindraṁ madantyanu dhīraṇāsaḥ //8//*
*sasānātyām̐ uta sūryaṁ sasānendraḥ sasāna purubhojasaṁ gām /*
*hiraṇyayamutabhogaṁ sasāna hatvī dasyūn prāryaṁ varṇamāvat //9//*
*indra oṣadhīrasanodahāni vanaspatīm̐ rasanodantarikṣam /*
*bibheda valaṁ nunude vivācho'thābhavad damitābhikratūnām //10//*
*śunaṁ huvema maghavānamindramasmin bhare nṛtamaṁ vājasātau /*
*śuṇvantamugramūtaye samatsu ghnantaṁ vṛtrāṇi saṁjitaṁ dhanānām //11//*

अ. (Av.) २०.१९.१-७

वार्त्रहत्याय शवसे पृतनाषाह्याय च। इन्द्र त्वा वर्तयामसि ॥१॥
अर्वाचीनं सु ते मन उत चक्षुः शतक्रतो। इन्द्र कृण्वन्तु वाघतः ॥२॥
नामानि ते शतक्रतो विश्वाभिर्गीर्भिरीमहे। इन्द्राभिमातिषाह्ये ॥३॥
पुरुष्टुतस्य धामभिः शतेन महयामसि। इन्द्रस्य चर्षणीधृतः ॥४॥
इन्द्रं वृत्राय हन्तवे पुरुहूतमुप ब्रुवे। भरेषु वाजसातये ॥५॥
वाजेषु सासहिर्भव त्वामीमहे शतक्रतो। इन्द्र वृत्राय हन्तवे ॥६॥
द्युम्नेषु पृतनाज्ये पृत्सुतूर्षु श्रवःसु च। इन्द्र साक्ष्वाभिमातिषु ॥७॥
*vārtrahatyāya śavase pṛtanāṣāhyāya cha / indra tvā vartayāmasi //1//*
*arvāchīnaṁ su te mana uta chakṣuḥ śatakrato / indra kṛṇvantu vāghataḥ //2//*
*nāmāni te śatakrato viśvābhirgīrbhirīmahe / indrābhimātiṣāhye //3//*
*puruṣṭutasya dhāmabhiḥ śatena mahayāmasi / indrasya charṣaṇīdhṛtaḥ //4//*
*indraṁ vṛtrāya hantave puruhūtamupa bruve / bhareṣu vājasātaye //5//*
*vājeṣu sāsahirbhava tvāmīmahe śatakrato / indra vṛtrāya hantave //6//*
*dyumneṣu pṛtanājye pṛtsutūrṣu śravaḥsu cha / indra sākṣavābhimātiṣu //7//*

अ. (Av.) २०.२०.१-४

शुष्मिन्तमं न ऊतये द्युम्निनं पाहि जागृविम्। इन्द्र सोमं शतक्रतो ॥१॥
इन्द्रियाणि शतक्रतो या ते जनेषु पंचसु। इन्द्र तानि त आ वृणे ॥२॥
अगन्निन्द्र श्रवो बृहद् दधिष्व दुष्टरम्। उत् ते शुष्मं तिरामसि ॥३॥
अर्वावतो न आ गह्यथो शक्र परावतः। उ लोको यस्ते अद्रिव इन्द्रेह तत आ गहि ॥४॥
*śuṣmintamaṁ na ūtaye dyumninaṁ pāhi jāgṛvim / indra somaṁ śatakrato //1//*
*indriyāṇi śatakrato yā te janeṣu paṁchasu / indra tāni ta ā vṛṇe //2//*
*agannindra śravo bṛhad dadhiṣva duṣṭaram / ut te śuṣmaṁ tirāmasi //3//*

*arvāvato na ā gahyatho śakra parāvataḥ । u loko yaste adriva indreha tata ā gahi ॥4 ॥*

अ. (Av.) २०.२३.१-९

आ तू न इन्द्र मद्र्यग्घुवानः सोमपीतये। हरिभ्यां याह्यद्रिवः ॥१ ॥
सत्तो होता न ऋत्वियस्तिस्तिरे बर्हिरानुषक्। अयुञ्रन् प्रातरद्रयः ॥२ ॥
इमा ब्रह्म ब्रह्मवाहः क्रियन्त आ बर्हिः सीद। वीहि शूर पुरोडाशम् ॥३ ॥
रारन्धि सवनेषु ण एषु स्तोमेषु वृत्रहन्। उक्थेष्विन्द्र गिर्वणः ॥४ ॥
मतयः सोमपामुरुं रिहन्ति शवसस्पतिम्। इन्द्रं वत्सं न मातरः ॥५ ॥
स मन्दस्वा ह्यन्धसो राधसे तन्वा महे। न स्तोतारं निदे करः ॥६ ॥
वयमिन्द्र त्वायवो हविष्मन्तो जरामहे। उत त्वमस्मयुर्वसो ॥७ ॥
मारे अस्मद् वि मुमुचो हरिप्रियार्वाङ् याहि। इन्द्र स्वधावो मत्स्वेह ॥८ ॥
अर्वांचं त्वा सुखे रथे वहतामिन्द्र केशिना। घृतस्नू बर्हिरासदे ॥९ ॥

*ā tū na indra madryagghuvānaḥ somapītaye । haribhyāṁ yāhyadrivaḥ ॥1 ॥*
*satto hotā na ṛtviyastistire barhirānuṣak । ayujran prātaradrayaḥ ॥2 ॥*
*imā brahma brahmavāhaḥ kriyanta ā barhiḥ sīda । vīhi śūra puroḍāśam ॥3 ॥*
*rārandhi savaneṣu ṇa eṣu stomeṣu vṛtrahan । uktheṣvindra girvaṇaḥ ॥4 ॥*
*matayaḥ seāmapāmuruṁ rihanti śavasaspatim । indraṁ vatsaṁ na mātaraḥ ॥5 ॥*
*sa mandasvā hyandhaso rādhase tanvā mahe । na stotāraṁ nide karaḥ ॥6 ॥*
*vayamindra tvāyavo haviṣmanto jarāmahe । uta tvamasmayurvaso ॥7 ॥*
*māre asmad vi mumucho haripriyārvāṅ yāhi । indra svadhāvo matsveha ॥8 ॥*
*arvāṁchaṁ tvā sukhe rathe vahatāmindra keśinā । ghṛtasnū barhirāsade ॥9 ॥*

अ. (Av.) २०.२४.१-९

उप नः सुतमा गहि सोममिन्द्र गवाशिरम्। हरिभ्यां यस्ते अस्मयुः ॥१ ॥
तमिन्द्र मदमा गहि बर्हिष्ठां ग्रावभिः सुतम। कुविन्न्वस्य तृण्णवः ॥२ ॥
इन्द्रमित्था गिरो ममाच्छागुरिषिता इतः। आवृते सोमपीतये ॥३ ॥
इन्द्र सोमस्य पीतये स्तोमैरिह हवामहे। उक्थेभिः कुविदागमत् ॥४ ॥
इन्द्र सोमाः सुता इमे तान् दधिष्व शतक्रतो। जठरे वाजिनीवसो ॥५ ॥
विद्मा हि त्वा धनंजयं वाजेषु दधृषं कवे। अधा ते सुम्नमीमहे ॥६ ॥
इममिन्द्र गवाशिरं यवाशिरं च नः पिब। आगत्या वृषभिः सुतम् ॥७ ॥
तुभ्येदिन्द्र स्व ओक्ये३ सोमं चोदामि पीतये। एष रारन्तु ते हृदि ॥८ ॥
त्वां सुतस्य पीतये प्रत्नमिन्द्र हवामहे। कुशिकासो अवस्यवः ॥९ ॥

*upa naḥ sutamā gahi somamindra gavāśiram । haribhyāṁ yaste asmayuḥ ॥1 ॥*
*tamindra madamā gahi barhiṣṭhāṁ grāvabhiḥ sutama । kuvinnvasya tṛpṇavaḥ ॥2 ॥*
*indramitthā giro mamāchchhāguriṣitā itaḥ । āvṛte somapītaye ॥3 ॥*
*indra somasya pītaye stomairiha havāmahe । ukthebhiḥ kuvidāgamat ॥4 ॥*
*indra somāḥ sutā ime tān dadhiṣva śatakrato । jaṭhare vājinīvaso ॥5 ॥*
*vidmā hi tvā dhanaṁjayaṁ vājeṣu dadhṛṣaṁ kave । adhā te sumnamīmahe ॥6 ॥*
*imamindra gavāśiraṁ yavāśiraṁ cha naḥ piba । āgatyā vṛṣabhiḥ sutam ॥7 ॥*
*tubhyedindra sva okye3 somaṁ chodāmi pītaye । eṣa rārantu te hṛdi ॥8 ॥*
*tvāṁ sutasya pītaye pratnamindra havāmahe । kuśikāso avasyavaḥ ॥9 ॥*

अ. (Av.) २०.५७.४-७

शुष्मिन्तमं न ऊतये द्युम्निनं पाहि जागृविम्। इन्द्र सोमं शतक्रतो ॥४ ॥
इन्द्रियाणि शतक्रतो या ते जनेषु पंचसु। इन्द्र तानि त आ वृणे ॥५ ॥
अगन्निन्द्र श्रवो बृहद् द्युम्नं दधिष्व दुष्टरम्। उत् ते शुष्मं तिरामसि ॥६ ॥
अर्वावतो न आ गह्यथो शक्र परावतः। उ लोको यस्ते अद्रिव इन्द्रेह तत आ गहि ॥७ ॥

*śuṣmintamaṁ na ūtaye dyumninaṁ pāhi jāgṛvim । indra somaṁ śatakrato ॥4 ॥*
*indriyāṇi śatakrato yā te janeṣu paṁchasu । indra tāni ta ā vṛṇe ॥5 ॥*
*agannindra śravo bṛhad dyumnaṁ dadhiṣva duṣṭaram । ut te śuṣmaṁ tirāmasi ॥6 ॥*
*arvāvato na ā gahyatho śakra parāvataḥ । u loko yaste adriva indreha tata ā gahi ॥7 ॥*

अ. (Av.) २०.८६.१

ब्रह्मणा ते ब्रह्मयुजा युनज्मि हरी सखाया सधमाद आशू ।
स्थिरं रथं सुखमिन्द्राधिति
*brahmaṇā te brahmayujā yunajmi harī sakhāyā sadhamāda āśū /*
*sthiraṁ rathaṁ sukhamindrādhiti*

य. (Yv.) २०.२९

धानावन्तं करम्भिणमपूपवन्तमुक्थिनम्। इन्द्र प्रातर्जुषस्व नः ॥२९॥
*dhānāvantaṁ karambhiṇamapūpavantamukthinam / indra prātarjuṣasva naḥ //29 //*

य. (Yv.) २०.५३

आ मन्द्रैरिन्द्रं हरिभिर्याहि मयूररोमभिः ।
मा त्वा के चिन्नि यमन्वि न पाशिनोऽति धन्वेव ताँ२ऽइहि ॥५३॥
*ā mandrairindraṁ haribhiryāhi mayūraromabhiḥ /*
*mā tvā ke chinni yamanvi na pāśino'ti dhanveva tām̐2'ihi //53 //*

य. (Yv.) ३३.२२

आतिष्ठन्तं परि विश्वेऽअभूषिंछ्रयो वसानश्चरति स्वरोचिः ।
महत्तद्वृष्णोऽअसुरस्य नामा विश्वरूपोऽअमृतानि तस्थौ ॥२२॥
*ātiṣṭhantaṁ pari viśve'abhūṣiṁchhrayo vasānaścharati svarochiḥ /*
*mahattadvṛṣṇo'asurasya nāmā viśvarūpo'amṛtāni tasthau //22 //*

य. (Yv.) ३३.२६

इन्द्रो वृत्रमवृणोच्छर्द्धनीतिः प्र मायिनाममिनाद्वर्पणीतिः ।
अहन् व्यंसमुशधग्वनेष्वाविर्धेनाऽअकृणोद्राम्याणाम् ॥२६॥
*indro vṛtramavṛṇochchharddhanītiḥ pra māyināmamināḍvarpaṇītiḥ /*
*ahan vyaṁsamuśadhagvaneṣvāvirdhenā'akṛṇodrāmyāṇām //26 //*

य. (Yv.) ३३.६३

ये त्वाहिहत्ये मघवन्नवर्द्धन्ये शाम्बरे हरिवो ये गविष्टौ ।
ये त्वा नूनमनुमदन्ति विप्राः पिबेन्द्र सोमं सगणो मरुद्भिः ॥६३॥
*ye tvāhihatye maghavannavarddhanye śāmbare harivo ye gaviṣṭau /*
*ye tvā nūnamanumadanti viprāḥ pibendra somaṁ sagaṇo marudbhiḥ //63 //*

५. इन्द्राग्निः (Indrāgniḥ) - य. (Yv.) ७.३१

इन्द्राग्नीऽआगतं सुतं गीर्भिर्नभो वरेण्यम्। अस्य पातं धियेषिता ।
उपयामगृहीतोऽसीन्द्राग्निभ्यां त्वैष ते योनिरिन्द्राग्निभ्यां त्वा ॥३१॥
*indrāgnī'āgataṁ sutaṁ gīrbhirnabho vareṇyam / asya pātaṁ dhiyeṣitā /*
*upayāmagṛhīto'sīndrāgnibhyāṁ tvaiṣa te yonirindrāgnibhyāṁ tvā //31 //*

६. ऋतवोऽग्निर्वा (Ṛtavo'gnirvā) - ऋ. (Rv.) ३.२७.१

प्र वो वाजा अभिद्यवोा हविष्मन्तो घृताच्या। देवाञ्जिगाति सुम्नयुः॥ १॥
*pra vo vājā abhidyavoā haviṣmanto ghṛtāchyā / devāñjigāti sumnayuḥ // 1 //*

७. एक वृषः (Eka Vṛṣaḥ) - अ. (Av.) ५.१६.१-११

यद्येकवृषोऽसि सृजारसोसि ॥१॥
यदि द्विवृषोऽसि सृजारसोसि ॥२॥
यदि त्रिवृषोऽसि सृजारसोसि ॥३॥
यदि चतुर्वृषेऽसि सृजारसोसि ॥४॥
यदि पंचवृषोऽसि सृजारसोसि ॥५॥
यदि षड्वृषोऽसि सृजारसोसि ॥६॥
यदि सप्तवृषोऽसि सृजारसोसि ॥७॥
यद्यष्टवृषोऽसि सृजारसोसि ॥८॥
यदि नववृषोऽसि सृजारसोसि ॥९॥
यदि दशवृषोऽसि सृजारसोऽसि ॥१०॥

यद्येकादशोऽसि सोऽपोदकोसि ॥११॥
*yadyekavṛṣo'si sṛjārasosi ॥1॥*
*yadi dvivṛṣo'si sṛjārasosi ॥2॥*
*yadi trivṛṣo'si sṛjārasosi ॥3॥*
*yadi chaturvṛṣe'si sṛjārasosi ॥4॥*
*yadi paṁchavṛṣo'si sṛjārasosi ॥5॥*
*yadi ṣaḍvṛṣo'si sṛjārasosi ॥6॥*
*yadi saptavṛṣo'si sṛjārasosi ॥7॥*
*yadyaṣṭavṛṣo'si sṛjārasosi ॥8॥*
*yadi navavṛṣo'si sṛjārasosi ॥9॥*
*yadi daśavṛṣo'si sṛjāraso'si ॥10॥*
*yadyekādaśo'si so'podakosi ॥11॥*

८. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.६७.१३-१५

वाचो जन्तुः कवीनां पवस्व सोम धारया। देवेषु रत्नधा असि ॥१३॥
आ कलशेषु धावति श्येनो वर्म वि गाहते। अभि द्रोणा कनिक्रदत् ॥१४॥
परि प्र सोम ते रसोऽसर्जि कलशे सुतः। श्येनो न तक्तो अर्षति ॥१५॥
*vācho jantuḥ kavīnāṁ pavasva soma dhārayā । deveṣu ratnadhā asi ॥13॥*
*ā kalaśeṣu dhāvati śyeno varma vi gāhate । abhi droṇā kanikradat ॥14॥*
*pari pra soma te raso'sarji kalaśe sutaḥ । śyeno na takto arṣati ॥15॥*

९. प्रजापतिः (Prajāpatiḥ) - य. (Yv.) ७.३५-३८

इन्द्र मरुत्वऽइह पाहि सोमं यथा शार्य्यातेऽअपिबः सुतस्य। तव प्रणीती तव शूर शर्म्मन्नाविवासन्ति कवयः सुयज्ञाः।
उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वतऽएष ते योनिरिन्द्राय त्वा मरुत्वते ॥३५॥
मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यं शासमिन्द्रम्।
विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम। उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वतऽएष ते योनिरिन्द्राय त्वा
मरुत्वते। उपयामगृहीतोऽसि मरुतां त्वौजसे ॥३६॥
सजोषाऽइन्द्र सागणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान्। जहि शत्रूँ२ऽरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः।
उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वतऽएष ते योनिरिन्द्राय त्वा मरुत्वते ॥३७॥
मरुत्वाँ२ऽइन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय। आसिंचस्व जठरे मध्वऽऊमिर्मं त्वं राजासि प्रतिपत्सुतानाम्।
उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वतऽएष ते योनिरिन्द्राय त्वा मरुत्वते ॥३८॥
*indra marutva'iha pāhi somaṁ yathā śāryyāte'apibaḥ sutasya ।*
*tava praṇītī tava śūra śarmmannāvivāsanti kavayaḥ suyajñāḥ ।*
*upayāmagṛhīto'sīndrāya tvā marutvata'eṣa te yonirindrāya tvā marutvate ॥35॥*
*marutvantaṁ vṛṣabhaṁ vāvṛdhānamakavāriṁ divyaṁ śāsamindram ।*
*viśvāsāhamavase nūtanāyograṁ sahodāmiha taṁ huvema । upayāmagṛhīto'sīndrāya tvā*
*marutvata'eṣa te yonirindrāya tvā marutvate । upayāmagṛhīto'si marutāṁ tvaujase ॥36॥*
*sajoṣā'indra sāgaṇo marudbhiḥ somaṁ piba vṛtrahā śūra vidvān ।*
*jahi śatrūm̐2'rapa mṛdho nudasvāthābhayaṁ kṛṇuhi viśveto naḥ ।*
*upayāmagṛhīto'sīndrāya tvā marutvata'eṣa te yonirindrāya tvā marutvate ॥37॥*
*marutvām̐2'indra vṛṣabho raṇāya pibā somamanuṣvadhaṁ madāya ।*
*āsiṁchasva jaṭhare madhva'ūmirmaṁ tvaṁ rājāsi pratipatsutānām ।*
*upayāmagṛhīto'sīndrāya tvā marutvata'eṣa te yonirindrāya tvā marutvate ॥38॥*

१०. मधुला ओषधिः (Madhulā Oṣadhiḥ) - अ. (Av.) ५.१५.१-११

एका च मे दश च मेऽपवक्तार ओषधे। ऋतजात ऋतावरि मधु मे मधुला करः ॥१॥
द्वे च मे विंशतिश्च मेऽपवक्तार ओषधे। ऋतजात ऋतावरि मधु मे मधुला करः ॥२॥
तिस्रश्च मे त्रिंशच्च मेऽपवक्तार ओषधे। ऋतजात ऋतावरि मधु मे मधुला करः ॥३॥
चतस्रश्च मे चत्वारिंशच्च मेऽपवक्तार ओषधे। ऋतजात ऋतावरि मधु मे मधुला करः ॥४॥
पंच च मे पंचाशच्च मेऽपवक्तार ओषधे। ऋतजात ऋतावरि मधु मे मधुला करः ॥५॥
षट् च मे षष्टिश्च मेऽपवक्तार ओषधे। ऋतजात ऋतावरि मधु मे मधुला करः ॥६॥
सप्त च मे सप्ततिश्च मेऽपवक्तार ओषधे। ऋतजात ऋतावरि मधु मे मधुला करः ॥७॥
अष्ट च मेऽशीतिश्च मेऽपवक्तारे ओषधे। ऋतजात ऋतावरि मधु मे मधुला करः ॥८॥

नव च मे नवतिश्च मेऽपवक्तार ओषधे। ऋतजात ऋतावरि मधु मे मधुला करः ॥९॥
दश च मे शतं च मेऽपवक्तार ओषधे। ऋतजात ऋतावरि मधु मे मधुला करः ॥१०॥
शतं च मे सहस्रं चापवक्तार ओषधे। ऋतजात ऋतावरि मधु मे मधुला करः ॥११॥
*ekā cha me daśa cha me'pavaktāra oṣadhe । ṛtajāta ṛtāvari madhu me madhulā karaḥ ॥1॥*
*dve cha me viṁśatiścha me'pavaktāra oṣadhe । ṛtajāta ṛtāvari madhu me madhulā karaḥ ॥2॥*
*tisraścha me triṁśachcha me'pavaktāra oṣadhe । ṛtajāta ṛtāvari madhu me madhulā karaḥ ॥3॥*
*chatasraścha me chatvāriṁśachcha me'pavaktāra oṣadhe । ṛtajāta ṛtāvari madhu me madhulā karaḥ ॥4॥*
*paṁcha cha me paṁchāśachcha me'pavaktāra oṣadhe । ṛtajāta ṛtāvari madhu me madhulā karaḥ ॥5॥*
*ṣaṭ cha me ṣaṣṭiścha me'pavaktāra oṣadhe । ṛtajāta ṛtāvari madhu me madhulā karaḥ ॥6॥*
*sapta cha me saptatiścha me'pavaktāra oṣadhe । ṛtajāta ṛtāvari madhu me madhulā karaḥ ॥7॥*
*aṣṭa cha me'śītiścha me'pavaktāre oṣadhe । ṛtajāta ṛtāvari madhu me madhulā karaḥ ॥8॥*
*nava cha me navatiścha me'pavaktāra oṣadhe । ṛtajāta ṛtāvari madhu me madhulā karaḥ ॥9॥*
*daśa cha me śataṁ cha me'pavaktāra oṣadhe । ṛtajāta ṛtāvari madhu me madhulā karaḥ ॥10॥*
*śataṁ cha me sahasraṁ chāpavaktāra oṣadhe । ṛtajāta ṛtāvari madhu me madhulā karaḥ ॥11॥*

११. मन्त्रोक्ताः (Mantroktāḥ) - अ. (Av.) ६.४४.१-३

अस्थाद् द्यौरस्थात् पृथिव्यस्थाद् विश्वमिदं जगत् ।
अस्थुर्वृक्षा ऊर्ध्वस्वप्नास्तिष्ठाद् रोगो अयं तव ॥१॥
शतं या भेषजानि ते सहस्रं संगतानि च ।
श्रेष्ठमास्रावभेषजं वसिष्ठं रोगनाशनम् ॥२॥
रुद्रस्य मूत्रमस्यमृतस्य नाभिः ।
विषाणका नाम वा असि पितॄणां मूलादुत्थिता वातीकृतनाशनी ॥३॥
*asthād dyaurasthāt pṛthivyasthād viśvamidaṁ jagat ।*
*asthurvṛkṣā ūrdhvasvapnāstiṣṭhād rogo ayaṁ tava ॥1॥*
*śataṁ yā bheṣajāni te sahasraṁ saṁgatāni cha ।*
*śreṣṭhamāsrāvabheṣajaṁ vasiṣṭhaṁ roganāśanam ॥2॥*
*rudrasya mūtramasyamṛtasya nābhiḥ ।*
*viṣāṇakā nāma vā asi pitṝṇāṁ mūlādutthitā vātīkṛtanāśanī ॥3॥*

१२. मित्रः (Mitraḥ) - य. (Yv.) ११.६२; ६४

य. (Yv.) ११.६२

मित्रस्य चर्षणीधृतोऽवो देवस्य सानसि। द्युम्नं चित्रश्रवस्तमम् ॥६२॥
*mitrasya charṣaṇīdhṛto'vo devasya sānasi । dyumnaṁ chitraśravastamam ॥62॥*

य. (Yv.) ११.६४

उत्थाय बृहती भावोदु तिष्ठ ध्रुवा त्वम्। मित्रैतां तऽउखां परिददाम्यभित्याऽएषा मा भेदि।६४॥

**१३.** मित्रावरुणौ (Mitrāvaruṇau) - य. (Yv.) २१.८

आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्। मध्वा रजांसि सुक्रतू ॥८॥
*ā no mitrāvaruṇā ghṛtairgavyūtimukṣatam । madhvā rajāṁsi sukratū ॥8॥*

१४. यज्ञः (Yajñaḥ) - य. (Yv.) १८.६३

प्रस्तरेण परिधिना स्रुचा वेद्या च बर्हिषा। ऋचेमं यज्ञं नो नय स्वर्देवेषु गन्तवे ॥६३॥
*prastareṇa paridhinā sruchā vedyā cha barhiṣā ।*
*ṛchemaṁ yajñaṁ no naya svardeveṣu gantave ॥63॥*

१५. वस्वादयो लिङ्गोक्ताः (Vasvādayo Liṅgoktāḥ) - य. (Yv.) ११.६५

वसवस्त्वा च्छृन्दन्तु गायत्रेण च्छन्दसाङ्गिरस्वद्रुद्रास्त्वाच्छृन्दन्तु त्रैष्टुभेन च्छन्दसाङ्गिरस्वदादित्यास्त्वा च्छृन्दन्तु जागतेन च्छन्दसाङ्गिरस्वद्विश्वे त्वा देवा वैश्वानराऽआच्छृन्दन्त्वानुष्टुभेन च्छन्दसाङ्गिरस्वत् ॥६५॥
*vasavastvā chchhṛndantu gāyatreṇa chchhandasāṅgirasvadrudrāstvāchchhṛndantu traiṣṭubhena chchhandasāṅgirasvadādityāstvā chchhṛndantu jāgatena chchhandasāṅgirasvadviśve tvā devā vaiśvānarā'āchchhṛndantvānuṣṭubhena chchhandasāṅgirasvat ॥65॥*

१६. वायुः (Vāyuḥ) - अ. (Av.) ६.१४२.१-३

उच्छ्रयस्व बहुर्भव स्वेन महसा यव। मृणीहि विश्वा पात्राणि मा त्वा दिव्याशनिर्वधीत् ॥१॥
आश्रृण्वन्तं यवं देवं यत्र त्वाच्छावदामसि। तदुच्छ्रयस्व द्यौरिव समुद्रइवैध्यक्षितः ॥२॥
अक्षितास्त उपसदोऽक्षिताः सन्तु राशयः। पृणन्तो अक्षिताः सन्त्वत्तारः सन्त्वक्षिताः ॥३॥
*uchchhrayasva bahurbhava svena mahasā yava । mṛṇīhi viśvā pātrāṇi mā tvā divyāśanirvadhīt ॥1॥*
*āśṛṇvantaṁ yavaṁ devaṁ yatra tvāchchhāvadāmasi । taduchchhrayasva dyauriva samudraivaidhyakṣitaḥ ॥2॥*
*akṣitāsta upasado'kṣitāḥ santu rāśayaḥ । pṛṇanto akṣitāḥ santvattāraḥ santvakṣitāḥ ॥3॥*

१७. विद्वान् (Vidvān) - य. (Yv.) ३३.७५

आ रोदसीऽअपृणदा स्वर्महज्जातं यदेनमपसोऽअधारयन् ।
सोऽअध्वराय परि णीयते कविरत्यो न वाजसातये चनोहितः ॥७५॥
*ā rodasī'apṛṇadā svarmahajjātaṁ yadenamapaso'adhārayan ।*
*so'adhvarāya pari ṇīyate kaviratyo na vājasātaye chanohitaḥ ॥75॥*

१८. विद्वांसः (Vidvāṁsaḥ) - य. (Yv.) ३३.७-८

त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन् ।
औक्षन् घृतैरस्तृणन् बर्हिरस्माऽआदिद्धोतारं न्यसादयन्त ॥७॥
मूर्द्धानं दिवोऽअरतिं पृथिव्या वैश्वानरमृतऽआ जातमग्निम् ।
कविं सम्राजमतिथिजनानामासन्ना पात्रं जनयन्त देवाः ॥८॥
*trīṇi śatā trī sahasrāṇyagniṁ triṁśachcha devā nava chāsaparyan ।*
*aukṣan ghṛtairastṛṇan barhirasmā'ādiddhotāraṁ nyasādayanta ॥7॥*
*mūrddhānaṁ divo'aratiṁ pṛthivyā vaiśvānaramṛta'ā jātamagnim ।*
*kaviṁ samrājamatithijanānāmāsannā pātraṁ janayanta devāḥ ॥8॥*

१९. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) ३.५७.१-६

प्र मे विविक्वाँ अविदन्मनीषां धेनुं चरन्तीं प्रयुतामगोपाम् ।
सद्यश्चिद्या दुदुहे भूरि धासोरिन्द्रस्तदग्निः पनितारो अस्याः ॥१॥
इन्द्रः सु पूषा वृषणा सुहस्ता दिवो न प्रीताः शशयं दुदुह्रे ।
विश्वे यदस्यां रणयन्त देवाः प्र वोऽत्र वसवः सुम्नमश्याम् ॥२॥
या जामयो वृष्ण इच्छन्ति शक्ति नमस्यन्तीर्जानते गर्भमस्मिन् ।
अच्छा पुत्रं धेनवो वावशाना महश्चरन्ति बिभ्रतं वपूंषि ॥३॥
अच्छा विवक्मि रोदसी सुमेके ग्रावणो युजानो अध्वरे मनीषा ।
इमा उ ते मनवे भूरिवारा ऊर्ध्वा भवन्ति दर्शता यजत्राः ॥४॥
या ते जिह्वा मधुमती सुमेधा अग्ने देवेषूच्यत उरूची ।
तयेह विश्वाँ अवसे यजत्राना सादय पायया चा मधूनि ॥५॥
या ते अग्ने पर्वतस्येव धारासश्चन्ती पीपयद्देव चित्रा ।
तामस्मभ्यं प्रमतिं जातवेदो वसो रास्व सुमतिं विश्वजन्याम् ॥६॥
*pra me vivikvām̐ avidanmanīṣāṁ dhenuṁ charantīṁ prayutāmagopām ।*
*sadyaśchidyā duduhe bhūri dhāsorindrastadagniḥ panitāro asyāḥ ॥1॥*
*indraḥ su pūṣā vṛṣaṇā suhastā divo na prītāḥ śaśayaṁ duduhre ।*
*viśve yadasyāṁ raṇayanta devāḥ pra vo'tra vasavaḥ sumnamaśyām ॥2॥*
*yā jāmayo vṛṣṇa ichchhanti śakti namasyantīrjānate garbhamasmin ।*
*achchhā putraṁ dhenavo vāvaśānā mahaścharanti bibhrataṁ vapūṁṣi ॥3॥*
*achchhā vivakmi rodasī sumeke grāvaṇo yujāno adhvare manīṣā ।*

*imā u te manave bhūrivārā ūrdhvā bhavanti darśatā yajatrāḥ //4 //*
*yā te jihvā madhumatī sumedhā agne deveṣūchyata urūchī /*
*tayeha viśvām̐ avase yajatrānā sādaya pāyayā chā madhūni //5 //*
*yā te agne parvatasyeva dhārāsaśchantī pīpayaddeva chitrā /*
*tāmasmabhyaṁ pramatiṁ jātavedo vaso rāsva sumatiṁ viśvajanyām //6 //*

२०. वैश्वानरः (Vaiśvānaraḥ) - य. (Yv.) ३३.६०

नहि स्पशमविदन्नन्यमस्माद्वैश्वानरात्पुरऽएतारमग्नेः ।
एमेनमवृधन्नमृताऽअमर्त्यं वैश्वानरं क्षैत्रजित्याय देवाः ॥६० ॥
*nahi spaśamavidannanyamasmādvaiśvānarātpura'etāramagneḥ /*
*emenamavṛdhannamṛtā'amartyaṁ vaiśvānaraṁ kṣaitrajityāya devāḥ //60 //*

२१. सविता (Savitā) - य. (Yv.) ३.३५; ११.६३; २२.९; ३६.३

य. (Yv.) ३.३५

तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥३५ ॥
*tat saviturvareṇyaṁ bhargo devasya dhīmahi / dhiyo yo naḥ prachodayāt //35 //*

य. (Yv.) ११.६३

देवस्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिः सुबाहुरुत शक्त्या ।
अव्यथमाना पृथिव्यामाशा दिशऽआपृण ॥६३ ॥
*devastvā savitodvapatu supāṇiḥ svaṅguriḥ subāhuruta śaktyā /*
*avyathamānā pṛthivyāmāśā diśa'āpṛṇa //63 //*

य. (Yv.) २२.९

तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥९ ॥
*tatsaviturvareṇyaṁ bhargo devasya dhīmahi / dhiyo yo naḥ prachodayāt //9 //*

य. (Yv.) ३६.३

भूर्भुवः स्वः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥३ ॥
*bhūrbhuvaḥ svaḥ / tatsaviturvareṇyaṁ bhargo devasya dhīmahi / dhiyo yo naḥ prachodayāt //3 //*

२२. सीता (Sītā) - अ. (Av.) ३.१७.१-९

सीरा युजंन्ति कवयो युगा वि तन्वते पृथक् । धीरा देवेषु सुम्नयौ ॥१ ॥
युनक्त सीरा वि युगा तनोत कृते योनौ वपतेह बीजम् ।
विराजः श्नुष्टिः सभरा असन्नो नेदीय इत् सृण्यः पक्वमा यवन् ॥२ ॥
लांगलं पवीरवत् सुशीमं सोमसत्सरु ।
उदिद् वपतु गामविं प्रस्थावद् रथवाहनं पीवरीं च प्रफर्व्यम् ॥३ ॥
इन्द्रः सीतां नि गृह्णातु तां पूषासि रक्षतु ।
सा नः पयस्वती दुहामुत्तरामुत्तरां समाम् ॥४ ॥
शुनं सुफाला वि तुदन्तु भूमिं शुनं कीनाशा अनु यन्तु वाहान् ।
शुनासीरा हविषा तोशमाना सुपिप्ला ओषधीः कर्तमस्मै ॥५ ॥
शुनं वाहाः शुनं नरः शुनं कृषतु लांगलम् ।
शुनं वरत्रा बध्यन्तां शुनमष्ट्रामुदिंगय ॥६ ॥
शुनासीरेह स्म मे जुषेथाम् । यद् दिवि चक्रथुः पयस्तेनेमामुप सिंचतम् ॥७ ॥
सीते वन्दामहे त्वार्वाची सुभगे भव । यथा नः सुमना असो यथा नः सुफला भुवः ॥८ ॥
घृतेन सीता मधुना समक्ता विश्वैर्देवैरनुमता मरुद्भिः ।
सा नः सीते पयसाभ्याववृत्स्वोर्जस्वती घृतवत् पिन्वमाना ॥९ ॥
*sīrā yujaṁnti kavayo yugā vi tanvate pṛthak / dhīrā deveṣu sumnayau //1 //*
*yunakta sīrā vi yugā tanota kṛte yonau vapateha bījam /*
*virājaḥ śnuṣṭiḥ sabharā asanno nedīya it sṛṇyaḥ pakvamā yavan //2 //*
*lāṁgalaṁ pavīravat suśīmaṁ somasatsaru /*
*udid vapatu gāmaviṁ prasthāvad rathavāhanaṁ pīvarīṁ cha prapharvyam //3 //*
*indraḥ sītāṁ ni gṛhṇātu tāṁ pūṣāsi rakṣatu /*

*sā naḥ payasvatī duhāmuttarāmuttarāṁ samām ॥4॥*
*śunaṁ suphālā vi tudantu bhūmiṁ śunaṁ kīnāśā anu yantu vāhān ।*
*śunāsīrā haviṣā tośamānā supiplā oṣadhīḥ kartamasmai ॥5॥*
*śunaṁ vāhāḥ śunaṁ naraḥ śunaṁ kṛṣatu lāṁgalam ।*
*śunaṁ varatrā badhyantāṁ śunamaṣṭrāmudiṁgaya ॥6॥*
*śunāsīreha sma me juṣethām । yad divi chakrathuḥ payastenemāmupa siṁchatam ॥7॥*
*sīte vandāmahe tvārvāchī subhage bhava ।*
*yathā naḥ sumanā aso yathā naḥ suphalā bhuvaḥ ॥8॥*
*ghṛtena sītā madhunā samaktā viśvairdevairanumatā marudbhiḥ ।*
*sā naḥ sīte payasābhyāvavṛtsvorjasvatī ghṛtavat pinvamānā ॥9॥*

## ६१७. विश्वामित्रो गाथिनः (Viśvāmitro Gāthinaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ३.१.१-२३; ३.५.१-११; ३.६.१-११; ३.७.१-११; ३.९.१-९; ३.११.१-९; ३.२४.१-५; ३.२५.१-३; ५; ३.२८.१-६; ३.२९.१-४; ६-१६; सा. (Sv.) ६२; ७६; ७९; ९८; १००; ६१४; १४७७-१४७९; १५३८-१५४०; १५५६-१५५८

ऋ. (Rv.) ३.१.१-२३

सोमस्य मा तवसं वक्ष्यग्ने वह्निं चकर्थ विदथे यजध्यै ।
देवाँ अच्छा दीद्यद्युञ्जे अद्रिं शमाये अग्ने तन्वं जुषस्व ॥१॥
प्रांचं यज्ञं चकृम वर्धतां गीः समिद्भिरग्निं नमसा दुवस्यन् ।
दिवः शशासुर्विदथा कवीनां गृत्साय चित्तवसे गातुमीषुः ॥२॥
मयो दधे मेधिरः पूतदक्षो दिवः सुबन्धुर्जनुषा पृथिव्याः ।
अविन्दन्नु दर्शतमस्व१न्तर्देवासो अग्निमपसि स्वसृणाम् ॥३॥
अवर्धयन्त्सुभगं सप्त यह्वीः श्वेतं जज्ञानमरुषं महित्वा ।
शिशुं न जातमभ्यारुरश्वा देवासो अग्निं जनिमन्वपुष्यन् ॥४॥
शुक्रेभिरंगै रज आततन्वान् क्रतुं पुनानः कविभिः पवित्रैः ।
शोचिर्वसानः पर्यायुरपां श्रियो मिमीते बृहतीरनूनाः ॥५॥
वव्राजा सीमनदतीरब्धा दिवो यह्वीरवसाना अनग्नाः ।
सना अत्र युवतयः सयोनीरेकं गर्भं दधिरे सप्त वाणीः ॥६॥
स्तीर्णा अस्य संहतो विश्वरूपा घृतस्य योनौ स्रवथे मधूनाम् ।
अस्थुरत्र धेनवः पिन्वमाना मही दस्मस्य मातरा समीची ॥७॥
बभ्राणः सूनो सहसो व्यद्यौद्दधानः शुक्रा रभसा वपूंषि ।
श्चोतन्ति धारा मधुनो घृतस्य वृषा यत्र वावृधे काव्येन ॥८॥
पितुश्चिदूधर्जनुषा विवेद व्यस्य धारा असृजद्वि धेनाः ।
गुहा चरन्तं सखिभिः शिवेभिर्दिवो यह्वीभिर्न गुहा बभूव ॥९॥
पितुश्च गर्भं जनितुश्च बभ्रे पूर्वीरेको अधयत्पीप्यानाः ।
वृष्णे सपत्नी शुचये सबन्धू उभे अस्मै मनुष्ये३ नि पाहि ॥१०॥
उरौ महाँ अनिबाधे ववर्धापो अग्निं यशसः सं हि पूर्वीः ।
ऋतस्य योनावशयद्दमूना जामीनामग्निरपसि स्वसृणाम् ॥११॥
अक्रो न बभ्रिः समिथे महीनां दिदृक्षेयः सूनवे भाऋजीकः ।
उदुस्रिया जनिता यो जजानापां गर्भो नृतमो यह्वो अग्निः ॥१२॥
अपां गर्भं दर्शतमोषधीनां वना जजान सुभगा विरूपम् ।
देवासश्चिन्मनसा सं हि जग्मुः पनिष्ठं जातं तवसं दुवस्यन् ॥१३॥
बृहन्त इद्भानवो भाऋजीकमग्निं सचन्त विद्युतो न शुक्राः ।
गुहेव वृद्धं सदसि स्वे अन्तरपार ऊर्वे अमृतं दुहानाः ॥१४॥
ईळे च त्वा यजमानो हविर्भिरीळे सखित्वं सुमतिं निकामः ।
देवैरवो मिमीहि सं जरित्रे रक्षा च नो दम्येभिरनीकैः ॥१५॥
उपक्षेतारस्तव सुप्रणीतेऽग्ने विश्वानि धन्या दधानाः ।
सुरेतसा श्रवसा तुंजमाना अभि ष्याम पृतनायूँरदेवान् ॥१६॥

आ देवानामभवः केतुरग्ने मन्द्रो विश्वानि काव्यानि विद्वान् ।
प्रति मर्तां अवासयो दमूना अनु देवान्रथिरो यासि साधन् ॥१७॥
नि दुरोणे अमृतो मर्त्यानां राजा ससाद् विदथानि साधन् ।
घृतप्रतीक उर्विया व्यद्यौदग्निर्विश्वानि काव्यानि विद्वान् ॥१८॥
आ नो गहि सख्येभिः शिवेभिर्महान्महीभिरूतिभिः सरण्यन् ।
अस्मे रयिं बहुलं संतरुत्रं सुवाचं भागं यशसं कृधी नः ॥१९॥
एता ते अग्ने जनिमा सनानि प्र पूर्व्याय नूतनानि वोचम् ।
महान्ति वृष्णे सवना कृतेमा जन्मंजन्मन् निहितो जातवेदाः ॥२०॥
जन्मंजन्मन् निहितो जातवेदा विश्वामित्रेभिरिध्यते अजस्रः ।
तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ॥२१॥
इमं यज्ञं सहसावन् त्वं नो देवत्रा धेहि सुक्रतो रराणः ।
प्र यंसि होतर्बृहतीरिषो नोऽग्ने महि द्रविणमा यजस्व ॥२२॥
इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥२३॥

*somasya mā tavasaṁ vakṣayagne vahni chakartha vidathe yajadhyai* ।
*devām̐ achchhā dīdyadyujje adriṁ śamāye agne tanvaṁ juṣasva* ॥1॥
*prāṁchaṁ yajñaṁ chakṛma vardhatāṁ gīḥ samidbhiragiṁna namasā duvasyan* ।
*divaḥ śaśāsurvidathā kavīnāṁ gṛtsāya chittavase gātumīṣuḥ* ॥2॥
*mayo dadhe medhiraḥ pūtadakṣo divaḥ subandhurjanuṣā pṛthivyāḥ* ।
*avindannu darśatamasva1ntardevāso agnimapasi svasṛṇām* ॥3॥
*avardhayantsubhagaṁ sapta yahvīḥ śvetaṁ jajñānamaruṣaṁ mahitvā* ।
*śiśuṁ na jātamabhyāruraśvā devāso agiṁna janimanvapuṣyan* ॥4॥
*śukrebhiraṁgai raja ātatanvān kratuṁ punānaḥ kavibhiḥ pavitraiḥ* ।
*śochirvasānaḥ paryāyurapāṁ śriyo mimīte bṛhatīranūnāḥ* ॥5॥
*vavrājā sīmanadatīrabdhā divo yahvīravasānā anagnāḥ* ।
*sanā atra yuvatayaḥ sayonīrekaṁ garbhaṁ dadhire sapta vāṇīḥ* ॥6॥
*stīrṇā asya saṁhato viśvarūpā ghṛtasya yonau sravathe madhūnām* ।
*asthuratra dhenavaḥ pinvamānā mahī dasmasya mātarā samīchī* ॥7॥
*babhrāṇaḥ sūno sahaso vyadyauddadhānaḥ śukrā rabhasā vapūṁṣi* ।
*śchotanti dhārā madhuno ghṛtasya vṛṣā yatra vāvṛdhe kāvyena* ॥8॥
*pituśchidūdharjanuṣā viveda vyasya dhārā asṛjadvi dhenāḥ* ।
*guhā charantaṁ sakhibhiḥ śivebhirdivo yahvībhirna guhā babhūva* ॥9॥
*pituścha garbhaṁ janituścha babhre pūrvīreko adhayatpīpyānāḥ* ।
*vṛṣṇe sapatnī śuchaye sabandhū ubhe asmai manuṣye3 ni pāhi* ॥10॥
*urau mahām̐ anibādhe vavardhāpo agiṁna yaśasaḥ saṁ hi pūrvīḥ* ।
*ṛtasya yonāvaśayaddamūnā jāmīnāmagnirapasi svasṛṇām* ॥11॥
*akro na babhriḥ samithe mahīnāṁ diddakṣeyaḥ sūnave bhāṛjīkaḥ* ।
*udusriyā janitā yo jajānāpāṁ garbho nṛtamo yahvo agniḥ* ॥12॥
*apāṁ garbhaṁ darśatamoṣadhīnāṁ vanā jajāna subhagā virūpam* ।
*devāsaśchinmanasā saṁ hi jagmuḥ paniṣṭhaṁ jātaṁ tavasaṁ duvasyan* ॥13॥
*bṛhanta idbhānavo bhāṛjīkamagiṁna sachanta vidyuto na śukrāḥ* ।
*guheva vṛddhaṁ sadasi sve antarapāra ūrve amṛtaṁ duhānāḥ* ॥14॥
*īḻe cha tvā yajamāno havirbhirīḻe sakhitvaṁ sumatiṁ nikāmaḥ* ।
*devairavo mimīhi saṁ jaritre rakṣā cha no dabhyebhiranīkaiḥ* ॥15॥
*upakṣetārastava supraṇīte'gne viśvāni dhanyā dadhānāḥ* ।
*suretasā śravasā tuṁjamānā abhi ṣyāma putanāyūm̐radevān* ॥16॥
*ā devānāmabhavaḥ keturagne mandro viśvāni kāvyāni vidvān* ।
*prati martāṁ avāsayo damūnā anu devānrathiro yāsi sādhan* ॥17॥
*ni duroṇe amṛto martyānāṁ rājā sasād vidathāni sādhan* ।
*ghṛtapratīka urviyā vyadyaudagnirviśvāni kāvyāni vidvān* ॥18॥
*ā no gahi sakhyebhiḥ śivebhirmahānmahībhirūtibhiḥ saraṇyan* ।
*asme rayiṁ bahulaṁ saṁtarutraṁ suvāchaṁ bhāgaṁ yaśasaṁ kṛdhī naḥ* ॥19॥
*etā te agne janimā saniāni pra pūrvyāya nūtanāni vocham* ।

*mahānti vṛṣṇe savanā kṛtemā janmaṁjanman nihito jātavedāḥ ॥20॥*
*janmaṁjanman nihito jātavedā viśvāmitrebhiridhyate ajasraḥ ।*
*tasya vayaṁ sumatau yajñiyasyāpi bhadre saumanase syāma ॥21॥*
*imaṁ yajñaṁ sahasāvan tvaṁ no devatrā dhehi sukrato rarāṇaḥ ।*
*pra yaṁsi hotarbṛhatīriṣo no'gne mahi draviṇamā yajasva ॥22॥*
*iḻāmagne purudaṁsaṁ saniṁ goḥ śaśvattamaṁ havamānāya sādha ।*
*syānnaḥ sūnustanayo vijāvāgne sā te sumatirbhūtvasme ॥23॥*

ऋ. (Rv.) ३.५.१-११

प्रत्यग्निरुषसश्चेकितानोऽबोधि विप्रः पदवीः कवीनाम् ।
पृथुपाजा देवयद्भिः समिद्धोऽप द्वारा तमसो वह्निरावः ॥१॥
प्रेद्वग्निर्वावृधे स्तोमेभिर्गीर्भिः स्तोतृणां नमस्य उक्थैः ।
पूर्वीऋतस्य संदृशश्चकानः सं दूतो अद्यौदुषसो विरोके ॥२॥
अधाय्यग्निर्मानुषीषु विक्ष्व१पां गर्भो मित्र ऋतेन साधन् ।
आ हर्यतो यजतः सान्वस्थादभूदु विप्रो हव्यो मतीनाम् ॥३॥
मित्रो अग्निर्भवति यत्समिद्धो मित्रो होता वरुणो जातवेदाः ।
मित्रो अध्वर्युरिषिरो दमूना मित्रः सिन्धूनामुत पर्वतानाम् ॥४॥
पाति प्रियं रिपो अग्रं पदं वेः पाति यह्वश्चरणं सूर्यस्य ।
पाति नाभा सप्तशीर्षाणमग्निः पाति देवानामुपमादमृष्वः ॥५॥
ऋभुश्चक्र ईड्यं चारु नाम विश्वानि देवो वयुनानि विद्वान् ।
ससस्य चर्म घृतवत्पदं वेस्तदिदग्नी रक्षत्यप्रयुच्छन् ॥६॥
आ योनिमग्निर्घृतवन्तमस्थात्पृथुप्रगाणमुशन्तमुशानः ।
दीद्यानः शुचिऋष्वः पावकः पुनः पुनर्मातरा नव्यसी कः ॥७॥
सद्यो जात ओषधीभिर्ववक्षे यदी वर्धन्ति प्रस्वो घृतेन ।
आप इव प्रवता शुम्भमाना उरुष्यदग्निः पित्रो रुपस्थे ॥८॥
उदु ष्टुतः समिधा यह्वो अद्यौद्वर्ष्मन्दिवो अधि नाभा पृथिव्याः ।
मित्रो अग्निरीड्यो मातरिश्वा दूतो वक्षद्यजथाय देवान् ॥९॥
उदस्तम्भीत्समिधा नाकमृष्वो३ग्निर्भवन्नुत्तमो रोचनानाम् ।
यदी भृगुभ्यः परि मातरिश्वा गुहा सन्तं हव्यवाहं समीधे ॥१०॥
इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥११॥

*pratyagniruṣasaśchekitāno'bodhi vipraḥ padavīḥ kavīnām ।*
*pṛthupājā devayadbhiḥ samiddho'pa dvārā tamaso vahnirāvaḥ ॥1॥*
*predvagnirvāvṛdhe stomebhirgībhiḥ stotṛṇāṁ namasya ukthaiḥ ।*
*pūrvīṛrtasya saṁdṛśaśchakānaḥ saṁ dūto adyauduṣaso viroke ॥2॥*
*adhāyyagnirmānuṣīṣu vikṣava1pāṁ garbho mitra ṛtena sādhan ।*
*ā haryato yajataḥ sānvasthādabhūdu vipro havyo matīnām ॥3॥*
*mitro agnirbhavati yatsamiddho mitro hotā varuṇo jātavedāḥ ।*
*mitro adhvaryuriṣiro damūnā mitraḥ sindhūnāmuta parvatānām ॥4॥*
*pāti priyaṁ ripo agraṁ padaṁ veḥ pāti yahvaścharaṇaṁ sūryasya ।*
*pāti nābhā saptaśīrṣāṇamagniḥ pāti devānāmupamādamṛṣvaḥ ॥5॥*
*ṛbhuśchakra īḍyaṁ chāru nāma viśvāni devo vayunāni vidvān ।*
*sasasya charma ghṛtavatpadaṁ vestadidagnī rakṣatyaprayuchchhan ॥6॥*
*ā yonimagnirghṛtavantamasthātpṛthupragāṇamuśantamuśānaḥ ।*
*dīdyānaḥ śuchirṛṣvaḥ pāvakaḥ punaḥ punarmātarā navyasī kaḥ ॥7॥*
*sadyo jāta oṣadhībhirvavakṣe yadī vardhanti prasvo ghṛtena ।*
*āpa iva pravatā śumbhamānā uruṣyadagniḥ pitro rupasthe ॥8॥*
*udu ṣṭutaḥ samidhā yahvo adyaudvarṣmandivo adhi nābhā pṛthivyāḥ ।*
*mitro agnirīḍyo mātariśvā dūto vakṣadyajathāya devān ॥9॥*
*udastambhītsamidhā nākamṛṣvo3gnirbhavannuttamo rochanānām ।*
*yadī bhṛgubhyaḥ pari mātariśvā guhā santaṁ havyavāhaṁ samīdhe ॥10॥*
*iḻāamagne puruṁdasaṁ saniṁ goḥ śaśvattamaṁ havamānāya sādha ।*

*syānnaḥ sūnustanayo vijāvāgne sā te sumatirbhūtvasme //11 //*

ऋ. (Rv.) ३.६.१-११

प्र कारवो मनना वच्यमाना देवद्रीचीं नयत देवयन्तः ।
दक्षिणावाड्वाजिनी प्राच्येति हविर्भरन्त्यग्नये घृताची ॥१॥
आ रोदसी अपृणा जायमान उत प्र रिक्था अध नु प्रयज्यो ।
दिविश्चिदग्ने महिना पृथिव्या वच्यन्तां ते वह्नयः सप्तजिह्वाः ॥२॥
द्यौश्च त्वा पृथिवी यज्ञियासो नि होतारं सादयन्ते दभाय ।
यदी विशो मानुषीर्देवयन्तीः प्रयस्वतीरीळते शक्रमर्चिः ॥३॥
महान्त्सधस्थे ध्रुव आ निषत्तोऽन्तर्द्यावा माहिने हर्यमाणः ।
आस्क्रे सपत्नी अजरे अमृक्ते सबर्दुघे उरुगायस्य धेनू ॥४॥
व्रता ते अग्ने महतो महानि तव क्रत्वा रोदसी आ ततन्थ ।
त्वं दूतो अभवो जायमानस्त्वं नेता वृषभ चर्षणीनाम् ॥५॥
ऋतस्य वा केशिना योग्याभिर्घृतस्नुवा रोहिता धुरि धिष्व ।
अथा वह देवान्देव विश्वान्त्स्वध्वरा कृणुहि जातवेदः ॥६॥
दिवश्चिदा ते रुचयन्त रोका उषो विभातीरनु भासि पूर्वीः ।
अपो यदग्न उशधग्वनेषु होतुर्मन्द्रस्य पनयन्त देवाः ॥७॥
उरौ वा ये अन्तरिक्षे मदन्ति दिवो वा ये रोचने सन्ति देवाः ।
ऊमा वा ये सुहवासो यजत्रा आयेमिरे रथ्यो अग्ने अश्वाः ॥८॥
ऐभिरग्ने सरथं याह्यर्वाङ् नानारथं वा विभवो ह्यश्वाः ।
पत्नीवतस्त्रिंशतं त्रींश्च देवाननुष्वधमा वह मादयस्व ॥९॥
स होता यस्य रोदसी चिदुर्वी यज्ञंयज्ञमभि वृधे गृणीतः ।
प्राची अध्वरेव तस्थतुः सुमेके ऋतावरी ऋतजातस्य सत्ये ॥१०॥
इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥११॥

*pra kāravo mananā vachyamānā devadrīchīṁ nayata devayantaḥ /*
*dakṣiṇāvāḍvājinī prāchyeti havirbharantyagnaye ghṛtāchī //1 //*
*ā rodasī apṛṇā jāyamāna uta pra rikthā adha nu prayajyo /*
*diviśchidagne mahinā pṛthivyā vachyantāṁ te vahnayaḥ saptajihvāḥ //2 //*
*dyauścha tvā pṛthivī yajñiyāso ni hotāraṁ sādayante dabhāya /*
*yadī viśo mānuṣīrdevayantīḥ prayasvatīrīḷate śakramarchiḥ //3 //*
*mahāntsadhasthe dhruva ā niṣatteā'ntardyāvā māhine haryamāṇaḥ /*
*āskre sapatnī ajare amṛkte sabardughe urugāyasya dhenū //4 //*
*vratā te agne mahato mahāni tava kratvā rodasī ā tatantha /*
*tvaṁ dūto abhavo jāyamānastvaṁ netā vṛṣabha charṣaṇīnām //5 //*
*ṛtasya vā keśinā yogyābhirghṛtasnuvā rohitā dhuri dhiṣva /*
*athā vaha devāndeva viśvāntsvadhvarā kṛṇuhi jātavedaḥ //6 //*
*divaśchidā te ruchayanta rokā uṣo vibhātīranu bhāsi pūrvīḥ /*
*apo yadagna uśadhagvaneṣu hoturmandrasya panayanta devāḥ //7 //*
*urau vā ye antarikṣe madanti divo vā ye rochane santi devāḥ /*
*ūmā vā ye suhavāso yajatrā āyemire rathyo agne aśvāḥ //8 //*
*aibhiragne sarathaṁ yāhyarvāṅ nānārathaṁ vā vibhavo hyaśvāḥ /*
*patnīvatastriśataṁ trīṁścha devānanuṣvadhamā vaha mādayasva //9 //*
*sa hotā yasya rodasī chidurvī yajñaṁyajñamabhi vṛdhe gṛṇītaḥ /*
*prāchī adhvareva tasthatuḥ sumeke ṛtāvarī ṛtajātasya satye //10 //*
*iḷāmagne purudaṁsaṁ saniṁ goḥ śaśchattamaṁ havamānāya sādha /*
*syānnaḥ sūnustanayo vijāvāgne sā te sumatirbhūtvasme //11 //*

ऋ. (Rv.) ३.७.१-११

प्र य आरुः शितिपृष्ठस्य धासेरा मातरा विविशुः सप्त वाणीः ।
परिक्षिता पितरा सं चरेते प्र सर्स्राते दीर्घमायुः प्रयक्षे ॥१॥
दिवक्षसो धेनवो वृष्णो अश्वा देवीरा तस्थौ मधुमद्वहन्तीः ।

ऋतस्य त्वा सदसि क्षेमयन्तं पर्येका चरति वर्तनिं गौः ॥२॥
आ सीमरोहत्सुयमा भवन्तीः पतिश्चिकित्वान् रयिविद्रयीणाम् ।
प्र नीलपृष्ठो अतसस्य धासेस्ता अवासयत्पुरुधप्रतीकः ॥३॥
महि त्वाष्ट्रमूर्जयन्तीरजुर्यं स्तभूयमानं वहतो वहन्ति ।
व्यंगेभिर्दिद्युतानः सधस्थ एकामिव रोदसी आ विवेश ॥४॥
जानन्ति वृष्णो अरुषस्य शेवमुत ब्रध्नस्य शासने रणन्ति ।
दिवोरुचः सुरुचो रोचमाना इळा येषां गण्या महिना गीः ॥५॥
उतो पितृभ्यां प्रविदानु घोषं महो महद्भ्यामनयन्त शूषम् ।
उक्षा ह यत्र परि धनमक्तोरनु स्वं धाम जरितुर्ववक्ष ॥६॥
अध्वर्युभिः पंचभिः सप्त विप्राः प्रियं रक्षन्ते निहितं पदं वेः ।
प्रांचो मदन्त्युक्षणो अजुर्या देवा देवानामनु हि व्रता गुः ॥७॥
दैव्या होतारा प्रथमा न्यृंजे सप्त पृक्षासः स्वधया मदन्ति ।
ऋतं शंसन्त ऋतमित्त आहुरनु व्रतं व्रतपा दीध्यानाः ॥८॥
वृषायन्ते महे अत्याय पूर्वीर्वृष्णे चित्राय रश्मयः सुशामाः ।
देव होतर्मन्द्रतरश्चिकित्वान्महो देवान् रोदसी एह वक्षि ॥९॥
पृक्षप्रयजो द्रविणः सुवाचः सुकेतव उषसो रेवदूषुः ।
उतो चिदग्ने महिना पृथिव्याः कृतं चिदेनः सं महे दशस्य ॥१०॥
इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥११॥

*pra ya āruḥ śitipṛṣṭhasya dhāserā mātarā viviśuḥ sapta vāṇīḥ /*
*parikṣitā pitarā saṁ charete pra sarsrāte dīrghamāyuḥ prayakṣe //1//*
*divakṣaso dhenavo vṛṣṇo aśvā devīrā tasthau madhumadvahantīḥ /*
*ṛtasya tvā sadasi kṣemayantaṁ paryekā charati vartaniṁ gauḥ //2//*
*ā sīmarohatsuyamā bhavantīḥ patiśchikitvān rayividrayīṇām /*
*pra nīlapṛṣṭho atasasya dhāsestā avāsayatpurudhapratīkaḥ //3//*
*mahi tvāṣṭramūrjayantīrajuryaṁ stabhūyamānaṁ vahato vahanti /*
*vyaṁgebhirdidyutānaḥ sadhastha ekāmiva rodasī ā viveśa //4//*
*jānanti vṛṣṇo aruṣasya śevamuta bradhnasya śāsane raṇanti /*
*divoruchaḥ surucho rochamānā iḷā yeṣāṁ gaṇyā mahinā gīḥ //5//*
*uto pitṛbhyāṁ pravidānu ghoṣaṁ maho mahadbhyāmanayanta śūṣam /*
*ukṣā ha yatra pari dhanamaktoranu svaṁ dhāma jariturvavakṣa //6//*
*adhvaryubhiḥ paṁchabhiḥ sapta viprāḥ priyaṁ rakṣante nihitaṁ padaṁ veḥ /*
*prāṁcho madantyukṣaṇo ajuryā devā devānāmanu hi vratā guḥ //7//*
*daivyā hotārā prathamā nyṛṁje sapta pṛkṣāsaḥ svadhayā madanti /*
*ṛtaṁ śaṁsanta ṛtamitta āhuranu vrataṁ vratapā dīdhyānāḥ //8//*
*vṛṣāyante mahe atyāya pūrvīrvṛṣṇe chitrāya raśmayaḥ suśāmāḥ /*
*deva hotarmandratараśchikitvānmaho devān rodasī eha vakṣi //9//*
*pṛkṣaprayajo draviṇaḥ suvāchaḥ suketava uṣaso revadūṣuḥ /*
*uto chidagne mahinā pṛthivyāḥ kṛtaṁ chidenaḥ saṁ mahe daśasya //10//*
*iḷāmagne purudaṁsaṁ saniṁ goḥ śaśvattamaṁ havamānāya sādha /*
*syānnaḥ sūnustanayo vijāvāgne sā te sumatirbhūtvasme //11//*

ऋ. (Rv.) ३.९.१-९

सखायस्त्वा ववृमहे देवं मर्तास ऊतये । अपां नपातं सुभगं सुदीदितिं सुप्रतूर्तिमनेहसम् ॥१॥
कायमानो वना त्वं यन्मातृरजगन्नपः । न तत्ते अग्ने प्रमृषे निवर्तनं यद्दूरे सन्निहाभवः ॥२॥
अति तृष्टं ववक्षिथाथैव सुमना असि ।
प्रप्रान्ये यन्ति पर्यन्य आसते येषां सख्ये असि श्रितः ॥३॥
ईयिवांसमति स्रिधः शश्वतीरति सश्चतः ।
अन्वीमविन्दन्निचिरासो अद्रुहोऽप्सु सिंहमिव श्रितम् ॥४॥
ससृवांसमिव त्मनाग्निमित्था तिरोहितम् ।
ऐनं नयन्मातरिश्वा परावतो देवेभ्यो मथितं परि ॥५॥

तं त्वा मर्ता अगृभ्णत देवेभ्यो हव्यवाहन ।
विश्वान्यद्यज्ञाँ अभिपासि मानुष तव ऋत्वा यविष्ठ्य ॥६॥
तद्भद्रं तव दंसना पाकाय चिच्छदयति । त्वां यदग्ने पशवः समासते समिद्धमपिशर्वरे ॥७॥
आ जुहोता स्वध्वरं शीरं पावकशोचिषम् । आशुं दूतमजिरं प्रत्नमीड्यं श्रुष्टी देवं सपर्यत ॥८॥
त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन् ।
ओक्षन्घृतैरस्तृणन्बर्हिरस्मा आदिद्धोतारं न्यसादयन्त ॥९॥
*sakhāyastvā vavṛmahe devaṁ martāsa ūtaye ।*
*apāṁ napātaṁ subhagaṁ sudīditiṁ supratūrtimanehasam ॥1॥*
*kāyamāno vanā tvaṁ yanmātṛrajagannapaḥ ।*
*na tatte agne pramṛṣe nivartanaṁ yaddūre sannihābhavaḥ ॥2॥*
*ati tṛṣṭaṁ vavakṣithāthaiva sumanā asi ।*
*praprānye yanti paryanya āsate yeṣāṁ sakhye asi śritaḥ ॥3॥*
*īyivāṁsamati sridhaḥ śaśvatīrati saśchataḥ ।*
*anvīmavindannichirāso adruho'psu siṁhamiva śritam ॥4॥*
*sasṛvāṁsamiva tmanāgnimitthā tirohitam ।*
*ainaṁ nayanmātariśvā parāvato devebhyo mathitaṁ pari ॥5॥*
*taṁ tvā martā agṛbhṇata devebhyo havyavāhana ।*
*viśvānyadyajñām̐ abhipāsi mānuṣa tava ṛtvā yaviṣṭhya ॥6॥*
*tadbhadraṁ tava daṁsanā pākāya chichchhadayati ।*
*tvāṁ yadagne paśavaḥ samāsate samiddhamapiśarvare ॥7॥*
*ā juhotā svadhvaraṁ śīraṁ pāvakaśochiṣam ।*
*āśuṁ dūtamajiraṁ pratnamīḍyaṁ śruṣṭī devaṁ saparyata ॥8॥*
*trīṇi śatā trī sahasrāṇyagiṁna triṁśachcha devā nava chāsaparyan ।*
*okṣanghṛtairastṛṇanbarhirasmā ādiddhotāraṁ nyasādayanta ॥9॥*

ऋ. (Rv.) ३.११.१-९

अग्निर्होता पुरोहितोऽध्वरस्य विचर्षणिः। स वेद यज्ञमानुषक् ॥१॥
स हव्यवाळमर्त्य उशिग्दूतश्चनोहितः। अग्निर्धिया समृण्वति ॥२॥
अग्निर्धिया स चेतति केतुर्यज्ञस्य पूर्व्यः। अर्थं ह्यस्य तरणि ॥३॥
अग्निं सूनुं सनश्रुतं सहसो जातवेदसम्। वह्निं देवा अकृण्वत ॥४॥
अदाभ्यः पुरएता विशमग्निर्मानुषीणाम्। तूर्णी रथः सदा नवः ॥५॥
साह्वान्विश्वा अभियुजः क्रतुर्देवानाममृक्तः। अग्निस्तुविश्रवस्तमः ॥६॥
अभि प्रयांसि वाहसा दाश्वाँ अश्नोति मर्त्यः। क्षयं पावकशोचिषः ॥७॥
परि विश्वानि सुधिताग्नेरश्याम मन्मभिः। विप्रासो जातवेदसः ॥८॥
अग्ने विश्वानि वार्या वाजेषु सनिषामहे। त्वे देवास एरिरे ॥९॥
*agnirhotā purohito'dhvarasya vicharṣaṇiḥ । sa veda yajñamānuṣak ॥1॥*
*sa havyavāḷamartya uśigdūtaśchanohitaḥ । agnirdhiyā samṛṇvati ॥2॥*
*agnirdhiyā sa chetati keturyajñasya pūrvyaḥ । arthaṁ hyasya taraṇi ॥3॥*
*agiṁna sūnuṁ sanaśrutaṁ sahaso jātavedasam । vahniṁ devā akṛṇvata ॥4॥*
*adābhyaḥ puraetā viśamagnirmānuṣīṇām । tūrṇī rathaḥ sadā navaḥ ॥5॥*
*sāhvānviśvā abhiyujaḥ kraturdevānāmamṛktaḥ । agnistuviśravastamaḥ ॥6॥*
*abhi prayāṁsi vāhasā dāśvām̐ aśnoti martyaḥ । kṣayaṁ pāvakaśochiṣaḥ ॥7॥*
*pari viśvāni sudhitāgneraśyāma manmabhiḥ । viprāso jātavedasaḥ ॥8॥*
*agne viśvāni vāryā vājeṣu saniṣāmahe । tve devāsa erire ॥9॥*

ऋ. (Rv.) ३.२४.१-५

अग्ने सहस्व पृतना अभिमातीरपास्य। दुष्टरस्तरन्नरातीर्वर्चो धा यज्ञवाहसे ॥१॥
अग्न इळा समिध्यसे वीतिहोत्रो अमर्त्यः। जुषस्व सू नो अध्वरम् ॥२॥
अग्ने द्युम्नेन जागृवे सहसः सूनबाहुत। एदं बर्हिः सदो मम ॥३॥
अग्ने विश्वेभिरग्निभिर्देवेभिर्महया गिरः। यज्ञेषु य उ चायवः ॥४॥
अग्ने दाशुषे रयिं वीरवन्तं परीणसम्। शिशीहि नः सूनुमतः ॥५॥
*agne sahasva pṛtanā abhimātīrapāsya । duṣṭarastarannarātīrvarcho dhā yajñavāhase ॥1॥*
*agna iḷā samidhyase vītihotro amartyaḥ । juṣasva sū no adhvaram ॥2॥*

*agne dyumnena jāgṛve sahasaḥ sūnabāhuta | edaṁ barhiḥ sado mama ||3 ||*
*agne viśvebhiragnibhirdevebhirmahayā giraḥ | yajñeṣu ya u chāyavaḥ ||4 ||*
*agne dāśuṣe rayiṁ vīravantaṁ parīṇasam | śiśīhi naḥ sūnumataḥ ||5 ||*

ऋ. (Rv.) ३.२५.१-३

अग्ने दिवः सूनुरसि प्रचेतास्तना पृथिव्या उत विश्ववेदाः। ऋधग्देवाँ इह यजा चिकित्वः ॥१॥
अग्निः सनोति वीर्याणि विद्वान्त्सनोति वाजममृताय भूषन्। स नो देवाँ एह वहा पुरुक्षो ॥२॥
अग्निर्द्यावापृथिवी विश्वजन्ये आ भाति देवी अमृते अमूरः। क्षयन्वाजैः पुरुश्चन्द्रो नमोभिः ॥३॥
*agne divaḥ sūnurasi prachetāstanā pṛthivyā uta viśvavedāḥ |*
*ṛdhagdevām̐ iha yajā chikitvaḥ ||1 ||*
*agniḥ sanoti vīryāṇi vidvāntsanoti vājamamṛtāya bhūṣan |*
*sa no devām̐ eha vahā purukṣo ||2 ||*
*agnirdyāvāpṛthivī viśvajanye ā bhāti devī amṛte amūraḥ |*
*kṣayanvājaiḥ puruśchandro namobhiḥ ||3 ||*

ऋ. (Rv.) ३.२५.५

अग्ने अपां समिध्यसे दुरोणे नित्यः सूनो सहसो जातवेदः। सधस्थानि महयमान ऊती ॥५॥
*agne apāṁ samidhyase duroṇe nityaḥ sūno sahaso jātavedaḥ |*
*sadhasthāni mahayamāna ūtī ||5 ||*

ऋ. (Rv.) ३.२८.१-६

अग्ने जुषस्व नो हविः पुरोळाशं जातवेदः। प्रातःसावे धियावसो ॥१॥
पुरोळा अग्ने पचतस्तुभ्यं वा घा परिष्कृतः। तं जुषस्व यविष्ठ्य ॥२॥
अग्ने वीहि पुरोळाशमाहुतं तिरोअह्न्यम्। सहसः सूनुरस्यध्वरे हितः ॥३॥
माध्यन्दिने सवने जातवेदः पुरोळाशमिह कवे जुषस्व ।
अग्ने यह्वस्य तव भागधेयं न प्र मिनन्ति विदथेषु धीराः ॥४॥
अग्ने तृतीये सवने हि कानिषः पुरोळाशं सहसः सूनवाहुतम् ।
अथा देवेष्वध्वरं विपन्यया धा रत्नवन्तमममृतेषु जागृविम् ॥५॥
अग्ने वृधान आहुतिं पुरोळाशं जातवेदः। जुषस्व तिरोअह्न्यम् ॥६॥
*agne juṣasva no haviḥ puroḷāśaṁ jātavedaḥ | prātaḥsāve dhiyāvaso ||1 ||*
*puroḷā agne pachatastubhyaṁ vā ghā pariṣkṛtaḥ | taṁ juṣasva yaviṣṭhya ||2 ||*
*agne vīhi puroḷāśamāhutaṁ tiroahnyam | sahasaḥ sūnurasyadhvare hitaḥ ||3 ||*
*mādhyandine savane jātavedaḥ puroḷāśamiha kave juṣasva |*
*agne yahvasya tava bhāgadheyaṁ na pra minanti vidatheṣu dhīrāḥ ||4 ||*
*agne tṛtīye savane hi kāniṣaḥ puroḷāśaṁ sahasaḥ sūnavāhutam |*
*athā deveṣvadhvaraṁ vipanyayā dhā ratnavantamamamṛteṣu jāgṛvim ||5 ||*
*agne vṛdhāna āhutiṁ puroḷāśaṁ jātavedaḥ | juṣasva tiroahnyam ||6 ||*

ऋ. (Rv.) ३.२९.१-४

अस्तीदमधिमन्थनमस्ति प्रजननं कृतम् । एतां विश्पत्नीमा भराग्निं मन्थाम पूर्वथा ॥१॥
अरण्योर्निहितो जातवेदा गर्भ इव सुधितो गर्भिणीषु ।
दिवेदिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः ॥२॥
उत्तानायामव भरा चिकित्वान्त्सद्यः प्रवीता वृषणं जजान ।
अरुषस्तूपो रुशदस्य पाज इळायास्पुत्रो वयुनेऽजनिष्ट ॥३॥
इळायास्त्वा पदे वयं नाभा पृथिव्या अधि । जातवेदो नि धीमह्यग्ने हव्याय वोळहवे ॥४॥
*astīdamadhimanthanamasti prajananaṁ kṛtam |*
*etāṁ viśpatnīmā bharāgimna manthāma pūrvathā ||1 ||*
*araṇyornihito jātavedā garbha iva sudhito garbhiṇīṣu |*
*divediva īḍyo jāgṛvadbhirhaviṣmadbhirmanuṣyebhiragniḥ ||2 ||*
*uttānāyāmava bharā chikitvāntsadyaḥ pravītā vṛṣaṇaṁ jajāna |*
*aruṣastṛpo ruśadasya pāja iḷāyāsputro vayune'janiṣṭa ||3 ||*
*iḷāyāstvā pade vayaṁ nābhā pṛthivyā adhi |*
*jātavedo ni dhīmahyagne havyāya voḷahave ||4 ||*

ऋ. (Rv.) ३.२९.६-१६

यदी मन्थन्ति बाहुभिर्वि रोचतेऽश्वो न वाज्यरुषो वनेष्वा ।
चित्रो न यामन्नश्विनोरनिवृतः परि वृणक्त्यश्मनस्तृणा दहन् ॥६॥
जातो अग्नी रोचते चेकितानो वाजी विप्रः कविशस्तः सुदानुः ।
यं देवास ईड्यं विश्विदं हव्यवाहमदधुरध्वरेषु ॥७॥
सीद होतः स्व उ लोके चिकित्वान्त्सादया यज्ञं सुकृतस्य योनौ ।
देवावीर्देवान्हविषा यजास्यग्ने बृहद्यजमाने वयो धाः ॥८॥
कृणोत धूमं वृषणं सखायोऽस्रेधन्त इतन वाजमच्छ ।
अयमग्निः पृतनाषाट् सुवीरो येन देवासो असहन्त दस्यून् ॥९॥
अयं ते योनिरृत्वियो यतो जातो अरोचथाः ।
तं जानन्नग्न आ सीदाथा नो वर्धया गिरः ॥१०॥
तनूनपादुच्यते गर्भ आसुरो नराशंसो भवति यद्विजायते ।
मातरिश्वा यदमिमीत मातरि वातस्य सर्गो अभवत्सरीमणि ॥११॥
सुनिर्मथा निर्मथितः सुनिधा निहितः कविः ।
अग्ने स्वध्वरा कृणु देवान्देवयते यज ॥१२॥
अजीजनन्नमृतं मर्त्यासोऽस्रेमाणं तरणिं वीळुजम्भम् ।
दश स्वसारो अग्रुवः समीचीः पुमांसं जातमभि सं रभन्ते ॥१३॥
प्र सप्तहोता सनकादरोचत मातुरुपस्थे यदशोचदूधनि ।
न नि मिषति सूरणो दिवेदिवे यदसुरस्य जठरादजायत ॥१४॥
अमित्रायुधो मरुतामिव प्रयाः प्रथमजा ब्रह्मणो विश्वमिद्विदुः ।
द्युम्नवद्ब्रह्म कुशिकास एरिर एकएको दमे अग्निं समीधिरे ॥१५॥
यदद्य त्वा प्रयति यज्ञे अस्मिन्होतश्चिकित्वोऽवृणीमहीह ।
ध्रुवमया ध्रुवमुताशमिष्ठाः प्रजानन्विद्वाँ उप याहि सोमम् ॥१६॥

*yadī manthanti bāhubhirvi rochate'śvo na vājyaruṣo vaneṣvā /*
*chitro na yāmannaśvinoranivṛtaḥ pari vṛṇaktyaśmanastṛṇā dahan //6 //*
*jāto agnī rochate chekitāno vājī vipraḥ kaviśastaḥ sudānuḥ /*
*yaṁ devāsa īḍyaṁ viśvidaṁ havyavāhamadadhuradhvareṣu //7 //*
*sīda hotaḥ sva u loke chikitvāntsādayā yajñaṁ sukṛtasya yonau /*
*devāvīrdevānhaviṣā yajāsyagne bṛhadyajamāne vayo dhāḥ //8 //*
*kṛṇota dhūmaṁ vṛṣaṇaṁ sakhāyo'sredhanta itana vājamachchha /*
*ayamagniḥ pṛtanāṣāṭ suvīro yena devāso asahanta dasyūn //9 //*
*ayaṁ te yonirṛtviyo yato jāto arochathāḥ /*
*taṁ jānannagna ā sīdāthā no vardhayā giraḥ //10 //*
*tanūnapāduchyate garbha āsuro narāśaṁso bhavati yadvijāyate /*
*mātariśvā yadamimīta mātari vātasya sargo abhavatsarīmaṇi //11 //*
*sunirmathā nirmathitaḥ sunidhā nihitaḥ kaviḥ /*
*agne svadhvarā kṛṇu devāndevayate yaja //12 //*
*ajījanannamṛtaṁ martyāso'sremāṇaṁ taraṇiṁ vīḷujambham /*
*daśa svasāro agruvaḥ samīchīḥ pumāṁsaṁ jātamabhi saṁ rabhante //13 //*
*pra saptahotā sanakādarochata māturupasthe yadaśochadūdhani /*
*na ni miṣati sūraṇo divedive yadasurasya jaṭharādajāyata //14 //*
*amitrāyudho marutāmiva prayāḥ prathamajā brahmaṇo viśvamidviduḥ /*
*dyumnavadbrahma kuśikāsa erira ekaeko dame agiṁna samīdhire //15 //*
*yadadya tvā prayati yajñe asminhotaśchikitvo'vṛṇīmahīha /*
*dhruvamayā dhruvamamutāśamiṣṭhāḥ prajānanvidvāṁ upa yāhi somam //16 //*

सा. (Sv.) ६२

सखायस्त्वा ववृमहे देवं मर्तास ऊतये। अपां नपातं सुभगं सुदं ससं सुप्रतूर्तिमनेहसम् ॥८॥
*sakhāyastvā vavṛmahe devaṁ martāsa ūtaye / apāṁ napātaṁ subhagaṁ sudaṁ sasaṁ supratūrtimanehasam //8 //*

सा. (Sv.) ७६

इडामग्ने पुरुदं संसनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥४॥
*iḍāmagne purudaṁ saṁsaniṁ goḥ śaśvattamaṁ havamānāya sādha /*
*syānnaḥ sūnustanayo vijāvāgne sā te sumatirbhūtvasme //4 //*

सा. (Sv.) ७९

अरण्योर्निहितो जातवेदा गर्भ इवेत्सुभृतो गर्भिणीभिः ।
दिवेदिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभरग्निः ॥७॥
*araṇyornihito jātavedā garbha ivetsubhṛto garbhiṇībhiḥ /*
*divediva īḍyo jāgṛvadbhirhaviṣmadbhirmanuṣyebharagniḥ //7 //*

सा. (Sv.) ९८

प्र होत्रे पूर्व्यं वचोऽग्नये भरता बृहत्। विपां ज्योतींषि बिभ्रते न वेधसे ॥२॥
*pra hotre pūrvyaṁ vacho'gnaye bharatā bṛhat / vipāṁ jyotīṁṣi bibhrate na vedhase //2 //*

सा. (Sv.) १००

अग्ने यजिष्ठो अध्वरे देवान् देवयते यज। होता मन्द्रो वि राजस्यति स्रिधः ॥४॥
*agne yajiṣṭho adhvare devān devayate yaja / hotā mandro vi rājasyati sridhaḥ //4 //*

सा. (Sv.) ६१४

पात्यग्निर्विपो अग्रं पदं वेः पाति यह्वश्चरणं सूर्यस्य ।
पाति नाभा सप्तशीर्षाणमग्निः पाति देवानामुपमादमृष्वः ॥१३॥
*pātyagnirvipo agraṁ padaṁ veḥ pāti yahvaścharaṇaṁ sūryasya /*
*pāti nābhā saptaśīrṣāṇamagniḥ pāti devānāmupamādamṛṣvaḥ //13 //*

सा. (Sv.) १४७७-१४७९

होता देवो अमर्त्यः पुरस्तादेति मायया। विदथानि प्रचोदयन् ॥१॥
वाजी वाजेषु धीयतेऽध्वरेषु प्र णीयते। विप्रो यज्ञस्य साधनः ॥२॥
धियो चक्र वरेण्यो भूतानां गर्भमा दधे। दक्षस्य पितरं तना ॥३॥
*hotā devo amartyaḥ purastādeti māyayā / vidathāni prachodayan //1 //*
*vājī vājeṣu dhīyate'dhvareṣu pra ṇīyate / vipro yajñasya sādhanaḥ //2 //*
*dhiyo chakra vareṇyo bhūtānāṁ garbhamā dadhe / dakṣasya pitaraṁ tanā //3 //*

सा. (Sv.) १५३८-१५४०

ईडेन्यो नमस्यस्तिरस्तमांसि दर्शतः। समग्निरिध्यते वृषा ॥१॥
वृषो अग्निः समिध्यतेऽश्वो न देववाहनः। तं हविष्मन्त ईडते ॥२॥
वृषणं त्वा वयं वृषन्वृषणः समिधीमहि। अगने दीद्यतं बृहत् ॥३॥
*īḍenyo namasyastirastamāṁsi darśataḥ / samagniridhyate vṛṣā //1 //*
*vṛṣo agniḥ samidhyate'śvo na devavāhanaḥ / taṁ haviṣmanta īḍate //2 //*
*vṛṣaṇaṁ tvā vayaṁ vṛṣanvṛṣaṇaḥ samidhīmahi / agane dīdyataṁ bṛhat //3 //*

सा. (Sv.) १५५६-१५५८

अदाभ्यः पुरएता विशामग्निर्मानुषीणाम्। तूर्णी रथः सदा नवः ॥१॥
अभि प्रयांसि वाहसा दाश्वाँ अश्नोति मर्त्यः। क्षयं पावकशोचिषः ॥२॥
साह्वान्विश्वा अभियुजः क्रतुर्देवानाममृक्तः। अग्निस्तुविश्रवस्तमः ॥३॥
*adābhyaḥ puraetā viśāmagnirmānuṣīṇām / tūrṇī rathaḥ sadā navaḥ //1 //*
*abhi prayāṁsi vāhasā dāśvām̐ aśnoti martyaḥ / kṣayaṁ pāvakaśochiṣaḥ //2 //*
*sāhvānviśvā abhiyujaḥ kraturdevānāmamṛktaḥ / agnistuviśravastamaḥ //3 //*

२. अग्निः (साग्नी.) वैद्युतोऽग्निः (सार्षेदी.) (Agniḥ [Ssb.] Vaidyuto'gniḥ [Sad.]) - सा. (Sv.) ५३

कायमानो वना त्वं यन्मातृरजगन्नपः। न तत्ते अग्ने प्रमृषे निवर्तनं यद् दूरे सन्निहाभुवः ॥९॥
*kāyamāno vanā tvaṁ yanmātṛrajagannapaḥ / na tatte agne pramṛṣe nivartanaṁ yad dūre sannihābhuvaḥ //9 //*

३. अग्निरात्मा वा (Agnirātmā vā) - ऋ. (Rv.) ३.२६.७-८

अग्निस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन् ।
अर्कस्त्रिधातू रजसो विमानोऽजस्रो घर्मो हविरस्मि नाम ॥७॥
त्रिभिः पवित्रैरपुपोद्ध्य१र्कं हृदा मतिं ज्योतिरनु प्रजानन् ।
वर्षिष्ठं रत्नमकृत स्वधाभिरादिद् द्यावापृथिवी पर्यपश्यत् ॥८॥
*agnismi janmanā jātavedā ghṛtaṁ me chakṣuramṛtaṁ ma āsan /*
*arkastridhātū rajaso vimāno'jasro gharmo havirasmi nāma //7 //*
*tribhiḥ pavitrairapupoddhya1rkaṁ hṛdā matiṁ jyotiranu prajānan /*
*varṣiṣṭhaṁ ratnamakṛta svadhābhirādid dyāvāpṛthivī paryapaśyat //8 //*

४. अग्निर् वैश्वानरः (Agnir Vaiśvānaraḥ) - ऋ. (Rv.) ३.२.१-१५; ३.३.१-११; ३.२६.१-३

ऋ. (Rv.) ३.२.१-१५

वैश्वानराय धिषणामृतावृधे घृतं न पूतमग्नये जनामसि ।
द्विता होतारं मनुषश्च वाघतो धिया रथं न कुलिशः समृण्वति ॥१॥
स रोचयज्जनुषा रोदसी उभे स मात्रोरभवत्पुत्र ईड्यः ।
हव्यवाळग्निरजरश्चनोहितो दूळभो विशामतिथिर्विभावसुः ॥२॥
क्रत्वा दक्षस्य तरुषो विधर्मणि देवासो अग्िंन जनयन्त चित्तिभिः ।
रुरुचानं भानुना ज्योतिषा महामत्यं न वाजं सनिष्यन्नुप ब्रुवे ॥३॥
आ मन्द्रस्य सन्स्यिन्तो वरेण्यं वृणीमहे अह्रयं वाजमृग्मियम् ।
रातिं भृगूणामुशिजं कविक्रतुमग्िंन राजन्तं दिव्येन शोचिषा ॥४॥
अग्िंन सुम्नाय दधिरे पुरो जना वाजश्रवसमिह वृक्तबर्हिषः ।
यतस्रुचः सुरुचं विश्वदेव्यं रुद्रं यज्ञानां साधदिष्टिमपसाम् ॥५॥
पावकशोचे तव हि क्षयं परि होतर्यज्ञेषु वृक्तवर्हिषो नरः ।
अग्ने दुव इच्छमानास आप्यमुपासते द्रविणं धेहि तेभ्यः ॥६॥
आ रोदसी अपृणदा स्वर्महज्जातं यदेनमपसो अधारयन् ।
सो अध्वराय परि णीयते कविरत्यो न वाजसातये चनोहितः ॥७॥
नमस्यत हव्यदातिं स्वध्वरं दुवस्यत दम्यं जातवेदसम् ।
रथीऋर्तस्य बृहतो विचर्षणिरग्निर्देवानामभवत्पुरोहितः ॥८॥
तिस्रो यह्वस्य समिधः परिज्मनोऽग्नेरपुनन्नुशिजो अमृत्यवः ।
तासामेकामदधुर्मर्त्ये भुजमु लोकमु द्वे उप जामिमीयतुः ॥९॥
विशां कविं विश्पतिं मानुषीरिषः सं सीमकृण्वन्त्स्वधितिं न तेजसे ।
स उद्वतो निवतो याति वेविषत्स गर्भमेषु भुवनेषु दीधरत् ॥१०॥
स जिन्वते जठरेषु प्रजज्ञिवान्वृषा चित्रेषु नानदन्न सिंहः ।
वैश्वानरः पृथुपाजा अमर्त्यो वसु रत्ना दयमानो वि दाशुषे ॥११॥
वैश्वानरः प्रत्नथा नाकमारुहद्दिवस्पृष्ठं भन्दमानः सुमन्मभिः ।
स पूर्ववज्जनयंजन्तवे धनं समानज्मं पर्येति जागृविः ॥१२॥
ऋतावानं यज्ञियं विप्रमुक्थ्य१ मा यं दधे मातरिश्वा दिवि क्षयम् ।
तं चित्रयामं हरिकेशमीमहे सुदीतिमग्िंन सुविताय नव्यसे ॥१३॥
शुचिं न यामन्निषिरं स्वर्दृशं केतुं दिवो रोचनस्थामुषर्बुधम् ।
अग्िंन मूर्धानं दिवो अप्रतिष्कुतं तमीमहे नमसा वाजिनं बृहत् ॥१४॥
मन्द्रं होतारं शुचिमद्वयाविनं दमूनसमुक्थ्यं विश्वचर्षणिम् ।
रथं न चित्रं वपुषाय दर्शतं मनुर्हितं सदमिद्राय ईमहे ॥१५॥
*vaiśvānarāya dhiṣaṇāmṛtāvṛdhe ghṛtaṁ na pūtamagnaye janāmasi /*
*dvitā hotāraṁ manuṣaścha vāghato dhiyā rathaṁ na kuliśaḥ samṛṇvati //1 //*
*sa rochayajjanuṣā rodasī ubhe sa mātrorabhavatputra īḍyaḥ /*
*havyavāḻagnirajaraśchanohito dūḻabho viśāmatithirvibhāvasuḥ //2 //*
*kratvā dakṣasya taruṣo vidharmaṇi devāso agiṁna janayanta chittibhiḥ /*
*ruruchānaṁ bhānunā jyotiṣā mahāmatyaṁ na vājaṁ saniṣyannupa bruve //3 //*
*ā mandrasya sanśyinto vareṇyaṁ vṛṇīmahe ahrayaṁ vājamṛgmiyam /*
*rātiṁ bhṛgūṇāmuśijaṁ kavikratumagiṁna rājantaṁ divyena śochiṣā //4 //*

*agiṁna sumnāya dadhire puro janā vājaśravasamiha vṛktabarhiṣaḥ* ।
*yatasruchaḥ suruchaṁ viśvadevyaṁ rudraṁ yajñānāṁ sādhadiṣṭimapasām* ॥5॥
*pāvakaśoche tava hi kṣayaṁ pari hotaryajñeṣu vṛktavarhiṣo naraḥ* ।
*agne duva ichchhamānāsa āpyamupāsate draviṇaṁ dhehi tebhyaḥ* ॥6॥
*ā rodasī apṛṇadā svarmahajjātaṁ yadenamapaso adhārayan* ।
*so adhvarāya pari ṇīyate kaviratyo na vājasātaye chanohitaḥ* ॥7॥
*namasyata havyadātiṁ svadhvaraṁ duvasyata dadamyaṁ jātavedasam* ।
*rathīṛrtasya bṛhato vicharṣaṇiragnirdevānāmabhavatpurohitaḥ* ॥8॥
*tisro yahvasya samidhaḥ parijmano'gnerapunannuśijo amṛtyavaḥ* ।
*tāsāmekāmadadhurmartye bhujamu lokamu dve upa jāmimīyatuḥ* ॥9॥
*viśāṁ kaviṁ viśpatiṁ mānuṣīriṣaḥ saṁ sīmakṛṇvantsvadhitiṁ na tejase* ।
*sa udvato nivato yāti veviṣatsa garbhameṣu bhuvaneṣu dīdharat* ॥10॥
*sa jinvate jaṭhareṣu prajajñivānvṛṣā chitreṣu nānadanna siṁhaḥ* ।
*vaiśvānaraḥ pṛthupājā amartyo vasu ratnā dayamāno vi dāśuṣe* ॥11॥
*vaiśvānaraḥ pratnathā nākamāruhaddivaspṛṣṭhaṁ bhandamānaḥ sumanmabhiḥ* ।
*sa pūrvavajjanayaṁjantave dhanaṁ samānajmaṁ paryeti jāgṛviḥ* ॥12॥
*ṛtāvānaṁ yajñiyaṁ vipramukthya1 mā yaṁ dadhe mātariśvā divi kṣayam* ।
*taṁ chitrayāmaṁ harikeśamīmahe sudītimagiṁna suvitāya navyase* ॥13॥
*śuchiṁ na yāmanniṣiraṁ svardṛśaṁ ketuṁ divo rochanasthāmuṣarbudham* ।
*agiṁna mūrdhānaṁ divo apratiṣkutaṁ tamīmahe namasā vājinaṁ bṛhat* ॥14॥
*mandraṁ hotāraṁ śuchimadvayāvinaṁ damūnasamukthyaṁ viśvacharṣaṇim* ।
*rathaṁ na chitraṁ vapuṣāya darśataṁ manurhitaṁ sadamidrāya īmahe* ॥15॥

ऋ. (Rv.) ३.३.१-११

वैश्वानराय पृथुपाजसे विपो रत्ना विधन्त धरुणेषु गातवे ।
अग्निर्हि देवाँ अमृतो दुवस्यत्यथा धर्माणि सनता न दूदुषत् ॥१॥
अन्तर्दूतो रोदसी दस्म ईयते निषत्तो मनुषः पुरोहितः ।
क्षयं बृहन्तं परि भूषति द्युभिर्देवेभिरग्निरिषितो धियावसुः ॥२॥
केतुं यज्ञानां विदथस्य साधनं विप्रासो अग्निं महयन्त चित्तिभिः ।
अपांसि यस्मिन्नधि सन्दधुर्गिरस्तस्मिन्त्सुम्नानि यजमान आ चके ॥३॥
पिता यज्ञानामसुरो विपश्चितां विमानमग्निर्वयुनं च वाघताम् ।
आ विवेश रोदसी भुरिवर्पसा पुरुप्रियो भन्दते धमभिः कविः ॥४॥
चन्द्रमग्निं चन्द्ररथं हरिव्रतं वैश्वानरमप्सुषदं स्वर्विदम् ।
विगाहं तूर्णिं तविषीभिरावृतं भूर्णिं देवास इह सुश्रियं दधुः ॥५॥
अग्निर्देवेभिर्मनुषश्च जन्तुभिस्तन्वानो यज्ञं पुरुपेशसं धिया ।
रथीरन्तरीयते साधदिष्टिभिर्जीरो दमूना अभिशस्तिचातनः ॥६॥
अग्ने जरस्व स्वपत्य आयुन्यूर्जा पिन्वस्व समिषो दिदीहि नः ।
वयांसि जिन्व बृहतश्च जागृव उशिग्देवानामसि सुक्रतुर्विपाम् ॥७॥
विश्पतिं यह्वमतिथिं नरः सदा यन्तारं धीनामुशिजं च वाघताम् ।
अध्वराणां चेतनं जातवेदसं प्र शंसन्ति नमसा जूतिभिर्वृधे ॥८॥
विभावा देवः सुरणः परि क्षितीरग्निर्बभूव शवसा सुमद्रथः ।
तस्य व्रतानि भूरिपोषिणो वयमुप भूषेम दम आ सुवृक्तिभिः ॥९॥
वैश्वानर तव धामान्या चके येभिः स्वर्विदभवो विचक्षण ।
जात आपृणो भुवनानि रोदसी अग्ने ता विश्वा परिभूरसि त्मना ॥१०॥
वैश्वानरस्य दंसनाभ्यो बृहदरिणादेकः स्वपस्यया कविः ।
उभा पितरा महयन्नजायताग्निर्द्यावापृथिवी भूरिरेतसा ॥११॥

*vaiśvānarāya pṛthupājase vipo ratnā vidhanta dharuṇeṣu gātave* ।
*agnirhi devāṁ̐ amṛto duvasyatyathā dharmāṇi sanatā na dūduṣat* ॥1॥
*antardūto rodasī dasma īyate niṣatto manuṣaḥ purohitaḥ* ।
*kṣayaṁ bṛhantaṁ pari bhūṣati dyubhirdevebhiragniriṣito dhiyāvasuḥ* ॥2॥
*ketuṁ yajñānāṁ vidathasya sādhanaṁ viprāso agiṁna mahayanta chittibhiḥ* ।
*apāṁsi yasminnadhi sandadhurgirastasmintsumnāni yajamāna ā chake* ॥3॥

*pitā yajñānāmasuro vipaśchitāṁ vimānamagnirvayunaṁ cha vāghatām* ।
*ā viveśa rodasī bhurivarpasā purupriyo bhandate dhamabhiḥ kaviḥ* ॥4॥
*chandramagiṁna chandrarathaṁ harivrataṁ vaiśvānaramapsuṣadaṁ svarvidam* ।
*vigāhaṁ tūrṇiṁ taviṣībhirāvṛtaṁ bhūrṇiṁ devāsa iha suśriyaṁ dadhuḥ* ॥5॥
*agnirdevebhirmanuṣaścha jantubhistanvāno yajñaṁ purupeśasaṁ dhiyā* ।
*rathīrantarīyate sādhadiṣṭibhirjīro damūnā abhiśastichātanaḥ* ॥6॥
*agne jarasva svapatya āyunyūrjā pinvasva samiṣo didīhi naḥ* ।
*vayāṁsi jinva bṛhataścha jāgṛva uśigdevānāmasi sukraturvipām* ॥7॥
*viśpatiṁ yahvamatithiṁ naraḥ sadā yantāraṁ dhīnāmuśijaṁ cha vāghatām* ।
*adhvarāṇāṁ chetanaṁ jātavedasaṁ pra śaṁsanti namasā jūtibhirvṛdhe* ॥8॥
*vibhāvā devaḥ suraṇaḥ pari kṣitīragnirbabhūva śavasā sumadrathaḥ* ।
*tasya vratāni bhūripoṣiṇo vayamuṣa bhūṣema dama ā suvṛktibhiḥ* ॥9॥
*vaiśvānara tava dhāmānyā chake yebhiḥ svarvidabhavo vichakṣaṇa* ।
*jāta āpṛṇo bhuvanāni rodasī agne tā viśvā paribhūrasi tmanā* ॥10॥
*vaiśvānarasya daṁsanābhyo bṛhadariṇādekaḥ svapasyayā kaviḥ* ।
*ubhā pitarā mahayannajāyatāgnirdyāvāpṛthivī bhūriretasā* ॥11॥

ऋ. (Rv.) ३.२६.१-३

वैश्वानरं मनसाग्निं निचाय्या हविष्मन्तो अनुषत्यं स्वर्विदम् ।
सुदानुं देवं रथिरं वसूयवो गीर्भी रण्वं कुशिकासो हवामहे ॥१॥
तं शुभ्रमग्निमवसे हवामहे वैश्वानरं मातरिश्वानमुक्थ्यम् ।
बृहस्पतिं मनुषो देवतातये विप्रं श्रोतारमतिथिं रघुष्यदम् ॥२॥
अश्वो न क्रन्दंजनिभिः समिध्यते वैश्वानरः कुशिकेभिर्युगेयुगे ।
स नो अग्निः सुवीर्यं स्वश्र्यं दधातु रत्नममृतेषु जागृविः ॥३॥
*vaiśvānaraṁ manasāgiṁna nichāyyā haviṣmanto anuṣatyaṁ svarvidam* ।
*sudānuṁ devaṁ rathiraṁ vasūyavo gīrbhī raṇvaṁ kuśikāso havāmahe* ॥1॥
*taṁ śubhramagnimavase havāmahe vaiśvānaraṁ mātariśvānamukthyam* ।
*bṛhaspatiṁ manuṣo devatātaye vipraṁ śrotāramatithiṁ raghuṣyadam* ॥2॥
*aśvo na krandaṁjanibhiḥ samidhyate vaiśvānaraḥ kuśikebhiryugeyuge* ।
*sa no agniḥ suvīryaṁ svaśrayaṁ dadhātu ratnamamṛteṣu jāgṛviḥ* ॥3॥

५. अश्विनौ (Aśvinau) - ऋ. (Rv.) ३.५८.१-९

धेनुः प्रत्नस्य काम्यं दुहानान्तः पुत्रश्चरति दक्षिणायाः ।
आ द्योतनिं वहति शुभ्रयामोषसः स्तोमो अश्विनावजीगः ॥१॥
सुयुग्वहन्ति प्रति वामृतेनोर्ध्वा भवन्ति पितरेव मेधाः ।
जरेथामस्मद्वि पणेर्मनीषां युवोरवश्चकृमा यातमर्वाक् ॥२॥
सुयुग्भिरश्वैः सुवृता रथेन दस्राविमं शृणुतं श्लोकमद्रेः ।
किमंग वां पत्यवर्तिं गमिष्ठाहुर्विप्रासो अश्विना पुराजाः ॥३॥
आ मन्येथामा गतं कच्चिदेवैर्विश्वे जनासो अश्विना हवन्ते ।
इमा हि वां गोऋजीका मधूनि प्र मित्रासो न ददुरुस्रो अग्रे ॥४॥
तिरः पुरू चिदश्विना रजांस्याङ्गूषो वां मघवाना जनेषु ।
एह यातं पथिभिर्देवयानैर्दस्राविमे वां निधयो मधूनाम् ॥५॥
पुराणमोकः सख्यं शिवं वां युवोर्नरा द्रविणं जह्नाव्याम् ।
पुनः कृण्वानाः सख्या शिवानि मध्वा मदेम सह नू समानाः ॥६॥
अश्विना वायुना युवं सुदक्षा नियुद्भिश्च सजोषसा युवाना ।
नासत्या तिरोअह्न्यं जुषाणा सोमं पिबतमस्रिधा सुदानू ॥७॥
अश्विना परि वामिषः पुरूचीरीयुर्गीर्भिर्यतमाना अमृध्राः ।
रथो ह वामृतजा अद्रिजूतः परि द्यावापृथिवी याति सद्यः ॥८॥
अश्विना मधुषुत्तमो युवाकुः सोमस्तं पातमा गतं दुरोणे ।
रथो ह वां भूरि वर्पः करिक्रत्सुतावतो निष्कृतमागमिष्ठः ॥९॥
*dhenuḥ pratnasya kāmyaṁ duhānāntaḥ putraścharati dakṣiṇāyāḥ* ।
*ā dyotaniṁ vahati śubhayāmoṣasaḥ stomo aśvināvajīgaḥ* ॥1॥

*suyugvahanti prati vāmṛtenordhvā bhavanti pitareva medhāḥ /*
*jarethāmasmadvi paṇermanīṣāṁ yuvoravaśchakṛmā yātamarvāk //2 //*
*suyugbhiraśvaiḥ suvṛtā rathena dasrāvimaṁ śṛṇutaṁ ślokamadreḥ /*
*kimaṁga vāṁ patyavartiṁ gamiṣṭhāhurviprāso aśvinā purājāḥ //3 //*
*ā manyethāmā gataṁ kachchidevairviśve janāso aśvinā havante /*
*imā hi vāṁ gorjīkā madhūni pra mitrāso na dadurusro agre //4 //*
*tiraḥ purū chidaśvinā rajāṁsyāṅgūṣo vāṁ maghavānā janeṣu /*
*eha yātaṁ pathibhirdevayānairdasrāvime vāṁ nidhayo madhūnām //5 //*
*purāṇamokaḥ sakhyaṁ śivaṁ vāṁ yuvornarā draviṇaṁ jahnāvyām /*
*punaḥ kṛṇvānāḥ sakhyā śivāni madhvā madema saha nū samānāḥ //6 //*
*aśvinā vāyunā yuvaṁ sudakṣā niyudbhiścha sajoṣasā yuvānā /*
*nāsatyā tiroahnyaṁ juṣāṇā somaṁ pibatamasridhā sudānū //7 //*
*aśvinā pari vāmiṣaḥ purūchīrīyurgīrbhiryatamānā amṛdhrāḥ /*
*ratho ha vāmṛtajā adrijūtaḥ pari dyāvāpṛthivī yāti sadyaḥ //8 //*
*aśvinā madhuṣuttamo yuvākuḥ somastaṁ pātamā gataṁ duroṇe /*
*ratho ha vāṁ bhūri varpaḥ karikratsutāvato niṣkṛtamāgamiṣṭhaḥ //9 //*

६. आत्मा अग्निर् वा (Ātmā Agnir Vā) - सा. (Sv.) ६१३

अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन् ।
त्रिधातुरर्को रजसो विमानोऽजस्रं ज्योतिर्हविरस्मि सर्वम् ॥१२॥
*agnirasmi janmanā jātavedā ghṛtaṁ me chakṣuramṛtaṁ ma āsan /*
*tridhāturarko rajaso vimāno'jasraṁ jyotirhavirasmi sarvam //12 //*

७. आप्रियः (Āprriyaḥ) - ऋ. (Rv.) ३.४.१-११

समित्समित्सुमना बोध्यस्मे शुचाशुचा सुमतिं रासि वस्वः ।
आ देव देवान्यजथाय वक्षि सखा सचीन्त्सुमना यक्ष्यग्ने ॥१॥
यं देवासस्त्रिरहन्नायजन्ते दिवेदिवे वरुणो मित्रो अग्निः ।
सेमं यज्ञं मधुमन्तं कृधी नस्तनूनपाद्घृतयोनिं विधन्तम् ॥२॥
प्र दीधितिर्विश्ववारा जिगाति होतारमिळः प्रथमं यजध्यै ।
अच्छा नमोभिर्वृषभं वन्दध्यै स देवान्यक्षदिषितो यजीयान् ॥३॥
ऊर्ध्वो वां गातुरध्वरे अकार्यूर्ध्वा शोचींषि प्रस्थिता रजांसि ।
दिवो वा नाभा न्यसादि होता स्तृणीमहि देवव्यचा वि बर्हिः ॥४॥
सप्त होत्राणि मनसा वृणाना इन्वन्तो विश्वं प्रति यन्नृतेन ।
नृपेशसो विदथेषु प्र जाता अभी३मं यज्ञं वि चरन्त पूर्वीः ॥५॥
आ भन्दमाने उषसा उपाके उत स्मयेते तन्वा३ विरूपे ।
यथा नो मित्रो वरुणो जुजोषदिन्द्रो मरुत्वाँ उत वा महोभिः॥ ॥६॥
दैव्या होतारा प्रथमा न्यृंजे सप्त पृक्षासः स्वधया मदन्ति ।
ऋतं शंसन्त ऋतमित्त आहुरनु व्रतं व्रतपा दीध्यानाः ॥७॥
आ भारती भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः ।
सरस्वती सारस्वतेभिरर्वाक् तिस्रो देवीर्बर्हिरेदं सदन्तु ॥८॥
तन्नस्तुरीपमध पोषयित्नु देव त्वष्टर्वि रराणः स्यस्व ।
यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः ॥९॥
वनस्पतेऽव सृजोप देवानग्निर्हविः शमिता सूदयाति ।
सेदु होता सत्यतरो यजाति यथा देवानां जनिमानि वेद ॥१०॥
आ याह्यग्ने समिधानो अर्वाङिन्द्रेण देवैः सरथं तुरेभिः ।
बर्हिर्न आस्तामदितिः सुपुत्रा स्वाहा देवा अमृता मादयन्ताम् ॥११॥
*samitsamitsumanā bodhyasme śuchāśuchā sumatiṁ rāsi vasvaḥ /*
*ā deva devānyajathāya vakṣi sakhā sachīntsumanā yakṣayagne //1 //*
*yaṁ devāsastrirahannāyajante divedive varuṇo mitro agniḥ /*
*semaṁ yajñaṁ madhumantaṁ kṛdhī nastanūnapādghṛtayoniṁ vidhantam //2 //*
*pra dīdhitirviśvavārā jigāti hotāramiḷaḥ prathamaṁ yajadhyai /*
*achchhā namobhirvṛṣabhaṁ vandadhyai sa devānyakṣadiṣito yajīyān //3 //*

*ūrdhvo vāṁ gāturadhvare akāryūrdhvā śochīṁṣi prasthitā rajāṁsi* ।
*divo vā nābhā nyasādi hotā stṛṇīmahi devavyachā vi barhiḥ* ॥4॥
*sapta hotrāṇi manasā vṛṇānā invanto viśvaṁ prati yannṛtena* ।
*nṛpeśaso vidatheṣu pra jātā abhī3maṁ yajñaṁ vi charanta pūrvīḥ* ॥5॥
*ā bhandamāne uṣasā upāke uta smayete tanvā3 virūpe* ।
*yathā no mitro varuṇo jujoṣadindro marutvām̐ uta vā mahobhiḥ* ॥ ॥6॥
*daivyā hotārā prathamā nyṛñje sapta pṛkṣāsaḥ svadhayā madanti* ।
*ṛtaṁ śaṁsanta ṛtamitta āhuranu vrataṁ bratapā dīdhyānāḥ* ॥7॥
*ā bhāratī bhāratībhiḥ sajoṣā iḷā devairmanuṣyebhiragniḥ* ।
*sarasvatī sārasvatebhirarvāk tisro devīrbarhiredaṁ sadantu* ॥8॥
*tannasturīpamadha poṣayitnu deva tvaṣṭarvi rarāṇaḥ syasva* ।
*yato vīraḥ karmaṇyaḥ sudakṣo yuktagrāvā jāyate devakāmaḥ* ॥9॥
*vanaspate'va sṛjopa devānagnirhaviḥ śamitā sūdayāti* ।
*sedu hotā satyataro yajāti yathā devānāṁ janimāni veda* ॥10॥
*ā yāhyagne samidhāno arvāṅindreṇa devaiḥ sarathaṁ turebhiḥ* ।
*barhirna āstāmaditiḥ suputrā svāhā devā amṛtā mādayantām* ॥11॥

८. इन्द्रः (Indraḥ) - ऋ. (Rv.) ३.३०.१-२२; ३.३२.१-१७; ३.३४.१-११; ३.३५. १-११; ३.३६.१-११; ३.३७.१-११; ३.३९.१-९; ३.४०.१-९; ३.४१.१-९; ३.४२.१-९; ३.४३.१-९; ३.४४.१-५; ३.४५.१-५; ३.४६.१-५; ३.४७.१-५; ३.४८.१-५; ३.४९.१-५; ३.५०.१-५; ३.५१.१-१२; ३.५२.१-८; ३.५३.२-१४; २१-२४; सा. (Sv.) १६५; १९५; २१०; २२६; २४६; ३२९; ३७४; ७३७-७३९; १७१८-१७२०

ऋ. (Rv.) ३.३०.१-२२

इच्छन्ति त्वा सोम्यासः सखायः सुन्वन्ति सोमं दधति प्रयांसि ।
तितिक्षन्ते अभिशस्तिं जनानामिन्द्र त्वदा कश्चन हि प्रकेतः ॥१॥
न ते दूरे परमा चिद्रजांस्या तु प्र याहि हरिवो हरिभ्याम् ।
स्थिराय वृष्णे सवना कृतेमा युक्ता ग्रावाणः समिधाने अग्नौ ॥२॥
इन्द्रः सुशिप्रो मघवा तरुत्रो महाव्रातस्तुविकूर्मिऋघावान् ।
यदुग्रो धा बाधितो मर्त्येषु क्व१ त्या ते वृषभ वीर्याणि ॥३॥
त्वं हि ष्मा च्यावयन्नच्युतान्येको वृत्रा चरसि जिघ्नमानः ।
तव द्यावापृथिवी पर्वतासोऽनु व्रताय निमितेव तस्थुः ॥४॥
उताभये पुरुहूत श्रवोभिरेको दृळहमवदो वृत्रहा सन् ।
इमे चिदिन्द्र रोदसी अपारे यत्संगृभ्णा मघवन्काशिरित्ते ॥५॥
प्र सू त इन्द्र प्रवता हरिभ्यां प्र ते वज्रः प्रमृणन्नेतु शत्रून् ।
जहि प्रतीचो अनूचः षराचो विश्वं सत्यं कृणुहि विष्टमस्तु ॥६॥
यस्मै धायुरदधा मर्त्यायाभक्तं चिद्भजते गेह्यं१ सः ।
भद्रा त इन्द्र सुमतिर्घृताची सहस्रदाना पुरुहूत रातिः ॥७॥
सहदानु पुरुहूत क्षियन्तमहस्तमिन्द्र सं पिणक्कुणारुम् ।
अभि वृत्रं वर्धमानं पियारुमपादमिन्द्र तवसा जघन्थ ॥८॥
नि सामनामिषिरामिन्द्र भूमिं महीमपारां सदने ससत्थ ।
अस्तभ्नाद् द्यां वृषभो अन्तरिक्षमर्षन्त्वापस्त्वयेह प्रसूताः ॥९॥
अलातृणो वल इन्द्र व्रजो गोः पुरा हन्तोर्भयमानो व्यार ।
सुगान्पथो अकृणोन्निरजे गाः प्रावन्वाणीः पुरुहूतं धमन्तीः ॥१०॥
एको द्वे वसुमती समीची इन्द्र आ पप्रौ पृथिवीमुत द्याम् ।
उतान्तरिक्षादभि नः समीक इषो रथीः सयुजः शूर वाजान् ॥११॥
दिशः सूर्यो न मिनाति प्रदिष्टा दिवेदिवे हर्यश्वप्रसूताः ।
सं यदानळध्वन आदिदश्वैर्विमोचनं कृणुते तत्त्वस्य ॥१२॥
दिदृक्षन्त उषसो यामन्नक्तोर्विवस्वत्या महि चित्रमनीकम् ।
विश्वे जानन्ति महिना यदागादिन्द्रस्य कर्म सुकृता पुरूणि ॥१३॥

महि ज्योतिर्निहितं वक्षणास्वामा पक्वं चरति बिभ्रती गौः ।
विश्वं स्वाद्म सम्भृतमुस्रियायां यत्सीमिन्द्रो अदधाद्भोजनाय ॥१४॥
इन्द्र दृह्य यामकोशा अभूवन्यज्ञाय शिक्ष गृणते सखिभ्यः ।
दुर्मायवो दुरेबा मर्त्यासो निषंगिणो रिपवो हन्त्वासः ॥१५॥
सं घोषः शृण्वेऽवमैरमित्रैर्जही न्वेष्वशनिं तपिष्ठाम् ।
वृश्चेमधस्ताद्वि रुजा सहस्व जहि रक्षो मघवन् रन्धयस्व ॥१६॥
उद्वृह रक्षः सहमूलमिन्द्र वृश्च मध्यं प्रत्यग्रं शृणीहि ।
आ कीवतः सललूकं चकर्थ ब्रह्मद्विषे तपुषिं हेतिमस्य ॥१७॥
स्वस्तये वाजिभिश्च प्रणेतः सं यन्महीरिष आसत्सि पूर्वीः ।
रायो वन्तारो बृहतः स्यामास्मे अस्तु भग इन्द्र प्रजावान् ॥१८॥
आ नो भर भगमिन्द्र द्युमन्तं नि ते देष्णस्य धीमहि प्ररेके ।
ऊर्व इव पप्रथे कामो अस्मे तमा पृण वसुपते वसूनाम् ॥१९॥
इमं कामं मन्दया गोभिरश्वैश्चन्द्रवता राधसा पप्रथश्च ।
स्वर्यवो मतिभिस्तुभ्यं विप्रा इन्द्राय वाहः कुशिकासो अक्रन् ॥२०॥
आ नो गोत्रा दर्दृहि गोपते गाः समस्मभ्यं सनयो यन्तु वाजाः ।
दिवक्षा असि वृषभ सत्यशुष्मोऽस्मभ्यं सु मघवन्बोधि गोदाः ॥२१॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥२२॥

*ichchhanti tvā somyāsaḥ sakhāyaḥ sunvanti somaṁ dadhati prayāṁsi /*
*titikṣante abhiśastiṁ janānāmindra tvadā kaśchana hi praketaḥ //1 //*
*na te dūre paramā chidrajāṁsyā tu pra yāhi harivo haribhyām /*
*sthirāya vṛṣṇe savanā kṛtemā yuktā grābāṇaḥ samidhāne agnau //2 //*
*indraḥ suśipro maghavā tarutro mahāvrātastuvikūrmiṛghāvān /*
*yadugro dhā bādhito martyeṣu kva1 tyā te vṛṣabha vīryāṇi //3 //*
*tvaṁ hi ṣmā chyāvayannachyutānyeko vṛtrā charasi jighnamānaḥ /*
*tava dyāvāpṛthivī parvatāso'nu vratāya nimiteva tasthuḥ //4 //*
*utābhaye puruhūta śravobhireko dṛḷahamavado vṛtrahā san /*
*ime chidindra rodasī apāre yatsaṁgṛbhṇā maghavankāśiritte //5 //*
*pra sū ta indra pravatā haribhyāṁ pra te vajraḥ pramṛṇannetu śatrūn /*
*jahi pratīcho anūchaḥ ṣarācho viśvaṁ satyaṁ kṛṇuhi viṣṭamastu //6 //*
*yasmai dhāyuradadhā martyāyābhaktaṁ chidbhajate gehyaṁ1 saḥ /*
*bhadrā ta indra sumatirghṛtāchī sahasradānā puruhūta rātiḥ //7 //*
*sahadānu puruhūta kṣiyanmahastamindra saṁ piṇakkuṇārum /*
*abhi vṛtraṁ vardhamānaṁ piyārumapādamindra tavasā jaghantha //8 //*
*ni sāmanāmiṣirāmindra bhūmiṁ mahīmapārāṁ sadane sasattha /*
*astabhnād dyāṁ vṛṣabho antarikṣamarṣantvāpastvayeha prasūtāḥ //9 //*
*alātṛṇo vala indra vrajro goḥ purā hantorbhayamāno vyāra /*
*sugānpatho akṛṇonniraje gāḥ prāvanvāṇīḥ puruhūtaṁ dhamantīḥ //10 //*
*eko dve vasumatī samīchī indra ā paprau pṛthivīmuta dyām /*
*utāntarikṣādabhi naḥ samīka iṣo rathīḥ sayujaḥ śūra vājān //11 //*
*diśaḥ sūryo na mināti pradiṣṭā divedive haryaśvaprasūtāḥ /*
*saṁ yadānaḷadhvana ādidaśvairvimochanaṁ kṛṇute tattvasya //12 //*
*didṛkṣanta uṣaso yāmannaktorvivasvatyā mahi chitramanīkam /*
*viśve jānanti mahinā yadāgādindrasya karma sukṛtā purūṇi //13 //*
*mahi jyotirnihitaṁ vakṣaṇāsvāmā pakvaṁ charati bibhratī gauḥ /*
*viśvaṁ svādma sambhṛtamusriyāyāṁ yatsīmindro adadhādbhojanāya //14 //*
*indra dṛhya yāmakośā abhūvanyajñāya śikṣa gṛṇate sakhibhyaḥ /*
*durmāyavo durebā martyāso niṣaṁgiṇo ripavo hantvāsaḥ //15 //*
*saṁ ghoṣaḥ śṛṇve'vamairamitrairjahī nveṣvaśaniṁ tapiṣṭhām /*
*vṛśchemadhastādvi rujā sahasva jahi rakṣo maghavan randhayasva //16 //*
*udvṛha rakṣaḥ sahamūlamindra vṛścha madhyaṁ pratyagraṁ śṛṇīhi /*
*ā kīvataḥ salalūkaṁ chakartha brahmadviṣe tapuṣiṁ hetimasya //17 //*

*svastaye vājibhiścha praṇetaḥ saṁ yanmahīriṣa āsatsi pūrvīḥ* ।
*rāyo vantāro bṛhataḥ syāmāsme astu bhaga indra prajāvān* ॥18॥
*ā no bhara bhagamindra dyumantaṁ ni te deṣṇasya dhīmahi prareke* ।
*ūrva iva paprathe kāmo asme tamā pṛṇa vasupate vasūnām* ॥19॥
*imaṁ kāmaṁ mandayā gobhiraśvaiśchandravatā rādhasā paprathaścha* ।
*sbaryavo matibhistubhyaṁ viprā indrāya vāhaḥ kuśikāso akran* ॥20॥
*ā no gotrā dardṛhi gopate gāḥ samasmabhyaṁ sanayo yantu vājāḥ* ।
*divakṣā asi vṛṣabha satyaśuṣmo'smabhyaṁ su maghavanbodhi godāḥ* ॥21॥
*śunaṁ huvema maghavānamindramasminbhare nṛtamaṁ vājasātau* ।
*śṛṇvantamugramūtaye samatsu ghnantaṁ vṛtrāṇi saṁjitaṁ dhanānām* ॥22॥

ऋ. (Rv.) ३.३२.१-१७

इन्द्र सोमं सोमपते पिबेमं माध्यंदिनं सवनं चारु यत्ते ।
प्रप्रुथ्या शिप्रे मघवन्नृजीषिन्विमुच्या हरी इह मादयस्व ॥१॥
गवाशिरं मन्थिनमिन्द्र शुक्रं पिबा सोमं ररिमा ते मदाय ।
ब्रह्मकृता मारुतेना गणेन सजोषा रुद्रैस्तृपदा वृषस्व ॥२॥
ये ते शुष्मं ये तविषीमवर्धन्नर्चन्त इन्द्र मरुतस्त ओजः ।
माध्यंदिने सवने वज्रहस्त पिबा रुद्रेभिः सगणः सुशिप्र ॥३॥
त इन्न्वस्य मधुमद्विविप्र इन्द्रस्य शर्धो मरुतो य आसन् ।
येभिर्वृत्रस्येषितो विवेदामर्मणो मन्यमानस्य मर्म ॥४॥
मनुष्वदिन्द्र सवनं जुषाणः पिबा सोमं शश्वते वीर्याय ।
स आ ववृत्स्व हर्यश्व यज्ञैः सरण्युभिरपो अर्णा सिसर्षि ॥५॥
त्वमपो यद्ध वृत्रं जघन्वाँ अत्याँ इव प्रासजः सर्तवाजौ ।
शयानमिन्द्र चरता वधेन वव्रिवांसं परि देवीरदेवम् ॥६॥
यजाम इन्नमसा वृद्धमिन्द्रं बृहन्तमृष्वमजरं युवानम् ।
यस्य प्रिये ममतुर्यज्ञियस्य न रोदसी महिमानं ममाते ॥७॥
इन्द्रस्य कर्म सुकृता पुरूणि व्रतानि देवा न मिनन्ति विश्वे ।
दाधार यः पृथिवीं द्यामुतेमां जजान सूर्यमुषसं सुदंसाः ॥८॥
अद्रोघ सत्यं तव तन्महित्वं सद्यो यज्जातो अपिबो ह सोमम् ।
न द्याव इन्द्र तवसस्त ओजो नाहा न मासाः शरदो वरन्त ॥९॥
त्वं सद्यो अपिवो जात इन्द्र मदाय सोमं परमे व्योमन् ।
यद्ध द्यावापृथिवी आविवेशीरथाभवः पूर्व्यः कारुधायाः ॥१०॥
अहन्नहिं परिशयानमर्ण ओजायमानं तुविजात तव्यान् ।
न ते महित्वमनु भूदध द्यौर्यदन्यया स्फिग्या३ क्षामवस्थाः ॥११॥
यज्ञो हि त इन्द्र वर्धनो भूदुत प्रियः सुतसोमो मियेधः ।
यज्ञेन यज्ञमव यज्ञियः सन्यज्ञस्ते वज्रमहिहत्य आवत् ॥१२॥
यज्ञेनेन्द्रमवसा चक्रे अर्वागैनं सुम्नाय नव्यसे ववृत्याम् ।
यः स्तोमेभिर्वावृधे पूर्व्येभिर्यो मध्यमेभिरुत नूतनेभिः ॥१३॥
विवेष यन्मा धिषणा जजान स्तवै पुरा पार्यादिन्द्रमह्नः ।
अंहसो यत्र पीपरद्यथा नो नावेव यान्तमुभये हवन्ते ॥१४॥
आपूर्णो अस्य कलशः स्वाहा सेक्तेव कोशं सिसिचे पिबध्यै ।
समु प्रिया आववृत्रन्मदाय प्रदक्षिणिदभि सोमास इन्द्रम् ॥१५॥
न त्वा गभीरः पुरुहूत सिन्धुर्नाद्रयः परि षन्तो वरन्त ।
इत्था सखिभ्य इषितो यदिन्द्रा दृळहं चिदरुजो गव्यमूर्वम् ॥१६॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥१७॥

*indra somaṁ somapate pibemaṁ mādhyaṁdinaṁ savanaṁ chāru yatte* ।
*prapruthyā śipre maghavannṛjīṣinvimuchyā harī iha mādayasva* ॥1॥
*gavāśiraṁ manthinamindra śukraṁ pibā somaṁ rarimā te madāya* ।
*brahmakṛtā mārutenā gaṇena sajoṣā rudraistṛpadā vṛṣasva* ॥2॥

*ye te śuṣmaṁ ye taviṣīmavardhannarchanta indra marutasta ojaḥ ।*
*mādhyaṁdine savane vajrahasta pibā rudrebhiḥ sagaṇaḥ suśipra ॥3 ॥*
*ta innvasya madhumadvivipra indrasya śardho maruto ya āsan ।*
*yebhirvṛtrasyeṣito vivedāmarmaṇo manyamānasya marma ॥4 ॥*
*manuṣvadindra savanaṁ juṣāṇaḥ pibā somaṁ śaśvate vīryāya ।*
*sa ā vavṛtsva haryaśva yajñaiḥ saraṇyubhirapo arṇā sisarṣi ॥5 ॥*
*tvamapo yaddha vṛtraṁ jaghanvām̐ atyām̐ iva prāsajaḥ sartavājau ।*
*śayānamindra charatā vadhena vavrivāṁsaṁ pari devīradevam ॥6 ॥*
*yajāma innamasā vṛddhamindraṁ bṛhantamṛṣvamajaraṁ yuvānam ।*
*yasya priye mamaturyajñiyasya na rodasī mahimānaṁ mamāte ॥7 ॥*
*indrasya karma sukṛtā purūṇi vratāni devā na minanti viśve ।*
*dādhāra yaḥ pṛthivīṁ dyāāmutemāṁ jajāna sūryamuṣasaṁ sudaṁsāḥ ॥8 ॥*
*adrogha satyaṁ tava tanmahitvaṁ sadyo yajjāto apibo ha somam ।*
*na dyāva indra tavasasta ojo nāhā na māsāḥ śarado varanta ॥9 ॥*
*tvaṁ sadyo apivo jāta indra madāya somaṁ parame vyoman ।*
*yaddha dyāvāpṛthivī āviveśīrathābhavaḥ pūrvyaḥ kārudhāyāḥ ॥10 ॥*
*ahannahi pariśayānamarṇa ojāyamānaṁ tuvijāta tavyān ।*
*na te mahitvamanu bhūdadha dyauryadanyayā sphigyā3 kṣāmavasthāḥ ॥11 ॥*
*yajño hi ta inadra vardhano bhūduta priyaḥ sutasomo miyedhaḥ ।*
*yajñena yajñamava yajñiyaḥ sanyajñaste vajramahihatya āvat ॥12 ॥*
*yajñenendramavasā chakre arvāgainaṁ sumnāya navyase vavṛtyām ।*
*yaḥ stomebhirvāvṛdhe pūrvyaibhiryo madhyamobhiruta nūtanebhiḥ ॥13 ॥*
*viveṣa yanmā dhiṣaṇā jajāna stavai purā pāryādindramahnaḥ ।*
*aṁhaso yatra pīparadyathā no nāveva yāntamubhye havante ॥14 ॥*
*āpūrṇo asya kalaśaḥ svāhā sekteva kośaṁ sisiche pibadhyai ।*
*samu priyā āvavṛtranmadāya pradakṣiṇidabhi somāsa indram ॥15 ॥*
*na tvā gabhīraḥ puruhūta sindhurnādrayaḥ pari ṣanto varanta ।*
*itthā sakhibhya iṣito yadindrā dṛḷahaṁ chidarujo gavyamūrvam ॥16 ॥*
*śunaṁ huvema maghavānamindramasminbhare nṛtamaṁ vājasātau ।*
*śṛṇvantamugramūtaye samatsu ghnantaṁ vṛtrāṇi saṁjitaṁ dhanānām ॥17 ॥*

ऋ. (Rv.) ३.३४.१-११

इन्द्रः पूर्भिदातिरद्दासमर्कैर्विदद्वसुर्दयमानो वि शत्रून् ।
ब्रह्मजूतस्तन्वा वावृधानो भूरिदात्र आपृणद्रोदसी उभे ॥१॥
मखस्य ते तविषस्य प्र जूतिमियर्मि वाचममृताय भूषन् ।
इन्द्र क्षितीनामसि मानुषीणां विशां दैवीनामुत पूर्वयावा ॥२॥
इन्द्रो वृत्रमवृणोच्छर्धनीतिः प्र मायिनाममिनाद्वर्पणीतिः ।
अहन्व्यंसमुशधग्वनेष्वाविर्धेना अकृणोद्राम्याणाम् ॥३॥
इन्द्रः स्वर्षा जनयन्नहानि जिगायोशिग्भिः पृतना अभिष्टिः ।
प्रारोचयन्मनवे केतुमह्नामविन्दज्ज्योतिर्बृहते रणाय ॥४॥
इन्द्रस्तुजो बर्हणा आ विवेश नृवद्दधानो नर्या पुरूणि ।
अचेतयद्धिय इमा जरित्रे प्रेमं वर्णमतिरच्छुक्रमासाम् ॥५॥
महो महानि पनयन्त्यस्येन्द्रस्य कर्म सुकृता पुरूणि ।
वृजनेन वृजिनान्त्सं पिपेष मायाभिर्दस्यूँरभिभूत्योजाः ॥६॥
युधेन्द्रो मह्ना वरिवश्चकार देवेभ्यः सत्पतिश्चर्षणिप्राः ।
विवस्वतः सदने अस्य तानि विप्रा उक्थेभिः कवयो गृणन्ति ॥७॥
सत्रासाहं वरेण्यं सहोदां ससवांसं स्वरपश्च देवीः ।
ससान यः पृथिवीं द्यामुतेमामिन्द्रं मदन्त्यनु धीरणासः ॥८॥
ससानात्याँ उत सूर्यं ससानेन्द्रः ससान पुरुभोजसं गाम् ।
हिरण्ययमुत भोगं ससान हत्वी दस्यून्प्रार्यं वर्णमावत् ॥९॥
इन्द्र ओषधीरसनोदहानि वनस्पतीँरसनोदन्तरिक्षम् ।
बिभेद वलं नुनुदे विवाचोऽथाभवद्दमिताभिक्रतूनाम् ॥१०॥

शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
श्रृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥११॥
*indraḥ pūrbhidātiraddāsamarkairvidadvasurdayamāno vi śatrūn /*
*brahmajūtastanvā vāvṛdhāno bhūridātra āpṛṇadrodasī ubhe //1 //*
*makhasya te taviṣasya pra jūtimiyarmi vāchamamṛtāya bhūṣan /*
*indra kṣitīnāmasi mānuṣīṇāṁ viśāṁ daivīnāmuta pūrvayāvā //2 //*
*indro vṛtramavṛṇochchhardhanītiḥ pra māyināmamināḍvarpaṇītiḥ /*
*ahanvyaṁsamuśadhagvaneṣvāvirdhenā akṛṇeādrāmyāṇām //3 //*
*indraḥ svarṣā janayannahāni jigāyośigbhiḥ pṛtanā abhiṣṭiḥ /*
*prārochayanmanave ketumahnāmavindajjyotirbṛhate raṇāya //4 //*
*indrastujo barhaṇā ā viveśa nṛvaddadhāno naryā purūṇi /*
*achetayaddhiya imā jaritre premaṁ varṇamatirachchhukramāsām //5 //*
*maho mahāni panayantyasyendrasya karma sukṛtā purūṇi /*
*vṛjanena vṛjināntsaṁ pipeṣa māyābhirdasyūm̐rabhibhūtyojāḥ //6 //*
*yudhendro mahnāā varivaśchakāra devebhyaḥ satpatiścharṣaṇiprāḥ /*
*vivasvataḥ sadane asya tāni viprā ukthebhiḥ kavayo gṛṇanti //7 //*
*satrāsāhaṁ vareṇyaṁ sahodāṁ sasavāṁsaṁ svarapaścha devīḥ /*
*sasāna yaḥ pṛthivīṁ dyāmutemāmindraṁ madantyanu dhīraṇāsaḥ //8 //*
*sasānātyām̐ uta sūryaṁ sasānendraḥ sasāna purubhojasaṁ gām /*
*hiraṇyayamuta bhogaṁ sasāna hatvī dasyūnprāryaṁ varṇamāvat //9 //*
*indra oṣadhīrasanodahāni vanaspatīm̐rasanodantarikṣam /*
*bibheda valaṁ nunude vivācho'thābhavaddamitābhikratūnām //10 //*
*śunaṁ huvema maghavānamindramasminbhare nṛtamaṁ vājasātau /*
*śṛṇvantamugramūtaye samatsu ghnantaṁ vṛtrāṇi saṁjitaṁ dhanānām //11 //*

ऋ. (Rv.) ३.३५.१-११

तिष्ठा हरी रथ आ युज्यमाना याहि वायुर्न नियुतो नो अच्छ ।
पिबास्यन्धो अभिसृष्टो अस्मे इन्द्र स्वाहा ररिमा ते मदाय ॥१॥
उपाजिरा पुरुहूताय सप्ती हरी रथस्य धूर्ष्वा युनज्मि ।
द्रवद्यथा संभृतं विश्वतश्चिदुपेमं यज्ञमा वहात इन्द्रम् ॥२॥
उपो नयस्व वृषणा तपुष्पोतेमव त्वं वृषभ स्वधावः ।
ग्रसेतामश्वा वि मुचेह शोणा दिवेदिवे सदृशीरद्धि धानाः ॥३॥
ब्रह्मणा ते ब्रह्मयुजा युनज्मि हरी सखाया सधमाद आशू ।
स्थिरं रथं सुखमिन्द्राधितिष्ठन्प्रजानन्विद्वाँ उप याहि सोमम् ॥४॥
मा ते हरी वृषणा वीतपृष्ठा नि रीरमन्यजमानासो अन्ये ।
अत्यायाहि शश्वतो वयं तेऽरं सुतेभिः कृणवाम सोमैः ॥५॥
तवायं सोमस्त्वमेह्यर्वाङ् शश्वत्तमं सुमना अस्य पाहि ।
अस्मिन्यज्ञे बर्हिष्या निषद्या दधिष्वेमं जठर इन्दुमिन्द्र ॥६॥
स्तीर्णं ते बर्हिः सुत इन्द्र सोमः कृता धाना अत्तवे ते हरिभ्याम् ।
तदोकसे पुरुषाकाय वृष्णे मरुत्वते तुभ्यं राता हवींषि ॥७॥
इमं नरः पर्वतास्तुभ्यमापः समिन्द्र गोभिर्मधुमन्तमक्रन् ।
तस्यागत्या सुमना ऋष्व पाहि प्रजानन्विद्वान्पथ्या३ अनु स्वाः ॥८॥
याँ आभजो मरुत इन्द्र सोमे ये त्वामवर्धन्नभवन्गणस्ते ।
तेभिरेतं सजोषा वावशानो३ग्नेः पिब जिह्वया सोममिन्द्र ॥९॥
इन्द्र पिब स्वधया चित्सुतस्याग्नेर्वा पाहि जिह्वया यजत्र ।
अध्वर्योर्वा प्रयतं शक्र हस्ताद्धोतुर्वा यज्ञं हविषो जुषस्व ॥१०॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
श्रृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥११॥
*tiṣṭhā harī ratha ā yujyamānā yāhi vāyurna niyuto no achchha /*
*pibāsyandho abhisṛṣṭo asme indra svāhā rarimā te madāya //1 //*
*upājirā puruhūtāya saptī harī rathasya dhūrṣvā yunajmi /*
*dravadyathā saṁbhṛtaṁ viśvataśchidupemaṁ yajñamā vahāta indram //2 //*

*upo nayasva vṛṣaṇā tapuṣpotemava tvaṁ vṛṣabha svadhāvaḥ* ।
*grasetāmaśvā vi mucheha śoṇā divedive sadṛśīraddhi dhānāḥ* ॥3॥
*brahmaṇā te brahmayujā yunajmi harī sakhāyā sadhamāda āśū* ।
*sthiraṁ rathaṁ sukhamindrādhitiṣṭhanprajānanvidvām̐ upa yāhi somam* ॥4॥
*mā te harī vṛṣaṇā vītapṛṣṭhā ni rīramanyajamānāso anye* ।
*atyāyāhi śaśvato vayaṁ te'raṁ sutebhiḥ kṛṇavāma somaiḥ* ॥5॥
*tavāyaṁ somastvamehyarvāṅ śaśvattamaṁ sumanā asya pāhi* ।
*asminyajñe barhiṣyā niṣadyā dadhiṣvemaṁ jaṭhara indumindra* ॥6॥
*stīrṇaṁ te barhiḥ suta indra somaḥ kṛtā dhānā attave te haribhyām* ।
*tadokase puruṣākāya vṛṣṇe marutvate tubhyaṁ rātā havīṁṣi* ॥7॥
*imaṁ naraḥ parvatāstubhyamāpaḥ samindra gobhirmadhumantamakran* ।
*tasyāgatyā sumanā ṛṣva pāhi prajānanvidvānpathyā3 anu svāḥ* ॥8॥
*yām̐ ābhajo maruta indra some ye tvāmavardhannabhavangaṇaste* ।
*tebhiretaṁ sajoṣā vāvaśāno3gneḥ piba jihvayā somamindra* ॥9॥
*indra piba svadhayā chitsutasyāgnervā pāhi jihvayā yajatra* ।
*adhvaryorvā prayataṁ śakra hastāddhoturvā yajñaṁ haviṣo juṣasva* ॥10॥
*śunaṁ huvema maghavānamindramasminbhare nṛtamaṁ vājasātau* ।
*śṛṇvantamugramūtaye samatsu ghnantaṁ vṛtrāṇi saṁjitaṁ dhanānām* ॥11॥

ऋ. (Rv.) ३.३६.१-११

इमामू षु प्रभृतिं सातये धाः शश्वच्छश्वदूतिभिर्यादमानः ।
सतेसुते वावृधे वर्धनेभिर्यः कर्मभिर्महाद्भिः सुश्रुतो भूत् ॥१॥
इन्द्राय सोमाः प्रदिवो विदाना ऋभुर्येभिर्वृषपर्वा विहायाः ।
प्रयम्यमानान्प्रति षू गृभायेन्द्र पिब वृषधूतस्य वृष्णः ॥२॥
पिबा वर्धस्व तव घा सुतास इन्द्र सोमासः प्रथमा उत्तेमे ।
यथापिबः पूर्व्याँ इन्द्र सोमाँ एवा पाहि पन्यो अद्या नवीयान् ॥३॥
महाँ अमत्रो वृजने विरप्श्यु१ग्रं शवः पत्यते धृष्ण्वोजः ।
नाह विव्याच पृथिवी चनैनं यत्सोमासो हर्यश्वममन्दन् ॥४॥
महाँ उग्रो वाजदा अस्य गावः प्र जायन्ते दक्षिणा अस्य पूर्वीः ॥५॥
प्र यत्सिन्धवः प्रसवं यथायन्नापः समुद्रं रथ्येव जग्मुः ।
अतश्चिदिन्द्रः सदसो वीरयान्यदीं सोमः पृणति दुग्धो अंशुः ॥६॥
समुद्रेण सिन्धवो यादमाना इन्द्राय सोमं सुषुतं भरन्तः ।
अंशुं दुहन्ति हस्तिनो भरित्रैर्मध्वः पुनन्ति धारया पवित्रैः ॥७॥
ह्रदा इव कुक्षयः सोमधानाः समी विव्याच सवना पुरूणि ।
अन्नायदिन्द्रः प्रथमा व्याश वृत्रं जघन्वाँ अवृणीत सोमम् ॥८॥
आ तू भर माकिरेतत्परि ष्ठाद्विद्मा हि त्वा वसुपतिं वसूनाम् ।
इन्द्र यत्ते माहिनं दत्रमस्त्यस्मभ्यं तद्धर्यश्व प्र यन्धि ॥९॥
अस्मे प्र यन्धि मघवन्नृजीषिन्निन्द्र रायो विश्ववारस्य भूरेः ।
अस्मे शतं शरदो जीवसे धा अस्मे वीरांछश्वत इन्द्र शिप्रिन् ॥१०॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
श्रृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥११॥

*imāmū ṣu prabhṛtiṁ sātaye dhāḥ śaśvachchhaśvadūtibhiryādamānaḥ* ।
*satesute vāvṛdhe vardhanebhiryaḥ karmabhirmahādbhiḥ suśruto bhūt* ॥1॥
*indrāya somāḥ pradivo vidānā ṛbhuryebhirvṛṣaparvā vihāyāḥ* ।
*prayamyamānānprati ṣū gṛbhāyendra piba vṛṣadhūtasya vṛṣṇaḥ* ॥2॥
*pibā vardhasva tava ghā sutāsa indra somāsaḥ prathamā utteme* ।
*yathāpibaḥ pūvyam̐ār indra somām̐ evā pāhi panyo adyā navīyān* ॥3॥
*mahām̐ amatro vṛjane virapśyu1graṁ śavaḥ patyate dhṛṣṇvojaḥ* ।
*nāha vivyācha pṛthivī chanainaṁ yatsomāso haryaśvamamandan* ॥4॥
*mahām̐ ugro vājadā asya gāvaḥ pra jāyante dakṣiṇā asya pūrvīḥ* ॥5॥
*pra yatsindhavaḥ prasavaṁ yathāyannāpaḥ samudraṁ rathyeva jagmuḥ* ।
*ataśchidindraḥ sadaso vīrayānyadīṁ somaḥ pṛṇati dugdho aṁśuḥ* ॥6॥

*samudreṇa sindhavo yādamānā indrāya somaṁ suṣutaṁ bharantaḥ* ।
*aṁśuṁ duhanti hastino bharitrairmadhvaḥ punanti dhārayā pavitraiḥ* ॥7॥
*hradā iva kukṣayaḥ somadhānāḥ samī vivyācha savanā purūṇi* ।
*annāyadindraḥ prathamā vyāśa vṛtraṁ jaghanvām̐ avṛṇīta somam* ॥8॥
*ā tū bhara mākiretatpari ṣṭhādvidyadmā hi tvā vasupatiṁ vasūnām* ।
*indra yatte māhinaṁ datramastyasmabhyaṁ taddharyaśva pra yantidha* ॥9॥
*asme pra yandhi maghavannṛjīṣinnindra rāyo viśvavārasya bhūreḥ* ।
*asme śataṁ śarado jīvase dhā asme vīrāṁchhaśvata indra śiprin* ॥10॥
*śunaṁ huvema maghavānamindramasminbhare nṛtamaṁ vājasātau* ।
*śṛṇvantamugramūtaye samatsu ghnantaṁ vṛtrāṇi saṁjitaṁ dhanānām* ॥11॥

ऋ. (Rv.) ३.३७.१-११

वार्त्रहत्याय शवसे पृतनाषाह्याय च। इन्द्र त्वा वर्तयामसि ॥१॥
अर्वाचीनं सु ते मन उत चक्षुः शतक्रतो। इन्द्र कृण्वन्तु वाघतः ॥२॥
नामानि ते शतक्रतो विश्वाभिर्गीर्भिरीमहे। इन्द्राभिमातिषाह्ये ॥३॥
पुरुष्टुतस्य धामभिः शतेन महयामसि। इन्द्रस्य चर्षणीधृतः ॥४॥
इन्द्रं वृत्राय हन्तवे पुरुहूतमुप ब्रुवे। भरेषु वाजसातये ॥५॥
वाजेषु सासहिर्भव त्वामीमहे शतक्रतो। इन्द्र वृत्राय हन्तवे ॥६॥
द्युम्नेषु पृतनाज्ये पृतसुतू र्षु श्रवः सु च। इन्द्र साक्ष्वाभिमातिषु ॥७॥
शुष्मिन्तमं न ऊतये द्युम्निनं पाहि जागृविम्। इन्द्र सोमं शतक्रतो ॥८॥
इन्द्रियाणि शतक्रतो या ते जनेषु पंचसु। इन्द्र तानि त आ वृणे ॥९॥
अगन्निन्द्र श्रवो बृहद् द्युम्नं दधिष्व दुष्टरम्। उत्ते शुष्मं तिरामसि ॥१०॥
अर्वावतो न आ गह्यथो शक्र परावतः। उ लोको यस्ते अद्रिव इन्द्रेह तत आ गहि ॥११॥
*vārtrahatyāya śavase pṛtanāṣāhyāya cha* । *indra tvā vartayāmasi* ॥1॥
*arvāchīnaṁ su te mana uta chakṣuḥ śatakrato* । *indra kṛṇvantu vāghataḥ* ॥2॥
*nāmāni te śatakrato viśvābhirgīrbhirīmahe* । *indrābhimātiṣāhye* ॥3॥
*puruṣṭutasya dhāmabhiḥ śatena mahayāmasi* । *indrasya charṣaṇīdhṛtaḥ* ॥4॥
*indraṁ vṛtrāya hantave puruhūtamupa bruve* । *bhareṣu vājasātaye* ॥5॥
*vājeṣu sāsahirbhava tvāmīmahe śatakrato* । *indra vṛtrāya hantave* ॥6॥
*dyumneṣu pṛtanājye pṛtasutū rṣu śravaḥ su cha* । *indra sākṣavābhimātiṣu* ॥7॥
*śuṣmintamaṁ na ūtaye dyumninaṁ pāhi jāgṛvim* । *indra somaṁ śatakrato* ॥8॥
*indriyāṇi śatakrato yā te janeṣu paṁchasu* । *indra tāni ta ā vṛṇe* ॥9॥
*agannindra śravo bṛhad dyumnaṁ dadhiṣva duṣṭaram* । *utte śuṣmaṁ tirāmasi* ॥10॥
*arvāvato na ā gahyatho śakra parāvataḥ* । *u loko yaste adriva indreha tata ā gahi* ॥11॥

ऋ. (Rv.) ३.३९.१-९

इन्द्र मतिर्हृद आ वच्यमानाच्छा पतिं स्तोमतष्टा जिगाति ।
या जागृविर्विदथे शस्यमानेन्द्र यत्ते जायते विद्धि तस्य ॥१॥
दिविश्चिदा पूर्व्या जायमाना वि जागृविर्विदथे शस्यमाना ।
भद्रा वस्त्राण्यर्जुना वसाना सेयमस्मे सनजा पित्र्या धीः ॥२॥
यमा चिदत्र यमसूरसूत जिह्वाया अग्रं पतदा ह्यस्थात् ।
वपूंषि जाता मिथुना सचेते तमोहना तपुषो बुध्न एता ॥३॥
नकिरेषां निन्दिता मर्त्येषु ये अस्माकं पितरो गोषु योधाः ।
इन्द्र एषां दंहिता माहिनावानुद्गोत्राणि ससृजे दंसनावान् ॥४॥
सखा ह यत्र सखिभिर्नवग्वैरभिज्ञ्वा सत्वभिर्गा अनुग्मन् ।
सत्यं तदिन्द्रो दशभिर्दशग्वैः सूर्यं विवेद तमसि क्षियन्तम् ॥५॥
इन्द्रो मधु सम्भृतमुस्त्रियायां पद्वद्विवेद शफवन्नमे गोः ।
गुहा हितं गुह्यं गूळ्हमप्सु हस्ते दधे दक्षिणे दक्षिणावान् ॥६॥
ज्योतिर्वृणीत तमसो विजानन्नारे स्याम दुरितादभीके ।
इमा गिरः सोमपाः सोमवृद्ध जुषस्वेन्द्र पुरुतमस्य कारोः ॥७॥
ज्योतिर्यज्ञाय रोदसी अनु ष्यादारे स्याम दुरितस्य भूरेः ।
भूरि चिद्धि तुजतो मर्त्यस्य सुपारासो वसवो बर्हणावत् ॥८॥

शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
श्रृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥९॥
*indra matirhṛda ā vachyamānāchchhā patiṁ stomataṣṭā jigāti /*
*yā jāgṛvirvidathe śasyamānendra yatte jāyate viddhi tasya //1 //*
*diviśchidā pūrvyā jāyamānā vi jāgṛvirvidathe śasyamānā /*
*bhadrā vastrāṇyarjunā vasānā seyamasme sanajā pitrayā dhīḥ //2 //*
*yamā chidatra yamasūrasūta jihvāyā agraṁ patadā hyasthāt /*
*vapūṁṣi jātā mithunā sachete tamohanā tapuṣo budhna etā //3 //*
*nakireṣāṁ ninditā martyeṣu ye asmākaṁ pitaro goṣu yodhāḥ /*
*indra eṣāṁ dṛṁhitā māhināvānudgotrāṇi sasṛje daṁsanāvān //4 //*
*sakhā ha yatra sakhibhirnavagvairabhijñavā satvabhirgā anugman /*
*satyaṁ tadindro daśabhirdaśagvaiḥ sūryaṁ viveda tamasi kṣiyantam //5 //*
*indro madhu sambhṛtamusriyāyāṁ padvadviveda śaphavanname goḥ /*
*guhā hitaṁ guhyaṁ gūḻhamapsu haste dadhe dakṣiṇe dakṣiṇāvān //6 //*
*jyotirvṛṇīta tamaso vijānannāre syāma duritādabhīke /*
*imā giraḥ somapāḥ somavṛddha juṣasvendra purutamasya kāroḥ //7 //*
*jyotiryajñāya rodasī anu ṣyādāre syāma duritasya bhūreḥ /*
*bhūri chiddhi tujato martyasya supārāso vasavo barhaṇāvat //8 //*
*śunaṁ huvema maghavānamindramasminbhare nṛtamaṁ vājasātau /*
*śṛṇvantamugramūtaye samatsu ghnantaṁ vṛtrāṇi saṁjitaṁ dhanānām //9 //*

ऋ. (Rv.) ३.४०.१-९

इन्द्र त्वा वृषभं वयं सुते सोमे हवामहे। स पाहि मध्वो अन्धसः ॥१॥
इन्द्र क्रतुविदं सुतं सोमं हर्य पुरुष्टुत। पिबा वृषस्व तातृपिम् ॥२॥
इन्द्र प्र णे धितावानं यज्ञं विश्वेभिर्देवेभिः। तिर स्तवान विश्पते ॥३॥
इन्द्र सोमाः सुता इमे तव प्र यन्ति सत्पते। क्षयं चन्द्रास इन्दवः ॥४॥
दधिष्वा जठरे सुतं सोममिन्द्र वरेण्यम्। तव द्युक्षास इन्दवः ॥५॥
गिर्वणः पाहि नः सुतं मधोर्धराभिरज्यसे। इन्द्र त्वादातमिद्यशः ॥६॥
अभि द्युम्नानि वनिन इन्द्रं सचन्ते अक्षिता। पीत्वी सोमस्य वावृधे ॥७॥
अर्वावतो न आ गहि परावतश्च वृत्रहन। इमा जुषस्व नो गिरः ॥८॥
यदन्तरा परावतमर्वावतं च हूयसे। इन्द्रेह तत आ गहि ॥९॥
*indra tvā vṛṣabhaṁ vayaṁ sute some havāmahe / sa pāhi madhvo andhasaḥ //1 //*
*indra kratuvidaṁ sutaṁ somaṁ harya puruṣṭuta / pibā vṛṣasva tātṛpim //2 //*
*indra pra ṇe dhitāvānaṁ yajñaṁ viśvebhirdevebhiḥ / tira stavāna viśpate //3 //*
*indra somāḥ sutā ime tava pra yanti satpate / kṣayaṁ chandrāsa indravaḥ //4 //*
*dadhiṣvā jaṭhare sutaṁ somamindra vareṇyam / tava dyukṣāsa indavaḥ //5 //*
*girvaṇaḥ pāhi naḥ sutaṁ madhordharābhirajyase / indra tvādātamidyaśaḥ //6 //*
*abhi dyumnāni vanina indraṁ sachante akṣitā / pītvī somasya vāvṛdhe //7 //*
*arvāvato na ā gahi parāvataścha vṛtrahana / imā juṣasva no giraḥ //8 //*
*yadantarā parāvatamarvāvataṁ cha hūyase / indreha tata ā gahi //9 //*

ऋ. (Rv.) ३.४१.१-९

आ तू न इन्द्र मद्र्यग्घुवानः सोमपीतये। हरिभ्यां याह्यद्रिः ॥१॥
सत्तो होता न ऋत्वियस्तिस्तिरे बर्हिरानुषक्। अयुज्रन्प्रातरद्रयः ॥२॥
इमा ब्रह्म ब्रह्मवाहः क्रियन्त आ बर्हिः सीद। वीहि शूर पुरोळाशम् ॥३॥
रारन्धि सवनेषु ण एषु स्तोमेषु वृत्रहन्। उक्थेष्विन्द्र गिर्वणः ॥४॥
मतयः सोमपामुरुं रिहन्ति शवसस्पतिम्। इन्द्रं वत्सं न मातरः ॥५॥
स मन्दस्वा ह्यन्धसो राधसे तन्वा महे। न स्तोतारं निदे करः ॥६॥
वयमिन्द्र त्वायवो हविष्मन्तो जरामहे। उत त्वमस्मयुर्वसो ॥७॥
मारे अस्मद्वि मुमुचो हरिप्रियार्वाङ् याहि। इन्द्र स्वधावो मत्स्वेह ॥८॥
अर्वांचं त्वा सुखे रथे वहतामिन्द्र केशिना। घृतस्नू बर्हिरासदे ॥९॥
*ā tū na indra madryagghuvānaḥ somapītaye / haribhyāṁ yāhyadriḥ //1 //*
*satto hotā na ṛtviyastistire barhirānuṣak / ayujranprātaradrayaḥ //2 //*

*imā brahma brahmavāhaḥ kriyanta ā barhiḥ sīda । vīhi śūra puroḷāśam ॥3 ॥*
*rārandhi savaneṣu ṇa eṣu stomeṣu vṛtrahan । uktheṣvindra girvaṇaḥ ॥4 ॥*
*matayaḥ somapāmuruṁ rihanti śavasaspatim । indraṁ vatsaṁ na mātaraḥ ॥5 ॥*
*sa mandasvā hyandhaso rādhase tanvā mahe । na stotāraṁ nide karaḥ ॥6 ॥*
*vayamindra tvāyavo haviṣmanto jarāmahe । uta tvamasmayurvaso ॥7 ॥*
*māre asmadvi mumucho haripriyārvāṅ yāhi । indra svadhāvo matsveha ॥8 ॥*
*arvāṁchaṁ tvā sukhe rathe vahatāmindra keśinā । ghṛtasnū barhirāsade ॥9 ॥*

ऋ. (Rv.) ३.४२.१-९

उप नः सुतामा गहि सोममिन्द्र गवाशिरम्। हरिभ्यां यस्ते अस्मयुः ॥१॥
तमिन्द्र मदमा गहि बर्हिः ष्ठां ग्रावभिः सुतम्। कुविन्न्वस्य तृण्णवः ॥२॥
इन्द्रमित्था गिरो समाच्छागुरिषिता इतः। आवृते सोमपीतये ॥३॥
इन्द्र सोमस्य पीतये स्तोमैरिह हवामहे। उक्थेभिः कुविदागमत् ॥४॥
इन्द्र सोमाः सुता इमे तान्दधिष्व शतक्रतो। जठरे वाजिनीवसो ॥५॥
विद्मा हि त्वा धनंज्यं वाजेषु दधृषं कवे। अधा ते सुम्नमीमहे ॥६॥
इममिन्द्र गवाशिरं यवाशिरं च नः पिब। आगत्या वृषभिः सुतम् ॥७॥
तुभ्येदिन्द्र स्व ओक्ये३ सोमं चोदामि पीतये। एष रारन्तु ते हृदि ॥८।
त्वां सुतस्य पीतये प्रत्नमिन्द्र हवामहे। कुशिकासो अवस्यवः ॥९॥

*upa naḥ sutāmā gahi somamindra gavāśiram । haribhyāṁ yaste asmayuḥ ॥1 ॥*
*tamindra madamā gahi barhiḥ ṣṭhāṁ grāvabhiḥ sutam । kuvinnvasya tṛpṇavaḥ ॥2 ॥*
*indramitthā giro samāchchhāguriṣitā itaḥ । āvṛte somapītaye ॥3 ॥*
*indra somasya pītaye stomairiha havāmahe । ukthebhiḥ kuvidāgamat ॥4 ॥*
*indra somāḥ sutā ime tāndadhiṣva śatakrato । jaṭhare vājinīvaso ॥5 ॥*
*vidmā hi tvā dhanaṁjyaṁ vājeṣu dadhṛṣaṁ kave । adhā te sumnamīmahe ॥6 ॥*
*imamindra gavāśiraṁ yavāśiraṁ cha naḥ piba । āgatyā vṛṣabhiḥ sutam ॥7 ॥*
*tubhyedindra sva okye3 somaṁ chodāmi pītaye । eṣa rārantu te hṛdi ॥8 ।*
*tvāṁ sutasya pītaye pratnamindra havāmahe । kuśikāso avasyavaḥ ॥9 ॥*

ऋ. (Rv.) ३.४३.१-९

आ याह्यर्वाङुप वन्धुरेष्ठास्तवेदनु प्रदिवः सोमपेयम् ।
प्रिया सखाया वि मुचोप बर्हिस्त्वामिमे हव्यवाहो हवन्ते ॥१॥
आ याहि पूर्वीरति चर्षणीराँ अर्य आशिष उप नो हरिभ्याम् ।
इमा हि त्वा मतयः स्तोमतष्टा इन्द्र हवन्ते सख्यं जुषाणाः ॥२॥
आ नो यज्ञं नमोवृधं सजोषा इन्द्र देव हरिभिर्याहि तूयम् ।
अहं हि त्वा मतिभिर्जोहवीमि घृतप्रयाः सधमादे मधूनाम् ॥३॥
आ च त्वामेता वृषणा वहातो हरी सखाया सुधुरा स्वंगा ।
धानावदिन्द्रः सवनं जुषाणः सखा सख्युः श्रृणवद्वन्दनानि ॥४॥
कुविन्म गोपां करसे जनस्य कुविद्राजानं मघवन्नृजीषिन् ।
कुविन्म ऋषिं पपिवांसं सुतस्य कुविन्मे वस्वो अमृतस्य शिक्षाः ॥५॥
आ त्वा बृहन्तो हरयो युजाना अर्वागिन्द्र सधमादो वहन्तु ।
प्र ये द्विता दिव ऋञ्जन्त्याताः सुसंमृष्टासो वृषभस्य मूराः ॥६॥
इन्द्र पिब वृषधूतस्य वृष्ण आ यं ते श्येन उशते जभार ।
यस्य मदे च्यावयसि प्र कृष्टीर्यस्य मदे अप गोत्रा ववर्थ ॥७॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
श्रृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि धनानाम् ॥८॥

*ā yāhyarvāṅupa vanndhureṣṭhāstavedanu pradivaḥ somapeyam ।*
*priyā sakhāyā vi muchopa barhistvāmime havyavāho havante ॥1 ॥*
*ā yāhi pūrvīrati charṣaṇīrām̐ arya āśiṣa upa no haribhyām ।*
*imā hi tvā matayaḥ stomataṣṭā indra havante sakhyaṁ juṣāṇāḥ ॥2 ॥*
*ā no yajñaṁ namovṛdhaṁ sajoṣā indra deva haribhiryāhi tūyam ।*
*ahaṁ hi tvā matibhirjohavīmi ghṛtaprayāḥ sadhamāde madhūnām ॥3 ॥*
*ā cha tvāmetā vṛṣaṇā vahāto harī sakhāyā sudhurā svaṁgā ।*

*dhānāvadindraḥ savanaṁ juṣāṇaḥ sakhā sakhyuḥ śṛṇavadvandanāni ॥4॥*
*kuvinma gopāṁ karase janasya kuvidrājānaṁ maghavannṛjīṣin ।*
*kuvinma ṛṣiṁ papivāṁsaṁ sutasya kuvinme vasvo amṛtasya śikṣāḥ ॥5॥*
*ā tvā bṛhanto harayo yujānā arvāgindra sadhamādo vahantu ।*
*pra ye dvitā diva ṛñjantyātāḥ susaṁmṛṣṭāso vṛṣabhasya mūrāḥ ॥6॥*
*indra piba vṛṣadhūtasya vṛṣṇa ā yaṁ te śyena uśate jabhāra ।*
*yasya made chyāvayasi pra kuṣṭīryasya made apa gotrā vavartha ॥7॥*
*śunaṁ huvema maghavānamindramasminbhare nṛtamaṁ vājasātau ।*
*śṛṇvantamugramūtaye samatsu ghnantaṁ vṛtrāṇi dhanānām ॥8॥*

ऋ. (Rv.) ३.४४.१-५

अयं ते अस्तु हर्यतः सोम आ हरिभिः सुतः ।
जुषाण इन्द्र हरिभिर्न आ गह्या तिष्ठ हरितं रथम् ॥१॥
हर्यन्नुषसमर्चयः सूर्यं हर्यन्नरोचयः ।
विद्वांश्चिकित्वान्हर्यश्व वर्धस इन्द्र विश्वा अभि श्रियः ॥२॥
द्यामिन्द्रो हरिधायसं पृथिवीं हरिवर्पसम् ।
अधारयद्धरितोर्भूरि भोजनं ययोरन्तर्हरिश्चरत् ॥३॥
जज्ञानो हरितो वृषा विश्वमा भाति रोचनम् ।
हर्यश्वो हरितं धत्त आयुधमा वज्रं बाह्वोर्हरिम् ॥४॥
इन्द्रो हर्यन्तमर्जुनं वज्रं शुक्रैरभीवृतम् ।
अपावृणोद्धरिभिरद्रिभिः सुतमुद्गा हरिभिराजत ॥५॥
*ayaṁ te astu haryataḥ soma ā haribhiḥ sutaḥ ।*
*juṣāṇa indra haribhirna ā gahyā tiṣṭha haritaṁ ratham ॥1॥*
*haryannuṣasamarchayaḥ sūryaṁ haryannarochayaḥ ।*
*vidvāṁśchikitvānharyaśva vardhasa indra viśvā abhi śriyaḥ ॥2॥*
*dyāmindro haridhāyasaṁ pṛthivīṁ harivarpasam ।*
*adhārayaddharitorbhūri bhojanaṁ yayorantarhariścharat ॥3॥*
*jajñāno harito vṛṣā viśvamā bhāti rochanam ।*
*haryaśvo haritaṁ dhatta āyudhamā vajraṁ bāhvorharim ॥4॥*
*indro haryantamarjunaṁ vajraṁ śukrairabhīvṛtam ।*
*apāvṛṇoddharibhiradribhiḥ sutamudgā haribhirājata ॥5॥*

ऋ. (Rv.) ३.४५.१-५

आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः ।
मा त्वा के चिन्नि यमन्विं न पाशिनोऽति धन्वेव ताँ इहि ॥१॥
वृत्रखादो वलंरुजः पुरां दर्मो अपामजः ।
स्थाता रथस्य हर्योरभिस्वर इन्द्रो दृळहा चिदारुजः ॥२॥
गम्भीराँ उदधीँरिव क्रतुं पुष्यसि गा इव ।
प्र सुगोपा यवसं धेनवो यथा ह्रदं कुल्या इवाशत ॥३॥
आ नस्तुजं रयिं भरांशं न प्रतिजानते ।
वृक्षं पक्वं फलमंकीव धूनुहीन्द्र सम्पारणं वसु ॥४॥
स्वयुरिन्द्र स्वराळसि स्मद्दिष्टिः स्वयशस्तरः ।
स वावृधान ओजसा पुरुष्टत भवा नः सुश्रवस्तमः ॥५॥
*ā mandrairindra haribhiryāhi mayūraromabhiḥ ।*
*mā tvā ke chinni yamaniṁva na pāśino'ti dhanveva tāṁ̐ ihi ॥1॥*
*vṛtrakhādo valaṁrujaḥ purāṁ darmo apāmajaḥ ।*
*sthātā rathasya haryorabhisvara indro dṛḷahā chidārujaḥ ॥2॥*
*gambhīrāṁ̐ udadhīṁ̐riva ṛtuṁ puṣyasi gā iva ।*
*pra sugopā yavasaṁ dhenavo yathā hradaṁ kulyā ivāśata ॥3॥*
*ā nastujaṁ rayiṁ bharāṁśaṁ na pratijānate ।*
*vṛkṣaṁ pakvaṁ phalamaṁkīva dhūnuhīndra sampāraṇaṁ vasu ॥4॥*
*svayurindra svarāḷasi smaddiṣṭiḥ svayaśastaraḥ ।*
*sa vāvṛdhāna ojasā puruṣṭata bhavā naḥ suśravastamaḥ ॥5॥*

ऋ. (Rv.) ३.४६.१-५

युध्मस्य ते वृषभस्य स्वराज उग्रस्य यूनः स्थविरस्य घृष्वेः ।
अजूर्यतो वज्रिणो वर्या३णीन्द्र श्रुतस्य महतो महानि ॥१॥
महाँ असि महिष वृष्ण्येभिर्धनस्पृदुग्र सहमानो अन्यान् ।
एको विश्वस्य भुवनस्य राजा स योधया च क्षयया च जनान् ॥२॥
प्र मात्राभी रिरिचे रोचमानः प्र देवेभिर्विश्वतो अप्रतीतः ।
प्र मज्मना दिव इन्द्रः पृथिव्याः प्रोरोर्महो अन्तरिक्षादृजीषी ॥३॥
उरुं गभीरं जनुषाभ्यु१ग्रं विश्वव्यचसमवतं मतीनाम् ।
इन्द्रं सोमासः प्रदिवि सुतासः समुद्रं न स्रवत आ विशन्ति ॥४॥
यं सोममिन्द्र पृथिवीद्यावा गर्भं न माता बिभृतस्त्वाया ।
तं ते हिन्वन्ति तमु ते मृजन्त्यध्वर्यवो वृषभ पातवा उ ॥५॥

*yudhmasya te vṛṣabhasya svarāja ugrasya yūnaḥ sthavirasya ghṛṣveḥ /*
*ajūryato vajriṇo varyā3ṇīndra śrutasya mahato mahāni //1 //*
*mahāṁ̐ asi mahiṣa vṛṣṇyebhirdhanaspṛdugra sahamāno anyān /*
*eko viśvasya bhuvanasya rājā sa yodhayā cha kṣayayā cha janān //2 //*
*pra mātrābhī ririche rochamānaḥ pra devebhirviśvato apratītaḥ /*
*pra majmanā diva indraḥ pṛthivyāḥ prorormaho antarikṣādṛjīṣī //3 //*
*uruṁ gabhīraṁ januṣābhyu1graṁ viśvavyachasamavataṁ matīnām /*
*indraṁ somāsaḥ pradivi sutāsaḥ samudraṁ na sravata ā viśanti //4 //*
*yaṁ somamindra pṛthivīdyāvā garbhaṁ na mātā bibhṛtastvāyā /*
*taṁ te hinvanti tamu te mṛjantyadhvaryavo vṛṣabha pātavā u //5 //*

ऋ. (Rv.) ३.४७.१-५

मरुत्वाँ इन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय ।
आ सिंचस्व जठरे मध्व ऊर्मिं त्वं राजासि प्रदिवः सुतानाम् ॥१॥
सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् ।
जहि शत्रूँरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः ॥२॥
उत ऋतुभिऋर्तुपाः पाहि सोममिन्द्र देवेभिः सखिभिः सुतं नः ।
याँ आभजो मरुतो ये त्वान्वहन्वृत्रमदधुस्तुभ्यमोजः ॥३॥
ये त्वाहिहत्ये मघवन्नवर्धन्ये शाम्बरे हरिवो ये गविष्टौ ।
ये त्वा नूनमनुमदन्ति विप्राः पिबेन्द्र सोमं सगणो मरुद्भिः ॥४॥
मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यं शासमिन्द्रम् ।
विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम ॥५॥

*marutvāṁ̐ indra vṛṣabho raṇāya pibā somamanuṣvadhaṁ madāya /*
*ā siṁchasva jaṭhare madhva ūrmiṁ tvaṁ rājāsi pradivaḥ sutānām //1 //*
*sajoṣā indra sagaṇo marudbhiḥ somaṁ piba vṛtrahā śūra vidvān /*
*jahi śatrūṁ̐rapa mṛdho nudasvāthābhayaṁ kṛṇuhi viśvato naḥ //2 //*
*uta ṛtubhirṛtupāḥ pāhi somamindra devebhiḥ sakhibhiḥ sutaṁ naḥ /*
*yāṁ̐ ābhajo maruto ye tvānvahanvṛtramadadhustubhyamojaḥ //3 //*
*ye tvāhihatye maghavannavardhanye śāmbare harivo ye gaviṣṭau /*
*ye tvā nūnamanumadanti viprāḥ pibendra somaṁ sagaṇo marudbhiḥ //4 //*
*marutvantaṁ vṛṣabhaṁ vāvṛdhānamakavāriṁ divyaṁ śāsamindram /*
*viśvāsāhamavase nūtanāyeāgraṁ sahodāmiha taṁ huvema //5 //*

ऋ. (Rv.) ३.४८.१-५

सद्यो ह जातो वृषभः कनीनः प्रभर्तुमावदन्धसः सुतस्य ।
साधोः पिब प्रतिकामं यथा ते रसाशिरः प्रथमं सोम्यस्य ॥१॥
यज्जायथास्तदहरस्य कामेंशोः पीयूषमपिबो गिरिष्ठाम् ।
तं ते माता परि योषा जनित्री महः पितुर्दम् असिंचदग्रे ॥२॥
उपस्थाय मातरमन्नमैट्ट तिग्ममपश्यदभि सोममूधः ।
प्रयावयन्नचरद् गृतसो अन्यान्महानि चक्रे पुरुधप्रतीकः ॥३॥

उग्रस्तुराषाळभिभूत्योजा यथावशं तन्वं चक्र एषः ।
त्वष्टारमिन्द्रो जनुषाभिभूयामुष्या सोममपिबच्चमूषु ॥४॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रगमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥५॥
*sadyo ha jāto vṛṣabhaḥ kanīnaḥ prabhartumāvadandhasaḥ sutasya /*
*sādhoḥ piba pratikāmaṁ yathā te rasāśiraḥ prathamaṁ somyasya //1 //*
*yajjāyathāstadaharasya kāmeṁśoḥ pīyūṣamapibo giriṣṭhām /*
*taṁ te mātā pari yoṣā janitrā mahaḥ pirtudam asiṁchadagre //2 //*
*upasthāya mātaramannamaiṭṭa tigmamapaśyadabhi somamūdhaḥ /*
*prayāvayannacharad gṛtaso anyānmahāni chakre purudhapratīkaḥ //3 //*
*ugrasturāṣāḷabhibhūtyojā yathāvaśaṁ tanvaṁ chakra eṣaḥ /*
*tvaṣṭāramindro januṣābhibhūyāmuṣyā somamapibachchamūṣu //4 //*
*śunaṁ huvema maghavānamindramasminbhare nṛtamaṁ vājasātau /*
*śṛṇvantamugragamūtaye samatsu ghnantaṁ vṛtrāṇi saṁjitaṁ dhanānām //5 //*

ऋ. (Rv.) ३.४९.१-५

शंसा महामिन्द्रं यस्मिन्विश्वा आ कृष्टयः सोमपाः काममव्यन् ।
यं सुक्रतुं धिषणे विभ्वतष्टं घनं वृत्राणां जनयन्त देवाः ॥१॥
यं नु नकिः पृतनासु स्वराजं द्विता तरति नृतमं हरिष्ठाम् ।
इनतमः सत्वभिर्यो ह शूषैः पृथुज्रया अमिनादायुर्दस्योः ॥२॥
सहावा पृत्सु तरणिर्नार्वा व्यानशी रोदसी मेहनावान् ।
भगो न कारे हवयो मतीनां पितेव चारुः सुहवो वयोधाः ॥३॥
धर्ता दिवो रजसस्पृष्ट ऊर्ध्वो रथो न वायुर्वसुभिर्नियुत्वान् ।
क्षपां वस्ता जनिता सूर्यस्य विभक्ता भागं धिषणेव वाजम् ॥४॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥५॥
*śaṁsā mahāmindraṁ yasminviśvā ā kṛṣṭayaḥ somapāḥ kāmamavyan /*
*yaṁ sukratuṁ dhiṣaṇe vibhvataṣṭaṁ ghanaṁ vṛtrāṇāṁ janayanta devāḥ //1 //*
*yaṁ nu nakiḥ pṛtanāsu svarājaṁ dvitā tarati nṛtamaṁ hariṣṭhām /*
*inatamaḥ satvabhiryo ha śūṣaiḥ pṛthujrayā amināḍāyurdasyoḥ //2 //*
*sahāvā pṛtsu taraṇirnārvā vyānaśī rodasī mehanāvān /*
*bhago na kāre havayo matīnāṁ piteva chāruḥ suhavo vayodhāḥ //3 //*
*dhartā divo rajasaspṛṣṭa ūrdhvo ratho na vāyurvasubhirniyutvān /*
*kṣapāṁ vastā janitā sūryasya vibhaktā bhāgaṁ dhiṣaṇeva vājam //4 //*
*śunaṁ huvema maghavānamindramasminbhare nṛtamaṁ vājasātau /*
*śṛṇvantamugramūtaye samatsu ghnantaṁ vṛtrāṇi saṁjitaṁ dhanānām //5 //*

ऋ. (Rv.) ३.५०.१-५

इन्द्रः स्वाहा पिबतु यस्य सोम आगत्या तुम्रो वृषभो मरुत्वान् ।
ओरुव्यचाः पृणतामेभिरन्नैरास्य हविस्तन्वः१ काममृध्याः॥ ॥१॥
आ ते सपर्यू जवसे युनज्मि ययोरनु प्रदिवः श्रुष्टिमावः ।
इह त्वा धेयुर्हरयः सुशिप्र पिबा त्व१स्य सुषुतस्य चारोः ॥२॥
गोभिर्मिमिक्षु दधिरे सुपारमिन्द्रं ज्यैष्ठ्याय धायसे गृणानाः ।
मन्दानः सोमं पपिवाँ ऋजीषिन्त्समस्मभ्यं पुरुधा गा इषण्य ॥३॥
इमं कामं मन्दया गोभिरश्वैश्चन्द्रवता राधसा पप्रथश्च ।
स्वर्यवो मतिभिस्तुभ्यं विप्रा इन्द्राय वाहः कुशिकासो अक्रन् ॥४॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥५॥
*indraḥ svāhā pibatu yasya soma āgatyā tumro vṛṣabho marutvān /*
*oruvyachāḥ pṛṇatāmebhirannairāsya havistanvaḥ1 kāmamṛdhyāḥ // //1 //*
*ā te saparyū javase yunajmi yayoranu pradivaḥ śruṣṭimāvaḥ /*
*iha tvā dheyurharayaḥ suśipra pibā tva1sya suṣutasya chāroḥ //2 //*

*gobhirmimikṣu dadhire supāramindraṁ jyaiṣṭhyāya dhāyase gṛṇānāḥ* *।*
*mandānaḥ somaṁ papivāṁ ṛjīṣintsamasmabhyaṁ purudhā gā iṣaṇya* *।।3 ।।*
*imaṁ kāmaṁ mandayā gobhiraśvaiśchandravatā rādhasā paprathaścha* *।*
*svaryavo matibhistubhyaṁ viprā indrāya vāhaḥ kuśikāso akran* *।।4 ।।*
*śunaṁ huvema maghavānamindramasminbhare nṛtamaṁ vājasātau* *।*
*śṛṇvantamugramūtaye samatsu ghnantaṁ vṛtrāṇi saṁjitaṁ dhanānām* *।।5 ।।*

ऋ. (Rv.) ३.५१.१-१२

चर्षणीधृतं मघवानमुक्थ्य१मिन्द्रं गिरो बृहतीरभ्यनूषत ।
वावृधानं पुरुहूतं सुवृक्तिभिरमर्त्यं जरमाणं दिवेदिवे ॥१॥
शतक्रतुमर्णवं शाकिनं नरं गिरो म इन्द्रमुप यन्ति विश्वतः ।
वाजसनिं पूर्भिदं तूर्णिमप्तुरं धामसाचमभिषाचं स्वर्विदम् ॥२॥
आकरे वसोर्जरिता पनस्यतेऽनेहसः स्तुभ इन्द्रो दुवस्यति ।
विवस्वतः सदन आ हि पिप्रिये सत्रासाहमभिमातिहनं स्तुहि ॥३॥
नृणामु त्वा नृतमं गीर्भिरुक्थैरभि प्र वीरमर्चता सबाधः ।
सं सहसे पुरुमायो जिहीते नमो अस्य प्रदिव एक ईशे ॥४॥
पूर्वीरस्य निष्षिधो मर्त्येषु पुरू वसूनि पृथिवी बिभर्ति ।
इन्द्राय द्याव ओषधीरुतापो रयिं रक्षन्ति जीरयो वनानि ॥५॥
तुभ्यं ब्रह्माणि गिर इन्द्र तुभ्यं सत्रा दधिरे हरिवो जुषस्व ।
बोध्या३पिरवसो नूतनस्य सखे वसो जरितृभ्यो वयो धाः ॥६॥
इन्द्र मरुत्व इह पाहि सोमं यथा शार्याते अपिबः सुतस्य ।
तव प्रणीती तव शूर शर्मन्ना विवासन्ति कवयः सुयज्ञाः ॥७॥
स वावशान इह पाहि सोमं मरुद्भिरिन्द्र सखिभिः सुतं नः ।
जातं यत्त्वा परि देवा अभूषन्महे भराय पुरुहूत विश्वे ॥८॥
अप्तूर्ये मरुत आपिरेषोऽमन्दन्निन्द्रमनु दातिवाराः ।
तेभिः साकं पिबतु वृत्रखादः सुतं सोमं दाशुषः स्वे सधस्थे ॥९॥
इदं ह्यन्वोजसा सुतं राधानां पते। पिबा त्व१स्य गिर्वणः ॥१०॥
यस्ते अनु स्वधामसत्सुते नि यच्छ तन्वम्। स त्वा ममत्तु सोम्यम्॥११॥
प्र ते अश्नोतु कुक्ष्योः प्रेन्द्र ब्रह्मणा शिरः। प्र बाहू शूर राधसे ॥१२॥

*charṣaṇīdhṛtaṁ maghavānamukthya1mindraṁ giro bṛhatīrabhyanūṣata* *।*
*vāvṛdhānaṁ puruhūtaṁ suvṛktibhiramartyaṁ jaramāṇaṁ divedive* *।।1 ।।*
*śatakratumarṇavaṁ śākinaṁ naraṁ giro ma indramupa yanti viśvataḥ* *।*
*vājasani pūrbhidaṁ tūrṇimapturaṁ dhāmasāchamabhiṣāchaṁ svarvidam* *।।2 ।।*
*ākare vasorjaritā panasyate'nehasaḥ stubha indro duvasyati* *।*
*vivasvataḥ sadana ā hi pipriye satrāsāhamabhimātihanaṁ stuhi* *।।3 ।।*
*nṛṇāmu tvā nṛtamaṁ gīrbhirukthairabhi pra vīramarchatā sabādhaḥ* *।*
*saṁ sahase purumāyo jihīte namo asya pradiva eka īśe* *।।4 ।।*
*pūrvīrasya niṣṣidho martyeṣu purū vasūni pṛthivī bibharti* *।*
*indrāya dyāva oṣadhīrutāpo rayiṁ rakṣanti jīrayo vanāni* *।।5 ।।*
*tubhyaṁ brahmāṇi gira indra tubhyaṁ satrā dadhire harivo juṣasva* *।*
*bodhyā3piravaso nūtanasya sakhe vaso jaritṛbhyo vayo dhāḥ* *।।6 ।।*
*indra marutva iha pāhi somaṁ yathā śāryāte apibaḥ sutasya* *।*
*tava praṇītī tava śūra śarmannā vivāsanti kavayaḥ suyajñāḥ* *।।7 ।।*
*sa vāvaśāna iha pāhi somaṁ marudbhirindra sakhibhiḥ sutaṁ naḥ* *।*
*jātaṁ yattvā pari devā abhūṣanmahe bharāya puruhūta viśve* *।।8 ।।*
*aptūrye maruta āpireṣo'mandannindramanu dātivārāḥ* *।*
*tebhiḥ sākaṁ pibatu vṛtraravādaḥ sutaṁ somaṁ dāśuṣaḥ sve sadhasthe* *।।9 ।।*
*idaṁ hyanvojasā sutaṁ rādhānāṁ pate । pibā tva1sya girvaṇaḥ* *।।10 ।।*
*yaste anu svadhāmasatsute ni yachchha tanvam । sa tvā mamattu somyam* *।।11 ।।*
*pra te aśnotu kukṣayoḥ prendra brahmaṇā śiraḥ । pra bāhū śūra rādhase* *।।12 ।।*

ऋ. (Rv.) ३.५२.१-८

धनावन्तं करम्भिणमपूपवन्तमुक्थिनम्। इन्द्र प्रातर्जुषस्व नः ॥१॥
पुरोळाशं पचत्यं जुषस्वेन्द्रा गुरस्व च। तुभ्यं हवयानि सिस्रते ॥२॥
पुरोळाशं च नो घसो जोषयासे गिरश्चनः। वधूयुरिव योषणाम् ॥३॥
पुरोळाशं सनश्रुत प्रातःसावे जुषस्व नः। इन्द्र क्रतुर्हि ते बृहन् ॥४॥
माध्यन्दिनस्य सवनस्य धानाः पुरोळाशमिन्द्र कृष्वेह चारुम् ।
प्र यत्स्तोता जरिता तूर्ण्यर्थो वृषायमाण उप गीर्भिरीट्टे ॥५॥
तृतीये धानाः सवने पुरुष्टुत पुरोळाशमाहुतं मामहस्व नः ।
ऋभुमन्तं वाजवन्तं त्वा कवे प्रयस्वन्त उप शिक्षेम धीतिभिः ॥६॥
पूषण्वते ते चकृमा करम्भं हरिवते हर्यश्वाय धानाः ।
अपूपमद्धि सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् ॥७॥
प्रति धाना भरत तूयमस्मै पुरोळाशं वीरतमाय नृणाम् ।
दिवेदिवे सदृशीरिन्द्र तुभ्यं वर्धन्तु त्वा सोमपेयाय धृष्णो ॥८॥

*dhanāvantaṁ karambhiṇamapūpavantamukthinam । indra prātarjuṣasva naḥ ॥1॥*
*puroḷāāśaṁ pachatyaṁ juṣasvendrā gurasva cha । tubhyaṁ havayāni sisrate ॥2॥*
*puroḷāśaṁ cha no ghaso joṣayāse giraśchanaḥ । vadhūyuriva yoṣaṇām ॥3॥*
*puroḷāśaṁ sanaśruta prātaḥsāve juṣasva naḥ । indra kraturhi te bṛhan ॥4॥*
*mādhyandinasya savanasya dhānāḥ puroḷāśamindra kṛṣveha chārum ।*
*pra yatstotā jaritā tūrṇyartho vṛṣāyamāṇa upa gīrmirīṭṭe ॥5॥*
*tṛtīye dhānāḥ savane puruṣṭuta puroḷāśamāhutaṁ māmahasva naḥ ।*
*ṛbhumantaṁ vājavantaṁ tvā kave prayasvanta upa śikṣema dhītibhiḥ ॥6॥*
*pūṣaṇvate te chakṛmā karambhaṁ harivate haryaśvāya dhānāḥ ।*
*apūpamaddhi sagaṇo marudbhiḥ somaṁ piba vṛtrahā śūra vidvān ॥7॥*
*prati dhānā bharata tūyamasmai puroḷāśaṁ vīratamāya nṛṇām ।*
*divedive sadṛśīrindra tubhyaṁ vardhantu tvā somapeyāya dhṛṣṇo ॥8॥*

ऋ. (Rv.) ३.५३.२-१४

तिष्ठा सु कं मघवन्मा परा गाः सोमस्य नु त्वा सुषुतस्य यक्षि ।
पितुर्न पुत्रः सिचमा रभे त इन्द्र स्वादिष्ठया गिरा शचीवः ॥२॥
शंसावाध्वर्यो प्रति मे गृणीहीन्द्राय वाहः कृणवाव जुष्टम् ।
एदं बर्हिर्यजमानस्य सीदाथा च भूदुक्थमिन्द्राय शस्तम् ॥३॥
जायेदस्तं मघवन्त्सेदु योनिस्तदित्त्वा युक्ता हरयो वहन्तु ।
यदा कदा च सुनवाम सोममग्निष्ट्वा दूतो धन्वात्यच्छ ॥४॥
परा याहि मघवन्ना च याहीन्द्र भ्रातरुभयत्रा ते अर्थम् ।
यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो रासभस्य ॥५॥
अपाः सोममस्तमिन्द्र प्र याहि कल्याणीर्जाया सुरणं गृहे ते ।
यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणावत् ॥६॥
इमे भोजा अंगिरसो विरूपा दिवस्पुत्रासो असुरस्य वीराः ।
विश्वामित्राय ददतो मघानि सहस्रसावे प्र तिरन्त आयुः ॥७॥
रूपंरूपं मघवा बोभवीति मायाः कृण्वानस्तन्वं१ परि स्वाम् ।
त्रिर्यद्दिवः परि मुहूर्तमागात्स्वैर्मन्त्रैरनृतुपा ऋतावा ॥८॥
महाँ ऋषिर्देवजा देवजूतोऽस्तभ्नात्सिन्धुमर्णवं नृचक्षाः ।
विश्वामित्रो यदवहत्सुदासमप्रियायत कुशिकेभिरिन्द्रः ॥९॥
हंसा इव कृणुथ श्लोकमद्रिभिर्मदन्तो गीर्भिरध्वरे सुते सचा ।
देवेभिर्विप्रा ऋषयो नृचक्षसो वि पिबध्वं कुशिकाः सोम्यं मधु ॥१०॥
उप प्रेत कुशिकाश्चेतयध्वमश्वं राये प्र मुंचता सुदासः ।
राजा वृत्रं जंघनत्प्रागपागुदगथा यजाते वर आ पृथिव्याः ॥११॥
य इमे रोदसी उभे अहमिन्द्रमतुष्टवम् ।
विश्वामित्रस्य रक्षति ब्रह्मेदं भारतं जनम् ॥१२॥

विश्वामित्रा अरासत ब्रह्मेन्द्राय वज्रिणे। करदिन्नः सुराधसः ॥१३॥
किं ते कृण्वन्ति कीकटेषु गावो नाशिरं दुह्रे न तपन्ति घर्मम् ।
आ नो भर प्रमगन्दस्य वेदो नैचाशाखं मधवन्रन्धया नः ॥१४॥
*tiṣṭhā su kaṁ maghavanmā parā gāḥ somasya nu tvā suṣutasya yakṣi /*
*piturna putraḥ sichamā rabhe ta indra svādiṣṭhayā girā śachīvaḥ //2 //*
*śaṁsāvādhvaryo prati me gṛṇīhīndrāya vāhaḥ kṛṇavāva juṣṭam /*
*edaṁ barhiryajamānasya sīdāthā cha bhūdukthamindrāya śastam //3 //*
*jāyedastaṁ maghavantsedu yonistadittvā yuktā harayo vahantu /*
*yadā kadā cha sunavāma somamagniṣṭvā dūto dhanvātyachchha //4 //*
*parā yāhi maghavannā cha yāhīndra bhrātarubhayatrā te artham /*
*yatrā rathasya bṛhato nidhānaṁ vimochanaṁ vājino rāsabhasya //5 //*
*apāḥ somamastamindra pra yāhi kalyāṇīrjāyā suraṇaṁ gṛhe te /*
*yatrā rathasya bṛhato nidhānaṁ vimochanaṁ vājino dakṣiṇāvat //6 //*
*ime bhojā aṁgiraso virūpā divasputrāso asurasya vīrāḥ /*
*viśvāmitrāya dadato maghāni sahasrasāve pra tiranta āyuḥ //7 //*
*rūpaṁrūpaṁ maghavā bobhavīti māyāḥ kṛṇvānastanvaṁ1 pari svām /*
*triryaddivaḥ pari muhūrtamāgātsvairmantrairanṛtupā ṛtāvā //8 //*
*mahām̐ ṛṣirdevajā devajūto'stabhnātsindhumarṇavaṁ nṛchakṣāḥ /*
*viśvāmitro yadavahatsudāsamapriyāyata kuśikebhirindraḥ //9 //*
*haṁsā iva kṛṇutha ślokamadribhirmadanto gīrbhiradhvare sute sachā /*
*devebhirviprā ṛṣayo nṛchakṣaso vi pibadhvaṁ kuśikāḥ somyaṁ madhu //10 //*
*upa preta kuśikāśchetayadhvamaśvaṁ rāye pra muṁchatā sudāsaḥ /*
*rājā vṛtraṁ jaṁghanatprāgapāgudagathā yajāte vara ā pṛthivyāḥ //11 //*
*ya ime rodasī ubhe ahamindramatuṣṭavam /*
*viśvāmitrasya rakṣati brahmedaṁ bhārataṁ janam //12 //*
*viśvāmitrā arāsata brahmendrāya vajriṇe / karadinnaḥ surādhasaḥ //13 //*
*kiṁ te kṛṇvanti kīkaṭeṣu gāvo nāśiraṁ duhre na tapanti gharmam /*
*ā no bhara pramagandasya vedo naichāśākhaṁ madhavanrandhayā naḥ //14 //*

ऋ. (Rv.) ३.५३.२१-२४

इन्द्रोतिभिर्बहुलाभिर्नो अद्य याच्छ्रेष्ठाभिर्मघवंछूर जिन्व ।
यो नो द्वेष्ट्यधरः सस्पदीष्ट यमु द्विष्मस्तमु प्राणो जहातु ॥२१॥
परशुं चिद्वि तपति शिम्बलं चिद्वि वृश्चति ।
उखा चिदिन्द्र येषन्ती प्रयस्ता फेनमस्यति ॥२२॥
न सायकस्य चिकिते जनासो लोधं नयन्ति पशु मन्यमानाः ।
नावाजिनं वाजिना हासयन्ति न गर्दभं पुरो अश्वान्नयन्ति ॥२३॥
इम इन्द्र भरतस्य पुत्रा अपपित्वं चिकितुर्न प्रपित्वम् ।
हिन्वन्त्यश्वमरणं न नित्यं ज्यावाजं परि णयन्त्याजौ ॥२४॥
*indrotibhirbahulābhirno adya yāchchhreṣṭhābhirmaghavaṁchhūra jinva /*
*yo no dveṣṭyadharaḥ saspadīṣṭa yamu dviṣmastamu prāṇo jahātu //21 //*
*paraśuṁ chidvi tapati śimbalaṁ chidvi vṛśchati /*
*ukhā chidindra yeṣantī prayastā phenamasyati //22 //*
*na sāyakasya chikite janāso lodhaṁ nayanti paśu manyamānāḥ /*
*nāvājinaṁ vājinā hāsayanti na gardabhaṁ puro aśvānnayanti //23 //*
*ima indra bharatasya putrā apapitvaṁ chikiturna prapitvam /*
*hinvantyaśvamaraṇaṁ na nityaṁ jyāvājaṁ pari ṇayantyājau //24 //*

सा. (Sv.) १६५

इदं ह्यन्वोजसा सुतं राधानां पते। पिबा त्वा३स्य गिर्वणः ॥१॥
*idaṁ hyanvojasā sutaṁ rādhānāṁ pate / pibā tvā3sya girvaṇaḥ //1 //*

सा. (Sv.) १९५

गिर्वणः पाहि नः सुतं मधोर्धाराभिरज्यसे। इन्द्र त्वादातमिद्यशः ॥२॥
*girvaṇaḥ pāhi naḥ sutaṁ madhordhārābhirajyase / indra tvādātamidyaśaḥ //2 //*

सा. (Sv.) २१०

धानावन्तं करम्भिणमपूपवन्तमुक्थिनम्। इन्द्र प्रातर्जुषस्व नः ॥७॥
*dhānāvantaṁ karambhiṇamapūpavantamukthinam | indra prātarjuṣasva naḥ ॥7॥*

सा. (Sv.) २२६

इन्द्र उक्थेभिर्मन्दिष्ठो वाजानां च वाजपतिः। हरिवान्त्सुतानां सखा ॥४॥
*indra ukthebhirmandiṣṭho vājānāṁ cha vājapatiḥ | harivāntsutānāṁ sakhā ॥4॥*

सा. (Sv.) २४६

आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः ।
मा त्वा के चिन्नि येमुरिन्न पाशिनोऽति धन्वेव ताँ इहि ॥४॥
*ā mandrairindra haribhiryāhi mayūraromabhiḥ |*
*mā tvā ke chinni yemurinna pāśino'ti dhanveva tām̐ ihi ॥4॥*

सा. (Sv.) ३२९

शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
श्रृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि सिंजतं धनानि ॥७॥
*śunaṁ huvema maghavānamindramasminbhare nṛtamaṁ vājasātau |*
*śṛṇvantamugramūtaye samatsu ghnantaṁ vṛtrāṇi siṁjataṁ dhanāni ॥7॥*

सा. (Sv.) ३७४

चर्षणीधृतं मघवानमुक्थ्या३मिन्द्रं गिरो बृहतीरभ्यनूषत ।
वावृधानं पुरुहूतं सुवृक्तिभिरमर्त्यं जरमाणं दिवेदिवे ॥५॥
*charṣaṇīdhṛtaṁ maghavānamukthyā3mindraṁ giro bṛhatīrabhyanūṣata |*
*vāvṛdhānaṁ puruhūtaṁ suvṛktibhiramartyaṁ jaramāṇaṁ divedive ॥5॥*

सा. (Sv.) ७३७-७३९

इदं ह्यन्वोजसा सुतं राधानां पते। पिबा त्वा३स्य गिर्वणः ॥१॥
यस्ते अनु स्वधामसत्सुते नि यच्छ तन्वम्। स त्वा ममत्तु सोम्य ॥२॥
प्र ते अश्नोतु कुक्ष्योः प्रेन्द्र ब्रह्मणा शिरः। प्र बाहू शूर राधसा ॥३॥
*idaṁ hyanvojasā sutaṁ rādhānāṁ pate | pibā tvā3sya girvaṇaḥ ॥1॥*
*yaste anu svadhāmasatsute ni yachchha tanvam | sa tvā mamattu somya ॥2॥*
*pra te aśnotu kukṣayoḥ prendra brahmaṇā śiraḥ | pra bāhū śūra rādhasā ॥3॥*

सा. (Sv.) १७१८-१७२०

आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः ।
मा त्वा के चिन्नि येमुरिन्न पाशिनोऽति धन्वेव ताँ इहि ॥१॥
वृत्रखादो वलं रुजः पुरां दर्मो अपामजः ।
स्थाता रथस्य हर्योरभिस्वर इन्द्रो दृढा चिदारुजः ॥२॥
गम्भीराँ उदधीं रिव क्रतुं पुष्यसि गा इव ।
प्र सुगोपा यवसं धेनवो यथा ह्रदं कुल्या इवाशत ॥३॥
*ā mandrairindra haribhiryāhi mayūraromabhiḥ |*
*mā tvā ke chinni yemurinna pāśino'ti dhanveva tām̐ ihi ॥1॥*
*vṛtrakhādo valaṁ rujaḥ purāṁ darmo apāmajaḥ |*
*sthātā rathasya haryorabhisvara indro dṛḍhā chidārujaḥ ॥2॥*
*gambhīrām̐ udadhīṁ riva kratuṁ puṣyasi gā iva |*
*pra sugopā yavasaṁ dhenavo yathā hradaṁ kulyā ivāśata ॥3॥*

९. इन्द्रः (सार्षेदी. सास्वा.) पर्वतेन्द्रौ (ऋसर्व. ३.५.३१) (Indraḥ [Sad. Sas.] Parvatendrau [Rss. 3.5.31)) - सा. (Sv.) ३३८

इन्द्रापर्वता बृहता रथेन वामीरिष आ वहतं सुवीराः ।
वीतं हव्यान्यध्वरेषु देवा वर्धेथां गीर्भिरिडया मदन्ता ॥७॥
*indrāparvatā bṛhatā rathena vāmīriṣa ā vahataṁ suvīrāḥ |*
*vītaṁ havyānyadhvareṣu devā vardhethāṁ gīrbhiriḍayā madantā ॥7॥*

१०. इन्द्राग्नी (Indrāgnī) - ऋ. (Rv.) ३.१२.१-९; ३.२५.४; सा. (Sv.) ६६९-६७१; १५७६-१५७८

ऋ. (Rv.) ३.१२.१-९

इन्द्राग्नी आ गतं सुतं गीर्भिनसो वरेण्यम्। अस्य पातं धियेषिता ॥१॥
इन्द्राग्नी जरितुः सचा यज्ञो जिगाति चेतनः। अया पातमिमं सुतम् ॥२॥
इन्द्रमग्निं कविच्छदा यज्ञस्य जूत्या वृणे। ता सोमस्येह तृम्पताम् ॥३॥
तोशा वृत्रहणा हुवे सजित्वानापराजिता। इन्द्राग्नी वाजसातमा ॥४॥
प्र वामर्चन्त्युक्थिनो नीथाविदो जरितारः। इन्द्राग्नी इष आ वृणे ॥५॥
इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतम्। साकमेकेन कर्मणा ॥६॥
इन्द्राग्नी अपसस्पर्युप प्र यन्ति धीतयः। ऋतस्य पथ्या३ अनु ॥७॥
इन्द्राग्नी तविषाणि वां सधस्थानि प्रयांसि च। युवोरप्तूर्यं हितम् ॥८॥
इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः। तद्वां चेति प्र वीर्यम् ॥९॥

*indrāgnī ā gataṁ sutaṁ gīrbhinaso vareṇyam । asya pātaṁ dhiyeṣitā ॥1॥*
*indrāgnī jarituḥ sachā yajño jigāti chetanaḥ । ayā pātamimaṁ sutam ॥2॥*
*indramagiṁna kavichchhadā yajñasya jūtyā vṛṇe । tā somasyeha tṛmpatām ॥3॥*
*tośā vṛtrahaṇā huve sajitvānāparājitā । indrāgnī vājasātamā ॥4॥*
*pra vāmarchantyukthino nīthāvido jaritāraḥ । indrāgnī iṣa ā vṛṇe ॥5॥*
*indrāgnī navatiṁ puro dāsapatnīradhūnutam । sākamekena karmaṇā ॥6॥*
*indrāgnī apasasparyupa pra yanti dhītayaḥ । ṛtasya pathyā3 anu ॥7॥*
*indrāgnī taviṣāṇi vāṁ sadhasthāni prayāṁsi cha । yuvoraptūryaṁ hitam ॥8॥*
*indrāgnī rochanā divaḥ pari vājeṣu bhūṣathaḥ । tadvāṁ cheti pra vīryam ॥9॥*

ऋ. (Rv.) ३.२५.४

अग्न इन्द्रश्च दाशुषो दुरोणे सुतावतो यज्ञमिहोप यातम्। अमर्धन्ता सोमपेयाय देवा ॥४॥

*agna indraścha dāśuṣo duroṇe sutāvato yajñamihopa yātam ।*
*amardhantā somapeyāya devā ॥4॥*

सा. (Sv.) ६६९-६७१

इन्द्राग्नी आ गतं सुतं गीर्भिर्नभो वरेण्यम्। अस्य पातं धियेषिता ॥१॥
इन्द्राग्नी जरितुः सचा यज्ञो जिगाति चेतनः। अया पातमिमं सुतम् ॥२॥
इन्द्रमग्निं कविच्छदा यज्ञस्य जूत्या वृणे। ता सोमस्येह तृम्पताम् ॥३॥

*indrāgnī ā gataṁ sutaṁ gīrbhirnabho vareṇyam । asya pātaṁ dhiyeṣitā ॥1॥*
*indrāgnī jarituḥ sachā yajño jigāti chetanaḥ । ayā pātamimaṁ sutam ॥2॥*
*indramagniṁ kavichchhadā yajñasya jūtyā vṛṇe । tā somasyeha tṛmpatām ॥3॥*

सा. (Sv.) १५७६-१५७८

इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतम्। साकमेकेन कर्मणा ॥२॥
इन्द्राग्नी अपसस्पर्युप प्र यन्ति धीतयः। ऋतस्य पथ्या३ अनु ॥३॥
इन्द्राग्नी तविषाणि वां सधस्थानि प्रयांसि च। युवोरप्तूर्यं हितम् ॥४॥

*indrāgnī navatiṁ puro dāsapatnīradhūnutam । sākamekena karmaṇā ॥2॥*
*indrāgnī apasasparyupa pra yanti dhītayaḥ । ṛtasya pathyā3 anu ॥3॥*
*indrāgnī taviṣāṇi vāṁ sadhasthāni prayāṁsi cha । yuvoraptūryaṁ hitam ॥4॥*

११. इन्द्रापर्वतौ (Indrāparvatau) - ऋ. (Rv.) ३.५३.१

इन्द्रापर्वता बृहता रथेन वामीरिष आ वहतं सुवीराः ।
वीतं हव्यान्यध्वरेषु देवा वर्धेथा गीर्भिरिळया मदन्ता ॥१॥

*indrāparvatā bṛhatā rathena vāmīriṣa ā vahataṁ suvīrāḥ ।*
*vītaṁ havyānyadhvareṣu devā vardhethā gīrbhiriḷayā madantā ॥1॥*

१२. इन्द्रावरुणौ (Indrāvaruṇau) - ऋ. (Rv.) ३.६२.१-३

इमा उ वां भृमयो मन्यमाना युवावते न तुज्या अभूवन् ।
क्व१ त्यदिन्द्रावरुणा यशो वां येन स्मा सिनं भरथः सखिभ्यः ॥१॥
अयमु वां पुरुतमो रयीयंछश्वत्तममवसे जोहवीति ।
सजोषविन्द्रावरुणा मरुद्भिर्दिवा पृथिव्या श्रृणुतं हवं मे ॥२॥
अस्मे तदिन्द्रावरुणा वसु ष्यादस्मे रयिर्मरुतः सर्ववीरः ।

अस्मान्वरूत्रीः शरणैरवन्त्वस्मान्होत्रा भारती दक्षिणाभिः ॥३॥
*imā u vāṁ bhṛmayo manyamānā yuvāvate na tujyā abhūvan /*
*kva1 tyadindrāvaruṇā yaśo vāṁ yena smā sinaṁ bharathaḥ sakhibhyaḥ //1 //*
*ayamu vāṁ purutamo rayīyaṁchhaśvattamamavase johavīti /*
*sajoṣavindrāvaruṇā marudbhirdivā pṛthivyā śṛṇutaṁ havaṁ me //2 //*
*asme tadindrāvaruṇā vasu ṣyādasme rayirmarutaḥ sarvavīraḥ /*
*asmānvarūtrīḥ śaraṇairavantvasmānhotrā bhāratī dakṣiṇābhiḥ //3 //*

१३. उषा (Uṣā) - ऋ. (Rv.) ३.६१.१-७

उषो वाजेन वाजिनि प्रचेताः स्तोमं जुषस्व गृणतो मघोनि ।
पुराणी देवि युवतिः पुरन्धिरनु व्रतं चरसि विश्ववारे ॥१॥
उषो देवयमर्त्या वि भाहि चन्द्ररथा सूनृता ईरयन्ती ।
आ त्वा वहन्तु सुयमासो अश्वा हिरण्यवर्णा पृथुपाजसो ये ॥२॥
उषः प्रतीची भुवनानि विश्वोर्ध्वा तिष्ठस्यमृतस्य केतुः ।
समानमर्थं चरणीयमाना चक्रमिव नव्यस्या ववृत्स्व ॥३॥
अव स्यूमेव चिन्वती मघोन्युषा याति स्वसरस्य पत्नी ।
स्व१र्जनन्ती सुभगा सुदंसा आन्ताद्दिवः पप्रथ आ पृथिव्याः ॥४॥
अच्छा वो देवीमुषसं विभातीं प्र वो भरध्वं नमसा सुवृक्तिम् ।
ऊर्ध्वं मधुधा दिवि पाजो अश्रेत्प्र रोचना रुरुचे रण्वसंदृक् ॥५॥
ऋतावरी दिवो अर्कैरबोध्या रेवती रोदसी चित्रमस्थात् ।
आयतीमग्न उषसं विभातीं वाममेषि द्रविणं भिक्षमाणः ॥६॥
ऋतस्य बुध्न उषसामिषण्यन्वृषा मही रोदसी आ विवेश ।
मही मित्रस्य वरुणस्य माया चन्द्रेव भानुं वि दधे पुरुत्रा ॥७॥
*uṣo vājena vājini prachetāḥ stomaṁ juṣasva gṛṇato maghoni /*
*purāṇī devi yuvatiḥ purandhiranu vrataṁ charasi viśvavāre //1 //*
*uṣo devayamartyā vi bhāhi chandrarathā sūnṛtā īrayantī /*
*ā tvā vahantu suyamāso aśvā hiraṇyavarṇā pṛthupājaso ye //2 //*
*uṣaḥ pratīchī bhuvanāni viśvordhvā tiṣṭhasyamṛtasya ketuḥ /*
*samānamarthaṁ charaṇīyamānā chakramiva navyasyā vavṛtsva //3 //*
*ava syūmeva chinvatī maghonyuṣā yāti svasarasya patnī /*
*sva1rjanantī subhagā sudaṁsā āntāddivaḥ papratha ā pṛthivyāḥ //4 //*
*achchhā vo devīmuṣasaṁ vibhātīṁ pra vo bharadhvaṁ namasā suvṛktim /*
*ūrdhvaṁ madhudhā divi pājo aśretpra rochanā ruruche raṇvasaṁdṛk //5 //*
*ṛtāvarī divo arkairabodhyā revatī rodasī chitramasthāt /*
*āyatīmagna uṣasaṁ vibhātīṁ vāmameṣi draviṇaṁ bhikṣamāṇaḥ //6 //*
*ṛtasya budhna uṣasāmiṣaṇyanvṛṣā Mahī rodasī ā viveśa /*
*mahī mitrasya varuṇasya māyā chandreva bhānuṁ vi dadhe purutrā //7 //*

१४. ऋत्विज अग्निर् वा (Ṛtvija Agnir Vā) - ऋ. (Rv.) ३.२९.५

मन्थता नरः कविमद्वयन्तं प्रचेतसममृतं सुप्रतीकम् ।
यज्ञस्य केतुं प्रथमं पुरस्तादग्निं नरो जनयता सुशेवम् ॥५॥
*manthatā naraḥ kavimadvayantaṁ prachetasamamṛtaṁ supratīkam /*
*yajñasya ketuṁ prathamaṁ purastādagiṁna naro janayatā suśevam //5 //*

१५. ऋभवः (Ṛbhavaḥ) - ऋ. (Rv.) ३.६०.१-७

इहेह वो मनसा बन्धुता नर उशिजो जग्मुरभि तानि वेदसा ।
याभिर्मायाभिः प्रतिजूतिवर्पसः सौधन्वना यज्ञियं भागमानश ॥१॥
याभिः शचीभिश्चमसाँ अपिंशत यया धिया गामरिणीत चर्मणः ।
येन हरी मनसा निरतक्षत तेन देवत्वमृभवः समानश ॥२॥
इन्द्रस्य सख्यमृभवः समानशुर्मनोर्नपातो अपसो दधन्विरे ।
सौधन्वनासो अमृतत्वमेरिरे विष्ट्वी शमीभिः सुकृतः सुकृत्यया ॥३॥
इन्द्रेण याथ सरथं सुते सचाँ अथो वशानां भवथा सह श्रिया ।

न वः प्रतिमै सुकृतानि वाघतः सौधन्वना ऋभवो वीर्याणि च ॥४॥
इन्द्र ऋभुभिर्वाजवद्भिः समुक्षितं सुतं सोममा वृषस्वा गभस्त्योः ।
धियेषितो मघवन्दाशुषो गृहे सौधन्वनेभिः सह मत्स्वा नृभिः ॥५॥
इन्द्र ऋभुमान्वाजवान्मत्स्वेह नोऽस्मिन्त्सवने शच्या पुरुष्टुत ।
इमानि तुभ्यं स्वसराणि येमिरे व्रता देवानां मनुषश्च धर्मभिः ॥६॥
इन्द्र ऋभुभिर्वाजिभिर्वाजयन्निह स्तोमं जरितुरुप याहि यज्ञियम् ।
शतं केतेभिरिषिरेभिरायवे सहस्रणीथो अध्वरस्य होमनि ॥७॥
*iheha vo manasā bandhutā nara uśijo jagmurabhi tāni vedasā /*
*yābhirmāyābhiḥ pratijūtivarpasaḥ saudhanvanā yajñiyaṁ bhāgamānaśa //1 //*
*yābhiḥ śachībhiśchamasām̐ apiśata yayā dhiyā gāmariṇīta charmaṇaḥ /*
*yena harī manasā niratakṣata tena devatvamṛbhavaḥ samānaśa //2 //*
*indrasya sakhyamṛbhavaḥ samānaśuṁrmanornapāto apaso dadhanvire /*
*saudhanvanāso amṛtatvamerire viṣṭvī śamībhiḥ sukṛtaḥ sukṛtyayā //3 //*
*indreṇa yātha sarathaṁ sute sachām̐ atho vaśānāṁ bhavathā saha śriyā /*
*na vaḥ pratimai sukṛtāni vāghataḥ saudhanvanā ṛbhavo vīryāṇi cha //4 //*
*indra ṛbhubhirvājavadbhiḥ samukṣitaṁ sutaṁ somamā vṛṣasvā gabhastyoḥ /*
*dhiyeṣito maghavandāśuṣo gṛhe saudhanvanebhiḥ saha matsvā nṛbhiḥ //5 //*
*indra ṛbhumānvājavānmatsveha no'smintsavane śachyā puruṣṭuta /*
*imāni tubhyaṁ svasarāṇi yemire vratā devānāṁ manuṣaścha dharmabhiḥ //6 //*
*indra ṛbhubhirvājibhirvājayanniha stomaṁ jariturupa yāhi yajñiyam /*
*śataṁ ketebhiriṣirebhirāyave sahasraṇītho adhvarasya homani //7 //*

१६. नद्यः (Nadyaḥ) - ऋ. (Rv.) ३.३३.१-१३

प्र पर्वतानामुशती उपस्थादश्वे इव विषिते हासमाने ।
गावेव शुभ्रे मातरा रिहाणे विपाट्छुतुद्री पयसा जवेते ॥१॥
इन्द्रेषिते प्रसवं भिक्षमाणे अच्छा समुद्रं रथ्येव याथः ।
समाराणे ऊर्मिभिः पिन्वमाने अन्या वामन्यामप्येति शुभ्रे ॥२॥
अच्छा सिन्धुं मातृतमामयासं विपाशमुर्वीं सुभगामगन्म ।
वत्समिव मातरा संरिहाणे समानं योनिमनु संचरन्ती ॥३॥
एना वयं पयसा पिन्वमाना अनु येनिं देवकृतं चरन्तीः ।
न वर्तवे प्रसवः सर्गतक्तः किंयुर्विप्रो नद्यो जोहवीति ॥४॥
रमध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्तमेवैः ।
प्र सिन्धुमच्छा बृहती मनीषावस्युरह्वे कुशिकस्य सूनुः ॥५॥
इन्द्रो अस्माँ अरदद्वज्रबाहुरपाहन्वृत्रं परिधिं नदीनाम् ।
देवेऽनयत्सविता सुपाणिस्तस्य वयं प्रसवे याम उर्वीः ।६॥
प्रवाच्यं शश्वधा वीर्यं१ तदिन्द्रस्य कर्म यदहिं विवृश्चत् ।
वि वज्रेण परिषदो जघानायन्नापोऽयनमिच्छमानाः ॥७॥
एतद्वचो जरितार्मापि मृष्ठा आ यत्ते घोषानुत्तरा युगानि ।
उक्थेषु कारो प्रति नो जुषस्व मा नो नि कः पुरुषत्रा नमस्ते ॥८॥
ओ षु स्वसारः कारवे श्रृणोत ययौ वो दूरादनसा रथेन ।
नि षू नमध्वं भवता सुपारा अधोअक्षाः सिन्धवः स्रोत्याभिः ॥९॥
आ ते कारो श्रृणवामा वचांसि ययाथ दूरादनसा रथेन ।
नि ते नंसै पीप्यानेव योषा मर्यायेव कन्या शश्वचै ते ॥१०॥
यदंग त्वा भरताः सर्गतक्त आ वो वृणे सुमतिं यज्ञियानाम् ॥११॥
अतारिषुर्भरता गव्यवः समभक्त विप्रः सुमतिं नदीनाम् ।
प्र पिन्वध्वमिषयन्तीः सुराधा आ वक्षणाः पृणध्वं यात शीभम् ॥१२॥
उद्व ऊर्मिः शम्या हन्त्वापो योक्राणि मुंचत। मादुष्कृतौ व्येनसाऽघ्न्यौ शूनमारताम् ॥१३॥
*pra parvatānāmuśatī upasthādaśve iva viṣite hāsamāne /*
*gāveva śubhre mātarā rihāṇe vipāṭchhutudrī payasā javete //1 //*
*indreṣite prasavaṁ bhikṣamāṇe achchhā samudraṁ rathyeva yāthaḥ /*

*samārāṇe ūrmibhiḥ pinvamāne anyā vāmanyāmapyeti śubhre ॥2॥*
*achchhā sindhuṁ mātṛtamāmayāsaṁ vipāśamurvīṁ subhagāmaganma ।*
*vatsamiva mātarā saṁrihāṇe samānaṁ yonimanu saṁcharantī ॥3॥*
*enā vayaṁ payasā pinvamānā anu yeniṁ devakṛtaṁ charantīḥ ।*
*na vartave prasavaḥ sargataktaḥ kiṁyurvipro nadyo johavīti ॥4॥*
*ramadhvaṁ me vachase somyāya ṛtāvarīrupa muhūrtamevaiḥ ।*
*pra sindhumachchhā bṛhatī manīṣāvasyurahve kuśikasya sūnuḥ ॥5॥*
*indro asmām̐ aradadvajrabāhurapāhanvṛtraṁ paridhiṁ nadīnām ।*
*deve'nayatsavitā supāṇistasya vayaṁ prasave yāma urvīḥ ।6॥*
*pravāchyaṁ śaśvadhā vīryaṁ1 tadindrasya karma yadahiṁ vivṛśchat ।*
*vi vajreṇa pariṣado jaghānāyannāpo'yanamichchhamānāḥ ॥7॥*
*etadvacho jaritārmāpi mṛṣṭhā ā yatte ghoṣānuttarā yugāni ।*
*uktheṣu kāro prati no juṣasva mā no ni kaḥ puruṣatrā namaste ॥8॥*
*o ṣu svasāraḥ kārave śṛṇota yayau vo dūrādanasā rathena ।*
*ni ṣū namadhvaṁ bhavatā supārā adhoakṣāḥ sindhavaḥ srotyābhiḥ ॥9॥*
*ā te kāro śṛṇavāmā vachāṁsi yayātha dūrādanasā rathena ।*
*ni te naṁsai pīpyāneva yoṣā maryāyeva kanyā śaśvachai te ॥10॥*
*yadaṁga tvā bharatāḥ sargatakta ā vo vṛṇe sumatiṁ yajñiyānām ॥11॥*
*atāriṣurbharatā gavyavaḥ samabhakta vipraḥ sumatiṁ nadīnām ।*
*pra pinvadhbamiṣayantīḥ surādhā ā vakṣaṇāḥ pṛṇadhvaṁ yāta śībham ॥12॥*
*udva ūrmiḥ śamyā hantvāpo yoktrāṇi muṁchata ।*
*māduṣkṛtau vyenasā'ghnyau śūnamāratām ॥13॥*

१७. पूषा (Pūṣā) - ऋ. (Rv.) ३.६२.७-९

इयं ते पूषन्नाघृणे सुष्टुतिर्देव नव्यसी। अस्माभिस्तुभ्यं शस्यते ॥७॥
तां जुषस्व गिरं मम वाजयन्तीमवा धियम्। वधूयुरिव योषणाम् ॥८॥
यो विश्वाभि विपश्यति भुवना सं च पश्यति। स नः पूषाविता भुवत् ॥९॥
*iyaṁ te pūṣannāghṛṇe suṣṭutirdeva navyasī । asmābhistubhyaṁ śasyate ॥7॥*
*tāṁ juṣasva giraṁ mama vājayantīmavā dhiyam । vadhūyuriva yoṣaṇām ॥8॥*
*yo viśvābhi vipaśyati bhuvanā saṁ cha paśyati । sa naḥ pūṣāvitā bhuvat ॥9॥*

१८. बृहस्पतिः (Bṛhaspatiḥ) - ऋ. (Rv.) ३.६२.४-

बृहस्पते जुषस्व नो हव्यानि विश्वदेव्य। रास्व रत्नानि दाशुषे ॥४॥
शुचिमर्कैबृहस्पातिमध्वरेषु नमस्यत। अनाम्योज आ चके ॥५॥
वृषभं चर्षणीनां विश्वरूपमदाभ्यम्। बृहस्पतिं वरेण्यम् ॥६॥
*bṛhaspate juṣasva no havyāni viśvadevya । rāsva ratnāni dāśuṣe ॥4॥*
*śuchimarkaibṛhaspātimadhvareṣu namasyata । anāmyoja ā chake ॥5॥*
*vṛṣabhaṁ charṣaṇīnāṁ viśvarūpamadābhyam । bṛhaspatiṁ vareṇyam ॥6॥*

१९. मरुतः (Marutaḥ) - ऋ. (Rv.) ३.२६.४-६

प्र यन्तु वाजास्तविषीभिरग्नयः शुभे संमिश्लाः पृषतीरयुक्षत ।
बृहदुक्षो मरुतो विश्ववेदसः प्र वेपयन्ति पर्वताँ अदाभ्याः ॥४॥
अग्निश्रियो मरुतो विश्वकृष्टय आ त्वेषमुग्रमव ईमहे वयम् ।
ते स्वानिनो रुद्रिया वर्षनिर्णिजः सिंहा न हेषक्रतवः सुदानवः ॥५॥
व्रातंव्रातं गणंगणं सुशस्तिभिरग्नेर्भामं मरुतामोज ईमहे ।
पृषदश्वासो अनवभ्रराधसो गन्तारो यज्ञं विदथेषु धीराः ॥६॥
*pra yantu vājāstaviṣībhiragnayaḥ śubhe saṁmiślāḥ pṛṣatīrayukṣata ।*
*bṛhadukṣo maruto viśvavedasaḥ pra vepayanti parvatām̐ adābhyāḥ ॥4॥*
*agniśriyo maruto viśvakṛṣṭaya ā tveṣamugramava īmahe vayam ।*
*te svānino rudriyā varṣanirṇijaḥ siṁhā na heṣakratavaḥ sudānavaḥ ॥5॥*
*vrātaṁvrātaṁ gaṇaṁgaṇaṁ suśastibhiragnerbhāmaṁ marutāmoja īmahe ।*
*pṛṣadaśvāso anavabhrarādhaso gantāro yajñaṁ vidatheṣu dhīrāḥ ॥6॥*

२०. मित्रः (Mitraḥ) - ऋ. (Rv.) ३.५९.१-९

मित्रो जनान्यातयति ब्रुवाणो मित्रो दाधार पृथिवीमुत द्याम् ।
मित्रः कृष्टीरनिमिषाभि चष्टे मित्राय हव्यं घृतवज्जुहोत ॥१॥
प्र स मित्र मर्तो अस्तु प्रयस्वान्यस्त आदित्य शिक्षति व्रतेन ।
न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यन्तितो न दूरात् ॥२॥
अनमीवास इळया मदन्तो मितज्ञवो वरिमन्ना पृथिव्याः ।
आदित्यस्य व्रतमुपक्षियन्तो वयं मित्रस्य सुमतौ स्याम ॥३॥
अयं मित्रो नमस्यः सुशेवो राजा सुक्षत्रो अजनिष्ट वेधाः ।
तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ॥४॥
महाँ आदित्यो नमसोपसद्यो यातयज्जनो गृणते सुशेवः ।
तस्मा एतात्पन्यतमाय जुष्टमग्नौ मित्राय हविरा जुहोत ॥५॥
मित्रस्य चर्षणीधृतोऽवो देवस्य सानसि। द्युम्नं चित्रश्रवस्तमम् ॥६॥
अभि यो महिना दिवं मित्रो बभूव सप्रथाः। अभि श्रवोभिः पृथिवीम् ॥७॥
मित्राय पंच येमिरे जना अभिष्टिशवसे। स देवान्विश्वान्बिभर्ति ॥८॥
मित्रो देवेष्वायुषु जनाय वृक्तबर्हिषे। इष इष्टव्रता अकः ॥९॥

*mitro janānyātayati bruvāṇo mitro dādhāra pṛthivīmuta dyām ।*
*mitraḥ kṛṣṭīranimiṣābhi chaṣṭe mitrāya havyaṁ ghṛtavajjuhota ॥1॥*
*pra sa mitra marto astu prayasvānyasta āditya śikṣati vratena ।*
*na hanyate na jīyate tvoto nainamaṁho aśnotyantito na dūrāt ॥2॥*
*anamīvāsa iḷayā madanto mitajñavo varimannā pṛthivyāḥ ।*
*ādityasya vratamupakṣiyanto vayaṁ mitrasya sumatau syāma ॥3॥*
*ayaṁ mitro namasyaḥ suśevo rājā sukṣatro ajaniṣṭa vedhāḥ ।*
*tasya vayaṁ sumatau yajñiyasyāpi bhadre saumanase syāma ॥4॥*
*mahām̐ ādityo namasopasadyo yātayajjano gṛṇate suśevaḥ ।*
*tasmā etātpanyatamāya juṣṭamagnau mitrāya havirā juhota ॥5॥*
*mitrasya charṣaṇīdhṛto'vo devasya sānasi । dyumnaṁ chitraśravastamam ॥6॥*
*abhi yo mahinā divaṁ mitro babhūva saprathāḥ । abhi śravobhiḥ pṛthivīm ॥7॥*
*mitrāya paṁcha yemire janā abhiṣṭiśavase । sa devānviśvānbibharti ॥8॥*
*mitro deveṣvāyuṣu janāya vṛktabarhiṣe । iṣa iṣṭavratā akaḥ ॥9॥*

२१. मित्रावरुणौ (Mitrāvaruṇau) - सा. (Sv.) ६६३-६६४

आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्। मध्वा रजांसि सुक्रतू ॥१॥
उरुशंसा नमोवृधा मह्ना दक्षस्य राजथः। द्रघिष्ठाभिः शुचिव्रता ॥२॥

*ā no mitrāvaruṇā ghṛtairgavyūtimukṣatam । madhvā rajāṁsi sukratū ॥1॥*
*uruśaṁsā namovṛdhā mahnā dakṣasya rājathaḥ । draghiṣṭhābhiḥ śuchivratā ॥2॥*

२२. रथाङ्गानि (Rathāṅgāni) - ऋ. (Rv.) ३.५३.१७-२०

स्थिरौ गावौ भवतां वीळुरक्षो मेषा हि वर्हि मा युगं वि शारि ।
इन्द्रः पातल्ये ददतां शरीतोरिष्टनेमे अभि नः सचस्व ॥१७॥
बलं धेहि तनूषु नो बलमिन्द्रानुळत्सु नः ।
बलं तोकाय तनयाय जीवसे त्वं हि बलदा असि ॥१८॥
अभि व्ययस्व खदिरस्य सारमोजो धेहि स्पन्दने शिंशपायाम् ।
अक्ष वीळो वीळित वीळयस्व मा यामादस्मादव जीहिपो नः ॥१९॥
अयमस्मान्वनस्पतिर्मा च हा मा च रीरिषत् ।
स्वस्त्या गृहेभ्य आवसा आ विमोचनात् ॥२०॥

*sthirau gāvau bhavatāṁ vīḷurakṣo meṣā hi varhi mā yugaṁ vi śāri ।*
*indraḥ pātalye dadatāṁ śarītoriṣṭaneme abhi naḥ sachasva ॥17॥*
*balaṁ dhehi tanūṣu no balamindrānuḷatsu naḥ ।*
*balaṁ tokāya tanayāya jīvase tvaṁ hi baladā asi ॥18॥*
*abhi vyayasva khadirasya sāramojo dhehi spandane śiṁśapāyām ।*
*akṣa vīḷo vīḷita vīḷayasva mā yāmādasmādava jīhipo naḥ ॥19॥*
*ayamasmānvanaspatirmā cha hā mā cha rīriṣat ।*
*svastyā gṛhebhya āvasā ā vimochanāt ॥20॥*

२३. वाक् (Vāk) - ऋ. (Rv.) ३.५३.१५-१६

ससर्परीरमतिं बाधमाना बृहन्मिमाय जमदग्निदत्ता ।
आ सूर्यस्य दुहिता ततान श्रवो देवेष्वमृतमजुर्यम् ॥१५॥
ससर्परीरभरत्तूयमेभ्योऽधि श्रवः पांचजन्यासु कृष्टिषुः ।
सा पक्ष्या३ नव्यमायुर्दधाना यां मे पलस्तिजमदग्नयो ददुः ॥१६॥
*sasarparīramatiṁ bādhamānā bṛhanmimāya jamadagnidattā ।*
*ā sūryasya duhitā tatāna śravo deveṣvamṛtamajuryam ॥15॥*
*sasarparīrabharattūyamebhyo'dhi śravaḥ pāṁchajanyāsu kṛṣṭiṣuḥ ।*
*sā pakṣayā3 navyamāyurdadhānā yāṁ me palastijamadagnayo daduḥ ॥16॥*

२४. विश्वामित्रोपाध्यायः (Viśvāmitropādhyāyaḥ) - ऋ. (Rv.) ३.२६.९

शतधारमुत्समक्षीयमाणं विपश्चितं पितरं वक्तवानाम् ।
मेळिं मदन्तं पित्रोरुपस्थे तं रोदसी पिपृतं सत्यवाचम् ॥९॥
*śatadhāramutsamakṣīyamāṇaṁ vipaśchitaṁ pitaraṁ vaktavānām ।*
*meḷiṁ madantaṁ pitrorupasthe taṁ rodasī pipṛtaṁ satyavācham ॥9॥*

२५. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) ३.८.१-११

अंजन्ति त्वामध्वरे देवयन्तो वनस्पते मधुना दैवयेन ।
यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थे ॥१॥
समिद्धस्य श्रयमाणः पुरस्ताद् ब्रह्म वन्वानो अजरं सुवीरम् ।
आरे अस्मदमतिं बाधमान उच्छयस्व महते सौभगाय ॥२॥
उच्छयस्व वनस्पते वर्ष्मन्पृथिव्या अधि । सुमिती मीयमानो वर्चो धा यज्ञवाहसे ॥३॥
युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः ।
तं धीरासः कवय उन्नयन्ति स्वाध्यो३ मनसा देवयन्तः ॥४॥
जातो जायते सुदिनत्वे अह्नां समर्य आ विदथे वर्धमानः ।
पुनन्ति धीरा अपसो मनीषा देवया विप्र उदियर्ति वाचम् ॥५॥
यान्वो नरो देवयन्तो निमिम्युर्वनस्पते स्वधितिर्वा ततक्ष ।
ते देवासः स्वरवस्तस्थिवांसः प्रजावदस्मे दिधिषन्तु रत्नम् ॥६॥
ये वृक्णासो अधि क्षमि निभितासो यतस्रुचः । ते नो व्यन्तु वार्यं देवत्रा क्षेत्रसाधसः ॥७॥
आदित्या रुद्रा वसवः सुनीथा द्यावाक्षामा पृथिवी अन्तरिक्षम् ।
सजोषसो यज्ञमवन्तु देवा ऊर्ध्वं कृण्वन्त्वध्वरस्य केतुम् ॥८॥
हंसा इव श्रेणिशो यतानाः शुक्रा वसानाः स्वरवो न आगुः ।
उन्नीयमानाः कविभिः पुरस्ताद्देवा देवानामपि यन्ति पाथः ॥९॥
श्रृंगाणीवेच्छृंगिणां सं ददृश्रे चषालवन्तः स्वरवः पृथिव्याम् ।
बाघद्भिर्वा विहवे श्रोषमाणा अस्माँ अवन्तु पृतनाज्येषु ॥१०॥
वनस्पते शतवल्शो वि रोह सहस्रवलशा वि वयं रुहेम ।
यं त्वामयं स्वधितिस्तेजमानः प्रणिनाय महते सौभगाय ॥११॥
*aṁjanti tvāmadhvare devayanto vanaspate madhunā daivayena ।*
*yadūrdhvastiṣṭhā draviṇeha dhattādyadvā kṣayo māturasyā upasthe ॥1॥*
*samiddhasya śrayamāṇaḥ purastād brahma vanvāno ajaraṁ suvīram ।*
*āre asmadamatiṁ bādhamāna uchchhayasva mahate saubhagāya ॥2॥*
*uchchhayasva vanaspate varṣmanpṛthivyā adhi ।*
*sumitī mīyamāno varcho dhā yajñavāhase ॥3॥*
*yuvā suvāsāḥ parivīta āgātsa u śreyānbhavati jāyamānaḥ ।*
*taṁ dhīrāsaḥ kavaya unnayanti svādhyo3 manasā devayantaḥ ॥4॥*
*jāto jāyate sudinatve ahnāṁ samarya ā vidathe vardhamānaḥ ।*
*punanti dhīrā apaso manīṣā devayā vipra udiyarti vācham ॥5॥*
*yānvo naro devayanto nimimyurvanaspate svadhitirvā tatakṣa ।*
*te devāsaḥ svaravastasthivāṁsaḥ prajāvadasme didhiṣantu ratnam ॥6॥*
*ye vṛkṇāso adhi kṣami nibhitāso yatasruchaḥ ।*
*te no vyantu vāryaṁ devatrā kṣetrasādhasaḥ ॥7॥*

*ādityā rudrā vasavaḥ sunīthā dyāvākṣāmā pṛthivī antarikṣam ।*
*sajoṣaso yajñamavantu devā ūrdhvaṁ kṛṇvantvadhvarasya ketum ॥8॥*
*haṁsā iva śreṇiśo yatānāḥ śukrā vasānāḥ svaravo na āguḥ ।*
*unnīyamānāḥ kavibhiḥ purastāddevā devānāmapi yanti pāthaḥ ॥9॥*
*śṛṁgāṇīvechchhṛṁgiṇāṁ saṁ dadṛśre chaṣālavantaḥ svaravaḥ pṛthivyām ।*
*bāghadbhirvā vihave śroṣamāṇā asmām̐ avantu pṛtanājyeṣu ॥10॥*
*vanaspate śatavalśo vi roha sahasravalaśā vi vayaṁ ruhema ।*
*yaṁ tvāmayaṁ svadhitistejamānaḥ praṇināya mahate saubhagāya ॥11॥*

२६. वैश्वानरः (Vaiśvānaraḥ) - ऋ. (Rv.) ३.२६.१-३

वैश्वानरं मनसाग्निं निचाय्या हविष्मन्तो अनुषत्यं स्वर्विदम् ।
सुदानुं देवं रथिरं वसूयवो गीर्भी रण्वं कुशिकासो हवामहे ॥१॥
तं शुभ्रमग्निमवसे हवामहे वैश्वानरं मातरिश्वानमुक्थ्यम् ।
बृहस्पतिं मनुषो देवतातये विप्रं श्रोतारमतिथिं रघुष्यदम् ॥२॥
अश्वो न क्रन्दंजनिभिः समिध्यते वैश्वानरः कुशिकेभिर्युगेयुगे ।
स नो अग्निः सुवीर्यं स्वश्व्यं दधातु रत्नमभृतेषु जागृविः ॥३॥
*vaiśvānaraṁ manasāgiṁna nichāyyā haviṣmanto anuṣatyaṁ svarvidam ।*
*sudānuṁ devaṁ rathiraṁ vasūyavo gīrbhī raṇvaṁ kuśikāso havāmahe ॥1॥*
*taṁ śubhramagnimavase havāmahe vaiśvānaraṁ mātariśvānamukthyam ।*
*bṛhaspatiṁ manuṣo devatātaye vipraṁ śrotāramatithi raghuṣyadam ॥2॥*
*aśvo na krandaṁjanibhiḥ samidhyate vaiśvānaraḥ kuśikebhiryugeyuge ।*
*sa no agniḥ suvīryaṁ svaśvyaṁ dadhātu ratnamabhṛteṣu jāgṛviḥ ॥3॥*

२७. सविता (Savitā) - ऋ. (Rv.) ३.६२.१०-१२; सा. (Sv.) १४६२

ऋ. (Rv.) ३.६२.१०-१२

तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ॥१०॥
देवस्य सवितुर्वयं वाजयन्तः पुरंध्या। भगस्य रातिमीमहे ॥११॥
देवं नरः सवितारं विप्रा यज्ञैः सुवृक्तिभिः। नमस्यन्ति धियेषिताः ॥१२॥
*tatsaviturvareṇyaṁ bhargo devasya dhīmahi । dhiyo yo naḥ prachodayāt ॥10॥*
*devasya saviturvayaṁ vājayantaḥ puraṁdhyā । bhagasya rātimīmahe ॥11॥*
*devaṁ naraḥ savitāraṁ viprā yajñaiḥ suvṛktibhiḥ । namasyanti dhiyeṣitāḥ ॥12॥*

सा. (Sv.) १४६२

तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ॥१॥
*tatsaviturvareṇyaṁ bhargo devasya dhīmahi । dhiyo yo naḥ prachodayāt ॥1॥*

२८. सोम (Soma) - ऋ. (Rv.) ३.६२.१३-१५

सोमो जिगाति गातुविद् देवानामेति निष्कृतम्। ऋतस्य योनिमासदम् ॥१३॥
सोमो अस्मभ्यं द्विपदे चतुष्पदे च पशवे। अनमीवा इषस्करत् ॥१४॥
अस्माकमायुर्वर्धयन्नभिमातीः सहमानः। सोमः सधस्थमासदत् ॥१५॥
*somo jigāti gātuvid devānāmeti niṣkṛtam । ṛtasya yonimāsadam ॥13॥*
*somo asmabhyaṁ dvipade chatuṣpade cha paśave । anamīvā iṣaskarat ॥14॥*
*asmākamāyurvardhayannabhimātīḥ sahamānaḥ । somaḥ sadhasthamāsadat ॥15॥*

## ६१८. विश्वामित्रो गाथिनः अभिपाद उदलो वा (Viśvāmitro Gāthinaḥ Abhipāda Udalo Vā)

१. इन्द्रः (Indraḥ) - सा. (Sv.) २३१

एन्द्र पृक्षु कासु चिन्नृम्णं तनूषु धेहि नः। सत्राजिदुग्र पौंस्यम् ॥९॥
*endra pṛkṣu kāsu chinnṛmṇaṁ tanūṣu dhehi naḥ । satrājidugra pauṁsyam ॥9॥*

## ६१९. विश्वामित्रो गाथिनः कुशिको ऐषीरथी वा (Viśvāmitro Gāthinaḥ Kuśiko Aiṣīrathī Vā)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ३.३१.१-२२

शासद्वह्निर्दुहितुर्नप्त्यं गाद्विद्वाँ ऋतस्य दीधितिं सपर्यन् ।
पिता यत्र दुहितुः सेकमृंजन्त्सं शग्म्येन मनसा दधन्वे ॥१॥

न जामये तान्वो रिक्थमारैक्चकार गर्भं सनितुर्निधानम् ।
यदी मातरो जनयन्त वह्निमन्यः कर्ता सुकृतोरन्य ऋन्धन् ॥२॥
अग्निर्जज्ञे जुह्वा३ रेजमानो महस्पुत्राँ अरुषस्य प्रयक्षे ।
महान्गर्भो मह्या जातमेषां मही प्रवृद्धर्यश्वस्य यज्ञैः ॥३॥
अभि जैत्रीरसचन्त स्पृधानं महि ज्योतिस्तमसो निरजानन् ।
तं जानतीः प्रत्युदायन्नुषासः पतिर्गवामभवदेक इन्द्रः ॥४॥
वीळौ सतीरभि धीरा अतृन्दन्प्राचाहिन्वन्मनसा सप्त विप्राः ।
विश्वामविन्दन्पथ्यामृतस्य प्रजानन्नित्ता नमसा विवेश ॥५॥
विदद्यदी सरमा रुग्णमद्रेर्महि पाथः पूर्व्यं सध्र्यक्कः ।
अग्रं नयत्सुपद्यक्षराणामच्छा रवं प्रथमा जानती गात् ॥६॥
अगच्छदु विप्रतमः सखीयन्नसूदयत्सुकृते गर्भमद्रिः ।
ससान मर्यो युवभिर्मखस्यन्नथाभवदंगिराः सद्यो अर्चन् ॥७॥
सतः सतः प्रतिमानं पुरोभूर्विश्वा वेद जनिमा हन्ति शुष्णम् ।
प्र णो दिवः पदवीर्गव्युरर्चन्त्सखा सखीरँमुंचन्निरवद्यात् ॥८॥
नि गव्यता मनसा सेदुरर्कैः कृण्वनासो अमृतत्वाय गातुम् ।
इदं चिन्नु सदनं भूर्येषां येन मासाँ असिषासन्नृतेन ॥९॥
संपश्यमाना अमदन्नभि स्वं पयः प्रत्नस्य रेतसो दुघानाः ।
वि रोदसी अतपद्घोषं एषां जाते निःष्ठामदधुर्गोषु वीरान् ॥१०॥
स जातेभिर्वृत्रहा सेदु हव्यैरुदुस्त्रिया असृजदिन्द्रो अर्कैः ।
उरूच्यस्मै घृतवद्भरन्ती मधु स्वाद्म दुदुहे जेन्या गौः ॥११॥
पित्रे चिच्चक्रुः सदनं समस्मै महि त्विषीमत्सुकृतो वि हि ख्यन् ।
विष्कभ्नन्तः स्कम्भनेना जनित्री आसीना ऊर्ध्वं रभसं वि मिन्वन् ॥१२॥
मही यदि धिषणा शिश्नथे धात्सद्योवृधं विभ्व१ रोदस्योः ।
गिरो यस्मिन्ननवद्याः समीचीर्विश्वा इन्द्राय तविषीरनुत्ताः ॥१३॥
मह्या ते सख्यं वश्मि शक्तीरा वृत्रघ्ने नियुतो यन्ति पूर्वीः ।
महि स्तोत्रमव आगन्म सुरेरस्माकं सु मघवन्बोधि गोपाः ॥१४॥
महि क्षेत्रं पुरु श्चन्द्रं विविद्वानादित्सखिभ्यश्चरथं समैरत् ।
इन्द्रो नृभिरजनद्दीद्यानः साकं सूर्यमुषसं गातुमग्निम् ॥१५॥
अपश्चिदेष विभ्वो३ दमूनाः प्र सध्रीचीरसृजद्विश्वश्चन्द्राः ।
मध्वः पुनानाः कविभिः पवित्रैर्द्युभिर्हिन्वन्त्यक्तुभिर्धनुत्रीः ॥१६॥
अनु कृष्णे वसुधिती जिहाते उभे सूर्यस्य मंहना यजत्रे ।
परि यत्ते महिमानं वृजध्यै सखाय इन्द्र काम्या ऋजिप्याः ॥१७॥
पतिर्भव वृत्रहन्त्सूनृतानां गिरां विश्वायुर्वृषभो वयोधाः ।
आ नो गहि सख्येभिः शिवेभिर्महान्महीभिरूतिभिः सरण्यन् ॥१८॥
तमंगिरस्वन्नमसा सपर्यन्नव्यं कृणोमि सन्यसे पुराजाम् ।
द्रुहो वि याहि बहुला अदेवीः स्वश्च नो मघवन्त्सातये धाः ॥१९॥
मिहः पावकाः प्रतता अभूवन्त्स्वस्ति नः पिपृहि पारमासाम् ।
इन्द्र त्वं रथिरः पाहि नो रिषो मक्षूमक्षू कृणुहि गोजितो नः ॥२०॥
अदेदिष्ट वृत्रहा गोपतिर्गा अन्तः कृष्णाँ अरुषैर्धामभिर्गात् ।
प्र सूनृता दिशमान ऋतेन दुरश्च विश्वा अवृणोदप स्वाः ॥२१॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
श्रृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥२२॥

*śāsadvahnirduhiturnaptyaṁ gādvidvām̐ ṛtasya dīdhitiṁ saparyan ।*
*pitā yatra duhituḥ sekamṛñjantsaṁ śagmyena manasā dadhanve ॥1॥*
*na jāmaye tānvo rikthamāraikchakāra garbhaṁ saniturnidhānam ।*
*yadī mātaro janayanta vahnimanyaḥ kartā sukṛtoranya ṛndhan ॥2॥*
*agnirjajñe juhvā3 rejamāno mahasputrām̐ aruṣasya prayakṣe ।*
*mahāngarbho mahyā jātameṣāṁ mahī pravṛddharyaśvasya yajñaiḥ ॥3॥*

*abhi jaitrīrasachanta spṛdhānaṁ mahi jyotistamaso nirajānan ।*
*taṁ jānatīḥ pratyudāyannuṣāsaḥ patirgavāmabhavadeka indraḥ ॥4 ॥*
*vīḻau satīrabhi dhīrā atṛndanprāchāhinvanmanasā sapta viprāḥ ।*
*viśvāmavindanpathyāmṛtasya prajānannittā namasā viveśa ॥5 ॥*
*vidadyadī saramā rugṇamadrermahi pāthaḥ pūrvyaṁ sadhryakkaḥ ।*
*agraṁ nayatsupadyakṣarāṇāmachchhā ravaṁ prathamā jānatī gāt ॥6 ॥*
*agachchhadu vipratamaḥ sakhīyannasūdayatsukṛte garbhamadriḥ ।*
*sasāna maryo yuvabhirmakhasyannathābhavadaṁgirāḥ sadyo archan ॥7 ॥*
*sataḥ sataḥ pratimānaṁ purobhūrviśvā veda janimā hanti śuṣṇam ।*
*pra ṇo divaḥ padavīrgavyurarchantsakhā sakhīraṁmuṁchanniravadyāt ॥8 ॥*
*ni gavyatā manasā sedurarkaiḥ kṛṇvanāso amṛtatvāya gātum ।*
*idaṁ chinnu sadanaṁ bhūryeṣāṁ yena māsāṁ asiṣāsannṛtena ॥9 ॥*
*saṁpaśyamānā amadannabhi svaṁ payaḥ pratnasya retaso dughānāḥ ।*
*vi rodasī atapaddhoṣaṁ eṣāṁ jāte niḥṣṭhāmadadhurgoṣu vīrān ॥10 ॥*
*sa jātebhirvṛtrahā sedu havyairudusriyā asṛjadindro arkaiḥ ।*
*urūchyasmai ghṛtavadbharantī madhu svādma duduhe jenyā gauḥ ॥11 ॥*
*pitre chichchakruḥ sadanaṁ samasmai mahi tviṣīmatsukṛto vi hi khyan ।*
*viṣkabhnantaḥ skambhanenā janitrī āsīnā ūrdhvaṁ rabhasaṁ vi minvan ॥12 ॥*
*mahī yadi dhiṣaṇā śiśnathe dhātsadyovṛdhaṁ vibhva1 rodasyoḥ ।*
*giro yasminnanavadyāḥ samīchīrviśvā indrāya taviṣīranuttāḥ ॥13 ॥*
*mahyā te sakhyaṁ vaśmi śaktīrā vṛtradhne niyuto yanti pūrvīḥ ।*
*mahi stotramava āgnama surerasmākaṁ su maghavanbodhi gopāḥ ॥14 ॥*
*mahi kṣetraṁ puru śchandraṁ vividvānāditsakhibhyaścharathaṁ samairat ।*
*indro nṛbhirajanaddīdyānaḥ sākaṁ sūryamuṣasaṁ gātumagnim ॥15 ॥*
*apaśchideṣa vibhvo3 damūnāḥ pra sadhrīchīrasṛjadviśvaśchandrāḥ ।*
*madhvaḥ punānāḥ kavibhiḥ pavitrairdyubhirhinvantyaktubhirdhanutrīḥ ॥16 ॥*
*anu kṛṣṇe vasudhitī jihāte ubhe sūryasya maṁhanā yajatre ।*
*pari yatte mahimānaṁ vṛjadhyai sakhāya indra kāmyā ṛjipyāḥ ॥17 ॥*
*patirbhava vṛtrahantsūnṛtānāṁ girāṁ viśvāyurvṛṣabho vayodhāḥ ।*
*ā no gahi sakhyebhiḥ śivebhirmahānmahībhirūtibhiḥ saraṇyan ॥18 ॥*
*tamaṁgirasvannamasā saparyannavyaṁ kṛṇomi sanyase purājām ।*
*druho vi yāhi bahulā adevīḥ svaścha no maghavantsātaye dhāḥ ॥19 ॥*
*mihaḥ pāvakāḥ pratatā abhūvantsvasti naḥ pipṛhi pāramāsām ।*
*indra tvaṁ rathiraḥ pāhi no riṣo makṣūmakṣū kṛṇuhi gojito naḥ ॥20 ॥*
*adediṣṭa vṛtrahā gopatirgā antaḥ kṛṣṇāṁ aruṣairdhāmamirgāt ।*
*pra sūnṛtā diśamāna ṛtena duraścha viśvā avṛṇodapa svāḥ ॥21 ॥*
*śunaṁ huvema maghavānamindramasminbhare nṛtamaṁ vājasātau ।*
*śṛṇvantamugramūtaye samatsu ghnantaṁ vṛtrāṇi saṁjitaṁ dhanānām ॥22 ॥*

## ६२०. विश्वामित्रो जमदग्नी (Viśvāmitro Jamadagnī)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.१६७.१-२; ४

ऋ. (Rv.) १०.१६७.१-२

तुभ्येदमिन्द्र परि षिच्यते मधु त्वं सुतस्य कलशस्य राजसि ।
त्वं रयिं पुरुवीरामु नस्कृधि त्वं तपः परिप्याजयः स्वः ॥१॥
स्वर्जितं महि मन्दानमन्धसो हवामहे परि शक्रं सुताँ उप ।
इमं नो यज्ञमिह बोध्या गहि स्पृधो जयन्तं मघवानमीमहे ॥२॥
*tubhyedamindra pari ṣichyate madhu tvaṁ sutasya kalaśasya rājasi ।*
*tvaṁ rayiṁ puruvīrāmu naskṛdhi tvaṁ tapaḥ paripyājayaḥ svaḥ ॥1 ॥*
*svarjitaṁ mahi mandānamandhaso havāmahe pari śakraṁ sutāṁ upa ।*
*imaṁ no yajñamiha bodhyā gahi spṛdho jayantaṁ maghavānamīmahe ॥2 ॥*

ऋ. (Rv.) १०.१६७.४

प्रसूतो भक्षमकरं चरावपि स्तोमं चेमं प्रथमः सूरिरुन्मृजे ।
सुते सातेन यद्यागमं वां प्रति विश्वमित्रजमदग्नी दमे ॥४॥

*prasūto bhakṣamakaraṁ charāvapi stomaṁ chemaṁ prathamaḥ sūrirunmṛje /*
*sute sātena yadyāgamaṁ vāṁ prati viśvamitrajamadagnī dame //4 //*

१. लिङेक्ताः (Liṅektāḥ) - ऋ. (Rv.) १०.१६७.३

सोमस्य राज्ञो वरुणस्य धर्मणि बृहस्पतेरनुमत्या उ शर्मणि ।
तवाहमद्य मघवन्नुपस्तुतौ धातर्विधातः कलशाँ अभक्षयम् ॥३॥
*somasya rājño varuṇasya dharmaṇi bṛhaspateranumatyā u śarmaṇi /*
*tavāhamadya maghavannupastutau dhātarvidhātaḥ kalaśāṁ abhakṣayam //3 //*

## ६२१. विश्वामित्रो गाथिनो जमदग्नि र्वा (Viśvāmitro Gāthino Jamadagni Rvā)

१. इन्द्रः (Indraḥ) - सा. (Sv.) २२०

आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्। मध्वा रजां सि सुक्रतू ॥७॥
*ā no mitrāvaruṇā ghṛtairgavyūtimukṣatam / madhvā rajāṁ si sukratū //7 //*

२. मित्रावरुणौ (Mitrāvaruṇau) - ऋ. (Rv.) ३.६२.१६-१८; सा. (Sv.) ६६५

ऋ. (Rv.) ३.६२.१६-१८

आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्। मध्वा रजांसि सुक्रतू ॥१६॥
उरुशंसा नमोवृधा मह्ना दक्षस्य राजथः। द्राघिष्ठाभिः शुचिव्रता ॥१७॥
गृणाना जमदग्निना योनावृतस्य सीदतम्। पातं सोममृतावृधा ॥१८॥
*ā no mitrāvaruṇā ghṛtairgavyūtimukṣatam / madhvā rajāṁsi sukratū //16 //*
*uruśaṁsā namovṛdhā mahnā dakṣasya rājathaḥ / drāghiṣṭhābhiḥ śuchivratā //17 //*
*gṛṇānā jamadagninā yonāvṛtasya sīdatam / pātaṁ somamṛtāvṛdhā //18 //*

सा. (Sv.) ६६५

गृणाना जमदग्निना योनावृतस्य सीदतम्।पातं सोममृतावृधा ॥३॥
*gṛṇānā jamadagninā yonāvṛtasya sīdatam /pātaṁ somamṛtāvṛdhā //3 //*

## ६२२. विश्वामित्रो गाथिनः (साग्री.सास्वा.); तिरश्ची (सार्षेदी.) (Viśvāmitro Gāthinaḥ [Ssb.Sas.]; Tiraśchī [Sad.])

१. इन्द्रः (Indraḥ) - सा. (Sv.) ३५०

एतो न्विन्द्रं स्तवाम शुद्धं साम्ना। शुद्धैरुक्थैर्वावृध्वांसं शुद्धैराशीर्वान्ममत्तु ॥९॥
*eto nvindraṁ stavāma śuddhaṁ sāmnā / śuddhairukthairvāvṛdhvāṁsaṁ śuddhairāśīrvānmamattu //9 //*

## ६२३. विश्वामित्रः प्रागाथः (Viśvāmitraḥ Prāgāthaḥ)

१. इन्द्राग्नी (Indrāgnī) - सा. (Sv.) १६९३-१६९५; १७०२-१७०४

सा. (Sv.) १६९३-१६९५

इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः। तद्वां चेति प्र वीर्यम् ॥१॥
इन्द्राग्नी अपसस्पर्युप प्र यन्ति धीतयः। ऋतस्य पथ्या३ अनु ॥२॥
इन्द्राग्नी तविषाणि वां सधस्थानि प्रयांसि च। युवोरप्तूर्यं हितम् ॥३॥
*indrāgnī rochanā divaḥ pari vājeṣu bhūṣathaḥ / tadvāṁ cheti pra vīryam //1 //*
*indrāgnī apasasparyupa pra yanti dhītayaḥ / ṛtasya pathyā3 anu //2 //*
*indrāgnī taviṣāṇi vāṁ sadhasthāni prayāṁsi cha / yuvoraptūryaṁ hitam //3 //*

सा. (Sv.) १७०२-१७०४

तोशा वृत्रहणा हुवे सजित्वानापराजिता। इन्द्राग्नी वाजसातमा ॥१॥
प्र वामर्चन्त्युक्थिनो नीथाविदो जरितारः। इन्द्राग्नी इष आ वृणे ॥२॥
इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतम्। साकमकेन कर्मणा ॥३॥
*tośā vṛtrahaṇā huve sajitvānāparājitā / indrāgnī vājasātamā //1 //*
*pra vāmarchantyukthino nīthāvido jaritāraḥ / indrāgnī iṣa ā vṛṇe //2 //*
*indrāgnī navatiṁ puro dāsapatnīradhūnutam / sākamakena karmaṇā //3 //*

## ६२४. विश्वावसुर् देवगन्धर्वः (Viśvāvasur Devagandharvaḥ)

१. विश्वावसुः (Viśvāvasuḥ) - ऋ. (Rv.) १०.१३९.४-६

विश्वावसुं सोम गन्धर्वमापो ददृशुषीस्तदृतेना व्यायन् ।
तदन्ववैदिन्द्रो रारहाण आसां परि सूर्यस्य परिधीँरपश्यत् ॥४॥
विश्वावसुरभि तन्नो गृणातु दिव्यो गन्धर्वो रजसो विमानः ।
यद्वा घा सत्यमुत यन्न विद्म धियो हिन्वानो धिय इन्नो अव्याः ॥५॥
सस्निमविन्दच्चरणे नदीनामपावृणोद्दुरो अश्मव्रजानाम् ।
प्रासां गन्धर्वो अमृतानि वोचदिन्द्रो दक्षं परि जानादहीनाम् ॥६॥
*viśvāvasuṁ soma gandharvamāpo dadṛśuṣīstadṛtenā vyāyan /*
*tadanvavaidindro rārahāṇa āsāṁ pari sūryasya paridhīm̐rapaśyat //4 //*
*viśvāvasurabhi tanno gṛṇātu divyo gandharvo rajaso vimānaḥ /*
*yadvā ghā satyamuta yanna vidma dhiyo hinvāno dhiya inno avyāḥ //5 //*
*sasnimavindachcharaṇe nadīnāmapāvṛṇodduro aśmavrajānām /*
*prāsāṁ gandharvo amṛtāni vochadindro dakṣaṁ pari jānādahīnām //6 //*

२. सविता (Savitā)-

ऋ. (Rv.) १०.१३९.१-३

सूर्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुदयाँ अजस्रम् ।
तस्य पूषा प्रसवे याति विद्वान्त्सम्पश्यन्विश्वा भुवनानि गोपाः ॥१॥
नुचक्षा एष दिवो मध्य आस्त आपप्रिवान् रोदसी अन्तरिक्षम् ।
स विश्वाचीरभि चष्टे घृताचीरन्तरा पूर्वमपरं च केतुम् ॥२॥
रायो बुध्नः संगमनो वसूनां विश्वा रूपाभि चष्टे शचीभिः ।
देवइव सविता सत्यधर्मेन्द्रो न तस्थौ समरे धनानाम् ॥३॥
*sūryaraśmirharikeśaḥ purastātsavitā jyotirudayām̐ ajasram /*
*tasya pūṣā prasave yāti vidvāntsampaśyanviśvā bhuvanāni gopāḥ //1 //*
*nuchakṣā eṣa divo madhya āsta āpaprivān rodasī antarikṣam /*
*sa viśvāchīrabhi chaṣṭe ghṛtāchīrantarā pūrvamaparaṁ cha ketum //2 //*
*rāyo budhnaḥ saṁgamano vasūnāṁ viśvā rūpābhi chaṣṭe śachībhiḥ /*
*devaiva savitā satyadharmendro na tasthau samare dhanānām //3 //*

३. अग्निः (Agniḥ) - ऋ. (Rv.) ५.२८.१-६

समिद्धो अग्निर्दिवि शोचिरश्रेत्प्रत्यङ्ङुषसमुर्विया वि भाति ।
एति प्राची विश्ववारा नमोभिर्देवाँ ईळाना हविषा घृताची ॥१॥
समिध्यमानो अमृतस्य राजसि हविष्कृण्वन्तं सचसे स्वस्तये ।
विश्वं स धत्ते द्रविणं यमिन्वस्यातिथ्यमग्ने नि च धत्त इत्पुरः ॥२॥
अग्ने शर्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु ।
सं जास्पत्यं सुयममा कृणुष्व शत्रूयतामभि तिष्ठा महांसि ॥३॥
समिद्धस्य प्रमहसोऽग्ने वन्दे तव श्रियम् ।
वृषभो द्युम्नवाँ असि समध्वरेष्विध्यसे ॥४॥
समिद्धो अग्न आहुत देवान्यक्षि स्वध्वर। त्वं हि हव्यवाळसि ॥५॥
आ जुहोता दुवस्यताग्निं प्रयत्यध्वरे। वृणीध्वं हव्यवाहनम् ॥६॥
*samiddho agnirdivi śochiraśretpratyaṅṅuṣasamurviyā vi bhāti /*
*eti prāchī viśvavārā namobhirdevām̐ īḷānā haviṣā ghṛtāchī //1 //*
*samidhyamāno amṛtasya rājasi haviṣkṛṇvantaṁ sachase svastaye /*
*viśvaṁ sa dhatte draviṇaṁ yaminvasyātithyamagne ni cha dhatta itpuraḥ //2 //*
*agne śardha mahate saubhagāya tava dyumnānyuttamāni santu /*
*saṁ jāspatyaṁ suyamamā kṛṇuṣva śatrūyatāmabhi tiṣṭhā mahāṁsi //3 //*
*samiddhasya pramahaso'gne vande tava śriyam /*
*vṛṣabho dyumnavām̐ asi samadhvareṣvidhyase //4 //*
*samiddho agna āhuta devānyakṣi svadhvara / tvaṁ hi havyavāḷasi //5 //*
*ā juhotā duvasyātāgiṁna prayatyadhvare / vṛṇīdhvaṁ havyavāhanam //6 //*

**६२५. विश्वावसुः (Viśvāvasuḥ)**

१. अग्निः (Agniḥ) - य. (Yv.) १२.६६

निवेशनः संगमानो वसूनां विश्वा रूपाऽभिचष्टे शचीभिः ।
देवऽइव सविता सत्यधर्मेन्द्रो न तस्थौ समरे पथीनाम् ॥६६॥
*niveśanaḥ saṁgamāno vasūnāṁ viśvā rūpā'bhichaṣṭe śachībhiḥ /*
*deva'iva savitā satyadharmendro na tasthau samare pathīnām //66//*

२. आदित्याः (Ādityāḥ) - य. (Yv.) १७.५९

विमानऽएष दिवो मध्यऽआस्तऽआप प्रिवान्नोदसीऽअन्तरिक्षम् ।
स विश्वाचीरभिचष्टे घृताचीरन्तरा पूर्वमपरं च केतुम् ॥५९॥
*vimāna'eṣa divo madhya'āsta'āpa privānnodasī'antarikṣam /*
*sa viśvāchīrabhichaṣṭe ghṛtāchīrantarā pūrvamaparaṁ cha ketum //59//*

३. कृषीवलाः कवयो वा (Kṛṣīvalāḥ Kavayo Vā) - य. (Yv.) १२.६७-६८

सीरा युंजन्ति कवयो युगा वितन्वते पृथक्। धीरा देवेषु सुम्नया ॥६७॥
युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपतेह बीजम् ।
गिरा च श्रुष्टिः सभरा असन्नो नेदीयऽइत्सृण्यः पक्वमेयात् ॥६८॥
*sīrā yuṁjanti kavayo yugā vitanvate pṛthak / dhīrā deveṣu sumnayā //67//*
*yunakta sīrā vi yugā tanudhvaṁ kṛte yonau vapateha bījam /*
*girā cha śruṣṭiḥ sabharā asanno nedīya'itsṛṇyaḥ pakvameyāt //68//*

## ६२६. विश्वेदेवाः (Viśvedevāḥ)

१. अग्न्यादयः (Agnyādayaḥ) - य. (Yv.) १४.२०

अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवताऽऽदित्या देवता मरुतो देवता विश्वे देवा देवता बृहस्पतिर्देवतेन्द्रो देवात वरुणो देवता ॥२०॥
*agnirdevatā vāto devatā sūryo devatā chandramā devatā vasavo devatā rudrā devatā''dityā devatā maruto devatā viśve devā devatā bṛhaspatirdevatendro devāta varuṇo devatā //20//*

२. इन्द्राग्नीः (Indrāgnīḥ) - य. (Yv.) १४.११

इन्द्राग्नीऽअव्यथमानामिष्टकां दृंहतं युवम्। पृष्ठेन द्यावापृथिवीऽअन्तरिक्षं च विबाधसे ॥११॥
*indrāgnī'avyathamānāmiṣṭakāṁ dṛṁhataṁ yuvam /*
*pṛṣṭhena dyāvāpṛthivī'antarikṣaṁ cha vibādhase //11//*

३. ईश्वरः (Īśvaraḥ) - य. (Yv.) १४.२८-२९

एकयास्तुवत प्रजाऽअधीयन्त प्रजापतिरधिपतिरासीत्। तिसृभिरस्तुवत ब्रह्मासृज्यत ब्रह्मणस्पतिरधिपतिरासीत्। पंचभिरस्तुवत भूतान्यसृज्यन्त भूतानां पतिरधिपतिरासीत्। सप्तभिरस्तुवत सप्त ऋषयोऽसृज्यन्त धाताधिपतिरासीत् ॥२८॥
नवभिरस्तुवत पितरोऽसृज्यन्तादितिरधिपत्न्यासीत् । एकादशभिरस्तुवतऽऋतवोऽसृजयन्तार्त्तवाऽअधिपतयऽआसन्। त्रयोदशभिरस्तुवत मासाऽअसृज्यन्त संवत्सरोऽधिपतिरासीत्। पंचदशभिरस्तुवत क्षत्रमसृज्यतेन्द्रोऽधिपतिरासीत् । सप्तदशभिरस्तुवत ग्राम्याः पशवोऽसृज्यन्त बृहस्पतिरधिपतिरासीत् ॥२९॥
*ekayāstuvata prajā'adhīyanta prajāpatiradhipatirāsīt / tisṛbhirastuvata brahmāsṛjyata brahmaṇaspatiradhipatirāsīt / paṁchabhirastuvata bhūtānyasṛjyanta bhūtānāṁ patiradhipatirāsīt / saptabhirastuvata sapta ṛṣayo'sṛjyanta dhātādhipatirāsīt //28//*
*navabhirastuvata pitaro'sṛjyantāditiradhipatnyāsīt /*
*ekādaśabhirastuvata'ṛtavo'sṛjayantārttavā'adhipataya'āsan / trayodaśabhirastuvata māsā'asṛjyanta saṁvatsaro'dhipatirāsīt / paṁchadaśabhirastuvata kṣatramasṛjyatendro'dhipatirāsīt /*
*saptadaśabhirastuvata grāmyāḥ paśavo'sṛjyanta bṛhaspatiradhipatirāsīt //29//*

४. ऋतवः (Ṛtavaḥ) - य. (Yv.) १४.१५-१७

नभश्च नभस्यश्च वार्षिकावृतूऽअग्नेरन्तः- श्लेषोऽसि कल्पेतां द्यावापृथिवी कल्पन्तामापऽओषधयः कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः ।
येऽअग्नयः समनसोऽन्तरा द्यावापृथिवीऽइमे वार्षिकावृतूऽअभिकल्पमानाऽइन्द्रमिव देवाऽअभिसंविशन्तु तया देवतयांगिरस्वद् ध्रुवे सीदतम् ॥१५॥

इषश्चोर्जश्च शारदावृतूऽअग्नेरन्तः श्लेषाऽसि कल्पेतां द्यावापृथिवी कल्पन्तामापऽओषधयः कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः ।
येऽअग्नयः समनसोऽन्तरा द्यावापृथिवीऽइमे शारदावृतूऽअभिकल्पमानाऽइन्द्रमिव देवाऽअभिसंविशन्तु तया देवतयांगिरस्वद् ध्रुवे सीदतम् ॥१६॥
आयुर्मे पाहि प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्मे पाहि श्रेत्रं मे पाहि वाच्मे पिन्व मनो मे जिन्वात्मानम्प्रे पाहि ज्योतिर्मे यच्छ ॥१७॥

*nabhaścha nabhasyaścha vārṣikāvṛtū'agnerantaḥ- śleṣo'si kalpetāṁ dyāvāpṛthivī kalpantāmāpa'oṣadhayaḥ kalpantāmagnayaḥ pṛthaṅ mama jyaiṣṭhyāya savratāḥ / ye'agnayaḥ samanaso'ntarā dyāvāpṛthivī'ime vārṣikāvṛtū'abhikalpamānā'indramiva devā'abhisaṁviśantu tayā devatayāṁgirasvad dhruve sīdatam //15 //*
*iṣaśchorjaścha śāradāvṛtū'agnerantaḥ śleṣā'si kalpetāṁ dyāvāpṛthivī kalpantāmāpa'oṣadhayaḥ kalpantāmagnayaḥ pṛthaṅ mama jyaiṣṭhyāya savratāḥ / ye'agnayaḥ samanaso'ntarā dyāvāpṛthivī'ime śāradāvṛtū'abhikalpamānā'indramiva devā'abhisaṁviśantu tayā devatayāṁgirasvad dhruve sīdatam //16 //*
*āyurme pāhi prāṇaṁ me pāhyapānaṁ me pāhi vyānaṁ me pāhi chakṣurme pāhi śretraṁ me pāhi vāchmme pinva mano me jinvātmānampre pāhi jyotirme yachchha //17 //*

५. ऋभवः (Ṛbhavaḥ) - य. (Yv.) १४.२६

यवानां भागोऽस्ययवानामाधिपत्यं प्रजा स्पृताश्चतुश्चत्वारिंश स्तोमः ।
ऋभूणां भागोऽसि विश्वेषां देवानामाधिपत्यं भूतं स्पृतं त्रयस्त्रिंश स्तोमः ॥२६॥
*yavānāṁ bhāgo'syayavānāmādhipatyaṁ prajā spṛtāśchatuśchatvāriṁśa stomaḥ / ṛbhūṇāṁ bhāgo'si viśveṣāṁ devānāmādhipatyaṁ bhūtaṁ spṛtaṁ trayastriṁśa stomaḥ //26 //*

६. छन्दांसिः (Chhandāṁsiḥ) - य. (Yv.) १४.१८

मा च्छन्दः प्रमा च्छन्दः प्रतिमा च्छन्दो अस्रीवयश्छन्दः पङ्क्तिश्छन्दऽउष्णिक् छन्दो बृहती छन्दोऽनुष्टुप् छन्दो विराट् छन्दो गायत्री छन्दस्त्रिष्टुप् छन्दो जगती छन्दः ॥१८॥
*mā chchhandaḥ pramā chchhandaḥ pratimā chchhando asrīvayaśchhandaḥ paṅktiśchhanda'uṣṇik chhando bṛhatī chhando'nuṣṭup chhando virāṭ chhando gāyatrī chhandastriṣṭup chhando jagatī chhandaḥ //18 //*

७. जगदीश्वरः (Jagadīśvaraḥ) - य. (Yv.) १४.३०

नवदशभिरस्तुवत शूद्रार्य्यावसृज्येतामहोरात्रेऽअधिपत्नीऽआस्ताम्। एकविंशत्यास्तुवतैकशफाः पशवोऽसृज्यन्त वरुणोऽधिपतिरासीत्। त्रयोविंशत्यास्तुवत क्षुद्राः पशवोऽसृज्यन्त पूषाधिपतिरासीत् । पंचविंशत्यास्तुवताऽऽरणयाः पशवोऽसृजयन्त वायुरधिपतिरासीत्। सप्तविंशत्यास्तुवत द्यावापृथिवी व्यैतां वसवो रुद्राऽआदित्याऽअनुव्यायँस्तऽएवाधिपतयऽआसन् ॥३०॥
*navadaśabhirastuvata śūdrāryyāvasṛjyetāmahorātre'adhipatnī'āstām / ekaviṁśatyāstuvataikaśaphāḥ paśavo'sṛjyanta varuṇo'dhipatirāsīt / trayoviṁśatyāstuvata kṣudrāḥ paśavo'sṛjyanta pūṣādhipatirāsīt / paṁchaviṁśatyāstuvatā''raṇayāḥ paśavo'sṛjayanta vāyuradhipatirāsīt / saptaviṁśatyāstuvata dyāvāpṛthivī vyaitāṁ vasavo rudrā'ādityā'anuvyāyaṁsta'evādhipataya'āsan //30 //*

८. दम्पती (Dampatī) - य. (Yv.) १४.८

प्राणम्मे पाह्यपानम्मे पाहि व्यानम्मे पाहि चक्षुर्मऽउर्व्या विभाहि श्रोत्रम्मे श्लोकय ।
अपः पिन्वौषधीर्जिन्व द्विपादव चतुष्पात् पाहि दिवो वृष्टिमेरय ॥८॥
*prāṇamme pāhyapānamme pāhi vyānamme pāhi chakṣurma'urvyā vibhāhi śrotramme ślokaya / apaḥ pinvauṣadhīrjinva dvipādava chatuṣpāt pāhi divo vṛṣṭimeraya //8 //*

९. दिशः (Diśaḥ) - य. (Yv.) १४.१३

राज्ञ्यसि प्राची दिग्विराडसि दक्षिणा दिक् सम्राडसि प्रतीची दिक् स्वराडस्युदीची दिगधिपत्न्यसि बृहती दिक् ॥१३॥
*rājñayasi prāchī digvirāḍasi dakṣiṇā dik samrāḍasi pratīchī dik svarāḍasyudīchī digadhipatnyasi bṛhatī dik //13 //*

१०. पृथिव्यादयः (Pṛthivyādayaḥ) - य. (Yv.) १४.१९

पृथिवी छन्दोऽन्रिक्षं छन्दो द्यौश्छन्दः समाश्छन्दो नक्षत्राणि छन्दो वाक् छन्दो मनश्छन्दः कृषिश्छन्दो हिरण्यं छन्दो गौश्छन्दोऽजाच्छन्दोऽश्वश्छन्दः ॥१९॥
*pṛthivī chhando'nrikṣaṁ chhando dyauśchhandaḥ samāśchhando nakṣatrāṇi chhando vāk chhando manaśchhandaḥ kṛṣiśchhando hiraṇyaṁ chhando gauśchhando'jāchchhando'śvaśchhandaḥ //19 //*

११. प्रजापतिः (Prajāpatiḥ) - य. (Yv.) १४.३१

नवविंशत्यास्तुवत वनस्पतयोऽसृज्यन्त सोमोऽधिपतिरासीत्। एकत्रिंशतास्तुवत प्रजाऽअसृज्यन्त यवाश्चायवाश्चाधिपतयऽआसन्। त्रयस्त्रिंशतास्तुवत भूतान्यशाम्यन् प्रजापतिः परमेष्ठ्यधिपतिरासीत् ॥३१॥
*navaviṁśatyāstuvata vanaspatayo'sṛjyanta somo'dhipatirāsīt / ekatriṁśatāstuvata prajā'asṛjyanta yavāśchāyavāśchādhipataya'āsan / trayastriṁśatāstuvata bhūtānyaśāmyan prajāpatiḥ parameṣṭhyadhipatirāsīt //31 //*

१२. प्राजापत्यादयः (Prājāpatyādayaḥ) - य. (Yv.) १४.९

मूर्धा वयः प्रजापतिश्छन्दः क्षत्रं वयो मयन्दं छन्दो विष्टम्भो वयोऽधिपतिश्छन्दो विश्वकर्मा वयः परमेष्ठी छन्दो वस्तो वयो विबलं छन्दो वृष्णिर्वयो विशालं छन्दः पुरुषो वयस्तन्द्रं छन्दो व्याघ्रो वयोऽनाधृष्टं छन्दः सिंहो वयश्छदिश्छन्दः पष्ठवाड् वयो बृहती छनदऽउक्षा वयः ककुप् छन्दऽऋषभो वयः सतोबृहती छन्दः ॥९॥
*mūrdhā vayaḥ prajāpatiśchhandaḥ kṣatraṁ vayo mayandaṁ chhando viṣṭambho vayo'dhipatiśchhando viśvakarmā vayaḥ parameṣṭhī chhando vasto vayo vibalaṁ chhando vṛṣṇirvayo viśālaṁ chhandaḥ puruṣo vayastandraṁ chhando vyāghro vayo'nādhṛṣṭaṁ chhandaḥ siṁho vayaśchhadiśchhandaḥ paṣṭhavāḍ vayo bṛhatī chhanada'ukṣā vayaḥ kakup chhanda'ṛṣabho vayaḥ satobṛhatī chhandaḥ //9 //*

१३. मन्त्रोक्ताः (Mantroktāḥ) - य. (Yv.) १४.७

सजूर्ऋतुभिः सजूर्विधाभिः सजूर्देवैः सजूर्देवैर्वयोनाधैरग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह त्वा सजूर्ऋतुभिः सजूर्विधाभिः सजूर्वसुभिः सजूर्देवैर्वयोना धैरग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह त्वा सजूर्ऋतुभिः सजूर्विधाभिः सजू रुद्रैः सजूर्देवैर्वयोनाधैरग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह त्वा सजूर्ऋतुभिः सजूर्विधाभिः सजूरादित्यैः सजूर्देवैर्वयोनाधैरग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह त्वा सजूर्ऋतुभिः सजूर्विधाभिः सजूर्विश्वैर्देवैः सजूर्देवैर्वयोनाधैरग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह त्वा ।७।
*sajūṛrtubhiḥ sajūrvidhābhiḥ sajūrdevaiḥ sajūrdevairvayonādhairagnaye tvā vaiśvānarāyāśvinādhvaryū sādayatāmiha tvā sajūṛrtubhiḥ sajūrvidhābhiḥ sajūrvasubhiḥ sajūrdevairvayonā dhairagnaye tvā vaiśvānarāyāśvinādhvaryū sādayatāmiha tvā sajūṛrtubhiḥ sajūrvidhābhiḥ sajū rudraiḥ sajūrdevairvayonādhairagnaye tvā vaiśvānarāyāśvinādhvaryū sādayatāmiha tvā sajūṛrtubhiḥ sajūrvidhābhiḥ sajūrādityaiḥ sajūrdevairvayonādhairagnaye tvā vaiśvānarāyāśvinādhvaryū sādayatāmiha tvā sajūṛrtubhiḥ sajūrvidhābhiḥ sajūrviśvairdevaiḥ sajūrdevairvayonādhairagnaye tvā vaiśvānarāyāśvinādhvaryū sādayatāmiha tvā /7 /*

१४. मेधाविनः (Medhāvinaḥ) - य. (Yv.) १४.२४

अग्नेर्भागोऽसि दीक्षायाऽआधिपत्यं ब्रह्म स्पृतं त्रिवृत्स्तोमः ।
इन्द्रस्य भागोऽसि विष्णोराधिपत्यं क्षत्रं स्पृतं पंचदश स्तोमः ।
नृचक्षसां भागोऽसि धातुराधिपत्यं जनित्रं स्पृतं सप्तदश स्तोमः ।
मित्रस्य भागोऽसि वरुणस्याधिपत्यं दिवो वृष्टिर्वात स्पृतऽएकविंश स्तोमः ॥२४॥
*agnerbhāgo'si dīkṣāyā'ādhipatyaṁ brahma spṛtaṁ trivṛtstomaḥ /*
*indrasya bhāgo'si viṣṇorādhipatyaṁ kṣatraṁ spṛtaṁ paṁchadaśa stomaḥ /*
*nṛchakṣasāṁ bhāgo'si dhāturādhipatyaṁ janitraṁ spṛtaṁ saptadaśa stomaḥ /*
*mitrasya bhāgo'si varuṇasyādhipatyaṁ divo vṛṣṭirvāta spṛta'ekaviṁśa stomaḥ //24 //*

१५. वस्वादयो लिङ्गोक्ताः (Vasvādayo Liṅgoktāḥ) - य. (Yv.) १४.२५

वसूनां भागोऽसि रुद्राणामाधिपत्यं चतुष्पात् स्पृतं चतुर्विंश स्तोमः। आदित्यानां भगोऽसि मरुतामाधिपत्यं गर्भाः स्पृताः पंचविंश स्तोमः। आदित्यै भागोऽसि पूष्णऽआधिपत्यमोज स्पृतं त्रिणव स्तोमः। देवस्य सवितुर्भागोऽसि बृहस्पतेराधिपत्यं समीचीर्दिश स्पृताश्चतुष्टोम स्तोमः ॥२५॥
*vasūnāṁ bhāgo'si rudrāṇāmādhipatyaṁ chatuṣpāt spṛtaṁ chaturviṁśa stomaḥ / ādityānāṁ bhago'si marutāmādhipatyaṁ garbhāḥ spṛtāḥ paṁchaviṁśa stomaḥ / ādityai*

*bhāgo'si pūṣṇa'ādhipatyamoja spṛtaṁ triṇava stomaḥ । devasya saviturbhāgo'si bṛhaspaterādhipatyaṁ samīchīrdiśa spṛtāśchatuṣṭoma stomaḥ ॥25 ॥*

१६. वायुः (Vāyuḥ) - य. (Yv.) १४.१४

विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे ज्योतिष्ठमतीम्।
विश्वस्मै प्राणायापानाय व्यानाय विश्वं ज्योतिर्यच्छ। वायुष्टेऽधिपतिस्तया देवतयांगिरस्वद् ध्रुवा सीद ॥१४॥
*viśvakarmā tvā sādayatvantarikṣasya pṛṣṭhe jyotiṣṭhamatīm । viśvasmai prāṇāyāpānāya vyānāya viśvaṁ jyotiryachchha । vāyuṣṭe'dhipatistayā devatayāṁgirasvad dhruvā sīda ॥14 ॥*

१७. विदुषी (Viduṣī) - य. (Yv.) १४.२१-२२

मूर्द्धासि राड् ध्रुवासि धरुणा धर्त्र्यसि धरणी ।
आयुषे त्वा वर्चसे त्वा कृष्यै त्वा क्षेमाय त्वा ॥२१॥
यन्त्री राड् यन्त्र्यसि यमनी ध्रुवासि धरित्री ।
इषे त्वोर्जे त्वा रय्यै त्वा पोषाय त्वा ॥२२॥
*mūrddhāsi rāḍ dhruvāsi dharuṇā dhartrayasi dharaṇī ।*
*āyuṣe tvā varchase tvā kṛṣyai tvā kṣemāya tvā ॥21 ॥*
*yantrī rāḍ yantrayasi yamanī dhruvāsi dharitrī ।*
*iṣe tvorje tvā rayyai tvā poṣāya tvā ॥22 ॥*

१८. विद्वांसः (Vidvāṁsaḥ) - य. (Yv.) १४.१०

अनड्वान् वयः पङ्क्तिश्छन्दो धेनुर्वयो जगती छन्दस्त्र्यविर्वयस्त्रिष्टुप् छन्दो दित्यवाड् वयो विराट् छन्दः पंचाविर्वयो गायत्री छन्दस्त्रिवत्सो वयऽउष्णिक् छन्दस्तुर्य्यवाड् वयोऽनुष्टुप् छन्दः ॥१०॥
*anaḍvān vayaḥ paṅktiśchhando dhenurvayo jagatī chhandastrayavirvayastriṣṭup chhando dityavāḍ vayo virāṭ chhandaḥ paṁchāvirvayo gāyatrī chhandastrivatso vaya'uṣṇik chhandasturyyavāḍ vayo'nuṣṭup chhandaḥ ॥10 ॥*

## ६२७. विहव्यः (Vihavyaḥ)

१. प्रजापतिः (Prajāpatiḥ) - अ. (Av.) १०.५.४२-५०

यं वयं मृगयामहे तं वधै स्तृणवामहै । व्यात्ते परमेष्ठिनो ब्रह्मणापीपदाम तम् ॥४२॥
वैश्वानरस्य दंष्ट्राभ्यां हेतिस्तं समधादभि ।
इयं तं पसात्वाहुतिः समिद् देवी सहीयसी ॥४३॥
राज्ञो वरुणस्य बन्धोऽसि । सो३मुमामुष्यायणममुष्याः पुत्रमन्ने प्राणे बधान ॥४४॥
यत् ते अन्नं भुवस्पत आक्षियति पृथिवीमनु ।
तस्य नस्त्वं भुवस्पते संप्रयच्छ प्रजा पते ॥४५॥
अपो दिव्या अचायिषं रसेन समपृक्ष्महि ।
पयस्वानग्न आगमं तं मा सं सृज वर्चसा ॥४६॥
सं माग्ने वर्चसा सृज सं प्रजया समायुषा ।
विद्युर्मे अस्य देवा इन्द्रो विद्यात् सह ऋषिभिः ॥४७॥
यदग्ने अद्य मिथुना शपातो यद्वाचस्तृष्टं जनयन्त रेभाः ।
मन्योर्मनसः शरव्या३ जायते या तया विध्य हृदये यातुधानान् ॥४८॥
परा श्रृणीहि तपसा यातुधानान् पराऽग्ने रक्षो हरसा श्रृणीहि ।
पराऽर्चिषा मूरदेवांछृणीहि परासुतृपः शोशुचतः श्रृणीहि ॥४९॥
अपामस्मै वज्रं प्र हरामि चतुर्भृष्टिं शीर्षभिद्याय विद्वान् ।
सो अस्यांगानि प्र श्रृणातु सर्वा तन्मे देवा अनु जानन्तु विश्वे ॥५०॥
*yaṁ vayaṁ mṛgayāmahe taṁ vadhai stṛṇavāmahai ।*
*vyātte parameṣṭhino brahmaṇāpīpadāma tam ॥42 ॥*
*vaiśvānarasya daṁṣṭrābhyāṁ hetistaṁ samadhādabhi ।*
*iyaṁ taṁ pasātvāhutiḥ samid devī sahīyasī ॥43 ॥*
*rājño varuṇasya bandho'si ।*
*so3mumāmuṣyāyaṇamamuṣyāḥ putramanne prāṇe badhāna ॥44 ॥*
*yat te annaṁ bhuvaspata ākṣiyati pṛthivīmanu ।*

*tasya nastvaṁ bhuvaspate saṁprayachchha prajā pate ॥45॥*
*apo divyā achāyiṣaṁ rasena samapṛkṣamahi ।*
*payasvānagna āgamaṁ taṁ mā saṁ sṛja varchasā ॥46॥*
*saṁ māgne varchasā sṛja saṁ prajayā samāyuṣā ।*
*vidyurme asya devā indro vidyāt saha ṛṣibhiḥ ॥47॥*
*yadagne adya mithunā śapāto yadvāchastṛṣṭaṁ janayanta rebhāḥ ।*
*manyormanasaḥ śaravyā3 jāyate yā tayā vidhya hṛdaye yātudhānān ॥48॥*
*parā śṛṇīhi tapasā yātudhānān parā'gne rakṣo harasā śṛṇīhi ।*
*parā'rchiṣā mūradevāṁchhṛṇīhi parāsutṛpaḥ śośuchataḥ śṛṇīhi ॥49॥*
*apāmasmai vajraṁ pra harāmi chaturbhṛṣṭiṁ śīrṣabhidyāya vidvān ।*
*so asyāṁgāni pra śṛṇātu sarvā tanme devā anu jānantu viśve ॥50॥*

२. लिङ्गोक्ताः (Liṅgoktāḥ) - य. (Yv.) ३४.४६

ये नः सपत्नाऽअप ते भवन्त्विन्द्राग्निभ्यामव बाधामहे तान् ।
वसवो रुद्राऽआदित्याऽउपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन् ॥४६॥
*ye naḥ sapatnā'apa te bhavantvindrāgnibhyāmava bādhāmahe tān ।*
*vasavo rudrā'ādityā'uparispṛśaṁ mograṁ chettāramadhirājamakran ॥46॥*

३. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १०.१२८.१-९

ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तन्वं पुषेम ।
मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेम ॥१॥
मम देवा विहवे सन्तु सर्व इन्द्रवन्तो मरुतो विष्णुरग्निः ।
ममान्तरिक्षमुरुलोकमस्तु मह्यं वातः पवतां कामे अस्मिन् ॥२॥
मयि देवा द्रविणमा यजन्तां मय्याशीरस्तु मयि देवहुतिः ।
दैव्या होतारो वनुषन्त पूर्वेऽरिष्टाः स्याम तन्वा सुवीराः ॥३॥
मह्यं यजन्तु मम यानि हव्याकूतिः सत्या मनसो मे अस्तु ।
एनो मा नि गां कतमच्चनाहं विश्वे देवासो अधि वोचता नः ॥४॥
देवीः षळुर्वीरुरु नः कृणोत विश्वे देवास इह वीरयध्वम् ।
मा हास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन् ॥५॥
अग्ने मन्युं प्रतिनुदन्परेषामदब्धो गोपाः परि पाहि नस्त्वम् ।
प्रत्यंचो यन्तु निगुतः पुनस्ते३ मैषां चित्तं प्रबुधां वि नेशत् ॥६॥
धाता धातृणां भुवनस्य यस्पतिर्देवं त्रातारमभिमातिषाहम् ।
इमं यज्ञमश्विनोभा बृहस्पतिर्देवाः पान्तु यजमानं न्यर्थात् ॥७॥
उरुव्यचा नो महिषः शर्म यंसदस्मिन्हवे पुरुहूतः पुरुक्षुः ।
स नः प्रजायै हर्यश्व मृळयेन्द्र मा नो रीरिषो मा परा दाः ॥८॥
ये नः सपत्ना अप ते भवन्त्विन्द्राग्निभ्यामव बाधामहे तान् ।
वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन् ॥९॥
*mamāgne varcho vihaveṣvastu vayaṁ tvendhānāstanvaṁ puṣema ।*
*mahyaṁ namantāṁ pradiśaśchatasrastvayādhyakṣeṇa pṛtanā jayema ॥1॥*
*mama devā vihave santu sarva indravanto maruto viṣṇuragniḥ ।*
*mamāntarikṣamurulokamastu mahyaṁ vātaḥ pavatāṁ kāme asmin ॥2॥*
*mayi devā draviṇamā yajantāṁ mayyāśīrastu mayi devahutiḥ ।*
*daivyā hotāro vanuṣanta pūrve'riṣṭāḥ syāma tanvā suvīrāḥ ॥3॥*
*mahyaṁ yajantu mama yāni havyākūtiḥ satyā manaso me astu ।*
*eno mā ni gāṁ katamachchanāhaṁ viśve devāso adhi vochatā naḥ ॥4॥*
*devīḥ ṣaḷurvīruru naḥ kṛṇota viśve devāsa iha vīrayadhvam ।*
*mā hāsmahi prajayā mā tanūbhirmā radhāma dviṣate soma rājan ॥5॥*
*agne manyuṁ pratinudanpareṣāmadabdho gopāḥ pari pāhi nastvam ।*
*pratyaṁcho yantu nigutaḥ punaste3 maiṣāṁ chittaṁ prabudhāṁ vi neśat ॥6॥*
*dhātā dhātṛṇāṁ bhuvanasya yaspatirdevaṁ trātāramabhimātiṣāham ।*
*imaṁ yajñamaśvinobhā bṛhaspatirdevāḥ pāntu yajamānaṁ nyarthāt ॥7॥*
*uruvyachā no mahiṣaḥ śarma yaṁsadasminhave puruhūtaḥ purukṣuḥ ।*

*sa naḥ prajāyai haryaśva mṛḷayendra mā no rīriṣo mā parā dāḥ* //8 //
*ye naḥ sapatnā apa te bhavantvindrāgnibhyāmava bādhāmahe tān* /
*vasavo rudrā ādityā uparispṛśaṁ mograṁ chettāramadhirājamakran* //9 //

## ६२८. वीतहव्यः (केशवर्धन कामः) (Vītahavyaḥ [Keśavardhana Kāmaḥ])

१. नितत्नी वनस्पतिः (Nitatnī Vanaspatiḥ) - अ. (Av.) ६.१३६.१-३; ६.१३७.१-३

अ. (Av.) ६.१३६.१-३

देवी देव्यामधि जाता पृथिव्यामस्योषधे । तां त्वा नितत्नि केशेभ्यो दृंहणाय खनामसि ॥१॥
दृंह प्रत्नांजनयाजातांजातानु वर्षीयसस्कृधि ॥२॥
यस्ते केशोऽवपद्यते समूलो यश्च वृश्चते । इदं तं विश्वभेषज्याभि षिंचामि वीरुधा ॥३॥
*devī devyāmadhi jātā pṛthivyāmasyoṣadhe* /
*tāṁ tvā nitatni keśebhyo dṛṁhaṇāya khanāmasi* //1 //
*dṛṁha pratnāṁjanayājātāṁjātānu varṣīyasaskṛdhi* //2 //
*yaste keśo'vapadyate samūlo yaścha vṛśchate* /
*idaṁ taṁ viśvabheṣajyābhi ṣiṁchāmi vīrudhā* //3 //

अ. (Av.) ६.१३७.१-३

यां जमदग्निरखनद् दुहित्रे केशवर्धनीम्। तां वीतहव्य आभरदसितस्य गृहेभ्यः ॥१॥
अभीशुना मेया आसन् व्यामेनानुमेयाः। केशा नडाइव वर्धन्तां शीर्ष्णस्ते असिताः परि ॥२॥
दृंह मूलमाग्रं यच्छ वि मध्यं यामयौषधे। केशा नडाइव वर्धन्तां शीर्ष्णस्ते असिताः परि ॥३॥
*yāṁ jamadagnirakhanad duhitre keśavardhanīm* /
*tāṁ vītahavya ābharadasitasya gṛhebhyaḥ* //1 //
*abhīśunā meyā āsan vyāmenānumeyāḥ* /
*keśā naḍāiva vardhantāṁ śīrṣṇaste asitāḥ pari* //2 //
*dṛṁha mūlamāgraṁ yachchha vi madhyaṁ yāmayauṣadhe* /
*keśā naḍāiva vardhantāṁ śīrṣṇaste asitāḥ pari* //3 //

## ६२९. वृशो जारः (Vṛśo Jāraḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ५.२.२; ९

ऋ. (Rv.) ५.२.२

कमेतं त्वं युवते कुमारं पेषी बिभर्षि महिषी जजान ।
पूर्वीर्हि गर्भः शरदो ववर्धापश्यं जातं यदसूत माता ॥२॥
*kametaṁ tvaṁ yuvate kumāraṁ peṣī bibharṣi mahiṣī jajāna* /
*pūrvīrhi garbhaḥ śarado vavardhāpaśyaṁ jātaṁ yadasūta mātā* //2 //

ऋ. (Rv.) ५.२.९

वि ज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा ।
प्रादेवीर्मायाः सहते दुरेवाः शिशीते शृंगे रक्षसे विनिक्षे ॥९॥
*vi jyotiṣā bṛhatā bhātyagnirāvirviśvāni kṛṇute mahitvā* /
*prādevīrmāyāḥ sahate durevāḥ śiśīte śṛṁge rakṣase vinikṣe* //9 //

## ६३०. वृषगणो वासिष्ठः (Vṛṣagaṇo Vāsiṣṭhaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.९७.७-९; सा. (Sv.) ५२४; १११६-१११८

ऋ. (Rv.) ९.९७.७-९

प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन् ॥७॥
प्र हंसासस्तृपलं मन्युमच्छामादस्तं वृषगणा अयासुः ।
आङ्गूष्यं१ पवमानं सखायो दुर्मर्षं साकं प्र वदन्ति वाणम् ॥८॥
स रंहत उरुगायस्य जूतिं वृथा क्रीळन्तं मिमते न गावः ।
परीणसं कृणुते तिग्मशृंगो दिवा हरिर्ददृशे नक्तमृज्रः ॥९॥
*pra kāvyamuśaneva bruvāṇo devo devānāṁ janimā vivakti* /
*mahivrataḥ śuchibandhuḥ pāvakaḥ padā varāho abhyeti rebhan* //7 //

*pra haṁsāsastṛpalaṁ manyumachchhāmādastaṁ vṛṣagaṇā ayāsuḥ ।*
*āṅgūṣyaṁ1 pavamānaṁ sakhāyo durmarṣaṁ sākaṁ pra vadanti vāṇam ॥8॥*
*sa raṁhata urugāyasya jūtiṁ vṛthā krīḻantaṁ mimate na gāvaḥ ।*
*parīṇasaṁ kṛṇute tigmaśṛṅgo divā harirdadṛśe naktamṛjraḥ ॥9॥*

सा. (Sv.) ५२४

प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन् ॥२॥
*pra kāvyamuśaneva bruvāṇo devo devānāṁ janimā vivakti ।*
*mahivrataḥ śuchibandhuḥ pāvakaḥ padā varāho abhyeti rebhan ॥2॥*

सा. (Sv.) १११६-१११८

प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन् ॥१॥
प्र हंसासस्तृपला वग्नुमच्छामादस्तं वृषगणा अयासुः ।
अंगोषिणं पवमानं सखायो दुर्मर्षं वाणं प्र वदन्ति साकम् ॥२॥
स योजत उरुगायस्य जूतिं वृथा क्रीडन्तं मिमते न गावः ।
परीणसं कृणुते तिग्मश्रृंगो दिवा हरिर्ददृशे नक्तमृज्रः ॥३॥
*pra kāvyamuśaneva bruvāṇo devo devānāṁ janimā vivakti ।*
*mahivrataḥ śuchibandhuḥ pāvakaḥ padā varāho abhyeti rebhan ॥1॥*
*pra haṁsāsastṛpalā vagnumachchhāmādastaṁ vṛṣagaṇā ayāsuḥ ।*
*aṁgoṣiṇaṁ pavamānaṁ sakhāyo durmarṣaṁ vāṇaṁ pra vadanti sākam ॥2॥*
*sa yojata urugāyasya jūtiṁ vṛthā krīḍantaṁ mimate na gāvaḥ ।*
*parīṇasaṁ kṛṇute tigmaśṛṅgo divā harirdadṛśe naktamṛjraḥ ॥3॥*

## ६३१. वृषाकपिर् इन्द्राणी च (Vṛṣākapir Indrāṇī Cha)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.१२६.१-२३

वि हि सोतोरसृक्षत नेन्द्रं देवममंसत ।
यत्रामदद् वृषाकपिरर्यः पुष्टेषु मत्सखा विश्वस्मादिन्द्र उत्तरः ॥१॥
परा हीन्द्र धावसि वृषाकपेरति व्यथिः ।
नो अह प्र विन्दस्यन्यत्र सोमपीतये विश्वस्मादिन्द्र उत्तरः ॥२॥
किमयं त्वां वृषाकपिश्चकार हरितो मृगः ।
यस्मा इरस्यसीदु न्वर्यो वा पुष्टिमद् वसु विश्वस्मादिन्द्र उत्तरः ॥३॥
यमिमं त्वं वृषाकपिं प्रियमिन्द्राभिरक्षसि ।
श्वा न्वस्य जम्भिषदपि कर्णे वराहयुर्विश्वस्मादिन्द्र उत्तरः ॥४॥
प्रिया तष्टानि मे कपिर्व्यक्ता व्यदूदुषत् ।
शिरो न्वस्य राविषं न सुगं दुष्कृते भुवं विश्वस्मादिन्द्र उत्तरः ॥५॥
न मत्स्त्री सुभसत्तरा न सुयाशुतरा भुवत् ।
न मत् प्रतिच्यवीयसी न सक्थ्युद्यमीयसी विश्वस्मादिन्द्र उत्तरः ॥६॥
उवे अम्ब सुलाभिके यथेवांग भविष्यति ।
भसन्मे अम्ब सक्थि मे शिरो मे वीव हृष्यति विश्वस्मादिन्द्र उत्तरः ॥७॥
किं सुबाहो स्वङ्गुरे पृथुष्टो पृथुजाघने ।
किं शूरपत्नि नस्त्वमभ्यमीषि वृषाकपिं विश्वस्मादिन्द्र उत्तरः ॥८॥
अवीरामिव मामयं शरारुरभि मन्यते ।
उताहमस्मि वीरिणीन्द्रपत्नी मरुत्सखा विश्वस्मादिन्द्र उत्तरः ॥९॥
संहोत्रं स्म पुरा नारी समनं वाव गच्छति ।
वेधा ऋतस्य वीरिणीन्द्रपत्नी महीयते विश्वस्मादिन्द्र उत्तरः ॥१०॥
इन्द्राणीमासु नारिषु सुभगामहमश्रवम् ।
नह्यस्या अपरं चन जरसा मरते पतिर्विश्वस्मादिन्द्र उत्तरः ॥११॥
नाहमिन्द्राणि रारण सख्युर्वृषाकपेर्ऋते ।
यस्येदमप्यं हविः प्रियं देवेषु गच्छति विश्वस्मादिन्द्र उत्तरः ॥१२॥

वृषाकपायि रेवति सुपुत्र आदु सुस्नुषे ।
घसत् त इन्द्र उक्षणः प्रियं काचित्करं हविर्विश्वस्मादिन्द्र उत्तरः ॥१३॥
उक्ष्णो हि मे पंचदश साकं पचन्ति विंशतिम् ।
उताहमद्मि पीव इदुभा कुक्षी पृणन्ति मे विश्वस्मादिन्द्र उत्तरः ॥१४॥
वृषभो न तिग्मशृंगोऽन्तर्यूथेषु रोरुवत् ।
मन्थस्त इन्द्र शं हृदे यं ते सुनोति भावयुविश्वस्मादिन्द्र उत्तरः ॥१५॥
न सेशे यस्य रम्बतेऽन्तरा सक्थ्या३ कपृत् ।
सेदीशे यस्य रोमशं निषेदुषो विजृम्भते विश्वस्मादिन्द्र उत्तरः ॥१६॥
न सेशे यस्य रोमशं निषेदुषो विजृम्भते ।
सेदीशे यस्य रम्ब तेऽनतरा सक्थ्या३ कपृद् विश्वस्मादिन्द्र उत्तरः ॥१७॥
अयमिन्द्र वृषाकपिः परस्वन्तं हतं विदत् ।
असिं सूनां नवं चरुमादेधस्यान आचितं विश्वस्मादिन्द्र उत्तरः ॥१८॥
अयामेमि विचाकशद् विचिन्वन् दासमार्यम् ।
पिबामि पाकसुत्वनोऽभि धीरमचाकशं विश्वस्मादिन्द्र उत्तरः ॥१९॥
धन्व च यत् कृन्तत्रं च कति स्वित् ता वि योजना ।
नेदीयसो वृषाकपेऽसतमेहिं गृहाँ उप विश्वस्मादिन्द्र उत्तरः ॥२०॥
पुनरेहि वृषाकपे सुविता कल्पयावहै ।
य एष स्वप्ननंशनोऽस्तमेषि पथा पुनर्विश्वस्मादिन्द्र उत्तरः ॥२१॥
यदुदंचो वृषाकपे गृहमिन्द्राजगन्तन ।
क्व१स्य पुल्वघो मृगः कमगं जनयोपनो विश्वस्मादिन्द्र उत्तरः ॥२२॥
पर्शुर्ह नाम मानवी साकं ससूव विंशतिम् ।
भद्रं भल त्यस्या अभूद् यस्या उदरमामयद् विश्वस्मादिन्द्र उत्तरः ॥२३॥

*vi hi sotorasṛkṣata nendraṁ devamamaṁsata /*
*yatrāmadad vṛṣākapiraryaḥ puṣṭeṣu matsakhā viśvasmādindra uttaraḥ //1 //*
*parā hīndra dhāvasi vṛṣākaperati vyathiḥ /*
*no aha pra vindasyanyatra somapītaye viśvasmādindra uttaraḥ //2 //*
*kimayaṁ tvāṁ vṛṣākapiśchakāra harito mṛgaḥ /*
*yasmā irasyasīdu nva1ryo vā puṣṭimad vasu viśvasmādindra uttaraḥ //3 //*
*yamimaṁ tvaṁ vṛṣākapiṁ priyamindrābhirakṣasi /*
*śvā nvasya jambhiṣadapi karṇe varāhayurviśvasmādindra uttaraḥ //4 //*
*priyā taṣṭāni me kapirvyaktā vyadūduṣat /*
*śiro nvasya rāviṣaṁ na sugaṁ duṣkṛte bhuvaṁ viśvasmādindra uttaraḥ //5 //*
*na matstrī subhasattarā na suyāśutarā bhuvat /*
*na mat pratichyavīyasī na sakthyudyamīyasī viśvasmādindra uttaraḥ //6 //*
*uve amba sulābhike yathevāṁga bhaviṣyati /*
*bhasanme amba sakthi me śiro me vīva hṛṣyati viśvasmādindra uttaraḥ //7 //*
*kiṁ subāho svaṅgure pṛthuṣṭo pṛthujāghane /*
*kiṁ śūrapatni nastvamabhyamīṣi vṛṣākapiṁ viśvasmādindra uttaraḥ //8 //*
*avīrāmiva māmayaṁ śarārurabhi manyate /*
*utāhamasmi vīriṇīndrapatnī marutsakhā viśvasmādindra uttaraḥ //9 //*
*saṁhotraṁ sma purā nārī samanaṁ vāva gachchhati /*
*vedhā ṛtasya vīriṇīndrapatnī mahīyate viśvasmādindra uttaraḥ //10 //*
*indrāṇīmāsu nāriṣu subhagāmahamaśravam /*
*nahyasyā aparaṁ chana jarasā marate patirviśvasmādindra uttaraḥ //11 //*
*nāhamindrāṇi rāraṇa sakhyurvṛṣākaperṛte /*
*yasyedamapyaṁ haviḥ priyaṁ deveṣu gachchhati viśvasmādindra uttaraḥ //12 //*
*vṛṣākapāyi revati suputra ādu susnuṣe /*
*ghasat ta indra ukṣaṇaḥ priyaṁ kāchitkaraṁ havirviśvasmādindra uttaraḥ //13 //*
*ukṣaṇo hi me paṁchadaśa sākaṁ pachanti viṁśatim /*
*utāhamadmi pīva idubhā kukṣī pṛṇanti me viśvasmādindra uttaraḥ //14 //*
*vṛṣabho na tigmaśṛṁgo'rntyūtheṣu roruvat /*

*manthasta indra śaṁ hṛde yaṁ te sunoti bhāvayuviśvasmādindra uttaraḥ ॥15॥*
*na seśe yasya rambate'ntarā sakthyā3 kapṛt ।*
*sedīśe yasya romaśaṁ niṣeduṣo vijṛmbhate viśvasmādindra uttaraḥ ॥16॥*
*na seśe yasya romaśaṁ niṣeduṣo vijṛmbhate ।*
*sedīśe yasya ramba te'natarā sakthyā3 kapṛd viśvasmādindra uttaraḥ ॥17॥*
*ayamindra vṛṣākapiḥ parasvantaṁ hataṁ vidat ।*
*asiṁ sūnāṁ navaṁ charumādedhasyāna āchitaṁ viśvasmādindra uttaraḥ ॥18॥*
*ayāmemi vichākaśad vichinvan dāsamāryam ।*
*pibāmi pākasutvano'bhi dhīramachākaśaṁ viśvasmādindra uttaraḥ ॥19॥*
*dhanva cha yat kṛntatraṁ cha kati svit tā vi yojanā ।*
*nedīyaso vṛṣākape'satamehiṁ gṛhām̐ upa viśvasmādindra uttaraḥ ॥20॥*
*punarehi vṛṣākape suvitā kalpayāvahai ।*
*ya eṣa svapnanaṁśano'stameṣi pathā punarviśvasmādindra uttaraḥ ॥21॥*
*yadudaṁcho vṛṣākape gṛhamindrājagantana ।*
*kva1sya pulvagho mṛgaḥ kamagaṁ janayopano viśvasmādindra uttaraḥ ॥22॥*
*parśurha nāma mānavī sākaṁ sasūva viṁśatim ।*
*bhadraṁ bhala tyasyā abhūd yasyā udaramāmayad viśvasmādindra uttaraḥ ॥23॥*

## ६३२. वृषाकपिर् ऐन्द्र इन्द्राणीन्द्रश्च (Vṛṣākapir Aindra Indrāṇīndraścha)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.८६.१-२३

वि हि सोतोरसृक्षत नेन्द्रं देवममंसत ।
यत्रामदद्वृषाकपिरर्यः पुष्टेषु मत्सखा विश्वस्मादिन्द्र उत्तरः ॥१॥
परा हीन्द्र धावसि वृषाकपेरति व्यथिः ।
नो अह प्र विन्दस्यन्यत्र सोमपीतये विश्वस्मादिन्द्र उत्तरः ॥२॥
किमयं त्वां वृषाकपिश्चकार हरितो मृगः ।
यस्मा इरस्यसीदु न्व१र्यो वा पुष्टिमद्वसु विश्वस्मादिन्द्र उत्तरः ॥३॥
यमिमं त्वं वृषाकपिं प्रियमिन्द्राभिरक्षसि ।
श्वा न्वस्य जम्भिषदपि कर्णे वराहयुर्विश्वस्मादिन्द्र उत्तरः ॥४॥
प्रिया तष्टानि मे कपिर्व्यक्ता व्यदूदुषत् ।
शिरो न्वस्य राविषं न सुगं दुष्कृते भुवं विश्वस्मादिन्द्र उत्तरः ॥५॥
न मत्स्त्री सुभसत्तरा न सुयाशुतारा भुवत् ।
न मत्प्रतिच्यवीयसी न सक्थ्युद्यमीयसी विश्वस्मादिन्द्र उत्तरः ॥६॥
उवे अम्ब सुलाभिके यथेवांग भविष्यति ।
भसन्मे अम्ब सक्थि मे शिरो मे वीव हृष्यति विश्वस्मादिन्द्र उत्तरः ॥७॥
किं सुबाहो स्वङ्गुरे पृथुष्टो पृथुजाघने ।
किं शूरपत्नि नस्त्वमभ्यमीषि वृषाकपिं विश्वस्मादिन्द्र उत्तरः ॥८॥
अवीरामिव मामयं शरारुरभि मन्यते ।
उताहमस्मि वीरिणीन्द्रपत्नी मरुत्सखा विश्वस्मादिन्द्र उत्तरः ॥९॥
संहोत्रं स्म पुरा नारी समनं वाव गच्छति ।
वेधा ऋतस्य वीरिणीन्द्रपत्नी महीयते विश्वस्मादिन्द्र उत्तरः ॥१०॥
इन्द्राणीमासु नारिषु सुभगामहमश्रवम् ।
नह्यस्या अपरं चन जरसा मरते पतिर्विश्वस्मादिन्द्र उत्तरः ॥११॥
नाहमिन्द्राणि रारण सख्युर्वृषाकपेर्ऋते ।
यस्येदमप्यं हविः प्रियं देवेषु गच्छति विश्वस्मादिन्द्र उत्तरः ॥१२॥
वृषाकपायि रेवति सुपुत्रं आदु सुस्नुषे ।
घसत्त इन्द्र उक्षणः प्रियं काचित्करं हविर्विश्वस्मादिन्द्र उत्तरः ॥१४॥
वृषभो न तिग्मशृंगोऽन्तर्यूथेषु रोरुवत् ।
मन्थस्त इन्द्र शं हृदे यं ते सुनोति भावयुर्विश्वस्मादिन्द्र उत्तरः ॥१५॥
न सेशे यस्य रम्बतेऽन्तरा सक्थ्या३ कपृत् ।
सेदीशे यस्य रोमशं निषेदुषो विजृम्भते विश्वस्मादिन्द्र उत्तरः ॥१६॥

न सेशे यस्य रोमशं निषेदुषो विजृम्भते ।
सेदीशे यस्य रम्बतेऽन्तरा सक्थ्या३ कपृद्विश्वस्मादिन्द्र उत्तरः ॥१७॥
अयमिन्द्र वृषाकपिः परस्वन्तं हतं विदत् ।
असिं सूनां नवं चरुमादेधस्यान आचितं विश्वस्मादिन्द्र उत्तरः ॥१८॥
अयमेमि विचाकशद्विचिन्वन्दासमार्यम् ।
पिबामि पाकसुत्वनोऽभि धीरमचाकशं विश्वस्मादिन्द्र उत्तरः ॥१।
धन्व च यत्कृन्तत्रं च कति स्वित्ता वि योजना ।
नेदीयसो वृषाकपेऽस्तमेहि गृहाँ उप विश्वस्मादिन्द्र उत्तरः ॥२०॥
पुनरेहि वृषाकपे सुविता कल्पयावहै ।
य एष स्वप्नंशनोऽस्तमेषि पथा पुनर्विश्वस्मादिन्द्र उत्तरः ॥२१॥
यदुदंचो वृषाकपे गृहमिन्द्राजगन्तन ।
क्व१स्य पुल्वघो मृगः कमगंजनयोपनो विश्वस्मादिन्द्र उत्तरः ॥२२॥
पर्शुर्ह नाम मानवी साकं ससूव विंशतिम् ।
भद्रं भल त्यस्या अभूद्यस्या उदरमामयद्विश्वस्मादिन्द्र उत्तरः ॥२३॥
*vi hi sotorasṛkṣata nendraṁ devamamaṁsata ।*
*yatrāmadadvṛṣākarpiraryaḥ puṣṭeṣu matsakhā viśvasmādindra uttaraḥ ॥1॥*
*parā hīndra dhāvasi vṛṣākaperati vyathiḥ ।*
*no aha pra vindasyanyatra somapītaye viśvasmādindra uttaraḥ ॥2॥*
*kimayaṁ tvāṁ vṛṣākapiśchakāra harito mṛgaḥ ।*
*yasmā irasyasīdu nva1ryo vā puṣṭimadvasu viśvasmādindra uttaraḥ ॥3॥*
*yamimaṁ tvaṁ vṛṣākapiṁ priyamindrābhirakṣasi ।*
*śvā nvasya jambhiṣadapi karṇe varāhayurviśvasmādindra uttaraḥ ॥4॥*
*priyā taṣṭāni me kapirvyaktā vyadūduṣat ।*
*śiro nvasya rāviṣaṁ na sugaṁ duṣkṛte bhuvaṁ viśvasmādindra uttaraḥ ॥5॥*
*na matstrī subhasattarā na suyāśutārā bhuvat ।*
*na matpratichyavīyasī na sakthyudyamīyasī viśvasmādindra uttaraḥ ॥6॥*
*uve amba sulābhike yathevāṁga bhaviṣyati ।*
*bhasanme amba sakthi me śiro me vīva hṛṣyati viśvasmādindra uttaraḥ ॥7॥*
*kiṁ subāho svaṅgure pṛthuṣṭo pṛthujāghane ।*
*kiṁ śūrapatni nastvamabhyamīṣi vṛṣākapiṁ viśvasmādindra uttaraḥ ॥8॥*
*avīrāmiva māmayaṁ śarārurabhi manyate ।*
*utāhamasmi vīriṇīndrapatnī marutsakhā viśvasmādindra uttaraḥ ॥9॥*
*saṁhotraṁ sma purā nārī samanaṁ vāva gachchhati ।*
*vedhā ṛtasya vīriṇīndrapatnī mahīyate viśvasmādindra uttaraḥ ॥10॥*
*indrāṇīmāsu nāriṣu subhagāmahamaśravam ।*
*nahyasyā aparaṁ chana jarasā marate patirviśvasmādindra uttaraḥ ॥11॥*
*nāhamindrāṇi rāraṇa sakhyurvṛṣākaperṛte ।*
*yasyedamapyaṁ haviḥ priyaṁ deveṣu gachchhati viśvasmādindra uttaraḥ ॥12॥*
*vṛṣākapāyi revati suputraṁ ādu susnuṣe ।*
*ghasatta indra ukṣaṇaḥ priyaṁ kāchitkaraṁ havirviśvasmādindra uttaraḥ ॥14॥*
*vṛṣabho na tigmaśṛṁgo'ntaryūtheṣu roruvat ।*
*manthasta indra śaṁ hṛde yaṁ te sunoti bhāvayurviśvasmādindra uttaraḥ ॥15॥*
*na seśe yasya rambate'ntarā sakthyā3 kapṛt ।*
*sedīśe yasya romaśaṁ niṣeduṣo vijṛmbhate viśvasmādindra uttaraḥ ॥16॥*
*na seśe yasya romaśaṁ niṣeduṣo vijṛmbhate ।*
*sedīśe yasya rambate'ntarā sakthyā3 kapṛdviśvasmādindra uttaraḥ ॥17॥*
*ayamindra vṛṣākapiḥ parasvantaṁ hataṁ vidat ।*
*asiṁ sūnāṁ navaṁ charumādedhasyāna āchitaṁ viśvasmādindra uttaraḥ ॥18॥*
*ayamemi vichākaśadvichinvandāsamāryam ।*
*pibāmi pākasutvano'bhi dhīramachākaśaṁ viśvasmādindra uttaraḥ ॥1।*
*dhanva cha yatkṛntatraṁ cha kati svittā vi yojanā ।*
*nedīyaso vṛṣākape'stamehi gṛhām̐ upa viśvasmādindra uttaraḥ ॥20॥*
*punarehi vṛṣākape suvitā kalpayāvahai ।*

*ya eṣa svapnanaṁśano'stameṣi pathā punarviśvasmādindra uttaraḥ ॥21॥*
*yadudaṁcho vṛṣākape gṛhamindrājagantana ।*
*kva1sya pulvagho mṛgaḥ kamagaṁjanayopano viśvasmādindra uttaraḥ ॥22॥*
*parśurha nāma mānavī sākaṁ sasūva viṁśatim ।*
*bhadraṁ bhala tyasyā abhūdyasyā udaramāmayadviśvasmādindra uttaraḥ ॥23॥*

### ६३३. वृषागिरो महाराजस्य पुत्रभूता वार्षागिरा - ऋज्राश्व-अम्बरीष-सहदेव भयमान सुराधसः (Vṛṣāgiro Mahārājasya Putrabhūtā Vārṣāgirā - Ṛjrāśva-Ambarīṣa-Sahadeva Bhayamāna Surādhasaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १.१००.१-१९

स यो वृषा वृष्ण्येभिः समोका महो दिवः पृथिव्याश्च सम्राट् ।
सतीनसत्वा हव्यो भरेषु मरुत्वान्नो भवत्विन्द्र ऊती ॥१॥
यस्यानाप्तः सूर्यस्येव यामो भरेभरे वृत्रहा शुष्मो अस्ति ।
वृषन्तमः सखिभिः स्वेभिरेवैर्मरुत्वान्नो भवत्विन्द्र ऊती ॥२॥
दिवो न यस्य रेतसो दुघानाः पन्थासो यन्ति शवसापरीताः ।
तरद्द्वेषाः सासहिः पौंस्येभिर्मरुत्वान्नो भवत्विन्द्र ऊती ॥३॥
सो अंगिरोभिरंगिरस्तमो भूद्वृषा वृषभिः सखिभिः सखा सन् ।
ऋग्मिभिऋग्मी गातुभिर्ज्येष्ठो मरुत्वान्नो भवत्विन्द्र ऊती ॥४॥
स सूनुभिर्न रुद्रेभिऋभ्वा नृषाह्यो सासह्वाँ अमित्रान् ।
सनीळेभिः श्रवस्यानि तूर्वन्मरुत्वान्नो भवत्विन्द्र ऊती ॥५॥
स मन्युमीः समदनस्य कर्तास्माकेभिर्नृभिः सूर्यं सनत् ।
अस्मिन्नहन्त्सत्पतिः पुरुहूतो मरुत्वान्नो भवत्विन्द्र ऊती ॥६॥
तमूतयो रणयंछूरसातौ तं क्षेमस्य क्षितयः कृण्वत त्राम् ।
स विश्वस्य करुणस्येश एको मरुत्वान्नो भवत्विन्द्र ऊती ॥७॥
तमप्सन्त शवस उत्सवेषु नरो नरमवसे तं धनाय ।
सो अन्धे चित्तमसि ज्योतिर्विदन्मरुत्वान्नो भवत्विन्द्र ऊती ॥८॥
स सव्येन यमति व्राधतश्चित्स दक्षिणे संगृभीता कृतानि ।
स कीरिणा चित्सनिता धनानि मरुत्वान्नो भवत्विन्द्र ऊती ॥९॥
स ग्रामेभिः सनिता स रथेभिर्विदे विश्वाभिः कृष्टिभिर्न्व१द्य ।
स पौंस्येभिरभिभूरशस्तीर्मरुत्वान्नो भवत्विन्द्र ऊती ॥१०॥
स जामिभिर्यत्समजाति मीळ्हेऽजामिभिर्वा पुरुहूत एवैः ।
अपां तोकस्य तनयस्य जेषे मरुत्वान्नो भवत्विन्द्र ऊती ॥११॥
स वज्रभृद्दस्युहा भीम उग्रः सहस्रचेताः शतनीथ ऋभ्वा ।
चम्रीषो न शवसा पांचजन्यो मरुत्वान्नो भवत्विन्द्र ऊती ॥१२॥
तस्य वज्रः क्रन्दति स्मत्स्वर्षा दिवो न त्वेषो रवथः शिमीवान् ।
तं सचन्ते सनयस्तं धनानि मरुत्वान्नो भवत्विन्द्र ऊती ॥१३॥
यस्याजस्रं शवसा मानमुक्थं परिभुजद्रोदसी विश्वतः सीम् ।
स परिषत्क्रतुभिर्मन्दसानो मरुत्वान्नो भवत्विन्द्र ऊती ॥१४॥
न यस्य देवा देवता न मर्ता आपश्चन शवसो अन्तमापुः ।
स प्ररिक्वा त्वक्षसा क्ष्मो दिवश्च मरुत्वान्नो भवत्विन्द्र ऊती ॥१५॥
रोहिच्छ्यावा सुमदंशुर्ललामीर्द्युक्षा राय ऋज्राश्वस्य ।
वृषण्वन्तं बिभ्रती धूर्षु रथं मन्द्रा चिकेत नाहुषीषु विक्षु ॥१६॥
एतत्यत्त इन्द्र वृष्ण उक्थं वार्षागिरा अभि गृणन्ति राधः ।
ऋज्राश्वः प्रष्टिभिरम्बरीषः सहदेवो भयमानः सुराधाः ॥१७॥
दस्यूञ्छिम्यूँश्च पुरुहूत एवैर्हत्वा पृथिव्यां शर्वा नि बर्हीत् ।
सनत्क्षेत्रं सखिभिः श्वित्न्येभिः सनत्सूर्यं सनदपः सुवज्रः ॥१८॥
विश्वाहेन्द्रो अधिवक्ता नो अस्त्वपरिह्वृताः सनुयाम वाजम् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥१९॥

*sa yo vṛṣā vṛṣṇyebhiḥ samokā maho divaḥ pṛthivyāścha samrāṭ ।*
*satīnasatvā havyo bhareṣu marutvānno bhavatvindra ūtī ॥1 ॥*
*yasyānāptaḥ sūryasyeva yāmo bharebhare vṛtrahā śuṣmo asti ।*
*vṛṣantamaḥ sakhibhiḥ svebhirevairmarutvānno bhavatvindra ūtī ॥2 ॥*
*divo na yasya retaso dughānāḥ panthāso yanti śavasāparītāḥ ।*
*taraddveṣāḥ sāsahiḥ pauṁsyebhirmarutvānno bhavatvindra ūtī ॥3 ॥*
*so aṁgirobhiraṁgirastamo bhūdvṛṣā vṛṣabhiḥ sakhibhiḥ sakhā san ।*
*ṛgmibhirṛgmī gātubhirjyeṣtho marutvānno bhavatvindra ūtī ॥4 ॥*
*sa sūnubhirna rudrebhirṛbhvā nṛṣāhyo sāsahvāṁ amitrān ।*
*sanīḷebhiḥ śravasyāni tūrvanmarutvānno bhavatvindra ūtī ॥5 ॥*
*sa manyumīḥ samadanasya kartāsmākebhirnṛbhiḥ sūryaṁ sanat ।*
*asminnahantsatpatiḥ puruhūto marutvānno bhavatvindra ūtī ॥6 ॥*
*tamūtayo raṇayaṁchhūrasātau taṁ kṣemasya kṣitayaḥ kṛṇvata trām ।*
*sa viśvasya karuṇasyeśa eko marutvānno bhavatvindra ūtī ॥7 ॥*
*tamapsanta śavasa utsaveṣu naro naramavase taṁ dhanāya ।*
*so andhe chittamasi jyotirvidanmarutvānno bhavatvindra ūtī ॥8 ॥*
*sa savyena yamati vrādhataśchitsa dakṣiṇe saṁgṛbhītā kṛtāni ।*
*sa kīriṇā chitsanitā dhanāni marutvānno bhavatvindra ūtī ॥9 ॥*
*sa grāmebhiḥ sanitā sa rathebhirvide viśvābhiḥ kṛṣṭibhirnva1dya ।*
*sa pauṁsyebhirabhibhūraśastīrmarutvānno bhavatvindra ūtī ॥10 ॥*
*sa jāmibhiryatsamajāti mīḷahe'jāmibhirvā puruhūta evaiḥ ।*
*apāṁ tokasya tanayasya jeṣe marutvānno bhavatvindra ūtī ॥11 ॥*
*sa vajrabhṛddasyuhā bhīma ugraḥ sahasrachetāḥ śatanītha ṛbhvā ।*
*chamrīṣo na śavasā pāṁchajanyo marutvānno bhavatvindra ūtī ॥12 ॥*
*tasya vajraḥ krandati smatsvarṣā divo na tveṣo ravathaḥ śimīvān ।*
*taṁ sachante sanayastaṁ dhanāni marutvānno bhavatvindra ūtī ॥13 ॥*
*yasyājasraṁ śavasā mānamukthaṁ paribhujadrodasī viśvataḥ sīm ।*
*sa pariṣatkratubhirmandasāno marutvānno bhavatvindra ūtī ॥14 ॥*
*na yasya devā devatā na martā āpaśchana śavaso antamāpuḥ ।*
*sa prarikvā tvakṣasā kṣamo divaścha marutvānno bhavatvindra ūtī ॥15 ॥*
*rohichchhyāvā sumadaṁśurlalāmīrdyukṣā rāya ṛjrāśvasya ।*
*vṛṣaṇvantaṁ bibhratī dhūrṣu rathaṁ mandrā chiketa nāhuṣīṣu vikṣu ॥16 ॥*
*etatyatta indra vṛṣṇa ukthaṁ vārṣāgirā abhi gṛṇanti rādhaḥ ।*
*ṛjrāśvaḥ praṣṭibhirambarīṣaḥ sahadevo bhayamānaḥ surādhāḥ ॥17 ॥*
*dasyūñchhimyūṁścha puruhūta evairhatvā pṛthivyāṁ śarvā ni barhīt ।*
*sanatkṣetraṁ sakhibhiḥ śvitnyebhiḥ sanatsūryaṁ sanadapaḥ suvajraḥ ॥18 ॥*
*viśvāhendro adhivaktā no astvaparihvṛtāḥ sanuyāma vājam ।*
*tanno mitro varuṇo māmahantāmaditiḥ sindhuḥ pṛthivī uta dyauḥ ॥19 ॥*

## ६३४. वृषाणकः (Vṛṣāṇakaḥ)

१. केशिनः (Keśinaḥ) - ऋ. (Rv.) १०.१३६.४

अन्तरिक्षेण पतति विश्वा रूपावचाकशत्। मुनिर्देवस्यदेवस्य सौकृत्याय सखा हितः ॥४॥
*antarikṣeṇa patati viśvā rūpāvachākaśat ।*
*munirdevasyadevasya saukṛtyāya sakhā hitaḥ ॥4 ॥*

## ६३५. वृहदुक्थो वामदेव्यः (Vṛhaduktho Vāmadevyaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.५५.१-८

दूरे तन्नाम गुह्यं पराचैर्यत्त्वा भीते अह्वयेतां वयोधै ।
उदस्तभनाः पृथिवीं द्यामभीके भ्रातुः पुत्रान्मघवन्तित्विषाणः ॥१॥
महत्तन्नाम गुह्यं पुरुस्पृग्येन भूतं जनयो येन भव्यम् ।
प्रत्नं जातं ज्योतिर्यदस्य प्रियं प्रियाः समविशन्त पंच ॥२॥
आ रोदसी अपृणादोत मध्यं पंच देवाँ ऋतुशः सप्तसप्त ।
चतुस्त्रिंशता पुरुधा वि चष्टे सरूपेण ज्योतिषा विव्रतेन ॥३॥

यदुष औच्छः प्रथमा विभानामजनयो येन पुष्टस्य पुष्टम् ।
यत्ते जामित्वमवरं परस्या महन्महत्या असुरत्वमेकम् ॥४॥
विधुं दद्राणं समने बहूनां युवानं सन्तं पलितो जगार ।
देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान ॥५॥
शाक्मना शाको अरुणः सुपर्ण आ यो महः शूरः सनादनीळः ।
यच्चिकेत सत्यमित्तन्न मोघं वसु स्पार्हमुत जेतोत दाता ॥६॥
ऐभिर्ददे वृष्ण्या पौंस्यानि येभिरौक्षद्वृत्रहत्याय वज्री ।
ये कर्मणः क्रियमाणस्य मह्न ऋतेकर्ममुदजायन्त देवाः ॥७॥
युजा कर्माणि जनयन्विश्वौजा अशस्तिहा विश्वमनास्तुराषाट् ।
पीत्वी सोमस्य दिव आ वृधानः शूरो निर्युधाधमद्दस्यून् ॥८॥

*dūre tannāma guhyaṁ parāchairyattvā bhīte ahvayetāṁ vayodhai /*
*udastabhanāḥ pṛthivīṁ dyāmabhīke bhrātuḥ putrānmaghavantitviṣāṇaḥ //1//*
*mahattannāma guhyaṁ puruspṛgyena bhūtaṁ janayo yena bhavyam /*
*pratnaṁ jātaṁ jyotiryadasya priyaṁ priyāḥ samaviśanta paṁcha //2//*
*ā rodasī apṛṇādota madhyaṁ paṁcha devām̐ ṛtuśaḥ saptasapta /*
*chatustriṁśatā purudhā vi chaṣṭe sarūpeṇa jyotiṣā vivratena //3//*
*yaduṣa auchchhaḥ prathamā vibhānāmajanayo yena puṣṭasya puṣṭam /*
*yatte jāmitvamavaraṁ parasyā mahanmahatyā asuratvamekam //4//*
*vidhuṁ dadrāṇaṁ samane bahūnāṁ yuvānaṁ santaṁ palito jagāra /*
*devasya paśya kāvyaṁ mahitvādyā mamāra sa hyaḥ samāna //5//*
*śākmanā śāko aruṇaḥ suparṇa ā yo mahaḥ śūraḥ sanādanīḻaḥ /*
*yachchiketa satyamittanna moghaṁ vasu spārhamuta jetota dātā //6//*
*aibhirdade vṛṣṇyā pauṁsyāni yebhiraukṣadvṛtrahatyāya vajrī /*
*ye karmaṇaḥ kriyamāṇasya mahna ṛtekarmamudajāyanta devāḥ //7//*
*yujā karmāṇi janayanviśvaujā aśastihā viśvamanāsturāṣāṭ /*
*pītvī somasya diva ā vṛdhānaḥ śūro niryudhādhamaddasyūn //8//*

२. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १०.५६.१-७

इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा सं विशस्व ।
संवेशने तन्व१श्चरुरेधि प्रियो देवानां परमे जनित्रे ॥१॥
तनूष्टे वाजिन्तन्वं१ नयन्ती वाममस्मभ्यं धातु शर्म तुभ्यम् ।
अह्रुतो महो धरुणाय देवान्दिवीव ज्योतिः स्वमा भिमीयाः ॥२॥
वाज्यसि वाजिनेना सुवेनीः सुवितः स्तोमं सुवितो दिवं गाः ।
सुवितो धर्म प्रथमानु सत्या सुवितो देवान्त्सुवितोऽनु पत्म ॥३॥
महिम्न एषां पितरश्चनेशिरे देवा देवेष्वदधुरपि क्रतुम् ।
समविव्यचुरुत यान्यत्विषुरैषां तनूषु नि विविशुः पुनः ॥४॥
सहोभिर्विश्वं परि चक्रमू रजः पूर्वा धामान्यमिता मिमानाः ।
तनू षु विश्वा भुवना नि येमिरे प्रासारयन्त पुरुध प्रजा अनु ॥५॥
द्विधा सूनवोऽसुरं स्वर्विदमास्थापयन्त तृतीयेन कर्मणा ।
स्वां प्रजां पितरः पित्र्यं सह आवरेष्वदधुस्तन्तुमाततम् ॥६॥
नावा न क्षोदः प्रदिशः पृथिव्याः स्वस्तिभिरति दुर्गाणि विश्वा ।
स्वां प्रजां बृहदुक्थो महित्वावरेष्वदधादा परेषु ॥७॥

*idaṁ ta ekaṁ para ū ta ekaṁ tṛtīyena jyotiṣā saṁ viśasva /*
*saṁveśane tanva1ścharuredhi priyo devānāṁ parame janitre //1//*
*tanūṣṭe vājintanvaṁ1 nayantī vāmamasmabhyaṁ dhātu śarma tubhyam /*
*ahruto maho dharuṇāya devāndivīva jyotiḥ svamā bhimīyāḥ //2//*
*vājyasi vājinenā suvenīḥ suvitaḥ stomaṁ suvito divaṁ gāḥ /*
*suvito dharma prathamānu satyā suvito devāntsuvito'nu patma //3//*
*mahimna eṣāṁ pitaraśchaneśire devā deveṣvadadhurapi kratum /*
*samavivyachuruta yānyatviṣuraiṣāṁ tanūṣu ni viviśuḥ punaḥ //4//*
*sahobhirviśvaṁ pari chakramū rajaḥ pūrvā dhāmānyamitā mimānāḥ /*

*tanū ṣu viśvā bhuvanā ni yemire prāsārayanta purudha prajā anu //5 //*
*dvidhā sūnavo'suraṁ svarvidamāsthāpayanta tṛtīyena karmaṇā /*
*svāṁ prajāṁ pitaraḥ pitrayaṁ saha āvareṣvadadhustantumātatam //6 //*
*nāvā na kṣodaḥ pradiśaḥ pṛthivyāḥ svastibhirati durgāṇi viśvā /*
*svāṁ prajāṁ bṛhaduktho mahitvāvareṣvadadhādā pareṣu //7 //*

## ६३६. वृहन्मतिः (Vṛhanmatiḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.३९.१-६; ९.४०.१-६

ऋ. (Rv.) ९.३९.१-६

आशुरर्ष बृहन्मते परि प्रियेण धाम्ना यत्र देवा इति ब्रवन् ॥१॥
परिष्कृण्वन्ननिष्कृतं जनाय यातयन्निषः। वृष्टिं दिवः परि स्रव ॥२॥
सुत एति पवित्र आ त्विषिं दधान ओजसा। विचक्षाणो विरोचयन् ॥३॥
अयं स यो दिवस्परि रघुयामा पवित्र आ। सिन्धोरूर्मा व्यक्षरत् ॥४॥
आविवासन् परावतो अथो अर्वावतः सुतः। इन्द्राय सिच्यते मधु। ॥५॥
समीचीना अनूषत हरि हिन्वन्त्यद्रिभिः। योनावृतस्य सीदत ॥६॥
*āśurarṣa bṛhanmate pari priyeṇa dhāmnā yatra devā iti bravan //1 //*
*pariṣkṛṇvannaniṣkṛtaṁ janāya yātayanniṣaḥ / vṛṣṭiṁ divaḥ pari srava //2 //*
*suta eti pavitra ā tviṣiṁ dadhāna ojasā / vichakṣāṇo virochayan //3 //*
*ayaṁ sa yo divaspari raghuyāmā pavitra ā / sindhorūrmā vyakṣarat //4 //*
*āvivāsan parāvato atho arvāvataḥ sutaḥ / indrāya sichyate madhu / //5 //*
*samīchīnā anūṣata hari hinvantyadribhiḥ / yonāvṛtasya sīdata //6 //*

ऋ. (Rv.) ९.४०.१-६

पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः। शुम्भन्ति विप्रं धीतिभिः ॥१॥
आ योनिमरुणो रुहद्गमदिन्द्रं वृषा सुतः। ध्रुवे सदसि सीदति ॥२॥
नू नो रयिं महामिन्द्रोऽस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणम् ॥३॥
विश्वा सोम पवमान द्युम्नानीन्दवा भर। विदाः सहस्रिणीरिषः ॥४॥
स नः पुनान आ भर रयिं स्तोत्रे सुवीर्यम्। जरितुर्वर्धया गिरः ॥५॥
पुनान इन्दवा भर सोमं द्विबर्हसं रयिम्। वृषन्निन्दो न उक्थ्यम् ॥६॥
*punāno akramīdabhi viśvā mṛdho vicharṣaṇiḥ / śumbhanti vipraṁ dhītibhiḥ //1 //*
*ā yonimaruṇo ruddadgamadindraṁ vṛṣā sutaḥ / dhruve sadasi sīdati //2 //*
*nū no rayiṁ mahāmindro'smabhyaṁ soma viśvataḥ / ā pavasva sahasriṇam //3 //*
*viśvā soma pavamāna dyumnānīndavā bhara / vidāḥ sahasriṇīriṣaḥ //4 //*
*sa naḥ punāna ā bhara rayiṁ stotre suvīryam / jariturvardhayā giraḥ //5 //*
*punāna indavā bhara somaṁ dvibarhasaṁ rayim / vṛṣannindo na ukyathm //6 //*

## ६३७. वृहच्छुक्रः (Vṛhachchhukraḥ)

१. पृथिव्यादयो मन्त्रोक्ताः (Pṛthivyādayo Mantroktāḥ) - अ. (Av.) ६.५३.१-३

द्यौश्च म इदं पृथिवी च प्रचेतसौ शुक्रो बृहन् दक्षिणया पिपर्तु ।
अनु स्वधा चिकितां सोमो अग्निर्वायुर्नः पातु सविता भगश्च ॥१॥
पुनः प्राणः पुनरात्मा न ऐतु पुनश्चक्षुः पुनरसुर्न ऐतु ।
वैश्वानरो नो अदब्धस्तनूपा अन्तस्तिष्ठाति दुरितानि विश्वा ॥२॥
सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सं शिवेन ।
त्वष्टा नो अत्र वरीयः कृणोत्वनु नो मार्ष्टु तन्वो३ यद् विरिष्टम् ॥३॥
*dyauścha ma idaṁ pṛthivī cha prachetasau śukro bṛhan dakṣiṇayā pipartu /*
*anu svadhā chikitāṁ somo agnirvāyurnaḥ pātu savitā bhagaścha //1 //*
*punaḥ prāṇaḥ punarātmā na aitu punaśchakṣuḥ punarasurna aitu /*
*vaiśvānaro no adabdhastanūpā antastiṣṭhāti duritāni viśvā //2 //*
*saṁ varchasā payasā saṁ tanūbhiraganmahi manasā saṁ śivena /*
*tvaṣṭā no atra varīyaḥ kṛṇotvanu no mārṣṭu tanvo3 yad viriṣṭam //3 //*

## ६३८. वृहद्दिवोऽथर्वा (Vṛhaddivo'tharvā)

१. अग्निः (Agniḥ) - अ. (Av.) ५.३.१-२

ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तन्वं पुषेम ।
मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेम ॥१॥
अग्ने मन्युं प्रतिनुदन् परेषां त्वं नो गोपाः परि पाहि विश्वतः ।
अपांचो यन्तु निवता दुरस्यवोऽमैषां चित्तं प्रबुधां वि नेशत् ॥२॥

*mamāgne varcho vihaveṣvastu vayaṁ tvendhānāstanvaṁ puṣema /*
*mahyaṁ namantāṁ pradiśaśchatasrastvayādhyakṣeṇa pṛtanā jayema //1 //*
*agne manyuṁ pratinudan pareṣāṁ tvaṁ no gopāḥ pari pāhi viśvataḥ /*
*apāṁcho yantu nivatā durasyavo'maiṣāṁ chittaṁ prabudhāṁ vi neśat //2 //*

२. इन्द्रः (Indraḥ) - अ. (Av.) ५.३.८; ११

अ. (Av.) ५.३.८

उरुव्यचा नो महिषः शर्म यच्छत्वस्मिन् हवे पुरुहूतः पुरुक्षु ।
स नः प्रजायै हर्यश्व मृडेन्द्र मा नो रीरिषो मा परा दाः ॥८॥

*uruvyachā no mahiṣaḥ śarma yachchhatvasmin have puruhūtaḥ purukṣu /*
*sa naḥ prajāyai haryaśva mṛḍendra mā no rīriṣo mā parā dāḥ //8 //*

अ. (Av.) ५.३.११

अर्वांचमिन्द्रममुतो हवामहे यो गोजिद् धनजिदश्वजिद् यः ।
इमं नो यज्ञं विहवे श्रृणोत्वस्माकमभूर्हर्यश्व मेदी ॥११॥

*arvāṁchamindramamuto havāmahe yo gojid dhanajidaśvajid yaḥ /*
*imaṁ no yajñaṁ vihave śṛṇotvasmākamabhūrharyaśva medī //11 //*

३. देवाः (Devāḥ) - अ. (Av.) ५.३.३-४

मम देवा विहवे सन्तु सर्व इन्द्रवन्तो मरुतो विष्णुरग्निः ।
ममान्तरिक्षमुरुलोकमस्तु मह्यं वातः पवतां कामायास्मै ॥३॥
मह्यं यजन्तां मम यानीष्टाकूतिः सत्या मनसो मे अस्तु ।
एनो मा नि गां कतमच्चनाहं विश्वे देवा अभि रक्षन्तु मेह ॥४॥

*mama devā vihave santu sarva indravanto maruto viṣṇuragniḥ /*
*mamāntarikṣamurulokamastu mahyaṁ vātaḥ pavatāṁ kāmāyāsmai //3 //*
*mahyaṁ yajantāṁ mama yānīṣṭākūtiḥ satyā manaso me astu /*
*eno mā ni gāṁ katamachchanāhaṁ viśve devā abhi rakṣantu meha //4 //*

४. द्रविणोदादयः (Draviṇodādayaḥ) - अ. (Av.) ५.३.५

मयि देवा द्रविणमा यजन्तां मय्याशीरस्तु मयि देवहूतिः ।
दैवा होतारः सनिषन् न एतदरिष्टाः स्याम तन्वा सुवीराः ॥५॥

*mayi devā draviṇamā yajantāṁ mayyāśīrastu mayi devahūtiḥ /*
*daivā hotāraḥ saniṣan na etadariṣṭāḥ syāma tanvā suvīrāḥ //5 //*

५. वरुणः (Varuṇaḥ) - अ. (Av.) ५.१.१-९; ५.२.१-९

अ. (Av.) ५.१.१-९

ऋधङ्मन्त्रो योनिं य आबभूवामृतासुर्वर्धमानः सुजन्मा ।
अदब्धासुर्भ्राजमानोऽहेव त्रितो धर्ता दाधार त्रीणि ॥१॥
आ यो धर्माणि प्रथमः ससाद ततो वपूंषि कृणुषे पुरूणि ।
धास्युर्योनिं प्रथम आ विवेशा यो वाचमनुदितां चिकेत ॥२॥
यस्ते शोकाय तन्वं रिरेच क्षरद्धिरण्यं शुचयोऽनु स्वाः ।
अत्रा दधेते अमृतानि नामास्मे वस्त्राणि विश एरयन्ताम् ॥३॥
प्र यदेते प्रतरं पूर्व्यं गुः सदःसद आतिष्ठन्तो अजुर्यम् ।
कविः शुष्स्य मातरा रिहाणे जाम्यै धुर्यं पतिमेरयेथाम् ॥४॥
तदू षु ते महत् पृथुज्मन् नमः कविः काव्येना कृणोमि ।
यत् सम्यंचावभियन्तावभि क्षामत्रा मही रोधचक्रे वावृधेते ॥५॥
सप्त मर्यादाः कवयस्ततक्षुस्तासामिदेकामभ्यंहुरो गात् आयोर्ह स्कम्भ

उपमस्य नीडे पथां विसर्गे धरुणेषु तस्थौ ॥६॥
उतामृतासुर्व्रत एमि कृण्वन्नसुरात्मा तन्वं१स्तत् सुमदगुः ।
उत वा शक्रो रत्नं दधात्यूर्जया वा यत् सचते हविर्दाः ॥७॥
उत पुत्रः पितरं क्षत्रमीडे ज्येष्ठं मर्यादमह्वयन्त्स्वस्तये ।
दर्शन् नु ता वरुण यास्ते विष्ठा आवर्व्रततः कृणवो वपूंषि ॥८॥
अर्धमर्धेन पयसा पृणक्ष्यर्धेन शुष्म वर्धसे अमुर ।
अविवृधाम् शग्मियं सखायं वरुणं पुत्रमदित्या इषिरम् ।
कविशस्तान्यस्मै वपूंष्यवोचाम रोदसी सत्यवाचा ॥९॥
*ṛdhaṁmantro yoniṁ ya ābabhūvāmṛtāsurvardhamānaḥ sujanmā /*
*adabdhāsurbhrājamāno'heva trito dhartā dādhāra trīṇi //1 //*
*ā yeā dharmāṇi prathamaḥ sasāda tato vapūṁṣi kṛṇuṣe purūṇi /*
*dhāsyuryoniṁ prathama ā viveśā yo vāchamanuditāṁ chiketa //2 //*
*yaste śokāya tanvaṁ rirecha kṣaraddhiraṇyaṁ śuchayo'nu svāḥ /*
*atrā dadhete amṛtāni nāmāsme vastrāṇi viśa erayantām //3 //*
*pra yadete prataraṁ pūrvyaṁ guḥ sadaḥsada ātiṣṭhanto ajuryam /*
*kaviḥ śuṣsya mātarā rihāṇe jāmyai dhuryaṁ patimerayethām //4 //*
*tadū ṣu te mahat pṛthujman namaḥ kaviḥ kāvyenā kṛṇomi /*
*yat samyaṁchāvabhiyantāvabhi kṣāmatrā mahī rodhachakre vāvṛdhete //5 //*
*sapta maryādāḥ kavayastatakṣustāsāmidekāmabhyaṁhuro gāt āyorha skambha*
*upamasya nīḍe pathāṁ visarge dharuṇeṣu tasthau //6 //*
*utāmṛtāsurvrata emi kṛṇvannasurātmā tanvaṁ1stat sumadaguḥ /*
*uta vā śakro ratnaṁ dadhātyūrjayā vā yat sachate havirdāḥ //7 //*
*uta putraḥ pitaraṁ kṣatramīḍe jyeṣṭhaṁ maryādamahvayantsvastaye /*
*darśan nu tā varuṇa yāste viṣṭhā āvarvratataḥ kṛṇavo vapūṁṣi //8 //*
*ardhamardhena payasā pṛṇakṣayardhena śuṣma vardhase amura /*
*avivṛdhām śagmiyaṁ sakhāyaṁ varuṇaṁ putramadityā iṣiram /*
*kaviśastānyasmai vapūṁṣyavochāma rodasī satyavāchā //9 //*

ऋ. (Rv.) ५.२.१-९

तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्णः ।
सद्यो जज्ञानो नि रिणाति शत्रूननु यदेनं मदन्ति विश्व ऊमाः ॥१॥
वावृधानः शवसा भूर्योजाः शत्रुर्दासाय भियसं दधाति ।
अवयनच्च व्यनच्च सस्नि सं ते नवन्त प्रभृता मदेषु ॥२॥
त्वे क्रतुमपि पृंचन्ति भूरि द्विर्यदेते त्रिर्भवन्त्यूमाः ।
स्वादोः स्वादीयः स्वादुना सृजा समदः सु मधु मधुनाभि योधीः ॥३॥
यदि चिन्नु त्वा धना जयन्तं रणेरणे अनुमदन्ति विप्राः ।
ओजीयः शुष्मिन्त्स्थिरमा तनुष्व मा त्वा दभन् दुरेवासः कशोकाः ॥४॥
त्वया वयं शाशद्महे रणेषु प्रपश्यन्तो युधेन्यानि भूरि ।
चोदयामि त आयुधा वचोभिः सं ते शिशामि ब्रह्मणा वयांसि ॥५॥
नि तद् दधिषेऽवरे परे च यस्मिन्नाविथावसा दुरोणे ।
आ स्थापयत मातरं जिगत्नुमत इन्वत कर्वराणि भूरि ॥६॥
स्तुष्व वर्ष्मन् पुरुवर्त्मानं समृभ्वाणमिनतममाप्त्यमाप्त्यानाम् ।
आ दर्शति शवसा भूर्योजाः प्र सक्षति प्रतिमानं पृथिव्याः ॥७॥
इमा ब्रह्म बृहद्दिवः कृणवदिन्द्राय शूषमग्रियः स्वर्षाः ।
महो गोत्रस्य क्षयति स्वराजा तुरश्चिद् विश्वमर्णवत् तपस्वान् ॥८॥
एवा महान् बृहद्दिवो अथर्वावोचत् स्वां तन्व१मिन्द्रमेव ।
स्वसारौ मातरिभ्वरी अरिप्रे हिन्वन्ति चैने शवसा वर्धयन्ति च ॥९॥
*tadidāsa bhuvaneṣu jyeṣṭhaṁ yato jajña ugrastveṣanṛmṇaḥ /*
*sadyo jajñāno ni riṇāti śatrūnanu yadenaṁ madanti viśva ūmāḥ //1 //*
*vāvṛdhānaḥ śavasā bhūryojāḥ śatrurdāsāya bhiyasaṁ dadhāti /*
*avayanachcha vyanachcha sasni saṁ te navanta prabhṛtā madeṣu //2 //*

*tve kratumapi pṛṁchanti bhūri dviryadete trirbhavantyūmāḥ /*
*svādoḥ svādīyaḥ svādunā sṛjā samadaḥ su madhu madhunābhi yodhīḥ //3 //*
*yadi chinnu tvā dhanā jayantaṁ raṇeraṇe anumadanti viprāḥ /*
*ojīyaḥ śuṣmintsthiramā tanuṣva mā tvā dabhan durevāsaḥ kaśokāḥ //4 //*
*tvayā vayaṁ śāśadmahe raṇeṣu prapaśyanto yudhenyāni bhūri /*
*chodayāmi ta āyudhā vachobhiḥ saṁ te śiśāmi brahmaṇā vayāṁsi //5 //*
*ni tad dadhiṣe'vare pare cha yasminnāvithāvasā duroṇe /*
*ā sthāpayata mātaraṁ jigatnumata invata karvarāṇi bhūri //6 //*
*stuṣva varṣman pururvtmānaṁ samṛbhvāṇaminatamamāptyamāptyānām /*
*ā darśati śavasā bhūryojāḥ pra sakṣati pratimānaṁ pṛthivyāḥ //7 //*
*imā brahma bṛhaddivaḥ kṛṇavadindrāya śūṣamagriyaḥ svarṣāḥ /*
*maho gotrasya kṣayati svarājā turaśchid viśvamarṇavat tapasvān //8 //*
*evā mahān bṛhaddivo atharvāvochat svāṁ tanva1mindrameva /*
*svasārau mātaribhvarī aripre hinvanti chaine śavasā vardhayanti cha //9 //*

६. सोमः (Somaḥ) - अ. (Av.) ५.३.७

तिस्रो देवीर्महि नः शर्म यच्छत प्रजायै नस्तन्वे३ यच्च पुष्टम् ।
मा हास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन् ॥७॥
*tisro devīrmahi naḥ śarma yachchhata prajāyai nastanve3 yachcha puṣṭam /*
*mā hāsmahi prajayā mā tanūbhirmā radhāma dviṣate seāma rājan //7 //*

## ६३९. वृहस्पतिः (Vṛhaspatiḥ)

१. ज्ञानम् (Jñānam) - ऋ. (Rv.) १०.७१.१-११

बृहस्पते प्रथमं वाचो अग्रं यत्प्रैरत नामधेयं दधानाः ।
यदेषां श्रेष्ठं यदरिप्रमासीत्प्रेणा तदेषां निहितं गुहाविः ॥१॥
सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि ॥२॥
यज्ञेन वाचः पदवीयमायन्तामन्वविन्दन्नृषिषु प्रविष्टाम् ।
तामाभृत्या व्यदधुः पुरुत्रा तां सप्त रेभा अभि सं नवन्ते ॥३॥
उत त्वः पश्यन्न ददर्श वाचमुत त्वः श्रृण्वन्न श्रृणोत्येनाम् ।
उतो त्वस्मै तन्वं१वि सस्रे जायेव पत्य उशती सुवासाः ॥४॥
उत त्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु ।
अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पाम् ॥५॥
यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति ।
यदीं श्रृणोत्यलकं शुणोति नहि प्रवेद सुकृतस्य पन्थाम् ॥६॥
अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः ।
आदघ्नास उपकक्षास उ त्वे ह्रदाइव स्नात्वा उ त्वे ददृश्रे ॥७॥
ह्रदा तष्टेषु मनसो जवेषु यद् ब्राह्मणाः संयजन्ते सखायः ।
अत्राह त्वं वि जहुर्वेद्याभिरोहब्रह्माणो वि चरन्त्यु त्वे ॥८॥
इमे ये नार्वाङ् न परश्चरन्ति न ब्राह्मणासो न सुतेकरासः ।
त एते वाचमभिपद्य पापया सिरीस्तन्त्रं तन्वते अप्रजज्ञयः ॥९॥
सर्वे नन्दन्ति यशसागतेन सभासाहेनसख्या सखायः ।
किल्विषस्पृत्पितुषणिर्ह्येषामरं हितो भवति वाजिनाय ॥१०॥
ऋचां त्वः पोषमास्ते पुपुष्वान्गायत्रं त्वो गायति शक्वरीषु ।
ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां वि मिमीत उ त्वः ॥११॥
*bṛhaspate prathamaṁ vācho agraṁ yatprairata nāmadheyaṁ dadhānāḥ /*
*yadeṣāṁ śreṣṭhaṁ yadaripramāsītpreṇā tadeṣāṁ nihitaṁ guhāviḥ //1 //*
*saktumiva titaunā punanto yatra dhīrā manasā vāchamakrata /*
*atrā sakhāyaḥ sakhyāni jānate bhadraiṣāṁ lakṣamīrnihitādhi vāchi //2 //*
*yajñena vāchaḥ padavīyamāyantāmanvavindannṛṣiṣu praviṣṭām /*
*tāmābhṛtyā vyadadhuḥ purutrā tāṁ sapta rebhā abhi saṁ navante //3 //*

*uta tvaḥ paśyanna dadarśa vāchamuta tvaḥ śṛṇvanna śṛṇotyenām /*
*uto tvasmai tanvaṁ1vi sasre jāyeva patya uśatī suvāsāḥ //4 //*
*uta tvaṁ sakhye sthirapītamāhurnainaṁ hinvantyapi vājineṣu /*
*adhenvā charati māyayaiṣa vāchaṁ śuśruvāṁ̐ aphalāmapuṣpām //5 //*
*yastityāja sachividaṁ sakhāyaṁ na tasya vāchyapi bhāgo asti /*
*yadīṁ śṛṇotyalakaṁ śuṇoti nahi praveda sukṛtasya panthām //6 //*
*akṣaṇvantaḥ karṇavantaḥ sakhāyo manojaveṣvasamā babhūvuḥ /*
*ādaghnāsa upakakṣāsa u tve hradāiva snātvā u tve dadṛśre //7 //*
*hṛdā taṣṭeṣu manaso javeṣu yad brāhmaṇāḥ saṁyajante sakhāyaḥ /*
*atrāha tvaṁ vi jahurvedyābhirohabrahmāṇo vi charantyu tve //8 //*
*ime ye nārvāṅ na paraścharanti na brāhmaṇāso na sutekarāsaḥ /*
*ta ete vāchamabhipadya pāpayā sirīstantraṁ tanvate aprajajñayaḥ //9 //*
*sarve nandanti yaśasāgatena sabhāsāhenasakhyā sakhāyaḥ /*
*kilviṣaspṛtpituṣaṇirhyeṣāmaraṁ hito bhavati vājināya //10 //*
*ṛchāṁ tvaḥ poṣamāste pupuṣvāṅgāyatraṁ tvo gāyati śakvarīṣu /*
*brahmā tvo vadati jātavidyāṁ yajñasya mātrāṁ vi mimīta u tvaḥ //11 //*

## ६४०. वेनः (Venaḥ)

१. आत्मा (Ātmā) - अ. (Av.) ४.२.१-८

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यो३स्येशे द्विपदो यश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥१॥
यः प्राणतो निमिषतो महित्वैको राजा जगतो बभूव ।
यस्य च्छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥२॥
यं क्रन्दसी अवतश्चस्कभाने भियसाने रोदसी अह्वयेताम् ।
यस्यासौ पन्था रजसो विमानः कस्मै देवाय हविषा विधेम ॥३॥
यस्य द्यौरुर्वी पृथिवी च मही यस्याद् उर्व१न्तरिक्षम् ।
यस्यासौ सूरो विततो महित्वा कस्मै देवाय हविषा विधेम ॥४॥
यस्य विश्वे हिमवन्तो महित्वा समुद्रे यस्य रसामिदाहुः ।
इमाश्च प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥५॥
आपो अग्रे विश्वमावन् गर्भं दधाना अमृता ऋतृज्ञाः ।
यासु देवीष्वधि देव आसीत् कस्मै देवाय हविषा विधेम ॥६॥
हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीमुत द्यां कस्मै देवाय हविषा विधेम ॥७॥
आपो वत्सं जनयन्तीर्गर्भमग्रे समैरयन् ।
तस्योत जायमानस्योल्ब आसीद्धिरण्ययः कस्मै देवाय हविषा विधेम ॥८॥

*ya ātmadā baladā yasya viśva upāsate praśiṣaṁ yasya devāḥ /*
*yo3syeśe dvipado yaśchatuṣpadaḥ kasmai devāya haviṣā vidhema //1 //*
*yaḥ prāṇato nimiṣato mahitvaiko rājā jagato babhūva /*
*yasya chchhāyāmṛtaṁ yasya mṛtyuḥ kasmai devāya haviṣā vidhema //2 //*
*yaṁ krandasī avataśchaskabhāne bhiyasāne rodasī ahvayetām /*
*yasyāsau panthā rajaso vimānaḥ kasmai devāya haviṣā vidhema //3 //*
*yasya dyaururvī pṛthivī cha mahī yasyād urva1ntarikṣam /*
*yasyāsau sūro vitato mahitvā kasmai devāya haviṣā vidhema //4 //*
*yasya viśve himavanto mahitvā samudre yasya rasāmidāhuḥ /*
*imāścha pradiśo yasya bāhū kasmai devāya haviṣā vidhema //5 //*
*āpo agre viśvamāvan garbhaṁ dadhānā amṛtā ṛtrjñāḥ /*
*yāsu devīṣvadhi deva āsīt kasmai devāya haviṣā vidhema //6 //*
*hiraṇyagarbhaḥ samavartatāgre bhūtasya jātaḥ patireka āsīt /*
*sa dādhāra pṛthivīmuta dyāṁ kasmai devāya haviṣā vidhema //7 //*
*āpo vatsaṁ janayantīrgarbhamagre samairayan /*
*tasyota jāyamānasyolba āsīddhiraṇyayaḥ kasmai devāya haviṣā vidhema //8 //*

२. ब्रह्म आत्मा (Brahma Ātmā) - अ. (Av.) २.१.१-५

वेनस्तत् पश्यत् परमं गुहा यद् यत्र विश्वं भवत्येकरूपम् ।
इदं पृश्निरदुहज्जायमानाः स्वर्विदो अभ्यनूषत व्राः ॥१॥
प्र तद् वोचेदमृतस्य विद्वान् गन्धर्वो धाम परमं गुहा यत् ।
त्रीणि पदानि निहिता गुहास्य यस्तानि वेद स पितुष्पितासत् ॥२॥
स नः पिता जनिता स उत बन्धुर्धामानि वेद भुवनानि विश्वा ।
यो देवानां नामध एक एव तं संप्रश्न भुवना यन्ति सर्वा ॥३॥
परि द्यावापृथवी सद्य आयमुपातिष्ठे प्रथमजामृतस्य ।
वाचमिव वक्तरि भुवनेष्ठा धास्युरेष नन्वे३षो अग्निः ॥४॥
परि विश्वा भुवनान्यायमृतस्य तन्तुं विततं दृशे कम् ।
यत्र देवा अमृतमानशानाः समाने योनावध्यैरयन्त ॥५॥

*venastat paśyat paramaṁ guhā yad yatra viśvaṁ bhavatyekarūpam* ।
*idaṁ pṛśniraduhajjāyamānāḥ svarvido abhyanūṣata vrāḥ* ॥1॥
*pra tad vochedamṛtasya vidvān gandharvo dhāma paramaṁ guhā yat* ।
*trīṇi padāni nihitā guhāsya yastāni veda sa pituṣpitāsat* ॥2॥
*sa naḥ pitā janitā sa uta bandhurdhāmāni veda bhuvanāni viśvā* ।
*yo devānāṁ nāmadha eka eva taṁ saṁpraśna bhuvanā yanti sarvā* ॥3॥
*pari dyāvāpṛthavīi sadya āyamupātiṣṭhe prathamajāmṛtasya* ।
*vāchamiva vaktari bhuvaneṣṭhā dhāsyureṣa nanve3ṣo agniḥ* ॥4॥
*pari viśvā bhuvanānyāyamṛtasya tantuṁ vitataṁ dṛśe kam* ।
*yatra devā amṛtamānaśānāḥ samāne yonāvadhyairayanta* ॥5॥

३. बृहस्पतिः आदित्यः (Bṛhaspatiḥ Ādityaḥ) - अ. (Av.) ४.१.१-७

ब्रह्म जज्ञानं प्रथमं पुरस्ताद् वि सीमतः सुरुचो वेन आवः ।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च वि वः ॥१॥
इयं पित्र्या राष्ट्र्येत्वग्रे प्रथमाय जनुषे भुवनेष्ठाः ।
तस्मा एतं सुरुचं ह्वारमह्यं घर्मं श्रीणन्तु प्रथमाय धास्यवे ॥२॥
प्र यो जज्ञे विद्वानस्य बन्धुर्विश्वा देवानां जनिमा विवक्ति ।
ब्र ब्रह्मण उज्जभार मध्यान्नीचैरुच्चैः स्वधा अभि प्रतस्थौ ॥३॥
स हि दिवः स पृथिव्या ऋतस्था मही क्षेमं रोदसी अस्कभायत् ।
महान् मही अस्कभायद् वि जातो द्यां सद्म पार्थिवं च रजः ॥४॥
स बुध्न्यादाष्ट्र जनुषोऽभ्यग्रं बृहस्पतिर्देवता तस्य सम्राट् ।
अहर्यच्छुक्रं ज्योतिषो जनिष्टाथ द्युमन्तो वि वसन्तु विप्राः ॥५॥
नूनं तदस्य काव्यो हिनोति महो देवस्य पूवर्यस्य धाम ।
एष जज्ञे बहुभिः साकमित्था पूर्वे अर्धे विषिते समन् नु ॥६॥
योऽथर्वाणं पितरं देवबन्धुं बृहस्पतिं नमसाव च गच्छात् ।
त्वं विश्वेषां जनिता यथासः कविर्देवो न दभायत् स्वधावान् ॥७॥

*brahma jajñānaṁ prathamaṁ purastād vi sīmataḥ surucho vena āvaḥ* ।
*sa budhnyā upamā asya viṣṭhāḥ sataścha yonimasataścha vi vaḥ* ॥1॥
*iyaṁ pitrayā rāṣṭryetvagre prathamāya januṣe bhuvaneṣṭhāḥ* ।
*tasmā etaṁ suruchaṁ hvāramahyaṁ gharmaṁ śrīṇantu prathamāya dhāsyave* ॥2॥
*pra yo jajñe vidvānasya bandhurviśvā devānāṁ janimā vivakti* ।
*bra brahmaṇa ujjabhāra madhyānnīchairuchchaiḥ svadhā abhi pratasthau* ॥3॥
*sa hi divaḥ sa pṛthivyā ṛtasthā mahī kṣemaṁ rodasī askabhāyat* ।
*mahān mahī askabhāyad vi jāto dyāṁ sadma pārthivaṁ cha rajaḥ* ॥4॥
*sa budhnyādāṣṭra januṣo'bhyagraṁ bṛhaspatirdevatā tasya samrāṭ* ।
*aharyachchhukraṁ jyotiṣo janiṣṭātha dyumanto vi vasantu viprāḥ* ॥5॥
*nūnaṁ tadasya kāvyo hinoti maho devasya pūvaryasya dhāma* ।
*eṣa jajñe bahubhiḥ sākamitthā pūrve ardhe viṣite saman nu* ॥6॥
*yo'tharvāṇaṁ pitaraṁ devabandhuṁ bṛhaspatiṁ namasāva cha gachchhāt* ।
*tvaṁ viśveṣāṁ janitā yathāsaḥ kavirdevo na dabhāyat svadhāvān* ॥7॥

४. वेनः (Venaḥ) - ऋ. (Rv.) १०.१२३.१-८

अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने ।
इममपां संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति ॥१॥
समुद्रादूर्मिमुदियर्ति वेना नभोजाः पृष्ठं हर्यतस्य दर्शि ।
ऋतस्य सानावधि विष्टपि भ्राट् समानं योनिमभ्यनूषत व्राः ॥२॥
समानं पूर्वीरभि वावशानास्तिष्ठन्वत्सस्य मातरः सनीळाः ।
ऋतस्य सानावधि चक्रमाणा रिहन्ति मध्वो अमृतस्य वाणीः ॥३॥
जानन्तो रूपमकृषन्त विप्रा मृगस्य घोषं महिषस्य हि ग्मन् ।
ऋतेन यन्तो अधि सिन्धुमस्थुर्विदद्गन्धर्वो अमृतानि नाम ॥४॥
अप्सरा जानमुपसिष्मियाणा योषा बिभर्ति परमे व्योमन् ।
चरत्प्रियस्य योनिषु प्रियः सन्त्सीदत्पक्षे हिरयये स वेनः ॥५॥
नाके सुपर्णमुप यत्पतन्तं हृदा वेनन्तो अभ्यचक्षत त्वा ।
हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ॥६॥
ऊर्ध्वो गन्धर्वो अधि नाके अस्थात्प्रत्यङ् चित्रा बिभ्रदस्यायुधानि ।
वसानो अत्कं सुरभिं दृशे कं स्व१र्ण नाम जनत प्रियाणि ॥७॥
द्रप्सः समुद्रमभि यज्जिगाति पश्यन्गृध्रस्य चक्षसा विधर्मन् ।
भानुः शुक्रेण शोचिषा चकानस्तृतीये चक्रे रजसि प्रियाणि ॥८॥
*ayaṁ venaśchodayatpṛśnigarbhā jyotirjarāyū rajaso vimāne /*
*imamapāṁ saṁgame sūryasya śiśuṁ na viprā matibhī rihanti //1//*
*samudrādūrmimudiyarti venā nabhojāḥ pṛṣṭhaṁ haryatasya darśi /*
*ṛtasya sānāvadhi viṣṭapi bhrāṭ samānaṁ yonimabhyanūṣata vrāḥ //2//*
*samānaṁ pūrvīrabhi vāvaśānāstiṣṭhanvatsasya mātaraḥ sanīḻāḥ /*
*ṛtasya sānāvadhi chakramāṇā rihanti madhvo amṛtasya vāṇīḥ //3//*
*jānanto rūpamakṛṣanta viprā mṛgasya ghoṣaṁ mahiṣasya hi gman /*
*ṛtena yanto adhi sindhumasthurvidadgandharvo amṛtāni nāma //4//*
*apsarā jānamupasiṣmiyāṇā yoṣā vibharti parame vyoman /*
*charatpriyasya yoniṣu priyaḥ santsīdatpakṣe hirayaye sa venaḥ //5//*
*nāke suparṇamupa yatpatantaṁ hṛdā venanto abhyachakṣata tvā /*
*hiraṇyapakṣaṁ varuṇasya dūtaṁ yamasya yonau śakunaṁ bhuraṇyum //6//*
*ūrdhvo garndhvo adhi nāke asthātpratyaṅ chitrā bibhradasyāyudhāni /*
*vasāno atkaṁ surabhiṁ dṛśe kaṁ sva1rṇa nāma janata priyāṇi //7//*
*drapsaḥ samudramabhi yajjigāti paśyangṛdhrasya chakṣasā vidharman /*
*bhānuḥ śukreṇa śochiṣā chakānastṛtīye chakre rajasi priyāṇi //8//*

## ६४१. वेनो भार्गवः (Veno Bhārgavaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.८५.१-१२; सा. (Sv.) ५६१

ऋ. (Rv.) ९.८५.१-१२

इन्द्राय सोम सुषुतः परि स्रवापामीवा भवतु रक्षसा सह ।
मा ते रसस्य मत्सत द्वयाविनो द्रविणस्वन्त इह सन्त्विन्दवः ॥१॥
अस्मान्त्समर्ये पवमान चोदय दक्षो देवानामसि हि प्रियो मदः ।
जहि शत्रूँरभ्या भन्दनायतः पिबेन्द्र सोममव नो मृधो जहि ॥२॥
अदब्ध इन्दो पवसे मदिन्तम आत्मेन्द्रस्य भवसि धासिरुत्तमः ।
अभि स्वरन्ति बहवो मनीषिणो राजानमस्य भुवनस्य निंसते ॥३॥
सहस्रणीथः शतधारो अद्भुत इन्द्रायेन्दुः पवते काम्यं मधु ।
जयन्क्षेत्रमभ्यर्षा जयन्नप उरुं नो गातुं कृणु सोम मीढ्वः ॥४॥
कनिक्रदत्कलशे गोभिरज्यसे व्य१व्ययं समया वारमर्षसि ।
मर्मृज्यमानो अत्यो न सानसिरिन्द्रस्य सोम जठरे समक्षरः ॥५॥
स्वादुः पवस्व दिव्याय जन्मने स्वादुरिन्द्राय सुहवीतुनाम्ने ।
स्वादुर्मित्राय वरुणय वायवे बृहस्पतेय मधुमाँ अदाभ्यः ॥६॥
अत्यं मृजन्ति कलशे दश क्षिपः प्र विप्राणां मतयो वाच ईरते ।

पवमाना अभ्यर्षन्ति सुष्टुतिमेन्द्रं विशन्ति मदिरास इन्दवः ॥७॥
पवमानो अभ्यर्षा सुवीर्यमुर्वीं गव्यूतिं महि शर्म सप्रथः ।
माकिर्नो अस्य परिषूतिरीशतेन्दो जयेम त्वया धनंधनम् ॥८॥
अधि द्यामस्थाद्वृषभो विचक्षणोऽरूरुचद्वि दिवो रोचना कविः ।
राजा पवित्रमत्येति रोरुवद्दिवः पीयूषं दुहते नृचक्षसः ॥९॥
दिवो नाके मधुजिह्वा असश्चतो वेना दुहन्त्युक्षणं गिरिष्ठाम् ।
अप्सु द्रप्सं वावुधानं समुद्र आ सिन्धेरूर्मा मधुमन्तं पवित्र आ ॥१०॥
नाके सुपर्णमुपपप्तिवांसं गिरो वेनानामकृपन्त पूर्वीः ।
शिशुं रिहन्ति मतयः पनिप्नतं हिरण्ययं शकुनं क्षामणि स्थाम् ॥११॥
ऊर्ध्वो गन्धर्वो अधि नाके अस्थाद्विश्वा रूपा प्रतिचक्षाणो अस्य ।
भानुः शुक्रेण शोचिषा व्यद्यौत्प्रारूरुचद्रोदसी मातरा शुचिः ॥१२॥
*indrāya soma suṣutaḥ pari sravāpāmīvā bhavatu rakṣasā saha /*
*mā te rasasya matsata dvayāvino draviṇasvanta iha santvindavaḥ //1 //*
*asmāntsamarye pavamāna chodaya dakṣo devānāmasi hi priyo madaḥ /*
*jahi śatrūm̐rabhyā bhandanāyataḥ pibendra somamava no mṛdho jahi //2 //*
*adabdha indo pavase madintama ātmendrasya bhavasi dhāsiruttamaḥ /*
*abhi svaranti bahavo manīṣiṇo rājānamasya bhuvanasya niṁsate //3 //*
*sahasraṇīthaḥ śatadhāro adbhuta indrāyenduḥ pavate kāmyaṁ madhu /*
*jayankṣetramabhyarṣā jayannapa uruṁ no gātuṁ kṛṇu soma mīḍhvaḥ //4 //*
*kanikradatkalaśe gobhirajyase vya1vyayaṁ samayā vāramarṣasi /*
*marmṛjyamāno atyo na sānasirindrasya soma jaṭhare samakṣaraḥ //5 //*
*svāduḥ pavasva divyāya janmane svādurindrāya suhavītunāmne /*
*svādurmitrāya varuṇaya vāyave bṛhaspateya madhumām̐ adābhyaḥ //6 //*
*atyaṁ mṛjanti kalaśe daśa kṣipaḥ pra viprāṇāṁ matayo vācha īrate /*
*pavamānā abhyarṣanti suṣṭutimendraṁ viśanti madirāsa indavaḥ //7 //*
*pavamāno abhyarṣā suvīryamurvīṁ gavyūtiṁ mahi śarma saprathaḥ /*
*mākirno asya pariṣūtirīśatendo jayema tvayā dhanaṁdhanam //8 //*
*adhi dyāmasthādvṛṣabho vichakṣaṇo'rūruchadvi divo rochanā kaviḥ /*
*rājā pavitramatyeti roruvaddivaḥ pīyūṣaṁ duhate nṛchakṣasaḥ //9 //*
*divo nāke madhujihvā asaśchato venā duhantyukṣaṇaṁ giriṣṭhām /*
*apsu drapsaṁ vāvudhānaṁ samudra ā sindherūrmā madhumantaṁ pavitra ā //10 //*
*nāke suparṇamupapaptivāṁsaṁ giro venānāmakṛpanta pūrvīḥ /*
*śiśuṁ rihanti matayaḥ panipnataṁ hiraṇyayaṁ śakunaṁ kṣāmaṇi sthām //11 //*
*ūrdhvo gandharvo adhi nāke asthādviśvā rūpā pratichakṣāṇo asya /*
*bhānuḥ śukreṇa śochiṣā vyadyautprārūruchadrodasī mātarā śuchiḥ //12 //*

सा. (Sv.) ५६१

इन्द्राय सोम सुषुतः परि स्रवापामीवा भवतु रक्षसा सह ।
मा ते रसस्य मत्सत द्वयाविनो द्रविणस्वन्त इह सन्त्विन्दवः ॥८॥
*indrāya soma suṣutaḥ pari sravāpāmīvā bhavatu rakṣasā saha /*
*mā te rasasya matsata dvayāvino draviṇasvanta iha santvindavaḥ //8 //*

२. वेनः (Venaḥ) - सा. (Sv.) ३२०; १८४६-१८४८

सा. (Sv.) ३२०

नाके सुपर्णमुप यत्पतन्त हृदा वेनन्तो अभ्यचक्षत त्वा ।
हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ॥८॥
*nāke suparṇamupa yatpatanta hṛdā venanto abhyachakṣata tvā /*
*hiraṇyapakṣaṁ varuṇasya dūtaṁ yamasya yonau śakunaṁ bhuraṇyum //8 //*

सा. (Sv.) १८४६-१८४८

नाके सुपर्णमुप यत्पतन्तं हृदा वेनन्तो अभ्यचक्षत त्वा ।
हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ॥१॥
ऊर्ध्वो गन्धर्वो अधि नाके अस्थात्प्रत्यङ्चित्रा बिभ्रदस्यायुधानि ।

वसानो अत्कं सुरभिं दृशे कं स्वा३र्ण नाम जनत प्रियाणि ॥२॥
द्रप्सः समुद्रमभि यज्जिगाति पश्यन् गृध्रस्य चक्षसा विधर्मन् ।
भानुः शुक्रेण शोचिषा चकानस्तृतीये चक्रे रजसि प्रियाणि ॥३॥
*nāke suparṇamupa yatpatantaṁ hṛdā venanto abhyachakṣata tvā /*
*hiraṇyapakṣaṁ varuṇasya dūtaṁ yamasya yonau śakunaṁ bhuraṇyum //1 //*
*ūrdhvo gandharvo adhi nāke asthātpratyaṅchitrā bibhradasyāyudhāni /*
*vasāno atkaṁ surabhiṁ dṛśe kaṁ svā3rṇa nāma janata priyāṇi //2 //*
*drapsaḥ samudramabhi yajjigāti paśyan gṛdhrasya chakṣasā vidharman /*
*bhānuḥ śukreṇa śochiṣā chakānastṛtīye chakre rajasi priyāṇi //3 //*

## ६४२. वैखानसः (Vaikhānasaḥ)

१. अग्निः (Agniḥ) - य. (Yv.) १९.४०; ४१; ४८; ३५.१७

य. (Yv.) १९.४०-४१

पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत्। अग्ने क्रत्वा क्रतूँ२ऽरनु ॥४०॥
यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा। ब्रह्म तेन पुनातु मा ॥४१॥
*pavitreṇa punīhi mā śukreṇa deva dīdyat / agne kratvā kratūm̐2'ranu //40 //*
*yatte pavitramarchiṣyagne vitatamantarā / brahma tena punātu mā //41 //*

य. (Yv.) १९.४८

इदं हविः प्रजननं मेऽअस्तु दशवीरं सर्वगणं स्वस्तये आत्मसनि प्रजासनि पशुसनि लोकसन्यभ्यसनि।
अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतोऽअस्मासु धत्त ॥४८॥
*idaṁ haviḥ prajananaṁ me'astu daśavīraṁ sarvagaṇaṁ svastaye ātmasani prajāsani paśusani lokasanyabhyasani / agniḥ prajāṁ bahulāṁ me karotvannaṁ payo reto'asmāsu dhatta //48 //*

य. (Yv.) ३५.१७

आयुष्मानग्ने हविषा वृधानो घृतप्रतीको घृतयोनिरेधि ।
घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि रक्षतादिमान्त्स्वाहा ॥१७॥
*āyuṣmānagne haviṣā vṛdhāno ghṛtapratīko ghṛtayoniredhi /*
*ghṛtaṁ pītvā madhu chāru gavyaṁ piteva putramabhi rakṣatādimāntsvāhā //17 //*

२. इन्द्रः (Indraḥ) - य. (Yv.) १९.३८

अग्नऽआयूंषि पवसऽआ सुवोर्जमिषं च नः। आरे बाधस्व दुच्छुनाम् ॥३८॥
*agna'āyūṁṣi pavasa'ā suvorjamiṣaṁ cha naḥ / āre bādhasva duchchhunām //38 //*

३. पवित्रकर्त्ता (Pavitrakarttā) - य. (Yv.) १९.४२

पवमानः सोऽअद्य नः पवित्रेण विचर्षणिः। यः पोता स पुनातु मा ॥४२॥
*pavamānaḥ so'adya naḥ pavitreṇa vicharṣaṇiḥ / yaḥ potā sa punātu mā //42 //*

४. पितरः (Pitaraḥ) - य. (Yv.) १९.४५; ४७

य. (Yv.) १९.४५

ये समानाः समनसः पितरो यमराज्ये। तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पताम् ॥४५॥
*ye samānāḥ samanasaḥ pitaro yamarājye /*
*teṣāṁ lokaḥ svadhā namo yajño deveṣu kalpatām //45 //*

य. (Yv.) १९.४७

द्वे सृतीऽअशृणवं पितृणामहं देवानामुत मर्त्यानाम् ।
ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं च ॥४७॥
*dve sṛtī'aśṛṇavaṁ pitṛṇāmahaṁ devānāmuta martyānām /*
*tābhyāmidaṁ viśvamejatsameti yadantarā pitaraṁ mātaraṁ cha //47 //*

५. राजादयो गृहपतयः (Rājādayo Gṛhapatayaḥ) - य. (Yv.) ८.३८

अग्ने पवस्व स्वपाऽअस्मे वर्चः सुवीर्य्यम्। दधद्रयिं मयि पोष ।
उपयामगृहीतोऽस्यग्नये त्वा वर्चसऽएष ते योनिरग्नये त्वा वर्चसे ।
अग्ने वर्चस्विन्वर्चस्वाँस्त्वं देवेष्वसि वर्चस्वानह मनुष्येषु भूयासम् ॥३८॥

*agne pavasva svapā'asme varchaḥ suvīryyam । dadhadrayiṁ mayi poṣa ।*
*upayāmagṛhīto'syagnaye tvā rchasa'eṣa te yoniragnaye tvā varchase ।*
*agne varchasvinvarchasvām̐stvaṁ deveṣvasi varchasvānaha manuṣyeṣu bhūyāsam ॥38 ॥*

६. राजादयो गृहस्थाः (Rājādayo Gṛhasthāḥ) - य. (Yv.) ८.३९

उत्तिष्ठन्नोजसा सह पीत्वी शिप्रेऽअवेपयः। सोममिन्द्र चमू सुतम् ।उपयामगृहीतोऽसीन्द्राय त्वौजसऽएष ते यानिरिन्द्राय त्वौजसे। इन्द्रौजिष्ठौजिष्ठस्त्वं देवेष्वस्योजिष्ठोऽहं मनुष्येषु भूयासम् ॥३९॥
*uttiṣṭhannojasā saha pītvī śipre'avepayaḥ । somamindra chamū*
*sutam ।upayāmagṛhīto'sīndrāya tvaujasa'eṣa te yānirindrāya tvaujase ।*
*indraujiṣṭhaujiṣṭhastvaṁ deveṣvasyojiṣṭho'haṁ manuṣyeṣu bhūyāsam ॥39 ॥*

७. विद्वांसः (Vidvāṁsaḥ) - य. (Yv.) १९.३९

पुनन्तु मा देवजनाः पुनन्तु मनसा धियः। पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥३९॥
*punantu mā devajanāḥ punantu manasā dhiyaḥ ।*
*punantu viśvā bhūtāni jātavedaḥ punīhi mā ॥39 ॥*

८. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.) १९.४४

वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठाः ।
तया मदन्तः समधमादेषु वयं स्याम पतयो रयीणाम् ॥४४॥
*vaiśvadevī punatī devyāgādyasyāmimā bahvyastanvo vītapṛṣṭhāḥ ।*
*tayā madantaḥ samadhamādeṣu vayaṁ syāma patayo rayīṇām ॥44 ॥*

९. श्री (Śrī) - य. (Yv.) १९.४६

ये समानाः समनसो जीवा जीवेषु मामकाः ।
तेषां श्रीर्मयि कल्पतामस्मिँल्लोके शतं समाः ॥४६॥
*ye samānāḥ samanaso jīvā jīveṣu māmakāḥ ।*
*teṣāṁ śrīrmayi kalpatāmarsmilloke śataṁ samāḥ ॥46 ॥*

१०. सविता (Savitā) - य. (Yv.) १९.४३

उभाभ्यां देव सवितः पवित्रेण सवेन च। मां पुनीहि विश्वतः ॥४३॥
*ubhābhyāṁ deva savitaḥ pavitreṇa savena cha । māṁ punīhi viśvataḥ ॥43 ॥*

## ६४३. वेदर्भिः भार्गवः (Vedarbhiḥ Bhārgavaḥ)

१. प्राणः (Prāṇaḥ) - अ. (Av.) ११.४.१-२६

प्राणाय नमो यस्य सर्वमिदं वशे। यो भूतः सर्वस्येश्वरो यस्मिन्त्सर्वं प्रतिष्ठितम् ॥१॥
नमस्ते प्राण क्रन्दाय नमस्ते स्तनयित्नवे। नमस्ते प्राण विद्युते नमस्ते प्राण वर्षते ॥२॥
यत् प्राण स्तनयित्नुनाभिक्रन्दत्योषधीः। प्र वीयन्ते गर्भान् दधतेऽथो बह्वीर्वि जायन्ते ॥३॥
यत् प्राण ऋतावागतेऽभिक्रन्दत्योषधीः। सर्वं तदा प्र मोदते यत् किं च भूम्यामधि ॥४॥
यत् प्राण अभ्यवर्षीद् वर्षेण पृथिवीं महीम्। पशवस्तत् प्र मोदन्ते महो वै नो भविष्यति ॥५॥
अभिवृष्टा ओषधयः प्राणेन समवादिरन्। आयुर्वै नः प्रातीतरः सर्वा नः सुरभीरकः ॥६॥
नमस्ते अस्त्वायते नमो अस्तु परायते। नमस्ते प्राण तिष्ठत आसीनायोत ते नमः ॥७॥
नमस्ते प्राण प्राणते नमो अस्त्वपानते । पराचीनाय ते नमः प्रतीचीनाय ते नमः सर्वस्मै त इदं नमः ॥८॥
या ते प्राण प्रिया तनूर्यो ते प्राण प्रेयसी। अथो यद् भेषजं तव तस्य नो धेहि जीवसे ॥९॥
प्राणः प्रजा अनु वस्ते पिता पुत्रमिव प्रियम्। प्राणो ह सर्वस्येश्वरो यच्च प्राणति यच्च न ॥१०॥
प्राणो मृत्युः प्राणस्तक्मा प्राणं देवा उपासते। प्राणो ह सत्यवादिनमुत्तमे लोक आ दधत् ॥११॥
प्राणो विराट् प्राणो देष्ट्री प्राणं सर्व उपासते। प्राणो ह सूर्यश्चन्द्रमाः प्राणमाहुः प्रजापतिम् ।१२॥
प्राणापानौ व्रीहियवावनड्वान् प्राण उच्यते। यवे ह प्राण आहितोऽपानो व्रीहिरुच्यते ॥१३॥
अपानति प्राणति पुरुषो गर्भे अन्तरा। यदा त्वं प्राण जिन्वस्यथ स जायते पुनः ॥१४॥
प्राणमाहुर्मातरिश्वानं वातो ह प्राण उच्यते। प्राणे ह भूतं भव्यं च प्राणे सर्वं प्रतिष्ठितम् ॥१५॥
आथर्वणीरांगिरसीर्दैवीर्मनुष्यजा उत। ओषधयः प्र जायन्ते यदा त्वं प्राण जिन्वसि ॥१६॥
यदा प्राणो अभ्यवर्षीद् वर्षेण पृथिवीं महीम्। ओषधयः प्र जायन्तेऽथो याः काश्च वीरुधः ।१७॥
यस्ते प्राणेदं वेद यस्मिंश्चासि प्रतिष्ठितः। सर्वे तस्मै बलिं हरानमुष्मिँल्लोक उत्तमे ॥१८॥

यथा प्राण बलिहृतस्तुभ्यं सर्वाः प्रजा इमाः । एवा तस्मै बलिं हरान् यस्त्वा श्रृणवत् सुश्रवः ।१९ ॥
अन्तर्गर्भश्चरति देवतास्वाभूतो भूतः स उ जायते पुनः । स भूतो भव्यं भविष्यत् पिता पुत्रं प्र विवेशा शचीभिः ॥२० ॥
एकं पादं नोत्खिदति सलिलाद्धंस उच्चरन् ।
यदंग स तमुत्खिदेन्नैवाद्य न श्वः स्यान्न रात्रि नाहः स्यान्न व्युच्छेत् कदा चन ॥२१ ॥
अष्टाचक्रं वर्तत एकनेमि सहस्राक्षरं प्र पुरो नि पश्चा ।
अर्धेन विश्वं भुवनं जजान यदस्यार्धं कतमः स केतुः ॥२२ ॥
यो अस्य विश्वजन्मन ईशे विश्वस्य चेष्टतः । अन्येषु क्षिप्रधन्वने तस्मै प्राण नमोऽस्तु ते ॥२३ ॥
यो अस्य सर्वजन्मन ईशे सर्वस्य चेष्टतः । अतन्द्रो ब्रह्मणा धीरः प्राणो मानु तिष्ठतु ॥२४ ॥
ऊर्ध्वः सुप्तेषु जागार ननु तियङ् नि पद्यते । न सुप्तमस्य सुप्तेष्वनु शुश्राव कश्चन ॥२५ ॥
प्राण मा मत् पर्यावृतो न मदन्यो भविष्यसि । अपां गर्भमिव जीवसे प्राण बध्नामि त्वामयि ॥२६ ॥
*prāṇāya namo yasya sarvamidaṁ vaśe |*
*yo bhūtaḥ sarvasyeśvaro yasmintsarvaṁ pratiṣṭhitam ||1 ||*
*namaste prāṇa krandāya namaste stanayitnave |*
*namaste prāṇa vidyute namaste prāṇa varṣate ||2 ||*
*yat prāṇa stanayitnunābhikrandatyoṣadhīḥ |*
*pra vīyante garbhān dadhate'tho bahvīrvi jāyante ||3 ||*
*yat prāṇa ṛtāvāgate'bhikrandatyoṣadhīḥ |*
*sarvaṁ tadā pra modate yat kiṁ cha bhūmyāmadhi ||4 ||*
*yat prāṇa abhyavarṣīd varṣeṇa pṛthivīṁ mahīm |*
*paśavastat pra modante maho vai no bhaviṣyati ||5 ||*
*abhivṛṣṭā oṣadhayaḥ prāṇena samavādiran |*
*āyurvai naḥ prātītaraḥ sarvā naḥ surabhīrakaḥ ||6 ||*
*namaste astvāyate namo astu parāyate | namaste prāṇa tiṣṭhata āsīnāyota te namaḥ ||7 ||*
*namaste prāṇa prāṇate namo astvapānate |*
*parāchīnāya te namaḥ pratīchīnāya te namaḥ sarvasmai ta idaṁ namaḥ ||8 ||*
*yā te prāṇa priyā tanūryo te prāṇa preyasī |*
*atho yad bheṣajaṁ tava tasya no dhehi jīvase ||9 ||*
*prāṇaḥ prajā anu vaste pitā putramiva priyam |*
*prāṇo ha sarvasyeśvaro yachcha prāṇati yachcha na ||10 ||*
*prāṇo mṛtyuḥ prāṇastakmā prāṇaṁ devā upāsate |*
*prāṇo ha satyavādinamuttame loka ā dadhat ||11 ||*
*prāṇo virāṭ prāṇo deṣṭrī prāṇaṁ sarva upāsate |*
*prāṇo ha sūryaśchandramāḥ prāṇamāhuḥ prajāpatim |12 ||*
*prāṇāpānau vrīhiyavāvanaḍvān prāṇa uchyate |*
*yave ha prāṇa āhito'pāno vrīhiruchyate ||13 ||*
*apānati prāṇati puruṣo garbhe antarā | yadā tvaṁ prāṇa jinvasyatha sa jāyate punaḥ ||14 ||*
*prāṇamāhurmātariśvānaṁ vāto ha prāṇa uchyate |*
*prāṇe ha bhūtaṁ bhavyaṁ cha prāṇe sarvaṁ pratiṣṭhitam ||15 ||*
*ātharvaṇīrāṁgirasīrdaivīrmanuṣyajā uta |*
*oṣadhayaḥ pra jāyante yadā tvaṁ prāṇa jinvasi ||16 ||*
*yadā prāṇo abhyavarṣīd varṣeṇa pṛthivīṁ mahīm |*
*oṣadhayaḥ pra jāyante'tho yāḥ kāścha vīrudhaḥ |17 ||*
*yaste prāṇedaṁ veda yasiṁmaśchāsi pratiṣṭhitaḥ |*
*sarve tasmai baliṁ harānamuṣmilloṁka uttame ||18 ||*
*yathā prāṇa balihṛtastubhyaṁ sarvāḥ prajā imāḥ |*
*evā tasmai baliṁ harān yastvā śṛṇavat suśravaḥ |19 ||*
*antargarbhaśchrati devatāsvābhūto bhūtaḥ sa u jāyate punaḥ |*
*sa bhūto bhavyaṁ bhaviṣyat pitā putraṁ pra viveśā śachībhiḥ ||20 ||*
*ekaṁ pādaṁ notkhidati salilāddhaṁsa uchcharan |*
*yadaṁga sa tamutkhidennaivādya na śvaḥ syānna rātri nāhaḥ syānna vyuchchhet kadā chana ||21 ||*
*aṣṭāchakraṁ vartata ekanemi sahasrākṣaraṁ pra puro ni paśchā |*
*ardhena viśvaṁ bhuvanaṁ jajāna yadasyārdhaṁ katamaḥ sa ketuḥ ||22 ||*

*yo asya viśvajanmana īśe viśvasya cheṣṭataḥ |*
*anyeṣu kṣipradhanvane tasmai prāṇa namo'stu te ||23 ||*
*yo asya sarvajanmana īśe sarvasya cheṣṭataḥ |*
*atandro brahmaṇā dhīraḥ prāṇo mānu tiṣṭhatu ||24 ||*
*ūrdhvaḥ supteṣu jāgāra nanu tiyaṁ ni padyate |*
*na suptamasya supteṣvanu śuśrāva kaśchana ||25 ||*
*prāṇa mā mat paryāvṛto na madanyo bhaviṣyasi |*
*apāṁ garbhamiva jīvase prāṇa badhnāmi tvāmayi ||26 ||*

## ६४४. वैश्वामित्रो मधुच्छन्दा - द्र. मधुच्छन्दा वैश्वामित्रः (Vaiśvāmitro Madhuchchhandā - See Madhuchchhandā Vaiśvāmitraḥ)

## ६४५. व्याघ्रपाद् वासिष्ठः (Vyāghrapād Vāsiṣṭhaḥ)

१. सोमानः सोमः (Somānaḥ Somaḥ) - ऋ. (Rv.) ९.९७.१६-१८

जुष्टी न इन्दो सुपथा सुगान्युरौ पवस्व वारिवांसि वृण्वन् ।
घनेव विष्वग्दुरितानि विघ्नन्नधि ष्णुना धन्व सानो अव्ये ॥१६॥
वृष्टिं नो अर्ष दिव्यां जिगत्नुमिळावतीं शंगयीं जीरदानुम् ।
स्तुकेव वीता धन्वा विचिन्वन् बन्धूँरिमाँ अवराँ इन्दो वयून् ॥१७॥
ग्रनिंथ न वि ष्य ग्रथितं पुनान ऋजुं च गातुं वृजिनं च सोम ।
अत्यो न क्रदो हरिरा सृजानो मर्यो देव धन्व पस्त्यावान् ॥१८॥
*juṣṭvī na indo supathā sugānyurau pavasva vārivāṁsi vṛṇvan |*
*ghaneva viṣvagduritāni vighnannadhi ṣṇunā dhanva sāno avye ||16 ||*
*vṛṣṭiṁ no arṣa divyāṁ jigatnumiḻāvatīṁ śaṁgayīṁ jīradānum |*
*stukeva vītā dhanvā vichinvan bandhūm̐rimām̐ avarām̐ indo vayūn ||17 ||*
*granimtha na vi ṣya grathitaṁ punāna ṛjuṁ cha gātuṁ vṛjinaṁ cha soma |*
*atyo na krado harirā sṛjāno maryo deva dhanva pastyāvān ||18 ||*

## ६४६. शकपूतो नार्मेधः (Śakapūto Nārmedhaḥ)

१. मित्रावरुणौ (Mitrāvaruṇau) - ऋ. (Rv.) १०.१३२.२-७

ता वां मित्रावरुणा धारयत्क्षिती सुषुम्नेषितत्वता यजामसि ।
युवोः क्राणाय सख्यैरभि ष्याम रक्षसः ॥२॥
अधा चिन्नु यद्दिधिषामहे वामभि प्रियं रेक्णः पत्यमानाः ।
दद्वाँ वा यत्पुष्यति रेक्णः सम्वारन्नकिरस्य मघानि ॥३॥
असावन्यो असुर सूयत द्यौस्त्वं विश्वेषां वरुणासि राजा ।
मूर्धा रथस्य चाकन्नैतावतैनसान्तकध्रुक् ॥४॥
अस्मिन्त्स्वे३ तच्छकपूत एनो हिते मित्रे निगतान्हन्ति वीरान् ।
अवोर्वा यद्धात्तनूष्ववः प्रियासु यज्ञियास्ववर्वा ॥५॥
युवोर्हि मातादितिर्विचेतसा द्यौर्न भूमिः पयसा पुपूतनि ।
अव प्रिया दिदिष्टन सूरो निनिक्त रश्मिभिः ॥६॥
युवं ह्यप्नराजावसीदतं तिष्ठद्रथं न धूर्षदं वनर्षदम् ।
ता नः कणूकयन्तीर्नृमेधस्तत्रे अंहसः सुमेधस्तत्रे अंहसः ॥७॥
*tā vāṁ mitrāvaruṇā dhārayatkṣitī suṣumneṣitatvatā yajāmasi |*
*yuvoḥ krāṇāya sakhyairabhi ṣyāma rakṣasaḥ ||2 ||*
*adhā chinnu yaddidhiṣāmahe vāmabhi priyaṁ reknaḥ patyamānāḥ |*
*dadvām̐ vā yatpuṣyati reknaḥ samvārannakirasya maghāni ||3 ||*
*asāvanyo asura sūyata dyaustvaṁ viśveṣāṁ varuṇāsi rājā |*
*mūrdhā rathasya chākannaitāvatainasāntakadhruk ||4 ||*
*asmintsve3 tachchhakapūta eno hite mitre nigatānhanti vīrān |*
*avorvā yaddhāttanūṣvavaḥ priyāsu yajñiyāsvarvā ||5 ||*
*yuvorhi mātāditirvichetasā dyaurna bhūmiḥ payasā pupūtani |*
*ava priyā didiṣṭana sūro ninikta raśmibhiḥ ||6 ||*
*yuvaṁ hyapnarājāvasīdataṁ tiṣṭhadrathaṁ na dhūrṣadaṁ vanarṣadam |*

*tā naḥ kaṇūkayantīrnṛmedhastatre aṁhasaḥ sumedhastatre aṁhasaḥ //7 //*

२. लिङ्गोक्ता (Liṅgoktā) - ऋ. (Rv.) १०.१३२.१

ईजानमिद् द्यौर्गूर्तावसुरीजानं भूमिरभि प्रभूषणि। ईजानं देवावश्विनावभि सुम्नैरवर्धताम् ॥१॥
*ījānamid dyaurgūrtāvasurījānaṁ bhūmirabhi prabhūṣaṇi / ījānaṁ devāvaśvināvabhi sumnairavardhatām //1 //*

## ६४७. शक्तिः (Śaktiḥ)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.७९.१

इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
शिक्षा णो अस्मिन् पुरुहूत यामनि जीवा ज्योतिरशीमहि ॥१॥
*indra kratuṁ na ā bhara pitā putrebhyo yathā /*
*śikṣā ṇo asmin puruhūta yāmani jīvā jyotiraśīmahi //1 //*

२. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.१०८.३; १४-१६

ऋ. (Rv.) ९.१०८.३

त्वं ह्य१ङ्ग दैव्या पवमान जनिमानि द्युमत्तमः ।
त्वं ह्य१ङ्ग दैव्या पवमान जनिमानि द्युमत्तमः ।
अमृतत्वाय घोषयः ॥३॥
*tvaṁ hya1ṅga daivyā pavamāna janimāni dyumattamaḥ /*
*tvaṁ hya1ṅga daivyā pavamāna janimāni dyumattamaḥ /*
*amṛtatvāya ghoṣayaḥ //3 //*

ऋ. (Rv.) ९.१०८.१४-१६

यस्य न इन्द्रः पिबाद्यस्य रुतो यस्य वार्यमणा भगः ।
आ येन मित्रावरुणा करामह एन्द्रमवसे महे ॥१४॥
इन्द्राय सोम पातवे नृभिर्यतः स्वायुधो मदिन्तमः । पवस्व मधुमत्तमः ॥१५॥
इन्द्रस्य हार्दि सोमधानमा विश समुद्रमिव सिन्धवः ।
जुष्टो मित्राय वरुणाय वायवे दिवो विष्टम्भ उत्तमः ॥१६॥
*yasya na indraḥ pibādyasya ruto yasya vāryamaṇā bhagaḥ /*
*ā yena mitrāvaruṇā karāmaha endramavase mahe //14 //*
*indrāya soma pātave nṛbhiryataḥ svāyudho madintamaḥ /*
*pavasva madhumattamaḥ //15 //*
*indrasya hārdi somadhānamā viśa samudramiva sindhavaḥ /*
*juṣṭo mitrāya varuṇāya vāyave divo viṣṭmbha uttamaḥ //16 //*

## ६४८. शक्तिर्वासिष्ठः (Śaktirvāsiṣṭhaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.९७.१९-२१; सा. (Sv.) ५८३; ९३८; १०९७

ऋ. (Rv.) ९.९७.१९-२१

जुष्टो मदाय देवतात इन्दो परि ष्णुना धन्व सानो अव्ये ।
सहस्रधारः सुरभिरदब्धः परि स्रव वाजसातौ नृषह्ये ॥१९॥
अरश्मानो येऽरथा अयुक्ता अत्यासो न ससृजानास आजौ ।
एते शुक्रासो धन्वन्ति सोमा देवासस्ताँ उप याता पिबध्यै ॥२०॥
एवा न इन्दो अभि देववीति परि स्रव नभो अर्णश्चमूषु ।
सोमो अस्मभ्यं काम्यं बृहन्तं रयिं ददातु वीरवन्तमुग्रम् ॥२१॥
*juṣṭo madāya devatāta indo pari ṣṇunā dhanva sāno avye /*
*sahasradhāraḥ surabhiradabdhaḥ pari srava vājasātau nṛṣahye //19 //*
*araśmāno ye'rathā ayuktā atyāso na sasṛjānāsa ājau /*
*ete śukrāso dhanvanti somā devāsastām̐ upa yātā pibadhyai //20 //*
*evā na indo abhi devavīti pari srava nabho arṇaśchamūṣu /*
*somo asmabhyaṁ kāmyaṁ bṛhantaṁ rayiṁ dadātu vīravantamugram //21 //*

सा. (Sv.) ५८३

त्वं ह्या३ङ्ग दैव्यं पवमान जनिमानि द्युमत्तमः । अमृतत्वाय घोषयन् ॥६॥
*tvaṁ hyā3ṅga daivyaṁ pavamāna janimāni dyumattamaḥ / amṛtatvāya ghoṣayan //6 //*

सा. (Sv.) ९३८

त्वं ह्या३ङ्ग दैव्यं पवमान जनिमानि द्युमत्तमः । अमृतत्वाय घोषयन् ॥१॥
*tvaṁ hyā3ṅga daivyaṁ pavamāna janimāni dyumattamaḥ / amṛtatvāya ghoṣayan //1 //*

सा. (Sv.) १०९७

यस्य त इन्द्रः पिबाद्यस्य मरुतो यस्य वार्यमणा भगः ।
आ येन मित्रावरुणा करामह एन्द्रमवसे महे ॥२॥
*yasya ta indraḥ pibādyasya maruto yasya vāryamaṇā bhagaḥ /*
*ā yena mitrāvaruṇā karāmaha endramavase mahe //2 //*

## ६४९. शची पौलौमी (Śachī Paulaumī)

१. शची पौलौमी (Śachī Paulaumī) - ऋ. (Rv.) १०.१५९.१-६

उदसौ सूर्यो अगादुदयं मामको भगः । अहं तद्विद्वला पतिमभ्यसाक्षि विषासहिः ॥१॥
अहं केतुरहं मूर्धाहमुग्रा विवाचनी । ममेदनु क्रतुं पतिः सेहानाया उपाचरेत् ॥२॥
मम पुत्राः शत्रुहणोऽथो मे दुहिता विराट् । उताहमस्मि संजया पत्यौ मे श्लोक उत्तमः ॥३॥
येनेन्द्रो हविषा कृत्व्यभवद् द्युम्न्युत्तमः । इदं तदक्रि देवा असपत्ना किलाभुवम् ॥४॥
असपत्ना सपत्नघ्नी जयन्त्यभिभूवरी । आवृखमन्यासां वर्चो राधो अस्थेयसामिव ॥५॥
समजैषमिमा अहं सपत्नीरभिभूवरी । यथाहमस्य वीरस्य वीराजानि जनस्य च ॥६॥
*udasau sūryo agādudayaṁ māmako bhagaḥ /*
*ahaṁ tadvidvalā patimabhyasākṣi viṣāsahiḥ //1 //*
*ahaṁ keturahaṁ mūrdhāhamugrā vivāchanī /*
*mamedanu kratuṁ patiḥ sehānāyā upācharet //2 //*
*mama putrāḥ śatruhaṇo'tho me duhitā virāṭ /*
*utāhamasmi saṁjayā patyau me śloka uttamaḥ //3 //*
*yenendro haviṣā kṛtvyabhavad dyumnyuttamaḥ /*
*idaṁ tadakri devā asapatnā kilābhuvam //4 //*
*asapatnā sapatnaghnī jayantyabhibhūvarī /*
*āvṛkhamanyāsāṁ varcho rādho astheyasāmiva //5 //*
*samajaiṣamimā ahaṁ sapatnīrabhibhūvarī / yathāhamasya vīrasya virājāni janasya cha //6 //*

## ६५०. शतप्रभेदेनो वैरुपः (Śataprabhedeno Vairupaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.११३.१-१०

तमस्य द्यावापृथिवी सचेतसा विश्वेभिर्देवैरनु शुष्ममावताम् ।
यदैत्कृण्वानो महिमानमिन्द्रियं पीत्वी सोमस्य क्रतुमाँ अवर्धत ॥१॥
तमस्य विष्णुर्महिमानमोजसांशुं दधन्वान्मधुनो वि रप्शते ।
देवेभिरिन्द्रो मघवा सयावभिर्वृत्रं जघन्वाँ अभवद्वरेण्यः ॥२॥
वृत्रेण यदहिना बिभ्रदायुधा समस्थिथा युधये शंसमाविदे ।
विश्वे ते अत्र मरुतः सह त्मनावर्धन्नुग्र महिमानमिन्द्रियम् ॥३॥
जज्ञान एव व्यबाधत स्पृधः प्रापश्यद्वीरो अभि पौंस्यं रणम् ।
अवृश्चदद्रिमव सस्यदः सृजदस्तभ्नानाकं स्वपस्यया पृथुम् ॥४॥
आदिन्द्रः सत्रा तविषीरपत्यत वरीयो द्यावापृथिवी अबाधत ।
अवाभरद्धृषितो वज्रमायसं शेवं मित्राय वरुणाय दाशुषे ॥५॥
इन्द्रस्यात्र तविषीभ्यो विरप्शिन ऋघायतो अरंहयन्त मन्यवे ।
वृत्रं यदुग्रो व्यवृश्चदोजसापो बिभ्रतं तमसा परीवृतम् ॥६॥
या वीर्याणि प्रथमानि कर्त्वा महित्वेभिर्यतमानौ समीयतुः ।
ध्वान्तं तमोऽव दध्वसे हत इन्द्रो मह्ना पूर्वहूतावपत्यत ॥७॥

विश्वे देवासो अध वृष्ण्यानि तेऽवर्धयन्त्सोमवत्या वचस्यया ।
रद्धं वृत्रमहिमिन्द्रस्य हन्मनाग्निर्न जम्भैस्तृष्वन्नमावयत् ॥८॥
भूरि दक्षेभिर्वचनेभिर्ऋक्वभिः सख्येभिः सख्यानि प्र वोचत ।
इन्द्रो धुनिं च चुमुरिं च दम्भयंछ्रद्धामनस्या शृणुते दभीतये ॥९॥
त्वं पुरूण्या भरा स्वश्व्या येभिर्मंसै निवचनानि शंसन् ।
सुगेभिर्विश्वा दुरिता तरेम विदो षु ण उर्विया गाधमद्य ॥१०॥
*tamasya dyāvāpṛthivī sachetasā viśvebhirdevairanu śuṣmamāvatām /*
*yadaitkṛṇvāno mahimānamindrayaṁ pītvī somasya ṛtumām̐ avardhata //1 //*
*tamasya viṣṇurmahimānamojasāṁśuṁ dadhanvānmadhuno vi rapśate /*
*devebhirindro maghavā sayāvabhivṛtraṁ jaghanvām̐ abhavadvareṇyaḥ //2 //*
*vṛtreṇa yadahinā bibhradāyudhā samasthithā yudhaye śaṁsamāvide /*
*viśve te atra marutaḥ saha tmanāvardhannugra mahimānamindriyam //3 //*
*jajñāna eva vyabādhata spṛdhaḥ prāpaśyadvīro abhi pauṁsyaṁ raṇam /*
*avṛśchadadrimava sasyadaḥ sṛjadastabhnānākaṁ svapasyayā pṛthum //4 //*
*ādindraḥ satrā taviṣīrapatyata varīyo dyāvāpṛthivī abādhata /*
*avābharaddhṛṣito vajramāyasaṁ śevaṁ mitrāya varuṇāya dāśuṣe //5 //*
*indrasyātra taviṣībhyo virapśina ṛghāyato araṁhayanta manyave /*
*vṛtraṁ yadugro vyavṛścharadojasāpo bibhrataṁ tamasā parīvṛtam //6 //*
*yā vīryāṇi prathamāni kartvā mahitvebhiryatamānau samīyatuḥ /*
*dhvāntaṁ tamo'va dadhvase hata indro mahnā pūrvahūtāvapatyata //7 //*
*viśve devāso adha vṛṣṇyāni te'vardhayantsomavatyā vachasyayā /*
*raddhaṁ vṛtramahimindrasya hanmanāgnirna jambhaistṛṣvannamāvayat //8 //*
*bhūri dakṣebhirvachanebhirṛkvabhiḥ sakhyebhiḥ sakhyāni pra vochata /*
*indro dhuniṁ cha chumuriṁ cha dambhayaṁdraddhāmanasyā śṛṇute dabhītaye //9 //*
*tvaṁ purūṇyā bharā svaśvyā yebhirmaṁsai nivachanāni śaṁsan /*
*sugebhirviśvā duritā tarema vido ṣu ṇa urviyā gādhamadya //10 //*

**६५१. शतं वैखानसः (Śataṁ Vaikhānasaḥ)**

१. अग्निः (Agniḥ) - ऋ. (Rv.) ९.६६.१९-२१

अग्न आयूंषि पवस आ सुवोर्जमिषं च नः। आरे बाधस्व दुच्दुनाम् ॥१९॥
अग्निर्ऋषिः पवमानः पांचजन्यः पुरोहितः। तमीमहे महागयम् ॥२०॥
अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम्। दधद्रयिं मयि पोषम् ॥२१॥
*agna āyūṁṣi pavasa ā suvorjamiṣaṁ cha naḥ / āre bādhasva duchdunām //19 //*
*agnirṛṣiḥ pavamānaḥ pāṁchajanyaḥ purohitaḥ / tamīmahe mahāgayam //20 //*
*agne pavasva svapā asme varchaḥ suvīryam / dadhadrayiṁ mayi poṣam //21 //*

२. अग्निः पवमानः (Agniḥ Pavamānaḥ) - सा. (Sv.) ६२७; १४६४; १५१८-१५२०

सा. (Sv.) ६२७

अग्न अयूंषि पवस आ सुवोर्जमिषं च नः। आरे बाधस्व दुच्छुनाम् ॥१॥
*agna ayūṁṣi pavasa ā suvorjamiṣaṁ cha naḥ / āre bādhasva duchchhunām //1 //*

सा. (Sv.) १४६४

अग्न आयूंषि पवसे आ सुवोर्जमिषं च नः। आरे बाधस्व दुच्छुनाम् ॥३॥
*agna āyūṁṣi pavase ā suvorjamiṣaṁ cha naḥ / āre bādhasva duchchhunām //3 //*

सा. (Sv.) १५१८-१५२०

अग्न आयूंषि पवस आ सुवोर्जमिषं च नः। आरे बाधस्व दुच्दुनाम्॥१॥
अग्निर्ऋषिः पवमानः पांचजन्यः पुरोहितः। तमीमहे महागयम् ॥२॥
अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम्। दधद्रयिं मयि पोषम् ॥३॥
*agna āyūṁṣi pavasa ā suvorjamiṣaṁ cha naḥ / āre bādhasva duchdunām //1 //*
*agnirṛṣiḥ pavamānaḥ pāṁchajanyaḥ purohitaḥ / tamīmahe mahāgayam //2 //*
*agne pavasva svapā asme varchaḥ suvīryam / dadhadrayiṁ mayi poṣam //3 //*

३. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.६६.१-१८; २२-३०; सा. (Sv.) ६५७-

६५९; १३१०-१३१२

ऋ. (Rv.) ९.६६.१-१८

पवस्व विश्वचर्षणेऽभि विश्वानि काव्या। सखा सखिभ्य ईड्यः ॥१॥
ताभ्यां विश्वस्य राजसि ये पवमान धामनी। प्रतीची सोम तस्थतुः ॥२॥
परि धामानि यानि ते त्वं सोमासि विश्वतः। पवमान ऋतुभिः कवे ॥३॥
पवस्व जनयन्निषोऽभि विश्वानि वार्या। सखा सखिभ्य ऊतये ॥४॥
तव शुक्रासो अर्चयो दिवस्पृष्ठे वि तन्वते। पवित्रं सोम धामभिः ॥५॥
तवेमे सप्त सिन्धवः प्राशिषं सोम सिस्रते। तुभ्यं धावन्ति धेनवः ॥६॥
प्र सोम याहि धारया सुत इन्द्राय मत्सरः। दधानो अक्षिति श्रवः ॥७॥
समु त्वा धीभिरस्वरन्हिन्वतीः सप्त जामयः। विप्रमाजा विवस्वतः ॥८॥
मृजन्ति त्वा समग्रुवोऽव्ये जीरावधि ष्वणि। रेभो यदज्यसे वने ॥९॥
पवमानस्य ते कवे वाजिन्त्सर्गा असृक्षत। अर्वन्तो न श्रवस्यवः ॥१०॥
अच्छा कोशं मधुश्चुतमसृग्रं वारे अव्यये। अवावशन्त धीतयः ॥११॥
अच्छा समुद्रमिन्दवोऽस्तं गावो न धेनवः। अग्मन्नृतस्य योनिमा ॥१२॥
प्र ण इन्दो महे रण आपो अर्षन्ति सिन्धवः। यद् गोभिर्वासयिष्यसे ॥१३॥
अस्य ते सख्ये वयमियक्षन्तस्त्वोतयः। इन्दो सखित्वमुश्मसि ॥१४॥
आ पवस्व गविष्टये महे सोम नृचक्षसे। एन्द्रस्य जठरे विश ॥१५॥
महाँ असि सोम ज्येष्ठ उग्राणमिन्द ओजिष्ठः। युध्वा संछश्वज्जिगेथ ॥१६॥
य उग्रेभ्यश्चिदोजीयांछूरेभ्यश्चिच्छूरतरः। भूरिदाभ्यश्चिन्मंहीयान् ॥१७॥
त्वं सोम सूर एषस्तोकस्य साता तनूनाम्। वृणीमहे सख्याय वृणीमहे युज्याय ॥१८॥

*pavasva viśvacharṣaṇe'bhi viśvāni kāvyā | sakhā sakhibhya īḍyaḥ ||1||*
*tābhyāṁ viśvasya rājasi ye pavamāna dhāmanī | pratīchī soma tasthatuḥ ||2||*
*pari dhāmāni yāni te tvaṁ somāsi viśvataḥ | pavamāna ṛtubhiḥ kave ||3||*
*pavasva janayanniṣo'bhi viśvāni vāryā | sakhā sakhibhya ūtaye ||4||*
*tava śukrāso archayo divaspṛṣṭhe vi tanvate | pavitraṁ soma dhāmabhiḥ ||5||*
*taveme sapta sindhavaḥ prāśiṣaṁ soma sisrate | tubhyaṁ dhāvanti dhenavaḥ ||6||*
*pra soma yāhi dhārayā suta indrāya matsaraḥ | dadhāno akṣiti śravaḥ ||7||*
*samu tvā dhībhirasvaranhinvatīḥ sapta jāmayaḥ | vipramājā vivasvataḥ ||8||*
*mṛjanti tvā samagruvo'vye jīrāvadhi ṣvaṇi | rebho yadajyase vane ||9||*
*pavamānasya te kave vājintsargā asṛkṣata | arvanto na śravasyavaḥ ||10||*
*achchhā kośaṁ madhuśchutamasṛgraṁ vāre avyaye | avāvaśanta dhītayaḥ ||11||*
*achchhā samudramindavo'staṁ gāvo na dhenavaḥ | agmannṛtasya yonimā ||12||*
*pra ṇa indo mahe raṇa āpo arṣanti sindhavaḥ | yad gobhirvāsayiṣyase ||13||*
*asya te sakhye vayamiyakṣantastvotayaḥ | indo sakhitvamuśmasi ||14||*
*ā pavasva gaviṣṭaye mahe soma nṛchakṣase | endrasya jaṭhare viśa ||15||*
*mahām̐ asi soma jyeṣṭha ugrāṇaminda ojiṣṭhaḥ | yudhvā saṁchhaśvajjigetha ||16||*
*ya ugrebhyaśchidojīyāṁchhūrebhyaśchichchhūrataraḥ |*
*bhūridābhyaśchinmaṁhīyān ||17||*
*tvaṁ soma sūra eṣastokasya sātā tanūnām | vṛṇīmahe sakhyāya vṛṇīmahe yujyāya ||18||*

ऋ. (Rv.) ९.६६.२२-३०

पवमानो अति स्रिधोऽभ्यर्षति सुष्टुतिम्। सूरो न विश्वदर्शतः ॥२२॥
स मर्मृजान आयुभिः प्रयस्वान्प्रयसे हितः। इन्दुरत्यो विचक्षणः ॥२३॥
पवमान ऋतं बृहच्छुक्रं ज्योतिरजीजनत्। कृष्णा तमांसि जंघनत् ॥२४॥
पवमानस्य जङ्घ्नतो हरेश्चन्द्रा असृक्षत। जीरा अजिरशोचिषः ॥२५॥
पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः। हरिश्चन्द्रो मरुद्गणः ॥२६॥
पवमानो व्यश्नवद्रश्मिभिर्वाजसातमः। दधत्स्तोत्रे सुवीर्यम् ॥२७॥
प्र सुवान इन्दुरक्षाः पवित्रमत्यव्ययम्। पुनान इन्दुरिन्द्रमा ॥२८॥
एष सोमो अधि त्वचि गवां क्रीळत्यद्रिभिः। इन्द्रं मदाय जोहुवत् ॥२९॥
यस्य ते द्युम्नवत्पयः पवमानाभृतं दिवः। तेन नो मृळ जीवसे ॥३०॥

*pavamāno ati sridho'bhyarṣati suṣṭutim । sūro na viśvadarśataḥ ॥22॥*
*sa marmṛjāna āyubhiḥ prayasvānprayase hitaḥ । induratyo vichakṣaṇaḥ ॥23॥*
*pavamāna ṛtaṁ bṛhachchhukraṁ jyotirajījanat । kṛṣṇā tamāṁsi jaṅghanat ॥24॥*
*pavamānasya jaṅghnato hareśchandrā asṛkṣata । jīrā ajiraśochiṣaḥ ॥25॥*
*pavamāno rathītamaḥ śubhrebhiḥ śubhraśastamaḥ । hariśchandro marudgaṇaḥ ॥26॥*
*pavamāno vyaśnavadraśmibhirvājasātamaḥ । dadhatstotre suvīryam ॥27॥*
*pra suvāna indurakṣāḥ pavitramatyavyayam । punāna indurindramā ॥28॥*
*eṣa somo adhi tvachi gavāṁ krīḻatyadribhiḥ । indraṁ madāya johuvat ॥29॥*
*yasya te dyumnavatpayaḥ pavamānābhṛtaṁ divaḥ । tena no mṛḻa jīvase ॥30॥*

सा. (Sv.) ६५७-६५९

पवमानस्य ते कवे वाजिन्त्सर्गा असृक्षत। अर्वन्तो न श्रवस्यवः ॥१॥
अच्छा कोशं मधुश्चुतमसृग्रं वारे अव्यये। अवावशन्त धीतयः ॥२॥
अच्छा समुद्रमिन्दवोऽस्तं गावो न धेनवः। अग्मन्नृतस्य योनिमा ॥३॥
*pavamānasya te kave vājintsargā asṛkṣata । arvanto na śravasyavaḥ ॥1॥*
*achchhā kośaṁ madhuśchutamasṛgraṁ vāre avyaye । avāvaśanta dhītayaḥ ॥2॥*
*achchhā samudramindavo'staṁ gāvo na dhenavaḥ । agmannṛtasya yonimā ॥3॥*

सा. (Sv.) १३१०-१३१२

पवमानस्य जिघ्नतो हरेश्चन्द्रा असृक्षत। जीरा अजिरशोचिषः ॥१॥
पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः। हरिश्चन्द्रो मरुद्गणः ॥२॥
पवमान व्यश्नुहि रश्मिभिर्वाजसातमः। दधत्स्तोत्रे सुवीर्यम् ॥३॥
*pavamānasya jighnato hareśchandrā asṛkṣata । jīrā ajiraśochiṣaḥ ॥1॥*
*pavamāno rathītamaḥ śubhrebhiḥ śubhraśastamaḥ । hariśchandro marudgaṇaḥ ॥2॥*
*pavamāna vyaśnuhi raśmibhirvājasātamaḥ । dadhatstotre suvīryam ॥3॥*

## ६५२. शन्तातिः (Śantātiḥ)

१. अग्निः (Agniḥ) - अ. (Av.) ६.१०.१

पृथिव्यै श्रोत्राय वनस्पतिभ्योऽग्नयेऽधिपतये स्वाहा ॥१॥
*pṛthivyai śrotrāya vanaspatibhyo'gnaye'dhipataye svāhā ॥1॥*

२. अग्न्यादयो मन्त्रोक्ताः (Agnyādayo Mantroktāḥ) - अ. (Av.) ११.६.१-२३

अग्निं ब्रूमो वनस्पतीनोषधीरुत वीरुधः । इन्द्रं बृहस्पतिं सूर्यं ते नो मुंचन्त्वंहसः ॥१॥
ब्रूमो राजानं वरुणं मित्रं विष्णुमथो भगम् । अंशं विवस्वन्तं ब्रूमस्ते नो मुंचन्त्वंहसः ॥२॥
ब्रूमो देवं सवितारं धातारमुत पूषणम् । त्वष्टारमग्रियं ब्रूमस्ते नो मुंचन्त्वंहसः ॥३॥
गन्धर्वाप्सरसो ब्रूमो अश्विना ब्रह्मणस्पतिम् । अयमा नाम यो देवस्ते नो मुंचन्त्वंहसः ॥४॥
अहोरात्रे इदं ब्रूमः सूर्याचन्द्रमसावुभा । विश्वानादित्यान् ब्रूमस्ते नो मुंचन्त्वंहसः ॥५॥
वातं ब्रूमः पर्जन्यमन्तरिक्षमथो दिशः । आशाश्च सर्वा ब्रूमस्ते नो मुंचन्त्वंहसः ॥६॥
मुंचन्तु मा शपथ्यादहोरात्रे अथो उषाः । सोमो मा देवो मुंचतु यमाहुश्चन्द्रमा इति ॥७॥
पार्थिवा दिव्याः पशव आरण्या उत ये मृगाः। शुकुन्तान् पक्षिणो ब्रूमस्ते नो मुंचन्त्वंहसः ॥८॥
भवाशर्वाविदं ब्रूमो रुद्रं पशुपतिश्च यः। इषूर्या एषां संविद्म ता नः सन्तु सदा शिवाः ॥९॥
दिवं ब्रूमो नक्षत्राणि भूमिं यक्षाणि पर्वतान्। समुद्रा नद्यो वेशन्तास्ते नो मुंचन्त्वंहसः ॥१०॥
सप्तऋषीन् वा इदं ब्रूमोऽपो देवीः प्रजापतिम्। पितृन् यमश्रेष्ठान् ब्रूमस्ते नो मुंचन्त्वंहसः ॥११॥
ये देवा दिविषदो अन्तरिक्षसदश्च ये। पृथिव्यां शक्रा ये श्रितास्ते नो मुंचन्त्वंहसः ॥१२॥
आदित्या रुद्रा वसवो दिवि देवा अथर्वाणः। अंगिरसो मनीषिणस्ते नो मुंचन्त्वंहसः ॥१३॥
यज्ञं ब्रूमो यजमानमृचः सामानि भेषजा। यजूंषि होत्रा ब्रूमस्ते नो मुंचन्त्वंहसः ॥१४॥
पंच राज्यानि वीरुधां सोमश्रेष्ठानि ब्रूमः। दर्भो भंगो यवः सहस्ते नो मुंचन्त्वंहसः ॥१५॥
अरायान् ब्रूमो रक्षांसि सर्पान् पुण्यजनान् पितृन्। मृतयूनेकशतं ब्रूमस्ते नो मुंचन्त्वंहसः ॥१६॥
ऋतून् ब्रूम ऋतुपतीनार्तवानुत हायनान् । समाः संवत्सरान् मासांस्ते नो मुंचन्त्वंहसः ॥१७॥
एत देवा दक्षिणतः पश्चात् प्रांच उदेत । पुरस्तादुत्तराच्छक्रा विश्वे देवाः समेत्य ते नो मुंचन्त्वंहसः ॥१८॥
विश्वान्देवानिदं ब्रूमः सत्यसंधानृतावृधः । विश्वाभिः पत्नीभिः सह ते नो मुंचन्त्वंहसः ॥१९॥
सवीन् देवानिदं ब्रूमः सत्यसंधानृतावृधः । सर्वाभिः पत्नीभिः सह ते नो मुंचन्त्वंहसः ॥२०॥

भूतं ब्रूमो भूतपतिं भूतानामुत यो वशी । भूतानि सर्वा संगत्य ते नो मुंचन्त्वंहसः ॥२१॥
या देवीः पंच प्रदिशो ये देवा द्वादशर्तवः। संवत्सरस्य ये दंष्ट्रास्ते नः सन्तु सदा शिवाः ॥२२॥
यन्मातली रथक्रीतममृतं वेद भेषजम् । तदिन्द्रो अप्सु प्रावेशयत् तदापो दत्त भेषजम् ॥२३॥
*agiṁna brūmo vanaspatīnoṣadhīruta vīrudhaḥ /*
*indraṁ bṛhaspatiṁ sūryaṁ te no muṁchantvaṁhasaḥ //1 //*
*brūmo rājānaṁ varuṇaṁ mitraṁ viṣṇumatho bhagam /*
*aṁśaṁ vivasvantaṁ brūmaste no muṁchantvaṁhasaḥ //2 //*
*brūmo devaṁ savitāraṁ dhātāramuta pūṣaṇam /*
*tvaṣṭāramagriyaṁ brūmaste no muṁchantvaṁhasaḥ //3 //*
*gandharvāpsaraso brūmo aśvinā brahmaṇaspatim /*
*ayamā nāma yo devaste no muṁchantvaṁhasaḥ //4 //*
*ahorātre idaṁ brūmaḥ sūryāchandramasāvubhā /*
*viśvānādityān brūmaste no muṁchantvaṁhasaḥ //5 //*
*vātaṁ brūmaḥ parjanyamantarikṣamatho diśaḥ /*
*āśāścha sarvā brūmaste no muṁchantvaṁhasaḥ //6 //*
*muṁchantu mā śapathyādahorātre atho uṣāḥ /*
*somo mā devo muṁchatu yamāhuśchandramā iti //7 //*
*pārthivā divyāḥ paśava āraṇyā uta ye mṛgāḥ /*
*śukuntān pakṣiṇo brūmaste no muṁchantvaṁhasaḥ //8 //*
*bhavāśarvāvidaṁ brūmo rudraṁ paśupatiścha yaḥ /*
*iṣūryā eṣāṁ saṁvidma tā naḥ santu sadā śivāḥ //9 //*
*divaṁ brūmo nakṣatrāṇi bhūmiṁ yakṣāṇi parvatān /*
*samudrā nadyo veśantāste no muṁchantvaṁhasaḥ //10 //*
*saptarṣīn vā idaṁ brūmo'po devīḥ prajāpatim /*
*pitṛn yamaśreṣṭhān brūmaste no muṁchantvaṁhasaḥ //11 //*
*ye devā diviṣado antarikṣasadaścha ye /*
*pṛthivyāṁ śakrā ye śritāste no muṁchantvaṁhasaḥ //12 //*
*ādityā rudrā vasavo divi devā atharvāṇaḥ /*
*aṁgiraso manīṣiṇaste no muṁchantvaṁhasaḥ //13 //*
*yajñaṁ brūmo yajamānamṛchaḥ sāmāni bheṣajā /*
*yajūṁṣi hotrā brūmaste no muṁchantvaṁhasaḥ //14 //*
*paṁcha rājyāni vīrudhāṁ somaśreṣṭhāni brūmaḥ /*
*darbho bhaṁgo yavaḥ sahaste no muṁchantvaṁhasaḥ //15 //*
*arāyān brūmo rakṣāṁsi sarpān puṇyajanān pitṛn /*
*mṛtayūnekaśataṁ brūmaste no muṁchantvaṁhasaḥ //16 //*
*ṛtūn brūma ṛtupatīrnātavānuta hāyanān /*
*samāḥ saṁvatsarān māsāṁste no muṁchantvaṁhasaḥ //17 //*
*eta devā dakṣiṇataḥ paśchāt prāṁcha udeta /*
*purastāduttarāchchhakrā viśve devāḥ sametya te no muṁchantvaṁhasaḥ //18 //*
*viśvāndevānidaṁ brūmaḥ satyasaṁdhānṛtāvṛdhaḥ /*
*viśvābhiḥ patnībhiḥ saha te no muṁchantvaṁhasaḥ //19 //*
*savīn devānidaṁ brūmaḥ satyasaṁdhānṛtāvṛdhaḥ /*
*sarvābhiḥ patnībhiḥ saha te no muṁchantvaṁhasaḥ //20 //*
*bhūtaṁ brūmo bhūtapatiṁ bhūtānāmuta yo vaśī /*
*bhūtāni sarvā saṁgatya te no muṁchantvaṁhasaḥ //21 //*
*yā devīḥ paṁcha pradiśo ye devā dvādaśartavaḥ /*
*saṁvatsarasya ye daṁṣṭrāste naḥ santu sadā śivāḥ //22 //*
*yanmātalī rathakrītamamṛtaṁ veda bheṣajam /*
*tadindro apsu prāveśayat tadāpo datta bheṣajam //23 //*

३. आदित्यरश्मिः (Ādityaraśmiḥ) - अ. (Av.) ६.२२.१

कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत पतन्ति ।
त आववृत्रन्त्सदनादृतस्यादिद् घृतेन पृथिवीं व्यूदः ॥१॥
*kṛṣṇaṁ niyānaṁ harayaḥ suparṇā apo vasānā divamuta patanti /*
*ta āvavṛtrantsadanādṛtasyādid ghṛtena pṛthivīṁ vyūdaḥ //1 //*

४. आपः (Āpaḥ) - अ. (Av.) १.३३.१-४; ६.२३.१-३; ६.५१.१-२

अ. (Av.) १.३३.१-४

हिरण्यवर्णाः शुचयः पावका यासु जातः सविता यास्वग्निः ।
या अग्िंन गर्भं दधिरे सुवर्णास्ता न आपः शं स्योना भवन्तु ॥१॥
यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यंजनानाम् ।
या अग्िंन गर्भं दधिरे सुवर्णास्ता न आपः शं स्योना भवन्तु ॥२॥
यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षं बहुधा भवन्ति ।
या अग्िंन गर्भं दधिरे सुवर्णास्ता न आपः शं स्योना भवन्तु ॥३॥
शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोप स्पृशत त्वचं मे ।
घृतश्चुतः शुचयो याः पावकास्ता न आपः शं स्योना भवन्तु ॥४॥

*hiraṇyavarṇāḥ śuchayaḥ pāvakā yāsu jātaḥ savitā yāsvagniḥ /*
*yā agiṁna garbhaṁ dadhire suvarṇāstā na āpaḥ śaṁ syonā bhavantu //1 //*
*yāsāṁ rājā varuṇo yāti madhye satyānṛte avapaśyaṁjanānām /*
*yā agiṁna garbhaṁ dadhire suvarṇāstā na āpaḥ śaṁ syonā bhavantu //2 //*
*yāsāṁ devā divi kṛṇvanti bhakṣaṁ yā antarikṣaṁ bahudhā bhavanti /*
*yā agiṁna garbhaṁ dadhire suvarṇāstā na āpaḥ śaṁ syonā bhavantu //3 //*
*śivena mā chakṣuṣā paśyatāpaḥ śivayā tanvopa spṛśata tvachaṁ me /*
*ghṛtaśchutaḥ śuchayo yāḥ pāvakāstā na āpaḥ śaṁ syonā bhavantu //4 //*

अ. (Av.) ६.२३.१-३

सस्रुषीस्तदपसो दिवा नक्तं च सस्रुषीः। वरेण्यक्रतुरहमपो देवी रुप ह्वये ॥१॥
ओता आपः कर्मण्यामुंचन्त्वितः प्रणीतये। सद्यः कृण्वन्त्वेतवे ॥२॥
देवस्य सवितुः सवे कर्म कृण्वन्तु मानुषाः। शं नो भवन्त्वप ओषधीः शिवाः ॥३॥

*sasruṣīstadapaso divā naktaṁ cha sasruṣīḥ / vareṇyakraturahamapo devī rupa hvaye //1 //*
*otā āpaḥ karmaṇyāmuṁchantvitaḥ praṇītaye / sadyaḥ kṛṇvantvetave //2 //*
*devasya savituḥ save karma kṛṇvantu mānuṣāḥ / śaṁ no bhavantvapa oṣadhīḥ śivāḥ //3 //*

अ. (Av.) ६.५१.१-२

वायोः पूतः पवित्रेण प्रत्यङ् सोमो अति द्रुतः। इन्द्रस्य युज्यः सखा ॥१॥
आपो अस्मान् मातरः सूदयन्तु घृतेन नो घृतप्वः पुनन्तु ।
विश्वं हि रिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरा पूत एमि ॥२॥

*vāyoḥ pūtaḥ pavitreṇa pratyaṅ somo ati drutaḥ / indrasya yujyaḥ sakhā //1 //*
*āpo asmān mātaraḥ sūdayantu ghṛtena no ghṛtapvaḥ punantu /*
*viśvaṁ hi ripraṁ pravahanti devīrudidābhyaḥ śuchirā pūta emi //2 //*

५. चन्द्रमा (Chandramā) - अ. (Av.) ६.२१.१-३

इमा यास्तिस्रः पृथिवीस्तासां ह भूमिरुत्तमा । तासामधि त्वचो अहं भेषजं समु जग्रभम् ॥१॥
श्रेष्ठमसि भेषजाना वसिष्ठं वीरुधानाम् । सोमो भगइव यामेषु देवेषु वरुणो यथा ॥२॥
रेवतीरनाधृषः सिषासवः सिषासथ । उत स्थ केशदृंहणीरथो ह केशवर्धनीः ॥३॥

*imā yāstisraḥ pṛthivīstāsāṁ ha bhūmiruttamā /*
*tāsāmadhi tvacho ahaṁ bheṣajaṁ samu jagrabham //1 //*
*śreṣṭhamasi bheṣajānā vasiṣṭhaṁ vīrudhānām /*
*somo bhagaiva yāmeṣu deveṣu varuṇo yathā //2 //*
*revatīranādhṛṣaḥ siṣāsavaḥ siṣāsatha / uta stha keśadṛṁhaṇīratho ha keśavardhanīḥ //3 //*

६. मन्त्रोक्ताः (Mantroktāḥ) - अ. (Av.) ६.१९.१-३; १९.९.१-१४

अ. (Av.) ६.१९.१-३

पुनन्तु मा देवजनाः पुनन्तु मनवो धिया। पुनन्तु विश्वा भूतानि पवमानः पुनातु मा ॥१॥
पवमानः पुनातु मा क्रत्वे दक्षाय जीवसे। अथो अरिष्टतातये ॥२॥
उभाभ्यां देव सवितः पवित्रेण सवेन च। अस्मान् पुनीहि चक्षसे ॥३॥

*punantu mā devajanāḥ punantu manavo dhiyā /*
*punantu viśvā bhūtāni pavamānaḥ punātu mā //1 //*

*pavamānaḥ punātu mā kratve dakṣāya jīvase | atho ariṣṭatātaye ||2 ||*
*ubhābhyāṁ deva savitaḥ pavitreṇa savena cha | asmān punīhi chakṣase ||3 ||*

अ. (Av.) १९.९.१-१४

शान्ता द्यौः शान्ता पृथिवी शान्तमिदर्मुव१न्तरिक्षम् ।
शान्ता उदन्वतीरापः शान्ता नः सन्त्वोषधीः ॥१॥
शान्तानि पूर्वरूपाणि शान्तं नो अस्तु कृताकृतम् ।
शान्तं भूतं च भव्यं च सर्वमेव शमस्तु नः ॥२॥
इयं या परमेष्ठिनी वाग् देवी ब्रह्मसंशिता । ययैव ससृजे घोरं तयैव शान्तिरस्तु नः ॥३॥
इदं यत् परमेष्ठिनं मनो वां ब्रह्मसंशितम् । येनैव ससृजे घोरं तेनैव शान्तिरस्तु नः ॥४॥
इमानि यानि पंचेन्द्रियाणि मनःषष्ठानि मे हृदि ब्रह्मणा संशितानि ।
यैरेव ससृजे घोरं तैरेव शान्तिरस्तु नः ॥५॥
शं नो मित्रः शं वरुणः शं विष्णुः शं प्रजापतिः ।
शं न इन्द्रो बृहस्पतिः शं नो भवत्वर्यमा ॥६॥
शं नो मित्रः शं वरुणः शं विवस्वांछमन्तकः ।
उत्पाताः पार्थिवान्तरिक्षाः शं नो दिविचरा ग्रहाः ॥७॥
शं नो भूमिर्वेप्यमाना शमुल्का निर्हतं च यत् ।
शं गावो लोहितक्षीराः शं भूमिरव तीर्यतीः ॥८॥
नक्षत्रमुल्काभिहतं शमस्तु नः शं नोऽभिचाराः शमु सन्तु कृतयाः ।
शं नो निखाता वल्गाः शमुल्का देशोपसर्गाः शमु नो भवन्तु ॥९॥
शं नो ग्रहाश्चान्द्रमसाः शमादित्यश्च राहुणा ।
शं नो मृत्युर्धूमकेतुः शं रुद्रास्तिग्मतेजसः ॥१०॥
शं रुद्राः शं वसवः शमादित्याः शमग्नयः ।
शं नो महर्षयो देवाः शं देवाः शं बृहस्पतिः ॥११॥
ब्रह्म प्रजपतिर्धाता लोका वेदाः सप्तऋषयोऽग्नयः ।
तैर्मे कृतं स्वस्त्ययनमिन्द्रो मे शर्म यच्छतु ब्रह्मा मे शर्म यच्छतु ।
विश्वे मे देवाः शर्म यच्छन्तु सर्वे मे देवाः शर्म यच्छन्तु ॥१२॥
यानि कानि चिच्छान्तानि लोके सप्तऋषयो विदुः ।
सर्वाणि शं भवन्तु मे शं मे अस्त्वभयं मे अस्तु ॥१३॥
पृथिवी शान्तिरन्तरिक्षं शान्तिर्द्यौः शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः शान्तिर्विश्वे मे देवाः शान्तिः सर्वे मे देवाः शान्तिः शान्तिः शान्तिः शान्तिभिः ।
ताभिः शान्तिभिः सर्व शान्तिभिः शमयामोऽहं यदिह घोरं यदिह क्रूरं यदिह पापं तच्छान्तं तच्छिवं सर्वमेव शमस्तु नः ॥१४॥

*śāntā dyauḥ śāntā pṛthivī śāntamidarmuva1ntarikṣam |*
*śāntā udanvatīrāpaḥ śāntā naḥ santvoṣadhīḥ ||1 ||*
*śāntāni pūrvarūpāṇi śāntaṁ no astu kṛtākṛtam |*
*śāntaṁ bhūtaṁ cha bhavyaṁ cha sarvameva śamastu naḥ ||2 ||*
*iyaṁ yā parameṣṭhinī vāg devī brahmasaṁśitā |*
*yayaiva sasṛje ghoraṁ tayaiva śāntirastu naḥ ||3 ||*
*idaṁ yat parameṣṭhinaṁ mano vāṁ brahmasaṁśitam |*
*yenaiva sasṛje ghoraṁ tenaiva śāntirastu naḥ ||4 ||*
*imāni yāni paṁchendriyāṇi manaḥṣaṣṭhāni me hṛdi brahmaṇā saṁśitāni |*
*yaireva sasṛje ghoraṁ taireva śāntirastu naḥ ||5 ||*
*śaṁ no mitraḥ śaṁ varuṇaḥ śaṁ viṣṇuḥ śaṁ prajāpatiḥ |*
*śaṁ na indro bṛhaspatiḥ śaṁ no bhavatvaryamā ||6 ||*
*śaṁ no mitraḥ śaṁ varuṇaḥ śaṁ vivasvāṁchhamantakaḥ |*
*utpātāḥ pārthivāntarikṣāḥ śaṁ no divicharā grahāḥ ||7 ||*
*śaṁ no bhūmirvepyamānā śamulkā nirhataṁ cha yat |*
*śaṁ gāvo lohitakṣīrāḥ śaṁ bhūmirava tīryatīḥ ||8 ||*
*nakṣatramulkābhihataṁ śamastu naḥ śaṁ no'bhichārāḥ śamu santu kṛtayāḥ |*
*śaṁ no nikhātā valgāḥ śamulkā deśopasargāḥ śamu no bhavantu ||9 ||*

*śaṁ no grahāśchāndramasāḥ śamādityaścha rāhuṇā ।*
*śaṁ no mṛtyurdhūmaketuḥ śaṁ rudrāstigmatejasaḥ ॥10 ॥*
*śaṁ rudrāḥ śaṁ vasavaḥ śamādityāḥ śamagnayaḥ ।*
*śaṁ no maharṣayo devāḥ śaṁ devāḥ śaṁ bṛhaspatiḥ ॥11 ॥*
*brahma prajapatirdhātā lokā vedāḥ saptarṣayo'gnayaḥ ।*
*tairme kṛtaṁ svastyayanamindro me śarma yachchhatu brahmā me śarma yachchhatu ।*
*viśve me devāḥ śarma yachchhantu sarve me devāḥ śarma yachchhantu ॥12 ॥*
*yāni kāni chichchhāntāni loke saptarṣayo viduḥ ।*
*sarvāṇi śaṁ bhavantu me śaṁ me astvabhayaṁ me astu ॥13 ॥*
*pṛthivī śāntirantarikṣaṁ śāntirdyauḥ śāntirāpaḥ śāntiroṣadhayaḥ śāntirvanaspatayaḥ*
*śāntirviśve me devāḥ śāntiḥ sarve me devāḥ śāntiḥ śāntiḥ śāntiḥ śāntibhiḥ ।*
*tābhiḥ śāntibhiḥ sarva śāntibhiḥ śamayāmo'haṁ yadiha ghoraṁ yadiha krūraṁ yadiha*
*pāpaṁ tachchhāntaṁ tachchhivaṁ sarvameva śamastu naḥ ॥14 ॥*

७. मरुतः (Marutaḥ) - अ. (Av.) ६.२२.२-३

पयस्वतीः कृणुथाप ओषधीः शिवा यदेजथा मरुतो रुक्मवक्षसः ।
ऊर्जं च तत्र सुमतिं च पिन्वत यत्रा नरो मरुतः सिंचथा मधु ॥२॥
उदप्रुतो मरुतस्ताँ इयर्त वृष्टिर्या विश्वा निवतस्पृणाति ।
एजाति गल्हा कन्येव तुन्नैरुं तुन्दाना पत्येव जाया ॥३॥
*payasvatīḥ kṛṇuthāpa oṣadhīḥ śivā yadejathā maruto rukmavakṣasaḥ ।*
*ūrjaṁ cha tatra sumatiṁ cha pinvata yatrā naro marutaḥ siṁchathā madhu ॥2 ॥*
*udapruto marutastām̐ iyarta vṛṣṭiryā viśvā nivataspṛṇāti ।*
*ejāti galhā kanyeva tunnairuṁ tundānā patyeva jāyā ॥3 ॥*

८. यमादयो मन्त्रोक्ताः (Yamādayo Mantroktāḥ) - अ. (Av.) ६.९३.१-३

यमो मृत्युरघमारो निर्ऋथो बभ्रुः शर्वोऽस्ता नीलशिखण्डः ।
देवजनाः सेनयोत्तस्थिवांसस्ते अस्माकं परि वृंजन्तु वीरान् ॥१॥
मनसा होमैर्हरसा घृतेन शर्वायास्त्र उत राज्ञे भवाय ।
नमस्येभ्यो नम एभ्यः कृणोम्यन्यत्रास्मदघविषा नयन्तु ॥२॥
त्रायध्वं नो अघविषाभ्यो वधाद् विश्वे देवा मरुतो विश्ववेदसः अग्नीषोमा वरुणः पूतदक्षा वातापर्जन्ययोः सुमतौ स्याम ॥३॥
*yamo mṛtyuraghamāro nirṛtho babhruḥ śarvo'stā nīlaśikhaṇḍaḥ ।*
*devajanāḥ senayottasthivāṁsaste asmākaṁ pari vṛṁjantu vīrān ॥1 ॥*
*manasā homairharasā ghṛtena śarvāyāstra uta rājñe bhavāya ।*
*namasyebhyo nama ebhyaḥ kṛṇomyanyatrāsmadaghaviṣā nayantu ॥2 ॥*
*trāyadhvaṁ no aghaviṣābhyo vadhād viśve devā maruto viśvavedasaḥ agnīṣomā varuṇaḥ pūtadakṣā vātāparjanyayoḥ sumatau syāma ॥3 ॥*

९. रुद्रः (Rudraḥ) - अ. (Av.) ६.५६.२-३; ६.५७.१-३

अ. (Av.) ६.५६.२-३

नमोऽस्त्वसिताय नमस्तिरश्चिराजये। स्वजाय बभ्रवे नमो नमो देवजनेभ्यः ॥२॥
सं ते हन्मि दता दतः समु ते हन्वा हनू। सं ते जिह्वया जिह्वां सम्वास्नाह आस्यम् ॥३॥
*namo'stvasitāya namastiraśchirājaye । svajāya babhrave namo namo devajanebhyaḥ ॥2 ॥*
*saṁ te hanmi datā dataḥ samu te hanvā hanū । saṁ te jihvayā jihvāṁ samvāsnāha āsyam ॥3 ॥*

अ. (Av.) ६.५७.१-३

इदमिद् वा उ भेषजमिदं रुद्रस्य भेषजम् । येनेषुमेकतेजनां शतशल्यामपब्रवत् ॥१॥
जालाषेणाभि षिंजत जालाषेणोप सिंचत । जालाषमुग्रं भेषजं तेन नो मृड जीवसे ॥२॥
शं च नो मयश्च नो मा च नः किं चनाममत्। क्षमा रपो विश्वं नो अस्तु भेषजं सर्वं नो अस्तु भेषजम ॥३॥
*idamid vā u bheṣajamidaṁ rudrasya bheṣajam ।*
*yeneṣumekatejanāṁ śataśalyāmapabravat ॥1 ॥*
*jālāṣeṇābhi ṣiṁjata jālāṣeṇopa siṁchata ।*
*jālāṣamugraṁ bheṣajaṁ tena no mṛḍa jīvase ॥2 ॥*

*śaṁ cha no mayaścha no mā cha naḥ kiṁ chanāmamat ।*
*kṣamā rapo viśvaṁ no astu bheṣajaṁ sarvaṁ no astu bheṣajama ॥3॥*

१०. वरुणः (Varuṇaḥ) - अ. (Av.) ६.५१.३

यत् किं चेदं वरुणं दैव्ये जनेऽभिद्रोहं मनुष्या३श्चरन्ति ।
अचित्त्या चेत् तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः ॥३॥
*yat kiṁ chedaṁ varuṇaṁ daivye jane'bhidrohaṁ manuṣyā3ścharanti ।*
*achittyā chet tava dharmā yuyopima mā nastasmādenaso deva rīriṣaḥ ॥3॥*

११. वायुः (Vāyuḥ) - अ. (Av.) ६.१०.२

प्राणायान्तरिक्षाय वयोभ्यो वायवेऽधिपतये स्वहा ॥२॥
*prāṇāyāntarikṣāya vayobhyo vāyave'dhipataye svahā ॥2॥*

१२. विश्वजित् (Viśvajit) - अ. (Av.) ६.१०७.१-४

विश्वजित् त्रायमाणायै मा परि देहि ।
त्रायमाणे द्विपांच सर्वं नो रक्ष चतुष्पाद् यच्च नः स्वम् ॥१॥
त्रायमाणे विश्वजिते मा परि देहि ।
विश्वजिद् द्विपाच्च सर्वं नो रक्ष चतुष्पाद् यच्च नः स्वम् ॥२॥
विश्वजित् कल्याण्यै मा परि देहि ।
कल्याणि द्विपांच सर्वं नो रक्ष चतुष्पाद् यच्च नः स्वम् ॥३॥
कल्याणि सर्वविदे मा परि देहि ।
सर्वविद् द्विपाच्च सर्वं नो रक्ष चतुष्पाद् यच्च नः स्वम् ॥४॥
*viśvajit trāyamāṇāyai mā pari dehi ।*
*trāyamāṇe dvipāṁcha sarvaṁ no rakṣa chatuṣpād yachcha naḥ svam ॥1॥*
*trāyamāṇe viśvajite mā pari dehi ।*
*viśvajid dvipāchcha sarvaṁ no rakṣa chatuṣpād yachcha naḥ svam ॥2॥*
*viśvajit kalyāṇyai mā pari dehi ।*
*kalyāṇi dvipāṁcha sarvaṁ no rakṣa chatuṣpād yachcha naḥ svam ॥3॥*
*kalyāṇi sarvavide mā pari dehi ।*
*sarvavid dvipāchcha sarvaṁ no rakṣa chatuṣpād yachcha naḥ svam ॥4॥*

१३. विश्वेदेवाः (Viśvedevāḥ) - अ. (Av.) ६.५६.१; ४.१३.१-७

अ. (Av.) ६.५६.१

मा नो देवा अहिर्वधीत् सतोकान्त्सहपूरुषान् ।
संयतं न वि ष्परद् व्यात्तं न सं यमन्नमो देवजनेभ्यः ॥१॥
*mā no devā ahirvadhīt satokāntsahapūruṣān ।*
*saṁyataṁ na vi ṣparad vyāttaṁ na saṁ yamannamo devajanebhyaḥ ॥1॥*

अ. (Av.) ४.१३.१-७

उत देवा अवहितं देवा उन्नयथा पुनः। उतागश्चक्रुषं देवा देवा जीवयथा पुनः ॥१॥
द्वाविमौ वातौ वात आ सिन्धोरा परावतः। दक्षं ते अन्य आवातु व्य१न्यो वातु यद् रपः ॥२॥
आ वात वाहि भेषजं वि वात वाहि यद् रपः। त्वं हि विश्वभेषज देवानां दूत ईयसे ॥३॥
त्रायन्तामिमं देवास्त्रायन्तां मरुतां गणाः। त्रायन्तां विश्वा भूतानि यथायमरपा असत् ॥४॥
आ त्वागमं शन्तातिभिरथो अरिष्टतातिभिः । दक्षं त उग्रमाभारिषं परा यक्ष्मं सुवामि ते ॥५॥
अयं मे हस्तो भगवानयं मे भगवत्तरः । अयं मे विश्वभेषजोऽयं शिवाभिमर्शनः ॥६॥
हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी ।
अनामयित्नुभ्यां हस्ताभ्यां ताभ्यां त्वाभि मृशामसि ॥७॥
*uta devā avahitaṁ devā unnayathā punaḥ ।*
*utāgaśchakruṣaṁ devā devā jīvayathā punaḥ ॥1॥*
*dvāvimau vātau vāta ā sindhorā parāvataḥ ।*
*dakṣaṁ te anya āvātu vya1nyo vātu yad rapaḥ ॥2॥*
*ā vāta vāhi bheṣajaṁ vi vāta vāhi yad rapaḥ ।*
*tvaṁ hi viśvabheṣaja devānāṁ dūta īyase ॥3॥*

*trāyantāmimaṁ devāstrāyantāṁ marutāṁ gaṇāḥ ।*
*trāyantāṁ viśvā bhūtāni yathāyamarapā asat ॥4 ॥*
*ā tvāgamaṁ śantātibhiratho ariṣṭatātibhiḥ ।*
*dakṣaṁ ta ugramābhāriṣaṁ parā yakṣamaṁ suvāmi te ॥5 ॥*
*ayaṁ me hasto bhagavānayaṁ me bhagavattaraḥ ।*
*ayaṁ me viśvabheṣajo'yaṁ śivābhimarśanaḥ ॥6 ॥*
*hastābhyāṁ daśaśākhābhyāṁ jihvā vāchaḥ purogavī ।*
*anāmayitnubhyāṁ hastābhyāṁ tābhyāṁ tvābhi mṛśāmasi ॥7 ॥*

१४. सरस्वती (Sarasvatī) - अ. (Av.) ७.६८.१-३

सरस्वति व्रतेषु ते दिव्येषु देवि धामसु । जुषस्व हव्यमाहुतं प्रजां देवि ररास्व नः ॥१ ॥
इदं ते हव्यं घृतवत् सरस्वतीदं पितृणां हविर यं१ यत् ।
इमानि त उदिता शंतमानि तेभिर्वयं मधुमन्तः स्याम ॥२ ॥
शिवा नः शंतमा भव सुमृडीका सरस्वति। मा ते युयोम संदृशः ॥३ ॥
*sarasvati vrateṣu te divyeṣu devi dhāmasu ।*
*juṣasva havyamāhutaṁ prajāṁ devi rarāsva naḥ ॥1 ॥*
*idaṁ te havyaṁ ghṛtavat sarasvatīdaṁ pitṛṇāṁ havira yaṁ1 yat ।*
*imāni ta uditā śaṁtamāni tebhirvayaṁ madhumantaḥ syāma ॥2 ॥*
*śivā naḥ śaṁtamā bhava sumṛḍīkā sarasvati । mā te yuyoma saṁdṛśaḥ ॥3 ॥*

१५. सुखम् (Sukham) - अ. (Av.) ७.६९.१

शं नो वातो वातु शं नस्तपतु सूर्यः ।
अहानि शं भवन्तु नः शं रात्री प्रति धीयतां शमुषा नो व्युच्छतु ॥१ ॥
*śaṁ no vāto vātu śaṁ nastapatu sūryaḥ ।*
*ahāni śaṁ bhavantu naḥ śaṁ rātrī prati dhīyatāṁ śamuṣā no vyuchchhatu ॥1 ॥*

१६. सूर्यः (Sūryaḥ) - अ. (Av.) ६.१०.३

दिवे चक्षुषे नक्षत्रेभ्यः सूर्यायाधिपतये स्वाहा ॥३ ॥
*dive chakṣuṣe nakṣatrebhyaḥ sūryāyādhipataye svāhā ॥3 ॥*

## ६५३. शबरः काक्षीवतः (Śabaraḥ Kākṣīvataḥ)

१. गावः (Gāvaḥ) - ऋ. (Rv.) १०.१६९.१-४

मयोभूर्वातो अभि वातूस्रा ऊर्जस्वतीरोषधीरा रिशन्ताम् ।
पीवस्वतीर्जीवधन्या पिबन्त्ववसाय पद्वते रुद्र मृळ ॥१ ॥
याः सरूपा विरूपा एकरूपा यासामग्निरिष्टया नामानि वेद ।
या अंगिरसस्तपसेह चक्रुस्ताभ्यः पर्जन्य महि शर्म यच्छ ॥२ ॥
या देवेषु तन्व१मैरयन्त यासां सोमो विश्वा रूपाणि वेद ।
ता अस्मभ्यं पयसा पिन्वमानाः प्रजावतीरिन्द्र गोष्ठे रिरीहि ॥३ ॥
प्रजापतिर्मह्यमेता रराणो विश्वैर्देवैः पितृभिः संविदानः ।
शिवाः सतीरुप नो गोष्ठमाकस्तासां वयं प्रजया सं सदेम ॥४ ॥
*mayobhūrvāto abhi vātūsrā ūrjasvatīroṣadhīrā riśantām ।*
*pīvasvatīrjīvadhanyā pibantvavasāya padvate rudra mṛḷa ॥1 ॥*
*yāḥ sarūpā virūpā ekarūpā yāsāmagniriṣṭyā nāmāni veda ।*
*yā aṁgirasastapaseha chakrustābhyaḥ parjanya mahi śarma yachchha ॥2 ॥*
*yā deveṣu tanva1mairayanta yāsāṁ somo viśvā rūpāṇi veda ।*
*tā asmabhyaṁ payasā pinvamānāḥ prajāvatīrindra goṣṭhe rirīhi ॥3 ॥*
*prajāpatirmahyametā rarāṇo viśvairdevaiḥ pitṛbhiḥ saṁvidānaḥ ।*
*śivāḥ satīrupa no goṣṭhamākastāsāṁ vayaṁ prajayā saṁ sadema ॥4 ॥*

## ६५४. शम्भूः (Śambhūḥ)

१. जरिमा आयुः (Jarimā Āyuḥ) - अ. (Av.) २.२८.१; ३

अ. (Av.) २.२८.१

तुभ्यमेव जरिमन् वर्धतामयं मेममन्ये मृत्यवो हिंसिषुः शतं ये ।

मातेव पुत्रं प्रमना उपस्थे मित्र एनं मित्रियात् पात्वंहसः ॥१॥
*tubhyameva jariman vardhatāmayaṁ memamanye mṛtyavo hiṁsiṣuḥ śataṁ ye /*
*māteva putraṁ pramanā upasthe mitra enaṁ mitriyāt pātvaṁhasaḥ //1 //*

अ. (Av.) २.२८.३

त्वमीशिषे पशूनां पार्थिवानां ये जाता उत वा ये जनित्राः ।
मेमं प्राणो हासीन्मो अपानो मेमं मित्रा वधिषुर्मो अमित्राः ॥३॥
*tvamīśiṣe paśūnāṁ pārthivānāṁ ye jātā uta vā ye janitrāḥ /*
*memaṁ prāṇo hāsīnmo apāno memaṁ mitrā vadhiṣurmo amitrāḥ //3 //*

२. द्यावापृथिव्यादयः (Dyāvāpṛthivyādayaḥ) - अ. (Av.) २.२८.४-५

द्यौष्ट्वा पिता पृथिवी माता जरामृत्युं कृणुतां संविदाने ।
यथा जीवा अदितेरुपस्थे प्राणापानाभ्यां गुपितः शतं हिमाः ॥४॥
इममग्न आयुषे वर्चसे नय प्रियं रेतो वरुण मित्र राजन् ।
मातेवास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथासत् ॥५॥
*dyauṣṭvā pitā pṛthivī mātā jarāmṛtyuṁ kṛṇutāṁ saṁvidāne /*
*yathā jīvā aditerupasthe prāṇāpānābhyāṁ gupitaḥ śataṁ himāḥ //4 //*
*imamagna āyuṣe varchase naya priyaṁ reto varuṇa mitra rājan /*
*mātevāsmā adite śarma yachchha viśve devā jaradaṣṭiryathāsat //5 //*

३. मित्रावरुणौ (Mitrāvaruṇau) - अ. (Av.) २.२८.२

मित्र एनं वरुणो वा रिशादा जरामृत्युं कृणुतां संवदिनौ ।
तदग्निर्होता वयुनानि विद्वान् विश्वा देवानां जनिमा विवक्ति ॥२॥
*mitra enaṁ varuṇo vā riśādā jarāmṛtyuṁ kṛṇutāṁ saṁvadiānau /*
*tadagnirhotā vayunāni vidvān viśvā devānāṁ janimā vivakti //2 //*

## ६५५. शशकर्णः (Śaśakarṇaḥ)

१. अश्विनौ (Aśvinau) - अ. (Av.) २०.१३९.१-५; २०.१४०.१-५; २०.१४१.१-५; २०.१४२.१-६

अ. (Av.) २०.१३९.१-५

आ नूनमश्विना युवं वत्सस्य गन्तमवसे ।
प्रास्मै यच्छतमवृकं पृथु च्छर्दिर्युयुतं या अरातयः ॥१॥
यदन्तरिक्षे यद् दिवि यत् पंच मानुषाँ अनु । नृम्णं तद् धत्तमश्विना ॥२॥
ये वां दंसांस्यश्विना विप्रासः परिमामृशुः । एवेत् काण्वस्य बोधतम् ॥३॥
अयं वां घर्मो अश्विना स्तोमेन परि षिच्यते ।
अयं सोमो मधुमान् वाजिनीवसू येन वृत्रं चिकेतथः ॥४॥
यदप्सु यद् वनस्पतौ यदोषधीषु पुरुदंससा कृतम् । तेन माविष्टमश्विना ॥५॥
*ā nūnamaśvinā yuvaṁ vatsasya gantamavase /*
*prāsmai yachchhatamavṛkaṁ pṛthu chchhardiryuyutaṁ yā arātayaḥ //1 //*
*yadantarikṣe yad divi yat paṁcha mānuṣām̐ anu / nṛmṇaṁ tad dhattamaśvinā //2 //*
*ye vāṁ daṁsāṁsyaśvinā viprāsaḥ parimāmṛśuḥ / evet kāṇvasya bodhatam //3 //*
*ayaṁ vāṁ gharmo aśvinā stomena pari ṣichyate /*
*ayaṁ somo madhumān vājinīvasū yena vṛtraṁ chiketathaḥ //4 //*
*yadapsu yad vanaspatau yadoṣadhīṣu purudaṁsasā kṛtam / tena māviṣṭamaśvinā //5 //*

अ. (Av.) २०.१४०.१-५

यन्नासत्या भुरण्यथो यद् वा देव भिषज्यथः ।
अयं वां वत्सो मतिभिर्न विन्धते हविष्मन्तं हि गच्छथः ॥१॥
आ नूनमश्विनोर्ऋषि स्तोमं चिकेत वामया । आ सोमं मधुमत्तमं घर्मं सिंचादथर्वणि ॥२॥
आ नूनं रघुवर्तनिं रथं तिष्ठाथो अश्विना । आ वां स्तोमा इमे मम नभो न चुच्यवीरत ॥३॥
यदद्य वां नासत्योक्थैराचुच्युवीमहि । यद् वा वाणीभिरश्विनेवेत् काण्वस्य बोधतम् ॥४॥
यद् वां कक्षीवाँ उत यद् व्यश्व ऋषिर्यद् वां दीर्घतमा जुहाव ।
पृथी यद् वां वैन्यः सादनेष्वेवेदतो अश्विना चेतयेथाम् ॥५॥
*yannāsatyā bhuraṇyatho yad vā deva bhiṣajyathaḥ /*

*ayaṁ vāṁ vatso matibhirna vindhate haviṣmantaṁ hi gachchhathaḥ ॥1॥*
*ā nūnamaśvinorṛṣi stomaṁ chiketa vāmayā ।*
*ā somaṁ madhumattamaṁ gharmaṁ siṁchādatharvaṇi ॥2॥*
*ā nūnaṁ raghuvartaniṁ rathaṁ tiṣṭhātho aśvinā ।*
*ā vāṁ stomā ime mama nabho na chuchyavīrata ॥3॥*
*yadadya vāṁ nāsatyokthairāchuchyuvīmahi ।*
*yad vā vāṇībhiraśvinevet kāṇvasya bodhatam ॥4॥*
*yad vāṁ kakṣīvām̐ uta yad vyaśva ṛṣiryad vāṁ dīrghatamā juhāva ।*
*pṛthī yad vāṁ vainyaḥ sādaneṣvevedato aśvinā chetayethām ॥5॥*

अ. (Av.) २०.१४१.१-५

यातं छर्दिष्पा उत नः परस्पा भूतं जगतपा उत नस्तनूपा ।
वर्तिस्तोकाय तनयाय यातम् ॥१॥
यदिन्द्रेण सरथं याथो अश्विना यद् वा वायुना भवथः समोकसा ।
यदादित्येभिर्ऋभुभिः सजोषसा यद् वा विष्णोर्विक्रमणेषु तिष्ठथः ॥२॥
यदद्याश्विनावहं हुवेय वाजसातये । यत् पृत्सु तुर्वणे सहस्तच्छ्रेष्ठमश्विनोरवः ॥३॥
आ नूनं यातमश्विनेमा हव्यानि वां हिता ।
इमे सोमासो अधि तुर्वशे यदाविमे कण्वेषु वामथ ॥४॥
यन्नासत्या पराके अर्वाके अस्ति भेषजम् ।
तेन नूनं विमदाय प्रचेतसा छर्दिर्वत्साय यच्छतम् ॥५॥

*yātaṁ chhardiṣpā uta naḥ paraspā bhūtaṁ jagatapā uta nastanūpā ।*
*vartistokāya tanayāya yātam ॥1॥*
*yadindreṇa sarathaṁ yātho aśvinā yad vā vāyunā bhavathaḥ samokasā ।*
*yadādityebhirṛbhubhiḥ sajoṣasā yad vā viṣṇorvikramaṇeṣu tiṣṭhathaḥ ॥2॥*
*yadadyāśvināvahaṁ huveya vājasātaye । yat pṛtsu turvaṇe sahastachchhreṣṭhamaśvinoravaḥ ॥3॥*
*ā nūnaṁ yātamaśvinemā havyāni vāṁ hitā ।*
*ime somāso adhi turvaśe yadāvime kaṇveṣu vāmatha ॥4॥*
*yannāsatyā parāke arvāke asti bheṣajam ।*
*tena nūnaṁ vimadāya prachetasā chhardirvatsāya yachchhatam ॥5॥*

अ. (Av.) २०.१४२.१-६

अभुत्स्यु प्र देव्या सकं वाचाहमश्विनोः । व्यावर्देव्या मतिं वि रातिं मर्त्येभ्यः ॥१॥
प्र बोधयोषो अश्विना प्र देवि सूनृते महि। प्र यज्ञहोतरानुषक् प्र मदाय श्रवो बृहत् ॥२॥
यदुषो यासि भानुना सं सूर्येण रोचसे। आ हायमश्विनो रथो वर्तिर्याति नृपाय्यम् ॥३॥
यदापीतासो अंशवो गावो न दुह्र ऊधभिः। यद्वा वाणीरनूषत प्र देवयन्तो अश्विना ॥४॥
प्र द्युम्नाय प्र शवसे प्र नृषाह्याय शर्मणे। प्र रक्षाय प्रचेतसा ॥५॥
यन्नूनं धीभिरश्विना पितुर्योना निषीदथः यद्वा सुम्नेभिरुक्थ्या ॥६॥

*abhutsyu pra devyā sakaṁ vāchāhamaśvinoḥ ।*
*vyāvardevyā matiṁ vi rātiṁ martyebhyaḥ ॥1॥*
*pra bodhayoṣo aśvinā pra devi sūnṛte mahi ।*
*pra yajñahotarānuṣak pra madāya śravo bṛhat ॥2॥*
*yaduṣo yāsi bhānunā saṁ sūryeṇa rochase । ā hāyamaśvino ratho vartiryāti nṛpāyyam ॥3॥*
*yadāpītāso aṁśavo gāvo na duhra ūdhabhiḥ ।*
*yadvā vāṇīranūṣata pra devayanto aśvinā ॥4॥*
*pra dyumnāya pra śavase pra nṛṣāhyāya śarmaṇe । pra rakṣāya prachetasā ॥5॥*
*yannūnaṁ dhībhiraśvinā pituryonā niṣīdathaḥ yadvā sumnebhirukthyā ॥6॥*

## ६५६. शशकर्णः काण्वः (Śaśakarṇaḥ Kāṇvaḥ)

१. अश्विनौ (Aśvinau) - ऋ. (Rv.) ८.९.१-२१

आ नूनमश्विना युवं वत्सस्य गन्तमवसे। प्रास्मै यच्छतमवृकं पृथु छर्दिर्युयुतं या अरातयः ॥१॥
यदन्तरिक्षे यद्दिवि यत्पंच मानुषाँ अनु । नृम्णं तद्धत्तमश्विना ॥२॥
ये वां दंसांस्यश्विना विप्रासः परिमामृशुः । एवेत्काण्वस्य बोधतम् ॥३॥

अयं वां घर्मो अश्विना स्तोमेन परि षिच्यते।
अयं सोमो मधुमानवाजिनीवसू येन वृत्रं चिकेतथः ॥४॥
यदप्सु यद्वनस्पतौ यदोषधीषु पुरुदंससा कृतम्। तेन माविष्टमश्विना ॥५॥
यन्नासत्या भुरण्यथो यद्वा देव भिषज्यथः ।
अयं वां वत्सो मतिभिर्न विन्धते हविष्मन्तं हि गच्छथः ॥६॥
आ नूनमश्विनोऋर्षिः स्तोमं चिकेत वामया ।
आ सोमं मधुमत्तमं घर्मं सिंचादथर्वणि ॥७॥
आ नूनं रघुवर्तानिं रथं तिष्ठाथो अश्विना ।
आ वां तोमा इमे मम नभो न चुच्यवीरत ॥८॥
यदद्य वां नासत्योकथैराचुच्युवीमहि । यद्वा वाणीभिरश्विनेवेत्काण्वस्य बोधतम् ॥९॥
यद्वां कक्षीवाँ उत यद्व्यश्व ऋषिर्यद्वां दीर्घतमा जुहाव ।
पृथी यद्वां वैन्सः सादनेष्वेवदतो अश्विना चेतयेथाम् ॥१०॥
यातं छर्दिष्पा उत नः परस्पा भूतं जगत्या उत नस्तनूपा । वर्तिस्तोकाय तनयाय यातम् ॥११॥
यदिन्द्रेण सरथं याथो अश्विना यद्वा वायुना भवथः समोकसा ।
यदादित्येभिऋर्भुभिः सजोषसा यद्वा विष्णोर्विक्रमणेषु तिष्ठथः ॥१२॥
यदद्याश्विनावहं हुवेय वाजसातये । यत्पृत्सु तुर्वणे सहस्तच्छ्रेष्ठमश्विनोरवः ॥१३॥
आ नूनं यातमश्विनेमा हव्यानि वां हिता ।
इमे सोमासो अधि तुर्वशे यदाविमे कण्वेषु वामथ ॥१४॥
यन्नासत्या पराके अर्वाके अस्ति भेषजम् ।
तेन नूनं विमदाय प्रचेतसा छर्दिर्वत्साय यच्छतम् ॥१५॥
अभुत्स्यु प्र देव्या साकं वाचाहमश्विनोः । व्यावर्देव्या मतिं वि रातिं मर्त्येभ्यः ॥१६॥
प्र बोधयोषो अश्विना प्र देवि सूनृते महि । प्र यज्ञहोतरानुषक्प्र मदाय श्रवो बृहत् ॥१७॥
यदुषो यासि भानुना सं सूर्येण रोचसे । आ हायमश्विनो रथो वार्तिर्याति नृपाय्यम् ॥१८॥
यदापीतासो अंशवो गावो न दुह्र ऊधभिः। यद्वा वाणीरनूषत प्र देवयन्तो अश्विना ॥१९॥
प्र द्युम्नाय प्र शवसे प्र नृषाह्याय शर्मणे। प्र दक्षाय प्र चेतसा ॥२०॥
यन्नूनं धीभिरश्विना पितुर्योना निषीदथः। यद्वा सुम्नेभिरुक्थ्या ॥२१॥
*ā nūnamaśvinā yuvaṁ vatsasya gantamavase |*
*prāsmai yachchhatamavṛkaṁ pṛthu chhardiryuyutaṁ yā arātayaḥ ||1||*
*yadantarikṣe yaddivi yatpaṁcha mānuṣām̐ anu | nṛmṇaṁ taddhattamaśvinā ||2||*
*ye vāṁ daṁsāṁsyaśvinā viprāsaḥ parimāmṛśuḥ | evetkāṇvasya bodhatam ||3||*
*ayaṁ vāṁ gharmo aśvinā stomena pari ṣichyate |*
*ayaṁ somo madhumānavājinīvasū yena vṛtraṁ chiketathaḥ ||4||*
*yadapsu yadvanaspatau yadoṣadhīṣu purudaṁsasā kṛtam | tena māviṣṭamaśvinā ||5||*
*yannāsatyā bhuraṇyatho yadvā deva bhiṣajyathaḥ |*
*ayaṁ vāṁ vatso matibhirna vindhate haviṣmantaṁ hi gachchhathaḥ ||6||*
*ā nūnamaśvinoṛrṣiḥ stomaṁ chiketa vāmayā |*
*ā somaṁ madhumattamaṁ gharmaṁ siṁchādatharvaṇi ||7||*
*ā nūnaṁ raghuvartāniṁ rathaṁ tiṣṭhātho aśvinā |*
*ā vāṁ tomā ime mama nabho na chuchyavīrata ||8||*
*yadadya vāṁ nāsatyokathairāchuchyuvīmahi |*
*yadvā vāṇībhiraśvinevetkāṇvasya bodhatam ||9||*
*yadvāṁ kakṣīvām̐ uta yadvyaśva ṛṣiryadvāṁ dīrghatamā juhāva |*
*pṛthī yadvāṁ vainsaḥ sādaneṣvevadato aśvinā chetayethām ||10||*
*yātaṁ chhardiṣpā uta naḥ paraspā bhūtaṁ jagatyā uta nastanūpā |*
*vartistokāya tanayāya yātam ||11||*
*yadindreṇa sarathaṁ yātho aśvinā yadvā vāyunā bhavathaḥ samokasā |*
*yadādityebhiṛrbhubhiḥ sajoṣasā yadvā viṣṇorvikramaṇeṣu tiṣṭhathaḥ ||12||*
*yadadyāśvināvahaṁ huveya vājasātaye |*
*yatpṛtsu turvaṇe sahastachchhraṣṭhamaśvinoravaḥ ||13||*
*ā nūnaṁ yātamaśvinemā havyāni vāṁ hitā |*
*ime somāso adhi turvaśe yadāvime kaṇveṣu vāmatha ||14||*

*yannāsatyā parāke arvāke asti bheṣajam ।*
*tena nūnaṁ vimadāya prachetasā chhardirvatsāya yachchhatam ॥15 ॥*
*abhutsyu pra devyā sākaṁ vāchāhamaśvinoḥ ।*
*vyāvardevyā matiṁ vi rātiṁ martyebhyaḥ ॥16 ॥*
*pra bodhayoṣo aśvinā pra devi sūnṛte mahi ।*
*pra yajñahotarānuṣakpra madāya śravo bṛhat ॥17 ॥*
*yaduṣo yāsi bhānunā saṁ sūryeṇa rochase ।*
*ā hāyamaśvino ratho vārtiryāti nṛpāyyam ॥18 ॥*
*yadāpītāso aṁśavo gāvo na duhra ūdhabhiḥ ।*
*yadvā vāṇīranūṣata pra devayanto aśvinā ॥19 ॥*
*pra dyumnāya pra śavase pra nṛṣāhyāya śarmaṇe । pra dakṣāya pra chetasā ॥20 ॥*
*yannūnaṁ dhībhiraśvinā pituryonā niṣīdathaḥ । yadvā sumnebhirukthyā ॥21 ॥*

## ६५७. शश्वती अङ्गीरसस्य पत्नी (Śaśvatī Aṅgīrasasya Patnī)

१. आसङ्गः (Āsaṅgaḥ) - ऋ. (Rv.) ८.१.३४

अन्वस्य स्थूरं ददृशे पुरस्तादनस्थ ऊरुरवरम्बमाणः ।
शश्वती नार्यभिचक्ष्याह सुभद्रमर्य भोजनं बिभर्षि ॥३४॥
*anvasya sthūraṁ dadṛśe pṛrastādanastha ūruravarambamāṇaḥ ।*
*śaśvatī nāryabhichakṣayāha subhadramarya bhojanaṁ bibharṣi ॥34 ॥*

## ६५८. शाकल्य (Śākalya)

१. सविता (Savitā) - य. (Yv.) ६.२

अग्रेणीरसि स्वावेशऽउन्नेतॄणामेतस्य वित्तादधि त्वा स्थास्यति देवस्त्वा सविता मध्वानक्तु सुपिप्पलाभ्यस्त्वौषधीभ्यः। द्यामाग्रेणास्पृक्षऽआन्तरिक्षं मध्येनाप्राः पृथिवीमुपरेणादृंहीः ॥२॥
*agreṇīrasi svāveśa'unnetṝṇāmetasya vittādadhi tvā sthāsyati devastvā savitā madhvānaktu supippalābhyastvauṣadhībhyaḥ । dyāmāgreṇāspṛkṣa'āntarikṣaṁ madhyenāprāḥ pṛthivīmupareṇādṛṁhīḥ ॥2 ॥*

## ६५९. शार्ङ्गाः (Śārṅgāḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १०.१४२.१-८

अयमग्ने जरिता त्वे अभूदपि सहसः सूनो नह्य१न्यदस्त्याप्यम् ।
भद्रं हि शर्म त्रिवरूथमस्ति त आरे हिंसानामप दिद्युमा कृधि ॥१॥
प्रवत्ते अग्ने जनिमा पितृयतः साचीव विश्वा भुवना न्यृंजसे ।
प्र सप्तयः प्र सनिषन्त नो धियः पुरश्चरन्ति पशुपाइव त्मना ॥२॥
उत वा उ परि वृणक्षि बप्सद्बहोरग्न उलपस्य स्वधावः ।
उत खिल्या उर्वराणां भवन्ति मा ते हेतिं तविषीं चुक्रुधाम ॥३॥
यदुद्वतो निवतो यासि वप्सत्पृथगेषि प्रंगर्धिनीव सेना ।
यदा ते वातो अनुवाति शोचिर्वप्तेव श्मश्रु वपसि प्र भूम ॥४॥
प्रत्यस्य श्रेणयो ददृश्र एकं नियानं बहवो रथासः ।
बाहू यदग्ने अनुमर्मृजानो न्यङ्ङुत्तानामन्वेषि भूमिम् ॥५॥
उत्ते शुष्मा जिहतामुत्ते अर्चिरुत्ते अगने शशमानस्य वाजाः ।
उच्छ्वञ्चस्व नि नम वर्धमान आ त्वाद्य विश्वे वसवः सदन्तु ॥६॥
अपामिदं न्ययनं समुद्रस्य निवेशनम् । अन्यं कृणुष्वेतः पन्थां तेन याहि वशाँ अनु ॥७॥
आयने ते परायणे दूर्वा रोहन्तु पुष्पिणीः। ह्रदाश्च पुण्डरीकाणि समुद्रस्य गृहा इमे ॥८॥
*ayamagne jaritā tve abhūdapi sahasaḥ sūno nahya1nyadastyāpyam ।*
*bhadraṁ hi śarma trivarūthamasti ta āre hiṁsānāmapa didyumā kṛdhi ॥1 ॥*
*pravatte agne janimā pitṛyataḥ sāchīva viśvā bhuvanā nyṛṁjase ।*
*pra saptayaḥ pra saniṣanta no dhiyaḥ puraścharanti paśupāiva tmanā ॥2 ॥*
*uta vā u pari vṛṇakṣi bapsadbahoragna ulapasya svadhāvaḥ ।*
*uta khilyā urvarāṇāṁ bhavanti mā te hetiṁ taviṣīṁ chukrudhāma ॥3 ॥*
*yadudvato nivato yāsi vapsatpṛthageṣi praṁgardhinīva senā ।*

*yadā te vāto anuvāti śochirvapteva śmaśru vapasi pra bhūma ॥4॥*
*pratyasya śreṇayo dadṛśra ekaṁ niyānaṁ bahavo rathāsaḥ ।*
*bāhū yadagne anumarmṛjāno nyaṅṅuttānāmanveṣi bhūmim ॥5॥*
*utte śuṣmā jihatāmutte archirutte agane śaśamānasya vājāḥ ।*
*uchchhvañchasva ni nama vardhamāna ā tvādya viśve vasavaḥ sadantu ॥6॥*
*apāmidaṁ nyayanaṁ samudrasya niveśanam ।*
*anyaṁ kṛṇuṣvetaḥ panthāṁ tena yāhi vaśāṁ̐ anu ॥7॥*
*āyane te parāyaṇe dūrvā rohantu puṣpiṇīḥ ।*
*hradāścha puṇḍarīkāṇi samudrasya gṛhā ime ॥8॥*

## ६६०. शार्यातो मानवः (Śāryāto Mānavaḥ)

१. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १०.९२.१-१५

यज्ञस्य वो रथ्यं विश्पतिं विशां होतारमक्तोरतिथिं विभावसुम् ।
शोचंछुष्कासु हरिणीषु जर्भुरद्वृषा केतुर्यजतो द्यामशायत ॥१॥
इममंजस्पामुभये अकृण्वत धर्माणमग्निं विदथस्य साधनम् ।
अक्तुं न यह्वमुषसः पुरोहितं तनूनपातमरुषस्य निंसते ॥२॥
बळस्य नीथा वि पणेश्च मन्महे वया अस्य प्रहुता आसुरत्तवे ।
यदा घोरासो अमृतत्वमाशतादिज्जनस्य दैव्यस्य चर्किरन् ॥३॥
ऋतस्य हि प्रसितिर्द्यौरुरु व्यचो नमो मह्य१रमतिः पनीयसी ।
इन्द्रो मित्रो वरुणः सं चिकित्रिरेऽथो भगः सविता पूतदक्षसः ॥४॥
प्र रुद्रेण ययिना यन्ति सिन्धवस्तिरो महीमरमतिं दधन्विरे ।
येभिः परिज्मा परियन्नुरु ज्रयो वि रोरुवज्जठरे विश्वमुक्षते ॥५॥
क्राणा रुद्रा मरुतो विश्वकृष्टयो दिवः श्येनासो असुरस्य नीळयः ।
तेभिश्चष्टे वरुणो मित्रो अर्यमेन्द्रो देवेभिरर्वशेभिरर्वशः ॥६॥
इन्द्रे भुजं शशमानास आशत सूरो दृशीके वृषणश्च पौंस्ये ।
प्र ये न्वस्यार्हणा ततक्षिरे युजं वज्रं नृषदनेषु कारवः ॥७॥
सुरश्चिदा हरितो अस्य रीरमदिन्द्रादा कश्चिद्भयते तवीयसः ।
भीमस्य वृष्णो जठरादभिश्वसो दिवेदिवे सहुरिः स्तन्नबाधितः ॥८॥
स्तोमं वो अद्य रुद्राय शिक्वसे क्षयद्वीराय नमसा दिदिष्टन ।
येभिः शिवः स्ववाँ एवयावभिर्दिवः सिषक्ति स्वयशा निकामभिः ॥९॥
ते हि प्रजाया अभरन्त वि श्रवो बृहस्पतिर्वृषभः सोमाजामयः ।
यज्ञैरथर्वा प्रथमो वि धारयद्देवा दक्षैर्भृगवः सं चिकित्रिरे ॥१०॥
ते हि द्यावापृथिवी भूरिरेतसा नराशंसश्चतुरंगो यमोऽदितिः ।
देवस्त्वष्टा द्रविणोदा ऋभुक्षणः प्र रोदसी मरुतो विष्णुरर्हिरे ॥११॥
उत स्य न उशिजामुर्विया कविरहिः शृणोतु बुध्न्यो३ हवीमनि ।
सूर्यामासा विचरन्ता दिविक्षिता धिया शमीनहुषी अस्य बोधतम् ॥१२॥
प्र नः पूषा चरथं विश्वदेव्योऽपां नपादवतु वायुरिष्टये ।
आत्मानं वस्यो अभि वातमर्चत तदश्विना सुहवा यामनि श्रुतम् ॥१३॥
विशामासामभयानामधिक्षितं गीर्भिरु स्वयशसं गृणीमसि ।
ग्नाभिर्विश्वाभिरदितिमनर्वणमक्तोर्युवानं नृमणा अधा पतिम् ॥१४॥
रेभदत्र जनुषा पूर्वो अंगिरा ग्रावाण ऊर्ध्वा अभि चक्षुरध्वरम् ।
येभिर्विहाया अभवद्विचक्षणः पाथः सुमेकं स्वधितिर्वनन्वति ॥१५॥

*yajñasya vo rathyaṁ viśpatiṁ viśāṁ hotāramaktoratithi vibhāvasum ।*
*śochaṁchhuṣkāsu hariṇīṣu jarbhuradvaṣā keturyajato dyāmaśāyata ॥1॥*
*imamaṁjaspāmubhaye akṛṇvata dharmāṇamagiṁna vidathasya sādhanam ।*
*aktuṁ na yahvamuṣasaḥ purohitaṁ tanūnapātamaruṣasya niṁsate ॥2॥*
*baḷasya nīthā vi paṇeścha manmahe vayā asya prahutā āsurattave ।*
*yadā ghorāso amṛtatvamāśatādijjanasya daivyasya charkiran ॥3॥*
*ṛtasya hi prasitirdyaururu vyacho namo mahya1ramatiḥ panīyasī ।*
*indro mitro varuṇaḥ saṁ chikitrire'tho bhagaḥ savitā pūtadakṣasaḥ ॥4॥*

*pra rudreṇa yayinā yanti sindhavastiro mahīmaramatiṁ dadhanvire* ।
*yebhiḥ parijmā pariyannuru jrayo vi roruvajjaṭhare viśvamukṣate* ॥5॥
*krāṇā rudrā maruto viśvakṛṣṭayo divaḥ śyenāso asurasya nīḻayaḥ* ।
*tebhiśchaṣṭe varuṇo mitro aryamendro devebhirarvaśebhirarvaśaḥ* ॥6॥
*indre bhujaṁ śaśamānāsa āśata sūro dṛśīke vṛṣaṇaścha pauṁsye* ।
*pra ye nvasyārhaṇā tatakṣire yujaṁ vajraṁ nṛṣadaneṣu kāravaḥ* ॥7॥
*suraśchidā harito asya rīramadindrādā kaśchidbhayate tavīyasaḥ* ।
*bhīmasya vṛṣṇo jaṭharādabhiśvaso divedive sahuriḥ stannabādhitaḥ* ॥8॥
*stomaṁ vo adya rudrāya śikvase kṣayadvīrāya namasā didiṣṭana* ।
*yebhiḥ śivaḥ svavām̐ evayāvabhirdivaḥ siṣakti svayaśā nikāmabhiḥ* ॥9॥
*te hi prajāyā abharanta vi śravo bṛhaspatirvṛṣabhaḥ somājāmayaḥ* ।
*yajñairatharvā prathamo vi dhārayaddevā dakṣairbhṛgavaḥ saṁ chikitrire* ॥10॥
*te hi dyāvāpṛthivī bhūriretasā narāśaṁsaśchaturaṁgo yamo'ditiḥ* ।
*devastvaṣṭā draviṇodā ṛbhukṣaṇaḥ pra rodasī maruto viṣṇurarhire* ॥11॥
*uta sya na uśijāmurviyā kavirahiḥ śṛṇotu budhnyo3 havīmani* ।
*sūryāmāsā vicharantā divikṣitā dhiyā śamīnahuṣī asya bodhatam* ॥12॥
*pra naḥ pūṣā charathaṁ viśvadevyo'pāṁ napādavatu vāyuriṣṭaye* ।
*ātmānaṁ vasyo abhi vātamarchata tadaśvinā suhavā yāmani śrutam* ॥13॥
*viśāmāsāmabhayānāmadhikṣitaṁ gīrbhiru svayaśasaṁ gṛṇīmasi* ।
*gnābhirviśvābhiraditimanarvaṇamaktoryuvānaṁ nṛmaṇā adhā patim* ॥14॥
*rebhadatra januṣā pūrvo aṁgirā grāvāṇa ūrdhvā abhi chakṣuradhvaram* ।
*yebhirvihāyā abhavadvichakṣaṇaḥ pāthaḥ sumekaṁ svadhitirvananvati* ॥15॥

## ६६१. शाषः शासः (Śāṣaḥ Śāsaḥ)

१. इन्द्रः (Indraḥ) - य. (Yv.) ८.४४; १८.७०

य. (Yv.) ८.४४

वि नऽइन्द्र मृधो जहि नीचा यच्छ पृतन्यतः । योऽअस्माँ२ऽअभिदासत्यधरं गमया तमः ।
उपयामगृहीतोऽसीन्द्राय त्वा विमृधऽएष ते यानिरिन्द्राय त्वा विमृधे ॥४४॥
*vi na'indra mṛdho jahi nīchā yachchha pṛtanyataḥ । yo'asmām̐2'abhidāsatyadharaṁ gamayā tamaḥ । upayāmagṛhīto'sīndrāya tvā vimṛdha'eṣa te yānirindrāya tvā vimṛdhe* ॥44॥

य. (Yv.) १८.७०

वि नऽइन्द्र मृधो नीचा यच्छ पृतन्यतः । योऽअस्माँ२ऽअभिदासत्यधरं गमया तमः ॥७०॥
*vi na'indra mṛdho nīchā yachchha pṛtanyataḥ* ।
*yo'asmām̐2'abhidāsatyadharaṁ gamayā tamaḥ* ॥70॥

२. ईश्वर सभेशौ राजानौ (Īśvara Sabheśau Rājānau) - य. (Yv.) ८.४५

वाचस्पतिं विश्वकर्म्माणमूतये मनोजुवं वाजेऽअद्या हुवेम । स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्म्मा । उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्म्मणऽएष ते योनिरिन्द्राय त्वा विश्वकर्म्मणे ॥४५॥
*vāchaspatiṁ viśvakarmmāṇamūtaye manojuvaṁ vāje'adyā huvema । sa no viśvāni havanāni joṣadviśvaśambhūravase sādhukarmmā । upayāmagṛhīto'sīndrāya tvā viśvakarmmaṇa'eṣa te yonirindrāya tvā viśvakarmmaṇe* ॥45॥

३. विश्वकर्मेन्द्रः (Viśvakarmendraḥ) - य. (Yv.) ८.४६; ४७

विश्वकर्म्मन् हविषा वर्द्धनेन त्रातार मिन्द्रमकृणोरवध्यम् ।
तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथासत् ।
उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्म्मणऽएष ते योनिरिन्द्राय त्वा विश्वकर्म्मणे ॥४६॥
उपयामगृहीतोऽस्यग्नये त्वा गायत्रच्छन्दसं गृह्णामीन्द्राय त्वा त्रिष्टुप्छन्दसं गृह्णामि विश्वेभ्यस्त्वा देवेभ्यो जगच्छन्दसं गृह्णाम्युनुष्टुप्तेऽभिगरः ॥४७॥
*viśvakarmman haviṣā varddhanena trātāra mindramakṛṇoravadhyam* ।
*tasmai viśaḥ samanamanta pūrvīrayamugro vihavyo yathāsat । upayāmagṛhīto'sīndrāya tvā viśvakarmmaṇa'eṣa te yonirindrāya tvā viśvakarmmaṇe* ॥46॥
*upayāmagṛhīto'syagnaye tvā gāyatrachchhandasaṁ gṛhṇāmīndrāya tvā triṣṭupchhandasaṁ*

*gṛhṇāmi viśvebhyastvā devebhyo jagachchhandasaṁ gṛhṇāmyunuṣṭupte'bhigaraḥ ॥47॥*

## ६६२. शासो भारद्वाजः (Śāso Bhāradvājaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.१५२.१-५

शास इत्था महाँ अस्यमित्रखादो अद्भुतः । न यस्य हन्यते सखा न जीयते कदा चन ॥१॥
स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी । वृषेन्द्रः पुर एतु नः सोमपा अभयंकरः ॥२॥
वि रक्षो वि मृधो जहि वि वृत्रस्य हनू रुज । वि मन्युमिन्द्र वृत्रहन्नमित्रस्याभिदासतः ॥३॥
वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः । यो अस्माँ अभिदासत्यधरं गमया तमः ॥४॥
अपेन्द्र द्विषतो मनोऽपि जिज्यासतो वधम् । वि मन्योः शर्म यच्छ वरीयो यवया वधम् ॥५॥

*śāsa itthā mahāṁ̐ asyamitrakhādo adbhutaḥ ।*
*na yasya hanyate sakhā na jīyate kadā chana ॥1॥*
*svastidā viśaspatirvṛtrahā vimṛdho vaśī ।*
*vṛṣendraḥ pura etu naḥ somapā abhayaṁkaraḥ ॥2॥*
*vi rakṣo vi mṛdho jahi vi vṛtrasya hanū ruja ।*
*vi manyumindra vṛtrahannamitrasyābhidāsataḥ ॥3॥*
*vi na indra mṛdho jahi nīchā yachchha pṛtanyataḥ ।*
*yo asmāṁ̐ abhidāsatyadharaṁ gamayā tamaḥ ॥4॥*
*apendra dviṣato mano'pi jijyāsato vadham ।*
*vi manyoḥ śarma yachchha varīyo yavayā vadham ॥5॥*

## ६६३. शिरिम्बिठिः (Śirimbiṭhiḥ)

१. अलक्ष्मी नाशनम् (Alakṣamī Nāśanam) - अ. (Av.) २०.१३७.१

यद्ध प्राचीरजगन्तोरो मण्डूरधाणिकीः । हता इन्द्रस्य शत्रवः सर्वे बुद्बुदयाशवः ॥१॥

*yaddha prāchīrajagantoro maṇḍūradhāṇikīḥ ।*
*hatā indrasya śatravaḥ sarve budbudayāśavaḥ ॥1॥*

## ६६४. शिरिम्बिठो भारद्वाजः (Śirimbiṭho Bhāradvājaḥ)

१. अलक्ष्मीघ्नम् (Alakṣamīdhnam) - ऋ. (Rv.) १०.१५५.१; ४

ऋ. (Rv.) १०.१५५.१

अरायि काणे विकटे गिरिं गच्छ सदान्वे । शिरिम्बिठस्य सत्वभिस्तेभिष्ट्वा चातयामसि ॥१॥

*arāyi kāṇe vikaṭe giriṁ gachchha sadānve ।*
*śirimbiṭhasya satvabhistebhiṣṭvā chātayāmasi ॥1॥*

ऋ. (Rv.) १०.१५५.४

यद्ध प्राचीरगन्तोरो मण्डूरधाणिकीः । हता इन्द्रस्य शत्रवः सर्वे बुदबुदयाशवः ॥४॥

*yaddha prāchīragantoro maṇḍūradhāṇikīḥ ।*
*hatā indrasya śatravaḥ sarve budabudayāśavaḥ ॥4॥*

२. ब्रह्मणस्पतिः (Brahmaṇaspatiḥ) - ऋ. (Rv.) १०.१५५.२-३

चत्तो इतश्चत्तामुतः सर्वा भ्रूणान्यारुषी । अराय्यं ब्रह्मणस्पते तीक्ष्णशृंगोदृषन्निहि ॥२॥
अदो यद्दारु प्लवते सिन्धोः पारे अपूरुषम् । तदा रभस्व दुर्हणो तेन गच्छ परस्तरम् ॥३॥

*chatto itaśchattāmutaḥ sarvā bhrūṇānyāruṣī ।*
*arāyyaṁ brahmaṇaspate tīkṣaṇaśṛṁgodṛṣannihi ॥2॥*
*ado yaddāru plavate sindhoḥ pāre apūruṣam ।*
*tadā rabhasva durhaṇo tena gachchha parastaram ॥3॥*

३. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १०.१५५.५

परीमे गामनेषत पर्यग्निमहृषत । देवेष्वक्रत श्रवः क इमाँ आ दधर्षति ॥५॥

*parīme gāmaneṣata paryagnimahṛṣata । deveṣvakrata śravaḥ ka imāṁ̐ ā dadharṣati ॥5॥*

## ६६५. शिवसंकल्पः (Śivasaṁkalpaḥ)

१. मनः (Manaḥ) - य. (Yv.) ३४.१-६

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति ।

दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु ॥१॥
येन कर्माण्यपसो मनीषिणो यज्ञो कृण्वन्ति विदथेषु धीराः ।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्पमस्तु ॥२॥
यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ।
यस्मान्नऽऋते किंचन कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु ॥३॥
येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन सर्वम् ।
येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसंकल्पमस्तु ॥४॥
यस्मिन्नृचः साम यजूंषि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः ।
यस्मिँश्चित्तं सर्वमोतं प्रजानां तन्मे मनः शिवसंकल्पमस्तु ॥५॥
सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिनऽइव ।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसंकल्पमस्तु ॥६॥
*yajjāgrato dūramudaiti daivaṁ tadu suptasya tathaivaiti* ।
*dūraṅgamaṁ jyotiṣāṁ jyotirekaṁ tanme manaḥ śivasaṁkalpamastu* ॥1॥
*yena karmāṇyapaso manīṣiṇo yajño kṛṇvanti vidatheṣu dhīrāḥ* ।
*yadapūrvaṁ yakṣamantaḥ prajānāṁ tanme manaḥ śivasaṁkalpamastu* ॥2॥
*yatprajñānamuta cheto dhṛtiścha yajjyotirantaramṛtaṁ prajāsu* ।
*yasmānna'ṛte kiṁchana karma kriyate tanme manaḥ śivasaṁkalpamastu* ॥3॥
*yenedaṁ bhūtaṁ bhuvanaṁ bhaviṣyatparigṛhītamamṛtena sarvam* ।
*yena yajñastāyate saptahotā tanme manaḥ śivasaṁkalpamastu* ॥4॥
*yasminnṛchaḥ sāma yajūṁṣi yasmin pratiṣṭhitā rathanābhāvivārāḥ* ।
*yasmiṁśchittaṁ sarvamotaṁ prajānāṁ tanme manaḥ śivasaṁkalpamastu* ॥5॥
*suṣārathiraśvāniva yanmanuṣyānnenīyate'bhīśubhirvājina'iva* ।
*hṛtpratiṣṭhaṁ yadajiraṁ javiṣṭhaṁ tanme manaḥ śivasaṁkalpamastu* ॥6॥

## ६६६. शिविर् औशीनरः (Śivir Auśīnaraḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.१७९.१

उत्तिष्ठताव पश्यतेन्द्रस्य भागमृत्वियम्। यदि श्रातो जुहोतन यद्यश्रातो ममत्तन ॥१॥
*uttiṣṭhatāva paśyatendrasya bhāgamṛtviyam* ।
*yadi śrāto juhotana yadyaśrāto mamattana* ॥1॥

## ६६७. शिशुः (Śiśuḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.११२.१-४

नानानं वा उ नो धियो व्रतानि जनानाम् ।
तक्षा रिष्टं रुतं भिषग्ब्रह्मा सुन्वन्तमिच्छतीन्द्रायेन्दो परि स्रव ॥१॥
जरतीभिरोषधीभिः पर्णेभिः शकुनानाम् ।
कार्मारो अश्मभिर्द्युभिर्हिरण्यवन्तमिच्छतीन्द्रायेन्दो परि स्रव ॥२॥
कारुरहं ततो भिषगुपलप्रक्षिणी नना ।
नानाधियो वसूयवोऽनु गाइव तस्थिमेन्द्रायेन्दो परि स्रव ॥३॥
अश्वो वोळहा सुखं रथं हसनामुपमन्त्रिणः ।
शेपो रोमण्वन्तौ भेदौ वरिन्मण्डूक इच्छतीन्द्रायेन्दो परि स्रव ॥४॥
*nānānaṁ vā u no dhiyo vratāni janānām* ।
*takṣā riṣṭaṁ rutaṁ bhiṣagbrahmā sunvantamichchhatīndrāyendo pari srava* ॥1॥
*jaratībhiroṣadhībhiḥ parṇobhiḥ śakunānām* ।
*kārmāro aśmabhirdyubhirhiraṇyavantamichchhatīndrāyendo pari srava* ॥2॥
*kāruraham tato bhiṣagupalaprakṣiṇī nanā* ।
*nānādhiyo vasūyavo'nu gāiva tasthimendrāyendo pari srava* ॥3॥
*aśvo voḷahā sukhaṁ rathaṁ hasanāmupamantriṇaḥ* ।
*śepo romaṇvantau bhedau varinmaṇḍūka ichchhatīndrāyendo pari srava* ॥4॥

## ६६८. शुक्रः (Śukraḥ)

१. अपामार्गः (Apāmārgaḥ) - अ. (Av.) ७.६५.१-३

प्रतीचीनफलो हि त्वमपामार्ग रुरोहिथ। सर्वान् मच्छपथाँ अधि वरीयो यावया इतः ॥१॥
यद् दुष्कृतं यच्छमलं यद् वा चेरिम पापया। त्वया तद् विश्वतोमुखापामार्गाप मृज्महे ॥२॥
श्यावदता कुनखिना बण्डेन यत्सहासिम। अपामार्ग त्वया वयं सर्वं तदप मृज्महे ॥३॥

*pratīchīnaphalo hi tvamapāmārga rurohitha |*
*sarvān machchhapathām̐ adhi varīyo yāvayā itaḥ ||1||*
*yad duṣkṛtaṁ yachchhamalaṁ yad vā cherima pāpayā |*
*tvayā tad viśvatomukhāpāmārgāpa mṛjmahe ||2||*
*śyāvadatā kunakhinā baṇḍena yatsahāsima |*
*apāmārga tvayā vayaṁ sarvaṁ tadapa mṛjmahe ||3||*

२. अपामार्गो वनस्पतिः (Apāmārgo Vanaspatiḥ) - अ. (Av.) ४.१७.१-८; ४.१८.१-८; ४.१९.१-८

अ. (Av.) ४.१७.१-८

ईशानां तवा भेषजानामुज्जेष आ रभामहे। चक्रे सहस्रवीर्यां सर्वस्मा ओषधे त्वा ॥१॥
सत्यजितं शपथयावनीं सहमानां पुनःसराम्। सर्वाः समह्व्योषधीरितो नः पारयादिति ॥२॥
या शशाप शपनेन याघं मूरमादधे। या रसस्य हरणाय जातमारेभे तोकमत्तु सा ॥३॥
यां ते चक्रुरामे पात्रे यां चक्रुर्नीललोहिते। आमे मांसे कृत्यां यां चक्रुस्तया कृत्याकृतो जहि।४।
दौःष्वप्न्यं दौर्जीवित्यं रक्षो अभ्वमराय्यः। दुर्णाम्नीः सर्वा दुर्वाचस्ता अस्मन्नाशयामसि ॥५॥
क्षुधामारं तृष्णामारमगोतामनपत्यताम्। अपामार्ग त्वया वयं सर्वं तदप मृज्महे ॥६॥
तृष्णामारं क्षुधामारमथो अक्षपराजयम्। अपामार्ग त्वया वयं सर्वं तदप मृज्महे ॥७॥
अपामार्ग ओषधीनां सर्वासामेक इद् वशी। तेन ते मृज्म आस्थितमथ त्वमगदश्चर ॥८॥

*īśānāṁ tavā bheṣajānāmujjeṣa ā rabhāmahe |*
*chakre sahasravīryāṁ sarvasmā oṣadhe tvā ||1||*
*satyajitaṁ śapathayāvanīṁ sahamānāṁ punaḥsarām |*
*sarvāḥ samahvyoṣadhīrito naḥ pārayāditi ||2||*
*yā śaśāpa śapanena yāghaṁ mūramādadhe |*
*yā rasasya haraṇāya jātamārebhe tokamattu sā ||3||*
*yāṁ te chakrurāme pātre yāṁ chakrurnīlalohite |*
*āme māṁse kṛtyāṁ yāṁ chakrustayā kṛtyākṛto jahi |4|*
*dauḥṣvapnyaṁ daurjīvityaṁ rakṣo abhvamarāyyaḥ |*
*durṇāmnīḥ sarvā durvāchastā asmannāśayāmasi ||5||*
*kṣudhāmāraṁ tṛṣṇāmāramagotāmanapatyatām |*
*apāmārga tvayā vayaṁ sarvaṁ tadapa mṛjmahe ||6||*
*tṛṣṇāmāraṁ kṣudhāmāramatho akṣaparājayam |*
*apāmārga tvayā vayaṁ sarvaṁ tadapa mṛjmahe ||7||*
*apāmārga oṣadhīnāṁ sarvāsāmeka id vaśī |*
*tena te mṛjma āsthitamatha tvamagadaśchara ||8||*

अ. (Av.) ४.१८.१-८

समं ज्योतिः सूर्येणाहना रात्री समावती। कृणोमि सत्यमूतयेऽरसाः सन्तु कृत्वरीः ॥१॥
यो देवाः कृत्यां कृत्वा हरादविदुषो गृहम्। वत्सो धारुरिव मातरं तं प्रत्यगुप पद्यताम् ॥२॥
अमा कृत्वा पाप्मानं यस्तेनान्यं जिघांसति। अश्मानस्तस्यां दग्धायां बहुलाः फट् करिक्रति।३॥
सहस्रधामन् विशिखान् विग्रीवांछायया त्वम्। प्रति स्म चक्रुषे कृत्यां प्रियां प्रियावते हर ॥४॥
अनयाहमोषध्या सर्वाः कृत्या अदूदुषम्। यां क्षेत्रे चक्रुर्यां गोषु यां वा ते पुरुषेषु ॥५॥
यश्चकार न शशाक कर्तुं शश्रे पादमङ्गुरिम्। चकारभद्रमस्मभ्यमात्मने तपनं तु सः ॥६॥
अपामार्गोऽप मार्ष्टु क्षेत्रियं शपथश्च यः। अपाह यातुधानीरप सर्वा अराय्यः ॥७॥
अपमृज्य यातुधानानप सर्वा अराय्यः अपामार्ग त्वया वय सर्वं तदप मृज्महे ॥८॥

*samaṁ jyotiḥ sūryeṇāhanā rātrī samāvatī | kṛṇomi satyamūtaye'rasāḥ santu kṛtvarīḥ ||1||*
*yo devāḥ kṛtyāṁ kṛtvā harādaviduṣo gṛham |*
*vatso dhāruriva mātaraṁ taṁ pratyagupa padyatām ||2||*
*amā kṛtvā pāpmānaṁ yastenānyaṁ jighāṁsati |*
*aśmānastasyāṁ dagdhāyāṁ bahulāḥ phaṭ karikrati |3||*
*sahasradhāman viśikhān vigrīvāṁchhāyayā tvam |*

*prati sma chakruṣe kṛtyāṁ priyāṁ priyāvate hara ॥4॥*
*anayāhamoṣadhyā sarvāḥ kṛtyā adūduṣam ।*
*yāṁ kṣetre chakruryāṁ goṣu yāṁ vā te puruṣeṣu ॥5॥*
*yaśchakāra na śaśāka kartuṁ śaśre pādamaṅgurim ।*
*chakārabhadramasmabhyamātmane tapanaṁ tu saḥ ॥6॥*
*apāmārgo'pa mārṣṭu kṣetriyaṁ śapathaścha yaḥ । apāha yātudhānīrapa sarvā arāyyaḥ ॥7॥*
*apamṛjya yātudhānānapa sarvā arāyyaḥ apāmārga tvayā vaya sarvaṁ tadapa mṛjmahe ॥8॥*

अ. (Av.) ४.१९.१-८

अतो अस्यबन्धुकृदुतो असि नु जामिकृत् ।
उतो कृत्याकृतः प्रजां नडमिवा च्छिन्धि वार्षिकम् ॥१॥
ब्राह्मणेन पर्युक्तासि कण्वेन नार्षदेन ।
सेनेवैषि त्विषीमती न तत्र भयमस्ति यत्र प्राप्नोष्योषधे ॥२॥
अग्रमेष्योषधीनां जयोतिषेवाभिदीपयन् ।
उत त्रातासि पाकस्याथो हन्तासि रक्षसः ॥३॥
यददो देवा असुरांस्त्वयाग्रे निरकुर्वत ।
ततस्त्वमध्योषधेऽपामार्गो अजायथाः ॥४॥
विभिन्दती शतशाखा विभिन्दन् नाम ते पिता ।
प्रत्यग् वि भिन्धि त्वं तं यो अस्माँ अभिदासति ॥५॥
असद् भूम्याः समभवत् तद् द्यामेति महद् व्यचः।
तद् वै ततो विधूपायत् प्रत्यक् कर्तारमृच्छतु ॥६॥
प्रत्यङ् हि सम्बभूविथ प्रतीचीहनफलस्त्वम् ।
सर्वान् मच्छपथाँ अधि वरीयो यावया वधम् ॥७॥
शतेन मा परि पाहि सहस्रेणाभि रक्ष मा । इन्द्रस्ते वीरुधां पत उग्र ओज्मानमा दधत् ॥८॥

*ato asyabandhukṛduto asi nu jāmikṛt ।*
*uto kṛtyākṛtaḥ prajāṁ naḍamivā chchhindhi vārṣikam ॥1॥*
*brāhmaṇena paryuktāsi kaṇvena nārṣadena ।*
*senevaiṣi tviṣīmatī na tatra bhayamasti yatra prāpnoṣyoṣadhe ॥2॥*
*agrameṣyoṣadhīnāṁ jayotiṣevābhidīpayan ।*
*uta trātāsi pākasyātho hantāsi rakṣasaḥ ॥3॥*
*yadado devā asurāṁstvayāgre nirakurvata ।*
*tatastvamadhyoṣadhe'pāmārgo ajāyathāḥ ॥4॥*
*vibhindatī śataśākhā vibhindan nāma te pitā ।*
*pratyag vi bhindhi tvaṁ taṁ yo asmām̐ abhidāsati ॥5॥*
*asad bhūmyāḥ samabhavat tad dyāmeti mahad vyachaḥ ।*
*tad vai tato vidhūpāyat pratyak kartāramṛchchhatu ॥6॥*
*pratyaṅ hi sambabhūvitha pratīchīhanaphalastvam ।*
*sarvān machchhapathām̐ adhi varīyo yāvayā vadham ॥7॥*
*śatena mā pari pāhi sahasreṇābhi rakṣa mā । indraste vīrudhāṁ pata ugra ojmānamā dadhat ॥8॥*

३. कृत्याप्रतिहरणम् (Kṛtyāpratiharaṇam) - अ. (Av.) ५.३१.१-१२

यां ते चक्रुरामे पात्रे यां चक्रुर्मिश्रधान्ये । आमे मांसे कृत्यां यां चक्रुः पुनः प्रति हरामि ताम्॥१॥
यां ते चक्रुः कृकवाकावजे वा यां कुरीरिणि ।
अव्यां ते कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ॥२॥
यां ते चक्रुरेकशफो पशूनामुभयादति । गर्दभे कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ॥३॥
यां ते चक्रुरमूलायां वलगं वा नराच्याम् । क्षेत्रे ते कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ॥४॥
यां ते चक्रुर्गार्हपत्ये पूर्वाग्नावुत दुश्चितः ।
शालायां कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ॥५॥
यां ते चक्रुः सभायां यां चक्रुरधिदेवने । अक्षेषु कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ॥६॥
या ते चक्रुः सेनायां यां चक्रुरिष्वायुधे । दुन्दुभौ कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ॥७॥
यां ते कृत्यां कूपेऽवदधुः श्मशाने वा निचख्नुः ।

सद्मनि कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ॥८॥
यां॑ाते चक्रुः पुरुषास्थे अग्नौ संकसुके च याम् ।
म्रोकं निर्दाहं क्रव्यादं पुनः प्रति हरामित ताम् ॥९॥
अपथेना जभारैणां तां पथेतः प्र हिण्मसि। अधीरो मर्याधीरेभ्यः सं जभाराचित्त्या ॥१०॥
यश्चकार न शशाक कर्तुं शश्रे पादमङ्गुरिम् । चकार भद्रमस्मभ्यमभगो भगवद्भ्यः ॥११॥
कृत्याकृतं वलगिनं मूलिनं शपथेय्यम् । इन्द्रस्तं हन्तु महता वधेनाग्निर्विध्यत्वस्तया ॥१२॥
*yāṁ te chakrurāme pātre yāṁ chakrurmiśradhānye /*
*āme māṁse kṛtyāṁ yāṁ chakruḥ punaḥ prati harāmi tām //1 //*
*yāṁ te chakruḥ kṛkavākāvaje vā yāṁ kurīriṇi /*
*avyāṁ te kṛtyāṁ yāṁ chakruḥ punaḥ prati harāmi tām //2 //*
*yāṁ te chakrurekaśapho paśūnāmubhayādati /*
*gardabhe kṛtyāṁ yāṁ chakruḥ punaḥ prati harāmi tām //3 //*
*yāṁ te chakruramūlāyāṁ valagaṁ vā narāchyām /*
*kṣetre te kṛtyāṁ yāṁ chakruḥ punaḥ prati harāmi tām //4 //*
*yāṁ te chakrurgārhapatye pūrvāgnāvuta duśchitaḥ /*
*śālāyāṁ kṛtyāṁ yāṁ chakruḥ punaḥ prati harāmi tām //5 //*
*yāṁ te chakruḥ sabhāyāṁ yāṁ chakruradhidevane /*
*akṣeṣu kṛtyāṁ yāṁ chakruḥ punaḥ prati harāmi tām //6 //*
*yā te chakruḥ senāyāṁ yāṁ chakrurisvāyudhe /*
*dundubhau kṛtyāṁ yāṁ chakruḥ punaḥ prati harāmi tām //7 //*
*yāṁ te kṛtyāṁ kūpe'vadadhuḥ śmaśāne vā nichakhnuḥ /*
*sadmani kṛtyāṁ yāṁ chakruḥ punaḥ prati harāmi tām //8 //*
*yāṁāte chakruḥ puruṣāsthe agnau saṁkasuke cha yām /*
*mrokaṁ nirdāhaṁ kravyādaṁ punaḥ prati harāmita tām //9 //*
*apathenā jabhāraiṇāṁ tāṁ pathetaḥ pra hiṇmasi /*
*adhīro maryādhīrebhyaḥ saṁ jabhārāchittyā //10 //*
*yaśchakāra na śaśāka kartuṁ śaśre pādamaṅgurim /*
*chakāra bhadramasmabhyamabhago bhagavadbhyaḥ //11 //*
*kṛtyākṛtaṁ valaginaṁ mūlinaṁ śapatheyyam /*
*indrastaṁ hantu mahatā vadhenāgnirvidhyatvastayā //12 //*

४. जातवेदः (अग्निः) (Jātavedaḥ (Agniḥ)) - अ. (Av.) ४.४०.१

ये पुरस्ताज्जुह्वति जातवेदः प्राच्या दिशोऽभिदासन्त्यस्मान् ।
अग्निमृत्वा ते परांचो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ॥१॥
*ye purastājjuhvati jātavedaḥ prāchyā diśo'bhidāsantyasmān /*
*agnimṛtvā te parāṁcho vyathantāṁ pratyagenān pratisareṇa hanmi //1 //*

५. जातवेदः (ब्रह्म) (Jātavedaḥ (Brahma)) - अ. (Av.) ४.४०.८

ये दिशामन्तर्देशेभ्यो जुह्वति जातवेदः सर्वाभ्यो दिग्भ्योऽभिदासन्त्यस्मान् ।
बह्मर्त्वा ते परांचो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ॥८॥
*ye diśāmantardeśebhyo juhvati jātavedaḥ sarvābhyo digbhyo'bhidāsantyasmān /*
*bahmartvā te parāṁcho vyathantāṁ pratyagenān pratisareṇa hanmi //8 //*

६. जातवेदः (भूमिः) (Jātavedaḥ (Bhūmiḥ)) - अ. (Av.) ४.४०.५

ये३ऽधस्ताज्जुह्वति जातवेदो ध्रुवाया दिशोऽभिदासन्त्यस्मान् ।
भूमिमृत्वा ते परांचो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ॥५॥
*ye3'dhastājjuhvati jātavedo dhruvāyā diśo'bhidāsantyasmān /*
*bhūmimṛtvā te parāṁcho vyathantāṁ pratyagenān pratisareṇa hanmi //5 //*

७. जातवेदः (यमः) (Jātavedaḥ (Yamaḥ)) - अ. (Av.) ४.४०.२

ये दक्षिणतो जुह्वति जातवेदो दक्षिणाया दिशोऽभिदासन्त्यस्मान् ।
यममृत्वा ते परांचो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ॥२॥
*ye dakṣiṇato juhvati jātavedo dakṣiṇāyā diśo'bhidāsantyasmān /*
*yamamṛtvā te parāṁcho vyathantāṁ pratyagenān pratisareṇa hanmi //2 //*

८. जातवेदः (वरुणः) (Jātavedaḥ (Varuṇaḥ)) - अ. (Av.) ४.४०.३

ये पश्चाज्जुह्वति जातवेदः प्रतीच्या दिशोऽभिदासन्त्यस्मान् ।
वरुणमृत्वा ते परांचो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ॥३॥
*ye paśchājjuhvati jātavedaḥ pratīchyā diśo'bhidāsantyasmān /*
*varuṇamṛtvā te parāṁcho vyathantāṁ pratyagenān pratisareṇa hanmi //3 //*

९. जातवेदः (वायुः) (Jātavedaḥ (Vāyuḥ)) - अ. (Av.) ४.४०.६

येऽ३न्तरिक्षाज्जुह्वति जातवेदो व्यध्वाया दिशोऽभिदासन्त्यस्मान् ।
वायुमृत्वा ते परांचो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ॥६॥
*ye3'ntarikṣājjuhvati jātavedo vyadhvāyā diśo'bhidāsantyasmān /*
*vāyumṛtvā te parāṁcho vyathantāṁ pratyagenān pratisareṇa hanmi //6 //*

१०. जातवेदः (सूर्यः) (Jātavedaḥ (Sūryaḥ)) - अ. (Av.) ४.४०.७

य उपरिष्टाज्जुह्वति जातवेद ऊर्ध्वाया दिशोऽभिदासन्त्यस्मान् ।
सूर्यमृत्वा ते परांचो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ॥७॥
*ya upariṣṭājjuhvati jātaveda ūrdhvāyā diśo'bhidāsantyasmān /*
*sūryamṛtvā te parāṁcho vyathantāṁ pratyagenān pratisareṇa hanmi //7 //*

११. जातवेदः (सोमः) (Jātavedaḥ (Somaḥ)) - अ. (Av.) ४.४०.४

ये उत्तरतो जुह्वति जातवेद उदीच्या दिशोऽभिदासन्त्यस्मान् ।
सोममृत्वा ते परांचो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ॥४॥
*ye uttarato juhvati jātaveda udīchyā diśo'bhidāsantyasmān /*
*somamṛtvā te parāṁcho vyathantāṁ pratyagenān pratisareṇa hanmi //4 //*

१२. मन्त्रोक्ताः (Mantroktāḥ) - अ. (Av.) २.११.१-५; ८.५.१-२२

अ. (Av.) २.११.१-५

दूष्या दूषिरसि हेत्या हेतिरसि मेन्या मेनिरसि। आप्नुहि श्रेयांसमति समं क्राम ॥१॥
स्रक्त्योऽसि प्रतिसरोऽसि प्रतयभिचरणोऽसि। आप्नुहि श्रेयांसमति समं क्राम ॥२॥
प्रति तमभि चर योऽ३स्मान् द्वेष्टि यं वयं द्विष्मः। आप्नुहि श्रेयांसमति समं क्राम ॥३॥
सूरिरसि वर्चोधा असि तनूपानोऽसि। आप्नुहि श्रेयांसमति समं क्राम ॥४॥
शुक्रोऽसि भ्राजोऽसि स्वरसि ज्योतिरसि। आप्नुहि श्रेयांसमति समं क्राम ॥५॥
*dūṣyā dūṣirasi hetyā hetirasi menyā menirasi / āpnuhi śreyāṁsamati samaṁ krāma //1 //*
*sraktyo'si pratisaro'si pratayabhicharaṇo'si / āpnuhi śreyāṁsamati samaṁ krāma //2 //*
*prati tamabhi chara yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ /*
*āpnuhi śreyāṁsamati samaṁ krāma //3 //*
*sūrirasi varchodhā asi tanūpāno'si / āpnuhi śreyāṁsamati samaṁ krāma //4 //*
*śukro'si bhrājo'si svarasi jyotirasi / āpnuhi śreyāṁsamati samaṁ krāma //5 //*

अ. (Av.) ८.५.१-२२

अयं प्रतिसरो मणिर्वीरो वीराय बध्यते । वीर्यवान्त्सपत्नहा शूरवीरः परिपाणः सुमंगलः ॥१॥
अयं मणिः सपत्नहा सुवीरः सहस्वान् वाजी सहमान उग्रः ।
प्रतयक् कृत्या दूषयन्नेति वीरः ॥२॥
अनेनेन्द्रो मणिना वृत्रमहन्ननेनासुरान् पराभावयनमनीषी ।
अनेनाजयद् द्यावापृथिवी उभे इमे अनेनाजयत् प्रदिशश्चतस्रः ॥३॥
अयं स्राक्त्यो मणिः प्रतीवर्तः प्रतिसरः । ओजस्वान् विमृधो वशी सो अस्मान् पातु सर्वतः ॥४॥
तदग्निराह तदु सोम आह बृहस्पतिः सविता तदिन्द्रः ।
ते मे देवाः पुरोहिताः प्रतीचीः कृत्याः प्रतिसरैरजन्तु ॥५॥
अन्तर्दधे द्यावापृथिवी उताहरुत सूर्यम् ।
ते मे देवाः पुरोहिताः प्रतीचीः कृत्याः प्रतिसरैरजन्तु ॥६॥
ये स्राक्त्यं मणिं जना वर्माणि कृण्वते । सूर्यइव दिवमारुह्य वि कृत्या बाधते वशी ॥७॥
स्राक्त्येन मणिन ऋषिणेव मनीषिणा । अजैषं सर्वाः पृतना वि मृधो हन्मि रक्षसः ॥८॥
याः कृत्या आंगिरसीर्याः कृत्या आसुरीर्याः कृत्याः स्वयंकृता या उ चान्येभिराभृताः ।

उभयीस्ता परा यन्तु परावतो नवतिं नाव्याः३ अति ॥९॥
अस्मै मणिं वर्म वध्नन्तु देवा इन्द्रो विष्णुः सविता रुद्रो अग्निः ।
प्रजापतिः परमेष्ठी विराड् वैश्वानर ऋषयश्च सर्वे ॥१०॥
उत्तमो अस्योषधीनामनड्वांजगतामिव व्याघ्रः श्वपदामिव ।
यमैच्छामाविदाम तं प्रतिस्पाशनमन्तिमतम् ॥११॥
स इद् व्याघ्रो भवत्यथो सिंहो अथो वृषा । अथो सपत्नकर्शनो यो बिभर्तीमं मणिम् ॥१२॥
नैनं घ्नन्त्यप्सरसो न गन्धर्वा न मर्त्याः ।
सर्वा दिशो वि राजति यो बिभर्तीमं मणिम् ॥१३॥
कश्यपस्त्वामसृजत कश्यपस्त्वा समैरयत् । अबिभस्त्वेन्द्रो मानुषे बिभ्रत् संश्रेषिणेऽजयत् ।
मणिं सहस्रवीर्यं वर्म देवा अकृण्वत ॥१४॥
यस्त्वा कृत्याभिर्यस्त्वा दीक्षाभिर्यज्ञैर्यस्त्वा जिघांसति ।
प्रत्यक् त्वमिन्द्र तं जहि वज्रेण शतपर्वणा ॥१५॥
अयमिद् वै प्रतीवर्त ओजस्वान्त्संजयो मणिः ।
प्रजां धनं च रक्षतु परिपाणः सुममंगलः ॥१६॥
असपत्नं नो अधरादसपत्नं न उत्तरात् । इन्द्रासपत्नं नः पश्चाज्ज्योतिः शूर पुरस्कृधि ॥१७॥
वर्म मे द्यावापृथिवी वर्माहर्वर्म सूर्यः । वर्म म इन्द्रश्चाग्निश्च वर्म धाता दधातु मे ॥१८॥
ऐन्द्राग्नं वर्म बहुलं यदुग्रं विश्वे देवा नाति विध्यन्ति सर्वे ।
तन्मे तन्वं त्रयतां सर्वतो बृहदायुष्मांजरदष्टिर्यथासानि ॥१९॥
आ मारुक्षद् देवमणिर्मह्या अरिष्टाततये । इमं मेथिमभिसंविशध्वं तनूपानं त्रिवरूथमोजसे ॥२०॥
अस्मिन्निन्द्रो नि दधातु नृम्णमिमं देवासो अभिसंविशध्वम् ।
दीघा।युत्वाय शतशारदायायुष्मांजरदष्टिर्यथासत् ॥२१॥
स्वस्तिदा विशां पतिवृत्रहा विमृधो वशी ।
इन्द्रो वध्नातु ते मणिं जिगीवाँ अपराजितः सोमपा अभ्यंकरो वृषा ।
स त्वा रक्षतु सर्वतो दिवा नक्तं च विश्वतः ॥२२॥
*ayaṁ pratisaro maṇirvīro vīrāya badhyate /*
*vīryavāntsapatnahā śūravīraḥ paripāṇaḥ sumaṁgalaḥ //1 //*
*ayaṁ maṇiḥ sapatnahā suvīraḥ sahasvān vājī sahamāna ugraḥ /*
*pratayak kṛtyā dūṣayanneti vīraḥ //2 //*
*anenendro maṇinā vṛtramahannanenāsurān parābhāvayanamanīṣī /*
*anenājayad dyāvāpṛthivī ubhe ime anenājayat pradiśaśchatasraḥ //3 //*
*ayaṁ srāktyo maṇiḥ pratīvartaḥ pratisaraḥ /*
*ojasvān vimṛdho vaśī so asmān pātu sarvataḥ //4 //*
*tadagnirāha tadu soma āha bṛhaspatiḥ savitā tadindraḥ /*
*te me devāḥ purohitāḥ pratīchīḥ kṛtyāḥ pratisarairajantu //5 //*
*antardadhe dyāvāpṛthivī utāharuta sūryam /*
*te me devāḥ purohitāḥ pratīchīḥ kṛtyāḥ pratisarairajantu //6 //*
*ye srāktyaṁ maṇiṁ janā varmāṇi kṛṇvate /*
*sūryaiva divamāruhya vi kṛtyā bādhate vaśī //7 //*
*srāktyena maṇina ṛṣiṇeva manīṣiṇā / ajaiṣaṁ sarvāḥ pṛtanā vi mṛdho hanmi rakṣasaḥ //8 //*
*yāḥ kṛtyā āṁgirasīryāḥ kṛtyā āsurīryāḥ kṛtyāḥ svayaṁkṛtā yā u chānyebhirābhṛtāḥ /*
*ubhayīstā parā yantu parāvato navatiṁ nāvyā3 ati //9 //*
*asmai maṇiṁ varma vadhnantu devā indro viṣṇuḥ savitā rudro agniḥ /*
*prajāpatiḥ parameṣṭhī virāḍ vaiśvānara ṛṣayaścha sarve //10 //*
*uttamo asyoṣadhīnāmanaḍvāṁjagatāmiva vyāghraḥ śvapadāmiva /*
*yamaichchhāmāvidāma taṁ pratispāśanamantimatam //11 //*
*sa id vyāghro bhavatyatho siṁho atho vṛṣā /*
*atho sapatnakarśano yo bibhartīmaṁ maṇim //12 //*
*nainaṁ ghnantyapsaraso na gandharvā na martyāḥ /*
*sarvā diśo vi rājati yo bibhartīmaṁ maṇim //13 //*
*kaśyapastvāmasṛjata kaśyapastvā samairayat /*
*abibhastvendro mānuṣe bibhrat saṁśreṣiṇe'jayat /*

*maṇiṁ sahasravīryaṁ varma devā akṛṇvata ॥14 ॥*
*yastvā kṛtyābhiryastvā dīkṣābhiryajñairyastavā jighāṁsati ।*
*pratyak tvamindra taṁ jahi vajreṇa śataparvaṇā ॥15 ॥*
*ayamid vai pratīvarta ojasvāntsaṁjayo maṇiḥ ।*
*prajāṁ dhanaṁ cha rakṣatu paripāṇaḥ sumamaṁgalaḥ ॥16 ॥*
*asapatnaṁ no adharādasapatnaṁ na uttarāt ।*
*indrāsapatnaṁ naḥ paśchājjyotiḥ śūra puraskṛdhi ॥17 ॥*
*varma me dyāvāpṛthivī varmāharvarma sūryaḥ ।*
*varma ma indraśchagniścha varma dhātā dadhātu me ॥18 ॥*
*aindrāgnaṁ varma bahulaṁ yadrugraṁ viśve devā nāti vidhyanti sarve ।*
*tanme tanvaṁ trayatāṁ sarvato bṛhadāyuṣmāṁjaradaṣṭiryathāsāni ॥19 ॥*
*ā māruksad devamaṇirmahyā ariṣṭātataye ।*
*imaṁ methimabhisaṁviśadhvaṁ tanūpānaṁ trivarūthamojase ॥20 ॥*
*asminnindro ni dadhātu nṛmṇamimaṁ devāso abhisaṁviśadhvam ।*
*dīghā ।yutvāya śataśāradāyāyuṣmāṁjaradaṣṭiryathāsat ॥21 ॥*
*svastidā viśāṁ pativṛtrahā vimṛdho vaśī ।*
*indro vadhnātu te maṇiṁ jigīvāṁ̐ aparājitaḥ somapā abhyaṁkaro vṛṣā ।*
*sa tvā rakṣatu sarvato divā naktaṁ cha viśvataḥ ॥22 ॥*

१३. वज्रः (Vajraḥ) - अ. (Av.) ६.१३४.१-३; ६.१३५.१-३

अ. (Av.) ६.१३४.१-३

अयं वज्रस्तर्पयतामृतस्यावास्य राष्ट्रमप हन्तु जीवितम् ।
श्रृणातु ग्रीवाः प्र श्रृणातूष्णिहा वृत्रस्येव शचीपतिः ॥१॥
अधरोऽधर उत्तरेभ्यो गूढः पृथिव्या मोत्सृपत्। वज्रेणावहतः शयाम् ॥२॥
यो जिनाति तमन्विच्छ यो जिनाति तमिज्जहि। जिनतो वज्र त्वं सीमन्तमन्वंचमनु पातय॥३॥
*ayaṁ vajrastarpayatāmṛtasyāvāsya rāṣṭramapa hantu jīvitam ।*
*śṛṇātu grīvāḥ pra śṛṇātūṣṇihā vṛtrasyeva śachīpatiḥ ॥1 ॥*
*adharo'dhara uttarebhyo gūḍhaḥ pṛthivyā motsṛpat । vajreṇāvahataḥ śayām ॥2 ॥*
*yo jināti tamanvichchha yo jināti tamijjahi ।*
*jinato vajra tvaṁ sīmantamanvaṁchamanu pātaya ॥3 ॥*

अ. (Av.) ६.१३५.१-३

यदश्नामि बलं कुर्व इत्थं वज्रमा ददे । स्कन्धानमुष्य शातयन् वृत्रस्येव शचीपतिः ॥१॥
यत् पिबामि सं पिबामि समुद्रइव संपिबः। प्राणानमुष्य संपाय सं पिबामो अमुं वयम् ॥२॥
यद् गिरामि सं गिरामि समुद्रइव संगिर । प्राणानमुष्य संगीर्य सं गिरामो अमुं वयम् ॥३॥
*yadaśnāmi balaṁ kurva itthaṁ vajramā dade ।*
*skandhānamuṣya śātayan vṛtrasyeva śachīpatiḥ ॥1 ॥*
*yat pibāmi saṁ pibāmi samudraiva saṁpibaḥ ।*
*prāṇānamuṣya saṁpāya saṁ pibāmo amuṁ vayam ॥2 ॥*
*yad girāmi saṁ girāmi samudraiva saṁgira ।*
*prāṇānamuṣya saṁgīrya saṁ girāmo amuṁ vayam ॥3 ॥*

१४. वनस्पतिः (Vanaspatiḥ) - अ. (Av.) ५.१४.१-१३

सुपर्णस्त्वान्वविन्दत् सूकरस्त्वाखनन्नसा । दिप्सौषधे त्वं दिप्सन्तमव कृत्याकृतं जहि ॥१॥
अव जहि यातुधानानव कृत्याकृतं जहि । अथो यो अस्मान् दिप्सति तमु त्वं जह्योषधे ॥२॥
रिश्यस्येव परीशासं परिकृत्य परि त्वचः । कृतयां कृतयाकृते देवा निष्कमिव प्रति मुंचत ॥३॥
पुनः कृत्यां कृतयाकृते हस्तगृह्य परा णय । समक्षमस्मा आ धेहि यथा कृत्याकृतं हनत् ॥४॥
कृत्याः सन्तु कृत्याकृते शपथः शपथीयते । सुखो रथइव वर्ततां कृत्या कृत्याकृतं पुनः ॥५॥
यदि स्त्री यदि वा पुमान् कृत्यां चकार पाप्मने। तामु तस्मै नयामस्यश्वमिवाश्वाभिधान्या ॥६॥
यदि वासि देवकृता यदि वा पुरुषैः कृता । तां त्वा पुनर्णयामसीन्द्रेण सयुजा वयम् ॥७॥
अग्ने पृतनाषाट् पृतनाः सहस्व । पुनः कृत्यां कृत्याकृते प्रतिहरणेन हरामसि ॥८॥
कृतव्यधनि विध्य तं यश्चकार तमिज्जहि । न त्वामचक्रुषे वयं वधाय सं शिशीमहि ॥९॥
पुत्रइव पितरं गच्छ स्वजइवाभिष्ठितो दश। बन्धमिवावक्रामी गच्छ कृत्ये कृत्याकृतं पुनः ॥१०॥

उदेणीव वारण्यभिस्कन्दं मृगीव । कृत्याकर्तारमृच्छतु ॥११॥
इष्वा ऋजीयः पततु द्यावापृथिवी तं प्रति। सा तं मृगमिव गृह्णातु कृत्या कृत्याकृतं पुनः ॥१२॥
अग्निरिवैतु प्रतिकूलमनुकूलमिवोदकम् । सुखो रथइव वर्ततां कृत्या कृत्याकृतं पुनः ॥१३॥
*suparṇastvānvavindat sūkarastvākhanannasā /*
*dipsauṣadhe tvaṁ dipsantamava kṛtyākṛtaṁ jahi //1//*
*ava jahi yātudhānānava kṛtyākṛtaṁ jahi /*
*atho yo asmān dipsati tamu tvaṁ jahyoṣadhe //2//*
*riśyasyeva parīśāsaṁ parikṛtya pari tvachaḥ /*
*kṛtayāṁ kṛtayākṛte devā niṣkamiva prati muṁchata //3//*
*punaḥ kṛtyāṁ kṛtayākṛte hastagṛhya parā ṇaya /*
*samakṣamasmā ā dhehi yathā kṛtyākṛtaṁ hanat //4//*
*kṛtyāḥ santu kṛtyākṛte śapathaḥ śapathīyate /*
*sukho rathaiva vartatāṁ kṛtyā kṛtyākṛtaṁ punaḥ //5//*
*yadi strī yadi vā pumān kṛtyāṁ chakāra pāpmane /*
*tāmu tasmai nayāmasyaśvamivāśvābhidhānyā //6//*
*yadi vāsi devakṛtā yadi vā puruṣaiḥ kṛtā /*
*tāṁ tvā punarṇayāmasīndreṇa sayujā vayam //7//*
*agne pṛtanāṣāṭ pṛtanāḥ sahasva / punaḥ kṛtyāṁ kṛtyākṛte pratiharaṇena harāmasi //8//*
*kṛtavyadhani vidhya taṁ yaśchakāra tamijjahi /*
*na tvāmachakruṣe vayaṁ vadhāya saṁ śiśīmahi //9//*
*putraiva pitaraṁ gachchha svajaivābhiṣṭhito daśa /*
*bandhamivāvakrāmī gachchha kṛtye kṛtyākṛtaṁ punaḥ //10//*
*udeṇīva vāraṇyabhiskandaṁ mṛgīva / kṛtyākartāramṛchchhatu //11//*
*iṣvā ṛjīyaḥ patatu dyāvāpṛthivī taṁ prati /*
*sā taṁ mṛgamiva gṛhṇātu kṛtyā kṛtyākṛtaṁ punaḥ //12//*
*agnirivaitu pratikūlamanukūlamivodakam /*
*sukho rathaiva vartatāṁ kṛtyā kṛtyākṛtaṁ punaḥ //13//*

## ६६९. शुनः शेपः (Śunaḥ Śepaḥ)

१. अग्निः (Agniḥ) - य. (Yv.) १०.२९; ११.१६; १८.४६; ५१-५२

य. (Yv.) १०.२९

अग्निः पृथुर्धर्मणस्पतिर्जुषाणोऽअग्निः पृथुर्धर्मणस्पतिराज्यस्य वेतु स्वाहा ।
स्वाहा कृताः सूर्यस्य रश्मिभिर्यतध्वं सजातानां मध्यमेष्ठ्यय ॥२९॥
*agniḥ pṛthurdharmaṇaspatirjuṣāṇo'agniḥ pṛthurdharmaṇaspatirājyasya vetu svāhā /*
*svāhā kṛtāḥ sūryasya raśmibhiryatadhvaṁ sajātānāṁ madhyameṣṭhyaya //29//*

य. (Yv.) ११.१६

पृथिव्याः सधस्थदग्निं पुरीष्यमंगिरस्वदाभराग्निं पुरीष्यमंगिरस्वदच्छेमोऽग्निं पुरीष्यमंगिरस्वद्भरिष्यामः ॥१६॥
*pṛthivyāḥ sadhasthadagniṁ purīṣyamaṁgirasvadābharāgniṁ*
*purīṣyamaṁgirasvadachchhemo'gniṁ purīṣyamaṁgirasvadbhariṣyāmaḥ //16//*

य. (Yv.) १८.४६

यास्ते अग्ने सूर्ये रुचो दिवमातन्वन्ति रश्मिभिः। ताभिर्नो अद्य सर्वाभी रुचे जनाय नस्कृधि।४६।
*yāste agne sūrye rucho divamātanvanti raśmibhiḥ / tābhirno adya sarvābhī ruche janāya naskṛdhi /46/*

य. (Yv.) १८.५१-५२

अग्निं युनज्मि शवसा घृतेन दिव्यं सुपर्णं वयसा बृहन्तम् ।
तेन वयं गमेम ब्रध्नस्य विष्टपं स्वो रुहाणा अधि नाकमुत्तमम् ॥५१॥
इमौ ते पक्षावजरौ पतत्रिणौ याभ्यां रक्षांस्यपहंस्यग्ने ।
ताभ्यां पतेम सुकृतामु लोकं यत्र ऋषयो जग्मुः प्रथमजाः पुराणाः॥५२॥
*agniṁ yunajmi śavasā ghṛtena divyaṁ suparṇaṁ vayasā bṛhantam /*
*tena vayaṁ gamema bradhnasya viṣṭapaṁ svo ruhāṇā adhi nākamuttamam //51//*
*imau te pakṣāvajarau patatriṇau yābhyāṁ rakṣāṁsyapahaṁsyagne /*

*tābhyāṁ patema sukṛtāmu lokaṁ yatra ṛṣayo jagmuḥ prathamajāḥ purāṇāḥ //52 //*

२. अश्विनौ (Aśvinau) - य. (Yv.) १०.३३; ३४

युवं सुराममश्विना नमुचावासुरे सचा । विपिपाना शुभस्पतीऽइन्द्रं कर्मस्वावतम् ॥३३॥
पुत्रमिव पितरावश्विनोभेन्द्रावथुः काव्यैर्दंसनाभिः ।
यत्सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णक ॥३४॥
*yuvaṁ surāmamaśvinā namuchāvāsure sachā /*
*vipipānā śubhaspatī'indraṁ karmasvāvatam //33 //*
*putramiva pitarāvaśvinobhendrāvathuḥ kāvyairdaṁsanābhiḥ /*
*yatsurāmaṁ vyapibaḥ śachībhiḥ sarasvatī tvā maghavannabhiṣṇaka //34 //*

३. आपः (Āpaḥ) - य. (Yv.) ३५.११

अपाघमप किल्बिषमप कृत्यामपो रपः । अपामार्ग त्वमस्मदप दुःष्वप्न्यं सुव ॥११॥
*apāghamapa kilbiṣamapa kṛtyāmapo rapaḥ /*
*apāmārga tvamasmadapa duḥṣvapnyaṁ suva //11 //*

४. इन्दुः (Induḥ) - य. (Yv.) १८.५३

इन्दुर्दक्षः श्येनऽऋतावा हिरण्यपक्षः शकुनो भुरण्युः ।
महान्त्सधस्थे ध्रुवऽआ निषत्तो नमस्तेऽअस्तु मा मा हिंसीः ॥५३॥
*indurdakṣaḥ śyena'ṛtāvā hiraṇyapakṣaḥ śakuno bhuraṇyuḥ /*
*mahāntsadhasthe dhruva'ā niṣatto namaste'astu mā mā hiṁsīḥ //53 //*

५. इन्द्रः (Indraḥ) - अ. (Av.) २०.२६.१-३; २०.७४.१-७; २०.१२२.१-३

अ. (Av.) २०.२६.१-३

योगेयोगे तवस्तरं वाजेवाजे हवामहे । सखाय इन्द्रमूतये ॥१॥
आ घा गमद् यदि श्रवत् सहस्रिणीभिरूतिभिः । वाजेभिरुप नो हवम् ॥२॥
अनु प्रत्नस्यौकसो हुवे तुविप्रतिं नरम् । यं ते पूर्वं पिता हुवे ॥३॥
*yogeyoge tavastaraṁ vājevāje havāmahe / sakhāya indramūtaye //1 //*
*ā ghā gamad yadi śravat sahasriṇībhirūtibhiḥ / vājebhirupa no havam //2 //*
*anu pratnasyaukaso huve tuvipratiṁ naram / yaṁ te pūrvaṁ pitā huve //3 //*

अ. (Av.) २०.७४.१-७

यच्चिद्धि सत्य सोमपा अनाशस्ताइव स्मसि ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥१॥
शिप्रिन् वाजानां पते शचीवस्तव दंसना ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥२॥
नि ष्वापया मिथूदृशा सस्तामबुध्यमाने ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥३॥
ससन्तु त्या अरातयो बोधन्तु शूर रातयः ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥४॥
समिन्द्र गर्दभं मृण नुवन्तं पापयामुया ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥५॥
पताति कुण्डृणाच्या दूरं वातो वनादधि ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥६॥
सर्वं परिक्रोशं जहि जम्भ्या कृकदाश्वम् ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥७॥
*yachchiddhi satya somapā anāśastāiva smasi /*
*ā tū na indra śaṁsaya goṣvaśveṣu śubhriṣu sahasreṣu tuvīmagha //1 //*
*śiprin vājānāṁ pate śachīvastava daṁsanā /*
*ā tū na indra śaṁsaya goṣvaśveṣu śubhriṣu sahasreṣu tuvīmagha //2 //*
*ni ṣvāpayā mithūdṛśā sastāmabudhyamāne /*
*ā tū na indra śaṁsaya goṣvaśveṣu śubhriṣu sahasreṣu tuvīmagha //3 //*
*sasantu tyā arātayeā bodhantu śūra rātayaḥ /*

*ā tū na indra śaṁsaya goṣvaśveṣu śubhriṣu sahasreṣu tuvīmagha //4 //*
*samindra gardabhaṁ mṛeā nuvantaṁ pāpayāmuyā /*
*ā tū na indra śaṁsaya goṣvaśveṣu śubhriṣu sahasreṣu tuvīmagha //5 //*
*patāti kuṇḍṛṇāchyā dūraṁ vāto vanādadhi /*
*ā tū na indra śaṁsaya goṣvaśveṣu śubhriṣu sahasreṣu tuvīmagha //6 //*
*sarvaṁ parikrośaṁ jahi jambhyā kṛkadāśvam /*
*ā tū na indra śaṁsaya goṣvaśveṣu śubhriṣu sahasreṣu tuvīmagha //7 //*

अ. (Av.) २०.१२२.१-३

रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः। क्षुमन्तो याभिर्मदेम ॥१॥
आ घत्वावान् त्मनाप्त स्तोतृभ्यो धृष्णवियानः। ऋणोरक्षं न चक्र्योः ॥२॥
आ यद् दुवः शतक्रतवा कामं जरितृणाम्। ऋणोरक्षं न शचीभिः ॥३॥
*revatīrnaḥ sadhamāda indre santu tuvivājāḥ / kṣumanto yābhirmadema //1 //*
*ā ghatvāvān tmanāpta stotṛbhyo dhṛṣṇaviyānaḥ / ṛṇorakṣaṁ na chakryoḥ //2 //*
*ā yad duvaḥ śatakratavā kāmaṁ jaritṛṇām / ṛṇorakṣaṁ na śachībhiḥ //3 //*

६. क्षत्रपतिः (Kṣatrapatiḥ) - य. (Yv.) १०.३१-३२; ११.१४

य. (Yv.) १०.३१-३२

अश्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्व ।
वायुः पूतः पवित्रेण प्रत्यंक्सोमो अतिस्रुतः । इन्द्रस्य युज्यः सखा ॥३१॥
कुविदंग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमऽउक्तिं यजन्ति ।
उपयामगृहीतोऽस्यश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णे ॥३२॥
*aśvibhyāṁ pachyasva sarasvatyai pachyasvendrāya sutrāmṇe pachyasva /*
*vāyuḥ pūtaḥ pavitreṇa pratyaṁksomo atisrutaḥ / indrasya yujyaḥ sakhā //31 //*
*kuvidaṁga yavamanto yavaṁ chidyathā dāntyanupūrvaṁ viyūya /*
*ihehaiṣāṁ kṛṇuhi bhojanāni ye barhiṣo nama'uktiṁ yajanti /*
*upayāmagṛhīto'syaśvibhyāṁ tvā sarasvatyai tvendrāya tvā sutrāmṇe //32 //*

य. (Yv.) ११.१४

योगेयोगे तवस्तरं वाजेवाजे हवामहे। सखायऽइन्द्रमूतये ॥१४॥
*yogeyoge tavastaraṁ vājevāje havāmahe / sakhāya'indramūtaye //14 //*

७. गणपतिः (Gaṇapatiḥ) - य. (Yv.) ११.१५

प्रतूर्वन्नेह्यवक्रामन्नशस्ती रुद्रस्य गाणपत्यं मयोभूरेहि ।
उव र्न्तरिक्षं वीहि स्वस्तिगव्यूतिरभयानि कृण्वन् पूष्ण सयुजा सह ॥१५॥
*pratūrvannehyavakrāmannaśastī rudrasya gāṇapatyaṁ mayobhūrehi /*
*uva rntarikṣaṁ vīhi svastigavyūtirabhayāni kṛṇvan pūṣṇa sayujā saha //15 //*

८. प्रजापतिः (Prajāpatiḥ) - य. (Yv.) १८.४५

समुद्रोऽसि नभस्वानार्द्रदानुः शम्भूर्मयोभूरभि मा वाहि स्वाहा। मारुतोऽसि मरुतां गणः शम्भूर्मयोभूरभि मा वाहि स्वाहा। अवस्यूरसि दुवस्वांछम्भूर्मयोभूरभि मा वाहि स्वाहा ॥४५॥
*samudro'si nabhasvānārdradānuḥ śambhūrmayobhūrabhi mā vāhi svāhā / māruto'si marutāṁ gaṇaḥ śambhūrmayobhūrabhi mā vāhi svāhā / avasyūrasi duvasvāṁchhambhūrmayobhūrabhi mā vāhi svāhā //45 //*

९. मन्यु विनाशनम् (Manyu Vināśanam) - अ. (Av.) ६.२५.१-३

पंच च याः पंचाशच्च संयन्ति मन्या अभि। इतस्ताः सर्वा नश्यन्तु वाका अपचितामिव ॥१॥
सप्त च याः सप्ततिश्च संयन्ति ग्रैव्या अभि। इतस्ताः सर्वा नश्यन्तु वाका अपचितामिव ॥२॥
नव च या नवतिश्च संयन्ति स्कन्ध्या अभि। इतस्ताः सर्वा नश्यन्तु वाका अपचितामिव ॥३॥
*paṁcha cha yāḥ paṁchāśachcha saṁyanti manyā abhi /*
*itastāḥ sarvā naśyantu vākā apachitāmiva //1 //*
*sapta cha yāḥ saptatiścha saṁyanti graivyā abhi /*
*itastāḥ sarvā naśyantu vākā apachitāmiva //2 //*
*nava cha yā navatiścha saṁyanti skandhyā abhi /*

*itastāḥ sarvā naśyantu vākā apachitāmiva ॥3 ॥*

१०. यजमानः (Yajamānaḥ) - य. (Yv.) १०.२८

अभिभूरस्येतास्ते पंच दिशः कल्पन्तां ब्रह्मँस्त्वं ब्रह्मासि सवितासि सत्यप्रसवो वरुणोऽसि सत्यौजाऽइन्द्रोऽसि विशौजा रुद्रोऽसि सुशेवः ।
बहुकार श्रेयस्कर भूयस्करेन्द्रस्य वज्रोऽसि तेन मे रध्य ॥२८ ॥
*abhibhūrasyetāste paṁcha diśaḥ kalpantāṁ brahmaṁstvaṁ brahmāsi savitāsi satyaprasavo varuṇo'si satyaujā'indro'si viśaujā rudro'si suśevaḥ ।*
*bahukāra śreyaskara bhūyaskarendrasya vajro'si tena me radhya ॥28 ॥*

११. वरुणः (Varuṇaḥ) - अ. (Av.) ७.८३.१-४; य. (Yv.) १०.२७; १२.१२; २१.१-२

अ. (Av.) ७.८३.१-४

अप्सु ते राजन् वरुण गृहो हिरण्ययो मिथः ।
ततो धृतव्रतो राजा सर्वा धामानि मुंचतु ॥१ ॥
धाम्नोधाम्नो राजन्नितो वरुण मुंच नः ।
यदापो अघ्न्या इति वरुणेति यदूचिम ततो वरुण मुंच नः ॥२ ॥
उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
अधा वयमादित्य व्रते तवानागसो अदितये स्याम ॥३ ॥
प्रास्मत् पाशान् वरुण मुंच सर्वान् य उत्तमा अधमा वारुणा ये ।
दुःष्वप्न्यं दुरितं निः ष्वास्मदथ गच्छेम सुकृतस्य लोकम् ॥४ ॥
*apsu te rājan varuṇa gṛho hiraṇyayo mithaḥ ।*
*tato dhṛtavrato rājā sarvā dhāmāni muṁchatu ॥1 ॥*
*dhāmnodhāmno rājannito varuṇa muṁcha naḥ ।*
*yadāpo aghnyā iti varuṇeti yadūchima tato varuṇa muṁcha naḥ ॥2 ॥*
*uduttamaṁ varuṇa pāśamasmadavādhamaṁ vi madhyamaṁ śrathāya ।*
*adhā vayamāditya vrate tavānāgaso aditaye syāma ॥3 ॥*
*prāsmat pāśān varuṇa muṁcha sarvān ya uttamā adhamā vāruṇā ye ।*
*duḥṣvapnyaṁ duritaṁ niḥ ṣvāsmadatha gachchhema sukṛtasya lokam ॥4 ॥*

य. (Yv.) १०.२७

निषसाद धृतव्रतो वरुणः पस्त्यास्वा । साम्राज्याय सुक्रतुः ॥२७ ॥
*niṣasāda dhṛtavrato varuṇaḥ pastyāsvā । sāmrājyāya sukratuḥ ॥27 ॥*

य. (Yv.) १२.१२

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
अथा वयमादित्य व्रते त्वानागसोऽअदितये स्याम ॥१२ ॥
*uduttamaṁ varuṇa pāśamasmadavādhamaṁ vi madhyamaṁ śrathāya ।*
*athā vayamāditya vrate tvānāgaso'aditaye syāma ॥12 ॥*

य. (Yv.) २१.१-२

इमं मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युरा चके ॥१ ॥
तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशंस मा नऽआयुः प्र मोषीः ॥२ ॥
*imaṁ me varuṇa śrudhī havamadyā cha mṛḍaya । tvāmavasyurā chake ॥1 ॥*
*tattvā yāmi brahmaṇā vandamānastadā śāste yajamāno havirbhiḥ ।*
*aheḍamāno varuṇeha bodhyuruśaṁsa mā na'āyuḥ pra moṣīḥ ॥2 ॥*

१२. सवित्रादिमन्त्रोक्ताः (Savitrādimantroktāḥ) - य. (Yv.) १०.३०

सवित्रा प्रसवित्रा सरस्वत्या वाचा त्वष्ट्रा रूपैः पूष्णा पशुभिरिन्द्रेणास्मे बृहस्पतिना ब्रह्मणा वरुणेनौजसाऽग्निना तेजसा सोमेन राज्ञा विष्णुना दशम्या देवतया प्रसूतः प्रसर्पामि ॥३० ॥
*savitrā prasavitrā sarasvatyā vāchā tvaṣṭrā rūpaiḥ pūṣṇā paśubhirindreṇāsme bṛhaspatinā brahmaṇā varuṇenaujasā'gninā tejasā somena rājñā viṣṇunā daśamyā devatayā prasūtaḥ prasarpāmi ॥30 ॥*

## ६७०. शुनःशेप आजीगर्तिः (Śunaḥśepa Ājīgartiḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १.२६.१-१०; १.२७.१-१२; सा. (Sv.) १५; १७; २८; १४१५-१४१७; १४९७-१४९९; १६१७-१६१९; १६३४-१६३६; १६६३-१६६५

ऋ. (Rv.) १.२६.१-१०

वसिष्वा हि मियेध्य वस्त्राण्यूर्जां पते। सेमं नो अध्वरं यज ॥१॥
नि नो होता वरेण्यः सदा यविष्ठ मन्मभिः। अग्ने दिवित्मता वचः ॥२॥
आ हि ष्मा सूनवे पितापिर्यजत्यापये। सखा सख्ये वरेण्यः ॥३॥
आ नो बर्ही रिशादसो वरुणो मित्रो अर्यमा। सीदन्तु मनुषो यथा ॥४॥
पूर्व्य होतरस्य नो मन्दस्व सख्यस्य च। इमा उ षु श्रुधी गिरः ॥५॥
यच्चिद्धि शश्वता तना देवंदेवं यजामहे। त्वे इद्धूयते हविः ॥६॥
प्रियो नो अस्तु विश्पतिर्होता मन्द्रो वरेण्यः। प्रिया स्वग्नयो वयम् ॥७॥
स्वग्नयो हि वार्यं देवासो दधिरे च नः। स्वग्नयो मनामहे ॥८॥
अथा न उभयेषाममृत मर्त्यानाम्। मिथः सन्तु प्रशस्तयः ॥९॥
विश्वेभिरग्ने अग्निभिरिमं यज्ञमिदं वचः। चनो धाः सहसो यहो ॥१०॥

*vasiṣvā hi miyedhya vastrāṇyūrjāṁ pate | semaṁ no adhvaraṁ yaja ||1||*
*ni no hotā vareṇyaḥ sadā yaviṣṭha manmabhiḥ | agne divitmatā vachaḥ ||2||*
*ā hi ṣmā sūnave pitāpiryajatyāpaye | sakhā sakhye vareṇyaḥ ||3||*
*ā no barhī riśādaso varuṇo mitro aryamā | sīdantu manuṣo yathā ||4||*
*pūrvya hotarasya no mandasva sakhyasya cha | imā u ṣu śrudhī giraḥ ||5||*
*yachchiddhi śaśvatā tanā devaṁdevaṁ yajāmahe | tve iddhūyate haviḥ ||6||*
*priyo no astu viśpatirhotā mandro vareṇyaḥ | priyā svagnayo vayam ||7||*
*svagnayo hi vāryaṁ devāso dadhire cha naḥ | svagnayo manāmahe ||8||*
*athā na ubhayeṣāmamṛta martyānām | mithaḥ santu praśastayaḥ ||9||*
*viśvebhiragne agnibhirimaṁ yajñamidaṁ vachaḥ | chano dhāḥ sahaso yaho ||10||*

ऋ. (Rv.) १.२७.१-१२

अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः। सम्राजन्तमध्वराणाम् ॥१॥
स घा नः सूनुः शवसा पृथुप्रगामा सुशेवः। मीढ्वाँ अस्माकं बभूयात् ॥२॥
स नो दूराच्चासाच्च नि मर्त्यादघायोः पाहि। सदमिद्विश्वायुः ॥३॥
इममू षु त्वमस्माकं सनिं गायत्रं नव्यांसम्। अग्ने देवेषु प्र वोचः ॥४॥
आ नो भज परमेष्वा वाजेषु मध्यमेषु। शिक्षा वस्वो अन्तमस्य ॥५॥
विभक्तासि चित्रभानो सिन्धोरूर्मा उपाक आ। सद्यो दाशुषे क्षरसि ॥६॥
यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः। स यन्ता शश्वतीरिषः ॥७॥
नाकिरस्य सहन्त्य पर्येता कयस्य चित्। वाजो अस्ति श्रवाय्यः ॥८॥
स वाजं विश्वचर्षणिरर्वद्भिरस्तु तरुता। विप्रेभिरस्तु सनिता ॥९॥
जराबोध तद्विविड्ढि विशेविशे यज्ञियाय। स्तोमं रुद्राय दृशीकम् ॥१०॥
स नो महाँ अनिमानो धूमकेतुः पुरुश्चन्द्रः। धिये वाजाय हिन्वतु ॥११॥
स रेवाँ इव विश्पतिर्दैव्यः केतुः शृणोतु नः। उक्थैरग्निर्बृहद्भानुः ॥१२॥

*aśvaṁ na tvā vāravantaṁ vandadhyā agiṁna namobhiḥ | samrājantamadhvarāṇām ||1||*
*sa ghā naḥ sūnuḥ śavasā pṛthupragāmā suśevaḥ | mīḍhvāṁ asmākaṁ babhūyāt ||2||*
*sa no dūrāchchāsāchcha ni martyādaghāyoḥ pāhi | sadamidviśvāyuḥ ||3||*
*imamū ṣu tvamasmākaṁ saniṁ gāyatraṁ navyāṁsam | agne deveṣu pra vochaḥ ||4||*
*ā no bhaja parameṣvā vājeṣu madhyameṣu | śikṣā vasvo antamasya ||5||*
*vibhaktāsi chitrabhāno sindhorūrmā upāka ā | sadyo dāśuṣe kṣarasi ||6||*
*yamagne pṛtsu martyamavā vājeṣu yaṁ junāḥ | sa yantā śaśvatīriṣaḥ ||7||*
*nākirasya sahantya paryetā kayasya chit | vājo asti śravāyyaḥ ||8||*
*sa vājaṁ viśvacharṣaṇirarvadbhirastu turutā | viprebhirastu sanitā ||9||*
*jarābodha tadviviḍḍhi viśeviśe yajñiyāya | stomaṁ rudrāya dṛśīkam ||10||*
*sa no mahāṁ animāno dhūmaketuḥ puruśchandraḥ | dhiye vājāya hinvatu ||11||*
*sa revāṁ iva viśpatirdaivyaḥ ketuḥ śṛṇotu naḥ | ukthairagnirbṛhadbhānuḥ ||12||*

सा. (Sv.) १५

जराबोध तद्विविड्ढ विशेविशे यज्ञियाय। स्तोमं रुद्राय दृशीकम् ॥५॥
*jarābodha tadviviḍḍha viśeviśe yajñiyāya । stomaṁ rudrāya dṛśīkam ॥5॥*

सा. (Sv.) १७

अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः। सम्राजन्तमध्वराणाम्॥७॥
*aśvaṁ na tvā vāravantaṁ vandadhyā agiṁna namobhiḥ । samrājantamadhvarāṇām ॥7॥*

सा. (Sv.) २८

इममू षु त्वमस्माकं सनिं गायत्रं नव्यां सम्। अग्ने देवेषु प्र वोचः ॥८॥
*imamū ṣu tvamasmākaṁ saniṁ gāyatraṁ navyāṁ sam । agne deveṣu pra vochaḥ ॥8॥*

सा. (Sv.) १४१५-१४१७

यमग्ने पृतसु मर्त्यमवा वाजेषु यं जुनाः। स यन्ता शश्वतीरिषः ॥१॥
न किरस्य सहन्त्य पर्येता कयस्य चित्। वाजो अस्ति श्रवाय्यः ॥२॥
स वाजं विश्वचर्षणिरर्वद्भिरस्तु तरुता। विप्रेभिरस्तु सनिता ॥३॥
*yamagne pṛtasu martyamavā vājeṣu yaṁ junāḥ । sa yantā śaśvatīriṣaḥ ॥1॥*
*na kirasya sahantya paryetā kayasya chit । vājo asti śravāyyaḥ ॥2॥*
*sa vājaṁ viśvacharṣaṇirarvadbhirastu tarutā । viprebhirastu sanitā ॥3॥*

सा. (Sv.) १४९७-१४९९

इममू षु त्वमस्माकं सनिं गायत्रं नव्यांसम्। अग्ने देवेषु प्र वोचः ॥१॥
विभक्तासि चित्रभानो सिन्धोरूर्मा उपाक आ। सद्यो दाशुषे क्षरसि ॥२॥
आ नो भज परमेष्वा वाजेषु मध्यमेषु। शिक्षा वस्वो अन्तमस्य ॥३॥
*imamū ṣu tvamasmākaṁ saniṁ gāyatraṁ navyāṁsam । agne deveṣu pra vochaḥ ॥1॥*
*vibhaktāsi chitrabhāno sindhorūrmā upāka ā । sadyo dāśuṣe kṣarasi ॥2॥*
*ā no bhaja parameṣvā vājeṣu madhyameṣu । śikṣā vasvo antamasya ॥3॥*

सा. (Sv.) १६१७-१६१९

विश्वेभिरग्ने अग्निभिरिमं यज्ञमिदं वचः। चनो धाः सहसो यहो ॥१॥
यच्चिद्धि शश्वता तना देवं देवं यजामहे। त्वे इद्धूयते हविः ॥२॥
प्रियो नो अस्तु विश्पतिर्होता मन्द्रो वरेण्यः। प्रियाः स्वग्नयो वयम् ॥३॥
*viśvebhiragne agnibhirimaṁ yajñamidaṁ vachaḥ । chano dhāḥ sahaso yaho ॥1॥*
*yachchiddhi śaśvatā tanā devaṁ devaṁ yajāmahe । tve iddhūyate haviḥ ॥2॥*
*priyo no astu viśpatirhotā mandro vareṇyaḥ । priyāḥ svagnayo vayam ॥3॥*

सा. (Sv.) १६३४-१६३६

अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः। सम्राजन्तमध्वराणाम् ॥१॥
स घा नः सूनुः शवसा पृथुप्रगामा सुशेवः। मीढ्वाँ अस्माकं बभूयात् ॥२॥
स नो दुराच्चासाच्च नि मर्त्यादघायोः। पाहि सदमिद्विश्वायुः ॥३॥
*aśvaṁ na tvā vāravantaṁ vandadhyā agiṁna namobhiḥ । samrājantamadhvarāṇām ॥1॥*
*sa ghā naḥ sūnuḥ śavasā pṛthupragāmā suśevaḥ । mīḍhvām̐ asmākaṁ babhūyāt ॥2॥*
*sa no durāchchāsāchcha ni martyādaghāyoḥ । pāhi sadamidviśvāyuḥ ॥3॥*

सा. (Sv.) १६६३-१६६५

जराबोध तद्विविड्ढि विशेविशे यज्ञियाय। स्तोमं रुद्राय दृशीकम् ॥१॥
स नो महाँ अनिमानो धूमकेतुः पुरुश्चन्द्रः। धिये वाजाय हिन्वतु ॥२॥
स रेवाँ इव विश्पतिर्दैव्यः केतुः शृणोतु नः। उक्थैरग्निर्बृहद्भानुः ॥३॥
*jarābodha tadviviḍḍhi viśeviśe yajñiyāya । stomaṁ rudrāya dṛśīkam ॥1॥*
*sa no mahām̐ animāno dhūmaketuḥ puruśchandraḥ । dhiye vājāya hinvatu ॥2॥*
*sa revām̐ iva viśpatirdaivyaḥ ketuḥ śṛṇotu naḥ । ukthairagnirbṛhadbhānuḥ ॥3॥*

२. अश्विनौ (Aśvinau) - ऋ. (Rv.) १.३०.१७-१९

आश्विनावश्ववात्येषा यातं शवीरया। गोमद्दस्रा हिरण्यवत् ॥१७॥
समानयोजनो हि वां रथो दस्रावमर्त्यः। समुद्रे अश्विनेयते ॥१८॥
न्य१घ्न्यस्य मूर्धनि चक्रं रथस्य येमथुः। परि द्यामन्यदीयते ॥१९॥

*āśvināvaśvavātyeṣā yātaṁ śavīrayā । gomaddasrā hiraṇyavat ॥17॥*
*samānayojano hi vāṁ ratho dasrāvamartyaḥ । samudre aśvineyate ॥18॥*
*nya1dhnyasya mūrdhani chakraṁ rathasya yemathuḥ । pari dyāmanyadīyate ॥19॥*

३. इन्द्रः (Indraḥ) - ऋ. (Rv.) १.२९.१-७; १.३०.१-१६; सा. (Sv.) १६३; १८३; २१४; ७४३-७४५; १०८४-१०८६; १५९९-१६०१; १६५४-१६५६

ऋ. (Rv.) १.२९.१-७

यच्चिद्धि सत्य सोमपा अनाशस्ता इव स्मसि ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥१॥
शिप्रिन्वाजाना पते शचीवस्तव दंसना ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥२॥
नि ष्वापया मिथूदृशा सस्तामबुध्यमाने ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥३॥
ससन्तु त्या अरातयो बोधन्तु शूर रातयः ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥४॥
समिन्द्र गर्दभं मृण नुवन्तं पापयामुया ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥५॥
पताति कुण्डृणाच्या दूरं वातो वनादधि ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥६॥
सर्वं परिक्रोशं जहि जम्भया कृकदाश्वम् ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥७॥
*yachchiddhi satya somapā anāśastā iva smasi ।*
*ā tū na indra śaṁsaya goṣvaśveṣu śubhriṣu sahasreṣu tuvīmagha ॥1॥*
*śiprinvājānā pate śachīvastava daṁsanā ।*
*ā tū na indra śaṁsaya goṣvaśveṣu śubhriṣu sahasreṣu tuvīmagha ॥2॥*
*ni ṣvāpayā mithūdṛśā sastāmabudhyamāne ।*
*ā tū na indra śaṁsaya goṣvaśveṣu śubhriṣu sahasreṣu tuvīmagha ॥3॥*
*sasantu tyā arātayeā bodhantu śūra rātayaḥ ।*
*ā tū na indra śaṁsaya goṣvaśveṣu śubhriṣu sahasreṣu tuvīmagha ॥4॥*
*samindra gardabhaṁ mṛṇa nuvantaṁ pāpayāmuyā ।*
*ā tū na indra śaṁsaya goṣvaśveṣu śubhriṣu sahasreṣu tuvīmagha ॥5॥*
*patāti kuṇḍṛṇāchyā dūraṁ vāto vanādadhi ।*
*ā tū na indra śaṁsaya goṣvaśveṣu śubhriṣu sahasreṣu tuvīmagha ॥6॥*
*sarvaṁ parikrośaṁ jahi jambhayā kṛkadāśvam ।*
*ā tū na indra śaṁsaya goṣvaśveṣu śubhriṣu sahasreṣu tuvīmagha ॥7॥*

ऋ. (Rv.) १.३०.१-१६

आ व इन्द्रं क्रिविं यथा वाजयन्तः शतक्रतुम्। मंहिष्ठं सिंच इन्दुभिः ॥१॥
शतं वा यः शुचीनां सहस्रं वा समाशिराम्। एदु निम्नं न रीयते ॥२॥
सं यन्मदाय शुष्मिण एना ह्यस्योदरे। समुद्रो न व्यचो दधे ॥३॥
अयमु ते समतसि कपोत इव गर्भधिम्। वचस्तच्चिन्न ओहसे ॥४॥
स्तोत्रं राधानां पते गिर्वाहो वीर यस्य ते। विभूतिरस्तु सूनृता ॥५॥
ऊर्ध्वस्तिष्ठा न ऊतयेऽस्मिन्वाजे शतक्रतो। समन्येषु ब्रवावहै ॥६॥
योगेयोगे तवस्तरं वाजेवाजे हवामहे। सखाय इन्द्रमूतये ॥७॥
आ घा गमद्यदि श्रवत् सहस्रिणीभिरूतिभिः।वाजेभिरुप नो हवम् ॥८॥
अनु प्रत्नस्यौकसो हुवे तुविप्रतिं नरम्। यं ते पूर्वं पिता हुवे ॥९॥
तं त्वा वयं विश्ववारा शास्महे पुरुहूत। सखे वसो जरितृभ्यः ॥१०॥
अस्माकं शिप्रिणीनां सोमपाः सोमपाव्नाम्। सखे वज्रिन्त्सखीनाम् ॥११॥
तथा तदस्तु सोमपाः सखे वज्रिन्तथा कृणु। यथा त उश्मसीष्टये ॥१२॥
रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः। क्षुमन्तो याभिर्मदेम ॥१३॥
आ घ त्वा वान्मनाप्तः स्तोतृभ्यो धृष्णवियानः। ऋणोरक्षं न चक्र्योः ॥१४॥

आ यद्दुवः शतक्रतवा कामं जरितृणाम्। ऋणोरक्षं न शचीभिः ॥१५॥
शश्वदिन्द्रः पोप्रुथद्भिर्जिगाय नानदद्भिः शाश्वसद्भिर्धनानि ।
स नो हिरण्यरथं दंसनावान्त्स नः सनिता सनये स नोऽदात् ॥१६॥
*ā va indraṁ kriviṁ yathā vājayantaḥ śatakratum । maṁhiṣṭhaṁ siṁcha indubhiḥ ॥1॥*
*śataṁ vā yaḥ śuchīnāṁ sahasraṁ vā samāśirām । edu nimnaṁ na rīyate ॥2॥*
*saṁ yanmadāya śuṣmiṇa enā hyasyodare । samudro na vyacho dadhe ॥3॥*
*ayamu te samatasi kapota iva garbhadhim । vachastachchinna ohase ॥4॥*
*stotraṁ rādhānāṁ pate girvāho vīra yasya te । vibhūtirastu sūnṛtā ॥5॥*
*ūrdhvastiṣṭhā na ūtaye'sminvāje śatakrato । samanyeṣu bravāvahai ॥6॥*
*yogeyoge tavastaraṁ vājevāje havāmahe । sakhāya indramūtaye ॥7॥*
*ā ghā gamadyadi śravat sahasriṇībhirūtibhiḥ ।vājebhirupa no havam ॥8॥*
*anu pratnasyaukaso huve tuvipratiṁ naram । yaṁ te pūrvaṁ pitā huve ॥9॥*
*taṁ tvā vayaṁ viśvavārā śāsmahe puruhūta । sakhe vaso jaritṛbhyaḥ ॥10॥*
*asmākaṁ śipriṇīnāṁ somapāḥ somapāvnām । sakhe vajrintsakhīnām ॥11॥*
*tathā tadastu somapāḥ sakhe vajrintathā kṛṇu । yathā ta uśmasīṣṭaye ॥12॥*
*revatīrnaḥ sadhamāda indre santu tuvivājāḥ । kṣumanto yābhirmadema ॥13॥*
*ā gha tvā vānmanāptaḥ stotṛbhyo dhṛṣṇaviyānaḥ । ṛṇorakṣaṁ na chakryoḥ ॥14॥*
*ā yadduvaḥ śatakratavā kāmaṁ jaritṛṇām । ṛṇorakṣaṁ na śachībhiḥ ॥15॥*
*śaśvadindraḥ popruthadbhirjigāya nānadadbhiḥ śāśvasadbhirdhanāni ।*
*sa no hiraṇyarathaṁ daṁsanāvāntsa naḥ sanitā sanaye sa no'dāt ॥16॥*

सा. (Sv.) १६३

योगेयोगे तवस्तरं वाजेवाजे हवामहे। सखाय इन्द्रमूतये ॥९॥
*yogeyoge tavastaraṁ vājevāje havāmahe । sakhāya indramūtaye ॥9॥*

सा. (Sv.) १८३

अयमु ते समतसि कपोत इव गर्भधिम्। वचस्तच्चिन्न ओहसे ॥९॥
*ayamu te samatasi kapota iva garbhadhim । vachastachchinna ohase ॥9॥*

सा. (Sv.) २१४

आ व इन्द्रं कृविं यथा वाजयन्तः शतक्रतुम्। मं हिष्ठं सिंच इन्दुभिः ॥१॥
*ā va indraṁ kṛviṁ yathā vājayantaḥ śatakratum । maṁ hiṣṭhaṁ siṁcha indubhiḥ ॥1॥*

सा. (Sv.) ७४३-७४५

योगेयोगे तवस्तरं वाजेवाजे हवामहे। सखाय इन्द्रमूतये ॥१॥
अनु प्रत्नस्यौकसो हुवे तुविप्रतिं नरम्। यं ते पूर्वं पिता हुवे ॥२॥
आ घा गमद्यदि श्रवत्सहस्रिणीभिरूतिभिः। वाजेभिरुप नो हवम् ॥३॥
*yogeyoge tavastaraṁ vājevāje havāmahe । sakhāya indramūtaye ॥1॥*
*anu pratnasyaukaso huve tuvipratiṁ naram । yaṁ te pūrvaṁ pitā huve ॥2॥*
*ā ghā gamadyadi śravatsahasriṇībhirūtibhiḥ । vājebhirupa no havam ॥3॥*

सा. (Sv.) १०८४-१०८६

रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः। क्षुमन्तो याभिर्मदेम ॥१॥
आ घ त्वावान् त्मना युक्तः स्तोतृभ्यो धृष्णवीयानः। ऋणोरक्षं न चक्र्यो ॥२॥
आ यद् दुवः शतक्रतवा कामं जरितृणाम्। ऋणोरक्षं न शचीभिः ॥३॥
*revatīrnaḥ sadhamāda indre santu tuvivājāḥ । kṣumanto yābhirmadema ॥1॥*
*ā gha tvāvān tmanā yuktaḥ stotṛbhyo dhṛṣṇavīyānaḥ । ṛṇorakṣaṁ na chakryo ॥2॥*
*ā yad duvaḥ śatakratavā kāmaṁ jaritṛṇām । ṛṇorakṣaṁ na śachībhiḥ ॥3॥*

सा. (Sv.) १५९९-१६०१

अयमु ते समतसि कपोत इव गर्भधिम्। वचस्तच्चिन्न ओहसे ॥१॥
स्तोत्रं राधानां पते गिर्वाहो वीर यस्य ते। विभूतिरस्तु सूनृता ॥२॥
ऊर्ध्वस्तिष्ठा न ऊतयेऽस्मिन् वाजे शतक्रतो। समन्येषु ब्रवावहै ॥३॥
*ayamu te samatasi kapota iva garbhadhim । vachastachchinna ohase ॥1॥*
*stotraṁ rādhānāṁ pate girvāho vīra yasya te । vibhūtirastu sūnṛtā ॥2॥*
*ūrdhvastiṣṭhā na ūtaye'smin vāje śatakrato । samanyeṣu bravāvahai ॥3॥*

सा. (Sv.) १६५४-१६५६

सुमन्मा वस्वी रन्ती सूनरी ॥१॥
सरूप वृषन्ना गहीमौ भद्रौ धुर्यावभि। ताविमा उप सर्पतः ॥२॥
नीव शीर्षाणि मृड्वं मध्य आपस्य तिष्ठति। श्रृंगेभिर्दशभिर्दिशन् ॥३॥
*sumanmā vasvī rantī sūnarī ॥1॥*
*sarūpa vṛṣannā gahīmau bhadrau dhuryāvabhi । tāvimā upa sarpataḥ ॥2॥*
*nīva śīrṣāṇi mṛḍhvaṁ madhya āpasya tiṣṭhati । śṛṁgebhirdaśabhirdiśan ॥3॥*

४. इन्द्रः (साग्री. सास्वा. सार्षेदी.) इन्द्रापूषणौ (ऋसर्व. १.३०.१०) (Indraḥ [Ssb. Sas. Sad.] Indrāpūṣaṇau [Rss. 1.30.10)) - सा. (Sv.) १५३

रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः। क्षुमन्तो याभिर्मदेम ॥९॥
*revatīrnaḥ sadhamāda indre santu tuvivājāḥ । kṣumanto yābhirmadema ॥9॥*

५. इन्द्र-यज्ञ-सोमाः (Indra-Yajña-Somāḥ) - ऋ. (Rv.) १.२८.१-९

यत्र ग्रावा पृथुबुध्न ऊर्ध्वो भवति सोतवे। उलूखलसुतानामवेद्विन्द्र जल्गुलः ॥१॥
यत्र द्वाविव जघनाधिषवण्या कृता। उलूखलसुतानामवेद्विन्द्र जल्गुलः ॥२॥
यत्र नार्यपच्यवमुपच्यवं च शिक्षते। उलूखलसुतानामवेद्विन्द्र जल्गुलः ॥३॥
यत्र मन्थां विबध्नते रशमीन्यमितवा इव। उलूखलसुतानामवेद्विन्द्र जल्गुलः ॥४॥
यच्चिद्धि त्वं गृहेगृह उलूखलक युज्यसे। इह द्युमत्तमं वद जयतामिव दुन्दुभिः ॥५॥
उते स्म ते वनस्पते वातो वि वात्यग्रमित्। अथो इन्द्राय पातवे सुनु सोममुलुखल ॥६॥
आयजी वाजसातमा ता ह्यु१च्चा विजर्भृतः। हरी इवान्धांसि बप्सता ॥७॥
ता नो अद्य वनस्पती ऋष्वावृष्वेभिः सोतृभिः। इन्द्राय मधुमत् सुतम् ॥८॥
उच्छिष्टं चम्वोर्भर सोमं पवित्र आ सृज। नि धेहि गोरधि त्वचि ॥९॥
*yatra grāvā pṛthubudhna ūrdhvo bhavati sotave ।*
*ulūkhalasutānāmavedvindra jalgulaḥ ॥1॥*
*yatra dvāviva jaghanādhiṣavaṇyā kṛtā । ulūkhalasutānāmavedvindra jalgulaḥ ॥2॥*
*yatra nāryapachyavamupachyavaṁ cha śikṣate । ulūkhalasutānāmavedvindra jalgulaḥ ॥3॥*
*yatra manthāṁ vibadhnate raśamīnyamitavā iva ।*
*ulūkhalasutānāmavedvindra jalgulaḥ ॥4॥*
*yachchiddhi tvaṁ gṛhegṛha ulūkhalaka yujyase ।*
*iha dyumattamaṁ vada jayatāmiva dundubhiḥ ॥5॥*
*ute sma te vanaspate vāto vi vātyagramit । atho indrāya pātave sunu somamulukhala ॥6॥*
*āyajī vājasātamā tā hyu1chchā vijarbhṛtaḥ । harī ivāndhāṁsi bapsatā ॥7॥*
*tā no adya vanaspatī ṛṣvāvṛṣvebhiḥ sotṛbhiḥ । indrāya madhumat sutam ॥8॥*
*uchchhiṣṭaṁ chamvorbhara somaṁ pavitra ā sṛja । ni dhehi goradhi tvachi ॥9॥*

६. उषा (Uṣā) - ऋ. (Rv.) १.३०.२०-२२

कस्त उषः कधप्रिये भुजे मर्तो अमर्त्ये। कं नक्षसे विभावरि ॥२०॥
वयं हि ते अमन्मह्यान्तादा पराकात्। अश्वे न चित्रे अरुषि ॥२१॥
त्वं त्येभिरा गहि वाजेभिर्दुहितर्दिवः। अस्मे रयिं नि धारय ॥२२॥
*kasta uṣaḥ kadhapriye bhuje marto amartye । kaṁ nakṣase vibhāvari ॥20॥*
*vayaṁ hi te amanmahyāntādā parākāt । aśve na chitre aruṣi ॥21॥*
*tvaṁ tyebhirā gahi vājebhirduhitardivaḥ । asme rayi ni dhāraya ॥22॥*

७. वरुणः (Varuṇaḥ) - ऋ. (Rv.) १.२५.१-२१; सा. (Sv.) १५८५

ऋ. (Rv.) १.२५.१-२१

यच्चिद्धि ते विशो यथा प्र देव वरुण व्रतम्। मिनीमसि द्यवि-द्यवि ॥१॥
मा नो वधाय हत्नवे जिहीळानस्य रीरधः। मा हृणानस्य मन्यवे ॥२॥
वि मृळीकाय ते मनो रथीरश्वं न संदितम्। गीर्भिर्वरुण सीमहि ॥३॥
परा हि मे विमन्यवः पतन्ति वस्यइष्टये। वयो न वसतीरुप ॥४॥
कदा क्षत्रश्रियं नरमा वरुणं करामहे। मृळीकायोरुचक्षसम् ॥५॥
तदित्समानमाशाते वेनन्ता न प्र युच्छतः। धृतव्रताय दाशुषे ॥६॥

वेदा यो वीनां पदमन्तरिक्षेण पतताम्। वेद नावः समुद्रियः ॥७॥
वेद मासो धृतव्रतो द्वादश प्रजावतः। वेदा य उपजायते ॥८॥
वेद वातस्य वर्तनिमुरोर्ऋष्वस्य बृहतः। वेदा ये अध्यासते ॥९॥
नि षसाद धृतव्रतो वरुणः पस्त्या३स्वा। साम्राज्याय सुक्रतुः ॥१०॥
अतो विश्वान्यद्भुता चिकित्वाँ अभि पश्यति। कृतानि या च कर्त्वा ॥११॥
स नो विश्वाहा सुक्रतुरादित्यः सुपथा करत्। प्र ण आयूंषि तारिषत् ॥१२॥
बिभ्रद् द्रापिं हिरण्ययं वरुणो वस्त निर्णिजम्। परि स्पशो नि षेदिरे ॥१३॥
न यं दिप्सन्ति दिप्सवो न द्रुह्वाणो जनानाम्। न देवमभिमातयः ॥१४॥
उत यो मानुषेष्वा यशश्चक्रे असाम्या। अस्माकमुदरेष्वा ॥१५॥
परा मे यन्ति धीतयो गावो न गव्यूतीरनु। इच्छन्तीरुरुचक्षसम् ॥१६॥
सं नु वोचावहै पुनर्यतो मे मध्वाभृतम्। होतेव क्षदसे प्रियम् ॥१७॥
दर्शं नु विश्वदर्शतं दर्शं रथमधि क्षमि। एता जुषत मे गिरः ॥१८॥
इमं मे वरुण श्रुधी हवमद्या च मृळय। त्वामवस्युरा चके ॥१९॥
त्वं विश्वस्य मेधिर दिवश्च ग्मश्च राजसि। स यामनि प्रति श्रुधि ॥२०॥
उदुत्तमं ममुग्धि नो वि पाशं मध्यमं चृत। अवाधमानि जीवसे ॥२१॥
*yachchiddhi te viśo yathā pra deva varuṇa vratam | minīmasi dyavi-dyavi ||1||*
*mā no vadhāya hatnave jihīḻānasya rīradhaḥ | mā hṛṇānasya manyave ||2||*
*vi mṛḻīkāya te mano rathīraśvaṁ na saṁditam | gīrbhirvaruṇa sīmahi ||3||*
*parā hi me vimanyavaḥ patanti vasyaiṣṭaye | vayo na vasatīrupa ||4||*
*kadā kṣatraśriyaṁ naramā varuṇaṁ karāmahe | mṛḻīkāyoruchakṣasam ||5||*
*taditsamānamāśāte venantā na pra yuchchhataḥ | dhṛtavratāya dāśuṣe ||6||*
*vedā yo vīnāṁ padamantarikṣeṇa patatām | veda nāvaḥ samudriyaḥ ||7||*
*veda māso dhṛtavrato dvādaśa prajāvataḥ | vedā ya upajāyate ||8||*
*veda vātasya vartanimurorṛṣvasya bṛhataḥ | vedā ye adhyāsate ||9||*
*ni ṣasāda dhṛtavrato varuṇaḥ pastyā3svā | sāmrājyāya sukratuḥ ||10||*
*ato viśvānyadbhutā chikitvām̐ abhi paśyati | kṛtāni yā cha kartvā ||11||*
*sa no viśvāhā sukraturādityaḥ supathā karat | pra ṇa āyūṁṣi tāriṣat ||12||*
*bibhrad drāpiṁ hiraṇyayaṁ varuṇo vasta nirṇijam | pari spaśo ni ṣedire ||13||*
*na yaṁ dipsanti dipsavo na druhvāṇo janānām | na devamabhimātayaḥ ||14||*
*uta yo mānuṣeṣvā yaśaśchakre asāmyā | asmākamudareṣvā ||15||*
*parā me yanti dhītayo gāvo na gavyūtīranu | ichchhantīruruchakṣasam ||16||*
*saṁ nu vochāvahai punaryato me madhvābhṛtam | hoteva kṣadase priyam ||17||*
*darśaṁ nu viśvadarśataṁ darśaṁ rathamadhi kṣami | etā juṣata me giraḥ ||18||*
*imaṁ me varuṇa śrudhī havamadyā cha mṛḻaya | tvāmavasyurā chake ||19||*
*tvaṁ viśvasya medhira divaścha gmaścha rājasi | sa yāmani prati śrudhi ||20||*
*uduttamaṁ mamugdhi no vi pāśaṁ madhyamaṁ chṛta | avādhamāni jīvase ||21||*

सा. (Sv.) १५८५

इमं मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युरा चके ॥१॥
*imaṁ me varuṇa śrudhī havamadyā cha mṛḍaya | tvāmavasyurā chake ||1||*

### ६७१. शुनःशेप आजीगर्तिः (देवरातः कृत्रिमो वैश्वामित्रः - साग्री. सास्वा.); शुनःशेप (ऋसर्व.) (Śunaḥśepa Ājīgartiḥ [Devarātaḥ Kṛtrimo Vaiśvāmitraḥ-Ssb. Sas.]; Śunaḥśepa [Rss.])

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.३.१-१०; सा. (Sv.) ७५८; १२५६-१२६५

ऋ. (Rv.) ९.३.१-१०

एष देवो अमर्त्यः पर्णवीरिव दीयति। अभि द्रोणान्यासदम् ॥१॥
एष देवो विपा कृतोऽति ह्वरांसि धावति। पवमानो अदाभ्यः ॥२॥
एष देवो विपन्युभिः पवमान ऋतायुभिः। हरिर्वाजाय मृजयते ॥३॥
एष विश्वानि वार्या शूरो यन्निव सत्वभिः। पवमानः सिषासति ॥४॥
एष देवो रथर्यति पवमानो दशस्यति। आविष्कृणोति वग्वनुम् ॥५॥
एष विप्रैरभिष्टुतोऽपो देवो वि गाहते। दधद्रत्नानि दाशुषे ॥६॥

एष दिवं वि धावति तिरो रजांसि धारया। पवमानः कनिक्रदत् ॥७॥
एष दिवं व्यासरत्तिरो रजांस्यस्पृतः। पवमानः स्वध्वरः ॥८॥
एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः। हरिः पवित्रे अर्षति ॥९॥
एष उ स्य पुरुव्रतो जज्ञानो जनयन्निषः। धारया पवते सुतः ॥१०॥
*eṣa devo amartyaḥ parṇavīriva dīyati | abhi droṇanyāsadam ||1 ||*
*eṣa devo vipā kṛto'ti hvarāṁsi dhāvati | pavamāno adābhyaḥ ||2 ||*
*eṣa devo vipanyubhiḥ pavamāna ṛtāyubhiḥ | harirvājāya mṛjayate ||3 ||*
*eṣa viśvāni vāryā śūro yanniva satvabhiḥ | pavamānaḥ siṣāsati ||4 ||*
*eṣa devo ratharyati pavamāno daśasyati | āviṣkṛṇoti vagvanum ||5 ||*
*eṣa viprairabhiṣṭuto'po devo vi gāhate | dadhadratnāni dāśuṣe ||6 ||*
*eṣa divaṁ vi dhāvati tiro rajāṁsi dhārayā | pavamānaḥ kanikradat ||7 ||*
*eṣa divaṁ vyāsarattiro rajāṁsyaspṛtaḥ | pavamānaḥ svadhvaraḥ ||8 ||*
*eṣa pratnena janmanā devo devebhyaḥ sutaḥ | hariḥ pavitre arṣati ||9 ||*
*eṣa u sya puruvrato jajñāno janayanniṣaḥ | dhārayā pavate sutaḥ ||10 ||*

सा. (Sv.) ७५८

एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः। हरिः पवित्रे अर्षति ॥१॥
*eṣa pratnena janmanā devo devebhyaḥ sutaḥ | hariḥ pavitre arṣati ||1 ||*

सा. (Sv.) १२५६-१२६५

एष देवो अमर्त्यः पर्णवीरिव दीयते। अभि द्रोणान्यासदम् ॥१॥
एष विप्रैरभिष्टुतोऽपो देवो वि गाहते। दधद्रत्नानि दाशुषे ॥२॥
एष विश्वानि वार्या शूरो यन्निव सत्वभिः। पवमानः सिषासति ॥३॥
एष देवो रथर्यति पवमानो दिशस्यति। आविष्कृणोति वग्वनुम् ॥४॥
एष देवो विपन्युभिः पवमान ऋतायुभिः। हरिर्वाजाय मृजयते ॥५॥
एष देवो विपा कृतोऽति ह्वरांसि धावति। पवमानो अदाभ्यः ॥६॥
एष दिवं वि धावति तिरो रजांसि धारया। पवमानः कनिक्रदत् ॥७॥
एष दिवं व्यासरत्तिरो रजांस्यस्तृतः। पवमानः स्वध्वरः ॥८॥
एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः। हरिः पवित्रे अर्षति ॥९॥
एष उ स्य पुरुव्रतो जज्ञानो जनयन्निषः। धारया पवते सुतः ॥१०॥
*eṣa devo amartyaḥ parṇavīriva dīyate | abhi droṇānyāsadam ||1 ||*
*eṣa viprairabhiṣṭuto'po devo vi gāhate | dadhadratnāni dāśuṣe ||2 ||*
*eṣa viśvāni vāryā śūro yanniva satvabhiḥ | pavamānaḥ siṣāsati ||3 ||*
*eṣa devo ratharyati pavamāno diśasyati | āviṣkṛṇoti vagvanum ||4 ||*
*eṣa devo vipanyubhiḥ pavamāna ṛtāyubhiḥ | harirvājāya mṛjayate ||5 ||*
*eṣa devo vipā kṛto'ti hvarāṁsi dhāvati | pavamāno adābhyaḥ ||6 ||*
*eṣa divaṁ vi dhāvati tiro rajāṁsi dhārayā | pavamānaḥ kanikradat ||7 ||*
*eṣa divaṁ vyāsarattiro rajāṁsyastṛtaḥ | pavamānaḥ svadhvaraḥ ||8 ||*
*eṣa pratnena janmanā devo devebhyaḥ sutaḥ | hariḥ pavitre arṣati ||9 ||*
*eṣa u sya puruvrato jajñāno janayanniṣaḥ | dhārayā pavate sutaḥ ||10 ||*

**६७२. शुनःशेप आजीगर्ति कृत्रिमो देवरातो वैश्वामित्रो वा (साग्री. सास्वा.); शुनःशेप आजगर्ति कृत्रिमो देवरातो वैश्वामित्रः (ऋसर्व.); शुनःशेपः (सार्षेदी.) (Śunaḥśepa Ājīgarti Kṛtrimo Devarāto Vaiśvāmitro Vā [Ssb. Sas.]; Śunaḥśepa Ājagarti Kṛtrimo Devarāto Vaiśvāmitraḥ [Rss.]; Śunaḥśepaḥ [Sad.])**

१. अग्निः (Agniḥ) - ऋ. (Rv.) १.२४.२

अग्नेर्वयं प्रथमस्यामृतानां मनामहे चारु देवस्य नाम ।
स नो मह्या अदितये पुनर्दात्पितरं च दृशेयं मातरं च ॥२॥
*agnervayaṁ prathamasyāmṛtānāṁ manāmahe chāru devasya nāma |*
*sa no mahyā aditaye punardātpitaraṁ cha dṛśeyaṁ mātaraṁ cha ||2 ||*

२. प्रजापतिः (Prajāpatiḥ) - ऋ. (Rv.) १.२४.१

कस्य नूनं कतमस्यामृतानां मनामहे चारु देवस्य नाम ।

को नो मह्या अदितये पुनर्दात्पितरं च दृशेयं मातरं च ॥१॥
*kasya nūnaṁ katamasyāmṛtānāṁ manāmahe chāru devasya nāma /*
*ko no mahyā aditaye punardātpitaraṁ cha dṛśeyaṁ mātaraṁ cha //1 //*

३. वरुणः (Varuṇaḥ) - ऋ. (Rv.) १.२४.६-१५; सा. (Sv.) ५८९

ऋ. (Rv.) १.२४.६-१५

नहि ते क्षत्रं न सहो न मन्युं वयश्चनामी पतयन्त आपुः ।
नेमा आपो अनिमिषं चरन्तीर्न ये वातस्य प्रमिनन्त्यभवम् ॥६॥
अबुध्ने राजा वरुणो वनस्योर्ध्वं स्तूपं ददते पूतदक्षः ।
नीचीनाः स्थुरुपरि बुध्न एषामस्मे अन्तर्निहिताः केतवः स्युः ॥७॥
उरुं हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ ।
अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित् ॥८॥
शतं ते राजन्भिषजः सहस्रमुर्वी गभीरा सुमतिष्टे अस्तु ।
बाधस्व दूरे निरृतिं पराचैः कृतं चिदेनः प्र ममुग्ध्यस्मत् ॥९॥
अमी य ऋक्षा निहितास उच्चा नक्तं ददृश्रे कुह चिद्दिवेयुः ।
अदब्धानि वरुणस्य व्रतानि विचाकशच्चन्द्रमा नक्तमेति ॥१०॥
तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।
अहेळमानो वरुणेह बोधयुरुशंस मा न आयुः प्र मोषीः ॥११॥
तदिन्नक्तं तद्दिवा मह्यमाहुस्तदयं केतो हृद आ वि चष्टे ।
शुनःशेपो यमह्वद् गृभीतः सो अस्मान् राजा वरुणो मुमोक्तु ॥१२॥
शुनःशेपो ह्यह्वद् गृभीतस्त्रिष्वादित्यं द्रुपदेषु बद्धः ।
अवैनं राजा वरुणः ससृज्याद्विद्वाँ अदब्धो वि मुमोक्तु पाशान् ॥१३॥
अव ते हेळो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः ।
क्षयन्नस्मभ्यमसुर प्रचेता राजन्नेनांसि शिश्रथः कृतानि ॥१४॥
उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥१५॥
*nahi te kṣatraṁ na saho na manyuṁ vayaśchanāmī patayanta āpuḥ /*
*nemā āpo animiṣaṁ charantīrna ye vātasya praminantyabhavam //6 //*
*abudhne rājā varuṇo vanasyordhvaṁ stūpaṁ dadate pūtadakṣaḥ /*
*nīchīnāḥ sthurupari budhna eṣāmasme antarnihitāḥ ketavaḥ syuḥ //7 //*
*uruṁ hi rājā varuṇaśchakāra sūryāya panthāmanvetavā u /*
*apade pādā pratidhātave'karutāpavaktā hṛdayāvidhaśchit //8 //*
*śataṁ te rājanbhiṣajaḥ sahasramurvī gabhīrā sumatiṣṭe astu /*
*bādhasva dūre nirṛtiṁ parāchaiḥ kṛtaṁ chidenaḥ pra mamugdhyasmat //9 //*
*amī ya ṛkṣā nihitāsa uchchā naktaṁ dadṛśre kuha chiddiveyuḥ /*
*adabdhāni varuṇasya vratāni vichākaśachchandramā naktameti //10 //*
*tattvā yāmi brahmaṇā vandamānastadā śāste yajamāno havirbhiḥ /*
*aheḻamāno varuṇeha bodhayuruśaṁsa mā na āyuḥ pra moṣīḥ //11 //*
*tadinnaktaṁ taddivā mahyamāhustadayaṁ keto hṛda ā vi chaṣṭe /*
*śunaḥśepo yamahvad gṛbhītaḥ so asmān rājā varuṇo mumoktu //12 //*
*śunaḥśepo hyahvad gṛbhītastriṣvādityaṁ drupadeṣu baddhaḥ /*
*avainaṁ rājā varuṇaḥ sasṛjyādvidvām̐ adabdho vi mumoktu pāśān //13 //*
*ava te heḻo varuṇa namobhirava yajñebhirīmahe havirbhiḥ /*
*kṣayannasmabhyamasura prachetā rājannenāṁsi śiśrathaḥ kṛtāni //14 //*
*uduttamaṁ varuṇa pāśamasmadavādhamaṁ vi madhyamaṁ śrathāya /*
*athā vayamāditya vrate tavānāgaso aditaye syāma //15 //*

सा. (Sv.) ५८९

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
अथादित्य व्रते वयं तवानागसो अदितये स्याम ॥४॥
*uduttamaṁ varuṇa pāśamasmadavādhamaṁ vi madhyamaṁ śrathāya /*
*athāditya vrate vayaṁ tavānāgaso aditaye syāma //4 //*

४. सविता भगो (Savitā Bhago) - ऋ. (Rv.) १.२४.३-५

अभि त्वा देव सवितरीशानं वार्याणाम्। सदावन्भागमीमहे ॥३॥
यश्चिद्धि त इत्था भगः शशमानः पुरा निदः। अद्वेषो हस्तयोर्दधे ॥४॥
भगभक्तस्य ते वयमुदशेम तवावसा। मूर्धानं राय आरभे ॥५॥
*abhi tvā deva savitarīśānaṁ vāryāṇām । sadāvanbhāgamīmahe ॥3॥*
*yaśchiddhi ta itthā bhagaḥ śaśamānaḥ purā nidaḥ । adveṣo hastayordadhe ॥4॥*
*bhagabhaktasya te vayamudaśema tavāvasā । mūrdhānaṁ rāya ārabhe ॥5॥*

## ६७३. शुनःशेप आजीगर्तिः वामदेवो वा (साग्री. सास्वा.); पूषा (सार्षेदी.) (Śunaḥśepa Ājīgartiḥ Vāmadevo Vā [Ssb. Sas.]; Pūṣā [Sad.])

१. इन्द्रः (साग्री. सास्वा.) सोमो पूषा च (सार्षेदी.) (Indraḥ [Ssb. Sas.] Somo Pūṣā Cha [Sad.]) - सा. (Sv.) १५४

सोमः पूषा च चेततुर्विश्वासां सुक्षितीनाम्। देवत्रा रथ्योर्हिता ॥१०॥
*somaḥ pūṣā cha chetaturviśvāsāṁ sukṣitīnām । devatrā rathyorhitā ॥10॥*

## ६७४. शनुःशेपो देवरात अपरनामा (Śanuḥśepo Devarāta Aparanāmā)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.४५.१-३

अयमु ते समतसि कपोतइव गर्भधिम्। वचस्तच्चिन्न ओहसे ॥१॥
स्तोत्रं राधानां पते गिर्वाहो वीर यस्य ते। विभूतिरस्तु सूनृता ॥२॥
ऊर्ध्वस्तिष्ठा न ऊतयेऽस्मिन् वाजे शतक्रतो। समन्येषु ब्रवावहे ॥३॥
*ayamu te samatasi kapotaiva garbhadhim । vachastachchinna ohase ॥1॥*
*stotraṁ rādhānāṁ pate girvāho vīra yasya te । vibhūtirastu sūnṛtā ॥2॥*
*ūrdhvastiṣṭhā na ūtaye'smin vāje śatakrato । samanyeṣu bravāvahe ॥3॥*

## ६७५. शुनूहोत्रः (Śunūhotraḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ६.३३.१-५; ६.३४.१-५

ऋ. (Rv.) ६.३३.१-५

य ओजिष्ठ इन्द्र तं सु नो दा मदो वृषन्त्स्वभिष्टिर्दास्वान् ।
सौवश्व्यं यो वनवत्स्वश्वो वृत्रा समत्सु सासहदमित्रान् ॥१॥
त्वां हीइन्द्रावसे विवाचो हवन्ते चर्षणयः शूरसातौ ।
त्वं विप्रेभिर्वि पणीँरशायस्त्वोत इत्सनिता वाजमर्वा। ॥२॥
त्वं ताँ इन्द्रोभयाँ अमित्रान्दासा वृत्राण्यार्या च शूर ।
वधीर्वनेव सुधितेभिरत्कैरा पृत्सु दर्षि नृणां नृतम ॥३॥
स त्वं न इन्द्राकवाभिरूती सखा विश्वायुरविता वृधे भूः ।
स्वर्षाता यद्धयामसि त्वा युध्यन्तो नेमधिता पृत्सु शूर ॥४॥
नूनं न इन्द्रापराय च स्या भवा मृळीक उत नो अभिष्टौ ।
इत्था गृणन्तो महिनस्य शर्मन्दिवि ष्याम पार्ये गोषतमाः ॥५॥
*ya ojiṣṭha indra taṁ su no dā mado vṛṣantsvabhiṣṭirdāsvān ।*
*sauvaśvyaṁ yo vanavatsvaśvo vṛtrā samatsu sāsahadamitrān ॥1॥*
*tvāṁ hī3ndrāvase vivācho havante charṣaṇayaḥ śūrasātau ।*
*tvaṁ viprebhirvi paṇīṁraśāyastvota itsanitā vājamarvā । ॥2॥*
*tvaṁ tām̐ indrobhayām̐ amitrāndāsā vṛtrāṇyāryā cha śūra ।*
*vadhīrvaneva sudhitebhiratkairā pṛtsu darṣi nṛṇāṁ nṛtama ॥3॥*
*sa tvaṁ na indrākavābhirūtī sakhā viśvāyuravitā vṛdhe bhūḥ ।*
*svarṣātā yaddhvayāmasi tvā yudhyanto nemadhitā pṛtsu śūra ॥4॥*
*nūnaṁ na indrāparāya cha syā bhavā mṛḻīka uta no abhiṣṭau ।*
*itthā gṛṇanto mahinasya śarmandivi ṣyāma pārye goṣatamāḥ ॥5॥*

ऋ. (Rv.) ६.३४.१-५

सं च त्वे जग्मुर्गिर इन्द्र पूर्वीर्वि च त्वद्यन्ति विभ्वो मनीषाः ।
पुरा नूनं च स्तुतय ऋषीणां पस्पृध्र इन्द्रे अध्युक्थार्का ॥१॥

पुरुहूतो यः पुरुगूर्त ऋभ्वाँ एकः पुरुप्रशस्तो अस्ति यज्ञैः ।
रथो न महे शवसे युजानो३ स्माभिरिन्द्रो अनुमाद्यो भूत् ॥२॥
न यं हिंसन्ति धीतयो न वाणीरिन्द्रं नक्षन्तीदभि वर्धयन्तीः ।
यदि स्तोतारः शतं यत्सहस्रं गृणन्ति गिर्वणसं शं तदस्मै ॥३॥
अस्मा एतद्दिव्य१ र्चेव मासा मिमिक्ष इन्द्रे न्ययामि सोमः ।
जनं न धन्वन्नभि सं यदापः सत्रा वावृधुर्हवनानि यज्ञैः ॥४॥
अस्मा एतन्मह्याङ्गूषमस्मा इन्द्राय स्तोत्रं मतिभिरवाचि ।
असद्यथा महति वृत्रतूर्य इन्द्रो विश्वायुरविता वृधश्च ॥५॥
*saṁ cha tve jagmurgira indra pūrvīrvi cha tvadyanti vibhvo manīṣāḥ /*
*purā nūnaṁ cha stutaya ṛṣīṇāṁ paspṛdhra indre adhyukthārkā //1 //*
*puruhūto yaḥ purugūrta ṛbhvām̐ ekaḥ purupraśasto asti yajñaiḥ /*
*ratho na mahe śavase yujāno3 smābhirindro anumādyo bhūt //2 //*
*na yaṁ hiṁsanti dhītayo na vāṇīrindraṁ nakṣantīdabhi vardhayantīḥ /*
*yadi stotāraḥ śataṁ yatsahasraṁ gṛṇanti girvaṇasaṁ śaṁ tadasmai //3 //*
*asmā etaddivya1 rcheva māsā mimikṣa indre nyayāmi somaḥ /*
*janaṁ na dhanvannabhi saṁ yadāpaḥ satrā vāvṛdhurhavanāni yajñaiḥ //4 //*
*asmā etanmahyāṅgūṣamasmā indrāya stotraṁ matibhiravāchi /*
*asadyathā mahati vṛtratūrya indro viśvāyuravitā vṛdhaścha //5 //*

## ६७६. शौनकः (Śaunakaḥ)

१. अग्निः (Agniḥ) - अ. (Av.) ६.१०८.४

यामृषयो भूतकृतो मेधां मेधाविनो विदुः। तया ममद्य मेधयाग्ने मेधविनं कृणु ॥४॥
*yāmṛṣayo bhūtakṛto medhāṁ medhāvino viduḥ / tayā mamadya medhayāgne medhavinaṁ kṛṇu //4 //*

२. इन्द्रः (Indraḥ) - अ. (Av.) ७.१२.३

एषामहं समासीनानां वर्चो विज्ञानमा ददे। अस्याः सर्वस्याः संसदो मामिन्द्र भगिनं कृणु ॥३॥
*eṣāmahaṁ samāsīnānāṁ varcho vijñānamā dade / asyāḥ sarvasyāḥ saṁsado māmindra bhaginaṁ kṛṇu //3 //*

३. मनः (Manaḥ) - अ. (AV.) ७.१२.४

यद् वो मनः परागतं यद् बद्धमिह वेह वा। तद् व आ वर्तयामसि मयि वो रमतां मनः ॥४॥
*yad vo manaḥ parāgataṁ yad baddhamiha veha vā / tad va ā vartayāmasi mayi vo ramatāṁ manaḥ //4 //*

४. मन्त्रोक्ता (Mantroktā) - अ. (Av.) ६.१६.१-४

आबयो अनाबयो रसस्त उग्र आबयो। आ ते करम्भमद्मसि ॥१॥
विहल्हो नाम ते पिता मदावती नाम ते माता ।
स हि न त्वमसि यस्त्वमात्मानमावयः ॥२॥
तौविलिकेऽवेलयावायमैलब ऐलयीत्। बभ्रुश्च बभ्रुकर्णश्चापेहि निराल ॥३॥
अलसालासि पूर्वा सिलांजालास्युत्तरा। नीलागलसाला ॥४॥
*ābayo anābayo rasasta ugra ābayo / ā te karambhamadmasi //1 //*
*vihalho nāma te pitā madāvatī nāma te mātā /*
*sa hi na tvamasi yastvamātmānamāvayaḥ //2 //*
*tauvilike'velayāvāyamailaba ailayīt / babhruścha babhrukarṇaśchāpehi nirāla //3 //*
*alasālāsi pūrvā silāṁjālāsyuttarā / nīlāgalasālā //4 //*

५. मेघः (Meghaḥ) - अ. (Av.) ६.१०८.१-३; ५

अ. (Av.) ६.१०८.१-३

त्वं नो मेधे प्रथमा गोभिरश्वेभिरा गहि । त्वं सूर्यस्य रश्मिभिस्त्वं नो असि यज्ञिया ॥१॥
मेधामहं प्रथमां ब्रह्मण्वतीं ब्रह्मजूतामृषिष्टुताम्। प्रपीतां ब्रह्मचारिभिर्देवानामवसे हुवे ॥२॥
यां मेधामृभवो विदुर्यां मेधामसुरा विदुः। ऋषयो भद्रां मेधां यां विदुस्तां मय्या वेशयामसि ॥३॥
*tvaṁ no medhe prathamā gobhiraśvebhirā gahi /*

*tvaṁ sūryasya raśmibhistvaṁ no asi yajñiyā //1 //*
*medhāmahaṁ prathamāṁ brahmaṇvatīṁ brahmajūtāmṛṣiṣṭutām /*
*prapītāṁ brahmachāribhirdevānāmavase huve //2 //*
*yāṁ medhāmṛbhavo viduryāṁ medhāmasurā viduḥ /*
*ṛṣayo bhadrāṁ medhāṁ yāṁ vidustāṁ mayyā veśayāmasi //3 //*

अ. (Av.) ६.१०८.५

मेधां सायं मेधां प्रातर्मेधां मध्यन्दिनं परि। मेधां सूर्यस्य रश्मिभिर्वचसा वेशयामहे ॥५॥
*medhāṁ sāyaṁ medhāṁ prātarmedhāṁ madhyandinaṁ pari /*
*medhāṁ sūryasya raśmibhirvachasā veśayāmahe //5 //*

६. सभा (Sabhā) - अ. (Av.) ७.१२.२

विद्म ते सभे नाम नरिष्टा नाम वा असि। ये ते के च सभासदस्ते मे सन्तु सवाचसः ॥२॥
*vidma te sabhe nāma nariṣṭā nāma vā asi /*
*ye te ke cha sabhāsadaste me santu savāchasaḥ //2 //*

७. सभा समितिः पितरश्च (Sabhā Samitiḥ Pitaraścha) - अ. (Av.) ७.१२.१

सभा च मा समितिश्चावतां प्रजापतेर्दुहितरौ संविदाने ।
येना संगच्छा उप मा स शिक्षाच्चारु वदानि पितरः संगतेषु ॥१॥
*sabhā cha mā samitiśchāvatāṁ prajāpaterduhitarau saṁvidāne /*
*yenā saṁgachchhā upa mā sa śikṣāchchāru vadāni pitaraḥ saṁgateṣu //1 //*

८. सरस्वती (Sarasvatī) - अ. (Av.) ७.१०.१; ७.११.१

अ. (Av.) ७.१०.१

यस्ते स्तनः शशयुर्यो मयोभूर्यः सुम्नयुः सुहवो यः सुदत्रः ।
येन विश्वा पुष्यसि वीर्याणि सरस्वति तमिह धातवे कः ॥१॥
*yaste stanaḥ śaśayuryo mayobhūryaḥ sumnayuḥ suhavo yaḥ sudatraḥ /*
*yena viśvā puṣyasi vīryāṇi sarasvati tamiha dhātave kaḥ //1 //*

अ. (Av.) ७.११.१

यस्ते पृथु स्तनयित्नुर्य ऋष्वो दैवः केतुर्विश्वमाभूषतीदम् ।
मा नो वधीर्विद्युता देव सस्यं मोत वधी रश्मिभिः सूर्यस्य ॥१॥
*yaste pṛthu stanayitnurya ṛṣvo daivaḥ keturviśvamābhūṣatīdam /*
*mā no vadhīrvidyutā deva sasyaṁ mota vadhī raśmibhiḥ sūryasya //1 //*

## ६७७. शौनकः (सम्पत्कामः) (Śaunakaḥ (Sampatkāmaḥ))

१. अग्निः (Agniḥ) - अ. (Av.) २.६.१-५; ७.८२.१-६

अ. (Av.) २.६.१-५

समास्त्वाग्न ऋतवो वर्धयन्तु संवत्सरा ऋषयो यानि सत्या ।
सं दिव्येन दीदिहि रोचनेन विश्वा आ भाहि प्रदिशश्चतस्रः ॥१॥
सं चेध्यस्वाग्ने प्र च वर्धयेममुच्च तिष्ठ महते सौभगाय ।
मा ते रिषन्नुपसत्तारो अग्ने ब्रह्माणस्ते यशसः सन्तु मान्ये ॥२॥
त्वामग्ने वृणते ब्राह्मणा इमे शिवो अग्ने संवरणे भवा नः ।
सपत्नहाग्ने अभिमातिजिद् भव स्वे गये जागृह्यप्रयुच्छन् ॥३॥
क्षत्रेणाग्ने स्वेन सं रभस्व मित्रेणाग्ने मित्रधा यतस्व ।
सजातानां मध्यमेष्ठा राज्ञामग्ने विहव्यो दीदिहीह ॥४॥
अति निहो अति स्रिधोऽत्यचित्तीरति द्विषः ।
विश्वा अग्ने दुरिता तर त्वमथास्मभ्यं सहवीरं रयिं दाः ॥५॥
*samāstvāgna ṛtavo vardhayantu saṁvatsarā ṛṣayo yāni satyā /*
*saṁ divyena dīdihi rochanena viśvā ā bhāhi pradiśaśchatasraḥ //1 //*
*saṁ chedhyasvāgne pra cha vardhayemamuchcha tiṣṭha mahate saubhagāya /*
*mā te riṣannupasattāro agne brahmāṇaste yaśasaḥ santu mānye //2 //*
*tvāmagne vṛṇate brāhmaṇā ime śivo agne saṁvaraṇe bhavā naḥ /*

*sapatnahāgne abhimātijid bhava sve gaye jāgṛhyaprayuchchhan ॥3॥*
*kṣatreṇāgne svena saṁ rabhasva mitreṇāgne mitradhā yatasva ।*
*sajātānāṁ madhyameṣṭhā rājñāmagne vihavyo dīdihīha ॥4॥*
*ati niho ati sridho'tyachittīrati dviṣaḥ ।*
*viśvā agne duritā tara tvamathāsmabhyaṁ sahavīraṁ rayiṁ dāḥ ॥5॥*

अ. (Av.) ७.८२.१-६

अभ्यर्चत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त ।
इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत् पवन्ताम् ॥१॥
मय्यग्रे अग्निं गृह्णामि सह क्षत्रेण वर्चसा बलेन ।
मयि प्रजां मय्यायुर्दधामि स्वाहा मय्यग्निम् ॥२॥
इहैवाग्ने अधि धारया रयिं मा त्वा नि क्रन् पूर्वचित्ता निकारिणः ।
क्षत्रेणाग्ने सुयममस्तु तुभ्यमुपसत्ता वर्धतां ते अनिष्टृतः ॥३॥
अन्वग्निरुषासमग्रमख्यदन्वहानि प्रथमो जातवेदाः ।
अनु सूर्य उषसो अनु रश्मीननु द्यावापृथिवी आ विवेश ॥४॥
प्रत्यग्निरुषसामग्रमख्यत् प्रत्यहानि प्रथमो जातवेदाः ।
प्रति सूर्यस्य पुरुधा च रश्मीन् प्रति द्यावापृथिवी आ ततान ॥५॥
घृतं ते अग्ने दिव्ये सधस्थे घृतेन त्वां मनुरद्या समिन्धे ।
घृतं ते देवीर्नप्त्य१ आ वहन्तु घृतं तुभ्यं दुह्रतां गावो अग्ने ॥६॥
*abhyarchata suṣṭutiṁ gavyamājimasmāsu bhadrā draviṇāni dhatta ।*
*imaṁ yajñaṁ nayata devatā no ghṛtasya dhārā madhumat pavantām ॥1॥*
*mayyagre agiṁna gṛhṇāmi saha kṣatreṇa varchasā balena ।*
*mayi prajāṁ mayyāyurdadhāmi svāhā mayyagnim ॥2॥*
*ihaivāgne adhi dhārayā rayiṁ mā tvā ni kran pūrvachittā nikāriṇaḥ ।*
*kṣatreṇāgne suyamamastu tubhyamupasattā vardhatāṁ te aniṣṭṛtaḥ ॥3॥*
*anvagniruṣāsamagramakhyadanvahāni prathamo jātavedāḥ ।*
*anu sūrya uṣaso anu raśmīnanu dyāvāpṛthivī ā viveśa ॥4॥*
*pratyagniruṣasāmagramakhyat pratyahāni prathamo jātavedāḥ ।*
*prati sūryasya purudhā cha raśmīn prati dyāvāpṛthivī ā tatāna ॥5॥*
*ghṛtaṁ te agne divye sadhasthe ghṛtena tvāṁ manuradyā samindhe ।*
*ghṛtaṁ te devīrnaptya1 ā vahantu ghṛtaṁ tubhyaṁ duhratāṁ gāvo agne ॥6॥*

## ६७८. शङ्खः (Śaṅkhaḥ)

१. अग्निः (Agniḥ) - य. (Yv.) १९.६४; ६६

य. (Yv.) १९.६४

यमग्ने कव्यवाहन त्वं चिन्मन्यसे रयिम्। तन्नो गीर्भिः श्रवाय्यं देवत्रा पनया युजम् ॥६४॥
*yamagne kavyavāhana tvaṁ chinmanyase rayim । tanno gīrbhiḥ śravāyyaṁ devatrā panayā yujam ॥64॥*

य. (Yv.) १९.६६

त्वमग्नऽईडितः कव्यवाहनावाड्ढव्यानि सुरभीणि कृत्वी ।
प्रादाः पितृभ्यः स्वधया तेऽअक्षन्नद्धि त्वं देव प्रयता हवींषि ॥६६॥
*tvamagna'īḍitaḥ kavyavāhunāvāḍḍhavyāni surabhīṇi kṛtvī ।*
*prādāḥ pitṛbhyaḥ svadhayā te'akṣannaddhi tvaṁ deva prayatā havīṁṣi ॥66॥*

२. अंगिरसः (Aṁgirasaḥ) - य. (Yv.) १९.७३

अद्भ्यः क्षीरं व्यपिबत् ऋङ्ङांगिरसो धिया ।
ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥७३॥
adbhyaḥ kṣīraṁ vyapibat ṛuṅṅāṁgiraso dhiyā ।
*ṛtena satyamindriyaṁ vipānaṁ śukramandhasa indrasyendriyamidaṁ payo'mṛtaṁ madhu ॥73॥*

३. अश्विनौ (Aśvinau) - य. (Yv.) १९.८२

तदश्विना भिषजा रुद्रवर्तनी सरस्वती वयति पेशोऽअन्तरम् ।
अस्थि मज्जानं मासरैः कारोतरेण दधतो गवां त्वचि ॥८२॥
*tadaśvinā bhiṣajā rudravartanī sarasvatī vayati peśo'antaram /*
*asthi majjānaṁ māsaraiḥ kārotareṇa dadhato gavāṁ tvachi //82 //*

४. आत्मा (Ātmā) - य. (Yv.) १९.९२

आत्मन्नुपस्थे न वृकस्य लोम मुखे श्मश्रूणि न व्याघ्रलोम ।
केशा न शीर्षन्यशसे श्रियै शिखा सिंहस्य लोम त्विषिरिन्द्रियाणि ॥९२॥
*ātmannupasthe na vṛkasya loma mukhe śmaśrūṇi na vyāghraloma /*
*keśā na śīrṣanyaśase śriyai śikhā siṁhasya loma tviṣirindriyāṇi //92 //*

५. इन्द्रः (Indraḥ) - य. (Yv.) १९.७१; ७६; ९१

य. (Yv.) १९.७१

अपां फेनेन नमुचेः शिरऽइन्द्रोदवर्तयः। विश्वा यदजय स्पृधः ॥७१॥
*apāṁ phenena namucheḥ śira'indrodavartayaḥ / viśvā yadajaya spṛdhaḥ //71 //*

य. (Yv.) १९.७६

रेतो मूत्रं वि जहाति योनिं प्रविशदिन्द्रियम्। गर्भो जरायुणावृतऽउल्वं जहाति जन्मना ।
ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥७६॥
*reto mūtraṁ vi jahāti yoniṁ praviśadindriyam /*
*garbho jarāyuṇāvṛta'ulvaṁ jahāti janmanā /*
*ṛtena satyamindriyaṁ vipānaṁ śukramandhasa'indrasyendriyamidaṁ payo'mṛtaṁ madhu //76 //*

य. (Yv.) १९.९१

इन्द्रस्य रूपमृषभो बलाय कर्णभ्यां श्रेत्रममृतं ग्रहाभ्याम् ।
यवा न बर्हिर्भ्रुवि केसराणि कर्कन्धु यज्ञे मधु सारघं मुखात् ॥९१॥
*indrasya rūpamṛṣabho balāya karṇabhyāṁ śretramamṛtaṁ grahābhyām /*
*yavā na barhirbhruvi kesarāṇi karkandhu yajñe madhu sāraghaṁ mukhāt //91 //*

६. पितरः (Pitaraḥ) - य. (Yv.) १९.४९-५३; ५५-५६; ६७-७०

य. (Yv.) १९.४९-५३

उदीरतामवरऽउत्परासऽउन्मध्यमाः पितरः सोम्यासः ।
असुं यऽईयुरवृकाऽऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥४९॥
अंगिरसो नः पितरो नवग्वाऽअथर्वाणो भृगवः सोम्यासः ।
तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥५०॥
ये नः पूर्वे पितरः सोम्यासोऽनूहिरे सोमपीथं वसिष्ठाः ।
तेभिर्यमः संरराणो हवींष्युशन्नुशद्भिः प्रतिकाममत्तु ॥५१॥
त्वं सोम प्रचिकितो मनीषा त्वं रजिष्ठमनु नेषि पन्थाम् ।
तव प्रणीती पितरो नऽइन्दो देवेषु रत्नमभजन्त धीराः ॥५२॥
त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः ।
वन्वन्नवातः परिधीँ२ऽरपोर्णु वीरेभिरश्वैर्मघवा भवा नः ॥५३॥
*udīratāmavara'utparāsa'unmadhyamāḥ pitaraḥ somyāsaḥ /*
*asuṁ ya'īyuravṛkā'ṛtajñāste no'vantu pitaro haveṣu //49 //*
*aṁgiraso naḥ pitaro navagvā'atharvāṇo bhṛgavaḥ somyāsaḥ /*
*teṣāṁ vayaṁ sumatau yajñiyānāmapi bhadre saumanase syāma //50 //*
*ye naḥ pūrve pitaraḥ somyāso'nūhire somapīthaṁ vasiṣṭhāḥ /*
*tebhiryamaḥ saṁrarāṇo havīṁṣyuśannuśadbhiḥ pratikāmamattu //51 //*
*tvaṁ soma prachikito manīṣā tvaṁ rajiṣṭhamanu neṣi panthām /*
*tava praṇītī pitaro na'indo deveṣu ratnamabhajanta dhīrāḥ //52 //*
*tvayā hi naḥ pitaraḥ soma pūrve karmāṇi chakruḥ pavamāna dhīrāḥ /*
*vanvannavātaḥ paridhīm̐2'raporṇu vīrebhiraśvairmaghavā bhavā naḥ //53 //*

य. (Yv.) १९.५५-५६

बर्हिषदः पितरऽऊत्य र्वागिमा वो हव्या चकृमा जुषध्वम् ।
तऽआ गतावसा शंत मेनाथा नः शं योररपो दधात ॥५५॥
आहम्पितॠन्सुविदत्राँऽअवित्सि नपातञ्च विक्रमणञ्च विष्णोः ।
बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्तऽइहागमिष्ठाः ॥५६॥

*barhiṣadaḥ pitara'ūtya rvāgimā vo havyā chakṛmā juṣadhvam /*
*ta'ā gatāvasā śaṁta menāthā naḥ śaṁ yorarapo dadhāta //55 //*
*āhampitaṟṟnsuvidatrām̐'avitsi napātañcha vikramaṇañcha viṣṇoḥ /*
*barhiṣado ye svadhayā sutasya bhajanta pitvasta'ihāgamiṣṭhāḥ //56 //*

य. (Yv.) १९.६७-७०

ये चेह पितरो ये च नेह याँश्च विद्म याँ२ऽउ च न प्रविद्म ।
त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञं सुकृतं जुषस्व ॥६७॥
इदं पितृभ्यो नमोऽअस्त्वद्य ये पूर्वासो यऽउपरासऽईयुः ।
ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु विक्षु ॥६८॥
अधा पथा नः पितरः परासः प्रत्नासोऽअग्नऽऋतमाशुषाणाः ।
शुचीदयन्दीधितिमुक्थशासः क्षामा भिन्दन्तोऽअरुणीरप व्रन् ॥६९॥
उशन्तस्त्वा नि धीमह्युशन्तः समिधीमहि । उशन्नुशतऽआ वह पितॄन्हविषेऽअत्तवे ॥७०॥

*ye cheha pitaro ye cha neha yām̐ścha vidma yām̐2'u cha na pravidma /*
*tvaṁ vettha yati te jātavedaḥ svadhābhiryajñaṁ sukṛtaṁ juṣasva //67 //*
*idaṁ pitṛbhyo namo'astvadya ye pūrvāso ya'uparāsa'īyuḥ /*
*ye pārthive rajasyā niṣattā ye vā nūnaṁ suvṛjanāsu vikṣu //68 //*
*adhā pathā naḥ pitaraḥ parāsaḥ pratnāso'agna'ṛtamāśuṣāṇāḥ /*
*śuchīdayandīdhitimukthaśāsaḥ kṣāmā bhindanto'aruṇīrapa vran //69 //*
*uśantastvā ni dhīmahyuśantaḥ samidhīmahi / uśannuśata'ā vaha pitṝnhaviṣe'attave //70 //*

७. प्रजापतिः (Prajāpatiḥ) - य. (Yv.) १९.७५; ७७-७९

य. (Yv.) १९.७५

अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत् क्षत्रं पयः सोमं प्रजापतिः ।
ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥७५॥

*annāātparisruto rasaṁ brahmaṇā vyapibat kṣatraṁ payaḥ somaṁ prajāpatiḥ /*
*ṛtena satyamindriyaṁ vipānaṁ śukramandhasa'indrasyendriyamidaṁ payo'mṛtaṁ madhu //75 //*

य. (Yv.) १९.७७-७९

दृष्ट्वा रूपे व्याकरोत्सत्यानृते प्रजापतिः । अश्रद्धामनृतेऽदाधाच्छ्रद्धां सत्ये प्रजापतिः ।
ऋतेन सत्यामिन्द्रियं विपानं शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥७७॥
वेदेन रूपे व्यपिबत्सुतासुतौ प्रजापतिः ।
ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥७८॥
दृष्ट्वा परिस्रुतो रसं शुक्रेण शुक्रं व्यपिबत् पयः सोमं प्रजापतिः ।
ऋतेन सत्यमिन्द्रियं विपानं शक्रमन्धसऽइन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥७९॥

*dṛṣṭvā rūpe vyākarotsatyānṛte prajāpatiḥ /*
*aśraddhāmanṛte'dādhāchchhraddhāṁ satye prajāpatiḥ /*
*ṛtena satyāmindriyaṁ vipānaṁ śukramandhasa'indrasyendriyamidaṁ payo'mṛtaṁ madhu //77 //*
*vedena rūpe vyapibatsutāsutau prajāpatiḥ /*
*ṛtena satyamindriyaṁ vipānaṁ śukramandhasa'indrasyendriyamidaṁ payo'mṛtaṁ madhu //78 //*
*dṛṣṭvā parisruto rasaṁ śukreṇa śukraṁ vyapibat payaḥ somaṁ prajāpatiḥ /*
*ṛtena satyamindriyaṁ vipānaṁ śakramandhasa'indrasyendriyamidaṁ payo'mṛtaṁ madhu //79 //*

८. वरुणः (Varuṇaḥ) - य. (Yv.) १९.८१

तदस्य रूपममृतं शचीभिस्तिस्रो दधुर्देवताः संरराणाः ।
लोमानि शष्पैर्बहुधा न तोक्मभिस्त्वगस्य मांसमभवन्न लाजाः ॥८१॥
*tadasya rūpamamṛtaṁ śachībhistisro dadhurdevatāḥ saṁrarāṇāḥ /*
*lomāni śaṣpairbahudhā na tokmabhistvagasya māṁsamabhavanna lājāḥ //81//*

९. सरस्वती (Sarasvatī) - य. (Yv.) १९.८३; ८८; ९०; ९४

य. (Yv.) १९.८३

सरस्वती मनसा पेशलं वसु नासत्याभ्यां वयति दर्शतं वपुः ।
रसं परिस्रुता न रोहितं नग्नहुर्धीरस्तसरं न वेम ॥८३॥
*sarasvatī manasā peśalaṁ vasu nāsatyābhyāṁ vayati darśataṁ vapuḥ /*
*rasaṁ parisrutā na rohitaṁ nagnahurdhīrastasaraṁ na vema //83//*

य. (Yv.) १९.८८

मुखं सदस्य शिरऽइत् सतेन जिह्वा पवि त्रमश्विनासन्त्सरस्वती ।
चप्यं न पायुर्भिषगस्य बालो वस्तिर्न शेपो हरसा तरस्वी ॥८८॥
*mukhaṁ sadasya śira'it satena jihvā pavi tramaśvināsantsarasvatī /*
*chapyaṁ na pāyurbhiṣagasya bālo vastirna śepo harasā tarasvī //88//*

य. (Yv.) १९.९०

अविर्न मेषो नसि वीर्याय प्राणस्य पन्थाऽअमृतो ग्रहाभ्याम् ।
सरस्वत्युपवाकैर्व्यानं नस्यानि बर्हिर्बदरैर्जजान ॥९०॥
*avirna meṣo nasi vīryāya prāṇasya panthā'amṛto grahābhyām /*
*sarasvatyupavākairvyānaṁ nasyāni barhirbadarairjajāna //90//*

य. (Yv.) १९.९४

सरस्वती योन्यां गर्भमन्तरश्विभ्यां पत्नी सुकृतं बिभर्त्ति ।
अपां रसेन वरुणो न साम्नेन्द्रं श्रियै जनयन्नप्सु राजा ॥९४॥
*sarasvatī yonyāṁ garbhamantaraśvibhyāṁ patnī sukṛtaṁ bibhartti /*
*apāṁ rasena varuṇo na sāmnendraṁ śriyai janayannapsu rājā //94//*

१०. सविता (Savitā) - य. (Yv.) १९.८०; ८५-८६

य. (Yv.) १९.८०

सीसेन तन्त्रं मनसा मनीषिणऽऊर्णा सूत्रेण कवयो वयन्ति ।
अश्विना यज्ञं सविता सरस्वतीन्द्रस्य रूपं वरुणो भिषज्यन् ॥८०॥
*sīsena tantraṁ manasā manīṣiṇa'ūrṇā sūtreṇa kavayo vayanti /*
*aśvinā yajñaṁ savitā sarasvatīndrasya rūpaṁ varuṇo bhiṣajyan //80//*

य. (Yv.) १९.८५-८६

इन्द्रः सुत्रामा हृदयेन सत्यं पुरोडाशेन सविता जजान ।
यकृत् क्लोमानं वरुणो भिषज्यन् मतस्ने वायव्यै र्न मिनाति पित्तम् ॥८५॥
आन्त्राणि स्थालीर्मधु पिन्वमाना गुदाः पात्राणि सुदुधा न धेनुः ।
श्येनस्य पत्रन्न प्लीहा शचीभिरासन्दी नाभिरुदरन्न माता ॥८६॥
*indraḥ sutrāmā hṛdayena satyaṁ puroḍāśena savitā jajāna /*
*yakṛt klomānaṁ varuṇo bhiṣajyan matasne vāyavyai rna mināti pittam //85//*
*āntrāṇi sthālīrmadhu pinvamānā gudāḥ pātrāṇi sududhā na dhenuḥ /*
*śyenasya patranna plīhā śachībhirāsandī nābhirudaranna mātā //86//*

११. सोमः (Somaḥ) - य. (Yv.) १९.७२; ७४; ८४

य. (Yv.) १९.७२

सोमो राजामृतं सुतऽऋजीषेणाजहान्मृत्युम् ।
ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥७२॥
*somo rājāmṛtaṁ suta'ṛjīṣeṇājahānmṛtyum /*
*ṛtena satyamindriyaṁ vipānaṁ śukramandhasa'indrasyendriyamidaṁ payo'mṛtaṁ madhu //72//*

य. (Yv.) १९.७४

सोममद्भ्यो व्यपिबच्छन्दसा हंसः शुचिषत् ।
ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥७४॥
*somamadbhyo vyapibachchhandasā haṁsaḥ śuchiṣat ।*
*ṛtena satyamindriyaṁ vipānaṁ śukramandhasa'indrasyendriyamidaṁ payo'mṛtaṁ madhu ॥74॥*

य. (Yv.) १९.८४

पयसा शुक्रममृतं जनित्रं सुरया मूत्रा ज्जनयन्त रेतः ।
अपामतिं दुर्मतिं बाधमानाऽऊवध्यं वातं सब्वं तदारात् ॥८४॥
*payasā śukramamṛtaṁ janitraṁ surayā mūtrā jjanayanta retaḥ ।*
*apāmatiṁ durmatiṁ bādhamānā'ūvadhyaṁ vātaṁ sabvaṁ tadārāt ॥84॥*

## ६७९. शंखो यामायनः (Śaṁkho Yāmāyanaḥ)

१. पितरः (Pitaraḥ) - ऋ. (Rv.) १०.१५.१-१४

उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः ।
असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥१॥
इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः ।
ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु विक्षु ॥२॥
आहं पितृन्त्सुविदत्राँ अवित्सि नपातं च विक्रमणं च विष्णोः ।
बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठाः ॥३॥
बर्हिषदः पितर ऊत्य१ र्वागिमा वो हव्या चकृमा जुषध्वम् ।
त आ गतावसा शंतमेनाथा नः शं योररपो दधात ॥४॥
उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ।
त आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥५॥
आच्या जानु दक्षिणतो निषद्येमं यज्ञमभि गृणीत विश्वे ।
मा हिंसिष्ट पितरः केन चिन्नो यद्व आगः पुरुषता कराम ॥६॥
आसीनासो अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय ।
पुत्रेभ्यः पितरस्तस्य वस्वः प्र यच्छत त इहोर्जं दधात ॥७॥
ये नः पूर्वे पितरः सोम्यासोऽनूहिरे सोमपीथं वसिष्ठाः ।
तेभिर्यमः सरराणो हवींष्युशन्नुशद्भिः प्रतिकाममत्तु ॥८॥
ये तातृषुर्देवत्रा जेहमाना होत्राविदः स्तोमतष्टासो अर्कैः ।
आग्ने याहि सुविदत्रेभिरर्वाङ् सत्यैः कव्यैः पितृभिर्घर्मसद्भिः ॥९॥
ये सत्यासो हविरदो हविष्पा इन्द्रेण देवैः सरथं दधानाः ।
आग्ने याहि सहस्रं देववन्दैः परैः पूर्वैः पितृभिर्घर्मसद्भिः ॥१०॥
अग्निष्वात्ताः पितर एह गच्छत सदःसदः सदत सुप्रणीतयः ।
अत्ता हवींषि प्रयतानि बर्हिष्यथा रयिं सर्ववीरं दधातन ॥११॥
त्वमग्न ईळितो जातवेदोऽवाड्ढव्यानि सुरभीणि कृत्वी ।
प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवींषि ॥१२॥
ये चेह पितरो ये च नेह याँश्च विद्म याँ उ च न प्रविद्म ।
त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञं सुकृतं जुषस्व ॥१३॥
ये अग्निदग्धा ये अनग्निदग्धा मध्ये दिवः स्वधया मादयन्ते ।
तेभिः स्वराळसुनीतिमेतां यथावशं तन्वं कल्पयस्व ॥१४॥
*udīratāmavara utparāsa unmadhyamāḥ pitaraḥ somyāsaḥ ।*
*asuṁ ya īyuravṛkā ṛtajñāste no'vantu pitaro haveṣu ॥1॥*
*idaṁ pitṛbhyo namo astvadya ye pūrvāso ya uparāsa īyuḥ ।*
*ye pārthive rajasyā niṣattā ye vā nūnaṁ suvṛjanāsu vikṣu ॥2॥*
*āhaṁ pitṛntsuvidatrām̐ avitsi napātaṁ cha vikramaṇaṁ cha viṣṇoḥ ।*
*barhiṣado ye svadhayā sutasya bhajanta pitvasta ihāgamiṣṭhāḥ ॥3॥*
*barhiṣadaḥ pitara ūtya1 rvāgimā vo havyā chakṛmā juṣadhvam ।*

*ta ā gatāvasā śaṁtamenāthā naḥ śaṁ yorarapo dadhāta //4 //*
*upahūtāḥ pitaraḥ somyāso barhiṣyeṣu nidhiṣu priyeṣu /*
*ta ā gamantu ta iha śruvantvadhi bruvantu te'vantvasmān //5 //*
*āchyā jānu dakṣiṇato niṣadyemaṁ yajñamabhi gṛṇīta viśve /*
*mā hiṁsiṣṭa pitaraḥ kena chinno yadva āgaḥ puruṣatā karāma //6 //*
*āsīnāso aruṇīnāmupasthe rayiṁ dhatta dāśuṣe martyāya /*
*putrebhyaḥ pitarastasya vasvaḥ pra yachchhata ta ihorjaṁ dadhāta //7 //*
*ye naḥ pūrve pitaraḥ somyāso'nūhire somapīthaṁ vasiṣṭhāḥ /*
*tebhiryamaḥ sararāṇo havīṣyuśannuśadbhiḥ pratikāmamattu //8 //*
*ye tātṛṣurdevatrā jehamānā hotrāvidaḥ stomataṣṭāso arkaiḥ /*
*āgne yāhi suvidatrebhirarvāṅ satyaiḥ kavyaiḥ pitṛbhirgharmasadbhiḥ //9 //*
*ye satyāso havirado haviṣpā indreṇa devaiḥ sarathaṁ dadhānāḥ /*
*āgne yāhi sahasraṁ devavandaiḥ paraiḥ pūrvaiḥ pitṛbhirgharmasadbhiḥ //10 //*
*agniṣvāttāḥ pitara eha gachchhata sadaḥsadaḥ sadata supraṇītayaḥ /*
*attā havīṁṣi prayatāni barhiṣyathā rayiṁ sarvavīraṁ dadhātana //11 //*
*tvamagna īḷito jātavedo'vāḍḍhavyāni surabhīṇi kṛtvī /*
*prādāḥ pitṛbhyaḥ svadhayā te akṣannaddhi tvaṁ deva prayatā havīṁṣi //12 //*
*ye cheha pitaro ye cha neha yāṁścha vidma yāṁ̐ u cha na pravidma /*
*tvaṁ vettha yati te jātavedaḥ svadhābhiryajñaṁ sukṛtaṁ juṣasva //13 //*
*ye agnidagdhā ye anagnidagdhā madhye divaḥ svadhayā mādayante /*
*tebhiḥ svarāḷasunītimetāṁ yathāvaśaṁ tanvaṁ kalpayasva //14 //*

## ६८०. शम्युः (Śamyuḥ)

१. अग्निः (Agniḥ) - य. (Yv.) २७.४५

संवत्सरोऽसि परिवत्सरोऽसीदावत्सरोऽसीद्वत्सरोऽसि वत्सरोऽसि। उषसस्ते कल्पन्तामहोरात्रास्ते कल्पन्तामर्द्धमासास्ते कल्पन्तां मासास्ते कल्पन्तामृतवस्ते कल्पन्तां संवत्सरस्ते कल्पताम्। प्रेत्याऽएत्यै सं चांच प्र च सारय। सुपर्णचिदसि तया देवतयांगिरस्वद् ध्रुवः सीद ॥४५॥

*saṁvatsaro'si parivatsaro'sīdāvatsaro'sīdvatsaro'si vatsaro'si / uṣasaste kalpantāmahorātrāste kalpantāmarddhamāsāste kalpantāṁ māsāste kalpantāmṛtavaste kalpantāṁ saṁvatsaraste kalpatām / pretyā'etyai saṁ chāṁcha pra cha sāraya / suparṇachidasi tayā devatayāṁgirasvad dhruvaḥ sīda //45 //*

२. यज्ञः (Yajñaḥ) - य. (Yv.) २७.४२

यज्ञायज्ञा वोऽअग्नये गिरागिरा च दक्षसे। प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम् ॥४२॥

*yajñāyajñā vo'agnaye girāgirā cha dakṣase / prapra vayamamṛtaṁ jātavedasaṁ priyaṁ mitraṁ na śaṁsiṣam //42 //*

३. वायुः (Vāyuḥ) - य. (Yv.) २७.४४

ऊर्जो नपातं स हिनायमस्मयुर्दाशेम हव्यदातये।
भुवद्वाजेष्वविता भुवद्वृधऽउत त्राता तनूनाम्॥४४॥

*ūrjo napātaṁ sa hināyamasmayurdāśema havyadātaye /*
*bhuvadvājeṣvavitā bhuvadvṛdha'uta trātā tanūnām //44 //*

४. वास्तुपतिर् अग्निः (Vāstupatir Agniḥ) - य. (Yv.) ३.४२

येषामद्ध्येति प्रसवन् येषु सौमनसो बहुः। गृहानुपह्वयामहे ते नो जानन्तु जानतः ॥४२॥

*yeṣāmaddhyeti prasavan yeṣu saumanaso bahuḥ / gṛhānupahvayāmahe te no jānantu jānataḥ //42 //*

## ६८१. शंयुर् बार्हस्पत्यः (Śaṁyur Bārhaspatyaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ६.४८.१-१०; सा. (Sv.) ३५; ३७; ४१; ७०३; ७०४; १६२३-१६२४

ऋ. (Rv.) ६.४८.१-१०

यज्ञायज्ञा वो अग्नेय गिरागिरा च दक्षसे ।
प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम् ॥१॥
ऊर्जो नपातं स हिनयामस्मयुर्दाशेम हव्यदातये ।

भुवद् वाजेष्ववित भुवद्वृध उत त्राता तनूनाम् ॥२॥
वृषा ह्यग्ने अजरो महान्विभस्यर्चिषा ।
अजस्रेणा शोचिषा शोचुचच्छुचे सुदीतिभिः सु दीदिहि ॥३॥
महो देवान्यजसि यक्ष्यानुषक्तव क्रत्वोत दंसना ।
अर्वाचः सीं कृणुह्यग्नेऽवसे रास्व वाजोत वंस्व ॥४॥
यमापो अद्रयो वना गर्भमृतस्य पिप्रति ।
सहसा यो मथितो जायते नृभिः पृथिव्या अधि सानवि ॥५॥
आ यः पप्रौ भानुना रोदसी उभे धूमेन धावते दिवि ।
तिरस्तमो ददृश ऊर्म्यास्वा श्यावास्वरुषो वृषा श्यावा अरुषो वृषा ॥६॥
बृहद्भिरग्ने अर्चिभिः शुक्रेण देव शोचिषा ।
भरद्वाजे समिधानो यविष्ठ्य रेवन्नः शुक्र दीदिहि द्युमत्पावक दीदिहि ॥७॥
विश्वासां गृहपतिर्विशामसि त्वमग्ने मानुषीणाम् ।
शतं पूर्भिर्यविष्ठ पाह्यंहसः सुमेद्धारं शतं हिमाः स्तोतृभ्यो ये च ददाति ॥८॥
त्वं नश्चित्र ऊत्या वसो राधांसि चोदय ।
अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः ॥९॥
पर्षि तोकं तनयं पर्तृभिष्ट्वमदब्धैरप्रयुत्वभिः ।
अग्ने हेळांसि दैव्या युयोधि नोऽदेवानि ह्वरांसि च ॥१०॥

*yajñāyajñā vo agneya girāgirā cha dakṣase /*
*prapra vayamamṛtaṁ jātavedasaṁ priyaṁ mitraṁ na śaṁsiṣam //1 //*
*ūrjo napātaṁ sa hinayāmasmayurdāśema havyadātaye /*
*bhuvad vājeṣvavitā bhuvadvṛdha uta trātā tanūnām //2 //*
*vṛṣā hyagne ajaro mahānvibhasyarchiṣā /*
*ajasreṇā śochiṣā śochuchachchhuche sudītibhiḥ su dīdihi //3 //*
*maho devānyajasi yakṣayānuṣaktava kratvota daṁsanā /*
*arvāchaḥ sīṁ kṛṇuhyagne'vase rāsva vājota vaṁsva //4 //*
*yamāpo adrayo vanā garbhamṛtasya piprati /*
*sahasā yo mathito jāyate nṛbhiḥ pṛthivyā adhi sānavi //5 //*
*ā yaḥ paprau bhānunā rodasī ubhe dhūmena dhāvate divi /*
*tirastamo dadṛśa ūrmyāsvā śyāvāsvaruṣo vṛṣā śyāvā aruṣo vṛṣā //6 //*
*bṛhadbhiragne archibhiḥ śukreṇa deva śochiṣā /*
*bharadvāje samidhāno yaviṣṭhya revannaḥ śukra dīdihi dyumatpāvaka dīdihi //7 //*
*viśvāsāṁ gṛhapatirviśāmasi tvamagne mānuṣīṇām /*
*śataṁ pūrbhiryaviṣṭha pāhyaṁhasaḥ sumeddhāraṁ śataṁ himāḥ stotṛbhyo ye cha dadāti //8 //*
*tvaṁ naśchitra ūtyā vaso rādhāṁsi chodaya /*
*asya rāyastvamagne rathīrasi vidā gādhaṁ tuche tu naḥ //9 //*
*parṣi tokaṁ tanayaṁ partṛbhiṣṭvamadabdhairaprayutvabhiḥ /*
*agne heḷāṁsi daivyā yuyodhi no'devāni hvarāṁsi cha //10 //*

सा. (Sv.) ३५

यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे। प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम् ॥१॥
*yajñāyajñā vo agnaye girāgirā cha dakṣase / prapra vayamamṛtaṁ jātavedasaṁ priyaṁ mitraṁ na śaṁsiṣam //1 //*

सा. (Sv.) ३७

बृहद्भिरग्ने अर्चिभिः शुक्रेण देव शोचिषा। भरद्वाजे समिधानो यविष्ठ्य रेवत्पावक दीदिहि ॥३॥
*bṛhadbhiragne archibhiḥ śukreṇa deva śochiṣā /*
*bharadvāje samidhāno yaviṣṭhya revatpāvaka dīdihi //3 //*

सा. (Sv.) ४१

त्व नश्चित्र ऊत्या वसो राधांसि चोदय। अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः ।७।
*tva naśchitra ūtyā vaso rādhāṁsi chodaya /*
*asya rāyastvamagne rathīrasi vidā gādhaṁ tuche tu naḥ /7 /*

सा. (Sv.) ७०३-७०४

यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे। प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम् ॥१॥
ऊर्जो नपातं स हिनायमस्मयुर्दाशेम हव्यदातये। भुवद्वाजेष्वविता भुवद्वृध उत त्राता तनूनाम् ॥२॥
*yajñāyajñā vo agnaye girāgirā cha dakṣase |*
*prapra vayamamṛtaṁ jātavedasaṁ priyaṁ mitraṁ na śaṁsiṣam ||1 ||*
*ūrjo napātaṁ sa hināyamasmayurdāśema havyadātaye |*
*bhuvadvājeṣvavitā bhuvadvṛdha uta trātā tanūnām ||2 ||*

सा. (Sv.) १६२३-१६२४

त्वं नश्चित्र ऊत्या वसो राधांसि चोदय ।
अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः ॥१॥
पर्षि तोकं तनयं पर्तृभिष्ट्वमदब्धैरप्रयुत्वभिः ।
अग्ने हेडांसि दैव्या युयोधि नोऽदेवानि ह्वरांसि च ॥२॥
*tvaṁ naśchitra ūtyā vaso rādhāṁsi chodaya |*
*asya rāyastvamagne rathīrasi vidā gādhaṁ tuche tu naḥ ||1 ||*
*parṣi tokaṁ tanayaṁ partṛbhiṣṭvamadabdhairaprayutvabhiḥ |*
*agne heḍāṁsi daivyā yuyodhi no'devāni hvarāṁsi cha ||2 ||*

२. इन्द्रः (Indraḥ) - ऋ. (Rv.) ६.४४.१-२४; ६.४५.१-३०; सा. (Sv.) ११५; ३५७; ८०९; ८१०; १६६६-१६६८; अ. (Av.) २०.७८.१-३; २०.८०.१-२; २०.८३.१-२; २०.९८.१-२; य. (Yv.) २७.३७-३८

ऋ. (Rv.) ६.४४.१-२४

यो रयिवो रयिन्तमो यो द्युम्नैर्द्युम्नवत्तमः ।
सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः ॥१॥
यः शुग्मस्तुविशग्म ते रायो दामा मतीनाम् ।
सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः ॥२॥
येन वृद्धो न शवसा तुरो न स्वाभिरूतिभिः ।
सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः ॥३॥
त्यमु वो अप्रहणं गृणीषे शवस्पतिम् ।
इन्द्रं विश्वासाहं नरं मंहिष्ठं विश्वचर्षणिम् ॥४॥
यं वर्धयन्तीद्गिरः पतिं तुरस्य राधसः ।
तमिन्न्वस्य रोदसी देवी शुष्मं सपर्यतः ॥५॥
तद्व उक्थस्य बर्हणेन्द्रायोपस्तृणीषणि ।
विपो न यस्योतयो वि यद्रोहन्ति सक्षितः ॥६॥
अविदद् दक्षं मित्रो नवीयान्पपानो देवेभ्यो वस्यो अचैत् ।
ससवान्स्तौलाभिर्धौतरीभिरुरुष्या पायुरभवत्सखिभ्यः ॥७॥
ऋतस्य पथि वेधा अपायि श्रिये मनांसि देवासो अक्रन् ।
दधानो नाम महो वचोभिर्वपुर्दृशये वेन्यो व्यावः ॥८॥
द्युमत्तमं दक्षं धेह्यस्मे सेधा जनानां पूर्वीररातीः ।
वर्षीयो वयः कृणुहि शचीभिर्धनस्य सातावस्माँ अविड्ढि ॥९॥
इन्द्र तुभ्यमिन्मघवन्नभूम वयं दात्रे हरिवो मा वि वेनः ।
नकिरापिर्ददृशे मर्त्यत्रा किमंग रध्रचोदनं त्वाहुः ॥१०॥
मा जस्वने वृषभ नो ररीथा मा ते रेवतः सख्ये रिषाम ।
पूर्वीष्ट इन्द्र निष्षिधो जनेषु जह्यसुष्वीन्प्र वृहापृणतः ॥११॥
उदभ्राणीव स्तनयन्नियर्तीन्द्रो राधांस्यश्व्यानि गव्या ।
त्वमसि प्रदिवः कारुधाया मा त्वादामान आ दभन्मघोनः ॥१२॥
अध्वर्यो वीर प्र महे सुतानामिन्द्राय भर स ह्यस्य राजा ।
यः पूर्व्याभिरुत नूतनाभिर्गीर्भिर्वावृधे गृणतामृषीणाम् ॥१३॥
अस्य मदे पुरु होषि मधुमन्तमस्मै सोमं वीराय शिप्रिणे पिबध्यै ॥१४॥

पाता सुतमिन्द्रो अस्तु सोमं हन्ता वृत्रं वज्रेण मन्दसानः ।
गन्ता यज्ञं परावतश्चिदच्छा वसुर्धीनामविता कारुधायाः ॥१५॥
इदं त्यत्पात्रमिन्द्रपानमिन्द्रस्य प्रियममृतमपायि ।
मत्सद्यथा सौमनसाय देवं व्य१स्मद् द्वेषां युयवद्व्यंहः ॥१६॥
एना मन्दानो जहि शूर शत्रुंजामिमजामिं मघवन्नमित्रान् ।
अभिषेणाँ अभ्या३ देदिशानान्पराच इन्द्र प्र मृणा जही च ॥१७॥
आसु ष्मा णो मघवन्निन्द्र पृत्स्व१ स्मभ्यं महि वरिवः सुगं कः ।
अपां तोकस्य तनयस्य जेष इन्द्र सूरीन्कृणुहि समा नो अर्धम् ॥१८॥
आ तवा हरयो वृषणो युजाना वृषरथासो वृषरश्मयोऽत्याः ।
अस्मत्रांचो वृषणो वज्रवाहो वृष्णे मदाय सुयुजो वहन्तु ॥१९॥
आ ते वृषन्वृषणो द्रोणमस्थुर्घृतप्रुषो नोर्मयो मदन्तः ।
इन्द्र प्र तुभ्यं वृषभिः सुतानां वृष्णे भरन्ति वृषभाय सोमम् ॥२०॥
वृषासि दिवो वृषभः पृथिव्या वृषा सिन्धूनां वृषभः स्तियानाम् ।
वृष्णे त इन्दुर्वृषभ पीपाय स्वादू रसो मधुपेयो वराय ॥२१॥
अयं देवः सहसा जायमान इन्द्रेण युजा पणिमस्तभायत् ।
अयं स्वस्य पितुरायुधानीन्दुरमुष्णादशिवस्य मायाः ॥२२॥
अयमकृणोदुषसः सुपत्नीरयं सूर्ये अदधाज्ज्योतिरन्तः ।
अयं त्रिधातु दिवि रोचनेषु त्रितेषु विन्ददमृतं निगूळहम् ॥२३॥
अयं द्यावापृथिवी वि ष्कभायदयं रथमयुनक्सप्तरश्मिभ् ।
अयं गोषु शच्या पक्कमन्तः सोमो दाधार दशयन्त्रमुत्सम् ॥२४॥
*yo rayivo rayintamo yo dyumnairdyumnavattamaḥ* ।
*somaḥ sutaḥ sa indra te'sti svadhāpate madaḥ* ॥1॥
*yaḥ śugmastuviśagma te rāyo dāmā matīnām* ।
*somaḥ sutaḥ sa indra te'sti svadhāpate madaḥ* ॥2॥
*yena vṛddho na śavasā turo na svābhirūtibhiḥ* ।
*somaḥ sutaḥ sa indra te'sti svadhāpate madaḥ* ॥3॥
*tyamu vo aprahaṇaṁ gṛṇīṣe śavaspatim* ।
*indraṁ viśvāsāhaṁ naraṁ maṁhiṣṭhaṁ viśvacharṣaṇim* ॥4॥
*yaṁ vardhayantīdbhiraḥ patiṁ turasya rādhasaḥ* ।
*taminnvasya rodasī devī śuṣmaṁ saparyataḥ* ॥5॥
*tadva ukthasya barhaṇendrāyopastṛṇīṣaṇi* ।
*vipo na yasyotayo vi yadrohanti sakṣitaḥ* ॥6॥
*avidad dakṣaṁ mitro navīyānpapāno devebhyo vasyo achait* ।
*sasavāntstaulābhirdhautarībhiruruṣyā pāyurabhavatsakhibhyaḥ* ॥7॥
*ṛtasya pathi vedhā apāyi śriye manāṁsi devāso akran* ।
*dadhāno nāma maho vachobhirvapurdṛśaye venyo vyāvaḥ* ॥8॥
*dyumattamaṁ dakṣaṁ dhehyasme sedhā janānāṁ pūrvīrarātīḥ* ।
*varṣīyo vayaḥ kṛṇuhi śachībhirdhanasya sātāvasmāṁ aviḍḍhi* ॥9॥
*indra tubhyaminmaghavannabhūma vayaṁ dātre harivo mā vi venaḥ* ।
*nakirāpirdadṛśe martyatrā kimaṁga radhrachodanaṁ tvāhuḥ* ॥10॥
*mā jasvane vṛṣabha no rarīthā mā te revataḥ sakhye riṣāma* ।
*pūrvīṣṭa indra niṣṣidho janeṣu jahyasuṣvīnpra vṛhāpṛṇataḥ* ॥11॥
*udabhrāṇīva stanayanniyartīndro rādhāṁsyaśvayāni gavyā* ।
*tvamasi pradivaḥ kārudhāyā mā tvādāmāna ā dabhanmaghonaḥ* ॥12॥
*adhvaryo vīra pra mahe sutānāmindrāya bhara sa hyasya rājā* ।
*yaḥ pūrvyābhiruta nūtanābhirgīrbhirvāvṛdhe gṛṇatāmṛṣīṇām* ॥13॥
*asya made puru hoṣi madhumantamasmai somaṁ vīrāya śipriṇe pibadhyai* ॥14॥
*pātā sutamindro astu somaṁ hantā vṛtraṁ vajreṇa mandasānaḥ* ।
*gantā yajñaṁ parāvataśchidachchhā vasurdhīnāmavitā kārudhāyāḥ* ॥15॥
*idaṁ tyatpātramindrapānamindrasya priyamamṛtamapāyi* ।
*matsadyathā saumanasāya devaṁ vya1smad dveṣāṁ yuyavadvyaṁhaḥ* ॥16॥
*enā mandāno jahi śūra śatruṁjāmimajāmiṁ maghavannamitrān* ।

*abhiṣeṇām̐ abhyā3 dediśānānparācha indra pra mṛṇā jahī cha  ॥17॥*
*āsu ṣmā ṇo maghavannindra pṛtsva1 smabhyaṁ mahi varaviḥ sugaṁ kaḥ  ।*
*apāṁ tokasya tanayasya jeṣa indra sūrīnkṛṇuhi samā no ardham  ॥18॥*
*ā tavā harayo vṛṣaṇo yujānā vṛṣarathāso vṛṣaraśmayo'tyāḥ  ।*
*asmatrāṁcho vṛṣaṇo vajravāho vṛṣṇe madāya suyujo vahantu  ॥19॥*
*ā te vṛṣanvṛṣaṇo droṇamasthurghṛtapruṣo normayo madantaḥ  ।*
*indra pra tubhyaṁ vṛṣabhiḥ sutānāṁ vṛṣṇe bharanti vṛṣabhāya somam  ॥20॥*
*vṛṣāsi divo vṛṣabhaḥ pṛthivyā vṛṣā sindhūnāṁ vṛṣabhaḥ stiyānām  ।*
*vṛṣṇe ta indurvṛṣabha pīpāya svādū raso madhupeyo varāya  ॥21॥*
*ayaṁ devaḥ sahasā jāyamāna indreṇa yujā paṇimastabhāyat  ।*
*ayaṁ svasya piturāyudhānīnduramuṣṇādaśivasya māyāḥ  ॥22॥*
*ayamakṛṇoduṣasaḥ supatnīrayaṁ sūrye adadhājjyotirantaḥ  ।*
*ayaṁ tridhātu divi rochaneṣu triteṣu vindadamṛtaṁ nigūḷaham  ॥23॥*
*ayaṁ dyāvāpṛthivī vi ṣkabhāyadayaṁ rathamayunnaksaptaraśmibh  ।*
*ayaṁ goṣu śachyā pakvamantaḥ somo dādhāra daśayantramutsam  ॥24॥*

ऋ. (Rv.) ६.४५.१-३०

य आनयत्परावतः सुनीती तुर्वशं यदुम्। इन्द्रः स नो युवा सखा ॥१॥
अविप्रे चिद्वयो दधदनाशुना चिदर्वता। इन्द्रो जेता हितं धनम् ॥२॥
महीरस्य प्रणीतयः पूर्वीरुत प्रशस्तयः। नास्य क्षीयन्त ऊतयः ॥३॥
सखायो ब्रह्मवाहसेऽर्चत प्र च गायत। स हि नः प्रमतिर्मही ॥४॥
त्वमेकस्य वृत्रहन्नविता द्वयोरसि। उतेदृशे यथा वयम् ॥५॥
नयसीद्वति द्विषः कृणोष्युक्थशंसिनः। नृभिः सुवीर उच्यसे ॥६॥
ब्रह्माणं ब्रह्मवाहसं गीर्भिः सखायमृग्मियम्। गां न दोहसे हुवे ॥७॥
यस्य विश्वानि हस्तयोरूचुर्वसूनि नि द्विता। वीरस्य पृतनाषहः ॥८॥
वि दृळहानि चिदद्रिवो जनानां शचीपते। वृह माया अनानत ॥९॥
तमु त्वा सत्ये सोमपा इन्द्र वजानां पते। अहूमहि श्रवस्यवः ॥१०॥
तमु त्वा यः पुरासिथ यो वा नूनं हिते धने। हव्यः स श्रुधी हवम्॥११॥
धीभिरर्वद्भिरर्वतो वाजाँ इन्द्र श्रवाय्यान्। त्वया जेष्म हितं धनम् ॥१२॥
अभूरु वीर गिर्वणो महाँ इन्द्र धने हिते। भरे वितन्तसाय्यः ॥१३॥
या त ऊतिरमित्रहन्मक्षूजवस्तमासति। तया नो हिनुही रथम् ॥१४॥
स रथेन रथीतमोऽस्माकेनाभियुग्वना। जेषि जिष्णो हितं धनम् ॥१५॥
य एक इत्तमु ष्टुहि कृष्टीनां विचर्षणिः। पतिर्जज्ञे वृषक्रतुः ॥१६॥
यो गृणतामिदासिथापिरूती शिवः सखा। स त्वं न इन्द्र मृळय ॥१७॥
धिष्व वज्रं गभस्त्यो रक्षोहत्याय वज्रिवः। सासहीष्ठा अभि स्पधः ॥१८॥
प्रत्नं रयीणां युजं सखायं कीरिचोदनम्। ब्रह्मवाहस्तमं हुवे ॥१९॥
स हि विश्वानि पार्थिवाँ एको वसूनि पत्यते। गिर्वणस्तमो अध्रिगुः ॥२०॥
स नो नियुद्भिरा पृण कामं वाजेभिरश्विभिः। गोमद्भिर्गोपते धृषत् ॥२१॥
तद्वो गाय सुते सचा पुरुहूताय सत्वने। शं यद् गवे न शाकिने ॥२२॥
न घा वसूर्नि यमते दानं वाजस्य गोमतः। यत्सीमुप श्रवद् गिरः ॥२३॥
कुवित्सस्य प्र हि व्रजं गोमन्तं दस्युहा गमत्। शचीभिरप नो वरत्॥२४॥
इमा उ त्वा शतक्रतोऽभि प्र णोनुवुर्गिरः। इन्द्र वत्सं न मातरः ॥२५॥
दूणाशं सख्यं तव गौरसि वीर गव्यते। अश्वो अश्वायते भव ॥२६॥
स मन्दस्वा ह्यन्धसो राधसे तन्वा महे। न स्तोतारं निदे करः ॥२७॥
इमा उ त्वा सुतेसुते नक्षन्ते गिर्वणो गिरः। वत्सं गावो न धेनवः ॥२८॥
पुरूतमं पुरूणां स्तोतृणां विवाचि। वाजेभिर्वाचयताम् ॥२९॥
अस्माकमिन्द्र भूतु ते स्तोमो वाहिष्ठो अन्तमः। अस्मान् राये महे हिनु ॥३०॥

*ya ānayatparāvataḥ sunītī turvaśaṁ yadum । indraḥ sa no yuvā sakhā  ॥1॥*
*avipre chidvayo dadhadanāśunā chidarvatā । indro jetā hitaṁ dhanam  ॥2॥*
*mahīrasya praṇītayaḥ pūrvīruta praśastayaḥ । nāsya kṣīyanta ūtayaḥ  ॥3॥*
*sakhāyo brahmavāhase'rchata pra cha gāyata । sa hi naḥ pramatirmahī  ॥4॥*

*tvamekasya vṛtrannavitā dvayorasi । utedṛśe yathā vayam ॥5 ॥*
*nayasīdvati dviṣaḥ kṛṇoṣyukthaśaṁsinaḥ । nṛbhiḥ suvīra uchyase ॥6 ॥*
*brahmāṇaṁ brahmavāhasaṁ gīrbhiḥ sakhāyamṛgmiyam । gāṁ na dohase huve ॥7 ॥*
*yasya viśvāni hastayorūchurvasūni nidvitā । vīrasya pṛtanāṣahaḥ ॥8 ॥*
*vi dṛḻahāni chidadrivo janānāṁ śachīpate । vṛha māyā anānata ॥9 ॥*
*tamu tvā satye somapā indra vajānāṁ pate । ahūmahi śravasyavaḥ ॥10 ॥*
*tamu tvā yaḥ purāsitha yo vā nūnaṁ hite dhane । havyaḥ sa śrudhī havam ॥11 ॥*
*dhībhirarvadbhirarvato vājām̐ indra śravāyyān । tvayā jeṣma hitaṁ dhanam ॥12 ॥*
*abhūru vīra girvaṇo mahām̐ indra dhane hite । bhare vitantasāyyaḥ ॥13 ॥*
*yā ta ūtiramitrahanmakṣūjavastamāsati । tayā no hinuhī ratham ॥14 ॥*
*sa rathena rathītamo'smākenābhiyugvanā । jeṣi jiṣṇo hitaṁ dhanam ॥15 ॥*
*ya eka ittamu ṣṭuhi kṛṣṭīnāṁ vicharṣaṇiḥ । patirjajñe vṛṣakratuḥ ॥16 ॥*
*yo gṛṇatāmidāsithāpirūtī śivaḥ sakhā । sa tvaṁ na indra mṛḻaya ॥17 ॥*
*dhiṣva vajraṁ gabhastyo rakṣohatyāya vajrivaḥ । sāsahīṣṭhā abhi spadhaḥ ॥18 ॥*
*pratnaṁ rayīṇāṁ yujaṁ sakhāyaṁ kīrichodanam । brahmavāhastamaṁ huve ॥19 ॥*
*sa hi viśvāni pārthivām̐ eko vasūni patyate । girvaṇastamo adhriguḥ ॥20 ॥*
*sa no niyudbhirā pṛṇa kāmaṁ vājebhiraśvibhiḥ । gomadbhirgopate dhṛṣat ॥21 ॥*
*tadvo gāya sute sachā puruhūtāya satvane । śaṁ yad gave na śākine ॥22 ॥*
*na ghā vasūrni yamate dānaṁ vājasya gomataḥ । yatsīmupa śravad giraḥ ॥23 ॥*
*kuvitsasya pra hi vrajaṁ gomantaṁ dasyuhā gamat । śachībhirapa no varat ॥24 ॥*
*imā u tvā śatakrato'bhi pra ṇonuvurgiraḥ । indra vatsaṁ na mātaraḥ ॥25 ॥*
*dūṇāśaṁ sakhyaṁ tava gaurasi vīra gavyate । aśvo aśvāyate bhava ॥26 ॥*
*sa mandasvā hyandhaso rādhase tanvā mahe । na stotāraṁ nide karaḥ ॥27 ॥*
*imā u tvā sutesute nakṣante girvaṇo giraḥ । vatsaṁ gāvo na dhenavaḥ ॥28 ॥*
*purūtamaṁ purūṇāṁ stotṛṇāṁ vivāchi । vājebhirvāchayatām ॥29 ॥*
*asmākamindra bhūtu te stomo vāhiṣṭho antamaḥ । asmān rāye mahe hinu ॥30 ॥*

सा. (Sv.) ११५

तद्वो गाय सुतं सचा पुरुहूताय सत्वने । शं यद्गवे न शाकिने ॥१ ॥
*tadvo gāya sutaṁ sachā puruhūtāya satvane । śaṁ yadgave na śākine ॥1 ॥*

सा. (Sv.) ३५७

त्यमु वो अप्रहणं गृणीषे शवसस्पतिम् । इन्द्रं विश्वासाहं नरं शचिष्ठं विश्ववेदसम् ॥६ ॥
*tyamu vo aprahaṇaṁ gṛṇīṣe śavasaspatim ।*
*indraṁ viśvāsāhaṁ naraṁ śachiṣṭhaṁ viśvavavedasam ॥6 ॥*

सा. (Sv.) ८०९-८१०

त्वामिद्धि हवामहे सातौ वाजस्य कारवः ।
त्वा वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥१ ॥
स त्वं नश्चित्र वज्रहस्त धृष्णुया मह स्तवानो अद्रिवः ।
गामश्वं रथ्यमिन्द्र सं किर सत्रा वाजं न जिग्युषे ॥२ ॥
*tvāmiddhi havāmahe sātau vājasya kāravaḥ ।*
*tvā vṛtreṣvindra satpatiṁ narastvāṁ kāṣṭhāsvarvataḥ ॥1 ॥*
*sa tvaṁ naśchitra vajrahasta dhṛṣṇuyā maha stavāno adrivaḥ ।*
*gāmaśvaṁ rathyamindra saṁ kira satrā vājaṁ na jigyuṣe ॥2 ॥*

सा. (Sv.) १६६६-१६६८

तद्वो गाय सुते सचा पुरुहूताय सत्वने । शं यद्गवे न शाकिने ॥१ ॥
न घा वसुर्नि यमते दानं वाजस्य गोमतः । यत्सीमुपश्रवद्गिरः ॥२ ॥
कुवित्सस्य प्र हि व्रजं गोमन्तं दस्युहा गमत् । शचीभिरप नो वरत् ॥३ ॥
*tadvo gāya sute sachā puruhūtāya satvane । śaṁ yadgave na śākine ॥1 ॥*
*na ghā vasurni yamate dānaṁ vājasya gomataḥ । yatsīmupaśravadgiraḥ ॥2 ॥*
*kuvitsasya pra hi vrajaṁ gomantaṁ dasyuhā gamat । śachībhirapa no varat ॥3 ॥*

अ. (Av.) २०.७८.१-३

तद् वो गाय सुते सचा पुरुहूताय सत्वने । शं यद् गवे न शाकिने ॥१ ॥

न घा वसुर्नि यमते दानं वाजस्य गोमतः। यत् सीमुप श्रवद् गिरः ॥२॥
कुवित्सस्य प्र हि व्रजं गोमन्तं दस्युहा गमत्। शचीभिरप नो वरत् ॥३॥
*tad vo gāya sute sachā puruhūtāya satvane | śaṁ yad gave na śākine ||1 ||*
*na ghā vasurni yamate dānaṁ vājasya gomataḥ | yat sīmupa śravad giraḥ ||2 ||*
*kuvitsasya pra hi vrajaṁ gomantaṁ dasyuhā gamat | śachībhirapa no varat ||3 ||*

अ. (Av.) २०.८०.१-२

इन्द्र ज्येष्ठं न आ भरँ ओजिष्ठं पपुरि श्रवः ।
येनेमे चित्र वज्रहस्त रोदसी ओभे सुशिप्र प्राः ॥१॥
त्वामुग्रमवसे चर्षणीसहं राजन् देवेषु हूमहे ।
विश्वा सु नो विथुरा पिब्दना वसोऽमित्रान् सुषहान् कृधि ॥२॥
*indra jyeṣṭhaṁ na ā bharaṁ̐ ojiṣṭhaṁ papuri śravaḥ |*
*yeneme chitra vajrahasta rodasī obhe suśipra prāḥ ||1 ||*
*tvāmugramavase charṣaṇīsahaṁ rājan deveṣu hūmahe |*
*viśvā su no vithurā pibdanā vaso'mitrān suṣahān kṛdhi ||2 ||*

अ. (Av.) २०.८३.१-२

इन्द्र त्रिधातु शरणं त्रिवरूथं स्वस्तिमत् ।
छर्दिर्यच्छ मघवद्भ्यश्च मह्यं च यावया दिद्युमेभ्यः ॥१॥
ये गव्यता मनसा शत्रुमादभुरभिप्रघ्नन्ति धृष्णुया ।
अध स्मा नो मघवन्निन्द्र गिर्वणस्तनूपा अन्तमो भव ॥२॥
*indra tridhātu śaraṇaṁ trivarūthaṁ svastimat |*
*chhardiryachchha maghavadbhyaścha mahyaṁ cha yāvayā didyumebhyaḥ ||1 ||*
*ye gavyatā manasā śatrumādabhurabhipraghnanti dhṛṣṇuyā |*
*adha smā no maghavannindra girvaṇastanūpā antamo bhava ||2 ||*

अ. (Av.) २०.९८.१-२

त्वामिद्धि हवामहे साता वाजस्य कारवः ।
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥१॥
स त्वं नश्चित्र वज्रहस्त धृष्णुया मह स्तवानो अद्रिवः ।
गामश्वं रथ्यमिन्द्र सं किर सत्रा वाजं न जिग्युषे ॥२॥
*tvāmiddhi havāmahe sātā vājasya kāravaḥ |*
*tvāṁ vṛtreṣvindra satpatiṁ narastvāṁ kāṣṭhāsvarvataḥ ||1 ||*
*sa tvaṁ naśchitra vajrahasta dhṛṣṇuyā maha stavāno adrivaḥ |*
*gāmaśvaṁ rathyamindra saṁ kira satrā vājaṁ na jigyuṣe ||2 ||*

य. (Yv.) २७.३७-३८

त्वामिद्धि हवामहे सातौ वाजस्य कारवः ।
त्वां वृत्रेष्विन्द्रं सतपतिं नरस्त्वां काष्ठास्वर्वतः ॥३७॥
स त्वं नश्चित्र वज्रर्हस्त धृष्णुया मह स्तवानोऽअद्रिवः ।
गामश्वं रथ्यमिन्द्र सं किर सत्रा वाजं न जिग्युषे ॥३८॥
*tvāmiddhi havāmahe sātau vājasya kāravaḥ |*
*tvāṁ vṛtreṣvindraṁ satapatiṁ narastvāṁ kāṣṭhāsvarvataḥ ||37 ||*
*sa tvaṁ naśchitra vajrarhasta dhṛṣṇuyā maha stavāno'adrivaḥ |*
*gāmaśvaṁ rathyamindra saṁ kira satrā vājaṁ na jigyuṣe ||38 ||*

३. परमेश्वरः (Parameśvaraḥ) - य. (Yv.) २७.३६

न त्वावाँ२ऽअन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्निन्द्र वाजिनो गवयन्तस्त्वा हवामहे ॥३६॥
*na tvāvāṁ̐2'anyo divyo na pārthivo na jāto na janiṣyate |*
*aśvāyanto maghavannindra vājino gavayantastvā havāmahe ||36 ||*

४. पूषा (Pūṣā) - ऋ. (Rv.) ६.४८.१६-१९

आ मा पूषन्नुप द्रव शंसिषं नु ते अपिकर्ण आघृणे। अघा अर्यो अरातयः ॥१६॥

मा काकम्बीरमुद्वृहो वनस्पतिमशस्तीर्वि हि नीनशः ।
मोत सूरो अह एवा चन ग्रीवा आदधते वेः ॥१७॥
दृतेरिव तेऽवृकमस्तु सख्यम् । अच्छिद्रस्य दधन्वतः सुपूर्णस्य दधन्वतः ॥१८॥
परो हि मर्त्यैरसि समो देवैरुत श्रिया । अभि ख्यः पूषन् पृतनासु नस्त्वमवा नूनं यथा पुरा ।१९॥
*ā mā pūṣannupa drava śaṁsiṣaṁ nu te apikarṇa āghṛṇe । aghā aryo arātayaḥ ॥16॥*
*mā kākambīramudvṛho vanaspatimaśastīrvi hi nīnaśaḥ ।*
*mota sūro aha evā chana grīvā ādadhate veḥ ॥17॥*
*dṛteriva te'vṛkamastu sakhyam ।*
*achchhidrasya dadhanvataḥ supūrṇasya dadhanvataḥ ॥18॥*
*paro hi martyairasi samo devairuta śriyā ।*
*abhi khyaḥ pūṣan pṛtanāsu nastvamavā nūnaṁ yathā purā ।19॥*

५. प्रश्निर्द्यावा भूमी वा (Prraśnirdyāvā Bhūmī Vā) - ऋ. (Rv.) ६.४८.२२

सकृद्ध द्यौरजायत सकृद्भूमिरजायत । पृश्न्या दुग्धं सकृत्पयस्तदन्यो नानु जायते ॥२२॥
*sakṛddha dyaurajāyata sakṛdbhūmirajāyata । pṛśnyā dugdhaṁ sakṛtpayastadanyo nānu jāyate ॥22॥*

६. बृबुतक्षा (Bṛbutakṣā) -ऋ. (Rv.) ६.४५.३१-३३

अधि बृबुः पणीनां वर्षिष्ठे मूर्धन्नस्थात् । इरुः कक्षो न गांग्य ॥३१॥
यस्य वायोरिव द्रवद्भद्रा रातिः सहस्रिणी । सद्यो दानाय मंहते ॥३२॥
तत्सु नो विश्वे अर्य आ सदा गृणन्ति कारवः । बृबुं सहस्रदातमं सूरिं सहस्रसातमम् ॥३३॥
*adhi bṛbuḥ paṇīnāṁ varṣiṣṭhe mūrdhannasthāt । iruḥ kakṣo na gāṁgya ॥31॥*
*yasya vāyoriva dravadbhadrā rātiḥ sahasriṇī । sadyo dānāya maṁhate ॥32॥*
*tatsu no viśve arya ā sadā gṛṇanti kāravaḥ । bṛbuṁ sahasradātamaṁ sūriṁ sahasrasātamam ॥33॥*

७. मरुतः (Marutaḥ) - ऋ. (Rv.) ६.४८.११; १२; २०; २१

ऋ. (Rv.) ६.४८.११-१२

आ सखायः सबर्दुघां धेनुमजध्वमुप नव्यसा वचः । सृजध्वमनपस्फुराम् ॥११॥
या शर्धाय मारुताय स्वभानवे श्रवोऽमृतयु धुक्षत । या मृळीके मरुतां तुराणां यासुम्नैरेवयावरी ॥१२॥
*ā sakhāyaḥ sabardughāṁ dhenumajadhvamupa navyasā vachaḥ । sṛjadhvamanapasphurām ॥11॥*
*yā śardhāya mārutāya svabhānave śravo'mṛtayu dhukṣata । yā mṛḻīke marutāṁ turāṇāṁ yāsumnairevayāvarī ॥12॥*

ऋ. (Rv.) ६.४८.२०-२१

वामी वामस्य धूतयः प्रणीतिरस्तु सूनृता ।
देवस्य वा मरुतो मर्त्यस्य वेजानस्य प्रयज्यवः ॥२०॥
सद्यश्चिद्यस्य चर्कृतिः परि द्यां देवो नैति सूर्यः ।
त्वेषं शवो दधिरे नाम यज्ञियं मरुतो वृत्रहं शवो ज्येष्ठं वृत्रहं शवः ॥२१॥
*vāmī vāmasya dhūtayaḥ praṇītirastu sūnṛtā ।*
*devasya vā maruto martyasya vejānasya prayajyavaḥ ॥20॥*
*sadyaśchidyasya charkṛtiḥ pari dyāṁ devo naiti sūryaḥ ।*
*tveṣaṁ śavo dadhire nāma yajñiyaṁ maruto vṛtrahaṁ śavo jyeṣṭhaṁ vṛtrahaṁ śavaḥ ॥21॥*

८. मरुतो लिङ्गोक्ता वा (Maruto Liṅgoktā Vā) - ऋ. (Rv.) ६.४८.१३-१५

भरद्वाजायाव धुक्षत द्विता । धेनुं च विश्वदोहसमिषं च विश्वभोजसम् ॥१३॥
तं व इन्द्र न सुक्रतुं वरुणमिव मायिनम् ।
अर्यमणं न मन्द्रं सृप्रभोजसं विष्णुं न स्तुष आदिशे ॥१४॥
त्वेषं शर्धो न मारुतं तुविष्वण्यनर्वाणं पूषणं सं यथा शता ।
सं सहस्रा करिषच्चर्षणिभ्य आँ आविर्गूळहा वसू करत्सुवेदा नो वसू करत् ॥१५॥
*bharadvājāyāva dhukṣata dvitā । dhenuṁ cha viśvadohasamiṣaṁ cha viśvabhojasam ॥13॥*
*taṁ va indra na sukratuṁ varuṇamiva māyinam ।*

*aryamaṇaṁ na mandraṁ sṛprabhojasaṁ viṣṇuṁ na stuṣa ādiśe //14 //*
*tveṣaṁ śardho na mārutaṁ tuviṣvaṇyanarvāṇaṁ pūṣaṇaṁ saṁ yathā śatā /*
*saṁ sahasrā kariṣachcharṣaṇibhya āṁ̐ āvirgūḷahā vasū karatsuvedā no vasū karat //15 //*

९. वास्तुपतिः (Vāstupatiḥ) - य. (Yv.) ३.४३

उपहूताऽइह गावऽउपहूताऽअजावयः। अथोऽअन्नस्य कीलालऽउपहूतो गृहेषु नः। क्षेमाय वः शान्त्यै प्रपद्ये शिवं शग्मं शंयोः शंयोः ॥४३॥
*upahūtā'iha gāva'upahūtā'ajāvayaḥ / atho'annasya kīlāla'upahūto gṛheṣu naḥ / kṣemāya vaḥ śāntyai prapadye śivaṁ śagmaṁ śaṁyoḥ śaṁyoḥ //43 //*

६८२. शंयुर् बार्हस्पत्यः (ऋसर्व. . ६.४५.२८; ६.४६.१) भरद्वाजो बार्हस्पत्यः (साग्री. सास्वा. सार्षेदी.) (Śaṁyur Bārhaspatyaḥ [Rss. . 6.45.28; 6.46.1) Bharadvājo Bārhaspatyaḥ [Ssb. Sas. Sad.])

१. इन्द्रः (Indraḥ) - सा. (Sv.) २०१; २३४; ५८६

सा. (Sv.) २०१

इमा उ त्वा सुतेसुते नक्षन्ते गिर्वणो गिरः। गावो वत्सं न धेनवः ॥८॥
*imā u tvā sutesute nakṣante girvaṇo giraḥ / gāvo vatsaṁ na dhenavaḥ //8 //*

सा. (Sv.) २३४

त्वामिद्धि हवामहे सातौ वाजस्य कारवः। त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥२॥
*tvāmiddhi havāmahe sātau vājasya kāravaḥ / tvāṁ vṛtreṣvindra satpatiṁ narastvāṁ kāṣṭhāsvarvataḥ //2 //*

सा. (Sv.) ५८६

*इन्द्र ज्येष्ठं न आ भर ओजिष्ठं पुपुरि श्रवः। यद्दिधृक्षेम वज्रहस्त रोदसी उभे सुशिप्र पप्राः ।१॥ indra* jyeṣṭhaṁ *na ā bhara ojiṣṭhaṁ pupuri śravaḥ /*
*yaddidhṛkṣema vajrahasta rodasī ubhe suśipra paprāḥ /1 //*

२. इन्द्रः प्रगाथो वा (Indraḥ Prragātho Vā) - ऋ. (Rv.) ६.४६.१-१४

त्वामिद्धि हवामहे साता वाजस्य कारवः ।
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥१॥
स त्वं नश्चित्र वज्रहस्त धृष्णुया महः स्तवानो अद्रिवः ।
गामश्वं रथ्यमिन्द्र सं किर सत्रा वाजं न जिग्युषे ॥२॥
यः सत्राहा विचर्षणिरिन्द्रं तं हूमहे वयम् ।
सहस्रमुष्क तुविनृम्ण सत्पते भवा समत्सु नो वृधे ॥३॥
बाधसे जनान् वृषभेव मन्युना घृषौ मीळ्ह ऋचीषम ।
अस्माकं बोध्यविता महाधने तनूष्वप्सु सूर्ये ॥४॥
इन्द्र ज्येष्ठं न आ भरँ ओजिष्ठं पपुरि श्रवः ।
येनेमे चित्र वज्रहस्त रोदसी ओभे सुशिप्र प्राः ॥५॥
त्वामुग्रमवसे चर्षणीसहं राजन्देवेषु हूमहे ।
विश्वा सु नो विथुरा पिब्दना वसोऽमित्रान्त्सुषहान्कृधि ॥६॥
यदिन्द्र नाहुषीष्वाँ ओजो नृम्णं च कृष्टिषु ।
यद्वा पंच क्षितीनां द्युम्नमा भर सत्रा विश्वानि पौंस्या ॥७॥
यद्वा तृक्षौ मघवन् द्रुह्यावा जने यत्पूरौ कच्च वृष्ण्यम् ।
अस्मभ्यं तद्रिरीहि सं नृषाह्येऽमित्रान्पृत्सु तुर्वणे ॥८॥
इन्द्र त्रिधातु शरणं त्रिवरूथं स्वस्तिमत् ।
छर्दिर्यच्छ मघवद्भ्यश्च मह्यं च यावया दिद्युमेभ्यः ॥९॥
ये गव्यता मनसा शत्रुमादभुरभिप्रघ्नन्ति धृष्णुया ।
अध स्मा नो मघवन्निन्द्र गिर्वणस्तनूपा अन्तमो भव ॥१०॥
अध स्मा नो वृधे भवेन्द्र नायमवा युधि ।
यदन्तरिक्षे पतयन्ति पर्णिनो दिद्यवस्तिग्ममूर्धानः ॥११॥

यत्र शूरासस्तन्वो वितन्वते प्रिया शर्म पितृणाम् ।
अध स्मा यच्छ तन्वे३ तने च छर्दिरचित्तं यावय द्वेषः ॥१२॥
यदिन्द्र सर्गे अर्वतश्चोदयासे महाधने ।
असमने अध्वनि वृजिने पथि श्येनाँ इव श्रवस्यतः ॥१३॥
सिन्धूँरिव प्रवण आशुया यतो यदि क्लोशमनु ष्वणि ।
आ ये वयो न वर्वृतत्यामिषि गृभीता बाह्वोर्गवि ॥१४॥
*tvāmiddhi havāmahe sātā vājasya kāravaḥ /*
*tvāṁ vṛtreṣvindra satpatiṁ narastvāṁ kāṣṭhāsvarvataḥ //1 //*
*sa tvaṁ naśchitra vajrahasta dhṛṣṇuyā mahaḥ stavāno adrivaḥ /*
*gāmaśvaṁ rathyamindra saṁ kira satrā vājaṁ na jigyuṣe //2 //*
*yaḥ satrāhā vicharṣaṇirindraṁ taṁ hūmahe vayam /*
*sahasramuṣka tuvinṛmṇa satpate bhavā samatsu no vṛdhe //3 //*
*bādhase janān vṛṣabheva manyunā ghṛṣau mīḷaha ṛchīṣama /*
*asmākaṁ bodhyavitā mahādhane tanūṣvapsu sūrye //4 //*
*indra jyeṣṭhaṁ na ā bharam̐ ojiṣṭhaṁ papuri śravaḥ /*
*yeneme chitra vajrahasta rodasī obhe suśipra prāḥ //5 //*
*tvāmugramavase charṣaṇīsahaṁ rājandeveṣu hūmahe /*
*viśvā su no vithurā pibdanā vaso'mitrāntsuṣahānkṛdhi //6 //*
*yadindra nāhuṣīṣvām̐ ojo nṛmṇaṁ cha kṛṣṭiṣu /*
*yadvā paṁcha kṣitīnāṁ dyumnamā bhara satrā viśvāni pauṁsyā //7 //*
*yadvā tṛkṣau maghavan druhyāvā jane yatpūrau kachcha vṛṣṇyam /*
*asmabhyaṁ tadririhi saṁ nṛṣāhye'mitrānpṛtsu turvaṇe //8 //*
*indra tridhātu śaraṇaṁ trivarūthaṁ svastimat /*
*chhardiryachchha maghavadbhyaścha mahyaṁ cha yāvayā didyumebhyaḥ //9 //*
*ye gavyatā manasā śatrumādabhurabhipraghnanti dhṛṣṇuyā /*
*adha smā no maghavannindra girvaṇastanūpā antamo bhava //10 //*
*adha smā no vṛdhe bhavendra nāyamavā yudhi /*
*yadantarikṣe patayanti parṇino didyavastigmamūrdhānaḥ //11 //*
*yatra śūrāsastanvo vitanvate priyā śarma pitṛṇām /*
*adha smā yachchha tanve3 tane cha chhardirachittaṁ yāvaya dveṣaḥ //12 //*
*yadindra sarge arvataśchodayāse mahādhane /*
*asamane adhvani vṛjine pathi śyenām̐ iva śravasyataḥ //13 //*
*sindhūm̐riva pravaṇa āśuyā yato yadi klośamanu ṣvaṇi /*
*ā ye vayo na varvṛtatyāmiṣi gṛbhītā bāhvorgavi //14 //*

### ६८३. श्यावाश्वः (Śyāvāśvaḥ)

१. अश्विनौ (Aśvinau) - ऋ. (Rv.) ८.३५.१-२४

अग्निनेन्द्रेण वरुणेन विष्णुनादित्यै रुद्रैर्वसुभिः सचाभुवा ।
सजोषसा उषसा सूर्येण च सोमं पितबमश्विना ॥१॥
विश्वाभिर्धीभिर्भुवनेन वाजिना दिवा पृथिव्याद्रिभिः सचाभुवा ।
सजोषसा उषसा सूर्येण च सोमं पिबतमश्विना ॥२॥
विश्वेदेवैस्त्रिभिरेकादशैरिहाद्भिर्मरुद्भिर्भृगुभिः सचाभुवा ।
सजोषसा उषसा सूर्येण च सोमं पितबमश्विना ॥३॥
जुषेथां यज्ञं बोधतं हवस्य मे विश्वेह देवा सवनाव गच्छतम् ।
सजोषसा उषसा सूर्येण चेषं नो वोळहमश्विना ॥४॥
स्तोमं जुषेथां युवशेव कन्यनां विश्वेह देवौ सवनाव गच्छतम् ।
सजोषसा उषसा सूर्येण चेषं नो वोळहमश्विना ॥५॥
गिरो जुषेथामध्वरं जुषेथां विश्वेह देवौ सवनाव गच्छतम् ।
सजोषसा उषसा सूर्येण चेषं नो वोळहमश्विना ॥६॥
हारिद्रवेव पतथो वनेदुष सोमं सुतं महिपेवाव गच्छथः ।
सजोषसा उषसा सूर्येण च त्रिर्वर्तिर्यातमश्विना ॥७॥

हंसाविव पतथो अध्वगाविव सोमं सुतं महिपेवाव गच्छथः ।
सजोषसा उषसा सूर्येण च त्रिर्वर्तिर्यातमश्विना ॥८॥
श्येनाविव पतथो हव्यदातये सोमं सुतं महिषेवाव गच्छथः ।
सजोषसा उषसा सूर्येण च त्रिर्वर्तिर्यातमश्विना ॥९॥
पिबतं च तृप्णुतं चा च गच्छतं प्रजां च धत्तं द्रविणं च धत्तम् ।
सजोषसा उषसा सूर्येण चोर्जं नो धतमश्विना ॥१०॥
जयंतं च प्र स्तुतं च प्र चावतं प्रजां च धत्तं द्रविणं च धत्तम् ।
सजोषसा उषसा सूर्येण चोर्जं नो धतमश्विना ॥११॥
हतं च शत्रून्यततं च मित्रिणः प्रजां च धत्तं द्रविणं च धत्तम् ।
सजोषसा उषसा सूर्येण चोर्जं नो धतमश्विना ॥१२॥
मित्रावरुणवन्ता उत धर्मवन्ता मरुत्वन्ता जरितुर्गच्छथो हवम् ।
सजोषसा उष सूर्येण चादित्यैर्यातमश्विना ॥१३॥
अंगिरस्वन्ता उत विष्णुवन्ता मरुत्वन्ता जरितुर्गच्छथो हवम् ।
सजोषसा उषसा सूर्येण चादित्यैर्यातमश्विना ॥१४॥
ऋभुमन्ता वृषणा वाजवन्ता मरुत्वन्ता जरितुर्गच्छथो हवम् ।
सजोषसा उष सूर्येण चादित्यैर्यातमश्विना ॥१५॥
ब्रह्म जिन्वतमुत जिन्वतं धियो हतं रक्षांसि सेधतमभीवाः ।
सजोषसा सूर्येण च सोमं सुन्वतो अश्विना ॥१६॥
क्षत्रं जिन्वतमुत जिन्वतं नृन्हतं रक्षांसि सेधतमभीवाः ।
सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥१७॥
धेनूर्जिन्वतमुत जिन्वतं विशो हतं रक्षांसि सेधतमभीवाः ।
सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥१८॥
अत्रेरिव शुणुतं पूर्व्यस्तुतिं श्यावाश्वस्य सुन्वतो मदच्युता ।
सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यम् ॥१९॥
सँर्गा इव सृजतं सुष्टुतीरुप श्यावाश्वस्य सुन्वतो मदच्युता ।
सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यम् ॥२०॥
रश्मींरिव यच्छतमध्वराँ उप श्यावाश्वस्य सुन्वतो मदच्युता ।
सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यम् ॥२१॥
अर्वाग्रथं नि यच्छतं पिबतं सोम्यं मधु ।
आ यातमश्विना गतमवस्युर्वामहं हुवे धत्तं रत्नानि दाशुषे ॥२२॥
नमोवाके प्रस्थिते अध्वरे नरा विवक्षणस्य पीतये ।
आ यातमश्विना गतमवस्युर्वामहं हुवे धत्तं रत्नानि दाशुषे ॥२३॥
स्वाहाकृतस्य तृम्पतं सुतस्य दोवान्धसः ।
आ यातमश्विना गतमवस्युर्वामहं हुवे धत्तं रत्नानि दाशुषे ॥२४॥

*agninendreṇa varuṇena viṣṇunādityai rudrairvasubhiḥ sachābhuvā /*
*sajoṣasā uṣasā sūryeṇa cha somaṁ pitabamaśvinā //1 //*
*viśvābhirdhībhirbhuvanena vājinā divā pṛthivyādribhiḥ sachābhuvā /*
*sajoṣasā uṣasā sūryeṇa cha somaṁ pibatamaśvinā //2 //*
*viśvedevaistribhirekādaśairihādbhirmarudbhirbhugubhiḥ sachābhuvā /*
*sajoṣasā uṣasā sūryeṇa cha somaṁ pitabamaśvinā //3 //*
*juṣethāṁ yajñaṁ bodhataṁ havasya me viśveha devā savanāva gachchhatam /*
*sajoṣasā uṣasā sūryeṇa cheṣaṁ no voḷahamaśvinā //4 //*
*stomaṁ juṣethāṁ yuvaśeva kanyanāṁ viśveha devau savanāva gachchhatam /*
*sajoṣasā uṣasā sūryeṇa cheṣaṁ no voḷahamaśvinā //5 //*
*giro juṣethāmadhvaraṁ juṣethāṁ viśveha devau savanāva gachchhatam /*
*sajoṣasā uṣasā sūryeṇa cheṣaṁ no voḷahamaśvinā //6 //*
*hāridraveva patatho vaneduṣa somaṁ sutaṁ mahipevāva gachchhathaḥ /*
*sajoṣasā uṣasā sūryeṇa cha trirvartiryātamaśvinā //7 //*
*haṁsāviva patatho adhvagāviva somaṁ sutaṁ mahipevāva gachchhathaḥ /*

*sajoṣasā uṣasā sūryeṇa cha trirvartiryātamaśvinā ॥8 ॥*
*śyenāviva patatho havyadātaye somaṁ sutaṁ mahiṣevāva gachchhathaḥ ।*
*sajoṣasā uṣasā sūryeṇa cha trirvartiryātamaśvinā ॥9 ॥*
*pibataṁ cha tṛpṇutaṁ chā cha gachchhataṁ prajāṁ cha dhattaṁ draviṇaṁ cha dhattam ।*
*sajoṣasā uṣasā sūryeṇa chorjaṁ no dhatamaśvinā ॥10 ॥*
*jayaṁtaṁ cha pra stutaṁ cha pra chāvataṁ prajāṁ cha dhattaṁ draviṇaṁ cha dhattam ।*
*sajoṣasā uṣasā sūryeṇa chorjaṁ no dhatamaśvinā ॥11 ॥*
*hataṁ cha śatrūnyatataṁ cha mitriṇaḥ prajāṁ cha dhattaṁ draviṇaṁ cha dhattam ।*
*sajoṣasā uṣasā sūryeṇa chorjaṁ no dhatamaśvinā ॥12 ॥*
*mitrāvaruṇavantā uta dharmavantā marutvantā jariturgachchhatho havam ।*
*sajoṣasā uṣa sūryeṇa chādityairyātamaśvinā ॥13 ॥*
*aṁgirasvantā uta viṣṇuvantā marutvantā jariturgachchhatho havam ।*
*sajoṣasā uṣasā sūryeṇa chādityairyātamaśvinā ॥14 ॥*
*ṛbhumantā vṛṣaṇā vājavantā marutvantā jariturgachchhatho havam ।*
*sajoṣasā uṣa sūryeṇa chādityairyātamaśvinā ॥15 ॥*
*brahma jinvatamuta jinvataṁ dhiyo hataṁ rakṣāṁsi sedhatamabhīvāḥ ।*
*sajoṣasā sūryeṇa cha somaṁ sunvato aśvinā ॥16 ॥*
*kṣatraṁ jinvatamuta jinvataṁ nṛnhataṁ rakṣāṁsi sedhatamabhīvāḥ ।*
*sajoṣasā uṣasā sūryeṇa cha somaṁ sunvato aśvinā ॥17 ॥*
*dhenūrjinvatamuta jinvataṁ viśo hataṁ rakṣāṁsi sedhatamabhīvāḥ ।*
*sajoṣasā uṣasā sūryeṇa cha somaṁ sunvato aśvinā ॥18 ॥*
*atreriva śuṇutaṁ pūrvyastutiṁ śyāvāśvasya sunvato madachyutā ।*
*sajoṣasā uṣasā sūryeṇa chāśvinā tiroahnyam ॥19 ॥*
*saṁrgā iva sṛjataṁ suṣṭutīrupa śyāvāśvasya sunvato madachyutā ।*
*sajoṣasā uṣasā sūryeṇa chāśvinā tiroahnyam ॥20 ॥*
*raśmīṁriva yachchhatamadhvarāṁ upa śyāvāśvasya sunvato madachyutā ।*
*sajoṣasā uṣasā sūryeṇa chāśvinā tiroahnyam ॥21 ॥*
*arvāgrathaṁ ni yachchhataṁ pibataṁ somyaṁ madhu ।*
*ā yātamaśvinā gatamavasyurvāmahaṁ huve dhattaṁ ratnāni dāśuṣe ॥22 ॥*
*namovāke prasthite adhvare narā vivakṣaṇasya pītaye ।*
*ā yātamaśvinā gatamavasyurvāmahaṁ huve dhattaṁ ratnāni dāśuṣe ॥23 ॥*
*svāhākṛtasya tṛmpataṁ sutasya dovāndhasaḥ ।*
*ā yātamaśvinā gatamavasyurvāmahaṁ huve dhattaṁ ratnāni dāśuṣe ॥24 ॥*

२. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.३६.१-७; ८.३७.१-७

ऋ. (Rv.) ८.३६.१-७

अवितासि सुन्वतो वृक्तबर्हिषः पिबा सोमं मदाय कं शतक्रतो ।
यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समत्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥१॥
प्राव स्तोतारं मघवन्नव त्वां पिबा सोमं मदाय कं शतक्रतो ।
यं ते भागमधारयन् विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥२॥
ऊर्जा देवाँ अवस्योजसा त्वां पिबा सोमं मदाय कं शतक्रतो ।
यं ते भागमधारयन् विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥३॥
जनिता दिवो जनिता पृथिव्याः पिबा सोमं मदाय कं शतक्रतो ।
यं ते भागमधारयन् विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥४॥
जनिताश्वानां जनिता गवामसि पिबा सोमं मदाय कं शतक्रतो ।
यं ते भागमधारयन् विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥५॥
अत्रीणां स्तोममद्रिवो महस्कृधि पिबा सोमं मदाय कं शतक्रतो ।
यं ते भागमधारयन् विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥६॥
श्यावाश्वस्य सुन्वतस्तथा शृणु यथाशृणोरत्रेः कर्माणि कृण्वतः ।
प्र त्रसदस्युमाविथ त्वमेक इन्नृषाह्य इन्द्र ब्रह्माणि वर्धयन् ॥७॥

*avitāsi sunvato vṛktabarhiṣaḥ pibā somaṁ madāya kaṁ śatakrato ।*
*yaṁ te bhāgamadhārayanviśvāḥ sehānaḥ pṛtanā uru jrayaḥ samatsujinmarutvāṁ indra satpate ॥1 ॥*

*prāva stotāraṁ maghavannava tvāṁ pibā somaṁ madāya kaṁ śatakrato ।*
*yaṁ te bhāgamadhārayan viśvāḥ sehānaḥ pṛtanā uru jrayaḥ samapsujinmarutvām̐ indra satpate ॥2॥*
*ūrjā devām̐ avasyojasā tvāṁ pibā somaṁ madāya kaṁ śatakrato ।*
*yaṁ te bhāgamadhārayan viśvāḥ sehānaḥ pṛtanā uru jrayaḥ samapsujinmarutvām̐ indra satpate ॥3॥*
*janitā divo janitā pṛthivyāḥ pibā somaṁ madāya kaṁ śatakrato ।*
*yaṁ te bhāgamadhārayan viśvāḥ sehānaḥ pṛtanā uru jrayaḥ samapsujinmarutvām̐ indra satpate ॥4॥*
*janitāśvānāṁ janitā gavāmasi pibā somaṁ madāya kaṁ śatakrato ।*
*yaṁ te bhāgamadhārayan viśvāḥ sehānaḥ pṛtanā uru jrayaḥ samapsujinmarutvām̐ indra satpate ॥5॥*
*atrīṇāṁ stomamadrivo mahaskṛdhi pibā somaṁ madāya kaṁ śatakrato ।*
*yaṁ te bhāgamadhārayan viśvāḥ sehānaḥ pṛtanā uru jrayaḥ samapsujinmarutvām̐ indra satpate ॥6॥*
*śyāvāśvasya sunvatastathā śṛṇu yathāśṛṇoratreḥ karmāṇi kṛṇvataḥ ।*
*pra trasadasyumāvitha tvameka innṛṣāhya indra brahmāṇi vardhayan ॥7॥*

ऋ. (Rv.) ८.३७.१-७

प्रेदं ब्रह्म वृत्रतूर्येष्वाविथ प्र सुन्वतः शचीपत इन्द्र विश्वाभिरूतिभिः ।
माध्यन्दिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥१॥
सेहान उग्र पृतना अभि द्रुहः शचीपत इन्द्र विश्वभिरूतिभिः ।
माध्यन्दिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥२॥
एकाराळस्य भुवनस्य राजसि शचीपत इन्द्र विश्वाभिरूतिभिः ।
माध्यन्दिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥३॥
सस्थावाना यवयसि त्वमेक इच्छचीपत इन्द्र विश्वाभिरूतिभिः ।
माध्यन्दिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥४॥
क्षेमस्य च प्रयुजश्च त्वमीशिषे शचीपत इन्द्र विश्वाभिरूतिभिः ।
माध्यन्दिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥५॥
क्षत्राय त्वमविस न त्वमाविथ शचीपत इन्द्र विश्वाभिरूतिभिः ।
माध्यन्दिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥६॥
श्यावाश्वस्य रेभतस्तथा श्रृणु यथाश्रृणोरत्रेः कर्माणि कृण्वतः ।
प्र त्रसदस्युमाविथ त्वमेक इन्नृषाह्य इन्द्र क्षत्राणि वर्धयन् ॥७॥

*predaṁ brahma vṛtratūryeṣvāvitha pra sunvataḥ śachīpata indra viśvābhirūtibhiḥ ।*
*mādhyandinasya savanasya vṛtrahannanedya pibā somasya vajrivaḥ ॥1॥*
*sehāna ugra pṛtanā abhi druhaḥ śachīpata indra viśvabhirūtibhiḥ ।*
*mādhyandinasya savanasya vṛtrahannanedya pibā somasya vajrivaḥ ॥2॥*
*ekārāḷasya bhuvanasya rājasi śachīpata indra viśvābhirūtibhiḥ ।*
*mādhyandinasya savanasya vṛtrahannanedya pibā somasya vajrivaḥ ॥3॥*
*sasthāvānā yavayasi tvameka ichchhachīpata indra viśvābhirūtibhiḥ ।*
*mādhyandinasya savanasya vṛtrahannanedya pibā somasya vajrivaḥ ॥4॥*
*kṣemasya cha prayujaścha tvamīśiṣe śachīpata indra viśvābhirūtibhiḥ ।*
*mādhyandinasya savanasya vṛtrahannanedya pibā somasya vajrivaḥ ॥5॥*
*kṣatrāya tvamavisa na tvamāvitha śachīpata indra viśvābhirūtibhiḥ ।*
*mādhyandinasya savanasya vṛtrahannanedya pibā somasya vajrivaḥ ॥6॥*
*śyāvāśvasya rebhatastathā śṛṇu yathāśṛṇoratreḥ karmāṇi kṛṇvataḥ ।*
*pra trasadasyumāvitha tvameka innṛṣāhya indra kṣatrāṇi vardhayan ॥7॥*

३. इन्द्राग्नी (Indrāgnī) - ऋ. (Rv.) ८.३८.१-१०

यज्ञस्य हि स्थ ऋत्विजा सस्नी वाजेषु कर्मसु। इन्द्राग्नी तस्य बोधतम् ॥१॥
तोशासा रथयावाना वृत्रहणापराजिता। इन्द्राग्नी तस्य बोधतम् ॥२॥
इदं वां मदिरं मध्वधुक्षन्नद्रिभिर्नरः। इन्द्राग्नी तस्य बोधतम् ॥३॥
जुषेथां यज्ञमिष्टये सुतं सोमं सधस्तुती। इन्द्राग्नी गतं नरा ॥४॥

इमा जषेथां सवना येभिर्हव्यान्यूहथुः। इन्द्राग्नी गतं नरा ॥५॥
इमां गायत्रवर्तानिं जुषेथां सुष्टुतिं मम। इन्द्राग्नी गतं नरा ॥६॥
प्रातर्यावभिरा गतं देवेभिर्जेन्यावसू। इन्द्राग्नी गतं नरा ॥७॥
श्यावाश्वस्य सुन्वतोऽत्रीणा श्रृणुतं हवम्। इन्द्राग्नी गतं नरा ॥८॥
एवा वामह्व ऊतये यथाहुवन्त मेधिराः। इन्द्राग्नी गतं नरा ॥९॥
आहं सरस्वतीवतोरिन्द्राग्न्योरवो वृणे। याभ्यां गायत्रमृच्यते ॥१०॥
*yajñasya hi stha ṛtvijā sasnī vājeṣu karmasu | indrāgnī tasya bodhatam ||1 ||*
*tośāsā rathayāvānā vṛtrahaṇāparājitā | indrāgnī tasya bodhatam ||2 ||*
*idaṁ vāṁ madiraṁ madhvadhukṣannadribhirnaraḥ | indrāgnī tasya bodhatam ||3 ||*
*juṭheṣāṁ yajñamiṣṭaye sutaṁ somaṁ sadhastutī | indrāgnī gataṁ narā ||4 ||*
*imā jaṣethāṁ savanā yebhirhavyānyūhathuḥ | indrāgnī gataṁ narā ||5 ||*
*imāṁ gāyatravartāniṁ juṣethāṁ suṣṭutiṁ mama | indrāgnī gataṁ narā ||6 ||*
*prātaryāvabhirā gataṁ devebhirjenyāvasū | indrāgnī gataṁ narā ||7 ||*
*śyāvāśvasya sunvato'trīṇā śṛṇutaṁ havam | indrāgnī gataṁ narā ||8 ||*
*evā vāmahva ūtaye yathāhuvanta medhirāḥ | indrāgnī gataṁ narā ||9 ||*
*āhaṁ sarasvatīvatorindrāgnyoravo vṛṇe | yābhyāṁ gāyatramṛchyate ||10 ||*

४. गुरुत्मान् (Gurutmān) - य. (Yv.) १२.४

सृपर्णोऽसि गरुत्माँस्त्रिवृत्ते शिरो गायत्रं चक्षुर्बृहद्रथन्तरे पक्षौ। स्तोमऽआत्मा छन्दांस्यंगानि यजूंषि नाम। साम ते तनूर्वामदेव्यं यज्ञायज्ञियं पुच्छं धिष्ण्याः शफाः। सुपर्णोऽसि गरुत्मान्दिवं गच्छ स्वः पत ॥४॥
*sṛparṇo'si garutmāṁstrivṛtte śiro gāyatraṁ chakṣurbṛhadrathantare pakṣau | stoma'ātmā chhandāṁsyaṁgāni yajūṁṣi nāma | sāma te tanūrvāmadevyaṁ yajñāyajñiyaṁ puchchhaṁ dhiṣṇyāḥ śaphāḥ | suparṇo'si garutmāndivaṁ gachchha svaḥ pata ||4 ||*

५. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.३२.१-६

प्र सोमासो मदच्युतः श्रवसे नो मघोनः। सुता विदथे अक्रमुः ॥१॥
आदीं त्रितस्य योषणो हरि हिन्वन्त्यद्रिभिः। इन्दुमिन्द्राय पीतये ॥२॥
आदी हंसो यथा गणं विश्वस्यावीवशन्मतिम्। अत्यो न गोभिरज्यते ॥३॥
उभे सोमावचाकशन्मृगो न तक्तो अर्षसि। सीदन्नृतस्य योनिमा ॥४॥
अभि गावो अनूषत योषा जारमिव प्रियम्। अगन्नाजिं यथा हितम् ॥५॥
अस्मे धेहि द्युमद्यशो मघवद्भ्यश्च मह्यं च। सनिं मेधामुत श्रवः ॥६॥
*pra somāso madachyutaḥ śravase no maghonaḥ | sutā vidathe akramuḥ ||1 ||*
*ādīṁ tritasya yoṣaṇo hari hinvantyadribhiḥ | indumindrāya pītaye ||2 ||*
*ādī haṁso yathā gaṇaṁ viśvasyāvīvaśanmatim | atyo na gobhirajyate ||3 ||*
*ubhe somāvachākaśanmṛgo na takto arṣasi | sīdannṛtasya yonimā ||4 ||*
*abhi gāvo anūṣata yoṣā jāramiva priyam | agannājiṁ yathā hitam ||5 ||*
*asme dhehi dyumadyaśo maghavadbhyaścha mahyaṁ cha |*
*saniṁ medhāmuta śravaḥ ||6 ||*

६. विष्णुः (Viṣṇuḥ) - य. (Yv.)१२.५

विष्णोः क्रमोऽसि सपत्नहा गायत्रं छन्दऽआरोह पृथिवीमनु विक्रमस्व विष्णोः क्रमोऽस्यभिमातिहा त्रैष्टुभं छन्दऽआरोहान्तरिक्षमनु विक्रमस्व विष्णोः क्रमोऽस्यरातीयतो हन्ता जागतं छन्दऽआरोह दिवमनु विक्रमस्व विष्णोः क्रमो॰सि शत्रूयतो हन्ताऽऽनुष्टुभं छन्दऽआरोह दिशोऽनु विक्रमस्व।५।
*viṣṇoḥ kramo'si sapatnahā gāyatraṁ chhanda'āroha pṛthivīmanu vikramasva viṣṇoḥ kramo'syabhimātihā traiṣṭubhaṁ chhanda'ārohāntarikṣamanu vikramasva viṣṇoḥ kramo'syarātīyato hantā jāgataṁ chhanda'āroha divamanu vikramasva viṣṇoḥ kramo·si śatrūyato hantā''nuṣṭubhaṁ chhanda'āroha diśo'nu vikramasva |5 |*

७. सविता (Savitā) - य. (Yv.) १२.३; ३७.२

य. (Yv.) १२.३

विश्वा रूपाणि प्रतिमुंचते कविः प्रासावीद् भद्रं द्विपदे चतुष्पदे ।
वि नाकमख्यत् सविता वरेण्योऽनु प्रयाणमुषसो विराजति ॥३॥
*viśvā rūpāṇi pratimuṁchate kaviḥ prāsāvīd bhadraṁ dvipade chatuṣpade |*

*vi nākamakhyat savitā vareṇyo'nu prayāṇamuṣaso virājati //3 //*

य. (Yv.) ३७.२

युंजते मनऽउत युंजते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेकऽइन्मही देवस्य सवितुः परिष्टुतिः स्वाहा ॥२ ॥
*yuṁjate mana'uta yuṁjate dhiyo viprā viprasya bṛhato vipaśchitaḥ /*
*vi hotrā dadhe vayunāvideka'inmahī devasya savituḥ pariṣṭutiḥ svāhā //2 //*

## ६८४. श्यावाश्व आत्रेयः (Śyāvāśva Ātreyaḥ)

१. इन्द्रः (साग्री. सास्वा.) सविता (ऋसर्व. ५.८२.४ सार्षेदी.) (Indraḥ [Ssb. Sas.] Savitā [Rss. 5.82.4 Sad.]) - सा. (Sv.) १४१

अद्या नो देव सवितः प्रजावत्सावीः सौभगम्। परा दुःष्वप्न्यं सुव ॥७ ॥
*adyā no deva savitaḥ prajāvatsāvīḥ saubhagam / parā duḥṣvapnyaṁ suva //7 //*

२. इन्द्राग्नी (Indrāgnī) - सा. (Sv.) १०७३-१०७५

यज्ञस्य हि स्थ ऋत्विजा सस्नी वाजेषु कर्मसु। इन्द्राग्नी तस्य बोधतम् ॥१ ॥
तोशासा रथयावाना वृत्रहणापराजिता। इन्द्राग्नी तस्य बोधतम् ॥२ ॥
इदं वां मदिरं मध्वधुक्षन्नद्रिभिर्नर। इन्द्राग्नी तस्य बोधतम् ॥३ ॥
*yajñasya hi stha ṛtvijā sasnī vājeṣu karmasu / indrāgnī tasya bodhatam //1 //*
*tośāsā rathayāvānā vṛtrahaṇāparājitā / indrāgnī tasya bodhatam //2 //*
*idaṁ vāṁ madiraṁ madhvadhukṣannadribhirnara / indrāgnī tasya bodhatam //3 //*

३. तरन्तो वैददश्विः (Taranto Vaidadaśviḥ) - ऋ. (Rv.) ५.६१.१०

यो मे धेनूनां शतं वैददश्विर्यथा ददत्। तरन्तइव मंहना ॥१० ॥
*yo me dhenūnāṁ śataṁ vaidadaśviryathā dadat / tarantaiva maṁhanā //10 //*

४. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ४७७; ७६९-७७१

सा. (Sv.) ४७७

प्र सोमासो मदच्युतः श्रवसे नो मघोनाम्। सुता विदथे अक्रमुः ॥१ ॥
*pra somāso madachyutaḥ śravase no maghonām / sutā vidathe akramuḥ //1 //*

सा. (Sv.) ७६९-७७१

प्र सोमासो मदच्युतः श्रवसे नो मघोनाम्। सुता विदथे अक्रमुः ॥१ ॥
आदीं हंसो यथा गणं विश्वस्यावीवशन्मतिम्। अत्यो न गोभिरज्यते ॥२ ॥
आदीं त्रितस्य योषणो हरिं हिन्वन्त्यद्रिभिः। इन्दुमिन्द्राय पीतये ॥३ ॥
*pra somāso madachyutaḥ śravase no maghonām / sutā vidathe akramuḥ //1 //*
*ādīṁ haṁso yathā gaṇaṁ viśvasyāvīvaśanmatim / atyo na gobhirajyate //2 //*
*ādīṁ tritasya yoṣaṇo hariṁ hinvantyadribhiḥ / indrumindrāya pītaye //3 //*

५. पुरुमीळहो वैददश्विः (Purumīḷaho Vaidadaśviḥ) - ऋ. (Rv.) ५.६१.९

उत मेऽरपद्युवतिर्ममन्दुषी प्रति श्यावाय वर्तनिम् ।
वि रोहिता पुरुमीळहाय येमतुर्विप्राय दीर्घयशसे ॥९ ॥
*uta me'rapadyuvatirmamanduṣī prati śyāvāya vartanim /*
*vi rohitā purumīḷahāya yematurviprāya dīrghayaśase //9 //*

६. मरुतः (Marutaḥ) - ऋ. (Rv.) ५.५२.१-१७; ५.५३.१-१६; ५.५४.१-१५; ५.५५.१-१०; ५.५६.१-९; ५.५७.१-८; ५.५८.१-८; ५.५९.१-८; ५.६१.१-४; ११-१६; सा. (Sv.) ३५६

ऋ. (Rv.) ५.५२.१-१७

प्र श्यावाश्व धृष्णुयार्चा मरुद्भिर्ऋक्वभिः ।
ये अद्रोघमनुष्वधं श्रवो मदन्ति यज्ञियाः ॥१ ॥
ते हि स्थिरस्य शवसः सखायः सन्ति धृष्णुया ।
ते यामन्ना धृषद्विनस्त्मना पान्ति शश्वतः ॥२ ॥
ते स्पन्द्रासो नोक्षणोऽति ष्कन्दन्ति शर्वरीः ।
मरुतामधा महो दिवि क्षमा च मन्महे ॥३ ॥

मरुत्सु वो दधीमहि स्तोमं यज्ञं च धृष्णुया ।
विश्वे ये मानुषा युगा पान्ति मर्त्यं रिषः ॥४॥
अर्हन्तो ये सुदानवो नरो असामिशवसः ।
प्र यज्ञं यज्ञियेभ्यो दिवो अर्चा मरुद्भ्यः ॥५॥
आ रुकमैरा युधा नर ऋष्वा ऋष्टीरसृक्षत ।
अन्वेना अह विद्युतो मरुतो जज्झतीरिव भानुरर्त त्मना दिवः ॥६॥
ये वावृधन्त पार्थिवा य उरावन्तरिक्ष आ ।
वृजने वा नदीनां सधस्थे वा माहो दिवः ॥७॥
शर्धो मारुतमुच्छंस सत्यशवसमृभ्वसम् ।
उत स्म ते शुभे नरः प्र स्पन्द्रा युजत त्मना ॥८॥
उत स्म ते परुष्यामूर्णा वसत शुन्ध्यवः ।
उत पव्या रथानामद्रिं भिन्दन्त्योजसा ॥९॥
आपथयो विपथयोऽन्तस्पथा अनुपथाः ।
एतेभिर्मह्यं नामभिर्यज्ञं विष्टार ओहते ॥१०॥
अधा नरो न्योहतेऽधा नियुत ओहते ।
अधा पारावता इति चित्रा रूपाणि दर्श्या ॥११॥
छन्दःस्तुभः कुभन्यव उत्समा कीरिणो नृतुः ।
ते मे के चिन्न तायव ऊमा आसन्दृशि त्विषे ॥१२॥
य ऋष्वा ऋष्टिविद्युतः कवयः सन्ति वेधसः ।
तमृषे मारुतं गणं नमस्या रमया गिरा ॥१३॥
अच्छ ऋषे मारुतं गणं दाना मित्रं न योषणां ।
दिवो वा धृष्णव ओजसा स्तुता धीभिरिषण्यत ॥१४॥
नू मन्वान एषां देवाँ अच्छा न वक्षणा ।
दाना सचेत सूरिभिर्यामश्रुतेभिरंजिभिः ॥१५॥
प्र ये मे बन्ध्वेषे गां वोचन्त सूरयः पृश्निं वोचन्त मातरम् ।
अधा पितरमिष्मिणं रुद्रं वोचन्त शिक्वसः ॥१६॥
सप्त मे सप्त शाकिन एकमेका शता ददुः ।
यमुनायामधि श्रुतमुद्राधो गव्यं मृजे नि राधो अश्व्यं मृजे ॥१७॥
*pra śyāvāśva dhṛṣṇuyārchā marudbhirṛkvabhiḥ* ।
*ye adroghamanuṣvadhaṁ śravo madanti yajñiyāḥ* ॥1॥
*te hi sthirasya śavasaḥ sakhāyaḥ santi dhṛṣṇuyā* ।
*te yāmannā dhṛṣadvinastmanā pānti śaśvataḥ* ॥2॥
*te spandrāso nokṣaṇo'ti ṣkandanti śarvarīḥ* ।
*marutāmadhā maho divi kṣamā cha manmahe* ॥3॥
*marutsu vo dadhīmahi stomaṁ yajñaṁ cha dhṛṣṇuyā* ।
*viśve ye mānuṣā yugā pānti martyaṁ riṣaḥ* ॥4॥
*arhanto ye sudānavo naro asāmiśavasaḥ* ।
*pra yajñaṁ yajñiyebhyo divo archā marudbhyaḥ* ॥5॥
*ā rukamairā yudhā nara ṛṣvā ṛṣṭīrasṛkṣata* ।
*anvenā aha vidyuto maruto jajjhatīriva bhānurarta tmanā divaḥ* ॥6॥
*ye vāvṛdhanta pārthivā ya urāvantarikṣa ā* ।
*vṛjane vā nadīnāṁ sadhasthe vā māho divaḥ* ॥7॥
*śardho mārutamuchchhaṁsa satyaśavasamṛbhvasam* ।
*uta sma te śubhe naraḥ pra spandrā yujata tmanā* ॥8॥
*uta sma te paruṣyāmūrṇā vasata śundhyavaḥ* ।
*uta pavyā rathānāmadriṁ bhindantyojasā* ॥9॥
*āpathayo vipathayo'ntaspathā anupathāḥ* ।
*etebhirmahyaṁ nāmabhiryajñaṁ viṣṭāra ohate* ॥10॥
*adhā naro nyohate'dhā niyuta ohate* ।
*adhā pārāvatā iti chitrā rūpāṇi darśyā* ॥11॥

*chhandaḥstubhaḥ kubhanyava utsamā kīriṇo nṛtuḥ ।*
*te me ke chinna tāyava ūmā āsandṛśi tviṣe ॥12 ॥*
*ya ṛṣvā ṛṣṭividyutaḥ kavayaḥ santi vedhasaḥ ।*
*tamṛṣe mārutaṁ gaṇaṁ namasyā ramayā girā ॥13 ॥*
*achchha ṛṣe mārutaṁ gaṇaṁ dānā mitraṁ na yoṣaṇāṁ ।*
*divo vā dhṛṣṇava ojasā stutā dhībhiriṣaṇyata ॥14 ॥*
*nū manvāna eṣāṁ devām̐ achchhā na vakṣaṇā ।*
*dānā sacheta sūribhiryāmaśrutebhiriṁjabhiḥ ॥15 ॥*
*pra ye me bandhveṣe gāṁ vochanta sūrayaḥ pṛśiṁna vochanta mātaram ।*
*adhā pitaramiṣmiṇaṁ rudraṁ vochanta śikvasaḥ ॥16 ॥*
*sapta me sapta śākina ekamekā śatā daduḥ ।*
*yamunāyāmadhi śrutamudrādho gavyaṁ mṛje ni rādho aśvyaṁ mṛje ॥17 ॥*

ऋ. (Rv.) ५.५३.१-१६

को वेद जानमेषां को वा पुरा सुम्नेष्वास मरुताम्। यद्युयुज्रे किलास्यः ॥१॥
एतान्रथेषु तस्थुषः कः शुश्राव कथा ययुः ।
कस्मै सस्रुः सुदासे अन्वापय इळाभिर्वृष्टयः सह ॥२॥
ते म आहुर्य आययुरुप द्युभिर्विभिर्मदे ।
नरो मर्या अरेपस इमान्पश्यन्निति ष्टुहि ॥३॥
ये आञ्जिषु ये वाशीषु स्वभानवः स्रक्षु रुक्मेषु खादिषु। श्राया रथेषु धन्वसु ॥४॥
युष्माकं स्मा रथाँ अनु मुदे दधे मरुतो जीरदानवः। वृष्टी द्यावो यतीरिव ॥५॥
आ यं नरः सुदानवो ददाशुषे दिवः कोशमचुच्यवुः ।
वि पर्जन्यं सृजन्ति रोदसी अनु धन्वना यन्ति वृष्टयः ॥६॥
ततृदानाः सिन्धवः क्षोदसा रजः प्र सस्रुर्धेनवो यथा ।
स्यन्ना अश्वा इवाध्वनो विमोचने वि यद्वर्तन्त एन्यः ॥७॥
आ यात मरुतो दिव आन्तरिक्षादमादुत। माव स्थात परावतः ॥८॥
मा वो रसानितभा कुभा क्रुमुर्मा वः सिन्धुर्निरीरमत् ।
मा वः परि ष्ठात्सरयुः पुरीषिण्यस्मे इत्सुम्नमस्तु वः ॥९॥
तं वः शर्धं रथानां त्वेषं गणं मारुतं नव्यसीनाम् ।
अनु प्र यन्ति वृष्टयः ॥१०॥
शर्धंशर्धं व एषां व्रातंव्रातं गणगणं सुशस्तिभिः। अनु क्रामेम धीतिभिः ॥११॥
कस्मा अद्य सुजाताय रातहव्याय प्र ययुः। एना यामेन मरुतः ॥१२॥
येन तोकाय तनयाय धान्यं१ बीजं वहध्वे अक्षितम् ।
अस्मभ्यं तद्धत्तन यद्व ईमहे राधो विश्वायु सौभगम् ॥१३॥
अतीयाम निदस्तिरः स्वस्तिभिर्हित्वावद्यमरातीः ।
वृष्ट्वी शं योराप उस्रि भेषजं स्याम मरुतः सह ॥१४॥
सुदवेः समहासति सुवीरो नरो मरुतः स मर्त्यः। यं त्रायध्वे स्याम ते ॥१५॥
स्तुहि भोजान्स्तुवतो अस्य यामनि रणन्गावो न यवसे ।
यतः पूर्वाँइव सखीँरनु ह्वय गिरा गृणीहि कामिनः ॥ १६॥

*ko veda jānameṣāṁ ko vā purā sumneṣvāsa marutām । yadyuyujre kilāsyaḥ ॥1 ॥*
*etānratheṣu tasthuṣaḥ kaḥ śuśrāva kathā yayuḥ ।*
*kasmai sasruḥ sudāse anvāpaya iḷābhirvṛṣṭayaḥ saha ॥2 ॥*
*te ma āhurya āyayurupa dyubhirvibhirmade ।*
*naro maryā arepasa imānpaśyanniti ṣṭuhi ॥3 ॥*
*ye āñjiṣu ye vāśīṣu svabhānavaḥ srakṣu rukmeṣu khādiṣu । śrāyā ratheṣu dhanvasu ॥4 ॥*
*yuṣmākaṁ smā rathām̐ anu mude dadhe maruto jīradānavaḥ । vṛṣṭī dyāvo yatīriva ॥5 ॥*
*ā yaṁ naraḥ sudānavo dadāśuṣe divaḥ kośamachuchyavuḥ ।*
*vi parjanyaṁ sṛjanti rodasī anu dhanvanā yanti vṛṣṭayaḥ ॥6 ॥*
*tatṛdānāḥ sindhavaḥ kṣodasā rajaḥ pra sasrurdhenavo yathā ।*
*syannā aśvā ivādhvano vimochane vi yadvartanta enyaḥ ॥7 ॥*
*ā yāta maruto diva āntarikṣādamāduta । māva sthāta parāvataḥ ॥8 ॥*

*mā vo rasānitabhā kubhā krumurmā vaḥ sindhurnirīramat ।*
*mā vaḥ pari ṣṭhātsarayuḥ purīṣiṇyasme itsumnamastu vaḥ ॥9॥*
*taṁ vaḥ śardhaṁ rathānāṁ tveṣaṁ gaṇaṁ mārutaṁ navyasīnām ।*
*anu pra yanti vṛṣṭayaḥ ॥10॥*
*śardhaṁśardhaṁ va eṣāṁ vrātaṁvrātaṁ gaṇagaṇaṁ suśastibhiḥ ।*
*anu krāmema dhītibhiḥ ॥11॥*
*kasmā adya sujātāya rātahavyāya pra yayuḥ । enā yāmena marutaḥ ॥12॥*
*yena tokāya tanayāya dhānyaṁ1 bījaṁ vahadhve akṣitam ।*
*asmabhyaṁ taddhattana yadva īmahe rādho viśvāyu saubhagam ॥13॥*
*atīyāma nidastiraḥ svastibhirhitvāvadyamarātīḥ ।*
*vṛṣṭvī śaṁ yorāpa usri bheṣajaṁ syāma marutaḥ saha ॥14॥*
*sudaveḥ samahāsati suvīro naro marutaḥ sa martyaḥ । yaṁ trāyadhve syāma te ॥15॥*
*stuhi bhojāntstuvato asya yāmani raṇangāvo na yavase ।*
*yataḥ pūrvāṁ̐iva sakhīṁ̐ranu hvaya girā gṛṇīhi kāminaḥ ॥ 16 ॥*

ऋ. (Rv.) ५.५४.१-१५

प्र शर्धाय मारुताय स्वभानव इमां वाचमनजा पर्वतच्युते ।
घर्मस्तुभे दिव आ पृष्ठयज्वने द्युम्नश्रवसे महि नृम्णमर्चत ॥१॥
प्र वो मरुतस्तविषा उदन्यवो वयोवृधो अश्वयुजः परिज्रयः ।
सं विद्युता दधति वाशति त्रितः स्वरन्त्यापोऽवना परिज्रयः ॥२॥
विद्युन्महसो नरो अश्मदिद्यवो वातत्विषो मरुतः पर्वतच्युतः ।
अब्दया चिन्मुहुरा ह्रादुनीवृतः स्तनयदमा रभसा उदोजसः ॥३॥
व्य१क्तून् रुद्रा व्यहानि शिक्वसो व्य१न्तरिक्षं वि रजांसि धूतयः ।
वि यदज्राँ अजथ नाव ईं यथा वि दुर्गाणि मरुतो नाह रिष्यथ ॥४॥
तद्वीर्यं वो मरुतो महित्वनं दीर्घं ततान सूर्यो न योजनम् ।
एता न यामे अगृभीतशोचिषोऽनश्वदां यन्न्ययातना गिरिम् ॥५॥
अभ्राजि शर्धो मरुतो यदर्णसं मोषथा वृक्षं कपनेव वेधसः ।
अध स्मा नो अरमतिं सजोषसश्चक्षुरिव यन्तमनु नेषथा सुगम् ॥६॥
न स जीयते मरुतो न हन्यते न स्रेधयति न व्यथते न रिष्यति ।
नास्य राय उप दस्यन्ति नोतय ऋषिं वा यं राजानं वा सुषूदथ ॥७॥
नियुत्वन्तो ग्रमजितो यथा नरोऽर्यमणो न मरुतः कबन्धिनः ।
पिन्वन्त्युत्सं यदिनासो अस्वरन्व्युन्दन्ति पृथिवीं मध्वो अन्धसा ॥८॥
प्रवत्वतीयं पृथिवी मरुद्भ्यः प्रवत्वती द्यौर्भवति प्रयद्भ्यः ।
प्रवत्वतीः पथ्या अन्तरिक्ष्याः प्रवत्वन्तः पर्वता जीरदानवः ॥९॥
यन्मरुतः सभरसः स्वर्णरः सूर्य उदिते मदथा दिवो नरः ।
न वोऽश्वाः श्रथयन्ताह सिस्रतः सद्यो अस्याध्वनः पारमश्नुथ ॥१०॥
अंसेषु व ऋष्टयः पत्सु खादयो वक्षःसु रुक्मा मरुतो रथे शुभः ।
अग्निभ्राजसो विद्युतो गभस्त्योः शिप्राः शीर्षसु वितता हिरण्ययीः ॥११॥
तं नाकमर्यो अगृभीतशोचिषं रुशत्पिप्पलं मरुतो वि धूनुथ ।
समच्यन्त वृजनातित्विषन्त यत्स्वरन्ति घोषं विततमृतायवः ॥१२॥
युष्मादत्तस्य मरुतो विचेतसो रायः स्याम रथ्यो३ वयस्वतः ।
न यो युच्छति तिष्यो३ यथा दिवो३ स्मे रारन्त मरुतः सहस्रिणम् ॥१३॥
यूयं रयिं मरुतः स्पार्हवीरं यूयमृषिमवथ सामविप्रम् ।
यूयमर्वन्तं भरताय वाजं यूयं धत्थ राजानं श्रुष्टिमन्तम् ॥१४॥
तद्वो यामि द्रविणं सद्य ऊतयो येना स्व१र्ण ततनाम नॄँरभि ।
इदं सु मे मरुतो हर्यता वचो यस्य तरेम तरसा शतं हिमाः ॥१५॥

*pra śardhāya mārutāya svabhānava imāṁ vāchamanajā parvatachyute ।*
*gharmastubhe diva ā pṛṣṭhayajvane dyumnaśravase mahi nṛmṇamarchata ॥1॥*
*pra vo marutastaviṣā udanyavo vayovṛdho aśvayujaḥ parijrayaḥ ।*
*saṁ vidyutā dadhati vāśati tritaḥ svarantyāpo'vanā parijrayaḥ ॥2॥*
*vidyunmahaso naro aśmadidyavo vātatviṣo marutaḥ parvatachyutaḥ ।*

*abdayā chinmuhurā hrādunīvṛtaḥ stanayadamā rabhasā udojasaḥ* //3 //
*vya1katūn rudrā vyahāni śikvasoā vya1ntarikṣaṁ vi rajāṁsi dhūtayaḥ* /
*vi yadajrāṁ ajatha nāva īṁ yathā vi durgāṇi maruto nāha riṣyatha* //4 //
*tadvīryaṁ vo maruto mahitvanaṁ dīrghaṁ tatāna sūryo na yojanam* /
*etā na yāme agṛbhītaśochiṣo'naśvadāṁ yannyayātanā girim* //5 //
*abhrāji śardho maruto yadarṇasaṁ moṣathā vṛkṣaṁ kapaneva vedhasaḥ* /
*adha smā no aramatiṁ sajoṣasaśchakṣuriva yantamanu neṣathā sugam* //6 //
*na sa jīyate maruto na hanyate na sredhayati na vyathate na riṣyati* /
*nāsya rāya upa dasyanti notaya ṛṣiṁ vā yaṁ rājānaṁ vā suṣūdatha* //7 //
*niyutvanto gramajito yathā naro'ryamaṇo na marutaḥ kabandhinaḥ* /
*pinvantyutsaṁ yadināso asvaranvyundanti pṛthivī madhvo andhasā* //8 //
*pravatvatīyaṁ pṛthivī marudbhyaḥ pravatvatī dyaurbhavati prayadbhyaḥ* /
*pravatvatīḥ pathyā antarikṣayāḥ pravatvantaḥ parvatā jīradānavaḥ* //9 //
*yanmarutaḥ sabharasaḥ svarṇaraḥ sūrya udite madathā divo naraḥ* /
*na vo'śvāḥ śrathayantāha sisrataḥ sadyo asyādhvanaḥ pāramaśnutha* //10 //
*aṁseṣu va ṛṣṭayaḥ patsu khādayo vakṣaḥsu rukmā maruto rathe śubhaḥ* /
*agnibhrājaso vidyuto gabhastyoḥ śiprāḥ śīrṣasu vitatā hiraṇyayīḥ* //11 //
*taṁ nākamaryo agṛbhītaśochiṣaṁ ruśatpippalaṁ maruto vi dhūnutha* /
*samachyanta vṛjanātitviṣanta yatsvaranti ghoṣaṁ vitatamṛtāyavaḥ* //12 //
*yuṣmādattasya maruto vichetaso rāyaḥ syāma rathyo3 vayasvataḥ* /
*na yo yuchchhati tiṣyo3 yathā divo3 sme rāranta marutaḥ sahasriṇam* //13 //
*yūyaṁ rayiṁ marutaḥ spārhavīraṁ yūyamṛṣimavatha sāmavipram* /
*yūyamarvantaṁ bharatāya vājaṁ yūyaṁ dhattha rājānaṁ śruṣṭimantam* //14 //
*tadvo yāmi draviṇaṁ sadya ūtayo yenā sva1rṇa tatanāma nṝṁrabhi* /
*idaṁ su me maruto haryatā vacho yasya tarema tarasā śataṁ himāḥ* //15 //

ऋ. (Rv.) ५.५५.१-१०

प्रयज्यवो मरुतो भ्राजदृष्टयो बृहद्वयो दधिरे रुक्मवक्षसः ।
ईयन्ते अश्वैः सुयमेभिराशुभिः शुभं यातामनु रथा अवृत्सत ॥१॥
स्वयं दधिध्वे तविषीं यथा विद बृहन्महान्त उर्विया वि राजथ ।
उतान्तरिक्षं ममिरे व्योजसा शुभं यातामनु रथा अवृत्सत ॥२॥
साकं जाताः सुभ्वः साकमुक्षिताः श्रिये चिदा प्रतरं वावृधुर्नरः ।
विरोकिणः सूर्य्यस्येव रश्मयः शुभं यातामनु रथा अवृत्सत ॥३॥
अभूषेण्यं वो मरुतो महित्वनं दिदृक्षेण्यं सूर्यस्येव चक्षणम् ।
उतो अस्माँ अमृतत्वे दधातन शुभं यातामनु रथा अवृत्सत ॥४॥
उदीरयथा मरुतः समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिणः ।
न वो दस्रा उप दस्यन्ति धेनवः शुभं यातामनु रथा अवृत्सत ॥५॥
यदश्वान्धूर्षु पृषतीरयुग्ध्वं हिरण्ययान्प्रत्यत्काँ अमुग्ध्वम् ।
विश्वा इत्स्पृधो मरुतो व्यस्यथ शुभं यातामनु रथा अवृत्सत ॥६॥
न पर्वता न नद्यो वरन्त वो यत्राचिध्वं मरुतो गच्छथेदु तत् ।
उत द्यावापृथिवी याथना परि शुभं यातामनु रथ अवृत्सत ॥७॥
यत्पूर्व्यं मरुतो यच्च नूतनं यदुद्यते वसवो यच्च शस्यते ।
विश्वस्य तस्य भवथा नवेदसः शुभं यातामनु रथा अवृत्सत ॥८॥
मृळत नो मरुतो मा वधिष्टनास्मभ्यं शर्म बहुलं वि यन्तन ।
अधि स्तोत्रस्य सख्यस्य गातन शुभं यातामनु रथा अवृत्सत ॥९॥
यूयमस्मान्नयत वस्यो अच्छा निरंहतिभ्यो मरुतो गृणानाः ।
जुषध्वं नो हव्यदितिं यजत्रा वयं स्याम पतयो रयीणाम् ॥१०॥

*prayajyavo maruto bhrājadṛṣṭayo bṛhadvayo dadhire rukmavakṣasaḥ* /
*īyante aśvaiḥ suyamebhirāśubhiḥ śubhaṁ yātāmanu rathā avṛtsata* //1 //
*svayaṁ dadhidhve taviṣīṁ yathā vida bṛhanmahānta urviyā vi rājatha* /
*utāntarikṣaṁ mamire vyojasā śubhaṁ yātāmanu rathā avṛtsata* //2 //
*sākaṁ jātāḥ subhvaḥ sākamukṣitāḥ śriye chidā prataraṁ vāvṛdhurnaraḥ* /

*virokiṇaḥ sūryyasyeva raśmayaḥ śubhaṁ yātāmanu rathā avṛtsata //3 //*
*abhūṣeṇyaṁ vo maruto mahitvanaṁ didṛkṣeṇyaṁ sūryasyeva chakṣaṇam /*
*uto asmām̐ amṛtatve dadhātana śubhaṁ yātāmanu rathā avṛtsata //4 //*
*udīrayathā marutaḥ samudrato yūyaṁ vṛṣṭiṁ vaṣaryathā purīṣiṇaḥ /*
*na vo dasrā upa dasyanti dhenavaḥ śubhaṁ yātāmanu rathā avṛtsata //5 //*
*yadaśvāndhūrṣu pṛṣatīrayugdhvaṁ hiraṇyayānpratyatkām̐ amugdhvam /*
*viśvā itspṛdho maruto vyasyatha śubhaṁ yātāmanu rathā avṛtsata //6 //*
*na parvatā na nadyo varanta vo yatrāchidhvaṁ maruto gachchhathedu tat /*
*uta dyāvāpṛthivī yāthanā pari śubhaṁ yātāmanu ratha avṛtsata //7 //*
*yatpūrvyaṁ maruto yachcha nūtanaṁ yadudyate vasavo yachcha śasyate /*
*viśvasya tasya bhavathā navedasaḥ śubhaṁ yātāmanu rathā avṛtsata //8 //*
*mṛḷata no maruto mā vadhiṣṭanāsmabhyaṁ śarma bahulaṁ vi yantana /*
*adhi stotrasya sakhyasya gātana śubhaṁ yātāmanu rathā avṛtsata //9 //*
*yūyamasmānnayata vasyo achchhā niraṁhatibhyo maruto gṛṇānāḥ /*
*juṣadhvaṁ no havyaditiṁ yajatrā vayaṁ syāma patayo rayīṇām //10 //*

ऋ. (Rv.) ५.५६.१-९

अग्ने शर्धन्तमा गणं पिष्टं रुक्मेभिरञ्जिभिः ।
विशो अद्य मरुतामव ह्वये दिवश्चिद्रोचनादधि ॥१॥
यथा चिन्मन्यसे हृदा तदिन्मे जग्मुराशसः ।
ये ते नेदिष्ठं हवनान्यागमन्तान्वर्ध भीमसंदृशः ॥२॥
मीळहुष्मतीव पृथिवी पराहता मदन्त्येत्यस्मदा ।
ऋक्षो न वो मरुतः शिमीवाँ अमो दुध्रो गौरिव भीमयुः ॥३॥
नि ये रिणन्त्योजसा वृथा गावो न दुर्धुरः ।
अश्मानं चित्स्वर्यं१ पर्वतं गिरिं प्र च्यावयन्ति यामभिः ॥४॥
उत्तिष्ठ नूनमेषां स्तोमैः समुक्षितानाम् ।
मरुतां पुरुतममपूर्व्यं गवां सर्गमिव ह्वये ॥५॥
युङ्ग्धं ह्यरुषी रथे युङ्ग्धं रथेषु रोहितः ।
युङ्ग्धं हरी अजिरा धुरि वोळहवे वहिष्ठा धुरि वोळहवे ॥६॥
उत स्य वाज्यरुषस्तुविष्वणिरिह स्म धायि दर्शतः ।
मा वो यामेषु मरुतश्चिरं करत्प्र तं रथेषु चोदत ॥७॥
रथं नु मारुतं वयं श्रवस्युमा हुवामहे ।
आ यस्मिन्तस्थौ सुरणनि बिभ्रती सचा मरुत्सु रोदसी ॥८॥
तं वः शर्धं रथेशुभं त्वेषं पनस्युमा हुवे ।
यस्मिन्त्सुजाता सुभगा महीयते सचा मरुत्सु मीळहुषी ॥९॥

*agne śardhantamā gaṇaṁ piṣṭaṁ rukmebhiriṁjabhiḥ /*
*viśo adya marutāmava hvaye divaśchidrochanādadhi //1 //*
*yathā chinmanyase hṛdā tadinme jagmurāśasaḥ /*
*ye te nediṣṭhaṁ havanānyāgamantānvardha bhīmasaṁdṛśaḥ //2 //*
*mīḷahuṣmatīva pṛthivī parāhatā madantyetyasmadā /*
*ṛkṣo na vo marutaḥ śimīvām̐ amo dudhro gauriva bhīmayuḥ //3 //*
*ni ye riṇantyojasā vṛthā gāvo na durdhuraḥ /*
*aśmānaṁ chitsvaryaṁ1 parvataṁ giriṁ pra chyāvayanti yāmabhiḥ //4 //*
*uttiṣṭha nūnameṣāṁ stomaiḥ samukṣitānām /*
*marutāṁ purutamamapūrvyaṁ gavāṁ sargamiva hvaye //5 //*
*yuṅgdhvaṁ hyaruṣī rathe yuṅgdhvaṁ ratheṣu rohitaḥ /*
*yuṅgdhvaṁ harī ajirā dhuri voḷahave vahiṣṭhā dhuri voḷahave //6 //*
*uta sya vājyaruṣastuviṣvaṇiriha sma dhāyi darśataḥ /*
*mā vo yāmeṣu marutaśchiraṁ karatpra taṁ ratheṣu chodata //7 //*
*rathaṁ nu mārutaṁ vayaṁ śravasyumā huvāmahe /*
*ā yasmintasthau suraṇani bibhratī sachā marutsu rodasī //8 //*
*taṁ vaḥ śardhaṁ ratheśubhaṁ tveṣaṁ panasyumā huve /*
*yasmintsujātā subhagā mahīyate sachā marutsu mīḷahuṣī //9 //*

ऋ. (Rv.) ५.५७.१-८

आ रुद्रास इन्द्रवन्तः सजोषसो हिरण्यरथाः सुविताय गन्तन ।
इयं वो अस्मत्प्रति हर्यते मतिस्तृष्णजे न दिव उत्सा उदन्यवे ॥१॥
वाशीमन्त ऋष्टिमन्तो मनीषिणः सुधन्वान इषुमन्तो निषंगिणः ।
स्वश्वाः स्थ सुरथाः पृश्निमातरः स्वायुधा मरुतो याथना शुभम् ॥२॥
धुनुथ द्यां पर्वतान्दाशुषे वसु नि वो वना जिहते यामनो भिया ।
कोपयथ पृथिवीं पृश्निमातरः शुभे यदुग्राः पृषतीरयुग्ध्वम् ॥३॥
वातत्विषो मरुतो वर्षनिर्णिजो यमा इव सुसदृशः सुपेशसः ।
पिशंगाश्व अरुणाश्व अरेपसः प्रत्वक्षसो महिना द्यौरिवोरवः ॥४॥
पुरुद्रप्सा अंजिमन्तः सुदानवस्त्वेषसंदृशो अनवभ्रराधसः ।
सुजातासो जनुषा रुक्मवक्षसो दिवो अर्का अमृतं नाम भेजिरे ॥५॥
ऋष्टयो वो मरुतो अंसयोरधि सह ओजो बाह्वोर्वो बलं हितम् ।
नृम्णा शीर्षस्वायुधा रथेषु वो विश्वा वः श्रीरधि तनूषु पिपिशे ॥६॥
गोमदश्ववद्रथवत्सुवीरं चन्द्रवद्राधो मरुतो ददा नः ।
प्रशस्तिं नः कृणुत रुद्रियासो भक्षीय वोऽवसो दैव्यस्य ॥७॥
हये नरो मरुतो मृळता नस्तुवीमघासो अमृता ऋतज्ञाः ।
सत्यश्रुतः कवयो युवानो बृहद् गिरयो बृहदुक्षमाणाः ॥८॥

*ā rudrāsa indravantaḥ sajoṣaso hiraṇyarathāḥ suvitāya gantana /*
*iyaṁ vo asmatprati haryate matistṛṣṇaje na diva utsā udanyave //1//*
*vāśīmanta ṛṣṭimanto manīṣiṇaḥ sudhanvāna iṣumanto niṣaṁgiṇaḥ /*
*svaśvāḥ stha surathāḥ pṛśnimātaraḥ svāyudhā maruto yāthanā śubham //2//*
*dhunutha dyāṁ parvatāndāśuṣe vasu ni vo vanā jihate yāmano bhiyā /*
*kopayatha pṛthivīṁ pṛśnimātaraḥ śubhe yadugrāḥ pṛṣatīrayugdhvam //3//*
*vātatviṣo maruto varṣanirṇijo yamā iva susadṛśaḥ supeśasaḥ /*
*piśaṁgāśva aruṇāśva arepasaḥ pratvakṣaso mahinā dyaurivoravaḥ //4//*
*purudrapsā aiṁjamantaḥ sudānavastveṣasaṁdṛśo anavabhrarādhasaḥ /*
*sujātāso januṣā rukmavakṣaso divo arkā amṛtaṁ nāma bhejire //5//*
*ṛṣṭayo vo maruto aṁsayoradhi saha ojo bāhvorvo balaṁ hitam /*
*nṛmṇā śīrṣasvāyudhā ratheṣu vo viśvā vaḥ śrīradhi tanūṣu pipiśe //6//*
*gomadaśvavadrathavatsuvīraṁ chandravadrādho maruto dadā naḥ /*
*praśasiṁta naḥ kṛṇuta rudriyāso bhakṣīya vo'vaso daivyasya //7//*
*haye naro maruto mṛḷatā nastuvīmaghāso amṛtā ṛtajñāḥ /*
*satyaśrutaḥ kavayo yuvāno bṛhad girayo bṛhadukṣamāṇāḥ //8//*

ऋ. (Rv.) ५.५८.१-८

तमु नूनं तविषीमन्तमेषां स्तुषे गणं मारुतं नव्यसीनाम् ।
य आश्वश्वाअमवद्वहन्त उतेशिरे अमृतस्य स्वराजः ॥१॥
त्वेषं गणं तवसं खादिहस्तं धुनिव्रतं मायिनं दातिवारम् ।
मयाभुवो ये अमिता महित्वा वन्दस्व विप्र तुविराधसो नृन् ॥२॥
आ वो यन्तूदवाहासो अद्य वृष्टिं ये विश्वे मरुतो जुनन्ति ।
अयं यो अग्निर्मरुतः समिद्ध एतं जुषध्वं कवयो युवानः ॥३॥
यूयं राजानमिर्यं जनाय विभ्वतष्टं जनयथा यजत्राः ।
युष्मदेति मुष्टिहा बाहूजूतो युष्मत्सदश्वो मरुतः सुवीरः ॥४॥
अराइवेदचरमा अहेव प्रप्र जायन्ते अकवा महोभिः ।
पृश्नेः पुत्रा उपमासो रभिष्ठाः स्वया मत्या मरुतः सं मिमिक्षुः ॥५॥
यत्प्रायासिष्ट पृषतीभिरश्वैर्वीळुपविभिर्मरुतो रथेभिः ।
क्षोदन्त आपो रिणते वनान्यवोस्त्रियो वृषभः क्रन्दतु द्यौः ॥६॥
प्रथिष्ट यामन्पृथिवी चिदेषा भर्तेव गर्भं स्वमिच्छवो धुः ।
वातान्ह्यश्वान्धुर्यायुयुज्रे वर्षं स्वेदं चक्रिरे रुद्रियासः ॥७॥
हये नरो मरुतो मृळमा नस्तुवीमघासो अमृता ऋतज्ञाः ।

सत्यश्रुतः कवयो युवानो बृहद् गिरयो बृहदुक्षमाणाः ॥८॥
*tamu nūnaṁ taviṣīmantameṣāṁ stuṣe gaṇaṁ mārutaṁ navyasīnām /*
*ya āśvaśvāamavadvahanta uteśire amṛtasya svarājaḥ //1 //*
*tveṣaṁ gaṇaṁ tavasaṁ khādihastaṁ dhunivrataṁ māyinaṁ dātivāram /*
*mayābhuvo ye amitā mahitvā vandasva vipra tuvirādhaso nṛn //2 //*
*ā vo yantūdavāhāso adya vṛṣṭiṁ ye viśve maruto junanti /*
*ayaṁ yo agnirmarutaḥ samiddha etaṁ juṣadhvaṁ kavayo yuvānaḥ //3 //*
*yūyaṁ rājānamiryaṁ janāya vibhvataṣṭaṁ janayathā yajatrāḥ /*
*yuṣmadeti muṣṭihā bāhūjūto yuṣmatsadaśvo marutaḥ suvīraḥ //4 //*
*arāivedacharamā aheva prapra jāyante akavā mahobhiḥ /*
*pṛśneḥ putrā upamāso rabhiṣṭhāḥ svayā matyā marutaḥ saṁ mimikṣuḥ //5 //*
*yatprāyāsiṣṭa pṛṣatībhiraśvairvīḻupavibhirmaruto rathebhiḥ /*
*kṣodanta āpo riṇate vanānyavosriyo vṛṣabhaḥ krandatu dyauḥ //6 //*
*prathiṣṭa yāmanpṛthivī chideṣā bharteva garbhaṁ svamichchhavo dhuḥ /*
*vātānhyaśvāndhuryāyuyujre varṣaṁ svedaṁ chakrire rudriyāsaḥ //7 //*
*haye naro maruto mṛḻamā nastuvīmaghāso amṛtā ṛtajñāḥ /*
*satyaśrutaḥ kavayo yuvāno bṛhad girayo bṛhadukṣamāṇāḥ //8 //*

ऋ. (Rv.) ५.५९.१-८

प्र वः स्पळक्रन्त्सुविताय दवनेऽर्चा दिवे प्र पृथिव्या ऋतं भरे ।
उक्षन्ते अश्वान्तरुषन्त आ रजोऽनु स्वं भानुं श्रथयन्ते अर्णवैः ॥१॥
अमादेषां भियसा भूमिरेजति नौर्न पूर्णा क्षरति व्यथिर्यती ।
दूरेदृशो ये चितयन्त एमभिरन्तर्महे विदथे येतिरे नरः ॥२॥
गवामिव श्रियसे शृंगमुत्तमं सूर्यो न चक्षू रजसो विसर्जने ।
अत्या इव सुभ्व१श्चारवः स्थन मर्या इव श्रियसे चेतथा नरः ॥३॥
को वो महान्ति महतामुदश्नवत्कस्काव्या मरुतः को ह पौंस्या ।
यूयं ह भूमिं किरणं न रेजथ प्र यद्भरध्वे सुविताय दावने ॥४॥
अश्वाइवेदरुषासः सबन्धवः शूराइव प्रयुधः प्रोत युयुधुः ।
मर्या इव सुवृधो वावृधुर्नरः सूर्यस्य चक्षुः प्र मिनन्ति वृष्टिभिः ॥५॥
ते अज्येष्ठा अकनिष्ठास उद्भिदोऽमध्यामासो महसा नि वावृधुः ।
सुजातासो जनुषा पृश्निमातरो दिवो मर्या आ नो अच्छा जिगातन ॥६॥
वयो न ये श्रेणीः पप्तुरोजसान्तान्दिवो बृहतः सानुनस्परि ।
अश्वास एषामुभये यथा विदुः प्र पर्वतस्य नभनूँरचुच्यवुः ॥७॥
मिमातु द्यौरदितिर्वीतये नः सं दानुचित्रा उषसो यतन्ताम् ।
आचुच्यवुर्दिव्यं कोशमेत ऋषे रुद्रस्य मरुतो गृणानाः ॥८॥
*pra vaḥ spaḻakrantsuvitāya davane'rchā dive pra pṛthivyā ṛtaṁ bhare /*
*ukṣante aśvāntaruṣanta ā rajo'nu svaṁ bhānuṁ śrathayante arṇavaiḥ //1 //*
*amādeṣāṁ bhiyasā bhūmirejati naurna pūrṇā kṣarati vyathiryatī /*
*dūredṛśo ye chitayanta emabhirantarmahe vidathe yetire naraḥ //2 //*
*gavāmiva śriyase śṛṁgamuttamaṁ sūryo na chakṣū rajaso visarjane /*
*atyā iva subhva1śchāravaḥ sthana maryā iva śriyase chetathā naraḥ //3 //*
*ko vo mahānti mahatāmudaśnavatkaskāvyā marutaḥ ko ha pauṁsyā /*
*yūyaṁ ha bhūmiṁ kiraṇaṁ na rejatha pra yadbharadhve suvitāya dāvane //4 //*
*aśvāivedaruṣāsaḥ sabandhavaḥ śūrāiva prayudhaḥ prota yuyudhuḥ /*
*maryā iva suvṛdho vāvṛdhurnaraḥ sūryasya chakṣuḥ pra minanti vṛṣṭibhiḥ //5 //*
*te ajyeṣṭhā akaniṣṭhāsa udbhido'madhyāmāso mahasā ni vāvṛdhuḥ /*
*sujātāso januṣā pṛśnimātaro divo maryā ā no achchhā jigātana //6 //*
*vayo na ye śreṇīḥ papturojasāntāndivo bṛhataḥ sānunaspari /*
*aśvāsa eṣāmubhaye yathā viduḥ pra parvatasya nabhanūm̐rachuchyavuḥ //7 //*
*mimātu dyauraditivītaye naḥ saṁ dānuchitrā uṣaso yatantām /*
*āchuchyavurdivyaṁ kośameta ṛṣe rudrasya maruto gṛṇānāḥ //8 //*

ऋ. (Rv.) ५.६१.१-४

के ष्ठा नरः श्रेष्ठतमा य एकएक आयय। परमस्याः परावतः ॥१॥
क्व१ वोऽश्वाः क्वा३भीषवः कथं शेक कथा यय। पृष्ठे सदो नसोर्यमः ॥२॥
जघने चोद एषां वि सक्थानि नरो यमुः। पुत्रकृथे न जनयः ॥३॥
परा वीरास एतन मर्यासो भद्रजानयः अग्नितपो यथासथ ॥४॥
*ke ṣṭhā naraḥ śreṣṭhatamā ya ekaeka āyaya / paramasyāḥ parāvataḥ //1 //*
*kva1 vo'śvāḥ kvā3bhīṣavaḥ kathaṁ śeka kathā yaya / pṛṣṭhe sado nasoryamaḥ //2 //*
*jaghane choda eṣāṁ vi sakthāni naro yamuḥ / putrakṛthe na janayaḥ //3 //*
*parā vīrāsa etana maryāso bhadrajānayaḥ agnitapo yathāsatha //4 //*

ऋ. (Rv.) ५.६१.११-१६

य ईं वहन्त आशुभिः पिबन्तो मदिरं मधु। अत्र श्रवाँसि दधिरे ॥११॥
येषां श्रियाधि रोदसी विभ्राजन्ते रथेष्वा। दिवि रुक्म इवोपरि ॥१२॥
युवा स मारुतो गणस्त्वेषरथो अनेद्यः। शुभंयावाप्रतिष्कुतः ॥१३॥
को वेद नूनमेषां यत्रामदन्ति धूतयः। ऋतजाता अरेपसः ॥१४॥
यूयं मर्तं विपन्यवः प्रणेतार इत्था धिया। श्रोतारो यामहूतिषु ॥१५॥
ते नो वसूनि काम्या पुरुश्चन्द्रा रिशादसः। आ यज्ञियासो ववृत्तन ॥१६॥
*ya īṁ vahanta āśubhiḥ pibanto madiraṁ madhu / atra śravām̐si dadhire //11 //*
*yeṣāṁ śriyādhi rodasī vibhrājante ratheṣvā / divi rukma ivopari //12 //*
*yuvā sa māruto gaṇastveṣaratho anedyaḥ / śubhaṁyāvāpratiṣkutaḥ //13 //*
*ko veda nūnameṣāṁ yatrāmadanti dhūtayaḥ / ṛtajātā arepasaḥ //14 //*
*yūyaṁ martaṁ vipanyavaḥ praṇetāra itthā dhiyā / śrotāro yāmahūtiṣu //15 //*
*te no vasūni kāmyā puruśchandrā riśādasaḥ / ā yajñiyāso vavṛttana //16 //*

सा. (Sv.) ३५६

यदी वहन्त्याशवो भ्राजमाना रथेष्वा। पिबन्तो मदिरं मधु तत्र श्रवांसि कृण्वते ॥५॥
*yadī vahantyāśavo bhrājamānā ratheṣvā /*
*pibanto madiraṁ madhu tatra śravāṁsi kṛṇvate //5 //*

७. मरुतो वाग्निश्च (Maruto Vāgniścha) - ऋ. (Rv.) ५.६०.१-८

ईळे अग्निं स्ववसं नमोभिरिह प्रसत्तो वि चयत्कृतं नः ।
रथैरिव प्र भरे वाजयद्भिः प्रदक्षिणिन्मरुतां स्तोममृध्याम् ॥१॥
आ ये तस्थुः पृषतीषु श्रुतासु सुखेषु रुद्रा मरुतो रथेषु ।
वना चिदुग्रा जिहते नि वो भिया पृथिवी चिद्रेजते पर्वतश्चित् ॥२॥
पर्वतश्चिन्महि वृद्धो बिभाय दिवश्चित्सानु रेजत स्वने वः ।
यत्क्रीळथ मरुत ऋष्टिमन्त आप इव सध्र्यंचो धवध्वे ॥३॥
वरा इवेद्रैवतासो हिरण्यैरभि स्वधाभिस्तन्वः पिपिश्रे ।
श्रिये श्रेयांसस्तवसो रथेषु सत्रा महांसि चक्रिरे तनूषु ॥४॥
अज्येष्ठासो अकनिष्ठास एते सं भ्रातरो वावृधुः सौभगाय ।
युवा पिता स्वपा रुद्र एषां सुदुघा पृश्निः सुदिना मरुद्भ्यः ॥५॥
यदुत्तमे मरुतो मध्यमे वा यद्वावमे सुभगासो दिवि ष्ठ ।
अतो नो रुद्रा उत वा न्व१स्याग्ने वित्ताद्धविषो यद्यजाम ॥६॥
अग्निश्च यन्मरुतो विश्ववदेसो दिवो वहध्व उत्तरादधि ष्णुभिः ।
ते मन्दसाना धुनयो रिशादसो वामं धत्त यजमानाय सुन्वते ॥७॥
अग्ने मरुद्भिः शुभयद्भिरृक्वभिः सोमं पिब मन्दसानो गणश्रिभिः ।
पावकेभिर्विश्वमिन्वेभिरायुभिर्वैश्वानर प्रदिवा केतुना सजूः ॥८॥
*īḻe agiṁna svavasaṁ namobhiriha prasatto vi chayatkṛtaṁ naḥ /*
*rathairiva pra bhare vājayadbhiḥ pradakṣiṇinmarutāṁ stomamṛdhyām //1 //*
*ā ye tasthuḥ pṛṣatīṣu śrutāsu sukheṣu rudrā maruto ratheṣu /*
*vanā chidugrā jihate ni vo bhiyā pṛthivī chidrejate parvataśchit //2 //*
*parvataśchinmahi vṛddho bibhāya divaśchitsānu rejata svane vaḥ /*
*yatkrīḻatha maruta ṛṣṭimanta āpa iva sadhryaṁcho dhavadhve //3 //*

*varā ivedraivatāso hiraṇyairabhi svadhābhistanvaḥ pipiśre* ।
*śriye śreyāṁsastavaso ratheṣu satrā mahāṁsi chakrire tanūṣu* ॥4॥
*ajyeṣṭhāso akaniṣṭhāsa ete saṁ bhrātaro vāvṛdhuḥ saubhagāya* ।
*yuvā pitā svapā rudra eṣāṁ sudughā pṛśniḥ sudinā marudbhyaḥ* ॥5॥
*yaduttame maruto madhyame vā yadvāvame subhagāso divi ṣṭha* ।
*ato no rudrā uta vā nva1syāgne vittāddhaviṣo yadyajāma* ॥6॥
*agniścha yanmaruto viśvavadeso divo vahadhva uttarādadhi ṣṇubhiḥ* ।
*te mandasānā dhunayo riśādaso vāmaṁ dhatta yajamānāya sunvate* ॥7॥
*agne marudbhiḥ śubhayadbhirṛkvabhiḥ somaṁ piba mandasāno gaṇaśribhiḥ* ।
*pāvakebhirviśvaminvebhirāyubhirvaiśvānara pradivā ketunā sajūḥ* ॥8॥

८. रथवीतिर्दाल्भ्यः (Rathavītirdālbhyaḥ) - ऋ. (Rv.) ५.६१.१७-१९

एतं मे स्तोममूर्म्ये दार्भ्याय परा वह। गिरो देवि रथीरिव ॥१७॥
उत मे वोचतादिति सुतसोमे रथवीतौ। न कामो अप वेति मे ॥१८॥
एष क्षेति रथवीतिर्मघवा गोमतीरनु। पर्वतेष्वपश्रितः ॥१९॥
*etaṁ me stomamūrmye dārbhyāya parā vaha । giro devi rathīriva* ॥17॥
*uta me vochatāditi sutasome rathavītau । na kāmo apa veti me* ॥18॥
*eṣa kṣeti rathavītirmaghavā gomatīranu । parvateṣvapaśritaḥ* ॥19॥

९. शशीयसी तरन्तमहिषी (Śaśīyasī Tarantamahiṣī) - ऋ. (Rv.) ५.६१.५-८

सनत्साश्वयं पशुमुत गव्यं शतावयम्। श्यावाश्वस्तुताय या दोर्वीरायोपबर्बृहत् ॥५॥
उत त्वा स्त्री शशीयसी पुंसो भवति वस्यसी। अदेवत्रादराधसः ॥६॥
वि या जानाति जसुरिं वि तृष्यन्तं वि कामिनम्। देवत्रा कृणुते मनः ॥७॥
उत घा नेमो अस्तुतः पुमाँ इति ब्रुवे पणिः। स वैरदेय इत्समः ॥८॥
*sanatsāśvayaṁ paśumuta gavyaṁ śatāvayam । śyāvāśvastutāya yā dorvīrāyopabarbṛhat* ॥5॥
*uta tvā strī śaśīyasī puṁso bhavati vasyasī । adevatrādarādhasaḥ* ॥6॥
*vi yā jānāti jasuriṁ vi tṛṣyantaṁ vi kāminam । devatrā kṛṇute manaḥ* ॥7॥
*uta ghā nemo astutaḥ pumāṁ̐ iti bruve paṇiḥ । sa vairadeya itsamaḥ* ॥8॥

१०. सविता (Savitā) - ऋ. (Rv.) ५.८१.१-५

युंजते मन उत युंजते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होता दधे वायुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥१॥
विश्वा रूपाणि प्रति मुंचते कविः प्रासावीद्भद्रं द्विपदे चतुष्पदे ।
वि नाकमख्यत्सविता वरेण्योऽनु प्रयाणमुषसो वि राजति ॥२॥
यस्य प्रयाणमन्वन्य इद्ययुर्देवा देवस्य महिमानमोजसा ।
यः पार्थिवानि विममे स एतशो रजांसि देवः सविता महित्वना ॥३॥
उत यासि सवितस्त्रीणि रोचनोात सूर्यस्य रश्मिभिः समुच्यसि ।
उत रात्रीमुभयतः परीयस उत मित्रो भवसि देव धर्मभिः ॥४॥
उतेशिषे प्रसवस्य त्वमेक इदुत पूषा भवसि देव यामभिः ।
उतेदं भुवनं वि राजसि श्यावाश्वस्ते सवितः स्तोममानशे ॥५॥
*yuṁjate mana uta yuṁjate dhiyo viprā viprasya bṛhato vipaśchitaḥ* ।
*vi hotā dadhe vāyunāvideka inmahī devasya savituḥ pariṣṭutiḥ* ॥1॥
*viśvā rūpāṇi prati muṁchate kaviḥ prāsāvīdbhadraṁ dvipade chatuṣpade* ।
*vi nākamakhyatsavitā vareṇyo'nu prayāṇamuṣaso vi rājati* ॥2॥
*yasya prayāṇamanvanya idyayurdevā devasya mahimānamojasā* ।
*yaḥ pārthivāni vimame sa etaśo rajāṁsi devaḥ savitā mahitvanā* ॥3॥
*uta yāsi savitastrīṇi rochanoāta sūryasya raśmibhiḥ samuchyasi* ।
*uta rātrīmubhayataḥ parīyasa uta mitro bhavasi deva dharmabhiḥ* ॥4॥
*uteśiṣe prasavasya tvameka iduta pūṣā bhavasi deva yāmabhiḥ* ।
*utedaṁ bhuvanaṁ vi rājasi śyāvāśvaste savitaḥ stomamānaśe* ॥5॥

ऋ. (Rv.) ५.८२.१-९

तत्सवितुर्वृणीमहे वयं देवस्य भोजनम्। श्रेष्ठं सर्वधातमं तुरं भगस्य धीमहि ॥१॥

अस्य हि स्वयशस्तरं सवितुः कच्चन प्रियम्। न मिनन्ति स्वराज्यम् ॥२॥
स हि रत्नानि दाशुषे सुवाति सविता भगः। तं भागं चित्रमीमहे ॥३॥
अद्या नो देव सवितः प्रजावत्सावीः सौभगम्। परा दुःष्वप्न्यं सुव ॥४॥
विश्वानि देव सवितर्दुरितानि परासुव। यद्भद्रं तन्न आ सुव ॥५॥
अनागसो अदितये देवस्य सवितुः सवे। विश्वा धामानि धीमहि ॥६॥
आ विश्वदेवं सत्पतिं सूक्तैरद्या वृणीमहे। सत्यसवं सवितारम् ॥७॥
य इमे उभे अहनी पुर एत्यप्रयुच्छन्। स्वाधीर्देवः सविता ॥८॥
य इमा विश्वा जातान्याश्रावयति श्लोकेन। प्र च सुवाति सविता ॥९॥
*tatsaviturvṛṇīmahe vayaṁ devasya bhojanam /*
*śreṣṭhaṁ sarvadhātamaṁ turaṁ bhagasya dhīmahi //1 //*
*asya hi svayaśastaraṁ savituḥ kachchana priyam / na minanti svarājyam //2 //*
*sa hi ratnāni dāśuṣe suvāti savitā bhagaḥ / taṁ bhāgaṁ chitramīmahe //3 //*
*adyā no deva savitaḥ prajāvatsāvīḥ saubhagam / parā duḥsvapnyaṁ suva //4 //*
*viśvāni deva savitarduritāni parāsuva / yadbhadraṁ tanna ā suva //5 //*
*anāgaso aditaye devasya savituḥ save / viśvā dhāmāni dhīmahi //6 //*
*ā viśvadevaṁ satpatiṁ sūktairadyā vṛṇīmahe / satyasavaṁ savitāram //7 //*
*ya ime ubhe ahanī pura etyaprayuchchhan / svādhīrdevaḥ savitā //8 //*
*ya imā viśvā jātānyāśrāvayati ślokena / pra cha suvāti savitā //9 //*

## ६८५. श्यावाश्वो वामदेवो वा (सास्वा.साग्री.); वामदेवः (सार्षेदी.) (Śyāvāśvo Vāmadevo Vā [Sas.Ssb.]; Vāmadevaḥ [Sad.])

१. अग्निः (Agniḥ) - सा. (Sv.) ६३

ओ जुहोता हविषा मर्जयध्वं नि होतारं गृहपतिं दधिध्वम् ।
इडस्पदे नमसा रातहव्यं सपर्यता यजतं पस्त्यानाम् ॥१॥
*o juhotā haviṣā marjayadhvaṁ ni hotāraṁ gṛhapatiṁ dadhidhvam /*
*iḍaspade namasā rātahavyaṁ saparyatā yajataṁ pastyānām //1 //*

## ६८६. श्येन आग्नेयः (Śyena Āgneyaḥ)

१. अग्निर् जातवेदा (Agnir Jātavedā) - ऋ. (Rv.) १०.१८८.१-३

प्र नूनं जातवेदसमश्वं हिनोत वाजिनम्। इदं नो बर्हिरासदे ॥१॥
अस्य प्र जातवेदसो विप्रवीरस्य मीळ्हुषः। महीमियर्मि सुष्टुतिम् ॥२॥
या रुचो जातवेदसो देवत्रा हव्यवाहनीः। ताभिर्नो यज्ञमिन्वतु ॥३॥
*pra nūnaṁ jātavedasamaśvaṁ hinota vājinam / idaṁ no barhirāsade //1 //*
*asya pra jātavedaso vipravīrasya mīḷahuṣaḥ / mahīmiyarmi suṣṭutim //2 //*
*yā rucho jātavedaso devatrā havyavāhanīḥ / tābhirno yajñaminvatu //3 //*

## ६८७. श्रद्धा कामायनी (Śraddhā Kāmāyanī)

१. श्रद्धा (Śraddhā) - ऋ. (Rv.) १०.१५१.१-५

श्रद्धयाग्निः समिध्यते श्रद्धया हूयते हविः। श्रद्धां भगस्य मूर्धनि वचसा वेदयामसि ॥१॥
प्रियं श्रद्धे ददतः प्रियं श्रद्धे दिदासतः। प्रियं भोजेषु यज्वस्विदं म उदितं कृधि ॥२॥
यथा देवा असुरेषु श्रद्धामुग्रेषु चक्रिरे। एवं भोजेषु यज्वस्वस्माकमुदितं कृधि ॥३॥
श्रद्धां देवा यजमाना वायुगोपा उपासते। श्रद्धां हृदय्य१याकूत्या श्रद्धया विन्दते वसु ॥४॥
श्रद्धां प्रातर्हवामहे श्रद्धां मध्यन्दिनं परि। श्रद्धां सूर्यस्य निम्रुचि श्रद्धे श्रद्धापयेह नः ॥५॥
*śraddhayāgniḥ samidhyate śraddhayā hūyate haviḥ /*
*śraddhāṁ bhagasya mūrdhani vachasā vedayāmasi //1 //*
*priyaṁ śraddhe dadataḥ priyaṁ śraddhe didāsataḥ /*
*priyaṁ bhojeṣu yajvasvidaṁ ma uditaṁ kṛdhi //2 //*
*yathā devā asureṣu śraddhāmugeṣu chakrire /*
*evaṁ bhojeṣu yajvasvasmākamuditaṁ kṛdhi //3 //*
*śraddhā devā yajamānā vāyugopā upāsate /*
*śraddhā hṛdayya1yākūtyā śraddhayā vindate vasu //4 //*

*śraddhāṁ prātarhavāmahe śraddhāṁ madhyandinaṁ pari ।*
*śraddhāṁ sūryasya nimruchi śraddhe śraddhāpayeha naḥ ॥5 ॥*

## ६८८. श्रीकामः (Śrīkāmaḥ)

१. विद्वद्राजानौ (Vidvadrājānau) - य. (Yv.) ३२.१६

इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नु ताम्। मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा ॥१६॥
*idaṁ me brahma cha kṣatraṁ chobhe śriyamaśnu tām ।*
*mayi devā dadhatu śriyamuttamāṁ tasyai te svāhā ॥16 ॥*

## ६८९. श्रुष्टिगुः (Śruṣṭiguḥ)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.११९.२

तुरण्यवो मधुमन्तं घृतश्चुतं विप्रासो अर्कमानृचुः ।
अस्मे रयिः पप्रथे वृष्ण्यं शवोऽस्मे सुवानास इन्दवः ॥२॥
*turaṇyavo madhumantaṁ ghṛtaśchutaṁ viprāso arkamānṛchuḥ ।*
*asme rayiḥ paprathe vṛṣṇyaṁ śavo'sme suvānāsa indavaḥ ॥2 ॥*

## ६९०. श्रुष्टिगुः काण्वः (साग्री. सास्वा. ऋसर्व.); बालखिल्यः (सार्षेदी.) (Śruṣṭiguḥ Kāṇvaḥ [Ssb. Sas. Rss.]; Bālakhilyaḥ [Sad.])

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.५१.१-१०; सा. (Sv.) ३००; १६०९-१६१०

ऋ. (Rv.) ८.५१.१-१०

यथा मनौ सांवरणौ सोममिन्द्रापिबः सुतम् ।
नीपातिथौ मघवन् मेध्यातिथौ पुष्टिगौ श्रुष्टिगौ सचा ॥१॥
पार्षद्वाणः प्रस्कण्वं समसादयच्छयानं जिव्रिमुद्धितम् ।
सहस्राण्यसिषासद् गवामृषिस्त्वोतो दस्यवे वृकः ॥२॥
य उक्थेभिर्न विन्धते चिकिद्य ऋषिचोदनः ।
इन्द्रं तमच्छा वद नव्यस्या मत्यरिष्यन्तं न भोजसे ॥३॥
यस्मा अर्कं सप्तशीर्षाणमानृचुस्त्रिधातुमुत्तमे पदे ।
स त्वि१मा विश्वा भुवनानि चिक्रददादिज्जनिष्ट पौंस्यम् ॥४॥
यो नो दाता वसूनामिन्द्रं तं हूमहे वयम् ।
विद्मा ह्यस्य सुमतिं नवीयसीं गमेम गोमति व्रजे ॥५॥
यस्मै त्वं वसो दानाय शिक्षसि स रायस्पोषमश्नुते ।
तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे ॥६॥
कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते ॥७॥
प्र यो ननक्षे अभ्योजसा क्रिविं वधैः शुष्णं निघोषयन् ।
यदेदस्तम्भीत्प्रथयन्नमूं दिवमादिज्जनिष्ट पार्थिवः ॥८॥
यस्यायं विश्व आर्यो दासः शेवधिपा अरिः ।
तिरश्चिदर्ये रुशमे पवीरवि तुभ्येत् सो अज्यते रयिः ॥९॥
तुरण्यवो मधुमन्तं घृतश्चुतं विप्रासो अर्कमानृचुः ।
अस्मे रयिः पप्रथे वृष्ण्यं शवोऽस्मे सुवानास इन्दवः ॥१०॥
*yathā manau sāṁvaraṇau somamindrāpibaḥ sutam ।*
*nīpātithau maghavan medhyātithau puṣṭigau śruṣṭigau sachā ॥1 ॥*
*pārṣadvāṇaḥ praskaṇvaṁ samasādayachchhayānaṁ jivrimuddhitam ।*
*sahasrāṇyasiṣāsad gavāmṛṣistvoto dasyave vṛkaḥ ॥2 ॥*
*ya ukthebhirna vindhate chikidya ṛṣichodanaḥ ।*
*indraṁ tamachchhā vada navyasyā matyariṣyantaṁ na bhojase ॥3 ॥*
*yasmā arkaṁ saptaśīrṣāṇamānṛchustridhātumuttame pade ।*
*sa tvi1mā viśvā bhuvanāni chikradadādijjaniṣṭa pauṁsyam ॥4 ॥*
*yo no dātā vasūnāmindraṁ taṁ hūmahe vayam ।*
*vidmā hyasya sumatiṁ navīyasīṁ gamema gomati vraje ॥5 ॥*

*yasmai tvaṁ vaso dānāya śikṣasi sa rāyaspoṣamaśnute* ।
*taṁ tvā vayaṁ maghavannindra girvaṇaḥ sutāvanto havāmahe* ॥6॥
*kadā chana starīrasi nendra saśchasi dāśuṣe* ।
*upoṣennu maghavan bhūya innu te dānaṁ devasya pṛchyate* ॥7॥
*pra yo nanakṣe abhyojasā krivi vadhaiḥ śuṣṇaṁ nighoṣayan* ।
*yadedastambhītprathayannamūṁ divamādijjaniṣṭa pārthivaḥ* ॥8॥
*yasyāyaṁ viśva āryo dāsaḥ śevadhipā ariḥ* ।
*tiraśchidarye ruśame pavīravi tubhyet so ajyate rayiḥ* ॥9॥
*turaṇyavo madhumantaṁ ghṛtaśchutaṁ viprāso arkamānṛchuḥ* ।
*asme rayiḥ paprathe vṛṣṇyaṁ śavo'sme suvānāsa indavaḥ* ॥10॥

सा. (Sv.) ३००

कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
अपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यते ॥८॥
*kadā chana starīrasi nendra saśchasi dāśuṣe* ।
*apopennu maghavanbhūya innu te dānaṁ devasya pṛchyate* ॥8॥

सा. (Sv.) १६०९-१६१०

यस्यायं विश्व आर्यो दासः शेवाधिपा अरिः ।
तिरश्चिदर्ये रुशमे पवीरवि तुभ्येत्सो अज्यते रयिः ॥१॥
तुरण्यवो मधुमन्तं घृतश्चुतं विप्रासो अर्कमानृचुः ।
अस्मे रयिः पप्रथे वृष्ण्यंशवोऽस्मे स्वानास इन्दवः ॥२॥
*yasyāyaṁ viśva āryo dāsaḥ śevādhipā ariḥ* ।
*tiraśchidarye ruśame pavīravi tubhyetso ajyate rayiḥ* ॥1॥
*turaṇyavo madhumantaṁ ghṛtaśchutaṁ viprāso arkamānṛchuḥ* ।
*asme rayiḥ paprathe vṛṣṇyaṁśavo'sme svānāsa indavaḥ* ॥2॥

### ६९१. श्रुतकक्षः (Śrutakakṣaḥ)

१. इन्द्रः (Indraḥ) - सा. (Sv.) १२८

मा न इन्द्राभ्या३ दिशः सूरो अक्तुष्वा यमत्। त्वा युजा वनेम तत् ॥४॥
*mā na indrābhyā3 diśaḥ sūro aktuṣvā yamat । tvā yujā vanema tat* ॥4॥

### ६९२. श्रुतकक्ष आंगिरसः (Śrutakakṣa Āṁgirasaḥ)

१. इन्द्रः (Indraḥ) - सा. (Sv.) १९९; ५९५

सा. (Sv.) १९९

इन्द्र इषे ददातु न ऋभुक्षणमृभु रयिम्। वाजी ददातु वाजिनम् ॥६॥
*indra iṣe dadātu na ṛbhukṣaṇamṛbhu rayim । vājī dadātu vājinam* ॥6॥

सा. (Sv.) ५९५

त्वमेतदधारयः कृष्णासु रोहिणीषु च। परुष्णीषु रुशत्पयः ॥१॥
*tvametadadhārayaḥ kṛṣṇāsu rohiṇīṣu cha । paruṣṇīṣu ruśatpayaḥ* ॥1॥

### ६९३. श्रुतकक्ष आंगिरसः (साग्री. सार्षेदी.); श्रुतकक्ष सुकक्षो वा (ऋसर्व.) (Śrutakakṣa Āṁgirasaḥ [Ssb. Sad.]; Śrutakakṣa Sukakṣo Vā [Rss.])

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.९२.१-३३

पान्तमा वो अन्धस इन्द्रमभि प्र गायत। विश्वासाहं शतक्रतुं मंहिष्ठं चर्षणीनाम्॥१॥
पुरुहूतं पुरुष्टुतं गाथान्यं१ सनश्रुतम्। इन्द्र इति ब्रवीतन ॥२॥
इन्द्र इन्नो महानां दाता वाजानां नृतुः। महाँ अभिज्ञ्वा यमत् ॥३॥
अपादु शिप्र्यन्धसः सुदक्षस्य प्रहोषिणः। इन्द्रोरिन्द्रो यवाशिरः ॥४॥
तम्वभि प्रार्चतेन्द्रं सोमस्य पीतये। तदिद्ध्यस्य वर्धनम् ॥५॥
अस्य पीत्वा मदानां देवो देवस्यौजसा। विश्वाभि भुवना भुवत् ॥६॥
त्यमु वः सत्रासाहं विश्वासु गीर्ष्वायतम्। आ च्यावयस्यूतये ॥७॥
युध्मं सन्तमनर्वाणं सोमपामनपच्युतम्। नरमवार्यक्रतुम् ॥८॥

शिक्षा ण इन्द्र राय आ पुरु विद्वाँ ऋचीषम। अवा नः पार्ये धने ॥९॥
अतश्चिदिन्द्र णा उपा याहि शतवाजया। इषा सहस्रवाजया ॥१०॥
अयाम धीवतो धियोऽर्वद्भिः शक्र गोदरे। जयेम पृत्सु वज्रिवः ॥११॥
वयमु त्वा शतक्रतो गावो न यवसेष्वा। उक्थेषु रणयामसि ॥१२॥
विश्वा हि मर्त्यत्वनानुकामा शतक्रतो। अगन्म वज्रिन्नाशसः ॥१३॥
त्वे सु पुत्र शवसोऽवृत्रन् कामकातयः। न त्वामिन्द्राति रिच्यते ॥१४॥
स नो वृषन्त्सनिष्ठया सं घोरया द्रवित्न्वा। धियाविड्ढि पुरन्ध्या ॥१५॥
यस्ते नूनं शतक्रतविन्द्र द्युम्नितमो मदः। तेन नूनं मदे मदेः ॥१६॥
यस्ते चित्रश्रवस्तमो य इन्द्र वृत्रहन्तमः। य ओजोदातमो मदः ॥१७॥
विद्मा हि यस्ते अद्रिवस्त्वादत्तः सत्य सोमपाः। विश्वासु दस्म कृष्टिषु ॥१८॥
इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः। अर्कमर्चन्तु कारवः ॥१९॥
यस्मिन् विश्वा अधि श्रियो रणन्ति सप्त संसदः। इन्द्रं सुते हवामहे ॥२०॥
त्रिकद्रुकेषु चेतनं देवासो यज्ञमतनत। तमिद्वर्धन्तु नो गिरः ॥२१॥
आ त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः। न त्वामिन्द्राति रिच्यते ॥२२॥
विव्यक्थ महिना वृषन्भक्षं सोामस्य जागृवे। य इन्द्र जठरेषु ते ॥२३॥
अरं त इन्द्र कुक्षये सोमो भवतु वृत्रहन्। अरं धामभ्य इन्दवः ॥२४॥
अरमश्वाय गायति श्रुतकक्षो अरं गवे। अरमिन्द्रस्य धाम्ने ॥२५॥
अरं हि ष्मा सुतेषु णः सोमेष्विन्द्र भूषसि। अरं ते शक्र दावने ॥२६॥
पराकात्ताच्चिदद्रिवस्त्वां नक्षन्त नो गिरः। अरं गमाम ते वयम् ॥२७॥
एवा ह्यसि वीरयुरेवा शूर उत स्थिरः। एवा ते राध्यं मनः ॥२८॥
एवा रातिस्तुवीमघ विश्वेभिर्धायि धातृभिः। अधा चिदिन्द्र मे सचा ॥२९॥
मो षु ब्रह्मेव तन्द्रयुर्भुवो वजानां पते। मत्स्वा सुतस्य गोमतः ॥३०॥
मा न इन्द्राभ्या३ दिशः सूरो अक्तुष्वा यमन्। त्वा युजा वनेम तत् ॥३१॥
त्वयेदिन्द्र युजा वयं प्रति ब्रवीमहि स्पृधः। त्वमस्माकं तव स्मसि ॥३२॥
त्वामिद्धि त्वायवोऽनुनोनुवतश्चरान्। सखाय इन्द्र कारवः ॥३३॥

*pāntamā vo andhasa indramabhi pra gāyata |*
*viśvāsāhaṁ śatakratuṁ maṁhiṣṭhaṁ charṣaṇīnām ||1 ||*
*puruhūtaṁ puruṣṭutaṁ gāthānyaṁ1 sanaśrutam | indra iti bravītana ||2 ||*
*indra inno mahānāṁ dātā vājānāṁ nṛtuḥ | mahāṁ̐ abhijñavā yamat ||3 ||*
*apādu śipyrandhasaḥ sudakṣasya prahoṣiṇaḥ | indrorindro yavāśiraḥ ||4 ||*
*tamvabhi prārchatendraṁ somasya pītaye | tadiddhyasya vardhanam ||5 ||*
*asya pītvā madānāṁ devo devasyaujasā | viśvābhi bhuvanā bhuvat ||6 ||*
*tyamu vaḥ satrāsāhaṁ viśvāsu gīrṣvāyatam | ā chyāvayasyūtaye ||7 ||*
*yudhmaṁ santamanarvāṇaṁ somapāmanapachyutam | naramavāryakratum ||8 ||*
*śikṣā ṇa indra rāya ā puru vidvāṁ̐ ṛchīṣama | avā naḥ pārye dhane ||9 ||*
*ataśchidindra ṇā upā yāhi śatavājayā | iṣā sahasravājayā ||10 ||*
*ayāma dhīvato dhiyo'rvadbhiḥ śakra godare | jayema pṛtsu vajrivaḥ ||11 ||*
*vayamu tvā śatakrato gāvo na yavaseṣvā | uktheṣu raṇayāmasi ||12 ||*
*viśvā hi martyatvanānukāmā śatakrato | aganma vajrinnāśasaḥ ||13 ||*
*tve su putra śavaso'vṛtran kāmakātayaḥ | na tvāmindrāti richyate ||14 ||*
*sa no vṛṣantsaniṣṭhayā saṁ ghorayā dravitnvā | dhiyāviḍḍhi purandhyā ||15 ||*
*yaste nūnaṁ śatakratavindra dyumnitamo madaḥ | tena nūnaṁ made madeḥ ||16 ||*
*yaste chitraśravastamo ya indra vṛtrahantamaḥ | ya ojodātamo madaḥ ||17 ||*
*vidmā hi yaste adrivastvādattaḥ satya somapāḥ | viśvāsu dasma kṛṣṭiṣu ||18 ||*
*indrāya madvane sutaṁ pari ṣṭobhantu no giraḥ | arkamarchantu kāravaḥ ||19 ||*
*yasmin viśvā adhi śriyo raṇanti sapta saṁsadaḥ | indraṁ sute havāmahe ||20 ||*
*trikadrukeṣu chetanaṁ devāso yajñamatanata | tamidvardhantu no giraḥ ||21 ||*
*ā tvā viśantvindavaḥ samudramiva sindhavaḥ | na tvāmindrāti richyate ||22 ||*
*vivyaktha mahinā vṛṣanbhakṣaṁ soāmasya jāgṛve | ya indra jaṭhareṣu te ||23 ||*
*araṁ ta indra kukṣaye somo bhavatu vṛtrahan | araṁ dhāmabhya indavaḥ ||24 ||*
*aramaśvāya gāyati śrutakakṣo araṁ gave | aramindrasya dhāmne ||25 ||*

*araṁ hi ṣmā suteṣu ṇaḥ someṣvindra bhūṣasi । araṁ te śakra dāvane ॥26॥*
*parākāttāchchidadrivastvāṁ nakṣanta no giraḥ । araṁ gamāma te vayam ॥27॥*
*evā hyasi vīrayurevā śūra uta sthiraḥ । evā te rādhyaṁ manaḥ ॥28॥*
*evā rātistuvīmagha viśvebhirdhāyi dhātṛbhiḥ । adhā chidindra me sachā ॥29॥*
*mo ṣu brahyeva tandrayurbhuvo vajānāṁ pate । matsvā sutasya gomataḥ ॥30॥*
*mā na indrābhyā3 diśaḥ sūro aktuṣvā yaman । tvā yujā vanema tat ॥31॥*
*tvayedindra yujā vayaṁ prati bravīmahi spṛdhaḥ । tvamasmākaṁ tava smasi ॥32॥*
*tvāmiddhi tvāyavo'nunonuvataścharān । sakhāya indra kāravaḥ ॥33॥*

६९४. **श्रुतकक्ष आंगिरसः (साग्री. सास्वा.); श्रुतकक्ष (सार्षेदी.) श्रुतकक्ष सुकक्षो वा आंगिरसः (ऋसर्व. ८.९२.१०; २२; २५) (Śrutakakṣa Āṁgirasaḥ [Ssb. Sas.]; Śrutakakṣa [Sad.]; Sukakṣaḥ Sukaṣo vā Āṁgirasaḥ [Rss. 8.93.7; 8])**

१. इन्द्रः (Indraḥ) - सा. (Sv.) ११८; १९७; २१५

सा. ११८

अरमश्वाय गायत श्रुतकक्षारं गवे। अरमिन्द्रस्य धाम्ने ॥४॥
*aramaśvāya gāyata śrutakakṣāraṁ gave । aramindrasya dhāmne ॥4॥*

सा. १९७

आ त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः। न त्वामिन्द्राति रिच्यते ॥४॥
*ā tvā viśantvindavaḥ samudramiva sindhavaḥ । na tvāmindrāti richyate ॥4॥*

सा. २१५

अतश्चिदिन्द्र न उपा याहि शतवाजया। इषा सहस्रवाजया ॥२॥
*ataśchidindra na upā yāhi śatavājayā । iṣā sahasravājayā ॥2॥*

६९५. **श्रुतकक्ष आंगिरसः (साग्री. सास्वा.); श्रुतकक्षः (सार्षेदी.) सुकक्षः आंगिरसः (ऋसर्व. ८.९३.७; ८) (Śrutakakṣa Āṁgirasaḥ [Ssb. Sas.]; Śrutakakṣaḥ [Sad.] Sukakṣaḥ Āṁgirasaḥ [Rss. 8.93.7; 8])**

१. इन्द्रः (Indraḥ) - सा. (Sv.) ११९; १४०

सा. (Sv.) ११९

तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे। स वृषा वृषभो भुवत् ॥५॥
*tamindraṁ vājayāmasi mahe vṛtrāya hantave । sa vṛṣā vṛṣabho bhuvat ॥5॥*

सा. (Sv.) १४०

बोधन्मना इदस्तु नो वृत्रहा भूर्यासुतिः। श्रृणोत शक्र आशिषम् ॥६॥
*bodhanmanā idastu no vṛtrahā bhūryāsutiḥ । śṛṇota śakra āśiṣam ॥6॥*

६९६. **श्रुतकक्ष आंगिरसः (साग्री. सास्वा.); श्रुतकक्षः (सार्षेदी.); सुकक्षः (ऋसर्व. ८.९२.४; ८.९३.३४) (Śrutakakṣa Āṁgirasaḥ [Ssb. Sas.]; Śrutakakṣaḥ [Sad.]; Sukakṣaḥ [Rss. 8.92.4; 8.93.34])**

१. इन्द्रः (Indraḥ) - सा. (Sv.) १९९

इन्द्र इषे ददातु न ऋभुक्षणमृभु रयिम्। वाजी ददातु वाजिनम् ॥६॥
*indra iṣe dadātu na ṛbhukṣaṇamṛbhu rayim । vājī dadātu vājinam ॥6॥*

२. इन्द्रः (साग्री. सास्वा. सार्षेदी.) इन्द्रापूषणौ (ऋसर्व.८.९.२४) (Indraḥ [Ssb. Sas. Sad.] Indrāpūṣaṇau [Rss.8.9.24)) - सा. (Sv.) १४५

अपादु शिप्र्यन्धसः सुदक्षस्य प्रहोषिणः। इन्द्रोरिन्द्रो यवाशिरः ॥१॥
*apādu śipryandhasaḥ sudakṣasya prahoṣiṇaḥ । indrorindro yavāśiraḥ ॥1॥*

६९७. **श्रुतकक्षः आंगिरसः (साग्री. सास्वा.); श्रुतकक्षः सुकक्षौ वा आंगिरसः (ऋसर्व. ८.९२.२८); मधुच्छन्दा (सार्षेदी.); (Śrutakakṣaḥ Āṁgirasaḥ [Ssb. Sas.]; Śrutakakṣaḥ Sukakṣau Vā Āṁgirasaḥ [Rss. 8.92.28]; Madhuchchhandā [Sad.])**

१. इन्द्रः (Indraḥ) - सा. (Sv.) २३२

एवा ह्यासि वीरयुरेवा शूर उत स्थिरः। एवा ते राध्यं मनः ॥१०॥
*evā hyāsi vīrayurevā śūra uta sthiraḥ । evā te rādhyaṁ manaḥ ॥10॥*

**६९८. श्रुतकक्षः (सार्षेदी.); श्रुतकक्षः सुकक्षो वा आंगिरसः (साग्री. सास्वा.); सुकक्षः (ऋसर्व. ८.९३.२३; २८; ३१) Śrutakakṣaḥ [Sad.]; Śrutakakṣaḥ Sukakṣo Vā Āṁgirasaḥ [Ssb. Sas.]; Sukaṣaḥ [Rss. 8.93.23; 28; 31])**

१. इन्द्रः (साग्री. सास्वा.); इन्द्रापूषणौ (ऋसर्व.); सा. १५०-१५१; १७३ (Indraḥ [Ssb. Sas.]; Indrāpūṣaṇau [Rss.); Sā. 150-151; 173)

सा. (Sv.) १५०-१५१

उप नो हरिभिः सुतं याहि मदानां पते। उप नो हरिभिः सुतम् ॥६॥
इष्टा असृक्षतेन्द्रं वृधन्तो अध्वरे। अच्छावभृथमोजसा ॥७॥
*upa no haribhiḥ sutaṁ yāhi madānāṁ pate । upa no haribhiḥ sutam ॥6॥*
*iṣṭā asṛkṣatendraṁ vṛdhanto adhvare । achchhāvabhṛthamojasā ॥7॥*

सा. (Sv.) १७३

भद्रंभद्रं न आ भरेषमूर्जं शतक्रतो। यदिन्द्र मृडयासि नः ॥९॥
*bhadraṁbhadraṁ na ā bhareṣamūrjaṁ śatakrato । yadindra mṛḍayāsi naḥ ॥9॥*

**६९९. श्रुतकक्षः (सार्षेदी.); श्रुतकक्षः सुकक्षो वा आंगिरसः (साग्री. सास्वा.) (Śrutakakṣaḥ [Sad.]; Śrutakakṣaḥ Sukakṣo Vā Āṁgirasaḥ [Ssb. Sas.])**

१. इन्द्रः (Indraḥ) - सा. (Sv.) ११६; १५८; १७०; १७३; १८८; २१३

सा. (Sv.) ११६

यस्ते नूनं शतक्रतविन्द्र द्युनितमो मदः। तेन नूनं मदेमदेः ॥२॥
*yaste nūnaṁ śatakratavindra dyunitamo madaḥ । tena nūnaṁ mademadeḥ ॥2॥*

सा. (Sv.) १५८

इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः। अर्कमर्चन्तु कारवः ॥४॥
*indrāya madvane sutaṁ pari ṣṭobhantu no giraḥ । arkamarchantu kāravaḥ ॥4॥*

सा. (Sv.) १७०

त्यमु वः सत्रासाहं विश्वासु गीर्ष्वायतम्। आ च्यावयस्यूतये ॥६॥
*tyamu vaḥ satrāsāhaṁ viśvāsu gīrṣvāyatam । ā chyāvayasyūtaye ॥6॥*

सा. (Sv.) १७३

भद्रं भद्रं न आ भरेषमूर्जं शतक्रतो। यदिन्द्र मृडयासि ॥९॥
*bhadraṁbhadraṁ na ā bhareṣamūrjaṁ śatakrato । yadindra mṛḍayāsi ॥9॥*

सा. (Sv.) १८८

अया धिया च गव्यया पुरुणामन्पुरुष्टुत। यत्सोमेसोम आभुवः ॥४॥
*ayā dhiyā cha gavyayā puruṇāmanpuruṣṭuta । yatsomesoma ābhuvaḥ ॥4॥*

सा. (Sv.) २१३

तुभ्यं सुतासः सोमाः स्तीर्णं बर्हिर्विभावसो। स्तोतृभ्य इन्द्र मृडय ॥१०॥
*tubhyaṁ sutāsaḥ somāḥ stīrṇaṁ barhirvibhāvaso । stotṛbhya indra mṛḍaya ॥10॥*

**७००. श्रुतकक्ष-सुकक्षौ (Śrutakakṣa-Sukakṣau)**

१. सूर्यः (Sūryaḥ) - य. (Yv.) ३३.३५

यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य। भर्वं तदन्द्रि ते वशे ॥३५॥
*yadadya kachcha vṛtrahannudagā abhi sūrya । bharvaṁ tadandri te vaśe ॥35॥*

**७०१. श्ररुतकक्षः सुकक्षो वा (Śrrutakakṣaḥ Sukakṣo Vā)**

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.११०.१-३

इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः। अर्कमर्चन्तु कारवः ॥१॥

यस्मिन् विश्वा अधि श्रियो रणन्ति सप्त संसदः। इन्द्रं सुते हवामहे ॥२॥
त्रिकद्रुकेषु चेतनं देवासो यज्ञमत्नत। तमिद् वर्धन्तु नो गिरः ॥३॥
*indrāya madvane sutaṁ pari ṣṭobhantu no giraḥ / arkamarchantu kāravaḥ //1 //*
*yasmin viśvā adhi śriyo raṇanti sapta saṁsadaḥ / indraṁ sute havāmahe //2 //*
*trikadrukeṣu chetanaṁ devāso yajñamatnata / tamid vardhantu no giraḥ //3 //*

**७०२. श्रुतकक्षः सुकक्षो वा आंगिरसः (Śrutakakṣaḥ Sukakṣo Vā Āṁgirasaḥ)**

१. इन्द्रः (Indraḥ) - सा. (Sv.) १५५; ७१३-७१५; ७२२-७२४; १६४२-१६४४; १६६०-१६६२

सा. (Sv.) १५५

पान्तमा वो अन्धस इन्द्रमभि प्र गायत। विश्वासाहं शतक्रतुं मं हिष्ठं चर्षणीनाम् ॥१॥
*pāntamā vo andhasa indramabhi pra gāyata /*
*viśvāsāhaṁ śatakratuṁ maṁ hiṣṭhaṁ charṣaṇīnām //1 //*

सा. (Sv.) ७१३-७१५

पान्तमा वो अन्धस इन्द्रमभि प्र गायत। विश्वासाहं शतक्रतुं मंहिष्ठं चर्षणीनाम् ॥१॥
पुरुहूतं पुरुष्टुतं गाथान्यां३ सनश्रुतम्। इन्द्र इति ब्रवीतन ॥२॥
इन्द्र इन्नो महोनां दाता वाजानां नृतुः। महाँ अभिज्ञ्वा यमत् ॥३॥
*pāntamā vo andhasa indramabhi pra gāyata /*
*viśvāsāhaṁ śatakratuṁ maṁhiṣṭhaṁ charṣaṇīnām //1 //*
*puruhūtaṁ puruṣṭutaṁ gāthānyāṁ3 sanaśrutam / indra iti bravītana //2 //*
*indra inno mahonāṁ dātā vājānāṁ nṛtuḥ / mahām̐ abhijñavā yamat //3 //*

सा. (Sv.) ७२२-७२४

इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः। अर्कमर्चन्तु कारवः ॥१॥
यस्मिन्विश्वा अधि श्रियो रणन्ति सप्त संसदः। इन्द्रं सुते हवामहे ॥२॥
त्रिकद्रुकेषु चेतनं देवासो यज्ञमत्नत। तमिद्वर्धन्तु नो गिरः ॥३॥
*indrāya madvane sutaṁ pari ṣṭobhantu no giraḥ / arkamarchantu kāravaḥ //1 //*
*yasminviśvā adhi śriyo raṇanti sapta saṁsadaḥ / indraṁ sute havāmahe //2 //*
*trikadrukeṣu chetanaṁ devāso yajñamatnata / tamidvardhantu no giraḥ //3 //*

सा. (Sv.) १६४२-१६४४

त्यमु वः सत्रासाहं विश्वासु गीर्ष्वायतम्। आ च्यावयस्यूतये ॥१॥
युध्मं सन्तमनर्वाणं सोमपामनपच्युतम्। नरमवार्यक्रतुम् ॥२॥
शिक्षा ण इन्द्र राय आ पुरु विद्वाँ ऋचीषम्। अवा नः पार्ये धने ॥३॥
*tyamu vaḥ satrāsāhaṁ viśvāsu gīrṣvāyatam / ā chyāvayasyūtaye //1 //*
*yudhmaṁ santamanarvāṇaṁ somapāmanapachyutam / naramavāryakratum //2 //*
*śikṣā ṇa indra rāya ā puru vidvām̐ ṛchīṣam / avā naḥ pārye dhane //3 //*

सा. (Sv.) १६६०-१६६२

आ त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः। न त्वमिन्द्राति रिच्यते ॥१॥
विव्यक्थ महिना वृषन्भक्षं सोमस्य जागृवे। य इन्द्र जठरेषु ते ॥२॥
अरं त इन्द्र कुक्षये सोमो भवतु वृत्रहन्। अरं धामभ्य इन्दवः ॥३॥
*ā tvā viśantvindavaḥ samudramiva sindhavaḥ / na tvamindrāti richyate //1 //*
*vivyaktha mahinā vṛṣanbhakṣaṁ somasya jāgṛve / ya indra jaṭhareṣu te //2 //*
*araṁ ta indra kukṣaye somo bhavatu vṛtrahan / araṁ dhāmabhya indavaḥ //3 //*

२. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ८२४-८२६

एवा ह्यसि वीरयुरेवा शूर उत स्थिरः। एवा ते राध्यं मनः ॥१॥
एवा रातिस्तविमघ विश्वेभिर्धायि धातृभिः। अधा चिदिन्द्र नः सचाा ॥२॥
मो षु ब्रह्मेव तन्द्रयुर्भुवो वाजानां पते। मत्स्वा सुतस्य गोमतः ॥३॥
*evā hyasi vīrayurevā śūra uta sthiraḥ / evā te rādhyaṁ manaḥ //1 //*
*evā rātistavimagha viśvebhirdhāyi dhātṛbhiḥ / adhā chidindra naḥ sachāā //2 //*
*mo ṣu brahmeva tandrayurbhuvo vājānāṁ pate / matsvā sutasya gomataḥ //3 //*

**७०३. श्रुतबन्धुः (Śrutabandhuḥ)**

१. अग्निः (Agniḥ) - य. (Yv.) ३.२७

इडऽएह्यदितऽएहि काम्याऽएत। मयि वः कामधरणं भूयात् ॥२७॥
*iḍa'ehyadita'ehi kāmyā'eta । mayi vaḥ kāmadharaṇaṁ bhūyāt ॥27॥*

## ७०४. श्रुतिविद् आत्रेयः (Śrutivid Ātreyaḥ)

१. मित्रावरुणौ (Mitrāvaruṇau) - ऋ. (Rv.) ५.६२.१-९

ऋतेन ऋतमपिहितं ध्रुवं सूर्यस्य यत्र विमुचन्त्यश्वान् ।
दश शता सह तस्थुस्तदेकं देवानां श्रेष्ठं वपुषामपश्यम् ॥१॥
तत्सु वां मित्रावरुणा महित्वमीर्मा तस्थुषीरहभिर्दुदुह्रे ।
विश्वाः पिन्वथः स्वसरस्य धेना अनु वामेकः पविरा ववर्त ॥२॥
अधारयतं पृथिवीमुत द्यां मित्रराजाना वरुणा महोभिः ।
वर्धयतमोषधीः पिन्वतं गा अव वृष्टिं सृजतं जीरदानू ॥३॥
आ वामश्वासः सुयुजो वहन्तु यतरश्मय उप यन्त्ववार्क् ।
घृतस्य निर्णिग्नु वर्तते वामुप सिन्धवः प्रदिवि क्षरन्ति ॥४॥
अनु श्रुताममतिं वर्धदुर्वीं बर्हिरिव यजुषा रक्षमाणा ।
नमस्वन्ता धृतदक्षाधि गर्ते मित्रासाथे वरुणेळास्वन्तः ॥५॥
अक्रविहस्ता सुकृते परस्पा यं त्रासाथे वरुणेळास्वन्तः ।
राजाना क्षत्रमहृणीयमाना सहस्रस्थूणं बिभृथः सह द्वौ ॥६॥
हिरण्यनिर्णिगयो अस्य स्थूणा वि भ्राजते दिव्य१ श्वाजनीव ।
भद्रे क्षेत्रे निमिता तिल्विनले वा सनेम मध्वो अधिगर्त्यस्य ॥७॥
हिरण्यरूपमुषसो व्युष्टावयः स्थुणमुदिता सूर्यस्य ।
आ रोहथो वरुण मित्र गर्तमतश्चक्षाथे अदितिं दितिं च ॥८॥
यद्बंहिष्ठं नातिविधे सुदानू अच्छिद्रं शर्म भुवनस्य गोपा ।
तेन नो मित्रावरुणावविष्टं सिषासन्तो जिगीवांसः स्याम ॥९॥

*ṛtena ṛtamapihitaṁ dhruvaṁ sūryasya yatra vimuchantyaśvan ।*
*daśa śatā saha tasthustadekaṁ devānāṁ śreṣṭhaṁ vapuṣāmapaśyam ॥1॥*
*tatsu vāṁ mitrāvaruṇā mahitvamīrmā tasthuṣīrahabhirduduhre ।*
*viśvāḥ pinvathaḥ svasarasya dhenā anu vāmekaḥ pavirā vavarta ॥2॥*
*adhārayataṁ pṛthivīmuta dyāṁ mitrarājānā varuṇā mahobhiḥ ।*
*vardhayatamoṣadhīḥ pinvataṁ gā ava vṛṣṭiṁ sṛjataṁ jīradānū ॥3॥*
*ā vāmaśvāsaḥ suyujo vahantu yataraśmaya upa yantvarvāk ।*
*ghṛtasya nirṇignu vartate vāmupa sindhavaḥ pradivi kṣaranti ॥4॥*
*anu śrutāmamatiṁ vardhadurvīṁ barhiriva yajuṣā rakṣamāṇā ।*
*namasvantā dhṛtadakṣādhi garte mitrāsāthe varuṇeḷāsvantaḥ ॥5॥*
*akravihastā sukṛte paraspā yaṁ trāsāthe varuṇeḷāsvantaḥ ।*
*rājānā kṣatramahṛṇīyamānā sahasrasthūṇaṁ bibhṛthaḥ saha dvau ॥6॥*
*hiraṇyanirṇigayo asya sthūṇā vi bhrājate divya1 śvājanīva ।*
*bhadre kṣetre nimitā tilvinale vā sanema madhvo adhigartyasya ॥7॥*
*hiraṇyarūpamuṣaso vyuṣṭāvayaḥ sthuṇamuditā sūryasya ।*
*ā rohatho varuṇa mitra gartamataśchakṣāthe aditiṁ ditiṁ cha ॥8॥*
*yadbaṁhiṣṭhaṁ nātividhe sudānū achchhidraṁ śarma bhuvanasya gopā ।*
*tena no mitrāvaruṇāvaviṣṭaṁ siṣāsanto jigīvāṁsaḥ syāma ॥9॥*

## ७०५. संकसुकः (Saṁkasukaḥ)

१. ईश्वरः (Īśvaraḥ) - य. (Yv.) ३५.१५

इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरोऽअर्थमेतम् ।
शतं जीवन्तु शरदः पुरूचीरन्तर्मृत्युं दधतां पर्वतेन ॥१५॥
*imaṁ jīvebhyaḥ paridhiṁ dadhāmi maiṣāṁ nu gādaparo'arthametam ।*
*śataṁ jīvantu śaradaḥ purūchīrantarmṛtyuṁ dadhatāṁ parvatena ॥15॥*

२. यमः (Yamaḥ) - य. (Yv.) ३५.७

परं मृतयोऽअनु परेहि पन्थां यस्तेऽअन्यऽइतरो देवयानात् ।
चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान् ॥७॥
*paraṁ mṛtayo'anu parehi panthāṁ yaste'anya'itaro devayānāt ।*
*chakṣuṣmate śṛṇvate te bravīmi mā naḥ prajāṁ rīriṣo mota vīrān ॥7॥*

## ७०६. सत्यधृतिर्-वरुणिः (Satyadhṛtir-Varuṇiḥ)

१. आदित्यः (Ādityaḥ) - य. (Yv.) ३.३१-३३.

महि त्रीणामवोऽस्तु द्युक्षं मित्रस्या र्यम्णः। दुराधर्षं वरुणस्य ॥३१॥
नहि तेषाममा चन नाध्वसु वारणेषु। ईशे रिपुरघशंसः ॥३२॥
ते हि पुत्रासोऽअदितेः प्र जीवसे मर्त्याय। जयोतिर्यच्छन्त्यजस्रम् ॥३३॥
*mahi trīṇāmavo'stu dyukṣaṁ mitrasyā ryamṇaḥ । durādharṣaṁ varuṇasya ॥31॥*
*nahi teṣāmamā chana nādhvasu vāraṇeṣu । īśe ripuraghaśaṁsaḥ ॥32॥*
*te hi putrāso'aditeḥ pra jīvase martyāya । jayotiryachchhantyajasram ॥33॥*

२. अदिति (स्वस्त्ययनम्) (Aditi (Svastyayanam) - ऋ. (Rv.)१०.१८५.१-३

महि त्रीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः। दुराधर्षं वरुणस्य ॥१॥
नाहि तेषाममा चन नाध्वसु वारणेषु। ईशे रिपुरघशंसः ॥२॥
यस्मै पुत्रासो अदितेः प्र जीवसे मर्त्याय। ज्योतिर्यच्छन्त्यजस्रम् ॥३॥
*mahi trīṇāmavo'stu dyukṣaṁ mitrasyāryamṇaḥ । durādharṣaṁ varuṇasya ॥1॥*
*nāhi teṣāmamā chana nādhvasu vāraṇeṣu । īśe ripuraghaśaṁsaḥ ॥2॥*
*yasmai putrāso aditeḥ pra jīvase martyāya । jyotiryachchhantyajasram ॥3॥*

३. आदित्यः (Ādityaḥ) - य. (Yv.) ३.३१-३३

महि त्रीणामवोऽस्तु द्युक्षं मित्रस्या र्यम्णः। दुराधर्षं वरुणस्य ॥३१॥
नहि तेषाममा चन नाध्वसु वारणेषु। ईशे रिपुरघशंसः ॥३२॥
ते हि पुत्रासोऽअदितेः प्र जीवसे मर्त्याय। जयोतिर्यच्छन्त्यजस्रम् ॥३३॥
*mahi trīṇāmavo'stu dyukṣaṁ mitrasyā ryamṇaḥ । durādharṣaṁ varuṇasya ॥31॥*
*nahi teṣāmamā chana nādhvasu vāraṇeṣu । īśe ripuraghaśaṁsaḥ ॥32॥*
*te hi putrāso'aditeḥ pra jīvase martyāya । jayotiryachchhantyajasram ॥33॥*

४. इन्द्रः (सास्वा.साग्री.); आदित्यः (ऋसर्व. १०.१८५.१); मित्रावरुणौ (सार्षेदी.) (Indraḥ [Sas.Ssb.]; Ādityaḥ [Rss. 10.185.1]; Mitrāvaruṇau [Sad.]) - सा. (Sv.) १९२

महि त्रीणामवरस्तु द्युक्षं मित्रस्यार्यम्णः। दुराधर्षं वरुणस्य ॥८॥
*mahi trīṇāmavarastu dyukṣaṁ mitrasyāryamṇaḥ । durādharṣaṁ varuṇasya ॥8॥*

५. ब्रह्मणस्पतिः (Brahmaṇaspatiḥ) - य. (Yv.) ३.३०

मा नः शंसोऽअररुषो धूर्तिः प्रणङ् मतर्यस्य। रक्षा णो ब्रह्मणस्पते ॥३०॥
*mā naḥ śaṁso'araruṣo dhūrtiḥ praṇaṅ mataryasya । rakṣā ṇo brahmaṇaspate ॥30॥*

## ७०७. सत्यश्रवा आत्रेयः (Satyaśravā Ātreyaḥ)

१. उषा (Uṣā) - ऋ. (Rv.) ५.७९.१-१०; ५.८०.१-६; सा. (Sv.) १७४०-१७४२

ऋ. (Rv.) ५.७९.१-१०

महे नो अद्य बोधयोषो राये दिवित्मती ।
यथा चिन्नो अबोधयः सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥१॥
या सुनीथे शौचद्रथे व्यौच्छो दुहितर्दिवः ।
सा व्युच्छ सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥२॥
सा नो अद्याभरद्वसुर्व्युच्छा दुहितर्दिवः ।
यो व्यौच्छः सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥३॥
अभि ये त्वा विभावरि स्तोमैर्गृणान्ति वह्नयः ।
मघैर्मघोनि सुश्रियो दामन्वन्तः सुरातयः सुजाते अश्वसूनृते ॥४॥
यच्चिद्धि ते गणा इमे छदयन्ति मघत्तये ।
परि चिद्वष्टयो दधुर्ददतो राधो अह्रयं सुजाते अश्वसूनृते ॥५॥

ऐषु धा वीरवद्यश उषो मघोनि सूरिषु ।
ये नो राधांस्यह्रया मघवानो अरासत सुजाते अश्वसूनृते ॥६॥
तेभ्यो द्युम्नं बृहद्यश उषो मघोन्या वह ।
ये नो राधंस्यश्व्या गव्या भजन्त सूरयः सुजाते अश्वसूनृते ॥७॥
उत नो गोमतीरिष आ वहा दुहितर्दिवः ।
साकं सूर्यस्य रश्मिभिः शक्रैः शोचद्भिरार्चिभिः सुजाते अश्वसूनृते ॥८॥
व्युच्छा दुहितर्दिवो मा चिरं तनुथा अपः ।
नेत्त्वा स्तेनं यथा रिपुं तपाति सूरो अर्चिषा सुजाते अश्वसूनृते ॥९॥
एतावद्वेदुषस्त्वं भूयो वा दातुमर्हसि ।
या स्तोतृभ्यो विभावर्युच्छन्ती न प्रमीयसे सुजाते अश्वसूनृते ॥१०॥
*mahe no adya bodhayoṣo rāye divitmatī* ।
*yathā chinno abodhayaḥ satyaśravasi vāyye sujāte aśvasūnṛte* ॥1॥
*yā sunīthe śauchadrathe vyauchchho duhitardivaḥ* ।
*sā vyuchchha sahīyasi satyaśravasi vāyye sujāte aśvasūnṛte* ॥2॥
*sā no adyābharadvasurvyuchchhā duhitardivaḥ* ।
*yo vyauchchhaḥ sahīyasi satyaśravasi vāyye sujāte aśvasūnṛte* ॥3॥
*abhi ye tvā vibhāvari stomairgṛṇānti vahnayaḥ* ।
*maghairmaghoni suśriyo dāmanvantaḥ surātayaḥ sujāte aśvasūnṛte* ॥4॥
*yachchiddhi te gaṇā ime chhadayanti maghattaye* ।
*pari chidvaṣṭayo dadhurdadato rādho ahrayaṁ sujāte aśvasūnṛte* ॥5॥
*aiṣu dhā vīravadyaśa uṣo maghoni sūriṣu* ।
*ye no rādhāṁsyahrayā maghavāno arāsata sujāte aśvasūnṛte* ॥6॥
*tebhyo dyumnaṁ bṛhadyaśa uṣo maghonyā vaha* ।
*ye no rādhaṁsyaśvyā gavyā bhajanta sūrayaḥ sujāte aśvasūnṛte* ॥7॥
*uta no gomatīriṣa ā vahā duhitardivaḥ* ।
*sākaṁ sūryasya raśmibhiḥ śakraiḥ śochadbhirārchibhiḥ sujāte aśvasūnṛte* ॥8॥
*vyuchchhā duhitardivo mā chiraṁ tanuthā apaḥ* ।
*nettvā stenaṁ yathā ripuṁ tapāti sūro archiṣā sujāte aśvasūnṛte* ॥9॥
*etāvadveduṣastvaṁ bhūyo vā dātumarhasi* ।
*yā stotṛbhyo vibhāvaryuchchhantī na pramīyase sujāte aśvasūnṛte* ॥10॥

ऋ. (Rv.) ५.८०.१-६

द्युतद्यामानं बृहतीमृतेन ऋतावरीमरुणप्सुं विभातीम् ।
देवीमुषसं स्वरावहन्तीं प्रति विप्रासो मतिभिर्जरन्ते ॥१॥
एषा जनं दर्शता बोधयन्ती सुगान्पथः कृण्वती यात्यग्रे ।
बृहद्रथा बृहती विश्वमिन्वोषा ज्योतिर्यच्छत्यग्रे अह्नाम् ॥२॥
एषा गोभिररुणेभिर्युजानास्रेधन्ती रयिमप्रायु चक्रे ।
पथो रदन्ती सुविताय देवी पुरुष्टुता विश्ववारा वि भाति ॥३॥
एषा व्येनी भवति द्विबर्हा अविष्कृण्वाना तन्वं पुरस्तात् ।
ऋतस्य पन्थामन्वेति साधु प्रजानतीव न दिशो मिनाति ॥४॥
एषा शुभ्रा न तन्वो विदानोर्ध्वेव स्नाती दृशये नो अस्थात् ।
अप द्वेषो बाधमाना तमांस्युषा दिवो दुहिता ज्योतिषागात् ॥५॥
एषा प्रतीची दुहिता दिवो नॄन्योषेव भद्रा नि रिणीते अप्सः ।
व्यूर्ण्वती दाशुषे वार्याणि पुनर्ज्योतिर्युवतिः पूर्वथाकः ॥६॥
*dyutadyāmānaṁ bṛhatīmṛtena ṛtāvarīmaruṇapsuṁ vibhātīm* ।
*devīmuṣasaṁ svarāvahantīṁ prati viprāso matibhirjarante* ॥1॥
*eṣā janaṁ darśatā bodhayantī sugānpathaḥ kṛṇvatī yātyagre* ।
*bṛhadrathā bṛhatī viśvaminvoṣā jyotiryachchhatyagre ahnām* ॥2॥
*eṣā gobhiraruṇebhiryujānāsredhantī rayimaprāyu chakre* ।
*patho radantī suvitāya devī puruṣṭutā viśvavārā vi bhāti* ॥3॥
*eṣā vyenī bhavati dvibarhā aviṣkṛṇvānā tanvaṁ purastāt* ।
*ṛtasya panthāmanveti sādhu prajānatīva na diśo mināti* ॥4॥

*eṣā śubhrā na tanvo vidānordhveva snātī dṛśaye no asthāt ।*
*apa dveṣo bādhamānā tamāṁsyuṣā divo duhitā jyotiṣāgāt ॥5॥*
*eṣā pratīchī duhitā divo nṛnyoṣeva bhadrā ni riṇīte apsaḥ ।*
*vyūrṇvatī dāśuṣe vāryāṇi punarjyotiryuvatiḥ pūrvathākaḥ ॥6॥*

सा. (Sv.) १७४०-१७४२

महे नो अद्य बोधयोषो राये दिवित्मती ।
यथा चिन्नो अबोधयः सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥१॥
या सुनीथे शौचद्रथे व्यौच्छो दुहितर्दिवः ।
सा व्युच्छ सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥२॥
सा नो अद्याभरद्वसुर्व्युच्छा दुहितर्दिवः ।
यो व्यौच्छः सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥३॥
*mahe no adya bodhayoṣo rāye divitmatī ।*
*yathā chinno abodhayaḥ satyaśravasi vāyye sujāte aśvasūnṛte ॥1॥*
*yā sunīthe śauchadrathe vyauchchho duhitardivaḥ ।*
*sā vyuchchha sahīyasi satyaśravasi vāyye sujāte aśvasūnṛte ॥2॥*
*sā no adyābharadvasurvyuchchhā duhitardivaḥ ।*
*yo vyauchchhaḥ sahīyasi satyaśravasi vāyye sujāte aśvasūnṛte ॥3॥*

**७०८. सत्यश्रवा आत्रेयः (साग्री. सास्वा. ऋसर्व.); गोतमः (सार्षेदी.) (Satyaśravā Ātreyaḥ [Ssb. Sas. Rss.]; Gotamaḥ [Sad.])**

१. उषा (साग्री. सास्वा.) अग्निः (सार्षेदी.) - सा. (Sv.) ४२१

महे नो अद्य बोधयोषो राये दिवित्मती ।
यथा चिन्नो अबोधयः सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥३॥
*mahe no adya bodhayoṣo rāye divitmatī ।*
*yathā chinno abodhayaḥ satyaśravasi vāyye sujāte aśvasūnṛte ॥3॥*

**७०९. सदापृण आत्रेयः (Sadāpṛṇa Ātreyaḥ)**

१. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) ५.४५.१-११

विदा दिवो विष्यन्नद्रिमुक्थैरायत्या उषसो अर्चिनो गुः ।
अपावृत व्रजिनीत्स्वर्गाद्वि दुरो मनुषीर्देव आवः ॥१॥
वि सूर्यो अमतिं न श्रियं सादोर्वाद् गवां माता जानती गात् ।
धन्वर्णसो नद्यः१ खादोअर्णाः स्थूणेव सुमिता दृंहत द्यौः ॥२॥
अस्मा उक्थाय पर्वतस्य गर्भो महीनां जनुषे पूर्व्याय ।
वि पर्वतो जिहीत साधत द्यौराविवासन्तो दसयन्त भूम ॥३॥
सूक्तेभिर्वो वचोभिर्देवजुष्टैरिन्द्रा न्व१ग्नी अवसे हुवध्यै ।
उक्थेभिर्हि ष्मा कवयः सुयज्ञा आविवासन्तो मरुतो यजन्ति ॥४॥
एतो न्व१द्य सुध्यो३ भवाम प्र दुच्छुना मिनवामा वरीयः ।
आरे द्वेषांसि सनुतर्दधामायाम प्रांचो यजमानमच्छ ॥५॥
एता धियं कृणवामा सखायोऽप या माताँ ऋणुत व्रजं गोः ।
यया मनुर्विशिशिप्रं जिगाय यया वणिग्वंकुरापा पुरीषम् ॥६॥
अनूनोदत्र हस्तयतो अद्रिरार्चन्येन दश मासो नवग्वाः ।
ऋतं यती सरमा गा अविन्दद्विश्वानि सत्यांगिराश्चकार ॥७॥
विश्वे अस्या व्युषि महिनायाः सं यद् गोभिरंगिरसो नवन्त ।
उत्स आसां परमे सधस्थ ऋतस्य पथा सरमा विदद् गाः ॥८॥
आ सूर्यो यातु सप्ताश्वः क्षेत्रं यदस्योर्विया दीर्घयाथे ।
रघुः श्येनः पतयदन्धो अच्छा युवा कविर्दीदयद् गोषु गच्छन् ॥९॥
आ सूर्यो अरुहच्छुक्रमर्णोऽयुक्त यद्धरितो वीतपृष्ठाः ।
उद्रा न नावमनयन्त धीरा आश्रृण्वतीरापो अर्वागतिष्ठन् ॥१०॥
धियं वो अप्सु दधिषे सवर्षां ययातरन्दश मासो नवग्वाः ।

अया धिया स्याम देवगोपा अया धिया तुतुर्यामात्यंहः ॥११॥
*vidā divo viṣyannadrimukthairāyatyā uṣaso archino guḥ /*
*apāvṛta vrajinītsvargādvi duro manuṣīrdeva āvaḥ //1 //*
*vi sūryo amatiṁ na śriyaṁ sādorvād gavāṁ mātā jānatī gāt /*
*dhanvarṇaso nadyaḥ1 khādoarṇāḥ sthūṇeva sumitā dṛṁhata dyauḥ //2 //*
*asmā ukthāya parvatasya garbho mahīnāṁ januṣe pūrvyāya /*
*vi parvato jihīta sādhata dyaurāvivāsanto dasayanta bhūma //3 //*
*sūktebhirvo vachobhirdevajuṣṭairindrā nva1gnī avase huvadhyai /*
*ukthebhirhi ṣmā kavayaḥ suyajñā āvivāsanto maruto yajanti //4 //*
*eto nva1dya sudhyo3 bhavāma pra duchchhunā minavāmā varīyaḥ /*
*āre dveṣāṁsi sanutardadhāmāyāma prāṁcho yajamānamachchha //5 //*
*etā dhiyaṁ kṛṇavāmā sakhāyo'pa yā mātāṁ ṛṇuta vrajaṁ goḥ /*
*yayā manurviśiśipraṁ jigāya yayā vaṇigvaṁkurāpā purīṣam //6 //*
*anūnodatra hastayato adrirārchanyena daśa māso navagvāḥ /*
*ṛtaṁ yatī saramā gā avindadviśvāni satyāṁgirāśchakāra //7 //*
*viśve asyā vyuṣi mahināyāḥ saṁ yad gobhiraṁgiraso navanta /*
*utsa āsāṁ parame sadhastha ṛtasya pathā saramā vidad gāḥ //8 //*
*ā sūryo yātu saptāśvaḥ kṣetraṁ yadasyorviyā dīrghayāthe /*
*raghuḥ śyenaḥ patayadandho achchhā yuvā kavirdīdayad goṣu gachchhan //9 //*
*ā sūryo aruhachchhukramarṇo'yukta yaddharito vītapṛṣṭhāḥ /*
*udnā na nāvamanayanta dhīrā āśṛṇvatīrāpo arvāgatiṣṭhan //10 //*
*dhiyaṁ vo apsu dadhiṣe savarṣāṁ yayātarandaśa māso navagvāḥ /*
*ayā dhiyā syāma devagopā ayā dhiyā tuturyāmātyaṁhaḥ //11 //*

## ७१०. सध्वंसः काण्वः (Sadhvaṁsaḥ Kāṇvaḥ)

### १. अश्विनौ (Aśvinau) - ऋ. (Rv.) ८.८.१-२३

आ नो विश्वभिरूतिभिरश्विना गच्छतं युवम्। दस्रा हिरण्यवर्तनी पिबतं सोम्यं मधु ॥१॥
आ नूनं यातमश्विना रथेन सूर्यत्वचा। भुजी हिरण्यपेशसा कवी गम्भीरचेतसा ॥२॥
आ यातं नहुषस्पर्यान्तरिक्षात् सुवृक्तिभिः। पिबाथो अश्विना मधु कण्वानां सवने सुतम् ॥३॥
आ नो यातं दिवस्पर्यान्तरिक्षादधप्रिया। पुत्रः कण्वस्य वामिह सुषाव सोम्यं मधु ॥४॥
आ नो यातमुपश्रुत्यश्विना सोमपीतये। स्वाहा स्तोमस्य वर्धना प्र कवी धीतिभिर्नरा ॥५॥
यच्चिद्धि वां पुर ऋषयो जुहूरेऽवसे नरा। आ यातमश्विना गतमुपेमां सुष्टुतिं मम ॥६॥
दिवश्चिद्रोचनादध्या नो गन्तं स्वर्विदा। धीभिर्वत्सप्रचेतसा स्तोमेभिर्हवनश्रुता ॥७॥
किमन्ये पर्यासतेऽस्मत्स्तोमेभिरश्विना। पुत्रः कण्वस्य वामृषिर्गीर्भिर्वत्सो अवीवृधत् ॥८॥
आ वां विप्र इहावसेऽह्वत्स्तोमेभिरश्विना। अरिप्रा वृत्रहन्तमा ता नो भूतं मयोभुवा ॥९॥
आ यद्वां योषणा रथमतिष्ठद्वाजिनीवसू। विश्वन्यश्विना युवं प्र धीतान्यगच्छतम् ॥१०॥
अतः सहस्रनिर्णिजा रथेना यातमश्विना। वत्सो वां मधुमद्वचोऽशंसीत्काव्यः कविः ॥११॥
पुरुमन्द्रा पुरूवसू मनोतरा रयीणाम्। स्तोमं मे अश्विनाविममभि वह्नी अनूषाताम् ॥१२॥
आ नो विश्वन्यश्विना धत्तं राधांस्यह्रया। कृतं न ऋत्वियावतो मा नो रीरधतं निदे ॥१३॥
यन्नासत्या परावति यद्वा स्थो अध्यम्बरे। अतः सहस्रनिर्णिजा रथेना यातमश्विना ॥१४॥
यो वां नसत्यावृषिर्गीर्भिर्वत्सो अवीवृधत्। तस्मै सहस्रनिर्णिजमिषं धत्तं घृतश्चुतम् ॥१५॥
प्रास्मा ऊर्जं घृतश्चुतमश्विना यच्छतं युवम्। यो वां सुम्नाय तुष्टवद्वसूयाद्दानुनस्पती ॥१६॥
आ नो गन्तं रिशादसेमं स्तोमं पुरुभुजा। कृतं नः सुश्रियो नरेमा दातमभिष्टये ॥१७॥
आ वं विश्वाभिरूतिभिः प्रियमेधा अहूषत। राजन्तावध्वराणामश्विना यामहूतिषु ॥१८॥
आ नो गन्तं मयोभुवाश्विना शम्भुवा युवम्। यो वां विपन्यू धीतिभिर्गीर्भिर्वत्सो अवीवृधत् ॥१९॥
याभिः कण्वं मेधातिथिं याभिर्वशं दशव्रजम्। याभिर्गोशर्यमावतं ताभिर्नोऽवतं नरा ॥२०॥
याभिर्नरा त्रसदस्युमावतं कृत्व्ये धने। ताभिः ष्व१स्माँ अश्विना प्रावतं वाजसातये ॥२१॥
प्र वां स्तोमाः सुवृक्तयो गिरो वर्धन्त्वश्विना। पुरुत्रा वृत्रहन्तमा ता नो भूतं पुरुस्पृहा ॥२२॥
त्रीणि पदान्यश्विनोराविः सान्ति गुहा परः। कवी ऋतस्य पत्मभिरर्वाग्जीवेभ्यस्परि ॥२३॥
*ā no viśvabhirūtibhiraśvinā gachchhataṁ yuvam /*
*dasrā hiraṇyavartanī pibataṁ somyaṁ madhu //1 //*

*ā nūnaṁ yātamaśvinā rathena sūryatvachā ।*
*bhujī hiraṇyapeśasā kavī gambhīrachetasā ॥2 ॥*
*ā yātaṁ nahuṣasparyāntarikṣāt suvṛktibhiḥ ।*
*pibātho aśvinā madhu kaṇvānāṁ savane sutam ॥3 ॥*
*ā no yātaṁ divasparyāntarikṣādadhapriyā ।*
*putraḥ kaṇvasya vāmiha suṣāva somyaṁ madhu ॥4 ॥*
*ā no yātamupaśrutyaśvinā somapītaye ।*
*svāhā stomasya vardhanā pra kavī dhītibhirnarā ॥5 ॥*
*yachchiddhi vāṁ pura ṛṣayo juhūre'vase narā ।*
*ā yātamaśvinā gatamupemāṁ suṣṭutiṁ mama ॥6 ॥*
*divaśchidrochanādadhyā no gantaṁ svarvidā ।*
*dhībhirvatsaprachetasā stomebhirhavanaśrutā ॥7 ॥*
*kimanye paryāsate'smatstomebhiraśvinā ।*
*putraḥ kaṇvasya vāmṛṣirgīrbhirvatso avīvṛdhat ॥8 ॥*
*ā vāṁ vipra ihāvase'hvatstomebhiraśvinā ।*
*ariprā vṛtrahantamā tā no bhūtaṁ mayobhuvā ॥9 ॥*
*ā yadvāṁ yoṣaṇā rathamatiṣṭhadvājinīvasū ।*
*viśvanyaśvinā yuvaṁ pra dhītānyagachchhatam ॥10 ॥*
*ataḥ sahasranirṇijā rathenā yātamaśvinā ।*
*vatso vāṁ madhumadvacho'śaṁsītkāvyaḥ kaviḥ ॥11 ॥*
*purumandrā purūvasū manotarā rayīṇām ।*
*stomaṁ me aśvināvimamabhi vahnī anūṣātām ॥12 ॥*
*ā no viśvanyaśvinā dhattaṁ rādhāṁsyahrayā ।*
*kṛtaṁ na ṛtviyāvato mā no rīradhataṁ nide ॥13 ॥*
*yannāsatyā parāvati yadvā stho adhyambare ।*
*ataḥ sahasranirṇijā rathenā yātamaśvinā ॥14 ॥*
*yo vāṁ nasatyāvṛṣirgīrbhirvatso avīvṛdhat ।*
*tasmai sahasranirṇijamiṣaṁ dhattaṁ ghṛtaśchutam ॥15 ॥*
*prāsmā ūrjaṁ ghṛtaśchutamaśvinā yachchhataṁ yuvam ।*
*yo vāṁ sumnāya tuṣṭavadvasūyāddānunaspatī ॥16 ॥*
*ā no gantaṁ riśādasemaṁ stomaṁ purubhujā ।*
*kṛtaṁ naḥ suśriyo naremā dātamabhiṣṭaye ॥17 ॥*
*ā vaṁ viśvābhirūtibhiḥ priyamedhā ahūṣata । rājantāvadhvarāṇāmaśvinā yāmahūtiṣu ॥18 ॥*
*ā no gantaṁ mayobhuvāśvinā śambhuvā yuvam ।*
*yo vāṁ vipanyū dhītibhirgīrbharvatso avīvṛdhat ॥19 ॥*
*yābhiḥ kaṇvaṁ medhātithiṁ yābhirvaśaṁ daśavrajam ।*
*yābhirgośaryamāvataṁ tābhirno'vataṁ narā ॥20 ॥*
*yābhirnarā trasadasyumāvataṁ kṛtvye dhane ।*
*tābhiḥ ṣva1smāṁ̐ aśvinā prāvataṁ vājasātaye ॥21 ॥*
*pra vāṁ stomāḥ suvṛktayo giro vardhantvaśvinā ।*
*purutrā vṛtrahantamā tā no bhūtaṁ puruspṛhā ॥22 ॥*
*trīṇi padānyaśvinorāviḥ sānti guhā paraḥ । kavī ṛtasya patmabhirarvāgjīvebhyaspari ॥23 ॥*

## ७११. सध्रिर् वैरुपो धर्मोगवा तापसः (Sadhrir Vairupo Dharmogavā Tāpasaḥ)

१. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १०.११४.१-१०

घर्मा समन्ता त्रिवृतं व्यापतुस्तयोर्जुष्टिं मातरिश्वा जगाम ।
दिवस्पयो दिधिषाणा अवेषन्विदुर्देवाः सहसामानमर्कम् ॥१ ॥
तिस्रो देष्ट्राय निर्ऋतीरुपासते दीर्घश्रुतो वि हि जानन्ति वह्नयः ।
तासां नि चिक्युः कवयो निदानं परेषु या गुह्येषु व्रतेषु ॥२ ॥
चतुष्कपर्दा युवतिः सुपेशा घृतप्रतीका वयुनानि वस्ते ।
तस्यां सुपर्णा वृषणा नि षेदतुर्यत्र देवा दधिरे भागधेयम् ॥३ ॥
एकः सुपर्णः स समुद्रमा विवेश स इदं विश्वं भुवनं वि चष्टे ।
तं पाकेन मनसापश्यमन्तितस्तं माता रेळिह स उ रेळिह मातरम् ॥४ ॥

सुपर्णं विप्राः कवयो वचोभिरेकं सन्तं बहुधा कल्पयन्ति ।
छन्दांसि च दधतो अध्वरेषु ग्रहान्त्सोमस्यं मिमते द्वादश ॥५॥
षड्विंशाँश्च चतुरः कल्पयन्तश्छन्दांसि च दधत आद्वादशम् ।
यज्ञं विमाय कवयो मनीष ऋक्सामाभ्यां प्र रथं वर्तयन्ति ॥६॥
चतुर्दशान्ये महिमानो अस्य तं धीरा वाचा प्र णयन्ति सप्त ।
आप्नानं तीर्थं क इह प्र वोचद्येन पथा प्रपिबन्ते सुतस्य ॥७॥
सहस्रधा पंचदशान्युक्था यावद् द्यावापृथिवी तावदित्तत् ।
सहस्रधा महिमानः सहस्रं यावद् ब्रह्म विष्ठितं तावती वाक् ॥८॥
कश्छन्दसां योगमा वेद धीरः को धिष्ण्यां प्रति वाचं पपाद ।
कमृत्विजामष्टमं शूरमाहुर्हरी इन्द्रस्य नि चिकाय कः स्वित् ॥९॥
भूम्या अन्तं पर्येके चरन्ति रथस्य धूर्षु युक्तासो अस्थुः ।
श्रमस्य दायं वि भजन्त्येभ्यो यदा यमो भवति हर्म्ये हितः ॥१०॥
*gharmā samantā trivṛtaṁ vyāpatustayorjuṣṭiṁ mātariśvā jagāma /*
*divaspayo didhiṣāṇā aveṣanvidurdevāḥ sahasāmānamarkam //1 //*
*tisro deṣṭrāya nirṛtīrupāsate dīrghaśruto vi hi jānanti vahnayaḥ /*
*tāsāṁ ni chikyuḥ kavayo nidānaṁ pareṣu yā guhyeṣu vrateṣu //2 //*
*chatuṣkapardā yuvatiḥ supeśā ghṛtapratīkā vayunāni vaste /*
*tasyāṁ suparṇā vṛṣaṇā ni ṣedaturyatra devā dadhire bhāgadheyam //3 //*
*ekaḥ suparṇaḥ sa samudramā viveśa sa idaṁ viśvaṁ bhuvanaṁ vi chaṣṭe /*
*taṁ pākena manasāpaśyamantitastaṁ mātā reḻiha sa u reḻiha mātaram //4 //*
*suparṇaṁ viprāḥ kavayo vachobhirekaṁ santaṁ bahudhā kalpayanti /*
*chhandāṁsi cha dadhato adhvareṣu grahāntsomasyaṁ mimate dvādaśa //5 //*
*ṣaṭtriṁśāṁścha chaturaḥ kalpayantaśchhandāṁsi cha dadhata ādvādaśam /*
*yajñaṁ vimāya kavayo manīṣa ṛksāmābhyāṁ pra rathaṁ vartayanti //6 //*
*chaturdaśānye mahimāno asya taṁ dhīrā vāchā pra ṇayanti sapta /*
*āpnānaṁ tīrthaṁ ka iha pra vochadyena pathā prapibante sutasya //7 //*
*sahasradhā paṁchadaśānyukthā yāvad dyāvāpṛthivī tāvadittat /*
*sahasradhā mahimānaḥ sahasraṁ yāvad brahma viṣṭhitaṁ tāvatī vāk //8 //*
*kaśchhandasāṁ yogamā veda dhīraḥ ko dhiṣṇyāṁ prati vāchaṁ papāda /*
*kamṛtvijāmaṣṭamaṁ śūramāhurharī indrasya ni chikāya kaḥ svit //9 //*
*bhūmyā antaṁ paryeke charanti rathasya dhūrṣu yuktāso asthuḥ /*
*śramasya dāyaṁ vi bhajantyebhyo yadā yamo bhavati harmye hitaḥ //10 //*

## ७१२. सप्तर्षयः (Saptarṣayaḥ)

१. अग्निः (Agniḥ) - य. (Yv.) १७.७९; ८७

य. (Yv.) १७.७९

सप्त तेऽअग्ने समिधः सप्त जिह्वाः सप्तऽऋषयः सप्त धाम प्रियाणि ।
सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्व घृतेन स्वाहा ॥७९॥
*sapta te'agne samidhaḥ sapta jihvāḥ sapta'ṛṣayaḥ sapta dhāma priyāṇi /*
*sapta hotrāḥ saptadhā tvā yajanti sapta yonīrāpṛṇasva ghṛtena svāhā //79 //*

य. (Yv.) १७.८७

इमं स्तनमूर्जस्वन्तं धयापां प्रपीनमग्ने सरिरस्य मध्ये ।
उत्सं जुषस्व मधुमन्तमर्वन्तसमुद्रियं सदनमाविशस्व ॥८७॥
*imaṁ stanamūrjasvantaṁ dhayāpāṁ prapīnamagne sarirasya madhye /*
*utsaṁ juṣasva madhumantamarvantasamudriyaṁ sadanamāviśasva //87 //*

२. चातुर्मास्यामरुतः (Chāturmāsyāmarutaḥ) - य. (Yv.) १७.८५

स्वतवाँश्च प्रघासी च सान्तपनश्च गृहमेधी च। क्रीडी च शाकी चोज्जेषी ॥८५॥
*svatavāṁścha praghāsī cha sāntapanaścha gṛhamedhī cha / krīḍī cha śākī chojjeṣī //85 //*

३. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.१०७.१-२६; सा. (Sv.) ५११-५२२; ६७५-६७६; ७६७-७६८; ८५६-८५८; ९२२-९२३; ९९७-९९८; १०७९-१०८०; १३१३-१३१५; १६८९-

१६९०

ऋ. (Rv.) ९.१०७.१-२६

परीतो षिंचता सुतं सोमो य उत्तमं हविः ।
दधन्वाँ यो नर्यो अप्स्व१न्तरा सुषाव सोममद्रिभिः ॥१॥
नूनं पुनानोऽविभिः परि स्रवादब्धः सुरभिंतरः ।
सुते चित्त्वाप्सु मदामो अन्धसा श्रीणन्तो गोभिरुत्तरम् ॥२॥
परि सुवानश्चक्षसे देवमादनः क्रतुरिन्दुर्विचक्षणः ॥३॥
पुनानः सोम धारयापो वसानो अर्षसि ।
आ रत्नधा योनिमृतस्य सीदस्युत्सो देव हिरण्ययः ॥४॥
दुहान ऊधर्दिव्यं मधु प्रियं प्रत्नं सधस्थमासदत् ।
आपृच्छ्यं धरुणं वाज्यर्षति नृभिर्धूतो विचक्षणः ॥५॥
पुनानः सोम जागृविरव्यो वारे परि प्रियः ।
त्वं विप्रो अभवोऽङ्गिरस्तमो मध्वा यज्ञं मिमिक्ष नः ॥६॥
सोमो मीढ्वान्पवते गातुवित्तम ऋषिर्विप्रो विचक्षणः ।
त्वं कविरभवो देववीतम आ सूर्यं रोहयो दिवि ॥७॥
सोम उ षुवाणः सोतृभिरधि ष्णुभिरवीनाम् ।
अश्वयेव हरिता याति धारया मन्द्रया याति धारया ॥८॥
अनूपे गोमान्गोभिरक्षाः सोमो दुग्धाभिरक्षाः ।
समुद्रं न संवरणान्यग्मन्मन्दी मदाय तोशते ॥९॥
आ सोम सुवानो अद्रिभिस्तिरो वाराण्यव्यया ।
जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दधिषे ॥१०॥
स मामृजे तिरो अण्वानि मेष्यो मीळहे सप्तिर्न वाजयुः ।
अनुमाद्यः पवमानो मनीषिभिः सोमो विप्रेभिऋर्क्वभिः ॥११॥
प्र सोम देववीतये सिन्धुर्न पिप्ये अर्णसा ।
अंशोः पयसा मदिरो न जागृविरच्छा कोशं मधुश्चुतम् ॥१२॥
आ हर्यतो अर्जुने अत्के अव्यत प्रियः सूनुर्न मर्ज्यः ।
तमीं हिन्वन्त्यपसो यथा रथं नदीष्वा गभस्त्योः ॥१३॥
अभि सोमाय आयवः पवन्ते मद्यं मदम् ।
समुद्रस्याधि विष्टपि मनीषिणो मत्सरासः स्वर्विदः ॥१४॥
तरत्समुद्रं पवमान ऊर्मिणा राजा देव ऋतं बृहत् ।
अर्षन्मित्रस्य वरुणस्य धर्मणा प्र हिन्वान ऋतं बृहत् ॥१५॥
नृभिर्येमानो हर्यतो विचक्षणो राजा देवः समुद्रियः ॥१६॥
इन्द्राय पवते मदः सोमो मरुत्वते सुतः ।
सहस्रधारो अत्यव्यमर्षति तमी मृजन्त्यायवः ॥१७॥
पुनानश्चमू जनयन्मतिं कविः सोमो देवेषु रण्यति ।
अपो वसानः परि गोभिरुत्तर सीदन्वनेष्वव्यत ॥१८॥
तवाहं सोम रारण सख्य इन्दो दिवेदिवे ।
पुरूणि बभ्रो नि चरन्ति मामव परिधीँरति ताँ इहि ॥१९॥
उताहं नक्तमुत सोम ते दिवा सख्याय बभ्र ऊधनि ।
घृणा तपन्तमति सूर्यं परः शकुनाइव पप्तिम ॥२०॥
मृज्यमानः सुहस्त्य समुद्रे वाचमिन्वसि ।
रयिं पिशंगं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि ॥२१॥
मृजानो वारे पवमानो अव्यये वृषाव चक्रदो वने ।
देवानां सोम पवमान निष्कृतं गोभिरंजानो अर्षसि ॥२२॥
पवस्व वाजसातयेऽभि विश्वानि काव्या ।
त्वं समुद्रं प्रथमो वि धारयो देवेभ्यः सोम मत्सरः ॥२३॥
स तू पवस्व परि पार्थिवं रजो दिव्या च सोम धर्मभिः ।

त्वां विप्रासो मतिभिर्विचक्षा शुभ्रं हिन्वन्ति धीतिभिः ॥२४॥
पवमाना असृक्षत पवित्रमति धारया ।
मरुत्वन्तो मत्सरा इन्द्रिया हया मेधामभि प्रयांसि च ॥२५॥
अपो वसानः परि कोशमर्षतीन्दुर्हियानः सोतृभिः ।
जनयंजयोतिर्मन्दना अवीवशद्गाः कृण्वानो न निर्णिजम् ॥२६॥
*parīto ṣiṁchatā sutaṁ somo ya uttamaṁ haviḥ /*
*dadhanvām̐ yo naryo apsav1ntarā suṣāva somamadribhiḥ //1 //*
*nūnaṁ punāno'vibhiḥ pari sravādabdhaḥ surabhiṁtaraḥ /*
*sute chittvāpsu madāmo andhasā śrīṇanto gobhiruttaram //2 //*
*pari suvānaśchakṣase devamādanaḥ kraturindurvichakṣaṇaḥ //3 //*
*punānaḥ seāma dhārayāpo vasāno arṣasi /*
*ā ratnadhā yonimṛtasya sīdasyutso deva hiraṇyayaḥ //4 //*
*duhāna ūdhardivyaṁ madhu priyaṁ pratnaṁ sadhasthamāsadat /*
*āpṛchchhyaṁ dharuṇaṁ vājyarṣati nṛbhirdhūto vichakṣaṇaḥ //5 //*
*punānaḥ soma jāgṛviravyo vāre pari priyaḥ /*
*tvaṁ vipro abhavo'ṅgirastamo madhvā yajñaṁ mimikṣa naḥ //6 //*
*somo mīḍhvānpavate gātuvittama ṛṣirvipro vichakṣaṇaḥ /*
*tvaṁ kavirabhavo devavītama ā sūryaṁ rohayo divi //7 //*
*soma u ṣuvāṇaḥ sotṛbhiradhi ṣṇubhiravīnām /*
*aśvayeva haritā yāti dhārayā mandrayā yāti dhārayā //8 //*
*anūpe gomāngobhirakṣāḥ somo dugdhābhirakṣāḥ /*
*samudraṁ na saṁvaraṇānyagmanmandī madāya tośate //9 //*
*ā soma suvāno adribhistiro vārāṇyavyayā /*
*jano na puri chamvorviśaddhariḥ sado vaneṣu dadhiṣe //10 //*
*sa māmṛje tiro aṇvāni meṣyo mīḷahe saptirna vājayuḥ /*
*anumādyaḥ pavamāno manīṣibhiḥ somo viprebhiṛrkvabhiḥ //11 //*
*pra soma devavītaye sindhurna pipye arṇasā /*
*aṁśoḥ payasā madiro na jāgṛvirachchhā kośaṁ madhuśchutam //12 //*
*ā haryato arjune atke avyata priyaḥ sūnurna marjyaḥ /*
*tamīṁ hinvantyapaso yathā rathaṁ nadīṣvā gabhastyoḥ //13 //*
*abhi somāya āyavaḥ pavante madyaṁ madam /*
*samudrasyādhi viṣṭapi manīṣiṇo matsarāsaḥ svarvidaḥ //14 //*
*taratsamudraṁ pavamāna ūrmiṇā rājā deva ṛtaṁ bṛhat /*
*arṣanmitrasya varuṇasya dharmaṇā pra hinvāna ṛtaṁ bṛhat //15 //*
*nṛbhiryemāno haryato vichakṣaṇo rājā devaḥ samudriyaḥ //16 //*
*indrāya pavate madaḥ somo marutvate sutaḥ /*
*sahasradhāro atyavyamarṣati tamī mṛjantyāyavaḥ //17 //*
*punānaśchamū janayanmatiṁ kaviḥ somo deveṣu raṇyati /*
*apo vasānaḥ pari gobhiruttara sīdanvaneṣvavyata //18 //*
*tavāhaṁ soma rāraṇa sakhya indo divedive /*
*purūṇi babhro ni charanti māmava paridhīm̐rati tām̐ ihi //19 //*
*utāhaṁ naktamuta soma te divā sakhyāya babhra ūdhani /*
*ghṛṇā tapantamati sūryaṁ paraḥ śakunāiva patpima //20 //*
*mṛjyamānaḥ suhastya samudre vāchaminvasi /*
*rayiṁ piśaṁgaṁ bahulaṁ puruspṛhaṁ pavamānābhyarṣasi //21 //*
*mṛjāno vāre pavamāno avyaye vṛṣāva chakrado vane /*
*devānāṁ soma pavamāna niṣkṛtaṁ gobhiraṁjāno arṣasi //22 //*
*pavasva vājasātaye'bhi viśvāni kāvyā /*
*tvaṁ samudraṁ prathamo vi dhārayo devebhyaḥ soma matsaraḥ //23 //*
*sa tū pavasva pari pārthivaṁ rajo divyā cha soma dharmabhiḥ /*
*tvāṁ viprāso matibhirvichakṣā śubhraṁ hinvanti dhītibhiḥ //24 //*
*pavamānā asṛkṣata pavitramati dhārayā /*
*marutvanto matsarā indriyā hayā medhāmabhi prayāṁsi cha //25 //*
*apo vasānaḥ pari kośamarṣatīndurhiyānaḥ sotṛbhiḥ /*

*janayaṁjayotirmandanā avīvaśadgāḥ kṛṇvāno na nirṇijam ॥26॥*

सा. (Sv.) ५११-५२२

पुनानः सोम धारयापो वसानो अर्षसि ।
आ रत्नधा योनिमृतस्य सीदस्युत्सो देवो हिरण्ययः ॥१॥
परीतो षिंचता सुतं सोमो य उत्तमं हविः ।
दधन्वानयो नर्यो अप्स्वा३न्तरा सुषाव सोममद्रिभिः ॥२॥
आ सोम स्वानो अद्रिभिस्तिरो वाराण्यव्यया ।
जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दध्रिषे ॥३॥
प्र सोम दीववीतये सिन्धुर्न पिप्ये अर्णसा ।
अंशोः पयसा मदिरो न जागृविरच्छा कोशं मधुश्चुतम् ॥४॥
सोम उ ष्वाणः सोतृभिरधि ष्णुभिरवीनाम् ।
अश्वयेव हरिता याति धारया मन्द्रया याति धारया ॥५॥
तवाहं सोम रारण सख्य इन्दो दिवेदिवे ।
पुरूणि बभ्रो नि चरन्ति मामव परिधीँ रति ताँ इहि ॥६॥
मृज्यमानः सुहस्त्या समुद्रे वाचमिन्वसि ।
रयिं पिशंगं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि ॥७॥
अभि सोमास आयवः पवन्ते मद्यं मदम् ।
समुद्रस्याधि विष्टपे मनीषिणो मत्सरासो मदच्युतः ॥८॥
पुनानः सोम जागृविरव्या वारैः परि प्रियः ।
त्वं विप्रो अभवोऽङ्गिरस्तम मध्वा यज्ञं मिमिक्ष णः ॥९॥
इन्द्राय पवते मदः सोमो मरुत्वते सुतः ।
सहस्रधारो अत्यव्यमर्षति तमी मृजन्त्यायवः ॥१०॥
पवस्व वाजसातमोऽभि विश्वानि वार्या ।
त्वं समुद्रः प्रथमे विधर्मन् देवेभ्यः सोम मत्सरः ॥११॥
पवमाना असृक्षत पवित्रमति धारया ।
मरुत्वन्तो मत्सरा इन्द्रिया हया मेधामभि प्रयांसि च ॥१२॥

*punānaḥ soma dhārayāpo vasāno arṣasi ।*
*ā ratnadhā yonimṛtasya sīdasyutso devo hiraṇyayaḥ ॥1॥*
*parīto ṣiṁchatā sutaṁ somo ya uttamaṁ haviḥ ।*
*dadhanvānayo naryo apsvā3ntarā suṣāva somamadribhiḥ ॥2॥*
*ā soma svāno adribhistiro vārāṇyavyayā ।*
*jano na puri chamvorviśaddhariḥ sado vaneṣu dadhriṣe ॥3॥*
*pra soma dīvavītaye sindhurna pipye arṇasā ।*
*aṁśoḥ payasā madiro na jāgṛvirachchhā kośaṁ madhuśchutam ॥4॥*
*soma u ṣvāṇaḥ sotṛbhiradhi ṣṇubhiravīnām ।*
*aśvayeva haritā yāti dhārayā mandrayā yāti dhārayā ॥5॥*
*tavāhaṁ soma rāraṇa sakhya indo divedive ।*
*purūṇi babhro ni charanti māmava paridhīm̐ rati tām̐ ihi ॥6॥*
*mṛjyamānaḥ suhastyā samudre vāchaminvasi ।*
*rayiṁ piśaṁgaṁ bahulaṁ puruspṛhaṁ pavamānābhyarṣasi ॥7॥*
*abhi somāsa āyavaḥ pavante madyaṁ madam ।*
*samudrasyādhi viṣṭape manīṣiṇo matsarāso madachyutaḥ ॥8॥*
*punānaḥ soma jāgṛviravyā vāraiḥ pari priyaḥ ।*
*tvaṁ vipro abhavo'ṅgirastama madhvā yajñaṁ mimikṣa ṇaḥ ॥9॥*
*indrāya pavate madaḥ somo marutvate sutaḥ ।*
*sahasradhāro atyavyamarṣati tamī mṛjantyāyavaḥ ॥10॥*
*pavasva vājasātamo'bhi viśvāni vāryā ।*
*tvaṁ samudraḥ prathame vidharman devebhyaḥ soma matsaraḥ ॥11॥*
*pavamānā asṛkṣata pavitramati dhārayā ।*
*marutvanto matsarā indriyā hayā medhāmabhi prayāṁsi cha ॥12॥*

सा. (Sv.) ६७५-६७६

पुनानः सोम धारयापो वसानो अर्षसि ।
आ रत्नधा योनिमृतस्य सीदस्युत्सो देवो हिरण्ययः ॥१॥
दुहान ऊधर्दिव्यं मधु प्रियं प्रत्नं सधस्थमासदत् ।
आपृच्छ्यं धरुणं वाज्यर्षसि नृभिर्धौतो विचक्षणः ॥२॥
*punānaḥ soma dhārayāpo vasāno arṣasi /*
*ā ratnadhā yonimṛtasya sīdasyutso devo hiraṇyayaḥ //1 //*
*duhāna ūdhardivyaṁ madhu priyaṁ pratnaṁ sadhasthamāsadat /*
*āpṛchchhyaṁ dharuṇaṁ vājyarṣasi nṛbhirdhauto vichakṣaṇaḥ //2 //*

सा. (Sv.) ७६७-७६८

प्र सोम देववीतये सिन्धुर्न पिप्ये अर्णसा ।
अंशोः पयसा मदिरो न जागृविरच्छा कोशं मधुश्चुतम् ॥१॥
आ हर्यतो अर्जुनो अत्के अव्यत प्रियः सूनुर्न मर्ज्यः ।
तमीं हिन्वन्त्यपसो यथा रथं नदीष्वा गभस्त्योः ॥२॥
*pra soma devavītaye sindhurna pipye arṇasā /*
*aṁśoḥ payasā madiro na jāgṛvirachchhā kośaṁ madhuśchutam //1 //*
*ā haryato arjuno atke avyata priyaḥ sūnurna marjyaḥ /*
*tamīṁ hinvantyapaso yathā rathaṁ nadīṣvā gabhastyoḥ //2 //*

सा. (Sv.) ८५६-८५८

भि सोमास आयवः पवन्ते मद्यं मदम् ।
समुद्रस्याधि विष्टपे मनीषिणो मत्सरासो मदच्युतः ॥१॥
तरत्समुद्रं पवमान ऊर्मिणा राजा देव ऋतं बृहत् ।
अर्षा मित्रस्य वरुणस्य धर्मणा प्र हिन्वान ऋतं बृहत् ॥२॥
नुभिर्येमाणो हर्यतो विचक्षणो राजा देवः समुद्र्यः ॥३॥
*bhi somāsa āyavaḥ pavante madyaṁ madam /*
*samudrasyādhi viṣṭape manīṣiṇo matsarāso madachyutaḥ //1 //*
*taratsamudraṁ pavamāna ūrmiṇā rājā deva ṛtaṁ bṛhat /*
*arṣā mitrasya varuṇasya dharmaṇā pra hinvāna ṛtaṁ bṛhat //2 //*
*nubhiryemāṇo haryato vichakṣaṇo rājā devaḥ samudryaḥ //3 //*

सा. (Sv.) ९२२-९२३

तवाहं सोम रारण सख्य इन्द्रो दिवेदिवे ।
पुरूणि बभ्रो नि चरन्ति मामव परिधीं रति ताँ इहि ॥१॥
तवाहं नक्तमुत सोम ते दिवा दुहानो बभ्र ऊधनि ।
घृणा तपन्तमति सूर्यं परः शकुना इव पप्तिम ॥२॥
*tavāhaṁ soma rāraṇa sakhya indro divedive /*
*purūṇi babhro ni charanti māmava paridhīṁ rati tāṁ̐ ihi //1 //*
*tavāhaṁ naktamuta seāma te divā duhāno babhra ūdhani /*
*ghṛṇā tapantamati sūryaṁ paraḥ śakunā iva paptima //2 //*

सा. (Sv.) ९९७-९९८

सोम उ ष्वाणः सोतृभिरधि ष्णुभिरवीनाम् ।
अश्वयेव हरिता याति धारया मन्द्रया याति धारया ॥१॥
अनूपे गोमान् गोभिरक्षाः सोमो दुग्धाभिरक्षाः ।
समुद्रं न संवरणान्यग्मन्मन्दी मदाय तोशते ॥२॥
*soma u ṣvāṇaḥ sotṛbhiradhi ṣṇubhiravīnām /*
*aśvayeva haritā yāti dhārayā mandrayā yāti dhārayā //1 //*
*anūpe gomān gobhirakṣāḥ somo dugdhābhirakṣāḥ /*
*samudraṁ na saṁvaraṇānyagmanmandī madāya tośate //2 //*

सा. (Sv.) १०७९-१०८०

मृज्यमानः सुहस्त्या समुद्रे वाचमिन्वसि ।

रयिं पिशंगं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि ॥१॥
पुनानो वारे पवमानो अव्यये वृषो अचिक्रदद्वने ।
देवानां सोम पवमान निष्कृतं गोभिरंजानो अर्षसि ॥२॥
*mṛjyamānaḥ suhastyā samudre vāchaminvasi /*
*rayiṁ piśaṁgaṁ bahulaṁ puruspṛhaṁ pavamānābhyarṣasi //1 //*
*punāno vāre pavamāno avyaye vṛṣo achikradadvane /*
*devānāṁ soma pavamāna niṣkṛtaṁ gobhiraṁjāno arṣasi //2 //*

सा. (Sv.) १३१३-१३१५

परीतो षिंचता सुतं सोमो य उत्तमं हविः ।
दधन्वाँ यो नर्यो अप्स्वा३ऽन्तरा सुषाव सोममद्रिभिः ॥१॥
नूनं पुनानोऽविभिः परि स्रवादब्धः सुरभिंतरः ।
सुते चित्वाप्सु मदामो अंधसा श्रीणन्तो गोभिरुत्तरम् ॥२॥
परि स्वानश्चक्षसे देवमादनः क्रतुरिन्दुर्विचक्षणः ॥३॥
*parīto ṣiṁchatā sutaṁ somo ya uttamaṁ haviḥ /*
*dadhanvām̐ yo naryo apsvā3'ntarā suṣāva somamadribhiḥ //1 //*
*nūnaṁ punāno'vibhiḥ pari sravādabdhaḥ surabhiṁtaraḥ /*
*sute chitvāpsu madāmo aṁdhasā śrīṇanto gobhiruttaram //2 //*
*pari svānaśchakṣase devamādanaḥ kraturindurvichakṣaṇaḥ //3 //*

स. १६८९-१६९०

आ सोम स्वानो अद्रिभिस्तिरो वाराण्यव्यया ।
जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दध्रिषे ॥१॥
स मामृजे तिरो अण्वानि मेष्यो मीढ्वांत्सप्तिर्न वाजयुः ।
अनुमाद्यः पवमानो मनीषिभिः सोमो विप्रेभिर्ऋक्वभिः ॥२॥
*ā soma svāno adribhistiro vārāṇyavyayā /*
*jano na puri chamvorviśaddhariḥ sado vaneṣu dadhriṣe //1 //*
*sa māmṛje tiro aṇvāni meṣyo mīḍhvāṁtsaptirna vājayuḥ /*
*anumādyaḥ pavamāno manīṣibhiḥ somo viprebhirṛkvabhiḥ //2 //*

४. मरुतः (Marutaḥ) - य. (Yv.) १७.८०-८४; ८६

य. (Yv.) १७.८०-८४

शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माँश्च। शुक्रश्चऽऋतपाश्चात्यंहाः ॥८०॥
ईदृङ् चान्यादृङ् च सदृङ् च प्रतिसदृङ् च। मितश्च संमितश्च सभराः ॥८१॥
ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च। धर्त्ता च विधर्त्ता च विधारयः ॥८२॥
ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च। अन्तिमित्रश्च दूरेऽअमित्रश्च गणः ॥८३॥
ईदृक्षासएतादृक्षास ऊ षु णः सदृक्षासः प्रतिसदृक्षासऽएतन ।
मितासश्च सम्मितासो नोऽअद्य सभरसो मरुतो यज्ञेऽअस्मिन् ॥८४॥
*śukrajyotiścha chitrajyotiścha satyajyotiścha jyotiṣmām̐ścha /*
*śukraścha'ṛtapāśchātyaṁhāḥ //80 //*
*īdṛṅ chānyādṛṅ cha sadṛṅ cha pratisadṛṅ cha / mitaścha saṁmitaścha sabharāḥ //81 //*
*ṛtaścha satyaścha dhruvaścha dharuṇaścha / dharttā cha vidharttā cha vidhārayaḥ //82 //*
*ṛtajichcha satyajichcha senajichcha suṣeṇaścha /*
*antimitraścha dūre'amitraścha gaṇaḥ //83 //*
*īdṛkṣāsaetādṛkṣāsa ū ṣu ṇaḥ sadṛkṣāsaḥ pratisadṛkṣāsa'etana /*
*mitāsaścha sammitāso no'adya sabharaso maruto yajñe'asmin //84 //*

य. (Yv.) १७.८६

इन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन्यथेन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन् ।
एवमिमं यजमानं दैवीश्च विशो मानुषीश्चानुवर्त्मानो भवन्तु ॥८६॥
*indraṁ daivīrviśo maruto'nuvartmāno'bhavanyathendraṁ daivīrviśo*
*maruto'nuvartmāno'bhavan /*
*evamimaṁ yajamānaṁ daivīścha viśo mānuṣīśchānuvartmāno bhavantu //86 //*

## ७१३. सप्तर्षयः एकर्चाः (Saptarṣayaḥ Ekarchāḥ)

१. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १०.१३७.१-७

उत देवा अवहितं देवा उन्नयथा पुनः ।
उतागश्चक्रुषं देवा देवा जीवयथा पुनः ॥१॥
द्वाविमौ वातौ वात आ सिन्धोरा परावतः ।
दक्षं ते अन्य आ वातु परान्यो वातु यद्रपः ॥२॥
आ वात वाहि भेषजं वि वात वाहि यद्रपः ।
त्वं हि विश्वभेषजो देवानां दूत ईयसे ॥३॥
आ त्वागमं शन्तातिभिरथो अरिष्टतातिभिः ।
दक्षं ते भद्रमाभार्षं परा यक्ष्मं सुवामि ते ॥४॥
त्रायन्तामिह देवास्त्रायतां मरुतां गणः ।
त्रायन्तां विश्वा भूतानि यथायमरपा असत् ॥५॥
आप इद्वा उ भेषजीरापो अमीवचातनीः ।
आपः सर्वस्य भेषजीस्तास्ते कृण्वन्तु भेषजम् ॥६॥
हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी ।
अनामयित्नुभ्यां त्वा ताभ्यां त्वोप स्पृशामसि ॥७॥

*uta devā avahitaṁ devā unnayathā punaḥ /*
*utāgaśchakruṣaṁ devā devā jīvayathā punaḥ //1//*
*dvāvimau vātau vāta ā sindhorā parāvataḥ /*
*dakṣaṁ te anya ā vātu parānyo vātu yadrapaḥ //2//*
*ā vāta vāhi bheṣajaṁ vi vāta vāhi yadrapaḥ /*
*tvaṁ hi viśvabheṣajo devānāṁ dūta īyase //3//*
*ā tvāgamaṁ śantātibhiratho ariṣṭatātibhiḥ /*
*dakṣaṁ te bhadramābhārṣaṁ parā yakṣamaṁ suvāmi te //4//*
*trāyantāmiha devāstrāyatāṁ marutāṁ gaṇaḥ /*
*trāyantāṁ viśvā bhūtāni yathāyamarapā asat //5//*
*āpa idvā u bheṣajīrāpo amīvachātanīḥ /*
*āpaḥ sarvasya bheṣajīstāste kṛṇvantu bheṣajam //6//*
*hastābhyāṁ daśaśākhābhyāṁ jihvā vāchaḥ purogavī /*
*anāmayitnubhyāṁ tvā tābhyāṁ tvopa spṛśāmasi //7//*

## ७१४. सप्तगुः (Saptaguḥ)

१. इन्द्रो वैकुण्ठः (Indro Vaikuṇṭhaḥ) - ऋ. (Rv.) १०.४७.१-८

जगृम्भा ते दक्षिणमिन्द्र हस्तं वसूयवो वसुपते वसूनाम् ।
विद्मा हि त्वा गोपतिं शूर गोनामस्मभ्यं चित्रं वृषणं रयिं दाः ॥१॥
स्वायुधं स्ववसं सुनीथं चतुःसमुद्रं धरुणं रयीणाम् ।
चर्कृत्यं शंस्यं भुरिवारमस्मभ्यं चित्रं वृषणं रयिं दाः ॥२॥
सुब्रह्माणं देववन्तं बृहन्तमुरुं गभीरं पृथुबुध्नमिन्द्र ।
श्रुतऋषिमुग्रमभिमातिषाहमस्मभ्यं चित्रं वृषणं रयिं दाः ॥३॥
सनद्वाजं विप्रवीरं तरुत्रं धनस्पृतं शूशुवांसं सुदक्षम् ।
दस्युहनं पूर्भिदमिन्द्र सत्यमस्मभ्यं चित्रं वृषणं रयिं दाः ॥४॥
अश्वावन्तं रथिनं वीरवन्तं सहस्रिणं शतिनं वाजमिन्द्र ।
भद्रव्रातं विप्रवीरं स्वर्षामस्मभ्यं चित्रं वृषणं रयिं दाः ॥५॥
प्र सप्तगुमृतधीतिं सुमेधां बृहस्पतिं मतिरच्छा जिगाति ।
य आंगिरसो नमसोपसद्योऽस्मभ्यं चित्रं वृषणं रयिं दाः ॥६॥
वनीवानो मम दूतास इन्द्रं स्तोमाश्चरन्ति सुमतीरियानाः ।
हृदिस्पृशो मनसा वच्यमाना अस्मभ्यं चित्रं वृषणं रयिं दाः ॥७॥
यत्त्वा यामि दद्धि तन्न इन्द्र बृहन्तं क्षयमसमं जनानाम् ।
अभि तद् द्यावापृथिवी गृणीतामस्मभ्यं चित्रं वृषणं रयिं दाः ॥८॥

*jagṛmbhā te dakṣiṇamindra hastaṁ vasūyavo vasupate vasūnām /*
*vidmā hi tvā gopatiṁ śūra gonāmasmabhyaṁ chitraṁ vṛṣaṇaṁ rayiṁ dāḥ //1 //*
*svāyudhaṁ svavasaṁ sunīthaṁ chatuḥsamudraṁ dharuṇaṁ rayīṇām /*
*charkṛtyaṁ śaṁsyaṁ bhurivāramasmabhyaṁ chitraṁ vṛṣaṇaṁ rayiṁ dāḥ //2 //*
*subrahmāṇaṁ devavantaṁ bṛhantamuruṁ gabhīraṁ pṛthubudhnamindra /*
*śrutarṣimugramabhimātiṣāhamasmabhyaṁ chitraṁ vṛṣaṇaṁ rayiṁ dāḥ //3 //*
*sanadvājaṁ vipravīraṁ tarutraṁ dhanaspṛtaṁ śūśuvāṁsaṁ sudakṣam /*
*dasyuhanaṁ pūrbhidamindra satyamasmabhyaṁ chitraṁ vṛṣaṇaṁ rayiṁ dāḥ //4 //*
*aśvāvantaṁ rathinaṁ vīravantaṁ sahasriṇaṁ śatinaṁ vājamindra /*
*bhadravrātaṁ vipravīraṁ svarṣāmasmabhyaṁ chitraṁ vṛṣaṇaṁ rayiṁ dāḥ //5 //*
*pra saptagumṛtadhītiṁ sumedhāṁ bṛhaspatiṁ matirachchhā jigāti /*
*ya āṁgiraso namasopasadyo'smabhyaṁ chitraṁ vṛṣaṇaṁ rayiṁ dāḥ //6 //*
*vanīvāno mama dūtāsa indraṁ stomāścharanti sumatīriyānāḥ /*
*hṛdispṛśo manasā vachyamānā asmabhyaṁ chitraṁ vṛṣaṇaṁ rayiṁ dāḥ //7 //*
*yattvā yāmi daddhi tanna indra bṛhantaṁ kṣayamasamaṁ janānām /*
*abhi tad dyāvāpṛthivī gṛṇītāmasmabhyaṁ chitraṁ vṛṣaṇaṁ rayiṁ dāḥ //8 //*

## ७१५. सप्तगुरांगिरसः (Saptagurāṁgirasaḥ)

१. इन्द्रः (Indraḥ) - सा. (Sv.) ३१७

जगृह्मा ते दक्षिणमिन्द्र हस्तं वसूयवो वसुपते वसूनाम् ।
विद्मा हि त्वा गोपतिं शूर गोनामस्मभ्यं चित्रं वृषणं रयिं दाः ॥५॥
*jagṛhmā te dakṣiṇamindra hastaṁ vasūyavo vasupate vasūnām /*
*vidmā hi tvā gopatiṁ śūra gonāmasmabhyaṁ chitraṁ vṛṣaṇaṁ rayiṁ dāḥ //5 //*

## ७१६. सप्तवध्रिर् आत्रेयः (Saptavadhrir Ātreyaḥ)

१. अश्विनौ (Aśvinau) - ऋ. (Rv.) ५.७८.१-९

अश्विनावेह गच्दतं नासत्या मा वि वेनतम् । हंसाविव पततमा सुताँ उप ॥१॥
अश्विना हरिणाविव गौराविवानु यवसम्। हंसाविव पततमा सुताँ उप ॥२॥
अश्विना वाजिनीवसू जुषेथां यज्ञमिष्टये । हंसाविव पततमा सुताँ उप ॥३॥
अत्रिर्यद्वामवरोहन्नृबीसमजोहवीन्नाधमानेव योषा ।
श्येनस्य चिज्जवसा नूतनेनागच्छतमश्विना शंतमेन ॥४॥
वि जिहीष्व वनस्पते योनिः सूष्यन्त्या इव ।
श्रुतं मे अश्विना हवं सप्तवध्रिं च मुंचतम् ॥५॥
भीताय नाधमानाय ऋषये सप्तवध्रये ।
मायाभिरश्विना युवं वृक्षं सं च वि चाचथः ॥६॥
यथा वातः पुष्करिणीं समिंगयति सर्वतः ।
एवा ते गर्भ एजतु निरैतु दशमास्यः ॥७॥
यथा वातो यथा वनं यथा समुद्र एजति ।
एवा त्वं दशमास्य सहावेहि जरायुणा ॥८॥
दश मासांछशयानः कुमारो अधि मातरि ।
निरैतु जीवो अक्षतो जीवो जीवन्त्या अधि ॥९॥
*aśvināveha gachdataṁ nāsatyā mā vi venatam / haṁsāviva patatamā sutāṁ̆ upa //1 //*
*aśvinā hariṇāviva gaurāvivānu yavasam / haṁsāviva patatamā sutāṁ̆ upa //2 //*
*aśvinā vājinīvasū juṣethāṁ yajñamiṣṭaye / haṁsāviva patatamā sutāṁ̆ upa //3 //*
*atriryadvāmavarohannṛbīsamajohavīnnādhamāneva yoṣā /*
*śyenasya chijjavasā nūtanenāgachchhatamaśvinā śaṁtamena //4 //*
*vi jihīṣva vanaspate yoniḥ sūṣyantyā iva /*
*śrutaṁ me aśvinā havaṁ saptavadhriṁ cha muṁchatam //5 //*
*bhītāya nādhamānāya ṛṣaye saptavadhraye /*
*māyābhiraśvinā yuvaṁ vṛkṣaṁ saṁ cha vi chāchathaḥ //6 //*
*yathā vātaḥ puṣkariṇīṁ samiṁgayati sarvataḥ /*
*evā te garbha ejatu niraitu daśamāsyaḥ //7 //*

*yathā vāto yathā vanaṁ yathā samudra ejati /*
*evā tvaṁ daśamāsya sahāvehi jarāyuṇā //8 //*
*daśa māsāṁchhaśayānaḥ kumāro adhi mātari /*
*niraitu jīvo akṣato jīvo jīvantyā adhi //9 //*

## ७१७. सप्रथो भारद्वाजः (Sapratho Bhāradvājaḥ)

१. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १०.१८१.२

अविन्दन्ते अतिहितं यदासीद्यज्ञस्य धाम परमं गुहा यत् ।
धातुर्द्युतानात्सवितुश्च विष्णोर्भरद्वाजो बृहदा चक्रे अग्नेः ॥२॥
*avindante atihitaṁ yadāsīdyajñasya dhāma paramaṁ guhā yat /*
*dhāturdyutānātsavituścha viṣṇorbharadvājo bṛhadā chakre agneḥ //2 //*

## ७१८. सरमा देवशुनी (Saramā Devaśunī)

१. पणयः (Paṇayaḥ) - ऋ. (Rv.) १०.१०८.२; ४; ६; ८; १०; ११

ऋ. (Rv.) १०.१०८.२

इन्द्रस्य दूतिरिषिता चरामि मह इच्छन्ती पणयो निधीन्वः ।
अतिष्कदो भियसा तन्न आवत्तथा रसाया अतरं पयांसि ॥२॥
*indrasya dūtiriṣitā charāmi maha ichchhantī paṇayo nidhīnvaḥ /*
*atiṣkado bhiyasā tanna āvattathā rasāyā ataraṁ payāṁsi //2 //*

ऋ. (Rv.) १०.१०८.४

नाहं तं वेद दभ्यं दभत्स यस्येदं दूतीरसरं पराकात् ।
न तं गूहन्ति स्रवतो गभीरा हता इन्द्रेण पणयः शयध्वे ॥४॥
*nāhaṁ taṁ veda dabhyaṁ dabhatsa yasyedaṁ dūtīrasaraṁ parākāt /*
*na taṁ gūhanti sravato gabhīrā hatā indreṇa paṇayaḥ śayadhve //4 //*

ऋ. (Rv.) १०.१०८.६

असेन्या वः पणवो वचांस्यनिषव्यास्तन्वः सन्तु पापीः ।
अधृष्टो व एतवा अस्तु पनथा बृहस्पतिर्व उभया न मृळात् ॥६॥
*asenyā vaḥ paṇavo vachāṁsyaniṣavyāstanvaḥ santu pāpīḥ /*
*adhṛṣṭo va etavā astu panathā bṛhaspatirva ubhayā na mṛḷāt //6 //*

ऋ. (Rv.) १०.१०८.८

एह गमन्नृषयः सोमशिता अयास्यो अंगिरसो नवग्वाः ।
त एतमूर्वं वि भजन्त गोनामथैतद्वचः पणयो वमन्नित् ॥८॥
*eha gamannṛṣayaḥ somaśitā ayāsyo aṁgiraso navagvāḥ /*
*ta etamūrvaṁ vi bhajanta gonāmathaitadvachaḥ paṇayo vamannit //8 //*

ऋ. (Rv.) १०.१०८.१०-११

नाहं वेद भ्रातृत्वं नो स्वसृत्वमिन्द्रो विदुरंगिरसश्च घोराः ।
गोकामा मे अच्छदयन्यदायमपात इत पण्यो वरीयः ॥१०॥
दूरमित पणयो वरीय उद्गावो यन्तु मिनतीऋर्तेन ।
बृहस्पतिर्या अविन्दन्निगूळहाः सोमो ग्रावाण ऋषयश्च विप्राः ॥११॥
*nāhaṁ veda bhrātṛtvaṁ no svasṛtvamindro viduraṁgirasaścha ghorāḥ /*
*gokāmā me achchhadayanyadāyamapāta ita paṇyo varīyaḥ //10 //*
*dūramita paṇayo varīya udgāvo yantu minatīṛrtena /*
*bṛhaspatiryā avindannigūḷahāḥ somo grāvāṇa ṛṣayaścha viprāḥ //11 //*

## ७१९. सरस्वती (Sarasvatī)

१. अग्निः (Agniḥ) - य. (Yv.) २८.२४; ३४

य. (Yv.) २८.२४

होता यक्षत्समिधानं महद्यशः सुममिद्धं वरेण्यमग्निमिन्द्रं वयोधसम् ।
गायत्रीं छनदऽइन्द्रियं त्र्यविं गां वयो दधद्वेत्वाज्यस्य होतर्यज ॥२४॥

*hotā yakṣatsamidhānaṁ mahadyaśaḥ sumamiddhaṁ vareṇyamagnimindraṁ vayodhasam |*
*gāyatrīṁ chhanada'indriyaṁ trayaviṁ gāṁ vayo dadhadvetvājyasya hotaryaja ||24 ||*

य. (Yv.) २८.३४

होता यक्षत् स्वाहाकृतीरग्निं गृहपतिं पृथग्वरुणं भेषजं कविं क्षत्रमिन्द्रं वयोधसम् । अतिच्छन्दसं छन्दऽइन्द्रियं बृहदृषभं गां वयो दधद्व्यन्त्वाज्यस्य होतर्यज ॥३४॥
*hotā yakṣat svāhākṛtīragniṁ gṛhapatiṁ pṛthagvaruṇaṁ bheṣajaṁ kaviṁ kṣatramindraṁ vayodhasam | atichchhandasaṁ chhanda'indriyaṁ bṛhadṛṣabhaṁ gāṁ vayo dadhadvyantvājyasya hotaryaja ||34 ||*

२. अश्विनौ (Aśvinau) - य. (Yv.) २८.३०

होता यक्षत्प्रचेतसा देवानामुत्तमं यशो होतारा दैव्या कवी सयुजेन्द्रं वयोधसम् ।
जगतीं छन्दऽइन्द्रियमनड्वाहं गां वयो दधद्वीतामाज्यस्य होतर्यज ॥३०॥
*hotā yakṣatprachetasā devānāmuttamaṁ yaśo hotārā daivyā kavī sayujendraṁ vayodhasam |*
*jagatīṁ chhanda'indriyamanaḍrvāhaṁ gāṁ vayo dadhadvītāmājyasya hotaryaja ||30 ||*

३. अहोरात्रे (Ahorātre) - य. (Yv.) २८.२९

होता यक्षत्सुपेषसा सुशिल्पे बृहतीऽउभे नक्तोषासा न दर्शते विश्वमिन्द्रं वयोधसम् ।
त्रिष्टुभं छन्दऽइहन्द्रियं पष्ठवाहं गां वयो दधद्वीतामाज्यस्य होतर्यज ॥२९॥
*hotā yakṣatsupeṣasā suśilpe bṛhatī'ubhe naktoṣāsā na darśate viśvamindraṁ vayodhasam |*
*triṣṭubhaṁ chhanda'ihandriyaṁ paṣṭhavāhaṁ gāṁ vayo dadhadvītāmājyasya hotaryaja ||29 ||*

४. इन्द्रः (Indraḥ) - य. (Yv.) २८.२५-२८; ३२; ३३; ३५-४६

य. (Yv.) २८.२५-२८

होता यक्षत्तनूनपातमुद्भिदं यं गर्भमदितिर्दधे शुचिमिन्द्रं वयोधसम् ।
उष्णिाहं छन्दऽइन्द्रियं दित्यवाहं गां वयो दधद्वेत्ववाज्यस्य होतर्यज ॥२५॥
होता यक्षदीडेन्यमीडितं वृत्रहन्तममिडाभिरीड्यं सहः सोममिन्द्रं वयोधसम् ।
अनुष्टुभं छन्दऽइन्द्रियं पंचाविं गां वयो दधद्वेत्वाज्यस्य होतर्यज ॥२६॥
होता यक्षत्सुबीर्हषं पूषण्वन्तममर्त्यं सीदन्तं बर्हिषि प्रिये ऽमृतेन्द्रं वयोधसम् ।
बृहतीं छन्दऽइन्द्रियं त्रिवत्सं गां वयो दधद्वेत्वाज्यस्य होतर्यज ॥२७॥
होता यक्षद्व्यचस्वतीः सुप्रायणाऽऋतावृधो द्वारो देवीर्हिरण्ययीर्ब्रह्मणमिन्द्रं वयोधसम् ।
पङक्ति छन्दऽइहेन्द्रियं तुर्यवाहं गां वयो दधद्व्यन्त्वाज्यस्य होतर्यज ॥२८॥
*hotā yakṣattanūnapātamudbhidaṁ yaṁ garbhamaditirdadhe śuchimindraṁ vayodhasam |*
*uṣṇiāhaṁ chhanda'indriyaṁ dityavāhaṁ gāṁ vayo dadhadvetvavājyasya hotaryaja ||25 ||*
*hotā yakṣadīḍenyamīḍitaṁ vṛtrahantamamiḍābhirīḍyaṁ sahaḥ somamindraṁ vayodhasam |*
*anuṣṭubhaṁ chhanda'indriyaṁ paṁchāviṁ gāṁ vayo dadhadvetvājyasya hotaryaja ||26 ||*
*hotā yakṣatsubīrhaṣaṁ pūṣaṇvantamamartyaṁ sīdantaṁ barhiṣi priye 'mṛtendraṁ vayodhasam |*
*bṛhatīṁ chhanda'indriyaṁ trivatsaṁ gāṁ vayo dadhadvetvājyasya hotaryaja ||27 ||*
*hotā yakṣadvyachasvatīḥ suprāyaṇā'ṛtāvṛdho dvāro devīrhiraṇyayīrbrahmaṇamindraṁ vayodhasam |*
*paṅakti chhanda'ihendriyaṁ turyavāhaṁ gāṁ vayo dadhadvyantvājyasya hotaryaja ||28 ||*

य. (Yv.) २८.३२-३३

होता यक्षत्सुरेतसं त्वष्टारं पुष्टिवर्द्धनं रूपाणि बिभ्रतं पृथक् पुष्टिमिन्द्रं वयोधसम् ।
द्विपदं छन्दऽइन्द्रियमुक्षाणं गां न वयो दधद्वेत्वाज्यस्य होतर्यज ॥३२॥
होता यक्षद्वनस्पतिं शमितारं शतक्रतुं हिरण्यपर्णमुक्थिनं रशनां बिभ्रतं वशिं भगमिन्द्रं वयोधसम्। ककुभं छन्दऽइहेन्द्रियं वशां वेहतं गां वयो दधद्वेत्वाज्यस्य होतर्यज ॥३३॥
*hotā yakṣatsuretasaṁ tvaṣṭāraṁ puṣṭivarddhanaṁ rūpāṇi bibhrataṁ pṛthak puṣṭimindraṁ vayodhasam |*
*dvipadaṁ chhanda'indriyamukṣāṇaṁ gāṁ na vayo dadhadvetvājyasya hotaryaja ||32 ||*

*hotā yakṣadvanaspatiṁ śamitāraṁ śatakratuṁ hiraṇyaparṇamukthinaṁ raśanāṁ bibhrataṁ vaśiṁ bhagamindraṁ vayodhasam । kakubhaṁ chhanda'ihendriyaṁ vaśāṁ vehataṁ gāṁ vayo dadhadvetvājyasya hotaryaja ॥33॥*

य. (Yv.) २८.३५-४६

देवं बर्हिर्वयोधसं देवमिन्द्रमवर्द्धयत्।
गायत्र्या छन्दसेन्द्रियं चक्षुरिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥३५॥
देवीर्द्वारो वयोधसं शुचिमिन्द्रमवर्द्धयन्।
उष्णिहा छन्दसेन्द्रियं प्राणमिन्द्रे वयो दधद्वसुवने वसुधेयस्य व्यन्तु यज ॥३६॥
देवीऽउषासानक्त देवमिन्द्रं वयोधसं देवीदेवमवर्द्धताम्।
अनुष्टुभा छन्दसेन्द्रियं बलमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ॥३७॥
देवी जोष्ट्री वसुधिती देवमिन्द्रं वयोधसं देवी दवमवर्द्धताम्।
बृहत्या छन्दसेन्द्रियं श्रोत्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज॥३८॥
देवीऽऊर्जाहुती दुघे सुदुघे पयसेन्द्रं वयोधसं देवी देवमवर्द्धताम्।
पङ्क्या छनदसेन्द्रियं शुक्रमिन्द्रे वयो दधद्वसुवने। वसुधेयस्य वीतां यज ॥३९॥
देवा दैव्या होतारा देवमिन्द्रं वयोधसं देवौ देवमवर्द्धताम्।
त्रिष्टुभा छन्दसेन्द्रियं त्विषिमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ॥४०॥
देवीस्तिस्रस्तिस्रो देवीर्वयोधसं पतिमिन्द्रमवर्द्धयन्।
जगत्या छन्दसेन्द्रियं शूषमिन्द्रे वयो दधद्वसुवने वसुधेयस्य व्यन्तु यज ॥४१॥
देवो नराशंसो देवमिन्द्रं वयोधसं देवो देवमवर्द्धयत्।
विराजा छन्दसेन्द्रियं रूपमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज॥४२॥
देवो वनस्पतिर्देवमिन्द्रं वयोधसं देवो देवमवर्द्धयत्।
द्विपदा छन्दसेन्द्रियं भगमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥४३॥
देवं बर्हिर्वारितीनां देवमिन्द्रं वयोधसं देवं देवमवर्द्धयत्।
ककुभा छन्दसेन्द्रियं यशऽइन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥४४॥
देवोऽअग्निः स्विष्टकृद्देवमिन्द्रं वयोधसं देवो देवमवर्द्धयत्।
अतिच्छन्दसा छनदसेन्द्रियं क्षत्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥४५॥
अग्निमद्य होतारमवृणीतायं यजमानः पचन् पक्तीः पचन् पुरोडाशं बध्नन्निन्द्राय वयोधसे छागम्। सूपस्थाऽअद्य देवो वनस्पतिरभवदिन्द्राय वयोधसे छागेन ।
अघत्तं मेदस्तः प्रतिपचताग्रभीदवीवृधत्पुरोडाशेन त्वामद्यऽऋषे ॥४६॥

*devaṁ barhirvayodhasaṁ devamindramavarddhayat । gāyatrayā chhandasendriyaṁ chakṣurindre vayo dadhadvasuvane vasudheyasya vetu yaja ॥35॥*
*devīrdvāro vayodhasaṁ śuchimindramavarddhayan । uṣṇihā chhandasendriyaṁ prāṇamindre vayo dadhadvasuvane vasudheyasya vyantu yaja ॥36॥*
*devī'uṣāsānakta devamindraṁ vayodhasaṁ devīdevamavarddhatām । anuṣṭubhā chhandasendriyaṁ balamindre vayo dadhadvasuvane vasudheyasya vītāṁ yaja ॥37॥*
*devī joṣṭrī vasudhitī devamindraṁ vayodhasaṁ devī davamavarddhatām । bṛhatyā chhandasendriyaṁ śrotramindre vayo dadhadvasuvane vasudheyasya vītāṁ yaja ॥38॥*
*devī'ūrjāhutī dughe sudughe payasendraṁ vayodhasaṁ devī devamavarddhatām । paṅktyā chhanadasendriyaṁ śukramindre vayo dadhadvasuvane । vasudheyasya vītāṁ yaja ॥39॥*
*devā daivyā hotārā devamindraṁ vayodhasaṁ devau devamavarddhatām । triṣṭubhā chhandasendriyaṁ tviṣimindre vayo dadhadvasuvane vasudheyasya vītāṁ yaja ॥40॥*
*devīstisrastisro devīrvayodhasaṁ patimindramavarddhayan । jagatyā chhandasendriyaṁ śūṣamindre vayo dadhadvasuvane vasudheyasya vyantu yaja ॥41॥*
*devo narāśaṁso devamindraṁ vayodhasaṁ devo devamavarddhayat । virājā chhandasendriyaṁ rūpamindre vayo dadhadvasuvane vasudheyasya vetu yaja ॥42॥*
*devo vanaspatirdevamindraṁ vayodhasaṁ devo devamavarddhayat । dvipadā*

*chhandasendriyaṁ bhagamindre vayo dadhadvasuvane vasudheyasya vetu yaja ॥43॥*
*devaṁ barhirvāritīnāṁ devamindraṁ vayodhasaṁ devaṁ devamavarddhayat ।*
*kakubhā chhandasendriyaṁ yaśa'indre vayo dadhadvasuvane vasudheyasya vetu yaja ॥44॥*
*devo'agniḥ sviṣṭakṛddevamindraṁ vayodhasaṁ devo devamavarddhayat ।*
*atichchhandasā chhanadasendriyaṁ kṣatramindre vayo dadhadvasuvane vasudheyasya vetu yaja ॥45॥*
*agnimadya hotāramavṛṇītāyaṁ yajamānaḥ pachan paktīḥ pachan puroḍāśaṁ badhnannindrāya vayodhase chhāgam । sūpasthā'adya devo vanaspatirabhavadindrāya vayodhase chhāgena ।*
*aghattaṁ medastaḥ pratipachatāgrabhīdavīvṛdhatpuroḍāśena tvāmadya'ṛṣe ॥46॥*

५. वाण्यः (Vāṇyaḥ) - य. (Yv.) २८.३१

होता यक्षत्पेशस्तीस्तिस्रो देवीर्हिरण्ययीर्भारतीबृहतीर्महीः पतिमिन्द्रं वयोधसम् । विराजं छन्दऽइहेन्द्रियं धेनुं गां न वयो दधद्व्यन्त्वाज्यस्य होतर्यज ॥३१॥
*hotā yakṣatpeśastīstisro devīrhiraṇyayīrbhāratībṛhatīrmahīḥ patimindraṁ vayodhasam ।*
*virājaṁ chhanda'ihendriyaṁ dhenuṁ gāṁ na vayo dadhadvyantvājyasya hotaryaja ॥31॥*

## ७२०. सविता (Savitā)

१. क्षेत्रपतिः (Kṣetrapatiḥ) - य. (Yv.) १३.२६

अषाढासि सहमाना सहस्वारातीः सहस्व पृतनायतः । सहस्रवीर्य्यासि सा मा जिन्व ॥२६॥
*aṣāḍhāsi sahamānā sahasvārātīḥ sahasva pṛtanāyataḥ । sahasravīryyāsi sā mā jinva ॥26॥*

२. पशवः (Paśavaḥ) - अ. (Av.) २.२६.१-५

एह यन्तु पशवो ये परेयुर्वायुर्येषां सहचारं जुजोष ।
त्वष्टा येषां रूपधेयानि वेदास्मिन् तान् गोष्ठे सविता नि यच्छतु ॥१॥
इमं गोष्ठं पशवः सं स्रवन्तु बृहस्पतिरा नयतु प्रजानन् ।
सिनीवाली नयत्वाग्रमेषामाजग्मुषो अनुमते नि यच्छ ॥२॥
सं सं स्रवन्तु पशवः समश्वाः समु पूरुषाः ।
सं धान्यस्य या स्फातिः संस्राव्येण हविषा जुहोमि ॥३॥
सं सिंचामि गवां क्षीरं समाज्येन बलं रसम् ।
संसिक्ता अस्माकं वीरा ध्रुवा गावो मयि गोपतौ ॥४॥
आ हरामि गवां क्षीरमाहार्षं धान्यं१ रसम् ।
आहृता अस्माकं वीरा आ पत्नीरिदमस्तकम् ॥५॥
*eha yantu paśavo ye pareyurvāyuryeṣāṁ sahachāraṁ jujoṣa ।*
*tvaṣṭā yeṣāṁ rūpadheyāni vedāsmin tān goṣṭhe savitā ni yachchhatu ॥1॥*
*imaṁ goṣṭhaṁ paśavaḥ saṁ sravantu bṛhaspatirā nayatu prajānan ।*
*sinīvālī nayatvāgrameṣāmājagmuṣo anumate ni yachchha ॥2॥*
*saṁ saṁ sravantu paśavaḥ samaśvāḥ samu pūruṣāḥ ।*
*saṁ dhānyasya yā sphātiḥ saṁsrāvyeṇa haviṣā juhomi ॥3॥*
*saṁ siṁchāmi gavāṁ kṣīraṁ samājyena balaṁ rasam ।*
*saṁsiktā asmākaṁ vīrā dhruvā gāvo mayi gopatau ॥4॥*
*ā harāmi gavāṁ kṣīramāhārṣaṁ dhānyaṁ1 rasam ।*
*āhṛtā asmākaṁ vīrā ā patnīridamastakam ॥5॥*

## ७२१. सविताः (पुष्टिकामः) (Savitāḥ (Puṣṭikāmaḥ))

१. औदुम्बरमणिः (Audumbaramaṇiḥ) - अ. (Av.) १९.३१.१-१४

औदुम्बरेण मणिना पुष्टिकामाय वेधसा ।
पशूनां सर्वेषं स्फातिं गोष्ठे मे सविता करत् ॥१॥
यो नो अग्निर्गार्हपत्यः पशूनामधिपा असत् ।
औदुम्बरो वृषा मणिः स मा सृजतु पुष्ट्या ॥२॥
करीषिणीं लवतीं स्वधामिरां च नो गृहे ।

औदुम्बरस्य तेजसा धाता पुष्टिं दधातु मे ॥३॥
यद् द्विपाच्च चतुष्पाच्च यान्यन्नानि ये रसाः ।
गृह्णे३ हं त्वेषां भूमानं बिभ्रदौदुम्बरं मणिम् ॥४॥
पुष्टिं पशूना परि जग्रभाहं चतुष्पदां द्विपदां यच्च धान्यम् ।
पयः पशूनां रसमोषधीनां बृहस्पतिः सविता मे नि यच्छात् ॥५॥
अहं पशूनामधिपा असानि मयि पुष्टं पुष्टपतिर्दधातु ।
मह्यमौदुम्बरो मणिर्द्रविणानि नि यच्छतु ॥६॥
उप मौदुम्बरो मणिः प्रजया च धनेन च ।
इन्द्रेण जिन्वितो मणिरा मागन्त्सह वर्चसा ॥७॥
देवो मणिः सपत्नहा धनसा धनसातये ।
पशोरन्नस्य भूमानं गवां स्फातिं नि यच्छतु ॥८॥
यथाग्रे त्वं वनस्पते पुष्ट्या सह जज्ञिषे ।
एवा धनस्य मे स्फातिमा दधातु सरस्वती ॥९॥
सिनीवाल्युपा वहादयं चौदुम्बरो मणिः ॥१०॥
त्वं मणीनामधिपा वृषासि त्वयि पुष्टं पुष्टपतिर्जजान ।
त्ययीमे वाजा द्रविणानि सर्वौदुम्बरः स त्वमस्मत् सहस्वारादरातिममतिं क्षुधं च ॥११॥
ग्रामणीरसि ग्रामणीरुत्थायाभिषिक्तोऽभि मा सिंच वर्चसा ।
तेजोऽसि तेजो मयि धारयाधि रयिरसि रयिं मे धेहि ॥१२॥
पृष्टिरसि पुष्ट्या मा समङ्ग्धि गृहमेधी गृहपतिं मा कृणु ।
औदुम्बरः स त्वमस्मासु धेहि रयिं च नः सर्ववीरं नि यच्छा रायस्पोषाय प्रति मुंचे अहं त्वाम् ॥१३॥
अयमौदुम्बरो मणिर्वीरो वीराय बध्यते ।
स नः सनिं मधुमतीं कृणोतु रयिं च नः सर्ववीरं नि यच्छात् ॥१४॥

*audumbareṇa maṇinā puṣṭikāmāya vedhasā* ।
*paśūnāṁ sarveṣaṁ sphātiṁ goṣṭhe me savitā karat* ॥1॥
*yo no agnirgārhapatyaḥ paśūnāmadhipā asat* ।
*audumbaro vṛṣā maṇiḥ sa mā sṛjatu pṛṣṭyā* ॥2॥
*karīṣiṇīṁ lavatīṁ svadhāmirāṁ cha no gṛhe* ।
*audumbarasya tejasā dhātā puṣṭiṁ dadhātu me* ॥3॥
*yad dvipāchcha chatuṣpāchcha yānyannāni ye rasāḥ* ।
*gṛhṇe3 haṁ tveṣāṁ bhūmānaṁ bibhradaudumbaraṁ maṇim* ॥4॥
*puṣṭiṁ paśūnā pari jagrabhāhaṁ chatuṣpadāṁ dvipadāṁ yachcha dhānyam* ।
*payaḥ paśūnāṁ rasamoṣadhīnāṁ bṛhaspatiḥ savitā me ni yachchhāt* ॥5॥
*ahaṁ paśūnāmadhipā asāni mayi puṣṭaṁ puṣṭapatirdadhātu* ।
*mahyamaudumbaro maṇirdraviṇāni ni yachchhatu* ॥6॥
*upa maudumbaro maṇiḥ prajayā cha dhanena cha* ।
*indreṇa jinvito maṇirā māgantsaha varchasā* ॥7॥
*devo maṇiḥ sapatnahā dhanasā dhanasātaye* ।
*paśorannasya bhūmānaṁ gavāṁ sphātiṁ ni yachchhatu* ॥8॥
*yathāgre tvaṁ vanaspate puṣṭyā saha jajñiṣe* ।
*evā dhanasya me sphātimā dadhātu sarasvatī* ॥9॥
*sinīvālyupā vahādayaṁ chaudumbaro maṇiḥ* ॥10॥
*tvaṁ maṇīnāmadhipā vṛṣāsi tvayi puṣṭaṁ puṣṭapatirjajāna* ।
*tyayīme vājā draviṇāni sarvaudumbaraḥ sa tvamasmat sahasvārādarātimamatiṁ kṣudhaṁ cha* ॥11॥
*grāmaṇīrasi grāmaṇīrutthāyābhiṣikto'bhi mā siṁcha varchasā* ।
*tejo'si tejo mayi dhārayādhi rayirasi rayiṁ me dhehi* ॥12॥
*pṛṣṭirasi puṣṭyā mā samaṅgdhi gṛhamedhī gṛhapatiṁ mā kṛṇu* ।
*audumbaraḥ sa tvamasmāsu dhehi rayiṁ cha naḥ sarvavīraṁ ni yachchhā rāyaspoṣāya prati muṁche ahaṁ tvām* ॥13॥
*ayamaudumbaro maṇirvīro vīrāya badhyate* ।
*sa naḥ saniṁ madhumatīṁ kṛṇotu rayiṁ cha naḥ sarvavīraṁ ni yachchhāt* ॥14॥

## ७२२. सव्यः (Savyaḥ)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.२१.१-११

न्यू३षु वाचं प्र महे भरामहे गिर इन्द्राय सदने विवस्वतः ।
नू चिद्धि रत्नं ससमतामिवाविदन्न दुष्टुतिर्द्रविणोदेषु शस्यते ॥१॥
दुरो अश्वस्य दुर इन्द्र गोरसि दुरो यवस्य वसुन इनस्पतिः ।
शिक्षानरः प्रदिवो अकामकर्शनः सखा सखिभ्यस्तमिदं गृणीमसि ॥२॥
शचीव इन्द्र पुरुकृद्द्युमत्तम तवेदिदमभितश्चेकिते वसु ।
अतः संगृभ्याभिभूत आ भर मा त्वायतो जरितुः काममूनयीः ॥३॥
एभिर्द्युभिः सुमना एभिरिन्दुभिर्निरुन्धानो अमतिं गोभिरश्विना ।
इन्द्रेण दस्युं दरयन्त इन्दुभिर्युतद्वेषसः समिषा रभेमहि ॥४॥
समिन्द्र राया समिषा रभेमहि सं वाजेभिः पुरुश्चन्द्रैरभिद्युभिः ।
सं देव्या प्रमत्या वीरशुष्मया गोअग्रयाश्वावत्या रभेमहि ॥५॥
ते त्वा मदा अमदन्तानि वृष्ण्या ते सोमासो वृत्रहत्येषु सत्पते ।
यत्कारवे दश वृत्राण्यप्रति बर्हिष्मते नि सहस्राणि बर्हयः ॥६॥
युधा युधमुप घेदेषि धृष्णुया पुरा पुरं समिदं हंस्योजसा ।
नम्या यदिन्द्र सख्या परावति निबर्हयो नमुचिं नाम मायिनम् ॥७॥
त्वं करंजमुत पर्णयं वधीस्तेजिष्ठयातिथिग्वस्य वर्तनी ।
त्वं शता वङ्गृदस्याभिनत्पुरोऽनानुदः परिषूता ऋजिश्वना ॥८॥
त्वमेतां जनराज्ञो द्विर्दशाबन्धुना सुश्रवसोपजग्मुषः ।
षष्टिं सहस्रा नवतिं नव श्रुतो नि चक्रेण रथ्या दुष्पदावृणक् ॥९॥
त्वमाविथ सुश्रवसं तवोतिभिस्तव त्रामभिरिन्द्र तूर्वयाणम् ।
त्वमस्मै कुत्समतिथिग्वमायुं महे राज्ञे यूने अरन्धनायः ॥१०॥
य उद्दचीन्द्र देवगोपाः सखायस्ते शिवतमा असाम ।
त्वां स्तोषाम त्वया सुवीरा द्राघीय आयुः प्रतरं दधानाः ॥११॥

*nyū3ṣu vācham pra mahe bharāmahe gira indrāya sadane vivasvataḥ /*
*nū chiddhi ratnaṁ sasamatāmivāvidanna duṣṭutirdraviṇodeṣu śasyate //1 //*
*duro aśvasya dura indra gorasi duro yavasya vasuna inaspatiḥ /*
*śikṣānaraḥ pradivo akāmakarśanaḥ sakhā sakhibhyastamidaṁ gṛṇīmasi //2 //*
*śachīva indra purukṛddyumattama tavedidamabhitaśchekite vasu /*
*ataḥ saṁgṛbhyābhibhūta ā bhara mā tvāyato jarituḥ kāyamūnayīḥ //3 //*
*ebhirdyubhiḥ sumanā ebhirindubhirnirundhāno amatiṁ gobhiraśvinā /*
*indreṇa dasyuṁ darayanta indubhiryutadveṣasaḥ samiṣā rabhemahi //4 //*
*samindra rāyā samiṣā rabhemahi saṁ vājebhiḥ puruśchandrairabhidyubhiḥ /*
*saṁ devyā pramatyā vīraśuṣmayā goagrayāśvāvatyā rabhemahi //5 //*
*te tvā madā amadantāni vṛṣṇyā te somāso vṛtrahatyeṣu satpate /*
*yatkārave daśa vṛtrāṇyaprati barhiṣmate ni sahasrāṇi barhayaḥ //6 //*
*yudhā yudhamupa ghedeṣi dhṛṣṇuyā purā puraṁ samidaṁ haṁsyojasā /*
*namyā yadindra sakhyā parāvati nibarhayo namuchiṁ nāma māyinam //7 //*
*tvaṁ karaṁjamuta parṇayaṁ vadhīstejiṣṭhayātithigvasya vartanī /*
*tvaṁ śatā vaṅgṛdasyābhinatpuro'nānudaḥ pariṣūtā ṛjiśvanā //8 //*
*tvametāṁ janarajño dvirdaśābandhunā suśravasopajagmuṣaḥ /*
*ṣaṣṭiṁ sahasrā navatiṁ nava śruto ni chakreṇa rathyā duṣpadāvṛṇak //9 //*
*tvamāvitha suśravasaṁ tavotibhistava trāmabhirindra tūrvayāṇam /*
*tvamasmai kutsamatithigvamāyuṁ mahe rājñe yūne arandhanāyaḥ //10 //*
*ya udṛchīndra devagopāḥ sakhāyaste śivatamā asāma /*
*tvāṁ stoṣāma tvayā suvīrā drāghīya āyuḥ prataraṁ dadhānāḥ //11 //*

## ७२३. सव्य आंगिरसः (Savya Āṁgirasaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १.५१.१-१५; १.५२.१-१५; १.५३.१-११; १.५४ १-११; १.५५.१-८; १.५६.१-६; १.५७.१-६; सा. (Sv.) ३७३; ३७६-३७७

ऋ. (Rv.) १.५१.१-१५

अभि त्यं मेषं पुरुहूतमृग्मियमिन्द्रं गीर्भिर्मदता वस्वो अर्णवम् ।
यस्य द्यावो न विचरन्ति मानुषा भुजे मंहिष्ठमभि विप्रमर्चत ॥१॥
अभीमवन्वन्त्स्वभिष्टिमूतयोऽनतरिक्षप्रां तविषीभिरावृतम् ।
इन्द्रं दक्षास ऋभवो मदच्युतं शतक्रतुं जवनी सूनृतारुहत् ॥२॥
त्वं गोत्रमङ्गिरोभ्योऽवृणोरपोतात्रये शतदुरेषु गातुवित् ।
ससेन चिद्विमदायावहो वस्वाजावद्रिं वावसानस्य नर्तयन् ॥३॥
त्वमपामपिधानावृणोरपाधारयः पर्वते दानुमद्वसु ।
वृत्रं यदिन्द्र शवसावधीरहिमादित्सूर्यं दिव्यारोहयो दृशे ॥४॥
त्वं मायाभिरप मायिनोऽधमः स्वधाभिर्ये अधि शुप्तावजुह्वत ।
त्वं पिप्रोर्नृमणः प्रारुजः पुरः प्र ऋजिश्वानं दस्युहत्येष्वाविथ ॥५॥
त्वं कुत्सं शुष्णहत्येष्वाविथारन्धयोऽतिथिग्वाय शम्बरम् ।
महान्तं चिदर्बुदं नि क्रमीः पदा सनादेव दस्युहत्याय जज्ञिषे ॥६॥
त्वे विश्वा तविषी सध्र्यग्घिता तव राधः सोमपीथाय हर्षते ।
तव वज्रश्चिकिते बाह्वोर्हितो वृश्चा शत्रोरव विश्वानि वृष्ण्या ॥७॥
वि जानीह्यार्यान्ये च दस्यवो बर्हिष्मते रन्धया शासदव्रतान् ।
शाकी भव यजमानस्य चोदिता विश्वेत्ता ते सधमादेषु चाकन ॥८॥
अनुव्रताय रन्धयन्नपव्रतानाभूभिरिन्द्रः श्नथयन्ननाभुवः ।
वृद्धस्य चिद्वर्धतो द्यामिनक्षतः स्तवानो वम्रो वि जघान संदिहः ॥९॥
तक्षद्यत्त उशना सहसा सहो वि रोदसी मज्मना बाधते शवः ।
आ त्वा वातस्य नृमणो मनोयुज आ पूर्यमाणमवहन्नभि श्रवः ॥१०॥
मन्दिष्ट यदुशने काव्ये सचाँ इन्द्रो वंकू वंकुतराधि तिष्ठति ।
उग्रो ययिं निरपः स्रोतसासृजद्वि शुष्णस्य दृंहिता ऐरयत्पुरः ॥११॥
आ स्मा रथं वृषपाणेषु तिष्ठसि शार्यातस्य प्रभृता येषु मन्दसे ।
इन्द्र यथा सुतसोमेषु चाकनोऽनर्वाणं श्लोकमा रोहसे दिवि ॥१२॥
अददा अर्भां महते वचस्यवे कक्षीवते वृचयामिन्द्र सुन्वते ।
मेनाभवो वृषणश्वस्य सुक्रतो विश्वेत्ता ते सवनेषु प्रवाच्या ॥१३॥
इन्द्रो अश्रायि सुध्यो निरेके पज्रेषु स्तोमो दुर्यो न यूपः ।
अश्वयुर्गव्यु रथयुर्वसूयुरिन्द्र इद्रायः क्षयति प्रयन्ता ॥१४॥
इदं नमो वृषभाय स्वराजे सत्यशुष्माय तवसेऽवाचि ।
अस्मिन्निन्द्र वृजने सर्ववीराः स्मत्सूरिभिस्तव शर्मन्त्स्याम ॥१५॥

*abhi tyaṁ meṣaṁ puruhūtamṛgmiyamindraṁ gīrbhirmadatā vasvo arṇavam /*
*yasya dyāvo na vicharanti mānuṣā bhuje maṁhiṣṭhamabhi vipramarchata //1 //*
*abhīmavanvantsvabhiṣṭimūtayo'natarikṣaprāṁ taviṣībhirāvṛtam /*
*indraṁ dakṣāsa ṛbhavo madachyutaṁ śatakratuṁ javanī sūnṛtāruhat //2 //*
*tvaṁ gotramaṅgirobhyo'vṛṇorapotātraye śataduresu gātuvit /*
*sasena chidvimadāyāvaho vasvājāvadriṁ vāvasānasya nartayan //3 //*
*tvamapāmapidhānāvṛṇorapādhārayaḥ parvate dānumadvasu /*
*vṛtraṁ yadindra śavasāvadhīrahimāditsūryaṁ divyārohayo dṛśe //4 //*
*tvaṁ māyābhirapa māyino'dhamaḥ svadhābhirye adhi śuptāvajuhvata /*
*tvaṁ piprornṛmaṇaḥ prārujaḥ puraḥ pra ṛjiśvānaṁ dasyuhatyeṣvāvitha //5 //*
*tvaṁ kutsaṁ śuṣṇahatyeṣvāvithārandhayo'tithigvāya śambaram /*
*mahāntaṁ chidarbudaṁ ni kramīḥ padā sanādeva dasyuhatyāya jajñiṣe //6 //*
*tve viśvā taviṣī sadhyragghitā tava rādhaḥ somapīthāya harṣate /*
*tava vajraśchikite bāhvorhito vṛśchā śatrorava viśvāni vṛṣṇyā //7 //*
*vi jānīhyāryānye cha dasyavo barhiṣmate randhayā śāsadavratān /*
*śākī bhava yajamānasya choditā viśvettā te sadhamādeṣu chākana //8 //*
*anuvratāya randhayannapavratānābhūbhirindraḥ śnathayannanābhuvaḥ /*
*vṛddhasya chidvardhato dyāminakṣataḥ stavāno vamro vi jaghāna saṁdihaḥ //9 //*
*takṣadyatta uśanā sahasā saho vi rodasī majmanā bādhate śavaḥ /*

*ā tvā vātasya nṛmaṇo manoyuja ā pūryamāṇamavahannabhi śravaḥ ॥10 ॥*
*mandiṣṭa yaduśane kāvye sachām̐ indro vaṁkū vaṁkutarādhi tiṣṭhati ।*
*ugro yayiṁ nirapaḥ srotasāsṛjadvi śuṣṇasya dṛṁhitā airayatpuraḥ ॥11 ॥*
*ā smā rathaṁ vṛṣapāṇeṣu tiṣṭhasi śāryātasya prabhṛtā yeṣu mandase ।*
*indra yathā sutasomeṣu chākano'narvāṇaṁ ślokamā rohase divi ॥12 ॥*
*adadā arbhāṁ mahate vachasyave kakṣīvate vṛchayāmindra sunvate ।*
*menābhavo vṛṣaṇaśvasya sukrato viśvettā te savaneṣu pravāchyā ॥13 ॥*
*indro aśrāyi sudhyo nireke pajreṣu stomo duryo na yūpaḥ ।*
*aśvayurgavyu rathayurvasūyurindra idrāyaḥ kṣayati prayantā ॥14 ॥*
*idaṁ namo vṛṣabhāya svarāje satyaśuṣmāya tavase'vāchi ।*
*asminnindra vṛjane sarvavīrāḥ smatsūribhistava śarmantsyāma ॥15 ॥*

ऋ. (Rv.) १.५२.१-१५

त्यं सु मेषं महया स्वर्विदं शतं यस्य सुभ्वः साकमीरते ह्न ।
अत्यं न वाजं हवनस्यदं रथमेन्द्रं ववृतयामवसे सुवृक्तिभिः ॥१॥
स पर्वतो न धरुणेष्वच्युतः सहस्रमूतिस्तविषीषु वावृधे ।
इन्द्रो यद्वृत्रमवधीन्नदीवृतमुब्जन्नर्णांसि जर्हृषाणो अन्धसा ॥२॥
स हि द्वरो द्वरिषु वव्र ऊधनि चन्द्रबुध्नो मदवृद्धो मनीषिभिः ।
इन्द्र तमह्वे स्वपस्यया धिया मंहिष्ठरातिं स हि पप्रिरन्धसः ॥३॥
आ यं पृणन्ति दिवि सद्मबर्हिषः समुद्रं न सुभ्वः१ स्वा अभिष्टयः ।
तं वृत्रहत्ये अनु तस्थुरूतयः शुष्मा इन्द्रमवाता अह्रुतप्सवः ॥४॥
अभि स्ववृष्टिं मदे अस्य युध्यतो रघ्वीरिव प्रवणे सस्रुरूतयः ।
इन्द्रा यद्वज्री धृषमाणे अन्धसा भिनद्वलस्य परिधींरिव त्रितः ॥५॥
परीं घृणा चरति तित्विषे शवोऽपो वृत्वी रजसो बुध्नमाशयत् ।
वृत्रस्य यत्प्रवणे दुर्गृभिश्वनो निजघन्थ हन्वोरिन्द्र तन्यतुम् ॥६॥
ह्रदं न हि त्वा न्यृषन्त्यूर्मयो ब्रह्माणीन्द्र तव यानि वर्धना ।
त्वष्टा चित्ते युज्यं शवस्ततक्ष वज्रमभिभूत्योजसम् ॥७॥
जघन्वाँ उ हरिभिः संभृतक्रतविन्द्र वृत्रं मनुषे गातुयन्नपः ।
अयच्छथा बाह्वोर्वज्रमायसमधारयो दिव्या सूर्यं दृशे ॥८॥
बृहत्स्वश्चन्द्रममवद्यदुक्थ्य१मकृण्वत भियसा रोहणं दिवः ।
यान्मानुषप्रधना इन्द्रभूतयः स्वर्नृषाचो मरुतोऽमदन्ननु ॥९॥
द्यौश्चिदस्यामवाँ अहेः स्वनादयोयवीद्भियसा वज्र इन्द्र ते ।
वृत्रस्य यद्बद्बधानस्य रोदसी मदे सुतस्य शवसाभिनच्छिरः ॥१०॥
यदिन्न्विन्द्र पृथिवी दशभुजिरहानि विश्वा ततनन्त कृष्टयः ।
अत्राह ते मघवन्विश्रुतं सहो द्यामनु शवसा बर्हणा भुवत् ॥११॥
त्वमस्य पारे रजसो व्योमनः स्वभूतयोजा अवसे धृषन्मनः ।
चकृषे भूमिं प्रतिमानमोजसोऽपः स्वः परिभूरेष्या दिवम् ॥१२॥
त्वं भुवः प्रतिमानं पृथिव्या ऋष्ववीरस्य बृहतः पतिर्भूः ।
विश्वमाप्रा अन्तरिक्षं महित्वा सत्यमद्धा नकिरन्यस्त्वावान् ॥१३॥
न यस्य द्यावापृथिवी अनु व्यचो न सिन्धवो रजसो अन्तमानशुः ।
नोत स्ववृष्टिं मदे अस्य युध्यत एको अन्यच्चकृषे विश्वमानुषक् ॥१४॥
आर्चन्नत्र मरुतः सस्मिन्नाजौ विश्वे देवासो अमदन्ननु त्वा ।
वृत्रस्य यद् भृष्टिमता वेधन नि त्वमिन्द्र प्रत्यानं जघन्थ ॥१५॥

*tyaṁ su meṣaṁ mahayā svarvidaṁ śataṁ yasya subhavaḥ sākamīrate hna ।*
*atyaṁ na vājaṁ havanasyadaṁ rathamendraṁ vavṛtayāmavase suvṛktibhiḥ ॥1 ॥*
*sa parvato na dharuṇeṣvachyutaḥ sahasramūtistaviṣīṣu vāvṛdhe ।*
*indro yadvṛtramavadhīnnadīvṛtamubjannarṇāṁsi jarhṛṣāṇo andhasā ॥2 ॥*
*sa hi dvaro dvariṣu vavra ūdhani chandrabudhno madavṛddho manīṣibhiḥ ।*
*indra tamahve svapasyayā dhiyā maṁhiṣṭharātiṁ sa hi paprirandhasaḥ ॥3 ॥*
*ā yaṁ pṛṇanti divi sadmabarhiṣaḥ samudraṁ na subhvaḥ1 svā abhiṣṭayaḥ ।*
*taṁ vṛtrahatye anu tasthurūtayaḥ śuṣmā indramavātā ahrutapsavaḥ ॥4 ॥*

*abhi svavṛṣṭiṁ made asya yudhyato raghvīriva pravaṇe sasrurūtayaḥ ।*
*indrā yadvajrī dhṛṣamāṇe andhasā bhinadvalasya paridhīm̐riva tritaḥ ॥5॥*
*parīṁ ghṛṇā charati titviṣe śavo'po vṛtvī rajaso budhnamāśayat ।*
*vṛtrasya yatpravaṇe durgṛbhiśvano nijaghantha hanvorindra tanyatum ॥6॥*
*hradaṁ na hi tvā nyṛṣantyūrmayo brahmāṇīndra tava yāni vardhanā ।*
*tvaṣṭā chitte yujyaṁ śavastatakṣa vajramabhibhūtyojasam ॥7॥*
*jaghanvām̐ u haribhiḥ saṁbhṛtakratavindra vṛtraṁ manuṣe gātuyannapaḥ ।*
*ayachchhathā bāhvorvajramāyasamadhārayo divyā sūryaṁ dṛśe ॥8॥*
*bṛhatsvaśchandramamavadyadukthya1makṛṇvata bhiyasā rohaṇaṁ divaḥ ।*
*yānmānuṣapradhanā indrabhūtayaḥ svarnṛṣācho maruto'madannanu ॥9॥*
*dyauśchidasyāmavām̐ aheḥ svanādayoyavīdbhiyasā vajra indra te ।*
*vṛtrasya yadbadbadhānasya rodasī made sutasya śavasābhinachchhiraḥ ॥10॥*
*yadinnvindra pṛthivī daśabhujirahāni viśvā tatananta kṛṣṭayaḥ ।*
*atrāha te maghavanviśrutaṁ saho dyāmanu śavasā barhaṇā bhuvat ॥11॥*
*tvamasya pāre rajaso vyomanaḥ svabhūtayojā avase dhṛṣanmanaḥ ।*
*chakṛṣe bhūmiṁ pratimānamojaso'paḥ svaḥ paribhūreṣyā divam ॥12॥*
*tvaṁ bhuvaḥ pratimānaṁ pṛthivyā ṛṣvavīrasya bṛhataḥ patirbhūḥ ।*
*viśvamāprā antarikṣaṁ mahitvā satyamaddhā nakiranyastvāvān ॥13॥*
*na yasya dyāvāpṛthivī anu vyacho na sindhavo rajaso antamānaśuḥ ।*
*nota svavṛṣṭiṁ made asya yudhyata eko anyachchakṛṣe viśvamānuṣak ॥14॥*
*ārchannatra marutaḥ sasminnājau viśve devāso amadannanu tvā ।*
*vṛtrasya yad bhṛṣṭimatā vedhana ni tvamindra pratyānaṁ jaghantha ॥15॥*

ऋ. (Rv.) १.५३.१-११

न्यू१षु वाचं प्र महे भरामहे गिर इन्द्राय सदने विवस्वतः ।
नू चिद्धि रत्नं ससतामिवाविदन्न दुष्टुतिर्द्रविणोदेषु शस्यते ॥१॥
दुरो अश्वस्य दुर इन्द्र गोरसि दुरो यवस्य वसुन इनस्पतिः ।
शिक्षानरः प्रदिवो अकामकर्शनः सखा सखिभ्यस्तमिदं गृणीमसि ॥२॥
शचीव इन्द्र पुरुकृद्द्युमत्तम तवेदिदमभितश्चेकिते वसु ।
अतः संगृभ्याभिभूत आ भर मा त्वायतो जरितुः काममूनयीः ॥३॥
एभिर्द्युभिः सुमना एभिरिन्दुभिर्निरुन्धानो अमतिं गोभिरश्विना ।
इन्द्रेण दस्युं दरयन्त इन्दुभिर्युतद्वेषसः समिषा रभेमहि ॥४॥
समिन्द्र राया समिषा रभेमहि सं वाजेभिः पुरुश्चन्द्रैरभिद्युभिः ।
सं देव्या प्रमत्या वीरशुष्मया गोअग्रयाश्वावत्या रभेमहि ॥५॥
ते त्वा मदा अमदन्तानि वृष्ण्या ते सोमासो वृत्रहत्येषु सत्पते ।
यत्कारवे दश वृत्राण्यप्रति बर्हिष्मते नि सहस्राणि बर्हयः ॥६॥
युधा युधमुप घेदेषि धृष्णुया पुरा पुरं समिदं हंस्योजसा ।
नम्या यदिन्द्र सख्या परावति निबर्हयो नमुचिं नाम मायिनम् ॥७॥
त्वं करंजमुत पर्णयं वधीस्तेजिष्ठयातिथिग्वस्य वर्तनी ।
त्वं शता वङ्गृदस्याभिनत्पुरोऽनानुदः परिषूता ऋजिश्वना ॥८॥
त्वमेतांजनराज्ञो द्विर्दशबान्धुना सुश्रवसोपजग्मुषः ।
षष्टिं सहस्रा नवतिं नव श्रुतो नि चक्रेण रथ्या दुष्पदावृणक् ॥९॥
त्वमाविथ सुश्रवसं तवोतिभिस्तव त्रामभिरिन्द्र तूर्वयाणम् ।
त्वमस्मै कुत्समतिथिग्वमायुं महे राज्ञे यूने अरन्धनायः ॥१०॥
य उद्दचीन्द्र देवगोपाः सखायस्ते शिवतमा असाम ।
त्वां स्तोषाम त्वया सुवीरा द्राघीय आयुः प्रतरं दधानाः ॥११॥

*nyū1ṣu vāchaṁ pra mahe bharāmahe gira indrāya sadane vivasvataḥ ।*
*nū chiddhi ratnaṁ sasatāmivāvidanna duṣṭutirdraviṇodeṣu śasyate ॥1॥*
*duro aśvasya dura indra gorasi duro yavasya vasuna inaspatiḥ ।*
*śikṣānaraḥ pradivo akāmakarśanaḥ sakhā sakhibhyastamidaṁ gṛṇīmasi ॥2॥*
*śachīva indra purukṛddyumattama tavedidamabhitaśchekite vasu ।*
*ataḥ saṁgṛbhyābhibhūta ā bhara mā tvāyato jarituḥ kāmamūnayīḥ ॥3॥*

*ebhirdyubhiḥ sumanā ebhirindubhirnirundhāno amatiṁ gobhiraśvinā* ।
*indreṇa dasyuṁ darayanta indubhiryutadveṣasaḥ samiṣā rabhemahi* ॥4॥
*samindra rāyā samiṣā rabhemahi saṁ vājebhiḥ puruśchandrairabhidyubhiḥ* ।
*saṁ devyā pramatyā vīraśuṣmayā goagrayāśvāvatyā rabhemahi* ॥5॥
*te tvā madā amadantāni vṛṣṇyā te somāso vṛtrahatyeṣu satpate* ।
*yatkārave daśa vṛtrāṇyaprati barhiṣmate ni sahasrāṇi barhayaḥ* ॥6॥
*yudhā yudhamupa ghedeṣi dhṛṣṇuyā purā puraṁ samidaṁ haṁsyojasā* ।
*namyā yadindra sakhyā parāvati nibarhayo namuchiṁ nāma māyinam* ॥7॥
*tvaṁ karaṁjamuta parṇayaṁ vadhīstejiṣṭhayātithigvasya vartanī* ।
*tvaṁ śatā vaṅgṛdasyābhinatpuro'nānudaḥ pariṣūtā ṛjiśvanā* ॥8॥
*tvametāṁjanarājño dvirdaśabāndhunā suśravasopajagmuṣaḥ* ।
*ṣaṣṭiṁ sahasrā navatiṁ nava śruto ni chakreṇa rathyā duṣpadāvṛṇak* ॥9॥
*tvamāvitha suśravasaṁ tavotibhistava trāmabhirindra tūrvayāṇam* ।
*tvamasmai kutsamatithigvamāyuṁ mahe rājñe yūne arandhanāyaḥ* ॥10॥
*ya udṛchīndra devagopāḥ sakhāyaste śivatamā asāma* ।
*tvāṁ stoṣāma tvayā suvīrā drāghīya āyuḥ prataraṁ dadhānāḥ* ॥11॥

ऋ. (Rv.) १.५४.१-११

मा नो अस्मिन्मघवन्पृत्स्वंहसि नाहि ते अन्तः शवसः परीणशे ।
अक्रन्दयो नद्यो३रोरुवद्वना कथा न क्षोणीर्भियसा समारत ॥१॥
अर्चा शक्राय शाकिने शचीवते शृण्वन्तमिन्द्रं महयन्नभि ष्टुहि ।
यो धृष्णुना शवसा रोदसी उभे वृषा वृषत्वा वृषभो न्यृंजते ॥२॥
अर्चा दिवे बृहते शूष्यं१ वचः स्वक्षत्रं यस्य धृषतो धृषन्मनः।
बृहच्छ्रवा असुरो बर्हणा कृतः पुरो हरिभ्यां वृषभो रथो हि षः ॥३॥
त्वं दिवो बृहतः सानु कोपयोऽव त्मना धृषता शम्बरं भिनत् ।
यन्मायिनो व्रन्दिनो मन्दिना धृषच्छितां गभस्तिमशनिं पृत्न्यसि ॥४॥
नि यद्वृणक्षि श्वसनस्य मूर्धनि शुष्णय चिद् व्रन्दिनो रोरुवद्वना ।
प्राचीनेन मनसा बर्हणावता यदद्या चित्कणवः कस्त्वा परि ॥५॥
त्वमाविथ नर्यं तुर्वशं यदुं त्वं तुर्वीतिं वय्यं शतक्रतो ।
त्वं रथमेतशं कृत्व्ये धने त्वं पुरो नवतिं दम्भयो नव ॥६॥
स घा राजा सत्पतिः शूशुवज्जनो रातहव्यः प्रति यः शासमिन्वति ।
उक्था वा यो अभिगृणाति राधसा दानुरस्मा उपरा पिन्वते दिवः ॥७॥
असमं क्षत्रमसमा मनीषा प्रसोमपा अपसा सन्तु नेमे ।
ये त इन्द्र ददुषो वर्धयन्ति महि क्षत्रं स्थविरं वृष्ण्यं च ॥८॥
तुभ्येदेते बहुला अद्रिदुग्धाश्चमूषदश्चमसा इन्द्रपानाः ।
व्यश्नुहि तर्पया काममेषामथा मनो वसुदेयाय कृष्व ॥९॥
अपामतिष्ठद्धरुणह्वरं तमोऽन्तर्वृत्रस्य जठरेषु पर्वतः ।
अभीमिन्द्रो नद्यो वव्रिणा हिता विश्वा अनुष्ठाः प्रवणेषु जिघ्नते ॥१०॥
स शेवृधमधि धा द्युम्नमस्मे महि क्षत्रं जनाषाळिन्द्र तव्यम् ।
रक्षा च नो मघोनः पाहि सूरीन् राये च नः स्वपत्या इषे धाः ॥११॥

*mā no asminmaghavanpṛtsvaṁhasi nāhi te antaḥ śavasaḥ parīṇaśe* ।
*akrandayo nadyo3roruvadvanā kathā na kṣoṇīrbhiyasā samārata* ॥1॥
*archā śakrāya śākine śachīvate śṛṇvantamindraṁ mahayannabhi ṣṭuhi* ।
*yo dhṛṣṇunā śavasā rodasī ubhe vṛṣā vṛṣatvā vṛṣabho nyṛṁjate* ॥2॥
*archā dive bṛhate śūṣyaṁ1 vachaḥ svakṣatraṁ yasya dhṛṣato dhṛṣanmanaḥ* ।
*bṛhachchhravā asuro barhaṇā kṛtaḥ puro haribhyāṁ vṛṣabho ratho hi ṣaḥ* ॥3॥
*tvaṁ divo bṛhataḥ sānu kopayo'va tmanā dhṛṣatā śambaraṁ bhinat* ।
*yanmāyino vrandino mandinā dhṛṣachchhitāṁ gabhastimaśāniṁ pṛtnyasi* ॥4॥
*ni yadvṛṇakṣi śvasanasya mūrdhani śuṣṇaya chid vrandino roruvadvanā* ।
*prāchīnena manasā barhaṇāvatā yadṛdyā chitkaṇavaḥ kastvā pari* ॥5॥
*tvamāvitha naryaṁ turvaśaṁ yaduṁ tvaṁ turvītiṁ vayyaṁ śatakrato* ।
*tvaṁ rathametaśaṁ kṛtvye dhane tvaṁ puro navatiṁ dambhayo nava* ॥6॥

*sa ghā rājā satpatiḥ śūśuvajjano rātahavyaḥ prati yaḥ śāsaminvati* ।
*ukthā vā yo abhigṛṇāti rādhasā dānurasmā uparā pinvate divaḥ* ॥7॥
*asamaṁ kṣatramasamā manīṣā prasomapā apasā santu neme* ।
*ye ta indra daduṣo vardhayanti mahi kṣatraṁ sthaviraṁ vṛṣṇyaṁ cha* ॥8॥
*tubhyedete bahulā adridugdhāśchamūṣadaśchamasā indrapānāḥ* ।
*vyaśnuhi tarpayā kāmabheṣāmathā mano vasudeyāya kṛṣva* ॥9॥
*apāmatiṣṭhaddharuṇahvaraṁ tamo'ntarvṛtrasya jaṭhareṣu parvataḥ* ।
*abhīmindro nadyo vavriṇā hitā viśvā anuṣṭhāḥ pravaṇeṣu jighnate* ॥10॥
*sa śevṛdhamadhi dhā dyumnamasme mahi kṣatraṁ janāṣāḻindra tavyam* ।
*rakṣā cha no maghonaḥ pāhi sūrīn rāye cha naḥ svapatyā iṣe dhāḥ* ॥11॥

ऋ. (Rv.) १.५५.१-८

दिवश्चिदस्य वरिमा वि पप्रथ इन्द्रं न मह्ना पृथिवी चन प्रति ।
भीमस्तुविष्मांचर्षणिभ्य आतपः शिशीते वज्रं तेजसे न वंसगः ॥१॥
सो अर्णवो न नद्यः समुद्रियः प्रति गृभ्णाति विश्रिता वरीमभिः ।
इन्द्रः सोमस्य पीतये वृषायते सनात्स युध्म ओजसा पनस्यते ॥२॥
त्वं तमिन्द्र पर्वतं न भोजसे महो नृम्णस्य धर्मणामिरज्यसि ।
प्र वीर्येण देवताति चेकिते विश्वस्मा उग्रः कर्मणे पुरोहितः ॥३॥
स इद्वने नमस्युभिर्वचस्यते चारु जनेषु प्रब्रुवाण इन्द्रियम् ।
वृषा छन्दुर्भवति हर्यतो वृषा क्षेमेण धेनां मघवा यदिन्वति ॥४॥
स इन्महानि समिथानि मज्मना कृणोति युध्म ओजसा जनेभ्यः ।
अधा चन श्रद्दधति त्विषीमत इन्द्राय वज्रं निघन्घ्निते वधम् ॥५॥
स हि श्रवस्युः सदनानि कृत्रिमा क्ष्मया वृधान ओजसा विनाशयन् ।
ज्योतींषि कृण्वन्नवृकाणि यज्यवेऽव सुक्रतुः सर्तवा अपः सृजत् ॥६॥
दानाय मनः सोमपावन्नस्तु तेऽर्वांचा हरी वन्दनश्रुदा कृधि ।
यभिष्ठासः सारथयो य इन्द्र ते न त्वा केता आ द भ्नुवन्ति भूर्णयः ॥७॥
अप्रक्षितं वसु बिभर्षि हस्तयोरषळहं सहस्तन्वि श्रुतो दधे ।
आवृतासोऽवतासो न कर्तृभिस्तनूषु ते क्रतव इन्द्र भूरयः ॥८॥
*divaśchidasya varimā vi paprathe indraṁ na mahnā pṛthivī chana prati* ।
*bhīmastuviṣmāṁcharṣaṇibhya ātapaḥ śiśīte vajraṁ tejase na vaṁsagaḥ* ॥1॥
*so arṇavo na nadyaḥ samudriyaḥ prati gṛbhṇāti viśritā varīmabhiḥ* ।
*indraḥ somasya pītaye vṛṣāyate sanātsa yudhma ojasā panasyate* ॥2॥
*tvaṁ tamindra parvataṁ na bhojase maho nṛmṇasya dharmaṇāmirajyasi* ।
*pra vīryeṇa devatāti chekite viśvasmā ugraḥ karmaṇe purohitaḥ* ॥3॥
*sa idvane namasyubhirvachasyate chāru janeṣu prabruvāṇa indriyam* ।
*vṛṣā chhandurbhavati haryato vṛṣā kṣemeṇa dhenāṁ maghavā yadinvati* ॥4॥
*sa inmahāni samithāni majmanā kṛṇoti yudhma ojasā janebhyaḥ* ।
*adhā chana śraddadhati tviṣīmata indrāya vajraṁ nighanghnite vadham* ॥5॥
*sa hi śravasyuḥ sadanāni kṛtrimā kṣamayā vṛdhāna ojasā vināśayan* ।
*jyotīṁṣi kṛṇvannavṛkāṇi yajyave'va sukratuḥ sartavā apaḥ sṛjat* ॥6॥
*dānāya manaḥ somapāvannastu te'rvāṁchā harī vandanaśrudā kṛdhi* ।
*yabhiṣṭhāsaḥ sārathayo ya indra te na tvā ketā ā da bhnuvanti bhūrṇayaḥ* ॥7॥
*aprakṣitaṁ vasu bibharṣi hastayoraṣaḻahaṁ sahastanvi śruto dadhe* ।
*āvṛtāso'vatāso na kartṛbhistanūṣu te kratava indra bhūrayaḥ* ॥8॥

ऋ. (Rv.) १.५६.१-६

एष प्र पूर्वीरव तस्य चम्रिषोऽत्यो न योषामुदयंस्त भुर्वणिः ।
दक्षं महे पाययते हिरण्ययं रथमावृत्या हरियोगमृभ्वसम् ॥१॥
तं गूर्तवो नेमन्निषः परीणसः समुद्रं न संचरणे सनिष्यवः ।
पतिं दक्षय विदथस्य नू सहा गिरिं न वेना अधि रोह तेजसा ॥२॥
स तुर्वणिर्महाँ अरेणु पौंस्यो गिरेर्भृष्टिर्न भ्राजते तुजा शवः ।
येन शुष्णं मयिनमायसो मदे दुध्र आभूषु रामयन्नि दामनि ॥३॥

देवी यदि तविषी त्वावृधोतय इन्द्रं सिषक्त्युषसं न सूर्यः ।
यो धृष्णुना शवसा बाधते तम इयर्ति रेणुं बृहदर्हरिष्वणिः ॥४॥
वि यतिरो धरुणमच्युतं रजोऽतिष्ठिपो दिव आतासु बर्हणा ।
स्वर्मीळ्हे यन्मद इन्द्र हर्ष्याहन्वृत्रं निरपामौब्जो अर्णवम् ॥५॥
त्वं दिवो धरुणं धिष ओजसा पृथिव्या इन्द्र सदनेषु माहिनः ।
त्वं सुतस्य मदे अरिणा अपो वि वृत्रस्य समया पाष्यारुजः ॥६॥
*eṣa pra pūrvīrava tasya chamriṣo'tyo na yoṣāmudayaṁsta bhurvaṇiḥ ।*
*dakṣaṁ mahe pāyayate hiraṇyayaṁ rathamāvṛtyā hariyogamṛbhvasam ॥1॥*
*taṁ gūrtavo nemanniṣaḥ parīṇasaḥ samudraṁ na saṁcharaṇe saniṣyavaḥ ।*
*patiṁ dakṣaya vidathasya nū sahā giriṁ na venā adhi roha tejasā ॥2॥*
*sa turvaṇirmahām̐ areṇu pauṁsyo girerbhṛṣṭirna bhrājate tujā śavaḥ ।*
*yena śuṣṇaṁ mayinamāyaso made dudhra ābhūṣu rāmayanni dāmani ॥3॥*
*devī yadi taviṣī tvāvṛdhotaya indraṁ siṣaktyuṣasaṁ na sūryaḥ ।*
*yo dhṛṣṇunā śavasā bādhate tama iyarti reṇuṁ bṛhadarhariṣvaṇiḥ ॥4॥*
*vi yatiro dharuṇamachyutaṁ rajo'tiṣṭhipo diva ātāsu barhaṇā ।*
*svarmīḻhe yanmada indra harṣyāhanvṛtraṁ nirapāmaubjo arṇavam ॥5॥*
*tvaṁ divo dharuṇaṁ dhiṣa ojasā pṛthivyā indra sadaneṣu māhinaḥ ।*
*tvaṁ sutasya made ariṇā apo vi vṛtrasya samayā pāṣyārujaḥ ॥6॥*

ऋ. (Rv.) १.५७.१-६

प्र मंहिष्ठाय बृहते बृहद्रये सत्यशुष्माय तवसे मतिं भरे ।
अपामिव प्रवणे यस्य दुर्धरं राधो विश्वायु शवसे अपावृतम् ॥१॥
अध ते विश्वमनु हासदिष्टय आपो निम्नेव सवना हविष्मतः ।
यत्पर्वते न समशीत हर्यत इन्द्रस्य वज्रः श्नथिता हिरण्ययः ॥२॥
अस्मै भीमाय नमसा समध्वर उषो न शुभ्र आ भरा पनीयसे ।
यस्य धाम श्रवसे नामेन्द्रियं ज्योतिरकारि हरितो नायसे ॥३॥
इमे त इन्द्र ते वयं पुरुष्टुत ये त्वारभ्य चरामसि प्रभूवसो ।
नहि त्वदन्यो गिर्वणो गिरः सघत्क्षोणीरिव प्रति नो हर्य तद्वचः ॥४॥
भूरि त इन्द्र वीर्यं१ तव समस्यस्य स्तोतुर्मघवन्काममा पृण ।
अनु ते द्यौर्बृहती वीर्यं मम इयं च ते पृथिवी नेम ओजसे ॥५॥
त्वं तमिन्द्र पर्वतं महामुरुं वज्रेण वज्रिन्पर्वशश्चकर्तिथ ।
अवासृजो निवृताः सर्तवा अपः सत्रा विश्वं दधिषे केवलं सहः ॥६॥
*pra maṁhiṣṭhāya bṛhate bṛhadraye satyaśuṣmāya tavase matiṁ bhare ।*
*apābhiva pravaṇe yasya durdharaṁ rādho viśvāyu śavase apāvṛtam ॥1॥*
*adha te viśvamanu hāsadiṣṭaya āpo nimneva savanā haviṣmataḥ ।*
*yatparvate na samaśīta haryata indrasya vajraḥ śnathitā hiraṇyayaḥ ॥2॥*
*asmai bhīmāya namasā samadhvara uṣo na śubhra ā bharā panīyase ।*
*yasya dhāma śravase nāmendriyaṁ jyotirakāri harito nāyase ॥3॥*
*ime ta indra te vayaṁ puruṣṭuta ye tvārabhya charāmasi prabhūvaso ।*
*nahi tvadanyo girvaṇo giraḥ saghatkṣoṇīriva prati no harya tadvachaḥ ॥4॥*
*bhūri ta indra vīryaṁ1 tava samasyasya stoturmaghavankāmamā pṛṇa ।*
*anu te dyaurbṛhatī vīryaṁ mama iyaṁ cha te pṛthivī nema ojase ॥5॥*
*tvaṁ tamindra parvataṁ mahāmuruṁ vajreṇa vajrinparvaśaśchakartitha ।*
*avāsṛjo nivṛtāḥ sartavā apaḥ satrā viśvaṁ dadhiṣe kevalaṁ sahaḥ ॥6॥*

सा. (Sv.) ३७३

इमे त इन्द्र ते वयं पुरुष्टुत ये त्वारभ्य चरामसि प्रभूवसो ।
न हि त्वदन्यो गिर्वणो गिरः सघत्क्षोणीरिव प्रति तद्धर्य नो वचः ॥४॥
*ime ta indra te vayaṁ puruṣṭuta ye tvārabhya charāmasi prabhūvaso ।*
*na hi tvadanyo girvaṇo giraḥ saghatkṣoṇīriva prati taddharya no vachaḥ ॥4॥*

सा. (Sv.) ३७६-३७७

अभि त्यं मेषं पुरुहूतमृग्मियमिन्द्रं गीर्भिर्मदता वस्वो अर्णवम् ।

यस्य द्यावो न विचरन्ति मानुषं भुजे मंहिष्ठमभि विप्रमर्चत ॥७॥
त्यंसु मेषं महया स्वर्विदं शतं यस्य सुभुवः साकमीरते ।
अत्यं न वाजं हवनस्यदं रथमिन्द्रं ववृत्यामवसे सुवृक्तिभिः ॥८॥
*abhi tyaṁ meṣaṁ puruhūtamṛgmiyamindraṁ gīrbhirmadatā vasvo arṇavam /*
*yasya dyāvo na vicharanti mānuṣaṁ bhuje maṁhiṣṭhamabhi vipramarchata //7 //*
*tyaṁsu meṣaṁ mahayā svarvidaṁ śataṁ yasya subhuvaḥ sākamīrate /*
*atyaṁ na vājaṁ havanasyadaṁ rathamindraṁ vavṛtyāmavase suvṛktibhiḥ //8 //*

## ७२४. सस आत्रेयः (Sasa Ātreyaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ५.२१.१-४

मनुष्वत्त्वा नि धीमहि मनुष्वत्समिधीमहि । अग्ने मनुष्वदंगिरो देवान्देवयते यज ॥१॥
त्वं हि मानुषे जनेऽग्ने सुप्रीत इध्यसे । स्रुचस्त्वा यन्त्यानुषक्सुजात सर्पिरासुते ॥२॥
त्वां विश्वे सजोषसो देवासो दूतमक्रत । सपर्यन्तस्त्वा कवे यज्ञेषु देवमीळते ॥३॥
देवं वो देवयज्ययाग्निमीळीत मर्त्यः ।
समिद्धः शुक्र दीदिह्यृतस्य योनिमासदः ससस्य योनिमासदः ॥४॥
*manuṣvattvā ni dhīmahi manuṣvatsamidhīmahi /*
*agne manuṣvadaṁgiro devāndevayate yaja //1 //*
*tvaṁ hi mānuṣe jane'gne suprīta idhyase / sruchastvā yantyānuṣaksujāta sarpirāsute //2 //*
*tvāṁ viśve sajoṣaso devāso dūtamakrata / saparyantastvā kave yajñeṣu devamīḷate //3 //*
*devaṁ vo devayajyayāgnimīḷīta martyaḥ /*
*samiddhaḥ śukra dīdihyṛtasya yonimāsadaḥ sasasya yonimāsadaḥ //4 //*

## ७२५. सारिसृक्वः (Sārisṛkvaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १०.१४२.५; ६

प्रत्यस्य श्रेणयो ददृश्र एकं नियानं बहवो रथासः ।
बाहू यदग्ने अनुमर्मृजानो न्यङ्ङुत्तानामन्वेषि भूमिम् ॥५॥
उत्ते शुष्मा जिहतामुत्ते अर्चिरुत्ते अग्ने शशमानस्य वाजाः ।
उच्छ्वञ्चस्व नि नम वर्धमान आ त्वाद्य विश्वे वसवः सदन्तु ॥६॥
*pratyasya śreṇayo dadṛśra ekaṁ niyānaṁ bahavo rathāsaḥ /*
*bāhū yadagne anumarmṛjāno nyaṅṅuttānāmanveṣi bhūmim //5 //*
*utte śuṣmā jihatāmutte archirutte agne śaśamānasya vājāḥ /*
*uchchhvañchasva ni nama vardhamāna ā tvādya viśve vasavaḥ sadantu //6 //*

## ७२६. सार्पराज्ञी (Sārparājñī)

१. सूर्य आत्मा वा (Sūrya Ātmā Vā) - सा. (Sv.) ६३०-६३२; १३७६-१३७८

सा. (Sv.) ६३०-६३२

आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरं च प्रयन्त्स्वः ॥४॥
अन्तश्चरति रोचनास्य प्राणादपानती । व्यख्यन्महिषो दिवम् ॥५॥
त्रिंशद्धाम वि राजति वाक्पतंगाय धीयते । प्रति वस्तोरह द्युभिः ॥६॥
*āyaṁ gauḥ pṛśnirakramīdasadanmātaraṁ puraḥ / pitaraṁ cha prayantsvaḥ //4 //*
*antaścharati rochanāsya prāṇādapānatī / vyakhyanmahiṣo divam //5 //*
*triṁśaddhāma vi rājati vākpataṁgāya dhīyate / prati vastoraha dyubhiḥ //6 //*

सा. (Sv.) १३७६-१३७८

आयंगौः पृश्निक्रमीदसदन्मातरं पुरः । पितरं च प्रयन्त्स्वः ॥१॥
अन्तश्चरति रोचनास्य प्राणादपानती । व्यख्यन्महिषो दिवम् ॥२॥
त्रिंशद्धाम वि राजति वाक्पतंगाय धीयते । प्रति वस्तोरह द्युभिः ॥३॥
*āyaṁgauḥ pṛśnikramīdasadanmātaraṁ puraḥ / pitaraṁ cha prayantsvaḥ //1 //*
*antaścharati rochanāsya prāṇādapānatī / vyakhyanmahiṣo divam //2 //*
*triṁśaddhāma vi rājati vākpataṁgāya dhīyate / prati vastoraha dyubhiḥ //3 //*

## ७२७. सर्पराज्ञी कद्रुः (Sarparājñī Kadruḥ)

१. अग्निः (Agniḥ) - य. (Yv.) ३.६-८

आयं गौः पृश्निरक्रमीदसदन् मातरं पुरः। पितरं च प्रयन्त्स्वः ॥६॥
अन्तश्चरति रोचनास्य प्राणादपानती। व्यख्यन् महिषो दिवम् ॥७॥
त्रिंशद्धाम विराजति वाक् पतंगाय धीयते। प्रति वस्तोरह द्युभिः ॥८॥
*āyaṁ gauḥ pṛśnirakramīdasadan mātaraṁ puraḥ । pitaraṁ cha prayantsavaḥ ॥6॥*
*antaścharati rochanāsya prāṇādapānatī । vyakhyan mahiṣo divam ॥7॥*
*triṁśaddhāma virājati vāk pataṁgāya dhīyate । prati vastoraha dyubhiḥ ॥8॥*

## ७२८. सावित्री सूर्या (Sāvitrī Sūryā)

१. आत्मा (Ātmā) - अ. (Av.) १४.२.१-९; १२-३५; ३७-७५

अ. (Av.) १४.२.१-९

तुभ्यमग्रे पर्यवहन्त्सूर्यां वहतुना सह । स नः पतिभ्यो जायां दा अग्ने प्रजया सह ॥१॥
पुनः पत्नीमग्निरदादायुषा सह वर्चसा । दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम् ॥२॥
सोमस्य जाया प्रथमं गन्धर्वस्तेऽपरः पतिः । तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥३॥
सोमो ददद् गन्धर्वाय गन्धर्वो दददग्नये । रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम् ॥४॥
आ वामगन्त्सुमतिर्वाजिनीवसू न्यश्विना हृत्सु कामा अरंसत ।
अभूतं गोपा मिथुना शुभस्पती प्रिया अर्यम्णो दुर्यां अशीमहि ॥५॥
सा मन्दसाना मनसा शिवेन रयिं धेहि सर्ववीरं वचस्यम् ।
सुगं तीर्थं सुप्रपाणं शुभस्पती स्थाणुं पथिष्ठामप दुर्मतिं हतम् ॥६॥
या ओषधयो या नद्यो३ यानि क्षेत्राणि या वना ।
तास्त्वा वधु प्रजावतीं पत्ये रक्षन्तु रक्षसः ॥७॥
एमं पन्थामरुक्षाम सुगं स्वस्तिवाहनम् । यस्मिन् वीरो न रिष्यत्यन्येषां विन्दते वसु ॥८॥
इदं सु मे नरः श्रृणुत ययाशिषा दम्पती वाममश्नुतः ।
ये गन्धर्वा अप्सरसश्च देवीरेषु वानस्पत्येषु येऽधि तस्थुः ।
स्योनास्ते अस्यै वध्वै भवन्तु मा हिंसिषुर्वहतुमुह्यमानम् ॥९॥
*tubhyamagre paryavahantsūryāṁ vahatunā saha ।*
*sa naḥ patibhyo jāyāṁ dā agne prajayā saha ॥1॥*
*punaḥ patnīmagniradādāyuṣā saha varchasā ।*
*dīrghāyurasyā yaḥ patirjīvāti śaradaḥ śatam ॥2॥*
*somasya jāyā prathamaṁ gandharvaste'paraḥ patiḥ ।*
*tṛtīyo agniṣṭe patisturīyaste manuṣyajāḥ ॥3॥*
*somo dadad gandharvāya gandharvo dadadagnaye । rayiṁ cha*
*putrāṁśchādādagnirmahyamatho imām ॥4॥*
*ā vāmagantsumatirvājinīvasū nyaśvinā hṛtsu kāmā araṁsata ।*
*abhūtaṁ gopā mithunā śubhaspatī priyā aryamṇo duryāṁ aśīmahi ॥5॥*
*sā mandasānā manasā śivena rayiṁ dhehi sarvavīraṁ vachasyam ।*
*sugaṁ tīrthaṁ suprapāṇaṁ śubhaspatī sthāṇuṁ pathiṣṭhāmapa durmatiṁ hatam ॥6॥*
*yā oṣadhayo yā nadyo3 yāni kṣetrāṇi yā vanā ।*
*tāstvā vadhu prajāvatīṁ patye rakṣantu rakṣasaḥ ॥7॥*
*emaṁ panthāmarukṣāma sugaṁ svastivāhanam ।*
*yasmin vīro na riṣyatyanyeṣāṁ vindate vasu ॥8॥*
*idaṁ su me naraḥ śṛṇuta yayāśiṣā dampatī vāmamaśnutaḥ ।*
*ye gandharvā apsarasaścha devīreṣu vānaspatyeṣu ye'dhi tasthuḥ ।*
*syonāste asyai vadhvai bhavantu mā hiṁsiṣurvahatumuhyamānam ॥9॥*

अ. (Av.) १४.२.१२-३५

सं काशयामि वहतुं ब्रह्मणा गृहैरघोरेण चक्षुषा मित्रियेण ।
पर्याणद्धं विश्वरूपं यदस्ति स्योनं पतिभ्यः सविता तत् कृणोतु ॥१२॥
शिवा नारीयमस्तमागन्निमं धाता लोकमस्यै दिदेश ।
तामर्यमा भगो अश्विनोभा प्रजापतिः प्रजया वर्धयन्तु ॥१३॥
आत्मन्वत्युर्वरा नारीयमागन् तस्यां नरो वपत बीजमस्याम् ।

सा वः प्रजां जनयद् वक्षणाभ्यो बिभ्रती दुग्धमृषभस्य रेतः ॥१४॥
प्रति तिष्ठ विराडसि विष्णुरिवेह सरस्वति । सिनीवालि प्र जायतां भगस्य सुमतावसत् ॥१५॥
उद् व ऊर्मिः शम्या हन्तवापो योक्त्राणि मुंचत । मादुष्कृतौ व्येनसावघ्न्यावशुनमारताम् ॥१६॥
अघोरचक्षुरपतिघ्नी स्योना शग्मा सुशेवा सुयमा गृहेभ्यः ।
वीरसूर्देवृकामा सं त्वयैधिषीमहि सुमनस्यमाना ॥१७॥
अदेवृघ्न्यपतिघ्नीहैधि शिवा पशुभ्यः सुयमा सुवर्चाः ।
प्रजावती वीरसूर्देवृकामा स्योनेममग्निं गार्हपत्यं सपर्य ॥१८॥
उत्तिष्ठेतः किमिच्छन्तीदमागा अहं त्वेडे अभिभूः स्वाद् गृहात् ।
शून्यैषी निर्ऋते याजगन्धोत्तिष्ठाराते प्र पत मेह रंस्थाः ॥१९॥
यदा गार्हपत्यमसपर्यैत् पूर्वमग्निं वधूरियम् । अधा सरस्वत्यै नारि पितृभ्यश्च नमस्कुरु ॥२०॥
शर्म वर्मैतदा हरास्यै नार्या उपस्तरे । सिनीवालि प्र जायतां भगस्य सुमतावसत् ॥२१॥
यं बल्बजं न्यस्यथ चर्म चोपस्तृणीथन । तदा रोहतु सुप्रजा या कन्या विन्दते पतिम् ॥२२॥
उप स्तृणीहि बल्बजमधि चर्मणि रोहते । तत्रोपविश्य सुप्रजा इममग्निं सपर्यतु ॥२३॥
आ रोह चर्मोप सीदाग्निमेष देवो हन्ति रक्षांसि सर्वा ।
इह प्रजां जनय पत्ये अस्मै सुज्यैष्ठ्यो भवत् पुत्रस्त एषः ॥२४॥
वि तिष्ठन्तां मातुरस्या उपस्थान्नानारूपाः पशवो जायमानाः ।
सुमङ्गल्युप सीदेममग्निं संपत्नी प्रति भूषेह देवान् ॥२५॥
सुमङ्गली प्रतरणी गृहाणां सुशेवा पत्ये श्वशुराय शंभूः ।
स्योना श्वश्र्वे प्र गृहान् विशेमान् ॥२६॥
स्योना भव श्वशुरेभ्यः स्योना पत्ये गृहेभ्यः ।
स्योनास्यै सर्वस्यै विशे स्योना पुष्टायैषां भव ॥२७॥
सुमङ्गलीरियं वधूरिमां समेत पश्यत । सौभाग्यमस्यै दत्त्वा दौर्भाग्यैर्विपरेतन ॥२८॥
या दुर्हार्दो युवतयो याश्चेह जरतीरपि । वर्चो न्वस्यै सं दत्ताथास्तं विपरेतन ॥२९॥
रुक्मप्रस्तरणं वह्यं विश्वा रूपाणि बिभ्रतम् ।
आरोहत् सूर्या सावित्री बृहते सौभगाय कम् ॥३०॥
आ रोह तल्पं सुमनस्यमानेह प्रजां जनय पत्ये अस्मै ।
इन्द्राणीव सुबुधा बुध्यमाना ज्योतिरग्रा उषसः प्रति जागरासि ॥३१॥
देवा अग्रे न्यपद्यन्त पत्नीः समस्पृशन्त तन्वस्तनूभिः ।
सूर्येव नारि विश्वरूपा महित्वा प्रजावती पत्या सं भवेह ॥३२॥
उत्तिष्ठेतो विश्वावसो नमसेडामहे त्वा ।
जामिमिच्छ पितृषदं न्यक्तां स ते भागो जनुषा तस्य विद्धि ॥३३॥
अप्सरसः सधमादं मदन्ति हविर्धानमन्तरा सूर्यं च ।
तास्ते जनित्रमभि ताः परेहि नमस्ते गन्धर्वर्तुना कृणोमि ॥३४॥
नमो गन्धर्वस्य नमसे नमो भामाय चक्षुषे च कृण्मः ।
विश्वावसो ब्रह्मणा ते नमोऽभि जाया अप्सरसः परेहि ॥३५॥

*saṁ kāśayāmi vahatuṁ brahmaṇā gṛhairaghoreṇa chakṣuṣā mitriyeṇa /*
*paryāṇaddhaṁ viśvarūpaṁ yadasti syonaṁ patibhyaḥ savitā tat kṛṇotu //12 //*
*śivā nārīyamastamāgannimaṁ dhātā lokamasyai dideśa /*
*tāmaryamā bhago aśvinobhā prajāpatiḥ prajayā vardhayantu //13 //*
*ātmanvatyurvarā nārīyamāgan tasyāṁ naro vapata bījamasyām /*
*sā vaḥ prajāṁ janayad vakṣaṇābhyo bibhratī dugdhamṛṣabhasya retaḥ //14 //*
*prati tiṣṭha virāḍasi viṣṇuriveha sarasvati / sinīvāli pra jāyatāṁ bhagasya sumatāvasat //15 //*
*ud va ūrmiḥ śamyā hantavāpo yoktrāṇi muṁchata /*
*māduṣkṛtau vyenasāvaghnyāvaśunamāratām //16 //*
*aghorachakṣurapatighnī syonā śagmā suśevā suyamā gṛhebhyaḥ /*
*vīrasūdrevṛkāmā saṁ tvayaidhiṣīmahi sumanasyamānā //17 //*
*adevṛghnyapatighnīhaidhi śivā paśubhyaḥ suyamā suvarchāḥ /*
*prajāvatī vīrasūrdevṛkāmā syonemamagiṁna gārhapatyaṁ saparya //18 //*
*uttiṣṭhetaḥ kimichchhantīdamāgā ahaṁ tveḍe abhibhūḥ svād gṛhāt /*

*śūnyaiṣī nirṛte yājagandhottiṣṭhārāte pra pata meha raṁsthāḥ //19 //*
*yadā gārhapatyamasaparyait pūrvamagiṁna vadhūriyam /*
*adhā sarasvatyai nāri pitṛbhyaścha namaskuru //20 //*
*śarma varmaitadā harāsyai nāryā upastare /*
*sinīvāli pra jāyatāṁ bhagasya sumatāvasat //21 //*
*yaṁ balbajaṁ nyasyatha charma chopastṛṇīthana /*
*tadā rohatu suprajā yā kanyā vindate patim //22 //*
*upa stṛṇīhi balbajamadhi charmaṇi rohate /*
*tatropaviśya suprajā imamagiṁna saparyatu //23 //*
*ā roha charmopa sīdāgnimeṣa devo hanti rakṣāṁsi sarvā /*
*iha prajāṁ janaya patye asmai sujyaiṣṭhyo bhavat putrasta eṣaḥ //24 //*
*vi tiṣṭhantāṁ māturasyā upasthānnanārūpāḥ paśavo jāyamānāḥ /*
*sumaṅgalyupa sīdemamagiṁna saṁpatnī prati bhūṣeha devān //25 //*
*sumaṅgalī prataraṇī gṛhāṇāṁ suśevā patye śvaśurāya śaṁbhūḥ /*
*syonā śvaśrave pra gṛhān viśemān //26 //*
*syonā bhava śvaśurebhyaḥ syonā patye gṛhebhyaḥ /*
*syonāsyai sarvasyai viśe syonā puṣṭāyaiṣāṁ bhava //27 //*
*sumaṅgalīriyaṁ vadhūrimāṁ sameta paśyata /*
*saubhāgyamasyai dattvā daurbhāgyairviparetana //28 //*
*yā durhārdo yuvatayo yāścheha jaratīrapi /*
*varcho nva1syai saṁ dattāthāstaṁ viparetana //29 //*
*rukmaprastaraṇaṁ vahyaṁ viśvā rūpāṇi bibhratam /*
*ārohat sūryā sāvitrī bṛhate saubhagāya kam //30 //*
*ā roha talpaṁ sumanasyamāneha prajāṁ janaya patye asmai /*
*indrāṇīva subudhā budhyamānā jyotiragrā uṣasaḥ prati jāgarāsi //31 //*
*devā agre nyapadyanta patnīḥ samaspṛśanta tanvastanūbhiḥ /*
*sūryeva nāri viśvarūpā mahitvā prajāvatī patyā saṁ bhaveha //32 //*
*uttiṣṭheto viśvāvaso namaseḍāmahe tvā /*
*jāmimichchha pitṛṣadaṁ nyaktāṁ sa te bhāgo januṣā tasya viddhi //33 //*
*apsarasaḥ sadhamādaṁ madanti havirdhānamantarā sūryaṁ cha /*
*tāste janitramabhi tāḥ parehi namaste gandharvartunā kṛṇomi //34 //*
*namo gandharvasya namase namo bhāmāya chakṣuṣe cha kṛṇmaḥ /*
*viśvāvaso brahmaṇā te namo'bhi jāyā apsarasaḥ parehi //35 //*

अ. (Av.) १४.२.३७-७५

सं पितरावृत्विये सृजेथां माता पिता च रेतसो भवाथः ।
मर्य इव योषामधि रोहयैनां प्रजां कृण्वाथमिह पुष्यतं रयिम् ॥३७॥
तां पूषिंछवतमामेरयस्व यस्यां बीजं मनुष्या३ वपन्ति ।
या न ऊरू उशती विश्रयाति यस्यामुशन्तः प्रहरेम शेपः ॥३८॥
आ रोहोरुमुप धत्स्व हस्तं परि ष्वजस्व जायां सुमनस्यमानः ।
प्रजां कृण्वाथामिह मोदमानौ दीर्घं वामायुः सविता कृणोतु ॥३९॥
आ वां प्रजां जनयतु प्रजापतिरहोरात्राभ्यां समनक्त्वर्यमा ।
अदुर्मंगली पतिलोकमा विशेमं शं नो भव द्विपदे शं चतुष्पदे ॥४०॥
देवैर्दत्तं मनुना साकमेतद् वाधूयं वासो वध्वश्च वस्त्रम् ।
यो ब्रह्मणे चिकितुषे ददाति स इद् रक्षांसि तल्पानि हन्ति ॥४१॥
यं मे दत्तो ब्रह्मभागं वधूयोर्वाधूयं वासो वध्वश्च वस्त्रम् ।
युवं ब्रह्मणेऽनुमन्यमानौ बृहस्पते साकमिन्द्रश्च दत्तम् ॥४२॥
स्योनाद्योनेरधि बुध्यमानौ हसामुदौ महसा मोदमानौ ।
सुगू सुपुत्रौ सुगृहौ तराथो जीवावुषसो विभातीः ॥४३॥
नवं वसानः सुरभिः सुवासा उदागां जीव उषसो विभातीः ।
आण्डात् पतत्रीवामुक्षि विश्वस्मादेनसस्परि ॥४४॥
शुम्भनी द्यावापृथिवी अन्तिसुम्ने महिव्रते ।
आपः सप्त सुस्रुवुर्देवीस्ता नो मुंचन्त्वंहसः ॥४५॥

सूर्यायै देवेभ्यो मित्राय वरुणाय च ।
ये भूतस्य प्रचेतसस्तेभ्य इदमकरं नमः ॥४६॥
य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः ।
संधाता संधि मघवा पुरूवसुर्निष्कर्ता विह्रुतं पुनः ॥४७॥
अपास्मत् तम उच्छतु नीलं पिशंगमुत लोहितं यत् ।
निर्दहनी या पृषातक्य१स्मिन् तां स्थाणावध्या सजामि ॥४८॥
यावतीः कृत्या उपवासने यावन्तो राज्ञो वरुणस्य पाशाः ।
व्यृद्धयो या असमृद्धयो या अस्मिन् ता स्थाणावधि सादयामि ॥४९॥
या मे प्रियतमा तनूः सा मे बिभाय वाससः।
तस्याग्रे त्वं वनस्पते नीविं कृणुष्व मा वयं रिषाम ॥५०॥
ये अन्ता यावतीः सिचो य ओतवो ये च तन्तवः ।
वासो यत् पत्नीभिरुतं तन्नः स्योनमुप स्पृशात् ॥५१॥
उशतीः कन्यला इमाः पितृलोकात् पतिं यतीः । अव दीक्षामसृक्षत स्वाहा ॥५२॥
बृहस्पतिनावसृष्टां विश्वे देवा अधारयन् । वर्चो गोषु प्रविष्टं यत् तेनेमां सं सृजामसि ॥५३॥
बृहस्पतिनावसृष्टां विश्वे देवा अधारयन् । तेजो गोषु प्रविष्टं यत् तेनेमां स सृजामसि ॥५४॥
बृहस्पतिनावसृष्टां विश्वे देवा अधारयन् । भगो गोषु प्रविष्टो यस्तेनेमां सं सृजामसि ॥५५॥
बृहस्पतिनावसृष्टां विश्वे देवा अधारयन् । यशो गोषु पविष्टं यस्तेनेमां सं सृजामसि ॥५६॥
बृहस्पतिनावसृष्टां विश्वे देवा अधारयन् । पयो गोषु प्रविष्टं यत् तेनेमां सं सृजामसि ॥५७॥
बृहस्पतिनावसृष्टां विश्वे देवा अधारयन् । रसो गोषु प्रविष्टो यस्तेनेमां सं सृजामसि ॥५८॥
यदीमे केशिनो जना गृहेते समनर्तिषू रोदेन कृण्वन्तो३घम् ।
अग्निष्ट्वा तस्मादेनसः सविता च प्र मुंचताम् ॥५९॥
यदीयं दुहिता तव विकेश्यरुदद् गृहे रोदेन कृण्वत्य१घम् ।
अग्निष्ट्वा तस्मादेनसः सविता च प्र मुंचताम् ॥६०॥
यज्जामयो यद्युवतयो गृहे ते समनर्तिषू रोदेन कृण्वतीरघम् ।
अग्निष्ट्वा तस्मादेनसः सविता च प्र मुंचताम् ॥६१॥
यत् ते प्रजायां पशुषु यद्वा गृहेषु निष्ठितमघकृद्भिरघं कृतम् ।
अग्निष्ट्वा तस्मादेनसः सविता च प्र मुंचताम् ॥६२॥
इयं नार्युप ब्रूते पूल्यान्यावपन्तिका । दीर्घायुरस्तु मे पतिर्जीवाति शरदः शतम् ॥६३॥
इहेमाविन्द्र सं नुद चक्रवाकेव दम्पती। प्रजयैनौ स्वस्तकौ विश्वमायुर्व्यश्नुताम् ॥६४॥
यदा सन्द्यामुपधाने यद् वोपवासने कृतम् ।
विवाहे कृत्या यां चक्रुरास्नाने तां नि दध्मसि ॥६५॥
यद् दृष्कृतं यच्छमलं विवाहे वहतौ च यत् ।
तत् संभलस्य कम्बले मृज्महे दुरितं वयम् ॥६६॥
संभले मलं सादयित्वा कम्बले दुरितं वयम् ।
अभूम यज्ञियाः शुद्धाः प्र ण आयूंषि तारिषत् ॥६७॥
कृत्रिम कण्टकः शतदन् य एषः । अपास्याः केश्यं मलमप शीर्षण्यं लिखात् ॥६८॥
अंगादंगाद् वयमस्या अप यक्ष्मं नि दध्मसि ।
तन्मा प्रापत् पृथिवीं मोत देवान् दिवं मा प्रापदुर्व१न्तरिक्षम् ।
अपो मा प्रापन्मलमेतदग्ने यमं मा प्रापत् पितृंश्च सर्वान् ॥६९॥
सं त्वा नह्याभि पयसा पृथिव्याः सं त्वा नह्यामि पयसौषधीनाम् ।
सं त्वा नह्यामि प्रजया धनेन सा संनद्धा सनुहि वाजमेमम् ॥७०॥
अमोऽहमस्मि सा त्वं सामाहमस्म्यृक् त्वं द्यौरहं पृथिवी त्वम् ।
ताविह सं भवाव प्रजामा जनयावहै ॥७१॥
जनियन्ति नावग्रवः पुत्रियन्ति सुदानवः । अरिष्टासू सचेवहि बृहते वाजसातये ॥७२॥
ये पितरो वधूदर्शा इमं वहतुमागमन् । ते अस्यै वध्वै संपत्न्यै प्रजावच्छर्म यच्छन्तु ॥७३॥
येदं पूर्वागन् रशनायमाना प्रजामस्यै द्रविणं चेह दत्त्वा ।
तां वहन्त्वगतस्यानु पन्थां विराडियं सुप्रजा अत्यजैषीत् ॥७४॥

प्र बुध्यस्व सुबुधा बुध्यमाना दीर्घायुत्वाय शतशारदाय ।
गृहान् गच्छ गृहपत्नी यथासो दीर्घं त आयुः सविता कृणोतु ॥७५॥

*saṁ pitarāvṛtviye sṛjethāṁ mātā pitā cha retaso bhavāthaḥ /*
*marya iva yoṣāmadhi rohayaināṁ prajāṁ kṛṇvāthamiha puṣyataṁ rayim //37 //*
*tāṁ pūṣiṁchhavatamāmerayasva yasyāṁ bījaṁ manuṣyā3 vapanti /*
*yā na ūrū uśatī viśrayāti yasyāmuśantaḥ praharema śepaḥ //38 //*
*ā rohorumupa dhatsva hastaṁ pari ṣvajasva jāyāṁ sumanasyamānaḥ /*
*prajāṁ kṛṇvāthāmiha modamānau dīrghaṁ vāmāyuḥ savitā kṛṇotu //39 //*
*ā vāṁ prajāṁ janayatu prajāpatirahorātrābhyāṁ samanaktvaryamā /*
*adurmaṁgalī patilokamā viśemaṁ śaṁ no bhava dvipade śaṁ chatuṣpade //40 //*
*devairdattaṁ manunā sākametad vādhūyaṁ vāseā vadhvaścha vastram /*
*yo brahmaṇe chikituṣe dadāti sa id rakṣāṁsi talpāni hanti //41 //*
*yaṁ me datto brahmabhāgaṁ vadhūyorvādhūyaṁ vāso vadhvaścha vastram /*
*yuvaṁ brahmaṇe'numanyamānau bṛhaspate sākamindraścha dattam //42 //*
*syonādyoneradhi budhyamānau hasāmudau mahasā modamānau /*
*sugū suputrau sugṛhau tarātho jīvāvuṣaso vibhātīḥ //43 //*
*navaṁ vasānaḥ surabhiḥ suvāsā udāgāṁ jīva uṣaso vibhātīḥ /*
*āṇḍāt patatrīvāmukṣi viśvasmādenasaspari //44 //*
*śumbhanī dyāvāpṛthivī antisumne mahivrate /*
*āpaḥ sapta susruvurdevīstā no muṁchantvaṁhasaḥ //45 //*
*sūryāyai devebhyo mitrāya varuṇāya cha /*
*ye bhūtasya prachetasastebhya idamakaraṁ namaḥ //46 //*
*ya ṛte chidabhiśriṣaḥ purā jatrubhya ātṛdaḥ /*
*saṁdhātā saṁdhi maghavā purūvasurniṣkartā vihrutaṁ punaḥ //47 //*
*apāsmat tama uchchhatu nīlaṁ piśaṁgamuta lohitaṁ yat /*
*nirdahanī yā pṛṣātakya1smin tāṁ sthāṇāvadhyā sajāmi //48 //*
*yāvatīḥ kṛtyā upavāsane yāvanto rājño varuṇasya pāśāḥ /*
*vyṛddhayo yā asamṛddhayo yā asmin tā sthāṇāvadhi sādayāmi //49 //*
*yā me priyatamā tanūḥ sā me bibhāya vāsasaḥ /*
*tasyāgre tvaṁ vanaspate nīviṁ kṛṇuṣva mā vayaṁ riṣāma //50 //*
*ye antā yāvatīḥ sicho ya otavo ye cha tantavaḥ /*
*vāso yat patnībhirutaṁ tannaḥ syonamupa spṛśāt //51 //*
*uśatīḥ kanyalā imāḥ pitṛlokāt patiṁ yatīḥ / ava dīkṣāmasṛkṣata svāhā //52 //*
*bṛhaspatināvasṛṣṭāṁ viśve devā adhārayan /*
*varcho goṣu praviṣṭaṁ yat tenemāṁ saṁ sṛjāmasi //53 //*
*bṛhaspatināvasṛṣṭāṁ viśve devā adhārayan /*
*tejo goṣu praviṣṭaṁ yat tenemāṁ sa sṛjāmasi //54 //*
*bṛhaspatināvasṛṣṭāṁ viśve devā adhārayan /*
*bhago goṣu praviṣṭo yastenemāṁ saṁ sṛjāmasi //55 //*
*bṛhaspatināvasṛṣṭāṁ viśve devā adhārayan /*
*yaśo goṣu paviṣṭaṁ yastenemāṁ saṁ sṛjāmasi //56 //*
*bṛhaspatināvasṛṣṭāṁ viśve devā adhārayan /*
*payo goṣu praviṣṭaṁ yat tenemāṁ saṁ sṛjāmasi //57 //*
*bṛhaspatināvasṛṣṭāṁ viśve devā adhārayan /*
*raso goṣu praviṣṭo yastenemāṁ saṁ sṛjāmasi //58 //*
*yadīme keśino janā gṛhete samanartiṣū rodena kṛṇvanto3gham /*
*agniṣṭvā tasmādenasaḥ savitā cha pra muṁchatām //59 //*
*yadīyaṁ duhitā tava vikeśyarudad gṛhe rodena kṛṇvatya1gham /*
*agniṣṭvā tasmādenasaḥ savitā cha pra muṁchatām //60 //*
*yajjāmayo yadyuvatayo gṛhe te samanartiṣū rodena kṛṇvatīragham /*
*agniṣṭvā tasmādenasaḥ savitā cha pra muṁchatām //61 //*
*yat te prajāyāṁ paśuṣu yadvā gṛheṣu niṣṭhitamaghakṛdbhiraghaṁ kṛtam /*
*agniṣṭvā tasmādenasaḥ savitā cha pra muṁchatām //62 //*
*iyaṁ nāryupa brūte pūlyānyāvapantikā / dīrghāyurastu me patirjīvāti śaradaḥ śatam //63 //*
*ihemāvindra saṁ nuda chakravākeva dampatī /*

*prajayainau svastakau viśvamāyurvyaśnutām ॥64॥*
*yadā sandyāāmupadhāne yad vopavāsane kṛtam ।*
*vivāhe kṛtyā yāṁ chakrurāsnāne tāṁ ni dadhmasi ॥65॥*
*yad dṛṣkṛtaṁ yachchhamalaṁ vivāhe vahatau cha yat ।*
*tat saṁbhalasya kambale mṛjmahe duritaṁ vayam ॥66॥*
*saṁbhale malaṁ sādayitvā kambale duritaṁ vayam ।*
*abhūma yajñiyāḥ śuddhāḥ pra ṇa āyūṁṣi tāriṣat ॥67॥*
*kṛtrima kaṇṭakaḥ śatadan ya eṣaḥ । apāsyāḥ keśyaṁ malamapa śīrṣaṇyaṁ likhāt ॥68॥*
*aṁgādaṁgād vayamasyā apa yakṣamaṁ ni dadhmasi ।*
*tanmā prāpat pṛthivīṁ mota devān divaṁ mā prāpadurva1ntarikṣam ।*
*apo mā prāpanmalametadagne yamaṁ mā prāpat pitṛṁścha sarvān ॥69॥*
*saṁ tvā nahyābhi payasā pṛthivyāḥ saṁ tvā nahyāmi payasauṣadhīnām ।*
*saṁ tvā nahyāmi prajayā dhanena sā saṁnaddhā sanuhi vājamemam ॥70॥*
*amo'hamasmi sā tvaṁ sāmāhamasmyṛk tvaṁ dyauraham pṛthivī tvam ।*
*tāviha saṁ bhavāva prajāmā janayāvahai ॥71॥*
*janiyanti nāvagravaḥ putriyanti sudānavaḥ । ariṣṭāsū sachevahi bṛhate vājasātaye ॥72॥*
*ye pitaro vadhūdarśā imaṁ vahatumāgaman ।*
*te asyai vadhvai saṁpatnyai prajāvachchharma yachchhantu ॥73॥*
*yedaṁ pūrvāgan raśanāyamānā prajāmasyai draviṇaṁ cheha dattvā ।*
*tāṁ vahantvagatasyānu panthāṁ virāḍiyaṁ suprajā atyajaiṣīt ॥74॥*
*pra budhyasva subudhā budhyamānā dīrghāyutvāya śataśāradāya ।*
*gṛhān gachchha gṛhapatnī yathāso dīrghaṁ ta āyuḥ savitā kṛṇotu ॥75॥*

२. चन्द्रमा (Chandramā) - अ. (Av.) १४.१.२४

नवोनवो भवसि जायमानोऽह्नां केतुरुषसामेष्यग्रम् ।
भागं देवेभ्यो वि दधास्यायन् प्र चन्द्रमस्तिरसे दीर्घमायुः ॥२४॥
*navonavo bhavasi jāyamāno'hnāṁ keturuṣasāmeṣyagram ।*
*bhāgaṁ devebhyo vi dadhāsyāyan pra chandramastirase dīrghamāyuḥ ॥24॥*

३. वधूवास संस्पर्शमोचनम् (Vadhūvāsa Saṁsparśamochanam) - अ. (Av.) १४.१.२५; २७

अ. (Av.) १४.१.२५

परा देहि शामुल्यं ब्रह्मभ्यो वि भजा वसु। कृत्यैषा पद्वती भूत्वा जाया विशते पतिम् ॥२५॥
*parā dehi śāmulyaṁ brahmabhyo vi bhajā vasu ।*
*kṛtyaiṣā padvatī bhūtvā jāyā viśate patim ॥25॥*

अ. (Av.) १४.१.२७

अश्लीला तनूर्भवति रुशती पापयामुया। पतिर्यद् वध्वो३ वाससः स्वपमंगमभ्यूर्णुते ॥२७॥
*aślīlā tanūrbhavati ruśatī pāpayāmuyā ।*
*patiryad vadhvo3 vāsasaḥ svapamaṁgamabhyūrṇute ॥27॥*

४. विवाहः (Vivāhaḥ) - अ. (Av.) १४.१.६-२२

चित्तिरा उपबर्हणं चक्षुरा अभ्यंजनम् । द्यौर्भूमिः कोश आसीद् यदयात् सूर्या पतिम् ॥६॥
रैभ्यासीदनुदेयी नाराशंसी न्योचना । सूर्याया भद्रमिद् वासो गाथयैति परिष्कृता ॥७॥
स्तोमा आसन् प्रतिधयः कुरीरं छन्द ओपशः। सूर्याया अश्विना वराग्निरासीत् पुरोगवः ॥८॥
सोमो वधूयुरभवदश्विनास्तामुभा वरा । सूर्यां यत् पत्ये शंसन्तीं मनसा सवितादात् ॥९॥
मनो अस्या अन आसीद् द्यौरासीदुत च्छदिः ।
शुक्रावनड्वाहावास्तां यदयात् सूर्या पतिम् ॥१०॥
ऋक्सामाभ्यामभिहितौ गावौ ते सामनावैताम् ।
श्रोत्रे ते चक्रे आस्तां दिवि पन्थाश्चराचरः ॥११॥
शुची ते चक्रे यात्या व्यानो अक्ष आहतः । अनो मनस्मयं सूर्यारोहात् प्रयती पतिम् ॥१२॥
सूर्याया वहतुः प्रागात् सविता यमवासृजत् ।
मघासु हन्यन्ते गावः फलगुनीषु व्युह्यते ॥१३॥
यदश्विना पृच्छमानावयातं त्रिचक्रेण वहतुं सूर्यायाः ।
क्वैकं चक्रं वामासीत् क्वदेष्ट्राय तस्थथुः ॥१४॥

यदयातं शुभस्पती वरेयं सूर्यामुप । विश्वे देवा अनु तद्वामजानन् पुत्रः पितरमवृणीत पूषा ॥१५॥
द्वे ते चक्रे सूर्ये ब्रह्माण ऋतुथा विदुः । अथैकं चक्रं यत् गुहा तदद्धातय इद् विदुः ॥१६॥
अर्यमणं यजामहे सुबन्धुं पतिवेदनम् । उर्वारुकमिव बन्धनात् प्रेतौ मुंचामि नामुतः ॥१७॥
प्रेतो मुंचामि नामुतः सुबद्धाममुतस्करम् । यथेयमिन्द्र मीढ्वः सुपुत्रा सुभगासति ॥१८॥
प्र त्वा मुंचामि वरुणस्य पाशाद् येन त्वाबध्नात् सविता सुशेवाः ।
ऋतस्य योनौ सुकृतस्य लोके स्योनं ते अस्तु सहसंभलायै ॥१९॥
भगस्त्वेतो नयतु हस्तगृह्याश्विना त्वा प्र वहतां रथेन ।
गृहान् गच्छ गृहपत्नी यथासो वशिना त्वं विदथमा वदासि ॥२०॥
इह प्रियं प्रजायै ते समृध्यतामस्मिन् गृहे गार्हपत्याय जागृहि ।
एना पत्या तन्वं१ सं स्पृशस्वाथ जिर्विर्विदथमा वदासि ॥२१॥
इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतम् । क्रीडन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वस्तकौ ॥२२॥
*chittirā upabarhaṇaṁ chakṣurā abhyaṁjanam /*
*dyaurbhūmiḥ kośa āsīd yadayāt sūryā patim //6//*
*raibhyāsīdanudeyī nārāśaṁsī nyochanā / sūryāyā bhadramid vāso gāthayaiti pariṣkṛtā //7//*
*stomā āsan pratidhayaḥ kurīraṁ chhanda opaśaḥ /*
*sūryāyā aśvinā varāgnirāsīt purogavaḥ //8//*
*somo vadhūyurabhavadaśvināstāmubhā varā /*
*sūryāṁ yat patye śaṁsantīṁ manasā savitādadāt //9//*
*mano asyā ana āsīd dyaurāsīduta chchhadiḥ /*
*śukrāvanaḍvāhāvāstāṁ yadayāt sūryā patim //10//*
*ṛksāmābhyāmabhihitau gāvau te sāmanāvaitām /*
*śrotre te chakre āstāṁ divi panthāścharācharaḥ //11//*
*śuchī te chakre yātyā vyāno akṣa āhataḥ /*
*ano manasmayaṁ sūryārohāt prayatī patim //12//*
*sūryāyā vahatuḥ prāgāt savitā yamavāsṛjat /*
*madhāsu hanyante gāvaḥ phalagunīṣu vyuhyate //13//*
*yadaśvinā pṛchchhamānāvayātaṁ trichakreṇa vahatuṁ sūryāyāḥ /*
*kvaikaṁ chakraṁ vāmāsīt kvadeṣṭrāya tasthathuḥ //14//*
*yadayātaṁ śubhaspatī vareyaṁ sūryāmupa /*
*viśve devā anu tadvāmajānan putraḥ pitaramavṛṇīta pūṣā //15//*
*dve te chakre sūrye brahmāṇa ṛtuthā viduḥ /*
*athaikaṁ chakraṁ yat guhā tadaddhātaya id viduḥ //16//*
*aryamaṇaṁ yajāmahe subandhuṁ pativedanam /*
*urvārukamiva bandhanāt pretau muṁchāmi nāmutaḥ //17//*
*preto muṁchāmi nāmutaḥ subaddhāmamutaskaram /*
*yatheyamindra mīḍhvaḥ suputrā subhagāsati //18//*
*pra tvā muṁchāmi varuṇasya pāśād yena tvābadhnāt savitā suśevāḥ /*
*ṛtasya yonau sukṛtasya loke syonaṁ te astu sahasaṁbhalāyai //19//*
*bhagastveto nayatu hastagṛhyāśvinā tvā pra vahatāṁ rathena /*
*gṛhān gachchha gṛhapatnī yathāso vaśinā tvaṁ vidathamā vadāsi //20//*
*iha priyaṁ prajāyai te samṛdhyatāmasmin gṛhe gārhapatyāya jāgṛhi /*
*enā patyā tanvaṁ1 saṁ spṛśasvātha jirvirvidathamā vadāsi //21//*
*ihaiva staṁ mā vi yauṣṭaṁ viśvamāyurvyaśnutam / krīḍantau*
*putrairnaptṛbhirmeādamānau svastakau //22//*

५. विवाह मन्त्राशिषः (Vivāha Mantrāśiṣaḥ) - अ. (Av.) १४.१.२६; २८-६४

अ. (Av.) १४.१.२६

नीललोहितं भवति कृत्यासक्तिर्व्यज्यते। एधन्ते अस्या ज्ञातयः पतिर्बन्धेषु बध्यते ॥२६॥
*nīlalohitaṁ bhavati kṛtyāsaktirvyajyate /*
*edhante asyā jñātayaḥ patirbandheṣu badhyate //26//*

अ. (Av.) १४.१.२८-६४

आशसनं विशसनमथो अधिविकर्तनम् । सूर्यायाः पश्य रूपाणि तानि ब्रह्मोत शुम्भति ॥२८॥

तृष्टमेतत् कटुकमपाष्ठवद् विषवन्नैतदत्तवे । सूर्यां यो ब्रह्मा वेद स इद् वाधूयमर्हति ॥२९॥
स इत् तत् स्योनं हरति ब्रह्मा वासः सुमंगलम् ।
प्रायश्चित्तिं यो अध्येति येन जाया न रिष्यति ॥३०॥
युवं भगं सं भरतं समृद्धमृतं वदन्तावृतोद्येषु ।
ब्रह्मणस्पते पतिमस्यै रोचय चारु संभलो वदतु वाचमेताम् ॥३१॥
इहेदसाथ न परो गमाथेमं गावः प्रजया वर्धयाथ ।
शुभं यतीरुस्रियाः सोमवर्चसो विश्वे देवाः क्रन्निह वो मनांसि ॥३२॥
इमं गावः प्रजया सं विशाथायं देवानां न मिनाति भागम् ।
अस्मै वः पूषा मरुतश्च सर्वे अस्मै वो धाता सविता सुवाति ॥३३॥
अनृक्षरा ऋजवः सन्तु पन्थानो येभिः सखायो यन्ति नो वरेयम् ।
सं भगेन समर्यम्णा सं धाता सृजतु वर्चसा ॥३४॥
यच्च वर्चो अक्षेषु सुरायां च यदाहितम् । यद् गोष्वश्विना वर्चस्तेनेमां वर्चसावतम् ॥३५॥
येन महानघ्न्या जघन्मश्विना येन वा सुरा। येनाक्षा अभ्यषिच्यन्त तेनेमां वर्चसावतम् ॥३६॥
यो अनिध्मो दीदयदप्स्व१न्तर्यं विप्रास ईडते अध्वरेषु ।
अपां नपान्मधुमतीरपो दा याभिरिन्द्रो वावृधे वीर्यावान् ॥३७॥
इदमहं रुशन्तं ग्राभं तनूदूषिमपोहामि । यो भद्रो रोचनस्तमुदचामि ॥३८॥
आस्यै ब्राह्मणाः स्नपनी र्हरन्त्ववीरघ्नीरुदजन्त्वापः ।
अर्यम्णो अग्निं पर्येतु पूषन् प्रतीक्षन्ते श्वशुरो देवरश्च ॥३९॥
शं ते हिरण्यं शमु सन्त्वापः शं मेथिर्भवतु शं युगस्य तर्द्म ।
शं त आपः शतपवित्रा भवन्तु शमु पत्या तन्वं१ सं स्पृशस्व ॥४०॥
खे रथस्य खेऽनसः खे युगस्य शतक्रतो। अपालामिन्द्र त्रिष्पूत्वाकृणोः सूर्यत्वचम् ॥४१॥
आशासाना सौमनसं प्रजां सौभाग्यं रयिम् । पत्युरनुव्रता भूत्वा सं नह्यस्वामृताय कम् ॥४२॥
यथा सिन्धुर्नदीनां साम्राज्यं सुषुवे वृषा । एवा त्वं सम्राज्ञ्येधि पत्युरस्तं परेत्य ॥४३॥
सम्राज्ञ्येधि श्वशुरेषु सम्राज्ञ्युत देवृषु । ननान्दुः सम्राज्ञ्येधि सम्राज्ञ्युत श्वश्र्वाः ॥४४॥
आ अकृन्तन्नवयन् याश्च तत्निरे या देवीरन्ताँ अभितोऽददन्त ।
तास्त्वा जरसे सं व्ययन्त्वायुष्मतीदं परि धत्स्व वासः ॥४५॥
जीवं रुदन्ति वि नयन्त्यध्वरं दीर्घामनु प्रसितिं दीध्युर्नरः ।
वामं पितृभ्यो य इदं समीरिरे मयः पतिभ्यो जनये परिष्वजे ॥४६॥
स्योनं ध्रुवं प्रजायै धारयामि तेऽश्मानं देव्याः पृथिव्या उपस्थे ।
तमा तिष्ठानुमाद्या सुवर्चा दीर्घं त आयुः सविता कृणोतु ॥४७॥
येनाग्निरस्या भूम्या हस्तं जग्राह दक्षिणम् ।
तेन गृह्णामि ते हस्तं मा व्यथिष्ठा मया सह प्रजया च धनेन च ॥४८॥
देवस्ते सविता हस्तं गृह्णातु सोमो राजा सुप्रजसं कृणोतु ।
अग्निः सुभगां जातवेदाः पत्ये पत्नीं जरदष्टिं कृणोतु ॥४९॥
गृह्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः ।
भगो अर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥५०॥
भगस्ते हस्तमग्रहीत् सविता हस्तमग्रहीत् । पत्नी त्वमसि धर्मणाहं गृहपतिस्तव ॥५१॥
ममेयमस्तु पोष्या मह्यं त्वादाद् बृहस्पतिः । मया पत्या प्रजावति सं जीव शरदः शतम् ॥५२॥
त्वष्टा वासो व्यदधाच्छुभे कं बृहस्पतेः प्रशिषा कवीनाम् ।
तेनेमां नारी सविता भगश्च सूर्यामिव परि धत्तां प्रजया ॥५३॥
इन्द्राग्नी द्यावापृथिवी मातरिश्वा मित्रावरुणा भगो अश्विनोभा ।
बृहस्पतिर्मरुतो ब्रह्म सोम इमां नारीं प्रजया वर्धयन्तु ॥५४॥
बृहस्पतिः प्रथमः सूर्यायाः शीर्षे केशाँ अकल्पयत् ।
तेनेमामश्विना नारीं पत्ये सं शोभयामसि ॥५५॥
इदं तद्रूपं यदवस्त योषा जायां जिज्ञासे मनसा चरन्ताम् ।
तामन्वर्तिष्ये सखिभिर्नवग्वैः क इमान् विद्वान् वि चचर्त पाशान् ॥५६॥
अहं वि ष्यामि मयि रूपमस्या वेददित् पश्यन् मनसः कुलायम् ।

न स्तेयमद्मि मनसोदमुच्ये स्वयं श्रथ्नानो वरुणस्य पाशान् ॥५७॥
प्र त्वा मुंचामि वरुणस्य पाशाद् येन त्वाबध्नात् सविता सुशेवाः ।
उरुं लोकं सुगमत्र पन्थां कृणोमि तुभ्यं सहपत्न्यै वधु ॥५८॥
उद्यच्छध्वमप रक्षो हनाथेमां नारीं सुकृते दधात ।
धाता विपश्चित् पतिमस्यै विवेद भगो राजा पुर एतु प्रजानन् ॥५९॥
भगस्ततक्ष चतुरः पादान् भगस्ततक्ष चत्वार्युष्पलानि ।
त्वष्टा पिपेश मध्यतोऽनु वर्ध्रान्तसा नो अस्तु सुमंगली ॥६०॥
सुकिंशुकं वहतुं विश्वरूपं हिरण्यवर्णं सुवृतं सुचक्रम् ।
आ रोह सूर्ये अमृतस्य लोकं स्योनं पतिभ्यो वहतुं कृणु त्वम् ॥६१॥
अभ्रातृघ्नीं वरुणापशुघ्नीं बृहस्पते । इन्द्रापतिघ्नीं पुत्रिणीमास्मभ्यं सवितर्वह ॥६२॥
मा हिसिष्टं कुमार्य१ स्थूणे देवकृते पथि। शालाया देव्या द्वारं स्योनं कृण्मो वधूपथम् ॥६३॥
ब्रह्मापरं युज्यतां ब्रह्म पूर्वं ब्रह्मन्ततो मध्यतो ब्रह्म सर्वतः ।
अनाव्याधां देवपुरां प्रपद्य शिवा स्योना पतिलोके वि राज ॥६४॥
*āśasanaṁ viśasanamatho adhivikartanam ।*
*sūryāyāḥ paśya rūpāṇi tāni brahmota śumbhati ॥28॥*
*tṛṣṭametat kaṭukamapāṣṭhavad viṣavannaitadattave ।*
*sūryāṁ yo brahmā veda sa id vādhūyamarhati ॥29॥*
*sa it tat syonaṁ harati brahmā vāsaḥ sumaṁgalam ।*
*prāyaśchittiṁ yo adhyeti yena jāyā na riṣyati ॥30॥*
*yuvaṁ bhagaṁ saṁ bharataṁ samṛddhamṛtaṁ vadantāvṛtodyeṣu ।*
*brahmaṇaspate patimasyai rochaya chāru saṁbhalo vadatu vāchametām ॥31॥*
*ihedasātha na paro gamāthemaṁ gāvaḥ prajayā vardhayātha ।*
*śubhaṁ yatīrusriyāḥ somavarchaso viśve devāḥ kranniha vo manāṁsi ॥32॥*
*imaṁ gāvaḥ prajayā saṁ viśāthāyaṁ devānāṁ na mināti bhāgam ।*
*asmai vaḥ pūṣā marutaścha sarve asmai vo dhātā savitā suvāti ॥33॥*
*anṛkṣarā ṛjavaḥ santu panthāno yebhiḥ sakhāyo yanti no vareyam ।*
*saṁ bhagena samaryamṇā saṁ dhātā sṛjatu varchasā ॥34॥*
*yachcha varcho akṣeṣu surāyāṁ cha yadāhitam ।*
*yad goṣvaśvinā varchastenemāṁ varchasāvatam ॥35॥*
*yena mahānaghnyā jaghanmaśvinā yena vā surā ।*
*yenākṣā abhyaṣichyanta tenemāṁ varchasāvatam ॥36॥*
*yo anidhmo dīdayadapsva1ntaryaṁ viprāsa īḍate adhvareṣu ।*
*apāṁ napānmadhumatīrapo dā yābhirindro vāvṛdhe vīryāvān ॥37॥*
*idamahaṁ ruśantaṁ grābhaṁ tanūdūṣimapohāmi ।*
*yo bhadro rochanastamudachāmi ॥38॥*
*āsyai brāhmaṇāḥ snapanī rharantvavīraghnīrudajantvāpaḥ ।*
*aryamṇo agiṁna paryetu pūṣan pratīkṣante śvaśuro devaraścha ॥39॥*
*śaṁ te hiraṇyaṁ śamu santvāpaḥ śaṁ methirbhavatu śaṁ yugasya tardma ।*
*śaṁ ta āpaḥ śatapavitrā bhavantu śamu patyā tanvaṁ1 saṁ spṛśasva ॥40॥*
*khe rathasya khe'nasaḥ khe yugasya śatakrato ।*
*apālāmindra triṣpūtvākṛṇoḥ sūryatvacham ॥41॥*
*āśāsānā saumanasaṁ prajāṁ saubhāgyaṁ rayim ।*
*patyuranuvratā bhūtvā saṁ nahyasvāmṛtāya kam ॥42॥*
*yathā sindhurnadīnāṁ sāmrājyaṁ suṣuve vṛṣā ।*
*evā tvaṁ samrājñayedhi patyurastaṁ paretya ॥43॥*
*samrājñayedhi śvaśureṣu samrājñayuta devṛṣu ।*
*nanānduḥ samrājñayedhi samrājñayuta śvaśravāḥ ॥44॥*
*ā akṛntannavayan yāścha tatnire yā devīrantām̐ abhito'dadanta ।*
*tāstvā jarase saṁ vyayantvāyuṣmatīdaṁ pari dhatsva vāsaḥ ॥45॥*
*jīvaṁ rudanti vi nayantyadhvaraṁ dīrghāmanu prasitiṁ dīdhyurnaraḥ ।*
*vāmaṁ pitṛbhyo ya idaṁ samīrire mayaḥ patibhyo janaye pariṣvaje ॥46॥*
*syonaṁ dhruvaṁ prajāyai dhārayāmi te'śmānaṁ devyāḥ pṛthivyā upasthe ।*
*tamā tiṣṭhānumādyā suvarchā dīrghaṁ ta āyuḥ savitā kṛṇotu ॥47॥*

*yenāgnirasyā bhūmyā hastaṁ jagrāha dakṣiṇam* ।
*tena gṛhṇāmi te hastaṁ mā vyathiṣṭhā mayā saha prajayā cha dhanena cha* ॥48॥
*devaste savitā hastaṁ gṛhṇātu somo rājā suprajasaṁ kṛṇotu* ।
*agniḥ subhagāṁ jātavedāḥ patye patnīṁ jaradaṣṭiṁ kṛṇotu* ॥49॥
*gṛhṇāmi te saubhagatvāya hastaṁ mayā patyā jaradaṣṭiryathāsaḥ* ।
*bhago aryamā savitā purandhirmahyaṁ tvādurgārhapatyāya devāḥ* ॥50॥
*bhagaste hastamagrahīt savitā hastamagrahīt* ।
*patnī tvamasi dharmaṇāhaṁ gṛhapatistava* ॥51॥
*mameyamastu poṣyā mahyaṁ tvādād bṛhaspatiḥ* ।
*mayā patyā prajāvati saṁ jīva śaradaḥ śatam* ॥52॥
*tvaṣṭā vāso vyadadhāchchhubhe kaṁ bṛhaspateḥ praśiṣā kavīnām* ।
*tenemāṁ nārī savitā bhagaścha sūryāmiva pari dhattāṁ prajayā* ॥53॥
*indrāgnī dyāvāpṛthivī mātariśvā mitrāvaruṇā bhago aśvinobhā* ।
*bṛhaspatirmaruto brahma soma imāṁ nārīṁ prajayā vardhayantu* ॥54॥
*bṛhaspatiḥ prathamaḥ sūryāyāḥ śīrṣe keśām̐ akalpayat* ।
*tenemāmaśvinā nārīṁ patye saṁ śobhayāmasi* ॥55॥
*idaṁ tadrūpaṁ yadavasta yoṣā jāyāṁ jijñāse manasā charantām* ।
*tāmanvartiṣye sakhibhirnavagvaiḥ ka imān vidvān vi chacharta pāśān* ॥56॥
*ahaṁ vi ṣyāmi mayi rūpamasyā vedadit paśyan manasaḥ kulāyam* ।
*na steyamadmi manasodamuchye svayaṁ śrathnāno varuṇasya pāśān* ॥57॥
*pra tvā muṁchāmi varuṇasya pāśād yena tvābadhnāt savitā suśevāḥ* ।
*uruṁ lokaṁ sugamatra panthāṁ kṛṇomi tubhyaṁ sahapatnyai vadhu* ॥58॥
*udyachchhadhvamapa rakṣo hanāthemāṁ nārīṁ sukṛte dadhāta* ।
*dhātā vipaśchit patimasyai viveda bhago rājā pura etu prajānan* ॥59॥
*bhagastatakṣa chaturaḥ pādān bhagastatakṣa chatvāryuṣpalāni* ।
*tvaṣṭā pipeśa madhyato'nu vardhrāntasā no astu sumaṁgalī* ॥60॥
*sukiṁśukaṁ vahatuṁ viśvarūpaṁ hiraṇyavarṇaṁ suvṛtaṁ suchakram* ।
*ā roha sūrye amṛtasya lokaṁ syonaṁ patibhyo vahatuṁ kṛṇu tvam* ॥61॥
*abhrātṛghnīṁ varuṇāpaśughnīṁ bṛhaspate* ।
*indrāpatighnīṁ putriṇīmāsmabhyaṁ savitarvaha* ॥62॥
*mā hisiṣṭaṁ kumāryaṁ1 sthūṇe devakṛte pathi* ।
*śālāyā devyā dvāraṁ syonaṁ kṛṇmo vadhūpatham* ॥63॥
*brahmāparaṁ yujyatāṁ brahma pūrvaṁ brahmantato madhyato brahma sarvataḥ* ।
*anāvyādhāṁ devapurāṁ prapadya śivā syonā patiloke vi rāja* ॥64॥

६. सोमः (Somaḥ) - अ. (Av.) १४.१-५

सत्येनोत्तभिता भूमिः सूर्येणोत्तभिता द्यौः। ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधि श्रितः ॥१॥
सोमेनादित्या बलिनः सोमेन पृथिवी मही। अथो नक्षत्राणामेषामुपस्थे सोम आहितः ॥२॥
सोमं मन्यते पपिवान् यत् संपिंषन्त्योषधिम्। सोमं यं ब्रह्मणो विदुर्न तस्याश्नाति पार्थिवः ॥३॥
यत् त्वा सोम प्रपिबन्ति तत आ प्यायसे पुनः। वायुः सोमस्य रक्षिता समानां मास आकृतिः ।४।
आच्छद्विधानैर्गुपितो बार्हतैः सोम रक्षितः। ग्राव्णामिच्छृण्वन् तिष्ठसि न ते अश्नाति पार्थिवः ।५॥
*satyenottabhitā bhūmiḥ sūryeṇottabhitā dyauḥ* ।
*ṛtenādityāstiṣṭhanti divi somo adhi śritaḥ* ॥1॥
*somenādityā balinaḥ somena pṛthivī mahī* ।
*atho nakṣatrāṇāmeṣāmupasthe soma āhitaḥ* ॥2॥
*somaṁ manyate papivān yat saṁpiṁṣantyoṣadhim* ।
*somaṁ yaṁ brahmaṇo vidurna tasyāśnāti pārthivaḥ* ॥3॥
*yat tvā soma prapibanti tata ā pyāyase punaḥ* ।
*vāyuḥ somasya rakṣitā samānāṁ māsa ākṛtiḥ* ।4।
*āchchhadvidhānairgupito bārhataiḥ soma rakṣitaḥ* ।
*grāvṇāmichchhṛṇvan tiṣṭhasi na te aśnāti pārthivaḥ* ।5॥

७. सोमार्कौ (Somārkau) - अ. (Av.) १४.१.२३

पूर्वापरं चरतो माययैतौ शिशू क्रीडन्तौ परि यातोऽर्णवम् ।
विश्वान्यो भुवना विचष्ट ऋतूँरन्यो विदधज्जायसे नवः ॥२३॥

*pūrvāparaṁ charato māyayaitau śiśū krīḍantau pari yāto'rṇavam /*
*viśvānyo bhuvanā vichaṣṭa ṛtūm̐ranyo vidadhajjāyase navaḥ //23 //*

८. दम्पत्योः परिपथिनाशनौ (Dampatyoḥ Paripathināśanau) - अ. (Av.) १४.२.११

मा विदन् परिपन्थिनो य आसीदन्ति दम्पती। सुगेन दुर्गमतीतामप द्रान्त्वरातयः ॥११॥
*mā vidan paripanthino ya āsīdanti dampatī /*
*sugena durgamatītāmapa drāntvarātayaḥ //11 //*

९. देवाः (Devāḥ) - अ. (Av.) १४.२.३६

राया वयं सुमनसः स्यामोदितो गन्धर्वमावीवृताम ।
अगन्त्स देवः परमं सधस्थमगन्म यत्र प्रतिरन्त आयुः ॥३६॥
*rāyā vayaṁ sumanasaḥ syāmodito gandharvamāvīvṛtāma /*
*agantsa devaḥ paramaṁ sadhasthamaganma yatra pratiranta āyuḥ //36 //*

१०. पक्ष्मनाशनी (Pakṣmanāśanī) - अ. (Av.) १४.२.१०

ये वध्वश्चन्द्रं वहतुं यक्ष्मा यन्ति जनाँ अनु। पुनस्तान् यज्ञिया देवा नयन्तु यत आगताः ॥१०॥
*ye vadhvaśchandraṁ vahatuṁ yakṣamā yanti janām̐ anu / punastān yajñiyā devā nayantu yata āgatāḥ //10 //*

## ७२९. सिकता निवावरी (Sikatā Nivāvarī)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.८६.११-२०; सा. (Sv.) ५५७; ५५९; ८२१-८२२; ११५२-११५४

ऋ. (Rv.) ९.८६.११-२०

अभिक्रन्दन्कलशं वाज्यर्षति पतिर्दिवः शतधारो विचक्षणः ।
हरिर्मित्रस्य सदनेषु सीदति मर्मृजानोऽविभिः सिन्धुभिर्वृषा ॥११॥
अग्रे सिन्धूनां पवमानो अर्षत्यग्रे वाचो अग्रियो गोषु गच्छति ।
अग्रे वाजस्य भजते महाधनं स्वायुधः सोतृभिः पूयते वृषा ॥१२॥
अयं मतवांछकुनो यथा हितोऽव्ये ससार पवमान ऊर्मिणा ।
तव क्रत्वा रोदसी अन्तरा कवे शुचिर्धिया पवते सोम इन्द्र ते ॥१३॥
द्रापिं वसानो यजतो दिविस्पृशमन्तरिक्षप्रा भुवनेष्वर्पितः ।
स्वर्जज्ञानो नभसाभ्यक्रमीत्प्रत्नमस्य पितरमा विवासति ॥१४॥
सो अस्य विशे महि शर्म यच्छति यो अस्य धाम प्रथमं व्यानशे ।
पदं यदस्य परमे व्योमन्यतो विश्वा अभि सं याति संयतः ॥१५॥
प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतं सखा सख्युर्न प्र मिनाति संगिरम् ।
मर्यइव युवतिभिः समर्षति सोमः कलशे शतयाम्ना पथा ॥१६॥
प्र वो धियो मन्द्रयुवो विपन्युवः पनस्युवः संवनेष्वक्रमुः ।
सोमं मनीष अभ्यनूषत स्तुभोऽभि धेनवः पयसेमशिश्रयुः ॥१७॥
आ नः सोम संयतं पिप्युषीमिषमिन्दो पवस्व पवमानो अस्त्रिधम् ।
या नो दोहते त्रिरहन्नसश्चुषी क्षुमद्वाजवन्मधुमत्सुवीर्यम् ॥१८॥
वृषा मतीनां पवते विचक्षणः सोमो अह्नः प्रतरीतोषसो दिवः ।
क्राणा सिन्धूनां कलशाँ अवीवशदिन्द्रस्य हार्द्याविशन्मनीषिभिः ॥१९॥
मनीषिभिः पवते पूर्व्यः कविर्नृभिर्यतः परि कोशाँ अचिक्रदत् ।
त्रितस्य नाम जनयन्मधु क्षरदिन्द्रस्य वायोः सख्याय कर्तवे ॥२०॥
*abhikrandankalaśaṁ vājyarṣati patirdivaḥ śatadhāro vichakṣaṇaḥ /*
*harirbhitrasya sadaneṣu sīdati marmṛjāno'vibhiḥ sindhubhirvṛṣā //11 //*
*agre sindhṛnāṁ pavamāno arṣatyagre vācho agriyo goṣu gachchhati /*
*agre vājasya bhajate mahādhanaṁ svāyudhaḥ sotṛbhiḥ pūyate vṛṣā //12 //*
*ayaṁ matavāṁchhakuno yathā hito'vye sasāra pavamāna ūrmiṇā /*
*tava kratvā rodasī antarā kave śuchirdhiyā pavate soma indra te //13 //*
*drāpiṁ vasāno yajato divispṛśamantarikṣaprā bhuvaneṣvarpitaḥ /*
*svarjajñāno nabhasābhyakramītpratnamasya pitaramā vivāsati //14 //*

*so asya viśe mahi śarma yachchhati yo asya dhāma prathamaṁ vyānaśe ।*
*padaṁ yadasya parame vyomanyato viśvā abhi saṁ yāti saṁyataḥ ॥15॥*
*pro ayāsīdindurindrasya niṣkṛtaṁ sakhā sakhyurna pra mināti saṁgiram ।*
*maryaiva yuvatibhiḥ samarṣati somaḥ kalaśe śatayāmnā pathā ॥16॥*
*pra vo dhiyo mandrayuvo vipanyuvaḥ panasyuvaḥ saṁvaneṣvakramuḥ ।*
*somaṁ manīṣa abhyanūṣata stubho'bhi dhenavaḥ payasemaśiśrayuḥ ॥17॥*
*ā naḥ soma saṁyataṁ pipyuṣīmiṣamindo pavasva pavamāno asridham ।*
*yā no dohate trirahannasaśchuṣī kṣumadvājavanmadhumatsuvīryam ॥18॥*
*vṛṣā matīnāṁ pavate vichakṣaṇaḥ somo ahnaḥ pratarītoṣaso divaḥ ।*
*krāṇā sindhūnāṁ kalaśāṁ̐ avīvaśadindrasya hārdyāviśanmanīṣibhiḥ ॥19॥*
*manīṣibhiḥ pavate pūrvyaḥ kavirnṛbhiryataḥ pari kośāṁ̐ achikradat ।*
*tritasya nāma janayanmadhu kṣaradindrasya vāyoḥ sakhyāya kartave ॥20॥*

सा. (Sv.) ५५७

प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतं सखा सख्युर्न न मिनाति संगिरम् ।
मर्य इव युवतिभिः समर्षति सोमः कलशे शतयामना पथा ॥४॥
*pro ayāsīdindurindrasya niṣkṛtaṁ sakhā sakhyurna na mināti saṁgiram ।*
*marya iva yuvatibhiḥ samarṣati somaḥ kalaśe śatayāmanā pathā ॥4॥*

सा. (Sv.) ५५९

वृषा मतीनां पवते विचक्षणः सोमो अह्नां प्रतरीतोषसां दिवः ।
प्राणा सिन्धूनाँ कलशाँ अचिक्रददिन्द्रस्य हार्द्याविशन्मनीषिभिः ॥६॥
*vṛṣā matīnāṁ pavate vichakṣaṇaḥ somo ahnāṁ pratarītoṣasāṁ divaḥ ।*
*prāṇā sindhūnāṁ̐ kalaśāṁ̐ achikradadindrasya hārdyāviśanmanīṣibhiḥ ॥6॥*

सा. (Sv.) ८२१-८२२

वृषा मतीनां पवते विचक्षणः सोमो अह्नां प्रतरीतोषसां दिवः ।
प्राणा सिन्धूनां कलशाँ अचिक्रददिन्द्रस्य हार्द्याविशन्मनीषिभिः ॥१॥
मनीषिभिः पवते पूर्व्यः कविर्नृभिर्यतः परि कोशाँ असिष्यदत् ।
त्रितस्य नाम जनयन्मधु क्षरन्निन्द्रस्य वायुं सख्याय वर्धयन् ॥२॥
*vṛṣā matīnāṁ pavate vichakṣaṇaḥ somo ahnāṁ pratarītoṣasāṁ divaḥ ।*
*prāṇā sindhūnāṁ kalaśāṁ̐ achikradadindrasya hārdyāviśanmanīṣibhiḥ ॥1॥*
*manīṣibhiḥ pavate pūrvyaḥ kavirnṛbhiryataḥ pari kośāṁ̐ asiṣyadat ।*
*tritasya nāma janayanmadhu kṣarannindrasya vāyuṁ sakhyāya vardhayan ॥2॥*

सा. (Sv.) ११५२-११५४

प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतं सखा सख्युर्न प्र मिनाति संगिरम् ।
मर्य इव युवतिभिः समर्षति सोमः कलशे शतयामना पथा ॥१॥
प्र वो धियो मन्द्रयुवो विपन्युवः पनस्युवः संवरणेष्वक्रमुः ।
हरिं क्रीडन्तमभ्यनूषत स्तुभोऽभि धेनवः पयसेदशिश्रयुः ॥२॥
आ नः सोम संयतं पिप्युषीमिषमिन्दो पवस्व पवमान ऊर्मिणा ।
या नो दोहते त्रिरहन्नसश्चुषी क्षुमद्वाजवन्मधुमत्सुवीर्यम् ॥३॥
*pro ayāsīdindurindrasya niṣkṛtaṁ sakhā sakhyurna pra mināti saṁgiram ।*
*marya iva yuvatibhiḥ samarṣati somaḥ kalaśe śatayāmanā pathā ॥1॥*
*pra vo dhiyo mandrayuvo vipanyuvaḥ panasyuvaḥ saṁvaraṇeṣvakramuḥ ।*
*hariṁ krīḍantamabhyanūṣata stubho'bhi dhenavaḥ payasedaśiśrayuḥ ॥2॥*
*ā naḥ soma saṁyataṁ pipyuṣīmiṣamindo pavasva pavamāna ūrmiṇā ।*
*yā no dohate trirahannasaśchuṣī kṣumadvājavanmadhumatsuvīryam ॥3॥*

## ७३०. सिन्धुक्षित् प्रैयमेधः (Sindhukṣit Praiyamedhaḥ)

१. नद्यः (Nadyaḥ) - ऋ. (Rv.) १०.७५.१-९

प्र सु व आपो महिमानमुत्तमं कारुर्वोचाति सदने विवस्वतः ।
प्र सप्तसप्त त्रेधा हि चक्रमुः प्र सुत्वरीणामति सिन्धुरोजसा ॥१॥
प्र तेऽरदद्वरुणो यातवे पथः सिन्धो यद्वाजाँ अभ्यद्रवस्त्वम् ।

भूम्या अधि प्रवता यासि सानुना यदेषामग्रं जगतामिरज्यसि ॥२॥
दिवि स्वनो यतते भूम्योपर्यनन्तं शुष्ममुदियर्ति भानुना ।
अभ्रादिव प्र स्तनयन्ति वृष्टयः सिन्धुर्यदेति वृषभो न रोरुवत् ॥३॥
अभि त्वा सिन्धो शिशुमिन्न मातरो वाश्रा अर्षन्ति पयसेव धेनवः ।
राजेव युध्वा नयसि त्वमित्सिचौ यदासामग्रं प्रवतामिनक्षसि ॥४॥
इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचता पुरुष्ण्या ।
असिक्न्या मरुद्वृधे वितस्तयार्जीकीये श्रृणुह्या सुषोमया ॥५॥
तृष्टामया प्रथमं यातवे सजूः सुसर्त्वा रसया श्वेत्या त्या ।
त्वं सिन्धो कुभ्या गोमतीं क्रुमुं मेहत्न्वा सरथं याभिरीयसे ॥६॥
ऋजीत्येनी रुशती महित्वा परि ज्रयांसि भरते रजांसि ।
अदब्धा सिन्धुरपसामपस्तमाश्वा न चित्रा वपुषीव दर्शता ॥७॥
स्वश्वा सिन्धुः सुरथा सुवासा हिरण्ययी सुकृता वाजिनीवती ।
ऊर्णावती युवतिः सीलमावत्युताधि वस्ते सुभगा मधुवृधम् ॥८॥
सुखं रथं ययुजे सिन्धुरश्विनं तेन वाजं सनिषदस्मिन्नाजौ ।
महान्ह्यस्य महिमा पनस्यतेऽदब्धस्य स्वयशसो विरप्शिनः ॥९॥
*pra su va āpo mahimānamuttamaṁ kārurvochāti sadane vivasvataḥ |*
*pra saptasapta tredhā hi chakramuḥ pra sutvarīṇāmati sindhurojasā ||1||*
*pra te'radadvaruṇo yātave pathaḥ sindho yadvājām̐ abhyadravastvam |*
*bhūmyā adhi pravatā yāsi sānunā yadeṣāmagraṁ jagatāmirajyasi ||2||*
*divi svano yatate bhūmyoparyanantaṁ śuṣmamudiyarti bhānunā |*
*abhrādiva pra stanayanti vṛṣṭayaḥ sindhuryadeti vṛṣabho na roruvat ||3||*
*abhi tvā sindho śiśuminna mātaro vāśrā arṣanti payaseva dhenavaḥ |*
*rājeva yudhvā nayasi tvamitsichau yadāsāmagraṁ pravatāminakṣasi ||4||*
*imaṁ me gaṁge yamune sarasvati śutudri stomaṁ sachatā puruṣṇyā |*
*asiknyā marudvṛdhe vitastayārjīkīye śṛṇuhyā suṣomayā ||5||*
*tṛṣṭāmayā prathamaṁ yātave sajūḥ susartvā rasayā śvetyā tyā |*
*tvaṁ sindho kubhyā gomatīṁ krumuṁ mehatnvā sarathaṁ yābhirīyase ||6||*
*ṛjītyenī ruśatī mahitvā pari jrayāṁsi bharate rajāṁsi |*
*adabdhā sindhurapasāmapastamāśvā na chitrā vapuṣīva darśatā ||7||*
*svaśvā sindhuḥ surathā suvāsā hiraṇyayī sukṛtā vājinīvatī |*
*ūrṇāvatī yuvatiḥ sīlamāvatyutādhi vaste subhagā madhuvṛdham ||8||*
*sukhaṁ rathaṁ yayuje sindhuraśvinaṁ tena vājaṁ saniṣadasminnājau |*
*mahānhyasya mahimā panasyate'dabdhasya svayaśaso virapśinaḥ ||9||*

## ७३१. सिन्धुद्वीपः (Sindhudvīpaḥ)

१. अग्निः (Agniḥ) - अ. (Av.) ७.८९.१-४; य. (Yv.) ११.४०

अ. (Av.) ७.८९.१-४

अपो दिव्या अचायिषं रसेन समपृक्ष्महि। पयस्वानग्न आगमं तं मा सं सृज वर्चसा ॥१॥
सं माग्ने वर्चसा सृज सं प्रजया समायुषा। विद्युर्मे अस्य देवा इन्द्रो विद्यात् सह ऋषिभिः ॥२॥
इदमापः प्र वहतावद्यं च मलं च यत्। यच्चाभिदुद्रोहानृतं यच्च शेपे अभीरुणम् ॥३॥
एधोऽस्येधिषीय समिदसि समेधिषीय। तेजोऽसि तेजो मयि धेहि ॥४॥
*apo divyā achāyiṣaṁ rasena samapṛkṣamahi |*
*payasvānagna āgamaṁ taṁ mā saṁ sṛja varchasā ||1||*
*saṁ māgne varchasā sṛja saṁ prajayā samāyuṣā |*
*vidyurme asya devā indro vidyāt saha ṛṣibhiḥ ||2||*
*idamāpaḥ pra vahatāvadyaṁ cha malaṁ cha yat |*
*yachchābhidudrohānṛtaṁ yachcha śepe abhīruṇam ||3||*
*edho'syedhiṣīya samidasi samedhiṣīya | tejo'si tejo mayi dhehi ||4||*

य. (Yv.) ११.४०

सुजातो ज्योतिषा सह शर्म वरूथमास दत्स्वः। वासोऽअग्ने विश्वरूपं संव्ययस्व विभावसो ॥४०॥
*sujāto jyotiṣā saha śarma varūthamāsa datsvaḥ | vāso'agne viśvarūpaṁ saṁvyayasva*

*vibhāvaso ।40 ॥*

२. अदितिः (Aditiḥ) - य. (Yv.) ११.५६-५७; ५९

य. (Yv.) ११.५६-५७

सिनीवाली सुकपर्दा सुकुरीरा स्वौपशा ।
सा तुभ्यमदिते मह्योखां दधातु हस्तयोः ॥५६॥
उखाङ्कृणोतु शक्त्या बाहुभ्यामदितिर्धिया । माता पुत्रँयथोपस्थे साग्निम्बिभर्तु गर्भ आ । मखस्य शिरो सि ॥५७॥
*sinīvālī sukapardā sukurīrā svaupaśā ।*
*sā tubhyamadite mahyokhāṁ dadhātu hastayoḥ ॥56॥*
*ukhāṅkṛṇotu śaktyā bāhubhyāmaditirdhiyā । mātā putraṁyathopasthe sāgnimbibhartu garbha ā । makhasya śiro si ॥57॥*

य. (Yv.) ११.५९

अदित्यै रास्नास्यदितिष्टे बिलं गृभ्णातु। कृत्वाय सा महीमुखां मृन्मयीं योनिमग्नये।
पुत्रेभ्यः प्रायच्छददितिः श्रपयानिति ॥५९॥
*adityai rāsnāsyaditiṣṭe bilaṁ gṛbhṇātu । kṛtvāya sā mahīmukhāṁ mṛnmayīṁ yonimagnaye । putrebhyaḥ prāyachchhadaditiḥ śrapayāniti ॥59॥*

३. आदित्यादयो लिंगोक्ताः (Ādityādayo Liṁgoktāḥ) - य. (Yv.) ११.६१

अदितिष्ट्वा देवी विश्वदेवयावती पृथिव्याः सधस्थेऽस्रिरस्वत् खनत्ववट् देवानां त्वा पत्नीर्देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽअंगिरस्वद्दधतूखे धिषणास्त्वा देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽअंगिरस्वदभीन्धताम् उखे वरूत्रीष्ट्वा देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽअंगिरस्वच्छ्रपयन्तूखे ग्रास्त्वा देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽअंगिरस्वत्पचन्तूखे जनयस्त्वाऽछिन्नपत्रा देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽअंगिरस्वत्पचन्तूखे ॥६१॥
*aditiṣṭvā devī viśvadevayāvatī pṛthivyāḥ sadhasthe'asrirasvat khanatvavaṭ devānāṁ tvā patnīrdevīrviśvadevyāvatīḥ pṛthivyāḥ sadhasthe'aṁgirasvaddadhatūkhe dhiṣaṇāstvā devīrviśvadevyāvatīḥ pṛthivyāḥ sadhasthe'aṁgirasvadabhīndhatām ukhe varūtrīṣṭvā devīrviśvadevyāvatīḥ pṛthivyāḥ sadhasthe'aṁgirasvachchhrapayantūkhe grāstvā devīrviśvadevyāvatīḥ pṛthivyāḥ sadhasthe'aṁgirasvatpachantūkhe janayastvā'chhinnapatrā devīrviśvadevyāvatīḥ pṛthivyāḥ sadhasthe'aṁgirasvatpachantūkhe ॥61॥*

४. आपः (Āpaḥ) - अ. (Av.) १०.५.१-२४; १९.२.१-५; य. (Yv.) ११.३८; ५०-५२; ३६.१४-१६

अ. (Av.) १०.५.१-२४

इन्द्रस्यौज रथेन्द्रस्य सह स्थेन्द्रस्य बलं स्थेन्द्रस्य वीर्यं१ स्थेन्द्रस्य नृम्णं स्थ ।
जिष्णवे योगाय ब्रह्मयोगैर्वो युनज्मि ॥१॥
इन्द्रस्यौज रथेन्द्रस्य सह स्थेन्द्रस्य बलं स्थेन्द्रस्य वीर्यं१ स्थेन्द्रस्य नृम्णं स्थ ।
जिष्णवे योगाय क्षत्रयोगैर्वो युनज्मि ॥२॥
इन्द्रस्यौज रथेन्द्रस्य सह स्थेन्द्रस्य बलं स्थेन्द्रस्य वीर्यं१ स्थेन्द्रस्य नृम्णं स्थ ।
जिष्णवे योगायन्द्रयोगैर्वो युनज्मि ॥३॥
इन्द्रस्यौज स्थेन्द्रस्य सह स्थेन्द्रस्य बलं स्थेन्द्रस्य वीर्यं१ स्थेन्द्रस्य नृम्णं स्थ ।
जिष्णवे योगाय सोमयोगैर्वो युनज्मि ॥४॥
इन्द्रस्यौज स्थेन्द्रस्य सह स्थेन्द्रस्य बलं स्थेन्द्रस्य वीर्यं१ स्थेन्द्रस्य नृम्णं स्थ ।
जिष्णवे योगायाप्सुयोगैर्वो युनज्मि ॥५॥
इन्द्रस्यौज रथेन्द्रस्य सह स्थेन्द्रस्य बलं स्थेन्द्रस्य वीर्यं१ स्थेन्द्रस्य नृम्णं स्थ ।
जिष्णवे योगाय विश्वानि मा भूतान्युप तिष्ठन्तु युक्ता म आप स्थ ॥६॥
अग्नेर्भाग स्थ। अपां शुक्रमापो देवीर्वर्चो अस्मासु धत्त ।
प्रजापतेर्वो धाम्नास्मै लोकाय सादये ॥७॥
इन्द्रस्य भाग स्थ। अपां शुक्रमापो देवीर्वर्चो अस्मासु धत्त ।
प्रजापतेर्वो धाम्नास्मै लोकाय सादये ॥८॥
सोमस्य भाग स्थ। अपां शुक्रमापो देवीर्वर्चो अस्मासु धत्त ।
प्रजापतेर्वो धाम्नास्मै लोकाय सादये ॥९॥
वरुणस्य भाग स्थ। अपां शुक्रमापो देवीर्वर्चो अस्मासु धत्त ।

प्रजापतेर्वो धाम्नास्मै लोकाय सादये ॥१०॥
मित्रावरुण्योर्भाग स्थ। अपां शुक्रमापो देवीर्वर्चो अस्मासु धत्त ।
प्रजापतेर्वो धाम्नास्मै लोकाय सादये ॥११॥
यमस्य भाग स्थ। अपां शुक्रमापो देवीर्वर्चो अस्मासु धत्त ।
प्रजापतेर्वो धाम्नास्मै लोकाय सादये ॥१२॥
पितृणा भाग स्थ। अपां शुक्रमापो देवीर्वर्चो अस्मासु धत्त ।
प्रजापतेर्वो धाम्नास्मै लोकाय सादये ॥१३॥
देवस्य सवितुर्भाग स्थ। अपां शुक्रमापो देवीर्वर्चो अस्मासु धत्त ।
प्रजापतेर्वो धाम्नास्मै लोकाय सादये ॥१४॥
यो व आपोऽपां भागो३प्स्व१न्तर्यजुष्यो देवयजनः। इदं तमति सृजामि तं माभ्यवनिक्षि ।
तेन तमभ्यतिसृजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
तं वधेयं तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या ॥१५॥
यो व आपोऽपामूर्मिरप्स्व१न्तर्यजुष्यो देवयजनः। इदं तमति सृजामि तं माभ्यवनिक्षि ।
तेन तमभ्यतिसृजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
तं वधेयं तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या ॥१६॥
यो व आपोऽपां वत्सो३प्स्व१न्तर्यजुष्यो देवयजनः। इदं तमति सृजामि तं माभ्यवनिक्षि ।
तेन तमभ्यतिसृजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
तं वधेयं तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या ॥१७॥
यो व आपोऽपां वृषभो३प्स्व१न्तर्यजुष्यो देवयजनः। इदं तमति सृजामि तं माभ्यवनिक्षि ।
तेन तमभ्यतिसृजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
तं वधेयं तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या ॥१८॥
यो व आपोऽपां हिरण्यगर्भो३प्स्व१न्तर्यजुष्यो देवयजनः। इदं तमति सृजामि तं माभ्यवनिक्षि ।
तेन तमभ्यतिसृजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
तं वधेयं तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या ॥१९॥
यो व आपोऽपामश्मा पृश्निर्दिव्यो३प्स्व१न्तर्यजुष्यो देवयजनः ।
इदं तमति सृजामि तं माभ्यवनिक्षि। तेन तमभ्यतिसृजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
तं वधेयं तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या ॥२०॥
ये व आपोऽपामग्नयोऽप्स्व१न्तर्यजुष्यो देवयजनाः। इदं तानति सृजामि तान् माभ्यवनिक्षि ।
तेन तमभ्यतिसृजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
तं वधेयं तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या ॥२१॥
यदर्वाचीनं त्रैहायणादनृतं किं चोदिम। आपो मा तस्मात् सर्वस्माद् दुरितात् पान्त्वंहसः ॥२२॥
समुद्रं वः प्र हिणोमि स्वां योनिमपीतन। अरिष्टाः सर्वहायसो मा च नः किं चनाममत् ॥२३॥
अरिप्रा आपो अप रिप्रमस्मत्। प्रास्मदेनो दुरितं सुप्रतीकाः प्र दुःष्वप्न्यं प्र मलं वहन्तु ॥२४॥
*indrasyauja rathendrasya saha sthendrasya balaṁ sthendrasya vīryaṁ1 sthendrasya nṛmṇaṁ stha* ।
*jiṣṇave yogāya brahmayogairvo yunajmi* ॥1॥
*indrasyauja rathendrasya saha sthendrasya balaṁ sthendrasya vīryaṁ1 sthendrasya nṛmṇaṁ stha* ।
*jiṣṇave yogāya kṣatrayogairvo yunajmi* ॥2॥
*indrasyauja rathendrasya saha sthendrasya balaṁ sthendrasya vīryaṁ1 sthendrasya nṛmṇaṁ stha* ।
*jiṣṇave yogāyandrayogairvo yunajmi* ॥3॥
*indrasyauja sthendrasya saha sthendrasya balaṁ sthendrasya vīryaṁ1 sthendrasya nṛmṇaṁ stha* ।
*jiṣṇave yogāya somayogairvo yunajmi* ॥4॥
*indrasyauja sthendrasya saha sthendrasya balaṁ sthendrasya vīryaṁ1 sthendrasya nṛmṇaṁ stha* ।
*jiṣṇave yogāyāpsuyogairvo yunajmi* ॥5॥
*indrasyauja rathendrasya saha sthendrasya balaṁ sthendrasya vīryaṁ1 sthendrasya*

*nṛmṇaṁ stha* ।
*jiṣṇave yogāya viśvāni mā bhūtānyupa tiṣṭhantu yuktā ma āpa stha* ॥6॥
*agnerbhāga stha । apāṁ śukramāpo devīrvarcho asmāsu dhatta* ।
*prajāpatervo dhāmnāsmai lokāya sādaye* ॥7॥
*indrasya bhāga stha । apāṁ śukramāpo devīrvarcho asmāsu dhatta* ।
*prajāpatervo dhāmnāsmai lokāya sādaye* ॥8॥
*somasya bhāga stha । apāṁ śukramāpo devīrvarcho asmāsu dhatta* ।
*prajāpatervo dhāmnāsmai lokāya sādaye* ॥9॥
*varuṇasya bhāga stha । apāṁ śukramāpo devīrvarcho asmāsu dhatta* ।
*prajāpatervo dhāmnāsmai lokāya sādaye* ॥10॥
*mitrāvaruṇyorbhāga stha । apāṁ śukramāpo devīrvarcho asmāsu dhatta* ।
*prajāpatervo dhāmnāsmai lokāya sādaye* ॥11॥
*yamasya bhāga stha । apāṁ śukramāpo devīrvarcho asmāsu dhatta* ।
*prajāpatervo dhāmnāsmai lokāya sādaye* ॥12॥
*pitṛṇā bhāga stha । apāṁ śukramāpo devīrvarcho asmāsu dhatta* ।
*prajāpatervo dhāmnāsmai lokāya sādaye* ॥13॥
*devasya saviturbhāga stha । apāṁ śukramāpo devīrvarcho asmāsu dhatta* ।
*prajāpatervo dhāmnāsmai lokāya sādaye* ॥14॥
*yo va āpo'pāṁ bhāgo3psva1ntaryajuṣyo devayajanaḥ । idaṁ tamati sṛjāmi taṁ mābhyavanikṣi* ।
*tena tamabhyatisṛjāmo yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ* ।
*taṁ vadheyaṁ taṁ stṛṣīyānena brahmaṇānena karmaṇānayā menyā* ॥15॥
*yo va āpo'pāmūrmirapsva1ntaryajuṣyo devayajanaḥ । idaṁ tamati sṛjāmi taṁ mābhyavanikṣi* ।
*tena tamabhyatisṛjāmo yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ* ।
*taṁ vadheyaṁ taṁ stṛṣīyānena brahmaṇānena karmaṇānayā menyā* ॥16॥
*yo va āpo'pāṁ vatso3psva1ntaryajuṣyo devayajanaḥ । idaṁ tamati sṛjāmi taṁ mābhyavanikṣi* ।
*tena tamabhyatisṛjāmo yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ* ।
*taṁ vadheyaṁ taṁ stṛṣīyānena brahmaṇānena karmaṇānayā menyā* ॥17॥
*yo va āpo'pāṁ vṛṣabho3psva1ntaryajuṣyo devayajanaḥ । idaṁ tamati sṛjāmi taṁ mābhyavanikṣi* ।
*tena tamabhyatisṛjāmo yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ* ।
*taṁ vadheyaṁ taṁ stṛṣīyānena brahmaṇānena karmaṇānayā menyā* ॥18॥
*yo va āpo'pāṁ hiraṇyagarbho3psva1ntaryajuṣyo devayajanaḥ । idaṁ tamati sṛjāmi taṁ mābhyavanikṣi* ।
*tena tamabhyatisṛjāmo yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ* ।
*taṁ vadheyaṁ taṁ stṛṣīyānena brahmaṇānena karmaṇānayā menyā* ॥19॥
*yo va āpo'pāmaśmā pṛśnirdivyo3psva1ntaryajuṣyo devayajanaḥ* ।
*idaṁ tamati sṛjāmi taṁ mābhyavanikṣi । tena tamabhyatisṛjāmo yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ* ।
*taṁ vadheyaṁ taṁ stṛṣīyānena brahmaṇānena karmaṇānayā menyā* ॥20॥
*ye va āpo'pāmagnayo'psva1ntaryajuṣyo devayajanāḥ । idaṁ tānati sṛjāmi tān mābhyavanikṣi* ।
*tena tamabhyatisṛjāmo yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ* ।
*taṁ vadheyaṁ taṁ stṛṣīyānena brahmaṇānena karmaṇānayā menyā* ॥21॥
*yadarvāchīnaṁ traihāyaṇādanṛtaṁ kiṁ chodima । āpo mā tasmāt sarvasmād duritāt pāntvaṁhasaḥ* ॥22॥
*samudraṁ vaḥ pra hiṇomi svāṁ yonimapītana । ariṣṭāḥ sarvahāyaso mā cha naḥ kiṁ chanāmamat* ॥23॥
*ariprā āpo apa ripramasmat । prāsmadeno duritaṁ supratīkāḥ pra duḥṣvapnyaṁ pra malaṁ vahantu* ॥24॥

अ. (Av.) १९.२.१-५

शं त आपो हैमवतीः शमु ते सन्तूत्स्याः । शं ते सनिष्यदा आपः शमु ते सन्तु वर्ष्याः ॥१॥

शं त आपो धन्वन्याः शं ते सन्त्वनूप्याः। शं ते खनित्रिमा आपः शं याः कुम्भेभिराभृताः ॥२॥
अनभ्रयः खनमाना विप्रा गम्भीरे अपसः। भिषग्भ्यो भिषक्तरा आपो अच्छा वदामसि ॥३॥
अपामह दिव्यानामपां स्रोतस्यानाम्। अपामह प्रणेजनेऽश्वा भवथ वाजिनः ॥४॥
ता अपः शिवा अपोऽयक्ष्मंकरणीरपः। यथैव तृप्यते मयस्तास्त आ दत्त भेषजीः ॥५॥
*śaṁ ta āpo haimavatīḥ śamu te santūtsyāḥ |*
*śaṁ te saniṣyadā āpaḥ śamu te santu varṣyāḥ ||1 ||*
*śaṁ ta āpo dhanvanyā3ḥ śaṁ te santvanūpyāḥ |*
*śaṁ te khanitrimā āpaḥ śaṁ yāḥ kumbhebhirābhṛtāḥ ||2 ||*
*anabhrayaḥ khanamānā viprā gambhīre apasaḥ |*
*bhiṣagbhyo bhiṣaktarā āpo achchhā vadāmasi ||3 ||*
*apāmaha divyānāmapāṁ srotasyānām | apāmaha praṇejane'śvā bhavatha vājinaḥ ||4 ||*
*tā apaḥ śivā apo'yakṣamaṁkaraṇīrapaḥ |*
*yathaiva tṛpyate mayastāsta ā datta bheṣajīḥ ||5 ||*

य. (Yv.) ११.३८

अपो देवीरुपसृज मधुमतीरयक्ष्माय प्रजाभ्यः। तासामास्थानादुज्जिहतामोषधयः सुपिप्पलाः ॥३८॥
*apo devīrupasṛja madhumatīrayakṣamāya prajābhyaḥ |*
*tāsāmāsthānādujjihatāmoṣadhayaḥ supippalāḥ ||38 ||*

य. (Yv.) ११.५०-५२

आपो हि ष्ठा मयोभुवस्ता नऽऊर्जे दधातन। महे रणाय चक्षसे ॥५०॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः ॥५१॥
तस्माऽअरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः ॥५२॥
*āpo hi ṣṭhā mayobhuvastā na'ūrje dadhātana | mahe raṇāya chakṣase ||50 ||*
*yo vaḥ śivatamo rasastasya bhājayateha naḥ | uśatīriva mātaraḥ ||51 ||*
*tasmā'araṁ gamāma vo yasya kṣayāya jinvatha | āpo janayathā cha naḥ ||52 ||*

य. (Yv.) ३६.१४-१६

आपो हि ष्ठा मयोभुवस्ता नऽऊर्जे दधातन। महे रणाय चक्षसे ॥१४॥
यो वः शिवतमो रसस्तस्य भाजयतेहनः। उशतीरिव मातरः ॥१५॥
तस्माऽअरं गमामा वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः ॥१६॥
*āpo hi ṣṭhā mayobhuvastā na'ūrje dadhātana | mahe raṇāya chakṣase ||14 ||*
*yo vaḥ śivatamo rasastasya bhājayatehanaḥ | uśatīriva mātaraḥ ||15 ||*
*tasmā'araṁ gamāmā vo yasya kṣayāya jinvatha | āpo janayathā cha naḥ ||16 ||*

५. मित्रः (Mitraḥ) - य. (Yv.) ११.५३

मित्रः संसृज्य पृथिवीं भूमिं ज्योतिषा सह ।
सुजातं जातवेदसमयक्ष्माय त्वा संसृजामि प्रजाभ्यः ॥५३॥
*mitraḥ saṁsṛjya pṛthivīṁ bhūmiṁ jyotiṣā saha |*
*sṛjātaṁ jātavedasamayakṣamāya tvā saṁsṛjāmi prajābhyaḥ ||53 ||*

६. रुद्रः (Rudraḥ) - य. (Yv.) ११.५४

रुद्राः संसृज्य पृथिवीं बृहज्ज्योतिः समीधिरे। तेषां भानुरजस्रऽइच्छुक्रो देवेषु रोचते ॥५४॥
*rudrāḥ saṁsṛjya pṛthivīṁ bṛhajjyotiḥ samīdhire |*
*teṣāṁ bhānurajasra'ichchhukro deveṣu rochate ||54 ||*

७. वसुरुद्रादित्य विश्वेदेवाः (Vasurudrāditya Viśvedevāḥ) - य. (Yv.) ११.५८

वसवस्त्वा कृण्वन्तु गायत्रेण च्छन्दसाङ्गिरस्वद्ध्रुवासि पृथिव्यसि धारया मयि प्रजाँ रायस्पोषङ्गौपत्यँ सुवीर्यँ सजातान्यजमानाय रुद्रास्त्वा कृण्वन्तु त्रैष्टुभेन च्छन्दसाङ्गिरस्वद्ध्रुवास्यन्तरिक्षमसि धारया मयि प्रजाँ रायस्पोषङ्गौपत्यँ सुवीर्यँ सजातान्यजमानायादित्यास्त्वा कृण्वन्तु जागतेन च्छन्दसाङ्गिरस्वद्ध्रुवासि द्यौरसि धारया मयि प्रजाँ रायस्पोषङ्गौपत्यँ सुवीर्यँ सजातान्यजमानाय विश्वे त्वा देवा वैश्वानराः कृण्वन्त्वानुष्टुभेन छन्दसाङ्गिरस्वद्ध्रुवासि दिशोसि धारया मयि प्रजाँ रायस्पोषङ्गौपत्यँ सुवीर्यँ सजातान्यजमानाय ॥५८॥
*vasavastvā kṛṇvantu gāyatreṇa chchhandasāṅgirasvaddharuvāsi pṛthivyasi dhārayā mayi prajām̐ rāyaspoṣaṅgaupatyam̐ suvīryam̐ sajātānyajamānāya rudrāstvā kṛṇvantu traiṣṭubhena chchhandasāṅgirasvaddharuvāsyantarikṣamasi dhārayā mayi prajām̐*

*rāyaspoṣaṅgaupatyaṁ suvīryaṁ sajātānyajamānāyādityāstvā kṛṇvantu jāgatena chchhandasāṅgirasvaddharuvāsi dyaurasi dhārayā mayi prajāṁ rāyaspoṣaṅgaupatyaṁ suvīryaṁ sajātānyajamānāya viśve tvā devā vaiśvānarāḥ kṛṇvantvānuṣṭubhena chhandasāṅgirasvaddharuvāsi diśosi dhārayā mayi prajāṁ rāyaspoṣaṅgaupatyaṁ suvīryaṁ sajātānyajamānāya ॥58 ॥*

८. वस्वादयो मन्त्रोक्ताः (Vasvādayo Mantroktāḥ) - य. (Yv.) ११.६०

वसवस्त्वा धूपयन्तु गायत्रेण छन्दसांगिरस्वद् रुद्रास्तवा धूपयन्तु त्रैष्टुभेन छन्दसांगिरस्वदादित्यास्त्वा धूपयन्तु जागतेन छन्दसांगिरस्वद् विश्वे त्वा देवा वैश्वानरा धूपयन्त्वानुष्टुभेन छन्दसांगिरस्वदिन्द्रस्त्वा धूपयतु वरुणस्त्वा धूपयतु विष्णुस्त्वा धूपयतु ॥६० ॥

*vasavastvā dhūpayantu gāyatreṇa chhandasāṁgirasvad rudrāstavā dhūpayantu traiṣṭubhena chhandasāṁgirasvadādityāstvā dhūpayantu jāgatena chhandasāṁgirasvad viśve tvā devā vaiśvānarā dhūpayantvānuṣṭubhena chhandasāṁgirasvadindrastvā dhūpayatu varuṇastvā dhūpayatu viṣṇustvā dhūpayatu ॥60 ॥*

९. वायुः (Vāyuḥ) - य. (Yv.) ११.३९

सं ते वायुर्मातरिश्वा दधातूत्तानाया हृदयं यद्विकस्तम् ।
यो देवानां चरसि प्राणथेन कस्मै देव वषडस्तु तुभ्यम् ॥३९ ॥
*saṁ te vāyurmātariśvā dadhātūttānāyā hṛdayaṁ yadvikastam ।*
*yo devānāṁ charasi prāṇathena kasmai deva vaṣaḍastu tubhyam ॥39 ॥*

१०. सिनीवालीः (Sinīvālīḥ) - य. (Yv.) ११.५५

सं सृष्टां वसुभी रुद्रैर्धीरैः कर्मण्यां मृदम् ।
हस्ताभ्यां मृद्वीं कृत्वा सिनीवाली कृणोतु ताम् ॥५५ ॥
*saṁ sṛṣṭāṁ vasubhī rudrairdhīraiḥ karmaṇyāṁ mṛdam ।*
*hastābhyāṁ mṛdvīṁ kṛtvā sinīvālī kṛṇotu tām ॥55 ॥*

## ७३२. सिन्धुद्वीप आम्बरीष त्रित आप्त्यो वा (साग्री. सास्वा.); सिन्धुद्वीप (सार्षेदी.) (Sindhudvīpa Āmbarīṣa Trita Āptyo Vā [Ssb. Sas.]; Sindhudvīpa [Sad.])

१. अग्निः (Agniḥ) - सा. (Sv.) ३३

शं नो देवीरभिष्टये शं नो भवन्तु पीतये। शं योरभि स्रवन्तु नः ॥१३ ॥
*śaṁ no devīrabhiṣṭaye śaṁ no bhavantu pītaye । śaṁ yorabhi sravantu naḥ ॥13 ॥*

## ७३३. सिन्धुद्वीपः कृतिर वा (Sindhudvīpaḥ Kṛtira Vā)

१. आपः (Āpaḥ) - अ. (Av.) १.४.१-४; १.५.१-४

अ. (Av.) १.४.१-४

अम्बयो यन्त्यध्वभिर्जामयो अध्वरीयताम्। पृंचतीर्मधुना पयः ॥१ ॥
अमूर्या उप सूर्ये याभिर्वा सूर्यः सह। ता नो हिन्वन्त्वध्वरम् ॥२ ॥
अपो देवीरुप ह्वये यत्र गावः पिबन्ति नः। सिन्धुभ्यः कर्त्वं हविः ॥३ ॥
अप्स्व१न्तरमृतमप्सु भेषजम्। अपामुत प्रशस्तिभिरश्वा भवथ वाजिनो गावो भवथ वाजिनीः ॥४ ॥
*ambayo yantyadhvabhirjāmayo adhvarīyatām । pṛṁchatīrmadhunā payaḥ ॥1 ॥*
*amūryā upa sūrye yābhirvā sūryaḥ saha । tā no hinvantvadhvaram ॥2 ॥*
*apo devīrupa hvaye yatra gāvaḥ pibanti naḥ । sindhubhyaḥ kartvaṁ haviḥ ॥3 ॥*
*apsva1ntaramṛtamapsu bheṣajam ।*
*apāmuta praśastibhiraśvā bhavatha vājino gāvo bhavatha vājinīḥ ॥4 ॥*

अ. (Av.) १.५.१-४

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे ॥१ ॥
यो वः शिवतमो भाजयतेह नः। उशतीरिव मातरः ॥२ ॥
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः ॥३ ॥
ईशाना वार्याणां क्षयन्तीश्चर्षणीनाम्। अपो याचामि भेषजम् ॥४ ॥
*āpo hi ṣṭhā mayobhuvastā na ūrje dadhātana । mahe raṇāya chakṣase ॥1 ॥*
*yo vaḥ śivatamo bhājayateha naḥ । uśatīriva mātaraḥ ॥2 ॥*

*tasmā araṁ gamāma vo yasya kṣayāya jinvatha । āpo janayathā cha naḥ ॥3 ॥*
*īśānā vāryāṇāṁ kṣayantīścharṣaṇīnām । apo yāchāmi bheṣajam ॥4 ॥*

## ७३४. सुकक्षः (Sukakṣaḥ)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.७.१-३; २०.४७.१-३; २०.११२.१-३; २०.१३७.१२-१४

अ. (Av.) २०.७.१-३

उद् घेदभि श्रुतामघं वृषभं नर्यापसम्। अस्तारमेषि सूर्य ॥१॥
नव यो नवतिं पुरो बिभेद वाह्वोजसा। अहिं च वृत्रहावधीत् ॥२॥
स न इन्द्रः शिवः सखाश्वावद् गोमद् यवमत्। उरुधारेव दोहते ॥३॥
*ud ghedabhi śrutāmaghaṁ vṛṣabhaṁ naryāpasam । astārameṣi sūrya ॥1 ॥*
*nava yo navatiṁ puro bibheda vāhvojasā । ahiṁ cha vṛtrahāvadhīt ॥2 ॥*
*sa na indraḥ śivaḥ sakhāśvāvad gomad yavamat । urudhāreva dohate ॥3 ॥*

अ. (Av.) २०.४७.१-३

तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे। स वृषा वृषभो भुवत् ॥१॥
इन्द्रः स दामने कृत ओजिष्ठः स मदे हितः। द्युम्नी श्लोकी स सोम्यः ॥२॥
गिरा वज्रो न संभृतः सबलो अनपच्युतः। ववक्ष ऋष्वो अस्तृतः ॥३॥
*tamindraṁ vājayāmasi mahe vṛtrāya hantave । sa vṛṣā vṛṣabho bhuvat ॥1 ॥*
*indraḥ sa dāmane kṛta ojiṣṭhaḥ sa made hitaḥ । dyumnī ślokī sa somyaḥ ॥2 ॥*
*girā vajro na saṁbhṛtaḥ sabalo anapachyutaḥ । vavakṣa ṛṣvo astṛtaḥ ॥3 ॥*

अ. (Av.) २०.११२.१-३

यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य। सर्वं तदिन्द्र ते वशे ॥१॥
यद्वा प्रवृद्ध सत्पते न मरा इति मन्यसे। उतो तत् सत्यमित् तव ॥२॥
ये सोमासः परावति ये अर्वावति सुन्विरे। सर्वांस्ताँ इन्द्र गच्छसि ॥३॥
*yadadya kachcha vṛtrahannudagā abhi sūrya । sarvaṁ tadindra te vaśe ॥1 ॥*
*yadvā pravṛddha satpate na marā iti manyase । uto tat satyamit tava ॥2 ॥*
*ye somāsaḥ parāvati ye arvāvati sunvire । sarvāṁstām̐ indra gachchhasi ॥3 ॥*

अ. (Av.) २०.१३७.१२-१४

तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे। स वृषा वृषभो भुवत् ॥१२॥
इन्द्रः स दामने कृत ओजिष्ठः स मदे हितः। द्युम्नी श्लोकी स सोम्यः ॥१३॥
गिरा वज्रो न संभृतः सबलो अनपच्युतः। ववक्ष ऋष्वो अस्तृतः ॥१४॥
*tamindraṁ vājayāmasi mahe vṛtrāya hantave । sa vṛṣā vṛṣabho bhṛvat ॥12 ॥*
*indraḥ sa dāmane kṛta ojiṣṭhaḥ sa made hitaḥ । dyumnī ślokī sa somyaḥ ॥13 ॥*
*girā vajro na saṁbhṛtaḥ sabalo anapachyutaḥ । vavakṣa ṛṣvo astṛtaḥ ॥14 ॥*

## ७३५. सुकक्ष आंगिरसः (Sukakṣa Āṁgirasaḥ)

१. इन्द्रः (Indraḥ) - सा. (Sv.) १२२२-१२२४; १४५०-१४५२; १५८६; १७१०-१७१२

सा. (Sv.) १२२२-१२२४

तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे। स वृषा वृषभो भुवत् ॥१॥
इन्द्रः स दामने कृत ओजिष्ठः स बले हितः। द्युम्नी श्लोकी स सोम्यः ॥२॥
गिरा वज्रो न सम्भृतः सबलो अनपच्युतः। ववक्ष उग्रो अस्तृतः ॥३॥
*tamindraṁ vājayāmasi mahe vṛtrāya hantave । sa vṛṣā vṛṣabho bhuvat ॥1 ॥*
*indraḥ sa dāmane kṛta ojiṣṭhaḥ sa bale hitaḥ । dyumnī ślokī sa somyaḥ ॥2 ॥*
*girā vajro na sambhṛtaḥ sabalo anapachyutaḥ । vavakṣa ugro astṛtaḥ ॥3 ॥*

सा. (Sv.) १४५०-१४५२

उद्घेदभि श्रुतामघं वृषभं नर्यापसम्। अस्तारमेषि सूर्य ॥१॥
नव यो नवतिं पुरो बिभेद बाह्वोजसा। अहिं च वृत्रहावधीत् ॥२॥
स न इन्द्रः शिवः सखाश्वावद्गोमद्यवमत्। उरुधारेव दोहते ॥३॥
*udghedabhi śrutāmaghaṁ vṛṣabhaṁ naryāpasam । astārameṣi sūrya ॥1 ॥*
*nava yo navatiṁ puro bibheda bāhvojasā । ahiṁ cha vṛtrahāvadhīt ॥2 ॥*

*sa na indraḥ śivaḥ sakhāśvāvadgomadyavamat । urudhāreva dohate ॥3 ॥*

सा. (Sv.) १५८६

योे विश्वा दयते वसु होता मन्द्रो जनानाम्।
मघोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यन्त्वग्नये ॥१ ॥
*yo viśvā dayate vasu hotā mandro janānām ।*
*maghorna pātrā prathamānyasmai pra stomā yantvagnaye ॥1 ॥*

सा. (Sv.) १७१०-१७१२

अग्निः प्रियेषु धामसु कामो भूतस्य भव्यस्य। सम्राडेको विराजति ॥१ ॥
अग्नि प्रत्नेन जन्मना शुम्भानस्तन्वं२ स्वाम्। कविर्विप्रेण वावृधे ॥२ ॥
ऊर्ज्जो नपातमा हुवेऽग्निं पावकशोचिषम्। अस्मिन्यज्ञे स्वध्वरे ॥३ ॥
*agniḥ priyeṣu dhāmasu kāmo bhūtasya bhavyasya । samrāḍeko virājati ॥1 ॥*
*agni pratnena janmanā śumbhānastanvaṁ2 svām । kavirvipreṇa vāvṛdhe ॥2 ॥*
*ūrjjo napātamā huve'gniṁ pāvakaśochiṣam । asminyajñe svadhvare ॥3 ॥*

**७३६. सुकक्ष आंगिरसः (साग्री. सास्वा.); श्रुतकक्षः (ऋसर्व.८.९३.१६ सार्षेदी.) (Sukakṣa Āṁgirasaḥ [Ssb. Sas.]; Śrutakakṣaḥ [Rss.8.93.16 Sad.])**

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.९३.१; ४; सा. (Sv.) २०८

ऋ. (Rv.) ८.९३.१

उद्घेदभि श्रुतामघं वृषभं नर्यापसम्। अस्तारमेषि सूर्य ॥१ ॥
*udghedabhi śrutāmaghaṁ vṛṣabhaṁ naryāpasam । astārameṣi sūrya ॥1 ॥*

ऋ. (Rv.) ८.९३.४

यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य। सर्वं तदिन्द्र ते वशे ॥४ ॥
*yadadya kachcha vṛtrahannudagā abhi sūrya । sarvaṁ tadindra te vaśe ॥4 ॥*

सा. (Sv.) २०८

श्रुतं वो वृत्रहन्तमं प्र शर्धं चर्षणीनाम्। आशिषे राधसे महे ॥५ ॥
*śrutaṁ vo vṛtrahantamaṁ pra śardhaṁ charṣaṇīnām । āśiṣe rādhase mahe ॥5 ॥*

**७३७. सुकक्षः (ऋसर्व.); सुकक्षः (साग्री. ); श्रुतकक्षः (सार्षेदी.) (Sukakṣaḥ [Rss.); Sukakṣaḥ [Ssb.]; Śrutakakṣaḥ [Sad.])**

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.९३.१६

श्रुतं वो वृत्रहन्तमं प्र शर्धं चर्षणीनाम्। आ शुषे राधसे महे ॥१६ ॥
*śrutaṁ vo vṛtrahantamaṁ pra śardhaṁ charṣaṇīnām । ā śuṣe rādhase mahe ॥16 ॥*

**७३८. सुकक्षः (ऋसर्व.); श्रुतकक्ष सुकक्षो वा आंगिरसः (साग्री.); श्रुतकक्षः (सार्षेदी. १५०) (Sukakṣaḥ [Rss.]; Śrutakakṣa Sukakṣo Vā Āṁgirasaḥ [Ssb.]; Śrutakakṣaḥ [Sad. 150])**

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.९३.२३

इष्टा होत्रा असृक्षतेन्द्रं वृधासो अध्वरे। अच्छावभृथमोजसा ॥२३ ॥
*iṣṭā hotrā asṛkṣatendraṁ vṛdhāso adhvare । achchhāvabhṛthamojasā ॥23 ॥*

**७३९. सुकक्षः (ऋसर्व.); श्रुतकक्ष सुकक्षो वा आंगिरसः (साग्री.) (Sukakṣaḥ [Rss.) Śrutakakṣa Sukakṣo Vā Āṁgirasaḥ [Ssb.])**

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.९३.२; ५-२२; २४-३३

ऋ. (Rv.) ८.९३.२

नव यो नवतिं पुरो बिभेद बाह्वोजसा। अहिं च वृत्रहावधीत् ॥२ ॥
*nava yo navatiṁ puro bibheda bāhvojasā । ahiṁ cha vṛtrahāvadhīt ॥2 ॥*

ऋ. (Rv.) ८.९३. ५-२२

यद्वा प्रवृद्ध सत्पते न मरा इति मन्यसे। उतो तत्सत्यमित्तव ॥५ ॥
ये सोमासः परावति ये अर्वावति सुन्विरे। सर्वांस्ताँ इन्द्र गच्छसि ॥६ ॥

तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे। स वृषा वृषभो भुवत् ॥७॥
इन्द्र५ स दामने कृत ओजिष्ठः स मदे हितः। द्युम्नी श्लोकी स सोम्यः ॥८॥
गिरा वज्रो न सम्भृतः सबलो अनपच्युतः। ववक्ष ऋष्वो अस्तृतः ॥९॥
दुर्गे चिन्नः सुगं कृधि गृणान इन्द्र गिर्वणः। त्वं च मघवन् वशः ॥१०॥
यस्य ते नू चिदादिशं न मिनन्ति स्वराज्यम्। न देवो नाध्रिगुर्जनः ॥११॥
अधा ते अप्रतिष्कुतं देवी शुष्मं सपर्यतः। उभे सुशिप्र रोदसी ॥१२॥
त्वमेतदधारयः कृष्णासु रोहिणीषु च। परुष्णीषु रुशत् पयः ॥१३॥
वि यदहेरध त्विषो विश्वे देवासो अक्रमुः। विदन्मृगस्य ताँ अमः ॥१४॥
आदु मे निवरो भुवद्वृत्रहादिष्ट पौंस्यम्। अजातशत्रुरस्तृतः ॥१५॥
श्रुतं वो वृत्रहन्तमं प्र शर्धं चर्षणीनाम्। आ शुषे राधसे महे ॥१६॥
अया धिया च गव्यया पुरुणामन्पुरुष्टुत। यत्सोमेसोम आभावः ॥१७॥
बोधिन्मना इदस्तु नो वृत्रहा भूर्यासुतिः। श्रृणोतु शक्र आशिषम् ॥१८॥
कया त्वन्न ऊत्याभि प्र मन्दसे वृषन्। कया स्तोतृभ्य आ भर ॥१९॥
कस्य वृषा सुते सचा नियुत्वान्वृषभो रणत्। वृत्रहा सोमपीतये ॥२०॥
अभी षु णस्त्वं रयिं मन्दसानः सहस्रिणम्। प्रयन्ता बोधि दाशुषे ॥२१॥
पत्नीवन्तः सुता इम उशन्तो यन्ति वीतये। अपां जग्मिर्निचुम्पुणः ॥२२॥

*yadvā pravṛddha satpate na marā iti manyase | uto tatsatyamittava ||5||*
*ye somāsaḥ parāvati ye arvāvati sunvire | sarvāṁrstāṁ indra gachchhasi ||6||*
*tamindraṁ vājayāmasi mahe vṛtrāya hantave | sa vṛṣā vṛṣabho bhuvat ||7||*
*indra5 sa dāmane kṛta ojiṣṭhaḥ sa made hitaḥ | dyumnī ślokī sa somyaḥ ||8||*
*girā vajro na sambhṛtaḥ sabalo anapachyutaḥ | vavakṣa ṛṣvo astṛtaḥ ||9||*
*durge chinnaḥ sugaṁ kṛdhi gṛṇāna indra girvaṇaḥ | tvaṁ cha maghavan vaśaḥ ||10||*
*yasya te nū chidādiśaṁ na minanti svarājyam | na devo nādhrigurjanaḥ ||11||*
*adhā te apratiṣkutaṁ devī śuṣmaṁ saparyataḥ | ubhe suśipra rodasī ||12||*
*tvametadadhārayaḥ kṛṣṇāsu rohiṇīṣu cha | paruṣṇīṣu ruśat payaḥ ||13||*
*vi yadaheradha tviṣo viśve devāso akramuḥ | vidanmṛgasya tāṁ̐ amaḥ ||14||*
*ādu me nivaro bhuvadvṛtrahādiṣṭa pauṁsyam | ajātaśatrurastṛtaḥ ||15||*
*śrutaṁ vo vṛtrahantamaṁ pra śardhaṁ charṣaṇīnām | ā śuṣe rādhase mahe ||16||*
*ayā dhiyā cha gavyayā puruṇāmanpuruṣṭuta | yatsomesoma ābhāvaḥ ||17||*
*bodhinmanā idastu no vṛtrahā bhūryāsutiḥ | śṛṇotu śakra āśiṣam ||18||*
*kayā tvanna ūtyābhi pra mandase vṛṣan | kayā stotṛbhya ā bhara ||19||*
*kasya vṛṣā sute sachā niyutvānvṛṣabho raṇat | vṛtrahā somapītaye ||20||*
*abhī ṣu ṇastvaṁ rayiṁ mandasānaḥ sahasriṇam | prayantā bodhi dāśuṣe ||21||*
*patnīvantaḥ sutā ima uśanto yanti vītaye | apāṁ jagnirnichumpuṇaḥ ||22||*

ऋ. (Rv.) ८.९३.२४-३३

इह त्या सधमाद्या हरी हिरण्यकेश्या। वोळ्हामभि प्रयो हितम् ॥२४॥
तुभ्यं सोमाः सुता इमे स्तीर्णं बर्हिर्विभावसो। स्तोतृभ्य इन्द्रमा वह ॥२५॥
आ ते दक्षं वि रोचना दधद्रत्ना वि दाशुषे। स्तोतृभ्य इन्द्रमर्चत ॥२६॥
आ ते दधामीन्द्रियमुक्था विश्वा शतक्रतो। स्तोतृभ्य इन्द्र मृळय ॥२७॥
भद्रम्भद्रं न आ भरेषमूर्जं शतक्रतो। यदिन्द्र मृळयासि नः ॥२८॥
स नो विश्वान्या भर सुवितानि शतक्रतो। यदिन्द्र मृळयासि नः ॥२९॥
त्वामिद्वृत्रहन्तम सुतावन्तो हवामहे। यदिन्द्र मृळयामि नः ॥३०॥
उप नो हरिभिः सुतं याहि मदानां पते। उप नो हरिभिः सुतम् ॥३१॥
द्विता यो वृत्रहन्तमो विद इन्द्रः शतक्रतुः। उप नो हरिभिः सुतम् ॥३२॥
त्वं हि वृत्रहन्नेषां पाता सोमानामसि। उप नो हरिभिः सुतम् ॥३३॥

*iha tyā sadhamādyā harī hiraṇyakeśyā | voḷhāmabhi prayo hitam ||24||*
*tubhyaṁ somāḥ sutā ime stīrṇaṁ barhirvibhāvaso | stotṛbhya indramā vaha ||25||*
*ā te dakṣaṁ vi rochanā dadhadratnā vi dāśuṣe | stotṛbhya indramarchata ||26||*
*ā te dadhāmīndriyamukthā viśvā śatakrato | stotṛbhya indra mṛḷaya ||27||*
*bhadrambhadraṁ na ā bhareṣamūrjaṁ śatakrato | yadindra mṛḷayāsi naḥ ||28||*

*sa no viśvānyā bhara suvitāni śatakrato । yadindra mṛḷayāsi naḥ ॥29 ॥*
*tvāmidvṛtrahantama sutāvanto havāmahe । yadindra mṛḷayāmi naḥ ॥30 ॥*
*upa no haribhiḥ sutaṁ yāhi madānāṁ pate । upa no haribhiḥ sutam ॥31 ॥*
*dvitā yo vṛtrahantamo vida indraḥ śatakratuḥ । upa no haribhiḥ sutam ॥32 ॥*
*tvaṁ hi vṛtrahanneṣāṁ pātā somānāmasi । upa no haribhiḥ sutam ॥33 ॥*

२. इन्द्रो ऋभवश्च - ऋ. (Rv.) ८.९३.३४

इन्द्र इषे ददातु न ऋभुक्षणमृभुं रयिम्। वाजी ददातु वाजिनम् ॥३४॥
*indra iṣe dadātu na ṛbhukṣaṇamṛbhuṁ rayim । vājī dadātu vājinam ॥34 ॥*

## ७४०. सुकक्ष श्रुतकक्षौ (साग्री. सास्वा.); श्रुतकक्षः (सार्षेदी.) (Sukakṣa Śrutakakṣau [Ssb. Sas.]; Śrutakakṣaḥ [Sad.])

१. इन्द्रः (Indraḥ) - सा. (Sv.) १२५-१२६

उद्घेदभि श्रुतामघं वृषभं नर्यापसम्। अस्तारमेषि सूर्य ॥१॥
यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य। सर्वं तदिन्द्र ते वशे ॥२॥
*udghedabhi śrutāmaghaṁ vṛṣabhaṁ naryāpasam । astārameṣi sūrya ॥1 ॥*
*yadadya kachcha vṛtrahannudagā abhi sūrya । sarvaṁ tadindra te vaśe ॥2 ॥*

## ७४१. सुकीर्तिः (Sukīrtiḥ)

१. अश्विनौ (Aśvinau) - अ. (Av.) २०.१२५.४-५

युवं सुराममश्विना नमुचावासुरे सचा ।
विपिपाना शुभस्पती इन्द्रं कर्मस्वावतम् ॥४॥
पुत्रमिव पितरावश्विनोभेन्द्रावथुः काव्यैर्दंसनाभिः ।
यत् सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णक् ॥५॥
*yuvaṁ surāmamaśvinā namuchāvāsure sachā ।*
*vipipānā śubhaspatī indraṁ karmasvāvatam ॥4 ॥*
*putramiva pitarāvaśvinobhendrāvathuḥ kāvyairdaṁsanābhiḥ ।*
*yat surāmaṁ vyapibaḥ śachībhiḥ sarasvatī tvā maghavannabhiṣṇak ॥5 ॥*

२. इन्द्रः (Indraḥ) - अ. (Av.) २०.१२५.१-३; ६-७

अ. (Av.) २०.१२५.१-३

अपेन्द्र प्राचो मघवन्नमित्रानपापाचो अभिभूते नुदस्व ।
अपोदीचो अप शूराधराच उरौ यथा तवं शर्मन् मदेम ॥१॥
कुविदंग यवमन्तो यवं चिद् यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमोवृक्तिं न जग्मुः ॥२॥
नहि स्थूर्यृतुथा यातमस्ति नोत श्रवो विविदे संगमेषु ।
गव्यन्त इन्द्रं सख्याय विप्रा अश्वायन्तो वृषणं वाजयन्तः ॥३॥
*apendra prācho maghannamitrānapāpācho abhibhūte nudasva ।*
*apodīcho apa śūrādharācha urau yathā tavaṁ śarman madema ॥1 ॥*
*kuvidaṁga yavamanto yavaṁ chid yathā dāntyanupūrvaṁ viyūya ।*
*ihehaiṣāṁ kṛṇuhi bhojanāni ye barhiṣo namovṛktiṁ na jagmuḥ ॥2 ॥*
*nahi sthūryṛtuthā yātamasti nota śravo vivide saṁgameṣu ।*
*gavyanta indraṁ sakhyāya viprā aśvāyanto vṛṣaṇaṁ vājayantaḥ ॥3 ॥*

अ. (Av.) २०.१२५.६-७

इन्द्रः सुत्रामा स्ववाँ अवोभिः सुमृडीको भवतु विश्ववेदाः ।
बाधतां द्वेषो अभयं नः कृणोतु सुवीर्यस्य पतयः स्याम ॥६॥
स सुत्रामा स्ववाँ इन्द्रो अस्मदाराच्चिद् द्वेषः सनुतर्युयोतु ।
तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ॥७॥
*indraḥ sutrāmā svavāṁ̐ avobhiḥ sumṛḍīko bhavatu viśvavedāḥ ।*
*bādhatāṁ dveṣo abhayaṁ naḥ kṛṇotu suvīryasya patayaḥ syāma ॥6 ॥*
*sa sutrāmā svavāṁ̐ indro asmadārāchchid dveṣaḥ sanutaryuyotu ।*
*tasya vayaṁ sumatau yajñiyasyāpi bhadre saumanase syāma ॥7 ॥*

## ७४२. सुकीर्ति काक्षीवतः (Sukīrti Kākṣīvataḥ)

१. अश्विनौ (Aśvinau) - ऋ. (Rv.) १०.१३१.४; ५

युवं सुराममश्विना नमुचावासुरे सचा ।
विपिपाना शुभस्पती इन्द्रं कर्मस्वावतम् ॥४॥
पुत्रमिव पितरावश्विनोभेन्द्रावथुः काव्यैर्दंसनाभिः ।
यत्सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णक् ॥५॥
*yuvaṁ surāmamaśvinā namuchāvāsure sachā /*
*vipipānā śubhaspatī indraṁ karmasvāvatam //4 //*
*putramiva pitarāvaśvinobhendrāvathuḥ kāvyairdaṁsanābhiḥ /*
*yatsurāmaṁ vyapibaḥ śachībhiḥ sarasvatī tvā maghavannabhiṣṇak //5 //*

२. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.१३१.१-३; ६; ७

ऋ. (Rv.) १०.१३१.१-३

अप प्राच इन्द्र विश्वाँ अमित्रानपापाचो अभिभूते नुदस्व ।
अपोदीचो अप शूराधराच उरौ यथा तव शर्मन्मदेम ॥१॥
कुविदंग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमोवृत्तिं न जग्मुः ॥२॥
नाहि स्थूर्यृतुथा यातमस्ति नोत श्रवो विविदे संगमेषु ।
गव्यन्त इन्द्रं सख्याय विप्रा अश्वायन्तो वृषणं वाजयन्तः ॥३॥
*apa prācha indra viśvām̐ amitrānapāpācho abhibhūte nudasva /*
*apodīcho apa śūrādharācha urau yathā tava śarmanmadema //1 //*
*kuvidaṁga yavamanto yavaṁ chidyathā dāntyanupūrvaṁ viyūya /*
*ihehaiṣāṁ kṛṇuhi bhojanāni ye barhiṣo namovṛttiṁ na jagmuḥ //2 //*
*nāhi sthūryṛtuthā yātamasti nota śravo vivide saṁgameṣu /*
*gavyanta indraṁ sakhyāya viprā aśvāyanto vṛṣaṇaṁ vājayantaḥ //3 //*

ऋ. (Rv.) १०.१३१.६-७

इन्द्रः सुत्रामा स्ववाँ अवोभिः सुमृळीको भवतु विश्ववेदाः ।
बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम ॥६॥
तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ।
स सुत्रासा स्ववाँ इन्द्रो अस्मे आराच्चिद् द्वेषः सनुतर्युयोतु ॥७॥
*indraḥ sutrāmā svavām̐ avobhiḥ sumṛḷīko bhavatu viśvavedāḥ /*
*bādhatāṁ dveṣo abhayaṁ kṛṇotu suvīryasya patayaḥ syāma //6 //*
*tasya vayaṁ sumatau yajñiyasyāpi bhadre saumanase syāma /*
*sa sutrāsā svavām̐ indro asme ārāchchid dveṣaḥ sanutaryuyotu //7 //*

## ७४३. सुचीकः (Suchīkaḥ)

१. इन्द्रः (Indraḥ) - य. (Yv.) ३३.२३

प्र वो महे मन्दमानायान्धसोऽर्चाविश्वानराय विश्वाभुवे ।
इन्द्रस्य यस्य सुमखं सहो महि श्रवो नृम्णं च रोदसी सपर्य्यतः ॥२३॥
*pra vo mahe mandamānāyāndhaso'rchāviśvānarāya viśvābhuve /*
*indrasya yasya sumakhaṁ saho mahi śravo nṛmṇaṁ cha rodasī saparyyataḥ //23 //*

२. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.) ३५.१०

अश्मन्वती रीयते सं रभध्वमुत्तिष्ठत प्र तरता सखायः ।
अत्रा जहीमाऽशिवा येऽअसिंछवान्वयमुत्तरेमाभि वाजान् ॥१०॥
*aśmanvatī rīyate saṁ rabhadhvamuttiṣṭhata pra taratā sakhāyaḥ /*
*atrā jahīmā'śivā ye'asiṁchhavānvayamuttaremābhi vājān //10 //*

## ७४४. सुतकक्षः सुकक्षो वा (Sutakakṣaḥ Sukakṣo Vā)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०-६०.१-३

एवा ह्यसि वीरयुरेवा शूर उत स्थिरः। एवा ते राध्यं मनः ॥१॥
एवा रातिस्तुवीमघ विश्वेभिर्धायि धातृभिः। अधा चिदिन्द्र मे सचा ॥२॥
मो षु ब्रह्मेव तन्दुयुर्भुवो वाजानां पते। मत्स्वा सुतस्य गोमतः ॥३॥
*evā hyasi vīrayurevā śūra uta sthiraḥ । evā te rādhyaṁ manaḥ ॥1॥*
*evā rātistuvīmagha viśvebhirdhāyi dhātṛbhiḥ । adhā chidindra me sachā ॥2॥*
*mo ṣu brahmeva tanduyurbhuvo vājānāṁ pate । matsvā sutasya gomataḥ ॥3॥*

## ७४५. सुतम्भरः (Sutambharaḥ)

१. अग्निः (Agniḥ) - य. (Yv.) २२.१५

अग्निं स्तोमेन बोधय समिधानोऽअमर्त्यम्। हव्या देवेषु नो दधत् ॥१५॥
*agniṁ stomena bodhaya samidhāno'amartyam । havyā deveṣu no dadhat ॥15॥*

## ७४६. सुतम्भर आत्रेयः (Sutambhara Ātreyaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ५.११.१-६; ५.१२.१-६; ५.१३.१-६; ५.१४.१-६; सा. (Sv.) ९०७-९०९; १४०५-१४०७

ऋ. (Rv.) ५.११.१-६

जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे ।
घृतप्रतीको बृहता दिविस्पृशा द्युमद्वि भाति भरतेभ्यः शुचिः ॥१॥
यज्ञस्य केतुं प्रथमं पुरोहिमग्निं नरस्त्रिषधस्थे समीधिरे ।
इन्द्रेण देवैः सरथं स बर्हिषि सीदन्नि होता यजथाय सुक्रतुः ॥२॥
असंमृष्टो जायसे मात्रोः शुचिर्मन्द्रः कविरुदतिष्ठो विवस्वतः ।
घृतेन त्वावर्धयन्नग्न आहुत धूमस्ते केतुरभवद्दिवि श्रितः ॥३॥
अग्निर्नो यज्ञमुप वेतु साधुयाग्निं नरो वि भरन्ते गृहेगृहे ।
अग्निर्दूतो अभवद्धव्यवाहनोऽग्निं वृणाना वृणते कविक्रतुम् ॥४॥
तुभ्येदमग्ने मधुमत्तमं वचस्तुभ्यं मनीषा इयमस्तु शं हृदे ।
त्वां गिरः सिन्धुमिवावनीर्महीरा पृणन्ति शवसा वर्धयन्ति च ॥५॥
त्वामग्ने अंगिरसो गुहा हितमन्वविन्दिंछश्रियाणं वनेवने ।
स जायसे मथ्यमानः सहो महत्त्वामाहुः सहसस्पुत्रमंगिरः ॥६॥
*janasya gopā ajaniṣṭa jāgṛviragniḥ sudakṣaḥ suvitāya navyase ।*
*ghṛtapratīko bṛhatā divispṛśā dyumadvi bhāti bharatebhyaḥ śuchiḥ ॥1॥*
*yajñasya ketuṁ prathamaṁ purohimagiṁna narastriṣadhasthe samīdhire ।*
*indreṇa devaiḥ sarathaṁ sa barhiṣi sīdanni hotā yajathāya sukratuḥ ॥2॥*
*asaṁmṛṣṭo jāyase mātroḥ śuchirmandraḥ kavirudatiṣṭho vivasvataḥ ।*
*ghṛtena tvāvardhayannagna āhuta dhūmaste keturabhavaddivi śritaḥ ॥3॥*
*agnirno yajñamupa vetu sādhuyāgiṁna naro vi bharante gṛhegṛhe ।*
*agnirdūto abhavaddhavyavāhano'giṁna vṛṇānā vṛṇate kavikratum ॥4॥*
*tubhyedamagne madhumattamaṁ vachastubhyaṁ manīṣā iyamastu śaṁ hṛde ।*
*tvāṁ giraḥ sindhumivāvanīrmahīrā pṛṇanti śavasā vardhayanti cha ॥5॥*
*tvāmagne aṁgiraso guhā hitamanvavindiṁchhaśriyāṇaṁ vanevane ।*
*sa jāyase mathyamānaḥ saho mahattvāmāhuḥ sahasasputramaṁgiraḥ ॥6॥*

ऋ. (Rv.) ५.१२.१-६

प्राग्नये बृहते यज्ञियाय ऋतस्य वृष्णे असुराय मन्म ।
घृतं न यज्ञ आस्ये३ सुपूतं गिरं भरे वृषभाय प्रतीचीम् ॥१॥
ऋतं चिकित्व ऋतमिच्चिकिद्ध्यृतस्य धारा अनु तृन्धि पूर्वीः ।
नाहं यातुं सहसा न द्वयेन ऋतं सपाम्यरुषस्य वृष्णः ॥२॥
कया नो अग्न ऋतयन्नृतेन भुवो नवेदा उचथस्य नव्यः ।
वेदा मे देव ऋतुपा ऋतूनां नाहं पतिं सनितुरस्य रायः ॥३॥
के ते अग्ने रिपवे बन्धनासः के पायवः सनिषन्त द्युमन्तः ।
के धासिमग्ने अनृतस्य पान्ति क आसतो वचसः सन्ति गोपाः ॥४॥

सखायस्ते विषुणा अग्न एते शिवासः सन्तो अशिवा अभूवन् ।
अधेर्षत स्वयमेते वचोभिरृजूयते वृजिनानि ब्रुवन्तः ॥५॥
यस्ते अग्ने नमसा यज्ञमीट्ट ऋतं स पात्यरुषस्य वृष्णः ।
तस्य क्षयः पृथुरा साधुरेतु प्रसर्स्राणस्य नहुषस्य शेषः ॥६॥
*prāgnaye bṛhate yajñiyāya ṛtasya vṛṣṇe asurāya manma /*
*ghṛtaṁ na yajña āsye3 supūtaṁ giraṁ bhare vṛṣabhāya pratīchīm //1 //*
*ṛtaṁ chikitva ṛtamichchikiddhyṛtasya dhārā anu tṛndhi pūrvīḥ /*
*nāhaṁ yātuṁ sahasā na dvayena ṛtaṁ sapāmyaruṣasya vṛṣṇaḥ //2 //*
*kayā no agna ṛtayannṛtena bhuvo navedā uchathasya navyaḥ /*
*vedā me deva ṛtupā ṛtūnāṁ nāhaṁ patiṁ saniturasya rāyaḥ //3 //*
*ke te agne ripave bandhanāsaḥ ke pāyavaḥ saniṣanta dyumantaḥ /*
*ke dhāsimagne anṛtasya pānti ka āsato vachasaḥ santi gopāḥ //4 //*
*sakhāyaste viṣuṇā agna ete śivāsaḥ santo aśivā abhūvan /*
*adherṣata svayamete vachobhirṛjūyate vṛjināni bruvantaḥ //5 //*
*yaste agne namasā yajñamīṭṭa ṛtaṁ sa pātyaruṣasya vṛṣṇaḥ /*
*tasya kṣayaḥ pṛthurā sādhuretu prasarsrāṇasya nahuṣasya śeṣaḥ //6 //*

ऋ. (Rv.) ५.१३.१-६

अर्चन्तस्त्वा हवामहेऽर्चन्तः समिधीमहि। अग्नि अर्चन्त ऊतये ॥१॥
अग्नेः स्तोमं मनामहे सिध्रमद्य दिविस्पृशः। देवस्य द्रविणस्यवः ॥२॥
अग्निर्जुषत नो गिरो होता यो मानुषेष्वा। स यक्षद्दैव्यं जनम् ॥३॥
त्वमग्ने सप्रथा असि जुष्टो होता वरेण्यः। त्वया यज्ञं वि तन्वते ॥४॥
त्वामग्ने वाजसातमं विप्रा वर्धन्ति सुष्टुतम्। स नो रास्व सुवीर्यम् ॥५॥
अग्ने नेमिरराँ इव देवाँस्त्वं परिभूरसि। आ राधश्चित्रमृंजसे ॥६॥
*archantastvā havāmahe'rchantaḥ samidhīmahi / agni archanta ūtaye //1 //*
*agneḥ stomaṁ manāmahe sidhramadya divispṛśaḥ / devasya draviṇasyavaḥ //2 //*
*agnirjuṣata no giro hotā yo mānuṣeṣvā / sa yakṣaddaivyaṁ janam //3 //*
*tvamagne saprathā asi juṣṭo hotā vareṇyaḥ / tvayā yajñaṁ vi tanvate //4 //*
*tvāmagne vājasātamaṁ viprā vardhanti suṣṭutam / sa no rāsva suvīryam //5 //*
*agne nemirarām̐ iva devām̐stvaṁ paribhūrasi / ā rādhaśchitramṛṁjase //6 //*

ऋ. (Rv.) ५.१४.१-६

अग्निं स्तोमेन बोधय समिधानो अमर्त्यम्। हव्या देवेषु नो दधत् ॥१॥
तमध्वरेष्वीळते देवं मर्ता अमर्त्यम्। यजिष्ठं मानुषे जने ॥२॥
तं हि शश्वन्त ईळते स्रुचा देवं घृतश्चुता। अग्निं हव्याय वोळहवे ॥३॥
अग्निर्जातो अरोचत घ्नन्दस्यूंज्योतिषा तमः। अविन्दद् गा अपः स्वः ॥४॥
अग्निमीळेन्यं कविं घृतपृष्ठं सपर्यत। वेतु मे शृणवद्धवम् ॥५॥
अग्निं घृतेन वावृधुः स्तोमेभिर्विश्वचर्षणिम्। स्वाधीभिवर्चस्युभिः ॥६॥
*agiṁna stomena bodhaya samidhāno amartyam / havyā deveṣu no dadhat //1 //*
*tamadhvareṣvīḻate devaṁ martā amartyam / yajiṣṭhaṁ mānuṣe jane //2 //*
*taṁ hi śaśvanta īḻate sruchā devaṁ ghṛtaśchutā / agiṁna havyāya voḻahave //3 //*
*agnirjāto arochata ghnandasyūṁjyotiṣā tamaḥ / avindad gā apaḥ svaḥ //4 //*
*agnimīḻenyaṁ kaviṁ ghṛtapṛṣṭhaṁ saparyata / vetu me śṛṇavaddhavam //5 //*
*agiṁna ghṛtena vāvṛdhuḥ stomebhirviśvacharṣaṇim / svādhībhivarchasyubhiḥ //6 //*

सा. (Sv.) ९०७-९०९

जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे ।
घृतप्रतीको बृहता दिविस्पृशा द्युमद्वि भाति भरतेभ्यः शुचिः ॥१॥
त्वामग्ने अंगिरसो गुहा हितमन्वविन्दिंछश्रियाणं वनेवने ।
स जायसे मथ्यमानः सहो महत्त्वामाहुः सहसस्पुत्रमंगिरः ॥२॥
यज्ञस्य केतुं प्रथमं पुरोहितमग्निं नरस्त्रिषधस्थे समिन्धते ।
इन्द्रेण देवैः सरथं स बर्हिषि सीदन्नि होता यजथाय सुक्रतुः ॥३॥
*janasya gopā ajaniṣṭa jāgṛviragniḥ sudakṣaḥ suvitāya navyase /*

*ghṛtapratīko bṛhatā divispṛśā dyumadvi bhāti bharatebhyaḥ śuchiḥ ॥1 ॥*
*tvāmagne aṁgiraso guhā hitamanvavindiṁchhaśriyāṇaṁ vanevane ।*
*sa jāyase mathyamānaḥ saho mahattvāmāhuḥ sahasasputramaṁgiraḥ ॥2 ॥*
*yajñasya ketuṁ prathamaṁ purohitamagniṁ narastriṣadhasthe samindhate ।*
*indreṇa devaiḥ sarathaṁ sa barhiṣi sīdanni hotā yajathāya sukratuḥ ॥3 ॥*

सा. (Sv.) १४०५-१४०७

अग्ने स्तोमं मनामहे सिद्धमद्य दिविस्पृशः । देवस्य द्रविणस्यवः ॥१ ॥
अग्निर्जुषत नो गिरो होता यो मानुषेष्वा । स यक्षद्दैव्यं जनम् ॥२ ॥
त्वमग्ने सप्रथा असि जुष्टो होता वरेण्यः । त्वया यज्ञं वि तन्वते ॥३ ॥
*agne stomaṁ manāmahe siddhamadya divispṛśaḥ । devasya draviṇasyavaḥ ॥1 ॥*
*agnirjuṣata no giro hotā yo mānuṣeṣvā । sa yakṣaddaivyaṁ janam ॥2 ॥*
*tvamagne saprathā asi juṣṭo hotā vareṇyaḥ । tvayā yajñaṁ vi tanvate ॥3 ॥*

## ७४७. सुतजेता मधुच्छन्दा - द्र. मधुच्छन्दा (Sutajetā Madhuchchhandā - See Madhuchchhandā)

## ७४८. सुदा (Sudā)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.९५.२-४

प्रो ष्वस्मै पुरोरथमिन्द्राय शूषमर्चत। अभीके चिदु लोककृत् संगे समत्सु वृत्रहास्माकं बोधि चोदिता नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥२ ॥
त्वं सिन्धूँरवासृजोऽधराचो अहन्नहिम् । अशत्रुरिन्द्र जज्ञिषे विश्वं पुष्यसि वार्यं तं त्वा परि ष्वजामहे नभन्तामन्यकेषां ज्योा अधि धन्वसु ॥३ ॥
वि षु विश्वा अरातयोऽर्यो नशन्त नो धियः । अस्तासि शत्रवे वधं यो न इन्द्र जिघांसति या ते रातिर्ददिर्वसु नभन्तामन्यकेषां ज्योा अधि धन्वसु ॥४ ॥
*pro ṣvasmai purorathamindrāya śūṣamarchata । abhīke chidu lokakṛt saṁge samatsu vṛtrahāsmākaṁ bodhi choditā nabhantāmanyakeṣāṁ jyākā adhi dhanvasu ॥2 ॥*
*tvaṁ sindhūm̐ravāsṛjo'dharācho ahannahim । aśatrurindra jajñiṣe viśvaṁ puṣyasi vāryaṁ taṁ tvā pari ṣvajāmahe nabhantāmanyakeṣāṁ jyoā adhi dhanvasu ॥3 ॥*
*vi ṣu viśvā arātayo'ryo naśanta no dhiyaḥ । astāsi śatrave vadhaṁ yo na indra jighāṁsati yā te rātirdadirvasu nabhantāmanyakeṣāṁ jyoā adhi dhanvasu ॥4 ॥*

## ७४९. सुदा पैजवनः (Sudā Paijavanaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.१३३.१-७

प्रो ष्वस्मै पुरोरथमिन्द्राय शूषमर्चत । अभीके चिदु लोककृत्संगे समत्सु वृत्रहास्माकं बोधि चोदिता नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥१ ॥
त्वं सिन्धूँरवासृजोऽधराचो अहन्नहिम् । अशत्रुरिन्द्र जज्ञिषे विश्वं पुष्यसि वार्यं तं त्वा परि ष्वजामहे नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥२ ॥
वि षु विश्वा अरातयोऽर्यो नशन्त नो धियः । अस्तासि शत्रवे वधं यो न इन्द्र जिघांसति या ते रातिर्ददिर्वसु नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥३ ॥
यो न इन्द्राभितो जनो वृकायुरादिदेशति । अधस्पदं तमीँकृधि विबाधो असि सासहिर्नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥४ ॥
यो न इन्द्राभिदासति सनाभिर्यश्च निष्ट्यः ।
अव तस्य बलं तिर महीव द्यौरध त्मना नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥५ ॥
वयमिन्द्र त्वायवः सखित्वमा रभामहे ।
ऋतस्य नः पथा नयाति विश्वानि दुरिता नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥६ ॥
अस्मभ्यं सु त्वमिन्द्र तां शिक्ष या दोहते प्रति वरं जरित्रे ।
अच्छिद्रोध्नी पीपयद्यथा नः सहस्रधारा पयसा मही गौः ॥७ ॥
*pro ṣvasmai purorathamindrāya śūṣamarchata । abhīke chidu lokakṛtsaṁge samatsu vṛtrahāsmākaṁ bodhi choditā nabhantāmanyakeṣāṁ jyākā adhi dhanvasu ॥1 ॥*
*tvaṁ sindhūm̐ravāsṛjo'dharācho ahannahim । aśatrurindra jajñiṣe viśvaṁ puṣyasi vāryaṁ taṁ tvā pari ṣvajāmahe nabhantāmanyakeṣāṁ jyākā adhi dhanvasu ॥2 ॥*
*vi ṣu viśvā arātayo'ryo naśanta no dhiyaḥ । astāsi śatrave vadhaṁ yo na indra jighāṁsati*

*yā te rātirdadirvasu nabhantāmanyakeṣāṁ jyākā adhi dhanvasu ॥3॥*
*yeā na indrābhito jano vṛkāyurādideśati । adhaspadaṁ tamīm̐kṛdhi vibādho asi*
*sāsahirnabhantāmanyakeṣāṁ jyākā adhi dhanvasu ॥4॥*
*yo na indrābhidāsati sanābhiryaścha niṣṭyaḥ ।*
*ava tasya balaṁ tira mahīva dyauradha tmanā nabhantāmanyakeṣāṁ jyākā adhi dhanvasu ॥5॥*
*vayamindra tvāyavaḥ sakhitvamā rabhāmahe ।*
*ṛtasya naḥ pathā nayāti viśvāni duritā nabhantāmanyakeṣāṁ jyākā adhi dhanvasu ॥6॥*
*asmabhyaṁ su tvamindra tāṁ śikṣa yā dohate prati varaṁ jaritre ।*
*achchhidrodhnī pīpayadyathā naḥ sahasradhārā payasā mahī gauḥ ॥7॥*

## ७५०. सुदासः पैजवनः (Sudāsaḥ Paijavanaḥ)

१. इन्द्रः (Indraḥ) - सा. (Sv.) १८०१-१८०३

प्रो ष्वस्मै पुरोरथमिन्द्राय शूषमर्चत । अभीके चिदु लोककृत्संगे समत्सु वृत्रहा ।
अस्माक बोधि चोदिता नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥१॥
त्वं सिंधूं रवासृजोऽधराचो अहन्नहिम् । अशत्रुरिन्द्र जज्ञिषे विश्वं पुष्यसि वार्यम् ।
तं त्वा परि ष्वजामहे नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥२॥
वि षु विश्वा अरातयोऽर्या नशन्त नो धियः । अस्तासि शत्रवे वधं यो न इन्द्र जिघांसति ।
या ते रातिर्ददिर्वसु नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥३॥
*pro ṣvasmai purorathamindrāya śūṣamarchata ।*
*abhīke chidu lokakṛtsaṁge samatsu vṛtrahā ।*
*asmāka bodhi choditā nabhantāmanyakeṣāṁ jyākā adhi dhanvasu ॥1॥*
*tvaṁ siṁdhūṁ ravāsṛjo'dharācho ahannahim । aśatrurindra jajñiṣe viśvaṁ puṣyasi vāryam ।*
*taṁ tvā pari ṣvajāmahe nabhantāmanyakeṣāṁ jyākā adhi dhanvasu ॥2॥*
*vi ṣu viśvā arātayo'ryā naśanta no dhiyaḥ । astāsi śatrave vadhaṁ yo na indra jighāṁsati ।*
*yā te rātirdadirvasu nabhantāmanyakeṣāṁ jyākā adhi dhanvasu ॥3॥*

## ७५१. सुदीति-पुरुमीढौ (Sudīti-Purumīḍhau)

१. अग्निः (Agniḥ) - अ. (Av.) २०.१०३.१

अग्निमीडिष्वावसे गाथाभिः शीरशोचिषम्।
अग्ंिन राये पुरुमीळह श्रुतं नरोऽगिंन सुदीतये छर्दिः ॥१॥
*agnimīḍiṣvāvase gāthābhiḥ śīraśochiṣam ।*
*agiṁna rāye purumīḷaha śrutaṁ naro'giṁna sudītaye chhardiḥ ॥1॥*

## ७५२. सुदीति-पुरुमीळहौ आंगिरसौ (Sudīti-Purumīḷahau Āṁgirasau)

१. अग्निः (Agniḥ) - सा १५५४-१५५५

अच्छा नः शीरशोचिषं गिरो यन्तु दर्शतम् ।
अच्छा यज्ञासो नमसा पुरूवसुं पुरुप्रशस्तमूतये ॥१॥
अग्निं सूनुं सहसो जातवेदसं दानाय वार्याणाम् ।
द्विता यो भूदमृतो मर्त्येष्वा होता मन्द्रतमो विशि ॥२॥
*achchhā naḥ śīraśochiṣaṁ giro yantu darśatam ।*
*achchhā yajñāso namasā purūvasuṁ purupraśastamūtaye ॥1॥*
*agniṁ sūnuṁ sahaso jātavedasaṁ dānāya vāryāṇām ।*
*dvitā yo bhūdamṛto martyeṣvā hotā mandratamo viśi ॥2॥*

## ७५३. सुदीति पुरुमीळौ आंगिरसौ (साग्री. सास्वा.); सुदीति पुरुमीढो वा (सार्षेदी.) (Sudīti Purumīḷau Āṁgirasau [Ssb. Sas.]; Sudīti Purumīḍho Vā [Sad.])

१. अग्निः (Agniḥ) - सा. (Sv.) ४९

अग्निमीडिष्वावसे गाथाभिः शीरशोचिषम्। अग्निं राये श्रुतं नरोऽगिनः सुदीतये छर्दिः ॥५॥
*agnimīḍiṣvāvase gāthābhiḥ śīraśochiṣam ।*
*agniṁ rāye śrutaṁ naro'ginaḥ sudītaye chhardiḥ ॥5॥*

**७५४. सुदीति पुरुमीढौ आंगिरसौ तयोर्वान्यतरः (साग्री. सास्वा.); सुदीतिः (सार्षेदी.) (Sudīti Purumīḍhau Āṁgirasau Tayorvānyataraḥ [Ssb. Sas.]; Sudītiḥ [Sad.])**

१. अग्निः (Agniḥ) - सा. (Sv.) ६

त्वं नो अग्ने महोभिः पाहि विश्वस्या अरातेः । उत द्विषो मर्त्यस्य ॥६॥
*tvaṁ no agne mahobhiḥ pāhi viśvasyā arāteḥ । uta dviṣo martyasya ॥6॥*

**७५५. सुदिति पुरुमीळ्हौ तयोर्वा अन्यतरः (Suditi and Purumīḷaha or any one of them)**

१. अग्निः (Agniḥ) - ऋ. (Rv.) ८.७१.१-१५

त्वं नो अग्ने महोभिः पाहि विश्वस्या अरातेः । उत द्विषो मर्त्यस्य ॥१॥
नहि मन्युः पौरुषेय ईशे हि वः प्रियजात । त्वमिदसि क्षपावान् ॥२॥
स नो विश्वेभिर्देवेभिरूर्जो नपाद्भद्रशोचे । रयिं देहि विश्ववारम् ॥३॥
न तमग्ने अरातयो मर्तं युवन्त रायः । यं त्रायसे दाश्वांसम् ॥४॥
यं त्वं विप्र मेधसातावग्ने हिनोषि धनाय । स तवोती गोषु गन्ता ॥५॥
त्वं रयिं पुरुवीरमग्ने दाशुषे मर्ताय । प्र णो नय वस्यो अच्छ ॥६॥
अरुष्या णो मा परा दा अघायते जातवेदः । दुराध्ये३ मर्ताय ॥७॥
अग्ने माकिष्टे देवस्य रातिमदेवो युयोत । त्वमीशिषे वसूनाम् ॥८॥
स नो वस्व उप मास्यूर्जो नपान्माहिमस्य । सखे वसो जरितृभ्यः ॥९॥
अच्छा नः शीरशोचिषं गिरो यन्तु दर्शतम् ।
अच्छा यज्ञासो नमसा पुरूवसुं पुरुप्रशस्तमूतये ॥१०॥
अग्िंन सूनुं सहसो जातवेदसं दानाय वार्याणाम् ।
द्विता यो भूदमृतो मर्त्येष्वा होता मन्द्रतमो विशि ॥११॥
अग्िंन वो देवयज्याग्िंन प्रयत्यध्वरे। अग्िंन धीषु प्रथममग्निमर्वत्यग्िंन क्षैत्राय साधसे ॥१२॥
अग्निरिषां सख्ये ददातु न ईशे यो वार्याणाम् ।
अग्िंन तोके तनये शश्वदीमहे वसुं सन्तं तनूपाम् ॥१३॥
अग्निमीळिष्वावसे गाथाभिः शीरशोचिषम् ।
अग्िंन राये पुरुमीळ्ह श्रुतं नरोऽग्िंन सुदीतये छर्दिः ॥१४॥
अग्िंन द्वेषो योतवै नो गृणीमस्यग्िंन शं योश्च दातवे ।
विश्वासु विक्ष्ववितेव हव्यो भुवद्वस्तुर्ऋषूणाम् ॥१५॥
*tvaṁ no agne mahobhiḥ pāhi viśvasyā arāteḥ । uta dviṣo martyasya ॥1॥*
*nahi manyuḥ pauruṣeya īśe hi vaḥ priyajāta । tvamidasi kṣapāvān ॥2॥*
*sa no viśvebhirdevebhirūrjo napādbhadraśoche । rayiṁ dehi viśvavāram ॥3॥*
*na tamagne arātayo martaṁ yuvanta rāyaḥ । yaṁ trāyase dāśvāṁsam ॥4॥*
*yaṁ tvaṁ vipra medhasātāvagne hinoṣi dhanāya । sa tavotī goṣu gantā ॥5॥*
*tvaṁ rayiṁ puruvīramagne dāśuṣe martāya । pra ṇo naya vasyo achchha ॥6॥*
*aruṣyā ṇo mā parā dā aghāyate jātavedaḥ । durādhye3 martāya ॥7॥*
*agne mākiṣṭe devasya rātimadevo yuyota । tvamīśiṣe vasūnām ॥8॥*
*sa no vasva upa māsyūrjo napānmāhimasya । sakhe vaso jaritṛbhyaḥ ॥9॥*
*achchhā naḥ śīraśochiṣaṁ giro yantu darśatam ।*
*achchhā yajñāso namasā purūvasuṁ purupraśastamūtaye ॥10॥*
*agiṁna sūnuṁ sahaso jātavedasaṁ dānāya vāryāṇām ।*
*dvitā yo bhūdamṛto martyeṣvā hotā mandratamo viśi ॥11॥*
*agiṁna vo devayajyāgiṁna prayatyadhvare ।*
*agiṁna dhīṣu prathamamagnimarvatyagiṁna kṣaitrāya sādhase ॥12॥*
*agniriṣāṁ sakhye dadātu na īśe yo vāryāṇām ।*
*agiṁna toke tanaye śaśvadīmahe vasuṁ santaṁ tanūpām ॥13॥*
*agnimīḷiṣvāvase gāthābhiḥ śīraśochiṣam ।*
*agiṁna rāye puruhīḷaha śrutaṁ naro'giṁna sudītaye chhardiḥ ॥14॥*
*agiṁna dveṣo yotavai no gṛṇīmasyagiṁna śaṁ yoścha dātave ।*
*viśvāsu vikṣaviteva havyo bhuvadvasturṛṣūṇām ॥15॥*

**७५६. सुनीतिः (Sunītiḥ)**

१. वेनः (Venaḥ) - य. (Yv.) ३३.२१

आ सुते सिंचत श्रियं रोदस्योरभि श्रियम्। रसा दधीत वृषभम्। तं प्रत्नथा। अयं वेनः ॥२१॥
*ā sute siṁchata śriyaṁ rodasyorabhi śriyam |*
*rasā dadhīta vṛṣabham | taṁ pratnathā | ayaṁ venaḥ ||21||*

## ७५७. सुनुर् भार्गवः (Sunur Bhārgavaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १०.१७६.२-४

प्र देवं देव्या धिया भरता जातवेदसम्। हव्या नो वक्षदानुषक् ॥२॥
अयमु ष्य प्र देवयुर्होता यज्ञाय नीयते। रथो न योरभीवृतो घृणीवांचेतति त्मना ॥३॥
अयमग्निरुरुष्यत्यमृतादिव जन्मनः। सहसश्चित्सहीयान्देवो जीवातवे कृतः ॥४॥
*pra devaṁ devyā dhiyā bharatā jātavedasam | havyā no vakṣadānuṣak ||2||*
*ayamu ṣya pra devayurhotā yajñāya nīyate |*
*ratho na yorabhīvṛto ghṛṇīvāṁchetati tmanā ||3||*
*ayamagniruruṣyatyamṛtādiva janmanaḥ | sahasaśchitsahīyāndevo jīvātave kṛtaḥ ||4||*

२. ऋभवः (Ṛbhavaḥ) - ऋ. (Rv.) १०.१७६.१

प्र सूनव ऋभूणां बृहन्नवन्त वृजना। क्षामा ये विश्वधायसोऽश्नन्धेनुं न मातरम् ॥१॥
*pra sūnava ṛbhūṇāṁ bṛhannavanta vṛjanā | kṣāmā ye viśvadhāyaso'śnandhenuṁ na mātaram ||1||*

## ७५८. सुपर्णः (Suparṇaḥ)

१. अग्निः (Agniḥ) - सा. (Sv.) १८४३-१८४५

अभि वाजी विश्वरूपो जनित्रं हिरण्ययं बिभ्रदत्कं सुपर्णः ।
सूर्यस्य भानुमृतुथा वसानः परि स्वयं मेधमृज्रो जजान ॥१॥
अप्सु रेतः शिश्रिये विश्वरूपं तेजः पृथिव्यामधि यत्संबभूव ।
अन्तरिक्षे स्वं महिमानं मिमानः कनिक्रन्ति वृष्णो अश्वस्य रेतः ॥२॥
अयं सहस्रा परि युक्ता वसानः सूर्यस्य भानुं यज्ञो दाधार ।
सहस्रदाः शतदा भूरिदावा धर्ता दिवो भुवनस्य विश्पतिः ॥३॥
*abhi vājī viśvarūpo janitraṁ hiraṇyayaṁ bibhradatkaṁ suparṇaḥ |*
*sūryasya bhānumṛtuthā vasānaḥ pari svayaṁ medhamṛjro jajāna ||1||*
*apsu retaḥ śiśriye viśvarūpaṁ tejaḥ pṛthivyāmadhi yatsaṁbabhūva |*
*antarikṣe svaṁ mahimānaṁ mimānaḥ kanikranti vṛṣṇo aśvasya retaḥ ||2||*
*ayaṁ sahasrā pari yuktā vasānaḥ sūryasya bhānuṁ yajño dādhāra |*
*sahasradāḥ śatadā bhūridāvā dhartā divo bhuvanasya viśpatiḥ ||3||*

## ७५९. सुपर्णः काण्वः (Suparṇaḥ Kāṇvaḥ)

१. इन्द्रावरुणौ (Indrāvaruṇau) - ऋ. (Rv.) ८.५९.१-७

इमानि वां भागधेयानि सिस्रत इन्द्रावरुणा प्र महे सुतेषु वाम् ।
यज्ञेयज्ञे ह सवना भुरण्यथो यत्सुन्वते यजमानाय शिक्षथः ॥१॥
निःशिध्वरीरोषधीराप आस्तामिन्द्रावरुणा महिमानामाशत ।
या सिस्रतू रजसः पारे अध्वनो ययोः शत्रुर्नकिरादेव ओहते ॥२॥
सत्यं तदिन्द्रावरुणा कृशस्य वां मध्व ऊर्मिं दुहते सप्त वाणीः ।
ताभिर्दाश्वांसमवतं शुभस्पती यो वामदब्धो अभि पाति चित्तिभिः ॥३॥
घृतप्रुषः सौम्या जीरदानवः सप्त स्वसारः सदन ऋतस्य ।
या ह वामिन्द्रावरुणा घृतश्चुतस्ताभिर्धत्तं यजमानाय शिक्षतम् ॥४॥
अवोचाम महते सौभगाय सत्यं त्वेषाभ्यां महिमानमिन्द्रियम् ।
अस्मान्त्स्विन्द्रावरुणा घृतश्चुतस्त्रिभिः साप्तेभिरवतं शुभस्पती ॥५॥
इन्द्रावरुणा यदृषिभ्यो मनीषां वाचो मतिं श्रुतमदत्तमग्रे ।
यानि स्थानान्यसृजन्त धीरा यज्ञं तन्वानास्तपसाभ्यपश्यम् ॥६॥
इन्द्रावरुणा सौमनसमदृप्तं रायस्पोषं यजमानेषु धत्तम् ।

प्रजां पुष्टिं भूतिमस्मासु धत्तं दीर्घायुत्वाय प्र तिरतं न आयुः ॥७॥
*imāni vāṁ bhāgadheyāni sisrata indrāvaruṇā pra mahe suteṣu vām* ।
*yajñeyajñe ha savanā bhuraṇyatho yatsunvate yajamānāya śikṣathaḥ* ॥1॥
*niḥśighvarīroṣadhīrāpa āstāmindrāvaruṇā mahimānāmāśata* ।
*yā sisratū rajasaḥ pāre adhvano yayoḥ śatrurnakirādeva ohate* ॥2॥
*satyaṁ tadindrāvaruṇā kṛśasya vāṁ madhva ūrmiṁ duhate sapta vāṇīḥ* ।
*tābhirdāśvāṁsamavataṁ śubhaspatī yo vāmadabdho abhi pāti chittibhiḥ* ॥3॥
*ghṛtapruṣaḥ saumyā jīradānavaḥ sapta svasāraḥ sadana ṛtasya* ।
*yā ha vāmindrāvaruṇā ghṛtaśchutastābhirdhattaṁ yajamānāya śikṣatam* ॥4॥
*avochāma mahate saubhagāya satyaṁ tveṣābhyāṁ mahimānamindriyam* ।
*asmāntsvindrāvaruṇā ghṛtaśchutastribhiḥ sāptebhiravataṁ śubhaspatī* ॥5॥
*indrāvaruṇā yadṛṣibhyo manīṣāṁ vācho matiṁ śrutamadattamagre* ।
*yāni sthānānyasṛjanta dhīrā yajñaṁ tanvānāstapasābhyapaśyam* ॥6॥
*indrāvaruṇā saumanasamadṛptaṁ rāyaspoṣaṁ yajamāneṣu dhattam* ।
*prajāṁ puṣṭiṁ bhūtimasmāsu dhattaṁ dīrghāyutvāya pra tirataṁ na āyuḥ* ॥7॥

## ७६०. सुपर्णः तार्क्ष्यपुत्र ऊर्ध्व कृशनो वा यामायनः (Suparṇaḥ tārkṣayaputra Ūrdhva Kṛśano Vā Yāmāyanaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.१४४.१-६

अयं हि ते अमर्त्य इन्दुरत्यो न पत्यते। दक्षो विश्वायुर्वेधसे ॥१॥
अयमस्मासु काव्य ऋभुर्वज्रो दास्वते। अयं बिभर्त्यूर्ध्वकृशनं मदमृभुर्न कृत्व्यं मदम् ॥२॥
घृषुः श्येनाय कृत्वन आसु स्वासु वंसगः। अव दीधेदहीशुवः ॥३॥
यं सुपर्णः परावतः श्यनेस्य पुत्र आभरत्। शतचक्रं योऽह्यो वर्तनिः ॥४॥
यं ते श्येनश्चरुमवृकं पदाभरदरुणं मानमन्धसः। एना वयो वि तार्यायुर्जीवस एना जागार बन्धुता ॥५॥
एवा तदिन्द्र इन्दुना देवेषु चिद्धारयाते महि त्यजः। क्रत्वा वयो वि तार्यायुः सुक्रतो क्रत्वायमस्मदा सुतः ॥६॥
*ayaṁ hi te amartya induratyo na patyate* । *dakṣo viśvāyurvedhase* ॥1॥
*ayamasmāsu kāvya ṛbhurvajro dāsvate* ।
*ayaṁ bibhartyūrdhvakṛśanaṁ madamṛbhurna kṛtvyaṁ madam* ॥2॥
*ghṛṣuḥ śyenāya kṛtvana āsu svāsu vaṁsagaḥ* । *ava dīdhedahīśuvaḥ* ॥3॥
*yaṁ suparṇaḥ parāvataḥ śyanesya putra ābharat* । *śatachakraṁ yo3hyo vartaniḥ* ॥4॥
*yaṁ te śyenaścharumavṛkaṁ padābharadaruṇaṁ mānamandhasaḥ* ।
*enā vayo vi tāryāyurjīvasa enā jāgāra bandhutā* ॥5॥
*evā tadindra indunā deveṣu chiddhārayāte mahi tyajaḥ* ।
*kratvā vayo vi tāryāyuḥ sukrato kratvāyamasmadā sutaḥ* ॥6॥

## ७६१. सुबन्धुः (Subandhuḥ)

१. अग्निः (Agniḥ) - य. (Yv.) ३.२५; २६

अग्ने त्वं नोऽअन्तमऽउत त्राता शिवो भवा वरूथ्यः ।
वसुरग्निर्वसुश्रवाऽअच्छा नक्षि द्युमत्तमं रयिं दाः ॥२५॥
तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ।
स नो बोधि श्रुधी हवमुरुष्या णोऽअघायतः समस्मात् ॥२६॥
*agne tvaṁ no'antama'uta trātā śivo bhavā varūthyaḥ* ।
*vasuragnirvasuśravā'achchhā nakṣi dyumattamaṁ rayiṁ dāḥ* ॥25॥
*taṁ tvā śochiṣṭha dīdivaḥ sumnāya nūnamīmahe sakhibhyaḥ* ।
*sa no bodhi śrudhī havamuruṣyā ṇo'aghāyataḥ samasmāt* ॥26॥

## ७६२. सुमित्रो दुर्मित्रो वााकौत्सः (Sumitro Durmitro Vāākautsaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.१०५.१-११

कदा वसो स्तोत्रं हर्यत आव शमशा रुधद्वाः। दीर्घं सुतं वाताप्याय ॥१॥
हरी यस्य सुयुजा विव्रता वेरर्वन्तानु शेषा। उभा रजी न केशिना पतिर्दन् ॥२॥
अप योरिन्द्रः पापज आ मर्तो न शश्रमाणो बिभीवान्। शुभे यद्युयुजे तविषीवान् ॥३॥
सचायोरिन्द्रश्चर्कृष आँ उपानसः सपर्यन्। नदयोर्विव्रतयोः शूर इन्द्रः ॥४॥

अधि यस्तस्थौ केशवन्ता व्यचस्वन्ता न पुष्ट्यै। वनोति शिप्राभ्यां शिप्रिणीवान् ॥५॥
प्रास्तौदृष्वौजा ऋष्वेभिस्ततक्ष शूरः शवसा। ऋभुर्न क्रतुभिर्मातरिश्व ॥६॥
वज्रं यश्चक्रे सुहनाय दस्यवे हिरीमशो हिरीमान्। अरुतहनुरद् भुतं न रजः ॥७॥
अव नो वृजिना शिशीह्यृचा वनेमानृचः। नाब्रह्मा यज्ञ ऋधग्जोषति त्वे ॥८॥
ऊर्ध्वा यत्ते त्रेतिनी भूद्यज्ञस्य धूर्षु सद्मन्। सजूर्नावं स्वयशसं सचायोः ॥९॥
श्रिये ते पृश्निरुपसेचनी भूच्छ्रिये दर्विररेपाः। यया स्वे पात्रे सिंचस उत् ॥१०॥
शतं वा यदसुर्य प्रति त्वा सुमित्र इत्थास्तौद्दुर्मित्र इत्थास्तौत्।
आवो यद्दस्युहत्यै कुत्सपुत्रं प्रावो यद्दस्युहत्ये कुत्सवत्सम् ॥११॥

*kadā vaseā stotraṁ haryata āva śamaśā rudhadvāḥ | dīrghaṁ sutaṁ vātāpyāya ||1 ||*
*harī yasya suyujā vivratā verarvantānu śeṣā | ubhā rajī na keśinā patirdan ||2 ||*
*apa yorindraḥ pāpaja ā marto na śaśramāṇo bibhīvān | śubhe yadyuyuje taviṣīvān ||3 ||*
*sachāyorindraścharkṛṣa ām̐ upānasaḥ saparyan | nadayorvivratayoḥ śūra indraḥ ||4 ||*
*adhi yastasthau keśavantā vyachasvantā na puṣṭyai | vanoti śiprābhyāṁ śipriṇīvān ||5 ||*
*prāstaudṛṣvaujā ṛṣvebhistatakṣa śūraḥ śavasā | ṛbhurna kratubhirmātariśva ||6 ||*
*vajraṁ yaśchakre suhanāya dasyave hirīmaśo hirīmān |*
*arutahanurad bhutaṁ na rajaḥ ||7 ||*
*ava no vṛjinā śiśīhyṛchā vanemānṛchaḥ | nābrahmā yajña ṛdhagjoṣati tve ||8 ||*
*ūrdhvā yatte tretinī bhūdyajñasya dhūrṣu sadman |*
*sajūrnāvaṁ svayaśasaṁ sachāyoḥ ||9 ||*
*śriye te pṛśnirupasechanī bhūchchhriye darvirarepāḥ | yayā sve pātre siṁchasa ut ||10 ||*
*śataṁ vā yadasurya prati tvā sumitra itthāstauddurmitra itthāstaut |*
*āvo yaddasyuhatyai kutsaputraṁ prāvo yaddasyuhatye kutsavatsam ||11 ||*

## ७६३. सुमित्रो वाध्र्यश्वः (Sumitro Vādhrayaśvaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १०.६९.१-१२

भद्रा अग्नेर्वध्र्यश्वस्य संदृशो वामी प्रणीतिः सुरणा उपेतयः ।
यदीं सुमित्रा विशो अग्र इन्धते घृतेनाहुतो जरते दविद्युतत् ॥१॥
घृतमग्नेर्वध्र्यश्वस्य वर्धनं घृतमन्नं घृतम्वस्य मेदनम् ।
घृतेनाहुत उर्विया वि पप्रथे सूर्यइव रोचते सर्पिरासुतिः ॥२॥
यत्ते मनुर्यदनीकं सुमित्रः समीधे अग्ने तदिदं नवीयः ।
स रेवच्छोच स गिरो जुषस्व स वाजं दर्षि स इह श्रवो धाः ॥३॥
यं त्वा पूर्वमीळितो वध्र्यश्वः समीधे अग्ने स इदं जुषस्व ।
स नः स्तिपा उत भवा तनूपा दात्रं रक्षस्व यदिदं ते अस्मे ॥४॥
भवा द्युम्नी वाध्र्यश्वोत गोपा मा त्वा तारीदभिमातिर्जनानाम् ।
शूरइव धृष्णुश्च्यवनः सुमित्रः प्र नु वोचं वाध्र्यश्वस्य नाम ॥५॥
समज्र्या पर्वत्या३वसूनि दासा वृत्राण्यार्या जिगेथ ।
शूरइव धृष्णुश्च्यवनो जनानां त्वमग्ने पृतनायूँरभि ष्याः ॥६॥
दीर्घतन्तुर्बृहदुक्षायमग्निः सहस्रस्तरीः शतनीथ ऋभ्वा ।
द्युमान् द्युमत्सु नृभिर्मृज्यमानः सुमित्रेषु दीदयो देवयत्सु ॥७॥
त्वं धेनुः सुदुघा जातवेदोऽसश्चतेव समना सबर्धुक् ।
त्वं नृभिर्दक्षिणावद्भिरग्ने सुमित्रेभिरिध्यसे देवयद्भिः ॥८॥
देवाश्चित्ते अमृता जातवेदो महिमानं वाध्र्यश्व प्र वोचन् ।
यत्संपृच्छं मानुषीर्विश आयन्त्वं नृभिरजयस्त्वावृधेभिः ॥९॥
पितेव पुत्रमबिभरुपस्थे त्वामग्ने वध्र्यश्वः सपर्यन् ।
जुषाणो अस्य समिधं यविष्ठोत पूर्वां अवनोर्व्राधतश्चित् ॥१०॥
शश्वदग्निर्वध्र्यश्बस्य शत्रून्नृभिर्जिगाय सुतसोमवद्भिः ।
समनं चिददहश्चित्रभानोऽव व्राधन्तमभिनद्वृधश्चित् ॥११॥
अयमग्निर्वध्र्यश्वस्य वृत्रहा सनकात्प्रेद्धो नमसोपवाक्यः ।
स नो अजामीँरुत वा विजामीनभि तिष्ठ शर्धतो वाध्र्यश्व ॥१२॥

*bhadrā agnervadhryaśvasya saṁdṛśo vāmī praṇītiḥ suraṇā upetayaḥ* ।
*yadīṁ sumitrā viśo agra indhate ghṛtenāhuto jarate davidyutat* ॥1॥
*ghṛtamagnervdhryaśvasya vardhanaṁ ghṛtamannaṁ ghṛtamvasya medanam* ।
*ghṛtenāhuta urviyā vi paprathe sūryaiva rochate sarpirāsutiḥ* ॥2॥
*yatte manuryadanīkaṁ sumitraḥ samīdhe agne tadidaṁ navīyaḥ* ।
*sa revachchhocha sa giro juṣasva sa vājaṁ darṣi sa iha śravo dhāḥ* ॥3॥
*yaṁ tvā pūrvamīḻito vadhryaśvaḥ samīdhe agne sa idaṁ juṣasva* ।
*sa naḥ stipā uta bhavā tanūpā dātraṁ rakṣasva yadidaṁ te asme* ॥4॥
*bhavā dyumnī vādhyraśvota gopā mā tvā tārīdabhimātirjanānām* ।
*śūraiva dhṛṣṇuśchyavanaḥ sumitraḥ pra nu vochaṁ vādhyraśvasya nāma* ॥5॥
*samajryā parvatyā3vasūni dāsā vṛtrāṇyāryā jigetha* ।
*śūraiva dhṛṣṇuśchyavano janānāṁ tvamagne pṛtanāyūm̐rabhi ṣyāḥ* ॥6॥
*dīrghatanturbṛhadukṣāyamagniḥ sahasrastarīḥ śatanītha ṛbhvā* ।
*dyumān dyumatsu nṛbhirmṛjyamānaḥ sumitreṣu dīdayo devayatsu* ॥7॥
*tvaṁ dhenuḥ sudughā jātavedo'saśchateva samanā sabardhuk* ।
*tvaṁ nṛbhirdakṣiṇāvadbhiragne sumitrebhiridhyase devayadbhiḥ* ॥8॥
*devāśchitte amṛtā jātavedo mahimānaṁ vādhyraśva pra vochan* ।
*yatsaṁpṛchchhaṁ mānuṣīrviśa āyantvaṁ nṛbhirajayastvāvṛdhebhiḥ* ॥9॥
*piteva putramabibharupasthe tvāmagne vadhryaśvaḥ saparyan* ।
*juṣāṇo asya samidhaṁ yaviṣṭhota pūrvāṁ avanorvrādhataśchit* ॥10॥
*śaśvadagnirvadhyraśbasya śatrūnnṛbhirjigāya sutasomavadbhiḥ* ।
*samanaṁ chidadahaśchitrabhāno'va vrādhantamabhinadvṛdhaśchit* ॥11॥
*ayamagnirvadhryaśvasya vṛtrahā sanakātpreddho namasopavākyaḥ* ।
*sa no ajāmīm̐ruta vā vijāmīnabhi tiṣṭha śardhato vādhyraśva* ॥12॥

२. आप्रम् (Āpram) - ऋ. (Rv.) १०.७०.१-११

इमां मे अग्ने समिधं जुषस्वेळस्पदे प्रति हर्या घृताचीम् ।
वर्ष्मन्पृथिव्याः सुदिनत्वे अह्नामूर्ध्वो भव सुक्रतो देवयज्या ॥१॥
आ देवानामग्रयावेह यातु नराशंसो विश्वरूपेभिरश्वैः ।
ऋतस्य पथा नमसा मियेधो देवेभ्यो देवतमः सूषूदत् ॥२॥
शश्वत्तममीळते दूत्याय हविष्मन्तो मनुष्यासो अग्निम् ।
वहिष्ठैरश्वैः सुवृता रथेना देवान्वक्षि नि षदेह होता ॥३॥
वि प्रथतां देवजुष्टं तिरश्चा दीर्घं द्राघ्मा सुरभि भूत्वस्मे ।
अहेळता मनसा देव बर्हिरिन्द्रज्येष्ठाँ उशतो यक्षि देवान् ॥४॥
दिवो वा सानु स्पृशता वरीयः पृथिव्या वा मात्रया वि श्रयध्वम् ।
उशतीर्द्वारो महिना महद्भिर्देवं रथं रथयुर्धारयध्वम् ॥५॥
देवी दिवो दुहितरा सुशिल्पे उषासानक्ता सदतां नि योनौ ।
आ वां देवास उशती उशन्त उरौ सीदन्तु सुभगे उपस्थे ॥६॥
ऊर्ध्वो ग्रावा बृहदग्निः समिद्धः प्रिया धामान्यदितेरुपस्थे ।
पुरोहितावृत्विजां यज्ञे अस्मिन् विदुष्टरा द्रविणमा यजेथाम् ॥७॥
तिस्रो देवीर्बर्हिरिदं वरीय आ सीदत चकृमा वः स्योनम् ।
मनुष्वद्यज्ञं सुधिता हवींषीळा देवी घृतपदी जुषन्त ॥८॥
देव त्वष्टर्यद्ध चारुत्वमानड्यदंगिरसामभवः सचाभूः ।
स देवानां पाथ उप प्र विद्वानुशन्यक्षि द्रविणोदः सुरत्नः ॥९॥
वनस्पते रशनया नियुया देवानां पाथ उप वक्षि विद्वान् ।
स्वदाति देवः कृणवद्धवींष्यवतां द्यावापृथिवी हवं मे ॥१०॥
आग्ने वह वरुणमिष्टये न इन्द्रं दिवो मरुतो अन्तरिक्षात् ।
सीदन्तु बर्हिर्विश्व आ यजत्राः स्वाहा देवा अमृता मादयन्ताम् ॥११॥

*imāṁ me agne samidhaṁ juṣasveḻaspade prati haryā ghṛtāchīm* ।
*varṣmanpṛthivyāḥ sudinatve ahnāmūrdhvo bhava sukrato devayajyā* ॥1॥
*ā devānāmagrayāveha yātu narāśaṁso viśvarūpebhiraśvaiḥ* ।
*ṛtasya pathā namasā miyedho devebhyo devatamaḥ sūṣūdat* ॥2॥

*śaśvattamamīḷate dūtyāya haviṣmanto manuṣyāso agnim /*
*vahiṣṭharaiśvaiḥ suvṛtā rathenā devānvakṣi ni ṣadeha hotā //3 //*
*vi prathatāṁ devajuṣṭaṁ tiraśchā dīrghaṁ drādhmā surabhi bhūtvasme /*
*aheḷatā manasā deva barhirindrajyeṣṭhāṁ uśato yakṣi devān //4 //*
*divo vā sānu spṛśatā varīyaḥ pṛthivyā vā mātrayā vi śrayadhvam /*
*uśatīrdvāro mahinā mahadbhirdevaṁ rathaṁ rathayurdhārayadhvam //5 //*
*devī divo duhitarā suśilpe uṣāsānaktā sadatāṁ ni yonau /*
*ā vāṁ devāsa uśatī uśanta urau sīdantu subhage upasthe //6 //*
*ūrdhvo grāvā bṛhadagniḥ samiddhaḥ priyā dhāmānyaditerupasthe /*
*purohitāvṛtvijāṁ yajñe asmin viduṣṭarā draviṇamā yajethām //7 //*
*tisro devīrbarhiridaṁ varīya ā sīdata chakṛmā vaḥ syonam /*
*manuṣvadyajñaṁ sudhitā havīṁṣīḷā devī ghṛtapadī juṣanta //8 //*
*deva tvaṣṭaryaddha chārutvamānaḍyadaṁgirasāmabhavaḥ sachābhūḥ /*
*sa devānāṁ pātha upa pra vidvānuśanyakṣi draviṇodaḥ suratnaḥ //9 //*
*vanaspate raśanayā niyuyā devānāṁ pātha upa vakṣi vidvān /*
*svadāti devaḥ kṛṇavaddhavīṁṣyavatāṁ dyāvāpṛthivī havaṁ me //10 //*
*āgne vaha varuṇamiṣṭaye na indraṁ divo maruto antarikṣāt /*
*sīdantu barhirviśva ā yajatrāḥ svāhā devā amṛtā mādayantām //11 //*

## ७६४. सुवेदाः शैरीषिः (Suvedāḥ Śairīṣiḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.१४७.१-५

श्रत्ते दधामि प्रथमाय मन्यवेऽहन्यद्वृत्रं नर्यं विवेरपः ।
उभे यत्त्वा भवतो रोदसी अनु रेजते शुष्मात्पृथिवी चिदद्रिवः ॥१॥
त्वं मायाभिरनवद्य मायिनं श्रवस्यता मनसा वृत्रमर्दयः ।
त्वामिन्नरो वृणते गविष्टिषु त्वां विश्वासु हव्यास्विष्टिषु ॥२॥
ऐषु चाकन्धि पुरुहूत सूरिषु वृधासो ये मघवन्नानशुर्मघम् ।
अर्चन्ति तोके तनये परिष्टिषु मेधसाता वाजिनमह्रये धने ॥३॥
स इन्नु रायः सुभृतस्य चाकनन्मदं यो अस्य रंह्यं चिकेतति ।
त्वावृधो मघवन्दाश्वध्वरो मक्षू स वाजं भरते धना नृभिः ॥४॥
त्वं शर्धाय महिना गृणान उरु कृधि मघवंछग्धि रायः ।
त्वं नो मित्रे वरुणो न मायी पित्वो न दस्म दयसे विभक्ताः ॥५॥

*śratte dadhāmi prathamāya manyave'hanyadvṛtraṁ naryaṁ viverapaḥ /*
*ubhe yattvā bhavato rodasī anu rejate śuṣmātpṛthivī chidadrivaḥ //1 //*
*tvaṁ māyābhiranavadya māyinaṁ śravasyatā manasā vṛtramardayaḥ /*
*tvāminnaro vṛṇate gaviṣṭaṣu tvāṁ viśvāsu havyāsviṣṭiṣu //2 //*
*aiṣu chākandhi puruhūta sūriṣu vṛdhāso ye maghavannānaśurmagham /*
*archarnti toke tanaye pariṣṭiṣu medhasātā vājinamahraye dhane //3 //*
*sa innu rāyaḥ subhṛtasya chākananmadaṁ yo asya raṁhyaṁ chiketati /*
*tvāvṛdho maghavandāśvadhvaro makṣū sa vājaṁ bharate dhanā nṛbhiḥ //4 //*
*tvaṁ śardhāya mahinā gṛṇāna uru kṛdhi maghavaṁchhagdhi rāyaḥ /*
*tvaṁ no mitre varuṇo na māyī pitvo na dasma dayase vibhaktāḥ //5 //*

## ७६५. सुवेदा शैलूषि (Suvedā Śailūṣi)

१. इन्द्रः (Indraḥ) - सा. (Sv.) ३७१

श्रत्ते दधामि प्रथमाय मन्यवेऽहन्यद्स्युं नर्यं विवेरपः ।
उभे यत्वा रोदसी धावतामनु भ्यसाते शुष्मात्पृथिवी चिदद्रिवः ॥२॥

*śratte dadhāmi prathamāya manyave'hanyadsyuṁ naryaṁ viverapaḥ /*
*ubhe yatvā rodasī dhāvatāmanu bhyasāte śuṣmātpṛthivī chidadrivaḥ //2 //*

## ७६६. सुश्रुतः (Suśrutaḥ)

१. अग्निः (Agniḥ) - य. (Yv.) ३.२

सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन। अग्नये जातवेदसे ॥२॥

*susamiddhāya śochiṣe ghṛtaṁ tīvraṁ juhotana । agnaye jātavedase ॥2 ॥*

## ७६७. सुहस्त्यो घौषेयः (Suhastyo Ghauṣeyaḥ)

१. अश्विनौ (Aśvinau) - ऋ. (Rv.) १०.४१.१-३

समानमु त्यं पुरुहूतमुक्थ्यं१ रथं त्रिचक्रं सवना गनिग्मतम् ।
परिज्मानं विदथ्यं सुवृक्तिभिर्वयं व्युष्टा उषसो हवामहे ॥१ ॥
प्रातर्युजं नासत्याधि तिष्ठथः प्रातर्यावाणं मधुवाहनं रथम् ।
विशो येन गच्छथो यज्वरीर्नरा कीरेश्चिद्यज्ञं होतृमन्तमश्विना ॥२ ॥
अध्वर्युं व मधुपाणिं सुहस्त्यमग्निधं वा धृतदक्षं दमूनसम् ।
विप्रस्य वा यत्सवनानि गच्छथोऽत आ यातं मधुपेयमश्विना ॥३ ॥
*samānamu tyaṁ puruhūtamukthyaṁ1 rathaṁ trichakraṁ savanā ganigmatam ।*
*parijmānaṁ vidathyaṁ suvṛktibhirvayaṁ vyuṣṭā uṣaso havāmahe ॥1 ॥*
*prātaryujaṁ nāsatyādhi tiṣṭhathaḥ prātaryāvāṇaṁ madhuvāhanaṁ ratham ।*
*viśo yena gachchhatho yajvarīrnarā kīreśchidyajñaṁ hotṛmantamaśvinā ॥2 ॥*
*adhvaryuṁ va madhupāṇiṁ suhastyamagnidhaṁ vā dhṛtadakṣaṁ damūnasam ।*
*viprasya vā yatsavanāni gachchhatho'ta ā yātaṁ madhupeyamaśvinā ॥3 ॥*

## ७६८. सुहोत्रः (Suhotraḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ६.३१.१-५; ६.३२.१०५

ऋ. (Rv.) ६.३१.१-५

अभूरेको रयिपते रयीणामा हस्तयोरधिथा इन्द्र कृष्टीः ।
वि तोके अप्सु तनये च सूरेऽवोचन्त चर्षणयो विवाचः ॥१ ॥
त्वद्भियेन्द्र पार्थिवानि विश्वाच्युता चिच्च्यावयन्ते रजांसि ।
द्यावाक्षामा पर्वतासो वनानि विश्वं दृळहं भयते अज्मन्ना ते ॥२ ॥
त्वं कुत्सेनाभि शुष्णमिन्द्राशुषं युध्य कुयवं गविष्टौ ।
दश प्रपित्वे अध सूर्यस्य मुषायश्चक्रमविवे रपांसि ॥३ ॥
त्वं शतान्यव शम्बरस्य पुरो अघन्थाप्रतीनि दस्योः ।
अशिक्षो यत्र शच्या शचीवो दिवोदासाय सुन्वते सुतक्रे भरद्वाजाय गृणते वसूनि ॥४ ॥
स सत्यसत्वन्महते रणाय रथमा तिष्ठ तुविनृम्ण भीमम् ।
याहि प्रपथिन्नवसोप मद्रिक्प्र च श्रुत श्रावय चर्षणिभ्यः ॥५ ॥
*abhūreko rayipate rayīṇāmā hastayoradhithā indra kṛṣṭīḥ ।*
*vi toke apsu tanaye cha sūre'vochanta charṣaṇayo vivāchaḥ ॥1 ॥*
*tvadbhiyendra pārthivāni viśvāchyutā chichchyāvayante rajāṁsi ।*
*dyāvākṣāmā parvatāso vanāni viśvaṁ ddaḻahaṁ bhayate ajmannā te ॥2 ॥*
*tvaṁ kutsenābhi śuṣṇamindrāśuṣaṁ yudhya kuyavaṁ gaviṣṭau ।*
*daśa prapitve adha sūryasya muṣāyaśchakramavive rapāṁsi ॥3 ॥*
*tvaṁ śatānyava śambarasya puro aghanthāpratīni dasyoḥ ।*
*aśikṣo yatra śachyā śachīvo divodāsāya sunvate sutakre bharadvājāya gṛṇate vasūni ॥4 ॥*
*sa satyasatvanmahate raṇāya rathamā tiṣṭha tuvinṛmṇa bhīmam ।*
*yāhi prapathinnavasopa madrikpra cha śruta śrāvaya charṣaṇibhyaḥ ॥5 ॥*

ऋ. (Rv.) ६.३२.१-५

अपूर्व्या पुरुतमान्यस्मै महे वीराय तवसे तुराय ।
विरप्शिने वज्रिणे शन्तमानि वचांस्यासा स्थविराय तक्षम् ॥१ ॥
स मातरा सूर्येण कवीनामवासयद्रुजदद्रिं गृणानः ।
स्वाधीभिऋर्क्वभिर्वावशान उदुस्रिणामसृजन्निदानम् ॥२ ॥
स वह्निभिऋर्क्वभिर्गोषु शश्वन्मितज्ञुभिः पुरुकृत्वा जिगाय ।
पुरः पुरोहा सखिभिः सखीयन्दृळ्हा रुरोज कविभिः कविः सन् ॥३ ॥
स नीव्याभिर्जरितारमच्छा महो वाजेभिर्महद्भिश्च शुष्मैः ।
पुरुवीराभिर्वृषभ क्षितीनामा गिर्वणः सुविताय प्र याहि ॥४ ॥
स सर्गेण शवसा तक्तो अत्यैरप इन्द्रो दक्षिणतस्तुराषाट् ।

इत्था सृजाना अनपावृदर्थं दिवेदिवे विविषुरप्रमृष्यम् ॥५॥
*apūrvyā purutamānyasmai mahe vīrāya tavase turāya /*
*virapśine vajriṇe śantamāni vachāṁsyāsā sthavirāya takṣam //1 //*
*sa mātarā sūryeṇa kavīnāmavāsayadrujadadriṁ gṛṇānaḥ /*
*svādhībhirṛkvabhirvāvaśāna udusriṇāmasṛjannidānam //2 //*
*sa vahnibhirṛkvabhirgoṣu śaśvanmitajñubhiḥ purukṛtvā jigāya /*
*puraḥ purohā sakhibhiḥ sakhīyandṛḻhā ruroja kavibhiḥ kaviḥ san //3 //*
*sa nīvyābhirjaritāramachchhā maho vājebhirmahadbhiścha śuṣmaiḥ /*
*puruvīrābhirvṛṣabha kṣitīnāmā girvaṇaḥ suvitāya pra yāhi //4 //*
*sa sargeṇa śavasā takto atyairapa indro dakṣiṇatasturāṣāṭ /*
*itthā sṛjānā anapāvṛdarthaṁ divedive viviṣurapramṛṣyam //5 //*

२. इन्द्राग्निः (Indrāgniḥ) - य. (Yv.) ३३.९३

इन्द्राग्नीऽअपादियं पूर्वागात्पद्वतीभ्यः।
हित्वी शिरो जिह्वया वावदच्चरत्त्रिं शत्पदा न्यक्रमीत्॥९३॥
*indrāgnī'apādiyaṁ pūrvāgātpadvatībhyaḥ /*
*hitvī śiro jihvayā vāvadachcharattriṁ śatpadā nyakramīt //93 //*

३. पूषाः (Pūṣāḥ) - य. (Yv.) ३४.४१

पूषन्त्व व्रते वयं न रिष्येम कदा चन। स्तोतारस्तऽइह स्मसि ॥४१॥
*pūṣantva vrate vayaṁ na riṣyema kadā chana / stotārasta'iha smasi //41 //*

४. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.) ३३.५३; ७७

य. (Yv.) ३३.५३

विश्वे देवाः श्रृणुतेमं हवं मे येऽअन्तरिक्षे यऽउप द्यवि ष्ठ ।
येऽअग्निजिह्वाऽउत वा यजत्राऽआसद्यास्मिन् बर्हिषि मादयध्वम् ॥५३॥
*viśve devāḥ śṛṇutemaṁ havaṁ me ye'antarikṣe ya'upa dyavi ṣṭha /*
*ye'agnijihvā'uta vā yajatrā'āsadyāsmin barhiṣi mādayadhvam //53 //*

य. (Yv.) ३३.७७

उप नः सूनवो गिरः श्रृण्वन्त्वमृतस्य ये। सुमृडीका भवन्तु नः ॥७७॥
*upa naḥ sūnavo giraḥ śṛṇvantvamṛtasya ye / sumṛḍīkā bhavantu naḥ //77 //*

## ७६९. सुहोत्रो भरद्वाजः (Suhotra of Bharadvāja)

१. इन्द्रः (Indraḥ) - सा. (Sv.) ३२२

अपूर्व्या पुरुतमान्यस्मै महे वीराय तवसे तुराय ।
विरप्शिने वज्रिणे शन्तमानि वचांस्यस्मै स्थविराय तक्षुः ॥१०॥
*apūrvyā purutamānyasmai mahe vīrāya tavase turāya /*
*virapśine vajriṇe śantamāni vachāṁsyasme sthavirāya takṣuḥ //10 //*

## ७७०. सूर्या सावित्री (Sūryā Sāvitrī)

१. चन्द्रमा (Chandramā) - ऋ. (Rv.) १०.८५.१९

नवोनवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रम् ।
भागं देवेभ्यो वि दधात्यायन्प्र चन्द्रमास्तिरते दीर्घमायुः ॥१९॥
*navonavo bhavati jāyamāno'hnāṁ keturuṣasāmetyagram /*
*bhāgaṁ devebhyo vi dadhātyāyanpra chandramāstirate dīrghamāyuḥ //19 //*

२. देवाः (Devāḥ) - ऋ. (Rv.) १०.८५.१७

सूर्यायै देवेभ्यो मित्राय वरुणाय च। ये भूतस्य प्रचेतस इदं तेभ्योऽकरं नमः ॥१७॥
*sūryāyai devebhyo mitrāya varuṇāya cha /*
*ye bhūtasya prachetasa idaṁ tebhyo'karaṁ namaḥ //17 //*

३. नृणां विवाहमन्त्राः आशीः प्रायाः (Marriage mantras for the sake of bestowing blessing to the wedded couple) - ऋ. (Rv.) १०.८५.२०-२८

सुकिशुकं शल्मलिं विश्वरूपं हिरण्यवर्णं सुवृतं सुचक्रम् ।
आ रोह सूर्ये अमृतस्य लोकं स्योनं पत्ये वहतुं कृणुष्व ॥२०॥
उदीर्ष्वातः पतिवती ह्ये३ षा विश्वावसुं नमसा गीर्भिरीळे ।
अन्यामिच्छ पितृषदं व्यक्तां स ते भागो जनुषा तस्य विद्धि ॥२१॥
उदीर्ष्वातो विश्वावसो नमसेळामहे त्वा । अन्यामिच्छ प्रफर्व्यं१ सं जायां पत्या सृज ॥२२॥
अनृक्षरा ऋजवः सन्तु पन्था येभिः सखायो यन्ति नो वरेयम् ।
समर्यमा सं भगो नो निनीयात्सं जास्पत्यं सुयममस्तु देवाः ॥२३॥
प्र त्वा मुंचामि वरुणस्य पाशाद्येन त्वाबध्नात्सविता सुशेवः ।
ऋतस्य योनौ सुकृतस्य लोकेऽरिष्टा त्वा सह पत्या दधामि ॥२४॥
प्रेतो मुंचामि नामुतः सुबद्धाममुतस्करम् । यथेयमिन्द्र मीढ्वः सुपुत्रा सुभगासति ॥२५॥
पूषा त्वेतो नयतु हस्तगृह्याश्विना त्वा प्र वहतां रथेन ।
गृहान्गच्छ गृहपत्नी यथासो वशिनी त्वं विदथमा वदासि ॥२६॥
इह प्रियं प्रजया ते समृध्यतामस्मिन्गृहे गार्हपत्याय जागृहि ।
एना पत्या तन्वं१ सं सृजस्वाधा जिव्री विदथमा वदाथः ॥२७॥
नीललोहितं भवति कृत्यासक्तिर्व्यज्यते । एधन्ते अस्या ज्ञातयः पतिर्बन्धेषु बध्यते ॥२८॥
*sukiśukaṁ śalmaliṁ viśvarūpaṁ hiraṇyavarṇaṁ suvṛtaṁ suchakram* /
*ā roha sūrye amṛtasya lokaṁ syonaṁ patye vahatuṁ kṛṇuṣva* //20//
*udīrṣvātaḥ pativatī hye3 ṣā viśvāvasuṁ namasā gīrbhirīḷe* /
*anyāmichchha pitṛṣadaṁ vyaktāṁ sa te bhāgo januṣā tasya viddhi* //21//
*udīrṣvāto viśvāvaso namaseḷāmahe tvā* /
*anyāmichchha prapharvyaṁ1 saṁ jāyāṁ patyā sṛja* //22//
*anṛkṣarā ṛjavaḥ santu panthā yebhiḥ sakhāyo yanti no vareyam* /
*samaryamā saṁ bhago no ninīyātsaṁ jāspatyaṁ suyamamastu devāḥ* //23//
*pra tvā muṁchāmi varuṇasya pāśādyena tvābadhnātsavitā suśevaḥ* /
*ṛtasya yonau sukṛtasya loke'riṣṭā tvā saha patyā dadhāmi* //24//
*preto muṁchāmi nāmutaḥ subaddhāmamutaskaram* /
*yatheyamindra mīḍhvaḥ suputrā subhagāsati* //25//
*pūṣā tveto nayatu hastagṛhyāśvinā tvā pra vahatāṁ rathena* /
*gṛhāngachchha gṛhapatnī yathāso vaśinī tvaṁ vidathamā vadāsi* //26//
*iha priyaṁ prajayā te samṛdhyatāmasmingṛhe gārhapatyāya jāgṛhi* /
*enā patyā tanvaṁ1 saṁ sṛjasvādhā jivrī vidathamā vadāthaḥ* //27//
*nīlalohitaṁ bhavati kṛtyāsaktirvyajyate* / *edhante asyā jñātayaḥ patirbandheṣu badhyate* //28//

४. यक्ष्मनाशिनी दमपत्त्योः (Yakṣamanāśinī Damapattyoḥ) - ऋ. (Rv.) १०.८५.३१

ये वध्वश्चन्द्र वहतुं यक्ष्मा यन्ति जनादनु। पुनस्तान्यज्ञिया देवा नयन्तु यत आगताः ॥३१॥
*ye vadhvaśchandra vahatuṁ yakṣamā yanti janādanu* / *punastānyajñiyā devā nayantu yata āgatāḥ* //31//

५. वधूवासः संस्पर्शनिन्दा (Vadhūvāsaḥ Saṁsparśanindā) - ऋ. (Rv.) १०.८५.२९; ३०

परा देहि शामुल्यं ब्रह्मभ्यो वि भजा वसु। कृत्यैषा पद्वती भूत्व्या जाया विशते पतिम् ॥२९॥
अश्रीरा तनूर्भवति रुशती पापयामुया। पतिर्यद्वध्वो३ वाससा स्वमंगमभिधित्सते ॥३०॥
*parā dehi śāmulyaṁ brahmabhyo vi bhajā vasu* /
*kṛtyaiṣā padvatī bhūtvyā jāyā viśate patim* //29//
*aśrīrā tanūrbhavati ruśatī pāpayāmuyā* /
*patiryadvadhvo3 vāsasā svamaṁgamabhidhitsate* //30//

६. सूर्या (Sūryā) - ऋ. (Rv.) १०.८५.३२-४७

मा विदन्परिपन्थिनो य आसीदन्ति दंपती। सुगेभिर्दुर्गमतीतामप द्रान्त्वरातयः ॥३२॥
सुमङ्गलीरियं वधूरिमां समेत पश्यत। सौभग्यमस्यै दत्वायाथास्तं वि परेतन ॥३३॥
तृष्टमेतत्कटुकमेतदपाष्ठवद्विषवन्नेतदत्तवे। सूर्यां यो ब्रह्मा विद्यात्स इद्वाधूयमर्हति ॥३४॥
आशसनं विशसनमथो अधिविकर्तनम्। सूर्यायाः पश्य रूपाणि तानि ब्रह्मा तु शुन्धति ॥३५॥

गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः ।
भगो अर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥३६॥
तां पूषिंछवतमामेरयस्व यस्यां बीजं मनुष्या३ वपन्ति ।
या न ऊरू उशती विश्रयाते यस्यामुशन्तः प्रहराम शेषम् ॥३७॥
तुभ्यमग्रे पर्यवहन्त्सूर्यां वहतुना सह। पुनः पतिभ्यो जायां दा अग्ने प्रजया सह ॥३८॥
पुनः पत्नीमग्निरदादायुषा सह वर्चसा। दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम् ॥३९॥
सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः। तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥४०॥
सोमो ददद् गन्धर्वाय गन्धर्वो ददद्ग्नये। रयिं च पुत्राँश्चदादाग्निर्मह्यमथो इमाम् ॥४१॥
इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतम्। क्रीळन्तौ पुत्रैर्नप्तृभिर्मोदमानो स्वे गृहे ॥४२॥
आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा ।
अदुर्मंगलीः पतिलोकमा विश शं नो भव द्विपदे शं चतुष्पदे ॥४३॥
अघोरचक्षुरपतिघ्न्योधि शिवा पशुभ्यः सुमनाः सुवर्चाः ।
वीरसूर्देवृकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥४४॥
इमां त्वमिन्द्र मीढ्वः सुपुत्रां सुभगां कृणु। दशास्यां पुत्राना धेहि पतिमेकादशं कृधि ॥४५॥
सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव। ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥४६॥
समंजन्तु विश्वे देवाः समापो हृदयानि नौ। सं मातरिश्वा सं धाता समु देष्ट्री दधातु नौ ।४७।

*mā vidanparipanthino ya āsīdanti dampatī ।*
*sugebhirdurgamatītāmapa drāntvarātayaḥ ॥32॥*
*sumaṅgalīriyaṁ vadhūrimāṁ sameta paśyata ।*
*saubhagyamasyai datvāyāthāstaṁ vi paretana ॥33॥*
*tṛṣṭametatkaṭukametadapāṣṭhavadviṣavannetadattave ।*
*sūryāṁ yo brahmā vidyātsa idvādhūyamarhati ॥34॥*
*āśasanaṁ viśasanamatho adhivikartanam ।*
*sūryāyāḥ paśya rūpāṇi tāni brahmā tu śundhati ॥35॥*
*gṛbhṇāmi te saubhagatvāya hastaṁ mayā patyā jaradaṣṭiryathāsaḥ ।*
*bhago aryamā savitā purandhirmahyaṁ tvādurgārhapatyāya devāḥ ॥36॥*
*tāṁ pūṣiṁchhavatamāmerayasva yasyāṁ bījaṁ manuṣyā3 vapanti ।*
*yā na ūrū uśatī viśrayāte yasyāmuśantaḥ praharāma śeṣam ॥37॥*
*tubhyamagre paryavahantsūryāṁ vahatunā saha ।*
*punaḥ patibhyo jāyāṁ dā agne prajayā saha ॥38॥*
*punaḥ patnīmagniradādāyuṣā saha varchasā ।*
*dīrghāyurasyā yaḥ patirjīvāti śaradaḥ śatam ॥39॥*
*somaḥ prathamo vivide gandharvo vivida uttaraḥ ।*
*tṛtīyo agniṣṭe patisturīyaste manuṣyajāḥ ॥40॥*
*somo dadad gandharvāya gandharvo dadadagnaye ।*
*rayiṁ cha putrām̐śchadādāgnirmahyamatho imām ॥41॥*
*ihaiva staṁ mā vi yauṣṭaṁ viśvamāyurvyaśnutam ।*
*krīḷantau putrairnaptṛbhirmodamāno sve gṛhe ॥42॥*
*ā naḥ prajāṁ janayatu prajāpatirājarasāya samanaktvaryamā ।*
*adurmaṁgalīḥ patilokamā viśa śaṁ no bhava dvipade śaṁ chatuṣpade ॥43॥*
*aghorachakṣurapatighnyodhi śivā paśubhyaḥ sumanāḥ suvarchāḥ ।*
*vīrasūrdevṛkāmā syonā śaṁ no bhava dvipade śaṁ chatuṣpade ॥44॥*
*imāṁ tvamindra mīḍhvaḥ suputrāṁ subhagāṁ kṛṇu ।*
*daśāsyāṁ putrānā dhehi patimekādaśaṁ kṛdhi ॥45॥*
*samrājñī śvaśure bhava samrājñī śvaśrvāṁ bhava ।*
*nanāndari samrājñī bhava samrājñī adhi devṛṣu ॥46॥*
*samaṁjantu viśve devāḥ samāpo hṛdayāni nau ।*
*saṁ mātariśvā saṁ dhātā samu deṣṭrī dadhātu nau ।47।*

७. सूर्या विवाहः (Marriage of Sūryā) - ऋ. (Rv.) १०.८५.६-१६

रैभ्यासीदनुदेयी नाराशंसी न्योचनी । सूर्याया भद्रमिद्वासो गाथयैति परिष्कृतम् ॥६॥
चित्तिरा उपबर्हणं चक्षुरा अभ्यंजनम् । द्यौर्भूमिः कोश आसीद्यदयात्सूर्या पतिम् ॥७॥

स्तोमा आसन्प्रतिधयः कुरीरं छन्द ओपशः । सूर्याया अश्विना वराग्निरासीत्पुरोगवः ॥८॥
सोमो वधूयुरभवदश्विनास्तामुभा वरा । सूर्यां यत्पत्ये शंसन्तीं मनसा सवितादादात् ॥९॥
मनो अस्या अन आसीद् द्यौरासीदुत छदिः । शुक्रावनड्वाहावास्तां यदयात्सूर्या गृहम् ॥१०॥
ऋक्सामाभ्यामभिहितौ गावौ ते सामनावितः । श्रोत्रं ते चक्रे आस्तां दिवि पन्थाश्चराचरः ॥११॥
शुची ते चक्रे यात्या व्यानो अक्ष आहतः । अनो मनस्मयं सूर्यारोहत्प्रयती पतिम् ॥१२॥
सूर्याया वहतुः प्रागात्सविता यमवासृजत् । अघासु हन्यन्ते गावोऽर्जुन्योः पर्युह्यते ॥१३॥
यदश्विना पृच्छमानावयातं त्रिचक्रेण वहतुं सूर्यायाः ।
विश्वे देवा अनु तद्वामजानन्पुत्रः पितराववृणीत पूषा ॥१४॥
यदयातं शुभस्पती वरेयं सूर्यामुप । क्वैकं चक्रं वामासीत्क्व देष्ट्राय तस्थथुः ॥१५॥
द्वे ते चक्रं सूर्ये ब्रह्माण ऋतुथा विदुः । अथैकं चक्रं यद्गुहा तदद्धातय इद्विदुः ॥१६॥

*raibhyāsīdanudeyī nārāśaṁsī nyochanī ।*
*sūryāyā bhadramidvāso gāthayaiti pariṣkṛtam ॥6॥*
*chittirā upabarhaṇaṁ chakṣurā abhyaṁjanam ।*
*dyaurbhūmiḥ kośa āsīdyadayātsūryā patim ॥7॥*
*stomā āsanpratidhayaḥ kurīraṁ chhanda opaśaḥ ।*
*sūryāyā aśvinā varāgnirāsītpurogavaḥ ॥8॥*
*somo vadhūyurabhavadaśvināstāmubhā varā ।*
*sūryāṁ yatpatye śaṁsantīṁ manasā savitādādāt ॥9॥*
*mano asyā ana āsīd dyaurāsīduta chhadiḥ ।*
*śukrāvanaḍvāhāvāstāṁ yadayātsūryā gṛham ॥10॥*
*ṛksāmābhyāmabhihitau gāvau te sāmanāvitaḥ ।*
*śrotraṁ te chakre āstāṁ divi panthāścharācharaḥ ॥11॥*
*śuchī te chakre yātyā vyāno akṣa āhataḥ ।*
*ano manasmayaṁ sūryārohatprayatī patim ॥12॥*
*sūryāyā vahatuḥ prāgātsavitā yamavāsṛjat ।*
*aghāsu hanyante gāvo'rjunyoḥ paryuhyate ॥13॥*
*yadaśvinā pṛchchhamānāvayātaṁ trichakreṇa vahatuṁ sūryāyāḥ ।*
*viśve devā anu tadvāmajānanputraḥ pitarāvavṛṇīta pūṣā ॥14॥*
*yadayātaṁ śubhaspatī vareyaṁ sūryāmupa ।*
*kvaikaṁ chakraṁ vāmāsītkva deṣṭrāya tasthathuḥ ॥15॥*
*dve te chakraṁ sūrye brahmāṇa ṛtuthā viduḥ ।*
*athaikaṁ chakraṁ yadguhā tadaddhātaya idviduḥ ॥16॥*

८. सोमः (Somaḥ) - ऋ. (Rv.) १०.८५.१-५

सत्येनोत्तभिता भूमिः सूर्येणोत्तभिता द्यौः । ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधि श्रितः ॥१॥
सोमेनादित्या बलिनः सोमेन पृथिवी मही । अथो नक्षत्राणामेषामुपस्थे सोम आहितः ॥२॥
सोमं मन्यते पपिवान्यत्संपिंषन्त्योषधिम् । सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति कश्चन ॥३॥
आच्छद्विधानैर्गुपितो बार्हतैः सोम रक्षितः । ग्राव्णामिच्छृण्वन्तिष्ठसि न ते अश्नाति पार्थिवः ॥४॥
यत्त्वा देव प्रपिबन्ति तत आ प्यायसे पुनः । वायुः सोमस्य रक्षिता समानां मास आकृतिः ॥५॥

*satyenottabhitā bhūmiḥ sūryeṇottabhitā dyauḥ ।*
*ṛtenādityāstiṣṭhanti divi somo adhi śritaḥ ॥1॥*
*somenādityā balinaḥ somena pṛthivī mahī ।*
*atho nakṣatrāṇāmeṣāmupasthe soma āhitaḥ ॥2॥*
*somaṁ manyate papivānyatsāṁpiṁṣantyoṣadhim ।*
*somaṁ yaṁ brahmāṇo vidurna tasyāśnāti kaśchana ॥3॥*
*āchchhadvidhānairgupito bārhataiḥ soma rakṣitaḥ ।*
*grāvṇāmichchhṛṇvantiṣṭhasi na te aśnāti pārthivaḥ ॥4॥*
*yattvā deva prapibanti tata ā pyāyase punaḥ ।*
*vāyuḥ somasya rakṣitā samānāṁ māsa ākṛtiḥ ॥5॥*

९. सोमार्कौ (Soma and Arka) - ऋ. (Rv.) १०.८५.१८

पूर्वापरं चरतो माययैतौ शिशू क्रीळन्तौ परि यातो अध्वरम् ।
विश्वन्यन्यो भुवनाभिचष्ट ऋतूँरन्यो विदधज्जायते पुनः ॥१८॥

*pūrvāparaṁ charato māyayaitau śiśū krīḷantau pari yāto adhvaram /*
*viśvanyanyo bhuvanābhichaṣṭa ṛtūm̐ranyo vidadhajjāyate punaḥ //18 //*

## ७७१. सोमकः (Somakaḥ)

१. अग्निः (Agniḥ) - य. (Yv.) ११.२५

परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत्। दधद्रत्नानि दाशुषे ॥२५॥
*pari vājapatiḥ kaviragnirhavyānyakramīt / dadhadratnāni dāśuṣe //25 //*

## ७७२. सोमाहुतिः (Somāhutiḥ)

१. अग्निः (Agniḥ) - य. (Yv.) ११.७०; १२.४३; ४४; ४६

य. (Yv.) ११.७०

द्वन्नः सर्पिरासुतिः प्रत्नो होता वरेण्यः। सहसस्पुत्रोऽअद्भुतः ॥७०॥
*dvannaḥ sarpirāsutiḥ pratno hotā vareṇyaḥ / sahasasputro'adbhutaḥ //70 //*

य. (Yv.) १२.४३-४४

स बोधि सूरिर्मघवा वसुपते वसुदावन् । युयोध्य स्मद् द्वेषांसि विश्वकर्मणे स्वाहा ॥४३॥
पुनस्त्वाऽऽदित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः ।
घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥४४॥
*sa bodhi sūrirmaghavā vasupate vasudāvan /*
*yuyodhya smad dveṣāṁsi viśvakarmaṇe svāhā //43 //*
*punastvā''dityā rudrā vasavaḥ samindhatāṁ punarbrahmāṇo vasunītha yajñaiḥ /*
*ghṛtena tvaṁ tanvaṁ vardhayasva satyāḥ santu yajamānasya kāmāḥ //44 //*

य. (Yv.) १२.४६

संज्ञानमसि कामधरणं मयि ते काम धरणं भूयात् ।
अग्नेर्भस्मास्यग्नेः पुरी षमसि चित स्थ परिचितऽऊर्ध्वचितः श्रयध्वम् ॥४६॥
*saṁjñānamasi kāmadharaṇaṁ mayi te kāma dharaṇaṁ bhūyāt /*
*agnerbhasmāsyagneḥ purī ṣamasi chita stha parichita'ūrdhvachitaḥ śrayadhvam //46 //*

२. पितरः (Pitaraḥ) - य. (Yv.) १२.४५

अपेत वीत वि च सर्पतातो येऽत्र स्थ पुराणा ये च नूतनाः ।
अदाद्यमोऽवसानं पृथिव्याऽअक्रन्निमं पितरो लोकमस्मै ॥४५॥
*apeta vīta vi cha sarpatāto ye'tra stha purāṇā ye cha nūtanāḥ /*
*adādyamo'vasānaṁ pṛthivyā'akrannimaṁ pitaro lokamasmai //45 //*

## ७७३. सोमाहुतिः भार्गव (Somāhutiḥ Bhārgava)

१. अग्निः (Agniḥ) - सा. (Sv.) ९४

दधन्वे वा यदीमनु वोचद्ब्रह्मेति वेरु तत्। परि विश्वानि काव्या नेमिश्चक्रमिवाभुवत् ॥४॥
*dadhanve vā yadīmanu vochadbrahmeti veru tat /*
*pari viśvāni kāvyā nemiśchakramivābhuvat //4 //*

## ७७४. सोभरिः (Sobhariḥ)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.६२.१-४

वयमु त्वामपूर्व्य स्थूरं न कच्चिद् भरन्तोऽवस्यवः । वाजे चित्रं हवामहे ॥१॥
उप त्वा कर्मन्नूतये स नो युवोग्रश्च काम यो धृषत् ।
त्वामिद्ध्यवितारं ववृमहे सखाय इन्द्र सानसिम् ॥२॥
यो न इदमिदं पुरा प्र वस्य आनिनाय तमु व स्तुषे। सखाय इन्द्रमूतये ॥३॥
हर्यश्वं सत्पतिं चर्षणीसहं स हि ष्मा यो अमन्दत ।
आ तु नः स वयति गव्यमश्व्यं स्तोतृभ्यो मघवा शतम् ॥४॥
*vayamu tvāmapūrvya sthūraṁ na kachchid bharanto'vasyavaḥ /*
*vāje chitraṁ havāmahe //1 //*
*upa tvā karmannūtaye sa no yuvograścha kāma yo dhṛṣat /*
*tvāmiddhyavitāraṁ vavṛmahe sakhāya indra sānasim //2 //*

*yo na idamidaṁ purā pra vasya āninãya tamu va stuṣe | sakhāya indramūtaye ||3 ||*
*haryaśvaṁ satpatiṁ charṣaṇīsahaṁ sa hi ṣmā yo amandata |*
*ā tu naḥ sa vayati gavyamaśvyaṁ stotṛbhyo maghavā śatam ||4 ||*

## ७७५. सोभरिः काण्वः (Sobhariḥ Kāṇvaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ८.१९.१-३३; ८.१०३.१-१३

ऋ. (Rv.) ८.१९.१-३३

तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे। देवत्रा हव्यमोहिरे ॥१॥
विभूतरातिं विप्र चित्रशोचिषमग्निमीळिष्व यन्तुरम् ।
अस्य मेधस्य सोम्यस्य सोभरे प्रेमध्वराय पूर्व्यम् ॥२॥
यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारममर्त्यम् । अस्य यज्ञस्य सुक्रतुम् ॥३॥
ऊर्जो नपातं सुभगं सुदीदितिमग्निं श्रेष्ठशोचिषम् ।
स नो मित्रस्य वरुणस्य सो अपामा सुम्नं यक्षते दिवि ॥४॥
यः समिधा य आहुती यो वेदेन ददाश मर्तो अग्नये। यो नमसा स्वध्वरः ॥५॥
तस्येदर्वन्तो रंहयन्त आशवस्तस्य द्युम्नितमं यशः ।
न तमंहो देवकृतं कुतश्चन न मर्त्यकृतं नशत् ॥६॥
स्वग्नयो वो अग्निभिः स्याम सूनो सहस ऊर्जां पते । सुवीरस्त्वमस्मयुः ॥७॥
प्रशंसमानो अतिथिर्न मित्रियोऽग्नी रथो न वेद्यः ।
त्वं क्षेमासो अपि सन्ति साधवस्त्वं राजा रयीणाम् ॥८॥
सो अद्धा दाश्वध्वरोऽग्ने मर्तः सुभग स प्रशंस्यः । स धीभिरस्तु सनिता ॥९॥
यस्य त्वमूर्ध्वो अध्वराय तिष्ठसि क्षयद्वीरः स साधते ।
सो अर्वद्भिः सनिता स विपन्युभिः स शूरैः सनिता कृतम् ॥१०॥
यस्याग्निर्वपुर्गृहे स्तोमं चनो दधीत विश्ववार्यः । हव्या वा वेविषद्विषः ॥११॥
विप्रस्य वा स्तुवतः सहसो यहो मक्षूतमस्य रातिषु ।
अवोदेवमुपरिमर्त्यं कृधि वसो विविदुषो वचः ॥१२॥
यो अग्निं हव्यदातिभिर्नमोभिर्वा सुदक्षमाविवासति । गिरा वाजिरशोचिषम् ॥१३॥
समिधा या निशिती दाशददितिं धामभिरस्य मर्त्यः ।
विश्वेत्स धीभिः सुभगो जनाँ अति द्युम्नैरुद्र इव तारिषत् ॥१४॥
तदग्ने द्युम्नमा भर यत्सासहत्सदने कं चिदत्रिणम् । मन्युं जनस्य दूढ्यः ॥१५॥
येन चष्टे वरुणो मित्रो अर्यमा येन नासत्या भगः ।
वयं तत्ते शवसा गातुवित्तमा इन्द्रत्वोता विधेमहि ॥१६॥
ते घेदग्ने स्वाध्यो३ ये त्वा विप्र निदधिरे नृचक्षसम् । विप्रासो देव सुक्रतुम् ॥१७॥
त इद्वेदिं सुभग त आहुतिं ते सोतुं चक्रिर दिवि ।
त इद्वाजेभिर्जिग्युर्महद्धनं ये त्वे कामं न्येरिरे ॥१८॥
भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः। भद्रा उत प्रशस्तयः ॥१९॥
भद्रं मनः कृणुष्व वृत्रतूर्ये येना समत्सु सासहः ।
अव स्थिरा तनुहि भूरि शर्धतां वनेमा ते अभिष्टिभिः ॥२०॥
ईळे गिरा मनुर्हितं यं देवा दूतमरतिं न्येरिरे। यजिष्ठं हव्यवाहनम् ॥२१॥
तिग्मजम्भाय तरुणाय राजते प्रयो गायस्यग्नये ।
यः पिंशते सूनृताभिः सुवीर्यमग्निर्घृतेभिराहुतः ॥२२॥
यदी घृतेभिराहुतो वाशीमग्निर्भरत उच्चाव च । असुर इव निर्णिजम् ॥२३॥
यो हव्यान्यैरयता मनुर्हितो देव आसा सुगन्धिना ।
विवासते वार्याणि स्वध्वरो होता देवो अमर्त्यः ॥२४॥
यदग्ने मर्त्यस्त्वं स्यामहं मित्रमहो अमर्त्यः। सहसः सूनवाहुत ॥२५॥
न त्वा रासीयाभिशस्तये वसो न पापत्वाय सन्त्य ।
न मे स्तोतामतीवा न दुर्हितः स्यादग्ने न पापया ॥२६॥
पितुर्न पुत्रः सुभृतो दुरोण आ देवाँ एतु प्र णो हविः ॥२७॥
तवाहमग्न ऊतिभिर्नेदिष्ठाभिः सचेय जाषमा वसो । सदा दे वस्य मर्त्यः ॥२८॥

तव क्रत्वा सनेयं तव रातिभिरग्ने तव प्रशस्तिभिः ।
त्वामिदाहुः प्रमतिं वसो ममाग्ने हर्षस्व दातवे ॥२९॥
प्र सो अग्ने तवातिभिः सुवीराभिस्तिरते वाजभर्मभिः । यस्य त्वं सख्यमावरः ॥३०॥
तव द्रप्सो नीलवान्वाश ऋत्विय इन्धानः सिष्णवा ददे ।
त्वं महीनामुषसामसि प्रियः क्षपो वस्तुषु राजसि ॥३१॥
तमागन्म साभरयः सहस्रमुष्कं स्वभिष्टिमवसे। सम्राजं त्रसदस्यवम् ॥३२॥
यस्य ते अग्ने अन्ये अग्नय उपक्षितो वयाइव ।
विपो न द्युम्ना नि युवे जनानां तव क्षत्राणि वर्धयन् ॥३३॥
*taṁ gūrdhayā svarṇaraṁ devāso devamaratiṁ dadhanvire | devatrā havyamohire ||1 ||*
*vibhūtarātiṁ vipra chitraśochiṣamagnimīḷiṣva yanturam |*
*asya medhasya somyasya sobhare premadhvarāya pūrvyam ||2 ||*
*yajiṣṭhaṁ tvā vavṛmahe devaṁ devatrā hotāramamartyam |*
*asya yajñasya sukratum ||3 ||*
*ūrjo napātaṁ subhagaṁ sudīditimagiṁna śreṣṭhaśochiṣam |*
*sa no mitrasya varuṇasya so apāmā sumnaṁ yakṣate divi ||4 ||*
*yaḥ samidhā ya āhutī yo vedena dadāśa marto agnaye |*
*yo namasā svadhvaraḥ ||5 ||*
*tasyedarvanto raṁhayanta āśavastasya dyumnitamaṁ yaśaḥ |*
*na tamaṁho devakṛtaṁ kutaśchana na martyakṛtaṁ naśat ||6 ||*
*svagnayo vo agnibhiḥ syāma sūno sahasa ūrjāṁ pate |*
*suvīrastvamasmayuḥ ||7 ||*
*praśaṁsamāno atithirna mitriyo'gnī ratho na vedyaḥ |*
*tvaṁ kṣemāso api santi sādhavastvaṁ rājā rayīṇām ||8 ||*
*so addhā dāśvadhvaro'gne martaḥ subhaga sa praśaṁsyaḥ |*
*sa dhībhirastu sanitā ||9 ||*
*yasya tvamūrdhvo adhvarāya tiṣṭhasi kṣayadvīraḥ sa sādhate |*
*so arvadbhiḥ sanitā sa viṣanyubhiḥ sa śūraiḥ sanitā kṛtam ||10 ||*
*yasyāgnirvapurgṛhe stomaṁ chano dadhīta viśvavāryaḥ |*
*havyā vā veviṣadviṣaḥ ||11 ||*
*viprasya vā stuvataḥ sahaso yaho makṣūtamasya rātiṣu |*
*avodevamuparimartyaṁ kṛdhi vaso vividuṣo vachaḥ ||12 ||*
*yo agiṁna havyadātibhirnamobhirvā sudakṣamāvivāsati |*
*girā vājiraśochiṣam ||13 ||*
*samidhā yā niśitī dāśadaditiṁ dhāmabhirasya martyaḥ |*
*viśvetsa dhībhiḥ subhago janām̐ ati dyumnairudna iva tāriṣat ||14 ||*
*tadagne dyumnamā bhara yatsāsahatsadane kaṁ chidatriṇam |*
*manyuṁ janasya dūḍhyaḥ ||15 ||*
*yena chaṣṭe varuṇo mitro aryamā yena nāsatyā bhagaḥ |*
*vayaṁ tatte śavasā gātuvittamā indratvotā vidhemahi ||16 ||*
*te ghedagne svādhyo3 ye tvā vipra nidadhire nṛchakṣasam |*
*viprāso deva sukratum ||17 ||*
*ta idvediṁ subhaga ta āhutiṁ te sotuṁ chakrira divi |*
*ta idvājebhirjigyurmahaddhanaṁ ye tve kāmaṁ nyerire ||18 ||*
*bhadro no agnirāhuto bhadrā rātiḥ subhaga bhadro adhvaraḥ |*
*bhadrā uta praśastayaḥ ||19 ||*
*bhadraṁ manaḥ kṛṇuṣva vṛtratūrye yenā samatsu sāsahaḥ |*
*ava sthirā tanuhi bhūri śardhatāṁ vanemā te abhiṣṭibhiḥ ||20 ||*
*īḷe girā manurhitaṁ yaṁ devā dūtamaratiṁ nyerire |*
*yajiṣṭhaṁ havyavāhanam ||21 ||*
*tigmajambhāya taruṇāya rājate prayo gāyasyagnaye |*
*yaḥ piṁśate sūnṛtābhiḥ suvīryamagnirghṛtobhirāhutaḥ ||22 ||*
*yadī ghṛtebhirāhuto vāśīmagnirbharata uchchāva cha |*
*asura iva nirṇijam ||23 ||*
*yo havyānyairayatā manurhito deva āsā sugandhinā |*

*vivāsate vāryāṇi svadhvaro hotā devo amartyaḥ ॥24॥*
*yadagne martyastvaṁ syāmahaṁ mitramaho amartyaḥ ।*
*sahasaḥ sūnavāhuta ॥25॥*
*na tvā rāsīyābhiśastaye vaso na pāpatvāya santya ।*
*na me stotāmatīvā na durhitaḥ syādagne na pāpayā ॥26॥*
*piturna putraḥ subhṛto duroṇa ā devāṁ̐ etu pra ṇo haviḥ ॥27॥*
*tavāhamagna ūtibhirnediṣṭhābhiḥ sacheya jāṣamā vaso ।*
*sadā de vasya martyaḥ ॥28॥*
*tava kratvā saneyaṁ tava rātibhiragne tava praśastibhiḥ ।*
*tvāmidāhuḥ pramatiṁ vaso mamāgne harṣasva dātave ॥29॥*
*pra so agne tavātibhiḥ suvīrābhistirate vājabharmabhiḥ ।*
*yasya tvaṁ sakhyamāvaraḥ ॥30॥*
*tava drapso nīlavānvāśa ṛtviya indhānaḥ siṣṇavā dade ।*
*tvaṁ mahīnāmuṣasāmasi priyaḥ kṣapo vastuṣu rājasi ॥31॥*
*tamāganma sābharayaḥ sahasramuṣkaṁ svabhiṣṭimavase ।*
*samrājaṁ trasadasyavam ॥32॥*
*yasya te agne anye agnaya upakṣito vayāiva ।*
*vipo na dyumnā ni yuve janānāṁ tava kṣatrāṇi vardhayan ॥33॥*

ऋ. (Rv.) ८.१०३.१-१३

अदर्शि गातुवित्तमो यस्मिन्व्रतान्यादधुः । उपो षु जातमार्यस्य वर्धनमग्निं नक्षन्त नो गिरः ॥१॥
प्र दैवोदासो अग्निर्देवाँ अच्छा न मज्मना ।
अनु मातरं पृथिवीं वि वावृते तस्थौ नामस्य सानवि ॥२॥
यस्माद्रेजन्त कृष्टयश्चर्कृत्यानि कृण्वतः ।
सहस्रसां मेधसाताविव त्मनाग्निं धीभिः सपर्यत ॥३॥
प्र यं राये निनीषसि मर्तो यस्ते वसो दाशत् ।
स वीरं धत्ते अग्न उक्थशंसिनं त्मना सहस्रपोषिणम् ॥४॥
स दृळ्हे चिदभि तृणत्ति वाजमर्वता स धत्ते अक्षिति श्रवः ।
त्वे देवत्रा सदा पुरूवसो विश्वा वामानि धीमहि ॥५॥
यो विश्वा दयते वसु होता मन्द्रो जनानाम् ।
मधोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यन्त्यग्नये ॥६॥
अश्वं न गीर्भी रथ्यं सुदानवो मर्मृज्यन्ते देवयवः ।
उभे तोके तनये दस्म विश्पते पर्षि राधो मघोनाम् ॥७॥
प्र मंहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे । उपस्तुतासो अग्नये ॥८॥
आ वंसते मघवा वीरवद्यशः समिद्धो द्युम्न्याहुतः ।
कुविन्नो अस्य सुमतिर्नवीयस्यच्छा वाजेभिरागमत् ॥९॥
प्रेष्ठमु प्रियाणां स्तुह्यासावातिथिम्। अग्निं रथानां यमम् ॥१०॥
उदिता यो निदिता वेदिता वस्वा यज्ञियो ववर्तति ।
दुष्टरा यस्य प्रवणे नोर्मयो धिया वाजं सिषासतः ॥११॥
मा नो हृणीतामतिथिर्वसुरग्निः पुरुप्रशस्त एषः । सुहोता स्वध्वरः ॥१२॥
मो ते रिषन्ये अच्छोक्तिभिर्वसोऽग्ने केभिश्चिदेवैः ।
कीरिश्चिद्धि त्वामीट्टे दूतयाय रातहव्यः स्वध्वरः ॥१३॥

*adarśi gātuvittamo yasminvratānyādadhuḥ ।*
*upo ṣu jātamāryasya vardhanamagiṁna nakṣanta no giraḥ ॥1॥*
*pra daivodāso agnirdevāṁ̐ achchhā na majmanā ।*
*anu mātaraṁ pṛthivīṁ vi vāvṛte tasthau nāmasya sānavi ॥2॥*
*yasmādrejanta kṛṣṭayaścharkṛtyāni kṛṇvataḥ ।*
*sahasrasāṁ medhasātāviva tmanāgiṁna dhībhiḥ saparyata ॥3॥*
*pra yaṁ rāye ninīṣasi marto yaste vaso dāśat ।*
*sa vīraṁ dhatte agna ukthaśaṁsinaṁ tmanā sahasrapoṣiṇam ॥4॥*
*sa dṛḷhe chidabhi tṛṇatti vājamarvatā sa dhatte akṣiti śravaḥ ।*
*tve devatrā sadā purūvaso viśvā vāmāni dhīmahi ॥5॥*

*yo viśvā dayate vasu hotā mandro janānām ।*
*madhorna pātrā prathamānyasmai pra stomā yantyagnaye ॥6॥*
*aśvaṁ na gīrbhī rathyaṁ sudānavo marmṛjyante devayavaḥ ।*
*ubhe toke tanaye dasma viśpate parṣi rādho maghonām ॥7॥*
*pra maṁhiṣṭhāya gāyata ṛtāvne bṛhate śukraśochiṣe । upastutāso agnaye ॥8॥*
*ā vaṁsate maghavā vīravadyaśaḥ samiddho dyumnyāhutaḥ ।*
*kuvinno asya sumatirnavīyasyachchhā vājebhirāgamat ॥9॥*
*preṣṭhamu priyāṇāṁ stuhyāsāvātithim । agiṁna rathānāṁ yamam ॥10॥*
*uditā yo niditā veditā vasvā yajñiyo vavartati ।*
*duṣṭarā yasya pravaṇe normayo dhiyā vājaṁ siṣāsataḥ ॥11॥*
*mā no hṛṇītāmatithirvasuragniḥ purupraśasta eṣaḥ । suhotā svadhvaraḥ ॥12॥*
*mo te riṣanye achchhoktibhirvaso'gne kebhiśchidevaiḥ ।*
*kīriśchiddhi tvāmīṭṭe dūtayāya rātahavyaḥ svadhvaraḥ ॥13॥*

२. अग्निर्मरुतश्च (Agni and Maruta) - ऋ. (Rv.) ८.१०३.१४

आग्ने याहि मरुत्सखा रुद्रेभिः सोमपीतये। सोभर्या उप सुष्टुतिं मादयस्व स्वर्णरे ॥१४॥
*āgne yāhi marutsakhā rudrebhiḥ somapītaye ।*
*sobharyā upa suṣṭutiṁ mādayasva svarṇare ॥14॥*

३. अश्विनौ (Aśvinau) - ऋ. (Rv.) ८.२२.१-१८

ओ तयमह्व आ रथमद्या दंसिष्ठमूतये। यमश्विना सुहवा रुद्रवर्तनी आ सूर्यायै तस्थथुः ॥१॥
पूर्वापुषं सुहवं पुरुस्पृहं ज्युं वाजेषु पूर्व्यम्। सचनावन्तं सुमतिभिः सोभरे विद्वेषसमनेहसम् ॥२॥
इह त्या पुरुभूतमा देवा नमोभिरश्विना। अर्वाचीना स्ववसे करामहे गन्तारा दाशुषो गृहम् ॥३॥
युवो रथस्य परि चक्रमीयत ईर्मान्यद्वामिषण्यति।
अस्माँ अच्छा सुमतिर्वां शुभस्पती आ धेनुरिव धावतु ॥४॥
रथो यो वां त्रिबन्धुरो हिरण्याभीशुरश्विना ।
परि द्यावापृथिवी भूषति श्रुतस्तेन नासत्या गतम् ॥५॥
दशस्यन्ता मनवे पूर्व्यं दिवि यवं वृकेण कर्षथः ।
ता वामद्य सुमतिभिः शुभस्पती अश्विना प्र स्तुवीमहि ॥६॥
उप नो वाजिनीवसू यातमृतस्य पथिभिः ।
येभिस्तृक्षिं वृषणा त्रासदस्यवं महे क्षत्राय जिन्वथः ॥७॥
अयं वामद्रिभिः सुतः सोमो नरा वृषण्वसू ।
आ यातं सोमपीतये पिबतं दाशुषो गृहे ॥८॥
आ हि रुहतमश्विना रथे कोशे हिरण्यये वृषण्वसू । युंजाथां पीवरीरिषः ॥९॥
याभिः पक्थमवथो याभिरध्रिगुं याभिर्बभ्रुं विजोषसम् ।
ताभिर्नो मक्षू तूयमश्विना गतं भिषज्यतं यदातुरम् ॥१०॥
यदध्रिगावो अध्रिगू इदा चिदह्नो अश्विना हवामहे। वयं गीर्भिर्विषन्यवः ॥११॥
ताभिरा यातं वृषणोप मे हवं विश्वप्सुं विश्वावार्यम् ।
इषा मंहिष्ठा पुरुभूतमा नरा याभिः क्रिविं वावृधुस्ताभिरा गतम् ॥१२॥
ताविदा चिदहानां तावश्विना वन्दमान उप ब्रुवे । ता ऊ नमोभिरीमहे ॥१३॥
ताविद्दोषा ता उषसि शुभस्पती ता यामन् रुद्रवर्तनी ।
मा नो मर्ताय रिपवे वाजिनीवसू परो रुद्रावति ख्यतम् ॥१४॥
आ सुग्म्याय सुग्म्यं प्राता रथेनाश्विना वा सक्षणी । हुवे पितेव सोभरी ॥१५॥
मनोजवसा वृषणा मदच्युता मक्षुंगमाभिरूतिभिः ।
आरात्ताच्चिद्भूतमस्मे अवसे पूर्वीभिः पुरुभोजसा ॥१६॥
आ नो अश्वावदश्विना वर्तिर्यासिष्टं मधुपातमा नरा । गोमद्दस्रा हिरण्यवत् ॥१७॥
सुप्रावर्गं सुवीर्यं सुष्टु वार्यमनाधृष्टं रक्षस्विना।
अस्मिन्ना वामायाने वाजिनीवसू वि वामानि धीमहि ॥१८॥
*o tayamahva ā rathamadyā daṁsiṣṭhamūtaye ।*
*yamaśvinā suhavā rudravartanī ā sūryāyai tasthathuḥ ॥1॥*
*pūrvāpuṣaṁ suhavaṁ puruspṛhaṁ jyuṁ vājeṣu pūrvyam ।*

*sachanāvantaṁ sumatibhiḥ sobhare vidveṣasamanehasam* ॥2 ॥
*iha tyā purubhūtamā devā namobhiraśvinā* ।
*arvāchīnā svavase karāmahe gantārā dāśuṣo gṛham* ॥3 ॥
*yuvo rathasya pari chakramīyata īrmānyadvāmiṣaṇyati* ।
*asmām̐ achchhā sumatirvāṁ śubhaspatī ā dhenuriva dhāvatu* ॥4 ॥
*ratho yo vāṁ tribandhuro hiraṇyābhīśuraśvinā* ।
*pari dyāvāpṛthivī bhūṣati śrutastena nāsatyā gatam* ॥5 ॥
*daśasyantā manave pūrvyaṁ divi yavaṁ vṛkeṇa karṣathaḥ* ।
*tā vāmadya sumatibhiḥ śubhaspatī aśvinā pra stuvīmahi* ॥6 ॥
*upa no vājinīvasū yātamṛtasya pathibhiḥ* ।
*yebhistṛkṣiṁ vṛṣaṇā trāsadasyavaṁ mahe kṣatrāya jinvathaḥ* ॥7 ॥
*ayaṁ vāmadribhiḥ sutaḥ somo narā vṛṣaṇvasū* ।
*ā yātaṁ somapītaye pibataṁ dāśuṣo gṛhe* ॥8 ॥
*ā hi ruhatamaśvinā rathe kośe hiraṇyaye vṛṣaṇvasū* ।
*yuṁjāthāṁ pīvarīriṣaḥ* ॥9 ॥
*yābhiḥ pakthamavatho yābhiradhriguṁ yābhirbabhruṁ vijoṣasam* ।
*tābhirno makṣū tūyamaśvinā gataṁ bhiṣajyataṁ yadāturam* ॥10 ॥
*yadadhrigāvo adhrigū idā chidahno aśvinā havāmahe* ।
*vayaṁ gīrbhirviṣanyavaḥ* ॥11 ॥
*tābhirā yātaṁ vṛṣaṇopa me havaṁ viśvapsuṁ viśvāvāryam* ।
*iṣā maṁhiṣṭhā purubhūtamā narā yābhiḥ kriviṁ vāvṛdhustābhirā gatam* ॥12 ॥
*tāvidā chidahānāṁ tāvaśvinā vandamāna upa bruve* ।
*tā ū namobhirīmahe* ॥13 ॥
*tāviddoṣā tā uṣasi śubhaspatī tā yāman rudravartanī* ।
*mā no martāya ripave vājinīvasū paro rudrāvati khyatam* ॥14 ॥
*ā sugmyāya sugmyaṁ prātā rathenāśvinā vā sakṣaṇī* । *huve piteva sobharī* ॥15 ॥
*manojavasā vṛṣaṇā madachyutā makṣuṁgamābhirūtibhiḥ* ।
*ārāttāchchidbhūtamasme avase pūrvībhiḥ purubhojasā* ॥16 ॥
*ā no aśvāvadaśvinā vartiryāsiṣṭaṁ madhupātamā narā* ।
*gomaddasrā hiraṇyavat* ॥17 ॥
*suprāvargaṁ suvīryaṁ suṣṭhu vāryamanādhṛṣṭaṁ rakṣasvinā* ।
*asminnā vāmāyāne vājinīvasū vi vāmāni dhīmahi* ॥18 ॥

४. आदित्याः (Ādityāḥ) - ऋ. (rv.) ८.१९.३४-३५

यमादित्यासो अद्रुहः पारं नयथ मर्त्यम् । मघोनां विश्वेषां सुदानवः ॥३४॥
यूयं राजानः कं चिच्चर्षणीसहः क्षयन्तं मानुषाँ अनु ।
वयं ते वो वरुण मित्रार्यमन्त्स्यामेदृतस्य रथ्यः ॥३५॥
*yamādityāso adruhaḥ pāraṁ nayatha martyam* ।
*maghonāṁ viśveṣāṁ sudānavaḥ* ॥34 ॥
*yūyaṁ rājānaḥ kaṁ chichcharṣaṇīsahaḥ kṣayantaṁ mānuṣām̐ anu* ।
*vayaṁ te vo varuṇa mitrāryamantsyāmedṛtasya rathyaḥ* ॥35 ॥

५. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.२१.१-१६

वयमु त्वामपूर्व्य स्थूरं न कच्चिद्भरन्तोऽवस्यवः । वाजे चित्रं हवामहे ॥१॥
उप त्वा कर्मन्नूतये स नो युवोग्रश्चक्राम यो धृषत् ।
त्वामिद्ध्यावतारं ववृमहे सखाय इन्द्र सानसिम् ॥२॥
आ याहीम इन्दवोऽश्वपते गोपत उर्वरापते। सोमं सोमपते पिब ॥३॥
वयं हि त्वा बन्धुमन्तमबन्धवो विप्रास इन्द्र येमिम ।
या ते धामानि वृषभ तेभिरा गहि विश्वेभिः सोमपीतये ॥४॥
सीदन्तस्ते वयो यथा गोश्रीते मधौ मदिरे विवक्षणे। अभि त्वामिन्द्रं नोनुमः ॥५॥
अच्छा च त्वैना नमसा वदामसि किं मुहुश्चिद्वि दीधयः ।
सन्ति कामासो हरिवो ददिष्ट्वं रमो वयं सन्ति नो धियः ॥६॥
नूत्ना इदिन्द्र ते वयमूती अभूम नहि नू ते अद्रिवः। विद्मा पुरा परीणसः ॥७॥

विद्मा सखित्वमुत शूर भोज्य१ मा ते ता वज्रिन्नीमहे ।
उतो समस्मिन्ना शिशीहि नो वसो वाजे सुशिप्र गोमति ॥८॥
यो न इदमिदं पुरा प्र वस्य आनिनाय तमु वः स्तुषे । सखाय इन्द्रमूतये ॥९॥
हर्यश्वं सत्पतिं चर्षणीसहं स हि ष्मा यो अमन्दत ।
आ तु नः स वयति गव्यमश्व्यं स्तोतृभ्यो मघवा शतम् ॥१०॥
त्वया ह स्विद्युजा वयं प्रति श्वसन्तं वृषभ ब्रुवीमहि। संस्थे जनस्य गोमतः ॥११॥
जयेम कारे पुरुहूत कारिणोऽभि तिष्ठेम दूढ्यः ।
नृभिर्वृत्रं हन्याम शूशुयाम चावेरिन्द्र प्र णो धियः ॥१२॥
अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा सनादसि। युधेदापित्वमिच्छसे ॥१३॥
नकी रेवन्तं सख्याय विन्दसे पीयन्ति ते सुराश्वः ।
यदा कृणोषि नदनुं समूहस्यादित्पितेव हूयसे ॥१४॥
मा ते अमाजुरो यथा मूरास इन्द्र सख्ये त्वावतः । नि षदाम सचा सुते ॥१५॥
मा ते गोदत्र निरराम राधस इन्द्र मा ते गृहामहि ।
दृळ्हा चिदर्यः प्र मृशाभ्या भर न ते दामान आदभे ॥१६॥
*vayamu tvāmapūrvya sthūraṁ na kachchidbharanto'vasyavaḥ /*
*vāje chitraṁ havāmahe //1//*
*upa tvā karmannūtaye sa no yuvograśchakrāma yo dhṛṣat /*
*tvāmiddhyāvatāraṁ vavṛmahe sakhāya indra sānasim //2//*
*ā yāhīma indavo'śvapate gopata urvarāpate / somaṁ somapate piba //3//*
*vayaṁ hi tvā bandhumantamabandhavo viprāsa indra yemima /*
*yā te dhāmāni vṛṣabha tebhirā gahi viśvebhiḥ somapītaye //4//*
*sīdantaste vayo yathā gośrīte madhau madire vivakṣaṇe / abhi tvāmindraṁ nonumaḥ //5//*
*achchhā cha tvainā namasā vadāmasi kiṁ muhuśchidvi dīdhayaḥ /*
*santi kāmāso harivo dadiṣṭvaṁ ramo vayaṁ santi no dhiyaḥ //6//*
*nūtnā idindra te vayamūtī abhūma nahi nū te adrivaḥ / vidmā purā parīṇasaḥ //7//*
*vidmā sakhitvamuta śūra bhojya1 mā te tā vajrinnīmahe /*
*uto samasminnā śiśīhi no vaso vāje suśipra gomati //8//*
*yo na idamidaṁ purā pra vasya ānināya tamu vaḥ stuṣe / sakhāya indramūtaye //9//*
*haryaśvaṁ satpatiṁ charṣaṇīsahaṁ sa hi ṣmā yo amandata /*
*ā tu naḥ sa vayati gavyamaśvyaṁ stotṛbhyo maghavā śatam //10//*
*tvayā ha svidyujā vayaṁ prati śvasantaṁ vṛṣabha bruvīmahi /*
*saṁsthe janasya gomataḥ //11//*
*jayema kāre puruhūta kāriṇo'bhi tiṣṭhema dūḍhyaḥ /*
*nṛbhirvṛtraṁ hanyāma śūśuyāma chāverindra pra ṇo dhiyaḥ //12//*
*abhrātṛvyo anā tvamanāpirindra januṣā sanādasi / yudhedāpitvamichchhase //13//*
*nakī revantaṁ sakhyāya vindase pīyanti te surāśvaḥ /*
*yadā kṛṇoṣi nadanuṁ samūhasyāditpiteva hūyase //14//*
*mā te amājuro yathā mūrāsa indra sakhye tvāvataḥ / ni ṣadāma sachā sute //15//*
*mā te godatra nirarāma rādhasa indra mā te gṛhāmahi /*
*dṛḷahā chidaryaḥ pra mṛśābhyā bhara na te dāmāna ādabhe //16//*

६. चित्रस्य दानस्तुतिः (Praise for cherity by Chitra) - ऋ. (Rv.) ८.२१.१७-१८

इन्द्रो वा घेदियन्मघं सरस्वती वा सुभगा ददिर्वसु। त्वं वा चित्र दाशुषे ॥१७॥
चित्र इद्राजा राजका इदन्यके यके सरस्वतीमनु।
पर्जन्यइव ततनद्धि वृष्ट्या सहस्रमयुता ददत् ॥१८॥
*indro vā ghediyanmaghaṁ sarasvatī vā subhagā dadirvasu / tvaṁ vā chitra dāśuṣe //17//*
*chitra idrājā rājakā idanyake yake sarasvatīmanu /*
*parjanyaiva tatanaddhi vṛṣṭyā sahasramayutā dadat //18//*

७. त्रसदस्योर् दानस्तुतिः (Praise for cherity by Trasadasyu) - ऋ. (Rv.) ८.१९.३६-३७

अदान्मे पौरुकुत्स्यः पंचाशतं त्रसदस्युर्वधूनाम्। मंहिष्ठो अर्यः सत्पतिः ॥३६॥
उत मे प्रयियोर्वयियोः सुवास्त्वा अधि तुग्वनि ।

तिसृणां सप्ततीनां श्यावः प्रणेता भुवद्वसुर्दियानां पतिः ॥३७॥
*adānme paurukutsyaḥ paṁchāśataṁ trasadasyurvadhūnām /*
*maṁhiṣṭho aryaḥ satpatiḥ //36 //*
*uta me prayiyorvayiyoḥ suvāstvā adhi tugvani /*
*tisṛṇāṁ saptatīnāṁ śyāvaḥ praṇetā bhuvadvasurdiyānāṁ patiḥ //37 //*

८. मरुतः (Marutaḥ) - ऋ. (Rv.) ८.२०.१-२६

आ गन्ता मा रिषण्यत प्रस्थावानो माप स्थाता समन्यवः ।
स्थिरा चिन्नमयिष्णवः ॥१॥
वीळुपविभिर्मरुत ऋभुक्षण आ रुद्रासः सुदीतिभिः ।
इषा नो अद्या गता पुरुस्पृहो यज्ञमा सोभरीयवः ॥२॥
विद्मा हि रुद्रियाणां शुष्ममुग्रं मरुतां शिमीवताम् । विष्णोरेषस्य मीळहुषाम् ॥३॥
वि द्वीपानि पापतन्तिष्ठद्दुच्छुनोभे युजन्त रोदसी ।
प्र धन्वान्यैरत शुभ्रखादयो यदेजथ स्वभानवः ॥४॥
अच्युता चिद्वो अज्मन्ना नानदति पर्वतासो वनस्पतिः। भूमिर्यामेषु रेजते ॥५॥
अमाय वो मरुतो यातवे द्यौर्जिहीत उत्तरा बृहत् ।
यत्रा नरो देदिशते तनूष्वा त्वक्षांसि बाह्वोजसः ॥६॥
स्वधामनु श्रियं नरो महि त्वेषा अमवन्तो वृषप्सवः । वहन्ते अह्रुतप्सवः ॥७॥
गोभिर्वाणो अज्यते सोभरीणां रथे कोशे हिरण्यये ।
गोबन्धवः सुजातास इषे भुजे महान्तो नः स्परसे नु ॥८॥
प्रति वो वृषदंजयो वृष्णे शर्धाय मारुताय भरध्वम् । हव्या वृषप्रयाव्णे ॥९॥
वृषणश्वेन मरुतो वृषप्सुना रथेन वृषनाभिना ।
आ श्येनासो न पक्षिणो वृथा नरो हव्या नो वीतये गत ॥१०॥
समानमंज्येषां वि भ्राजन्ते रुक्मासो अधि बाहुषु। दविद्युतत्यृष्टयः ॥११॥
त उग्रासो वृषण उग्रबाहवो नकिष्टनूषु येतिरे ।
स्थिरा धन्वान्यायुधा रथेषु वोऽनीकेष्वधि श्रियः ॥१२॥
येषामर्णो न सप्रथो नाम त्वेषं शश्वतामेकमिद्भुजे । वयो न पित्र्यं सहः ॥१३॥
तान्वन्दस्व मरुतस्ताँ उप स्तुहि तेषां हि धुनीनाम् ।
अराणां न चरमस्तदेषां दाना मह्ना तदेषाम् ॥१४॥
सुभगः स व ऊतिष्वास पूर्वासु मरुतो व्युष्टिषु । यो वा नूनमुतासति ॥१५॥
यस्य वा यूयं प्रति वाजिनो नरः आ हव्या वीतये गथ ।
अभि ष द्युम्नैरुत वाजसातिभिः सुम्ना वोधूतयो नशत् ॥१६॥
यथा रुद्रस्य सूनवो दिवो वशन्त्यसुरस्य वेधसः। युवानस्तथेदसत् ॥१७॥
ये चार्हन्ति मरुतः सुदानवः स्मन्मीळहुषश्चरन्ति ये ।
अतश्चिदा न उप वस्यसा हृदा युवान आ ववृध्वम् ॥१८॥
यून ऊ षु नविष्ठया वृष्णः पावकाँ अभि सोभरे गिरा । गाय गा इव चर्कृषत् ॥१९॥
साहा ये सन्ति मुष्टिहेव हव्यो विश्वासु पृत्सु होतृषु ।
वृष्णश्चन्द्रान्न सुश्रवस्तमान् गिरा वन्दस्व मरुतो अह ॥२०॥
गावश्चिद्घा समन्यवः सजात्येन मरुतः सबन्धवः। रिहते ककुभो मिथः ॥२१॥
मर्तश्चिद्वो नृतवो रुक्मवक्षस उप भ्रातृत्वमायति ।
अधि नो गात मरुतः सदा हि व आपित्वमस्ति निध्रुवि ॥२२॥
मरुतो मारुतस्य न आ भेषजस्य वहता सुदानवः। यूयं सखायः सप्तयः ॥२३ ॥
याभिः सिन्धुमवथ याभिस्तूर्वथ याभिर्दशस्यथा क्रिविम् ।
मयो नो भूतोतिभिर्मयोभुवः शिवाभिरसचद्विषः ॥२४॥
यत्सिन्धौ यदसिक्न्यां यत्समुद्रेषु मरुतः सुबर्हिषः । यत्पर्वतेषु भेषजम् ॥२५॥
विश्वं पश्यन्तो बिभृथा तनूष्वा तेना नो अधि वोचत ।
क्षमा रपो मरुत आतुरस्य न इष्कर्ता विह्रुतं पुनः ॥२६॥
*ā gantā mā riṣaṇyata prasthāvāno māpa sthātā samanyavaḥ /*
*sthirā chinnamayiṣṇavaḥ //1 //*

*vīḷupavibhirmaruta ṛbhukṣaṇa ā rudrāsaḥ sudītibhiḥ /*
*iṣā no adyā gatā puruspṛho yajñamā sobharīyavaḥ //2 //*
*vidmā hi rudriyāṇāṁ śuṣmamugraṁ marutāṁ śimīvatām / viṣṇoreṣasya mīḷhuṣām //3 //*
*vi dvīpāni pāpatantiṣṭhadduchchhunobhe yujanta rodasī /*
*pra dhanvānyairata śubhrakhādayo yadejatha svabhānavaḥ //4 //*
*achyutā chidvo ajmannā nānadati parvatāso vanaspatiḥ / bhūmiryāmeṣu rejate //5 //*
*amāya voā maruto yātave dyaurjihīta uttarā bṛhat /*
*yatrā naro dediśate tanūṣvā tvakṣāṁsi bāhvojasaḥ //6 //*
*svadhāmanu śriyaṁ naro mahi tveṣā amavanto vṛṣapsavaḥ / vahante ahrutapsavaḥ //7 //*
*gobhirvāṇo ajyate sobharīṇāṁ rathe kośe hiraṇyaye /*
*gobandhavaḥ sujātāsa iṣe bhuje mahānto naḥ sparase nu //8 //*
*prati vo vṛṣadaṁjayo vṛṣṇe śardhāya mārutāya bharadhvam / havyā vṛṣaprayāvṇe //9 //*
*vṛṣaṇaśvena maruto vṛṣapsunā rathena vṛṣanābhinā /*
*ā śyenāso na pakṣiṇo vṛthā naro havyā no vītaye gata //10 //*
*samānamaṁjyeṣāṁ vi bhrājante rukmāso adhi bāhuṣu / davidyutatyṛṣṭayaḥ //11 //*
*ta ugrāso vṛṣaṇa ugrabāhavo nakiṣṭanūṣu yetire /*
*sthirā dhanvānyāyudhā ratheṣu vo'nīkeṣvadhi śriyaḥ //12 //*
*yeṣāmarṇo na sapratho nāma tveṣaṁ śaśvatāmekamidbhuje /*
*vayo na pitrayaṁ sahaḥ //13 //*
*tānvandasva marutastāṁ upa stuhi teṣāṁ hi dhunīnām /*
*arāṇāṁ na charamastadeṣāṁ dānā mahnā tadeṣām //14 //*
*subhagaḥ sa va ūtiṣvāsa pūrvāsu maruto vyuṣṭiṣu / yo vā nūnamutāsati //15 //*
*yasya vā yūyaṁ prati vājino naraḥ ā havyā vītaye gatha /*
*abhi ṣa dyumnairuta vājasātibhiḥ sumnā vodhūtayo naśat //16 //*
*yathā rudrasya sūnavo divo vaśantyasurasya vedhasaḥ / yuvānastathedasat //17 //*
*ye chārhanti marutaḥ sudānavaḥ smanmīḷahuṣaścharanti ye /*
*ataśchidā na upa vasyasā hṛdā yuvāna ā vavṛdhvam //18 //*
*yūna ū ṣu naviṣṭhayā vṛṣṇaḥ pāvakāṁ abhi sobhare girā / gāya gā iva charkṛṣat //19 //*
*sāhā ye santi muṣṭiheva havyo viśvāsu pṛtsu hotṛṣu /*
*vṛṣṇaśchandrānna suśravastamān girā vandasva maruto aha //20 //*
*gāvaśchiddhā samanyavaḥ sajātyena marutaḥ sabandhavaḥ / rihate kakubho mithaḥ //21 //*
*martaśchidvo nṛtavo rukmavakṣasa upa bhrātṛtvamāyati /*
*adhi no gāta marutaḥ sadā hi va āpitvamasti nidhruvi //22 //*
*maruto mārutasya na ā bheṣajasya vahatā sudānavaḥ / yūyaṁ sakhāyaḥ saptayaḥ //23 //*
*yābhiḥ sindhumavatha yābhistūrvatha yābhirdaśasyathā krivim /*
*mayo no bhūtotibhirmayobhuvaḥ śivābhirasachadviṣaḥ //24 //*
*yatsindhau yadasiknyāṁ yatsamudreṣu marutaḥ suvarhiṣaḥ / yatparvateṣu bheṣajam //25 //*
*viśvaṁ paśyanto bibhṛthā tanūṣvā tenā no adhi vochata /*
*kṣamā rapo maruta āturasya na iṣkartā vihrutaṁ punaḥ //26 //*

## ७७६. सौभरिः (Saubhariḥ)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.१४.१-४; २०.११४.१-२

अ. (Av.) २०.१४.१-४

वयमु त्वामपूर्व्य स्थूरं न कच्चिद् भरन्तोऽवस्यवः। वाजे चित्रं हवामहे ॥१॥
उप त्वा कर्मन्नूतयेस नो युवोग्रश्चक्राम यो धृषत् ।
त्वामिद्ध्यवितारं ववृमहे सखाय इन्द्र सानसिम् ॥२॥
यो न इदमिदं पुरा प्र वस्य आनिनाय तमु व स्तुषे। सखाय इन्द्रमूतये ॥३॥
हर्यश्वं सत्पतिं चर्षणीसहं स हि ष्मा यो अमन्दत ।
आ तु नः स वयति गव्यमश्व्यं स्तोतृभ्यो मघवा शतम् ॥४॥

*vayamu tvāmapūrvya sthūraṁ na kachchid bharanto'vasyavaḥ /*
*vāje chitraṁ havāmahe //1 //*
*upa tvā karmannūtayesa no yuvograśchakrāma yo dhṛṣat /*
*tvāmiddhyavitāraṁ vavṛmahe sakhāya indra sānasim //2 //*

*yo na idamidaṁ purā pra vasya āninā̄ya tamu va stuṣe । sakhāya indramūtaye ॥3 ॥*
*haryaśvaṁ satpatiṁ charṣaṇīsahaṁ sa hi ṣmā yo amandata ।*
*ā tu naḥ sa vayati gavyamaśvyaṁ stotṛbhyo maghavā śatam ॥4 ॥*

अ. (Av.) २०.११४.१-२

अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा सनादसि। युधेदापित्वमिच्छसे ॥१॥
नकी रेवन्तं सख्याय विन्दसे पीयन्ति ते सुराश्वः ।
यदा कृणोषि नदनुं समूहस्यादित् पितेव हूयसे ॥२॥
*abhrātṛvyo anā tvamanāpirindra januṣā sanādasi । yudhedāpitvamichchhase ॥1 ॥*
*nakī revantaṁ sakhyāya vindase pīyanti te surāśvaḥ ।*
*yadā kṛṇoṣi nadanuṁ samūhasyādit piteva hūyase ॥2 ॥*

## ७७७. सौभरिः काण्वः (Saubhariḥ son of Kaṇva)

१. अग्निः (Agniḥ) - सा. (Sv.) ४४; ४७; ५१; ५८; १०८; १०९; १११; ११२; ११३; ८७८-८७९; १५१५-१५१७; १५५९-१५६०; १५८३-१५८४; १६८७-१६८८; १८२२-१८२३

सा. (Sv.) ४४

यो विश्वा दयते वसु होता मन्द्रो जनानाम्।
मधोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यन्त्वग्नये ॥१०॥
*yo viśvā dayate vasu hotā mandro janānām ।*
*madhorna pātrā prathamānyasmai pra stomā yantvagnaye ॥10 ॥*

सा. (Sv.) ४७

अदर्शि गातुवित्तमो यस्मिन्व्रतान्यादधुः। उपो षु जातमार्यस्य वर्धनमग्निं नक्षन्तु नो गिरः ॥३॥
*adarśi gātuvittamo yasminvratānyādadhuḥ । upo ṣu jātamāryasya vardhanamagiṁna nakṣantu no giraḥ ॥3 ॥*

सा. (Sv.) ५१

प्र दैवोदासो अग्निर्देव इन्द्रो न मज्मना।
अनु मातरं पृथिवीं वि वावृते तस्थौ नाकस्य शर्मणि ॥७॥
*pra daivodāso agnirdeva indro na majmanā ।*
*anu mātaraṁ pṛthivīṁ vi vāvṛte tasthau nākasya śarmaṇi ॥7 ॥*

सा. (Sv.) ५८

प्र यो राये निनीषति मर्तो यस्ते वसो दाशत् ।
स वीरं धत्ते अग्न उक्थशंसिनं त्मना सहस्रपोषिणम् ॥४॥
*pra yo rāye ninīṣati marto yaste vaso dāśat ।*
*sa vīraṁ dhatte agna ukthaśaṁsinaṁ tmanā sahasrapoṣiṇam ॥4 ॥*

सा. (Sv.) १०८-१०९

प्र सो अग्ने तवोतिभिः सुवीराभिस्तरति वाजकर्मभिः। यस्य त्वं सख्यमाविथ ॥२॥
तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे। देवत्रा हव्यमूहिषे ॥३॥
*pra so agne tavotibhiḥ suvīrābhistarati vājakarmabhiḥ । yasya tvaṁ sakhyamāvitha ॥2 ॥*
*taṁ gūrdhayā ravarṇaraṁ devāso devamaratiṁ dadhanvire । devatrā havyamūhiṣe ॥3 ॥*

सा. (Sv.) १११-११३

भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः। भद्रा उत प्रशस्तयः ॥५॥
यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारममर्त्यम्। अस्य यज्ञस्य सुक्रतुम् ॥६॥
तदग्ने द्युम्नमा भर यत्सासाह सदने कं चिदत्रिणम्। मन्युं जनस्य दूढ्यम् ॥७॥
*bhadro no agnirāhuto bhadrā rātiḥ subhaga bhadro adhvaraḥ ।*
*bhadrā uta praśastayaḥ ॥5 ॥*
*yajiṣṭhaṁ tvā vavṛmahe devaṁ devatrā hotāramamartyam । asya yajñasya sukratum ॥6 ॥*
*tadagne dyumnamā bhara yatsāsāha sadane kaṁ chidatriṇam ।*
*manyuṁ janasya dūḍhyam ॥7 ॥*

सा. (Sv.) ८७८-८७९

प्र मंहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे। उपस्तुतासो अग्नये ॥१॥

आ वंसते मघवा वीरवद्यशः समिद्धो द्युम्न्याहुतः ।
कुविन्नो अस्य सुमतिर्भवीयस्यच्छा वाजेभिरागमत् ॥२॥
*pra maṁhiṣṭhāya gāyata ṛtāvne bṛhate śukraśochiṣe | upastutāso agnaye ||1 ||*
*ā vaṁsate maghavā vīravadyaśaḥ samiddho dyumnyāhutaḥ |*
*kuvinno asya sumatirbhavīyasyachchhā vājebhirāgamat ||2 ||*

सा. (Sv.) १५१५-१५१७

अदर्शि गातुवित्तमो यस्मिन्व्रतान्यादधुः। उपो षु जातमार्यस्य वर्धनमग्निं नक्षन्तु नो गिरः ॥१॥
यस्माद्रेजन्त कृष्टयश्चर्कृत्यानि कृण्वतः। सहस्रमां मेधसाताविव त्मनाग्निं धीभिर्नमस्यत ॥२॥
प्र दैवोदासो अग्निर्देव इन्द्रो न मज्मना।
अनु मातरं पृथिवीं वि वावृते तस्थौ नाकस्य शर्मणि ॥३॥
*adarśi gātuvittamo yasminvratānyādadhuḥ |*
*upo ṣu jātamāryasya vardhanamagiṁna nakṣantu no giraḥ ||1 ||*
*yasmādrejanta kṛṣṭayaścharkṛtyāni kṛṇvataḥ |*
*sahasramāṁ medhasātāviva tmanāgniṁ dhībhirnamasyata ||2 ||*
*pra daivodāso agnirdeva indro na majmanā |*
*anu mātaraṁ pṛthivīṁ vi vāvṛte tasthau nākasya śarmaṇi ||3 ||*

सा. (Sv.) १५५९-१५६०

भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः। भद्रा उत प्रशस्तयः ॥१॥
भद्रं मनः कृणुष्व वृत्रतूर्ये येना समत्सु सासहिः ।
अव स्थिरा तनुहि भूरि शर्धतां वनेमा ते अभिष्टये ॥२॥
*bhadro no agnirāhuto bhadrā rātiḥ subhaga bhadro adhvaraḥ |*
*bhadrā uta praśastayaḥ ||1 ||*
*bhadraṁ manaḥ kṛṇuṣva vutratūrye yenā samatsu sāsahiḥ |*
*ava sthirā tanuhi bhūri śardhatāṁ vanemā te abhiṣṭaye ||2 ||*

सा. (Sv.) १५८३-१५८४

यो विश्वा दयते वसु होता मन्द्रो जनानाम् ।
मधोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यन्त्वग्नये ॥१॥
अश्वं न गीर्भी रथ्यं सुदानवो मर्मृज्यन्ते देवयवः ।
उभे तोके तनये दस्म विश्पते पर्षि राधो मघोनाम् ॥२॥
*yo viśvā dayate vasu hotā mandro janānām |*
*madhorna pātrā prathamānyasmai pra stomā yantvagnaye ||1 ||*
*aśvaṁ na gīrbhī rathyaṁ sudānavo marmṛjyante devayavaḥ |*
*ubhe toke tanaye dasma viśpate parṣi rādho maghonām ||2 ||*

सा. (Sv.) १६८७-१६८८

तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे। देवत्राहव्यमूहिषे ॥१॥
विभूतरातिं विप्र चित्रशोचिषमग्निमीडिष्व यन्तुरम्।
अस्य मेधस्य सोम्यस्य सोभरे प्रेमध्वराय पूर्व्यम् ।२॥
*taṁ gūrdhayā svarṇaraṁ devāso devamaratiṁ dadhanvire | devatrāhavyamūhiṣe ||1 ||*
*vibhūtarātiṁ vipra chitraśochiṣamagnimīḍiṣva yanturam |*
*asya medhasya somyasya sobhare premadhvarāya pūrvyam |2 ||*

सा. (Sv.) १८२२-१८२३

प्र सो अग्ने तवोतिभिः सुवीराभिस्तरति वाजकर्मभिः। यस्य त्वं सख्मावथ ॥१॥
तव द्रप्सो नीलवान्वाश ऋत्विय इन्धानः सिष्णवा ददे ।
त्वं महीनामुषसामसि प्रियः क्षपो वस्तुषु राजसि ॥२॥
*pra so agne tavotibhiḥ suvīrābhistarati vājakarmabhiḥ | yasya tvaṁ sakhmāvitha ||1 ||*
*tava drapso nīlavānvāśa ṛtviya indhānaḥ siṣṇavā dade |*
*tvaṁ mahīnāmuṣasāmasi priyaḥ kṣapo vastuṣu rājasi ||2 ||*

२. इन्द्रः (Indraḥ) . सा. ३९९-४००; ४०२-४०३; ४०७-४०८; ७०८-७०९; १३८९-१३९०; १४१३-१४१४

सा. (Sv.) ३९९-४००

अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा सनादसि। युधेदापित्वमिच्छसे ॥१॥
यो न इदमिदं पुरा प्र वस्य आनिनाय तमु व स्तुषे। सखाय इन्द्रमूतये ॥२॥
*abhrātṛvyo anā tvamanāpirindra januṣā sanādasi / yudhedāpitvamichchhase //1 //*
*yo na idamidaṁ purā pra vasya ānināya tamu va stuṣe / sakhāya indramūtaye //2 //*

सा. (Sv.) ४०२-४०३

आ याह्ययमिन्दवेऽश्वपते गोपत उर्वरापते। सोमं सोमपते पिब ॥४॥
त्वया ह स्विद्युजा वयं प्रति श्वसन्तं वृषभ ब्रुवीमहि। संस्थे जनस्य गोमतः ॥५॥
*ā yāhyayamindave'śvapate gopata urvarāpate / somaṁ somapate piba //4 //*
*tvayā ha svidyujā vayaṁ prati śvasantaṁ vṛṣabha bruvīmahi /*
*saṁsthe janasya gomataḥ //5 //*

सा. (Sv.) ४०७-४०८

सीदन्तस्ते वयो यथा गोश्रीते मधौ मदिरे विवक्षणे। अभि त्वामिन्द्र नोनुमः ॥९॥
वयमु त्वामपूर्व्य स्थूरं न कच्चिद्भरन्तोऽवस्यवः। वज्रिं चित्रं हवामहे ॥१०॥
*sīdantaste vayo yathā gośrīte madhau madire vivakṣaṇe / abhi tvāmindra nonumaḥ //9 //*
*vayamu tvāmapūrvya sthūraṁ na kachchidbharanto'vasyavaḥ /*
*vajriṁ chitraṁ havāmahe //10 //*

सा. (Sv.) ७०८-७०९

वयमु त्वामपूर्व्य स्थूरं न कच्चिद्भरन्तोऽवस्यवः । वज्रिं चित्र हवामहे ॥१॥
उप त्वा कर्मन्नूतये स नो युवोग्रश्चक्राम यो धृषत् ।
त्वामिध्यवितारं ववृमहे सखाय इन्द्र सानसिम् ॥२॥
*vayamu tvāmapūrvya sthūraṁ na kachchidbharanto'vasyavaḥ /*
*vajriṁ chitra havāmahe //1 //*
*upa tvā karmannūtaye sa no yuvograśchakrāma yo dhṛṣat /*
*tvāmidhyavitāraṁ vavṛmahe sakhāya indra sānasim //2 //*

सा. (Sv.) १३८९-१३९०

अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा सनादसि। युधेदापित्वमिच्छसे ॥१॥
न की रेवन्तं सख्याय विन्दसे पीयन्ति ते सुराश्वः ।
यदा कृणोषि नदनुं समूहस्यादित्पितेव हूयसे ॥२॥
*abhrātṛvyo anā tvamanāpirindra januṣā sanādasi / yudhedāpitvamichchhase //1 //*
*na kī revantaṁ sakhyāya vindase pīyanti te surāśvaḥ /*
*yadā kṛṇoṣi nadanuṁ samūhasyāditpiteva hūyase //2 //*

सा. (Sv.) १४१३-१४१४

यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारममर्त्यम् । अस्य यज्ञस्य सुक्रतुम् ॥१॥
अपांनपातं सुभगं सुदीदितिमग्निमु श्रेष्ठशोचिषम् ।
स नो मित्रस्य वरुणस्य सो अपामा सुम्नं यक्षते दिवि ॥२॥
*yajiṣṭhaṁ tvā vavṛmahe devaṁ devatrā hotāramamartyam / asya yajñasya sukratum //1 //*
*apāṁnapātaṁ subhagaṁ sudīditimagnimu śreṣṭhaśochiṣam /*
*sa no mitrasya varuṇasya so apāmā sumnaṁ yakṣate divi //2 //*

३. मरुतः (Marutaḥ) - सा. (Sv.) ४०१; ४०४

सा. (Sv.) ४०१

आ गन्ता मा रिषण्यत प्रस्थावानो माप स्थात समन्यवः। दृढां चिद्यमयिष्णवः ॥३॥
*ā gantā mā riṣaṇyata prasthāvāno māpa sthāta samanyavaḥ /*
*dṛḍhāṁ chidyamayiṣṇavaḥ //3 //*

सा. (Sv.) ४०४

गावश्चिद्धा समन्यवः सजात्येन मरुतः सबन्धवः। रिहते ककुभो मिथः ॥६॥
*gāvaśchiddhā samanyavaḥ sajātyena marutaḥ sabandhavaḥ / rihate kakubho mithaḥ //6 //*

## ७७८. संकुसुको यामायनः (Saṁkusuka of Yamāyana)

१. त्वष्टा (Tvaṣṭā) - ऋ. (Rv.) १०.१८.६

आ रोहतायुर्जरसं वृणाना अनुपूर्वं यतमाना यति ष्ठ ।
इह त्वष्टा सुजनिमा सजोषा दीर्घमायुः करति जीवसे वः ॥६॥
*ā rohatāyurjarasaṁ vṛṇānā anupūrvaṁ yatamānā yati ṣṭha /*
*iha tvaṣṭā sujanimā sajoṣā dīrghamāyuḥ karati jīvase vaḥ //6 //*

२. धाता (Dhātā) - ऋ. (Rv.) १०.१८.५

यथाहान्यनुपूर्वं भवन्ति यथ ऋतव ऋतुभिर्यन्ति साधु ।
यथा न पूर्वमपरो जहात्येवा धारायूंषि कल्पयैषाम् ॥५॥
*yathāhānyanupūrvaṁ bhavanti yatha ṛtava ṛtubhiryanti sādhu /*
*yathā na pūrvamaparo jahātyevā dhārāyūṁṣi kalpayaiṣām //5 //*

३. पितृमेधः (Mantras related to last rites) - ऋ. (Rv.) १०.१८.७-१३

इमा नारीरविधवाः सुपत्नीरांजनेन सर्पिषा सं विशन्तु ।
अनश्रवोऽनमीवाः सुरत्ना आ रोहन्तु जनयो योनिमग्रे ॥७॥
उदीर्ष्व नार्यभि जीवलोकं गतासुमेतमुप शेष एहि ।
हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभि सं बभूथ ॥८॥
धनुर्हस्तादाददानो मृतस्यास्मे क्षत्राय वर्चसे बलाय ।
अत्रैव त्वमिह वयं सुवीरा विश्वाः स्पृधो अभिमातीर्जयेम ॥९॥
उप सर्प मातरं भूमिमेतामुरुव्यचसं पृथिवीं सुशेवाम् ।
ऊर्णम्रदा युवतिर्दक्षिणावत एषा त्वा पातु निरृतेरुपस्थात् ॥१०॥
उच्छ्वञ्चस्व पृथिवि मा नि बाधथाः सूपायनास्मै भव सूपवञ्चना ।
माता पुत्रं यथा सिचाभ्येनं भूम ऊर्णुहि ॥११॥
उच्छ्वञ्चमाना पृथिवी सु तिष्ठतु सहस्रं मित उप हि श्रयन्ताम् ।
ते गृहासो घृतश्चुतो भवन्तु विश्वाहास्मै शरणाः सन्त्वत्र ॥१२॥
उत्ते स्तभ्नामि पृथिवीं त्वत्परीमं लोगं निदधन्मो अहं रिषम् ।
एतां स्थूणां पितरो धारयन्तु तेऽत्रा यमः सादना ते मिनोतु ॥१३॥
प्रतीचीने मामहनीष्वाः पर्णमिवा दधुः । प्रतीचीं जग्रभा वाचमश्वं रशनया यथा ॥१४॥
*imā nārīravidhavāḥ supatnīrāṁjanena sarpiṣā saṁ viśantu /*
*anaśravo'namīvāḥ suratnā ā rohantu janayo yonimagre //7 //*
*udīrṣva nāryabhi jīvalokaṁ gatāsumetamupa śeṣa ehi /*
*hastagrābhasya didhiṣostavedaṁ patyurjanitvamabhi saṁ babhūtha //8 //*
*dhanurhastādādadāno mṛtasyāsme kṣatrāya varchase balāya /*
*atraiva tvamiha vayaṁ suvīrā viśvāḥ spṛdho abhimātīrjayema //9 //*
*upa sarpa mātaraṁ bhūmimetāmuruvyachasaṁ pṛthivīṁ suśevām /*
*ūrṇamradā yuvatirdakṣiṇāvata eṣā tvā pātu nirṛterupasthāt //10 //*
*uchchhvaṁṁchasva pṛthivi mā ni bādhathāḥ sūpāyanāsmai bhava sūpavaṁchanā /*
*mātā putraṁ yathā sichābhyenaṁ bhūma ūrṇuhi //11 //*
*uchchhvaṁṁchamānā pṛthivī su tiṣṭhatu sahasraṁ mita upa hi śrayantām /*
*te gṛhāso ghṛtaśchuto bhavantu viśvāhāsmai śaraṇāḥ santvatra //12 //*
*utte stabhnāmi pṛthivīṁ tvatparīmaṁ logaṁ nidadhanmo ahaṁ riṣam /*
*etāṁ sthūṇāṁ pitaro dhārayantu te'trā yamaḥ sādanā te minotu //13 //*
*pratīchīne māmahanīṣvāḥ parṇamivā dadhuḥ /*
*pratīchīṁ jagrabhā vāchamaśvaṁ raśanayā yathā //14 //*

४. पितृमेधः प्रजापतिर् वा (Mantras for Last rites or Prajāpati) - ऋ. (Rv.) १०.१८.१४

प्रतीचीने मामहनीष्वाः पर्णमिवा दधुः। प्रतीची जग्रभा वाचमश्वं रशनया यथा ॥१४॥
*pratīchīne māmahanīṣvāḥ parṇamivā dadhuḥ /*
*pratīchī jagrabhā vāchamaśvaṁ raśanayā yathā //14 //*

## ७७९. संवरणः प्राजापत्यः (Saṁvaraṇaḥ Prājāpatyaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ५.३३.१-१०; ५.३४.१-९

ऋ. (Rv.) ५.३३.१-१०

महि महे तवसे दीध्ये नॄनिन्द्रायेत्था तवसे अतव्यान् ।
यो अस्मै सुमतिं वाजसातौ स्तुतो जने समर्यश्चिकेत ॥१॥
स त्वं न इन्द्र धियसानो अर्कैर्हरीणां वृषयोक्त्रमश्रेः ।
या इत्था मघवन्ननु जोषं वक्षो अभि प्रार्यः सक्षि जनान् ॥२॥
न ते त इन्द्राभ्य३स्मदृष्वायुक्तासो अब्रह्मता यदसन् ।
तिष्ठा रथमधि तं वज्रहस्ता रश्मिं देव यमसे स्वश्वः ॥३॥
पुरू यत्त इन्द्र सन्त्युक्था गवे चकर्थोर्वरासु युध्यन् ।
ततक्षे सूर्याय चिदोकसि स्वे वृषा समत्सु दासस्य नाम चित् ॥४॥
वयं ते त इन्द्र ये च नरः शर्धो जज्ञाना याताश्च रथाः ।
आस्मांजगम्यादहिशुष्म सत्वा भगो न हव्यः प्रभृथेषु चारुः ॥५॥
पपृक्षेण्यमिन्द्र त्वे ह्योजो नृम्णानि च नृतमानो अमर्तः ।
स न एनीं वसवानां रयिं दाः प्रायः स्तुषे तुविमघस्य दानम् ॥६॥
एवा न इन्द्रोतिभिरव पाहि गृणतः शूर कारून् ।
उत त्वचं ददतो वाजसातौ पिप्रीहि मध्वः सुषुतस्य चारोः ॥७॥
उत त्ये मा पौरुकुत्स्यस्य सुरेस्त्रसदस्योर्हिरणिनो रराणाः ।
वहन्तु मा दश श्येतासो अस्य गैरिक्षितस्य क्रतुभिर्नु सश्चे ॥८॥
उत त्ये मा मारुताश्वस्य शोणाः क्रत्वामघासो विदथस्य रातौ ।
सहस्रा मे च्यवतानो ददान आनूकमर्यो वपुषे नार्चत् ॥९॥
उत त्ये मा ध्वन्यस्य जुष्टा लक्ष्मण्यस्य सुरुचो यतानाः ।
मह्ना रायः संवरणस्य ऋषेर्व्रजं न गावः प्रयता अपि ग्मन् ॥१०॥

*mahi mahe tavase dīdhye nṝnindrāyetthā tavase atavyān /*
*yo asmai sumatiṁ vājasātau stuto jane samaryaśchiketa //1 //*
*sa tvaṁ na indra dhiyasāno arkairharīṇāṁ vṛṣayoktramaśreḥ /*
*yā itthā maghavannanu joṣaṁ vakṣo abhi prāryaḥ sakṣi janān //2 //*
*na te ta indrābhya3smadṛṣvāyuktāso abrahmatā yadasan /*
*tiṣṭhā rathamadhi taṁ vajrahastā raśiṁma deva yamase svaśvaḥ //3 //*
*purū yatta indra santyukthā gave chakarthorvarāsu yudhyan /*
*tatakṣe sūryāya chidokasi sve vṛṣā samatsu dāsasya nāma chit //4 //*
*vayaṁ te ta indra ye cha naraḥ śardho jajñānā yātāścha rathāḥ /*
*āsmāṁjagamyādahiśuṣma satvā bhago na havyaḥ prabhṛtheṣu chāruḥ //5 //*
*papṛkṣeṇyamindra tve hyojo nṛmṇāni cha nṛtamāno amartaḥ /*
*sa na enīṁ vasavānāṁ rayiṁ dāḥ prāyaḥ stuṣe tuvimaghasya dānam //6 //*
*evā na indrotibhirava pāhi gṛṇataḥ śūra kārūn /*
*uta tvachaṁ dadato vājasātau piprīhi madhvaḥ suṣutasya chāroḥ //7 //*
*uta tye mā paurukutsyasya surestrasadasyorhiraṇino rarāṇāḥ /*
*vahantu mā daśa śyetāso asya gaurikṣitasya kratubhirnu saśche //8 //*
*uta tye mā mārutāśvasya śoṇāḥ kratvāmaghāso vidathasya rātau /*
*sahasrā me chyavatāno dadāna ānūkamaryo vapuṣe nārchat //9 //*
*uta tye mā dhvanyasya juṣṭā lakṣamaṇyasya surucho yatānāḥ /*
*mahnā rāyaḥ saṁvaraṇasya ṛṣervrajaṁ na gāvaḥ prayatā api gman //10 //*

ऋ. (Rv.) ५.३४.१-९

अजातशत्रुमजरा स्वर्वत्यनु स्वधामिता दस्ममीयते ।
सुनोतन पचत ब्रह्मवाहसे पुरुष्टुताय प्रतरं दधातन ॥१॥
आ यः सोमेन जठरमपिप्रतामन्दत मघवा मध्वो अन्धसः ।
यदीं मृगाय हन्तवे महावधः सहस्रभृष्टिमुशना वधं यमत् ॥२॥
यो अस्मै घ्रंस उत वा य ऊधनि सोमं सुनोति भवति द्युमाँ अह ।
अपाप शुक्रस्ततनुष्टिमूहति तनूशुभ्रं मघवा यः कवासखः ॥३॥
यस्यावधीत्पितरं यस्य मातरं यस्य शक्रो भ्रातरं नात ईषते ।
वेतीद्वस्य प्रयता यतंकरो न किल्बिषादीषते वस्व आकरः ॥४॥

न पंचभिर्दशभिर्वष्ट्यारभं नासुन्वता सचते पुष्यता चन ।
जिनाति वेदमुया हन्ति वा धुनिरा देवयुं भजति गोमति व्रजे ॥५॥
वित्वक्षणः समृतौ चक्रमासजोऽसुन्वतो विषुणः सुन्वतो वृधः ।
इन्द्रो विश्वस्य दमिता बिभीषणो यथावशं नयति दासमार्यः ॥६॥
समीं पणेरजति भोजनं मुषे वि दाशुषे भजति सूनरं वसु ।
दुर्गे चन ध्रियते विश्व आ पुरु जनो यो अस्य तविषीमचुक्रुधत् ॥७॥
सं यज्जनौ सुधनौ विश्वशर्धसाववेदिन्द्रो मघवा गोषु शुभ्रिषु ।
युजं ह्य१न्यमकृत प्रवेपन्युदीं गव्यं सृजते सत्वभिर्धुनिः ॥८॥
सहस्रसामाग्निवेशिं गृणीषे शत्रिमग्न उपमां केतमर्यः ।
तस्मा आपः संयतः पीपयन्त तस्मिन्क्षत्रममवत्त्वेषमस्तु ॥९॥
*ajātaśatrumajarā svarvatyanu svadhāmitā dasmamīyate /*
*sunotana pachata brahmavāhase puruṣṭutāya prataraṁ dadhātana //1 //*
*ā yaḥ somena jaṭharamapipratāmandata maghavā madhvo andhasaḥ /*
*yadīṁ mṛgāya hantave mahāvadhaḥ sahasrabhṛṣṭimuśanā vadhaṁ yamat //2 //*
*yo asmai ghraṁsa uta vā ya ūdhani somaṁ sunoti bhavati dyumām̐ aha /*
*apāpa śukrastatanuṣṭimūhati tanūśubhraṁ maghavā yaḥ kavāsakhaḥ //3 //*
*yasyāvadhītpitaraṁ yasya mātaraṁ yasya śakro bhrātaraṁ nāta īṣate /*
*vetīdvasya prayatā yataṁkaro na kilviṣādīṣate vasva ākaraḥ //4 //*
*na paṁchabhirdaśabhirvaṣṭyārabhaṁ nāsunvatā sachate puṣyatā chana /*
*jināti vedamuyā hanti vā dhunirā devayuṁ bhajati gomati vraje //5 //*
*vitvakṣaṇaḥ samṛtau chakramāsajo'sunvato viṣuṇaḥ sunvato vṛdhaḥ /*
*indro viśvasya damitā bibhīṣaṇo yathāvaśaṁ nayati dāsamāryaḥ //6 //*
*samīṁ paṇerajati bhojanaṁ muṣe vi dāśuṣe bhajati sūnaraṁ vasu /*
*durge chana dhriyate viśva ā puru jano yo asya taviṣīmachukrudhat //7 //*
*saṁ yajjanau sudhanau viśvaśardhasāvavedindro maghavā goṣu śubhriṣu /*
*yujaṁ hya1nyamakṛta pravepanyudīṁ gavyaṁ sṛjate satvabhirdhuniḥ //8 //*
*sahasrasāmāgniveśiṁ gṛṇīṣe śatrimagna upamāṁ ketamaryaḥ /*
*tasmā āpaḥ saṁyataḥ pīpayanta tasminkṣatramamavattveṣamastu //9 //*

### ७८०. संवर्त आंगिरसः (साग्री. ४४३; ४५१); संवर्त (ऋसर्व.); वामदेवः (सार्षेदी.) (Saṁvarta Āṁgirasaḥ [Ssb. 443; 451]; Saṁvarta [Rss.]; Vāmadevaḥ [Sad.])

१. उषा (Uṣā) - ऋ. (Rv.) १०.१७२.१-४; सा. (Sv.) ४४३; ४५१

ऋ. (Rv.) १०.१७२.१-४

आ याहि वनसवा सह गावः सचन्त वर्तनिं यदूधभिः ॥१॥
आ याहि वस्व्या धिया मंहिष्ठो जारयन्मखः सुदानुभिः ॥२॥
पितुभृतो न तन्तुमित्सुदानवः प्रति दध्मो यजामसि ॥३॥
उषा अप स्वसुस्तमः सं वर्तयति वर्तनिं सुजातता ॥४॥
*ā yāhi vanasavā saha gāvaḥ sachanta vartaniṁ yadūdhabhiḥ //1 //*
*ā yāhi vasvyā dhiyā maṁhiṣṭho jārayanmakhaḥ sudānubhiḥ //2 //*
*pitubhṛto na tantumitsudānavaḥ prati dadhmo yajāmasi //3 //*
*uṣā apa svasustamaḥ saṁ vartayati vartaniṁ sujātatā //4 //*

सा. (Sv.) ४४३

आ याहि वनसा सह गावः सचन्त वर्तनिं यदूधभिः ॥७॥
*ā yāhi vanasā saha gāvaḥ sachanta vartaniṁ yadūdhabhiḥ //7 //*

सा. (Sv.) ४५१

उषा अप स्वसुष्टमः सं वर्तयति वर्तनि सुजातता ॥५॥
*uṣā apa svasuṣṭamaḥ saṁ vartayati vartani sujātatā //5 //*

### ७८१. संवननः (Saṁvananaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १०.१९१.१

संसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ। इळस्पदे समिध्यसे स नो वसून्या भर ॥१॥
*saṁsamidyuvase vṛṣannagne viśvānyarya ā । iḷaspade samidhyase sa no vasūnyā bhara ॥1॥*

२. संज्ञानम् (Saṁjñānam) - ऋ. (Rv.) १०.१९१.२-४

संगच्छध्वं सं वदध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे संजनाना उपासते ॥२॥
समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम् ।
समानं मन्त्रमभि मन्त्रये वः समानेन वो हविषा जुहोमि ॥३॥
समानी व आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ॥४॥
*saṁgachchhadhvaṁ saṁ vadadhvaṁ saṁ vo manāṁsi jānatām ।*
*devā bhāgaṁ yathā pūrve saṁjanānā upāsate ॥2॥*
*samāno mantraḥ samitiḥ samānī samānaṁ manaḥ saha chittameṣām ।*
*samānaṁ mantramabhi mantraye vaḥ samānena vo haviṣā juhomi ॥3॥*
*samānī va ākūtiḥ samānā hṛdayāni vaḥ ।*
*samānamastu vo mano yathā vaḥ susahāsati ॥4॥*

## ७८२. स्तम्बमित्रः (Stambamitraḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १०.१४२.७; ८

अपामिदं नययनं समुद्रस्य निवेशनम्। अन्यं कुणुष्वेतः पन्थां तेन याहि वशाँ अनु ॥७॥
आयने ते परायणे दूर्वा रोहन्तु पुष्पिणीः। ह्रदाश्च पुण्डरीकाणि समुद्रस्य गृहा इमे ॥८॥
*apāmidaṁ nayayanaṁ samudrasya niveśanam ।*
*anyaṁ kuṇuṣvetaḥ panthāṁ tena yāhi vaśāṁ̐ anu ॥7॥*
*āyane te parāyaṇe dūrvā rohantu puṣpiṇīḥ ।*
*hradāścha puṇḍarīkāṇi samudrasya gṛhā ime ॥8॥*

## ७८३. स्यूमरश्मिर्भार्गवः (Syūmaraśmi of Bhṛgu)

१. मरुतः (Marutaḥ) - ऋ. (Rv.) १०.७७.१-८; १०.७८.१-८

ऋ. (Rv.) १०.७७.१-८

अभ्रप्रुषो न वाचा प्रुषा वसु हविष्मन्तो न यज्ञा विजानुषः ।
सुमारुतं न ब्रह्माणमर्हसे गणमस्तोष्येषां न शोभसे ॥१॥
श्रिये मर्यासो अंजीँरकृण्वत सुमारुतं न पूर्वीरति क्षपः ।
दिवस्पुत्रास एता न येतिर आदित्यासस्ते अक्रा न वावृधुः ॥२॥
प्र ये दिवः पृथिव्या न बर्हणा त्मना रिरिच्रे अभ्रान्न सूर्यः ।
पाजस्वन्तो न वीराः पनस्यवो रिशादसो न मर्या अभिद्यवः ॥३॥
युष्माकं बुध्ने अपां न यामनि विथुर्यति न मही श्रथर्यति ।
विश्वप्सुर्यज्ञो अर्वागयं सु वः प्रयस्वन्तो न सत्राच आ गत ॥४॥
यूयं धूर्षु प्रयुजो न रश्मिभिर्ज्योतिष्मन्तो न भासा व्युष्टिषु ।
श्येनासो न स्वयशसो रिशदसः प्रवासो न प्रसितासः परिप्रुषः ॥५॥
प्र यद्वहध्वे मरुतः पराकाद्यूयं महः संवरणस्य वस्वः ।
विदानासो वसवो राध्यस्याराच्चिद् द्वेषः सनुतर्युयोत ॥६॥
य उद्टचि यज्ञे अध्वरेष्ठा मरुद्भ्यो न मानुषो ददाशत् ।
रेवत्स वयो दधते सुवीरं स देवानामपि गोपीथे अस्तु ॥७॥
ते हि यज्ञेषु यज्ञियास ऊमा आदित्येन नाम्ना शम्भविष्ठाः ।
ते नोऽवन्तु रथतूर्मनीषां महश्च यामन्नध्वरे चकानाः ॥८॥
*abhrapruṣo na vāchā pruṣā vasu haviṣmanto na yajñā vijānuṣaḥ ।*
*sumārutaṁ na brahmāṇamarhase gaṇamastoṣyeṣāṁ na śobhase ॥1॥*
*śriye maryāso aṁjīṁ̐rakṛṇvata sumārutaṁ na pūrvīrati kṣapaḥ ।*
*divasputrāsa etā na yetira ādityāsaste akrā na vāvṛdhuḥ ॥2॥*
*pra ye divaḥ pṛthivyā na barhaṇā tmanā ririchre abhrānna sūryaḥ ।*

*pājasvanto na vīrāḥ panasyavo riśādaso na maryā abhidyavaḥ ॥3 ॥*
*yuṣmākaṁ budhne apāṁ na yāmani vithuryati na mahī śratharyati ।*
*viśvapsuryajño arvāgayaṁ su vaḥ prayasvanto na satrācha ā gata ॥4 ॥*
*yūyaṁ dhūrṣu prayujo na raśmibhirjyotiṣmanto na bhāsā vyuṣṭiṣu ।*
*śyenāso na svayaśaso riśadasaḥ pravāso na prasitāsaḥ paripruṣaḥ ॥5 ॥*
*pra yadvahadhve marutaḥ parākādyūyaṁ mahaḥ saṁvaraṇasya vasvaḥ ।*
*vidānāso vasavo rādhyasyārāchchid dveṣaḥ sanutaryuyota ॥6 ॥*
*ya udṛchi yajñe adhvareṣṭhā marudbhyo na mānuṣo dadāśat ।*
*revatsa vayo dadhate suvīraṁ sa devānāmapi gopīthe astu ॥7 ॥*
*te hi yajñeṣu yajñiyāsa ūmā ādityena nāmnā śambhaviṣṭhāḥ ।*
*te no'vantu rathatūrmanīṣāṁ mahaścha yāmannadhvare chakānāḥ ॥8 ॥*

ऋ. (Rv.) १०.७८.१-८

विप्रासो न मन्मभिः स्वाध्यो देवाव्यो३ न यज्ञैः स्वप्नसः ।
राजानो न चित्राः सुसंदृशः क्षितीनां न मर्या अरेपसः ॥१॥
अग्निर्न ये भ्राजसा रुक्मवक्षसो वातासो न स्वयुजः सद्यऊतयः ।
प्रज्ञातारो न ज्येष्ठाः सुनीतयः सुशर्माणो न सोमा ऋतं यते ॥२॥
वातासो न ये धुनयो जिगत्नवोऽग्नीनां न जिह्वा विरोकिणः ।
वर्मण्वन्तो न योधाः शिमीवन्तः पितृणां न शंसाः सुरातयः ॥३॥
रथानां न ये१राः सनाभ्यो जिगीवांसो न शूरा अभिद्यवः ।
वरेयवो न मर्या घृतप्रुषोऽभिस्वर्तारो अर्कं न सुष्टुभः ॥४॥
अश्वासो न ये ज्येष्ठास आशवो दिधिषवो न रथ्यः सुदानवः ।
आपो न निम्नैरुदभिर्जिगत्नवो विश्वरूपा अंगिरसो न सामभिः ॥५॥
ग्रवाणो न सूरयः सिन्धुमातर आदर्दिरासो अद्रयो न विश्वहा ।
शिशूला न क्रीळयः सुमातरो महाग्रामो न यामन्नुत त्विषा ॥६॥
उषसां न केतवोऽध्वरश्रियः शुभंयवो नाञ्जिभिर्व्यश्वितन् ।
सिन्धवो न ययियो भ्राजदृष्टयः परावतो न योजनानि ममिरे ॥७॥
सुभागान्नो देवाः कृणुता सुरत्नानस्मान्त्सतोतृन्मरुतो वावृधानाः ।
अधि स्तोत्रस्य सख्यस्य गात सनाद्धि वो रत्नधेयानि सन्ति ॥८॥

*viprāso na manmabhiḥ svādhyo devāvyo3 na yajñaiḥ svapnasaḥ ।*
*rājāno na chitrāḥ susaṁdṛśaḥ kṣitīnāṁ na maryā arepasaḥ ॥1 ॥*
*agnirna ye bhrājasā rukmavakṣaso vātāso na svayujaḥ sadyaūtayaḥ ।*
*prajñātāro na jyeṣṭhāḥ sunītayaḥ suśarmāṇo na somā ṛtaṁ yate ॥2 ॥*
*vātāso na ye dhunayo jigatnavo'gnīnāṁ na jihvā virokiṇaḥ ।*
*varmaṇvanto na yodhāḥ śimīvantaḥ pitṛṇāṁ na śaṁsāḥ surātayaḥ ॥3 ॥*
*rathānāṁ na ye1rāḥ sanābhyo jigīvāṁso na śūrā abhidyavaḥ ।*
*vareyavo na maryā ghṛtapruṣo'bhisvartāro arkaṁ na suṣṭubhaḥ ॥4 ॥*
*aśvāso na ye jyeṣṭhāsa āśavo didhiṣavo na rathyaḥ sudānavaḥ ।*
*āpo na nimnairudabhirjigatnavo viśvarūpā aṁgiraso na sāmabhiḥ ॥5 ॥*
*gravāṇo na sūrayaḥ sindhumātara ādardirāso adrayo na viśvahā ।*
*śiśūlā na krīḷayaḥ sumātaro mahāgrāmo na yāmannuta tviṣā ॥6 ॥*
*uṣasāṁ na ketavo'dhvaraśriya: śubhaṁyavo nāñjibhirvyaśvitan ।*
*sindhavo na yayiyo bhrājadṛṣṭayaḥ parāvato na yojanāni mamire ॥7 ॥*
*subhāgānno devāḥ kṛṇutā suratnānasmāntsatotṛnmaruto vāvṛdhānāḥ ।*
*adhi stotrasya sakhyasya gāta sanāddhi vo ratnadheyāni santi ॥8 ॥*

## ७८४. स्वयम्भुर् ब्रह्म (Svayambhu Brahma)

१. आत्मा (Ātmā) - य. (Yv.) ३२.४

एषो ह देवः प्रदिशोऽनु सर्वाः पूर्वो ह जातः सऽउ गर्भेऽअन्तः ।
सऽएव जातः स जनिष्यमाणः प्रत्यङ् जनास्तिष्ठति सर्वतोमुखः ॥४॥

*eṣo ha devaḥ pradiśo'nu sarvāḥ pūrvo ha jātaḥ sa'u garbhe'antaḥ ।*
*sa'eva jātaḥ sa janiṣyamāṇaḥ pratyaṅ janāstiṣṭhati sarvatomukhaḥ ॥4 ॥*

२. परमात्मा (Paramātmā) - य. (Yv.) ३२.१; २; ६-८; १०-१२

य. (Yv.) ३२.१-२

तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः । तदेव शुक्रं तद् ब्रह्म ताऽआपः स प्रजापतिः ॥१॥
सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि । नैनमूर्ध्वं न तिर्य्यंचं न मध्ये परि जग्रभत् ॥२॥
*tadevāgnistadādityastadvāyustadu chandramāḥ |*
*tadeva śukraṁ tad brahma tā'āpaḥ sa prajāpatiḥ ||1||*
*sarve nimeṣā jajñire vidyutaḥ puruṣādadhi |*
*nainamūrdhvaṁ na tiryyaṁchaṁ na madhye pari jagrabhat ||2||*

य. (Yv.) ३२.६-८

येन द्यौरुग्रा पृथिवी च दृढा येन स्व स्तभितं येन नाकः ।
यो ऽअन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥६॥
यं क्रन्दसीऽअवसा तस्तभानेऽअभ्यैक्षेतां मनसा रेजमाने ।
यत्राधि सूरऽउदितो विभाति कस्मै देवाय हविषा विधेम ।आपो ह यद्बृहतीर्यश्चिदापः ॥७॥
वेनस्तत्पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम् ।
तस्मिन्निदं सं च वि चैति सर्वं सऽओतः प्रोतश्च विभूः प्रजासु ॥८॥
*yena dyaurugrā pṛthivī cha dṛḍhā yena sva stabhitaṁ yena nākaḥ |*
*yo 'antarikṣe rajaso vimānaḥ kasmai devāya haviṣā vidhema ||6||*
*yaṁ krandasī'avasā tastabhāne'abhyaikṣetāṁ manasā rejamāne |*
*yatrādhi sūra'udito vibhāti kasmai devāya haviṣā vidhema |*
*āpo ha yadbṛhatīryaśchidāpaḥ ||7||*
*venastatpaśyannihitaṁ guhā sadyatra viśvaṁ bhavatyekanīḍam |*
*tasminnidaṁ saṁ cha vi chaiti sarvaṁ sa'otaḥ protaścha vibhūḥ prajāsu ||8||*

य. (Yv.) ३२.१०-१२

स नो बन्धुर्जनिता स विधाता धामानि वेदभुवनानि विश्वा ।
यत्र देवाऽअमृतमानशानास्तृतीये धामन्नध्यैरयन्त ॥१०॥
परीत्य भूतानि परीत्य लोकान् परीत्य सर्वाः प्रदिशो दिशश्च ।
उपस्थाय प्रथमजा मृतस्यात्मनात्मानमभि सं विवेश ॥११॥
परि द्यावापृथिवी सद्यऽइत्वा परि लोकान् परि दिशः परि स्वः ।
ऋतस्य तन्तुं विततं विच्त्य तदपश्यत्तदभवत्तदा सीत् ॥१२॥
*sa no bandhurjanitā sa vidhātā dhāmāni vedabhuvanāni viśvā |*
*yatra devā'amṛtamānaśānāstṛtīye dhāmannadhyairayanta ||10||*
*parītya bhūtāni parītya lokān parītya sarvāḥ pradiśo diśaścha |*
*upasthāya prathamajā mṛtasyātmanātmānamabhi saṁ viveśa ||11||*
*pari dyāvāpṛthivī sadya'itvā pari lokān pari diśaḥ pari svaḥ |*
*ṛtasya tantuṁ vitataṁ vichtya tadapaśyattadabhavattadā sīt ||12||*

३. परमेश्वरः (Parameśvaraḥ) - य. (Yv.) ३२.५

यस्माज्जातं न पुरा किं चनैव य आबभूव भुवनानि विश्वा ।
प्रजापतिः प्रजया संरराणस्त्रीणि ज्योतींषि सचते स षोडशी ॥५॥
*yasmājjātaṁ na purā kiṁ chanaiva ya ābabhūva bhuvanāni viśvā |*
*prajāpatiḥ prajayā saṁrarāṇastrīṇi jyotīṁṣi sachate sa ṣoḍaśī ||5||*

४. विद्वान् (Vidvān) - य. (Yv.) ३२.९

प्र तद्वोचेदमृतं नु विद्वान् गन्धर्वो धाम विभृतं गुहा सत् ।
त्रीणि पदानि निहिता गुहा स्य यस्तानि वेद स पितुः पितासत् ॥९॥
*pra tadvochedamṛtaṁ nu vidvān gandharvo dhāma vibhṛtaṁ guhā sat |*
*trīṇi padāni nihitā guhā sya yastāni veda sa pituḥ pitāsat ||9||*

५. हिरण्यगर्भः परमात्मा (Hiraṇyagarbha Paramātmā) - य. (Yv.) ३२.३

न तस्य प्रतिमाऽअस्ति यस्य नाम महद्यशः ।
हिरण्यगर्भऽइत्येष मा मा हिंसीदित्येषा यस्मान्न जातऽइत्येषः ॥३॥

*na tasya pratimā'asti yasya nāma mahadyaśaḥ* ।
*hiraṇyagarbha'ityeṣa mā mā hiṁsīdityeṣā yasmānna jāta'ityeṣaḥ* ॥3॥

## ७८५. स्वस्त्यात्रेयः (Svastyātreyaḥ)

१. अग्निः (Agniḥ) - य. (Yv.) २१.१२

समिद्धोऽअग्निः समिधा सुसमद्धो वरेण्यः । गायत्री छन्दऽइन्द्रियं त्र्यविर्गौर्वयो दधुः ॥१२॥
*samiddho'agniḥ samidhā susamaddho vareṇyaḥ* ।
*gāyatrī chhanda'indriyaṁ trayavirgaurvayo dadhuḥ* ॥12॥

२. अग्न्यश्वेन्द्रसरस्वत्याद्या लिंगोक्ताः (Agnyaśvendrasarasvatyādyā Liṁgoktāḥ) - य. (Yv.) २१.२९

होता यक्षत्समिधाग्निमिडस्पदेऽश्विनेन्द्रं सरस्वतीमजो धूम्रो न गोधूमैः कुवलैर्भेषजं मधु शष्पैर्न तेजऽइन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥२९॥
*hotā yakṣatsamidhāgnimiḍaspade'śvinendraṁ sarasvatīmajo dhūmro na godhūmaiḥ kuvalairbheṣajaṁ madhu śaṣpairna teja'indriyaṁ payaḥ somaḥ parisrutā ghṛtaṁ madhu vyantvājyasya hotaryaja* ॥29॥

३. अग्न्यादयः (Agnyādayaḥ) - य. (Yv.) २१.५९

अग्निमद्य होतारमवृणीतायं यजमानः पचन पक्तीः पचन् पुरोडाशान् बध्नन्नश्विभ्यां छागं सरस्वत्यै मेषमिन्द्रायऽऋषभं सुन्वन्नश्विभ्यां सरस्वत्याऽइन्द्राय सुत्राम्णे सुरासोमान् ॥५९॥
*agnimadya hotāramavṛṇītāyaṁ yajamānaḥ pachana paktīḥ pachan puroḍāśān badhnannaśvibhyāṁ chhāgaṁ sarasvatyai meṣamindrāya'ṛṣabhaṁ sunvannaśvibhyāṁ sarasvatyā'indrāya sutrāmṇe surāsomān* ॥59॥

४. अश्व्यादयः (Aśvyādayaḥ) - य. (Yv.) २१.३०; ३१; ३३-४०; ४६; ४७; ४९-५०

य. (Yv.) २१.३०-३१

होता यक्षत्तनूनपात्सरस्वतीमविर्मेषो न भेषजं पथा मधुमता भरन्नश्विनेन्द्राय वीर्यं बदरैरुपवाकाभिर्भेषजं तोक्मभिः पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥३०॥
होतायक्षन्नराशंसं न नग्नहुं पतिं सुरया भेषजं मेषः सरस्वती भिषग्रथो न चन्द्यश्विनोर्वपाऽइन्द्रस्य वीर्यं बदरैरुपवाकाभिर्भेषजं तोक्मभिः पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥३१॥
*hotā yakṣattanūnapātsarasvatīmavirmeṣo na bheṣajaṁ pathā madhumatā bharannaśvinendrāya vīryaṁ badarairupavākābhirbheṣajaṁ tokmabhiḥ payaḥ somaḥ parisrutā ghṛtaṁ madhu vyantvājyasya hotaryaja* ॥30॥
*hotāyakṣannarāśaṁsaṁ na nagnahuṁ patiṁ surayā bheṣajaṁ meṣaḥ sarasvatī bhiṣagratho na chandyaśvinorvapā'indrasya vīryaṁ badarairupavākābhirbheṣajaṁ tokmabhiḥ payaḥ somaḥ parisrutā ghṛtaṁ madhu vyantvājyasya hotaryaja* ॥31॥

य. (Yv.) २१.३३-४०

होता यक्षद् बर्हिरूर्णम्रदा भिषङ् नासत्या भिषजाश्विनाश्वा शिशुमती भिषग्धेनुः सरस्वती भिषग्दुहऽइन्द्राय भेषजं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतयर्ज ॥३३॥
होता यक्षद्दुरो दिशः कवष्यो न व्यचस्वतीरश्विभ्यां न दुरो दिशऽइन्द्रो न रोदसी दुघे दुहे धेनुः सरस्वत्यश्विनेन्द्राय भेषजं शुक्रं न ज्योतिरिन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥३४॥
होता यक्षत्सुपेशसोषे नक्तं दिवाश्विना समंजाते सरस्वत्या त्विषिमिन्द्रे न भेषजं श्येनो न रजसा हृदा श्रिया न मासरं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥३५॥
होता यक्षद्दैव्या होतारा भिषजाश्विनेन्द्रं न जागृवि दिवा नक्तं न भेषजैः शूषं सरस्वती भिषक् सीसेन दुहऽइन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥३६॥
होता यक्षत्तिस्रो देवीर्न भेषजं त्रयस्त्रिधातवोऽपसो रूपमिन्द्रे हिरण्यमश्विनेडा न भारती वाचा सरस्वती महऽइन्द्राय दुहऽइन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥३७॥
होता यक्षत्सुरेतसमृषभं नर्यापसं त्वष्टारमिन्द्रमश्विना भिषजं न सरस्वतीमोजो न जूतिरिन्द्रियं वृको न रभमो भिषग् यशः सुरया भेषजं श्रिया न मासरं पयः सोमः परिस्रुता घुतं मधु व्यन्त्वाज्यस्य होतर्यज ॥३८॥
होता यक्षद्वनस्पतिं शमितारं शतक्रतुं भीमं न मन्युं राजानं व्याघ्रं नमसाश्विना भामं सरस्वती भिषगिन्द्राय दुहऽइन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥३९॥

होता यक्षदग्निं स्वाहाज्यस्य स्तोकानां स्वाहा मेदसां पृथक् स्वाहा छागमश्विभ्यां स्वाहा मेषं सरस्वत्यै स्वाहऽऋषभमिन्द्राय सिंहाय सहसऽइन्द्रियं स्वाहाग्निं न भेषजं स्वाहा सोममिन्द्रियं स्वाहेन्द्रं सुत्रामाणं सवितारं वरुणं भिषजां पतिं स्वाहा वनस्पतिं प्रियं पाथो न भेषजं स्वाहा देवाऽआज्यपा जुषाणोऽअग्निर्भेषजं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥४० ॥

*hotā yakṣad barhirūrṇamradā bhiṣaṁ nāsatyā bhiṣajāśvināśvā śiśumatī bhiṣagdhenuḥ sarasvatī bhiṣagduha'indrāya bheṣajaṁ payaḥ somaḥ parisrutā ghṛtaṁ madhu vyantvājyasya hotayarja ॥33 ॥*

*hotā yakṣadduro diśaḥ kavaṣyo na vyachasvatīraśvibhyāṁ na duro diśa'indro na rodasī dughe duhe dhenuḥ sarasvatyaśvinendrāya bheṣajaṁ śukraṁ na jyotirindriyaṁ payaḥ somaḥ parisrutā ghṛtaṁ madhu vyantvājyasya hotaryaja ॥34 ॥*

*hotā yakṣatsupeśasoṣe naktaṁ divāśvinā samaṁjāte sarasvatyā tviṣimindre na bheṣajaṁ śyeno na rajasā hṛdā śriyā na māsaraṁ payaḥ somaḥ parisrutā ghṛtaṁ madhu vyantvājyasya hotaryaja ॥35 ॥*

*hotā yakṣaddaivyā hotārā bhiṣajāśvinendraṁ na jāgṛvi divā naktaṁ na bheṣajaiḥ śūṣaṁ sarasvatī bhiṣak sīsena duha'indriyaṁ payaḥ somaḥ parisrutā ghṛtaṁ madhu vyantvājyasya hotaryaja ॥36 ॥*

*hotā yakṣattisro devīrna bheṣajaṁ trayastridhātavo'paso rūpamindre hiraṇyamaśvineḍā na bhāratī vāchā sarasvatī maha'indrāya duha'indriyaṁ payaḥ somaḥ parisrutā ghṛtaṁ madhu vyantvājyasya hotaryaja ॥37 ॥*

*hotā yakṣatsuretasamṛṣabhaṁ naryāpasaṁ tvaṣṭāramindramaśvinā bhiṣajaṁ na sarasvatīmojo na jūtirindrayaṁ vṛko na rabhamo bhiṣag yaśaḥ surayā bheṣajaṁ śriyā na māsaraṁ payaḥ somaḥ parisrutā ghutaṁ madhu vyantvājyasya hotaryaja ॥38 ॥*

*hotā yakṣadvanaspatiṁ śamitāraṁ śatakratuṁ bhīmaṁ na manyuṁ rājānaṁ vyāghraṁ namasāśvinā bhāmaṁ sarasvatī bhiṣagindrāya duha'indriyaṁ payaḥ somaḥ parisrutā ghṛtaṁ madhu vyantvājyasya hotaryaja ॥39 ॥*

*hotā yakṣadagniṁ svāhājyasya stokānāṁ svāhā medasāṁ pṛthak svāhā chhāgamaśvibhyāṁ svāhā meṣaṁ sarasvatyai svāha'ṛṣabhamindrāya siṁhāya sahasa'indriyaṁ svāhāgniṁ na bheṣajaṁ svāhā somamindriyaṁ svāhendraṁ sutrāmāṇaṁ savitāraṁ varuṇaṁ bhiṣajāṁ patiṁ svāhā vanaspatiṁ priyaṁ pātho na bheṣajaṁ svāhā devā'ājyapā juṣāṇo'agnirbheṣajaṁ payaḥ somaḥ parisrutā ghṛtaṁ madhu vyantvājyasya hotaryaja ॥40 ॥*

य. (Yv.) २१.४६-४७

होता यक्षद्वनस्पतिमभि हि पिष्टतमया रभिष्ठया रशनयाधित। यत्राश्विनोश्छागस्य हविषः प्रिया धामानि यत्रसरस्वत्या मषस्य हविषः प्रिया धामानि यत्रेन्द्रस्यऽऋषभस्य हविषः प्रिया धामानि यत्राग्नेः प्रिया धामानि यत्र सोमस्य प्रिया धामानि यत्रेन्द्रस्य सुत्राम्णः प्रिया धामानि यत्र सवितुः प्रिया धामानि यत्र वरुणस्य प्रिया धामानि यत्र वनस्पतेः प्रिया पाथांसि यत्र देवाना माज्यपानां प्रिया धामानि यत्राग्नेर्होतुः प्रिया धामानि तत्रैतान् प्रस्तुत्येवोपम्तुत्येवोपावस्रक्षद्रभीयसऽइव कृत्वी करदेवं देवो वनस्पतिर्जुषतां हविर्होतर्यज ॥४६ ॥

होता यक्षदग्निं सिव्ष्टकृतमयाडग्निरश्विनोश्छागस्य हविषः प्रिया धामान्ययाट् सरस्वत्या मेषस्य हविषः प्रिया धामान्ययाडिन्द्रस्यऽऋषभस्य हविषः प्रिया धामान्ययाडग्नेः प्रिया धामान्ययाट् सोमस्य प्रिया धामान्यायाडिन्द्रस्य सुत्राम्णः प्रिया धामान्ययाट् सवितुः प्रिया धामान्ययाड् वरुणस्य प्रिया धामान्यायाड् वनस्पतेः प्रिया पाथांस्ययाड. देवानामाज्यपानां प्रिया धामानि यक्षदग्नेर्होतुः प्रिया धामानि यक्षत् स्वं महिमानमायजतामेज्याऽइषः कृणोतु सोऽअध्वरा जातवेदा जुषतां हविर्होतर्यज ॥४७ ॥

*hotā yakṣadvanaspatimabhi hi piṣṭatamayā rabhiṣṭhayā raśanayādhita । yatrāśvinośchhāgasya haviṣaḥ priyā dhāmāni yatrasarasvatyā maṣasya haviṣaḥ priyā dhāmāni yatrendrasya'ṛṣabhsya haviṣaḥ priyā dhāmāni yatrāgneḥ priyā dhāmāni yatra somasya priyā dhāmāni yatrendrasya sutrāmṇaḥ priyā dhāmāni yatra savituḥ priyā dhāmāni yatra varuṇasya priyā dhāmāni yatra vanaspateḥ priyā pāthāṁsi yatra devānā mājyapānāṁ priyā dhāmāni yatrāgnerhotuḥ priyā dhāmāni tatraitān prastutyevopamtutyevopāvasrakṣadrabhīyasa'iva kṛtvī karadevaṁ devo vanaspatirjuṣatāṁ havirhotaryaja ॥46 ॥*

*hotā yakṣadagniṁ sivṣṭakṛtamayāḍagniraśvinośchhāgasya haviṣaḥ priyā dhāmānyayāṭ sarasvatyā meṣasya haviṣaḥ priyā dhāmānyayāḍindrasya'ṛṣabhasya haviṣaḥ priyā dhāmānyayāḍagneḥ priyā dhāmānyayāṭ somasya priyā dhāmānyāyāḍindrasya sutrāmṇaḥ*

*priyā dhāmānyayāṭ savituḥ priyā dhāmānyayāḍ varuṇasya priyā dhāmānyāyāḍ vanaspateḥ priyā pāthāṁsyayāḍa. devānāmājyapānāṁ priyā dhāmāni yakṣadagnerhotuḥ priyā dhāmāni yakṣat svaṁ mahimānamāyajatāmejyā'iṣaḥ kṛṇotu so'adhvarā jātavedā juṣatāṁ havirhotaryaja ॥47 ॥*

य. (Yv.) २१.४९-५०

देवीर्द्वारोऽअश्विना भिषजेन्द्रे सरस्वती ।
प्राणं न वीर्य्यं नसि द्वारो दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज ॥४९॥
देवीऽउषासावश्विना सुत्रामेन्द्रे सरस्वती ।
बलं न वाचमास्यऽउषाभ्यां दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज ॥५०॥

*devīrdvāro'aśvinā bhiṣajendre sarasvatī /*
*prāṇaṁ na vīryyaṁ nasi dvāro dadhurindriyaṁ vasuvane vasudheyasya vyantu yaja ॥49 ॥*
*devī'uṣāsāvaśvinā sutrāmendre sarasvatī /*
*balaṁ na vāchamāsya'uṣābhyāṁ dadhurindriyaṁ vasuvane vasudheyasya vyantu yaja ॥50 ॥*

५. इन्द्रः (Indraḥ) - य. (Yv.) २१.२५

वर्षाभिरृर्तुनादित्या स्तोमे सप्तदशे स्तुताः । वैरूपेण विशौजसा हविरिन्द्रे वयो दधुः ॥२५॥

*varṣābhirṛtunādityā stome saptadaśe stutāḥ / vairūpeṇa viśaujasā havirindre vayo dadhuḥ ॥25 ॥*

६. यजमानर्त्विजः (Yajamānartvijaḥ) - य. (Yv.) २१.४५

होता यक्षदश्विनौ च्छागस्य हविषऽआत्तामद्य मध्यतो मेदऽउद्धृतम्पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभो घस्तान्नूनङ्घासेअज्राणाँयवसप्रथमानाँ सुमत्क्षराणाँ शतरुद्रियाणामग्निष्वात्तानाम्पीवोपवसानाम्पार्श्वतः श्रोणितः शितामतऽउत्सादतोङ्गाद्ङ्गादवत्तानाम्करत एवाश्विना जुषेताँ हविर्हातर्यज ॥४५॥

*hotā yakṣadaśvinau chchhāgasya haviṣa'āttāmadya madhyato meda'udbhṛtampurā dveṣobhyaḥ purā pauruṣeyyā gṛbho ghastānnūnaṅghāseajrāṇām̐yavasaprathamānām̐ sumatkṣarāṇām̐ śatarudriyāṇāmagniṣvāttānāmpīvopavasānāmpārśvataḥ śroṇitaḥ śitāmata'utsādatoṅgādṅgādavattānāmkarata evāśvinā juṣetām̐ havirhātaryaja ॥45 ॥*

७. रुद्राः (Rudrāḥ) - य. (Yv.) २१.२३

वसन्तेनऽऋतुना देवा वसवस्त्रिवृता स्तुताः । रथन्तरेण तेजसा हविरिन्द्रे वयो दधुः ॥२३॥

*vasantena'ṛtunā devā vasavastrivṛtā stutāḥ / rathantareṇa tejasā havirindre vayo dadhuḥ ॥23 ॥*

८. लिङ्गोक्ताः (Liṅgoktāḥ) - य. (Yv.) २१.६०; ६१

सूपस्थाऽअद्य देवो वनस्पतिरभवदश्विभ्यां छागेन सरस्वत्यै मेषेणेन्द्राय ऽऋषभेणाक्षँस्तान् मेदस्तः प्रति पचतागृभीषतावीवृधन्त पुरोडाशैरपुरश्विना सरस्वतीन्द्रः सुत्रामा सुरासोमान् ॥६०॥
त्वामद्यऽऋषऽआर्षेयऽऋषीणां नपादवृणीतायं यजमानो बहुभ्यऽआ संगतेभ्यऽएष मे देवेषु वसु वार्यायक्ष्यतऽइति ता या देवा देव दानान्यदुस्तान्यस्माऽआ च शास्स्वा च गुरस्वेषितश्च होतरसि भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहि ॥६१॥

*sūpasthā'adya devo vanaspatirabhavadaśvibhyāṁ chhāgena sarasvatyai meṣeṇendrāya 'ṛṣabheṇākṣam̐stān medastaḥ prati pachatāgṛbhīṣatāvīvṛdhanta puroḍāśairapuraśvinā sarasvatīndraḥ sutrāmā surāsomān ॥60 ॥*
*tvāmadya'ṛṣa'ārṣeya'ṛṣiṇāṁ napādavṛṇītāyaṁ yajamāno bahubhya'ā saṁgatebhya'eṣa me deveṣu vasu vāryāyakṣayata'iti tā yā devā deva dānānyadustānyasmā'ā cha śāssvā cha gurasveṣitaścha hotarasi bhadravāchyāya preṣito mānuṣaḥ sūktavākāya sūktā brūhi ॥61 ॥*

९. विद्वान् (Vidvān) - य. (Yv.) २२.२१

विश्वो देवस्य नेतुर्मर्त्तो वुरीत सख्यम् । विश्वाो रायऽइषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा ॥२१॥

*viśvo devasya neturmartto vurīta sakhyam /*
*viśvāo rāya'iṣudhyati dyumnaṁ vṛṇīta puṣyase svāhā ॥21 ॥*

१०. विद्वांसः (Vidvāṁsaḥ) - य. (Yv.) २१.१३-१६

तनूनपाच्छुचिव्रतस्तनूपाश्च सरस्वती । उष्णिहा छन्दऽइन्द्रियं दित्यवाड् गौर्वयो दधुः ॥१३॥
इडाभिरग्निरीड्यः सोमो देवोऽअमर्त्यः । अनुष्टुप् छन्दऽइन्द्रियं पंचाविर्गौर्वयो दधुः ॥१४॥

सुबर्हिरग्निः पूषण्वान्त्स्तीर्णबर्हिरमर्त्यः। बृहती छन्दऽइन्द्रियं त्रिवत्सो गौर्वयो दधुः ॥१५॥
दुरो देवीर्दिशो महीर्ब्रह्मा देवो बृहस्पतिः। पङ्क्तिश्छन्दऽइहेन्द्रियं तुर्य्यवाड् गौर्वयो दधुः ॥१६।
*tanūnapāchchhuchivratastanūpāścha sarasvatī |*
*uṣṇihā chhanda'indriyaṁ dityavāḍ gaurvayo dadhuḥ ||13 ||*
*iḍābhiragniriḍyaḥ somo devo'amartyaḥ |*
*anuṣṭup chhanda'indriyaṁ paṁchāvirgaurvayo dadhuḥ ||14 ||*
*subarhiragniḥ pūṣaṇvāntstīrṇabarhiramartyaḥ |*
*bṛhatī chhanda'indriyaṁ trivatso gaurvayo dadhuḥ ||15 ||*
*duro devīrdiśo mahīrbrahmā devo bṛhaspatiḥ |*
*paṅktiśchhanda'ihendriyaṁ turyyavāḍ gaurvayo dadhuḥ ||16 |*

११. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) ५.५०.१-५; ५.५१.१-१५; य. (Yv.) २१.१७-२१; २४; २६; २८

ऋ. (Rv.) ५.५०.१-५

विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् । विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे ॥१॥
ते ते देव नेतर्ये चेमाँ अनुशसे । ते राया ते ह्या३ पृचे सचेमहि सचथ्यैः ॥२॥
अतो न आ नृनतिथीनतः पत्नीर्दशस्यत । आरे विश्वं पथेष्ठां द्विषो युयोतु यूयुविः ॥३॥
यत्र वह्निरभिहितो दुद्रवद् द्रोण्यः पशुः । नृमणा वीरपस्त्योऽर्णा धीरेव सनिता ॥४॥
एष ते देव नेता रथस्पतिः शं रयिः।
शं राये शं स्वस्तयइषःस्तुतो मनामहे देवस्तुतो मनामहे ॥५॥
*viśvo devasya neturmarto vurīta sakhyam |*
*viśvo rāya iṣudhyati dyumnaṁ vṛṇīta puṣyase ||1 ||*
*te te deva netarye chemāṁ̐ anuśase |*
*te rāyā te hyā3 pṛche sachemahi sachathyaiḥ ||2 ||*
*ato na ā nṛnatithīnataḥ patnīrdaśasyata |*
*āre viśvaṁ patheṣṭhāṁ dviṣo yuyotu yūyuviḥ ||3 ||*
*yatra vahnirabhihito dudravad droṇyaḥ paśuḥ |*
*nṛmaṇā vīrapastyo'rṇā dhīreva sanitā ||4 ||*
*eṣa te deva netā rathaspatiḥ śaṁ rayiḥ |*
*śaṁ rāye śaṁ svastayaiṣaḥstuto manāmahe devastuto manāmahe ||5 ||*

ऋ. (Rv.) ५.५१.१-१५

अग्ने सुतस्य पीतये विश्वैरूमेभिरा गहि। देवेभिर्हव्यदातये ॥१॥
ऋतधीतय आ गत सत्यधर्माणो अध्वरम्। अग्नेः पिबत जिह्वया ॥२॥
विप्रेभिर्विप्र सन्त्य प्रातर्यावभिरा गहि। देवेभिः सोमपीतये ॥३॥
अयं सोमश्चमू सुतोऽमत्रे परि षिच्यते। प्रिय इन्द्राय वायवे ॥४॥
वायवा याहि वीतये जुषाणो हव्यदातये। पिबा सुतस्यान्धसो अभि प्रयः ॥५॥
इन्द्रश्च वायवेषां सुतानां पीतिमर्हथः। तांजुषेथामरेपसावभि प्रयः ॥६॥
सुता इन्द्राय वायवे सोमासो दध्याशिरः। निम्नं न यन्ति सिन्धवोऽभि प्रयः ॥७॥
सजूर्विश्वेभिर्देवेभिरश्विभ्यामुषसा सजूः। आ याह्यग्ने अत्रिवत्सुते रण ॥८॥
सजूर्मित्रावरुणाभ्यां सजूः सोमेन विष्णुना। आ याह्यग्ने अत्रिरवत्सुते रण ॥९॥
सजूरादित्यैर्वसुभिः सजूरिन्द्रेण वायुना। आ याह्यग्ने अत्रिवत्सुते रण ॥१०॥
स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः ।
स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना ॥११॥
स्वस्तये वायुमुप ब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः ।
बृहस्पतिं सर्वगणं स्वस्तये स्वस्तये आदित्यासो भवन्तु नः ॥१२॥
विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये ।
देवा अवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः ॥१३॥
स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति ।
स्वस्ति न इन्द्रश्चरग्निश्च स्वस्ति नो अदिते कृधि ॥१४॥
स्वस्ति पन्थामनुचरेम सूर्याचन्द्रमसाविव। पुनर्ददताघ्नता जानता सं गमेमहि ॥१५॥

*agne sutasya pītaye viśverūmabhirā gahi । devebhirhavyadātaye ॥1॥*
*ṛtadhītaya ā gata satyadharmāṇo adhvaram । agneḥ pibata jihvayā ॥2॥*
*viprebhirvipra santya prātaryāvabhirā gahi । devebhiḥ somapītaye ॥3॥*
*ayaṁ somaśchamū suto'matre pari ṣichyate । priya indrāya vāyave ॥4॥*
*vāyavā yāhi vītaye juṣāṇo havyadātaye । pibā sutasyāndhaso abhi prayaḥ ॥5॥*
*indraścha vāyaveṣāṁ sutānāṁ pītimarhathaḥ ।*
*tāṁjuṣethāmarepasāvabhi prayaḥ ॥6॥*
*sutā indrāya vāyave somāso dadhyāśiraḥ ।*
*nimnaṁ na yanti sindhavo'bhi prayaḥ ॥7॥*
*sajūrviśvebhirdevebhiraśvibhyāmuṣasā sajūḥ । ā yāhyagne atrivatsute raṇa ॥8॥*
*sajūrmitrāvaruṇābhyāṁ sajūḥ somena viṣṇunā । ā yāhyagne atriravatsute raṇa ॥9॥*
*sajūrādityairvasubhiḥ sajūrindreṇa vāyunā । ā yāhyagne atrivatsute raṇa ॥10॥*
*svasti no mimītāmaśvinā bhagaḥ svasti devyaditiranarvaṇaḥ ।*
*svasti pūṣā asuro dadhātu naḥ svasti dyāvāpṛthivī suchetunā ॥11॥*
*svastaye vāyumupa bravāmahai somaṁ svasti bhuvanasya yaspatiḥ ।*
*bṛhaspatiṁ sarvagaṇaṁ svastaye svastaye ādityāso bhavantu naḥ ॥12॥*
*viśve devā no adyā svastaye vaiśvānaro vasuragniḥ svastaye ।*
*devā avantvṛbhavaḥ svastaye svasti no rudraḥ pātvaṁhasaḥ ॥13॥*
*svasti mitrāvaruṇā svasti pathye revati ।*
*svasti na indraścharagniścha svasti no adite kṛdhi ॥14॥*
*svasti panthāmanucharema sūryāchandramasāviva ।*
*punardadatāghnatā jānatā saṁ gamemahi ॥15॥*

य. (Yv.) २१.१७-२१

उषे यह्वी सुपेशसा विश्वे देवाऽअमर्त्याः । त्रिष्टुप् छन्दऽइहेन्द्रियं पष्ठवाड् गौर्वयो दधुः ॥१७॥
दैव्या होतारा भिषजेन्द्रेण सयुजा युजा । जगती छन्दऽइन्द्रियमनडवान् गौर्वयो दधुः ॥१८॥
तिस्रऽइडा सरस्वती भारती मरुतो विशः । विराट् छन्दऽइहेन्द्रियं धेनुर्गौर्न वयो दधुः ॥१९॥
त्वष्टा तुरीपोऽअद्भुतऽइन्द्राग्नी पुष्टिवर्धना । द्विपदा छन्दऽइन्द्रियमुक्षा गौर्न वयो दधुः ॥२०॥
शमिता नो वनस्पतिः सविता प्रसुवन् भगम् । ककुप् छन्दऽइहेन्द्रियं वशा वेहद्वयो दधुः ॥२१॥
*uṣe yahvī supeśasā viśve devā'amartyāḥ ।*
*triṣṭup chhanda'ihendriyaṁ paṣṭhavāḍ gaurvayo dadhuḥ ॥17॥*
*daivyā hotārā bhiṣajendreṇa sayujā yujā ।*
*jagatī chhanda'indriyamanaḍavān gaurvayo dadhuḥ ॥18॥*
*tisra'iḍā sarasvatī bhāratī maruto viśaḥ ।*
*virāṭ chhanda'ihendriyaṁ dhenurgaurna vayo dadhuḥ ॥19॥*
*tvaṣṭā turīpo'adbhuta'indrāgnī puṣṭivardhanā ।*
*dvipadā chhanda'indriyamukṣā gaurna vayo dadhuḥ ॥20॥*
*śamitā no vanaspatiḥ savitā prasuvan bhagam ।*
*kakup chhanda'ihendriyaṁ vaśā vehadvayo dadhuḥ ॥21॥*

य. (Yv.) २१.२४

ग्रीष्मेणऽऋतुना देवा रुद्राः पंचदशे स्तुताः । बृहता यशसा बलं हविरिन्द्रे वयो दधुः ॥२४॥
*grīṣmeṇa'ṛtunā devā rudrāḥ paṁchadaśe stutāḥ ।*
*bṛhatā yaśasā balaṁ havirindre vayo dadhuḥ ॥24॥*

य. (Yv.) २१.२६

शारदेनऽऋतुना देवाऽएकविंशं ऋभव स्तुताः । वैराजेन श्रिया श्रियं हविरिन्द्रे वयो दधुः ॥२६॥
*śāradena'ṛtunā devā'ekaviṁśaṁ ṛbhava stutāḥ ।*
*vairājena śriyā śriyaṁ havirindre vayo dadhuḥ ॥26॥*

य. (Yv.) २१.२८

शैशिरेणऽऋतुना देवास्त्रयस्त्रिंशे ऽमृता स्तुताः । सत्येन रेवतीः क्षत्रं हविरिन्द्रे वयो दधुः ॥२८॥
*śaiśireṇa'ṛtunā devāstrayastriṁśe 'mṛtā stutāḥ ।*
*satyena revatīḥ kṣatraṁ havirindre vayo dadhuḥ ॥28॥*

१२. सरस्वत्यादयः (Sarasvati and others) - य. (Yv.) २१.३२; ४८

य. (Yv.) २१.३२

होता यक्षदिडेडितऽआजुह्वानः सरस्वतीमिन्द्रं बलेन वर्धयन्नृषभेण गवेन्द्रियमश्विनेन्द्राय भेषजं यवैः कर्कन्धुभिर्मधु लाजैर्न मासरं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥३२॥

*hotā yakṣadiḍeḍita'ājuhvānaḥ sarasvatīmindraṁ balena vardhayannṛṣabheṇa gavendriyamaśvinendrāya bheṣajaṁ yavaiḥ karkandhubhirmadhu lājairna māsaraṁ payaḥ somaḥ parisrutā ghṛtaṁ madhu vyantvājyasya hotaryaja ॥32॥*

य. (Yv.) २१.४८

देवं बर्हिः सरस्वती सुदेवमिन्द्रेऽअश्विना ।
तेजो न चक्षुरक्ष्योर्बर्हिषा दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज ॥४८॥

*devaṁ barhiḥ sarasvatī sudevamindre'aśvinā ।*
*tejo na chakṣurakṣayorbarhiṣā dadhurindriyaṁ vasuvane vasudheyasya vyantu yaja ॥48॥*

१३. होत्रादयः (Hotrādayaḥ) - य. (Yv.) २१.४२; ४३

होता यक्षदश्विनौ सरस्वतीमिन्द्रं सुत्रामाणमिमे सोमाः सुरामाणश्छागैर्न मेषैर्ऋषभैः सुताः शष्पैर्न तोक्मभिर्लाजैर्महस्वन्तो मदा मासरेण परिष्कृताः शुक्राः पयस्वन्तोऽमृताः प्रस्थिता वो मधुश्चुतस्तानश्विना सरस्वतीन्द्रः सुत्रामा वृत्रहा जुषन्तां सोम्यं मधु पिबन्तु मदन्तु व्यन्तु होतर्यज ॥४२॥
होता यक्षदश्विनौ छागस्य हविषऽआत्तामद्य मध्यतो मेदऽउद्भृतं पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभो घस्तां नूनं घासेऽअज्राणां यवसप्रथमानां सुमत्क्षराणां शतरुद्रियाणामग्निष्वात्तानां पीवोपवसनानां पार्श्वतः श्रोणितः शितामतऽउत्सादतोऽङ्गादङ्गादवत्तानाम्करत एवाश्विना जुषेतॉं हविर्होतर्यज ॥४३॥

*hotā yakṣadaśvinau sarasvatīmindraṁ sutrāmāṇamime somāḥ surāmāṇaśchhāgairna meṣairṛṣabhaiḥ sutāḥ śaṣpairna tokmabhirlājairmahasvanto madā māsareṇa pariṣkṛtāḥ śukrāḥ payasvanto'mṛtāḥ prasthitā vo madhuśchutastānaśvinā sarasvatīndraḥ sutrāmā vṛtrahā juṣantāṁ somyaṁ madhu pibantu madantu vyantu hotaryaja ॥42॥*
*hotā yakṣadaśvinau chhāgasya haviṣa'āttāmadya madhyato meda'udbhṛtaṁ purā dveṣobhyaḥ purā pauruṣeyyā gṛbho ghastāṁ nūnaṁ ghāse'ajrāṇāṁ yavasaprathamānāṁ sumatkṣarāṇāṁ śatarudriyāṇāmagniṣvāttānāṁ pīvopavasanānāṁ pārśvataḥ śroṇitaḥ śitāmata'utsādato'ṁgādaṁgādavattānāṁ karata'evāśvinā juṣetāṁ havirhotaryaja ॥43॥*

## ७८६. हरिमन्तः (Harimantaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.७२.१-९

हरिं मृजन्त्यरुषो न युज्यते सं धेनुभिः कलशे सोमो अज्यते ।
उद्वाचमीरयति हिन्वते मती पुरुष्टुतस्य कति चित्परिप्रियः ॥१॥
साके वदन्ति बहवो मनीषिण इन्द्रस्य सोमं जठरे यदादुहः ।
यदी मृजन्ति सुगभस्तयो नरः सनीळाभिर्दशभिः काम्यं मधु ॥२॥
अरममाणो अत्येति गा अभि सूर्यस्य प्रियं दुहितुस्तिरो रवम् ।
अन्वस्मै जोषमभरद्विनंगृसः सं द्वयीभिः स्वसृभिः क्षेति जामिभिः ॥३॥
नृधूतो अद्रिषुतो बर्हिषि प्रियः पतिर्गवां प्रदिव इन्दुर्ऋत्वियः ।
पुरन्धिवान्मनुषो यज्ञसाधनः शुचिर्धिया पवते सोम इन्द्र ते ॥४॥
नृबाहुभ्यां चोदितो धारया सुतोऽनुष्वधं पवते सोम इन्द्र ते ।
आप्राः क्रतून्त्समजैरध्वरे मतीर्वेर्न द्रुषच्चम्वो३रासदद्धरिः ॥५॥
अंशुं दुहन्ति स्तनयन्तमक्षितं कविं कवयोऽपसो मनीषिणः ।
समी गावो मतयो यन्ति सयंत ऋतस्य योना सदने पुनर्भुवः ॥६॥
नाभा पृथिव्या धरुणो महो दिवो३पामूर्मौ सिन्धुष्वन्तरुक्षितः ।
इन्द्रस्य वज्रो वृषभो विभूवसुः सोमो हृदे पवते चारु मत्सरः ॥७॥
स तू पवस्व परि पार्थिवं रजः स्तोत्रे शिक्षन्नाधून्वते च सुक्रतो ।
मा नो निर्भाग्वसुनः सादनस्पृशो रयिं पिशंगं बहुलं वसीमहि ॥८॥
आ तू न इन्दो शतदात्वश्व्यं सहस्रदातु पशुमद्धिरण्यवत् ।
उप मास्व बृहती रेवतीरिषोऽधि स्तोत्रस्य पवमान नो गहि ॥९॥

*hariṁ mṛjantyaruṣo na yujyate saṁ dhenubhiḥ kalaśe somo ajyate ।*

*udvāchamīrayati hinvate matī puruṣṭutasya kati chitparipriyaḥ //1 //*
*sāke vadanti bahavo manīṣiṇa indrasya somaṁ jaṭhare yadāduhuḥ /*
*yadī mṛjanti sugabhastayo naraḥ sanīḷābhirdaśabhiḥ kāmyaṁ madhu //2 //*
*aramamāṇo atyeti gā abhi sūryasya priyaṁ duhitustiro ravam /*
*anvasmai joṣamabharadvinaṁgṛsaḥ saṁ dvayībhiḥ svasṛbhiḥ kṣeti jāmibhiḥ //3 //*
*nṛdhūto adriṣuto barhiṣi priyaḥ patirgavāṁ pradiva indurṛtviyaḥ /*
*purandhivānmanuṣo yajñasādhanaḥ śuchirdhiyā pavate soma indra te //4 //*
*nṛbāhubhyāṁ chodito dhārayā suto'nuṣvadhaṁ pavate soma indra te /*
*āprāḥ kratūntsamajairadhvare matīrverna druṣachchamvo3rāsadaddhariḥ //5 //*
*aṁśuṁ duhanti stanayantamakṣitaṁ kaviṁ kavayo'paso manīṣiṇaḥ /*
*samī gāvo matayo yanti sayaṁta ṛtasya yonā sadane punarbhuvaḥ //6 //*
*nābhā pṛthivyā dharuṇo maho divo3pāmūrmau sindhuṣvantarukṣitaḥ /*
*indrasya vajro vṛṣabho vibhūvasuḥ somo hṛde pavate chāru matsaraḥ //7 //*
*sa tū pavasva pari pārthivaṁ rajaḥ stotre śikṣannādhūnvate cha sukrato /*
*mā no nirbhāgvasunaḥ sādanaspṛśo rayiṁ piśaṁgaṁ bahulaṁ vasīmahi //8 //*
*ā tū na indo śatadātvaśvayaṁ sahasradātu paśumaddhiraṇyavat /*
*upa māsva bṛhatī revatīriṣo'dhi stotrasya pavamāna no gahi //9 //*

### ७८७. हविर्धान आंगिः (Havirdhāna Āṁgiḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १०.११.१-९; १०.१२.१-९

ऋ. (Rv.) १०.११.१-९

वृषा वृष्णे दुदुहे दोहसा दिवः पयांसि यह्वो अदितेरदाभ्यः ।
विश्वं स वेद वरुणो यथा धिया स यज्ञियो यजतु यज्ञियाँ ऋतुन् ॥१॥
रपद्गन्धर्वीरप्या च योषणा नदस्य नादे परि पातु मे मनः ।
इष्टस्य मध्ये अदितिर्नि धातु नो भ्राता नो ज्येष्ठः प्रथमो वि वोचति ॥२॥
सो चिन्नु भद्रा क्षुमती यशस्वत्युषा उवास मनवे स्वर्वती ।
यदीमुशन्तमुशतामनु क्रतुमग्निं होतारं विदथाय जीजनन् ॥३॥
अध त्यं द्रप्सं विभ्वं विचक्षणं विराभरदिषितः श्येनो अध्वरे ।
यदी विशो वृणते दस्ममार्या अग्निं होतारमध धीरजायत ॥४॥
सदासि रण्वो यवसेव पुष्यते होत्राभिरग्ने मनुषः स्वध्वरः ।
विप्रस्य वा यच्छशमान उक्थ्यं१ वाजं ससवाँ उपयासि भूरिभिः ॥५॥
उदीरय पितरा जार आ भगमियक्षति हर्यतो हृत्त इष्यति ।
विवक्ति वह्निः स्वपस्यते मखस्तविष्यते असुरो वेपते मती ॥६॥
यस्ते अग्ने सुमतिं मर्तो अक्षत्सहसः सूनो अति स प्र शृण्वे ।
इषं दधानो वहमानो अश्वैरा स द्युमाँ अमवान्भूषति द्यून् ॥७॥
यदग्न एषा समितिर्भवाति देवी देवेषु यजमा यजत्र ।
रत्ना च यद्विभजासि स्वधावो भागं नो अत्र वसुमन्तं वीतात् ॥८॥
श्रुधी नो अग्ने सदने सधस्थे युक्ष्वा रथममृतस्य द्रवित्नुम् ।
आ नो वह रोदसी देवपुत्रे माकिर्देवानामप भूरिह स्याः ॥९॥

*vṛṣā vṛṣṇe duduhe dohasā divaḥ payāṁsi yahvo aditeradābhyaḥ /*
*viśvaṁ sa veda varuṇo yathā dhiyā sa yajñiyo yajatu yajñiyām̐ ṛtun //1 //*
*rapadgandharvīrapyā cha yoṣaṇā nadasya nāde pari pātu me manaḥ /*
*iṣṭasya madhye aditirni dhātu no bhrātā no jyeṣṭhaḥ prathamo vi vochati //2 //*
*so chinnu bhadrā kṣumatī yaśasvatyuṣā uvāsa manave svarvatī /*
*yadīmuśantamuśatāmanu kratumagniṁ hotāraṁ vidathāya jījanan //3 //*
*adha tyaṁ drapsaṁ vibhvaṁ vichakṣaṇaṁ virābharadiṣitaḥ śyeno adhvare /*
*yadī viśo vṛṇate dasmamāryā agiṁna hotāramadha dhīrajāyata //4 //*
*sadāsi raṇvo yavaseva puṣyate hotrābhiragne manuṣaḥ svadhvaraḥ /*
*viprasya vā yachchhaśamāna ukthyaṁ1 vājaṁ sasavām̐ upayāsi bhūribhiḥ //5 //*
*udīraya pitarā jāra ā bhagamiyakṣati haryato hṛtta iṣyati /*
*vivakti vahniḥ svapasyate makhastaviṣyate asuro vepate matī //6 //*

*yaste agne sumatiṁ marto akṣatsahasaḥ sūno ati sa pra śṛṇve /*
*iṣaṁ dadhāno vahamāno aśvairā sa dyumām̐ amavānbhūṣati dyūn //7 //*
*yadagna eṣā samitirbhavāti devī deveṣu yajamā yajatra /*
*ratnā cha yadvibhajāsi svadhāvo bhāgaṁ no atra vasumantaṁ vītāt //8 //*
*śrudhī no agne sadane sadhasthe yukṣavā rathamamṛtasya dravitnum /*
*ā no vaha rodasī devaputre mārkirdevānāmapa bhūriha syāḥ //9 //*

ऋ. (Rv.) १०.१२.१-९

द्यावा ह क्षामा प्रथमे ऋतेनाभिश्रावे भवतः सत्यवाचा ।
देवो यन्मर्तान्यजथाय कृण्वन्त्सीदद्धोता प्रत्यङ् स्वमसुं यन् ॥१॥
देवो देवान्परिभूऋर्तेन वहा नो हव्यं प्रथमश्चिकित्वान् ।
धूमकेतुः समिधा भाऋजीको मन्द्रो होता नित्यो वाचा यजीयान् ॥२॥
स्वावृग्देवस्यामृतं यदी गोरतो जातासो धारयन्त उर्वी ।
विश्वे देवा अनु तत्ते यजुर्गुर्दुहे यदेनी दिव्यं घृतं वाः ॥३॥
अर्चामि वां वर्धायापो घृतस्नू द्यावाभूमी शृणुतं रोदसी मे ।
अहा यद् द्यावोऽसुनीतिमयन्मध्वा नो अत्र पितरा शिशीताम् ॥४॥
किं स्विन्नो राजा जगृहे कदस्याति व्रतं चकृमा को वि वेद ।
मित्रश्चिद्धि ष्मा जुहुराणो देवांछ्लोको न यातामपि वाजो अस्ति ॥५॥
दुर्मन्त्वत्रामृतस्य नाम सलक्ष्मा यद्विषुरूपा भवाति ।
यमस्य यो मनवते सुमन्त्वग्ने तमृष्व पाह्यप्रयुच्छन् ॥६॥
यस्मिन्देवा विदथे मादयन्ते विवस्वतः सदने धारयन्ते ।
सूर्ये ज्योतिरदधुर्मास्य१क्तून्परि द्योतनिं चरतो अजस्रा ॥७॥
यस्मिन्देवा मन्मनि संचरन्त्यपीच्ये३ न वयमस्य विद्म ।
मित्रे नो अत्रादितिरनागान्त्सविता देवो वरुणाय वोचत् ॥८॥
श्रुधी नो अग्ने सदने सधस्थे युक्ष्वा रथममृतस्य द्रवित्नुम् ।
आ नो वह रोदसी देवपुत्रे माकिर्देवानामप भूरिह स्याः ॥९॥

*dyāvā ha kṣāmā prathame ṛtenābhiśrāve bhavataḥ satyavāchā /*
*devo yanmartānyajathāya kṛṇvantsīdaddhotā pratyaṅ svamasuṁ yan //1 //*
*devo devānparibhūṛrtena vahā no havyaṁ prathamaśchikitvān /*
*dhūmaketuḥ samidhā bhāṛjīko mandro hotā nityo vāchā yajīyān //2 //*
*svāvṛgdevasyāmṛtaṁ yadī gorato jātāso dhārayanta urvī /*
*viśve devā anu tatte yajurgurduhe yadenī divyaṁ ghṛtaṁ vāḥ //3 //*
*archāmi vāṁ vardhāyāpo ghṛtasnū dyāvābhūmī śṛṇutaṁ rodasī me /*
*ahā yad dyāvo'sunītimayanmadhvā no atra pitarā śiśītām //4 //*
*kiṁ svinno rājā jagṛhe kadasyāti vrataṁ chakṛmā ko vi veda /*
*mitraśchiddhi ṣmā juhurāṇo devāṁchhloko na yātāmapi vājo asti //5 //*
*durmantvatrāmṛtasya nāma salakṣamā yadviṣurūpā bhavāti /*
*yamasya yo manavate sumantvagne tamṛṣva pāhyaprayuchchhan //6 //*
*yasmindevā vidathe mādayante vivasvataḥ sadane dhārayante /*
*sūrye jyotiradadhurmāsya1ktūnpari dyotaniṁ charato ajasrā //7 //*
*yasmindevā manmani saṁcharantyapīchye3 na vayamasya vidma /*
*mitre no atrāditiranāgāntsavitā devo varuṇāya vochat //8 //*
*śrudhī no agne sadane sadhasthe yukṣavā rathamamṛtasya dravitnum /*
*ā no vaha rodasī devaputre mākirdevānāmapa bhūriha syāḥ //9 //*

## ७८८. हर्यतः प्रागाथः (Haryataḥ Prāgāthaḥ)

१. अग्निः हवींषि वा (Agniḥ Havīṁṣi Vā) - सा. (Sv.) १४८०-१४८२; १६०२-१६०४

सा. (Sv.) १४८०-१४८२

आ सुते सिंचत श्रियं रोदस्योरभिश्रियम्। रसा दधीत वृषभम् ॥१॥
ते जानत स्वमोक्यां३ सं वत्सासो न मातृभिः। मथो नसन्त जामिभिः ॥२॥
उप स्रक्केषु बप्सतः कृण्वते धरुणं दिवि। इन्द्रे अग्ना नमः स्वः ॥३॥

*ā sute siṁchata śriyaṁ rodasyorabhiśriyam । rasā dadhīta vr̥ṣabham ॥1 ॥*
*te jānata svamokyā̃m3 saṁ vatsāso na mātr̥bhiḥ । matho nasanta jāmibhiḥ ॥2 ॥*
*upa srakveṣu bapsataḥ kr̥ṇvate dharuṇaṁ divi । indre agnā namaḥ svaḥ ॥3 ॥*

सा. (Sv.) १६०२-१६०४

गाव उप वदावटे मही यज्ञस्य रप्सुदा। उभा कर्णा हिरण्यया ॥१॥
अभ्यारमिदद्रयो निषिक्तं पुष्करे मधु। अवटस्य विसर्जने ॥२॥
सिंचन्ति नमसावटमुच्चाचक्रं परिज्मानम्। नीचीनबारमक्षितम् ॥३॥
*gāva upa vadāvaṭe mahī yajñasya rapsudā । ubhā karṇā hiraṇyayā ॥1 ॥*
*abhyāramidadrayo niṣiktaṁ puṣkare madhu । avaṭasya visarjane ॥2 ॥*
*siṁchanti namasāvaṭamuchchāchakraṁ parijmānam । nīchīnabāramakṣitam ॥3 ॥*

२. अग्निः हवींषि वा (ऋसर्व. ८.७२.१२); इन्द्रः (साग्री. सास्वा. सार्षेदी.) (Agniḥ Havīṁṣi Vā [Rss. 8.72.12]; Indraḥ [Ssb. Sas. Sad.]) - ऋ. (Rv.) ८.७२.१-१८; सा. (Sv.) ११७

ऋ. (Rv.) ८.७२.१-१८

हविष्कृणुध्वमा गमदध्वर्युर्वनते पुनः। विद्वाँ अस्य प्रशासनम् ॥१॥
नि तिग्ममभ्यं१ शुं सीदद्धोता मनावधि। जुषाणो अस्य सख्यम् ॥२॥
अन्तरिच्छन्ति तं जने रुद्रं परो मनीषया। गृभ्णन्ति जिह्वया ससम् ॥३॥
जाम्यतीतपे धनुर्वयोधा अरुहद्वनम्। दृषदं जिह्वयावधीत् ॥४॥
चरन्वत्सो रुशन्निह निदातारं न विन्दते। वेति स्तोतव अम्बयम् ॥५॥
उतो न्वस्य यन्महदश्वावद्योजनं बृहत्। दामा रथस्य ददृशे ॥६॥
दुहन्ति सप्तैकामुप द्वा पंच सृजतः। तीर्थे सिन्धोरधि स्वरे ॥७॥
आ दशभिर्विवस्वत इन्द्रः कोशमचुच्यवीत्। खेदया त्रिवृता दिवः ॥८॥
परि त्रिधातुरध्वरं जूर्णिरेति नवीयसी। मध्वा होतारो अंजते ॥९॥
सिंचन्ति नमसावतमुच्चाचक्रं परिज्मानम्। नीचीनबारमक्षितम् ॥१०॥
अभ्यारमिदद्रयो निषिक्तं पुष्करे मधु। अवतस्य विसर्जने ॥११॥
गाव उपावतावतं मही यज्ञस्य रप्सुदा। उभा कर्णा हिरण्यया ॥१२॥
आ सुते सिंचत श्रियं रोदस्योरभिश्रियम्। रसा दधीत वृषभम् ॥१३॥
ते जानत स्वमोक्यं१सं वत्सासो न मातृभिः। मिथो नसन्त जामिभिः ॥१४॥
उप स्रक्केषु बप्सतः कृण्वते धरुणं दिवि। इन्द्रे अग्ना नमः स्वः ॥१५॥
अधुक्षत्पिप्युषीमिषमूर्जं सप्तपदीमरिः। सूर्यस्य सप्त रश्मिभिः ॥१६॥
सोमस्य मित्रावरुणोदिता सूर आ ददे। तदातुरस्य भेषजम् ॥१७॥
उतो न्वस्य यत्पदं हर्यतस्य निधान्यम्। परि द्यां जिह्वयातनत् ॥१८॥
*haviṣkr̥ṇudhvamā gamadadhvaryurvanate punaḥ । vidvā̃ asya praśāsanam ॥1 ॥*
*ni tigmamabhyaṁ1 śuṁ sīdaddhotā manāvadhi । juṣāṇo asya sakhyam ॥2 ॥*
*antarichchhanti taṁ jane rudraṁ paro manīṣayā । gr̥bhṇanti jihvayā sasam ॥3 ॥*
*jāmyatītape dhanurvayodhā aruhadvanam । dr̥ṣadaṁ jihvayāvadhīt ॥4 ॥*
*charanvatso ruśanniha nidātāraṁ na vindate । veti stotava ambayam ॥5 ॥*
*uto nvasya yanmahadaśvāvadyojanaṁ br̥hat । dāmā rathasya dadr̥śe ॥6 ॥*
*duhanti saptaikāmupa dvā paṁcha sr̥jataḥ । tīrthe sindhoradhi svare ॥7 ॥*
*ā daśabhirvivasvata indraḥ kośamachuchyavīt । khedayā trivr̥tā divaḥ ॥8 ॥*
*pari tridhāturadhvaraṁ jūrṇireti navīyasī । madhvā hotāro aṁjate ॥9 ॥*
*siṁchanti namasāvatamuchchāchakraṁ parijmānam । nīchīnabāramakṣitam ॥10 ॥*
*abhyāramidadrayo niṣiktaṁ puṣkare madhu । avatasya visarjane ॥11 ॥*
*gāva upāvatāvataṁ mahī yajñasya rapsudā । ubhā karṇā hiraṇyayā ॥12 ॥*
*ā sute siṁchata śriyaṁ rodasyorabhiśriyam । rasā dadhīta vr̥ṣabham ॥13 ॥*
*te jānata svamokyaṁ1saṁ vatsāso na mātr̥bhiḥ । mitho nasanta jāmibhiḥ ॥14 ॥*
*upa srakveṣu bapsataḥ kr̥ṇvate dharuṇaṁ divi । indre agnā namaḥ svaḥ ॥15 ॥*
*adhukṣatpipyuṣīmiṣamūrjaṁ saptapadīmariḥ । sūryasya sapta raśmibhiḥ ॥16 ॥*
*somasya mitrāvaruṇoditā sūra ā dade । tadāturasya bheṣajam ॥17 ॥*
*uto nvasya yatpadaṁ haryatasya nidhānyam । pari dyāṁ jihvayātanat ॥18 ॥*

सा. (Sv.) ११७

गाव उप वदावटे मही यज्ञस्य रप्सुदा। उभा कर्णा हिरण्यया ॥३॥
*gāva upa vadāvaṭe mahī yajñasya rapsudā । ubhā karṇā hiraṇyayā ॥3॥*

## ७८९. हिरण्यगर्भः (Hiraṇyagarbhaḥ)

१. अग्निः (Agniḥ) - य. (Yv.) १२.१०३; १०४

अभ्यावर्त्तस्व पृथिवि यज्ञेन पयसा सह। वपां तेऽअग्निरिषितोऽअरोहत् ॥१०३॥
अग्ने यत्ते शुक्रं यच्चन्द्रं यत्पूतं यच्च यज्ञियम्। तद्देवेभ्यो भरामसि ॥१०४॥
*abhyāvarttasva pṛthivi yajñena payasā saha । vapāṁ te'agniriṣito'arohat ॥103॥*
*agne yatte śukraṁ yachchandraṁ yatpūtaṁ yachcha yajñiyam ।*
*taddevebhyo bharāmasi ॥104॥*

२. ईश्वरः (Īśvaraḥ) - य. (Yv.) १३.५

द्रप्सश्चकन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः ।
समानं योनिमनु सचंरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ॥५॥
*drapsaśchakanda pṛthivīmanu dyāmimaṁ cha yonimanu yaścha pūrvaḥ ।*
*samānaṁ yonimanu sachaṁrantaṁ drapsaṁ juhomyanu sapta hotrāḥ ॥5॥*

३. कः (Kaḥ) - य. (Yv.) १२.१०२

मा मा हिंसीज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा व्यानट् ।
यश्चापश्चन्द्राः प्रथमो जजान कस्मै देवाय हविषा विधेम ॥१०२॥
*mā mā hiṁsījjanitā yaḥ pṛthivyā yo vā divaṁ satyadharmā vyānaṭ ।*
*yaśchāpaśchandrāḥ prathamo jajāna kasmai devāya haviṣā vidhema ॥102॥*

४. प्रजापतिः (Prajāpatiḥ) - य. (Yv.) १३.४

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेकऽआसीत् ।
स दाधार पृथिवी द्यामुतेमां कस्मै देवाय हविषा विधेम ॥४॥
*hiraṇyagarbhaḥ samavarttatāgre bhūtasya jātaḥ patireka'āsīt ।*
*sa dādhāra pṛthivī dyāmutemāṁ kasmai devāya haviṣā vidhema ॥4॥*

५. विद्वान् (Vidvān) - य. (Yv.) १२.१०५

इषमूर्जमहमितऽआदमृतस्य योनिं महिषस्य धाराम् ।
आ मा गोषु विशत्वा तनूषु जहामि सेदिमनिराममीवाम् ॥१०५॥
*iṣamūrjamahamita'ādamṛtasya yoniṁ mahiṣasya dhārām ।*
*ā mā goṣu viśatvā tanūṣu jahāmi sedimanirāmamīvām ॥105॥*

६. सूर्य्यः (Sūryyaḥ) - य. (Yv.) १३.८

ये वामी रोचने दिवो ये वा सूर्य्यस्य रश्मिषु। येषमप्सु सदस्कृतं तेभ्यः सर्पेभ्यो नमः ॥८॥
*ye vāmī rochane divo ye vā sūryyasya raśmiṣu ।*
*yeṣamapsu sadaskṛtaṁ tebhyaḥ sarpebhyo namaḥ ॥8॥*

७. हिरण्यगर्भः (Hiraṇyagarbhaḥ) - य. (Yv.) १३.६; ७

नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु। ये ऽअन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥६॥
याऽइषवो यातुधानानां ये वा वनस्पतीँ१ऽरनु। ये वावटेषु शेरते तेभ्यः सर्पेभ्यो नमः ॥७॥
*namo'stu sarpebhyo ye ke cha pṛthivīmanu ।*
*ye 'antarikṣe ye divi tebhyaḥ sarpebhyo namaḥ ॥6॥*
*yā'iṣavo yātudhānānāṁ ye vā vanaspatīm̐1'ranu ।*
*ye vāvaṭeṣu śerate tebhyaḥ sarpebhyo namaḥ ॥7॥*

## ७९०. हिरण्यगर्भः प्राजापत्य (Hiraṇyagarbhaḥ Prājāpatya)

१. कः (Kaḥ) - ऋ. (Rv.) १०.१२१.१-१०.

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥१॥
य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।

यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥२॥
यः प्राणतो निमिषतो महित्वेक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥३॥
यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥४॥
येन द्यौरुग्रा पृथिवी च दृळहा येन स्वः स्तभितं येन नाकः ।
यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥५॥
यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने ।
यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम ॥६॥
आपो ह यद् बृहतीर्विश्वमायन्गर्भं दधाना जनयन्तीरग्निम् ।
ततो देवानां समवर्ततासुरेकः कस्मै देवाय हविषा विधेम ॥७॥
यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयन्तीर्यज्ञम् ।
यो देवेष्वधि देव एक आसीत्कस्मै देवाय हविषा विधेम ॥८॥
मा नो हिंसीज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा जजान ।
यश्चापश्चन्द्रा बृहतीर्जजान कस्मै देवाय हविषा विधेम ॥९॥
प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ॥१०॥

*hiraṇyagarbhaḥ samavartatāgre bhūtasya jātaḥ patireka āsīt /*
*sa dādhāra pṛthivīṁ dyāmutemāṁ kasmai devāya haviṣā vidhema //1 //*
*ya ātmadā baladā yasya viśva upāsate praśiṣaṁ yasya devāḥ /*
*yasya chhāyāmṛtaṁ yasya mṛtyuḥ kasmai devāya haviṣā vidhema //2 //*
*yaḥ prāṇato nimiṣato mahitveka idrājā jagato babhūva /*
*ya īśe asya dvipadaśchatuṣpadaḥ kasmai devāya haviṣā vidhema //3 //*
*yasyeme himavanto mahitvā yasya samudraṁ rasayā sahāhuḥ /*
*yasyemāḥ pradiśo yasya bāhū kasmai devāya haviṣā vidhema //4 //*
*yena dyaurugrā pṛthivī cha dṛḷahā yena svaḥ stabhitaṁ yena nākaḥ /*
*yo antarikṣe rajaso vimānaḥ kasmai devāya haviṣā vidhema //5 //*
*yaṁ krandasī avasā tastabhāne abhyaikṣetāṁ manasā rejamāne /*
*yatrādhi sūra udito vibhāti kasmai devāya haviṣā vidhema //6 //*
*āpo ha yad bṛhatīrviśvamāyangarbhaṁ dadhānā janayantīragnim /*
*tato devānāṁ samavartatāsurekaḥ kasmai devāya haviṣā vidhema //7 //*
*yaśchidāpo mahinā paryapaśyaddakṣaṁ dadhānā janayantīryajñam /*
*yo deveṣvadhi deva eka āsītkasmai devāya haviṣā vidhema //8 //*
*mā no hiṁsījjanitā yaḥ pṛthivyā yo vā divaṁ satyadharmā jajāna /*
*yaśchāpaśchandrā bṛhatīrjajāna kasmai devāya haviṣā vidhema //9 //*
*prajāpate na tvadetānyanyo viśvā jātāni pari tā babhūva /*
*yatkāmāste juhumastanno astu vayaṁ syāma patayo rayīṇām //10 //*

## ७९१. हिरण्यस्तूपः (Hiraṇyastūpaḥ)

१. अश्विनौ (Aśvinau) - य. (Yv.) ३४.४७

आ नासत्या त्रिभिरेकादशैरिह देवेभिर्यातं मधुपेयमश्विना ।
प्रायुस्तारिष्टं नी रपांसि मृक्षतंसेधतं द्वेषो भवतं सचाभुवा ॥४७॥

*ā nāsatyā tribhirekādaśairiha devebhiryātaṁ madhupeyamaśvinā /*
*prāyustāriṣṭaṁ nī rapāṁsi mṛkṣataṁsedhataṁ dveṣo bhavataṁ sachābhuvā //47 //*

२. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.४.१-१०; ९.६९.१-१०

ऋ. (Rv.) ९.४.१-१०

सना च सोम जेषि च पवमान महि श्रवः। अथा नो वस्यसस्कृधि ॥१॥
सना ज्योतिः सना स्व१र्विश्वा च सोम सौभगा। अथा नो वस्यसस्कृधि ॥२॥
सना दक्षमुत क्रतुमप सोम मृधो जहि। अथा नो वस्यसस्कृधि ॥३॥
पवीतारः पुनीतन सोममिन्द्राय पातवे। अथा नो वस्यसस्कृधि ॥४॥

त्वं सूर्ये न आ भज तव क्रत्वा तवोतिभिः। अथा नो वस्यसस्कृधि ॥५॥
तव क्रत्वा तवोतिभिर्ज्योक्पश्येम सूर्यम्। अथा नो वस्यसस्कृधि ॥६॥
अभ्यर्ष स्वायुध सोम द्विबर्हसं रयिम्। अथ नो वस्यसस्कृधि ॥७॥
अभ्य१र्षानपच्युतो रयिं समत्सु सासहिः। अथा नो वस्यसस्कृधि ॥८॥
त्वां यज्ञैरवीवृधन् पवमान विधर्मणि। अथा नो वस्यसस्कृधि ॥९॥
रयिं नश्चित्रमश्विनमिन्दो विश्वायुमा भर। अथा नो वस्यसस्कृधि ॥१०॥

*sanā cha soma jeṣi cha pavamāna mahi śravaḥ । athā no vasyasaskṛdhi ॥1॥*
*sanā jyotiḥ sanā sva1rviśvā cha soma saubhagā । athā no vasyasaskṛdhi ॥2॥*
*sanā dakṣamuta kratumapa soma mṛdho jahi । athā no vasyasaskṛdhi ॥3॥*
*pavītāraḥ punītana somamindrāya pātave । athā no vasyasaskṛdhi ॥4॥*
*tvaṁ sūrye na ā bhaja tava kratvā tavotibhiḥ । athā no vasyasaskṛdhi ॥5॥*
*tava kratvā tavotibhirjyokpaśyema sūryam । athā no vasyasaskṛdhi ॥6॥*
*abhyarṣa svāyudha soma dvibarhasaṁ rayim । atha no vasyasaskṛdhi ॥7॥*
*abhya1rṣānapachyuto rayiṁ samatsu sāsahiḥ । athā no vasyasaskṛdhi ॥8॥*
*tvāṁ yajñairavīvṛdhan pavamāna vidharmaṇi । athā no vasyasaskṛdhi ॥9॥*
*rayiṁ naśchitramaśvinamindo viśvāyumā bhara । athā no vasyasaskṛdhi ॥10॥*

ऋ. (Rv.) ९.६९.१-१०

इषुर्न धन्वन् प्रति धीयते मतिर्वत्सो न मातुरुप सर्ज्यूधनि ।
उरुधारेव दुहे अग्र आयत्यस्य व्रतेष्वपि सोम इष्यते ॥१॥
उपो मतिः पृच्यते सिच्यते मधु मन्द्राजनी चोदते अन्तरासनि ।
पवमानः संतनिः प्रघ्नतामिव मधुमान्द्रप्सः परि वारमर्षति ॥२॥
अव्ये वधूयुः पवते परि त्वचि श्रथ्नीते नप्तीरदितेऋर्तं यते ।
हरिरक्रान्यजतः संयतो मदो नृम्णा शिशानो महिषो न शोभते ॥३॥
उक्षा मिमाति प्रति यन्ति धेनवो देवस्य देवीरुप यन्ति निष्कृतम् ।
अत्यक्रमीदर्जुनं वारमव्ययमत्कं न निक्तं परि सोमो अव्यत ॥४॥
अमृक्तेन रुशता वाससा हरिरमर्त्यो निर्णिजानः परि व्यत ।
दिवस्पृष्ठं बर्हणा निर्णिजे कृतोपस्तरणं चम्वोर्नभस्मयम् ॥५॥
सूर्यस्येव रश्मयो द्रावयित्नवो मत्सरासः प्रसुपः साकमीरते ।
तन्तुं ततं परि सर्गास आशवो नेन्द्रादृते पवते धाम किं चन ॥६॥
सिन्धोरिव प्रवणे निम्न आशवो वृषच्युता मदासो गातुमाशत ।
शं नो निवेशे द्विपदे चतुष्पदेऽस्मे वाजाः सोम तिष्ठन्तु कृष्टयः ॥७॥
आ नः पवस्व वसुमद्धिरण्यवदश्वावद् गोमद्यवमत्सुवीर्यम् ।
यूयं हि सोम पितरो मम स्थन दिवो मूर्धानः प्रस्थिता वयस्कृतः ॥८॥
एते सोमाः पवमानास इन्द्रं रथा इव प्र ययुः सातिमच्छ ।
सुताः पवित्रमति यन्त्यव्यं हित्वी वव्रिं हरितो वृष्टिमच्छ ॥९॥
इन्दविन्द्राय बृहते पवस्व सुमृळीको अनवद्यो रिशादाः ।
भरा चन्द्राणि गृणते वसूनि देवैर्द्यावापृथिवी प्रावतं नः ॥१०॥

*iṣurna dhanvan prati dhīyate matirvatso na māturupa sarjyūdhani ।*
*urudhāreva duhe agra āyatyasya vrateṣvapi soma iṣyate ॥1॥*
*upo matiḥ pṛchyate sichyate madhu mandrājanī chodate antarāsina ।*
*pavamānaḥ saṁtaniḥ praghnatāmiva madhumāndrapsaḥ pari vāramarṣati ॥2॥*
*avye vadhūyuḥ pavate pari tvachi śrathnīte naptīraditeṛrtaṁ yate ।*
*harirakrānyajataḥ saṁyato mado nṛmṇā śiśāno mahiṣo na śobhate ॥3॥*
*ukṣā mimāti prati yanti dhenavo devasya devīrupa yanti niṣkṛtam ।*
*atyakramīdarjunaṁ vāramavyayamatkaṁ na niktaṁ pari somo avyata ॥4॥*
*amṛktena ruśatā vāsasā hariramartyo nirṇijānaḥ pari vyata ।*
*divaspṛṣṭhaṁ barhaṇā nirṇije kṛtopastaraṇaṁ chamvornabhasmayam ॥5॥*
*sūryasyeva raśmayo drāvayitnavo matsarāsaḥ prasupaḥ sākamīrate ।*
*tantuṁ tataṁ pari sargāsa āśavo nendrādṛte pavate dhāma kiṁ chana ॥6॥*
*sindhoriva pravaṇe nimra āśavo vṛṣachyutā madāso gātumāśata ।*

*śaṁ no niveśe dvipade chatuṣpade'spe vājāḥ soma tiṣṭhantu kṛṣṭayaḥ //7 //*
*ā naḥ pavasva vasumaddhiraṇyavadaśvāvad gomadyavamatsuvīryam /*
*yūyaṁ hi soma pitaro mama sthana divo mūrdhānaḥ prasthitā vayaskṛtaḥ //8 //*
*ete somāḥ pavamānāsa indraṁ rathā iva pra yayuḥ sātimachchha /*
*sutāḥ pavitramati yantyavyaṁ hitvī vavriṁ harito vṛṣṭimachchha //9 //*
*indavindrāya bṛhate pavasva sukṛḷīko anavadyo riśādāḥ /*
*bharā chandrāṇi gṛṇate vasūni devairdyāvāpṛthivī prāvataṁ naḥ //10 //*

३. सूर्यः (Sūryaḥ) - य. (Yv.) ३४.३१; ३३.४३

य. (Yv.) ३४.३१

आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥३१॥
*ākṛṣṇena rajasā varttamāno niveśayannamṛtaṁ martṁya cha /*
*hiraṇyayena savitā rathenā devo yāti bhuvanāni paśyan //31 //*

य. (Yv.) ३३.४३

आ कृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥४३॥
*ā kṛṣṇena rajasā varttamāno niveśayannamṛtaṁ martyaṁ cha /*
*hiraṇyayena savitā rathenā devo yāti bhuvanāni paśyan //43 //*

## ७९२. हिरण्यस्तूपः आङ्गिरसः (Hiraṇyastūpaḥ Āṅgirasaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १.३१.१-१८; य. (Yv.) ३४.१२; १३

ऋ. (Rv.) १.३१.१-१८

त्वमग्ने प्रथमो अंगिरा ऋषिर्देवो देवानामभवः शिवः सखा ।
तव व्रते कवयो विद्मनापसोऽजायन्त मरुतो भ्रजदृष्टयः ॥१॥
त्वमग्ने प्रथमो अंगिरस्तमः कविर्देवानां परि भूषसि व्रतम् ।
विभुर्विश्वस्मै भुवनाय मेधिरो द्विमाता शयुः कतिधा चिदायवे ॥२॥
त्वमग्ने प्रथमो मातरिश्वन आविर्भव सुक्रतूया विवस्वते ।
अरेजेतां रोदसी होतृवूर्येऽसघ्नोर्भारमयजो महो वसो ॥३॥
त्वमग्ने मनवे द्यामवाशयः पुरूवसे सुकृते सुकृत्तरः ।
श्वात्रेण यत्पित्रोर्मुच्यसे पर्या त्वा पूर्वमनयन्नापरं पुनः ॥४॥
त्वमग्ने वृषभः पुष्टिवर्धन उद्यतस्रुचे भवसि श्रवाय्यः ।
य आहुतिं परि वेदा वषट्कृतिमेकायुरग्रे विश आविवाससि ॥५॥
त्वमग्ने वृजिनवर्तनिं नरं सक्मन्पिपर्षि विदथे विचर्षणे ।
यः शूरसाता परितक्म्ये धने दभ्रेभिश्चित्समृता हंसि भूयसः ॥६॥
त्वं तमग्ने अमृतत्व उत्तमे मर्तं दधासि श्रवसे दिवेदिवे ।
यस्तातृषाण उभयाय जन्मने मयः कृणोषि प्रय आ च सूरये ॥७॥
त्वं नो अग्ने सनये धनानां यशसं कारुं कृणुहि स्तवानः ।
ऋध्याम कर्मापसा नवेन देवैर्द्यावापृथिवी प्रावतं नः ॥८॥
त्वं नो अग्ने पित्रोरुपस्थ आ देवो देवेष्वनवद्य जागृविः ।
तनूकृद् बोधि प्रमतिश्च कारवे त्वं कल्याण वसु विश्वमोपिषे ॥९॥
त्वमग्ने प्रमतिस्त्वं पितासि नस्त्वं वयस्कृत्तव जामयो वयम् ।
सं त्वा रायः शतिनः सं सहस्रिणः सुवीरं यन्ति व्रतपामदाभ्य ॥१०॥
त्वामग्ने प्रथममायुमायवे देवा अकृण्वन्नहुषस्य विश्पतिम् ।
इळामकृण्वन्मनुषस्य शासनीं पितुर्यत्पुत्रो ममकस्य जायते ॥११॥
त्वं नो अग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च वन्द्य ।
त्राता तोकस्य तनये गवामस्यनिमेषं रक्षमाणस्तव व्रते ॥१२॥
त्वमग्ने यज्यवे पायुरन्तरोऽनिषंगाय चतुरक्ष इध्यसे ।
यो रातहव्योऽवृकाय धायसे कीरेश्चिन्मन्त्रं मनसा वनोषि तम् ॥१३॥

त्वमग्न उरुशंसाय वाघते सपार्हं यद्रेक्णः परमं वनोषि तत् ।
आध्रस्य चित्प्रमतिरुच्यसे पिता प्र पाकं शास्सि प्र दिशो विदुष्टरः ॥१४॥
त्वमग्ने प्रयतदक्षिणं नरं वर्मेव स्यूतं परि पासि विश्वतः ।
स्वादुक्षद्मा यो वसतौ स्योनकृज्जीवयाजं यजते सोमपा दिवः ॥१५॥
इमामग्ने शरणि मीमृषो न इममध्वानं यमगाम दूरात् ।
आपिः पिता प्रमतिः सोम्यानां भृमिरस्यृषिकृन्मर्त्यानाम् ॥१६॥
मनुष्वदग्ने अंगिरस्वदंगिरो ययातिवत्सदने पूर्ववच्छुचे ।
अच्छ याह्या वहा दैव्यं जनमा सादय बर्हिषि यक्षि च प्रियम् ॥१७॥
एतेनाग्ने ब्रह्मणा वावृधस्व शक्ती वा यत्ते चकृमा विदा वा ।
उत प्र णेष्यभि वस्यो अस्मान्त्सं नः सृज सुमत्या वाजवत्या ॥१८॥

*tvamagne prathamo aṁgirā ṛṣirdevo devānāmabhavaḥ śivaḥ sakhā /*
*tava vrate kavayo vidmanāpaso'jāyanta maruto bhrajadṛṣṭayaḥ //1 //*
*tvamagne prathamo aṁgirastamaḥ kavirdevānāṁ pari bhūṣasi vratam /*
*vibhurviśvasmai bhuvanāya medhiro dvimātā śayuḥ katidhā chidāyave //2 //*
*tvamagne prathamo mātariśvana āvirbhava sukratūyā vivasvate /*
*arejetāṁ rodasī hotṛvūrye'saghnorbhāramayajo maho vaso //3 //*
*tvamagne manave dyāmavāśayaḥ purūvase sukṛte sukṛttaraḥ /*
*śvātreṇa yatpitrormuchyase paryā tvā pūrvamanayannāparaṁ punaḥ //4 //*
*tvamagne vṛṣabhaḥ puṣṭivardhana udyatasruche bhavasi śravāyyaḥ /*
*ya āhutiṁ pari vedā vaṣṭkṛtimekāyuragre viśa āvivāsasi //5 //*
*tvamagne vṛjinavartaniṁ naraṁ sakmanpiparṣi vidathe vicharṣaṇe /*
*yaḥ śūrasātā paritakmye dhane dabhrebhiśchitsamṛtā haṁsi bhūyasaḥ //6 //*
*tvaṁ tamagne amṛtatva uttame martaṁ dadhāsi śravase divedive /*
*yastātṛṣāṇa ubhayāya janmane mayaḥ kṛṇoṣi praya ā cha sūraye //7 //*
*tvaṁ no agne sanaye dhanānāṁ yaśasaṁ kāruṁ kṛṇuhi stavānaḥ /*
*ṛdhyāma karmāpasā navena devairdyāvāpṛthivī prāvataṁ naḥ //8 //*
*tvaṁ no agne pitrorupastha ā devo deveṣvanavadya jāgṛviḥ /*
*tanūkṛd bodhi pramatiścha kārave tvaṁ kalyāṇa vasu viśvamopiṣe //9 //*
*tvamagne pramatistvaṁ pitāsi nastvaṁ vayaskṛttava jāmayo vayam /*
*saṁ tvā rāyaḥ śatinaḥ saṁ sahasriṇaḥ suvīraṁ yanti vratapāmadābhya //10 //*
*tvāmagne prathamamāyumāyave devā akṛṇvannahuṣasya viśpatim /*
*iḻāmakṛṇvanmanuṣasya śāsanīṁ pituryatputro mamakasya jāyate //11 //*
*tvaṁ no agne tava deva pāyubhirmaghono rakṣa tanvaścha vandya /*
*trātā tokasya tanaye gavāmasyanimeṣaṁ rakṣamāṇastava vrate //12 //*
*tvamagne yajyave pāyurantaro'niṣaṁgāya chaturakṣa idhyase /*
*yo rātahavyo'vṛkāya dhāyase kīreśchinmantraṁ manasā vanoṣi tam //13 //*
*tvamagna uruśaṁsāya vāghate sapārhaṁ yadrekṇaḥ paramaṁ vanoṣi tat /*
*ādhrasya chitpramatiruchyase pitā pra pākaṁ śāssi pra diśo viduṣṭaraḥ //14 //*
*tvamagne prayatadakṣiṇaṁ naraṁ varmeva syūtaṁ pari pāsi viśvataḥ /*
*svādukṣadmā yo vasatau syonakṛjjīvayājaṁ yajate somapā divaḥ //15 //*
*imāmagne śaraṇi mīmṛṣo na imamadhvānaṁ yamagāma dūrāt /*
*āpiḥ pitā pramatiḥ somyānāṁ bhṛmirasyṛṣikṛnmartyānām //16 //*
*manuṣvadagne aṁgirasvadaṁgiro yayātivatsadane pūrvavachchhuche /*
*achchha yāhyā vahā daivyaṁ janamā sādaya barhiṣi yakṣi cha priyam //17 //*
*etenāgne brahmaṇā vāvṛdhasva śaktī vā yatte chakṛmā vidā vā /*
*uta pra ṇeṣyabhi vasyo asmāntsaṁ naḥ sṛja sumatyā vājavatyā //18 //*

य. (Yv.) ३४.१२-१३

त्वमग्ने प्रथमोऽअंगिराऽऋषिर्देवो देवानामभवः शिवः सखा ।
तव व्रते कवयो विद्मनापसोऽजायन्त मरुतो भ्राजदृष्टयः ॥१२॥
त्वं नोऽअग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च वन्द्य ।
त्राता तोकस्य तनये गवामस्यनिमेषं रक्षमाणस्तव व्रते ॥१३॥

*tvamagne prathamo'aṁgirā'ṛṣirdevo devānāmabhavaḥ śivaḥ sakhā /*

*tava vrate kavayo vidmanāpaso'jāyanta maruto bhrājadṛṣṭayaḥ //12 //*
*tvaṁ no'agne tava deva pāyubhirmaghono rakṣa tanvaścha vandya /*
*trātā tokasya tanaye gavāmasyanimeṣaṁ rakṣamāṇastava vrate //13 //*

२. अग्नि मित्रावरुणौ रात्रिः सविता च (Agni Mitrāvaruṇa, Rātri and Savitā) - ऋ. (Rv.) १.३५.१

ह्वयाम्यग्निं प्रथमं स्वस्तये ह्वयामि मित्रावरुणाविहावसे ।
ह्वयामि रात्रीं जगतो निवेशनीं ह्वयामि देवं सवितारमूतये ॥१॥
*hvayāmyagniṁ prathamaṁ svastaye hvayāmi mitrāvaruṇāvihāvase /*
*hvayāmi rātrīṁ jagato niveśanīṁ hvayāmi devaṁ savitāramūtaye //1 //*

३. अश्विनौ (Aśvinau) - ऋ. (Rv.) १.३४.१-१२

त्रिश्चिन्नो अद्या भवतं नवेदसा विभुर्वां याम उत रातिरश्विना ।
युवोर्हि यन्त्रं हिम्येव वाससोऽभ्यायंसेन्या भवतं मनीषिभिः ॥१॥
त्रयः पवयो मधुवाहने रथे सोमस्य वेनामनु विश्व इद्विदुः ।
त्रयः स्कम्भासः स्कभितास आरभे त्रिर्नक्तं याथस्त्रिर्वश्विना दिवा ॥२॥
समाने अहन्त्रिरवद्यगोहना त्रिरद्य यज्ञं मधुना मिमिक्षतम् ।
त्रिर्वाजवतीरिषो अश्विना युवं दोषा अस्मभ्यमुषसश्च पिन्वतम् ॥३॥
त्रिर्वर्तिर्यातं त्रिरनुव्रते जने त्रिः सुप्राव्ये त्रेधेव शिक्षतम् ।
त्रिर्नान्द्यं वहतमश्विना युवं त्रिः पृक्षो अस्मे अक्षरेव पिन्वतम् ॥४॥
त्रिर्नो रयिं वहतमश्विना युवं त्रिर्देवताता त्रिरुतावतं धियः ।
त्रिः सौभगत्वं त्रिरुत श्रवांसि नस्त्रिष्ठं वां सूरे दुहितारुहद्रथम् ॥५॥
त्रिर्नो अश्विना दिव्यानि भेषजा त्रिः पार्थिवानि त्रिरु दत्तमद्भ्यः ।
ओमानं रशंयोर्ममकाय सूनवे त्रिधातु शर्म वहतं शुभस्पती ॥६॥
त्रिर्नो अश्विना यजता दिवेदिवे परि त्रिधातु पृथिवीमशायतम् ।
तिस्रो नासत्या रथ्या परावत आत्मेव वातः स्वसराणि गच्छतम् ॥७॥
त्रिरश्विना सिन्धुभिः सप्तमातृभिस्त्रय आहावास्त्रेधा हविष्कृतम् ।
तिस्रः पृथिवीरुपरि प्रवा दिवो नाकं रक्षेथे द्युभिरक्तुभिर्हितम् ॥८॥
क्व१त्री चक्राा त्रिवृतो रथस्य क्व१त्रयो वन्धुरो ये सनीळाः ।
कदा योगो वाजिनो रासभस्य येन यज्ञं नासतेपयाथः ॥९॥
आ नासत्या गच्छतं हूयते हविर्मध्वः पिबतं मधुपेभिरासभिः ।
युवोर्हि पूर्वं सवितोषसो रथमृताय चित्रं घृतवन्तमिष्यति ॥१०॥
आ नासत्या त्रिभिरेकादशैरिह देवेभिर्यातं मधुपेयमश्विना ।
प्रायुस्तारिष्टं नी रपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभुवा ॥११॥
आ नो अश्विना त्रिवृता रथेनार्वांचं रयिं वहतं सुवीरम् ।
श्रृण्वन्ता वामवसे जोहवीमि वृधे च नो भवतं वाजसातौ ॥१२॥
*triśchinno adyā bhavataṁ navedasā vibhurvāṁ yāma uta rātiraśvinā /*
*yuvorhi yantraṁ himyeva vāsaso'bhyāyaṁsenyā bhavataṁ manīṣibhiḥ //1 //*
*trayaḥ pavayo madhuvāhane rathe somasya venāmanu viśva idviduḥ /*
*trayaḥ skambhāsaḥ skabhitāsa ārabhe trirnaktaṁ yāthastrirvaśvinā divā //2 //*
*samāne ahantriravadyagohanā triradya yajñaṁ madhunā mimikṣatam /*
*trirvājavatīriṣo aśvinā yuvaṁ doṣā asmabhyamuṣasaścha pinvatam //3 //*
*trirvartiryātaṁ triranuvrate jane triḥ suprāvye tredheva śikṣatam /*
*trirnāndyaṁ vahatamaśvinā yuvaṁ triḥ pṛkṣo asme akṣareva pinvatam //4 //*
*trirno rayiṁ vahatamaśvinā yuvaṁ trirdevatātā trirutāvataṁ dhiyaḥ /*
*triḥ saubhagatvaṁ triruta śravāṁsi nastriṣṭhaṁ vāṁ sūre duhitāruhadratham //5 //*
*trirno aśvinā divyāni bheṣajā triḥ pārthivāni triru dattamadbhyaḥ /*
*omānaṁ raśaṁyormamakāya sūnave tridhātu śarma vahataṁ śubhaspatī //6 //*
*trirno aśvinā yajatā divedive pari tridhātu pṛthivīmaśāyatam /*
*tisro nāsatyā rathyā parāvata ātmeva vātaḥ svasarāṇi gachchhatam //7 //*
*triraśvinā sindhubhiḥ saptamātṛbhistraya āhāvāstredhā haviṣkṛtam /*

*tisraḥ pṛthivīrupari pravā divo nākaṁ rakṣethe dyubhiraktubhirhitam ॥8 ॥*
*kva1trī chakrāā trivṛto rathasya kva1trayo vandhuro ye sanīḷāḥ ।*
*kadā yogo vājino rāsabhasya yena yajñaṁ nāsatepayāthaḥ ॥9 ॥*
*ā nāsatyā gachchhataṁ hūyate havirmadhvaḥ pibataṁ madhupebhirāsabhiḥ ।*
*yuvorhi pūrvaṁ savitoṣaso rathamṛtāya chitraṁ ghṛtavantamiṣyati ॥10 ॥*
*ā nāsatyā tribhirekādaśairiha devebhiryātaṁ madhupeyamaśvinā ।*
*prāyustāriṣṭaṁ nī rapāṁsi mṛkṣataṁ sedhataṁ dveṣo bhavataṁ sachābhuvā ॥11 ॥*
*ā no aśvinā trivṛtā rathenārvāṁchaṁ rayiṁ vahataṁ suvīram ।*
*śṛṇvantā vāmavase johavīmi vṛdhe cha no bhavataṁ vājasātau ॥12 ॥*

४. इन्द्रः (Indraḥ) - ऋ. (Rv.) १.३२.१-१५; १.३३.१-१५; सा. (Sv.) ६१२

ऋ. (Rv.) १.३२.१-१५

इन्द्रस्य नु वीर्याणि प्र वोचं यानि चकार प्रथमानि वज्री ।ळ
अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत्पर्वतानाम् ॥१॥
अहन्नहिं पर्वते शिश्रियाणं त्वष्टास्मै वज्रं स्वर्यं ततक्ष ।
वाश्रा इव धेनवः स्यन्दमाना अंजः समुद्रमव जग्मुरापः ॥२॥
वृषायमाणोऽवृणीत सोमं त्रिकद्रुकेष्वपिबत्सुतस्य ।
आ सायकं मघवादत्त वज्रमहन्नेनं प्रथमजामहीनाम् ॥३॥
यदिन्द्राहन्प्रथमजामहीनामान्मायिनाममिनाः प्रोत मायाः ।
आत्सूर्यं जनयन्द्यामुषासं तादीत्ना शत्रुं न किला विवित्से ॥४॥
आहन्वृत्रं वृत्रतरं व्यंसमिन्द्रो वज्रेण महता वधेन ।
स्कन्धांसीव कुलिशेना विवृक्णाहिः शयत उपपृक्पृथिव्याः ॥५॥
अयोद्धेव दुर्मद आ हि जुह्वे महावीरं तुविबाधमृजीषम् ।
नातारीदस्य समृतिं वधानां सं रुजानाः पिपिष इन्द्रशत्रुः ॥६॥
अपादहस्तो अपृतन्यदिन्द्रमास्य वज्रमधि सानौ जघान ।
वृष्णो वध्रिः प्रतिमानं बुभूषन्पुरुत्रा वृत्रो अशयद्व्यस्तः ॥७॥
नदं न भिन्नममुया शयानं मनो रुहाणा अति यन्त्यापः ।
याश्चिद्वृत्रो महिना पर्यतिष्ठत्तासामहिः पत्सुतः शीर्बभूव ॥८॥
नीचावया अभवद् वृत्रपुत्रेन्द्रो अस्या अव वर्धर्जभार ।
उत्तरा सूरधरः पुत्र आसीद्दानुः शये सहवत्सा न धेनुः ॥९॥
अतिष्ठन्तीनामनिवेशनानां काष्ठानां मध्ये निहितं शरीरम् ।
वृत्रस्य निण्यं वि चरन्त्यापो दीर्घं तम आशयदिन्द्रशत्रुः ॥१०॥
दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः ।
अपां बिलमपिहितं यदासीद् वृत्रं जघन्वाँ अप तद्ववार ॥११॥
अश्व्यो वारो अभवस्तदिन्द्र सृके यत्त्वा प्रत्यहन्देव एकः ।
अजयो गा अजयः शूर सोममवासृजः सर्तवे सप्त सिन्धून् ॥१२॥
नास्मै विद्युन्न तन्यतुः सिषेध न यां मिहमकिरद् ध्रादुनिं च ।
इन्द्रश्च यद्युयुधाते अहिश्चोतापरीभ्यो मघवा वि जिग्ये ॥१३॥
अहेर्यातारं कमपश्य इन्द्र हृदि यत्ते जघ्नुषो भीरगच्छत् ।
नव च यन्नवतिं च स्रवन्तीः श्येनो न भीतो अतरो रजांसि ॥१४॥
इन्द्रो यातोऽवसितस्य राजा शमस्य च श्रृंगिणो वज्रबाहुः ।
सेदु राजा क्षयति चर्षणीनामरान्न नेमिः परि ता बभूव ॥१५॥

*indrasya nu vīryāṇi pra vochaṁ yāni chakāra prathamāni vajrī ।ḷa*
*ahannahimanvapastatarda pra vakṣaṇā abhinatparvatānām ॥1 ॥*
*ahannahiṁ parvate śiśriyāṇaṁ tvaṣṭāsmai vajraṁ svaryaṁ tatakṣa ।*
*vāśrā iva dhenavaḥ syandamānā aṁjaḥ samudramava jagmurāpaḥ ॥2 ॥*
*vṛṣāyamāṇo'vṛṇīta somaṁ trikadrukeṣvapibatsutasya ।*
*ā sāyakaṁ maghavādatta vajramahannenaṁ prathamajāmahīnām ॥3 ॥*
*yadindrāhanprathamajāmahīnāmānmāyināmamināḥ prota māyāḥ ।*
*ātsūryaṁ janayandyāmuṣāsaṁ tādītnā śatruṁ na kilā vivitse ॥4 ॥*

*āhanvṛtraṁ vṛtrataraṁ vyaṁsamindro vajreṇa mahatā vadhena ।*
*skandhāṁsīva kuliśenā vivṛkṇāhiḥ śayata upapṛkpṛthivyāḥ ॥5॥*
*ayoddheva durmada ā hi juhve mahāvīraṁ tuvibādhamṛjīṣam ।*
*nātārīdasya samṛtiṁ vadhānāṁ saṁ rujānāḥ pipiṣa indraśatruḥ ॥6॥*
*apādahasto apṛtanyadindramāsya vajramadhi sānau jaghāna ।*
*vṛṣṇo vadhriḥ pratimānaṁ bubhūṣanpurutrā vṛtro aśayadvyastaḥ ॥7॥*
*nadaṁ na bhinnamamuyā śayānaṁ mano ruhāṇā ati yantyāpaḥ ।*
*yāśchidvṛtro mahinā paryatiṣṭhattāsāmahiḥ patsutaḥ śīrbabhūva ॥8॥*
*nīchāvayā abhavad vṛtraputrendro asyā ava vardharjabhāra ।*
*uttarā sūradharaḥ putra āsīddānuḥ śaye sahavatsā na dhenuḥ ॥9॥*
*atiṣṭhantīnāmaniveśanānāṁ kāṣṭhānāṁ madhye nihitaṁ śarīram ।*
*vṛtrasya niṇyaṁ vi charantyāpo dīrghaṁ tama āśayadindraśatruḥ ॥10॥*
*dāsapatnīrahigopā atiṣṭhanniruddhā āpaḥ paṇineva gāvaḥ ।*
*apāṁ bilamapihitaṁ yadāsīd vṛtraṁ jaghanvāṁ̐ apa tadvavāra ॥11॥*
*aśvyo vāro abhavastadindra sṛke yattvā pratyahandeva ekaḥ ।*
*ajayo gā ajayaḥ śūra somamavāsṛjaḥ sartave sapta sindhūn ॥12॥*
*nāsmai vidyunna tanyatuḥ siṣedha na yāṁ mihamakirad dhrāduniṁ cha ।*
*indraścha yadyuyudhāte ahiśchotāparībhyo maghavā vi jigye ॥13॥*
*aheryātāraṁ kamapaśya indra hṛdi yatte jaghnuṣo bhīragachchhat ।*
*nava cha yannavatiṁ cha sravantīḥ śyeno na bhīto ataro rajāṁsi ॥14॥*
*indro yāto'vasitasya rājā śamasya cha śṛṁgiṇo vajrabāhuḥ ।*
*sedu rājā kṣayati charṣaṇīnāmarānna nemiḥ pari tā babhūva ॥15॥*

ऋ. (Rv.) १.३३.१-१५

एतायामोप गव्यन्त इन्द्रमस्माकं सु प्रमतिं वावृधाति ।
अनामृणः कुविदादस्य रायो गवां केतं परमावर्जते नः ॥१॥
उपेदहं धनदामप्रतीतं जुष्टां न श्येनो वसतिं पतामि ।
इन्द्रं नमस्यन्नुपमेभिरर्कैर्यः स्तोतृभ्यो हव्यो अस्ति यामन् ॥२॥
नि सर्वसेन इषुधीँरसक्त समर्यो गा अजति यस्य वष्टि ।
चोष्कूयमाण इन्द्र भूरि वामं मा पणिर्भूरस्मदधि प्रवृद्ध ॥३॥
वधीर्हि दस्युं धनिनं घनेनँ एकश्चरन्नुपशकेभिरिन्द्र ।
धनोरधि विषुणक्ते व्यायन्नयज्वानः सनकाः प्रेतिमीयुः ॥४॥
परा चिच्छीर्षा ववृजुस्त इन्द्रायज्वानो यज्वभिः स्पर्धमानाः ।
प्र यद्दिवो हरिवः स्थातरुग्र निरव्रताँ अधमो रोदस्योः ॥५॥
अयुयुत्सन्ननवद्यस्य सेनामयातयन्त क्षितयो नवग्वाः ।
वृषायुधो न वध्रयो निरष्टाः प्रवद्भिरिन्द्राच्चितयन्त आयन् ॥६॥
त्वमेतान् रुदतो जक्षतश्चायोधयो रजस इन्द्र पारे ।
अवादहो दिव आ दस्युमुच्चा प्र सुन्वतः स्तुवतः शंसमावः ॥७॥
चक्राणासः परीणहं पृथिव्या हिरण्येन मणिना शुम्भमानाः ।
न हिन्वानामस्तितिरुस्त इन्द्रं परि स्पशो अदधात्सूर्येण ॥८॥
परि यदिन्द्र रोदसी उभे अबुभोजीर्महिना विश्वतः सीम् ।
अमन्यमानाँ अभि मन्यमानैर्निर्ब्रह्मभिरधमो दस्युमिन्द्र ॥९॥
न ये दिवः पृथिव्या अन्तमापुर्न मायाभिर्धनदां पर्यभूवन् ।
युजं वज्रं वृषभश्चक्र इन्द्रो निर्ज्योतिषा तमसो गा अदुक्षत् ॥१०॥
अनु स्वधामक्षरन्नापो अस्यावर्धत मध्य आ नाव्यानाम् ।
सध्रीचीनेन मनसा तमिन्द्र ओजिष्ठेन हन्मनाहन्नभि द्यून् ॥११॥
न्याविध्यदिलीबिशस्य दृळहा वि श्रृंगिणमभिनच्छुष्णमिन्द्रः ।
यावत्तरो मघवन्यावदोजो वज्रेण शत्रुमवधीः पृतन्युम् ॥१२॥
अभि सिध्मो अजिगादस्य शत्रून्वि तिग्मेन वृषभेणा पुरोऽभेत् ।
सं वज्रेणासृजद् वृत्रमिन्द्रः प्र स्वां मतिमतिरच्छाशदानः ॥१३॥
आवः कुत्समिन्द्र यस्मिंचाकन्प्रावो युध्यन्तं वृषभं दशद्युम् ।

शफच्युतो रेणुर्नक्षत द्यामुच्छ्वैंत्रेयो नृषाह्याय तस्थौ ॥१४॥
आवः शमं वृषभं तुग्र्यासु क्षेत्रजेषे मघविंछ्वंत्र्यं गाम् ।
ज्योक् चिदत्र तस्थिवांसो अक्रंछत्रूयतामधरा वेदनाकः ॥१५॥
*etāyāmopa gavyanta indramasmākaṁ su pramatiṁ vāvṛdhāti ।*
*anāmṛṇaḥ kuvidādasya rāyo gavāṁ ketaṁ paramāvarjate naḥ ॥1॥*
*upedahaṁ dhanadāmapratītaṁ juṣṭāṁ na śyeno vasatiṁ patāmi ।*
*indraṁ namasyannupamebhirarkairyaḥ stotṛbhyo havyo asti yāman ॥2॥*
*ni sarvasena iṣudhīṁrasakta samaryo gā ajati yasya vaṣṭi ।*
*choṣkūyamāṇa indra bhūri vāmaṁ mā pāṇirbhūrasmadadhi pravṛddha ॥3॥*
*vadhīrhi dasyuṁ dhaninaṁ ghanenaṁ ekaścharannupaśakebhirindra ।*
*dhanoradhi viṣuṇakte vyāyannayajvānaḥ sanakāḥ pretimīyuḥ ॥4॥*
*parā chichchhīrṣā vavṛjusta indrāyajvāno yajvabhiḥ spardhamānāḥ ।*
*pra yaddivo harivaḥ sthātarugra niravratāṁ adhamo rodasyoḥ ॥5॥*
*ayuyutsannanavadyasya senāmayātayanta kṣitayo navagvāḥ ।*
*vṛṣāyudho na vadhrayo niraṣṭāḥ pravadbhirindrāchchitayanta āyan ॥6॥*
*tvametān rudato jakṣataśchāyodhayo rajasa indra pāre ।*
*avādaho diva ā dasyumuchchā pra sunvataḥ stuvataḥ śaṁsamāvaḥ ॥7॥*
*chakrāṇāsaḥ parīṇahaṁ pṛthivyā hiraṇyena maṇinā śumbhamānāḥ ।*
*na hinvānāmastitirusta indraṁ pari spaśo adadhātsūryeṇa ॥8॥*
*pari yadindra rodasī ubhe abubhojīrmahinā viśvataḥ sīm ।*
*amanyamānāṁ abhi manyamānairnirbrahmabhiradhamo dasyumindra ॥9॥*
*na ye divaḥ pṛthivyā antamāpurna māyābhirdhanadāṁ paryabhūvan ।*
*yujaṁ vajraṁ vṛṣabhaśchakra indro nirjyotiṣā tamaso gā adukṣat ॥10॥*
*anu svadhāmakṣarannāpo asyāvardhata madhya ā nāvyānām ।*
*sadhrīchīnena manasā tamindra ojiṣṭhena hanmanāhannabhi dyūn ॥11॥*
*nyāvidhyadilībiśasya dṛḷahā vi śṛṁgiṇamabhinachchhuṣṇamindraḥ ।*
*yāvattaro maghavanyāvadojo vajreṇa śatrumavadhīḥ pṛtanyum ॥12॥*
*abhi sidhmo ajigādasya śatrūnvi tigmena vṛṣabheṇā puro'bhet ।*
*saṁ vajreṇāsṛjad vṛtramindraḥ pra svāṁ matimatirachchhāśadānaḥ ॥13॥*
*āvaḥ kutsamindra yasmiṁchākanprāvo yudhyantaṁ vṛṣabhaṁ daśadyum ।*
*śaphachyuto reṇurnakṣata dyāmuchchhvaiṁtreyo nṛṣāhyāya tasthau ॥14॥*
*āvaḥ śamaṁ vṛṣabhaṁ tugryāsu kṣetrajeṣe maghaviṁchhvaṁtrayaṁ gām ।*
*jyok chidatra tasthivāṁso akraṁchhatrūyatāmadharā vedanākaḥ ॥15॥*

सा. (Sv.) ६१२

इन्द्रस्य नु वीर्याणि प्रवोचं यानि चकार प्रथमानि वज्री ।
अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत्पर्वतानाम् ॥११॥
*indrasya nu vīryāṇi pravochaṁ yāni chakāra prathamāni vajrī ।*
*ahannahimanvapastatarda pra vakṣaṇā abhinatparvatānām ॥11॥*

५. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) १०४७-१०५६; १३७०-१३७२

सा. (Sv.) १०४७-१०५६

सना च सोम जेषि च पवमान महि श्रवः। अथा नो वस्यसस्कृधि ॥१॥
सना ज्योतिः सना स्व३र्विश्वा च सोम सौभगा। अथा नो वस्यसस्कृधि ॥२॥
सना दक्षमुत क्रतुमप सोम मृधो जहि अथा नो वस्यसस्कृधि ॥३॥
पवीतारः पुनीतन सोममिन्द्राय पातवे। अथा नो वस्यसस्कृधि ॥४॥
त्वं सूर्ये न आ भज तव क्रत्वा तवोतिभिः। अथा नो वस्यसस्कृधि ॥५॥
तव क्रत्वा तवोतिभिर्ज्योक्पश्येम सूर्यम्। अथा नो वस्यसस्कृहिध ॥६॥
अभ्यर्ष स्वायुध सोम द्विबर्हसं रयिम्। अथा नो वस्यसस्कृधि ॥७॥
अभ्या३र्षानपच्युतो वाजिन्त्समत्सु सासहिः। अथा नो वस्यसस्कृधि ॥८॥
त्वां यज्ञैरवीवृधन्पवमान विधर्मणि। अथा नो वस्यसस्कृधि ॥९॥
रयिं नश्चित्रमश्विनमिन्दो विश्वायुमा भर। अथा नो वस्यसस्कृधि ॥१०॥
*sanā cha soma jeṣi cha pavamāna mahi śravaḥ । athā no vasyasaskṛdhi ॥1॥*

*sanā jyotiḥ sanā sva3rviśvā cha soma saubhagā | athā no vasyasaskṛdhi ||2 ||*
*sanā dakṣamuta kratumapa soma mṛdho jahi athā no vasyasaskṛdhi ||3 ||*
*pavītāraḥ punītana somamindrāya pātave | athā no vasyasaskṛdhi ||4 ||*
*tvaṁ sūrye na ā bhaja tava kratvā tavotibhiḥ | athā no vasyasaskṛdhi ||5 ||*
*tava kratvā tavotibhirjyokpaśyema sūryam | athā no vasyasaskṛhidha ||6 ||*
*abhyarṣa svāyudha seāma dvibarhasaṁ rayim | athā no vasyasaskṛdhi ||7 ||*
*abhyā3rṣānapachyuto vājintsamatsu sāsahiḥ | athā no vasyasaskṛdhi ||8 ||*
*tvāṁ yajñairavīvṛdhanpavamāna vidharmaṇi | athā no vasyasaskṛdhi ||9 ||*
*rayiṁ naśchitramaśvinamindo viśvāyumā bhara | athā no vasyasaskṛdhi ||10 ||*

सा. (Sv.) १३७०-१३७२

सूर्यस्येव रश्मयो द्रावयित्नवो मत्सरासः प्रसुतः साकमीरते ।
तन्तुं ततं परि सर्गास आशवो नेन्द्राद्दते पवते धाम किंचन ॥१॥
उपो मतिः पृच्यते सिच्यते मधु मन्द्राजनी चोदते अन्तरा सनि ।
पवमानः सन्तनिः सुन्वतामिव मधुमान् द्रप्सः परि वारमर्षति ॥२॥
उक्षा मिमेति प्रति यन्ति धेनवो देवस्य देवीरुप यन्ति निष्कृतम् ।
अत्यक्रमीदर्जुनं वारमव्ययमत्कं न निक्तं परि सोमो अव्यत ॥३॥

*sūryasyeva raśmayo drāvayitnavo matsarāsaḥ prasutaḥ sākamīrate |*
*tantuṁ tataṁ pari sargāsa āśavo nendrādṛte pavate dhāma kiṁchana ||1 ||*
*upo matiḥ pṛchyate sichyate madhu mandrājanī chodate antarā sani |*
*pavamānaḥ santaniḥ sunvatāmiva madhumān drapsaḥ pari vāramarṣati ||2 ||*
*ukṣā mimeti prati yanti dhenavo devasya devīrupa yanti niṣkṛtam |*
*atyakramīdarjunaṁ vāramavyayamatkaṁ na niktaṁ pari somo avyata ||3 ||*

६. सविता (Savitā) - ऋ. (Rv.) १.३५.२-११; य. (Yv.) ३४.२१-२७

ऋ. (Rv.) १.३५.२-११

आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥२॥
याति देवः प्रवता यात्युद्वता याति शुभ्राभ्यां यजतो हरिभ्याम् ।
आ देवो याति सविता परावतोऽप विश्वा दुरिता बाधमानः ॥३॥
अभीवृतं कृशनैर्विश्वरूपं हिरण्यशम्यं यजतो बृहन्तम् ।
आस्थाद्रथं सविता चित्रभानुः कृष्णा रजांसि तमिषीं दधानः ॥४॥
वि जनांछ्यावाः शितिपादो अख्यन्रथं हिरण्यप्रउगं वहन्तः ।
शश्वद्विशः सवितुर्दैव्यस्योपस्थे विश्वा भुवनानि तस्थुः ॥५॥
तिस्रो द्यावः सवितुर्द्वा उपस्थाँ एका यमस्य भुवने विराषाट् ।
आणिं न रथ्यममृताधि तस्थुरिह ब्रवीतु य उ तच्चिकेतत् ॥६॥
वि सुपर्णो अन्तरिक्षाण्यख्यद् गभीरवेपा असुरः सुनीथः ।
क्वे३दानीं सूर्यः कश्चिकेत कतमां द्यां रश्मिरस्या ततान ॥७॥
अष्टौ व्यख्यत्ककुभः पृथिव्यास्त्री धन्व योजना सप्त सिन्धून् ।
हिरण्याक्षः सविता देव आगाद्दधद्रत्ना दाशुषे वार्याणि ॥८॥
हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवी अन्तरीयते ।
अपामीवा बाधते वेति सूर्यमभि कृष्णेन रजसा द्यामृणोति ॥९॥
हिरण्यहस्तो असुरः सुनीथः सुमृळीकः स्ववाँ यात्वर्वाङ् ।
अपसेधन्रक्षसो यातुधानानस्थाद्देवः प्रतिदोषं गृणानः ॥१०॥
ये ते पन्थाः सवित पूर्व्यासोऽरेणवः सुकृता अन्तरिक्षे ।
तेभिर्नो अद्य पथिभिः सुगेभि रक्षा च नो अधि च ब्रूहि देव ॥११॥

*ā kṛṣṇena rajasā vartamāno niveśayannamṛtaṁ martyaṁ cha |*
*hiraṇyayena savitā rathenā devo yāti bhuvanāni paśyan ||2 ||*
*yāti devaḥ pravatā yātyudvatā yāti śubhrābhyāṁ yajato haribhyām |*
*ā devo yāti savitā parāvato'pa viśvā duritā bādhamānaḥ ||3 ||*
*abhīvṛtaṁ kṛśanairviśvarūpaṁ hiraṇyaśamyaṁ yajato bṛhantam |*

*āsthādrathaṁ savitā chitrabhānuḥ kṛṣṇā rajāṁsi tamiṣīṁ dadhānaḥ* //4 //
*vi janāṁchhyāvāḥ śitipādo akhyanrathaṁ hiraṇyapraugaṁ vahantaḥ* /
*śaśvadviśaḥ saviturdaivyasyopasthe viśvā bhuvanāni tasthuḥ* //5 //
*tisro dyāvaḥ saviturdvā upasthām̐ ekā yamasya bhuvane virāṣāṭ* /
*āṇiṁ na rathayamamṛtādhi tasthuriha bravītu ya u tachchiketat* //6 //
*vi suparṇo antarikṣāṇyakhyad gabhīravepā asuraḥ sunīthaḥ* /
*kve3dānīṁ sūryaḥ kaśchiketa katamāṁ dyāṁ raśmirasyā tatāna* //7 //
*aṣṭau vyakhyatkakubhaḥ pṛthivyāstrī dhanva yojanā sapta sindhūn* /
*hiraṇyākṣaḥ savitā deva āgāddadhadratnā dāśuṣe vāryāṇi* //8 //
*hiraṇyapāṇiḥ savitā vicharṣaṇirubhe dyāvāpṛthivī antarīyate* /
*apāmīvā bādhate veti sūryamabhi kṛṣṇena rajasā dyāmṛṇoti* //9 //
*hiraṇyahasto asuraḥ sunīthaḥ sumṛḻīkaḥ svavām̐ yātvarvāṅ* /
*apasedhanrakṣaso yātudhānānasthāddevaḥ pratidoṣaṁ gṛṇānaḥ* //10 //
*ye te panthāḥ savita pūrvyāso'reṇavaḥ sukṛtā antarikṣe* /
*tebhirno adya pathibhiḥ sugebhi rakṣā cha no adhi cha brūhi deva* //11 //

य. (Yv.) ३४.२१-२७

सोमो धेनुं सोमोऽअर्वन्तमाशुं सोमो वीरं कर्मण्यं ददाति ।
सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै ॥२१॥
त्वमिमाऽओषधीः सोम विश्वास्त्वमपोऽअजनयस्त्वं गाः ।
त्वमा ततन्थोव र्न्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥२२॥
देवेन नो मनसा देव सोम रायो भागं सहसावन्नभि युध्य ।
मा त्वा तनदीशिषे वीर्य्यस्योभयेभ्यः प्र चिकित्सा गविष्टौ ॥२३॥
अष्टौ व्यख्यत्ककुभः पृथिव्यास्त्री धन्व योजना सप्त सिन्धून् ।
हिरण्याक्षः सविता देवऽआगाद्दधद्रत्ना दाशुषे वार्य्याणि ॥२४॥
हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवीऽअन्तरीयते ।
अपामीवां बाधते वेति सूर्य्यमभि कृष्णेन रजसा द्यामृणोति ॥२५॥
हिरण्यहस्तोऽअसुरः सुनीथः सुमृडीकः स्वँवा यात्वर्वाङ् ।
अपसेधनूक्षमो यातुधानानस्थाद्दवः प्रतिदोषं गृणानः ॥२६॥
ये ते पन्थाः सवितः पूर्व्यासोऽरेणवः सुकृताऽअन्तरिक्षे ।
तेभिर्नोऽअद्य पथिभिः सुगेभी रक्षा च नोऽअधि च ब्रूहि देव ॥२७॥
*somo dhenuṁ somo'arvantamāśuṁ somo vīraṁ karmaṇyaṁ dadāti* /
*sādanyaṁ vidathyaṁ sabheyaṁ pitṛśravaṇaṁ yo dadāśadasmai* //21 //
*tvamimā'oṣadhīḥ soma viśvāstvamapo'ajanayastvaṁ gāḥ* /
*tvamā tatanthova rntarikṣaṁ tvaṁ jyotiṣā vi tamo vavartha* //22 //
*devena no manasā deva soma rāyo bhāgaṁ sahasāvannabhi yudhya* /
*mā tvā tanadīśiṣe vīryyasyobhayebhyaḥ pra chikitsā gaviṣṭau* //23 //
*aṣṭau vyakhyatkakubhaḥ pṛthivyāstrī dhanva yojanā sapta sindhūn* /
*hiraṇyākṣaḥ savitā deva'āgāddadhadratnā dāśuṣe vāryyāṇi* //24 //
*hiraṇyapāṇiḥ savitā vicharṣaṇirubhe dyāvāpṛthivī'antarīyate* /
*apāmīvāṁ bādhate veti sūryyamabhi kṛṣṇena rajasā dyāmṛṇoti* //25 //
*hiraṇyahasto'asuraḥ sunīthaḥ sumṛḍīkaḥ svam̐vā yātvarvāṅ* /
*apasedhanūkṣamo yātudhānānasthāddavaḥ pratidoṣaṁ gṛṇānaḥ* //26 //
*ye te panthāḥ savitaḥ pūrvyāso'reṇavaḥ sukṛtā'antarikṣe* /
*tebhirno'adya pathibhiḥ sugebhī rakṣā cha no'adhi cha brūhi deva* //27 //

## ७९३. हैमवर्चिः (Haimavarchiḥ)

१. अग्निः (Agniḥ) - य. (Yv.) १९.११

यदापिपेष मातरं पुत्रः प्रभूदितो धयन्। एतत्तदग्नेऽअनृणो भवाम्यहतौ पितरौ मया ।
सम्पृच स्थ सं मा भद्रेण पृङ्क विपृच स्थ वि मा पाप्मना पृङ्त्त् ॥११॥
*yadāpipeṣa mātaraṁ putraḥ prabhūdito dhayan* /
*etattadagne'anṛṇo bhavāmyahatau pitarau mayā* /
*sampṛcha stha saṁ mā bhadreṇa pṛṅkta vipṛcha stha vi mā pāpmanā pṛṅtt* //11 //

२. अतिथ्यादयो लिंगोक्ताः (Atithyādayo Limgoktāḥ) - य. (Yv.) १९.१४-१५

आतिथ्यरूपं मासरं महावीरस्य नग्नहुः। रूपमुपसदामेतत्तिस्रो रात्रीः सुरासुता ॥१४॥
सोमस्य रूपं क्रीतस्य परिस्रुत्परिषिच्यते। अश्विभ्यां दुग्धं भेषजमिन्द्रायैन्द्रं सरस्वत्या ॥१५॥
*ātithyarūpaṁ māsaraṁ mahāvīrasya nagnahuḥ |*
*rūpamupasadāmetattisro rātrīḥ surāsutā ||14 ||*
*somasya rūpaṁ krītasya parisrutpariṣichyate | aśvibhyāṁ dugdhaṁ*
*bheṣajamindrāyaindraṁ sarasvatyā ||15 ||*

३. इडा (Iḍā) - य. (Yv.) १९.२९

इडाभिर्भक्षानाप्नोति सूक्तवाकेनाशिषः। शंयुना पत्नीसंयाजान्त्समिष्टयजुषा संस्थम् ॥२९॥
*iḍābhirbhakṣānāpnoti sūktavākenāśiṣaḥ |*
*śaṁyunā patnīsaṁyājāntsamiṣṭayajuṣā saṁstham ||29 ||*

४. इन्द्रः (Indraḥ) - य. (Yv.) १९.३२; ३३

सुरावन्तं बर्हिषदं सुवीरं यज्ञं हिन्वन्ति महिषा नमोभिः ।
दधानाः सोमं दिवि देवतासु मदेमेन्द्रं यजमानाः स्वर्काः ॥३२॥
यस्ते रसः सम्भृतऽओषधीषु सोमस्य शुष्मः सुरया सुतस्य ।
तेन जिन्व यजमानं मदेन सरस्वतीमश्विनाविन्द्रमग्निम् ॥३३॥
*surāvantaṁ barhiṣadaṁ suvīraṁ yajñaṁ hinvanti mahiṣā namobhiḥ |*
*dadhānāḥ somaṁ divi devatāsu mademendraṁ yajamānāḥ svarkāḥ ||32 ||*
*yaste rasaḥ sambhṛta'oṣadhīṣu somasya śuṣmaḥ surayā sutasya |*
*tena jinva yajamānaṁ madena sarasvatīmaśvināvindramagnim ||33 ||*

५. गृहपतिः (Gṛhapatiḥ) - य. (Yv.) १९.१८

हविर्धानं यदश्विनाग्नीध्रं यत्सरस्वती। इन्द्रायैन्द्रं सदस्कृतं पत्नीशालं गार्हपत्यः ॥१८॥
*havirdhānaṁ yadaśvināgnīdhraṁ yatsarasvatī |*
*indrāyaindraṁ sadaskṛtaṁ patnīśālaṁ gārhapatyaḥ ||18 ||*

६. यजमानः (Yajamānaḥ) - य. (Yv.) १९.२०

पशुभिः पशूनाप्नोति पुरोडाशैर्हवींष्या। छन्दोभिः सामिधेनीर्याजयाभिर्वषट्कारान् ॥२०॥
*paśubhiḥ paśūnāpnoti puroḍāśairhavīāṁṣyā |*
*chhandobhiḥ sāmidhenīryājayābhirvaṣaṭkārān ||20 ||*

७. यज्ञः (Yajñaḥ) - य. (Yv.) १९.१३; १६-१७; १९; २२; २६-२८; ३०; ३१

य. (Yv.) १९.१३

दीक्षायै रूपं शष्पाणि प्रायणीयस्य तोक्मानि ।
क्रयस्य रूपं सोमस्य लाजाः सोमांशवो मधु ॥१३॥
*dīkṣāyai rūpaṁ śaṣpāṇi prāyaṇīyasya tokmāni |*
*krayasya rūpaṁ somasya lājāḥ somāṁśavo madhu ||13 ||*

य. (Yv.) १९.१६-१७

आसन्दी रूपं राजासन्द्यै वेद्यै कुम्भी सुराधानी। अन्तरऽउत्तरवेद्या रूपं कारोतरो भिषक् ॥१६॥
वेद्या वेदिः समाप्यते बर्हिषा बर्हिरिन्द्रियम्। यूपेन यूपऽआप्यते प्रणीतोऽअग्निरग्निा ॥१७॥
*āsandī rūpaṁ rājāsandyai vedyai kumbhī surādhānī |*
*antara'uttaravedyā rūpaṁ kārotaro bhiṣak ||16 ||*
*vedyā vediḥ samāpyate barhiṣā barhirindriyam |*
*yūpena yūpa'āpyate praṇīto'agniragniā ||17 ||*

य. (Yv.) १९.१९

प्रौषेभिः प्रैषानाप्नोत्याप्रीभिराप्रीर्यज्ञस्य। प्रयाजेभिरनुयाजान्वष्कारेभिराहुतीः ॥१९॥
*prauṣebhiḥ praiṣānāpnotyāprībhirāprīryajñasya |*
*prayājebhiranuyājānvaṣṭkārebhirāhutīḥ ||19 ||*

य. (Yv.) १९.२२

धानानांरूपं कुवलं परीवापस्य गोधूमाः। सक्तूनां रूपं बदरमुपवाकाः करम्भस्य ॥२२॥

*dhānānāṁrūpaṁ kuvalaṁ parīvāpasya godhūmāḥ |*
*saktūnāṁ rūpaṁ badaramupavākāḥ karambhasya ||22 ||*

य. (Yv.) १९.२६-२८

अश्विभ्यां प्रातः सवनमिन्द्रेणैन्द्रं माध्यन्दिनम्। वैश्वदेवं सरस्वत्या तृतीयमाप्तं सवनम् ॥२६॥
वायव्यैर्वायव्यान्याप्नोति सतेन द्रोणकलशम्।
कुम्भीभ्यामम्भृणौ सुते स्थालीभि सथालीराप्नोति ॥२७॥
यजुर्भिराप्यन्ते ग्रहा ग्रहै स्तोमाश्च विष्टुतीः। छन्दोभिरुक्थाशस्त्राणि साम्नावभृथऽआप्यते ॥२८॥
*aśvibhyāṁ prātaḥ savanamindreṇaindraṁ mādhyandinam |*
*vaiśvadevaṁ sarasvatyā tṛtīyamāptaṁ savanam ||26 ||*
*vāyavyairvāyavyānyāpnoti satena droṇakalaśam |*
*kumbhībhyāmabhbhṛṇau sute sthālībhi sathālīrāpnoti ||27 ||*
*yajurbhirāpyante grahā grahai stomāścha viṣṭutīḥ |*
*chhandobhirukthāśastrāṇi sāmnāvabhṛtha'āpyate ||28 ||*

य. (Yv.) १९.३०-३१

व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम्। दक्षिणा श्रद्धामाप्नोति श्रद्धयां सत्यमाप्यते ॥३०॥
एतावद्रूपं यज्ञस्य यद्देवैर्ब्रह्मणा कृतम्। तदेतत्सर्वमाप्नोति यज्ञे सौत्रामणी सुते ॥३१॥
*vratena dīkṣāmāpnoti dīkṣayāpnoti dakṣiṇām |*
*dakṣiṇā śraddhāmāpnoti śraddhayāṁ satyamāpyate ||30 ||*
*etāvadrūpaṁ yajñasya yaddevairbrahmaṇā kṛtam |*
*tadetatsarvamāpnoti yajñe sautrāmaṇī sute ||31 ||*

८. विद्वान् (Vidvān) - य. (Yv.) १९.२४

आ श्रावयेति स्तोत्रियाः प्रतयाश्रावोऽअनुरूपः। यजेति धाय्यारूपं प्रागाथा ये यजामहाः ॥२४॥
*ā śrāvayeti stotriyāḥ pratayāśrāvo'anurūpaḥ |*
*yajeti dhāyyārūpaṁ prāgāthā ye yajāmahāḥ ||24 ||*

९. विद्वांसः (Vidvāṁsaḥ) - य. (Yv.) १९.१२

देवा यज्ञमतन्वत भेषजं भिषजाश्विना। वाचा सरस्वती भिषगिन्द्रायेन्द्रियाणि दधतः ॥१२॥
*devā yajñamatanvata bheṣajaṁ bhiṣajāśvinā |*
*vāchā sarasvatī bhiṣagindrāyendriyāṇi dadhataḥ ||12 ||*

**७९४. ऋषि? (Ṛṣi ?)**

१. इन्द्रः (Indraḥ) - सा. (Sv.) १८६४; १८६५; १८६९

सा. (Sv.) १८६४

कंकाः सुपर्णा अनु यन्त्वेनान् गृध्राणामन्नमसावस्तु सेना ।
मैषां मोच्यघहारश्च नेन्द्र वयांस्येनाननुसंयन्तु सर्वान् ॥१॥
*kaṁkāḥ suparṇā anu yantvenān gṛdhrāāṇāmannamasāvastu senā |*
*maiṣāṁ mochyaghahāraścha nendra vayāṁsyenānanusaṁyantu sarvān ||1 ||*

सा. (Sv.) १८६५

अमित्रसेनां मघवन्नस्मां छत्रुयतीमभि। उभौ तामिन्द्र वृत्रहन्नग्निश्च दहतं प्रति ॥२॥
*amitrasenāṁ maghavannasmāṁ chhatruyatīmabhi |*
*ubhau tāmindra vṛtrahannagniścha dahataṁ prati ||2 ||*

सा. (Sv.) १८६९

इन्द्रस्य बाहू स्थविरौ युवानावनाधृष्यौ सुप्रतीकावसह्यौ ।
तौ युंजीत प्रथमौ योग आगते याभ्यां जितमसुराणां सहो महत् ॥३॥
*indrasya bāhū sthavirau yuvānāvanādhṛṣyau supratīkāvasahyau |*
*tau yuṁjīta prathamau yoga āgate yābhyāṁ jitamasurāṇāṁ saho mahat ||3 ||*

२. देवता ?- सा. (Sv.) १७०८-१७१०

सा. (Sv.) १७०८-१७१०

ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम्। अजस्रं घर्ममीमहे ॥१॥

य इदं प्रतिपप्रथे यज्ञस्य स्वरुत्तिरन्। ऋतूनुत्सृजते वशी ॥२॥
अग्निः प्रियेषु धामसु कामो भूतस्य भव्यस्य। सम्राडेको विराजति ॥३॥
*ṛtāvānaṁ vaiśvānaramṛtasya jyotiṣaspatim | ajasraṁ gharmamīmahe ||1 ||*
*ya idaṁ pratipaprathe yajñasya svaruttiran | ṛtūnutsṛjate vaśī ||2 ||*
*agniḥ priyeṣu dhāmasu kāmo bhūtasya bhavyasya | samrāḍeko virājati ||3 ||*

**७९५. ऋषि-? (Ṛṣi ?)**

१. अग्निः (Agniḥ) - अ. (Av.) २०.२.२

अग्निराग्नीध्रात् सुष्टुभः स्वर्कादृतुना सोमं पिबतु ॥२॥
*agnirāgnīdhrāt suṣṭubhaḥ svarkādṛtunā somaṁ pibatu ||2 ||*

२. इन्द्रः (Indraḥ) - अ. (Av.) २०.२.३; २०.४९.१-३

अ. (Av.) २०.२.३

इन्द्रो ब्रह्मा ब्राह्मणात् सुष्टुभः स्वर्कादृतुना सोमं पिबतु ॥३॥
*indro brahmā brāhmaṇāt suṣṭubhaḥ svarkādṛtunā somaṁ pibatu ||3 ||*

अ. (Av.) २०.४९.१-३

यच्छक्रा वाचमारुहन्नन्तरिक्षं सिषासथः। सं देवा अमदन् वृषा ॥१॥
शक्रो वाचमधृष्टायोरुवाचो अधृष्णुहि। मंहिष्ठ आ मदर्दिवि ॥२॥
शक्रो वाचमधृष्णुहि धामधर्मन् वि राजति। विमदन् बर्हिरासरन् ॥३॥
*yachchhakrā vāchamāruhannantarikṣaṁ siṣāsathaḥ | saṁ devā amadan vṛṣā ||1 ||*
*śakro vāchamadhṛṣṭāyoruvācho adhṛṣṇuhi | maṁhiṣṭha ā madardivi ||2 ||*
*śakro vāchamadhṛṣṇuhi dhāmadharman vi rājati | vimadan barhirāsaran ||3 ||*

३. द्रविणोदा - अ. (Av.) २०.२.४

देवोद्रविणोदाः पोत्रात् सुष्टुभः स्वर्कादृतुना सोमं पिबतु ॥४॥
*devodraviṇodāḥ potrāt suṣṭubhaḥ svarkādṛtunā somaṁ pibatu ||4 ||*

४. मरुतः (Marutaḥ) - अ. (Av.) २०.२.१

मरुतः पोत्रात् सुष्टुभः स्वर्कादृतुना सोमं पिबतु ॥१॥
*marutaḥ potrāt suṣṭubhaḥ svarkādṛtunā somaṁ pibatu ||1 ||*

५. यज्ञः (Yajñaḥ) - अ. (Av.) १९.१.१-३ (ऋषि ब्रह्मा)

सं सं स्रवन्तु सिन्धवः सं वाताः सं पतत्रिणः।
यज्ञमिमं वर्धयता गिरः संस्राव्येण हविषा जुहोमि ॥१॥
इमं होमा यज्ञमवतेमं संस्रावणा उत ।
यज्ञमिमं वर्धयता गिरः संस्राव्येण हविषा जुहोमि ॥२॥
रूपंरूपं वयोवयः संरभ्यैनं परि ष्वजे ।
यज्ञमिमं चतस्रः प्रदिशो वर्धयन्तु संस्राव्येण हविषा जुहोमि ॥३॥
*saṁ saṁ sravantu sindhavaḥ saṁ vātāḥ saṁ patatriṇaḥ |*
*yajñamimaṁ vardhayatā giraḥ saṁsrāvyeṇa haviṣā juhomi ||1 ||*
*imaṁ homā yajñamavatemaṁ saṁsrāvaṇā uta |*
*yajñamimaṁ vardhayatā giraḥ saṁsrāvyeṇa haviṣā juhomi ||2 ||*
*rūpaṁrūpaṁ vayovayaḥ saṁrabhyainaṁ pari ṣvaje |*
*yajñamimaṁ chatasraḥ pradiśo vardhayantu saṁsrāvyeṇa haviṣā juhomi ||3 ||*

**७९६. ऋषि-? (Ṛṣi ?)**

१. देवता ? - अ. (Av.) २०.४८.१-३; २०.१२७.१-१४; २०.१२८.१-१६; २०.१२९.१-२०; २०.१३०.१-२०; २०.१३१.१-२०; २०.१३२.१-१६; २०.१३४.१-६; २०.१३५.१-१३; २०.१३६.१-१६

अ. (Av.) २०.४८.१-३

अभि त्वा वर्चसा गिरः सिंचन्तीराचरण्यवः। अभि वत्सं न धेनवः ॥१॥
ता अर्षन्ति शुभ्रियः पृंचन्तीर्वर्चसा प्रियः। जातं जात्रीर्यथा हृदा ॥२॥
वज्रापवसाध्यः कीर्तिर्म्रियमाणमावहन्। मह्यमायुर्घृतं पयः ॥३॥

*abhi tvā varchasā giraḥ siṁchantīrācharaṇyavaḥ ।*
*abhi vatsaṁ na dhenavaḥ ॥1 ॥*
*tā arṣanti śubhriyaḥ pṛṁchantīrvarchasā priyaḥ ।*
*jātaṁ jātrīryathā hṛdā ॥2 ॥*
*vajrāpavasādhyaḥ kīrtirmriyamāṇamāvahan ।*
*mahyamāyurghṛtaṁ payaḥ ॥3 ॥*

अ. (Av.) २०.१२७.१-१४

इदं जना उप श्रुत नराशंस स्तविष्यते। षष्टिं सहस्रा नवतिं च कौरम आ रुशमेषु दद्महे ॥१॥
उष्ट्रा यस्य प्रवाहणो वधूमन्तो द्विर्दश । वर्ष्मा रथस्य नि जिहीडते दिव ईषमाणा उपस्पृशः ॥२॥
एष इषाय मामहे शतं निष्कान् दश स्रजः। त्रीणि शतान्यर्वतां सहस्रा दश गोनाम् ॥३॥
वच्यस्व रेभ वच्यस्व वृक्षे न पक्वे शकुनः । नष्टे जिह्वा चर्चरीति क्षुरो न भुरिजोरिव ॥४॥
प्र रेभासो मनीषा वृषा गावइवेरते । अमोतपुत्रका एषाममोत गाइवासते ॥५॥
प्र रेभ धीं भरस्व गोविदं वसुविदम् । देवत्रेमां वाचं श्रीणीहीषुर्नावीरस्तारम् ॥६॥
राज्ञो विश्वजनीनस्य यो देवोऽमर्त्याँ अति । वैश्वानरस्य सुष्टुतिमा सुनोता परिक्षितः ॥७॥
परिच्छिन्नः क्षेममकरोत् तम आसनमाचरन् । कुलायन् कृण्वन् कौरव्यः पतिर्वदति जायया ॥८॥
कतरत् त आ हराणि दधि मन्थां परि श्रुतम्। जायाः पतिं वि पृच्छति राष्ट्रे राज्ञः परिक्षित ॥९॥
अभीवस्वः प्र जिहीते यवः पक्वःपरो बिलम् । जनः स भद्रमेधते राष्ट्रे राज्ञः परिक्षितः ॥१०॥
इन्द्रः कारुमबूबुधदुत्तिष्ठ वि चरा जनम् । ममेदुग्रस्य चर्कृधि सर्व इत् ते पृणादरिः ॥११॥
इह गावः प्रजायध्वमिहाश्वा इह पूरुषाः। इहो सहस्रदक्षिणेऽपि पूषा नि षीदति ॥१२॥
नेमा इन्द्र गावो रिषन् मो आसां गोपती रिषत् मासाममित्रयुर्जन इन्द्र मा स्तेन ईशत ॥१३॥
उप नो रमसि सूक्तेन वचसा वयं भद्रेण वचसा वयम् ।
वनादधिध्वनो गिरो न रिष्येम कदा चन ॥१४॥

*idaṁ janā upa śruta narāśaṁsa staviṣyate ।*
*ṣaṣṭiṁ sahasrā navatiṁ cha kaurama ā ruśameṣu dadmahe ॥1 ॥*
*uṣṭrā yasya pravāhaṇo vadhūmanto dvirdaśa ।*
*varṣmā rathasya ni jihīḍate diva īṣamāṇā upaspṛśaḥ ॥2 ॥*
*eṣa iṣāya māmahe śataṁ niṣkān daśa srajaḥ ।*
*trīṇi śatānyarvatāṁ sahasrā daśa gonām ॥3 ॥*
*vachyasva rebha vachyasva vṛkṣe na pakve śakunaḥ ।*
*naṣṭe jihvā charcharīti kṣuro na bhurijoriva ॥4 ॥*
*pra rebhāso manīṣā vṛṣā gāvaiverate ।*
*amotaputrakā eṣāmamota gāivāsate ॥5 ॥*
*pra rebha dhīṁ bharasva govidaṁ vasuvidam ।*
*devatremāṁ vāchaṁ śrīṇīhīṣurnāvīrastāram ॥6 ॥*
*rājño viśvajanīnasya yeā devo'matyām̐ ati ।*
*vaiśvānarasya suṣṭutimā sunotā parikṣitaḥ ॥7 ॥*
*parichchhinnaḥ kṣemamakarot tama āsanamācharan ।*
*kulāyan kṛṇvan kauravyaḥ patirvadati jāyayā ॥8 ॥*
*katarat ta ā harāṇi dadhi manthāṁ pari śrutam ।*
*jāyāḥ patiṁ vi pṛchchhati rāṣtre rājñaḥ parikṣita ॥9 ॥*
*abhīvasvaḥ pra jihīte yavaḥ pakvaḥparo bilam ।*
*janaḥ sa bhadramedhate rāṣṭre rājñaḥ parikṣitaḥ ॥10 ॥*
*indraḥ kārumabūbudhaduttiṣṭha vi charā janam ।*
*mamedugrasya charkṛdhi sarva it te pṛṇādariḥ ॥11 ॥*
*iha gāvaḥ prajāyadhvamihāśvā iha pūruṣāḥ ।*
*iho sahasradakṣiṇe'pi pūṣā ni ṣīdati ॥12 ॥*
*nemā indra gāvo riṣan mo āsāṁ gopatī riṣat māsāmamitrayurjana indra mā stena īśata ॥13 ॥*
*upa no ramasi sūktena vachasā vayaṁ bhadreṇa vachasā vayam ।*
*vanādadhidhvano giro na riṣyema kadā chana ॥14 ॥*

अ. (Av.) २०.१२८.१-१६

यः सभेयो विदथ्यः सुत्वा यज्वाथ पूरुषः। सूर्यं चामू रिशादसस्तद् देवाः प्रागकल्पयन् ॥१॥
यो जाम्या अप्रथयस्तद् यत् सखायं दुधूर्षति। ज्येष्ठो यदप्रचेतास्तदाहुरधरागिति ॥२॥
यद् भद्रस्य पुरुषस्य पुत्रो भवति दाधृषिः। तद् विप्रो अब्रवीदु तद् गन्धर्वः काम्यं वचः ॥३॥
यश्च पणि रघुजिष्ठ्यो यश्च देवाँ अदाशुरिः। धीराणां शश्वतामहं तदपागिति शुश्रुम ॥४॥
ये च देवा अयजन्ताथो ये च परादादिः। सूर्यो दिवमिव गत्वाय मघवा नो वि रप्शते ॥५॥
योऽनाक्ताक्षो अनभ्यक्तो अमणिवो अहिरण्यवः। अब्रह्मा ब्रह्मणः पुत्रस्तोता कल्पेषु संमिता ॥६॥
य आक्ताक्षः सुभ्यक्तः सुमणिः सुहिरण्यवः। सुब्रह्मा ब्रह्मणः पुत्रस्तोता कल्पेषु संमिता ॥७॥
अप्रपाणा च वेशन्ता रेवाँ अप्रतिदिश्ययः। अयभ्या कन्या कल्याणी तोता कल्पेषु संमिता ॥८॥
सुप्रपाणा च वेशन्ता रेवान्र्सुप्रतिदिश्ययः। सुयभ्या कन्या कल्याणी तोता कल्पेषु संमिता ॥९॥
परिवृक्ता च महिषी स्वस्त्या च युधिंगमः। अनाशुरश्चायामी तोता कल्पेषु संमिताः ॥१०॥
वावाता च महिषी स्वस्त्या च युधिंगमः। श्वाशुरश्चायामी तोता कल्पेषु संमिता ॥११॥
यदिन्द्रादो दाशराज्ञे मानुषं वि गाहथाः। विरूपः सर्वस्मा आसीत् सह यक्षाय कल्पते ॥१२॥
त्वं वृषाक्षुं मघवन्नम्रं मर्याकरो रविः। त्वं रौहिणं व्यास्यो वि वृत्रस्याभिनच्छिरः ॥१३॥
यः पर्वतान् व्यदधाद् यो अपो व्यगाहथाः। इन्द्रो यो वृत्रहान्महं तस्मादिन्द्र नमोऽस्तु ते ॥१४॥
पृष्ठं धावन्तं हर्योरौच्चैःश्रवसमब्रुवन् । स्वस्त्यश्व जैत्रायेन्द्रमा वह सुस्रजम् ॥१५॥
ये त्वा श्वेता अजैश्रवसो हार्यो युंजन्ति दक्षिणम्। पूर्वा नमस्य देवानां बिभ्रदिन्द्र महीयते ॥१६॥

*yaḥ sabheyo vidathyaḥ sutvā yajvātha pūruṣaḥ |*
*sūryaṁ chāmū riśādasastad devāḥ prāgakalpayan ||1 ||*
*yo jāmyā aprathayastad yat sakhāyaṁ dudhūrṣati |*
*jyeṣṭho yadaprachetāstadāhuradharāgiti ||2 ||*
*yad bhadrasya puruṣasya putro bhavati dādhṛṣiḥ |*
*tad vipro abravīdu tad gandharvaḥ kāmyaṁ vachaḥ ||3 ||*
*yaścha paṇi raghujiṣṭhyo yaścha devām̐ adāśuriḥ |*
*dhīrāṇāṁ śaśvatāmahaṁ tadapāgiti śuśruma ||4 ||*
*ye cha devā ayajantātho ye cha parādadiḥ |*
*sūryo divamiva gatvāya maghavā no vi rapśate ||5 ||*
*yo'nāktākṣo anabhyakto amaṇivo ahiraṇyavaḥ |*
*abrahmā brahmaṇaḥ putrastotā kalpeṣu saṁmitā ||6 ||*
*ya āktākṣaḥ subhyaktaḥ sumaṇiḥ suhiraṇyavaḥ |*
*subrahmā brahmaṇaḥ putrastotā kalpeṣu saṁmitā ||7 ||*
*aprapāṇā cha veśantā revām̐ apratidiśyayaḥ |*
*ayabhyā kanyā kalyāṇī totā kalpeṣu saṁmitā ||8 ||*
*suprapāṇā cha veśantā revārnsupratidiśyayaḥ |*
*suyabhyā kanyā kalyāṇī totā kalpeṣu saṁmitā ||9 ||*
*parivṛktā cha mahiṣī svastyā cha yudhiṁgamaḥ |*
*anāśuraśchāyāmī totā kalpeṣu saṁmitāḥ ||10 ||*
*vāvātā cha mahiṣī svastyā cha yudhiṁgamaḥ |*
*śvāśuraśchāyāmī totā kalpeṣu saṁmitā ||11 ||*
*yadindrādo dāśarājñe mānuṣaṁ vi gāhathāḥ |*
*virūpaḥ sarvasmā āsīt saha yakṣāya kalpate ||12 ||*
*tvaṁ vṛṣākṣuṁ maghavannamraṁ maryākaro raviḥ |*
*tvaṁ rauhiṇaṁ vyāsyo vi vṛtrasyābhinachchhiraḥ ||13 ||*
*yaḥ parvatān vyadadhād yo apo vyagāhathāḥ |*
*indro yo vṛtrahānmahaṁ tasmādindra namo'stu te ||14 ||*
*pṛṣṭhaṁ dhāvantaṁ haryorauchchaiḥśravasamabruvan |*
*svastyaśva jaitrāyendramā vaha susrajam ||15 ||*
*ye tvā śvavetā ajaiśravaso hāryo yuṁjanti dakṣiṇam |*
*pūrvā namasya devānāṁ bibhradindra mahīyate ||16 ||*

अ. (Av.) २०.१२९.१-२०

एता अश्वा आ प्लवन्ते ॥१॥

प्रतीपं प्राति सुत्वनम् ॥२॥
तासामेका हरिक्निका ॥३॥
हरिक्निके किमिच्छसि ॥४॥
साधुं पुत्रं हिरण्ययम् ॥५॥
क्वाहतं परास्यः ॥६॥
यत्रामूस्तिस्रः शिंशपाः ॥७॥
परि त्रयः ॥८॥
पृदाकवः ॥९॥
श्रृंग धमन्त आसते ॥१०॥
अयन्महा ते अर्वाहः ॥११॥
स इच्छकं सघाघते ॥१२॥
सघाघते गोमीद्या गोगतीरिति ॥१३॥
पुमां कुस्ते निमिच्छसि ॥१४॥
पल्प बद्ध वयो इति ॥१५॥
बद्ध वो अघा इति ॥१६॥
अजागार केविका ॥१७॥
अश्वस्य वारो गोशपद्यके ॥१८॥
श्येनीपती सा ॥१९॥
अनामयोपजिह्विका ।२०॥
*etā aśvā ā plavante ॥1॥*
*pratīpaṁ prāti sutvanam ॥2॥*
*tāsāmekā hariknikā ॥3॥*
*harikniке kimichchhasi ॥4॥*
*sādhuṁ putraṁ hiraṇyayam ॥5॥*
*kvāhataṁ parāsyaḥ ॥6॥*
*yatrāmūstisraḥ śiṁśapāḥ ॥7॥*
*pari trayaḥ ॥8॥*
*pṛdākavaḥ ॥9॥*
*śṛṁga dhamanta āsate ॥10॥*
*ayanmahā te arvāhaḥ ॥11॥*
*sa ichchhakaṁ saghāghate ॥12॥*
*saghāghate gomīdyā gogatīriti ॥13॥*
*pumāṁ kuste nimichchhasi ॥14॥*
*palpa baddha vayo iti ॥15॥*
*baddha vo aghā iti ॥16॥*
*ajāgāra kevikā ॥17॥*
*aśvasya vāro gośapadyake ॥18॥*
*śyenīpatī sā ॥19॥*
*anāmayopajihvikā ।20॥*

अ. (Av.) २०.१३०.१-२०

को अर्य बहुलिमा इषूनि ॥१॥
को असिद्याः पयः ॥२॥
को अर्जुन्याः पयः ॥३॥
कः कार्ष्ण्याः पयः ॥४॥
एतं पृच्छ कुहं पृच्छ ॥५॥
कुहाकं पक्वकं पृच्छ ॥६॥
यवानो यतिस्वभिः कुभिः ॥७॥
अकुप्यन्तः कुपायकुः ॥८॥
आमणको मणत्सकः ॥९॥
देव त्वप्रतिसूर्य ॥१०॥

एनश्चिपङ्क्तिका हविः ॥११॥
प्रदुद्रुदो मघाप्रति ॥१२॥
श्रृंग उत्पन्नः ॥१३॥
मा त्वाभि सखा नो विदन् ॥१४॥
वशायाः पुत्रमा यन्ति ॥१५॥
इरावेदुमयं दत ॥१६॥
अथो इयन्नियन्निति ॥१७॥
अथो इयन्निति ॥१८॥
अथो श्वा अस्थिरो भवन् ॥१९॥
उयं यकांशलोकका ॥२०॥
*ko arya bahulimā iṣūni* //1 //
*ko asidyāḥ payaḥ* //2 //
*ko arjunyāḥ payaḥ* //3 //
*kaḥ kārṣṇyāḥ payaḥ* //4 //
*etaṁ pṛchchha kuhaṁ pṛchchha* //5 //
*kuhākaṁ pakvakaṁ pṛchchha* //6 //
*yavāno yatisvabhiḥ kubhiḥ* //7 //
*akupyantaḥ kupāyakuḥ* //8 //
*āmaṇako maṇatsakaḥ* //9 //
*deva tvapratisūrya* //10 //
*enaśchipaṅktikā haviḥ* //11 //
*pradudrudo maghāprati* //12 //
*śṛṁga utpannaḥ* //13 //
*mā tvābhi sakhā no vidan* //14 //
*vaśāyāḥ putramā yanti* //15 //
*irāvedumayaṁ data* //16 //
*atho iyanniyanniti* //17 //
*atho iyanniti* //18 //
*atho śvā asthiro bhavan* //19 //
*uyaṁ yakāṁśalokakā* //20 //

अ. (Av.) २०.१३१.१-२०

आमिनोनिति भद्यते ॥१॥
तस्य अनु निभंजनम् ॥२॥
वरुणो याति वस्वभिः ॥३॥
शतं वा भारती शवः ॥४॥
शतमाश्वा हिरण्ययाः । शतं रथ्या हिरण्ययाः । शतं कुथा हिरण्ययाः ।
शतं निष्का हिरण्ययाः ॥५॥
अहल कुश वर्त्तक ॥६॥
शफेनइव ओहते ॥७॥
आय वनेनती जनी ॥८॥
वनिष्ठा नाव गृह्यन्ति ॥९॥
इदं मह्यं मदूरिति ॥१०॥
ते वृक्षाः सह तिष्ठति ॥११॥
पाक बलिः ॥१२॥
शक बलिः ॥१३॥
अश्वत्थ खदिरो धवः ॥१४॥
अरदुपरम ॥१५॥
शयो हतइव ॥१६॥
व्याप पूरुषः ॥१७॥
अदूहमित्यां पूषकम् ॥१८॥

अत्यर्धर्च परस्वतः ॥१९॥
दौव हस्तिनो दृती ॥२०॥
*āminoniti bhadyate ॥1॥*
*tasya anu nibhaṁjanam ॥2॥*
*varuṇo yāti vasvabhiḥ ॥3॥*
*śataṁ vā bhāratī śavaḥ ॥4॥*
*śatamāśvā hiraṇyayāḥ । śataṁ rathyā hiraṇyayāḥ । śataṁ kuthā hiraṇyayāḥ ।*
*śataṁ niṣkā hiraṇyayāḥ ॥5॥*
*ahala kuśa varttaka ॥6॥*
*śaphenaiva ohate ॥7॥*
*āya vanenatī janī ॥8॥*
*vaniṣṭhā nāva gṛhyanti ॥9॥*
*idaṁ mahyaṁ madūriti ॥10॥*
*te vṛkṣāḥ saha tiṣṭhati ॥11॥*
*pāka baliḥ ॥12॥*
*śaka baliḥ ॥13॥*
*aśvattha khadiro dhavaḥ ॥14॥*
*araduparama ॥15॥*
*śayo hataiva ॥16॥*
*vyāpa pūruṣaḥ ॥17॥*
*adūhamityāṁ pūṣakam ॥18॥*
*atyardharcha parasvataḥ ॥19॥*
*dauva hastino dṛtī ॥20॥*

अ. (Av.) २०.१३२.१-१६

आदलाबुकमेककम् ॥१॥
अलाबुकं निखातकम् ॥२॥
कर्करिको निखातकः ॥३॥
तद् वात उन्मथायति ॥४॥
कुलायं कृणवादिति ॥५॥
उग्रं वनिषदाततम् ॥६॥
न वनिषदनाततम् ॥७॥
क एषां कर्करी लिखत् ॥८॥
क एषां दुन्दुभि हनत् ॥९॥
यदीयं हनत् कथं हनत् ॥१०॥
देवी हनत् कुहनत् ॥११॥
पर्यागारं पुनःपुनः ॥१२॥
त्रीण्युष्ट्रस्य नामानि ॥१३॥
हिरण्य इत्येके अब्रवीत् ॥१४॥
द्वौ वा ये शिशवः ॥१५॥
नीलशिखण्डवाहनः ॥१६॥
*ādalābukamekakam ॥1॥*
*alābukaṁ nikhātakam ॥2॥*
*karkariko nikhātakaḥ ॥3॥*
*tad vāta unmathāyati ॥4॥*
*kulāyaṁ kṛṇavāditi ॥5॥*
*ugraṁ vaniṣadātatam ॥6॥*
*na vaniṣadanātatam ॥7॥*
*ka eṣāṁ karkarī likhat ॥8॥*
*ka eṣāṁ dundubhi hanat ॥9॥*
*yadīyaṁ hanat kathaṁ hanat ॥10॥*
*devī hanat kuhanat ॥11॥*
*paryāgāraṁ punaḥpunaḥ ॥12॥*

*trīṇyuṣṭrasya nāmāni //13 //*
*hiraṇya ityeke abravīt //14 //*
*dvau vā ye śiśavaḥ //15 //*
*nīlaśikhaṇḍavāhanaḥ //16 //*

अ. (Av.) २०.१३४.१-६

इहेत्थ प्रागपागुदगधराग्-अरालागुदभर्त्सथ ॥१॥
इहेत्थ प्रागपागुदगधराग्-वत्साः पुरुषन्त आसते ॥२॥
इहेत्थ प्रागपागुदगधराग्-स्थालीपको वि लीयते ॥३॥
इहेत्थ प्रागपागुदगधराग्-स वै पृथु लीयते ॥४॥
इहेत्थ प्रागपागुदगधराग्-आष्टे लाहणि लीशाथी ॥५॥
इहेत्थ प्रागपागुदगधराग्-अक्ष्लिली पुच्छिलीयते ॥६॥
*ihettha prāgapāgudagadharāg-arālāgudabhartsatha //1 //*
*ihettha prāgapāgudagadharāg-vatsāḥ puruṣanta āsate //2 //*
*ihettha prāgapāgudagadharāg-sthālīpako vi līyate //3 //*
*ihettha prāgapāgudagadharāg-sa vai pṛthu līyate //4 //*
*ihettha prāgapāgudagadharāg-āṣṭe lāhaṇi līśāthī //5 //*
*ihettha prāgapāgudagadharāg-akṣalilī puchchhilīyate //6 //*

अ. (Av.) २०.१३५.१-१३

भुगित्यभिगतः शलित्यपक्रान्तः फलित्यभिष्ठितः। दुन्दुभिमाहननाभ्यां जरितरोऽथामो दैव ॥१॥
कोशबिले रजनि ग्रन्थेर्धानमुपानहि पादम्। उत्तमां जरिमां जन्यानुत्तमां जनीन् वर्त्मन्यात् ॥२॥
अलाबूनि पृषातकान्यश्वत्थपलाशम्।
पिपीलिकावटश्वसो विद्युत्स्वापर्णशफो गोशफो जरितरोऽथामो दैव ॥३॥
वी मे देवा अक्रंसताध्वर्यो क्षिप्रं प्रचर। सुसत्यमिद् गवामस्यसि प्रखुदसि ॥४॥
पत्नी यद्दृश्यते पत्नी यक्ष्यमाणा जरितारोऽथामो दैव। होता विष्टीमेन जरितरोऽथामो दैव ॥५॥
आदित्या ह जरितरंगिरोभ्यो दक्षिणामनयन्। तां ह जरितः प्रत्यायंस्तामु ह जरितःप्रतयायन् ।६।
तां ह जरितर्नः प्रतयगृभ्णांस्तामु ह जरितर्नः प्रत्यगृभ्णः ।
अहानेतरसं न वि चेतनानि यज्ञानेतरसं न पुरोगवामः ॥७॥
उत श्वेत आशुपत्वा उतो पद्याभिर्यविष्ठः। उतेमाशु मानं पिपर्ति ॥८॥
आदित्या रुद्रा वसवस्त्वेनु त इदं राधः प्रति गृभ्णीह्यंगिरः ।
इदं राधो विभु प्रभु इदं राधो बृहत् पृथु ॥९॥
देवा ददत्वासुरं तद् वो अस्तु सुचेतनम्। युष्माँ अस्तु दिवेदिवे प्रत्येव गृभायत ॥१०॥
त्वमिन्द्र शर्मरिणा हव्यं पारावतेभ्यः। विप्राय स्तुवते वसुवनि दुरश्रवसे वह ॥११॥
त्वमिन्द्र कपोताय च्छिन्नपक्षाय वंचते। श्यामाकं पक्कं पीलु च वारस्मा अकृणोर्बहुः ॥१२॥
अरंगरो वावदीति त्रेधा वरत्रया। इरामह प्रशंसत्यनिरामप सेधति ॥१३॥
*bhugityabhigataḥ śalityapakrāntaḥ phalityabhiṣṭhitaḥ /*
*dundubhimāhananābhyāṁ jaritaro'thāmo daiva //1 //*
*kośabile rajani grantherdhānamupānahi pādam /*
*uttamāṁ jarimāṁ janyānuttamāṁ janīn vartmanyāt //2 //*
*alābūni pṛṣātakānyaśvatthapalāśam /*
*pipīlikāvaṭaśvaso vidyutsvāparṇaśapho gośapho jaritaro'thāmo daiva //3 //*
*vī me devā akraṁsatādhvaryo kṣipraṁ prachara /*
*susatyamid gavāmasyasi prakhudasi //4 //*
*patnī yadṛśyate patnī yakṣayamāṇā jaritāro'thāmo daiva /*
*hotā viṣṭīmena jaritaro'thāmo daiva //5 //*
*ādityā ha jaritaraṁgirobhyo dakṣiṇāmanayan /*
*tāṁ ha jaritaḥ pratyāyaṁstāmu ha jaritaḥpratayāyan /6 /*
*tāṁ ha jaritarnaḥ pratayagṛbhṇāṁstāmu ha jaritarnaḥ pratyagṛbhṇaḥ /*
*ahānetarasaṁ na vi chetanāni yajñānetarasaṁ na purogavāmaḥ //7 //*
*uta śveta āśupatvā uto padyābhiryaviṣṭhaḥ /*
*utemāśu mānaṁ piparti //8 //*

*ādityā rudrā vasavastvenu ta idaṁ rādhaḥ prati gṛbhṇīhyaṁgiraḥ ।*
*idaṁ rādho vibhu prabhu idaṁ rādho bṛhat pṛthu ॥9॥*
*devā dadatvāsuraṁ tad vo astu suchetanam ।*
*yuṣmām̐ astu divedive pratyeva gṛbhāyata ॥10॥*
*tvamindra śarmariṇā havyaṁ pārāvatebhyaḥ ।*
*viprāya stuvate vasuvani duraśravase vaha ॥11॥*
*tvamindra kapotāya chchhinnapakṣāya vaṁchate ।*
*śyāmākaṁ pakvaṁ pīlu cha vārasmā akṛṇorbahuḥ ॥12॥*
*araṁgaro vāvadīti tredhā varatrayā । irāmaha praśaṁsatyanirāmapa sedhati ॥13॥*

अ. (Av.) २०.१३६.१-१६

यदस्या अंहुभेद्याः कृधु स्थूलमुपातसत् । मुष्काविदस्य एजतो गोशफे शकुलाविव ॥१॥
यदा स्थूलेन पससाणौ मुष्का उपावधीत् । विष्वंचा वस्या वर्धतः सिकतास्वेव गर्दभौ ॥२॥
यदल्पिकास्वल्पिका कर्कन्धूकेव पद्यते । वासन्तिकमिव तेजनं यन्त्यवाताय वित्पति ॥३॥
यद् देवासो ललामगुं प्रविष्टीमिनमाविषुः । सकुला देदिश्यते नारी सत्यस्याक्षिभुवो यथा ॥४॥
महानग्न्यतृप्नद्वि मोक्रददस्थानासरन् । शक्तिकानना स्वचमशकं सक्तु पद्यम ॥५॥
महानग्न्युलखूलमातिक्रामन्त्यब्रवीत् । यथा तव वनस्पते निरघ्नन्ति तथैवेति ॥६॥
महानग्न्युप ब्रूते भ्रष्टोऽथाप्यभूभुवः । यथैव ते वनस्पते पिप्पति तथैवेति ॥७॥
महानग्न्युप ब्रूते भ्रष्टोऽथाप्यभूभुवः । यथा वयो विदाह्य स्वर्गे नमवदह्यते ॥८॥
महानग्न्युप ब्रूते स्वसावेशितं पसः । इत्थं फलस्य वृक्षस्य शूर्पे शूर्पं भजेमहि ॥९॥
महानग्नी कृकवाकं शम्यया परि धावति । अयं न विद्म यो मृगः शीर्ष्णा हरति धणिकाम् ।१०॥
महानग्नी महानग्नं धावन्तमनु धावति । इमास्तदस्य गा रक्ष यभ मामद्ध्यौदनम् ॥११॥
सुदेवस्त्वा महानग्नीर्बबाधते महतः साधु खोदनम् । कुसं पीबरो नवत् ॥१२॥
वशा दग्धामिमाङ्गुरिं प्रसृजतोऽग्रतं परे । महान् वै भद्रो यभ मामद्ध्यौदनम् ॥१३॥
विदेवस्त्वा महानग्नीर्विबाधते महतः साधु खोदनम् ।
कुमारिका पिंगलिका कार्द भस्मा कु धावति ॥१४॥
महान् वै भद्रो बिल्वो महान् भद्र अदुम्बरः । महाँ अभिक्त बाधते महतः साधु खोदनम् ॥१५॥
यः कुमारी पिंगलिका वसन्तं पीबरी लभेत् । तैलकुण्डमिमाङ्गुष्ठं रोदन्तं शुदमुद्धरेत् ॥१६॥

*yadasyā aṁhubhedyāḥ kṛdhu sthūlamupātasat ।*
*muṣkāvidasya ejato gośaphe śakulāviva ॥1॥*
*yadā sthūlena pasasāṇau muṣkā upāvadhīt ।*
*viṣvaṁchā vasyā vardhataḥ sikatāsveva gardabhau ॥2॥*
*yadalpikāsvalpikā karkandhūkeva padyate ।*
*vāsantikamiva tejanaṁ yantyavātāya vitpati ॥3॥*
*yad devāso lalāmaguṁ praviṣṭīminamāviṣuḥ ।*
*sakulā dediśyate nārī satyasyākṣibhuvo yathā ॥4॥*
*mahānagnyatṛpnadvi mokradadasthānāsaran ।*
*śaktikānanā svachamaśakaṁ saktu padyama ॥5॥*
*mahānagnyulakhūlamātikrāmantyabravīt ।*
*yathā tava vanaspate niraghnanti tathaiveti ॥6॥*
*mahānagnyupa brūte bhraṣṭo'thāpyabhūbhuvaḥ ।*
*yathaiva te vanaspate pippati tathaiveti ॥7॥*
*mahānagnyupa brūte bhraṣṭo'thāpyabhūbhuvaḥ ।*
*yathā vayo vidāhya svarge namavadahyate ॥8॥*
*mahānagnyupa brūte svasāveśitaṁ pasaḥ ।*
*itthaṁ phalasya vṛkṣasya śūrpe śūrpaṁ bhajemahi ॥9॥*
*mahānagnī kṛkavākaṁ śamyayā pari dhāvati ।*
*ayaṁ na vidma yo mṛgaḥ śīrṣṇa harati dhaṇikām ।10॥*
*mahānagnī mahānagnaṁ dhāvantamanu dhāvati ।*
*imāstadasya gā rakṣa yabha māmaddhyaudanam ॥11॥*
*sudevastvā mahānagnīrbabādhate mahataḥ sādhu khodanam ।*
*kusaṁ pībaro navat ॥12॥*
*vaśā dagdhāmimāṅguriṁ prasṛjato'grataṁ pare ।*

*mahān vai bhadro yabha māmaddhyaudanam ॥13॥*
*videvastvā mahānagnīrvibādhate mahataḥ sādhu khodanam ।*
*kumārikā piṁgalikā kārda bhasmā ku dhāvati ॥14॥*
*mahān vai bhadro bilvo mahān bhadra adumbaraḥ ।*
*mahām̐ abhikta bādhate mahataḥ sādhu khodanam ॥15॥*
*yaḥ kumārī piṁgalikā vasantaṁ pībarī labhet ।*
*tailakuṇḍamimāṅguṣṭhaṁ rodantaṁ śudamuddharet ॥16॥*